CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ शिवरहस्य दशमांशपूर्वार्ध प्रारंभः॥ ॥

hp1.3

SC-12/1/21

1

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ ॥श्रीशारदायैनमः॥श्रीशिवायगुरवेनमः॥ ॥श्रीशंकरमहादेवायनमः॥ ॥श्रीशिवरहस्यदशमांशपूर्वा
र्धप्रारंभः॥ ॥वेतंडतुंड भवतंसित चंद्रखंड सत्कुंडलीशपरिवेष्टि बृहत्पि चंडं॥शुंडावलीकलितदंतकृतार्घकांड विघ्नाद्रिखंडनमि
दुं प्रणमाम्यखंडं ॥१॥ ॥सूतउवाच॥ ॥जैगीषव्यस्तदाप्राह जितषड्वैरिविक्रमः॥क्रौंचदारणमानस्य तत्पदं शरणं ययौ॥२॥
अर्धेंदुमौलिपादाब्जमोदानंदाब्धिचन्द्रमाः॥तरंगरंगितहृदाशांगसंगाघभंगकः॥३॥तेनैवपृष्टोमुनिनाशिखिविष्ट कथानकं॥समुन्न
सत्सुमनसा फालानननपदांबुजे॥४॥सेनानिपुत्रःसेनानिर्भक्तिशक्तिधरस्तदा॥मुक्तिमार्गमशक्तानां भक्तानांप्राहषण्मुखः॥५॥ ॥
मुनयऊचुः॥ ॥स्वच्छेनापृच्छिकिंतेनमुनिनाशांकरेणहि॥वीरशक्तिधरःस्कंदःसूदिताराति मंडलः॥६॥तस्मैविस्मयदंकिंवास्म
राराति कथानकं॥उक्तवान्सूक्तसरसं भक्तहृत्तापहारकं॥७॥तन्नोवदविशेषेणपूषलोचनसत्कथां॥ ॥सूतउवाच॥ ॥धन्या
यूयंसदामान्याःमहामन्युकथादराः॥शैलकन्यापतेर्नान्याः कथाभवविनाशकाः॥८॥भवतांभवतांभूत्यैभूयोभूयोवदाम्य
हम्॥स्कंदंसेवितमंदारमिंदिरारमणार्चितं॥९॥गणेंद्रवृंदवंद्याङ्घ्रि मावभावविशेषवित्॥ ॥जैगीषव्यउवाच॥ ॥अपर्णाव
क्त्रपाथोजविकाशनदिवाकर॥शूरतारकसंहार स्मरमारप्रियार्चक॥१०॥विशिष्टशिष्टभक्तेष्ट सिध्यष्टकवरप्रद॥विशिष्टध
र्मा नाचक्ष्व चक्षुश्श्रोत्रप्रियस्यहि॥११॥किंवाप्रसादजनकं शंभोरंभोदवाहिनः॥केषुस्थानेषु वसतां तुष्यत्येवमहेश्वरः॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्यार्चनेन मुक्तिस्याद्वेदोक्तेर्भजनं हि कः ॥ धृतेन केन भगवान् भक्तमुक्तिं प्रयच्छति ॥१३॥ त्रियंबकोंबिकानाथः कथं नाथय
ति प्रजाः ॥ एतन्मे कौतुकं हृद्यं त्वदुक्त्या साधयाम्यहम् ॥१४॥ महर्षे सह्यापगाजानिस्मुद्भवगराशिनः ॥ कथा कथय सानंदं पृच्छ
ते छिन्नचेतसे ॥१५॥ ॥सूत उवाच॥ ॥स्कन्दस्तत्सूक्तिमाधुर्यवचोवीचीप्रहर्षितः ॥ उवाच हिमांशुवदनो मदनारातिसुप्रजाः
॥१६॥ शांगं तं मुनिमालिंग्य भुजंगाभरणप्रियाः ॥ कथाश्च कथयन्नस्मै देव्यै देवेन कीर्तिताः ॥१७॥ ता एव वोवदाम्य स्कंदेना
नंददायिना ॥ जैगीषव्याय मुनये याः प्रोक्ताः श्रुतिदर्शिताः ॥१८॥ ॥श्रीस्कंद उवाच॥ ॥शृणु त्वं सावधानेन निधानकलशं मम ॥
देव्यै पुरा महेशेन कैलासस्थेन शांकर ॥१९॥ रहस्येह्यस्य सुहृदा तदा शिवरहस्यगाः ॥ मन्मथांतकरं देवी तदा प्रणयगर्भिता ॥२०॥
कैलासशैलप्रासादे प्रसादाभिमुखं स्थितं ॥ नवरत्नपरिष्कारे दिव्यमंचोत्तरच्छदे ॥२१॥ मंदारपुष्पगर्भोत्थमरंदासारसौरभे ॥
१ कासारमध्यसरसफुल्लतामरसाश्रये ॥२२॥ रणद्भृंगसमुखाराव समीरणगणावृते ॥ चंडतांडवसन्नाहशिखंडिकुलकूजिते ॥२३॥
कोकिलाकाकलरव पिकसारसनादिते ॥ वनावनीगलत्पुष्परजसामोदिमारुते ॥२४॥ घ्राणासर्पि विसर्पिद्यौ भूमिगंधाद्भुतादि
शि ॥ पश्यंतं सागरोपांतं नितांतं सांतकांतकं ॥२५॥ अपृच्छत्पार्वती कांतं शांतस्वांतं तदा मुदा ॥ ॥पार्वत्युवाच॥ ॥
देवदेव महादेव हर गंगाधर प्रभो ॥ अंतकांतक कामारे अंधकासुरसूदन ॥२६॥ महाकैलासनिलय विश्वनाथ हराव्यय ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किंतत्त्वंमुक्त्युपायंकिंसाधनंतद्वद स्वमे॥२७॥असत्यजनतास्वांत पापतापनिवारकं॥मह्यंविश्वाधिक ब्रूहि निस्तारं विस्तराच्छि
व॥२८॥इत्युक्तोभगवान्रुद्रो गिरिजाजाययातदा॥मुदाहृदिचिरंध्यात्वा मुक्त्युपायंहरोवदत्॥२९॥ ॥सदाशिव उवाच॥ ॥
धन्येमान्येऽद्रिकन्येत्वयिवरकरुणापूर्णहृच्छ्रा[च्छया]भिवक्षेसंपूर्णंकुरुकर्ण[सार]सुरसामोहास्पदंतेमनः॥मुह्यत्यज्ञोपिगुह्यप्रकथनमहिमाऽस
ह्यपापौघनाशं पाह्यस्मत्कृपयैवलोकननुमभितोप्यूह्यंत्वयाशैलजे॥३०॥यातायातपरं परासु भवजैःदुःखाभिघातैःशिवे मोमुह्य
त्यपि पातशातनमिषे रुन्मेषमेबोन्मिषेः॥दुर्दांतदुष्टिपोनहाहतधियो भक्तिंपरांमुक्तिदामित्येवश्रुतिसूक्तिगर्भितवचोमुंचंतिमे
पामराः॥३१॥वारंवारमुमासहायचरणंपारंभवाब्धेःपरंद्वारंमुक्तिनिकायमार्गमवरंजानंतिह्याराःपरं॥घोरंपातकपंजरंप्रविजह्य
त्येवाद्भुतंनोबुधैबोधायैवभविष्यति प्रियतरमाज्ञानमेकंशिवे॥३२॥कर्णौखलुरसायनंहरमहाजने पावनं सदैवसुखसाधनंगि
रिशतुंगलिंगार्चनं॥महाघगिरिभेदनंप्रबलदुःखसंदीपनंजनेषुजनिनाशनंहृदयमोहसंभेदनं॥३३॥शृणुष्वशशिशेखरवरे त्रिन
यननेंदुबिंबाननेसदैवसुकृतीभवतिभस्मभूषोज्वलः॥सरुद्रसदृशोभवेत्सकलदेहरुद्राक्षधृक्सदेशिममसंमतोभवतिभाग्यपूर्णो
जनः॥३४॥मत्पंचाक्षरपावनोत्तममतिर्यासंश्रुतेतांगतिंसंसारेषुविराज्यनिर्भमहदात्यक्तेषणोवायतिः॥नैतामेतिगतागतिप्रचलि
तोब्रह्मांतलोकोर्ध्वगःसत्यंरुद्रपरायणोपि गिरिजेनारायणस्याघहृत्॥३५॥हरहर शिवशंकर त्रिशूलिनितिनाम्नैवविमुक्तपाप
संघः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्त्विहरिममपादध्यानधारानुरक्तो भवति कलिजमर्त्यो मुक्तिशक्तो विशिष्टः ॥ मनाविमुक्ते शतरुद्रजापी पारंवारं मुक्तिमुपैति शश्व
त् ॥ निश्चित्य पंचाक्षर मंत्रजापी क्षेत्रेषु वा तस्य कुतो जनुर्हि ॥ ३७ ॥ भुवि भारतवर्षमेतदुर्गिरिजे राजति पुण्यमार्गदाने ॥ इदमासा
द्य नरोत्तमो वरो वा नहि तिष्ठति विषयेषु दुःखभावः ॥ ३८ ॥ त्रिलोचनविलोकने मति रुदेति भाग्योदये रभाग्यनिधनक्षमाक्षय
गदादिनाशप्रदा ॥ क्षपापतिकलाधरं क्षपितपापविक्षेपहृत्क्षपां हृदि समर्चयन् सकलपुण्यनिक्षेपकृत् ॥ शर्वस्पर्शेन स
र्वो भवति विमलतरो खर्वपापादिहीनो हीनोऽपि स्याद्दहीनाध्वरवरफलभृद्योर्वरादानकृत्सः ॥ ३९ ॥ योवा को वापि लोके प्रथि
तजनिजरानाशदोषैस्तद्दोषैरपचितिपरमोनो चेतो दुःखभोगैर्यः शांगसंगजनितोत्तमपापभंगो लिंगार्चनेन निरयं वि
लयं व्रजेत ॥ ४० ॥ योमत्कथास्तुतिविधौ सकलाघधूतो धातुः प्रमार्ष्टि फलकेऽलिपि जालरेखाम् ॥ मदालयकरं बिके भ
वति पूर्वपुण्योदयैः सुदीपवरदानकृद्धिमलधूपमोदप्रदः ॥ भवेत विभवेपियः प्रतिभवेपि भावादरो भवाय जगतां शिवे
3 सभवेत्तेगणेषूत्तमः ॥ प्रातःसंगवपुंगवो रुवहन श्रीदिव्यलिंगार्चको सायं वापि उमासहायमगजे विक्षेत वाहृष्टधीः ॥ ४२ ॥ तेनैवाध्वर
कोट्यो विधिहुता तेनैव दत्तो वरा तेनाघ्न्यादिगजाश्वकांचनवरं दत्तं द्विजेभ्यः शिवे ॥ एवं दशैव विहिता मम तोषधर्माः मुक्तिप्रदा
भुवि नरेषु शिवे सदैव ॥ ४३ ॥ अस्येतिहासमधुना मधुसारभूतं धार्यं त्वया शिवरहस्य समुद्रमध्ये ॥ नाम्ना ख्यातेश्वरोऽयं जनिमृतिवि दारा

शिवरह०१७० नाशकोऽयं भवानि अंशोयं दशमः सदा शशिकलाचूडांघ्रिभक्तिप्रदः॥ अध्यायाध्ययनेन संसृतिभवं दुःखं न स ध्यायति ध्वांतध्वंस ईश्व०द०पू०
३ नमेतदेवगिरिजे पुण्यं शताध्यायकं॥४४॥ ॥श्रीस्कन्द उवाच॥ ॥इत्युक्तं शशिशेखरोत्तमवचः पीयूषमाध्वीझरी भा अ०१
रानन्दहृद्यागिरींद्रवरजा जाता च हर्षांतरा॥ तेनैवोक्तमपारसुंदरमहासारानुधारारसस्फारामोदमदायते पुनरहं विस्तृत्यव
क्षेमुने॥४५॥ अंशोयं शशिशेखरेण कथितः पूर्वापरार्धात्मकः अध्यायार्धशतेन तद्धरमतो पुण्येति हासो महान् नाना
र्थानुरसैकधीरसरसप्रेमास्पदो वै मुदे श्रृण्वन्त्वै सततं महाघगिरिभिद्वज्रं सुखायास्तु ते॥४६॥ इति श्रीशिवरहस्ये ईश्व
राख्ये दशमांशे शिवगौरीसंवादे प्रथमोध्यायः॥१॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईश्वराय नमः॥ ॥ ॥ ॥
श्रीस्कन्द उवाच॥ ॥शिवसंस्पर्शजालोकभस्मरुद्राक्षधारिणा॥ रुद्रपंचाक्षरमनोः नाम्नामीशस्य कीर्त्यतां॥१॥ क्षेत्रे निवसतां विप्र भक्तार्च
नरतात्मनां॥ प्रदोषसोमवारेषु भूताद्व्योर्महेशितुः॥२॥ नक्तपूजनमाहात्म्यं सेतिहासं वदाम्यहम्॥ प्राकारमंडपारामगोपुरोत्सवकारि
णां॥३॥ पुष्पजातिविशेषेण कालेकालेर्चनस्य हि॥ शिवेन कथितं विप्र शैलजायै विशेषतः॥४॥ हंत ते कथयिष्यामि महिमानं विशेषतः॥
मुनिरुवाच॥ ॥किमुक्तं देवदेवेन शिवेन परमात्मना॥ कैलाससदने देव्ये मदनांतकरेण हि॥५॥ तन्मे क्रौंचरिपो ब्रूहि निस्तारं विस्तरेण हि मे॥ ॥
सूत उवाच॥ ॥जैगीषव्यवचः श्रुत्वा स्कन्दः सूदिततारकः॥ बभाषे तत्तदा विप्राः तच्छृणुध्वं विशेषतः॥ ॥स्कंद उवाच॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रणम्य भक्तान्प्रवक्ष्यामि पूर्वं भस्मानुलेपनात् ॥ ७ ॥ त्याज्यःसकलसंग्रामस्त्रयकल्पाः शिवोदिता ॥ त्रिधा तापितभस्मश्रीकथनं मोहनाशनं ॥
॥ ८ ॥ कल्पानुकल्पोपकल्पा इति भस्मसमुद्भवाः ॥ मुरारिणा पुरा प्रोक्ताः क्रमेण कथयामि तान् ॥ ९ ॥ पंचाननाभिषेकार्हं पंचगव्यप्रसूतयः ॥
चिरप्रसूता गावो या भवंतीति चरो मया ॥ १० ॥ करभ्यां शुचिना तासां आदेयं गोमयं नवं ॥ शिवानलेविधेयं छिवमंत्रेण गोमयं ॥ ११ ॥ शिवमं
त्रेण तद्भस्म जायते बोधदायकं ॥ इदं हि कल्पसंभूतं भस्म धार्यं शिवार्चकैः ॥ शुष्कं गोमयमारण्यं चूर्णयित्वा यथाविधि ॥ गोमूत्रेण समूहस्य
विशोध्ये शेन मंत्रतः ॥ १३ ॥ पिंडीकृत्य च तास्मिन्प्रज्वलिते होमपावके ॥ तद्भस्म जायते धार्यं अनुकल्पसमुद्भवं ॥ १४ ॥ एतत्पृथक्पृथक् भ
स्मगोमूत्रेणाभिमृश्य तत् ॥ पिंडीकृत्यादि मंत्रेण क्षिपेद्भस्म शिवानले ॥ १५ ॥ दद्दग्धं भसितं प्राहुरुपकल्पोपकल्पितं ॥ तद्धार्यमेव तद्भक्तै रितिशं
करशासनं ॥ १६ ॥ वामे करतले भस्म न्यस्य केश्चन पांसुभिः ॥ शिवार्चकस्तदीयेश्च दिशो दश विरोधयेत् ॥ १७ ॥ अनतो हि महान्रुद्रः तद्रूपं भ
स्म कथ्यते ॥ दुरुत्सहं च तद्भूयः सुखस्पर्शं गुरोर्दशा ॥ १८ ॥ मेधावी धारयेद्भस्म सर्वेष्ववयवेषु तत् ॥ मुदितं प्रणवेनैव जपन्पंचाक्षरं मनुं ॥ १९ ॥
विनियोगास्त्रयः प्रोक्ताः स्नानोद्धूलनधारणैः ॥ तीर्थे स्नात्वा त्रिराचम्य प्राङ्मुखो वाप्युदङ्मुखः ॥ २० ॥ प्राणान्यच्छिन्न घोरेण षडंगैर्न्यासमाचरेत् ॥
5 अघोरमनुमस्त्रेतु प्रणानश्रममुच्चरन् ॥ उच्चार्योंकारमव्यग्रः पाणिनादाय भस्म तत् ॥ अग्निरित्यादि मनुभिः प्रक्षिप्ते सव्यतः करे ॥ २२ ॥ विकी
र्य किंचित्तत्रोर्व्यां भूतादित्य इति ब्रुवन् ॥ विधाय पाणिना भस्म तस्य सव्यकरस्थितं ॥ २३ ॥ तन्मंत्रै रग्निरित्यादि श्रीकारोंकारकौ तथा ॥ मूल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शैवर॰१० इध्व॰द॰पू॰

४ अ॰२

मंत्रंजपेद्विद्वान् अष्टवारं स्वसिद्धये॥२४॥निदध्येत्ततदात्मानः परेशायांतरात्मने॥अभ्युक्ष्येशानमंत्रेण मूर्ध्निसंप्रोक्ष्य भस्मना॥२५॥मुखंतत्पु
रुषेणैव हृदयंतदघोरतः॥पूरकंवामदेवेन सद्योजातेन पादकौ॥२६॥ओंकारेणांगमखिलं स्वंस्नातोभवेद्गृही॥पादमारभ्य मूर्धांतं सद्यो
जातादिभिः क्रमः॥२७॥यतीनांतु मुमुक्षूणां पंचब्रह्मभिरुच्यते॥वसित्वाथपरंवस्त्रं द्विराचामेद्विधानतः॥२८॥नयतीनांकालनिष्ठा सदे
तिशिवशासनं॥अभाष्यभाषणे चैवमनिरीक्ष्यनिरीक्षणे॥२९॥अश्राव्यश्रवणास्पर्शजे भाक्षुतेषुच॥दुःस्वप्नेषु चमूलेन सर्वांगेभसि
तेक्षणं॥३०॥मूर्धादिपादपर्यंतं सर्वांगं प्रणवं वदन्॥भस्मनोत्धूलयेदेतदुद्धूलनमुदीर्यते॥३१॥भस्मनो धारणं वक्ष्ये प्रणवेनप्रगृह्यतां॥
कृत्वारक्षांपूर्ववत्तन्मोलयेद्विशदांभसा॥३२॥त्रिमूर्तिरूपं मूलेन त्रिपुंड्रं धारयेत्सुधीः॥गुणाग्निशक्तित्रितय प्रणवंभस्मधारणं॥३३॥त्रि
पुंड्रदर्शनाच्छुद्धिः किंपुनस्तस्यधारणात्॥शिववशक्तिमनुत तत्फालग्रीवयोर्धृतं॥३४॥कांते स्थानद्वये चास्मिन्धारयेच्चत्रिपुंड्रकम्॥
भूतेशोवचसामीशः परमात्माचतुष्यति॥३५॥ब्रह्मविष्णुहरप्रीत्यै तत्फालांगलयोर्धृतं॥त्रिमूर्तिस्कंदतुष्येत नाभौ चास्मिन्स्त्रयोर्धृत
म्॥३६॥शिवविष्ण्वीशरुद्रांशांतेषुबाह्वोर्धृतंचतत्॥कर्णयोस्तेषुचधृतं शिवभक्त्या प्रियंभवेत्॥३७॥तत्तेषुमूर्ध्निचधृतं परब्रह्मप्रि
यंभवेत्॥ललाटफलहृन्नाभि बाहुकर्णद्वयेषुच॥३८॥पृष्ठेचभस्मभरणात् ब्रह्मविष्णुशिवोमही॥पितृशक्राग्निविघ्नेशस्कंदातुष्य
तितेक्रमात्॥३९॥बाहूरंसद्वयीजानुपदेषुश्रवसोरपि॥मूर्ध्निवास्येप्रतुष्यंति स्कंदाद्याभस्मधारणे॥४०॥स्कंदविश्वेश्वरेशान प्रजापति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनार्दन॥ नारायणाश्विभूम्यग्निब्रह्माणः शिवमूर्त्तयः॥४१॥ ललाटकर्णहृदयनाभिदक्षिणबाहुषु॥ तदन्यदक्षिणश्रोत्रे वामश्रोत्रेषु
चक्रमात्॥४२॥ पृष्ठे चककुदे मुर्ध्नि तुष्टाःस्युर्भस्मधारिणः॥ महेश्वरः पशुपतिः शंभुः शंकर ईश्वरः॥४३॥ वामदेवो महारुद्रः श्रीकंठो वृषभ
ध्वजः॥ परमात्मा शिवश्चेति रुद्रा एकादशात्मकाः॥४४॥ फालहृन्नाभिकंठेषु बाह्वोस्तन्मध्ययोरपि॥ तत्प्रकोष्ठद्वये पृष्ठे मुर्ध्नियो भस्मधार
येत्॥४५॥ ब्रह्माहुतवहस्कंदपुरुषारुद्रभास्करौः॥ शशिप्रभावामनश्च नभस्वान्वासवोहरः॥४६॥ वामदेवश्चते शर्वे तस्य प्रीता भवंतिहि॥
येषुकुक्षौ च यो भस्म धारयेत्स शिवप्रियः॥४७॥ फालाग्निवाहूदुदरनाभिबाहुद्वयेष्वपि॥ प्रकोष्ठमणिबंधांसपादयुग्मेषु पृष्ठतः॥४८॥
विभूतिं बिभृतस्तस्य शिवादि ब्रह्मपंचकं॥ वामाज्येष्ठा तथा रौद्री काली कलविकारिणी॥४९॥ बलवीकरणी चैव तथा बलप्रमाथिनी॥ सर्व
भूतप्रदमनी तथा चान्या मनोन्मनी॥५०॥ अश्विन्यो चक्रमात्सिद्धिं यच्छंतिस्थानदेवताः॥ ललाटकर्णयोर्नेत्रद्वयेनासद्वयास्ययोः॥५१॥
ग्रीवायामंसयोर्बाह्वोः कूर्पयोर्मणिबंधयोः॥ हृन्नाभिगुह्यदेशोरुद्वयजानुद्वयेषु च॥५२॥ स्फिक्द्वये जंघयोर्द्वोग्रद्वयं पृष्ठ समीविनः॥ यो भस्म
धारयेद्भक्त्या क मातस्याष्ट मूर्त्तयः॥५३॥ विघ्नेश्वरी दिगंते शावसवोष्टौ च सिद्धिदाः॥ अंगुष्ठनामिकाभ्यां तु ललाटे भस्मधारणे॥५४॥ सर्वदा तर्ज
नी तत्र वर्ज्ये त्यागमशासनं॥ मध्यमानामिकाभ्यां तत् धारयेदंगमूर्धनि॥५५॥ अंगुष्ठनामिकाभ्यां तु कर्णयोस्तस्य धारणं॥ (~~शिश्नं मूले तर्जिघ्रे~~)
सांगुलीभिश्च उक्तेषु स्थानेष्वंगेषु धारयेत्॥५६॥ इत्थं विधाय विधिवद्भक्त्या श्री भस्मधारणं॥ शिश्नं मूले तर्जिघ्रेदंतः करणा तु बृये॥५७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० ज्ञानार्थी चन्दनोन्मीलं श्रीकामं कुंकुमान्वितं ॥ वश्यार्थी वश्यचूर्णेन जयार्थी रक्तचंदनात् ॥५८॥ नारीणां तिलकं यद्वा पराकृत्यर्धचंद्रके ॥ ईश्व० द० पू०
५ नपुंसकानां तत्प्रोक्तं दीपशाखाशिखोपमं ॥५९॥ यत्त्रिपुरदाहार्थं भस्मादि व्याख्यमुच्यते ॥ विभूतिश्रीकृतैश्वर्यं भूतिर्भसितमित्यपि ॥६०॥ अ २
शिवं भस्म पवित्रं च क्षारमाग्नेयमित्यपि ॥ रक्षेति चास्य नामानि प्राहुरेकादशास्तिकाः ॥६१॥ नामत्रयं विभूत्यादि सद्योजं संपदावहं ॥ भूतादि
नामद्वितयं वामार्थाभासनार्थियः ॥६२॥ यच्छिवादिद्वयं नाम्नो तत्तत्पुरुषसंभवं ॥ नामद्वयं पवित्रादि तदीशानमुखोद्भूतं ॥६३॥ संपत्करवि
धिं नाम आपदुद्धारणं च तत् ॥ आग्नेयादि च यन्नामद्वयमेतदघोरजं ॥६४॥ अपस्मारभयोन्माद भूतादीनां निवारणं ॥ स्मरणाद्दार्शमनंद
र्शनाद्भयनाशनं ॥६५॥ स्पर्शनाच्छुद्धिकरणं धारणात्सर्वकामदं ॥ सर्वमंत्रमयं साक्षाज्ज्वरशांतिमहौषधं ॥६६॥ सर्वाघभंजनं सर्वशत्रुगर्वनि
वारणं ॥ ज्ञानप्रदं स्मृतिकरं आयुष्करमभिष्टदं ॥६७॥ विप्राणां ज्ञानतत्त्वानां भस्म चेताग्निजं भवेत् ॥ व्याघ्रचर्मांबरं देवं स्तुवंतत्रिमलच्छिदः ॥६८॥
भस्मोद्धूलितसर्वांगाः प्रभवंति शिवार्चकाः ॥ इत्युक्तसंस्कारविलिप्तभूतिशिवार्चका ये शिवसक्तभावाः ॥ ते स्वाभिलाषामृतभाषमोक्षानंदं
तिलोके शिवसाधनेन ॥ ये जातिसंस्कारविभूतिभाजां शिवार्चकानां परभक्तिभाजः ॥ तदर्चकास्ते धरणीतलेस्मिन्भजंति भोगान्स
हपुत्रपौत्रैः ॥ ॥ इति श्रीशिवरहस्ये ईश्वराख्ये दशमांशे भस्ममहिमावर्णनं नाम द्वितीयोध्यायः ॥२॥ श्रीकाशीविश्वेश्वरार्पणा
मस्तु ॥ ॥ श्रीईश्वराय नमः ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ भस्मोत्पत्तिं प्रवक्ष्यामि बृहज्जाबालदर्शितां ॥ आदर्शइव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्हं वर्हिं
देवेन देव्यै प्रोक्तां त्वयि बुवे॥१॥दर्शेषु धारयन् भस्म कृत्वा होमं यथाविधि॥स्वसूत्रोक्तविधानेन बर्हमर्हं विधारये॥२॥बैल्वखादिरसंभू
तसमिद्भिश्चरुणा तथा॥आज्येन मधुमिश्रेण जुहुयाद्रुद्रसूक्तकैः॥ब्रह्माणं ब्राह्मणं तत्र कल्पयेद्भस्मभूषितं॥स्वयं वाचार्यमुख्यो वा
जुहुयाज्जातवेदसि॥४॥अन्वाधानादि पूर्वार्धं कृत्वा इध्मादिपातनं॥आघारावथ वाधार्य चक्षुषी जुहुयात्ततः॥प्रणीतां तत्र निक्षिप्य
पुण्याहं कृतिमाचरेत्॥बर्हिराच्छाद्य पश्चात्तु कृतनित्यक्रियः स्वयं॥६॥अजरे वाससी तत्र वसानः शिववासनः॥पुण्याहं वाचयि
त्वाथ नांदीश्राद्धं विधाय च॥७॥विलाप्याज्यं प्रयत्नेन हविरुत्तार्य चोत्तरे॥बैल्वखादिरपालाशैः स्रुक्स्रुवौ परिकल्प्य च॥८॥पू
र्वापरार्धमाज्येन हविः प्रत्यभिघारयेत्॥देवमावाह्य वह्नौ च शिवहोमं समाचरेत्॥९॥शांतिपूर्वोत्तरं चैव जपित्वा चम्य वाग्यतः॥
शं च म इत्यादि जुह्येव शतरुद्रेण वै तदा॥१०॥नमस्त इत्यादि मन्वंतं चतुर्थ्यंतैश्च होमयेत्॥शतरुद्राहुतीस्तत्र शताष्टोत्तरमेव च॥११॥
जुहुयादनले मंत्रैः चतुर्थ्यंतैः पृथक्पृथक्॥पुनराज्यैर्वसोधारां हुत्वा रुद्रेण मंत्रवित्॥१२॥रुद्रं च विधिवत्पूज्य कलशे मंत्रवि
त्तमः॥अव्रणे मृण्मये वापि ताम्रस्वर्णविनिर्मिते॥१३॥राले वा तथा राजासरोजाच्छादनैर्युते॥पंचाम्रपल्लवैर्युक्ते धूपदीपनिवेदनैः
6 ॥१४॥ततः स्विष्टकृतं हुत्वा रौद्रं बलिमुपाहरेत्॥दिक्षष्टसु विशेषेण चर्वाज्येन द्विजोत्तमः॥१५॥धूपदीपैस्तथा गंधैः वासोभिः पू
जयेद्व्रतिं॥एवं त्रिरात्रं कृत्वैव होमं तत्रैव पावके॥१६॥यावकौदनवर्तीस्याद्ब्रह्मचार्यश्च वाग्यतः॥नक्तभुक्तेन वर्तीस्याद्भूशय्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० निरतोमुने॥१७॥रुद्रत्रिषवणंकुर्युःस्नानंमौनेनतेतदा॥शतंदशवरान्वापिद्विजान्संभोजयेत्क्रमात्॥१८॥भक्ष्यभोज्यैःसुविहितैस्तैः इ॰श्च॰द॰पू॰
६ धूलैर्गंधपुष्पकैः॥दुकूलैर्दक्षिणादानैः रात्रावभ्यर्च्यशंकरं॥१९॥ग्रामाद्बहिर्गृहेवापिशालायांवानदीतटे॥वटेरुबिल्व॰प स्याश्वो अ३
बिल्वाश्वत्थादिमूलके॥२०॥शुभमासेवसंतादौशुभर्क्षेचोत्तरायणे॥यथाविभवसारेणब्राह्मणंपूजयेत्क्रमात्॥२१॥आचा
र्यंवायथाशक्त्याप्रादक्षिण्यक्रमेणहि॥प्रदक्षिणाविधिंकृत्वासंरक्ष्याथप्रयत्नतः॥२२॥नुधैःकरीषैश्चपृथक्सप्तरात्रंशिवान
ये॥ब्राह्मणान्स्वागतासिद्धान्भोजयेच्छांभवान्यतीन्॥२३॥शिवयोगीतथेशानंलिंगेसंपूजयेद्द्विजः॥ब्राह्मणाःक्षत्रियोवैश्योरा
जावापियथाविधि॥२४॥यथाशक्त्यानुसारेणशिवभक्त्याप्रयत्नतः॥साधयेद्भस्मतत्प्राप्त्येगोमयंतद्विधिंशृणु॥२५एवंशिवा
नलप्रोक्तंभस्मधारणहेतवे॥महाशांभववीराणांएषएवविधिस्मृतः॥२६॥विरजानलजंभस्मधारयेत्तत्समिदुद्भवं॥अग्निरित्यादिभिर्मंत्रैर्दग्ध
पापस्त्रिपुंड्रधृक्॥२७॥वर्णीपर्णमयंदंडंधारयन्स्वर्णवर्जितः॥वेदमेकंत्रयंवापिअभ्यसेच्छिवभावनः॥गृहस्थोपिसदाविद्वान्स्वकीयोपास
नोद्भवं॥धारयेदेकएकेकंनर्यभस्मयथोत्तमं॥२९॥सर्वेषांसर्वदाधार्यंत्रिपुंड्रंधूलनात्मना॥वनस्थोदावजंभस्मधारयन्धूलनात्मना॥३०॥
त्रियायुषैस्त्रिपुंड्रकोग्राम्याहारादिवर्जितः॥संन्यासीप्रणवेनैवधारयेद्धूलिनात्मना॥३१॥त्रिपुंड्रवर्त्मनाभस्मसितंवाथयथारुचि॥वेप्रानल
संभवाऽपिधारयन्ज्ञानमुक्तिभाक्॥३२॥शिवानलोत्थभसितंशांभवैःशिवयोगिभिः॥धार्यमन्याश्रमीनांतुश्मशानाग्निसमुद्भवं॥३३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रीभिः शिवाह्वयोत्थं तु धार्यं सर्वजनैरपि॥ ब्रह्मक्षत्रविशां दृष्टा प्रोदितो ह्येव वै विधिः॥२४॥ ॥स्कंद उवाच॥ ॥शिवानलसमुद्भवं भसित
मेव कल्पोद्भतं लभेत यदि भाग्यतो मृडहृद्धार्चनासूद्यतः॥ तदन्यदपि कथ्यते शिव महेश सच्छासनं त्रिपुंड्रपरिधारणं भवति शर्वतोषप्रदं॥२५॥
ये निंदंति महेश्वरं त्रिजगतामाधारभूतं हरं ते निंदंति त्रिपुंड्रधारणविधिं द्विष्यंतु रुद्रदर्शने॥ ते वै संकरसूकरीखरखरीयोन्युत्थकीटोपमाजारा
एव भवंति पापपरमास्ते नारकाः केवलं॥२६॥ तान्दृष्ट्वा शशिभास्करौ निशि दिवा प्राप्नोपि वा केवलं पश्यंतु श्रुतिरुद्रसूक्तजपतो मुच्येत तेना
घतः॥ तत्संभाषपातो भवेत नरकं निस्तारवातोज्झितं ये भस्मादिविधारिणां तनुरिमे निंदंति मंदाहिते॥२७॥ श्वानाश्वासनहीनमैथुनभवा
स्तेरासभाभानना दीना एव वनावनीषु नितरां कीशोपमा शारता॥ कीनाशस्य वशं प्रयांति कुनरा जारोपजारोद्भवा ये निंदंत्यपि भस्मधारणरतं
मंदाहि कर्मंदिनः॥२८॥ असाराचाराद्ये दृढतर विमूढा त्वमतिभिर्वितत्यैकं शास्त्रं खलु कुलजमार्गैकशरणः॥ कुलालोत्पन्नास्ते श्रुतिग
दितभस्मोज्झितमुखा नुलायप्रायास्ते यमगतिगता नारकवराः॥२९॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे भस्ममाहिमा नाम
तृतीयोध्यायः॥३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीस्कंद उवाच॥ ॥धेनुं लक्षणसंपन्नां प
7 रीक्षेत विचक्षणः॥ सर्वावयवसंपन्नां हृष्टां दोषादिवर्जितां॥१॥ बहुक्षीरदुघां शस्तां सवत्सां मधसोवरां॥ श्वेतां रक्तां तथा कृष्णां कपि
लां वा विशेषतः॥२॥ शबलां वाथ पिंगाक्षीं अरोगामपलायिनीं॥ हुंभारवकृतोत्साहां दर्शनीयां च श्रृंगिणीं॥ ह्रस्वांगां विकटां चैव मनु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुन्मत्तां पलायिनीं ॥ चोरश्रवां तथा रुष्टां दीर्घश्रृंगामश्रृंगकां ॥४॥ रोगिणीं नवसूतां च रुग्धां गां चक्रचिह्नितां ॥ मलपंकवसामांसकेशशैवाल 
भक्षिणीं ॥५॥ वत्सापवत्सलांपृत्स्नीमल्पक्षीरात्यमूत्रिणीं ॥ ग्लानदोग्ध्रीं मंदगमां अन्नहीनांकृशांतथा ॥६॥ अतिस्थूलां चमुंडां च एकगर्भागर्भि
णीं ॥ दाहगर्भां च वहनीं गर्भिणीं स्रस्तगर्भिणीं ॥७॥ मृतवत्सामवत्सां च वर्जयित्वा प्रयत्नतः ॥ काकस्वरां कोकरवां घंटाभीतां क्षुधातुरां ॥८॥ बद्ध
दनीमल्पभक्षां स्वोधसः क्षीरपायिनीं ॥ श्रवन्नेत्रां कृमियुतां लालाजालमुखां तथा ॥९॥ सर्ववर्णामककुदां विरूपामामगर्भिणीं ॥ वृषाहासां च
भीतां च वर्जयेद्गोमयाहृतौ ॥१०॥ पूर्वलक्षणसंपन्नां अलक्षणविवर्जितां ॥ नैचिकीमुचितां तां गां सर्वांगे लक्षणैर्युतां ॥११॥ परीक्ष्य त्र्यक्षहृ
दयो विष्णुमुख्यादिदेवतां ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥१२॥ तस्माद्गावः सदा पूज्याः सदाशिवमयाः सदा ॥ अग्नियानां पतिः शं
भुस्तासु तिष्ठति सर्वदा ॥१३॥ गावो यस्य गृहे तुष्टास्तस्य तुष्यंति देवताः ॥ घासदानेन पितरस्तृप्ताः स्युः प्रपितामहाः ॥१४॥ अलक्ष्मि
परिहाराय गावः पूज्याः प्रयत्नतः ॥ कुलमेकं द्विधा भिन्नं ब्राह्मणानां गवां तथा ॥१५॥ एकत्र वेदास्तिष्ठंति हविरन्यत्र तिष्ठति ॥ घृत
योन्यो क्षीरभारा गावः पूज्यास्तदैव हि ॥१६॥ गवां पूजाप्रभावेन प्रीतः पशुपतिः सदा ॥ गावो हि धात्र्यो भूतानां मातरो लोकपावनाः ॥१७॥
आ गावइति मंत्रेण उपस्थेयास्तदैव हि ॥ गावो यज्ञस्य सदनं मदनांतकप्रियाः ॥१८॥ गोभिश्चामृतनिष्पत्तिः पंचामृतवहाः सदा ॥ गवां
क्षिराद्दधि भवेद्दध्नाच्च नवनीतकं ॥१९॥ तस्माद्घृतस्य चोत्पत्तिस्तेनाज्येन दिवौकसः ॥ हूयंति किल वै तानेतत्यमाज्यमिति श्रुतिः ॥
॥२०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋतंसत्यंपरंब्रह्ममहेशंकृष्णपिंगलं॥शिवोभिषिच्यतेयेनशिवलिंगेसनातनः॥२१॥क्षीरेणाज्येनदध्नाचतासांतासर्वपावनाः॥
तद्गोमयंमंगलंस्यात्सदालेपनकर्मणि॥२२॥प्रातःप्रातःसदाशुद्धंप्रोक्षितंगोमयांभसा॥गृहंपवित्रतांयातियासामंगोद्भवंहि
तं॥२३॥पावनंगोमयंप्रोक्तंयस्माद्भस्मप्रजायते॥ताःपूज्याःसर्वयत्नेनशिवःप्रीतोभविष्यति॥२४॥पशूनामधिपोयस्मान्म
हादेवोमहेश्वरः॥शृंगांतरेसदाभातिलिंगरूपेणशंकरः॥२५॥शृंगाभ्यांमश्विनौदेवौचक्षुषाचंद्रभास्करौ॥घ्राणेचनिर्ऋति
श्चैवमुखेवैपूर्वदेवताः॥२६॥कर्णयोर्वसवश्चाष्टौगलेसा(न्ना)स्तासुभास्करः॥ब्रह्मतत्ककुदिस्थोपिपृष्ठवंशेपुरंदरः॥२७॥पूर्वपा
देविश्वेदेवाःवरुणोपादसंधिषु॥वायुरग्निश्चजठरेमृत्युर्नाभौचसंस्थितः॥२८॥खुरेषुरुद्रास्तिष्ठंतिहृदयेचजनार्दनः॥कमला
विमलानित्यंगोपुच्छेसंस्थितामुने॥२९॥गोपुच्छेमार्जनंकुर्यादलक्ष्मीनाशनायहि॥रोमकूपेषुमुनयोमनवोथचतुर्दश॥३०॥नक्षत्राणि
चसर्वाणिपृथिवीद्यौर्दिशस्तथा॥मातरःपितरश्चैवगंधर्वाश्चाप्सरोगणाः॥उरगागरुडाःसिद्धाःसाध्याःकिंपुरुषास्तथा॥यक्षारक्षांसिभू
तानिगवामंगेषुसंस्थिताः॥३२॥तासांगवानामधिपोमहादेवउमासखः॥तत्पूजयापूजितःस्यादधिपानांपतिःप्रभुः॥३३॥नंदासुनंदासु
रभिःकामधेनुश्चभद्रका॥पंचैवगोगणाःपूर्वंसृष्टावैब्रह्मणापुरा॥३४॥शिपिविष्टप्रसादार्थंतत्सुतोवाहिनीकृतः॥देवदेवेनधर्मोपियुग
८ पादोमहाबलः॥३५॥सर्वतीर्थक्षेत्रमयोसर्वधर्ममयोमहान्॥तपसावाहनत्वंसप्राप्तोदेवस्यशूलिनः॥३६॥कदाचिन्मेरुनिलयेसुरवासी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नंमहेश्वरं ॥महादेव्या समासीनं मानसाख्यसरस्तटे ॥ऊर्ध्वं चरंत्यस्ता गावो पंचैवासन्मदोद्धताः ॥ वत्से हत्साह्युक्तास्ताः चरंत्यो विपिने तृणं ॥३०॥ दुग्ध्वरा० द
नंदने नंदिता गावः कपिलास्वर्णसन्निभाः ॥ बालभास्करवर्णाभा वृत्तपुच्छ तनूभराः ॥३९॥ मेरुमूले स्थितं शंभुं अजानंतो यथेच्छया ॥ रोमंथ पू०अ०४
स्रावफेनिलैले रम्यं सिंचुस्तदा मुने ॥४०॥ गवां मुखोद्भूतं वारि शंभुगात्रे निपातितं ॥ किंचित्क्रुद्धेक्षणोक्षोभ्य गावस्ता लोकमातरः ॥४१॥ शिव
क्रोधाग्निनिर्दग्धा नानावर्णा निभेजिरे ॥ब्रह्मणा सांत्विता गावो मेरुमौलिं समागताः ॥४२॥ शिवेन शप्ता गावस्ता मुखे यूयं भविष्यथ ॥ अम
अपवित्रतराः सर्वे जिघ्रंत्यो यच्च किंचन ॥४३॥ अपवित्रतरं भूयादिति शप्ता गवां गणाः ॥ स्वोधोभरक्षरत्क्षीरैः अभ्युषिंचन्महेश्वरं ॥ शतं वर्षा
णि ता गावो रुद्रसूक्तेन शंकरं ॥क्षीराभिषेकतुष्टोऽसौ वरेण च्छंदयंस्तताः ॥४५॥ ॥श्रीईश्वर उवाच ॥ ॥हे गावः परमा तुष्टिः क्षीरवृष्ट्या
निशं मयि ॥वरं यं तु वरं ह्यद्य सद्यो वो ददामि वांछितं ॥४६॥ इत्युक्ताः शंकरेणैव गावः संतुष्टुवुर्हरं ॥ ॥गाव ऊचतुः ॥ ॥शंभो चारुदृशा शांक
रो दूवरतसंगं गातरं गोज्वलं मौलेनालितशांबरार्भककरध्वस्तोरुनागाजिन ॥पार्श्वीशान दयानिधान भगवन्नो महन्नो कृतं वारंवारम
पाकुरुष्व दयया शीघ्रं पशूनां पते ॥४७॥ भो भर्ग त्रिपुरांधकांतक महादेवाद्य गंगाधर भूतेश अखिलपावनामितबलान्नीललिंशूलीध
र ॥रक्षास्मान्छरणागतान्करुणया गावो वयं गोपते संवीक्षाद्य दृशा दशांशकरुणाकोटि कटाक्षेण च ॥४८॥ पुत्रोनोस्तु भवभवोद्भवम
हा धर्मा क्षितिर्वाहनं देवस्त्वं पशुपोसि पाहि सुदृशा कारुण्यवारांनिधे ॥नो दद्यो वरमीदृशं तव दृशा चाशावसान प्रभो हे रंबादपि सुप्रियोस्तु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवते धर्मः सुतो नोद्यहि ॥४९॥ ॥श्रीस्कंद उवाच ॥ ॥गावस्ताः प्रतिनंद्य नंदितदृशा वृंदारवृंदैर्नलः सानंदं शशिकुंदसुंदरजटाभारांकमौ
लिः शिवः ॥धर्मं चापि सवाहने च कलयन्नेवं च गावो पिताः प्रीतेशेन तदा मुदात्वभिमता वत्सा गमिष्यंत्विति ॥५०॥ यूयं यात निजालयं प्रति
सदा नैवाद्य मंतुर्हृदि वः क्षीरोत्तमसेचनेन सुहृदा मोदामि तुष्यामि च ॥समं स मीनस्तुतितो जितो हरः तदा समीचीनदृशा विलोक्यतां ॥५१॥
त्रिलोचनः प्रीतियुतो बभूव स्मेराननः पुंगवराजवाहनः ॥ ॥श्रीईश उवाच ॥ ॥यः क्षीरोत्तमसेचनं प्रतिदिनं कुर्याद्धि लिंगोत्तमे तस्या
हं वितरामि भाग्यमहिमं केवलं त्व्यवल्लीमपि ॥५२॥ तस्यापारमहापराधशतकं सेहे हमेवादरात् यूयं गच्छत नंदनोत्तमवने तुष्टाश्च
रं तुद्रुतं ॥इत्युक्त्वा शशिशेखरेण पशुभिर्नामंत्रिता यंत्रिताः नत्वा शंभुपदांबुजं प्रतिययुर्गावो हि हृष्टा मुने ॥५३॥ तस्माद्गोपति
रेव शंकर इति श्रुत्या परं गीयते तन्नत्वा शरणाय मुक्तिपरमानंदैकधाम्नि स्थितः ॥५४॥ ॥इती श्री शिवरहस्ये ईशाना
ख्ये दशमांशे पूर्वार्धे गोमहिमानाम चतुर्थोध्यायः ॥४॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईशानाय नमः ॥
श्रीस्कंद उवाच ॥ ॥श्रीफाललोचनेनैव वक्ष्ये जाबालसंभवं ॥भस्म चोक्तं विमुक्ते हि जनान्जन्मवना मुने ॥१॥ शृणु स्वसावधानेन
9 त्वमेकाग्रेण चेतसा ॥सद्योजातोद्भवात्वक्त्रात्पृथिवी समजायत ॥२॥ महेशास्यादिसृष्टौ हि जाबालश्रुतिचोदिता ॥पृथिवीरूपिणी
या सा गौर्जज्ञे कपिलास्व्यया ॥३॥ नंदा सा नाम तो विप्र तस्यां भूतिर्बभूव ह ॥ वामदेवमुखाच्चं भोर्वार्यग्रे समजायत ॥४॥ कृष्णा वर्णा ततो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १०
९

भद्रा तस्यां वै भसितं स्मितं ॥ आख्यातं मुनिशार्दूल शूलपाणिप्रसादकृत् ॥५॥ अघोरवक्त्रादभवद्वह्निर्लिहानो ज्वलत्प्रभः ॥ वह्निरह्नाय जगतां म ईश्वर० द०
ध्याह्नार्कशतोपमः ॥६॥ रक्ताम्बर (मुखाच्च) रक्तवर्णा च सुरभिः समजायत ॥ तस्यां हि भस्म संजातं भासनं पावनं परं ॥७॥ तत्पुरुषमुखाद्वायुः सर्वायुःका पू० अ० ५
रणो महान् ॥ तस्माच्छ्वेता (चि) भवद्वर्णा सुशीला गोपयस्विनी ॥८॥ तस्मात्क्षारं समुत्पन्नं क्षरत्पापकुलं मुने ॥ ईशानवक्त्रादाकाशो व्योमकेशा
द्बभूव ह ॥९॥ तस्माच्चित्रवर्णाभूत्सुमनासापयस्विनी ॥ तद्गोमयोत्था रक्षाभूत्साक्षात्र्यक्षप्रसादकृत् ॥१०॥ विद्या शांतिप्रतिष्ठा च शांत्यती
ता मनोन्मनी ॥ कलाः पंच समुत्पन्नाः क्रमोयं शंकराज्ञया ॥११॥ विभूतिर्भसितं भस्म क्षारं रक्षेति वै मुने ॥ भवंति पंच नामानि पंचवक्त्रोद्भवानि
हि ॥१२॥ ऐश्वर्यकारणाभूतिर्भस्म सर्वाघभक्षणात् ॥ भासनाद्भसितं प्रोक्तं क्षरणात्क्षारमापदां ॥१३॥ संसारभयभीतानां रक्षा संरक्षणान्मुने ॥
अग्निसोमात्मकं भस्म संप्रोक्तं मुनिसत्तम ॥ एको वह्निर्यथा यज्ञे समिद्धे ताध्वरे तदा ॥ बहुरूपं मुनिश्रेष्ठ तथेदं भस्म पावनं ॥१५॥ अतनुदेवदेवस्य
अष्टमूर्तिः पिनाकिनः ॥ अग्निरित्युच्यते रौद्री घोराया तैजसी तनुः ॥१६॥ सोमः शक्त्यामृतमयः शांता कांततरी तनुः ॥ अमृतं यत्प्रतिष्ठा सा तेजो
विद्या कलाः स्वयं ॥१७॥ स्थूलसूक्ष्मेषु भूतेषु त एव रसतेजसी ॥ द्विविधा तेजसो वृत्तिः सूर्यात्मा चानलात्मिका ॥१८॥ वैद्युतादिमयं तेजो मधुरादि
मयो रसः ॥ तेजोरसविभेदेन जगद्व्याप्तं चराचरं ॥ अग्नेरमृतनिष्पत्तिरमृतेनाग्निरिध्यते ॥ अत एव हविः क्लृप्तं मुने सर्वमखेषु च ॥२०॥ हविषा
सस्यसंपत्तिः वृष्टिः सस्याभिवृद्धये ॥ हविस्तृप्ताः सुराः सर्वे अग्निसोमात्मकं जगत् ॥२१॥ ऊर्ध्वशक्तिमयः सोमो ह्यधः शिवमयोनलः ॥ आभ्यां संपुष्टि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तंयस्माच्छक्तिद्विश्वमिदंजगत् ॥२२॥ अग्निरूर्ध्वंज्वलत्येषोयावत्सौम्यंपरामृतं ॥ यावदग्न्यास्पदंसौम्यममृतंविसृजत्यधः ॥२३॥ अतएवाहिकाला
ग्निरधस्ताच्छक्तिरूर्ध्वगा ॥ यावतादहनश्चोर्ध्वमधश्चाप्लावनंभवेत् ॥२४॥ आधारशक्त्यवधृतः कालाग्निरयमूर्ध्वगः ॥ तथैवनिम्नगः सो
मः शिवः शक्तिपदास्पदः ॥२५॥ शिवश्चोर्ध्वमयः शक्तिरूर्ध्व शक्तिरधः शिवः ॥ तदित्थंशिवशक्तिभ्यांनाव्याप्तमिह किंचन ॥२६॥ असकृच्चा
ग्निनादग्धंजगत्तद्भस्मसात्कृतं ॥ अग्नेर्वीर्यमिदंप्राहुस्तद्वीर्यंभस्मयत्ततः ॥२७॥ यश्चेत्थंभस्मसद्भावंज्ञात्वाहिस्नातिभस्मना ॥ अग्निरित्या
दिभिर्मंत्रैर्दग्धपाशः सउच्यते ॥२८॥ अग्नेर्वीर्यंतुतद्भस्मसोमेनाप्लावितः पुनः ॥ अयोगयुक्त्याप्रकृतेरधिकारायकल्पते ॥२९॥ योगयुक्तौतु
तद्भस्मप्लाव्यमानंसमंततः ॥ शाक्तेनामृतवर्षेण ह्यधिकारान्निवर्तयेत् ॥३०॥ अतोमृत्युंजयायेत्थं समृतप्लावनंसता ॥ शिवशक्त्यमृतस्प
र्शे लब्धएवकुतोमृतिः ॥ योवेदगहनंगुह्यंप्लावनंचतथोदितं ॥ अग्नीषोमपुटंकृत्वानसभूयोभिजायते ॥३२॥ शिवाग्निर्वा(ना)तनुंदग्ध्वाश
क्तिसोमामृतेनयः ॥ प्लावयेद्योगमार्गेणसोमृतत्वायकल्पते ॥३३॥ अग्नीषोममयंजगत् स्थिरचरंसंभावितंशंकरात्सारासारविचारसागरमहा
मारीणाधुर्यामुने ॥ जानंत्येवगतागतीषुनितरांमुत्कृष्टभावाभवेभावाएवभवेपिभावपरमाभस्मैकभावाः सदा ॥३४॥ अग्नीषोमपुटोद्भवेनभ
सितालोकावभूषांगकाशांगाएवभवंतिभाग्यपरमापापौघभंगाशयाः ॥ दुग्धानंगमहांगसंगभुजगाभोगांगलिंगार्चकाः पुण्या
७ पास्तपतंगभानभवनाः तेपावनाभूतले ॥३५॥ योवाकोवापिभूत्याभवतिहिकलितोदेविदिव्यात्रिपुंड्रैः सर्वेषामपिपावनोहिस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० भवेत्स्वालोकसंगे नहि॥ तत्संगे नहि भंगिता घनिचयो भूयो भवेद्वै जनः जानाति श्रुतियुक्तिसूक्तिवचनैः संभस्य नों बेप्रभुः॥ ३६॥ आर्या ईशा० ६० पू० अ० ६
१० वर्त्तस्थितार्याश्रुतिगादितमहानर्थभस्मादिभिर्ये पुंडुं फालतत्ते निधायविमलं सर्वाघसंघोज्झिताः शार्वस्यैव समर्चनप्रियतरा गर्वादि
वर्गोज्झिता स्तेविर्योन्नितपरास्त रंति भुवने तेचार्यवृत्तिस्थिताः॥ ३७॥ भस्मेदं स्मरहंतृ फालफलकालंकारभूतं सदा पापौघातुलघस्म
रं स्मृतिकृतं बुध्यादिबोधप्रदं॥ ज्ञानं चापि दिशेदु मे विधिधृतं तिर्यक्फाले ष्वपि सर्वेषामविशेषतो द्विजगणेषूक्तं विशेषा पाहि॥ ३८॥ संमाम्ना
ताम्नायप्रबलवचनेनाल्पमितर प्रमाणानां मानं श्रुतिगादितसीमानुशरणं प्रमादो नो भूत्यै भवति सुखकीर्त्यादिविनशं छिद्वोत्कर्षं ज्ञानं
भवतिच विमुक्तः परतरं॥ ३९॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे पंचमोध्यायः॥ ५॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥
श्री ईशानायनमः॥ ॥ श्रीस्कंद उवाच॥ ॥ भस्मस्नानविधिं वक्ष्ये त्र्यक्षः स्याभिमतं मुने॥ केलासशिखरासीनं महादेवं गिरींद्र
जा॥ प्रणाम्य प्रणयेनाह प्रणतार्तिहरं हरं॥ २॥ पार्वत्युवाच॥ ॥ देवत्रिशूलविलसत्करपल्लवशंकर॥ प्रसीदप्रमथाधीश मन्मथांतकत्र्य
य॥ २॥ शंभो विश्वाक्ष विश्वेश विश्वतो मुख शंकर॥ भस्मस्नानविधिं शंभो वदैक करुणाकर॥ ३॥ ॥ श्रीस्कंद उवाच॥ ॥ इति देव्या तदा
पृष्ट ईशानो देवनायकः॥ विनायकगुरुर्देवो बभाषे लां गिरींद्रजां॥ ४॥ ॥ श्री ईश्वर उवाच॥ ॥ साधु पृष्टं त्वया (महा) भद्रे गुह्यमेव त्व
यां बिके॥ भस्मस्नानविधिं तेद्य प्रवक्ष्ये पापनाशनं॥ ५॥ भस्मस्नाने ष्वधिकृतः शांभवः शिवपादधीः॥ नेतरो देवि तत्पात्रं त्रि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेत्रप्रियमद्द्रिजे॥६॥नान्यपुंड्रधरः पात्रं भस्मस्नानेसदैवहि॥वैदिकोवेदनिरतोविरतस्त्वन्यकर्मणि॥७॥नतांत्रिकस्त्वधिकृतोनोर्ध्वपुंड्र
धरः शिवे॥सततंच क्वचिन्न्हः श्ववद्यज्ञेबहिष्कृतः॥८॥तद्धदेवात्रगिरिजेभस्मस्नानविधौमुदा॥ तत्रैतेबहवः श्लोकाबृहज्जाबाल
चोदिताः॥शृणुष्वसावधानेनभस्मस्नानविधौशिवे॥भस्मचोक्तंसमादायसंसितंमंत्रमंत्रितं॥१०॥मस्तकात्पादपर्यंतं मलस्ना
नंपरोदितं॥हन्मंत्रेणचकर्तव्यं,विधिस्नानंसमाचरेत्॥११॥ईशोनपंचधाभस्म विकरेन्मूर्ध्नियत्नतः॥चतुर्धापुरुषेणैववक्त्रे,हृदि
तथाष्टधा॥१२॥अघोरेणाथवामेन दशधा उदके करौ॥अष्टावंतेनसद्येनपादावुद्धूलयत्नतः॥१३॥सर्वांगोद्धूलनंकार्यंराजन्यस्य
यथाविधि॥मुखंविनाचतत्सर्वं उद्धूल्यक्रमयोगतः॥१४॥संध्यात्रयेनिशीथेवातथापूर्वापरा ह्नयोः॥सुप्त्वाभुक्त्वापयःपीत्वा
कृत्वाचावश्यकादिकं॥१५॥स्त्रीपुंनपुंसकंग्रध्रंबिडालंवालमूषकं॥स्पृष्ट्वातथाविधानन्यान्भस्मस्नानंसमाचरेत्॥१६॥देवाग्निगुरुविप्रानां
समीपेत्याज्यदर्शने॥अभ्युद्धभूतेमार्गेकुर्यान्नोद्धूलनंव्रती॥१७॥शंखतोयेनमूलेन भस्मव्यामिश्रणंभवेत्॥ एषितंचंदनेनापिवा
रिणासंयुतंतुवा॥१८॥चंदनेनसमालिंपेत् ज्ञानार्थीचूर्णमेवतु॥मध्यान्हात्प्राक्जलैर्युक्तंतोयंतदनुवर्जयेत्॥१९॥त्रिपुंड्रंकामये
त्सच्चाद्ब्रह्मविष्णुशिवात्मकं॥मध्यांगुलिभिरादायतिसृभिर्मूलमंत्रितं॥२०॥अनामामध्यमांगुष्ठैरथवास्यात्त्रिपुंड्रकं॥उद्धूलयेन्मुखंवि
प्रःक्षत्रियस्तच्छिरोधिकं॥२१॥द्वात्रिंशत्स्थानकेवार्धं षोडशस्थानकेपिवा॥अष्टस्थानेतथाचैव पंचस्थानेपियोजयेत्॥२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० उत्तमांगे ललाटे च कर्णयोर्नेत्रयोस्तथा ॥ नासावक्त्रगलेष्वेमुंसद्वयमतः परं ॥२३॥ कूर्परे मणिबंधे च हृदये पार्श्वयोर्द्वयोः ॥ नाभौ गुह्यद्वये चैव मूर्वोर्गुल्फौ ईशा०द०पू०
११ चजानुनी ॥ जंघाद्वये च पादौ द्वौ द्वात्रिंशत्स्थानमुत्तमं ॥ अष्टमूर्त्यष्टदिग्देशादिक्पालान्वसुभिः सह ॥२५॥ धराध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ॥ प्रत्यू अ०६
षश्च प्रभासश्च वसवोऽष्टावितीरिताः ॥२६॥ एतेषां नाममंत्रेण त्रिपुंड्रं धारयेद्बुधः ॥ विदध्यात्षोडशस्थाने त्रिपुंड्रं तु समाहितः ॥२७॥ शीर्षके च ललाटे च कंठे
चांसद्वयोरिति ॥ कूर्परे मणिबंधे च हृदये नाभिपार्श्वके ॥२८॥ पृष्ठे चैकं प्रतिष्ठाय जपेत्तत्राधिदैवतं ॥ शिवं भक्तिं च नादाख्यं ईशं नादाख्यमेव च ॥२९॥ वामादि नवशक्तीश्च रता
षोडशदेवताः ॥ नासत्यो दस्रकश्चैव मश्विनौ समीरितौ ॥३०॥ अथवा मूर्ध्नि केशे च कर्णयोःश्वसने तथा ॥ बाहुद्वये च हृदये नाभ्यामूर्वोर्युगे तथा ॥३१॥ जानुद्वये च पदयोः पृष्ठ
भागे च षोडश ॥ शिवश्चंद्रश्च रुद्रार्कौ विघ्नेशो विष्णुरेव च ॥३२॥ श्रीश्चैव हृदयेशश्च तथा नाभौ प्रजापतिः ॥ नागाश्च नागकन्याश्च उभयोऋषिकन्यकाः ॥३३॥ पादयो
श्च समुद्राश्च तीर्थाः पृष्ठेऽपि शास्त्रतः ॥ एवं च षोडशं ध्यायेदष्टस्थानमथोच्यते ॥३४॥ गुरुस्थानं ललाटं च कर्णद्वयमनुत्तमं ॥ अंसयुग्मं च हृदयं नाभिरित्यष्टमं भवेत् ॥३५॥
ब्रह्मा च ऋषयः सप्त देवताश्च प्रकीर्तिताः ॥ अथवा मस्तकं बाहु हृदयं नाभिरेव च ॥३६॥ पंचस्थानान्यमून्याहुर्भस्मतत्त्वविदो जनाः ॥ यथासंभवनं कुर्याद्देशकालाद्यपेक्षया
॥३७॥ उद्धूलनेऽप्यशक्तश्चेत्त्रिपुंड्रादीनि कारयेत् ॥ त्रिनेत्रं त्रिगुणाधारं त्रयाणां जनकं विभुं ॥३८॥ स्मरन्नमः शिवायेति ललाटे तु त्रिपुंड्रकं ॥ ईशाभ्यां नम इत्युक्त्वा पा
र्श्वयोश्च त्रिपुंड्रकं ॥३९॥ बीजाभ्यां नम इत्युक्त्वा धारयेत्तु प्रकोष्ठयोः ॥ कूर्परकाधः पितृभ्यां च उमेशाभ्यां तथोपरि ॥४०॥ भीमायेति ततः पृष्ठे शिरसः पश्चिमे
तथा ॥ नीलकंठाय शिरसि क्षिपेत्सर्वात्मने नमः ॥४१॥ पापं नाशयते कृत्स्नं अपि जन्मशतार्जितं ॥ कर्णोपरिकृतं पापं नष्टं स्याद्भस्मधारणात् ॥ कंठे च धारणात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कंठे भोगादि कृतपातकं॥तद्भस्मधारणं मुख्यं सर्वत्रैव त्रिपुंड्रकं॥४३॥ ब्रह्मविष्णुमहेशात्मत्रया ग्नीनां च धारणं॥ गुणलोकत्रयाणां च धारणं तेन वै कृतं॥४४॥
तेनाधीतं गुरोश्चैव तेन सर्वमनुष्ठितं॥येन विप्रेण शिरसि त्रिपुंड्रं भस्मना कृतं॥४५॥ त्यक्तवर्णाश्रमाचारो लुप्तवर्णक्रियोपि यः॥सकृत्तिर्यक्त्रिपुंड्रधार
णात्सोपि मुच्यते॥४६॥ये भस्मधारणं मुक्त्वा कर्म कुर्वंति मानवाः॥ तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः॥४७॥ महापातकयुक्तानां पूर्व
जन्मसु सर्वतः॥त्रिपुंड्रोद्धूलने द्वेषो जायते सुदृढं बुधैः॥४८॥येषां द्वेषो भवेद्ब्रह्मन् ललाटे भस्मदर्शनात्॥ तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता॥४९॥
ये भस्मधारिणं दृष्ट्वा नराः कुर्वंति ताडनं॥तेषां चंडालतो जन्म ब्रह्मन्नूह्यं विपश्चिता॥५०॥ येषां नास्ति मुने श्रद्धा श्रौते भस्मनि सर्वदा॥गर्भाधानादिसंस्कारस्तेषां नास्ती
ति निश्चयः॥५१॥त्रिपुंड्रं ये विनिंदंति निंदंति शिवमेव ते॥धारयंति च ये भक्त्या धारयंति तमेव ते॥५२॥धिक् भस्मरहितं फालं धिक् ग्राममशिवालयं॥धिगनीशार्च
12 नं जन्म धिग्विद्यामशिवाश्रयां॥५३॥रुद्राग्नेर्यत्परं वीर्यं तद्भस्म परिकीर्तितं॥ तस्मात्सर्वेषु लोकेषु वीर्यवान् भस्मसंयुतः॥५४॥भस्मनिष्ठस्य दह्यंते दोषा भस्माग्नि
संगमात्॥भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः॥५५॥ भस्मसंदिग्धसर्वांगो भस्मदिव्यत्रिपुंड्रकः॥भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः॥ ५६॥ ॥
श्रीस्कंद उवाच॥ ॥अष्टस्थानधृतं त्रिपुंड्रमलिके स्याद्रुद्रमूर्त्तिप्रियं॥तद्वै द्वादशभानुदैवतमुमे तद्द्वादशांगैर्धृतं॥५७॥ मन्ये षोडशशीतलांगकलया धार्यं
त्रिपुंड्रं तनौ॥द्वात्रिंशस्थितवर्ष्मणि त्रिभुवनाधीशास्पदं प्राप्नुयात्॥५८॥धृतं ललाटे क्षितिदधातिफाले पापावथैणं शिरसीं दुगंगे सु ॥वक्षः चक्षुश्रवसोरुहारे हरो भवे
द्भूति विभूतिभानैः॥यो वा हृत्सप्तकमनुप्रथितोरुभस्म भीषा त्रियायुषमनुप्रथितोरुपुंड्रः॥५९॥फाले णवा हृत्सरव एण कृतां कमौलि रेणी दृशार्धतनुरे णाकरो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० १० भवेत॥ त्रैवर्णिकानामिदमेव भस्म धार्यं सदा श्रौतभवं ग्रहस्थैः॥६०॥ विरजानलजं समिद्भवं वा सद्भिर्वर्णिभिः किल धारयेद्विभूतिं॥ स्मृतिजातानलभस्म धार्यमा ईशा० ६: पू
११ हुःगृहिणो वै नियमेन सर्वथाहि॥६१॥ वनसावोत्थभवं वने चरैर्यतयः सर्वगतं सितं सदा॥ अतिवर्णाश्रमधर्मतत्परः पितृकांतारगतं विलेपयेत्॥६२॥ विप्राणां अ ६
पंचनाग्निसंभवमुमे धार्यं त्रिपुंड्रात्मना भस्मैवाघहरं भवेत्तर्हि तत्कृत्पादोद्भवानां सदा॥ संकीर्णेष्वपि रथ्यपथ्यविहितं भस्मैव तत्पावनं धन्यानामिदमेव मं
गलकरं सत्फालनेत्रं मुने॥६३॥ भस्मत्रिपुंड्रपरिमंडिततुंडगंडश्रीबाहुदंडयुगलांसहृत्पिचंडः॥ चंडांशुसूनुनिलयं न स जातु पश्येदिंदुप्रभासरसमौक्तिकया
क्षघंटैः॥६४॥ भवेत्स विभवाधिकः प्रतिभवेपि भावादरो भवोद्भवसमर्चनप्रभावितात्मभावः सदा॥ भजेत भसितं सितं यदि तदांत्यजः संत्यजन् भवेत कितवा
नरः परमकातरः पामरः॥६५॥ शिवे भसितभूषणो भवति भाग्यपूर्णो नरो वरश्रुतिपरायणोप्यहह भस्मपुंड्रोज्झितः॥ द्विजाधमकुलानलप्रबलधूमकेतुर्भवे
त्कदापि नरकालयान्नहि स जातु मुच्येदपि॥ धृतसितभसितत्रिपुंड्रभूषा यतिमतिगतिदायिनस्तु तेशाः॥६६॥ कृतवरसुकृताजितारिवर्गामितहितनप
साभवंति हाराः॥ नस्नानशौचाचमनक्रियाभिः शुद्ध्यंत विद्यापि कृताकृतेर्हि॥६७॥ भस्मत्रिपुंड्रोज्झितफालगात्रः पात्रं न सामुष्मिकपुण्यहेतौ॥ वीतैषण
स्त्रिषवणं किल भस्मभूषो यो वा विरक्तहृदयः किल भक्तवर्यः॥ शाक्तः समुक्तिपदवीमभिवीक्षितांतुं वै त्र्यक्षप्रसादमखिलं सततं लभेत॥६८॥ ॥
इतिश्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्द्धे षष्ठोध्यायः॥६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥ ॥ ॥
श्रीस्कंद उवाच॥ ॥मानस्तोकेति मंत्रेण मंत्रितं भस्म धारयेत्॥ ऊर्ध्वपुंड्रं भवेत्साम मध्यपुंड्रं यजूंषि च॥१॥ अधःपुंड्रमृचः साक्षात्तस्मात्पुंड्रं त्रियायुषं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रियायुषाणि कुर्वीत ललाटे भुजयोर्हृदये ॥२॥ नाभौ शिरसि हृत्पार्श्वे ब्राह्मणाः क्षत्रियास्तथा ॥ वैश्यास्त्र्यंबकेनैव शूद्रः पंचाक्षरेण तु ॥३॥ स्त्रीणां च स
धवानां तु पंचाक्षर त्रिपुंड्रकं ॥ विधवानां तथैवायं विधिः प्रोक्तोथ शूद्रवत् ॥ त्र्यंबकेन मनुना ब्रह्मचारी सदैव हि ॥ पंच ब्रह्मादिमनुभिः गृहस्थस्य
विधीयते ॥५॥ अघोरेणाथ मनुना विपिनस्था विधिः स्मृतः ॥ यतिस्तु प्रणवेनैव त्रिपुंड्रादीनि कारयेत् ॥६॥ अतिवर्णाश्रमी नित्यं शिवोऽहं भावनात्म
ना ॥ शिवयोगी च नियतं ईशानेन विधारयेत् ॥७॥ नत्याज्यं सर्ववर्णैश्च भस्मेदं शिवशासनं ॥ अत्रेदमितिहासं ते नाम पंचक भासकं ॥८॥
वासिष्ठोथ मुनिः कश्चिदवंत्यो वेदवित्तमः ॥ धनंजय समो विप्रो नाम्ना वासीत् धनंजयः ॥९॥ तस्य भार्या शतं चासीद्रूपलावण्य शोभितं ॥ जे
ष्ठिनेयस्तस्य सुतो करुणो नाम तोऽभवत् ॥ उपनीतः सकालेन वेदानभ्यग्रहीत्स हि ॥ भार्गवीमुपयेनेस कन्यां कमललोचनां ॥११॥ पितर्युपरते काले
भ्रातृभिः कलहोद्यतैः ॥ विभज्य तत्पितृधनं भवनाशात् तं ययौ ॥१२॥ तत्राश्रमोचितं कर्म निर्वर्त्य समवस्थितः ॥ नृसिंहमगमत्तत्र हरिं संसेवितुं द्वि
13 जः ॥१३॥ ब्राह्मणेन पुरोन्यस्तं नृसिंहोपायनं फलं ॥ अजिघ्रत्सोथ जंबीरं गंधवत्कांचनप्रभं ॥ तेन विप्रेण शप्तोऽसौ मक्षिकत्वमुपेयिवान् ॥ भार्यामा
हूय विप्रोसौ जगाद स्वस्य चेष्टितं ॥१५॥ मां रक्षेति तदा प्राह करुणं शरणायतां ॥ मक्षिकां तामरक्षत्सा तदंतर विरोधिनः ॥१६॥ भ्रातरस्तेऽस्य तं पापं तैल
मध्ये ह्यमारयन् ॥ सामृतं स्वपतिं गृह्य अरुंधत्यैन्यवेदयत् ॥१७॥ रुदतीं सा विशालाक्षी तां सांत्वैः समतोषयत् ॥ ॥ अरुंधत्युवाच ॥ ॥ शोके
नालमितो भद्रे भस्मना जीवयाम्यहं ॥ अग्निहोत्रोद्भवं भस्म समानय द्रुतं मम ॥१८॥ समानीय ततो भस्म ददौ तस्याः करे सती ॥ मृत्युंजयेन मंत्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५ पंक्ति४ – "क्रियाऽवनम्रास्ते देवा पुरहूतपुरोगमाः॥ दुर्वाससं भस्मनिष्ठं अगच्छन् शापशान्तये॥ २६॥"

शिवरह० १० प्राम्रतज्जंतौतदाक्षिपत्॥१९॥मंदवायुस्तदाजज्ञे व्यजनेनशुचिस्मिता॥उदतिष्ठत्ततोजंतुःभस्म नास्यप्रभावतः॥२०॥ततोवर्षशतांतेऽस्य भ्रातास्थितिमवा द्रशा०द०प्र० अ०७

१२ प्रवान्॥काश्यपोदुष्टसर्पेण दष्टोऽपि पुनरुत्थितः॥२१॥भस्मनोस्य प्रभावंवै तस्मादृक्षेति नामतः॥तस्माच्च भस्मनोवीर्यात्तस्यपुत्रोभवन्मुनिः॥२२॥

दधीचिस्तपतांश्रेष्ठः तपस्वीतपनप्रभः॥शंभवोऽसौमुने तत्रसुरकार्यार्थमुद्यतः॥२३॥गोतमस्यमुनेः पूर्वंविवाहेऽहल्ययासह॥रूपयुक्तां देवगणाः तां

वीक्ष्य प्रमदोत्तमां॥कामप्रमादोपहताः निर्धूतरभसोभवन्॥इंद्रोपिसंगतस्तस्यां शप्तश्चाक्षपदेनहि॥२५॥प्रणम्यशांभवश्रेष्ठं भस्मनिष्ठंसुरास्तदा॥प्रा

हुःप्रांजलयः सर्वे स्वागोमुनिवरंप्रति॥२७॥ ॥देवाऊचुः॥ ॥क्षमस्वनोमुनिश्रेष्ठ स्वागोहेतुंतदद्यनः॥इंद्रंचकृपयावीक्ष्यपाह्यस्मान्मुनिशापतः

॥२८॥इत्युक्तं देववचनंश्रुत्वातानाहसुव्रतः॥ ॥दुर्वासाउवाच॥ ॥तद्दोषंशमयिष्येहंभस्मनैवसुरोत्तमाः॥शतरुद्रोत्थमंत्रेण मंत्रितेनैवभस्म

ना॥शमयिष्येमुनिकृतंशापेनेंद्रविरूपतां॥३०॥इत्येवमुक्त्वादूर्वासादत्तवान्भस्मचोत्तमं॥ब्रूतमद्वचनात्सर्वे यूयंवैकृतरेभसः॥शतरुद्रेणमं

त्रेणभस्मोद्धूलितविग्रहाः॥निर्धूतरेभसःसेंद्राःसुराआसन्ननेनसः॥३२॥आश्चर्यमेतज्जानीहिप्रभावंभस्मनोमुने॥एकार्णवेयुगांतेहिपुराहि

शयनेहरिः॥३३॥योगमास्थायपरमं शिश्येसतमसावृतः॥जानुदघ्नेऽर्णवजलेसंचरन्परमेश्वरः॥३४॥शूलासक्तमहास्कंधःसोमार्धकृतशेखर

रः॥दृष्ट्वाहरिंकरुणयास्वभावतमसावृतं॥३५॥अप्रणम्यस्थितं ज्ञात्वा तदज्ञाननिवृत्तये स्ववक्षसिस्थितंभस्म नखेनादाय शंकरः॥३६॥प्रण

वेनाभिमंत्र्याथ शिवपंचाक्षरेणहि॥हरिमस्तकगात्रेषु भस्मतत्क्षिपदंजसा॥३७॥शिवांगसंगभस्मादिसवृत्तांगोहरिर्हरं॥संत्यज्यतामसं हृत्स्थं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यायन्नभ्युत्थितो हरिः ॥ ३८ ॥ साष्टांगमथ मूर्तिंतमष्टांगं प्रणिपत्य च ॥ दृष्टेश्वरं भक्तिगम्यं भस्माभक्षय दच्युतः ॥ ३९ ॥ तदैवासीद्धरिः पूर्णपक्वबिं
बसमद्युतिः ॥ वासुदेवः शुद्धमुक्ताफलवर्णो भवत्तदा ॥ ४० ॥ तदाप्रभृति मुक्ताभो वासुदेवो मुनीश्वर ॥ तुष्टावदेवं दृष्ट्वासौ शिपिविष्टमुमासखं ॥ ४१ ॥
श्रीविष्णुरुवाच ॥ ॥ त्र्यक्षाक्षयोरुरक्षाक्षापितहृदिमम ध्वांतसंघातवक्षः क्षोभाक्षक्षतशिक्षयाद्भुतसुराध्यक्षाद्यसंवीक्षितः ॥ वीक्षाशिक्षितदक्ष
पक्षसुमधुक्कानांतकस्वध्वरा ध्यक्षाक्षोभ्युगुणाकरार्णवनिभो मां रक्ष उक्षध्वज ॥ ४२ ॥ वेदांतस्तुतवस्तुरूपरहिताप्रमेयादि मायोज्झितप्रज्ञानंदघनैकनि
स्तुलतलसत्प्राचांवचोदूरग ॥ मस्तेनाभिनमंतियेतवपदं तेस्वस्तयेहीक्षितो स्तोताकस्तवसंस्तवाघगणानागपयेषु शस्तं मनः ॥ अत्राक्वं तेरूपं परमपरम
प्राप्यहरये भवाभावंप्राप्ता विधिहरसुराश्चासुरगणाः ॥ महाग्रासोरुद्रो भवसि भगवन्नद्भुततरो वरीयान्नोजिष्ठो बृहदणुकरूपोसि महिमा ॥ ४४ ॥ श्रीस्कंद उवा
च ॥ ॥ इत्थं स्तुत्वा तदा विष्णुः महादेवं तदावदत् ॥ प्रणम्य भस्मफालोहि भवप्रणमानसः ॥ ४५ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ न शक्तिं भस्मनो जाने प्रभा
वं ते कुतो विभो ॥ नमस्तेस्तु महादेव त्वामेव शरणं गतः ॥ ४६ ॥ त्वत्पादयुगले शंभो भक्तिरस्तु सदा मम ॥ श्रीस्कन्द उवाच ॥ तत्र विष्णोर्वचः श्रुत्वा तत्स्तुत्या तुष्ट ईश्वरः ॥ ४७ ॥ स्पृष्ट्वा
विष्णोः शिरस्तत्र भस्मना पावितेन हि ॥ उवाच घनघोषेण उच्चैर्घोषो महेश्वरः ॥ ४८ ॥ ॥ श्री ईश्वर उवाच ॥ ॥ भस्मधारणसंपन्नो मम भक्तो भविष्यसि ॥
14 त्वं भस्मनिष्ठो नितरां पालयेदं चराचरं ॥ ४९ ॥ पुनस्ते भस्मनो वक्षे महिमानं शृणुष्व मे ॥ श्रीस्कन्द उवाच ॥ उमानाथो रमानाथं वीक्षतामगजां तदा ॥ ५० ॥ एवमाह विरूपाक्षः
पद्माक्षं वीक्ष्य सादरं ॥ ॥ ईश्वर उवाच ॥ ॥ मानस्तोके तिशस्तं भसितमतिसितं हस्तमध्यांगुलीभिः न्यस्तं फालतले त्रिपुंड्र रचनाद्विध्वस्तपापो भवेत् ॥
॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० स्रस्तं तस्य महेश पादकमलोदारप्रभूतं मधु व्यस्तं पापगणेन यस्तु भसितेनाध्यस्तमस्ते शिवे ॥ ५१ ॥ त्रिपुंड्रविधिधृतिः शिवे किल ईशा०द०पू०
१४ महाघशैलातुलं कुलाचलविलोपने मुदिर वृष्टिसृष्टिप्रभः ॥ ५२ ॥ भवाखिलविभावरि परमचानुशेसीमभूर्भवेतविभ अ०७
वाधिकः परमकालकालप्रियः ॥ ५२ ॥ अभावभवभावकृद्भवपदाब्जभावोद्भवं भवेत विभवाधिकं प्रतिभवेपि भावस्य हि ॥ ५३ ॥
शिवे भसितधारणं सितहितामितार्तिं हरं त्रिपुंड्रमिदमेवमे प्रबल पाप तूलानलं ॥ ५३ ॥ श्यारंत्विदं निखिलपापहरं प्रदोषे सारं धृतं भसित
मेव भवेकसारम् ॥ ५४ ॥ पारं भवेत भवसागरतारणाय हारं वरं श्रुतिशिरोनगबोधकारं ॥ ५४ ॥ अकार्यकरणाद्यहृत्करणजाम्प्रयंत
तो विशेषसरणेन वै भसितधारणेनाद्भुते ॥ ५५ ॥ शिरः करउरोदरे करपदोरुभागे धृतं भगाक्षिः हरपूजनप्रकरणेकहृत्पू
रणं ॥ ५५ ॥ द्विजांत्यजवधाच्छिवे त्यजति पातकं पात्कृतं श्वरत्यजलिपीगतं शिरसि धार्यमेतत्सदा ॥ ५६ ॥ ५५ ॥ भजेत भसितं सितं द्विजवरो
नरो वांत्यजो मम प्रियतरो विके भवति भाग्यपूर्णो जनः ॥ ५६ ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे सप्तमोध्यायः ॥ ७ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ ईशानायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ पुरा मंकणकः सिद्धः फणिभूषणपादधीः ॥ भस्म
निष्ठस्तदा शंभुं तपसाराध्य वै मुने ॥ १ ॥ ते भसितव्यक्तं कंविप्र अथ मूर्तिं कृपारसैः ॥ लेखवालभ्यं पदं शंभोः तास्यात्केनास माप्तवान् ॥ २ ॥
शिवपादैकनिष्ठेन मनसा स महामनाः हारो हारैकमनसा योगं माहेश्वरं परं ॥ ३ ॥ युयोजविजितक्रोधः कामजिच्छं भवोत्तमः ॥ शिवो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्तेनैव मार्गेण पुण्यमाथर्वणोदितं ॥४॥ चक्रे शिरोव्रतं श्रौतमश्रांतमनसा मुनिः ॥ भस्मनिष्ठो भवद्विप्रो भस्मांगो भस्मभावनः ॥५॥
शतं वर्षाणि स मुनिस्तदा चक्रे शिरोव्रतं ॥ सदा त्रिषवणस्नायी त्रिवारं भस्मभूषणः ॥६॥ वैराजमग्निमिंधानो विसृजाः स राराजहि ॥ द्विजराजकलाभो
लिपादाब्जभ्रमरोपमः ॥७॥ रुद्रमावर्त्तयन्भक्त्या युक्तः स मुनिरास्त हि ॥ हिमांशुपांडुरं भस्म तस्यांगात्सुस्रुवे तदा ॥८॥ ॥जैगीषव्य उवाच॥
क्रौंचदारण सर्वज्ञ विस्मयो मे महानभूत् ॥ कथं मंकणकः सिद्धः स्नातो भवेभस्मभावनः ॥९॥ लेभे स परमां सिद्धिमित्यवादि त्वया ह्यहि ॥ सर्वाथर्व
महासारं पापगर्वनिवारणं ॥१०॥ शिरोव्रतं कथं चक्रे तन्मे वद विशेषतः ॥ शिवप्रसादपात्रं वै मुनिः केनाभवत्तदा ॥११॥ शिपिविष्टोपदे
शेन कथं चक्रे शिरोव्रतं ॥ तन्मे वद विशेषेण चरितं मंकणस्य हि ॥१२॥ ॥श्रीसूत उवाच॥ ॥जैगीषव्येन मुनिना पृष्टस्तु षण्मुखः ॥
सन्मुखवायाथ मुनये बभाषे मांकणीं कथां ॥१३॥ ॥सुब्रह्मण्यः ॥उवाच॥ शृणु त्वं मुनिभिः सार्द्धं वृंदारकगणे मुने ॥ यथोपदिष्टो देवे
न मुनिर्मंकणकः पुरा ॥१४॥ गरभूषणपादाब्जे सदा प्रवणमानसः ॥ हिमवच्छिखरे रम्ये पुण्यवृक्षोपशोभिते ॥१५॥ रसालतालहिंताल
तमालामलकैर्युतं ॥ सालजाल महाबिल्व पनसाम्रातकैर्युते ॥१६॥ पुंनागनागपीताम्र लिकुचैर्बकुलैर्धवैः ॥ केतकीसर्जभुर्जाद्यैर
15 र्जुनैश्चंदनैर्युते ॥१७॥ क्रमुकाक्रामित द्राक्षा वल्लिगुच्छविराजिते ॥ एलांदोलितवल्लीज मल्लिकाकुसुमोत्करे ॥ कदंबवृंद पुष्पौघ
रजसा छादि भूतले ॥ वनावनी रमन्मंद समीरणविराजिते ॥१८॥ तत्पुष्पमकरंदौघ दुग्धबंधुरतर्पिते ॥ सरोद्भव सरोजश्री विराजत्फुल्लह

शिवरह०१० ल्लके॥२०॥पुष्पगुच्छच्छटामोदसत्प्रच्छद विराजिते॥राजत्कोकनदामोदसमुद्यन्मंदमारुते॥२१॥शारिकाविरुतोड्डीनशिखंडिज विराजिते॥ ईशा० द० पू०
१५ पुंस्कोकिलकुलारावकेकीकूजनसंजिते॥२२॥गंधर्वगीतबहुलमृदंगध्वनिसंयुते॥हरिणीगणसंचारपंकाक्रखुरभूतले॥२३॥ करींद्रीकर अ०८
संस्त्राविमदामोदितभूतले॥महामहिषहुंकारप्रतिध्वनितकंदरे॥२४॥सुंदरे तद्वने तत्र चचार समहत्तपः॥सहि मंकणकः सिद्धः फणिकंकण
पूजकः॥२५॥महालिंगंतत्रमुनिः प्रतिष्ठाप्यर्चयच्छिवं॥त्रिकालंभस्मनिरतो विरतोविषयेषुसः॥त्यक्तैषणः त्रिषवणो भस्मस्नानरतः स
दा॥अग्निरित्यादिभिर्मंत्रैः यंत्रितांगः सभस्मना॥२६॥त्रियायुषत्रिपुंड्रांको शशांकांकितमौलिधीः॥शंकातंकादिरहितः कालांतकसमर्चकः
॥२८॥भस्मच्छन्नोभस्मसंस्थः स्वस्थोरुद्रमजीजपत्॥शतंवर्षाणिहृष्टात्मा वर्षास्वभ्रावकाशकः॥२९॥अदभ्रभक्तिरभ्रौघैः छन्नोऽपिस्व
स्थमानसः॥निरिच्छोऽन्यसुरार्चायां हृच्छयादिविवर्जितः॥३०॥पंचाग्निमध्यनिरतः भस्माभ्यक्तोभवाश्रयः॥भवभावसमासक्तोभावोभ
वपराश्रयः॥३१॥शांतिदांत्यादिनिरतः मुक्तिमार्गैकतत्परः॥तंतादृशंतपश्यंतं पश्यंतित्रिदशामुने॥३२॥सरोजासनआगत्य तंतदाप्राह
विस्मितः॥ ॥ब्रह्मोवाच॥ ॥ब्रह्मन्ब्रह्माहमागत्य त्वदग्रेसंस्थितोमुने॥सहैभिश्चसुरैः सार्धं वृणुमत्तोवरंवरं॥३३॥तदापद्मासनवचः
श्रुत्वानत्वातमब्रवीत्॥ ॥मंकणउवाच॥ ॥धन्योमान्योऽद्यतेब्रह्मन्दर्शनादेवमेमनः॥नाहंत्वत्तोवरंयाचे, याचेभक्तिंशिवेस्थिरां
॥३४॥त्वमेवेशप्रसादेन प्राप्तोसिपरमंपदं॥वेदजालंसृष्टिबलं बलप्रमथनार्चनात्॥३५॥याहि त्वंवैसुरैः सार्धं तवत्तोकंपितामह॥६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्युक्तस्तं तदा प्राह मुनिं पद्मासनस्तदा ॥३६॥ ॥ब्रह्मोवाच॥ ॥त्वं मंकणास्तपः सिद्धः भवभक्तोसि सत्तम ॥ उत्तमोसि मुनीन्द्रा
णां प्रसन्नोस्तु भवस्त्वयि ॥३७॥ भवस्य तपसे भूत्यै भवभक्तिर्भवेत्त्वयि ॥ भवतां भवशांतिर्हि भवादेव भविष्यति ॥३८॥ भविष्य
ति त्वयि प्रीतो भव एव न संशयः ॥ भस्मच्छन्नोसि नितरां सिद्धोसि त्वं न संशयः ॥३९॥ तमामंत्र्य मुनिं तत्र ययौ लोकं विधिः सुरैः ॥
पुनस्तत्तापसिद्धोसौ मंकणो भस्मभूषणः ॥४०॥ फणिभूषणपादाब्जचरणस्मरणादरः ॥ तं विष्णुर्गरुडारूढः शंखचक्रगदा
धरः ॥४१॥ स्वपार्षदैः परिवृतो ययौ तं मुनिपुंगवं ॥ तमाभाष्य बभाषेवं विप्रमाक्षार्चनेरतं ॥४२॥ ॥श्रीविष्णुरुवाच॥ ॥
शांभवोसि मुनिश्रेष्ठ शिपिविष्टपदार्चक ॥ निष्ठां तवेदृशीं दृष्ट्वा विस्मयो मे महानभूत् ॥४३॥ तया वीक्षितुमायातः शिवभक्तिं
तवेदृशीं ॥ ॥सूत उवाच॥ ॥इत्थं विष्णुवचः श्रुत्वा निमील्य नयने स्वके ॥ अशांभवं च तच्चिन्हं दृष्ट्वा विष्णुं तदाब्रवी
त् ॥ ॥मुनिरुवाच॥ ॥नाहं त्वत्तो वरं याचे याचे भक्तिं महेश्वरे ॥ अशांभवं त्वां दृष्ट्वैव नाहं वीक्षे जनार्दन ॥४५॥
16 यस्य लिंगार्चनेनैव विष्णुत्वं प्राप्तवानसि ॥ त्वं पालको जगत्यस्मिन् वैकुंठस्याधिपः कृतः ॥४६॥ महेशेन प्रसन्नेन न
न त्वत्तो कांक्षये वरं ॥ याहि याहि यथाजोषं विशेषो नास्ति ते मयि ॥४७॥ नाहं त्वत्तोपि याचे वरममरधुनीधन्यमूर्ध
न्यमौलेर्नाहं चान्यं सुरं वा शतमुखममरं शंकरान्यं न वीक्षे ॥ यत्त्र्यक्षाक्षतपादपंकजरजोलेशांशलेशांशतो याचेहं वर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

*पंक्ति ३ – "त्वद्भावं विमर्श विलोक्य तव हृद् ज्ञातुं प्रवृत्तस्त्वयि॥ भावेष्येव भवान्तको हि भगवान् शीघ्रं प्रसन्नो भवेत् ॥५१॥"

शिवरह° १० मेव नावरमहं विष्णोर्नद्रष्टे मनाक् ॥४८॥ इत्युक्तं मुनिवचनं निशम्य धार्ष्ट्यं, विष्णुस्तं मुररिपुराबभाषे॥ भीतोभावमनो नि ईशा॰ द॰ पू॰
१६ रीक्ष्य भसित प्रोद्धूतपापं तदा॥४९॥ ॥श्रीविष्णुरुवाच॥ ॥त्वं भावोसि भवोत्तमांबुजपदध्यानैकसन्मानसः॥ भस्मो अ॰ ८
द्धूलित दिव्य भासुर महा दिव्यत्रिपुंड्रांकितः॥५०॥ इत्युक्त्वा (कृत्वा) सथयो हरिर्हरमहा भक्तं च युक्तं मुनिं सत्कं शंभुपदांबुजार्च
नरतं संवीक्ष हृष्टोऽभवत्॥५२॥ लक्ष्म्या वै गरुडेन पार्षदगणो रुद्राभिषिक्तोत्तमैः नीरैस्तैः स्वशिरस्यहोभिषिषिचे धन्यं अ
मन्यन्मुनिं॥ ॥श्रीईश्वर उवाच॥ ॥ते खाशाखा मख मुखशिखिना माख्यया भस्म रेखा प्रोक्तास्ता वै नखशिखर
हिता कुर्यु रंगुष्ठतो हि॥ ते सर्वे सुखिता भवंति गिरिजे ते ष पमुखास्योपमाः॥ अन्ये तद्रहितांश्च दुःखपरमा मत्संमुखे वर्जि
ताः॥५३॥ कतिकति मतिहीना ऊर्ध्वदांगाविहीना दीनातिमीलाइव भुवि तरला सूर्यधर्मानुतप्ताः॥ भाले भस्मादिहीना कृति म
तिविमुखा मय्यनंते कृतांत॥ श्रांता वाताइवेशि प्रतिजनि विनुता बालबालेयतुल्याः॥५४॥ ॥इतिश्रीशिवरहस्ये
ईशानाख्ये दशमांशे पूर्वार्धे मंकणिकोपाख्यानं नाम अष्टमोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्री ई
शानाय नमः॥ ॥श्रीस्कंद उवाच॥ ॥एवं तपस्यतस्तस्य मंकणस्य महामुनेः॥ भस्माभ्यक्तस्य नियतं त्रिपुंड्रा
लंकृतस्य च॥१॥ शरत्सुधांशुधवलं भस्मांगान्निर्गतं मुने॥ ततः स्वांगं समुद्वीक्ष्य (क्ष्य) त्र्यक्षलिंगार्चनः प्रियः॥२॥ भस्मनिष्ठो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुदं प्राप शिपिविष्टनिविष्टधीः॥ जपन् छ्री शतरुद्रीयं हर्षवर्षेण तर्षितः॥ ३॥ पुनः कैरुल्लूसद्वाचाविनैचपदभावनः॥ ततस्तुष्टाव हृष्टा
त्मा मंकणः पणिकं कर्णं॥ ४॥ ॥मंकण उवाच॥ ॥अहो मे तपसः सिद्धिः सिद्धा शंभोः प्रसादतः॥ मदंगेभ्यो भस्मधाराः सरद्धाकाक
राः सदा॥ ५॥ विनिर्गताः प्रमातीव प्रमोदामोदते मनः॥ इत्थं स मंकणस्तत्र विकथं मेरुमस्तके॥ ६॥ ननर्तानंदविवशो महेशं संस्तुव
न्सदा॥ शतं वर्षाणि मुदितो भस्म स्वांगे भिवीक्ष्य सः॥ ७॥ ॥मंकण उवाच॥ ॥हे शंभो भगवन् महेश गिरिजाजाने न जाने विभो त्वत्तो
ऽहं शशिसंगरंगितमहागंगातरंगोद्धत॥ विद्युत्पुंजसमाधिकावृतजटाजूटं नियाल्लेक्षणं वंदे देवशिखामणिं गरगलोदारं हरं शंकरं॥
मारापारक्षरादिभीकरकणासारेण संहारिणं॥ भो भर्ग त्रिजगच्छरण्य चरणांभोज प्रभा भावतः॥ भस्मोद्धूलितकामिनीवरधृतार्धां
गांग संगप्रभो॥ त्वत्तो वेद्मि न चैव कुत्सित सुरोदारं वरं पामरं॥ हारं धीरतरं मम वहृदयं जानासि शंभोधुना वीक्षा शिक्षित मन्मथां
तकपुरं दक्षादिदीक्षापहं॥ त्र्यक्षं भिक्षित मौनि योषित मुमाकांतं क्षपेशांकितं॥ १०॥ उक्षांगस्थितमप्रमेयविभवाध्यक्षं हि वीक्ष्ये
17 कदा॥ भक्षीभूतगरं भवार्णवहरं पक्षींद्रवाहार्चितं॥ सोमावतंस वरसाम सुगीत शंभो निर्धूतकाम गिरिजापरिपूर्णकाम॥ निःसीमभूम
महितं भगवन्नमस्ते॥ त्वं व्योमधाम गरिमा लघिमा सम श्व॥ त्वच्छासनं भसितमेव भवादिरोग संशामनं शमन भेदनमेव शंभो॥ त
द्भेषजं भवति भूतिकरं महेश॥ पारं भवेत भवसागर तारणाय॥ १२॥ लिंपन्निलिंप पदवी मदवीयसीं वै॥ यात्येव तद्भसित फाल तलं सि
तेन॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० मृत्स्नामलीकतिलकं त्वलिके हि बिभ्रन्कृत्स्नं महाघनिचयं स लभेत शंभो ॥१३॥ योनिर्भसितत्रिपुंड्ररहितो ह्याहितोग्नावघोमग्नो या ईशा०द०प्र
१७ त्यनुवासरं स नितरां न नग्नो विभूतिर्विना ॥ शावास्पृश्यसमं तदीयमधुना देहं हि दाहोपमं हाहा हंत भवेत पातकं करं त्र्यक्षाधुना नेक्षये ॥१४॥ अ९
तस्यानुक्षणदुर्मुखाधममुखं दृष्टं च दुःखास्पदं यात्येवानुदिनं स शावजमहास्पृश्योपमः सूतकी ॥ घोरं याति च यातनां यमकृतां
निःसीमका मातिगां तस्योद्धारपरं परासु न हरिर्वाचांपतिर्नो सुराः ॥१५॥ भंडास्तर्कवितर्ककर्कशधियो भस्मत्रिपुंड्रोज्झितास्ते सोर्युध्य त
बाहुदंडविधृतप्रोच्चंडदंडाहताः ॥ धारारवड्गनिपातिता धममहामुंडादिखंडाकुला कोदंडोरुशराभिघातसुमहा देहाद्रवंत्यार्त्तवत् ॥१६॥
याहृक्षा दक्षशिक्षाक्षुभितसुरगणाध्यक्षसंधुक्षिताक्षाध्वांक्षामीक्षाभुजोंत्र क्षितिधरशरणा वारणाकक्षमुक्षाः ॥ ताहृक्षाक्षा रहीना विधि
विधिहितनिहितागाधगोधानुयोधा नाधावंति द्रुतं ते शरखरगतिदाः त्र्यक्षरूक्षाः कयक्षाः ॥१७॥ ॥मंकण उवाच॥ ॥शिवार्चनप
रे करे शिववित्नोकने नोचने शिवध्वनिपरे श्रुती शिवनमो विनोदं शिरः ॥ अहो परमदुर्लभं किमपि भाग्य भस्माद्दशांशिवैकविषयं
मनः शिवपतिव्रता भारती ॥१८॥ ॥श्रीस्कंद उवाच॥ ॥एवं स्तुवंतं नृत्यंतं मंकणं शिवतत्परं ॥ शांभवं ते सुरा दृष्ट्वा विस्मयोत्फु
ल्ललोचनाः ॥१९॥ नृत्यमानं जगच्चापि ससुरासुरमानवं ॥ अधरोत्तरमुद्भ्रांतं शांभवस्य तपस्यया ॥२०॥ नानर्तीदं जगत्किं वा इति
चिंताकुलांतराः ॥ पद्मयोनेः सभ्यागत्वा प्रोचुर्वृत्तं मुनेः सुराः ॥२१॥ ॥सुरा ऊचतुः॥ ॥पद्मयोने नमस्तेऽस्तु लोकसर्जकपाहि नः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तर्जमानान्गर्जमानानन्वयं भीत्या प्रजापते ॥२२॥ शंभवो मंकणो नाम फणिभूषणपादधीः ॥ स भस्मधारणात् धृष्टो निष्ठामा
त्यंतिकीं गतः ॥२३॥ मेरुमौलौ सत्तिंगाग्रे नृत्यत्युन्मत्तवन्मुनिः ॥ तेनेदं भ्राम्यते ब्रह्मन् जगत्स्थावरजंगमं ॥२४॥ अकांडमेव ब्र
ह्मांडं नानर्तीदं निवारय ॥ इत्युक्तः ससुरैर्ब्रह्मा विचिंत्य मनसा चिरं ॥२५॥ सुरान्ब्रह्मा तदा प्राह भक्तिं वीक्ष्य मुनेस्तदा ॥ ॥
ब्रह्मोवाच ॥ ॥शंभवोयं मुनिः श्रेष्ठः पूर्वं मद्दरवारकः ॥ मया निवारितुं शक्यो नासौ मुनिरयं सुराः ॥२६॥ न शंभवेषु धार्ष्ट्ये
मे न विष्णो वापि वा सुराः ॥ त्र्यक्षं प्रसाद्य यत्नेन भववैद्यं महेश्वरं ॥ तेनैव शमयिष्येहं व्येतु वो मानसो ज्वरः ॥ इत्युक्त्वा ससुरैः
सार्धं कैलासं शंकरं ययौ ॥२७॥ सुरैश्च विष्णुना चैव निरुद्धो नंदिना तदा ॥ तद्द्वारि स गिरेस्तत्र गिरांनाथः सुरैः सह ॥२९॥ रमा
नाथेन स तदा उमानाथं प्रसन्नधीः तुष्टाव विमलोदारवचोभिः शिवमव्ययं ॥३०॥ ॥देवा ऊचुः ॥ ॥शंभो बालमृगांक
शेखरजटाजूटोरुघोटीरयस्फोरौर्वीधर धैर्यदारणमहागंगातरंगोद्वहन् ॥ कालांधांतककामदक्षभगदृक्संहारपाद्घ्य
18 नौ देवान्मंकणनृत्यभीतिपरमानाश्वासयाद्य प्रभो ॥३१॥ प्रालेयाचलकन्यका विलसितश्रीमत्पदे देहे प्रभो मन्युं संहर दै
न्यनाशक हरत्वत्तो हि नान्यः सुरः ॥ धन्यान्नः कुरु पापजन्यमुरतादुःखं विहन्य प्रभो स्वर्धुन्येंदुकलाललाम भगवन्
त्वं चाप्यनन्या गतिः ॥३२॥ भव भूतपते सुरेषु भाव्यं भवदुःखं भुवि नाशयाशु भावैः ॥ भव भावेन भयं न चैव नो विभवं चा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पि भवे भवायनना। अभ्यर्णं भवतावकीनचरणं संतार्णमेवाघनो॥ भावोद्य भवकार्णवैकतरणे उद्दीर्णमेवप्रभो॥ ३३॥ पाह्यस्मान्करुणाय पूर्णहृ- 
दययादीर्णं सुरार्णा गणं॥ तूर्णं घूर्णितमेतदद्य सुमुनेर्वृत्तं हि निर्वापय॥ हरिशशिशिखिवाणघोणघूर्ण॥ त्रिपुरविदारणशेषभूषणाद्य॥ फणि 
मणिघृणिकंकणोरुहस्त॥ प्रमथाधिशसनाथयाशुनः॥ ३४॥ गरगुरु वरगौरवोरु विम्यात्रिदशानां शिवदुर्दशाविनाश॥ अविनाशशरीर व्योमके-
श॥ जगदाकाशशरीरकोशकाश॥ मुनयः प्रशमायनाः सदा ते शमनाद्यातपदं हृदाभिध्याय॥ समुदायमिमं मुरात्वघानां मदनारे किल ना-
शयंति शंभो॥ शंभो त्वदंकवसतेः किल मंकणोयं तुल्यप्रभो भसितभासिततनुः सदैव॥ ३५॥ क्रौंचांतकस्य सदृशः सुदृशातमीक्षस्य तं न वार-
यामाभुनष्टनाज्जगतो वनाय॥ गीर्वाणगर्वकृतसंस्तुतिभिः प्रतुष्टो॥ ईष्टेश्वरो मुनिमहोप्यभिदृष्टुमेव॥ ३६॥ यांतो दयासुरसयासुर-
वृंदवंद्यो॥ मोदायपर्वतवरात्मजयासमेतः॥ कैलासगोपुरवरान्निरगात्पुरारिः॥ पादांबुजं तु रगवैरिवहांतकं स्वं॥ ३७॥ संदर्शयन्नु-
रगवैरिवहादि देवानां लोकयन्वृषगतो मुनिलोकनाथ॥ ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे देवस्तुतो
नवमोध्यायः॥ ९॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्रीईशानाय नमः॥ ॥ श्रीस्कंद उवाच॥ ॥ तत्स्तुत्या
हृष्टहृदयो भगवान्गोवृषध्वजः॥ दृष्टुं मंकणकं सिद्धं स्वयं गोर्याविनिर्ययो॥ १॥ महापांडुरमारुह्य वृषं कैलाससप्रभं॥
त्र्यक्षः शंबरशृत्तोद्यत्करनीलमुकंधरः॥ २॥ गंगातुंगजटामौलिः शशांककृतशेखरः॥ दिव्यभस्मत्रिपुंड्रोद्यत्फाल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्नलविराजितः ॥३॥ फणिमणी घृणिलसद्धीरहाराहिसद्गनः ॥ गुरुणागरजातेन नीलीभूतसुकंधरः ॥४॥ दंतित्वकृपरि
वीतांगो व्याघ्रचर्मांबरावृतः ॥ वामभागमहादेवी वीक्षितापांगवक्रकः ॥५॥ नंदिभृंगीमहाकालस्कंदविघ्नेशसेवितः ॥
वंदारमुकुटीकोटीमणिनीराजितांघ्रिकः ॥६॥ गणेंद्रवदनोद्भूतशंखकाहलनिस्वनैः ॥ मृदंगढक्काभेरीणामारावोद्घोषितां
बरः ॥७॥ छत्रचामरमायूरव्यजनात्तकैर्गणैः ॥ पार्श्वतः सेवितः शंभुरायथौ मंकणांतिकं ॥८॥ मुनिर्झरकरोत्सृष्टपु
ष्पवृष्टिरभूच्चखात् ॥ ननृतुस्तालसाम्येन लयेनाप्सरसां गणाः ॥९॥ प्रावाद्यंतोरुवाद्यानि गंधर्वाः किन्नरास्तदा ॥ ज
गुः शिवापदानानि नारदाद्याः सुतुंबराः ॥१०॥ विष्णुब्रह्मादिभिर्देवैः जयेशेतिनतस्तुतः ॥ ॥देवा ऊचुः॥ ॥देवादिम
स्त्वमसि सोमकलाललाम" सामादिसंस्तुतपदः श्रुतिसीमभूमा ॥११॥ व्योमावकाशमहिमा गरिमा त्वमीश" सर्वेषु हृत्सु ल
घिमा त्ववनो महेश ॥ हेमाचलात्तधनुषाकरमुत्कटं ते" कामादिदर्पविनिवारकमत्यदं ते ॥१२॥ भामार्धकायमतिसुं
19 दरमीक्षितं ते" त्र्यक्षाधुना सुरगणेषु भवेत्कृपा ते ॥ इत्थं देवस्तुतिं श्रुत्वा तान्वीक्ष्य करुणादृशा ॥१३॥ हिमवच्छिखरप्रा
पसौ पश्यन्नृत्तमद्भुतं ॥ मंकणस्य महादेवः प्रणतो मुनिना स्तुतः ॥१४॥ पुलकांकुरितां गौरीं थन्नृत्यं स्तुत्वा वृषशंकरं ॥
गणा देवेषु पश्यत्सु देवदेवं स मंकणः ॥१५॥ ॥मंकण उवाच॥ ॥शंभो भर्ग भवेंदुशेखर महादेवाव्ययेशानते ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० पादद्वंद्वसमर्चनार्जितमहाभक्तिप्रभाभावितः ॥ भावोहं भवभाव(भाव)परमानंदांबुधौमग्नधीरुन्मत्तोत्तम अन्यमान्यपदवीमापादितः ईशा० द० पृ
१९ सादरं ॥१६॥ हेशंभोशशिखंडसुंदरजटाकांडोरुविश्रामित त्र्युद्यत्तारपतंगसंगसुमहादिग्वक्त्रभाभाजितः ॥ पापापारमहांबुसा अ० १०
गरमहापानोरुसद्बाडव दिव्येनाद्य दृशांकुरेकरुणाकोपेन संवीक्षय ॥१७॥ मातंगात्वगलंकृतांगगिरिजादेहार्धसंगप्र
भो हस्ते बालकुरंगसंगततलसन्नेत्रे पतंगोत्तम ॥ लिंगस्थांगमहोत्तमांगविधृतागंगाशशांकांकते पादौ वै शरणं प्रयामि स
ततं पापौघभंगाय मे ॥१८॥ उग्रभीमभवभर्गशंकर त्र्यक्षरक्षमखभक्षवीक्षमां ॥ अंधकांतककृतांतनिशीशामोदवेदशि
खराश्रय पाहि ॥१९॥ त्वत्पादपुरत्नसुमहाधिकयत्नलभ्यं पुण्यासपत्नमघहारिविभुद्भुनूनं ॥ हृष्टो विशिष्टकरुणारुपाशि
ष्टमिष्ट मोजिष्ठमष्टतनवेकरवैनमस्ते ॥२०॥ वस्तुस्वस्तिदमस्तुमेहृदिसदावेदोरुमूर्त्तस्तुतं निस्तोकं वरहस्तशस्तसुमहावि
ध्युत्तमांगधृतं ॥ शूलत्रस्तसमस्तदैत्यनिकरारंभेणमातंगहृद्दूस्तं निरस्तुलमाविरस्तु परतो ध्वस्ताघसंघं परं ॥२१॥ भद्राक्ष
त्र्यक्षपादं फणिमणिघृणियुक् सर्वसंपत्प्रदं वै लोके वं भो व्युत्थेरखाकिणमसृणयुतं सिद्धसंसिद्धिवंद्यं ॥ अरूपिमशरणानां
लोकलीलाविनोदं मदमुदितभवानां भावनानाशहेतुं ॥२२॥ अयत्नमहिपुराजनो मरवशातेनतेप्रीतये अयुज्मयदि शो
करं तव सुयोगमत्यादरात् ॥ ददद्भिहिमहापथप्रतिवरोरुदानैरपि दधीमहिहृदामुदा तवसरोजपादं सदा ॥२३॥ अधीमहि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

✗ पं.क्ति (१) अत्नेपि भसितं सितं विमलमेव पुंड्रांकयुक् भवेन सततं भवे भवन वेद भावासदा (१)

सदाह्यहं सुगममुक्तिमार्गप्रदं" शतश्रुतिशिरोगतं विमलमेव रुद्रं सदा॥२५॥ अचक्रमवरिवद्भूयां गांगलिंगोत्तमां गे" तव सदय कराक्षैः मोदमाना
सदैव॥ नवशिवचरणाआलोकनेनात्नमेतं" नवरसुरवरा^प्रांणां वारणे कारणं मे॥२६॥ ॥सूतउवाच॥ ॥तदास फणिकंकणास्तुतिपरं तदामेक
णं" मुदा भसित धारिणं मुनिवरं प्रणंतं हरः॥ अहस्करविलोचन प्रसृमरैः करोत्फुल्लितं" गिरींद्र जनितास्यकं वरसरोज मीक्ष्याहृदि॥२७॥ ॥
ईश्वरउवाच॥ ॥शाखाशिखादिसुनिरुक्तपदक्रमादि" बोधार्थ वादविधयः सकलाअधीताः॥ तेनेशतोषकरणाय मखादिसृष्ट्या" अथ्या कृतेः
प्रियतराः सकला अपीष्टाः॥ सद्योजातेन सद्यो भसितयुततनुः पूत एवाभिजातः" पापौघं तस्य भेद्यं भवतिभवगदे वैद्य एवायमीशः॥ वेद्यं
वेदांतगद्यं पद मभि भवते पद्य मेवाभिजातं" खिद्यंत्येव वाधि दुःखं हृदुदर भवजं भिद्यते ग्रंथिजातं॥२९॥ येनैव वशीकर गिरा प्रसृतोरुवेदमौ
ल्यर्थ सारनिहिताभूत भस्मधृक्स्यात्॥ तेनोर्वशादिविधिबोधितषोडशोरु" दानानि वाडबकरे विहितानि गौरि॥३०॥ नीचानामपि मोचनाय
४० गिरिजे वाचः श्रुतेरंकितो" मार्गोऽयं हि विरंचिवंचितमहा धर्माश्रमोत्थश्रमैः॥३१॥ तच्चिंताहतिदुर्धियो विधिममुं मुंचंति दुःखाश्रुभिः" सिंचं
तिस्वतनुं यमालयगताः मद्भस्मसंगोज्झिताः॥३२॥ ॥इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे मंकण स्तुतौ दशमोऽध्यायः॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीस्कंदउवाच॥ ॥तत्स्तुत्या तुष्टहृदयः शिपिविष्टो विकासवान्॥
नमाहशं भवं विप्रं मंकणं भस्मभूषणम्॥१॥ श्रृण्वतां ब्रह्मविष्णूनां सुराणां शशिशेखरः॥ ॥ईश्वरउवाच॥ ॥नृत्तादुपारमस्वास्मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰१० ज्जगत्क्षोभकरा मुने॥ भस्मसिद्धोऽसि धन्योऽसि त्वं मान्योऽपि मुनीष्वपि॥ ज्ञांभवोऽसि विशेषेण भस्मनिष्ठो विशिष्टधीः॥ त्वत्तपस्तापिता ह्येते वै ईशा॰द॰पू॰
२० ब्रह्मविष्ण्वादयः सुराः॥३॥ मामेव शरणं प्राप्तास्तस्मात्ते सान्निधिं गताः॥ शिरोव्रतमिदं तेऽद्य प्रवक्ष्याम्यखिलं तव॥४॥ अथर्वशिरसि प्रोक्तं श्रृणु वेभिः अ॰११
सुरसत्तमैः॥ हृत्तमोनाशकं पुण्यं मम ज्ञानप्रदं मुने॥५॥ अज्ञानध्वंसनार्कं ते वितर्कमतिदूरगे॥ त्वयि गुह्यं न मे किंचित्त्वं कस्त्वं मत्पदांबुजे॥
॥६॥ त्वद्भक्तिभावितोऽहं ते देव्या दृग्गोचरीकृतः॥ मयाकैलासशिखरे भवान्यै भवनाशकं॥७॥ शिरोव्रतमिदं प्रोक्तं नान्येषु क्तं मुनीष्वपि॥ तत्तेऽहं
संप्रवक्षामि साक्षान्मत्प्रसादकृत्॥८॥ कृत्वेदं पावनं विप्र व्रतं सर्वं कृतं भवेत्॥ अधीतास्तेन वेदाहि सांगोपनिषदा सह॥९॥ तेनेष्टाः सकला
यागा दत्तदानः स एव हि॥ ब्रह्मविष्ण्वादिभिर्वंद्यो सहि मद्रूपणो भवेत्॥१०॥ स्कंद विघ्नेशतुल्योऽसौ सेवने त्याश्रमी भवेत्॥ शिरोव्रतविधिं त्वेत
दाश्रमेश्रममाप्नुयात्॥११॥ ब्रह्मक्षत्रियवैश्यो वा ब्रह्मचारी गृही वनी॥ संन्यासी वा मुनिश्रेष्ठ शिरोव्रतविवर्जितः॥१२॥ वेदांतोत्थं मम ज्ञानं
न संविदति जातु चित्॥ नैतां शांतिमवाप्नोति शाश्वतीमिति मे श्रुतिः॥१३॥ अभ्यस्यापि च वेदांताः शिरोव्रतविवर्जितः॥ शब्दार्थविद्भवेदेवन सा
क्षात्कृतिमाप्नुयात्॥१३॥ गुरुर्वापि तथा शिष्यो विशिष्य मुनिसत्तम॥ शिरोव्रतमये (तंहि) श्चीर्णं लितीर्णो भवसागरात्॥१४॥ अन्ये सत्यं निमज्जं
ति मत्प्रसादपराङ्मुखाः॥ तस्माच्छिरोव्रतं पुण्यं यैः समाचरितं मुदा॥१५॥ तेषां चोपनिषद्विद्यां वदेत्तैवमिति श्रुतिः॥ तेषां वै हृदयग्रंथिर्भिद्या
छिंद्यात्सपश्यतः॥१६॥ स एव मुक्तो भक्तो मे नान्यः संसारवारिधेः॥ ब्रह्मचारी गृहस्थो वा वनस्थो वाथ मस्करी॥१७॥ शिरोव्रतमिदं कृत्वा सो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति वर्णाश्रमी भवेत् ॥ न पुण्यपापैर्बध्नाति ब्रह्मवद्भासको भवेत् ॥१८॥ ॥ईश्वर उवाच॥ ॥मर्त्या अमर्त्यपदवीमपि तेत्र भांति सुज्ञाविहीनमत
योऽपि ममेशिकांत्या ॥ व्रात्या अपींद्रसदृशोत्तमभोगजात्या वात्यागतांगपरिशोभभजंति भूत्या ॥१९॥ कृत्या कृत्यविवर्जिताश्च गिरिजे
सत्यानुवृत्त्याहतां व्रात्यास्ते ग्रहिणीफणीकुरसनादष्टा दुरवाशयाः ॥ स्तुत्यानत्याविभूत्यामम निगममहासारभूत्याविहीनाः काले का
लानलं ते तिलकुलबंवन्धर्षमामाग्नाहि भीत्या ॥२०॥ ये गार्हपत्यभसितं किल फालदेशे लिंपंति ते हि गृह्हिणो भवतेनिलंपाः ॥ वन्योऽपि मान्य
पदवीमदवीयसीं सो नैश्रेयसीं अथ लभेत दवोद्भवेन ॥२१॥ समिद्धाक्षोत्पन्नं सितभसितधारी यदि शिवे विराजोऽत्थे नापि द्रुहिणसदने ह्योद्भमति
भाक् ॥ विराजत्येवायं भसितलसितो गोश्रुतिशिरो विहारी वर्णी वै भवति मम संपूर्णकृपया ॥२२॥ यतिः श्रुतिशिरोव्रतं गदितमेवाचरन्
मतिप्रदमुमे सदा सुगममार्गमेवागमे ॥ न भेत निजबोधदं विदितवेद्यमोदप्रदं त्रिपुंड्रपरिधारणं शरणमेव कर्मदिनः ॥ यतिर्निर्यति
२ भाग्भवेत्कुमतिमार्गदूरादरो गतिप्रदमिदं सदा भसितभासितांगः शिवे ॥ स याति विमलं पदं पशुपतेर्विमुक्तिप्रदं सरवभवपाशतो विरत
रोंच मुक्तिं व्रजेत् ॥२४॥ पतलसेवाप्रवणो यतिर्भवेन्ममलिंगार्चनमात्रभिक्षितान्नः ॥ भसितं सितमेव धारयन् श्रुतिविद्यात्मगतिं लभेत
सः ॥२५॥ अवगुंठनकुंठितो रूपापाः सततं परिभांति नीलकंठाः ॥ हृदि सोत्कंठभवापितद्धे परिपूज्या स्विदशाधिपाविकुंठाः ॥२६॥ प्रातर्धृतं
भसितमेव भवेदघघ्नं यन्नैशसंभवमुमे धृतसंगवं च ॥ प्राण्हापराण्ह विधृतं किल पूर्वपापं सायंतनेऽपि विधृतं भवते विमुक्त्यै ॥२७॥ निशि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ १० शिखिविशिखं भजेत मुक्तये शशधरशेखरमेव भस्मधारी॥ स्मरहरगात्रविभासनं भजेद्यो क्षरतेक्षारमुमे महाघवारि॥२८॥ त्रिपुंड्रविलसत्तनुः भव ई॰ शा॰ द॰ प्र
२१ तिपूर्वपुण्योदयैः विकुंठनविकुंठितो भवति पापतापानलः॥ सएव ममपूजने भवति भस्मनार्हो जनः सएवसुखसंपदां पदमवाप्य मोदेत हि अ॰ ११
॥२९॥ भस्मालंकृत फालमेव सफलं यत्कालकालेन तं तल्लोला मललोचने हि सफले मल्लिंगलोकावृते॥ यद्बाह्वोः शिखरे त्रिपुंड्ररचिते
हस्तौ मम स्पर्शके यत्पादौ सततं मदालयगती संप्रक्रमे पाक्रमौ॥३०॥ धिक् धिक् फालमहत्त्रिपुंड्ररहितं शून्यं तदा वै फलं भस्माभ्यक्ति वि
वर्जिता तनुरियं मन्ये शिवे शून्यकं॥ मन्मन्युप्रभवाक्षिकोणकरुणा तेषां शफालानले तूलायेत शिवे जनः किल तदा भस्मांगसंगोज्झितः
॥३१॥ हाहा शिवे परिपतंति महाग्निशूलकुंभीनसोरुवलये किल कालचक्रे॥ संतारणं भवमहांबुधि वीचि मज्जद्दुर्जीवजातजनुषां किल
भस्मनालं॥३२॥ ऊर्ध्वं मृदा हृदुदरे किल बाहुमूले फाले गले विरचिता खिलपापपुंड्रः॥ तं वह्निशैलशिखरे खरशोकजातं जारोपजारज भवं
परिपातयामि॥३३॥ संतप्तताम्रचक्रचिह्नितनुं तन्नक्रवक्त्रोपमं संतप्तक्रकचैर्विदारितमहामूर्धानमप्यंततः॥ विष्ठाकूपशतेषु
दुस्तरमहो निस्तारविस्तारितं तालाजालनिकाय लालितलतागेहान्तसर्वांगकं॥३४॥ संतप्तासिवने सुखंडित महामुंडं प्रपश्यांबिके॥ गो
धावगाधतमसो हर भस्म तिर्यक् कुर्युस्त्रिपुंड्रमगजे किल शैववर्याः॥ तत्पापजालमखिलं खलु कंपमेति बोधिद्रुमच्छदजकंपनवद्भ
ग ॥५ वानि॥३५॥ यस्तूर्ध्वपुंड्राद्दुपरि त्रिपुंड्रं दुद्धूलितां गहृदयोपि भवेद्भवानि॥ वर्णी वनी यति गृही मम पूजकश्चेन्मद्रुद्रजाप्यपरमो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नरकं सयाति ॥ नेक्षे तत्कृत पूजनं च गिरिजे यद्विल्वपत्रैः कृतं तद्दत्तं कुसुमं वहामि शिरसा स्याद श्मवृष्टेः समं ॥ सालग्राम शिला समार्चन
मिवेदानीं चदीनादरो दूरात्तं परिवर्जयामि सुतरां मल्लिंग संपूजनं ॥३६॥ अहस्करस्तु स्कर एव तस्य मयस्क एचीपरिवर्जितस्य ॥ वि
लोकने लोपित एव लोचने नालोकि लोकेपि स पापिना समं ॥३७॥ ॥ इतीश्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे एकादशो
ध्यायः ॥११॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईशानाय नमः ॥ ॥श्रीस्कंद (ईश्वर) उवाच ॥ ॥शृणु मे कुम्भसिद्धार्थ
भस्मसिद्धमहामते ॥ येन चीर्णेन वेदांत ज्ञानं सम्यक् विजायते ॥१॥ शिरोव्रतमिदं श्रौतं पुण्यमाथर्वणोदितं ॥ तस्यैवा विधिमाख्यास्ये शृ
णुत्वं सावधानतः ॥२॥ बहूनां जन्मनामंते शिरोव्रतविधौ रतिः ॥ कस्यचिज्जायते पुंसो न सर्वस्यापि वै मुने ॥ येन द्विजत्वं संप्राप्य बहुजन्म
सुसत्तम ॥ अधीताश्चतुरो वेदाः सांगोपांग पदक्रमाः ॥४॥ तस्यैव जायते श्रद्धा शिरोव्रतविधौ मुने ॥ ए(ये)नया गाः कृताः सम्यगेकाहाहीन
सत्रकाः ॥५॥ शिवप्रीत्यर्थमेवाहस्त्वाद्दन्ना बहुदक्षिणाः ॥ तस्यैव जायते श्रद्धा शिरोव्रतविधौ मुने ॥६॥ येनोर्वरा द्विजे दत्ता देशे काले च
१२ पात्रके ॥ तस्यैव जायते श्रद्धा ॥७॥ येन षोडशदानानि दत्तानि विधिवन्मुदा ॥ तस्यैव० ॥८॥ गृहारामसगोद्यान वापीकूपतटाककं ॥
कृतं सम्यक् ममप्रीत्यै अन्नपानीयशालकं ॥ तस्यैव० ॥९॥ उग्रप्रीत्यर्थमेवेह अग्रहारकरः पुमान् ॥ शांभवानां यतीनां च तथैव
शिवयोगिनां ॥१०॥ मठं मठोपकरणं दद्याद्यो विधिवन्मुने ॥ तस्यैव० ॥११॥ शांभवानन्नदानैश्च यस्तोषयति सर्वथा ॥ तस्यैव० ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० २२ शंभवान्पूजयेद्यस्तु वाचा वा परिचर्यया ॥ तस्यैव जा० ॥ १३ ॥ शिवागारपरोयश्च शिवोत्सवकरस्तथा ॥ तस्यैव० ॥ १४ ॥ दीपधूपपरोयश्च सर्वदायतनं मम ॥ तस्यैव० ॥ १५ ॥ मत्प्रिया लोकको यस्या प्रदोषेषु विशेषतः ॥ तस्यैव० ॥ १६ ॥ मत्पूजापरमो यश्च बिल्वपत्रादि साधनैः ॥ तस्यैव० ॥ १७ ॥ अष्टम्यां सोमवारे च चतुर्दश्यां तथा मुने ॥ तस्यैव० ॥ १८ ॥ अविमुक्ते तथा तीव्रा भक्तिर्विप्र गरीयसी ॥ तस्यैव ॥ १९ ॥ मयि विश्वेश्वरे शंभो मणिकर्ण्यां तथा मुने ॥ तस्यैव० ॥ २० ॥ क्षेत्रेष्वन्येषु नियतं यो वसेन्मम सर्वदा ॥ तस्यैव० २१ ॥ कुरुक्षेत्रे प्रभासे च गंगासागरसंगमे ॥ तस्यैव० ॥ २२ ॥ बदर्यां च विशालायां पिंडारे विरजे तथा ॥ तस्यैव० ॥ २३ ॥ रुद्रकोटे नर्मदायां ओंकारे भृगुतुंदके ॥ तस्यैव ॥ २४ ॥ केदारे च महाकाले गयायां च प्रयागके ॥ तस्यैव० ॥ २५ ॥ त्र्यंबके च प्रतिष्ठाने मुने चामरकंटके ॥ तस्यैव० ॥ २६ ॥ पुष्करे वेणुविपिने श्रीशैले कोटजे पुरे ॥ तस्यैव० ॥ २७ ॥ प्रतिष्ठाने हरिद्वारे ज्वालावक्त्रे च यो वसेत् ॥ तस्यैव० ॥ २८ ॥ मधुरायामयोध्यायां मायायामविमुक्तके ॥ तस्यैव० ॥ २९ ॥ अवंत्यायां तथा कांच्यां द्वारवत्यां च यो वसेत् ॥ तस्यैव० ॥ ३० ॥ नैमिषे भारते वर्षे वसेदादेहवर्जनं ॥ तस्यैव० ॥ ३१ ॥ दक्षिणस्यामपि दिशि मम क्षेत्राणि भूरिशः ॥ तेषु स्थानेषु नियतं वसतोस्य रुचिर्भवेत् ॥ ३२ ॥ सह्यापगातटे पुण्ये शितिकंठे वसन्मुने ॥ तस्यैव० ॥ ३३ ॥ तणज्योतौ गजारण्ये धूतस्थाने द्युतीश्वरे ॥ तस्यैव० ॥ ३४ ॥ अरुणाद्रौ च वृद्धाद्रौ अभ्रगोष्ठ्यां श्वगोनगे ॥ तस्यैव० ॥ ३५ ॥ कालहस्तिगिरौ पुण्ये वसतो मम वै मुने ॥ तस्यैव० ॥ ३६ ॥ मुने पंचनदे पुण्ये कुंभघोणेर्जुने तथा ॥ तस्यैव० ॥ ३७ ॥ श्वेतकांतारके वापि तथा मायूरके मुने ॥ ईशा० द० प्र० अ० १२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्यैव०॥३८॥ छायावने बिल्ववने तेजनीविपिने मुने॥ तस्यैव०॥३९॥ वेदारण्ये भ्रमसदने ह्यालास्ये गंधमादने॥ तस्यैव०॥४०॥ ~~वसतः~~
वसतः क्षेत्रवर्येषु तत्रान्येष्वोदितेषु च॥ तस्यैव जायते श्रद्धा शिरोव्रतविधौ मुने॥ सर्वक्षेत्रेषु वसतो विमुक्तिदमिदं मम॥ अविमुक्तं न
मुक्तं मे यतोतीव सुदुर्लभं॥४२॥ तत्रैवामरणं जंतुर्वसन्मुक्तिं परां व्रजेत्॥ सर्वक्षेत्रनिवासस्य फलमंते विमुक्तकं॥४३॥ सेवतस्तार
कं मंत्रं तारं शंभवसत्तमे॥ ददामीति प्रतिज्ञातं मया पूर्वं मुनीश्वर॥४४॥ यदि तत्र व्रतं पुण्यं शिरोव्रतमिदं मुने॥ कृत्वायुतैर्जन्म
शतैः पापान्मुक्तो न संशयः॥४५॥ ॥मंकण उवाच॥ ॥कथं तद्व्रतमाख्याहि येन चीर्णेन शंकर॥ तव ज्ञानोदयः शंभो
पशुपाशच्छिदो भवेत्॥४६॥ अविमुक्ते करिष्यामि व्रतं ते करुणानिधे॥ विधेहि करुणां विभो तव विधेहि पादांबुजं मुदे हिम
मसांप्रतं हृदि भवाद्य पादेरतं॥ अवेहि शरणागतं भवदवाब्धिमध्यं गतं प्रसादसुमुखागतं वद मुदे हितायाधुना॥४७॥ श्रु
५८ तिसूक्तिनिषक्तिवृत्तिसक्तेः भवभक्तेः किल कारणं महेश युक्तिः॥ समवक्ति प्रथमं मनोनुरक्तिस्तव मुक्तिः परमा भवेव्य
नक्ति॥४८॥ ॥सूत उवाच॥ ॥स तदा फणिकंकणोऽथ मंकणं अनुगृह्याह विभूतिभूषणं॥ शरणकरणं मुदा स देशोच्चरणं तन्नखच
चंद्रभूषणं॥ ॥ईश्वरोवाच॥ ॥तवादेयं मेयं नहि मम मुनेऽत्रास्ति विशदाशये शक्के जाने भवभुवनमायाविरहितः॥ त्वया सर्वे धन्या म
महृदयमान्या मुनिगणाः सदा वन्याः संन्यासिन अपि न्यूनरहिताः॥४९॥ व्रतं कृत्वा तीर्त्वा भवजलधिमोहांधतमसं मुने नत्वा स्तुत्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰ १० मम वरप्रसादाद्दृढतरं ॥ अहो तीर्णा स्त्वं पूर्णं यदि भवनिगीर्णापि मुनयो व्रतं चीर्णं ये स्ते मुनिवर सुपूर्णा मयि शिवे ॥ ५० ॥ अपर्णा दृष्ट्वा ईशा॰ द॰ पू॰
२३ ते प्रतिभवजदोषोर्णजनितं भयं प्रच्छिद्येते हृदि विहिततीर्णं प्रतिनिभं ॥ पंचब्रह्ममनुप्रभावभसितं संचान्निजांगेस्सदा मुंचेदेव अ॰ १३
ह्रिपातकं सगिरिजे किं चिन्तयासंस्मृते ॥ अंचन्फालतले त्रिपुंड्रमथवै संकोचभावोज्झितं तं चाप्यन्वहमेकपंचकगतं कुर्वीह
मत्यादरात् ॥ ५१ ॥ ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे द्वादशोऽध्यायः ॥ १२ ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥
श्रीईशानाय नमः ॥ ॥ श्रीईश्वर उवाच ॥ ॥ शिरोव्रतविधानस्य कालदेशानुसिद्धिदं ॥ कथयिष्ये समासेन शिष्यभूतस्य वै मुने ॥ १ ॥
विशिष्य मम भक्तस्य गोप्यं न मम विद्यते ॥ यस्य मेनुग्रहो नित्यं तस्य व्रतविधौ मुने ॥ २ ॥ भविष्यति परा बुद्धिः पशुपाशविमुक्तये ॥ यं
मोचयामि भवगं तस्यैषा मतिरुद्भवेत् ॥ ३ ॥ बहुजन्मसु विप्रेन्द्र भ्रांतस्य पुरुषस्य वा ॥ देवतिर्यङ्नरोत्पन्नः स तदा ब्राह्मणो भवेत् ॥ ४ ॥
ब्राह्मणेषु च विद्वांश्च ततो मद्भक्तितत्परः ॥ सारासारविचारज्ञस्तस्य व्रतविधौ मतिः ॥ ममैवानुग्रहात्कश्चिज्जिज्ञास्यति व्रतं परं ॥ तेन चीर्णेन
तीर्णं तदसारं भवसागरं ॥ ६ ॥ सुगमा निगमा तस्य भविष्यंति मुने सदा ॥ ज्ञातं कृत्वापि वेदान्तान्नैतत्कृत्वा शिरोव्रतं ॥ ७ ॥ स शब्दमात्र
भक्षकः नापरोक्षमवाप्नुयात् ॥ संन्यासी वा गृहस्थो वा गुरुशिष्यावुभावपि ॥ ८ ॥ वृथाश्रमं गकृतस्तौ व्रतसंसिद्धिवर्जितौ ॥ श्रवणा
यापि बहुधा न लभ्यो हं व्रतं विना ॥ तस्माद्व्रतविधिं कृत्वा विमुक्तश्च विमुच्यते ॥ ज्ञानांगमेतदुत्कृष्टं शिरोव्रतसमाह्वयं ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्वैवाभ्यस्य वेदांतान् मुक्तिमाप्नोतिशाश्वतीं॥ यथादेवेषुसर्वेषु महादेवोंऽहमेवहि॥११॥ ज्ञानांगसाधनोपायमिदंश्रेष्ठतरंमुने॥ यथैवस्त्री
षुसर्वासु पार्वतीपरमा मम॥१२॥ ज्ञानांगसाधनो०॥ कर्मदेवेषुनियतं यथाश्रेष्ठोहरिर्विधिः॥ ज्ञानांग०॥१३॥ यथानदीषुसर्वासुगंगा
श्रेष्ठासरिद्वरा॥ ज्ञानांग०॥१४॥ यथाक्षेत्रेषुसर्वेषु अविमुक्तंविमुक्तिदं॥ ज्ञानांग०॥१५॥ यथामङ्गलपंश्रेष्ठं रुद्राक्षं ज्ञानसिद्धिदं॥ ज्ञानां
ग०॥१६॥ यथाश्रमेष्वेषुसर्वेषुमनपंचाक्षरोवरः॥ ज्ञानांग०॥१७॥यथा बेदेषु सर्वेषु श्रीरुद्रं प
रमंमम॥ ज्ञानांग०॥१८॥ यथास्थानेषु पूज्येषु लिंगपूज्यतमंमम॥ ज्ञानांग०॥१९॥ यथैवसर्वपुष्पेषु बि
ल्वंप्रियकरंमम॥ ज्ञानांग०॥२०॥ यथापूज्यादिवेलासुप्रदोषाममतुष्टिदः॥ ज्ञानांग०॥२१॥ नक्तव्रतेषुसर्वेषुसोमवा
रोयथामम॥ ज्ञानांग०॥२२॥ यथापर्वस्वपिसदाभूताकालाष्टमीप्रिया॥ ज्ञानांग०॥२३॥ यथावर्णेषुसर्वेषु शांभवोविप्र
सत्तमः॥ ज्ञानांग०॥२४॥ यथाचतुष्पदांमुख्यागौःश्रेष्ठापावनीसदा॥ ज्ञानांग०॥२५॥ यथासर्वामरश्रेष्ठो महेंद्रःपाकशा
२४ सनः॥ ज्ञानांग०॥२६॥ यथासर्वमुनिश्रेष्ठोदधीचो ममभक्तिमान्॥ ज्ञानांग०॥२७॥ यथैवपततांश्रेष्ठो गरुडोवेगवत्तरः॥
ज्ञानांग०॥२८॥ यथायक्षाधिपःश्रेष्ठो यक्षाणांत्र्यक्षपूजकः॥ ज्ञानांग०॥२९॥ यथावृक्षोत्तमो बिल्वः वृक्षाणांममतुष्टि
दः॥ ज्ञानांग०॥३०॥ किमत्रबहुनोक्तेन व्रतंश्रेष्ठतरंमुने॥ व्रतंपाशुपतं श्रौतमथर्वशिरसिस्थितं॥३१॥ देशकालौविदित्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽथ स्वस्य भक्तिं निरीक्ष्य च॥ आपूर्यमाणे शशिनि पुण्ये चैवोत्तरायणे॥३२॥ आर्द्रायां च चतुर्दश्यां अष्टम्यां वा समाहितः॥ चि
त्रायां पौर्णमास्यां वा मुख्यमेतद्द्विहायने॥३३॥ नदीतीरे शिवक्षेत्रे प्रागुदक्प्रवणां शुभां॥ शालां निर्माय तदनु वितानाद्यै
रलंकृतां॥३४॥ पुष्पदीपादिधूपैश्च कदलीस्तंभकुंभकैः॥ पल्लवोर्ध्वमुखैस्तत्र रंगवल्ल्याद्यलंकृतैः॥ व्रतनित्यसमाचारैर्ब्रा
ह्मणैः शांभवैः सह॥ स्नात्वा शुक्लांबरधरो मां संपूज्य गणाधिपं॥३६॥ नांदीश्राद्धं ततः कृत्वा, वेदवेदांगपारगं॥ आचा
र्यं वरयेद्विप्रं भस्मरुद्राक्षभूषितं॥३७॥ दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च॥ प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः
॥३८॥ ध्यात्वा मां चैव गिरिजां स्कंदविघ्नेश्वरावुभौ॥ व्रतमेतत्करोमीति संकल्प्य त्रिः पिबेदपः॥३९॥ शांभवांश्चाप्यनुज्ञाप्य तान्य
थाशक्ति तोषयेत्॥ यावच्छरीरपातं वा द्वादशाब्दमथापि वा॥४०॥ तदर्धं वा तदर्धं वा मासद्वादशकं तु वा॥ तदर्धं वा तदर्धं वा मा
समेकमथापि वा॥४१॥ दिनद्वादशकं वापि द्विस्त्रिरेकदिनं तु वा॥ अग्निमाधाय विधिवत्स्वसूत्रोक्तेन वर्त्मना॥४२॥ विरजामंत्रसं
सिद्धैः मंत्रैः संजुहुयाद्घृतैः॥ चरुणा स्वयमाचार्यो ब्राह्मणां तत्र कल्पयेत्॥४३॥ मंत्रैः साविरजैर्हुत्वा स्वयं च विरजो भवेत्॥ अथ गोमय
मादाय पूर्वोक्तेनैव वर्त्मना॥४४॥ संलिप्य गंधसलिलैर्गंधद्वारेति मंत्रतः॥ न्यस्याग्नौ पंच ब्रह्माद्यैः करीषैश्चाद्य चानलं॥४५॥ घृ
ताहारी हविष्याशी नक्तं भुक्त्वा यतव्रतः॥ पयो ब्राह्मणपूर्वं वा क्षत्रियाद्याः श्रुतिक्रमात्॥४६॥ द्वादशे तत्र दिवसे होमशेषं समापयेत्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिखाजटस्त्वेकजटो जटी वा सशिखोथवा ॥४७॥ काषायवसनो वाथ चीरवल्कलधार्यपि ॥ तान्युद्धृत्य तदा पात्रे भस्मपिंडादिकं
क्रमात् ॥४८॥ सद्योजातादि पंचाद्यैः संपूज्याथर्वत्रियंबकैः ॥ प्रक्षाल्य पाणी चरणौ त्रिराचामेच्छिवं स्मरन् ॥४९॥ सकलीकृत्य त
द्भस्म विरजानलसंभवं ॥ अग्निरित्यादिभिर्मंत्रैः षड्भिराथर्वणैः क्रमात् ॥५०॥ विमृज्यांगानि मूर्धांतं चरणाद्यानि संस्पृशेत् ॥ य
तिस्तु प्रणवेनैव सर्वेषां च यथाक्रमं ॥५१॥ ततस्त्रिपुंड्रं रचये त्रियायुषसमाहृयं ॥ शिवभावं समागम्य शिवयोगमिदं मुने ॥५२॥
कुर्यात्त्रिसंध्यमप्येतत्पशुपाशविमुक्तये ॥ आदेहपातमेतद्वै चरन् पाशुपतव्रतं ॥५३॥ समुक्तो मोचयेदन्यान् स्वदृष्टिपथगो
चरान् ॥ तदलाभे द्वादशाब्दं वत्सरं वा दिनत्रयं ॥५४॥ दिनद्वादशकं वापि स तु वै नैष्ठिकः स्मृतः ॥ अत्याश्रमी स विज्ञेयो यो
देहांतावसानभृत् ॥५५॥ स एव तपतां श्रेष्ठः स एव च महाव्रती ॥ न तेन सदृशः कश्चित्कृत्यकृत्यो मुमुक्षुषु ॥५६॥ वर्णी वाथ
२६ गृही वन्यो यतिः क्षत्रियवैश्यकः ॥ व्रतं पाशुपतं कृत्वा मम ज्ञानमवाप्नुयात् ॥५७॥ अन्ते चेत्कर्तुर्यत्पुण्यं व्रतेनानेन सिद्धिदं ॥
तस्याविमुक्ते देहांतः प्रसादान्मे भविष्यति ॥५८॥ किमत्र बहुनोक्तेन ज्ञानांगमिदमेव हि ॥ सर्वैर्मुमुक्षुभिः सेव्यं सत्यं सत्यं मयो
दितं ॥५९॥ अथर्वसर्वस्वमिदं शिरोव्रतं शर्वप्रियं पर्वतराजनंदिनी ॥ अखर्वपापाद्रिमहाघगर्वहृत्सर्वार्थमेधादपि मेध्यतुष्टि
कृत् ॥६०॥ कैवल्यश्रुतिवल्लरी कुसुमितश्रीपल्लवोल्लासि यन्मे ध्यानार्चनरुद्रसूक्तजपतो भस्मस्मरारिप्रियं ॥ यन्मुक्तिप्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० दभक्तिसूक्तिपरमंपुण्याविमुक्तिंसदा॥मोदायाहमनेमेवकिंचपरमानंदप्रिये शाश्वतं॥६१॥बृहज्जाबालोक्तश्रुतिविहितभस्माक्ष ईशा०द०पू
२५ विधृतिःपरं।निर्वाणायप्रकथितमहोशैलतनये॥तदुक्तंतन्मुक्त्यैप्रभवतिविशेषेणमनुजैः द्विजैःसंसेव्योयंश्रुतिगदितमार्गोहि अ०१४
सुगमः॥६२॥भूत्यैप्रमादोनविधेयइत्युमेतैत्तिरीयाह्निसदामनंति॥कालाग्निरुद्रा अपिसंगिरंतिश्रुतेर्गिराभस्मधृतिप्रभावं॥
॥६३॥इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्द्धे त्रयोदशोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥श्रीईश्वरायनमः॥
श्रीईश्वरउवाच॥ ॥भस्माधिकारसंपत्तिंधारणेपात्रमप्यहो॥अधिकारिविभेदेन प्रवक्षा(क्ष्या)मिनिबोधमे॥१॥ब्रह्मचारीगृहीवन्यः संन्यासीमत्प
रायणः॥धृत्वावाधारयन्वापिदृष्ट्वास्यष्ठापितंनरं॥२॥निंदन्मुदंप्रपद्यन्वासद्योयातिकृतांकृतं॥धृतःत्रिपुंड्रोयःकोवा सएवाहंमुनेसदा॥३॥
मांपोवेदसवैदेवोमां योद्वेष्टि सवैद्विजः (=देगल)॥भस्मस्नातंनरंदृष्ट्वा प्रणमेन्मांयथातथा॥४॥भस्मनिष्ठस्यदह्यंते दोषाभस्माग्निसंगमात्॥तस्मात्सर्वे
षुकालेषु वीर्यवान्भस्मसंयुतः॥५॥अग्निषोमात्मकंचैव जगत्स्थिरचरंमुने॥तेनभस्नापितंचांगेजगत्तेनधृतंभवेत्॥६॥अग्निषोमतनुंकृ
·X त्वानसभूयोऽभिजायते॥भस्मस्नानविशुद्धात्मा भस्मनिष्ठइतिस्मृतः॥७॥भस्मशायीचपुरुषोरुद्राध्यायीत्रिपुंड्रधृक्॥भूतप्रेतपिशाचाद्या
रोगाश्चातीवदुःसहाः॥८॥भस्मनिष्ठस्यसान्निध्या विद्रवंतियथातथं॥भस्मप्रीतियुतोमर्त्योदुर्लभोदुर्लभोमुने॥९॥यत्रकुत्रस्थितंभस्म
लापयन्मुक्तिभाक्भवेत्॥ आसकंभसितःप्रोक्तंभस्मकल्मषभक्षणात्॥१०॥भूतिर्भूतिकरीप्रोक्ताक्षारक्षारक्षाकरीमुने॥क्षरणंपापजालानां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षारमेतत्प्रगीयते ॥११॥ भस्मनः पंचनामानि श्रुतिगीतानि ते मुने ॥ उक्तानि मुक्तिदायीनि श्रद्धयैव निशामय ॥१२॥ भस्मस्नानेन यावंतः क
णाः स्वांगे प्रतिष्ठिताः ॥ तावंतः शिवलिंगानि तनौ धत्ते मुनीश्वर ॥१३॥ कणानां संख्यया तस्य सदा तत्पितरो खिलाः ॥ नरकस्था दिवं यांति दि
विस्था मम लोकगाः ॥१४॥ अधिकारिविधिं चापि मनः समवधारय ॥ ब्राह्मणाः क्षत्रियो वैश्यः शूद्रो वापि च संकरः ॥१५॥ स्त्रियोऽथ विध
वा बाला व्रात्या पाषंडिनस्तथा ॥ ब्रह्मचारी गृही विप्र संन्यासी वा व्रती तथा ॥१६॥ नर्यभस्मत्रिपुंड्रांको मुक्त एव न संशयः ॥ विधिं कालं चाधि
कारी धारणे त्याजने मुने ॥१७॥ फलाफलं प्रवक्षामि शृणुष्वैकमना मुने ॥ यच्छ्रुत्वा महदाप्नोति पुण्यं मत्पदभावनः ॥१८॥ यत्कृतेन
कृतं सर्वं ज्ञात्वा स्नायीत भस्मना ॥१९॥ ज्ञानाज्ञानधृतो वापि वह्निर्दहे समो यथा ॥१९॥ ज्ञानाज्ञानधृतं भस्म पावयेत्पावनं परं ॥ पुरा कैला
सशिखरे देव्यै प्रोक्तो मया विधिः ॥२०॥ तत्तेऽद्य कथयिष्यामि त्वं मे शिष्यो विशेषतः ॥ शृण्वेभिः सुरवृन्दैश्च मद्गुणैर्मुनिभिः सह ॥२१॥
२६ निःसंशयो विधिरयं सर्वेषां सर्वदा मुने ॥ सर्वपापप्रशमनं सर्वपुण्यविवर्धनं ॥ न स्नानशौचाचमनक्रियाभिः शुद्धो न विद्यापि कृ
ताकृतो हि ॥ भस्मत्रिपुंड्रोज्ज्वलितफालगात्रः पात्रं नसामुष्मिकपुण्यहेतौ ॥२३॥ स्नानैः पंचद्वयाद्यैरपि न स वै शुद्ध्यते मानसैर्वा आग्नेयेन स नग्न
कोपि न भवेन्नग्नो महापातकैः ॥ संध्याध्यानसमार्चनस्तुतिकथा मन्त्राग्निविद्यादिकैः भस्माभ्यक्ततनुर्धुनाति सकलं पापं त्रिपुंड्रांकधृक् ॥२४॥
संध्याहोमजपार्चने पितृविधौ तीर्थे सदा तर्पणे श्रीरुद्रावृत्तिपंचवर्णकमनोः जाप्ये स एवोत्तम ॥ तत्त्वं त्वा सकलं बलेन कलयन्नैवाप्नुयात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्फलं तस्मात्सत्त्वप्रच्युत व्यवैति स शिवे मन्वेव हन्यामितं ॥२५॥ योनंदनेश्चन्दनकेपि मिश्रं धार्यं हि भस्मैव त्रिपुंड्रभस्मना ॥ नभू
तिफालो परि किंचनाद्विजे धार्यं सदा नोपदिशंति बुद्धयः ॥२६॥ स्त्रीभिः त्रिपुंड्रमतिकावधि धारणीयं सत्कुंकुमांकितलसत्
तिलकं ततोधः ॥ धार्यं कुमारिभिरथैवमेवं भस्माद्विजादिभिरुमे विधवाभिरेवं ॥ रेखा समस्तघिरिशे त्वधरमथवायुष्यना शंविधत्तेभी
तिं भ्रूयुगलाधिकं विधिकृतं भस्म त्रिपुंड्रं परं ॥२७॥ तस्माद्रेखा त्रयाख्यं विरचित विरलं कल्पनीयं ततो धौ देयं वै तिलकं सदैव भसि
तालंकार पापौघहृत् ॥ श्रद्धा श्रद्धोपि मर्त्यो भसितसिततनुर्यस्त्रिपुंड्रं वतीर्यक् कृत्वा दर्शे पितृभ्यः प्रमुदितमनसा भोजये त्तर्पये
द्वा ॥२८॥ भस्माभ्यक्तांश्च विप्रान्श्रुतिवरवदनान्र्द्धं भुपादाब्जभक्तान् कं भोज्यं प्रमुक्त्वै पितॄणां दिशि शिविधिवशात्तेन दत्तं मुदेवै ॥
भस्मोद्धूलनवर्जितं यदिकृतं भो कुश्चकर्तुः सदा तद्धं श्यापितरोप्यवश्यमगजे प्रेतत्वहीना नवै ॥२९॥ तच्छ्राद्धं विधितः कृतं च सुकृतं
नैवेति पापोत्तरं तद्दत्तापनिवापपिंडपतनं तन्मांसविष्ठोपमं ॥ तत्पूर्वेण मुखे विलिंपति शिवे घोरेण वक्षस्थलं वामेनैव सदा स्वबा
हुयुगलं सद्येन सर्वांगकं ॥३०॥ ईशानेन शिरस्त्वपि प्रविकरे भस्मादिधूलः क्रमः ॥ त्रियायुषं मनुप्रभा भसितफालपुंड्रोज्ज्वलोज्ज्वलच्छि
खिशिखोपमो भवति भूतिपूतो द्विजः ॥ वर्नीच सततं शिवे सुविहितोपि वर्णीक्रमात्र्यंबकमनुप्रभा भसितफालपुंड्रांकधृक् ॥३१॥
प्रणवप्रवणोथ मस्करी स्वकपापानि तिरस्करोत्यपि ॥ भसितं सितमेव तेन धृत्वाप्यदगुण्येव त्रिपुंड्रधृक् भवेत् ॥ फाले शिरोजनित

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पापततिं निहंति वक्षोधृतं च परतल्पगसंगभंगं ॥३२॥ बाह्वोर्धृतं भसितमेव हि तत्कृताघं सर्वांगलेपितमुमे सकलं निहन्यात् ॥ कीलालं वि
मलं विभूतिजनितं हस्तोज्झितं तत्पिवेन्नाधो त्याज्यमिदं सदा त्रिपुंड्ररचितं उच्छेषणं शोषणं ॥ पापानां भवतें भवानि सततं आपः पुनंती
त्यमुं मंत्रैः पात्रतमं द्विजं करोति सुहितं त्वेतात्रिनेत्रप्रियं ॥३४॥ कालत्रयेपि निशि धार्यमुमे त्रिपुंड्रं केचिन्निशासु परिधूलनमामनंति ॥
तन्नप्रशस्तमिदमेव सदा विधेयं, धार्यं त्रिपुंड्रमखिलैर्मम शासनं हि ॥३५॥ दृष्ट्वा दुःस्वप्नकं सदा धृतमुमे दृष्ट्वाप्यरिष्टं मुदा धार्यं भस्मसमंत्र
कं प्रविलयं दुःस्वप्नमेवं व्रजेत् ॥ स्पृष्ट्वास्पृश्यविनिंद्यविप्रियमहापापां त्यजस्पर्शनं सद्यो ह्यघतमं भवेत भसितं पापौघतापौघभित् ॥३६॥
पर्वस्वप्यविशेषतो द्विजवरैर्धार्यं त्रिपुंड्रात्मना नित्यादप्यधिकं फलं लभेत सशिवे पूर्णेंदुसूर्यग्रहे ॥ संक्रांतावयनद्वयेपि च सदा पातेस
पापौघभिद्धयो देव सपुण्यपुण्यपरमानंदैकमोदैकभूः ॥३७॥ ॥इति श्री शिवरहस्ये ईशानाख्ये दशमांशे चतुर्दशोऽध्यायः ॥१४॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईशानाय॥ ॥मुनिरुवाच॥ ॥कुमारसुकुमारांगमारमारप्रियप्रभो॥ वारंवारं
८७ प्रपद्येहं शूरहारिपदांबुजं ॥१॥ श्रुतमंकुपाजाख्यानं भस्मनो महिमामपि ॥ शिरोव्रतविधिं चैव शिवप्रोक्तं विशेषतः ॥२॥ श्रुतं विश्रुतमाख्यानं
श्रुतिप्रोक्तं सदाद्भुतं ॥ कथं रुद्राक्षमहिमा तन्मे विस्तरतो वद ॥३॥ निस्तारय भवांबुधेः धारणेन नगा इव ॥ कथं रुद्राक्षवृक्षाणामुत्पत्तिः को वि
धिः फलं ॥ धारणे वा कथं तस्य कालस्तस्य मुखेन च ॥ किमुक्तवान्महादेवो देव्यै रुद्राक्षजं फलं ॥५॥ धारणे चाधिकारी कः तन्मे स्कंद वद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० धुना॥ ॥सूतउवाच॥ ॥इतिवाक्यं मुनेःश्रुत्वा क्रौंचारिस्तमभाषत॥पुराकैलासशिखरेयत्पृष्टं तत्कृतंसदा॥देव्यैदेवेनकथितंतदवोच ईशा·द·पू·
२७ त्कथात्मकं॥७॥ ॥श्रीस्कंदउवाच॥ ॥शृणुत्वंगणवृंदैश्चसुरवृन्दमुनीश्वरैः॥कैलासशैलप्रासादे चंद्रस्फटिकनिर्मिते॥८॥देवीकांत अ·१५
तरं कांतं चद्रस्फीज मनोहरं॥स्मयमानमुखांभोज षट्पदीकृत मानसा॥९॥सस्मिताक्षंरहस्यैवमपृच्छत्पर्वतात्मजा॥दिव्यासनेसमा
विष्टं शिपिविष्टं तदांबिका॥१०॥ ॥देव्युवाच॥ ॥रुद्राक्षमहिमाशंभोनश्रुतोविस्तरान्मया॥तन्मेकौतुकमुत्कृष्टं श्रोतुंतन्माहि
मांविभो॥११॥तवामृतमुखांभोजचंचरीकायते मनः॥कथासुधारसंपातुं इच्छास्वल्पास्तिमेशिव॥१२॥रहस्यमपिमेब्रूहि सावधानास्मि
सांप्रतं॥ ॥श्रीस्कंदउवाच॥ ॥इत्युक्तंगिरिजावाक्यंश्रुत्वाचंद्रकलाधरः॥प्रहस्याहमहादेवःकैलासेगिरिजां तदा॥१३॥ ॥श्रीईश्वरउ
वाच॥ ॥शृणुत्वमगजेजाये फुल्लकह्लारक गंधिनी॥धंमिल्लमल्लिविमलगंध ...... कचोभरे॥१४॥भौव्ये मनोरंतरेतेदितिजाबलदर्पि
ताः॥कश्यपस्यान्वयेजाताः महाबलपराक्रमाः॥१५॥देवान्जिग्युश्चसंग्रामे नैसर्क्तन्मत्परायणाः॥ब्रह्मविष्ण्वादयोदेवास्तैर्जितं
बलवत्तरैः॥१६॥ऐरावतसमारूढःसुरवृंदयुतोन्वहं॥रणेनिराकृतोदैत्यैः मदृप्तवरदर्पितैः॥१७॥विध्वस्तामुनयःसर्वेलोकाश्चैवचतु
र्दश॥अधरोत्तरमुद्भ्रांतंजगच्चक्रुर्बलोद्धताः॥१८॥यज्ञभागभुजोदेवाःकृतास्तेबलिभोजनाः॥पितरःकातराजाता मरुतोगरुतोभ
वन्॥१९॥वसवश्चासुभिर्हीना वायुरायुनिराशवान्॥गोविंदोमंदगर्वोभूत् ब्रह्माजिह्मत्वमाप्नवान्॥२०॥आदित्याःक्षितिगत्यां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षिविचरंतिपृथक्जनैः ॥ विश्वासहीनाअभवन् विश्वेदेवास्तदाबलाः ॥ २१ ॥ रुद्रादीरुद्राश्चभवन् गरुडामूर्छतांगताः ॥ यक्षाश्चध्वंसितादै
त्यैः ध्वांक्षाइवमहाबलैः ॥ २२ ॥ समीरणोथवरुणोरणेदैत्यैःपराजितौ ॥ अश्विनौश्वासहीनौतौ कांदिशीकौदिशामुखे ॥ कृशः कृशानुरेता
भूत् गंधर्वा धैर्यवर्जिताः ॥ मुनयोमनवश्चैव वामनाप्रद्रवंतिच ॥ २४ ॥ अपसर्पंति सर्पास्तेदैत्यभीत्यादिशोदश ॥ दिशागजामदो
द्भूतामदधाराविवर्जिताः ॥ वेदानिर्वेदतांप्राप्ता शंकस्त्रस्तभयाचत ॥ २६ ॥ तर्जिताः पर्वताः सर्वे पक्षगर्व विवर्जिताः ॥ दीनाःहीनब
लाःसर्वे सुरा दैत्यपराजिताः ॥ प्रणवःप्राणहीनोभूत् कुबेरोबेर वर्जितः ॥ २७ ॥ त्रिविष्टप विनिष्ठाये तेभ्यः तद्रुमो कष्टजीविनः ॥
एवंब्रह्मांडमुद्दंडदैत्यदंडेनपीडितं ॥ २८ ॥ निःस्वाध्यायवषट्कारस्वदामरव मुखोज्झितं ॥ लेखदुःखप्रदंचैवं जगदासीच्चराचरं ॥ २९ ॥
संतप्ताव्यथिताःसर्वे गीर्वाणाश्चार्णवंगताः ॥ सागरारगवेगेनवडवाग्निमुखेर्पिताः ॥ ३० ॥ नवातिवातपोतोपिदैत्यभीत्याऽनिशंशि
वं ॥ अग्निरूर्ध्वशिखश्चापिशिखाभ्याप्यधोमुखा ॥ विद्युतोद्युतिहीनाश्च सोमोम्लानवपुर्धरः ॥ चंडरश्मिर्मंदरश्मिरभूद्दैत्य
२८ पराजितः ॥ ३२ ॥ क्रूराक्षेणाथतेदेवि ताराक्षेणपराजिताः ॥ ताराभारा हृतापेतुः मकराक्षेणपीडिताः ॥ ३३ ॥ विद्युन्मंडलमुत्कृष्ट
माकृष्टंमेघमंडलं ॥ कल्पवृक्षाः क्षितितलेसमानीताश्चनंदनात् ॥ ३४ ॥ मलवद्धिकृतंलोकं तदाविद्युत्सुमालिना ॥ एवंक्रूरर
पाक्षोप्ययांबाणासिपरिघैः शरैः ॥ ३५ ॥ ऐरावतोरावितश्च शक्रोविक्रमवर्जितः ॥ असकृत्तर्जितादेवा जगच्चक्रंचभर्जितं ॥ ३६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० निर्वीर्या वीर्या: सर्वेपि आर्यधर्मविवर्जिता: ॥ तत्र देवैस्तु तो देवि ब्रह्मविष्णुपुरोगमै: ॥ ३७ ॥ त्रिपुराणां वधार्थाय मतिं कृत्वाहमास्थित: ॥ ईशा० द० पू०
२८ ब्रह्मादिस्तुतितोषितोहमगजे त्रैलोक्यरक्षाक्षमै: मन्त्रैस्त्र प्रभवाश्रुतिप्रभविना रुद्राक्षवृक्षक्षितो ॥ द्वात्रिंशत्प्रभवा भवंति नियतं तद्बीज अ० १५।१९
मेवामले धार्यं वैदिकसंमतं श्रुतिशिरोवार्त्तासु निर्वर्ज्जितं ॥ त्र्यक्षानुक्षणवीक्षणेन भगद्दृक्संधुक्षलिंगार्चको रुद्राक्षोरुवलक्षदि
व्यभसिताऽलंकारपुंड्रांकधृक् ॥ ३९ ॥ पापध्वांक्षनिवारणाय सकरासंगाद्भ्रम संक्षेपको ॥ मोक्षश्रीकरसंगसंभवमहानंदांबुपानोद्यत: ॥
॥ ४० ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्द्धे पंचदशोध्याय: ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ ईशानाय नम: ॥
श्रीदेव्युवाच ॥ ॥ एतादृशबलैर्युक्ता: कथमासन्दितेसुता: ॥ किं तपस्तैस्तपो देव त्वत्प्रीतिजनकं महत् ॥ १ ॥ तन्मे वद विशेषेणादितिजानां
विचेष्टितं ॥ श्रवणे न धृतो शंभो तन्मह्यं वक्तुमर्हसि ॥ २ ॥ ॥ श्रीस्कंद उवाच ॥ ॥ इत्थं देव्या तदा पृष्ट: शंकर: करुणाकर: ॥ तां प्राह
थ तपश्चर्यां दैत्यानां परमाद्भुतां ॥ ३ ॥ ॥ श्रीईश्वर उवाच ॥ ॥ शृणु देवि विशालाक्षि द्विजातीनां विचेष्टितं ॥ तैर्यत्तप्तं तपो घोरं नतथा
सुरसत्तमै: ॥ ४ ॥ मुनिभिर्गणवृंदैर्वा तन्मत्त: श्रोतुमर्हसि ॥ तारकाक्षो मकराक्षश्च विद्युन्माली च ते त्रय: ॥ ५ ॥ त्रेताग्निवर्चस: सर्वे बलस्यैव तनू
भवा: ॥ भवपादाश्रसंसक्ता: त्रिपुंड्रपरिशोभिता: ॥ ६ ॥ रुद्राक्षहारवलयास्ते ह्यासन् करुणालया: ॥ शिवलिंगार्चनाशक्ता: सर्वदा बिल्व
पल्लवै: ॥ ७ ॥ बलेहते तदेंद्रेण तत्पुत्रास्ते त्रयोंबिके ॥ शुक्रं वै शरणं याता रणे सुरपराजिता: ॥ ८ ॥ प्रणम्य काव्यं दितिजा दु:खभागिन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तानना॥ प्रोचुर्वृत्तांतमखिलं स्वपितुर्मरणं रणे॥९॥ ॥दैत्या ऊचुः॥ ॥देवैः पराजिताः सर्वे दैत्या वात्या इवाहताः॥ बलश्च बलिनां
श्रेष्ठो निहतो रणमूर्धनि॥१०॥ शरासारैश्च लगुडैः खड्गैर्वरधरैः सुरैः॥ विप्रद्रुतबलाः सर्वे हतनाथ हतौजसः॥११॥ कांदिशीका
न्यस्तशस्त्रास्त्वामेव शरणं गताः॥ भवान्गुरुर्भवांस्त्राता भवपादार्चने रतः॥ वदास्मभ्यं जयोपायं येन जेष्याम्यहं सुरान्॥ ॥
सूत उवाच॥ ॥स शुक्रो दैत्यवचनात्तानाहूयाथ सांत्वयन्॥१३॥ ॥शुक्र उवाच॥ ॥आहो (अहो) यूयं दितिभवाः सर्वे एवम
होजसः॥ सुरैर्विप्रद्रुता भीत्या वात्या पर्ण इवाहताः॥१४॥ उपायं वो प्रवक्ष्यामि तच्छृणुध्वं मतं दिताः॥ प्रसे पूज्य महादेवं तप
साराध्य शंकरं॥१५॥ तस्माल्लब्धवरा यूयं विजेष्याम रणे सुरान्॥ आषाढार्चनयुक्ता यां तुराषाड पिनो समः॥१६॥ हि
मवच्छिखरं गत्वा कंदमूलफलाशनाः॥ भस्मरुद्राक्षसंपन्नास्तपः कुरुत मा चिरं॥१७॥ भवतामचिरादेव वरं दास्यति शंकरः॥
अरिपक्षजयोपायः शंकरस्यैव पूजनं॥१८॥ भुक्तिमुक्तिप्रदं दैत्या शंकरस्यैव पूजनं॥ स्वर्ग्यं संतानमायुष्यं शंकरस्यै०॥१९॥
ब्रह्मत्वममरत्वं च शंकरस्यैव पूजनात्॥ पशुपाशविमोक्षं च शंकरस्यै०॥२०॥ विद्यासुखधनावाप्तिः शंकरस्यैव पूजनात्॥ वि
ष्णुत्वं वासवत्वं च शंकरस्यैव०॥२१॥ दिक्पालत्वं मुनित्वं च शंकरस्यै०॥ गंधर्वगरुडेशत्वं शंकर०॥२२॥ यद्यद्विभूतिमत्सत्त्वं शं
कर०॥ तस्मात्पूजापरं श्रेयो ददाति दितिजाः सदा॥२३॥ गच्छध्वं द्रुतमत्युग्रं तपश्चरत सुव्रताः॥ शिवलिंगार्चका यूयं भस्मरुद्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 क्ष भूषणाः ॥२४॥ रुद्रपंचाक्षरावृत्त्या तोषयध्वं महेश्वरं ॥ इत्युक्तास्तेथकाव्येन नत्वा दुःखविवर्जिताः ॥२५॥ काव्यमव्याहतै 
 श्वर्यं स्तव्यं स्तुत्वादितेः सुताः ॥ ययुः प्रालेयकगिरिं तपसे धृतनिश्चयाः ॥२६॥ रम्यं वृक्षशतोपेतं मृगपक्षिविराजितं ॥ सरोवरोरुसं 
राजद्राजीवोत्फुल्लकल्हलकं ॥२७॥ तत्तीरे सरिदाभोगतरंगक्रांतमारुते ॥ रुतेपक्षिनिकायानां वसंतोत्फुल्लशाखिषु ॥२८॥ निरु
ध्यत्वमनोदग्रमुग्रार्चनपरास्तदा ॥ त्रिकालस्नानपरमा भस्मरुद्राक्षभूषणाः ॥२९॥ त्यक्तेषणास्त्रिषवणमुदकाप्लाविग्रहाः ॥
पंचाग्निनिरताः सर्वे मूर्ध्निसूर्यकरार्दिताः ॥३०॥ हेमंते सरसिस्वस्थाः वर्षास्वभ्रावकाशकाः ॥ कटधूमाशनाः सर्वे सूर्च्यग्रेसम
वस्थिताः ॥३१॥ वायुपर्णांबुफलजच्छदभोजनकारिणः ॥ शरणं प्रतिपन्नास्ते महादेवपदांबुजं ॥३२॥ प्रत्येकमेषां वर्षाणां
सहस्राणि तपोरताः ॥ निरुच्छ्वासपराः सर्वे स्थाणुवत्स्थाणुतत्पराः ॥३३॥ तेषां तपस्ययातप्तैर्देवैरुत्सादिताप्सराः ॥ तेचाप्स
रसवर्गाणां आलोकनविवर्जिताः ॥३४॥ देवानां भयमाजह्नुः दैत्यास्ते दैत्यपोरताः ॥ तेषां तपोमहद्दृष्ट्वा सुरायाताः पितामहं
॥३५॥ भीतादैत्यतपस्याभिः शरणं पद्मजं तदा ॥ प्रोचुः प्रांजलयः सर्वे शक्रमुख्या दिवोकसः ॥३६॥ ॥ देवा ऊचुः ॥
बलपुत्राः सदा ब्रह्मन् तपोनिष्ठाजितक्रुधः ॥ ताराक्षोमकराक्षश्च विद्युन्माली महाबलः ॥३७॥ बलप्रमथनाचार्यातो महा
बलपराक्रमाः ॥ नास्माभिर्धर्षितुं शक्यास्तेषां चैवतपस्यया ॥३८॥ सुराः संतोषिता ब्रह्मन् तान्वरेणाभियोजय ॥ ॥

सूतउवाच॥ ॥इत्थंगीर्वाणवचसा सहसापद्मजस्तदा॥ययौहंससमारूढः सुरैर्दैत्यवरांतिकं॥दृष्ट्वादैत्यांस्तपोयुक्तान
भ्यभाषतपद्मजः॥भो भोदैत्यसुतायूयंमत्तः किमभिवांछथ॥४०॥भवतां तपसा तुष्टः वृणुध्वंवरमीप्सितं॥वाणीपतेस्तस्
वाणीं श्रुत्वातेदानवोत्तमाः॥४१॥प्रणम्य पद्मजंप्रोचुः सुराणां पश्यतांशिवे॥ ॥दैत्याऊचुः॥ ॥स्वच्छंदमरणंनोस्तुअ
वध्याश्चसुरैः सदा॥अयोरजतहेमादिपुरं पक्षसमन्वितं॥४२॥पुराणियत्रनो ब्रह्मन् गतिस्तत्रचजंतुनः॥यदासर्वैःसमेष्या
मः यद्येकस्मिन्क्षणेविधे॥एके नैवेषुणाहन्यात्तदा नोस्तुवधोध्रुवः॥इतिदैत्यवचः श्रुत्वा विधिस्तानभ्यभाषत॥४४॥एष
वोस्तुवरोदैत्याः निवर्त्तध्वंतपोबुधैः॥तथेतितेदैत्यसुताजहर्षुः॥ विधेः सुवाक्येन बलोन्नतिंगताः॥४५॥पुराणितेषांप्र
बभूवुरंबिके मोदायवृक्षाश्रयणानि तेषां॥विधिःसुरैश्चाभिजगाम लोकं॥प्रतारिताश्चेतितदासुराजगुः॥४६॥ततेदैव
तेदैत्यसुताबलिष्ठा जिग्युःसुरांश्चापि निजघ्नुरुद्धताः॥हस्तन्यस्तोरुशस्त्रैः करमुखविधृतैः कार्मुकज्याविनिर्यद्धारा
३० सारशरावैः सुरगणंजघ्नुश्चतेवैरणे॥संन्नद्धोद्धतबाहुदंडविधृतैर्दण्डैश्च खंडीकृतान्मुंडैःखंडवरांडभांडमसकृत्कुर्वंतिशी
रैर्रणे॥४७॥ ॥इतिश्री शिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्द्धे षोडशोध्यायः॥१६॥ ॥श्रीकाशीविश्वेश्वरा
र्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ॥ततोदैत्यामदाविष्टाः त्रिविष्टपनिवासिनां॥मदंचम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० दयंतस्ते स्वेनानीकेन दंशिताः॥१॥रणमूर्धनि ते दैत्या देवतैः समयोधयन्॥शस्त्रास्त्रदंडपाषाणैः मुसलैस्ते गदायुधैः॥२॥असिकुंतहलैर्यंत्रैर्बाणैर्भि ईशा·पू·द
३० पासनच्युतैः॥धुरंधरैः सिंदुरैश्च चतुरंगबलैस्तथा॥३॥हया हयैर्गजाश्चैव दंतिभिश्च रथा रथैः॥पत्तिनः पत्तिभिः सार्धं कवचेषु निषंगिणः॥४॥खड्ग अ०१७
खेटधरा दैत्या सुराश्च युयुधुर्युधि॥वसंतसूर्योत्कर चाकचक्यासिभिर्मृधे॥मंडलानि तदा चक्रुरसिविक्षेपणैस्तदा॥५॥शतं सहस्रं नियुतमयुतं
प्रयुतं तथा॥निजघ्नुः शरवर्षैस्ते अन्योन्यं तौ ततक्षतुः॥६॥शराचितांगसर्वस्वौ वसंते किंशुकाविव॥मकराक्षोथ युयुधे देवेंद्रेण सुरैः समं॥७॥दै
त्याश्चोद्रिक्तशस्त्रास्ते ताराक्षेणाप्यपांपतिः॥युयुधे पाशसर्वस्वैर्वारुणैः स्वगणैः सह॥८॥मयूरवमाली स तदा विद्युन्मालिनमाह्वयत्॥निःसाण
भेरीभाकार गर्जितानकगोमुखैः॥९॥तर्जितांभोनिधिरवैर्भीरूणां भयदायकैः॥गदानिःपातशब्दैश्च कवचानां कचाकचैः॥१०॥करिबृंहितयोधा
नां कूजतामितरेतरं॥हयहेषितशब्दैश्च रथनेमिस्वनां तथा॥११॥खंधांनिसंधत्मस तदा खंरावोत्थं तदारुणाः॥वसंतार्ककरासार प्रविद्युदसिभिस्फुटैः
॥१२॥वर्षासु शलभासंघसमावृत्तनभो यथा॥तथा शरासारपरं नभो भूद्दैत्यदारुणं॥१३॥अन्योन्यमत्सरारावकनकत्सरुसत्करैः॥मंडलीकृतकोदंडचारुका
डसरावरैः॥१४॥कंकरूक्षमहापक्षलक्षीकृतशरैः सुराः॥नाराचैर्वत्सदंतैश्च क्षुरप्रैः प्रक्षिप्तांगकाः॥१५॥विपाटिपाटितो रक्ताः दैत्याश्चैव सुरास्तदा॥नारा
चोत्सन्नकवचाः वत्सदंतैश्च दंसिताः॥१६॥निजघ्नुः शरवर्षैस्ते स्वमर्मसु मुमूर्षवः॥अन्योन्यं चिच्छिदुर्बाणैः शतशोथ सहस्रशः॥मकराक्षः सह
स्त्राक्षं विव्याथ निशितैः शरैः॥करटीकटभागे च शतेनानतपर्वणां॥१८॥कुंभांतरे सहस्रेश्च दंतवेष्टे शतोत्तरैः॥नखसंधिषु सर्वेषु करींद्रस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मवाकिरत् ॥१९॥ सफालैरफलीभूतैः स्वशरैरावृतोऽसि ॥ निजघान स दैत्येंद्रः तमिंद्रमपि सत्वरम ॥२०॥ इंद्रोपि मकराक्षं तं शरैर्विव्याध सप्तभिः ॥ वक्षोशीर्षे
तथा मुष्टौ कवचेश्च शतं शरैः ॥ धनुर्ज्यामच्छिनत्तस्य यंतारं तरसा रणे ॥ रथे ध्वजे चक्रवधे योक्त्रे च हयसारथौ ॥२२॥ पातयंतः शरासारमन्योन्यं ते सु
रासुराः ॥ मयूरवमालिनं चापि विद्युन्माली तदाच्छिनत् ॥ शरासारैर्यथा वार्कं प्रावृट्कालपयोदवत् ॥ तदार्कोपि तदा छन्नोप्यछन्नो वार्षकालिकः ॥ न च व्य
क्तं न चाव्यक्तमभूत्तत्क्षुरपीडितः ॥ तद्रथे ध्वजवृंदे च तद्वक्षसि हृदये तथा ॥२५॥ तद्धंतारिशरासारमवर्षत्स्वकरच्युतैः ॥ यथा सूर्यकरोत्सृष्टा वृष्टिः सस्याभिवृद्ध
ये ॥२६॥ तद्दैत्यहयमुख्येषु पातयत्खंडयन्नृपैः ॥ केषांचिद्बाहवश्छिन्नाः शिरांसि न्यपतन्क्षितौ ॥२७॥ महावातसमुत्थेन वृंतात्तालच्युतिर्यथा ॥ ता
राक्षोपि तदा तत्र वरूणं समरोल्बणे ॥२८॥ रथस्थोभिजघानाथ शरैरानतपर्वभिः ॥ शिंशुमारोऽमरारीणां समरे सोऽरिमर्दनः ॥२९॥ ताराक्षस्य महावक्षो वि
ददार शितैः शरैः ॥ यंतारं च त्रिषष्ट्या तु सप्तत्या वाजिनस्तथा ॥३०॥ सस्रौ तत्र महावेगा असृग्घोरा तरंगिणी ॥ मेदोवसामांसपंका गजोरुपुलिना
तदा ॥३१॥ छत्रचामरफेनौघा भीरूणां भयवर्धना ॥ एवं शतं ते वर्षाणि शरवर्षैः सुरासुरैः ॥ युयुधुः समरे देवा दैत्या रक्षोति हर्षदं ॥ निजघ्नुः समरे
वीरा शिरांसि तनवक्षितौ ॥३३॥ हस्तान्सहस्ताभरणान् असिभिः द्योतितप्रभान् ॥ सकुंडलशिरस्त्राणैरासृतारणभूरभूत् ॥३४॥ गजानां च शरीरौघैः
31 हयभग्नरथैस्तदा ॥ पातयंति तदा दैत्याः सुरांश्च दितिजान्सुराः ॥३५॥ एवमन्योन्यमुद्भूतं तुमुलं रोमहर्षणं ॥ नृत्यत्कवंधासंभ्रांतं मुष्टामुष्टि
कचाकचि ॥३६॥ युद्धं विध्वस्तदेवौघं भीकरं समपद्यत ॥ सहस्रवारं देवानां दैत्यानां विष्वपाशया ॥३७॥ ततस्ते विफला देवाः पलायनपरायणाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० न्यस्तशस्त्राक्षितितलेत्तणवक्रहृतौजसः ॥३८॥ विवाहनायुधाः सर्वेविस्रस्तमकुटास्तदा ॥ धावंत्यनभिवीक्षंतो सुरास्तेमुक्तमूर्धजाः ॥३९॥ हाकष्टमितिधावंति ईशा० द० पू०
३१ त्रिविष्टपविनाशिनः ॥ स्थानानितत्यजुर्भीताः ब्रह्माणंशरणंगताः ॥४०॥ दैत्यास्त्रिविष्टपगतानंदनेविहरंतिते ॥ तदाप्सरोभिर्दिव्याभिः स्रक्चंदनविभूषिताः अ०१७
॥४१॥ देवोपभोग्यंबुभुजुः भोगंतेदैत्यनायकाः ॥ शक्रानुशासिताः सर्वेस्थिताः शक्रपदेतथा ॥४२॥ दिक्पालपदवींसर्वेशासंतोबलवत्तराः ॥ यज्ञभागभुजो
ऽभूवन्मुनीनांभयभावनाः ॥४३॥ उद्वेजयंतोलोकान्स्त्रीन्बलवीर्यमदोत्कटाः ॥ पपुः पानानिसोमेनमुनीनामाश्रमेषु च ॥४४॥ पुराणिनृपतीनांतेस्वपुरःपा
तनेनवै ॥ विनाशयंतितेदैत्यामत्ताब्रह्मवरोद्धताः ॥४५॥ देवाब्रह्माणमासुस्तेभयभीताससवासवाः ॥ निर्विण्णास्तेथगीर्वाणानिगीर्णादैत्यभीतितः ॥४६॥ सास्त्रावितेक्ष
णादेवाः प्रणतास्तेब्रुवन्विधिं ॥ देवाऊचुः ॥ पितामहनमस्तेस्तुत्वद्वरादैत्यनायकैः ॥ रणेपराजिताः सर्वेकथंचित्त्वांसमागताः ॥ भस्मरुद्राक्षयुक्तांगैः स्वांगैस्त्वामागता
वयं ॥४८॥ स्थानानिचास्मदीयानितेहृतान्येवमोजसा ॥ वंद्राग्न्यनिलवायूनांवस्वीशानमरुत्वतां ॥४९॥ इंद्रादिक्यात्तसूर्याणां शिक्षितासुरसत्तमाः ॥ नंदनेविह
रंतेवदैत्यायज्ञभुजः सदा ॥५०॥ विहरंत्यप्सरोभिस्तेदेवभोग्यैर्महोत्सवैः ॥ शिवद्रोहकृतः कोवाअस्माभिर्भोगतत्परैः ॥५१॥ किंचास्माभिर्महादेवः प्रदोषेपूजितोनहि ॥
नभूतिः विमलाफालेनधृतास्तिविधोकिमु ॥५२॥ रुद्राक्षधारणंपुण्यं विस्मितोरुद्रजापकः ॥ नचापिचाश्रीजप्तातत्फलंवाकिमागतं ॥५३॥ किंकुर्मः शाधिनोब्रह्मन्देवानांभ
यमागतं ॥ श्रीस्कंदउवाच ॥ इतितद्वचनंनिशम्यवेधाः सुरवर्गानथसांत्वयन्नुवाच ॥ भवतांभवपादसंश्रितानांभयनाशंप्रवदामिसद्यएव ॥५४॥ दितिजास्तपसाबलो
न्मताः ममचैवाद्यवरेणशंभुभक्त्या ॥ प्रभवामवयंचभूतिहेतोःशिवमेवाभुजामनोक्षिता ॥५५॥ इतिसर्वैः सुरसंघसंवृतोममकैलासवरंविधिः समाजगाम ॥ ममगंगातट
सीम्निसंगतोअभजन्मांसमुरैर्मुदाविधिश्च ॥५६॥ इतिश्रीशिवरहस्येदशांशेपूर्वार्द्धेसुरपराजयोनामसप्तदशोध्यायः ॥१७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोब्रह्मन्नूदेवानां भयमागतम् ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ इति तद्वचनं निशम्यैवेधाः सुरवर्यान प्र
सांत्वयन्नुवाच ॥ भवतां भवपादसंश्रितानां भयनाशं प्रवदामि सद्य एव ५४ ॥ इति जातपसा बलोन्नताः
मम चैवाद्य वरेण शंभुभक्त्या ॥ प्रभवाम वयं च भूतिहेतो शिवमेवाशुभजाम नो हिताय ॥ ५५ ॥ इति
सर्वैः सुरसंघसंवृतो मम कैलासवरं विधिः समाजगाम ॥ मम गङ्गातटसीम्नि संगतो अथ जन्मांससु
रैर्मुदा विधिश्च ॥ ५६ ॥ इति श्री शिवरहस्ये दशमांशे पूर्वार्धे सुरपराजयो नाम सप्तदशोऽध्यायः ॥ १७ ॥
श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री ॥ ईशानाय नमः ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ ततो
ब्रह्ममुखा देवा विष्ण्वाद्यास्त्रिपुरार्दिताः ॥ मामेव शरणं प्राप्ता मम कैलासभूधरे ॥ १ ॥ शतं वर्षाणि ते
देवास्तपन्ति परमं तपः ॥ मद्दर्शनार्थमगजे भस्मरुद्राक्षधारिणः ॥ २ ॥ मम लिंगार्चने व्यग्रा रुद्रपंचाक्ष
रादराः ॥ ब्रह्मा ब्रह्मेश्वरे लिङ्गे विष्णुर्विष्ण्वीश्वरे तथा ॥ ३ ॥ इन्द्रश्चेन्द्रेश्वरे देवि चन्द्रश्चन्द्रेश्वराभिधे ॥
3-२ सूर्यः सूर्येश्वरे देवि वरुणो वरुणेश्वरे ॥ ४ ॥ अग्निरग्नीश्वरे आश्विनौ तौ पितरः पैतृकेश्वरे ॥ ऋषीश्वरे च
ऋषयः रुद्रा रुद्रेश्वरे तथा ॥ ५ ॥ मुनीश्वरे च मुनयः विघ्नं देवश्वरे सुराः ॥ मत्कैलासे प्रतिष्ठाप्यालि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ङ्गान्येतानि शंकरि ॥६॥ मणिपद्मगतान्येव कृत्वा पाशुपतव्रतम् ॥ अग्निरित्यादिभिर्मन्त्रैर्धृतलिङ्गास्त ईशा० द० प्र०
१० दासुराः ॥७॥ रुद्राक्षहारवलयाः रुद्रपञ्चाक्षरादराः ॥ ब्रह्मविष्ण्वादयो देवाः पूजयन्ति च मांसदं ॥८॥ अ० १८
३२ पञ्चामृतैर्गन्धधूपैः पुष्पैर्नैवेद्यकल्पनैः ॥ बिल्वपत्रार्चनैश्चैव लिङ्गान्यभ्यर्च्य भक्तितः ॥९॥ स्तुवन्ति
स्तुतिभिर्दिव्याभिस्तुतिं मे निशामय ॥ ॥ब्रह्म उवाच॥ ॥ भवभूतपते पिनाकपाणे त्रिपुरग्रस्तमिदं सुनाकि
जालम् ॥ गरभक्षातुल चारुदृष्ट्या अभिरक्षाद्य तवाद्य संप्रपद्ये ॥१०॥ विष्णुरुवाच॥ ॥ मदनार्दनगं
गसक्तपर्दीश्वरं भो दुरितं मे शमयाशु चारुदृष्ट्या ॥ परिहर भयमेतद्दुग्रदैत्योद्भवमद्य त्वमहो भवैककेन्द्यः ॥११॥
श्रीइन्द्र उवाच ॥ ॥ त्र्यक्षाक्षय्यफलप्रदाव्ययगिरीभूतात्मकण्ठोज्ज्वल रक्षास्मान्शरणागतान् करुणया रु
दैत्यान्प्रहृत्यादरात् ॥ त्वत्पादाम्बुरुहं श्रयामि शरणं भस्मत्रिपुण्ड्रोज्ज्वलो नान्यामेस्ति गतिः त्वमे
व भगवन् रुद्रः श्रुतौ विश्रुतः ॥१२॥ ॥ चन्द्र उवाच ॥ ॥ सोमोत्तं सगजच्छदोत्तमवसामेयप्र
भो मांसदा दिग्वासा नसमे हृदम्बुज वरे वासी कृताङ्गाखिल ॥ दक्षोद्धृतसवप्रमथनं हे हे वासवाद्यर्चि
तं पाह्यस्मान्दयया सदैव करुणासिंधो ऽद्य बंधं हर ॥१३॥ ॥ सूर्य उवाच ॥ ॥ पतंगनयनप्रभो ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिशुकुरङ्ग हस्ताम्बुज वराङ्ग धृतगांगसद्दुर तरङ्गमालाधर ॥ हरामरवैरोत्तम प्रबलपापतापं हर स

प्र राङ्गदमन भो त्रिपुरदैत्य भीतिं हर ॥१४॥ ॥ वरुण उवाच ॥ ॥ तव शिव करुणाकटाक्षसा

रैः शरणं मे चरणं भवेन्मुदे ते ॥ करुणावरुणं भवाब्धिजन्यां जन्मतापापहरं भवं प्रपद्ये ॥१५॥ ॥

॥ वसव ऊचुः ॥ ॥ असुभिर्वैस्वावविहीनभासः स्मरवैरिन्नधुनामुखास्मि ते ते ॥ सुदृशास्मद्दृश्यदुर्द

शां परिहार्वैवि[illegible]हरावसर्वदानः ॥१६॥ ॥ मरुत ऊचुः ॥ ॥ रक्षास्मान् भगवन्नघोक्षजविधिप्र

क्षादिदूरांघ्रिकं पाहींदुद्युति मौलिधारित महागङ्गातरङ्गोज्ज्वल कामां गाढ़ीत भीतिदां तव दृशं दै

त्येषु संपातय ॥१७॥ अग्निरुवाच ॥ ॥ श्रीफालानललोचनान्तकहर व्योमावकाश प्रभो देवा

नामवनाय चारुसुदृशापाङ्गेन संवीक्षय ॥ उद्धृत्तासुरहत्त्वदीयकरज शूलानलोत्पाटितं तद्दैत्यप्रवरा

रुसुरवरप्राकारभंगं कुरु ॥१८॥ यम उवाच ॥ ॥ श्रीवामदेव जितकामललामसोम भीमात्म

83. येशामरनशासन व्योमकेश ॥ व्योमोत्तमांगवरसामसमस्तसीम भूमा त्वमेव भगवन्नव मां सदैव ॥१९॥

निर्ऋतिरुवाच ॥ ॥ देवेन्दुचूड भगवन्नमरारिपीडां भूयश्चेतां जगवरात्मजदेहभाग ॥ संहारया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० गुणितरामरविन्दनेत्र॥ पूजाब्जपादसहसा मनसाप्रपद्ये ॥ २० ॥ ॥ ईशान उवाच ॥ ॥ शंभो शंकर शान्त खण्ड ईशा० ३८ प्र
१० परशो देवेश विश्वार्तिहन्नुग्रो मेश भवोद्भव त्रिनयन मामद्य पाहि प्रभो ॥ अस्मान् रक्ष सदेव सौम्य करुणासारेक्षणो द्वीक्षित अ १८
33 नन्दरुग्निनिवारयाशु भगवन् नमस्ते शास्तं नमः ॥२१॥ ॥ अश्विनावूचतुः ॥ ॥ शंभो त्वं भवभेषजो भसितयुक् भू
षाहि शेषोज्ज्वलः॥ निःशेषं वर पातकं हरहर श्री साम्ब रक्षाद्य नो ॥ दैत्योद्धृत भायं हरापहर वै श्री कण्ठ शंभो ऽधुना वैकुण्ठा-
र्चित पादपंकज हरामेयप्रभो शंकर ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ मातङ्गानङ्ग भङ्ग त्रिपुर सुर वैरी द्भुत भीतिं हराशु ॥
चन्द्रासार किरीट शोभित कराघोरैक शूलप्रभो ॥ बन्धं नो हर सांब संसृति भवं पापौ च तापं हर॥ त्र्यक्षाक्षय्यगतिप्रदानकु
शलेनाक्ष्णा विलोक्या शुनः ॥ २३ ॥ ॥ पितर ऊचुः ॥ ॥ हे सोमधामशशकलाकलितो त्तमांग॥ गङ्गातरंगसु
जटा भर संग भङ्गे ॥ पाह्यास्मदुस्समयगतं ज्वर वर्गरूपं दैत्या धमोक्तनितं भयनाशहेतो ॥ २४ ॥ ॥ विश्वेदेवा ऊचुः ॥ ज
अन्नानां पतिरेक एव भगवान् रुद्रोवरुद्रोऽपि धृक्॥ क कुद्रः श्रुति शेखराङ्कित पदा दैत्या यदुध्वं सकृत् ॥ पापं नो विनि
वारयाशु भगवन् भूम्नि च धाम्नि नमः॥ सर्वाम्नायकसौम्नि विश्रुत पदं तत्त्व प्रपद्यामहे ॥ २५ ॥ ॥ मातर ऊचुः ॥ ॥
देवामरो त्तम गरादि धान्तकारे॥ पाहीक्षणेन क्षण माद्रिसुता सहाय ॥ वाहीकृतोक्ष भुज गाङ्ग महोरुहार॥ पारं भवाद्य सुरतारुजसिन्धु
तार ॥ २६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्कन्द उवाच ॥ ॥ इत्थं देवैस्तुतः शंभुः त्रिपुरासुरपीडितैः ॥ चण्डापीडो महादेवस्तेषां काममपूरयत ॥ २७ ॥ गिरिजाजा
निरीशोऽयं वलक्षोक्षवराश्रयः ॥ त्र्यक्षो भगाक्षिमथनः प्रत्यक्षं समदृश्यत ॥ २८ ॥ बालेन्दुगङ्गाविधृतजटामौलिः सुरारिहा ॥
गणवृन्दयुतस्तेषां मुग्धो ग्रे समदृश्यत ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ दृष्ट्वा ते सुरपुंगवा नतिधृतस्वैः पद्मसज्जैः करैः ॥
देवं चारुशशाङ्कसुन्दरजटोदग्रप्रसन्नाननम् ॥ सन्नासे त्रिपुरे विदारितपदक्षुण्णा ततो मेनिरे शंभुं तद्भयमोचनेऽभ्युपगतं
का प्राहुः स्व[illegible]र्त्तिं सुराः ॥ ३० ॥ इति श्रीमच्छिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे देवकृतस्तुतौ अष्टादशोऽध्यायः ॥ १८ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ देवा ऊचुः ॥ ॥ देवदेव महादेव शरणागतवत्सल ॥
नमो नमस्ते देवेश विश्वेश शशिशेखर ॥ १ ॥ पाहि पाहि कृपासिन्धो बन्धो सिद्धादिवन्दित ॥ स्कन्दवन्दितपादाब्ज
वृन्दारकगणार्चित ॥ १ ॥ मन्दारसुंदरसुममन्दंदस्राविपत्प्रभ ॥ महाहिकच्छकद्योतिविद्योताङ्ग महेश्वर ॥ २ ॥ गर
धृक्कण्ठ कण्ठीर कुटीभूतजगत्त्रय ॥ विश्वाधिकाशावसन सनातन नमोऽस्तु ते ॥ ३ ॥ गिरीन्द्रजाकुचाश्लेषपुलकाङ्कित
३४ विग्रह ॥ पतङ्गगिरिसोमादिविलोकन जगज्जादन ॥ ४ ॥ इभवक्त्राब्जलोकार्कविलोकनयनाव्यय ॥ उग्रमेयभवामेय
पाहि पाहि महेश्वर ॥ ५ ॥ गजांधकासुरहर मत्तानङ्गागनाशक ॥ महाकैलासनिलय जगद्विलयशंकर ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰
१०
३४

किंकरान्शरणं पन्नानापन्नास्माहि शङ्कर ॥ महोक्ष ध्वज कामारे मां सदा पाहि धूर्जटे ॥ ८ ॥ पिनाक पाणे खट्वाङ्गिन्खड्ग ईशान् पू
पान्पाहि शिव प्रभो ॥ व्योमकेश भवामेय दक्षाध्वर निवारक ॥ ९ ॥ कपाल पाणे भगवन्रुद्रानन्त प्रभो हर ॥ फणि भूषित शा॰ अ॰ १५
न्तात्मन् कृत्तिवास महेश्वर ॥ १ ॥ हिरण्य बाहो देवेश कुण्डलीश विभूषण ॥ शूलपाणे विश्वमूर्ते वेदवेदान्त बोधित ॥ १० ॥ क
र्पूर गौर गौरीश त्रिवक्रप्रमार्धदेहक ॥ कृपासागर भावात्मन् शंभो सांब सदाशिव ॥ ११ ॥ त्रिपुरासुर संत्रस्तानस्मान्पाहि ज
गत्प्रभो ॥ ॥ स्कन्द उवाच ॥ ॥ इत्थं देवस्तुतिं श्रुत्वा सर्वेषां परमेश्वरः ॥ १२ ॥ ब्रह्म विष्ण्वादि देवांश्च विलोक्य
प्राह शंकरः ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिपुरासुरनाशार्थं देवा यूयं सदा मम ॥ जयाय रथसन्नद्धं कुर्वन्तु द्रुतमेव मे ॥ १३ ॥
यथा त्रिपुरसंयोगो यावता संभविष्यति ॥ तावत्स्थास्ये रथे देवाः सन्नद्धे रथपस्त्वयम् ॥ १४ ॥ धनुर्मे कल्प्यतां शीघ्रं बाणं चो
णयुतं सुराः ॥ चक्रे रथस्य सज्जत्वं मौर्वी महि गणेश्वरम् ॥ १५ ॥ वेदाश्चतुरो देवा वाहाः सन्तु सदा मम ॥ क्षोणीमण्डलमेतद्धि
रथभूतं भवेन्मम ॥ १६ ॥ कीलास्तस्य महाधर्मा भवन्तु विगतज्वराः ॥ १६ ॥ यन्ता विधिरयं भूयान्मम सारथ्य कल्पकः ॥
इत्थं शंभोर्वचः श्रुत्वा देवा देवं प्रणम्य च ॥ १७ ॥ गत्वा तन्मेरु निलयं स्थोपायमचिन्तयन् ॥ बृहस्पतिं बृहद्बुद्धिं समाहूय
दिवौकसः ॥ १८ ॥ ॥ देवा ऊचुः ॥ ॥ महादेवस्य समेरथो धैव प्रकल्प्यताम् ॥ तत्र नो बुद्धिर्न पुण्यं निदर्शय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरोर्गुरुम् ॥ १९ ॥ इत्थं देववचः श्रुत्वा गुरुः प्राह तदाऽमरान् ॥ बुद्ध्याभिध्याय देवस्य रथमारोहयोगिनम् ॥ २० ॥ विश्व
कर्माणमाहूय सुमुहूर्ते तदा गुरुः ॥ विघ्नादिशमनं नत्वा स्तुत्वा संपूज्य भक्तितः ॥ २१ ॥ युक्तिसूक्तिं विचिन्त्याथ स्व
यमाध्याय यत्नतः ॥ क्षोणीमकल्पयंस्तत्र रथमण्डलविस्तृतम् ॥ २२ ॥ चक्रे चक्रेऽथ सूर्येन्दू सहस्राक्षं युगात्मकम् ॥
युगंधर्ममयं तस्य रथस्य परिकल्पयत् ॥ २३ ॥ घोणां स्मृतिमयीं चक्रे कीलास्तस्य त्रुटीलवाः ॥ चत्वारो निगमा वाहाः
स्तंभाः कुम्भश्च विद्युतः ॥ २४ ॥ पताका तत्र जालानि त्रिवेणुः प्रणवोऽभवत् ॥ मेरुं धनुस्तदा चक्रुः ज्यां चाहिगणपुङ्गवम् ॥
स्वयं विधिरभूद्यन्ता रश्मयोपनिषद्गणम् ॥ ॐकारं तत्प्रतोदं वै चक्रुस्तत्र सुरेश्वराः ॥ २६ ॥ वाजी बालस्य च शिखी सोमो
कण्ठमभूत्तदा ॥ कालं तस्याभवद्विष्णुस्तदा ते रथकल्पनम् ॥ २७ ॥ कृत्वा निवेदयन्तस्ते नन्दिनं विश्वनन्दिनम् ॥ प्राहुः
प्राञ्जलयः सर्वे कैलासद्वाराधिष्ठिताः ॥ २८ ॥ ॥ देवा ऊचुः ॥ ॥ रथः सज्जो रथपते विजयाय महेशितुः ॥ दे
वानां कार्यसिद्ध्यर्थं विज्ञापय शिलादज ॥ २९ ॥ तदा देववचः श्रुत्वा गत्वा नत्वा महेश्वरम् ॥ स्तुत्वा प्रोवाच वचनं दे
३५ वानां नन्दिकेश्वरः ॥ ३० ॥ ॥ नन्द्युवाच ॥ ॥ विष्णुब्रह्मादयो देवाः देवदेव महेश्वर ॥ कैलासद्वारि संगत्य स्थः
सुरथकल्पनः ॥ ३१ ॥ सिद्धो रथपते ऽरं भो त्रिपुराणां जयाय ते ॥ प्रतीक्षन्तेऽद्य मुदिताः पद्मिनीव दिवाकरम् ॥ ३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ क्षीणाः देवगणाः सर्वे वीक्षन्ते तवबीक्षणम् ॥ आज्ञां तेषां च विज्ञप्तिं समाकर्णय शंकर ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ इत्थं ईशान्दूश
३५ १॰ शिलादतनूस्य वचो निशाम्य वीक्ष्याद्रिसौधमथमंचविहारसंस्थः ॥ पश्यन्नुवाच गिरिजां मदनान्तकारिः तं नन्दिनं सु अ॰ ११-२
य वचनामृतसारवर्षैः ॥ ३४ ॥ ॥ इति श्रीमच्छिवरहस्ये ईशानारव्ये दशमांशे पूर्वार्धे एकोनविंशोऽध्यायः ॥ १९ ॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्री ईशानाय नमः ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु नन्दिन् ममैवाज्ञां निशाम
यसुरान्प्रति ॥ के तिष्ठंति शिवागार द्वारि कैलासपर्वते ॥ १ ॥ इत्थं शंभोर्वचः श्रुत्वा नन्दी प्राह शिलादजः ॥ स्वर्णवेत्रधरो वि-
प्रमहा वृषभलाञ्छितम ॥ २ ॥ ॥ नन्दिकेश उवाच ॥ ॥ शंभो विष्णुर्विष्णुगणैर्वि ष्वक्सेनादिभिः सह ॥ त्वत्प-
दाब्जं हृदा ध्यायन् स्थितो द्वारि सुरैर्वृतः ॥ ३ ॥ प्रजापतिभिरन्यैश्च ब्रह्मा मुनिगणैः सह ॥ प्रजपन्छतरुद्रीयन्तवागमनमीक्षते ॥
ईशानः स्वगणैः सार्धं शूलोद्यतकरैः शिव ॥ तवागमनमाकांक्षन्कैलास द्वारि तिष्ठति ॥ ४ ॥ इन्द्रोऽपि स्वगणैः सार्कं वज्रह-
स्तैः पुरासदैः ॥ वरुणः स्वगणैः सार्धं पाशहस्तो महेश्वर ॥ ५ ॥ यक्षाणामधिपो रक्षः कुबेरस्त्वां प्रतीक्षते ॥ मरुद्भिर्मरुतो देव
अग्निराग्नेयकैर्गणैः ॥ ६ ॥ निरृतिः स्वगणैः शंभो यमः स्वगणपुंगवैः ॥ गन्धर्वा गरुडाः सिद्धा विद्याधरवराप्सराः ॥ ७ ॥
किंनर उवाच ॥
मनवो मुनयश्चैव पितरो मानवास्तथा ॥ तवागमनमीक्षन्ते जयाय त्रिपुरारिणाम् ॥ ८ ॥ तदा शिलादतनयं प्राह चन्द्रकिरी-

दधृक्॥ प्राञ्जलिं नन्दिकेशानं स्थितमग्रे तदा मुने ॥९॥ ॥ ईश्वर उवाच ॥ ॥ समानय गणेश्वरांस्त्वं वाराणसि शूलोद्यतान्॥
अहीशकृतकुण्डलान्विमलभस्मत्रिपुण्ड्रांकितान् ॥१०॥ मृदङ्गवरशंखकाहलरवमुखोद्धताडम्बरांस्महारवसुदुंदुभिःसम
भिताडयन्नुद्रुतम् ॥१०॥ स्कन्द उवाच ॥ इत्युक्तः शशिशेखरेण गणपानाहूय तत्राकरोत् सन्नद्धान्विविधायुधोत्तमकरान् सच्छत्रपाणी
गणान् ॥ कालाग्निरुद्रो गणलक्षकैर्युतो सवीरभद्रोऽपि च लक्षसंख्यैः ॥ चण्डेश्वरश्चापि च लक्षसंख्यैर्भृङ्गी तदा लक्षकस
हस्रकैश्च ॥११॥ नन्दीश्वरः कोटिगणैस्तदा ययौ वाराणसीं बाणासनशूलधारिभिः ॥ त्रिपुण्ड्रभस्माभरणैर्गजेंद्रचर्माम्बरैर्व्या
घ्रमृगाजिनांबरैः ॥१२॥ तरक्षुरक्षमुखैर्गजाननैः सिंहाननैः शरभभेकवक्त्रैः ॥ मयूरमार्जारहयास्यवानरमृगास्यकैर्वा
मनकैस्तथोर्ध्वैः ॥ जटाधरैर्मुण्डितमुण्डषण्डैः पिचण्डिलैश्चातिकृशैश्च चौरैः ॥ मृदङ्गशंखानकमड्डुडिण्डिमप्रवा
दकैर्घोषकरैस्तदा प्रययुः ॥१४॥ तदा गजास्यस्य गणैः समावृतं गजास्यकैः पाशसृणीकराब्जैः ॥ स्कान्दैर्गणैश्चापि च
शक्तिधारिभिः ययौ नगारिः स्वगणैस्तदावृतः ॥१५॥ सप्तलक्षैर्गजवक्त्रवृन्दैस्तदाष्टलक्षैरभितो ययौ हरम् ॥ हं
36 सोत्थामलपक्षचामरमरुत्संवीजितः शंकरो रत्नभ्राजितपादुकायुतपदो देवान्तिकं प्राप हि ॥१६॥ छत्रैश्चापि पताककैः
शारकैर्नानानदत्तूर्यकैः रुद्राणीकरमुक्तमौक्तिकफलैः मूर्ध्न्यर्चितः शंकरः ॥ रत्नभ्राजितपात्रमध्यगलसत्सौव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०
७०
३६

र्ण दीपावलौ दे व्याली करकं कणध्वनि युतैः सप्तार्चिनीराजितः ॥१६॥ पश्यन्ता नगकन्यका ऽऽज वदनं संवीक्ष्य सं जीवि ईशाः रूप
नौ रि व्यासारमरं सौरभसमोत्कर्षोः वर्षैरपि ॥ नन्दीशानपुरः प्रसारितमहा वेत्रो प्रेतात्सारितैः विष्णु ब्रह्मसुरासुरादिकगणैः अ०२०
संप्रोक्त वाचां भरेः ॥१८॥ शंभो पाहि सुरासुरान्प्रमथपा धीशोक्ति सूक्ति प्रभा मन्दारा नतमौलि जालमणि युक्पाद प्रभावः शिः
वः ॥ तदा जयेश विश्वेश त्राहि नः शरणागतान् ॥ त्रिपुरासुरसंत्रस्तानस्मान् पाहि महेश्वर ॥१९॥ इत्थं स्तुवन्ति संदृष्टु
देवाश्च मुनयस्तथा ॥ जगुर्गन्धर्वपतयो ननृतुश्चवराप्सराः ॥२०॥ जगौ शिवा पदानानि नारदस्तुम्बुरुस्तथा ॥ तदा देवा महा
देवं प्रोचुः प्राञ्जलिपाणयः ॥२१॥ भक्तिनम्रात्मवदना विकिरन्ति सुमोत्करैः ॥ तत्कौतुकं महद्वीक्ष्य धृतबाणकरं हरं ॥२२॥
देवा ऊचुः ॥ ॥ रथस्तेस्त्वोऽयं भवतु भवतो मोदविबहः रथाधीशः श्रुत्या भवसि च भवानेकरथिकः ॥ भवत्तो नज्याया
नसुरगणगणे षुतमतनुः निषङ्गी द्राक्षिपिस्त्वं हरि शंकरोदार चरितः ॥२३॥ महेशस्त्वं शंभो सकलनिगमान्ते कवचसा प्रभा
रश्मिः संवित्सुरगणशरण्यः शरणदः ॥ विधिस्ते वेदानां यमकरणोऽयं तुरधिको सुधन्वा शंभुस्त्वं भवसि निखिलात्माज
निजुषाम् ॥२४॥ बाहुभ्यां तव धन्वने शरकरा सारेनता वै श्रुतिः ॥ त्वन्मन्युं भगवन् विमोचय वरेडुच्चैः पुरे त्रैपुरे ॥ अ
घोरं दैत्येषु प्रकटय तनुं देव निवहे विभो नानां तां वै कुरु सदयमिन्दुप्रभ विभो ॥२५॥ ॥ स्कन्द उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्थं गीर्वाणवाणीं श्रवणवरसीमानुसरणीं महादेवः श्रुत्वा, तरणिवरचक्रं समरुहत् ॥ क्षणं क्षोणी
क्षीणं पद्मकमलभारानतरथं वृषेनाद्धाह्यं तत्प्रकृति परमां तन्यत विभुः ॥ २६ ॥ देवः क्ष्मास्यन्दनचक्र
सूर्यसोमानिलाग्निहरिबाणसुधन्वकोद्रिः ॥ मौर्वीकृताहिवरशेषविशेषभूषायोषाकृतार्धतनुरारुह
तत्क्षणेन ॥ २७ ॥ वाहाम्नायगणासुबोधितविधिप्राचुर्यरश्मीमुरनां धावनि श्रुतमीश्वरस्य करुणासौरक
दृष्ट्यामृतैः ॥ कं भद्योतिपताककारथगताभान्त्येवतच्चालनैः अन्यं धन्यतमं तदेवमसकृद्द्रष्टुं सहस्राक्ष
काः ॥ २८ ॥ गणवृन्दारमुखाश्च वाहयुक्ता वरभूरारिगणाश्च केकिवाहाः ॥ प्रसरन्पार्श्वत एव तं रथस्थं भ-
गवन्तं प्रययुस्ततः सुराः ॥ २९ ॥ दुन्दुभ्याघातघोषोजितवरजलधिध्यानहर्षोत्सुतर्षी वर्षं तत्सुमसंभवं
दिविपुन नाना युधानां स्वनैः ॥ पाहीशानदयानिधानभगवन् याहि द्रुतं त्रैपुरं वीर्योद्रिक्तमदं मुदे सुरग
णे शान्त्यै जहीत्रैरसि ॥ ३० ॥ आयोधनं त्रिपुरदारणकालफाललीलानलोद्यतविशालितहस्तशू
87 लः ॥ देवाकुलाकुलगणोघमुखोत्थवाद्यविध्वस्तशैलविवरोभियो विजेतुम् ॥ ३१ ॥ वर्षाणां च स
हस्रकं गिरिसुताजानी रथस्थोऽभवत् धुन्वन्मेरुसरासनं हरिशरोभिव्यज्यमज्यं करोतु ॥ उन्मील्याक्षि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुंगारुकोणसलिलासारेण कोणव्रजं पातुं स्वं करशेखरेण कलयन् कालं निनायेश्वरः ॥ ३२ ॥ तत्र श्री परमे॰ ईशा॰ दृश
श्वरस्य नयनासारप्रवाहोद्भवास्ते वृक्षाः प्रभवन्ति लोकसुहिता रुद्राक्ष वृक्षा इति ॥ द्वात्रिंशत्कुलनायकास्त्र अ॰२॰
कथिता गौडोद्भवान्योद्भवा ते फाला नललोचनोत्तम भवाः कैलासमौलिस्थिताः ॥ ३३ ॥ तत्रांतरे त्रिपु
र वैरि पुरं समील दुन्मील्य लोलनयनाग्निकणाव घूतम् ॥ चक्रे त्रिनोगिरिजयारथ वर्यसंस्थः स्वस्थैः सुरादि
गणपेन विमोचवाणं ॥ ३४ ॥ तं देवाशान्तिशेखरं पुरवधोदारं रथस्थं तदा स्वस्था एव नमन्ति भावपरमा स्वस्थाः
स्तथान्ये सुमैः ॥ वृष्टिं तेंपिवितेनिरे मुनिवराः ओं पुष्परुद्रं तदा प्रावाद्यन वीरोरु बाह्यकलनैर्नृत्यैश्च देवस्त्रियः ॥
॥ ३५ ॥ गन्धर्वाः प्रजगुः कलं लययुतं तालापदानक्रमं शंभोस्तस्य पराक्रमं त्रिपुरभिद्देवैस्तुतं शंकरः ॥ ॥ ॥
॥ देवा ऊचुः ॥ ॥ शंभो शंकर देव किं कारमहाक्षोणीरथाध्यक्षतो लोकेन त्रिदिवद्विषोपमिषतां भस्मीकृतास्तेय
तः ॥ वाता वान्त्यपि भास्करादिगृहपा द्योतन्ति खे केवलं भा भान्ति द्युति दीप्ति ऋक्षसहितः सोमोधुनीतेतमः ॥
शान्तश्चोग्रशिखो शिखी विजयते लोके पुते सुप्रभो कर्सो वेद गुणागुणं कलयतां स्याद्दष्टमूर्त्तिर्भवान् ॥ वेदास्ते मुन
योऽपि जेपुरमरान त्वाभियाताः शिवं स्वानि स्थानवराणि दीप्तिपरमा विष्ण्वादयोप्यब्जजाः ॥ ३६ ॥ कैलासं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निलयं ययौ गिरिजया देवः पशूनां पतिर्नन्द्याद्यैर्गणपुङ्गवैस्सह तैस्तूर्यैश्च कोलाहलैः ॥ ॥ स्कन्द उवाच ॥
सर्वं ते त्रिपुरोरुगोपुरमहासंदारिणीं ते कथां पापध्वान्तनिवारणैकतरणिं श्रुत्वा भवे कः कर ॥ शर्वस्य प्रियकारि-
णीमथ मुने मुक्तेः सदा मुक्तिदां सिद्धां ते सरणीं ददाति विधृता भक्त्या किमन्यद्भुवे ॥ ३८ ॥ श्री ॥ इति श्रीशि-
वरहस्ये ईशानाख्ये दशमांशे त्रिपुरवधो नाम विंशोऽध्यायः ॥ २० ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥
श्री ईशानाय नमः ॥ ॥ श्रीदेव्युवाच ॥ ॥ कथं जाता महादेव भूमौ रुद्राक्षवृक्षकाः ॥ कथं जाता महादेव
तन्मे विस्तरतो वद ॥ १ ॥ त्वदक्षजाश्रुसंजातास्ते वै रुद्राक्षवृक्षकाः ॥ द्वात्रिंशत्प्रथिता देव कथयैतन्महामते ॥ २ ॥
॥ ॥ स्कन्द उवाच ॥ ॥ इति देव्या वचः श्रुत्वा प्राह रुद्राक्षसंभवम् ॥ जगतां पापतापादि तन्निवारणकारण-
म् ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु पद्मपलाशाक्षि रुद्राक्षप्रभवं शिवे ॥ सर्वपापक्षयकरं रुद्राक्षप्रीतिकरं सदा ॥
अक्षय्यफलदं साक्षात्पापध्वान्तनिवारकम् ॥ मदुन्मेषनिमेषादिनेत्रजाश्रुसमुद्भवम् ॥ ५ ॥ रुद्राक्षवृक्षास्ते
३० जाताः भूमौ देवैस्तदा शिवे ॥ कैलासमौलिजातास्ते वृक्षास्सौवर्णसप्रभाः ॥ ६ ॥ पुरा ब्रह्मादयो देवाः लोकपापनिवृ-
त्तये ॥ कैलासद्वारि संगत्य सुखोपायेन मोचकम् ॥ ७ ॥ विष्ण्वादयस्सदा मां हि तुष्टुवुर्लोकगुप्तये ॥ रुद्राध्यायेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मांदिविदशवर्षाणि तुष्टुवुः ॥ ८॥ देवा ऊचुः॥ ॥ शंभो शरण्य करुणार्णव वेदवेद्य सद्योप्युमारमण सामगणस्तु ईशा.२.पू.
ताद्य ॥ भूमा त्वमेव महिमा शशि धाम चूड भामार्धकाय जितकाम शिवोग्र भीम ॥ ९॥ श्री वीरदेव शरणारुणपा अ.२.२
दपद्मं संप्रापितेन मनसा तमसो विमुच्य ॥ घोरान्ध पातक ततिं प्रतिभान मानगानादिदान परमास्त्वयि भक्तिभाजाम् ॥
उत्तुङ्ग लिङ्ग भुजगाङ्ग स्फुरत्स्फु लिङ्ग मातङ्ग भंगितमनंग तरणी वरकाद्यपाङ्ग ॥ भस्मांगसंग भव भंग महेश लिंग व्यो
मांग संग जनितांग सुखादि संग ॥ ११॥ शिखि शशि दिन नाथ लोल नेत्र प्रथित श्रोत्र विलोचनोरुहार ॥ अव भव भ
गवन सनातनाद्य त्रिभुवननाथ सनाथयास्मान् ॥ १२॥ शिव शिव शंकर मारमार शंभो भव भव देव महेश आद्य
वैद्य ॥ गरधर चारु शशाङ्क शेखर त्रिपुरोद्यान हरासुरा विपाहि ॥ १३॥ इत्थं देवस्तुतिं श्रुत्वा भगवान् चन्द्रशेखरः॥
प्रादुर्बभूव पुरतो भगवान् वृषभध्वजः ॥ १४॥ चारु चन्द्रकलामौलि गिरिजार्धीकृतिर्हरः ॥ नीलकण्ठो विरूपाक्षो
गंगातुंगजटाधरः ॥ १५॥ मृग शोभि करो दंष्ट्रा उग्रो देवानभाषत ॥ ॥ ईश्वर उवाच ॥ ॥ भो भो देवगणा यूयं
किमर्थं मां समागताः॥ मा चिरं ब्रूत सर्वं मे तद्विवः साधयाम्यहम् ॥ १६॥ इत्थं महेशवचनं श्रुत्वा देवाः सवा
सवाः॥ हरि पद्मजमुख्यास्ते प्रणम्य प्राहुरीश्वरम् ॥ १७॥ ॥ देवा ऊचुः ॥ ॥ देवदेव महादेव करुणा ॥ ३८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रससागर ॥ कपालपाणे विश्वात्मन् जगतां रक्षणेक्षण ॥१८॥ पाहि देवासुरमुनीन् रुद्राक्षाणां प्रदानतः ॥
लोकपापौघसंतापं निवारय कृपाकर ॥१९॥ स देवानां वचः श्रुत्वा देवदेवमहेश्वरः ॥ करुणारसया दृष्ट्या
किमक्ष्या लोकमुद्धृतम् ॥२०॥ त्रैलोक्यं पापसंक्रान्तं जनतां वीक्ष्य दुःखिताम् ॥ उवाच वीक्ष्य त्र्यक्षोसौ देवानां मुदमाद
धात् ॥ कैलासमौलौ पालीतो वृक्षान् रुद्राक्षभूषितान् ॥ चतुर्दशकुलोत्पन्नान् लोलनेत्रोद्भवान् स्वकान् ॥२२॥ भू
मौ गौडोद्भवांश्चक्रे रुद्राक्षान् शिववल्लभान् ॥ मथुरायामयोध्यायां लंकायां मलये तथा ॥२३॥ सह्याद्रौ सह्य
पापौघभेदनान् श्रुतिभेदितान् ॥ दत्वा द्विजानां श्वेतांश्च रक्तान् राज्ञां शिवोऽददत् ॥२४॥ पीतान्वैश्येष्वदाद
न्यान् कृष्णान् शूद्रेष्वदाच्छिवः ॥ देवानां च मुनीनां च गन्धर्वाणां सदा शिवः ॥२५॥ चतुर्दशमुखान् शंभुः
व्यधाद्भूमौ च पापहृत ॥ लब्ध्वा रुद्राक्षवृक्षान् शिवविलसदृशो संभवान् ॥ लोकपापसंतापभीतिवि नि
वारकान् ददौ ते ॥ संगत्या गोपतिवहाब्जपदे प्रणम्य रुद्राक्षवृक्षतिलकान् भुवि ते निदधुः ॥२६॥ कैलास
४१ मौलि विपिनोत्तममध्यसंस्था रुद्राक्षवृक्षवनमेतदपेक्षयाय ॥ संकल्पितं हि मनसैव मयाद्रिकन्ये रुद्राक्षवि
क्षगणपालमलक्षसंख्यम् ॥२७॥ एकाद्यशतवक्त्रा काष्टकलिता चन्द्रार्धरेखा मुखानिष्टस्योत्तम हेमगौर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० लिकुचाकारा श्च संदग्धिनः ॥ तत्सद्भूषणमात्रगात्र विहितास्त्वन्ये भुवं संस्थिता ॥ देवानां प्रभदेमुदे व विहिता ईशा० द०१
लिङ्गादिसल्लीनः ॥ २९ ॥ कैलासस्थित दिव्य चारु सुमहारुद्राक्ष वृक्षोद्भवः तद्वंधो त्तम संग बन्धुर चलद्वातो अ०२१
त्थपोतोम्बिके ॥ देवानां प्रमुदे भवेतसनैव यद्वात पस्याफलैः कस्तद्धारराशक्ति कोद्रितनये मद्भूषण
क्षाहिते ॥ ३० ॥ एकाननाद्यादि चतुर्दशास्यं रुद्राक्षमाहुरगजे श्रुतयः पुराणे ॥ कैलासशैल विपिनप्रभ
वारु वृक्षरुद्राक्ष वृक्षशतकाष्टमुखं भवानि ॥ ३१ ॥ कपित्थ फलसन्निभा विमल शात कुंभ प्रभाइभाननगणे
श्वरैर्वरनगारिध्यायी त्वया ॥ मयापि गिरिजे सदा वरम माक्षजा शुभ वाभवन्ति भुवि मो चैनेन भुवि सन्ति
रुद्राक्षकाः ॥ ३२ ॥ रुद्राक्ष वृक्ष कुसुमोद्भ बवीत पोतः स्वर्गेऽपि दुर्लभतरः सुरसत्तमानाम् ॥ तन्मूल भूम्निम
णिहेम्नि सुकान्ति धाम्नि प्रासाद सोम्नि विहरामि शिवे त्वया हम् ॥ ३३ ॥ रुद्राक्षार्चनमम्बिके त्वघहरं म
ल्लिंगपूजासमं नीरेणैव विवर्जयेच्छिघि हितं सामान्य पूजां चरेत् ॥ तेनैवाहमहो ददामि विपुलं भागयं मुक्तिं
शिवे ॥ तस्यै वाहमुमेसदाममपदं सुविहितं कैलास मौलौ निदं ॥ ३४ ॥ वृन्ताच्च्युतं स्वकृतरन्ध्र मुमे वि
शिष्टं रुद्राक्षमेत दघहारि भवेतमुक्त्यै ॥ धार्यं तदेव शिवलिंग समर्च के श्च तत्पौरुषेण कृतरन्ध्रकम ॥२१॥
ध्यमं स्यात् ॥ ३५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाश्नीयात्फलमन्नमण्वपि तथा भस्माक्षधार्यं विना भुक्त्वा वाथ गृही वनी यति पति र्वर्णी च वा शंकरि ॥ रेता
भुक् नरकं प्रयाति स तदा गायत्रिजापेन तत् वर्णानां च यतेस्तु मुख्य प्रणवोपास्य स्तदा मुक्तिभाक् ॥ ३६ ॥
॥ ॥ इति श्रीमच्छिवरहस्ये ईशानाख्ये दन्नामांशे एकविंशोऽध्यायः ॥ ॥ २१ ॥ ॥ श्री कॄ न्नी विश्वे-
श्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥ ॥ अत्र रुद्राक्षमाहात्म्यं सेतिहासं वदामि ते ॥ शृणु पुण्य
तमाख्यानं गणवृन्दैर्द्विजैरपि ॥ १ ॥ पाप ताप विनाशाय सावधानमना मुने ॥ आसीद्गौडे पुरा वैश्यश्चन्द्र
गुप्ताभिधो धनी ॥ २ ॥ धनेन यक्षाधिपतेः समो रुद्राक्ष भूषितः ॥ त्र्यक्ष पादाम्बुजे भक्तः शाक्तो भक्त
प्रपूजकः ॥ ३ ॥ शिव भक्तान्सदा भक्त्या भोजयन् षड्रसोदनैः ॥ रुद्राक्ष दानतो भक्त्या शांभवांश्चाप्यतोष
यन् ॥ ४ ॥ धनैरन्नैश्च नियतं नौकाभिश्चार्णवे रतः ॥ धनान्यादाय रत्नानि वृद्धिसिद्ध्यैव जीवति ॥ ५ ॥
संतुष्टो भस्मरुद्राक्ष भूषितं वीक्ष्य वैश्यराट् ॥ शिपिविष्टमना नित्यं भस्मरुद्राक्ष भूषितः ॥ ६ ॥ रुद्राक्षवृक्ष
बीजानि क्रयार्थं धनदोपमः ॥ वह्वाभिस्तु चोणीभिः देशेष्वन्येषु गौडजान् ॥ ७ ॥ प्रेषयत्प्रेष्यवर्गैः स
वि क्रयार्थमसौ वणिक् ॥ रासभै वृषभैश्चैव खरोष्ट्रैरपि वै मुने ॥ ८ ॥ अवन्ती मालवे चैव केदारे पुष्करे

40

शिवरह॰ तथा ॥ रुद्रकोटौ प्रभासे च लंकायां मलये तथा ॥ ९ ॥ अप्रेषयत्सुतं वणिक्धन लाभाय सादरम् ॥ सहस्रेण खरोष्ट्रैर्गर्दभै-
णवृषभैरासभैरपि ॥ १० ॥ विन्ध्याद्रिमगमत्तस्य तत्र वाहोऽस्य सत्तम ॥ रुद्राक्षघोणी सहितः रासभैर्वृषभैर्युतः ॥ ११ ॥ अ॰ २१
॥ ४० ॥ घोणी श्रेणीभिरापूर्णो निश्रेणीव गिरेस्तटम् ॥ विन्ध्याद्रेरारुहत्सार्थश्चन्द्रगुप्तस्य सप्तमम् ॥ १२ ॥ तत्र कश्चित्खरो-
भग्नपादः प्राप तद्दिशतः ॥ घोणीभरेण भारेण रुद्राक्षाणां तदानघ ॥ १३ ॥ समावृतो ममाराय भग्नांगो मृग्व मन्द-
दा ॥ निर्यज्जिह्वोऽश्रुनयनो सार्थानां पश्यतां तदा ॥ १४ ॥ तत्रान्तेरसमानीतं शिवदूताहृतं मुने ॥ विमानं तत्समानीतं
रुद्रकन्यासमावृतम् ॥ १५ ॥ चलच्चामरवाताद्येर्वीतं पुष्पसरावृतम् ॥ त्रिनेत्रो नीलकण्ठश्च गङ्गाचन्द्रकलाधरः ॥
॥ १६ ॥ खरो रुद्रगणाकारो दृष्टो वैश्ये नते नहि ॥ तमाह चन्द्रगुप्तं तदा रुद्रगणोत्तमः ॥ १७ ॥ ॥ रुद्रगण उवाच ॥
पश्य पश्य वैश्य वर्य वश्यो ऽहं त्वत्समागमात् ॥ रुद्राक्षवाहनान्मे ह्य गणत्वं शंकरस्य हि ॥ १८ ॥ प्राप्तं मया गमि-
ष्यामि कैलासं शिववल्लभम् ॥ शांभवस्यांग संगेन रुद्राक्षाणां च धारणात् ॥ १९ ॥ विष्णुब्रह्मादिदुर्दर्शमि-
या प्राप्तं वणिग्वर ॥ इत्युक्त्वा स विमानेन ययो रुद्राकृतिः खरः ॥ २० ॥ चन्द्रगुप्तो विस्मिताक्षः समुद्वेक्षत
तं तदा ॥ प्रशस्य तं खरं तत्र तदा रुद्राक्षधारिणम् ॥ २१ ॥ रुद्राक्षधारिणां पुण्यं वर्णयन्मनसा वणिक् ॥ सार्धैः ॥ ४० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगामरेशं स्वंरुद्राक्ष क्रयविक्रयी ॥ २२ ॥ ग्रांभवेभ्यो मुदा दत्वा रुद्राक्षान्विधिवच्च बहुभान् ॥ एकाननाद्यान्लोकान्तान्,
स्वयं सौवर्ण वेष्टितान् ॥ २३ ॥ दध्यार स वणिक्वर्यो नर्य भस्म त्रिपुण्ड्र धृक् ॥ तत्प्रेष्यास्तत्कलत्राणि तत्सुता बा
न्धवास्तथा ॥ २४ ॥ दासीदास्यो वाह वृषा रासभा वामयस्तथा ॥ रुद्राक्ष धारिणः सर्वेऽप्यभवन्भस्म धारिणः ॥
॥ २५ ॥ स चन्द्रगुप्तो नियतं वसन्गुप्त धनस्तदा ॥ कैलासं समवाप्यन्ते गणत्वं प्राप शांकरं ॥ २६ ॥ एवं रुद्राक्ष
वृक्षाणां बीजानां धारणान्मुने ॥ खरोऽपि चन्द्रगुप्तस्य गणत्वं प्राप शांकरम् ॥ किं पुनर्ब्राह्मणा भक्ताः क्षत्र
वैश्याश्च शूद्रकाः ॥ २७ ॥ गृहस्था वर्णिनो वन्या मुने सन्यासिनस्तथा ॥ रुद्राक्ष धारिणः सर्वे रुद्रा एव न संश-
यः ॥ २८ ॥ ॥ स्कन्द उवाच ॥ ॥ यः कोकटेऽपि विधृतोत्तम भस्म भूषो रुद्राक्ष बीज वहनेन मृतिं प्रया
तः ॥ स्याच्चन्द्रगुप्त खरकोऽपि हि विंध्य शैलेशंभो गणत्व पदवीं समवाप्य मुक्तः ॥ २९ ॥ धृत रुद्राक्ष संसि नरो वाप्य
धमो वान्त्यज एव वा द्विजः ॥ स मुने प्रतरेत वै भवं सित भस्मांग युतः स पुण्य धीः ॥ ३० ॥ पुण्येतिहासो मम
41 यं पुरातनो देवेन देव्यै कथितो मुने तदा ॥ तदेतदापादितमेतदेव मे पुनः शिवो प्याह मुदा भवान्यै ॥ ३१ ॥
ईश्वर उवाच ॥ ॥ वृक्षा अश्रुप्रभवा भवन्ति विमला रुद्राक्ष वृक्षाः क्षितौ दृष्ट्वा अप्यघ शैल दारणरदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० द्देनोरुसद्धारणाः ॥ पुण्यापुण्यसमीहितार्थफलने स्वांगे च सद्भूषणाः शर्वाणीरमणार्चनासु नियतं धार्या हि ई०श०द०पू
१० मद्भूषणाः ॥ ३२ ॥ रुद्राक्षस्मृतिमात्रतोऽप्यघकुलं नश्येत्तपन्सुपञ्जरो॥ मुच्येदेव हि संसृतेर्जनिजरारोगैः स्पृशन्नरो मु अ० २२
॥४१॥ क्तिभाक् ॥ नामोच्चारणमात्रतोऽतिकृपणः पापौघकृपाणं दधन्॥ छिंद्यादेव हि दुर्द्रुमवनं (पाप) गोदान पुण्याधिभा
क् ॥ ३३ ॥ रुद्राक्षोत्सकिरीटकुण्डलधरस्तस्यांगदं कंकणे॥ मालाभिर्वरवक्षसा च विमलो भूयाच्छिवं पाव
नः ॥ तस्यानुक्षणमीक्षणेन गिरिजे लोकस्य कष्टं मुदा॥ संहृष्टो नितरां हरामि सततं तत्संगसंगात्मनाम् ॥ यस्मिन्
ग्रामे पुरे वा धृतवरविमलोदाररुद्राक्षभूषः॥ तिष्ठेत्तत्र न पातकानां क भयं दुःखं कुतस्तत्तनौ ॥ तत्क्षेत्रं विमलं
तदेव हि शिवागारं वरं शांभवं॥ देहे तद्धृदयां बुजे गिरिजया मद्वासद्दृष्टः सदा ॥ ३४ ॥ यो नित्यं भसितत्रिपुण्ड्ररहि
तो रुद्राक्षमालोज्झितः॥ तद्दृष्टं समलं त्यजन्ति विमला अन्नं च नीरं फलम् ॥ सो नित्यं शवसूतकी परमुमे पा
पाहि दृष्टो नरः॥ नित्यं तन्मुखवीक्षणेन गिरिजे सूर्यो निरीक्ष्यो जनैः ॥ ३५ ॥ ॥ इति श्री शिवरहस्ये ईशानाख्ये
दशमांशे (पूर्वार्धे) रुद्राक्षमहिमा नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ ईशानाय न
मः ॥ ॥ देव्युवाच ॥ ॥ कस्माज्जातं तु किं नाम कथं वा धार्यते नरैः ॥ नत्वे भेऽथ मुखान्यत्र के मन्त्रैः ॥४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथयस्व मे ॥१॥ ॥ ईश्वर उवाच ॥ ॥ दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया ॥ पुटाभ्यां चाफलक्षाभ्यां पति
ता जलबिन्दवः ॥२॥ तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः ॥ स्थावरत्वमनुप्राप्य भक्तानुग्रहकार
णात् ॥३॥ भक्त्या रात्रौ दिवा पापं दिवारात्रिकृतं हरेत् ॥ लक्षं तु दर्शनात्पुण्यं कोटिस्तत्स्पर्शनात्फलम् ॥४॥
ततः कोटिशतं पुण्यं लभते धारणान्नरः ॥ लक्षकोटिसहस्राणि लक्षकोटिशतानि च ॥५॥ तज्जपाल्ल
भते पुण्यं नरो रुद्राक्षधारणात् ॥ रुद्राक्षाणां तु रुद्राणां धारणे स्यान्महत्फलम् ॥६॥ धात्रीफलप्रमाणं यत्
श्रेष्ठमेतदुदाहृतम् ॥ बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ॥७॥ अधमं चणकमात्रं स्यात्प्रक्रियैषा मयोच्य
ते ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया ॥८॥ वृक्षाः जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः ॥
श्वेतास्तु ब्राह्मणा ज्ञेया क्षत्रिया रक्तवर्णकाः ॥९॥ पीता वैश्यास्तु विज्ञेया कृष्णाः शूद्रा उदाहृताः ॥ ब्राह्मणो
बिभृयात् श्वेतान् रक्तान् राजा तु धारयेत् ॥१०॥ वैश्यस्तु बिभृयात् पीतान् कृष्णाञ्छूद्रस्तु धारयेत् ॥ समाः स्नि
४२ ग्धा दृढाः स्थूलाः कंटकैः संयुताः शुभाः ॥११॥ क्रिमिदुष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च ॥ व्रणयु
क्तं चर्मकृतं षड् रुद्राक्षाणि वर्जयेत् ॥१२॥ स्वयमेव कृतद्वारं रुद्राक्षं स्यादिहोत्तमम् ॥ यत्तु पौरुषयत्नेन कृ त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 कृतं तन्मध्यमं भवेत् ॥१३॥ सर्वान् स्निग्धानृढान्सवार्न् क्षौमसूत्रेण संयुतान् ॥ धारयेत्सर्व गात्रेषु समास्यानि ई.शा.र.भू.
 विचक्षणः ॥१४॥ निकषे सोम(स्वर्ण) लेखेव यस्य रेखा प्रदृश्यते ॥ तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः ॥१५॥ शिखा अ.२३॥
 यामेकरुद्राक्षं त्रिशतं शिरसा वहेत् ॥ षट्शतं च गले दद्यात् बाह्वोर्द्वादश धारयेत् ॥१६॥ मणिबन्धे तु तावन्ति स्कन्धे
पञ्चाशतं हरेत् ॥ अष्टोत्तरशतं मालामुपवीतं प्रकल्पयेत् ॥१७॥ द्विसरं त्रिसरं वापि सराणां पञ्चकं तु वा ॥ द्वात्रिं
शच्चैव रुद्राक्षान् बिभृयात्कण्ठदेशतः ॥१८॥ मुकुटे कुण्डले चैव कर्णिका हारकेषु च ॥ केयूरकाङ्के चैव कु
क्षिबन्धे विशेषतः ॥१९॥ कलवीतिसदा कालं रुद्राक्षं धारयेन्नरः ॥ त्रिशतं त्वधमं पञ्च शतं मध्यममुच्यते ॥
॥२०॥ सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् ॥ शिरसीशान मन्त्रेण कण्ठे तत्पुरुषेण च ॥२१॥ अघोरेण गले
धार्यं तेनैव हृदयेऽपि च ॥ अघोर बीजमन्त्रेण करयो र्धारयेत्सुधीः ॥२२॥ पञ्चाशदक्ष ग्रथितान् व्योमव्या
पीति चोदरे ॥ पञ्चब्रह्मभिरंगैश्च त्रिमालां पञ्च सप्त च ॥१३॥ अथवा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत् ॥
एकवक्त्रं तु रुद्राक्षं परतत्वस्वरूपकम् ॥२४॥ तद्धारणात्परे तत्वे लीयते विजितेन्द्रियः ॥ द्विवक्त्रं तु मुनि श्रेष्ठ
अर्धनारीश्वरो भवेत् ॥२५॥ धारणादर्धनारीशः प्रीयते तस्य नित्यशः ॥ त्रिवक्त्रमनलः साक्षात्स्त्रीहत्यां दहति ॥४२॥
क्षणात् ॥२६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिमुखं चैव रुद्राक्षमग्नित्रयस्वरूपकम् ॥ तदेवं हि परं ब्रह्म पुरुषहत्यां व्यपोहति ॥ २७ ॥ चतुर्मुखं तु रुद्राक्षं पितामह
स्वरूपकम् ॥ तस्य धारणमात्रेण संतुष्यति सदा शिवः ॥ २८ ॥ पंचवक्त्रं स्वयं रुद्रः कालाग्निर्नाम नामतः ॥ अ
गम्यागमनं चैव अभक्ष्यस्य च भक्षकः ॥ २९ ॥ प्रमुच्यते सर्व पापेभ्यः पंचवक्त्रस्य धारणात् ॥ षड्वक्त्रमपि रुद्राक्षं
कार्त्तिकेयाधिदैवतम् ॥ ३० ॥ विनायकाधिदेवं च प्रवदन्ति मनीषिणः ॥ सप्तवक्त्रं तु रुद्राक्षं सप्तमं निधिदैव
तम् ॥ ३१ ॥ सप्ताश्वदैवतं चैव मारीसप्तकदैवतम् ॥ तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ३२ ॥ महाविज्ञानस
म्पत्तिः शुचेर्धारयतः शनैः ॥ अष्टवक्त्रं तु रुद्राक्षं अष्टमूर्त्यधिदैवतम् ॥ ३३ ॥ वस्वष्टकप्रियं चैव गंगाप्रीतिकरं
परम् ॥ तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः ॥ ३४ ॥ नववक्त्रं तु रुद्राक्षं नवशक्त्याधिदैवतम् ॥ तस्य धार
णमात्रेण प्रीणन्ति नवशक्तयः ॥ ३५ ॥ दशवक्त्रं तु रुद्राक्षं यमदेवमुदाहृतम् ॥ दशाशाप्रीतिजननं धारणे
नात्र संशयः ॥ ३६ ॥ एकादशमुखं त्वक्षं रुद्रैकादशदैवतम् ॥ तदिन्द्रदैवतं चाहुः सदा सौभाग्यवर्धनं ॥ ३७ ॥
४3 रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम् ॥ द्वादशादित्यदैवं च बिभर्त्यस्तत्परो नरः ॥ ३८ ॥ त्रयोदशमुखं चा
क्षं कामदं सिद्धिदं शुभम् ॥ तस्य धारणमात्रेण कामदेवः प्रसीदति ॥ ३९ ॥ चतुर्दशमुखं चाक्षं रुद्रनेत्रसमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ द्रवम् ॥ सर्वव्याधिहरं चैव सदाऽऽरोग्यमवाप्नुयात् ॥ ४० ॥ मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च ॥ श्लेष्मा ई॰शा॰ द॰ पू॰
१० तकं विड्वराहं भक्ष्यं वर्जयेत्ततः ॥ ४१ ॥ ग्रहणे विषुवे चैव अयने संक्रमे तथा ॥ दर्शे च पूर्णमासे च पुण्येषु अ॰ २३॥
॥ ४३ ॥ दिवसेषु च ॥ ४२ ॥ रुद्राक्षधारणात्सद्यः सर्वपापक्षयो भवेत् ॥ भूमावाऽऽमलकोपमास्तु विहिता द्वात्रिं
शद्वक्त्रोत्तराः कृष्णारक्तसदृक्षवर्णकलिता गौडोद्भवाः शंकरि ॥ अन्ये चापि भवन्ति पुण्यपरमा द्वात्रिंश
जात्यानगाः स्वप्रार्थनयामपासु विहिता भूमौ जनाघौघहृत् ॥ ४३ ॥ मान्या धन्यास्त एव क्षितितलतिल
का वन्द्यसन्यासिनस्ते पापाघौघभवारुदावशमने पर्जन्यरूपाश्च ते ॥ मूर्धन्याश्च वदान्य एव करुणानान्य
च्छरण्यं सदा तेषां शंभुसमर्चनं श्रुतिगतं भस्माक्षसद्धारिणाम् ॥ ४४ ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दश
मांशे पूर्वार्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ - ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ ईशानाय नमः ॥ ॥ श्रीस्क
न्द उवाच ॥ कैलासस्थानजन्यानां रुद्राक्षाणां मुने तदा ॥ वक्त्राणां शतसंख्यानां देवा प्रोक्ता समासतः ॥
एकवक्त्रे श्वरः साक्षात् द्विवक्त्रं पार्वती शिवो ॥ त्रिवक्त्रमनलः साक्षाच्चतुर्वक्त्रं पितामहः ॥ २ ॥ पंचवक्त्रं ह
रिर्विप्र, षण्मुखोऽहं सनातनः ॥ सप्तेन लोकससास्यं, अष्टास्यं वसुदैवतम् ॥ ३ ॥ नवास्यं नवदुर्गास्ताः, दश ॥ ४३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यं दशनागकाः ॥ एकादशास्यं रुद्रादि देवताः परिकीर्त्तिताः ॥४॥ द्वादशादित्यदेवत्यं द्वादशास्यं प्रकीर्त्ति
तम् ॥ त्रयोदशमुखं चाक्षं कामदेवसमाह्वयम् ॥५॥ चतुर्दशास्यं ते लोकाः चतुर्दश मुने तदा ॥ शताष्टोत्तरसं
ख्यानां मुखानां देवता मुने ॥६॥ कथयिष्येऽनुपूर्वेण शिवप्रोक्तं सनातनम् ॥ मातंगा वानरा ऋक्षा गरुडाः प
तगास्तथा ॥७॥ मुनयो मनवश्चैव लोकाश्चाथ चतुर्दश ॥ नागानां पतयश्चैव दिग्गजाः पक्षिणस्तथा ॥८॥
महता मातरश्चैव मरुतो पितरस्तथा ॥ पिशाचा यातुधानाश्च नैऋता वायवस्तथा ॥९॥ विद्याधराः किं
पुरुषा नागाः सर्पाश्च पुरुषाः ॥ दैत्याश्च राक्षसाश्चैव ममरुद्गणास्तथा ॥१०॥ सप्तर्षयः सर्वदेवाः कर्मदे
वास्सनातनाः ॥ कला काष्ठा मुहूर्त्ताश्च ऋक्षाणि युजातयः ॥११॥ मधुश्च माधवश्चैव ऋतवो हायना
तथा ॥ क्षण त्रु टि लवाश्चैव गावो धर्मोऽप्यधर्मकः ॥१२॥ सिद्धा यक्षा मरवाश्चैव नदी कालाग्निरुद्रकः ॥
44 भैरवश्चैव चण्डीशो माण्डको भाण्डकिस्तथा ॥१३॥ वेदाश्चोपनिषद्दुर्गा पुराणानि तथागमाः ॥ रहस्या
नि तथा गंगा नद्यो वै सागरास्तथा ॥१४॥ पर्वता वृक्षगुल्मा घास्तृणौषधिलतास्तथा ॥ प्रणवा मन्त्रजाश्चै
व रुद्रमन्त्राणि मानवा ॥१५॥ तथैवाप्सरसः सर्वा गंधर्वा नागकास्तथा ॥ गतागती पुण्यपापे तयासर्वं कृताकु
तम् ॥१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० इन्द्रियाणि मनश्चैव त्वङ्नासारस धातवः ॥ अतीतानागतं चैव भूतं भव्यं च वर्त्तितम् ॥१७॥ तत्वा ईशा०द०पु
१० भिमानिनो देवाः दिशा कालाश्च संख्ययोः ॥ रुद्राक्षवदनानां च देवाश्चाष्टोत्तरं शतम् ॥१८॥ प्रोक्ता अ०२४
॥४४॥ कैलासमन्दन रुद्राक्षाणां शिवे मम ॥ भूमौ चतुर्दशान्येव मुखान्येव भवन्ति हि ॥१९॥ मुखं मुखेषु ग्रथितं
किलेदं पुण्याय, पापाय भवेदथान्यथा ॥ तत्क्षौमसूत्रे मणिभिर्विशिष्टमष्टाकृतः प्रीतिकरं भवेच्छिवे ॥
शिरोक्षधृतिः शिवे शिरसि जातपापौघहन्मुक्षविधृतार्क्षकैः परजतल्पभोगोद्भवम् ॥ करादिविधृता
क्षकैः करकृतोरु पापापहं भवेत गिरिजे समस्तादिह पुण्य वृद्धि प्रदम् ॥ २१॥ धृत रुद्राक्षशरीरेण स्नानं परमा
वृद्धिमुपैति देवलोके ॥ प्रतिगामां ह्य धमां गतिं न चाप्नुयाद्धरि भस्माक्षधारी द्विजोत्तमोऽपि ॥२२॥
आ वङ्गपकं वङ्गपकरं सदैव रुद्राक्षमेतद्धृतिमद्भिरन्ये ॥ पशुपाधुना कश्यप कण्वमुख्यैर्धृतं सदा देवगणै
मुदामे ॥२३॥ अलं विविधदानतोऽप्यलमुमे मखादिक्रियाविचार परमक्रिया विविधवेदबोधैरपि ॥
धृतं यदि तनौ शिवे विमलमेतदेवादरान्ममाक्षमिदमुत्तमं झटिति हन्त मोनाशयेत् ॥२४॥ त्रियम्बके-
वर्णी नमनुनाविधृतं यदक्षं गृही वनपरोऽपि नरस्सदैव ॥ पंचाक्षरेण सधवा विधवापि देवि तत्कण्ठमध्य वि ॥४४॥
धृतं वरमङ्गलं स्यात् ॥२५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तारेणैव यते वदन्ति निगमा रुद्राक्षमाला धृतं तस्य क्वा निगमोत्तमांगवचसां सारं न संप्राप्नुयात् ॥ ज्ञानांगं
त्विदमेव बोधदमहामुक्तेर्हि मार्गप्रदं प्रातर्धारितमद्रिजे ऽक्षवरकं नैशं लघं नाशयेत् ॥ २६ ॥ मध्याह्ने पित
तोऽपि पूर्वमघहृत् सायं तेन जन्मकृतं नैशोतत्शशिशेखराचैनमतिं दद्यादुमे पावनम् ॥ द्वात्रिंशत्कण्ठभागे धृ
तमगतनये भ्रूयुगे चैकमक्षं मूर्ध्नि धारितमक्षविंशतियुगं बाह्वोस्तथा षोडश ॥ २७ ॥ षड्द्विद्वित्वमुमे धृतं हि क
रयोः षट्कुण्डले मण्डले वक्षस्यष्टाधिकोत्तरशतमति विमलाचाक्षमालामुदे मे ॥ रुद्राक्षहीननपुषं न समक्ष
मीक्षे चक्षुश्रवो रुवरमन्युजको परक्षैः ॥ २८ ॥ तं धक्षयामि नितरामरिपक्षमीक्षे कक्षेऽग्निसिद्धिरिवमेसभ
वेत्कराक्षैः ॥ शतं नियुतमम्बिके प्रयुतमेव धार्यं नरैः सहस्रमथलक्षकं विमलमेव रुद्राक्षकम् ॥ २९ ॥
सकोटि विधृतं शिवे दद्यदपारपुण्यं शिवे ॥ [illegible] हरि विधि भावरं शतमखस्य साम्राज्यदम् ॥ वलक्षं रुद्राक्षं
द्विजजनुभिरेवेह विहितम् ॥ सुरक्तं क्षत्राणां प्रकथितमुमे पीतमसकृत् ॥ ३० ॥ ततो वैश्यैर्धार्यं प्रतिदिनकमा
95 वश्यकमहो ॥ तथा कृष्णं शूद्रैः श्रुतिगदितमार्गोऽयमगजे ॥ न वर्णसंसिद्धिरुमेविशिष्टा ॥ रुद्राक्षमेतद्गुरशि
ष्टधार्यं ॥ वर्णैस्तपैर्वाश्रमतत्परैर्नरैः ॥ स्त्रीभिश्च धार्यं नरमक्षजातम् ॥ ३१ ॥ धृतसितभसितत्रि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० पुण्ड्रफाला वररुद्राक्षमहांगशोभिमालाः॥ सततं शिवनाम सक्तिशीला शिवमेव प्रवदन्ति ते विशालाः॥ ३३॥ ईशा० द० पू०
१० इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे चतुर्विंशोऽध्यायः॥ २४॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ अ० २४
॥४५॥ ॥ ॥ईशानायनमः॥ ॥श्रीस्कन्द उवाच॥ ॥ विधिशेशेन कथितो रुद्राक्षमुखतो मु
ने॥ शिवेनोक्तं समासेन तद्धारणविधौ सदा॥१॥ पुण्योऽयं शिवसंवादो देव्यै देवेन चोदितः॥ रुद्राक्षवक्ष्
सां नित्यं शिवः साक्षात्प्रसीदति॥२॥ रुद्राक्षं प्रथमं धृत्वा कर्म कुर्यादतंद्रितः॥ भस्मवद्धारणविधिः केचित्त्रे
यं वेकोदितः॥३॥ सर्वाश्रमाणां वर्णानां स्त्रीशूद्राणां समाख्यया॥ धार्यः सदैव रुद्राक्षो यतीनां प्रणवेन हि
॥४॥ दिवा बिभृद्रात्रिकृतं रात्रौ बिभृद्दिवाकृतम्॥ प्रातर्मध्याह्नसायाह्ने बिभ्रन्नात्पूर्वपातकैः॥५॥ सद्य ए
व विमुच्येत पितृहोमार्चनाविधौ॥ रुद्राक्षधृङ्नरो नित्यं तत्तद्दशगुणं फलम्॥६॥ प्राप्नोति शिवस्सा
रूप्यं एषोऽत्र विहितो विधिः॥ देवदेव्याश्च संवादः कैलासे विदितो मया॥७॥ तत्तेऽहं संप्रवक्ष्यामि तन्मे नि
गदितं शृणु॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते भवसागरात्॥ सर्वेषां सर्वपापानां शामकोऽयं मुने सदा॥ नो ४५॥
रुद्राक्षधारेण पूजितमुमे लिंगं न मुक्तिप्रदं कुर्वन्तेन विवर्जितोऽत्र मनुजो नो तस्य विन्देत्फलम्॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निन्दन्त्वपि सदाक्षधारिणमथो यात्येव वंशे युतं संदष्टः क्रिमिभिः क्षतांगरुधिरो मज्जेस्मविष्ठाह्रदे ॥ ८ ॥ स्नाने
संध्यासु तीर्थे पितृतिथिषु विधौ होमकाले प्रदोषे दोषघ्नं त्विदमेव तर्पणविधौ धार्यं विभूत्या समम् ॥ तन्न्यू
नाधिकता भवेच्च यदि चेत्संपूर्णमेतद्भवेत् रुद्राक्षोत्तमधारणे नगिरिजे सत्यं त्रिसत्यं वदे ॥ ९ ॥ वर्णी वनी गृ
ही यतिः नियमेन धार्यमेतद्रहस्य परमं नहि जातु तिष्ठेत् ॥ रुद्राक्षधारणमिदं सुकृतैश्च लभ्यं त्यक्त्वेदमेतदखिल
46 ला नरकं प्रयान्ति ॥ १० ॥ यद्दंशसंभवनरो भसिते कचारुरुद्राक्षकुण्डललसन्ननचोरुवक्षाः ॥ तं पक्षपात
सुहृन्नाप्यति पापयुक्तं त्र्यक्षो निरीक्षति मुदापि तभिः कटाक्षैः ॥ यस्तूर्ध्वपुंड्रमलिकेपि बिभर्ति पापः संताप
तप्तहृदयोऽपि सदा भवानी ॥ रुद्राक्षकण्ठवलयोऽपि सहारवक्षाः कक्षाग्निमध्यपरिवर्त्ति तनुर्भवेत ॥ १२ ॥ ॥
देवास्तन्मुखसंख्यया सुविहितास्तस्य प्रसन्नाः शिवे सन्ना एव भवन्ति पापगिरयस्तस्यारयो दुःखिताः ॥ रुद्रा एव
भवन्ति रुद्रपरमा रुद्राक्षनक्षाः सदा रुद्राक्षोत्तमवक्षसा सुजपतो मन्त्रो विशिष्टार्थदः ॥ १३ ॥ तन्माना कृत
संख्यया च विहिता नित्यं शिवे पावनः ॥ तस्यामेयफलं भवेत्सततं मद्रुद्रपंचाक्षरं चावृत्या भसितेन देह
गतकेनायुष्यवृद्धिर्भवेत् ॥ १४ ॥ विष्णुब्रह्मासुरा ये पितृमुनिनिवहाः तं नमस्यन्ति दूराद्रुद्राक्षोत्तमवक्षसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह. द्विजवरं नीचं जनं वा शिवे ॥ तद्दृष्ट्याभिभवन्ति राक्षसगणाः प्रेताः पिशाचास्तथा रक्षन्त्येव सदा मुदा सुकृति ईशा. द
१० नं रुद्राक्षयुक्तं नरम् ॥१५॥ संक्रान्तावयनद्वये शशिरविग्राहेषु पर्वस्वपि धार्यं तु प्रदिशन्ति च श्रुतिगिरः पुण्यं पू. अ. २५
॥४६॥ हि रुद्राक्षकम् ॥ आयुष्यं विहपुत्र्यमग्र्यगतिदं तु त्वत्प्रियः स्यान्नरः स्वर्ग्यं पापहरं सदैव विधृतं किं वच्मि
तत्ते फलम् ॥१६॥ रुद्राक्षं कलितं मृदापि विभृयात्पुण्यं तु रुद्राक्षकं तस्यानन्तमहाघसंघगिरयः कंप-
न्तिभिस्त्यपि ॥ साक्षाद्रक्षमुमेव वक्षसि धृतं त्र्यक्षप्रसादाद्धृतिं प्राप्यानुक्षणमक्षि फालसुगिरिं प्रा
प्नोत्यलक्षो नरः ॥१७॥ अर्वीगामलकास्ततो लघुतराः क्षुद्रास्ततो प्यम्बिके संदष्टाः क्रिमिभिः तनु
वकिणैः छिद्रणहीनास्तथा ॥ धार्या नैव शुभेच्छुभिः चणकवद्रुद्राक्षमप्यं ततो रुद्राक्षो मम लिंगमंगल
मुमे क्षुण्णं प्रशस्तं सदा ॥१८॥ स्वर्णेनापि च राजतेन गिरिजे ताम्रेण वा मौक्तिकैः रत्नैर्विद्रुमस्फाटि
काक्षमणिभिर्मध्यास्थिते धारयेत् ॥ नान्यस्मृतरुद्राक्षवयो मलजलोत्सर्गे तथा संगमे धार्या
नोत्तममालिका श्रुतिगता विप्रैः सदैवादरात् ॥१९॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे रु
द्राक्षमहिमा नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ छ ॥ ॥ ॥४६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानायनमः॥ ॥श्रीस्कन्द उवाच॥ ॥कैलासशैलसदने देव्या पृष्टो महेश्वरः॥ शतरुद्रीयमाहा
त्म्यमभिषेकं जपक्रमम्॥१॥ अतिरुद्रं महारुद्रं विधिमेकादशावृतेः॥ जपाधिकारिणं चापि प्रोक्तवा
न् परमेश्वरः॥२॥ तत्तेऽहं संप्रवक्ष्यामि त्वमिहैकमनाः शृणु॥ ॥जैगीषव्य उवाच॥ ॥क
ह थं देव्या पुरा पृष्टो शिपिविष्टो वृषध्वजः॥ श्रीरुद्रमन्त्रमाहात्म्यमुक्तवान् तज्जपे विधिम्॥ तन्मे विस्त
रतो ब्रूहि निस्ताराय भवार्णवे॥४॥ ॥सूत उवाच॥ ॥जैगीषव्यवचः श्रुत्वा सुब्रह्मण्यो बिका
४७ सुतः॥ देव्यै देवेन कथितमुवाच विधिविस्तरम्॥५॥ ॥सुब्रह्मण्य उवाच॥ ॥कैलासशि
खरे देव्या पृष्टो रुद्रविधिं हरः॥ संतुष्टेनैव मनसा प्राह देवो महेश्वरः॥६॥ ॥उमोवाच॥ ॥
देवदेव महादेव शूलपाणे जगत्प्रभो॥ श्रीरुद्राणां च माहात्म्यं वद मे करुणार्णव॥७॥ अभिषेक
जपे चैव महारुद्रातिरुद्रके॥ पुण्यपापहरा शंभोः श्रुतिर्मे याजुषी वरा॥८॥ पापानां नाशिनी देव रु
द्रैकादशिनो विधिः॥ श्रीस्कन्द उवाच॥ ॥ततो देव्या वचः श्रुत्वा प्राह देवो महेश्वरः॥
रुद्रातिरुद्रमाहात्म्यं जाप्ये चैवाभिषेचने॥९॥ ॥श्री ईश्वर उवाच॥ ॥शतरुद्रीयमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ह्मात्म्यमधुनासंप्रवक्ष्यते ॥ यस्यविज्ञानमात्रेण पापनाशः प्रजायते ॥ १०॥ ऋग्वेदे च यजुर्वेदे सामार्थर्वणके 
 द्रके ॥ सारात्सारतरं पुण्यं शतरुद्रीयमीरितम् ॥ ११॥ श्रुतस्याध्ययनं यस्य स्यादधीतस्य नाशनम् ॥ सर्ववेदबाह्य 
दृग्युक्तः सर्वकर्मबहिष्कृतः ॥ १२॥ दैवेऽपि श्राद्धकालेषु न स योग्यः कदाचन ॥ यस्याधीतमहाविद्या
शतरुद्रीयनामिका ॥ १३॥ तेनाभ्यस्ताश्चतुर्वेदा अनधीता अपि द्विजाः ॥ जप्यते शतरुद्रीयं येन नित्यं द्विजोत्त
माः, ॥ १४॥ स एवमेव पित्र्यादि कर्मयोग्यो न संशयः ॥ उपास्य नित्यं गायत्रीं प्रजप्त्वा शतरुद्रियम् ॥ १५॥
ब्रह्मर्षित्वमयं प्राप्य ब्रह्मभूयाय कल्पते ॥ त्यक्त्वा यः शतरुद्रीयमन्यज्जाप्तुमिहेच्छति ॥ १६॥ स्वगृहे
पायसं त्यक्त्वा भिक्षामटति दुर्मतिः ॥ त्यक्त्वा यः शतरुद्रीयं० ॥ तटाकस्थं जलं त्यक्त्वा मृगतृष्णां सुधाव
ति ॥ १७॥ त्यक्त्वा यः शतरुद्रीयं० ॥ कामधेनुपयस्त्यक्त्वा खरक्षीरं प्रधावति ॥ १८॥ त्यक्त्वा यः शत
रुद्रीयं० ॥ स हेमभारं त्यक्त्वा, सो अयः पिण्डं प्रधावति ॥ १९॥ यथेन्द्रजालिका लाभाः क्षणमात्रं सु-
खावहाः ॥ एतस्मादपरा विद्यास्तादृशा मुनिपुंगवाः ॥ २०॥ वेदानामपि शास्त्राणां पुराणानामपि द्विजाः ॥
शतरुद्रीयमाहात्म्यं कथनात्तदुपास्यता ॥ २१॥ ब्रह्मादयः सुराः सर्वे वशिष्ठाद्या ऋषीश्वराः ॥ सनकाद्या 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चयोगीन्द्राः जीवन्मुक्ताः शुकादयः ॥ २२॥ ब्रह्मर्षयोमरीच्याद्यानारदाद्यासुरर्षयः॥ यक्षकिन्नरगन्ध
र्वसिद्धविद्याधरादयः॥ २३॥ प्रजप्त्वा शतरुद्रीयं श्रुतिसारमहोदयम्॥ अवाप्यसकलान्कामानज
पन्त्यद्यापिसर्वदा ॥ २४॥ कृते तु ऋग्वेदमन्त्रा जप्याः सदा द्विजैः॥ अथर्वाङ्गिरसां विद्या जप्यास्त्रे
युगे तायुगे सदा ॥ २५॥ प्रजप्तव्यानि सामानि युगे द्वापरनायके ॥ प्रजप्तव्यो यजुर्वेदो युगेऽस्मिन् कलिना
मके ॥ २६॥ वेदाः सर्वेऽपि जप्तव्या युगेषु त्रिषु च द्विजाः॥ शतरुद्रीयमभ्यस्येत्सततं नियमेन यः
४७ ॥ २७॥ सएव विप्रो लोकेषु पूज्यो वन्द्यो नसंशयः॥ सव्रती सतपस्वी च स्तोतव्यः सयतिप्रियः॥
॥ २८॥ सचाचार्यः समतिमान् स ज्ञानी सच साधकः॥ स यज्वा सच पूतात्मा स देवज्ञः समांत्रिकः॥
॥ २९॥ सयोगी सचदेवर्षिः स ब्रह्मर्षिः सुरोत्तमः॥ सब्रह्मा सविधाता च सविष्णुः शंकरो द्वि
जाः॥ ३०॥ तत्कुलं पावनं नित्यं धन्या तज्जननी सदा ॥ तत्पिता च कृतार्थः स्यान्मुक्तास्तत्पितरो
द्विजाः॥ ३१॥ पुण्यास्तद्वंशजाः सर्वे पूतास्तन्मित्रबान्धवाः॥ किमत्र बहुनोक्तेन सारं वक्ष्ये मुनी
श्वराः॥ ३२॥ शतरुद्रीयजप्तारं दृष्ट्वा स्पृष्ट्वा स्मरन्नपि ॥ संभाष्य वा समाप्नोति राजसूयाधिकं फलम्॥ ३३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिव र॰ १० यस्मिन्देशे स्थिता विप्राः शतरुद्रीयजापकाः ॥ दिव्यक्षेत्रं तदुद्दिष्टं समन्ताद्योजनावृतम् ॥३४॥ तत्रैव देवा ई॰शा॰द॰पू॰
॥४८॥ स्तिष्ठन्ति वेदा यज्ञाः समन्त्रकाः ॥ मुनयः सिद्धयस्तत्र ऋषयः पितृभिः सह ॥३५॥ इदं च परमं श्रेयः इद अ॰ २६
मेव परं तपः ॥ इदमेव परं तीर्थमिदमेव महाद्भुतम् ॥३६॥ इदमेव परा दीक्षा इदमेव परा गतिः ॥ इदमेव प
रो योगः इदमेव परं सुखम् ॥३७॥ इदमेव परं पुण्यमिदमेव महत्फलम् ॥ अयमेव सदाचारः अयमेव
महामखः ॥३८॥ अयं सर्वोपनिषदां सारभूतार्थसंग्रहः ॥ निर्मलं निर्गुणं नित्यं निष्कलं च निरंज
नम् ॥३९॥ अनन्तमव्ययं ज्योतिर्मनोवाचामगोचरम् ॥ आदिमध्यान्तरहितं सर्वभूतहृदि स्थितम् ॥
॥४०॥ स्वप्रकाशं परं ब्रह्म सत्यानन्दचिदात्मकम् ॥ एतत्तं शतरुद्रीयजपात्साक्षात्प्रकाशते ॥४१॥ ब्र
ह्महत्याशतं वापि सुरापानशतं तथा ॥ मातृहत्यादिकं वापि पितृहत्यादिकं तु वा ॥४२॥ शतरुद्रीयज
पतो विनश्यन्ति न संशयः ॥ शतरुद्रीय (मध्य) भस्मस्य नियतो नियताशनः ॥४३॥ पुत्रपौत्रमतीं वृद्धिमणि
मादिगुणान्विताम् ॥ अवाप्य जीवन्मुक्तः सन् विद्योतेनात्र संशयः ॥४४॥ नाष्टाङ्गयोगाभ्यासेन न
दानेन न चेज्यया ॥ न वेदैर्नागमैः शास्त्रैर्न पुराणैः सुविस्तरैः ॥४५॥ गतिर्भवति मर्त्यानां शतरु ॥४८॥
द्रीयजापिनाम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदसारमिदं गुह्यं पावनं सर्वदेहिनाम्॥ ४६॥ महापापक्षयकरं महापुण्यफलप्रदम्॥ यजुर्वेदचतुर्थे
स्मिन् काण्डे प्रश्नो हि पंचमः॥४७॥ अस्मिन्प्रश्ने शतरुद्रमन्त्रास्तिष्ठंति सिद्धिदाः॥ तस्मात्तद्वेव
दसारं शतरुद्रीयमीरितम्॥ ४८॥ शतरुद्रीयजपतो ब्रह्मसाक्षात्प्रकाशते॥ जातिस्मरत्वमासाद्य भवेत्
साक्षात्परः शिवः॥ ४९॥ शतरुद्रीयमाहात्म्यं किंचिदेतन्मयोदितम्॥ सर्वपापप्रशमनं किं भूयः श्रो
तुमिच्छथ॥ ५०॥ वेदक्षीरमहार्णवोद्यतरथि प्रोद्यत्सुमन्थानवत् श्रीरुद्रान्तरमध्यसंस्थितमहा
99 पंचाक्षरावृत्तिभाक्॥ तन्मध्यस्थशिवाभिधानमसकृज्जप्त्वा जनो मुक्तिभाक्॥ योग्यायुष्यमुपा
श्नुते स यजुषां मध्यार्थसाराद्दरो दूरात्पापमपाकरोति म तदा शंभोः प्रसादात्सर्वे॥ ५१॥ ॥ ॥
॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे षड्विंशोऽध्यायः॥ २६॥ ॥ श्रीकाशीविश्वेश्वरार्पण
मस्तु॥ ॥श्री ईशानायनमः॥ ॥ जैगीषव्य मुनिरुवाच॥ ॥ भगवन्सर्वतत्त्वज्ञ स्कंद शंकरसंभव॥
काण्डे चतुर्थे यजुषि प्रश्नेऽस्मिन्पंचमे शुभे॥ १॥ रुद्रमन्त्राः शतं तस्माच्छतरुद्रीयमुच्यते॥ नामानि
श्रोतुमिच्छामि तेषां स्कन्द महामते॥ २॥ ॥ सूत उवाच॥ जैगीषव्य वचः श्रुत्वा स्कन्दः सूदिततारकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिवर.१० नमस्कृत्य महादेवं प्रवक्तुमुपचक्रमे ॥३॥ ॥स्कन्द उवाच॥ ॥शतरुद्रीयमाहात्म्यं भूयो वक्ष्यामि ते शृणु॥ ई.शा.ह.पृ.

॥४१॥ यस्य विज्ञानमात्रेण सिद्धिः करतले स्थिता॥४॥ वेदेषु शतरुद्रीयं देवतासु महेश्वरः॥ क्षेत्रेषु चाविमुक्तं मे अ.१६

मन्त्रे पंचाक्षरो वरः॥५॥ नृणां यथा द्विजो मुख्यो द्विजेष्वपि च शांभवः॥ पापनाशकरं विप्र यथा भस्मैव

पावनम्॥६॥ भूषणेषु यथा मुख्यं रुद्राक्षं पावनं द्विज॥ पुराणेषु यथा स्कान्दं सर्वस्मृतिषु मानवी॥७॥

यथा प्रमाणं मानानां श्रुतिरेव सनातनी॥ इतिहासेषु परमं यथा शिवरहस्यकम्॥८॥ शतमस्मिन्महामन्त्रा

स्तिष्ठन्ति भुवि दुर्लभाः॥ ऋषिश्छन्दो देवताभिर्विनियोगैः समन्विताः॥९॥ जपेत्समग्रं नमकं सम

ग्रं चमकं तथा॥ रुद्रमित्युच्यते सद्भिः महाघौघविनाशनम्॥१०॥ नमकं चमकेनानुवाकयुतं जपेत्॥ ए

वमेकादशावृत्या रुद्रैकादशिनी स्मृता॥११॥ रुद्रैकादशिनीं जप्त्वा तथैकादशनीं पुनः॥ श्रीरुद्रमिच्छ्रुति

विद्भिः कथ्यते भुक्तिमुक्तिदम्॥१२॥ श्रीरुद्रैकादशावृत्या महारुद्रमुदाहृतम्॥ तथैकादशधा जप्त

मतिरुद्रमिति स्मृतम्॥१३॥ नामधेयानि वक्ष्यामि मन्त्राणां च पृथक् पृथक्॥ व्योम बीजादिको म

न्त्रः प्रथमः परिकीर्तितः॥१४॥ वामदेवर्षिसंयुक्तो द्वात्रिंशार्ण उदाहृतः॥ सांबाख्यदेवतायुक्तो ऽनु- ॥४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टुछन्दोऽष्टसिद्धिदः ॥१५॥ पवनादिस्त्रितीयस्याद्दैवतं छन्दसान्वितः ॥ अंतर्यामी ऋषिः सांबः शिवं दे
वोष्टसिद्धिदः ॥१६॥ चतुर्थो वायुबीजादिरनुष्टुप्छन्दसान्वितः ॥ अभीष्टसिद्धिदः प्रोक्तः स्कन्दर्षिस्त्रि
पुरान्तकः ॥१७॥ अमृताद्यादिमो मन्त्रो गायत्री छन्दसावृतः ॥ तथैव सप्त चत्वारिंशद्वर्णोऽभीष्टसिद्धिदः ॥१८॥
चतुर्मुखादि चमक चत्वारिंशाक्षरो मनुः ॥ त्रिष्टुप्छन्दयुतः षष्ठो भार्गवर्षिः सुरोत्तमः ॥१९॥ रविर्देवतको
मन्त्रो त्रिंशत्सप्तदशाक्षरः ॥ भार्गवर्षिसमायुक्तो गायत्री छन्दसावृतः ॥२०॥ सृष्टिकर्त्रादिमो मन्त्रोऽभीष्टदः
संप्रकीर्त्तितः ॥ मूलादिमो महामन्त्रः कण्वर्षिर्भयनाशकः ॥२१॥ पंक्तिश्छन्दसमायुक्तो नीलकण्ठः सुरो
50 ऽष्टमः ॥ अग्निबीजसमायुक्तो वायुबीजादिमो मनुः ॥२२॥ दधीचिऋषिसंयुक्तः छन्दसानुष्टुभान्वि
तः ॥ त्रिपुरान्तकदेवोऽसौ नवमः शत्रुनाशकः ॥२३॥ विष्ण्वादि देवतायुक्तो दशमो गायत्री युतः ॥ सहस्रा
क्षः सुरः शत्रुक्षयकृद्धामो मनुः ॥२४॥ अमृतादिर्महामन्त्रः पंक्तिश्छन्दसमन्वितः ॥ कपर्दी देव कण्व
र्षिः सदा विजयसिद्धिदः ॥२५॥ अग्न्यादिस्त्र महामन्त्र ऋषिर्नारदसंयुतः ॥ गायत्री छन्दसायु
क्तो रविरूपसुरस्तथा ॥२६॥ आयुरारोग्यसंसिद्धिप्रदो द्वात्रिंशदीरितः ॥ मकारान्त्या इमा विद्या दधी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर·१० चिक्रीष संयुता ॥२८॥ देवतं छन्दसा युक्ता पिनाकी सुरसंयुता ॥ त्रयोदशीति कथिता रणे विजयदायिनी ॥ शि·ना·द·पू·
॥५०॥ ॥२८॥ मा·रुद्रादिमहाविद्या पंक्तिछन्दसमन्विता ॥ पिनाकी देवता युक्ता गौतमो ऋषि संयुता ॥२९॥ अ·२७
चतुर्दशेति कथिता वैश्यादिव्य प्रदायिनी ॥ नमो हिरण्य इत्यारभ्य सत्वनां पतये नमः ॥ एतत्
पर्यन्ता विद्यास्यात्पार्वती ब्रह्मसुरस्मृता ॥३०॥ चतुर्मुखर्षि संयुक्ता विराट्छन्दसमन्विता ॥ अ
नुवाकश्चतुर्थः स्याद्विद्यासप्तदशी स्मृता ३१॥ कुमारर्षि समायुक्ता बृहती छन्दसायुता ॥ महा
देव सुरा सर्व गृह देव निवारिणी ॥३२॥ अष्टादशी महाविद्या अनुवाद कस्तु पंचमः ॥ गणेश
र्षि समायुक्ता त्रिष्टुप्छन्दसमन्विता ॥३३॥ महारुद्र सुरा सर्व सिद्धिदाऽज्ञाननाशिनी ॥ षष्ठोऽ
नुवाक एकोनविंशो मन्त्रः स ईरितः ॥३४॥ सविष्टर्षि समायुक्ता त्रिष्टुप्छन्दसमन्विताः ॥ परमेश्व
रे देवोऽसौ सर्वसंपत्प्रदायकः ॥३५॥ एकविंशो महामन्त्रो ह्यनुवाकस्तथाष्टमः ॥ वामदेव
र्षि सहिता जगतीछन्दसमन्विताः ॥३६॥ उमामहेश्वरसुरश्चिंतितार्थफलप्रदः ॥ एतन्मध्यग
ता विद्या मूलं पंचाक्षरी शुभा ॥३७॥ ब्रह्मविद्या भुक्तिमुक्ति दायिनी सर्व सिद्धिदा ॥ ~~ब्रह्मदेवर्षि~~ ॥५०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वामदेवर्षि सहिता पंक्तिश्छंदसमन्विता ॥ ३८ ॥ सत्यानन्दचिदाकार सांबशंकर देवता ॥ एतन्मध्य
गता तत्र विंशत्संख्या मुनीश्वरा: ॥ ३९ ॥ वामदेवर्षि संयुक्ता त्रिष्टुपछन्दसमन्विता ॥ अथग्र
हानुना काख्या मालामन्त्रस्वरूपिणी ॥ ४० ॥ वीरभद्रर्षि संयुक्ता त्रिष्टुप्छन्दसमन्विता ॥ महे
श्वरसुराभीष्ट सिद्धिदा हेम सिद्धिदा ॥ ४१ ॥ एतन्मध्यगता मन्त्रास्त्रयस्त्रिंशत्फलप्रदा ॥ वेदव्या
सर्षिसहिता: पंक्तिश्छन्द समन्विता ॥ ४२ ॥ नमो वर्ण्य प्रथमा मीवत्केभ्य इत्यन्तसंयुता ॥ श्रीरुद्र
र्षिसमायुक्ता गायत्री छंदसमन्विता ॥ ४२ ॥ सर्व प्रथम संस्तुत्य सांबशंकर देवता ॥ महासिद्धिप्र
दासाक्षाच्छंकर त्वप्रदायिनी ॥ ४३ ॥ द्रापे अंधस इत्येषा मुनि ब्रह्म समन्विता ॥ गायत्री छन्द
सा युक्ता स्कन्द दैवतसंयुता ॥ ४४ ॥ द्रारिघ्र नाशन करी परमैश्वर्य दायिनी ॥ यातेरुद्रेति विद्यास्या
त्सूर्यनारायणात्मिका ॥ ४५ ॥ गायत्री छन्दसा युक्ता भार्गवर्षि समन्विता ॥ सर्वरोगक्षयकरी मनश्चिं
तितसिद्धिदा ॥ ४६ ॥ इमामिति महाविद्या शंकर्षि समन्विता ॥ विराट्छन्दो युता सौख्यसिद्धिदा
रुद्रदेवता ॥ ४७ ॥ मृडानो रुद्रविद्यास्यात्संकर्षणमुनिस्तुता ॥ कालाग्निरुद्रश्चैस्याज्जगतछंदसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर·१०न्विता॥४८॥ आदिव्याधिहरान्नृणां दीर्घायुष्यप्रदायिनी ॥मानोमहान्तमित्येषा विद्यासूर्यर्षिसंपु ई.शा.द.पृ
॥५१॥ ता॥४९॥सांबशंकरदेवेशककुप्छन्दसमन्विता॥मातृपितृसुतभ्रातृवियोगक्षयकारिणी॥५०॥मानस् अ.२६
तोकेमहाविद्या वरुणऋषिसंयुता॥रुद्रदेवतसंयुक्ता देवतछन्दसान्विता॥५१॥गर्भपातक्षयकरी सुतायु
ष्यविवर्धिनी॥ आराते गोघ्न इत्येषा विद्या ब्रह्मर्षिसंयुता॥५२॥ गायत्रीछन्दसायुक्ताग्निर्देवतसं
युता॥अजागोमहिषीमत्तगजाश्वत्राणकारिणी॥५३॥ तुहिश्रुतमितिह्येषा दक्षिणामूर्त्तिदेवता॥
ऋषिः प्रजापतिस्तुल्यागायत्रीछन्दसान्विता॥५४॥ अज्ञाननाशनं सर्वविद्यासिद्धिप्रदायिनी॥परी
णःप्रथमा विद्या कण्वकऋषिपूजिता॥५५॥रुद्रदेवतसंयुक्ता निचृद्गायत्रसंयुता॥मीढुष्टमेतिवि
द्यासाद्भिनस्वद्दर्षिसंयुता॥५६॥साक्षात्कारकरी शंभोर्गायत्रीछन्दसान्विता॥विकिरिद्रमहावि
द्यामुनिब्रह्मप्रपूजिता॥५७॥ गायत्रीछन्दसायुक्ता वीरभद्रादिदेवता॥सहस्राणि सहस्रेतिविद्या
भद्रर्षिसंयुता॥५८॥विराट्छन्दसमायुक्ता परशंकरदेवता॥सहस्राणीति विद्यास्याच्चतुर्वर्गफ
लप्रदा॥५९॥ वीरभद्रर्षिसंयुक्ता महारुद्राख्यदेवता॥ विराजोछन्दसायुक्तो यक्षासर्वत्रपूजिता॥६०॥ ॥५१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्मिन्महत्यादिविद्या नीलग्रीवाधि देवता ॥ पराशरर्षिसंहिता गायत्री छन्दसान्विता ॥६१॥ नी
लग्रीवा इति प्रोक्ता महाविद्याफलप्रदा ॥ कपिलर्षिस्तुता वामदेवं देवो निवृद्युत ॥६२॥ ये भूता नाम
धीत्येषां मार्कण्डेयमुनिस्तुता ॥ मृत्युंजयाख्य देवीस्याद्गायत्री छन्दसान्विता ॥६४॥ य एतावन्त
इत्याद्या विद्या श्रीरुद्रं देवता ॥ ऋषिकण्वं समभ्यर्च्य जागतछन्दसान्विता ॥६५॥ नमो रुद्रेभ्य इ
त्येषा विद्या श्रीरुद्रं देवता ॥ संकर्षणमुनिस्तुत्या गायत्री छन्दसान्विता ॥६६॥ सर्वाधिव्याधिशमनी
चतुर्वर्गफलप्रदा ॥ एता विद्या मयाख्याता शतरुद्रीयमध्यगा ॥६७॥ एकादशानुवाकेभ्यो विद्याश
52 तमजायत ॥ समग्रं नमकं माला मन्त्ररूपं द्विजोत्तमाः ॥६८॥ शतरुद्रीयमित्युक्तं वेदसारं महोदयं ॥ शां
त्यर्थं शं च मे सूक्तं पठित्वा दो द्विजोत्तमाः ॥६९॥ प्रजपेच्छतरुद्रीयं त्रयीसारमनुत्तमम् ॥ मयेषां सर्व
मन्त्राणां छन्दर्ष्यादि कीरितम् ॥७०॥ उक्तानि नामधेयानि माहात्म्यं वक्ष्यते पुनः ॥ मल्लिंगं वाभि
वीक्ष्य रुद्रजनमो वाक्यैस्तुवन्भक्तितः ॥ शं भुं शांभव सत्तमो त्तम पदं प्राप्नोति रुद्रं जपन् ॥ रुद्रेणप्र
णमन्प्रदक्षिणाविधिं कुर्वन्महापातकैः मुक्तः श्री शतरुद्रमन्त्रजपकृच्छंभोर्यथांतेगणः ॥७१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० ॥ इति श्रीमच्छिवरहस्ये ईशानाख्ये दशमांशे सप्तविंशोऽध्यायः ॥ २७॥ ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ शतरुद्रीय माहात्म्यं पु अ०२८

॥५२॥ नर्वक्ष्ये मुनीश्वर ॥ शृणुष्व श्रद्धया युक्तो यदीच्छसि भवक्षयम् ॥१॥ शान्त्यर्थं शं च मे सूक्तं जप्त्वादौ मुनिपुंगव ॥ प्रजपेच्छतरुद्रीयं समग्रं नमकं तथा ॥२॥ भूम्नो रुपासना पंच विध्या प्रोक्ता महर्षिभिः ॥ अस्मिन् समग्रे नमके नामानि त्रिशतं द्विज ॥ ३॥ तिष्ठन्ति श्रुतिसाराणि भुक्तिमुक्तिकराणि हि ॥ एते र्यो नामभिर्लिंगे स्थावरे जंगमेऽपि वा ॥४॥ पूजयेत्सा महापूजा, तया प्रीणाति शंकरः ॥ मन्त्रोक्तैः शतसंख्याकैः मन्त्रैः शंकरदैवतैः ॥५॥ कुन्दर्ष्यादिकमुक्त्वादौ ज्वलिते जातवेदसि ॥ स्वाहान्तं जुहुयाद्रुद्रीयेदं नमम कथ्यते ॥६॥ एवं होमेन गौरीशः प्रीणाति फलदायकः ॥ तर्पयेच्छतरुद्रीय मध्यगैः शतमन्त्रकैः ॥७॥ श्रीरुद्रं तर्पयामीति प्रोच्चरन् सुसमाहितः ॥ उपास्ना तृतीयास्यादिति सर्व फलप्रदा ॥८॥ न्यासस्यान्मन्त्रसंनाहो न्यासहीना न सिद्धिदा ॥ बोधायनकृतं स्तोत्रं शतरुद्रीयदीपनम् ॥९॥ बोधायनोक्तमार्गेण न्यासं कृत्वा विचक्षणः ॥ प्रजप्त्वा शं च मे सूक्तं आदौ विघ्ननिवृ ॥ ५०॥

त्तये ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समग्रनमकस्यास्य वेदसारस्य ब्राह्मणाः ॥ स वामदेवयोघोरः ऋषिरित्युच्यते बुधैः ॥ ११ ॥ छन्दांसि
चास्य गायत्री पंक्त्यानुष्टुभ एव च ॥ जगती बृहती चेति देवता कथ्यते ततः ॥ १२ ॥ जपाकुसुमसाहस्रस
न्निभे सूर्यमंडले ॥ मध्यरूपी विराड्रूपी विधिविष्णुशिवात्मकः ॥ १३ ॥ योसावादित्ये पुरुषः श्रीरु
द्राख्यः परः शिवः ॥ परमेशः स विज्ञेयः शिवः सत्यं चिदात्मकम् ॥ १४ ॥ समग्रनमकस्यास्य कथितं देव
तं द्विजाः ॥ प्रीत्यर्थं परमेशस्य विनियोग उदाहृतः ॥ १५ ॥ ऋषिछन्दोदेवतानि विहितानि समाहितः ॥
ध्यायेन्निरामयं वस्तु सर्गस्थितिलयाधिकम् ॥ १६ ॥ यदेव व्यवहाराणामाधारं प्रकृतेः परम् ॥ निर्गुणं नि
53 ष्कलं नित्यं मनोवाचामगोचरम् ॥ १७ ॥ परंतेजोऽहमस्मीति ध्यात्वैवं द्विजपुंगवाः ॥ सगुणं हृदये ध्याये
द्ब्रह्मरंध्रेऽथवा प्रभुम् ॥ १८ ॥ शुद्धस्फटिकसंकाशं मध्याह्नादित्यसंनिभम् ॥ स्वसंवेद्यमनाद्यन्तं श्वे
तपद्मासुत प्रभुम् ॥ १९ ॥ गंगाधरं शशिकरं जटामुकुटभूषितम् ॥ श्वेतभूतित्रिपुण्ड्रेण विराजितल
लाटकम् ॥ २० ॥ लोचनत्रयसंपन्नं स्वर्णकुण्डलशोभितम् ॥ बिंबाधरं चतुर्बाहुं मुक्ताहारोपशोभित
म् ॥ २१ ॥ अक्षमालासुधाकुंभं चिन्मयीं मुद्रिकामपि ॥ पुस्तकं च भुजैर्दिव्यैर्दधानं पार्वतीपतिम् ॥ २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० शुक्लयज्ञोपवीतेन श्वेतवस्त्रेण शोभितम् ॥ श्वेतांबरधरं श्वेतं रत्नसिंहासने स्थितम् ॥२३॥ वीरासनं
॥५३॥ सनेसमासीनं विराट्रूपिणमीश्वरम् ॥ संतप्तहेमरुचिरं स्वंगुलीयकभूषितम् ॥२४॥ मुक्तामाणिक्यसौवर्णकांचीदामविराजितम् ॥ योगिभिः सनंद्यैश्च स्तूयमानमहर्निशम् ॥२५॥ दातारं सर्वविद्यानां सकलैश्वर्यदायकम् ॥ सर्वाभीष्टप्रदातारं वटमूलनिवासिनम् ॥२६॥ सत्यानन्दचिदात्मानं शंकरं परमेश्वरम् ॥ वामांके संस्थितां गौरीं बालार्कयुतसन्निभाम् ॥२७॥ जपाकुसुमसाहस्रसमानश्रियमीश्वरीम् ॥ सुवर्णरत्नखचितमकुटेन विराजिताम् ॥२८॥ ललाटपट्टसंराजत्संलग्नतिलकांकिताम् ॥ भ्रमद्भ्रमरनीलाभधंमिल्लालकशोभिताम् ॥२९॥ सौंदर्यजितकामेशकोदंडभ्रूयुगान्विताम् ॥ राजीवायतनेत्रांतां नीलोत्पलदलेक्षणाम् ॥३०॥ मुक्तामाणिक्यखचितनासिकाभरणान्विताम् ॥ कुण्डलद्वयसंशोभिकर्णयुग्मविराजिताम् ॥ ३१॥ तांबूलचर्वणरतां नवरत्नविराजिताम् ॥ आढ्यभूषणसौवर्णचित्रकाभरणान्विताम् ॥३२॥ पताकाभरणोपेतां मुक्ताहारोपशोभिताम् ॥ इक्षुकार्मुकपुष्पेषु चापबाणशराकरैः ॥ ३३॥ दिव्यांगुलीयकयुतैः केयूरयुगलान्वितैः ॥ स्वर्णकंकणसं ॥ ३३॥

का अ०२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युक्तैः चतुर्भिर्बाहुभिर्युताम् ॥३४॥ सुवर्णरत्नखचित कांची चंदा विराजिताम् ॥ सौभाग्य भूषण युतां सू
क्ष्ममध्य विराजिताम् ॥३५॥ रक्त चन्दन संलिप्तहेम कुंभोपमस्तनीम् ॥ रक्त वस्त्र परीधानां रक्त माल्य
विभूषिताम् ॥३६॥ ३६ ॥ तनुमध्यां पृथुश्रोणीं शिव वामांक संश्रयाम् ॥ कदली ललित स्तंभ संनि
भोरुयुगान्विताम् ॥३७॥ सुवर्णपादकटक युगलेन सुशोभिताम् ॥ संतप्त हेम पादांगुली यकैः सुवि
राजिताम् ॥३८॥ पूर्णचन्द्र मुखीमंबां सुस्मितास्य विराजिताम् ॥ ब्रह्मविष्णु महेन्द्रादि शिरोमु
कुटजातया ॥३९॥ श्रिया विराजितपदां भक्त त्राण परायणाम् ॥ स्वकांत्या शंकरं देवं पुनरप्य
54 रूपी कृताम् ॥४०॥ सर्वालंकार सुभगं युवानमति सुन्दरम् ॥ छत्रेण शोभितं मूर्ध्नि चामराभ्यां वि
राजितम् ॥४१॥ ब्रह्मविष्णु महेंद्रादि वन्द्यमान पदांबुजम् ॥ सृष्टिस्थित्युपसंहार हेतुभूतं स
नातनम् ॥४२॥ अन्योऽन्य श्लिष्ट हृद्बाहु गौरी शंकर संज्ञितम् ॥ सनातनं परं ब्रह्म परमानन्दमव्य
यम् ॥४३॥ नमामि जगतामीशं शंकरं परमेश्वरम् ॥ एवं ध्यात्वा जपेन्नित्यं शतरुद्रीयमादरात् ॥
चमके रुद्र संख्याकाननुवाकान् जपेत्ततः ॥ एकवारं द्विवारं वा त्रिवारं चमकान्वितम् ॥४४॥ नम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० कं प्रजपेदेषा जपोपास्तिरुदीरिता ॥ शिवप्रीतिकरा श्रेष्ठा श्रीरुद्रैश्वर्यप्रदायिनी ॥ ४६ ॥ स्थावरे जंगमे इशा०द०५
॥५४॥ लिंगे समाहितमनः शुचिः ॥ न्यासध्यानादिसहितं शं चमेसूक्तपूर्वकम् ॥ ४७ ॥ प्रजपन्... शतरुद्री
यमभिषेकं समाचरेत् ॥ एकवारं द्विवारं वा त्रिवारं चमकान्विता ॥ ४८ ॥ उपास्तिः पंचमी प्रोक्ता ३१.२८
शंभोः प्रीतिकरी शुभा ॥ विशेषमन्त्रान्वक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ ४९ ॥ जप्त्वा समन्त्रं नमकं शतरुद्रीय
मुत्तमम् ॥ चमकस्यानुवाकस्य चैकमेकं ततो जपेत् ॥ ५० ॥ रुद्रैकादशिनीं नामैतां प्रजपन्वै करोपरि ॥ करोति
योऽभिषेकं हि नियमेनैकमंडलम् ॥ ५१ ॥ स महापातकैस्त्यक्तो राजसूयफलं लभेत् ॥ शतमन्त्रैश्चतुर्वारं
जुहुयात्पायसं शुभम् ॥ ५२ ॥ रुद्रसंख्यानुवाकैश्च जपहोमौ हुनेत्ततः ॥ मधुत्रितयसंयुक्तं महापापैः प्रमुच्यते ॥
॥ ५३ ॥ अभिषेकं केवलं वा मंडलं यः करोति हि ॥ इह भुक्त्वाखिलान्लोकान्परे ब्रह्मणि लीयते ॥ ५४ ॥ पू-
जाया अधिको होमो होमात्तर्पणमुत्तमम् ॥ तर्पणाच्च जपः श्रेष्ठः ह्यभिषेकः परो जपात् ॥ ५५ ॥ रुद्रैकादशिनीं
जप्त्वा प्रजपेच्छांतिपंचकम् ॥ अन्यथा तस्य संसिद्धिर्नास्ति नास्ति तपोधन ॥ ५६ ॥ यदा भक्त्युदयो नृणां ततो
पास्तिं समाचरेत् ॥ चतुरस्रं वरं कुंडं होमकाले विधीयते ॥ ५७ ॥ गणेशमादौ संपूज्य कृत्वा नियममेव च ॥ ॥५८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपासनापंचकार्यं कृत्वा नियममादितः ॥ ५८ ॥ समग्रं नमकः प्रोक्तः प्रजपेच्चमकान्वितम् ॥ स महापातकैर्मु
क्तः शिवसायुज्यमश्नुते ॥ ५९ ॥ मध्याह्ने प्रजपेद्यस्तु चमकेन युतं द्विजाः ॥ स सूर्यमंडलं भित्वा गणानामग्र
णीर्भवेत् ॥ ६० ॥ सायंकाले जपेद्यस्तु नमकं चमकान्वितम् ॥ अवाप्य सकलान्भोगान्परे ब्रह्मणि लीयते ॥ ६१ ॥
भूतिभूषितसर्वांगो लिंगपूजारतः शुचिः ॥ नमकं चमकं नित्यं प्रजपेत्फलदायकम् ॥ ६२ ॥ वेदसाराणि नामा
नि कथितान्यत्र तानि हि ॥ एतज्जाप्यमृतो भूत्वा ब्रह्मभूयाय कल्पते ॥ ६३ ॥ एतत्ते शतरुद्रीयं मया संध्यानादिकं
शुभम् ॥ मयोक्तं ब्राह्मणश्रेष्ठाः किं पुनः श्रोतुमिच्छथ ॥ ६४ ॥ एकावृत्त्याऽघनाशो भवति गिरिसुते तद्द्वितीयेग
55 णेंद्रो तमिव प्रविशेत्ततः त्रितयतो श्रीरुद्रजापी नरः ॥ षड्वारं प्रजपंश्च मुक्तिफलभाक् भूयो भवेच्छ्रो भवः ॥ ६५ ॥
श्रीरुद्रनामार्चनतो महेशलिंगार्चयन्यो कुसुमैश्च बिल्वैः ॥ रुद्राक्षभस्मांगयुतो विमुक्तः च्युतोऽपि मुक्तो
गणपो भवेद्द्विजः ॥ ६६ ॥ तस्मात्स्नानतएवजानात् इमं जप्त्वा विमुक्तो भवेत् ॥ हुत्वा वाप्यभिषिच्य वा द्विज
वरः तस्यास्ति तद्वै फलम् ॥ छंदो दैवतसर्षिकं मनुगुणं जप्त्वा भवेत्पावनो नेतद्वै द्विपदिश्रुतिः शतगतं ना
नेति तत्सम्यक्था ॥ ६७ ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशेऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥५४॥ तरुद्रस्य माहात्म्यं भूयो वक्ष्यामि मे शृणु॥ कथितं संश्रुतं येस्तु तेषां पापं प्रणश्यति ॥१॥ साक्षा अ॰२८॰
द्यक्षप्रियं वेदमध्यगं शतरुद्रियम्॥ शतरुद्रीयमाहात्म्यं शिवप्रोक्तं सनातनम्॥२॥ निष्कृतिं सर्व
पापानां यदि कर्त्तुमिहेच्छसि॥ शतरुद्रीयमभ्यस्य सर्वपापैः प्रमुच्यते॥३॥ ब्रह्महत्यासुरापानं स्तेयं
गुर्वंगनागमः॥ तत्संसर्ग इति प्रोक्तं महापातकपंचकम्॥४॥ ज्ञानाज्ञानकृतं पापं द्विविधं परिकी
र्त्तितम्॥ ब्रह्महत्याज्ञानकृता विप्रस्य यदि जायते॥५॥ भस्मधृक् भस्मशायी च त्रिपुण्ड्रांको ऽनुताप
वान्॥ रुद्रैकादशनीं नित्यं प्रजपन्वत्सरत्रयम्॥६॥ तदन्ते दक्षिणां दद्याद्गवां शत वृषान्विताम्॥
गवामभावे निष्कं स्यात्तदर्धं पादमेव वा॥७॥ तदभावे पुनर्मासत्रितयं प्रजपेच्छुचिः॥ ब्रह्महत्या
विनिर्मुक्तो भवत्येव न संशयः॥८॥ श्रोत्रियं च द्विजं हत्वा ज्ञानपूर्वं द्विजोत्तमः॥ प्राजापत्यत्रयं पूर्वं शरीरस्य विशुद्धये॥९॥ कृत्वा श
रीरसंशुद्धिं कृत्वा चांद्रायणं ततः॥ महत्या सविधिं कृत्वा रुद्रे पौष समाहितः॥१०॥ संपूज्य स्थावरे लिंगे जंगमे वा समाहितः॥ रुद्रै ॥५५॥
कादशिनीं नित्यं नियमेन समभ्यसेत॥११॥ वर्षषट्कमधःशायी फलमूलाशनो जपन्॥ तदन्ते दक्षिणां दद्याद् गवां त्रिशतमेव वा॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवं कृते विशुद्धात्मा स याति ब्रह्म शाश्वतं ।। द्विविधं मद्यपानं स्याद् ज्ञानाज्ञानकृतं भवेत् ।।१३।। अज्ञा-
नोद्भवपापस्य मद्यपानस्य कथ्यते ।। भूतिभूषितसर्वांगो रुद्राक्षाभरणान्वितः ।।१४।। रुद्रैकादश
नीं नित्यं वत्सरं प्रजपेद् द्विजः ।। तदंते दक्षिणां दद्यात् गवामेकोनविंशतिं ।।१५।। विमुच्यतेऽज्ञानकृता
न्मद्यपानान्न संशयः ।। ज्ञानेन कृतपापस्य सुरापानस्य कथ्यते ।।१६।। गौडी माध्वी च पैष्टी च
विज्ञेया त्रिविधा सुरा ।। आसामन्यतमं पीत्वा सुरापीति च कथ्यते ।।१७।। भूतिभूषितसर्वांगो त्रि
पुंड्रांकी जितेन्द्रियः ।। प्राजापत्यं चरेत् कृच्छ्रं कृच्छ्रं सांतपनं ततः ।।१८।। रुद्रैकादशिनीं नित्यं एकं संव-
त्सरं जपेत् ।। तदंते दक्षिणां दत्वा गवामेकोनविंशतिः ।।१९।। एकं मासं दारि प्रक्ष्वेद्रुद्रैकादशिनीं जपेत्
56 सुरापानात् ज्ञानकृतान्मुच्यते नात्र संशयः ।।२०।। स्वर्णस्तेयं तु द्विविधं ज्ञानाज्ञानसमुद्भवं ।। भूतिभूषित
सर्वांगो रुद्राक्षाभरणः शुचिः ।।२१।। जिताहारेन्द्रियो मौनी रुद्रैकादशिनीं जपेत् ।। तदंते दक्षिणां दद्यात् अष्टविं
शति गाः शुभाः ।।२२।। स्तेयेनाज्ञानजन्येन मुच्यते नात्र संशयः ।। रुद्राक्षमालाभरणो भूतिभूषितदेह
वान् ।।२३।। प्राजापत्यं चरेत्कृच्छ्रं ब्रह्मचारी जितेन्द्रियः ।। षण्मासं नियताहारो रुद्रैकादशिनीं जपेत्
।।२४।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदंते दक्षिणां दद्यात् दश गावः सवत्सकाः॥ गवामभावे निष्कं स्यात्तदर्धं पादमेव वा॥ २५ ॥दरिद्र
श्चेत्पुनर्मासं रुद्रैकादशिनीं जपेत् ॥स्वर्णस्तेयात् ज्ञानकृतान्मुच्यते नात्र संशयः॥ २६ ॥ गुरुपत्नीगम
नजं ज्ञानाज्ञानकृतं द्वि धा ॥कंठदघ्न जले स्थित्वा षण्मासं नियतेन्द्रियः॥ २७॥ रुद्रैकादशिनीं नि
त्यं प्रजपेदा त्मशुद्धये ॥ तदन्ते दक्षिणा देया दश गावः सवत्सकाः ॥ २८॥ गुरुस्त्रीगमनात्पापात्कृ
तात् मु क्तो भवेत् ध्रुवं ॥ तत्संसर्गाभिधं पापं द्विविधं परिकीर्तितं ॥ २९ ॥ नित्यं त्रिषवणस्नायी मा
समेकमतन्द्रितः ॥ भस्मरुद्राक्षभूषाढ्यः त्रिपुंड्रोपरि शोभितः॥ ३०॥ रुद्रैकादशिनीं नित्यं प्रजपेत् भूतिभू
षितः ॥ मासत्रयेण संसर्गाद् द्विविधादपि मुच्यते ॥ ३१॥ आर्द्राणामप्यनार्द्राणां पापानां निष्कृतिर्वरा॥
पापानामुपपापानां सूक्ष्माणां महतामपि ॥ ३२ ॥ असत्यसेवी मलिनः धूर्तो गोघ्नः कृतघ्नकः ॥प्रागन्नादः शू
द्रगामी मूलस्नान परो मुने ॥ ३३॥ गणको गणिकाजीवी वैद्यविद्याविचक्षणः ॥ परान्नादो गणान्ना
दो वार्धुषो हलजीवकः ॥ ३४॥ भार्यात्यागी सुतत्यागी पंक्तिभेदकरो नरः ॥अग्नित्यागी गुरुत्यादी सर्व
जीवोपघातकः ॥ ३५॥ तडागारामभेत्ता च देवानां निन्दकस्तथा ॥ वैश्वदेवश्राद्धहीनः तर्पणादिविवर्जितः
॥३६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निन्दापरो ह्यसूयी च गुरुदेव द्विजन्मनां ॥ राजद्रोही जनद्रोही गरदोपि पुनः खलः ॥ ३७ ॥ रसानां चैव तैला
नां च विक्रेता गोखराश्वयोः ॥ न्यस्तापहारी कुण्डाशी पिशुनो वृषलीपतिः ॥ ३८ ॥ देवब्रह्मस्वहारी यो अनृ
जुः वाक्छलो द्विजः ॥ भस्मरुद्राक्षनिन्दाकृद्दूतकाधर्मकस्तथा ॥ ३९ ॥ ग्रामारिणः शूद्रहारी च महादा
नप्रतिगृही ॥ सर्पहा जन्तुहा भ्रूणगोस्त्रीजीवी तिथ्याभवान् ॥ ४० ॥ पुंसि गोपुरवरक्रीडो रेतपो क्रोधनोऽशुचिः
तीर्थदूषकरो मर्त्यो गृहदाहरतो नरः ॥ ४१ ॥ एते चान्ये च बहवः संकराणां च पल्लराः संकरी करणाश्च मलि
नीकरणास्तथा ॥ ४२ ॥ जातिभ्रंशकराश्चैव अपात्रीकरणास्तथा ॥ जाग्रत्स्वप्नसुषुप्तौ च जनिता
नां द्विजोत्तम ॥ ४३ ॥ बाल्ययौवनकौमारवार्धके वृद्धवान्यपि ॥ पापानि नाशमायान्ति रुद्रैकादशिनो जपात्
57 प्रारब्धे संचिते पापे मुच्येत रुद्रजापकः ॥ भस्मधृक् च त्रिपुण्ड्राङ्को मुच्येत सर्वपातकैः ॥ ४५ ॥ कोटिज
न्मकृते पापे महापापोपपातकैः ॥ रुद्रजापी विमुच्येत फलं विन्देत सर्वदा ॥ ४६ ॥ राजसूयाश्वमेधाभ्या
मग्निष्टोमापुतस्य च ॥ अवाप्य च फलं कृत्स्नं शिवेन सह मोदते ॥ ४७ ॥ स्कन्द उवाच ॥ ब्रह्म
घ्नश्च कृतघ्नश्च तस्कर वीरघ्न गोघ्न कृतघ्नो मुने ॥ ब्रह्मघ्नस्य शिवमीदृश रुद्रजपकृद् पापेभ्यो मुक्तो भवेत्
॥ ४८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्नात्वा गांगजलैर्भगध्नपद हृद् तत्कुंडध्वस्थितो भस्माक्षादिविदग्ध सर्वतनु भाक् संदग्धपापो भवेत्॥
५८ पुण्याविमुक्तसदने मदनांतकस्य भक्त्यैव रुद्रजप कृत्सकलाघमुक्तः॥ तं दृष्ट्वा रुद्रवदनं भृकुटीकराल
मुद्यच्छ शंकर दनैः कदनं न गच्छेत् ॥४८॥ ॥इति श्री शिवरहस्ये दशमांशे ईशानाख्ये पंचपाल
क निष्कृतौ रुद्रमहिमानामराक्षो नत्रिंशोध्यायः॥२८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ईशानायन
मः॥ श्रीस्कंद उवाच॥ अथकाम्यानि कर्माणि वक्ष्यामि मुनिपुंगवाः॥ स्नात्वा भुक्तं वरधूरः समाहि
तमनाः शुचिः॥१॥ भूतिभूषितसर्वांगो रुद्राक्षाभरणान्वितः॥ गायत्रीं प्रजपेन्नित्यं अष्टोत्तरसहस्रकं॥२॥
नित्याग्निहोत्रं कृत्वाथ ब्रह्मयज्ञमनंतरं॥ संतर्प्य पितृदेवर्षीन् द्विजाः त्रैवर्णिका अपि॥३॥ संपूज्यैव
धिवल्लिंगे रुद्रैकादशिनीं जपेत्॥ ऋकं मंत्रं यजुर्षोमं सामान्याथर्वणो गरां॥४॥ त्रिंशद्दिनानि ज
प्त्वा तु शीघ्रं शत्रून्विनाशयेत्॥ संपूज्य स्फाटिके लिंगे शुभ्रपुष्पैर्मनोरमैः॥५॥ नैवेद्यं पायसं दत्वा कृ
५९ त्वा न्यासादिकं शुभं॥ रुद्रैकादशिनीं जप्त्वा षण्मासं विजितेंद्रियः॥६॥ अधिपः सर्वविद्यानां मूकोपि भवति
ध्रुवं॥ जपन्नेकाग्रमनसा ध्यायेद्देवमुमापतिं॥७॥ व्याख्याता श्रुतिशास्त्राणाम श्रुतानां च जायते॥ सर्ववेदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रगृह्णाति स्वयं सोनैकदा मुने ॥ ८ ॥ नो विस्मरति सर्वन्नवियां विश्वम्भरा त्वया ॥ पीतां वरधरो नित्यं भूतिभूषितदेहवान् ॥ ९ ॥ रुद्राक्षमाला भरणः लिंगं मरकतं द्रुवं ॥ प्रतिष्ठाप्य महापीठ संकल्प्य सुसमाहितः ॥ १० ॥ प्राणायामन्न्यासंकृत्वा छंदर्षिन्यासपूर्वकं ॥ सैद्रेका दशिनीं नित्यं प्रजपन्नाभिषेचयेत् ॥ ११ ॥ पूजां बिल्वदलैः कुर्यात् शैलपुत्रसमन्विते ॥ नैवेद्यं शर्करा युक्तं त्रिमधु प्लुतपायसं ॥ १२ ॥ दद्याच्छिवाय देवाय मासषट्कं दिने दिने ॥ एवं यः कुरुते नित्यं षण्मासं विजितेन्द्रियः १३ ॥ अलक्ष्मीः कलहा घोरा दूराद्धावति वद्गृहात् ॥ धन धान्याकुलां लक्ष्मीं गजाश्वप्रमुसंयुताम् ॥ १४ ॥ अशीमोद गणो पितां महतीं श्रियमश्नुते ॥ सन्ततिर्व्यापिनी लक्ष्मीश्च च ला तस्य जायते ॥ १५ ॥ अथातः पुत्र कामानां वक्ष्ये योगाननुत्तमान् ॥ पूर्वजन्म कृतात् पापात् स्त्रियो वंध्या भवंति हि ॥ १६ ॥ वंध्यात्वं मृषिभिः प्रोक्तं अङ्गनानां चतुर्विधम् ॥ महावंध्या काकवंध्या कदली च मृतप्रसूः ॥ १७ ॥ पुरुषस्यापि वंध्यत्वं चतुर्विधमुदीरितं ॥ पूर्वजन्मनि संसारविछित्तिः पुरुषो यदि ॥ १८ ॥ यानारी वालकान् हन्ति सपत्न्येच विषप्रदा ॥ सपत्न्येगर्भविच्छित्तिं यो करोत्यंगना द्विजाः ॥ १९ ॥ चतुर्विधेः सा वंध्या स्यात्पूर्व जन्मज दुष्कृतात् ॥ यो विप्रो विधवागंता भार्या त्यागं करोति यः ॥ २० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीवर०१० दासीगन्ता भवेद्यस्तु परनारीरतः सदा ॥ विप्रबालकहन्ता च विहृत्पीडाकरः सदा ॥२१॥ अनेन पूर्वपापेन वंध्यशुक्रो ईशानसंहिता पूर्वार्ध (इशान) अ. ३०
५८ न संसयः ॥ तन्निमित्तं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥२२॥ प्रातःस्नात्वा विशुद्धात्मा शुक्लांबरधरः शुचिः ॥ भूतिभूषितस-
र्वांगो रुद्राक्षाभरणान्वितः ॥२३॥ ब्राह्मणान्वेदसंपन्नान्शुभ्रवस्त्रानलङ्कृतान् ॥ आहूय वरयित्वैकं आचार्यं द्विजपुङ्गवम् ॥२४॥
ऋत्विजो वरयेत्पश्चाद्दशसंख्यान् द्विजोत्तमान् ॥ दद्याद्वासोयुगं तेषां शुभलग्ने शुभे दिने ॥२५॥ कारयेदभिषेकं तैर्ब्रा-
ह्मणैर्वेदपारगैः ॥ येकादशदिने पश्चाद्ब्राह्मणान् भोजयेदथ ॥२६॥ अष्टविंशोत्तरचतुःशतसंख्यैरनुत्तमैः ॥ द्वाद-
शे दिवसे होमं कारयेद्द्विजपुङ्गवैः ॥२७॥ वसोर्धारां ततः कुर्यात्प्रजपं चमकं द्विजाः ॥ सवत्सा दश गा वास्य दोहनाद-
क्षिणा ततः ॥२८॥ आचार्याय प्रदद्याद्वस्त्रालङ्करणादिकं शुभं ॥ रुद्रैकादशिनीमेवं एकविंशोत्तरं शतम् ॥ २९ ॥ महारुद्र-
मिति प्रोक्तं महापातकनाशनम् ॥ एवं कृते न संदेहो वंध्यात्वं नश्यति द्विजाः ॥३०॥ महावंध्यापि लभते तस्मिन्
संवत्सरे सुतम् ॥ आयुष्मन्तं यशस्वन्तं लक्ष्मीवन्तं गुणान्वितं ॥३१॥ गोमूल्यमेकनिष्कं स्यात्तदर्धं पादमेव वा
॥ यद्येकस्मिन्दिने कुर्युरेकविंशच्छतं द्विजाः ॥३२॥ महारुद्रमिति प्रोक्तं सर्वदुष्कृतनाशनम् ॥ एकैकादशिनीं
जप्त्वा तदंते शांतिपञ्चकम् ॥३३॥ तदंते पौरुषं सूक्तं नारायणमतः परम् ॥ पञ्चब्रह्ममहामन्त्रान्वीरितं रुद्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मप्यथ ॥३४॥ त्रियंबक महामन्त्रं यो रुद्रमिति मन्त्रकं ॥ सर्वो इति विद्या स्यात् कद्रुद्राये न्यतः परम् ॥३५॥ नमो हिरण्य
मंत्रं चत्वारितं रुद्रमीरितं ॥ एतज्जपेन्साङ्गस्स्यात् रुद्रैकादशिनी जपः ॥३६॥ त्रिवारं यो महारुद्रं कारयेद्ब्राह्मणोत्त
मैः ॥ विनाशयत्य सो स्त्रीणां वंध्यत्वं च चतुर्विधं ॥३७॥ पुरुषस्यापि वंध्यत्वं विनश्यति न संशयः ॥ अचिरात्पु
त्रमाप्नोति ह्यायुष्मन्तं यशस्विनम् ॥३८॥ कारयेदति रुद्रं यो ब्राह्मणैर्वेदपारगैः ॥ तरं ते हवनं कुर्युः लक्षसं
ख्यं द्विजोत्तमाः ॥३९॥ धेनूनां शतकं दद्यादाचार्याय वृषं त्रयं ॥ वृषाभावे त्रिनिष्कं स्यान्मूल्यं कर्न्मीरितं
॥४०॥ धेन्वाभावे तथा निष्कं स्वर्णमेव मुदीरितम् ॥ ब्राह्मणान्भोजयेत्पश्चाद्दशसाहस्रमादरात् ॥४१
एवं यः कुरुते विप्र अतिरुद्रमहोदयम् ॥ सर्वपापानि नश्यन्ति कोटि जन्मार्जितान्यपि ॥४२॥ आयुः
59 श्री कीर्त्ति संयुक्तां पुत्र पौत्रान नु त्तमान् ॥ अवाप्य सकलान्भोगान्लीयते परमे शिवे ॥४३॥ अशक्तश्चे
त्स्वयं नित्यं रुद्रैकादशिनीं जपेत् ॥ वत्सरान्लभते पुत्रं आयुष्मंतं यशस्विनं ॥४४॥ घर्माभिषेकं यः
कुर्यात् शिवस्य परमेष्ठिनः ॥ सर्व पाप विनिर्मुक्तो सं प्राप्य प्रभु संपदं ॥४५॥ कैलाशे शिवसांनिध्यं वस
त्यं तेन संशयः ॥ नारिकेलोदकेनैव ह्यभिषेकं करोति यः ॥४६॥ स लब्ध्वा महतीं लक्ष्मीं आयुष्मत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 पुत्रपौत्रकान् ॥ मे[redacted]धो प्रज्ञां तदंते तु शिवसान्निध्यमश्नुते ॥ ४७ ॥ यः कुर्यान्मधुना शंभोः 
५९ अभिषेकं द्विजोत्तमाः ॥ स पुत्रपौत्रान चलां लक्ष्मीं विद्यां यशस्तथा ॥ ४८ ॥ अवाप्य शिवसांनिध्ये र
मते नात्र संशयः ॥ घृताभिषेकं यः कुर्यात् शिवस्य परमात्मनः ॥ ४९ ॥ स ब्रह्मवर्चसं प्रशांतलक्ष्मीं पुत्रा
न वा प्नुयात् ॥ इक्षूदकेनाभिषेकं यः कुर्यात्परमात्मनः ॥ ५० ॥ स पुत्रपौत्रानासाद्य विद्यां लक्ष्मीं मचचलां ॥
कैलासे शिवसांनिध्ये रमते नात्र संशयः ॥ ५१ ॥ आम्रोदकेनाभिषेकं यः करोति जितेंद्रियः ॥ स सर्व
पापकैर्मुक्तः पुत्रान् विद्यां महाश्रियं ॥ ५२ ॥ अवाप्य शिवसारूप्यं लभते नात्र संशयः ॥ शुद्धोदकेना
भिषेकं शिवस्य कुरुते यदि ॥ ५३ ॥ स सर्वा भोग्यमासाद्य शिवसायुज्यमश्नुते ॥ स प्राजरा जितं ज्ञैस्तक
हृत्सरोजे स जीववत्सुपदमानस रुद्र जापी ॥ ५४ ॥ पापं निरस्य चिरजं विरजो भवेत स प्राजतो
त्तमनगेस भवेद् गरीन्द्रः ॥ रुद्रा ति रुद्र शत रुद्र महाति रुद्र रुकादशावृति परो जपतो हि रुद्रः ॥ हे
मार्चिना सुनियतो जपतां विमुक्त्यै भूयाच्च शांभववरे सुविनिश्चयेन ॥ ५५ ॥ इति श्री शिवरहस्ये ईशा
नाख्ये दशमांशे त्रिंशो ध्यायः ॥ ३० ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानायनमः ॥ श्री स्कंद उवाच ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ नमः सहमानाय ककुभाय च नततः॥८॥
नमो निषङ्गिणे विद्या नमः अंगिणे विद्यानमो वंचत इत्यथ॥

शिव १५० होमे पिशं च मे सूक्तमादावेकाहुतिं चरेत् ॥ नमस्ते प्रथमो मंत्रो द्वितीयो यात इत्यथ ॥१॥ याते रुद्रेति
विद्यास्त्या यामिषुं गिरिशंतथा ॥ शिवेन वचसा त्वेति ह्यध्यवोचदथापरः ॥२॥ असौ यस्ताम्र इत्यस्मात्
थासौ योवसर्पति ॥ नमो स्त्विति मन्त्रोयं प्रमुञ्चेति परो मनुः ॥३॥ अवतत्येति मन्त्रोऽन्यो विज्यं धनुर
थापरः ॥ याते हेतिस्तथा विद्यान्नमस्तेत्वा तथा परः ॥४॥ परिते धन्वन इति नमो हिरण्यबाहवे ॥ न
मो वृक्षेभ्य इत्यन्यो नमः सस्पिंजराय च ॥५॥ सा नमो बभ्लुशायेति नमो हरिकेशाय इत्यथ ॥ नमोभ
वस्य हेत्यै सा नमो रुद्राप मन्त्रकः ॥६॥ नमः सूताय विद्यान्या नमो रोहिताय स्थपतये इत्यथ ॥ नमो निचेरवे वि
द्यानमः सृकायिभ्य इत्यथ ॥ नमो सिमद्भ्य इत्यन्या नम उष्णीषिणे तथा ॥ नम इषुमद्भ्य इत्यन्या नम आत
60 न्वने इत्यथ ॥१०॥ नम आयच्छद् इत्यन्या नमो स्यद्भ्यो परो मनुः ॥ नम आसीन इत्यन्या नमः स्वपद्भ्य इत्यथ ॥११॥
नमस्तिष्ठद्भ्य इत्यन्या नमः सभाभ्य इत्यथ ॥ नम अश्वेभ्य इत्यन्या नम आव्याधिनी इत्यथ ॥१२॥ नम उगणाभ्य
इत्यन्या नमो गृत्सेभ्य इत्यथ ॥ नमो व्रातेभ्यो इत्यन्या नमो गणेभ्य इत्यथ ॥१३॥ नमो विरूपे इत्यन्या नमो महद्भ्य
इत्यथ ॥ नमो रथिभ्य इत्यन्या नमो रथेभ्य इत्यथ ॥१४॥ नमः सेनाभ्य इत्यन्या नमः क्षत्तृभ्य इत्यथ ॥ नमस्तक्ष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानांश पूर्वार्धे
(दशम)
अ० ३१

शिवरह०१० भ्य इत्यन्यो नमः कुलालेभ्य इत्यथ ॥१५॥ नमः पुंजिष्ठ इत्यन्यो नम इष्वकृद्भ्यो मनुः ॥ नमो मृगयुमंत्रोन्यो
६० नमो श्वभ्यः परो मनुः ॥१६॥ नमो भवायेत्यपरो नमः शर्वाय इत्यथ ॥ नमो नीलेति मंत्रोन्यो नमः कपर्दिनेत्यथ ॥१७॥
नमस्सहस्राक्षाय च शतधन्वने चापरः ॥ नमो गिरिशाय च शिपिविष्टाय चान्यो मनुः ॥१८॥ नमो मीढुष्टमा
येति नमो ह्रस्वाय चेत्यथ ॥ नमो बृहत इत्यन्यो नमो वृद्धाय चेत्यथ ॥१९॥ नमो अग्रियाय चेत्यन्यो नम आशवे
चेत्यथापरः ॥ नमः शीघ्र्याय मंत्रोन्यो नम ऊर्म्याय चेत्यथ ॥२०॥ नमः स्रोतस्यायेति नमो ज्येष्ठाय चेत्यथ ॥
नमो पूर्वजाय चापरजाय चेत्यन्यो मनुः ॥२१॥ नमो मध्यमाय च प्रगल्भायायापरो मनुः ॥ नमो जघन्याय इति भवः
सोभ्याय चेत्यथ ॥२२॥ नमो याम्याय चेत्यन्यो नम उर्वर्य इत्यथ ॥ नमः श्लोक्याय चेत्यनो नमो वन्याय चेत्यथ ॥
नमः श्रवाय च प्रतिश्रवायेत्यपरो मनुः ॥ नमः आशुषेणाय चापरो मंत्रो दिजोत्तमाः ॥२४॥ नमः शूराय चे
त्यन्यो नमो वर्मिणा इत्यथ ॥ नमो बिल्मिन इत्यन्यो नमः श्रुताय चेत्यथ ॥२५॥ नमो दुन्दुभ्याय चाहनन्याय
चेत्यन्यो मनुः ॥ नमो धृष्णवे इत्यन्यो नमो दूताय चेत्यथ ॥२६॥ नमो निषंगिणे इषुधिमते चेत्यन्यो मनुः ॥
नमस्तीक्ष्णेषवे चायुधिने चेत्यपरो मनुः ॥ नमः स्वायुधाय च सुधन्वने चेत्यन्यो मनुः ॥ नमः श्रुत्याय च-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यन्यो नमः कात्याय चेत्यथ ॥२८॥ नमो नाद्याय चेत्यन्यो वैशंताय इत्यथापरः ॥ नमः कूप्याय चाप्यन्यो नम
आवट्याय इत्यथ ॥२९॥ नमो वर्ष्याय इत्यन्यो अवर्ष्याय इत्यथापरः ॥ नमो मेघ्याय इत्यन्यो विद्युत्याय इत्यथापरः ३०
नमईध्रीयाय इत्यन्यो आतप्याय इतरो मनुः ॥ नमो वात्याय चेत्यन्यो नमो रेष्मियेत्यथापरः ॥ नमः सोमाय मंत्रोन्यो
नमस्ताम्राय चेत्यथ ॥ नमः शंगाय मंत्रोन्यो नम उग्राय चेत्यथ ॥३२॥ नमो अग्रेवधाय इति नमो हंत्रे त्यथापरः ॥
नमो वृक्षेभ्य इत्यन्यो नमस्ताम्राय इत्यथ ॥३३॥ नमो अरण्याय इत्यन्यो नमः शंभव इत्यथ ॥ मयोभुवे त्सथान्योयं शंकरो
न्योमयस्करः ॥३४॥ नमः शिवाय मंत्रोन्यो सर्व मंत्रशिरवामणिः ॥ तथा शिवतराख्यान्यो मंत्रोयं शिवबोधकृत् ॥३५॥
नमस्तीर्थ्याय चाप्यन्यो नमः पार्याय चेत्यथ ॥ नमः प्रतरणाय इति नमश्चोत्तरणो मनुः ॥३६॥ नमआतार्य को मंत्रः
61 नमः शष्प्याय चेत्यथ ॥ नमः शिकत्याय चेत्यन्यो नम इरण्याय चेत्यथ ॥३७॥ नमः प्रपथ्याय इत्यन्यो नमः
पांसव्यो मनुः ॥ नमो जम्य इत्यन्यो भुज्यो थ हरितो मनुः ॥ नमो लोप्याय चेत्यन्यो नमो लप्येत्यथापरः ॥
नम उर्वर्य इत्यन्यो नमो पगुरवे मनुः ॥३९॥ नम आखिद्यते चेति नमो वः किरिको मनुः ॥ नमो देवा
दिहृदयं नमो वीक्षीणकं परं ॥४०॥ नमो विचिन्वत्केभ्य नम आनिर्हतेपरं ॥ नम आमीवत्केभ्य इत्यनुआनुषं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह:१० गादेभ्य इति व्यचं रसिद्धविद्यक: ॥४१॥ द्रापे अंधस इत्यन्यायांतस्य द्रशिवेत्यथ ॥ इमा रुद्राय विद्यान्यामृ ईशानोरा पूर्वार्धं (रुद्राम)
डा मोरुद्रमंत्रक:॥४२॥ मानो महांतमित्यन्यो मानस्तोकोमनुस्तत:॥ आरान्ते गोघ्न इत्यन्यो स्तुहिस्तुत्य अ० ३
६१ तथापर:॥४३॥ पीरमो रुद्र इत्यन्या मीढुष्टमतत:पर:॥ विकिरिदितिमंत्रोन्यासहस्राणि सहस्रधा ॥४४॥ ३१
सहस्राणि सहेत्यन्या अस्मिन्नित्य परोमनु:॥ नीलग्रीवा इति ह्यन्यो नीलग्रीवा इतीरित:॥४५॥ ये वृक्षेषु मं
त्रोन्यो ये भूतानामथापर:॥ ये अन्नेषु इत्यन्यो ये पथां पथि मंत्रक:॥४६॥ येतीर्थानि मंत्रोन्यो य एतावंतमि
त्यथ॥ नमो रुद्रेभ्य इत्यन्यो तं वोजंभेति चान्तिम:॥४७॥ एवं शतं ते मंत्रास्तु: शतरुद्रा: समीरिता:॥ अष्टपं
ए चाशदधिका शतमंत्रा:प्रकीर्तिता:॥४८॥ येतेमृताख्या मंत्रास्तु रमृतत्वप्रदायका:॥ स्वाहांता होमकालेस्तु: सर्व
सिद्धिप्रदायका:॥४९॥ श्रीरुद्रायेदं नम इत्युच्यते रुद्रा सर्वोत्तमे:॥ अष्ट पंचाशदधिक शतमंत्रै: फलप्रदे:॥५०॥
हुत्वापश्चाद्वसोर्धारां सम्यैनातिमाचरेत्॥ एवं मेकादशावृत्या रुद्रैकादशिनी स्मृता॥५१॥ लयोप नमकांतस्थे
मंत्रे हुत्वाज्यमादरात्॥ वसोर्धारां जपंस्तं ते कुर्व मेका हुतिं बुध:॥५२॥ रुद्रैकादशिनी होमं रुद्रावृत्या समाचरेत्॥
महारुद्रां गृहो मो पं सर्वाघौघविनाशन:॥५३॥ अति रुद्र तथा कुर्यु: शतमेका दशोत्तरम्॥ नमकेनानुवाकेनहोमे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्वाविचक्षणः ॥५४॥ चमकैकानुवाके नहोमं कुर्युस्ततो द्विजाः ॥ पुनः सम गनमकं जप्त्वांतेवह्निव
ल्लभां ॥५५॥ एकामेवाहुतिंकुर्यात्समगनमकंततः ॥ जप्त्वांतेवह्निदयितामुद्दिश्यैकाहुतिं चरेत् ॥५६॥
इतिवार त्रयंकुर्यात्पूर्णाहुतिमतः परः ॥ अतिरुद्रांगहोमोयं सर्वप्रत्यूहनाशनः ॥५७॥ एतच्छतद्विगुणं
प्रोक्तं महारुद्रजपोहवं ॥ सप्तदशगुणंकुर्वन्जपहोमद्विजार्चनं ॥५८॥ कोटिरुद्रमितिप्रोक्तंशिव
प्रीतिकरं शुभे ॥ अश्वमेधसहस्रस्य फलमाप्नोतिसाधकः ॥५९॥ पुत्रपौत्रानवाप्नोति विद्यायुःश्रीसमन्वितान् ॥
अणिमादिगुणैश्वर्यं दिव्यान्भोगाँश्चदुर्लभान् ॥६०॥ आसाद्यशिवसायुज्यमाप्नोत्यंतेनसंशयः ॥
62 यावद्विश्वंभराशैलद्वीपकाननसंयुता ॥६१॥ अतिरुद्रकृतेतावत्कालं भूमंडलेद्विजाः ॥ विद्यायुःश्रीस
मायुक्तासंततिर्वसतिध्रुवं ॥६२॥ अतिरुद्रसमोधर्मोनभूतोनभविष्यति ॥ यदिहास्तितदन्यत्रयन्ने
हास्तिनतत्क्वचित् ॥६३॥ एतच्छतरुद्रीयमाहात्म्यं पापनाशनं ॥ उदीरितं मयाविप्राः किंपुनः
श्रोतुमिच्छथ ॥६४॥ यस्मिन्पुरे ग्रामेवाद्विजकुलतिलकोभस्मरुद्राक्षधृक्स्यात् ॥ श्रीरुद्रप्रज
पादेराभिनिवसेच्चेत्क्षेत्रवर्यंमम ॥६५॥ क्रोशंतत्रमृतेपिकीटकबरीग्रामेपिनैवादराभूयाद्दक्षश्रुतौ

ईशानेश पूर्वाधि (ईशान) अ० ३१

शिवरह० १ रितोयमम गजेपुण्योविधिः केवलः॥ किंजप्येनामृतत्वंभवीतभगवती दिव्यपंकमध्येवेदपृष्ठोवरिशी

६२ गणैर्गिरींद्रपददंप्राहारुशीमेणरं॥ पुण्यं मेश्रातं जापनविधि श्चोत्बुलितां गोमदाभद्राक्षामर

रात्रिडंश्लसिते फालप्रभामंडले॥ ६७॥ इतिश्री शिवरहस्ये दशमांशे पूर्वार्धे एकत्रिंशोध्यायः ३१॥

श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीईशानायनमः॥ श्रीस्कंद उवाच॥ अथान्यंविधिमाख्यास्ये

रुद्रमंत्रस्यसत्तम॥ शृणुष्वसावधानेनचेतसा शिवभाषितं॥ १॥ ईश्वर उवाच॥ जपार्दवास्वबमुद

वकुर्याच्छ्रीरुद्रमंत्रस्यसदैवशंकरी॥ एतेनजप्योमत्रेरवोनिश्चितंशिवोभवेकेनसंदेवयोज्य:॥ २॥ काला

चम्यां सोमवारमहेशि भूतायांवै ग्रहशे पर्वकाले॥ नित्यादंभे फलमाप्यमोदतेश्रीरुद्रसंजप्ययरुबशां

भवः॥ ३॥ मृदोर्धपुंड्रं विरच्यपालेजप्यान चायंमंत्रेरवनिश्चयं॥ जप्वासचांते नरकंप्रयातिभस्मा

क्षधृक्‌याम्यतमाहिजप्त्वा॥ ४॥ साधिष्ण्येतभवेतभस्मजमहं निष्कभवेच्छांकरी॥ ज्येष्ठश्रीशतरुद्र

निष्ठसुहृदा पूतोवीरको नरः॥ ५॥ अन्यकुष्ठकजिष्ठदुष्ट जनिताश्रीरुद्रजाप्यां विक्रेप्रेतास्ते उरदृष्टतः

भतिमेवविप्राशनाः शूकराः॥ मदुदजाप्यं परिहायमर्त्या मुक्तेकथंतेप्रभवंतिमूढाः॥ रत्नंस्वहस्तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मपास्य हर्षितो गृह्णाति काञ्चेत्पु यथा तथेयं ॥ यस्तु रुद्रजपरसास्मेत प्रजपन्मुक्तिमुपास्नुते
वरेपि ॥७॥ यदि संत्यज्य सुरुद्र जाप्यो गिरिजे पूयपपातकी भवेत् ॥ नैतस्य जप्त्वाधिकमेत
देवश्री रुद्रमंत्रं चतदान्यशारिवनः ॥ स्वकं चरुद्रं प्रजपंति वोधदं पूर्वं ततो रुद्रपरो भवेत् ॥८॥ नमकं चम
कं श्चैव वर्जितं प्रजपन् वेशमतिं नमोनुवाकं ॥ यैतभिः सितभस्मधारिभिः शतरुद्रप्रपणाथ मुक्ति
भाक् स्यात् ॥९॥ विषमं प्रजपेत रुद्रमंत्रं विषेशो षप्रविशेष भस्मभूषा ॥ विषमाक्षं त्वभिविंदयधु
क्षिताघो प्रभवेद्देव स मोक्षणेधिकारी ॥१०॥ श्री पंचाक्षरमध्यभागविलसच्छ्रीरुद्रशक्त्यादरादा
रान्मुक्तिमुपेत्यशंकरपदध्यानानुधारादरः ॥ रुद्राक्षात्कलभस्मफालकलितामुद्रादि विद्रावित
पापध्वांतनिवारणार्ककिरणा भूमान्मुदे मे शिव ॥११॥ तरणि स्थितकारणां महेशचरणांयः श
रणां हृदा प्रपद्य प्रणिपत्य च रुद्रमंत्र जापिनां मरणांतो भविता विमुक्तके ॥ रुद्रैकादशिनीं जपंति च
भवेभस्मत्रिपुंड्रांकिता रुद्राक्षाभरणाः शिवैकशरणाः पूता महापातकैः ॥१२॥ तैनैवोत्तमदिव्य लिंगम
गजे संसिच्यनीरैर्वरैः सर्ववीवर दानकोटिजफलं लब्ध्वा समुक्तो भवेत् ॥ विमुक्तपापाप्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानेश पूर्वार्ध
(द्वादश)
अ.३२

शिवरह० विमुक्तोविमुक्तः माश्रयेच्छ्रीरुद्रसूक्तं प्रजपन्नघघ्नं ॥ मुक्तो हि भक्त्यैव महेश पादसक्त्यैव भस्माक्षधरोन
६३ रोपि ॥१४॥ भस्मच्छन्नो भवच्छन्नं प्रजपति यति रुद्रमन्त्रं स तारं पारं तद्भवसागरो ह्युपमिव प्राप्येत
मुक्तिं स्थिरां ॥ दिव्यं फालतले त्रिपुंड्र ~~धारी विमलमनं प्रजपेच्च रुद्रसूक्तं ॥ शिवपदकमले ली~~
~~सिद्ध~~ मगाजे विभ्रत्स रुद्राक्षमालं संन्यस्य ज्वालाम्ममृदोर्ध्वपुंड्रमखिलं विधयाविधिं प्राप्नुयात् ॥१५॥ योदि
सित भसित त्रिपुंड्र धारी विमलो मनं प्रजपेत रुद्रसूक्तं ॥ शिवपदकमले निविष्टचित्तो भवतिभ
वे पि विमुच्येत गृहस्थः ॥१६॥ वर्णी वनी शतमनुं शतरुद्रमंत्रं भस्माक्षधृग्यदि जपेद विमुक्तसिध्यै ॥
विधुरितोपि नियमाश्रमवर्णधर्मैः रुद्रस्य जाप्यपरमः सफलं लभेत ॥१७॥ रुद्रेण विद्राविति सर्वपाप
संतापनिद्रादिविवर्जिताक्षः ॥ यक्षप्रसादेन च रुद्रजापी दारिद्र्यनाशं किल शैवमंत्रैः ॥१८॥ गृहे वा गो
ष्ठे वा नदितटवटाश्वत्थतलगः क्रमात्पुण्यं वृद्धिं लभति च जपं न्रुद्रमगजे ॥ शिवक्षेत्रे पुण्ये भव
ति शिवपादाब्जभजने जपे बिल्वस्याधोऽपि जपनकृत्तपनभाः ॥१९॥ योदिसितभसित त्रिपुंड्रफालो
मनुगणमद्रिसुत सुरुद्रजापी ॥ पापोपतापरहितोपि विमुक्तसंघः प्रभवति रुद्रगणोत्तमः सधन्यः ॥२०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो भानुसोदरवरेश्वममूलसंस्थो रुद्रार्थवादविधिबोधितमंत्रसारं ।। तस्याविमुक्तसदने मरणां
तकाले प्राप्येत्सदशिमदनांतकत्वमिद्ध्वः ।।२१।। श्रीबिल्वमूलगतिभाक् शतरुद्रमंत्रजाप्येनपाप
सहितापि विमुक्तपापः ।। स एव मे पंकजपादमिक्षनिष्ठानकृद्यांभ(व)स-तंभोद्रिजे ।।२२।। प्रातश्री
शतरुद्रमंत्र जपंतो भस्मलिप्तरुद्राक्षधृक् ।। सायान्हे पितताषि संगवकृतं सापं तनेजन्महं ।। एवो
तत्र जपन् निशासु गिरिजे भस्माक्षधृक् मुक्तिभाक् ।। निर्योतो यतिनां श्रुतिशूलगतं वै द्विजवरेशमु
दारुद्रं भस्मस्थितसितवरां गो द्रुतपदं ।।२४।। त्रिपुंड्रांकः फालेधृतसितवराक्षस्त्रजधरोवरेहारः परः
भवति-चविमुक्ते(कृते)परतरः ।। नान्यार्थं प्रजपेदथ गनमथमे श्रीरुद्रमंत्रं शिवेकामाद्वाधनलोभतो गिरिसुत
जप्त्वा लभेद्यातनां ।।२५।। लालाजालनिकायदुष्कृमिपुतावक्रेणपूयाघसृक् पूतीगंधयुता
राकोहि सम्भवेत्त्दैवमानं शतं ।। पुण्याविमुक्त सदेन शतानि गमगतं रुद्रजाप्याद्विशुकः। तत्रैव यदि
लोभतो धनपरः जप्त्वा लभेद्भैरवीं ।।२६।। दुष्टांतां किलयातनां गिरिसुते तद्भैरवस्य क[illegible]त
जातो सोढ़ा नहि तत्र(त)क्षराग्रमुनेतत्केनशक्यं ध्रुवं ।। भूयादुद्रपिशाचकोनर गृहे जप्त्वादितत्सा
तत्केः ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 मुक्तो नैव भवेत्तचोऽन्यत्किरणातनयस्य सत्यनिहितो विष्णोसुतिश्चेच्छ्रुतं ॥२७॥ तस्मान्नप्रजपेति 
 साधवमं मंत्रं विमुक्तिप्रदं स्वर्गारोग्यसुखप्रदानमगजे भाज्ञानदं केवलं ॥ महालिंगासेकनीरैः शतमनुविहितैः स्नापयेद्रोगिरांवा वंध्यावानियतं सुरुद्रजपकृद्रोगैः प्रमुक्तो भवेत ॥२८॥ वंध्या चापि सुवेत पुत्रमगजे पुण्यं परं शांभवं मुक्त्यै चापि मनुं दिशंति मुनयो मत्पादनिष्ठाः सदा ॥ आपातालनभस्थलांत भुवनब्रह्मांडमाविस्फुरज्ज्योतिः स्फाटिकलिंगमौलिविलसत्पूर्णेंदुवातामृतैः ॥ अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकं जपन् ध्यायेदीप्सितसिद्धये पद्मुलपरिवेषोऽभिषंचेच्छिवं ॥२९॥ श्रीस्कंद उवाच ॥ एवमाह महादेवः कैलासे गिरिजां प्रति ॥ रुद्राध्यायविधिं कृत्स्नं किं भूयः श्रोतुमिच्छसि ॥३०॥ शंभोः पदांभोजसमर्चनेन कुंभोद्भवाद्या मुनयश्च शांभवाः ॥ अंभोजजातोऽपि च पञ्चरुद्रं जपन्ति दूंभादिविवर्जिताज्ञाः ॥३१॥ ताराघन्ते जपेद्यदि मुदा रुद्रं द्रुतो ब्रह्मसु विना नत्वा प्राञ्जलिरीशनामकलयन्मुक्तो महापातकैः ॥ भस्मोद्धूलितदेह एव द्विजपः श्रीरुद्रमंत्रं द्विजा हृत्प्रेक्षा मलटैर्वीहि भवेन्मुक्तो महापातकैः ॥३२॥ इति श्री शिवरहस्ये ईशानाख्ये दशांशे पूर्वार्द्धे शुभ्रेशो

ऽध्यायः ॥३२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीकाशीविश्वेश्वरापेरामस्तु ॥श्रीईशानायनमः ॥श्रीजैगीषव्यउवाच ॥श्रुतंतेरुद्रमाहात्म्यंदेवदेव
सनातनं॥पंचाक्षरस्यच विधिं उत्पत्तिमेवदाधुना ॥१॥ विधिर्जपप्रकारंश्चकीदृशस्यवपीहिमे ॥सु
व्रक्षण्यनमस्तेस्तुत्वत्तोवेत्ता नचापरः ॥२॥ सूतउवाच॥ इतितस्यवचः श्रुत्वामुनिंप्राहशिखिध्वजः॥
महादेवेनयत्प्रोक्तं कैलासेप्रार्थतींप्रति ॥३॥ श्रीस्कंदउवाच॥ जैगीषव्यश्रुणुष्ववमितिहासंनगोत्तमे॥
कैलासेलास्यसदनेमदनांतकरस्यच ॥४॥ नानाशिवालयोपात्तलासिमणिद्युतिविराजिते॥शातकुंभम
हाकुंभध्वजाग्रितदिक्तटे॥५॥ महाविल्वोरुविपिनेसंतानप्रवरंमुने ॥रत्नप्राकारसौधोघचंद्र
मौलीश्वरालये ॥६॥ पंचयोजनसाहस्रचंद्रस्फटिकनिर्मिते॥कक्ष्यागवाक्षशिक्षाभिर्देवताक्षस
दुर्लभे॥७॥तत्रतत्स्फाटिकोद्दामसौधेचंद्रशिरवामणिः॥ एकाकारास्वंडदंडस्फाटिकोत्तममंडपे॥८॥
सहस्रस्तंभपिततेरत्नसिंहासनस्थितः॥देव्यासहमहादेवः रहस्येसुंदरास्यकः ॥तन्मौलिचंद्रकिरण
निर्यत्स्फाटिकसंस्रवे ॥ अच्छोदेः सरमुत्कृष्टंउत्फुल्लकमलोत्पलं॥१०॥ स्फाटिकोत्तमसोपानतीरमणि
मंडपं ॥पश्चिमाभिमुखंतत्रगर्भागारंमहेशितुः॥ शतयोजनमानेनस्फाटिकोपलनिर्मितं॥प्राकारराज

69

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० वृषभं मणिकुंभ विराजितं ॥१२॥ चंद्रमौलीश्वरं लिंगं स्फाटिकं मोजनोन्नतं ॥ तन्मौलिचंद्रकांतोत्सुधाराधारांग
६५ शीतलं ॥१३॥ भुजंगबिल्वकुसुमैः अर्चितं लिंगमुत्तमं ॥ सोमार्द्धपातयुक्तायां भूतायां भूतनायकं ॥१४॥ स्ना
त्वात्र चंद्रसरसि भस्मरुद्राक्षभूषणाः ॥ गणास्तत्र समायांति अहं चापि गजाननः ॥ वीरभद्रस्तथा नंदी विघ्न
तं तु क्षारिर्मुने ॥ चन्द्रमौलीश्वरं लिंगं द्रष्टुं संपूजितं तदा ॥१६॥ तस्यां तिथावेकदाहं गजास्य गणैर्वृतः ॥
द्रष्टुं श्रीचंद्रमौलीशं चरिब्रह्माकरोऽगमं ॥१७॥ तद्धारि वारितोऽतिष्ठं नंदिकेशेन सादरं ॥ अहमेवाब्रुवं त
न्नंदिकेशं गणैर्वृतः ॥१८॥ श्रीस्कंद उवाच ॥ सोमार्द्धपातयुक्तायां भूतायां पतये हितां ॥ अस्यां
संपूजयामीशं चंद्रमौलीश्वरं शिवं ॥१९॥ तदा तद्वचनं श्रुत्वा नंदिकेशोऽभ्यभाषत ॥ प्रणम्य मां
द्वारपालः शंभोरंतर्गृहान्वितः ॥२०॥ नंदिकेश उवाच ॥ रहस्य तत्र देवेशो देव्या स्फाटिकमंडपे ॥
न चात्र गमनं शक्यं सर्वेषां तारकांतक ॥२१॥ चंद्रमौलीश्वरं लिंगं द्रष्टुं चेच्छया गणैः ॥ तं तु मा विं
तु मीशाय विज्ञाप्याथाहमाव्रजे ॥२२॥ इत्युक्त्वा नंदिकेशोऽथ गत्वा नत्वा महेश्वरं ॥ स्तुत्वा प्रांजलिरा
स्थं मदागमनमीश्वरे ॥२३॥ नंदिकेश्वर उवाच ॥ देवदेव महादेव सर्वज्ञ शशिशेखर ॥ द्रष्टुं श्रीचंद्र



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मौलीशं नंतु संप्रजितुं गणाः ॥ २४ ॥ स्तोतुं स्कंदं दृष्ट्वा द्वारि गजास्याधाश्च संस्थिता ॥ सोमाद्रीपात
युक्ता यां भूतायां गणा पक्ता ॥ २५ ॥ तव पादांबुज द्वंद्वं द्रष्टुमिच्छंति शंकर ॥ आज्ञापय महादेव द्रष्टुं
लिंगं तव प्रभो ॥ २६ ॥ इति तद्गिरमाकर्ण्य महादेवो महेश्वर ॥ उवाच तं महादेवो नंदिकेशं पुरस्थितं ॥
ईश्वर उवाच ॥ प्रवेशय तान् गणश्रेष्ठान् स्कंद देव द्वेनश्च शम्य ॥ पूजयंतु समर्पाभिः लिंगं गणाश्चा
म ॥ २७ ॥ चंद्रमौली श्वरं त्युत्सुरादर्श गणोत्तमा ॥ पश्यंतु गणाः सर्वे पूजयंतु सपर्यया ॥ २८ ॥
इत्युक्तो इत्युक्तो नंदिकेशोथ तद्वास्मान प्रवेशयत् ॥ गत्वा गणा वयं सर्वे तत्रानत्वा महेश्वरं ३० ॥ देवीं
66 चं नत्वा गत्वाथ सांतं गतं विभो ॥ गजास्य भ्याघ्य हं विप्र भस्म रुद्राक्ष भूषणाः ॥ ३१ ॥ गत्वा
श्री चंद्रमौली शं पूजयं तोव्यवस्थिता ॥ गव्यैः पंचामृताद्यैः शशिनिभसुघटैः दिव्य कार
चंद्रसौरेश्च सुगंधैर्यक्ष कर्दमैः ॥ ३२ ॥ बिल्वपत्रं चंक मंदार नवनीलोत्पलांबुजे ॥ धूपै दीपैश्च
नैवेद्यैः स्तवैश्च करतार्डनैः ॥ ३३ ॥ नीराजनैर्वीजनैश्च चामर छत्रदापनैः ॥ प्रदक्षिणानमस्का
रैः शतरुद्रीयसंस्तवैः ॥ ३४ ॥ रुद्राणी गणावेणूनां संरावैर्नृत्तदर्शनैः ॥ मृदंग मुरजा ढक्का शंखदुंदुभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानेश पूर्वा
(दशाम)
अ-33

शिवरह० एवं चतुर्षु यामेषु भूतायामर्च्य शंकरं ॥ गिरिजानंदिमुंख्याद्या वयं तत्र महेश्वरं ॥ २६ ॥ पद्मिनीर
९६ मणीत्तं स कामिनी शोभितांगकं ॥ क्षणाद्यायां मेनिरे च क्षणादां गणापुंवा ॥ २७ ॥ चंद्रमौलीश्वरे लिं
गे गणेशोः पूजां कृत्वा हरः ॥ वीक्ष्य सिंहासनवरे देव्या तिष्ठन्स हर्षितः ॥ २८ ॥ वयं स्तवामदेवेशं चंद्र
मौलीश्वरं तदा ॥ तत्स्तुतिं शृणु वक्ष्यामि समाहितमना मुने ॥ ३९ ॥ गणा ऊचुः ॥ यस्मिन्जगत्सर्वमिदं
विभाति यश्चाव्ययमन्यः सकलप्रपंचात् ॥ तिलेषु तैलोपममास्थितं त्वां श्री चन्द्रमौलीश्वरमाश्रयामः ॥ ४०
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः ॥ त्वां सर्वभूतस्थितमात्मरूपं श्री चन्द्र
मौलीश्वरमाश्रयामः ॥ ४१ ॥ यः सर्वसाक्षी तमसः परस्तात् विभाति सर्वं किल यस्य भासा ॥
त्वमागमांतैरपि दुर्निरूपं श्री चंद्रमौलीश्वरमाश्रयामः ॥ ४२ ॥ पुमान विज्ञाय शिवं कदाचिद्
दुःखस्य नांतं समुपैति धीरः ॥ त्वां सच्चिदानंदमयं प्रशान्तं श्री चंद्रमौलीश्वरमाश्रयामः ॥ ४३
अजं पुराणं पुरुषं महांतं अनश्वरं वाङ्मनसोतिदूरं ॥ ज्ञानात्मना हृद्यवभासमानं श्री-
चंद्रमौलीश्वरमाश्रयामः ॥ ४४ ॥ वदन्त्यमी यत्पदमेव वेदा ज्ञाते तु यस्मिन्सकलं विबुद्धं ॥ त्वांप्र

९२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यगात्मानमन्विंत्यशक्तिंश्रीचंद्रमौलीश्वरं॥ ४५॥ यंनिर्विकल्पेन समाधिनैवयतयस्विनःश्चेत
सिवीतरागाः॥ध्यायंतितेजोमयमद्भुतं लोश्रीचंद्रमौलीश्वरं॥ ४६॥त्रिलोचनंचंद्रकलावतं
संगंगातरंगोल्लसदुज्वलांगं॥स्मेरास्यमिद्धप्रदमष्टमूर्तिंश्रीचंद्रमौलीं॥ ४७॥ अपारमानंद
सुखवारिराशिमनादिमध्यांतमनंतरूपं॥त्रिलोचनंनीलगलंप्रशान्तंश्रीचंद्रमौं॥ ४८॥कैलास
शैलेन्द्रशिरस्सुनगेन्द्रपुत्र्यासहसंवसन्तं॥विभूतिरुद्राक्षविभूषितांगंश्रीचन्द्रमौ॥ ४९॥श्री
स्कंद उवाच॥इत्थं गणानंदवचोनुवीची माधवज्जरिभारतरोरुहर्षाः॥हरस्तदा तां गिरिराज
पुत्रींनु धन्यां सौभाग्यवतीं जगतां महेशः॥ ५०॥ तदन्तरं सा प्रणता महेशपादांबुजं स्वांजलिपद्म
67 कोशैः॥ अभ्यर्च्यपत्त्या प्रणताथनत्वा महेश्वरं सानयाद्दूबभावाण॥५१॥ इतिश्री शिवरहस्ये ईशाना
ख्ये दशमांशे पूर्वार्धे चंद्रमौलीश्वरस्तुतौ त्रयस्त्रिंशोध्यायः॥३३॥श्रीकाशीविश्वेश्वरा
र्पणमस्तु॥ श्रीदेव्युवाच॥ देवदेवमहादेवकरुणाब्धे ~~[illegible]~~लय॥ शरणं तेप्रपन्नाहं
कामाशरणं सतां॥ १॥ यथाविधान मेब्रूहि महागोप्यमपिप्रभो॥ यदि ते करुणाचित्ते मयि शंभो रुणद्धु
72 चेत्॥ २॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९० विस्तारात्सर्वमंत्रस्य प्रभावं कथयाधुना ॥ नातिसंक्षेपविस्ताराविस्तारानिस्तारयमकृपाकर ॥३॥
६७ श्रीस्कंद उवाच ॥ इत्थं गिरिजया पृष्टः तुष्टस्तां प्राह शंकरः ॥ अंभोरुहाक्षीमंबां तां अभिवीक्ष्य
हसन्हरः ॥४॥ श्रीईश्वर उवाच ॥ पंचाक्षरस्य माहात्म्यं कल्पकोटिशतैरपि ॥ न शक्यं विस्त
राद्वक्तुं तस्मात्संक्षेपतः शृणु ॥५॥ वेदे शिवागमे चायं उभयत्र षडक्षरः ॥ मंत्रः स्थितः सदामु
ख्यो लोके पंचाक्षरः स्मृतः ॥६॥ सर्वमंत्राधिकश्चायं ओंकाराद्यः षडक्षरः ॥ सर्वेषां शिवभक्ता
नां अशेषार्थप्रसाधकः ॥७॥ इदल्पाक्षरमर्थाढ्यं वेदसारं विमुक्तिदं ॥ आज्ञासिद्धमसंदिग्धं
वाक्यमेतच्छिवात्मकं ॥८॥ नानासिद्धियुतं दिव्यं लोकचित्तानुरंजनं ॥ सुनिश्चितार्थं गंभी
रं वाक्यं तत्पारमेश्वरं ॥९॥ मंत्रं सुखमुखोच्चार्यं अशेषार्थप्रसिद्धये ॥ प्राहोन्नमः शिवायेति
सर्वज्ञः सर्वदेहिनां ॥१०॥ तद्बीजं सर्वविद्यानां मंत्रमाद्यं षडक्षरं ॥ अतिसूक्ष्मं महार्थं च ज्ञेयं
तद्वटबीजवत् ॥११॥ देवो गुणत्रयातीतः सर्वज्ञः सर्वकृत्प्रभुः ॥ ओमित्येकाक्षरे मंत्रे स्थितः सर्व
गतः शिवः ॥१२॥ ईशानाद्यानि सूक्ष्माणि ब्रह्माण्येकाक्षराणि च ॥ मंत्रे नमः शिवायेति संस्थितानि
यथाक्रमं ॥१३॥

ईशानांश पूर्वा (द्वशम) अ० ३४

९३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मंत्रेष्वक्षरसूक्ष्मः पंचब्रह्मतनुः शिवः ॥ वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः ॥ वाच्यः
शिवः शिवः प्रोक्त्यात्मा मंत्रस्तद्वाचकः स्मृतः ॥ वाच्यवाचकभावोयमनादिः सुस्थितस्तयोः ॥१५॥
यथानादिप्रवृत्तोयं घोरः संसारसागरः ॥ शिवोपि हि तथानादिः संसारान्मोचकः स्थितः ॥१६॥ व्याधीनां भेष
जं यद्वत् प्रतिपक्षस्वभावतः ॥ तद्वत्संसारदोषाणां प्रतिपक्षः स्थितः शिवः ॥१७॥ असत्यस्मिन् जगन्नाथे तमो
भूतमिदं भवेत् ॥ आदित्ये न यथाहीनं निरालोकमिदं जगत् ॥ अभावादीश्वरस्यपं जगत्सृष्टिः कथं भवेत् ॥१८॥
अचेतनत्वात्प्रकृतेरज्ञत्वादीश्वरस्य च ॥ प्रधानपरमाण्वादि यावत्किंचिदचेतनं ॥ न तत्कर्तृ स्वयं
दृष्टं बुद्धिमत्कारणं विना ॥ धर्माधर्मौ पदेशश्च बंधमोक्षविचारणा ॥२०॥ न सार्वज्ञं विना पुंसां आदि
सर्गे प्रसिध्यति ॥ वैद्यं विना निरानंदाः क्लिश्यंते रोगिणो यथा ॥२१॥ शिवं विना निरानंदं क्लिश्यते हि ज
गत्तथा ॥ तस्मादनादिः सर्वज्ञः परिपूर्णः सदाशिवः ॥ अस्ति नाथः परित्राता पुंसां संसारसागरात् ॥
आदिमध्यांतनिर्मुक्तः स्वभावविमलः प्रभुः ॥२३॥ सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥ तस्याभि
धानमंत्रोयं अभिधेयः स तत्स्मृतः ॥२४॥ अभिधानाभिधेयत्वान्मंत्रात्सिद्धः परमः शिवः ॥ एतावत्त्विहि शिवज्ञा

ईशानसंहिता पूर्वा (दशम) अ० ३४

शिवरह०१० नएतावत्स्थितपरंपदं॥२५॥तदेतन्नमःशिवायेतिशिववाक्यंषडक्षरं॥विधिवाक्यमिदंशैवंनार्थवादःशिवात्मकं॥
६८ यःसर्वज्ञःसुसंपूर्णःस्वभावविमलःशिवः॥लोकानुग्रहकर्तायःसमृषार्थःकथंभवेत्॥२७॥यद्यथावस्थि
तोवस्तुगुणदोषैःस्वभावतः॥यावत्फलंचयत्पुण्यंसर्वज्ञस्तंतथावदेत्॥२८॥रागाज्ञानादिभिर्दोषैःग्रस्त
त्वादनृतंवदेत्॥तेचेश्वरेनविद्यंतेब्रूयात्सकथमन्यथा॥२९॥अज्ञाताशेषदोषेणसर्वज्ञेनशिवेनयत्॥
प्रणीतममलंवाक्यंतत्प्रमाणंनसंशयः॥३०॥तस्मादीश्वरवाक्यानिश्रद्धेयानिविपश्चिता॥यथार्थपु
ण्यपापेषुतदश्रद्धोव्रजत्यधः॥३१॥स्वर्गापवर्गसिद्ध्यर्थंभाषितंयत्सुशोभनं॥वाक्यंमुनि
वरैःशांतैःतद्विज्ञेयंसुभाषितं॥३२॥रागद्वेषात्मकंक्रोधकामतृष्णानुसारियत्॥वाक्यंनिरयहेतुत्वा
त्तद्दुर्भाषितमुच्यते॥३३॥संस्कृतेनापिकिंतेनमृदुनाललितेनवा॥अविद्यारागवाक्येनसं
सारक्लेशहेतुना॥यच्छ्रुत्वाजायतेश्रद्धारागादीनांचसंक्षयः॥विरूपमपितद्वाक्यंविज्ञे
यमतिशोभनं॥३५॥बहुत्वेनापिमंत्राणांसर्वज्ञेनशिवेनयत्॥प्रणीतममलंमंत्रंनतेनसदृशंक्व
चित्॥३६॥सप्तकोटिमहामंत्रैरुपमंत्रैरनेकधा॥मंत्रःषडक्षरोभिन्नःसूत्रवृत्त्यात्मनायथा॥३७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टिव ज्ञानानि यावन्ति विद्यास्थानानि यानि च ॥ षडक्षरस्य मन्त्रस्य तानि भाष्यं समासतः ॥ ३८ ॥ किं तस्य बहुभि
र्मन्त्रैः शास्त्रैर्वा बहुविस्तरैः ॥ यस्यों नमः शिवायेति मंत्रोयं हृदि सुस्थिरः ॥ ३९ ॥ तेनाधीतं श्रुतं तेन सर्वमनुष्ठितम् ॥
येनों नमः शिवायेति मंत्राभ्यासः स्थिरीकृतः ॥ ४० ॥ नमस्कारादिसंयुक्तं शिवायेत्यक्षरद्वयम् ॥ जिह्वाग्रे वसते
यस्य सफलं तस्य जीवितम् ॥ ४१ ॥ अंत्यजो वाऽधमो वापि मूर्खो वा पण्डितोऽपि वा ॥ पंचाक्षरजपे निष्ठो मुच्यते
पापबंधनात् ॥ ४२ ॥ इत्युक्तं परमेशेन देव्या पृष्टेन शूलिना ॥ हिताय सर्वमर्त्यानां द्विजानां विशेषतः ॥ ४३ ॥
गौरि उवाच ॥ ॥ कलौ कलुषिते काले दुर्जये दुरतिक्रमे ॥ अपुण्यतमसाच्छन्ने लोके धर्मपराङ्मुखे ॥ ४४ ॥
69 क्षीणे वर्णाश्रमाचारे संकरे समुपस्थिते ॥ सर्वाधिकारे संदिग्धे निश्चिते वा विपर्यये ॥ ४५ ॥ तदुपदेशे परिहृते गु
रुशिष्यक्रमे गते ॥ केनोपायेन मुच्यन्ते भक्तास्तव महेश्वर ॥ ४६ ॥ शिव उवाच ॥ आश्रित्य परमां विद्यां हृद्यां पं
चाक्षरीं मम ॥ भक्त्या च भावितात्मानो मुच्यन्ते कलिजा नराः ॥ ४७ ॥ मनोवाक्कायजैर्दोषैः वक्तुं स्मर्तुमगोचरैः ॥ दूषि
तानां कृतघ्नानां निर्दयानां खलात्मनाम् ॥ ४८ ॥ लुब्धानां वक्रमनसां अपि मत्प्रवणात्मनाम् ॥ मम पंचाक्षरी विद्या
संसारभयतारिणी ॥ ४९ ॥ मयैवमसकृद्देवि प्रतिज्ञातं धरातले ॥ पतितो वापि मुच्येत मद्भक्तो विद्ययाऽनया ॥ ५० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानेश पूर्व (इश्राम) अ०३४

शिवरह०१० ६९

विद्यां हृद्यामविद्यां विजहति मधिगतां गद्य पद्याक्षरां तां डिल्ल्ये येनामविद्यां हृदि कुटिलतमो रोगवैद्यां जपेद्यः ॥ मुक्तिप्राप्त्यै
वसद्यः शतगुणफलदां परां सद्यप्रसादां हृदि यं त्वद्य माद्य जन्ममरणं सद्यैव भेद्यं भवेत् ॥ ५१ ॥ ॥ इति श्रीशिवरहस्ये ईशाना
ख्ये दशमांशे चतुर्विंशोध्यायः ॥ ३४ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ गौर्युवाच ॥ पुनः पं
चाक्षरस्यास्य महिमानं महेश्वर ॥ अधिकारिविभेदेन पुरश्चर्तुः फलं वद ॥ १ ॥ ऋषि ॥ ईश्वर उवाच ॥ षडक्षरं
प्रवक्ष्यामि समासेन गिरीन्द्रजे ॥ सद्यः संसारदुःखानि विनश्यन्ति जपाद्धि वै ॥ २ ॥ ऋषिर्ब्रह्मास्य मन्त्रस्य गाय
त्रीछन्द उच्यते ॥ देवतास्य शिवः साक्षात् अहमेव महेश्वर ॥ ३ ॥ शक्तिर्महेश्वरी त्वं च भुवनेशाक्षरी भवेः ॥ बीजं मयात्मकं प्रो
क्तं रुद्रः संकल्पविग्रहः ॥ ४ ॥ सोहं तन्मय एवं स्यात् मन्त्रमध्ये स्थितः सदा ॥ अङ्गुष्ठादि कनिष्ठान्तं विन्यसेदक्षरक्र
मात् ॥ ५ ॥ मस्तके च ललाटे च हृदि नाभौ पदद्वये ॥ पुनः पञ्चाक्षरैर्न्यसेत्स्वस्य तनुं परं ॥ ६ ॥ प्रणवं प्रथमं विद्यात्
द्वितीयं तु नकारकं ॥ मकारं तत्परं देवि शिकारं तु ततः परं ॥ ७ ॥ वकारं पञ्चमं विद्यात् यकारं षष्ठमुच्यते ॥ एवं ष
डक्षरं देवि श्रीरुद्रपदमध्यगं ॥ ८ ॥ स्त्रीशूद्राणां नमोन्तोयं प्रभवेत मनुः शिवे ॥ ब्रह्मक्षत्रविशामेव जप्या
नुक्रमतो मनुः ॥ ९ ॥ ब्रह्मचारिगृहस्थानां वर्णिनां वनवासिनां ॥ सन्न्यासिनां स प्रणवमाद्यं तेषु विधीयते ॥ १० ॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नैकं फलं गृहस्थानां त्वद्बीजेनयुतो मनुः॥ धनधान्यसमृद्धिश्च पुत्रपौत्रादिसंपदः॥११॥ त्वद्बीजेनयुतो दद्यात्
गृहीणां आयिनां मनुः॥ वर्णी जपेत्सहस्रं हि गृहस्थः त्रिसहस्रकं॥१२॥ वनवासी सहस्राणां दशकं प्रजपेद्दिने॥ सन्या
सी पंचसाहस्रं प्रणवाद्यं जपेन्मनुं॥१३॥ न गायत्र्याधिकं जाप्यं मत्पूर्वं पंचाक्षरं मनुं॥ स्त्रीभिः शूद्रैश्च नियतं शतमष्टो
त्तरं जपेत्॥१४॥ यथा ब्राह्मण जाप्यं स्यात्तथा विट्क्षत्रियोरपि॥ मंत्रेणानेन मल्लिंगे केवलेनन चसेचयेत्॥१५॥ स
एव पूजको मान्यो मम देवि प्रसादभाक्॥ अनुत्धूलितदेहेन न जप्योयं मनुः शिवे॥१६॥ त्रिपुंड्रांकितभा
लेन न जप्योयं मनुः शिवे॥ अरुद्राक्षधरेणापि न जप्योयं मनुः शिवे॥ ऊर्ध्वपुंड्रधरेणायं न जप्योयं मनुः
20 शिवे॥ नान्यदेवार्चनायोग्यो मनुरेष गिरींद्रजे॥१८॥ नदीतीरे गृहे गोष्ठे वने चापि शिवालये॥ बिल्वमूले
विशेषेण पुरश्चर्यादिसिद्धिदः॥१९॥ मृगव्याघ्राजिने चैले जाप्यासीत कुशोत्तरे॥ न भूमौ च न पाषाणे
न काष्ठे जाप्यमाचरेत्॥२०॥ मंत्रः सांगः समाख्यातो जपासनविधिक्रमः॥ देशकालविशेषात्र क
थ्यते गिरिजेऽधुना॥२१॥ अष्टम्यां च चतुर्दश्यां पर्वण्यारुभयोरपि॥ ग्रहणे सोमसूर्योस्थे विषुवाय
नयोरपि॥२२॥ सोमवारे प्रदोषे च सायं प्रातः पराह्णयोः॥ नित्यादभ्यधिकं कुर्यात् जपं पंचाक्षरस्य च॥२३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ७० फलंशतगुणंतस्मप्रोक्तमीशेनयाध्वुना ॥मनोरथं तथामेद्यनमेयुक्तेविशेषतः॥२४॥अहंवाच्यो महादेवः ईशानांश पूर्व (द्दशम)

७० तस्यार्थोयंसनातनः॥ध्यानांगन्यासभेदाश्चवह्वोस्यमनोःशिवे॥२५॥निगमागमभेदेनवदंतिमुनयोद्विजे॥ अ.३५

मंत्रार्थःकथितःकृत्स्नःपुरश्चर्यांशृणुष्वमे॥२६॥आचार्यमुखतोमंत्रंजपेत्सर्वसमाहितः॥यथाश

क्तिधनंतस्मैप्रदत्वातदनुज्ञया॥२७॥स्नानंत्रिषवणंकृत्वाभस्मनाशाकभोजनः॥फलमूलाशनोवापिहवि

ष्याशीयथाबलं॥२८॥पर्वताग्रेनदीतीरेसागरांतेशिवालये॥वनेवानिर्भयेशुद्धेप्रासुखोवाशुचिः

बिल्वमूलेगृहेगोष्ठेभस्मच्छन्नासनोभवेत्॥प्राणायामत्रयंकृत्वाछंदोऋषिनोस्यदैवबित्॥३०॥शक्तिं

बीजंदेवतांचमंत्रांगेषुतथामनुं॥करन्यासंपुनःकृत्वातथांगन्यासमेवच॥३१॥पंचांगमपिविन्यस्यगुरुं

मामभिवीक्ष्यच॥लिंगवास्थंडिलेदेविसोमसूर्याग्निमंडले॥३२॥विद्युत्कोटिसेवककल्याणंज्वलंतंविश्व

रूपिणं॥शिवंध्यात्वाजपेन्मन्त्रांलक्षमात्रंपंचकंशिवे॥३३॥प्रणवाद्यंनमोंतंचद्विजेजपमाचरेत्॥

वंदेहरंवरदशूलकपालहस्तंसाभीतिमद्रिसुतयोज्वलदेहकांतिं॥वामोरुपीठगतयानिजवामह

स्तन्यस्तारुशोत्पलयुजार्पितनत्वदेहं॥३४॥शांतंपद्मासनस्थंशशिधरमुकुटंपंचवक्त्रंत्रिनेत्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नागं पाशं च घंटां प्रलयहुतवहं सांकुशं वामभागे ॥ नानालंकारदीप्तं स्फटिकमणिनिभं दक्षभागे वहंतं शूलं
वज्रं च खड्गं परशुमभयदं पार्वतीशं नमामि ॥ ३५॥ मंगलायतनं देवं युवानमतिसुंदरं ॥ ध्यायेत्कल्पतरोर्मू
ले सुखासीनं सहोमया ॥ ३६॥ एवं ध्यात्वा जपेन्मंत्रं पंचाक्षरमतंद्रितः ॥ तर्पयेल्लक्षमेकं तु जुहुयाल्लक्षमेव हि ॥
आज्येन पयसा वापि पलाशकुसुमेन वा ॥ ततः सिद्धयति मंत्रोऽस्य भुक्तिमुक्तिफलप्रदः ॥ ३८॥ तैलेनाभि
चारेषु अर्काणां समिधो हुनेत् ॥ वश्ये कौसुंभकुसुमैः विल्वपत्रैर्धनाप्तये ॥ ३९॥ ज्वररोगादिशांत्यर्थं अ
श्वत्थसमिधो हुनेत् ॥ विद्वेषणे मारणे च वैभीतककारंजकौ ॥ ४०॥ उच्चाटने च शत्रूणां अपामार्गं कुने
7/ तद ॥ प्रत्येकमष्टसाहस्रं जुहुयाज्जातवेदसि ॥ ४१॥ निवर्तते ततः सर्वं हरं दैः जुहुयादभिचारके ॥ नित्या
दभ्यधिकं जप्यं जपेन्मंत्रस्य सिद्धये ॥ ४२॥ नित्यं द्वादशसाहस्रं जपेद्रुद्रस्य समाहितः ॥ सम्यक्षणानं
समासाद्य मयि लीनो भविष्यति ॥ ४३॥ लक्षपंचाशतं जप्त्वा वृत्रारेः पदमाप्नुयात् ॥ षष्टिलक्षजपेनैव ल
भते ब्रह्मणः पदं ॥ ४४॥ अशीतिलक्षं जप्त्वा तु नरो विष्णुत्वमाप्नुयात् ॥ लक्षाणां तु शतं जप्त्वा साक्षाद्रु
द्रत्वमाप्नुयात् ॥ ४५॥ लक्षं जप्त्वा तथा पुष्यं द्विलक्षजपतः सुतान् ॥ निष्कामो लक्षदशकं जप्त्वा स्यैता वि मुक्तकं ॥ ४६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० विनियोगः समाख्यातः तज्जपे लक्षणं शृणु ॥ विधिनोक्तेन मार्गेण मंत्राभ्यासो जपः स्मृतः ॥ ४७ ॥ जपस्त्रिवि
७१ धः प्रोक्तो वाचिकोपांशुमानसः ॥ वाचिकोपांशुरुच्चैश्च द्विविधः परिकीर्तितः ॥ मानसो मननध्यानभेदद्वै अ० ३५
विध्यमास्थितः ॥ उच्चैर्जपादुपांशुश्च सहस्रगुण उच्यते ॥ ४९ ॥ मानसश्च तथा ध्यानमनंतगुणमुच्यते ॥
उमासहायं मां देवं नीलग्रीवं त्रिलोचनं ॥ ५० ॥ ध्यात्वा जपेत्तथा मंत्रं सच्चानंतफलः स्मृतः ॥ अथवा
प्राकृतं भावं स्वीयमुत्सृज्य देहकं ॥ ५१ ॥ शिवोऽहमिति संचिन्त्य साधयेदिदमुत्तमं ॥ उच्चैर्जपस्तु सर्वेषां
यथोक्तफलदो नृणां ॥ ५२ ॥ नीचैःश्रुतो न चेत्सोऽपि श्रुतश्चेन्निष्फलो भवेत् ॥ कामिच्छंदो देव
तं च ध्यायन्मंत्रं जपेत्सुधीः ॥ ५३ ॥ दीपस्तंभनरच्छाया छायामभ्रस्य संतम ॥ न जपेत विभुत्धात्मा शू
द्रम्लेच्छांत्यसंनिधौ ॥ ५४ ॥ एषोऽस्य विधिः प्रोक्तः षडक्षरजपस्य हि ॥ उत्पत्तिमस्य मंत्रस्य पुन
रन्यां निबोधमे ॥ ५५ ॥ ईश्वर उवाच ॥ सुगमं निगमांतगोचरं त्वगमागांतकरं गमान्तसारं ॥ नग
मौलिसुतेन गाधिवासप्रममेत ज्जपतां न चाघसंगः ॥ ३५ ॥ इति श्रीशिवरहस्ये ईशानाख्ये
दशमांशे पूर्वार्धे शिवगौरीसंवादे पंचत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥
शिवेनोक्तं समाख्यान देव्यै देवेन कीर्तितं ॥ शृणुध्वं मुनिभिः सार्धं गणैः सुरगणैः सह ॥ १ ॥ पुरा कल्पांतरे शम्भुः स्वबुद्ध्या यमचिंतयत् ॥
पंचाननः स्वयं जातः माया स्वीकृत विग्रहः ॥ २ ॥ तेजोराशिः स्वप्रकाशो स्वभासा भासयन्जगत् ॥ ७०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वदनानि महेशस्य प्रादुरासन् समंततः ॥३॥ प्राक् प्रत्यक् दक्षिणोदीच्य ऊर्ध्वं वर्णैः पंचभिः ॥ त्र्यक्षाणि
सोमधामाख्य ककराणि समंततः ॥ तत्पूर्वं मुखं सौम्यं शुद्धस्फटिकसमप्रभं ॥ बालेंदुमुकुटं त्र्यक्षं सुस्मितं करु
णाधिकं ॥५॥ विराट् ततः प्रादुरभूत् नकारात्मा प्रजापतिः ॥ भूर्भुवश्च ततो विप्र प्रतिष्ठा शाश्वती
ततः ॥६॥ ततश्च भगवान् लोकसर्गे पितामहः ॥ अघोरं दक्षिणं वक्त्रं प्रादुरासीन्महेशितुः ॥७॥
दंष्ट्राकरालं भ्रुकुटीनिटिलाक्षं ज्वलत्प्रभं ॥ इंद्रनीलसमाकारं त्र्यक्षं बालेन्दुभूषणं ॥ मस्वरा
दस्मात्ततो रुद्रः शूलहस्तो विनिर्गतः ॥ मकारवान् भगवान् ज्योतिर्धामयनस्तदा ॥८॥ सद्यो
जातमुखं शंभोः शरदंभोदसच्छवि ॥ दीप्तत्रिनयनं सोमधामसामि शिखं मुने ॥१०॥ संभूताद्यस्त
72 तो विष्णुः शिकाराद् उद्भूवह ॥ आपस्तस्मात् समुद्भूताः लोकसर्गे पुरा मुने ॥११॥ वामदेवमुखं शंभोः प्रादुर्भूतं तदा
वशात् ॥ पद्मरागसमप्रख्यं बालेंदुकृतशेखरं ॥१२॥ त्र्यक्षं प्रसन्नवदनं वकारस्थाद्पीश्वरः ॥ वायुः प्राण
शरीरात्मा जपतां सर्वभूवह ॥१३॥ ईशानाख्यं मुखं शंभोः पर्व शर्वरीनाथवत् ॥ त्रिलोचनं चंद्रचूडमुद
भूत् स्वादि देवतं ॥१४॥ सदाशिवो यकाराच्च प्रादुर्भूतो महेश्वरात् ॥ पंचब्रह्ममयाकारा मूर्तयो मी महे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्यितु ॥१५॥ तुरीयाच्च तथोंकारः प्रादुर्भूतोऽर्थवाचकः ॥ पंचनादात्स्य रूपात्ते शिववक्त्रादिनिर्गता ॥१६॥ जगतामुप
कारायब्रह्मविष्णुमहेश्वराः ॥ सदाशिवश्चेश्वरश्च पंचब्रह्माण इत्यपि ॥१७॥ सृष्टिस्थिती च संहार तिरोधानानुद
र्शकाः ॥ पंचाक्षरेभ्य एवेत्थं उद्भूतास्ते मुने ॥१८॥ मुखादिक्रमतो पूर्वं शंभोः शंभोजसंभवः ॥ नियुक्तः सृष्टि
करणे पालनेऽच्युतेक्षणः ॥१९॥ रुद्रः संहरणे प्रोक्तो नियुक्तः शूलपाणिना ॥ तिरोधानस्य जगतां ईश्वरं विनि
योजितः ॥२०॥ सदाशिवोऽनुग्रहणे जगतोऽस्य नियोजितः ॥ महादेवेन विप्रेन्द्र भूतादिक्रमवर्णकैः ॥२१॥ एते हि
पशवः प्रोक्ताः पतिरेषां महेश्वरः ॥ प्रणवस्यार्थ एवेह अयं वर्णक्रमेश्वरः ॥२२॥ प्रकाशकः सर्ववर्णानां शिव
एव महेश्वरः ॥ पंचाक्षरमिदं प्रोक्तं शक्तरुद्रीयमध्यगं ॥२३॥ वामदेवो ऋषिस्त्वस्य छंदः पंक्तिश्छंद प्र
कीर्तितः ॥ सदाशिवोऽस्य देवो हि ॐ बीजं शक्तिर्नमुने ॥२४॥ ब्रह्मबीजमिदं मंत्रं प्रोक्तं वै द्विजसत्तम ॥
मं कीलकं मंत्रेण न्यासमस्य यथाक्रमं ॥२५॥ अंगुलीदेहवक्त्रेषु न्यसेत् पंचाक्षरं मनुं ॥ ॐ नं तत्पुरुषाय मं
अघोरं प्रचक्षते ॥२६॥ शिं सद्योजातकायेति वां वामायेति वै मुने ॥ यं ईशानायेति नमोंतेन न्यसेत्क्रमात् ॥
अंगुलीषु हृदिन्यासं कृत्वांगेषु मुनीश्वर ॥ सर्वज्ञधाम्ने हृदयं तृप्तिधाम्ने शिरस्तथा ॥२८॥ शिखा



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनादिधाम्ने च कवचे च स्वतंत्रकं ॥ अलुप्तशक्तिधाम्ने च ॐ मनंत च शक्तिच ॥ २९ ॥ अस्त्रायफट् सेवं अं
गन्यासं चरेत् क्रमात् ॥ अस्त्रमंत्रेण दिग्बंधं कृत्वा मूलेन रोधयेत् ॥ ३० ॥ प्रज्ञानघनमानंदं कल्याणं शि
वमव्ययं ॥ ध्यायेदहमिति स्वस्थः स्वस्थान्यक्षाणि धारयेत् ॥ ३१ ॥ ध्यायेद्देवं विरूपाक्षं षडक्षरविधौ मुने ॥
ध्यानं ॥ बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः ॥ सर्वालंकारदीप्तः सरसिजनिलयो व्या
घ्रचर्मोत्तरीयः ॥ ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभांपंचवक्त्रस्त्र्यक्षः कोटीरकोटीघटित
हिमरुचिर्वर्तुलोत्तुंगमौलिः ॥ ३२ ॥ एवं ध्यात्वा बहिः पीठे समाराध्ये न्नमेद्वहिं ॥ ॥ नामज्येष्ठा च
73 रौद्री च काली कलविकारिणी ॥ ३३ ॥ बलविकरिणी चेति बलप्रमथिनी तथा ॥ दमनी सर्वभूतानां त
थाविप्र मनोन्मनी ॥ ३४ ॥ पीठानां शक्तयः सर्वा नव वै मुनिसत्तम ॥ संपूज्या वरेण पूजा पूर्वपश्चाद्
दीशके ॥ ३५ ॥ पूर्वेंच मूर्तयः पूज्याः पंच ब्रह्माण इत्यथ ॥ उमाचंडेश्वरो नंदी महाकालो गणेश्वरः
एकद्वित्रिचतुष्कोण पूजादिग्देवताः क्रमात् ॥ पूजा हवन जाप्य च लक्षणानां चतुष्टयं ॥ साज्यश
त तिलैर्होमः पायसेन च कारयेत् ॥ मंत्रसिद्धिमवाप्नोति पंचाक्षरविधौ मुने ॥ ३८ ॥ अनंत सूक्ष्मौ च शिवोत्त

शि॰रह॰ ७३

मश्च तथैव पृथविपरिरुद्ध नेत्रौ ॥ त्रिमूर्ति श्री खंड शिखंडितश्च प्राणादि पान्तिजु समर्चनीयाः ॥ ३९ ॥ अल्पर्कानल सोम लोचन विभो वन्नेत्र जाले जगत्पुष्णास्योषधि जालमुग्र मुकैरः वर्ष स्यथान्नं पचेतु ॥ तन्वस्ते जगतां च प्राणनकरा श्चाप्यायनी शंकरा त्वत्तोयं नु विभाति भासन परो देवस्त्व मात्माशिव ॥ ४० ॥ इतिश्री शिवरहस्य ईशानांशे दशमांशे षट्त्रिंशो ध्यायः ॥ ३६ ॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ श्री ईशानाय नमः ॥ श्री स्कंद उवाच ॥ कदाचित्कौतुका विप्रा गौरी पृच्छति शंकरं ॥ रहस्ये हर वामांक संस्था विप्र गिरीं द्रजा ॥ १ ॥ शिवोवाच ॥ कर्मा यो ग्यो भवेत्सद्यः पतितो यदि सर्वथा ॥ कथं योगेन यत्कर्म कृतं तं नरकाय हि ॥ २ ॥ ततः कथं विमुच्येत पतितो विद्ययानया ॥ श्री शिव उवाच ॥ तथ्यमेतत्त्वया प्रोक्तं तथापि शृणु पार्वति ॥ रहस्य मिति मत्वैतत् गोपितं पन्न यापुरा ॥ ३ ॥ अमंत्रको मां पतितः पूजयेद्यदि मोहतः ॥ नारको स्या न्न संदेहो मम पंचाक्षरं विना ॥ ४ ॥ अभक्षा वायुभक्षाश्च पंचान्य व्रत कर्षिता ॥ तेषा मेतैर्व्रतै र्नास्ति मे लोक समागमः ॥ ५ ॥ भक्त्या पंचाक्षरेणैव यस्तु मांसकृदर्चयेत् ॥ सोऽपि गच्छेत्परमं स्थानं मंत्रकस्यैव गौरवात् ॥ ६ ॥ तस्मात्तपांसियज्ञश्च व्रतानि नियमा यमाः ॥ पंचाक्षरस्य



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानसंहिता पूर्वार्धे (द्वादशम)

न स्यात्कोट्यंशेनापि नो समाः ॥७॥ बद्धो वाप्यथ मुक्तो वा पौंड्रः पंचाक्षरेण यः ॥ पूजयेन्मां विमुच्येत सर्व पापैर्न संशयः ॥ अशुद्धो वा विशुद्धो वा सकृत्पंचाक्षरेण यः ॥ पूजयन्नुपवित्ताम्मूर्तेः मुच्येत पतितोऽपि वा ॥८॥ षडक्षरेण वेदोक्तवत्तथा पंचाक्षरेण वा ॥ सब्रह्मांगेन मां भक्त्या पूजयेद्यदि मुच्यते ॥१०॥ पतितोऽपातितो वापि मंत्रेणानेन पूजयेत् ॥ मम भक्तो जितक्रोधो भस्मरुद्राक्षधृक् द्विजः ॥११॥ अन्यपुंड्रधरेणायं न जप्यो मनुराड्यं ॥ अश्रौत मूर्ध्नपुंड्रेहि मंत्रोऽयं श्रुतिमध्यगः ॥१२॥ श्रौतपुंड्रं सदा भस्मत्रिपुंड्रोन्मूलनात्मनः ॥ रुद्राक्षधारणं पुंड्रं शिवलिंगमिदं द्वयं ॥१३॥ नत्याज्यं वैदिकैर्नित्यं तस्मात्धृत्वा जपेन्मनुं ॥ गुरुवक्त्रादि मंत्रलब्ध्वा श्रीमत्पंचाक्षरं मम ॥ द्विजोत्तमाद्यं मया जपनीयो शताष्टकं ॥ उपनीतस्तथापि त्राद्यन्तः पंचाक्षरो यदि ॥१५॥ गायत्र्या सहस्रं वायं जपेन्मंत्रमतंद्रितः वर्णी विद्याभ्यासनाच्छतमष्टोत्तरं जपेत् ॥१६॥ गृहस्थः पंचसाहस्रं जपेत्ध्यायन्हि मां सदा ॥ वन्यः संन्यासधर्मस्थः संन्यासं प्रणवेन हि ॥१७॥ दशद्वादश साहस्रं जपेन्तस्थो यथाबलं ॥ स्त्रियः शूद्रसंकराश्च नमोऽन्तेन जपक्रमे ॥१८॥ चोदिताः तांत्रिकाणां नुतं लोके नैवबलर्मना ॥ वैदिकानामपं मंत्रो धर्मश्चापं मयोदितः ॥१९॥ ब्राह्मणक्षत्रियविशां एष जाप्यविधिक्रमः ॥ लब्ध्वा मंत्रं गुरोर्वक्त्रान्मैत्र्यादिगुण संयुतः ॥२०॥ भस्मत्रिपुंड्रवीतांगो मत्ध्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० ७४ ननि हतांऽशुभः ॥ ब्रह्मचर्यरतो मन्त्यामस्तापुज्य मवाप्नुयात् ॥२१॥ किमेतोवहुनोक्तेन भक्ताः सेर्वधिकारिणः ॥ म
मपंचाक्षरे मंत्रे तस्मात्तिष्ठ तेरोहि सः ॥२२॥ पंचाक्षरप्रभावेन लोकोऽयम् हर्षयः ॥ तिष्ठति शाश्वता धर्मा देवाः सर्व अ० ३७
मिदं ततं ॥२३॥ प्रलये समनुप्राप्ते नष्टे स्थावरजंगमे ॥ सर्वं प्रकृतिमापन्नं त्वत्तः प्रकृत कार्यभूत् ॥ एकोहं संस्थितो
देवि न द्वितीयोऽस्ति कुत्रचित् ॥ तदा वेदाश्च शास्त्राणि मंत्राः पंचाक्षरे स्थिताः ॥२५॥ ते नाशं नैव संप्राप्ता मच्छक्त्या ह्य
नुपालिताः ॥ ततः सृष्टिरभून्मत्तः प्रकृत्यात्मविभेदतः ॥२६॥ गुणमूर्त्यात्मनां चैव ततोवांतरसंहृतिः ॥ तदा नारा
यणो मत्तः समुत्पन्नो महेश्वरि ॥२७॥ मत्त एव समुत्पन्नो पंचवक्त्रः प्रजापतिः ॥ संसृक्षमाणो लोकांस्त्रीन्शक्तो
ह्यसहायवान् ॥२८॥ मुनीन्दश ससर्ज दौ मानसानमितौजसः ॥ तेषां सृष्टिविवृद्ध्यर्थं मां प्रोवाच पितामहः ॥२९॥
प्रणम्य संस्तुवन्भक्त्या कृतांजलिरुमे तदा ॥ ब्रह्मोवाच ॥ नमस्ते देवदेवेश त्रिपुरहारी मन्त्रिनयन ॥ प्रभो शंभो वि
श्वाधिक हर भवाग्रामितगुण ॥ विभो बंधो बंधं हर हर शशिधारिततशिरः प्रसादं मे शश्वत् कुरु कुरु भवान्मे यश
रणं ॥३०॥ मत्पुत्राणां महादेव सर्जने देहि विक्रमं ॥ इत्येवं प्रार्थितस्तेन पंचवक्त्रधरो ह्यहं ॥३१॥ —

20

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचाक्षरराशिक्रमशः प्रोक्तवान्पु थयोनमेप्र ॥ सपंचवत्तुत्स्तानि गृणन्लोकपितामह ॥ ३२ ॥ वाच्यवाच
कभावेनज्ञातवान्मांमहेश्वरं ॥ ज्ञातप्रयोगेविधिवत्सिध्यमंत्रप्रजापतिः ॥ ३३ ॥ पुत्रेभ्यःप्रददौमंत्रंमंत्रार्थ
चप्रजापतिः ॥ तेलब्ध्वामंत्ररत्नं तत्साक्षाल्लोकपितामहात् ॥ ३४ ॥ मयाज्ञातेनमार्गेणमदाराधनकां
क्षिणः ॥ मेरोस्तुशिखरेदेवीमुंजवान्नामपर्वतः ॥ मत्प्रियःसततंश्रीमान्मद्गणैरपिरक्षितः ॥ तस्याभ्याशेत
पस्तीव्रंलोकसृष्टिसमुत्सुकाः ३६ ॥ दिव्यंवर्षसहस्रंतुवायुभक्षाःसमाचरन् ॥ तेषांभक्तिमहंदृष्ट्वासद्
यःप्रत्यक्षतामियाम् ॥ ३७ ॥ मांदृष्ट्वातुष्टुवुःसर्वेप्रणम्यावतपोरताः ॥ ३८ ॥ मुनयऊचुः ॥ ओमित्येका
क्षरोसिप्रकृतिविरहिताओमितिदंचसर्वं॥ त्वत्तोभिन्नंनचैतान्नहिभवतवमहिमा वाच्यवदःसदैवा ॥
२४ ईशानस्त्वंसर्वविद्याधिनाथोउद्गीथस्त्वंवाचकंतेतदेवा ॥ मातामानंमातृकाव्यानसिद्धिःशब्दादीनांमू
लमीशस्त्वमेवा ॥ ३८ ॥ नमस्तेरुद्रस्त्वंप्रतिगतनमोतेकवचसांभवानंतोनाथोनतिकरणनानाविधतनुः ॥
नहित्वत्तोभिन्नंजगदपिचनानेवहिमृषा॥ नमःशंभोदेवःनहिशिवविवादःश्रुतिबलात् ॥ ३९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰१० महानात्मा मायाविरहितशरीरो मनुगतो महेशो मंत्रार्थः त्वमसि मतिदातामनामिग:॥ मनस्वी मध्य

७५ स्थो मरणजननाद्यंतरहितो मधुर्मे तामानाम वसि हरमन्वर्चितपद:॥४०॥ शिवःशिष्टो निष्ठो भवसि शि

पिविष्ठ: शिवतर: शिनी बाल्यः स्वल्प: शशिधर शिरवासूक्त महिमा॥ शिरवीन त्रोयं त्रेगभवसि

शितिकंठ: त्वमसि हृक्शतावर्त्तो हर्त्ता त्वमसि भवहर्त्तासि जगतां॥४१॥ वाही कृतो क्षमभगवन् हरवाम

देवबालाशनादि परिभूषित दिव्यकाम॥ वास्तव्य वास्तु परमेश्वर वामने त्र्यंकृत्तार्धकाय भगवन्

अवबारणोर॥४२॥ यतो जातं विश्वं यमपति तथांते च यहले नहिस्वरूपं यस्मान्न भवति तथान

न्यमतिकं॥ यमात्मानं सर्वं निहि खलु विजानंति तिमस: परं पारं यत्तत् भवसि यततामेव नियतं॥४३॥

ईश्वर उवाच॥ पंचाक्षरार्थस्तवमेतदेवं पठंति ये वाध्यवसं तमां शिवे॥ त एव धन्या जगतीतलस्मिंस्तेषां

हि मुक्ति: करगा भवेत॥४४॥ वेदक्षीरमहार्णवोद्यतमहारूद्रार्मिनामावली मध्यश्रीआजित

दिव्यहृद्य सुमहापंचाक्षरीविद्यया॥ राजत्स्येव सुधाकरांशुचयवत् विप्रो नरो वा सुरो वारो वाप्य

सुरोऽथवा गिरिसुते मुक्तो भवेत्तात्पदे:॥४५॥ इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे पंचाक्षरमहिमावर्णनं नाम

सप्तविंशोऽध्याय:॥२७॥ काशीविश्वेश्वरार्पणमस्तु॥ श्री॥ श्री॥ श्री॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानाय नमः।। ।। श्रीईश्वर उवाच।। ।। पञ्चाक्षरमृषिछ्छन्दबीजंशक्तिंच दैवतं।। न्यासं षडङ्गं दिग्बंधं विनियो
गमशेषतः।।१।। प्रोक्तवानहमार्याणां जगतः सृष्टिसिद्धये।। ततस्तन्मन्त्रमाहात्म्यादृषयस्तपसे स्थिताः।।२
।।सृष्टिं वितन्यते सम्यक् सदेवासुरमानुषाम्।। अस्याः परमविद्यायाः स्वरूपमधुनोच्यते।।३।। आदौ नमः
प्रयोक्तव्यं शिवायेति ततः परम्।। सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता।।४।। शब्दजातस्य स
र्वस्य बीजभूता समासतः।। प्रथमं मन्मुखोद्गीर्णा सा ममैवात्म ~~वाच्म~~ वाचिका।।५।। तप्तचामीकरप्रख्या
पीनोन्नतपयोधरा।। चतुर्भुजा त्रिनयना बालेंदुकृतशेखरा।।६।। पद्मोत्पलधरा सौम्या वरदाभयपाणि
२६ का।। सर्वलक्षणसंपन्ना सर्वाभरणभूषिता।।७।। सितपद्मासनासीना नीलकुंचितमूर्धजा।। अस्याः प
ञ्चविधा वर्णाः प्रस्फुरद्रश्मिमण्डलाः।।८।। पीतकृष्णौ तथा धूम्रः श्वेतारक्त एव च।। पृथक् प्रयोज्या एवैते
बिंदुनादविभूषिताः।।९।। अर्धचंद्राकृतिर्बिंदुर्नादो दीपशिखाकृतिः।। बीजं द्वितीयं बीजेषु मन्त्रस्यास्य वरानने।।१०
।।दीर्घं तुरीयं पूर्वस्य पंचमं शक्तिमादिशेत्।। वामदेवो नाम ऋषिः पंक्तिश्छन्द उदाहृतम्।।११।। देवता शिव एवाहं
मंत्रस्यास्य वरानने। ~~अ~~ गौतमोऽत्रिर्वरारोहे विश्वामित्रस्तथाङ्गिरा।।१२।। भरद्वाजश्च वर्णानां क्रमशो ऋषयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० स्मृताः ॥ गायत्र्यनुष्टुप्त्रिष्टुप्छंदांसि बृहती विराट् ॥२३॥ इन्द्रो रुद्रो हरिर्ब्रह्मा स्कन्दस्तेषां च देवताः ॥ मम पञ्चमुखान्यस्य ई० आ० द० पू०
७९ स्युः स्थानं तेषां वरानने ॥२४॥ पूर्वादिश्चोर्द्ध्वपर्यन्तं नकारादि यथाक्रमम् ॥ उदात्तः प्रथमो वर्णः चतुर्थश्च द्वि अ० श्०
तीयकः ॥२५॥ पंचमः स्वरितश्चैव मध्यमो निहतः स्मृतः ॥ मूलविद्या शिवस्यैव सूत्रं पञ्चाक्षरं तथा ॥२६॥
नामान्यस्य विजानीयात् सैव मे हृदयं मतम् ॥ नकारः शिव उच्यते मकारस्तु शिवो च्यते ॥२७॥ शिकारः कवचं
तद्वद्वाकारो नेत्र उच्यते ॥ यकारोऽस्त्रं नमः स्वाहा वषट् हुं वौषडित्यपि ॥२८॥ फडित्यपि च वर्णानां अंतेगत्वं य
था तथा ॥ तत्रापि मूलमन्त्रोऽयं किंचिद्भेदसमन्वयात् ॥२९॥ तत्रास्य पञ्चमो वर्णो द्वादश स्वरभूषितः ॥ तस्मा
दनेन मन्त्रेण मनोवाक्कायभेदतः ॥२०॥ आवयोरर्चनं कुर्याज्जपहोमादिकं तथा ॥ यथाप्रज्ञं यथाश्रद्धं यथाका
लं यथास्मृतिः ॥२१॥ यथाशक्ति यथासंपत् यथा ~~का से~~ योगं यथारति ॥ यदा कदापि वा भक्त्या यत्र कुत्रपि वा
कृता ॥२२॥ येन केनापि वा देवी पूजा मुक्तिं नयिष्यति ॥ मय्यासक्तेन मनसा यत्कृतं मम सुन्दरि ॥२३॥ तत्प्रियं
च शिवं चैव क्रमेणाप्यक्रमेण वा ॥ तथापि मम भक्ता ये नात्यंतविवशाः पुनः ॥२४॥ तेषामर्थेन त्रास्त्रेषु मयैव नि
यमः कृतः ॥ पञ्चाक्षरं क्षरति पापगणं च कृत्स्नं रक्षाभिलिप्तशिरसामभिरक्षितेयं ॥ रक्षा भवं त्वखिलरक्ष



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सयक्षसंघाः संधुक्षितापरिभवन्ति शिवेक्षजालैः ॥२५॥ प्रातः प्रदोषनिशि वा सुदक्ष, अक्षानुरक्तहृदयो जपति प्रमो
दात् ॥ पंचाक्षरं परमपावनमेतदेव रुद्रत्वदायि गिरिजे विरजो भवेत्सः ॥ २६ ॥ वेदान्यज्ञानव्रतं योगशिखिमुखविहितं
होमजालं च कृत्स्नं कन्यां पृथ्वीं च वाराणि द्विजगणकुलितामप्यधन्यो भवेत ॥ श्रीपंचाक्षरजापनोज्झितमतिः यस्तस्य
किं सेवनैर्जाप्यन्ते तदनुक्षरणं द्विजगणैः पञ्चाक्षरं मे परम् ॥ २७ ॥ जात्यन्त्यवृत्रि शिवे यो जपति मनुमुणैव(?)
न्यमेवेह मूढो मूढं गूढपरांगशोभि सुदृढं त्यक्त्वा मृडेड्यामपि ॥ संत्यज्यान्त्यजसंभवे प्रभवते वेदानुवादे रतो
विप्रोपि श्वपचाधमेन सदृशो विप्रासुति ष्टेच्छतं ॥ २८ ॥ षडक्षरपरायणाधवलभस्मसंभूषणाः मह
घगिरिदारणा भुवि भवन्ति न्यकेषणाः(?) ॥ विदूषणपरा नरा यमकरेरुवारणाहताः तदीयवरवाहनोरु
२७ करविषाणकोणहताः ॥ २९ ॥ पञ्चाक्षरे वृत्तिपराश्च नरा नुरा वैते भूसुरा सुरगणाश्रित एव धीराः ॥
अन्ये जपोज्झितपरा नरसभास्ते तेषां नरा भुवि भवन्त्यथ पामराश्च ॥ ३० ॥ पञ्चाक्षरैकमाला यो यत योपि धन्या
मान्यानुतप्तहृदयाश्च दयाविशिष्टाः ॥ अन्ये विनिंदनपरा गदया विभिन्नमूर्धान एव न वसन्ति यमालये
षु ॥३१॥ क्षारत्रिपुंड्रपरिमण्डितफाल रुद्राक्षकंकणलसत्कुलमालिकाक्षः ॥ पंचाक्षरं कनत यन्निलयं ममे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 तिस्यादक्षरं पदमुमेन हि ताक्षरेत ॥३२॥ पञ्चाक्षरं प्रजपतोऽक्षरलक्षसंख्यां मायं तयुप्रणवतः प्रवरेण भक्त्या 
 ॥ मुक्त्या किमेवभवभीशकराक्षश्यक्त्यास्तक्त्या मुना ममलभेतपदं हि भक्त्या ॥३३॥ पंचाक्षरं पावनमुच्चरन्तः
पतिं पशूनां हृदि भावयन्तः ॥ ध्यानाःकृतांतां तकमर्च्चयन्तः क्षेत्रेषु तिष्ठंति सदैव सन्तः ॥३४॥ पञ्चाक्षरादृ
त्रिकृतांक्षरे दधं ॥ क्षारं भुवं त्यज्यतरक्षरं व्रजेत् ॥ नयक्षरक्षप्रभवं भयं भवेत् यक्षप्रसादाल्लभते फलाक्षयं
॥३५॥ प्रणवाद्यन्तमुमेयतिर्जपेत् जियतिर्वैश्रुतिचोदितामुषान ॥ तवबीजमुमेविधारयन् जपतां जप्यमिमं फलायते
ते ॥३६॥ पुण्यानि वर्द्धयति पापततिं धुनोति मुक्त्या विमुक्तसदनेवसतिं करोति ॥ पञ्चाक्षरं मम मनुं ज
पतिस्थिरान्तःतस्यां विके परममुक्तिपदं ददाति ॥३७॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्धे अष्टत्रिं
शोऽध्यायः ॥३८॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ श्रीस्कंद उवाच ॥ तत्रादौ संप्रवक्षा
मि मंत्रसंग्रहणं शुभं ॥ यं विना निस्फलं जप्यं येन वा सफलं भवेत् ॥१॥ आज्ञाहीनं क्रियाहीनं श्रद्धाहीनं वाणन
ने ॥ आज्ञप्तं दक्षिणाहीनं सदा जप्यं च निष्फलम् ॥२॥ आज्ञासिद्धं क्रियासिद्धं श्रद्धासिद्धं ममात्मकम् ॥ ए
वं च दक्षिणासिद्धं मंत्रसिद्धं महत्फलम् ॥३॥ उपेगस्य गुरुं श्रेष्ठमार्यं नत्वार्थवेदिनम् ॥ जापिनं सृगुणोपेतं ध्या



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नयोगपरायणम् ॥४॥ तोषयेत्तं प्रयत्नेन भावशुद्धिसमन्वितम् ॥ वाचा च मनसा चैव कायेन द्रविणेन च ॥ आ ५॥
चार्यं पूजयेच्छिष्यः सर्वदाति प्रयत्नतः ॥५॥ हस्त्यश्वरथरत्नानि क्षेत्राणि च गृहाणि च ॥६॥ भूषणानि च वा
सांसि धान्यानि च धनानि च ॥ एतानि गुरवे दद्यात् भक्त्या च विभवे सति ॥७॥ वित्तशाठ्यं न कुर्वीत यदीच्छे
त्सिद्धिमात्मनः ॥ पश्चान्निवेदयेद्देवमात्मानं सपरिच्छदम् ॥८॥ एवं संपूज्य विधिवद्यथाशक्ति त्ववञ्चयन्
॥९॥ आददीत गुरोर्मन्त्रं ज्ञानं चैव क्रमेण तु ॥ एवं तुष्टो गुरुः शिष्यं पूजकं वत्सरोषितम् ॥ शुश्रूषमनसञ्ज्ञा
रं शान्तं शुचिमुपोषितम् ॥१०॥ स्नापयित्वा विशुद्ध्यर्थं पूर्णकुंभघृतेन वै ॥ जलेन मन्त्रसिद्धेन पुण्यद्रव्ययुतेन च ॥११॥
अलंकृत्य सुवेषं च गंधस्वर्णविभूषणैः ॥ पुण्याहं वाचयित्वा च ब्राह्मणानभिपूज्य च ॥१२॥ समुद्रतीरे नद्यां वा
78 गोष्ठे देवालयेपि च ॥ शुचौ देशे गृहे वापि काले सिद्धिकरे तिथौ ॥१३॥ नक्षत्रे शुभयोगे च सर्वदोषविवर्जि
ते ॥ अनुगृह्य ततो दद्यात् ज्ञानं मम यथाविधि ॥१४॥ स्वरेणोच्चारयेत्सम्यक् एकान्ते तु प्रसन्नधीः ॥ उच्चार्यो
च्चारयित्वा चावयोर्मन्त्रमुत्तमम् ॥१५॥ शुभं चास्तु शिवं चास्तु शोभनं च प्रियं त्विति ॥ एवं दद्याद्गुरुर्म
न्त्रं आज्ञा चैव समाहितः ॥१६॥ संकल्प्य च जपेन्नित्यं पुरश्चरणपूर्वकम् ॥ यावज्जीवं जपेन्नित्यं अष्टोत्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षिवरह०१० रसहस्रकम् ॥१७॥ अनस्तन्नात्परो भूत्वा स याति परमां गतिम् ॥ जपेदक्षरलक्षं वै चतुर्गुणितमादरात्, ईशा०द०पू

७८ ॥१८॥ युक्ताशी संयमी यः स पौरश्चरणिकः स्मृतः ॥ यः पुरश्चरणं कृत्वा नित्यजापी भवेत्पुनः ॥१९॥ तस्य अ०३९

नास्ति समो लोके स सिद्धः सिद्धिदो भवेत् ॥ स्नानं कृत्वा शुचौ देशे बध्वा रुचिरमासनम् ॥२०॥ त्वां च मां हृ

दि संचिन्त्य सगुणं स्वगुरुं तथा ॥ प्राङ्मुखोदङ्मुखो वापि मौनी चैकाग्रमानसः ॥२१॥ विशोध्य पञ्चत

त्वानि दहनाप्लावनादिभिः ॥ मन्त्रन्यासादिकं कृत्वा सकलीकृतविग्रहः ॥२२॥ आवयोर्विग्रहं ध्यात्वा प्रा

णापानौ नियम्य च ॥ विद्यास्थानं स्वरूपं च ऋषिच्छन्दोऽधिदैवतम् ॥२३॥ बीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चा

क्षरं जपेत् ॥ उत्तमं मानसं जप्यं उपांशुं मध्यमं विदुः ॥२४॥ अधमं वाचिकं प्राहुः आगमार्थविशारदाः ॥

उत्तमं शिवदैवत्यं मध्यमं विष्णुदैवतम् ॥२५॥ अधमं ब्रह्मदैवत्यं इत्याहुरनुपूर्वशः ॥ पदुच्चनीचस्वरितैः

शब्दैः स्पष्टपदाक्षरैः ॥२६॥ मंत्रमुच्चारयेद्वाचा वाचिकोयं जपः स्मृतः ॥ जिह्वामात्रपरिस्पंदादीषदुच्चारितो

पि वा ॥२७॥ अपरैरश्रुतः किञ्चिच्छ्रुतोपांशुस्स उच्यते ॥ धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ॥२८॥

शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥ वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते ॥२९॥ सहस्रं



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानसः प्रोक्तः सगर्भस्तच्छताधिकः ॥ प्राणायामसमायुक्तः सगर्भो जप उच्यते ॥ ३०॥ आद्यंतयोरगर्भीयः प्राणायामः
प्रशस्यते ॥ चत्वारिंशत्समा समावृत्तिं प्राणानायम्य संस्मरेत् ॥ ३१॥ मंत्रं मंत्रार्थविद् ध्यायन्नाशक्त्याशक्तमतो ज
पेत् ॥ अंगुल्या जपसंख्यानमेकमेकमुदाहृतम् ॥ ३२॥ पंचकं त्रिकमेकं वा प्राणायामं समाचरेत् ॥ अगर्भं वा सग
र्भं वा, सगर्भं तत्र शस्यते ॥ ३३॥ सगर्भादपि साहस्रः सध्यानो जप उच्यते ॥ एवं पंच विधेष्वेकः कर्तव्यः शक्तितो जपः ॥ ३४॥ रेख
याष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकं ॥ शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकम् ॥ ३५॥ स्फाटिके दशसाहस्रं मौक्ति
के लक्ष उच्यते ॥ पद्माक्षे दशलक्षं तु सौवर्णे कोटिरुच्यते ॥ ३६॥ कुशग्रन्थ्या च रुद्राक्षैः अनन्तगुणितं मतं
२० ॥ त्रिंशदक्षैः कृता माला धनदा जपकर्मणि ॥ ३७॥ सप्तविंशति संख्यातैः कृता पुष्टिप्रदा भवेत् ॥ पंचविंशति संख्याकैः
कृता मुक्तिं प्रयच्छति ॥ ३८॥ अक्षैस्तु पंचदशभिः अभिचारफलप्रदा ॥ ३९॥ अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ म
ध्यमा धनदा, शांतिं करोत्येषा ह्यनामिका ॥ कनिष्ठाऽऽकर्षणे प्रोक्ता जपकर्मणि शोभना ॥ ४०॥ अंगुष्ठेन जपेज्जाप्यं अन्ये
रंगुलिभिः सह ॥ अंगुष्ठेन विना जप्यं कृतं यदफलं यतः ॥ ४१॥ गृहे जपं समं विद्याद्गोष्ठे शतगुणं विदुः ॥ पुण्यार
ण्ये तथाऽऽरामे सहस्रगुण उच्यते ॥ ४२॥ अयुतं पर्वते तीरे नद्यां लक्षमुदाहृतं ॥ कोटिं देवालये प्राहुः पराधं बिल्वमूलके ॥ ४३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० २०
ईशा०द पृ.
७८

ईशा०द पृ
अ० ३९
अ० ३९

शिवलिङ्गाग्रतो देवि जपस्यानन्त्यमुच्यते ॥ सूर्यस्याग्रे गुरोरिन्दोः शम्भवानां च सन्निधौ ॥४४॥ विप्राणां च गवाश्वत्थ-
मूले वै शस्यते जपः ॥ तत्पूर्वाभिमुखं वश्यं दक्षिणं त्वाभिचारके ॥४५॥ पश्चिमं धनदं विद्यादुत्तरं शान्तिदं भवेत् ॥
अन्यासु च दिशास्वेवं वश्याकर्षणविद्विषि ॥४६॥ मारणोच्चाटने जप्यो मनुरेष समाहितैः ॥ उष्णीषी कञ्चुकी
नग्नः मुक्तकेशोऽथ कच्छकः ॥४७॥ अपवित्रकरोऽशुद्धः विलपन्प्रहसन्तथा ॥ क्रोधो मदः क्षुधातन्द्रानिद्रालस्यादि व-
र्जितः ॥४८॥ दर्शनं च श्वनीचानां वर्जयेज्जपकर्मणि ॥ आचामेत्संभवेत्तेषां स्मरेद्वा मां त्वयासह ॥४९॥ तप्तचक्रांकितान्व
व्रात्यान् न पश्येत्स्त्रीं रजस्वलाम् ॥ जपेन संभाषेत मौनी मां ध्यायमानवः ॥५०॥ न चान्यस्पर्शनं कार्यं जपकर्मणि शोभने ॥ एते-
षां संभवे देवि प्राणायामं समाचरेत् ॥५१॥ ज्योतींषि च प्रपश्येद्वा कुर्याद्वा स्मरणं मम वह्नि ॥ अनासनः शयानो वा गच्छन्नुत्थित एव वा ॥
५२॥ रथ्यायामशिवस्थाने न जपेत्तिमिरावृते ॥ प्रसार्य न जपेत्पादौ धुन्वन्केशान्यथाशुचि ॥५३॥ यानशय्याधिरूढो वा चिंताव्याकुलितोऽपि
वा ॥ शक्तस्य सर्वमेवैतत् अशक्तः शक्तितो जपेत् ॥ ॥५४॥ शावसूतिकयोश्चापि दशधा प्रजपेन्मनुं ॥ किमत्र बहुनोक्तेन एष जाप्यवि-
धिः शिवे ॥५५॥ ईश्वर उवाच ॥ पापानां जपतां प्रभंजनकरं शिवाख्यां (विद्यां) च पञ्चाक्षरं मे भु ॥ मत्पादप्रवणे सदाहितकरं मारश्च मु-
क्तिंकरं ॥ सर्वाघौघविदारिणं मम दयापारीणधुर्यारणं दुःखाध्वान्तनिवारिणं भवनिधेः पारस्य संतारिणम् ॥५६॥ अष्टत्रिं

२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शास्त्रकलभिः शिवमनुमनिशं न्यस्य सर्वांगसंधौ अन्तर्भावितशंभुपादकमलध्यानानुरागादरः ॥ स्वात्मानं शिवमे
वभावयति यो देहं द्विधा व्युत्थितं सानंदं बुधि सर्वहृदयः पंचाक्षराद्याश्रयः ॥ ५७ ॥ इति श्रीशिवरहस्ये दशमां
से ईशानाख्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीशिवाय नमः ॥ ॥ श्री ईश्वर उवाच ॥
सदाचारी जपन् जुह्वन् ध्यायन् भद्रं समश्नुते ॥ आचारः प्रभवो धर्मो ह्याचारः परमं धनम् ॥ आचारः परमा विद्या ह्याचारः प
रमा गतिः ॥ आचारहीनः पुरुषो लोके भवति निंदितः ॥ २ ॥ परत्र च सुखी न स्यात्तस्मादाचारवान् भवेत् ॥ यस्य यद्विहितं
कर्म वेदैः शास्त्रेषु कथ्यते ॥ तस्य तेन समाचारः सदाचारो, न चेतरः ॥ सद्भिराचरितत्वाच्च सदाचारः स उच्यते ॥ ४ ॥ सदा
८० चारस्य तस्याहुः तस्य मूलस्य कारणम् ॥ आस्तिक्यं चेत्प्रमादाद्यैः सदाचारदपि च्युतः ॥ ५ ॥ ननु व्याप्त नरो नित्यं तस्मादास्ति
कतां व्रजेत् ॥ यथेहास्ति सुखं दुःखं सुकृतैर्दुष्कृतैरपि ॥ ६ ॥ तथा परत्र चास्तीति मतिरास्तिक्यमुच्यते ॥ रहस्यमन्यद्वक्ष्या
मि गोपनीयमिदं प्रिये ॥ ७ ॥ न वाच्यं यस्य कस्यचित् नास्तिकस्याथवा पशोः ॥ सदाचारविहीनस्य पतितस्यान्त्यजस्य
च ॥ ८ ॥ पंचाक्षरात्परं नास्ति परित्राणं कलौ युगे ॥ गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः ॥ ९ ॥ अशुचेर्वा शुचे
र्वापि मंत्रोऽयं न च निष्फलः ॥ अनाचारवतां पुंसां अविशुद्धषडध्वनां ॥ १० ॥ अनादिष्टोऽपि गुरुणां मन्त्रोऽयं न च निष्फलः ॥ अं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिव र· १०
८०

त्यजस्यापि मूढस्य मूर्खस्य पतितस्य वा ॥ निर्मर्यादस्य नीचस्य मंत्रोयं न च निष्फलः ॥ सर्वावस्थागतस्यापि मयि भक्तिमतः प्रिये ॥११॥ ईशा· द पू·

सिद्ध्यत्येष न संदेहो नापरस्य तु कस्यचित् ॥ न लग्न तिथि नक्षत्र वार योगादयः प्रिये ॥१२॥ अस्यात्यन्तमपेक्षा स्यान्नैव अ·४०

सुप्तसदोत्थितः ॥ न कदाचन कस्यापि रिपुरेष महामनुः ॥१३॥ असिद्धोऽथ सुसिद्धो वा साध्यो वाथ भविष्यति ॥ सिद्धेन गुरुणापि द

त्तः सुसिद्ध इति कथ्यते ॥१४॥ असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलम् ॥ असाधितः साधितो वा सिध्यत्येष न संशयः ॥१५॥ श्र

द्धातिशय युक्तस्य मयि मंत्रे तथा गुरौ ॥ तस्मान्मंत्रान्तरं त्यक्त्वा सोपाया नाधिकारिणः ॥१६॥ आश्रयेत्परमां विद्यां हृद्यां पंचा

क्षरीं बुधः ॥ मंत्रान्तरेषु सिद्धेषु मंत्र एष न सिध्यति ॥१७॥ असिन्सिद्धे महामन्त्रे तेऽपि सिद्धा भवन्त्युत ॥ यथा देवेष्वलब्धेषु ल

ब्धेष्वपि महेश्वरि ॥१८॥ मयि लब्धे तु ते लब्धा मंत्रेष्वेष समो विधिः ॥ ये दोषाः सर्वमन्त्राणां नैतस्मिन् संभवन्त्यपि ॥ अ

स्य मंत्रस्य जात्यादिनपेक्षप्रवर्तनात् ॥१९॥ तथापि नैव क्षुद्रेषु फलेषु प्रतियोगिषु ॥२०॥ सहसा विनियुञ्जीत यस्मा

देष महाफलः ॥ स्वयं साक्षान्महादेवो महादेवेन शूलिना ॥२१॥ हिताय जगतामुक्तः पंचाक्षरविधिग्रहः ॥ यद्दं कीर्तयेद्वि

द्वान् गृणुयाद्वा समाहितः ॥२२॥ सर्वपाप विनिर्मुक्तः सयाति परमां गतिम् ॥ ॥ ईश्वर उवाच ॥ ॥ परीक्ष्यशिष्य्यांवि

धिवच्चिरेप्सितं शान्तं दान्तं भवतान्त मद्विजे ॥ दद्याच्च विद्यां सकलापभेद्यां पंचाक्षरीं भवरोगवैद्यां ॥२३॥ गुरुं परीक्ष्येत

२६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशिष्यशिष्यः भवैकशोषेयविशोध्यमानसम् ॥ शांतंचदांतंजितमानमोहमदाधविद्यादिदमीक्षरोन ॥ २४ ॥ भस्मत्रिपुंड्रप
रिमण्डितकालदेशंउग्राचैकानुग्रहनि[गृह]~~ज्वलेच्छ~~राम॥ मैत्रंत्रिनेत्रपदपङ्कजंभावपात्रंज्ञातारमत्रंचपरत्रचतंप्रपद्येत्॥
॥२५॥ सएवपशुपाशहृद्भवतिभक्तमुक्तिप्रदो भवेत्ताकिलशक्तितोविमलपातभावाद्धिवे॥ नतंगुरुजनंदुदेसकलकाय
कर्मेन्द्रियैः विशिष्यमंनसापि[वा]विधिरनुष्यशिष्यस्यहि ॥२६॥ यस्यस्यान्मयिभक्तिरीदृवरजे तस्मिन्भवेत्सागुरौ तस्यायंम
नुरेवमुक्तिं[परमा]नंददिशेत्केवलम्॥ वेदान्तरहस्यमस्यहृद्गं तस्यास्यपद्मेवसेत्॥ नित्यंयस्यमनोऽप्रभावभवनं तस्यार्थ
८| एवंस्फुरेत् ॥२७॥ नाधन्यःकिलसंश्रयेतभुवनेपंचाक्षरंकेवलंमान्यस्त्वन्यमनुंविहायजपकृत्तस्यान्यधर्मैश्चकिं ॥ किंवन्या
श्रमधर्मसंभवफलैः॥ संन्यासविन्यासतःस्वधुन्याप्लुतविग्रहाग्रहपरैः तीर्थाटनेनापिकिम्॥ २८॥ त्यक्त्वापंचाक्षरंमेक्षर
मनुविभवंभावयन्तोऽप्यभव्या आधिव्याध्यादिविद्धान्दृढतरनियमैः याम्यधामेषुसक्ताः॥ बुद्धा बोद्धास्तयेवक्षितिसुरनि
करभासुरश्चारचोराघोरादुःखादिरुद्धा क्षितिधररमणेयान्तिनोधाममीशि॥ २९॥ जात्यंधोनहिवेत्तिरानविषयं,षंडः
कुतस्त्रीसुखं, कन्यासत्पुरुषेरसमोख्यपदवीं,वंध्याप्रसूतिक्रियाम्॥ काकोहंसगतिं,खरोष्ट्रदुरवं,सौख्यंदरिद्रोयथा, श्वानः
सिंहपराक्रमंभुवितथानोजानतेमन्मनुं॥ ३०॥ केदारेतुहिमाद्रिशेखरभवाखंगेतथासागरे वाराणस्यां प्रयागेकुरुव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शैवरह १० रसदने पुष्करे नैमिषे वा ॥ ॐकारेश्वर तुंगनाथामरमहाकाले तथा त्र्यंबके श्रीरुद्रोत्तमकोटिके मम शिवे पंचाक्षरावृत्तिभाक् ॥ ॥ अ. ४०
८१. श्रीकंठे जगकानने द्युतिपुरे जप्येश्वकुंभीश्वरे श्वेतारण्यविपिने तथार्जुनवने वृद्धाचले गोनगे ॥ कांच्यां शोणाचले वा
श्रुतिवनकमले कालहस्त्यां तथा मे हालास्ये वरसिंधुकोणगगिरौ वेरामेश्वरे जाप्यतः ॥ तत्रैवं यदि चंद्रचूडचरणां
भोजार्चको भस्मधृक् ॥ रुद्राक्षामलदेहयुक्तहृदयः पंचाक्षरावृत्तिं शतं ॥ जप्त्वा देवमथ प्रदक्षिणनमस्कारैश्च मुक्तो भवेत् ॥ गंगां तुं
गां च कृष्णां कमलजतनितां नर्मदां बाहुदां तां तापीं वेणां च नीरां भविभव वहिनीं गोदकासहजातां ॥ ३३ ॥ पंपां कंपां च ताम्रां शिवगिरि
तनयामात्र काशीं गराणां तीर्थे स्नानं तथा संतत गत शिव हृद्व्य पंचाक्षरस्य ॥ भवेत भसितांगको विमलपुण्यरुद्राक्ष
धृक् शतश्रुतिशिरोगतं परमरूपमव्यस्थितं ॥ ३४ ॥ षडक्षर जपादरो भवति भाग्यपूर्णो जनः ॥ शतं त्रिशतमंबिके जपति पापतूल
नलं ॥ द्विजोंत्यजवरोपि वा परमसंकर स्तत्करोऽभयस्करपदार्चको यदि भवेत्स धन्यो जनः ॥ ३५ ॥ जपंन्नक्षं भक्तं फल कुलम
थान्यन् द्विजवरोऽभजेच्च कोटिस्कोपि न्यस्मुक्तोपि भवति ॥ मम क्षेत्रे च्वीशेऽवसति शरदं वै कमधुनाम नुं धन्यो मान्यो भवति कलि
॥ इति श्री शिवरहस्ये ईशानांशे दशमांशे चत्वारिंशोऽध्यायः ४० ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥
सामान्य जनुभाक् ॥ ३६ ॥ श्री ईश्वराय नमः ॥ मुनिरुवाच ॥ नमस्तेतारकाराते श्रुतः पंचाक्षरोद्भवः ॥ धन्योस्मि कृतकृत्योस्मि
शिवविद्याश्रवादहं ॥ केषु स्थानेषु भगवान् पूजनीयो महेश्वरः ॥ तत्र संपूजितो देवः कथं तुष्यति मे वद ॥ २ ॥ सविधानं रहस्यं



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेयदि स्यान्मयितेदया ॥ सूतउवाच ॥ तदा मुनेर्वचः श्रुत्वाध्यात्वानत्वामहेश्वरं ॥ जैगीषव्यायमुनयेप्राहलिङ्गार्चनक्रमं ॥ ३ ॥ संध्यानं
मंत्रं [illegible]यं आदि फलप्रदं [illegible] नेतः फलं ॥ कालाधिकारभेदं च द्विजाः शंकर संभवः ॥ ४ ॥ श्री स्कंद उवाच ॥ अथतें संप्रवक्ष्यामिशि
वलिंगंसमासतः ॥ यस्यविज्ञानमात्रेणविमुक्तोमानवोभवेत् ॥ ५ ॥ शिवरूपस्वयंलिंगं लिंगं गमनशब्दितं ॥ लयंजा
त्सर्व जगतांलिंगमित्युच्यतेमुने ॥ ६ ॥ शिवश्चेतनरूपोहि जडंजगदितिस्थितं ॥ तेन चैतन्यरूपेण जडमेतद्विभासते ॥ ७ ॥
शिवोनैवजडः साक्षात्स्वप्रकाशैकलक्षणः ॥ अतः साक्षीशिवःसर्वधाम्नि समवस्थितः ॥ ८ ॥ स्वयंज्योतिर्महादेवः अ
लिंगोलिंगसंगतः ॥ तस्यभासा जगद्भाति, जगज्जडमिदं मुने ॥ ९ ॥ अलिंगस्यापि देवस्य लिंगं श्रुतिशिरोगतम् ॥ योगी-
ध्येयमिदंलिंगंशम्भोर्निगमचोदितं ॥ १० ॥ आगमोक्तानिलिंगानि भौतिकानिमुनीश्वर ॥ अयोगीभौक्तिकेलिंगेयो
गी सर्वत्र भावयेत् ॥ ११ ॥ सर्वावभासको देवोयश्चाहृदि विराजते ॥ तथा सर्वगतः शम्भुः देशादिकालवर्जितः ॥ लिंगे
संपूजितो विप्रैः भुक्तिं मुक्तिं प्रयच्छति ॥ अलिंगोपि महादेवः शिवलिंगे समर्चितः ॥ १२ ॥ भस्मत्रिपुंड्ररुद्राक्षधारकेणार्चि
तं यदि ॥ लिंगं शम्भोर्मुक्तिदायि बिल्वपत्राक्षतार्चितं ॥ भौतिकेष्वपि लिंगेषु पूजनीयोमहेश्वरः ॥ देव्या कैलासशि
खरे पृष्टः तुष्टो महेश्वरः ॥ १४ ॥ शिवलिंगार्चनस्यास्यप्रभावंकथयन्मुने ॥ देव्युवाच ॥ देवदेवमहादेवकेषुस्थानेषु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १०
८२

ईशानोश पूर्वा (इत्याम) अ० ४१

पूजितः ॥ ददासि भुक्तिं मुक्तिं च शिवज्ञानं च शंकरं ॥१६॥ किं तल्लिंगं कथं लिंगी तदर्चनविधिं शिव ॥ नैवेद्य मुक्तिं
शक्तिं च वद मे करुणाकर ॥ ईश्वर उवाच ॥ लिंगोत्पत्तिं प्रवक्ष्यामि शृणुष्व कमलानने ॥ यच्छ्रुत्वा मनुजः सद्यो
ह्यज्ञानं जहाति च ॥१७॥ पूर्वमेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ विवादः सुमहानासीत् ब्रह्मविष्ण्वोः प-
रस्परं ॥१८॥ अहं कर्त्ता अहं कर्त्ता न मत्तोऽन्यो जगत्प्रभुः ॥ एवमाह हरिं ब्रह्मा ब्रह्माणं च हरिस्तथा ॥१९॥ त
योर्दर्पापहाराय प्रबोधार्थं च देवयोः ॥ कंदर्पदर्पहा देवः सर्वाशुभकल्पकः ॥२०॥ मध्ये प्रादुर्बभौ सांबो ज्योतिर्लिंगाकृ
तिः शिवः ॥ तयोः समभवल्लिंगं मे ऐश्वरं तेज संपरं ॥२१॥ ज्वालामालावृतं दिव्यं अप्रमेयमनूपमं ॥ योजनायुतवि
स्तीर्णं ज्वालामालाविराजितं ॥२२॥ ज्वालाभिर्मोहितौ तस्य लिंगस्य सुरसत्तमौ ॥ तदा विस्मयमापन्नौ पश्य
तावमूरौ तदा ॥२३॥ गत्वा ऊर्ध्वमधस्तस्य संप्रधार्य परस्परं ॥ अधो दृष्टुमगाद्विष्णुः ऊर्ध्वमस्य पितामहः ॥२४॥
अदृष्ट्वांतमधः श्रोर्ध्वं तौ समेत्य परस्परं ॥ कृतांजलिपुटौ भूत्वा स्तोत्रमेतदगायतां ॥२५॥ ब्रह्मविष्णू ऊचतुः ॥
अनादिदेव देवेश विश्वेश्वर महेश्वर ॥ सर्वज्ञ ज्ञान विज्ञान प्रज्ञाज्ञाननिवर्तक ॥२६॥ अनेककांतिसंपन्न अनन्ता
सनसंस्थित ॥ अनन्तशक्तिसंभोग परमेश नमोऽस्तु ते ॥२७॥ परात्पर परातीत मायातीत विवर्जित ॥ स्वभा

२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वनिर्मला मेयनिर्गुणाकाश मध्यगा ॥ २८ ॥ योगसांख्यै दुराधर्ष निगमांतैकगोचर ॥ निरंजन निराधार स्वाधार निरूपप्लव ॥ २९ ॥ स्वभावभासका मेय भात्यभासक वर्जित ॥ सर्वेन्द्रियादि रहित भावाभाव विवर्जित ॥ ३० ॥ नमस्ते प्रीनलिंगाय अलिंगाय नमोस्तु ते ॥ नमस्ते गुह्यलिंगाय परलिंगाय लिंगिने ॥ ३१ ॥ नमस्ते ज्योतिलिंगाय अलिंगाय नमोस्तु ते ॥ नमः पर्वतलिंगाय बुद्धिलिंगाय ते नमः ॥ ३२ ॥
नमस्ते सूक्ष्मलिंगाय भवलिंगाय ते नमः ॥ जगत्कारणलिंगाय जगतां पतये नमः ॥ ३३ ॥ नमो हिरण्यलिंगाय
दिव्यलिंगा
८७ यते नमः ॥ नमस्ते रुद्र मन्यव उतोत इषवे नमः ॥ ३४ ॥ नमस्ते अस्तु धन्वने कराभ्यां ते नमो नमः ॥ याते रुद्र शिवाघोरा तनु ग्यां ते नमो नमः ॥ ३५ ॥ नमोस्तु नीलग्रीवाय सहस्राक्षाय ते नमः ॥ सहस्रपाणये तुभ्यं नमो मीढुष्टमायते ॥ ३६ ॥ कपर्दिने नमस्तुभ्यं कालातीताय ते नमः ॥ नमस्ते चात्तशूलाय विज्याय धनुषे नमः ॥ ३७ ॥ हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ॥ सेनान्ये ते नमो दिशां च पतये नमः ॥ नमस्ते हरिकेशाय नमस्ते उपवीतिने ॥ नमो भवस्य हेत्यै ते जगतां पतये नमः ॥ ३९ ॥ पुष्टानां पतये शंभो क्षेत्राणां पतये नमः ॥ पशूनां पतये शंभो पत्तीनां पत्तीनां पतये नमः आततायिन्नमस्तुभ्यं वनानां पतये नमः ॥ नमस्ते रोहिताया वृक्षाणां पतये नमः ॥ ४१ ॥ नमस्ते मंत्रिणे देवकक्षाणां पतये नमः ॥ औषधीनां च पतये नमस्ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानांश पूर्वार्ध
(रुद्राय)
अ. ४१

शिवर० सुभुवंतये ॥४२॥ उच्चैर्घोषाय च नमो पत्तीनां पतये नमः ॥ सत्वनां पतये तुभ्यं धन्वनां पतये नमः ४३॥ सहमानाय शं
८३ ताय शंभवे ते मयोभवे ॥ आधीनां पतये तुभ्यं व्याधीनां पतये नमः ॥ भिषजे भवरोगाणां प्रथमाय प्रमाथिने ॥ ककुभाय
नमस्तुभ्यं नमस्ते स्तुनिषंगिणे ॥४५॥ स्तेनानां पतये तुभ्यं वनानां पतये नमः ॥ तस्कराणां च पतये नमस्तुभ्यं पिना
किने ॥४६॥ वंचते भक्तिहीनानां नमस्ते परिवंचते ॥ स्तायूनां पतये तुभ्यं नमस्ते स्तुनिषंगिणे ॥४७॥ अरण्यानां च
पतये नमउष्णीषिणे विभो ॥ धावते भ्रमते देव आसीनाय स्थिताय स्थितायते ॥४८॥ शयानाय सुषुप्ताय जाग्रते
ते नमो नमः ॥ नमः सोमाय शांताय भीष्माया थभवाय च ॥ ताम्राय अरुणायाय शिवाय च नमो नमः ॥ उग्राय शं
कराय च शंभवे ते नमो नमः ॥५०॥ शर्वाय सर्वरूपाय नमः सर्वगताय च ॥ आत्मनः पतये चैव जगतां पतये नमः ॥
जिह्वाचापलभावेन मयेदं गदितं हि यत् ॥ तत्क्षंतव्यमनौपम्य करुणार्णव ॥५२॥ श्रीस्कंद उवाच ॥
एवं स्तुत्वा तदा लिंगं नेमतुः शिरसा सुरैः ॥ ब्रह्मविष्णू भियाभक्त्या स्थितौ तौ प्रांजली मुने ॥५३॥ लिंगोत्पत्तिस्त
वं पुण्यं यः शृणोति नरः सदा ॥ नोत्पद्यते हि संसारे स्थानमाप्नोति शांकरं ॥५४॥ तस्मात्सर्वप्रयत्नेन शृणुयाद्वाचयेत्त
था ॥ पापकंचुकमुत्सृज्य शिवलोके महीयते ॥५५॥ अलिंगलिंगी भगवान्महेशो लिंगोत्तमांगे किल संनिविष्टः ॥ शांतप्रशांतः

२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुषः पुराणो अणोरणीयान्महतो महीयान् ॥५६॥ इति श्री शिवरहस्ये ईशाख्ये दशमांशे लिंगोद्भवो नाम एकचत्वारिं
शोध्यायः ॥४१॥ श्रीकण्ठविश्वेश्वरार्पणमस्तु ॥ ईशानायनमः ॥ श्रीस्कंद उवाच ॥ एवं स्तुत्वा महादेवं प्रणम्य शिर
सा विभुं ॥ ब्रह्मविष्णु तदा विप्र भक्त्या परमया युतौ ॥१॥ लिंगमध्ये परं लिंगं स्थितं प्रादेश संमितं ॥ समाधिस्तौ
न संपन्नौ ह्यपश्यतां शिवात्मकं ॥२॥ नैव तत्कांचनं रूप्यं न रत्न स्फाटिकोद्भवं ॥ ज्योतिर्मात्रं स्थितं शांतं केवलं त
च्चिदात्मकं ॥३॥ तयो स्तुष्टो महादेवः प्रादाद्वरमनुत्तमं ॥ श्रीईश्वर उवाच ॥ एतस्य मम लिंगस्य भवतं वां सुरो
४१ त्तमौ ॥ योनिः पीठं कंज भवकं जाक्षौ लोक शांतये ॥४॥ लिंगस्योपरतौ धत्तां भवतं वां सुरोत्तमौ ॥ भवेत मुक्ति
स्तान्नाज्यं लिंगे बिल्वार्चनात्सुरौ ॥५॥ इत्युक्त्वा स महादेवः तस्मिंल्लिंगे तिरोदधे ॥ तदा प्रभृति ब्रह्माद्या
विष्णुश्चापि सुरोत्तमः ॥६॥ लिंगवेदी लिंगपीठं मुने ह्यभवतं तदा ॥ तल्लिंग सदृशं लिंगं प्रतिष्ठाप्य सुरासुराः ॥
गणा महर्षयः सिद्धाः पूजयंति विमुक्तये ॥ रत्न स्फाटिक धातुभ्यो मृत्सैकतसमुद्भवं ॥८॥ कृत्वा लिंगाकृतिं सर्वे
शांभवाः सुरसत्तमाः ॥ भस्म रुद्राक्ष संपन्नाः रुद्रपंचाक्षरादराः ॥९॥ पंचामृतैर्बिल्वपत्रैः धूपदीपनिवेदनैः ॥ प्रद
क्षिणनमस्कार स्तोत्रनर्तनकैस्तथा ॥१०॥ प्रातर्मध्याह्न सायाह्ने प्रदोषे पूजयन्सुराः ॥ तेषां लिंगार्चनाद्देव पदप्रा

शिवरह० १०
६४

स्तिरभून्मुने॥११॥ परं सूक्ष्मं निर्गुणं तत् लिंगमेतत्तदेश्वरं॥ यदाद्यमैश्वरं तेजः तल्लिंगमितिकीर्त्यते॥१२॥ कल्पांते संस्थिता
लोकाः लिंगे तस्मिन् चराचराः॥ दक्षिणे लीयते ब्रह्मा, वामतस्तु जनार्दनः॥ हृदये चैव गायत्री छंदांस्यन्यानि पार्वति॥
मूर्ध्नि लीयंति वै वेदाः सषडंगपदक्रमाः॥१४॥ जठरे लीयते सर्वं जगत्स्थावरजंगमं॥ उत्पद्यते पुनस्तस्मात् ब्रह्मादि
सचराचरं॥१५॥ आकाशं लिंगमित्याहुः पृथिवी तस्य पीठिका॥ आलयः सर्वभूतानां लयनाल्लिंगमुच्यते॥
तस्माल्लिंगं प्रतिष्ठाप्य सर्वदेवो ध्रुवो ध्रुवं॥ स्थापितं तेन सर्वं स्यात् जगत्सर्वं चराचरं॥१७॥ तत्पूजया पूजितं वै जग
त्सर्वं न संशयः॥ पूजयंति सदा देवा ब्रह्मविष्णुमहेश्वराः॥१८॥ एवं लिंगं समभ्यर्च्य सृष्टिस्थित्यंतकारिणः॥ ब्रह्मा शैल
मयं लिंगं भक्त्या पूजयते सदा॥१९॥ गंधपुष्पादिभिर्नित्यं त्रिकालं बिल्वपल्लवैः॥ तस्य संपूजनात्प्राप्तं तेन ब्र
ह्मत्वमुत्तमं॥२०॥ ससर्ज जगदेवं हि ससुरासुरमानुषं॥ इंद्रनीलमयं लिंगं विष्णुः पूजयते सदा,॥२१॥ विष्णुत्वं
तेन संप्राप्तं पालकोजगतोऽभवत्॥ हीरसारमयं लिंगं रुद्रः पूजयते सदा॥२२॥ तेन रुद्रत्वमासाद्य जगन्नाश
कोऽभवत्॥ शक्रोऽपि देवदेवस्य पद्मरागमयं शुभं॥२३॥ नित्यमभ्यर्च्य यत्नात् भक्त्या तेन शक्रत्वमाप्तवान्॥ लिंगं हैम
मयं कांतं धनदोऽर्चयते सदा॥२४॥ तेनासौ धनदो देवो धनदत्वमवाप्तवान्॥ विश्वेदेवा महात्मानो रौप्यलिंगं स



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मर्चयन्॥ विश्वेदेवत्वमासाद्य मोदंते शक्रलोकगाः॥ वायुः पूजयते नित्यं लिंगं पित्तलसंभवं॥२६॥ वायुत्वं तेन संप्राप्त
मप्रमेयमनोपमं॥ वसवः कांस्यजं लिंगं पूजयंति विधानतः॥२७॥ वसुत्वं तेन संप्राप्य मोदंते सुखिनः सदा॥ अ
श्विनौ पार्थिवं लिंगं पूजयंतौ भिषग्वरौ॥२८॥ तेन तावश्विनौ देवौ देवानां भिषजां वरौ॥ स्फाटिकं निर्मलं लिंगं वरु
णोऽर्चयते सदा॥२९॥ तेन तद्वरुणत्वं हि प्राप्तं तत्रैव कान्वितं॥ लिंगमन्नमयं नित्यं अग्निः पूजयते सदा॥३०॥ अग्नित्वं
प्राप्तवांस्तेन तेजोरूपसमन्वितं॥ ताम्रं लिंगं सदा काल्लं भक्त्या देवो दिवाकरः॥३१॥ त्रिकालं पूजयत्येव तेन
८५ सूर्यत्वमाप्तवान्॥ मुक्ताफलमयं लिंगं सोमः पूजयते सदा॥३२॥ तेन सोमोपि संप्राप्य सुधारश्मित्वमाप्तवान्॥
शालिपिष्टमयं लिंगं गृहाः संपूजयंत्यपि॥३३॥ घनीभूतान्यपि लिंगानि नक्षत्राण्यर्चयंति हि॥ कर्पूरखण्डजं लिंगं
नागाः संपूजयंति हि॥३४॥ प्रवालकमयं लिंगं मरुतः पूजयंति हि॥ आदित्याः पूजयंत्येव गोमेदं लिंगमुत्तमं॥३५॥
पुष्परागमयं लिंगं ~~वसवः~~ रुद्राः संपूजयं~~ति हि॥ पू~~त्यपि॥ वैडूर्यमयं लिंगं निर्ऋतिः पूजयेत्सदा॥३६॥ यमः पूजयः
तेनित्यं लिंगमायसनिर्मितं॥ ईशानः पूजयत्येव लिंगं मरकतोद्भवं॥३७॥ नित्यं दारुमयं लिंगं गुह्यकाः पूजयंत्यपि॥
सदा सीसमयं लिंगं नागाः संपूजयंत्यपि॥३८॥ असुराः संपूजयंत्येव लिंगं तगरसंभवं॥ तेन जन्यबलोपेता भवंति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० पू० नियतं मुने ॥ ३९ ॥ गजदंतमयं लिंगं राक्षसाः पूजयंत्यपि ॥ गंधर्वाः कौंकुमं लिंगं भक्त्या संपूजयंति हि ॥ ४० ॥ गंधलिंगं
८५ पूजयंति नियतं चाप्सरोवराः ॥ भस्मलिंगं हि पितरः पूजयंति सदा मुने ॥ ४१ ॥ हरिद्रानिर्मितं लिंगं मातरः पूजयंति हि ॥
अस्थिनिर्मितलिंगं हि पिशाचाः पूजयंति हि ॥ केशनिर्मितलिंगं हि किंपुरुषाः पूजयंति हि ॥ मनवः स्वैकृतं लिंगं पूजयंति
सदा मुने ॥ ४३ ॥ रसेंद्रकलितं लिंगं मुनयः पूजयंति हि ॥ एवं देवाः सगंधर्वाः सयक्षोरगराक्षसाः ॥ ४४ ॥ पूज
यंति सदा लिंगं ईशानं देवनायकं ॥ सर्वलिंगमयो लोकः जगल्लिंगे प्रतिष्ठितः ॥ ४५ ॥ तस्मात्संपूजयेल्लिंगं य
दीच्छेत्सिद्धिमात्मनः ॥ लिंगे देवो महादेवः सह देव्या व्यवस्थितः ॥ अनुग्रहाय लोकानां तस्माल्लिंगं प्रपूजये
त् ॥ यो न पूजयते मोहाल्लिंगमीशस्य वै मुने ॥ ४७ ॥ नासौ स्वर्गस्य मोक्षस्य भाजनं च हि सो भवेत् ॥ यस्तु पूज
यते लिंगं नित्यं त्रिभुवनेशितुः ॥ ४८ ॥ स स्वर्गमोक्षराज्यानां क्षिप्रं भवति भाजनं ॥ तस्मादेकमनाभूत्वा या
वंजीवं प्रतिज्ञया ॥ ४९ ॥ अर्चयीत सदा लिंगे आपन्नोपि सदा बुधः ॥ वरं प्राणपरित्यागः शिरच्छेदोपि वा नरः ॥ ५० ॥
न त्वनभ्यर्च्य भुंजीयाल्लिंगे देवं महेश्वरं ॥ एवं निर्वहते यस्तु शार्वं लिंगार्चनाविधौ ॥ ५१ ॥ मनुष्यदेहो पि मुने
स रुद्रगणवत्तमः ॥ नास्ति लिंगार्चनात्पुण्यं ध्यानं नास्ति लिंगार्चनाज्जपः ॥ नालिंगार्चनतुल्यं हि पुण्यमस्ति ज



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गन्त्रं धे ॥५३॥ यतो न्नरप्रीतिकरं महेशस्य सदा मुने ॥ न होमैर्न महादानैः प्रीयते भगवान्छिवः ॥५४॥ यथा
लिंगार्चनात्प्रीतो देवदेवो महेश्वरः ॥ न यज्ञैर्न व्रतैर्विप्र प्रीयते भगवान्छिवः ॥५५॥ यथा लिंगा० ॥ नाश्रमाचार
धर्मैर्वा प्रीयते भगवान् शिवः ॥५६॥ यथा लिंगा० ॥ नार्घ्यतोयप्रदानैर्वा प्री० ॥५७॥ यथा लिंगा० ॥ न भूमंडलदानैर्वा प्री० ॥
॥५८॥ यथा लिंगा० ॥ न तीर्थाटनकैः विप्र प्री० ॥५९॥ यथा लिंगा० ॥ न ध्याने न जपे विप्र प्री० ॥६०॥
८६ यथा लिंगा० ॥ न प्राणायामनियमैः प्री० ॥६१॥ यथा लिंगा० ॥ न शांतिदांत्यादिगुणैः प्री० ॥६२॥ यथा लि-
गा० ॥ न नियमासनयोगैर्वा प्री० ॥६३॥ यथा लिंगा० ॥ न मौनैर्नैर्विकाशापवसनैर्वा जटाजिनैः ॥६४॥
प्रीयेत स महादेवः यथा लिंगार्चनात्सदा ॥ नास्ति लिंगार्चनाप्राप्यं पदं वा विप्रसत्तम ॥६५॥ लोके न दृश्यते सर्वैः श्रेष्ठमे
तं न संशयः ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ इति विज्ञाप्य येन लिंगे पूज्यो महेश्वरः ॥ अल्पाम
लकमात्रं वा कृत्वा लिंगं प्रपूजयेत् ॥६७॥ अमंत्रं मंत्रं वा सपत्नं वा कुलकोटिं समुद्धरेत् ॥ श्रीस्कंद उवाच ॥ लिंगो
ऽयेतेषु यस्मिन् अभिरतश्चिपरमो भस्मरुद्राक्षधृक् स्यात् ॥ अभ्यर्च्यानुदिनं महेश्वरपदध्यानेकसन्मान
सः ॥ बिल्वानां च दलैः सदंबुजसुमैः यः कोऽपि रंकोऽपि वा विप्रो वा गिरिकन्यके सहितं दुःखं तापसंघो भवेत् ॥

शिवरह० भवेत्सोण्यां क्षीणोवर दुरितराशिः किलशिवेक्षणार्धमपि शंकरं क्षणिकलिंगदत्तेक्षणः॥ अलक्षण्यः पुण्यं

८६ परिलभति गण्यादिरहितं गणश्रेष्ठो भक्त्या मम पदज पुण्ये नगतिभाक्॥७०॥ इति श्रीशिवरहस्ये ईश्वराख्ये दशमांशे शिवलिंगार्चनमहिमानामैकचत्वारिंशोऽध्यायः॥४१॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीईशानाय नमः॥ श्रीस्कंद उवाच॥ पूर्वं श्रुतं मया तात शिवलिंगार्चनस्य हि॥ नित्यनैमित्तिकं काम्यं लिंगपूजाविनिर्णयं॥१॥ लिंगभेदे फलं चापि देव्यै देवेन कीर्तितं॥ देव्युवाच॥ देवदेव महादेव कैलासशिखरप्रिय॥ तव प्रियकराणीह कानि लिंगानि शंकर॥२॥ तेषां मत्कथतः शंभो पूजां चैवाधिकारितां॥ वदा लिंगानि कानि स्युस्तव पूजाविधौ शिव॥३॥ श्रीईश्वर उवाच॥ शृणु पद्मपत्राक्षि गिरिजे विश्वमंगले॥ नित्यनैमित्तिके काम्ये वक्ष्ये लिंगान्यनुक्रमात्॥४॥ तेषां पूजाविधिं चापि मानं लक्षणमीश्वरि॥ पार्थिवं तैजसं लिंगं वरिष्ठं परिकीर्तितं॥५॥ तैजसादूनलिंगानि वरिष्ठान्यर्चनाविधौ॥ चराचरविभागेन लिंगं द्वेधा विनिर्मितं॥ पाषाणं स्थावरं प्राहुः बाणलिंगविवर्जितं॥ तत्स्थूलं स्थावरं प्राहुः चरं तु चतुरंगुलं॥७॥ सर्वाण्यपि च लिंगानि स्थूलान्येव च शस्यते॥ रत्नानि सूक्ष्मलिंगानि प्रशस्तानि शुभानने॥ चरा सन्त्राण्यपि देवेशि



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थानि मम पूजने ॥ रत्नलिंगेषु देवेशि फलं वक्ष्ये नु पूर्वशः ॥ आयुर्वृद्धिकरं हीरं रोगहृन्मौक्तिकं ध्रुवं ॥ सुखकृ
त्पुष्परागोत्थं वैडूर्यं शत्रुनाशकं ॥ १० ॥ पद्मरागं च लक्ष्मीदं इन्द्रनीलं यशःप्रदं ॥ वैद्रुमं धनदं नित्यं गोमेदं पुत्र
पौत्रदं ॥ ११ ॥ लिंगं मरकतं पुष्ट्यै स्फाटिकं सर्वकामदं ॥ हेमजं मुक्तिदं देवि राजतं ज्ञानदं नृणां ॥ १२ ॥ पूजयेत्ताम्रजं लिंगं पुष्टि
तुष्टि पशुप्रदं ॥ पुत्रदं पैत्तलं लिंगं कांस्यं कीर्तिप्रदं शिवे ॥ १३ ॥ शत्रुमारणकामस्तु लिंगं लोहमयं यजेत् ॥ तथा
सीसमयं लिंगं आयुष्कामो यजेत्सदा ॥ १४ ॥ शिवे रसमये लिंगे सदा सन्निहितोस्म्यहं ॥ तत्पूजया कोटिलिं
87 गं पूजा महैव लभ्यते ॥ १५ ॥ न प्रतिष्ठादिसंस्कारा तल्लिंगस्य महेश्वरि ॥ रत्नधातुजलिंगेषु शताब्दं ते प्रति
ष्ठितम् ॥ १६ ॥ प्रतिमायां चित्रपटे तथा दर्शे महेश्वरि ॥ अयने पर्वपादे वा तत्तत्कुर्यात्प्रतिष्ठितिं ॥ १७ ॥ पार्थि
वादीनि लिंगानि वक्ष्यामि परमेश्वरि ॥ मृद्भवं दारुजं लिंगं सैकतं पिष्टनिर्मितं ॥ १८ ॥ गांधं सौभाग्यदं विद्धि
अन्नमायुर्विवर्धनं ॥ पौष्पं सर्वार्थदं देवि [illegible] ॥ मानदं शृंगनिर्मितं ॥ ॥ १९ ॥ सैनापत्यप्रदं
पुंसां नागदंतमयं शिवे ॥ शालिपिष्टोद्भवं लिंगं पशुदं यवजं बलं ॥ २० ॥ गोधूमजं वात हस्मौ दुस्त्री, माषजं
सुखं ॥ तिलकल्कोद्भवं पुण्यं, सिद्धार्थभयनाशनं ॥ २१ ॥ गौडं प्रीतिकरं पुंसां, नवनीतं सुखप्रदं ॥ गोमयं रोगनाशाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० भस्मोत्थं पापहृन्मिद्धवे ॥२२॥ लवणं भैरवदं देवि, मूलजं शत्रुनाशनं ॥ वंशांकुरोत्थं वंशादिवृद्धिप्रदमनुत्तमं ॥२३॥ पुरक्षोभ
८७ करं पौरं, राजं कुष्ठनाशनं ॥ अस्थिजं मारणे प्रोक्तं, केशजं भयदं त्वरे ॥२४॥ कुंकुमं धनदं देवि हारिद्रं मंगलप्रदं ॥ सौभा
ग्यदं च कर्पूरं, कस्तूरीसंभवं सुरवं ॥२५॥ यावत्कामं पूजयेत लिंगान्येतानि सुंदरि ॥ विधिः पार्थिवलिंगस्य समासा
न्न तु विस्तरः ॥२६॥ मृल्लिंगार्चाविधिं वक्ष्ये शृणु देवि मयोदितं ॥ मृदाहरण संघट्ट प्रतिष्ठाह्वानमीश्वरि ॥२७॥
स्नापनं पूजनं चैव विसर्जनमतः परं ॥ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ॥२८॥ शिवः पशुपतिश्चैव महादेव इति प्रिये ॥
केचित्पंचोपचाराणि पंचब्रह्मादिभिः शिवे ॥२९॥ षडक्षरेणोपचाराः कुर्युर्देवि पृथक्पृथक् ॥ प्रणवादिचतुर्थ्यंतैर्नमोंतैर्हरना
मभिः ॥३०॥ सर्वमंत्रमयश्चायं ॐकाराद्यः षडक्षरः ॥ यं यं काममभिध्यायन्तत्तत्संकल्प्य पूजयेत् ॥३१॥ यावत्कामसमाप्ति
र्हि कुर्यान्मृल्लिंगपूजनं ॥ ध्यानं तस्यैव विहितं पूजने परमेश्वरि ॥३२॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतं
सं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीति हस्तं प्रसन्नं ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसा
नं विश्वाद्यं विश्ववंद्यं निखिलभयहरं भावयेत्तं च चक्रं ॥३३॥ पंचोपचारैः संपूज्य स्नानादीनि सुरेश्वरि ॥
मूर्त्यष्टकं शिवस्यैतां पूजयेत्तैर्वदिक्क्रमात् ॥३४॥ शर्वाय क्षितिरूपाय भवाय जलमूर्त्तये ॥ रुद्राय वन्हिमूर्त्तये च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वायवे चोग्रमूर्तये ॥ ३५ ॥ भीमायाकाशमूर्तये च यजेतपशुपायच ॥ १६ ॥ महादेवाय सोमाय सूर्यमूर्त्यात्मिनेतिदिक् ॥ ३६ ॥ स्तुत्वाध्या
त्वानमस्कृत्यपार्थिवंतोद्विसर्जयेत् ॥ एकं पाप हरं प्रोक्तंद्विलिंगंसर्वसिद्धिदं ॥ ३७ ॥ त्रिलिंगंपूजयेन्नित्यंसर्वदं पार्थिवं शिवे ॥
लिंगानामयुतंपूज्यं महाराजभयापहं ॥ ३८ ॥ सहस्रमेकं लिंगानां पूज्यं रोगभये शिवे ॥ सहस्राणितथापंच पुत्रदंपार्थि
वार्चनं ॥ ३९ ॥ कारागृहविमुक्त्यर्थं शतमष्टोत्तरं यजे जपेत् ॥ लिंगानां पार्थिवानांतुलक्षंस्यान्मोक्षसिद्धिदं ॥ ४० ॥ कोटि
पार्थिवलिंगानां मुक्तिदंस्यान्नसंशयः ॥ सर्वपार्थिवलिंगानांनित्यंकाम्यद्वयंविधिः ॥ ४१ ॥ मृल्लिंगंपार्थिवंलक्षं
44 भुक्तिमुक्तिकरं परं ॥ देशकालबलंज्ञात्वा फलं चैवविशेषतः ॥ ४२ ॥ विद्यार्थीलिंगसाहस्रंधनार्थीचतदर्धकं ॥ पु
त्रार्थीचार्धसाहस्रंकन्यार्थीचशतत्रयं ॥ ४३ ॥ विद्वान्लिंगायुतंकुर्यात् सर्वपापहरं परं ॥ सुहृत्कामःसहस्रंतुध
नार्थीचसहस्रकं ॥ ४४ ॥ मारणार्थंसप्तशतं, मोहनार्थंशताष्टकं ॥ उच्चाटनार्थीसाहस्रंवश्यार्थीद्विसहस्रकं ॥ ४५ ॥
दारिद्र्यनाशनार्थंतु पंचसाहस्रमीरितं ॥ पार्थिवेनतु लिंगेन बहवः सिद्धिमागताः ॥ ४६ ॥ तत्रापिपार्थिवं लिंगंक्षि
प्रं सिद्धिप्रदं शिवे ॥ कृतेरत्नमयं लिंगं त्रेतायांहेमसंभवं ॥ ४७ ॥ द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे शिवे ॥ रत्न
धातुस्फटिकंकृतपार्थिवे नैवचंडभाक् ॥ ४८ ॥ नैवेद्ये चैव निर्माल्ये ग्राह्यमेवनसंशयः ॥ लिंगान्यमूनिकिल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशानसंहि॰ पृ॰
(दृश्याम)
अ. ४३,
४४

शिवरह॰१० शैलमूर्तिमल्तानितुंगानिपार्थिवसुधातुजतैजसानि ॥ संपूजितानिनियमेनफलंद्धभिर्यानिच्छामभुक्तिपरमा
८८ निसंदेवगौरि ॥ ४८ ॥ इतिश्रीशिवरहस्येदशमांशेपार्थिवलिंगपुजाकथनंनाम त्रिचत्वारिंशोध्यायः ॥ ४३ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानायनमः ॥ श्रीस्कंद उवाच ॥ अथातःसंप्रवक्ष्यामिशिवपूजाविधिक्रमं ॥ निग
मागममभेदेनपूजाप्रोक्ता महर्षिभिः ॥ १ ॥ पूजनंशंकरस्यैवबहुधापरिकीर्त्तितं ॥ श्रुतिस्मृतिसमाचारैःतंत्रैरागम
भेदतः ॥ २ ॥ बृहज्जाबालकाःप्रोचुःकेवलंलिंगपूजनं ॥ पंचायतनपूजाहिस्मृतिप्रोक्तामुनीश्वर ॥ तंत्रागमोक्तपू
जाहिशिवदीक्षावतांशिव ॥ निगमागमसंयुक्तापूजेयं कथ्यतेतव ॥ ४ ॥ शिवप्रधानपूजेयंशिवलिंगैकपूजनं ॥
केवलंतेसमासेनसपंचाक्षरसंयुतं ॥ ५ ॥ प्रवक्ष्यामियथावेदेव्यप्रोक्तंविश्वेश्वरेणहि ॥ कैलासशिखरासी
नंदेवंकामेश्वरंविभुं ॥ ६ ॥ ब्रह्मोपेंद्रमहेन्द्राद्यैःगणैर्विद्याधरैस्तथा ॥ दानवैर्मुनिभिःसिद्धैःयक्षरक्षोगणैःपरैः ॥
हेरंबस्कंदपूर्वादिगणैर्भक्त्यासुसेवितं ॥ अक्षक्रीडालसास्वादलालसं परमेश्वरं ॥ ७ ॥ प्रणम्यनंदीप्रोवा
चक्रीडंतंपरमेश्वरं ॥ क्रीडतोभुवनेशस्य जगदंबिकयासह ॥ ८ ॥ अक्षपाताधिकारेतुपक्षपातधियाजितः ॥
क्रीडतोकूर्मयोगेनजितंदेवेनशंभुना ॥ १० ॥ अक्षप्रपातादेवेनप्रोक्तंनंदिन्जितंमया ॥ तदासत्यमियंयोगेनवुद्धी

३४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ७० हं त्वयि भक्तित:॥११॥ वरो मे व्रियतां वत्स यत्ते मनसि वर्तते॥ तदामितं न संदेह: प्रीतेन मनसा तव॥१२॥ नंदिकेश उवाच॥ तुष्टोसि यदि देवेश जगतामीश्वर प्रभो॥ वद पूजाविधानं ते शैवान्मंत्रान्सुदुर्लभान्॥१३॥ चक्राण्यासैः सहितान्पूजाकर्मसमन्वितान्॥ शिव उवाच॥ कथयामि महाभाग त्रैलोक्येप्यपि दुर्लभान्॥ शैवान्सर्वमनुश्रेष्ठान्सर्वतंत्रेषु गोपितान्॥१४॥ भक्तोसीति नमस्कृत्य वक्ष्यान्यहं त्वयि सुव्रत॥ मूलमंत्रांगषिन्यासपूजाकर्मसमन्वितान्॥१५॥ दीक्षाभिषेकसहितान्ध्यानकारसमन्वितान्॥ उत्थारक्रमयोगेन सर्वकामफलप्रदान्॥१६॥ सुसमे भूप्रदेशे तु गोमयेनोपलेपिते॥ पुष्पप्रकरशोभाढ्ये गंधधूपतरंगिते॥१७॥ विलिखेन्मातृकां तत्र वर्गाष्टकविभेदत:॥ स्वरै: कोऽथ भिवर्ग: प्रथम: परिकीर्तित:॥१८॥ पंचपंचाक्षराश्चान्ये द्वावंत्यौ चतुरक्षरौ॥ वर्गाष्टकं भवेदेवं ततो मंत्रान्समुद्धरेत्॥१९॥ पंचमस्य तु वर्गस्य पंचमं प्रथमं भवेत्॥ षष्ठवर्गांतिमो वर्णः प्रथमांत्यसमन्वित:॥२०॥ द्वितीयं वर्णमाख्यातमष्टमस्याद्यमक्षरं॥ प्रथमस्य द्वितीयार्णसमेतं तत्त्रितीयकं॥२१॥ चतुर्थं सप्तमस्याद्यं द्वितीयाद्यसमन्वितं॥ चतुर्थवर्णमंत्रस्य सप्तमाद्यं तु पंचमं॥२२॥ एष पंचाक्षरो मंत्र: प्रणवाद्य: षडक्षर:॥ यत्साधनात्तु मनुजा: शिवसायुज्यमाप्नुयु:॥२३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८९

प्रणवस्तु परं ब्रह्मबोधकः समुदीरितः ॥ पंचाक्षरमयान्यस्य पंचभूतानि सुव्रत ॥ भूतात्मकं जगदिदं तेनास्य
जगदात्मता ॥ ऋषिरुक्तो वामदेवः पंक्तिश्छंद उदाहृतः ॥२५॥ सदाशिवो देवतास्य मंत्रस्य परिकीर्तितः ॥
षडंगानि मनोर्वर्णैः जातियुक्तानि कल्पयेत् ॥२६॥ तत्पुरुषाघोरसद्योवामदेवेशसंज्ञिताः ॥ मूल
वर्णादिकं न्यस्य त्रिषु स्थानेष्वतंद्रितः ॥२७॥ नतर्जनीमध्यमांत्यानामांगुष्ठेष्वथापरः ॥ आस्यहृत्पादगुह्यादि
मूर्ध्नि हस्तेषु चापरः ॥ प्राग्याम्यवारुणोदीच्यामध्यवक्त्रेषु पंचसु ॥ ततः षडंगं विन्यस्य वक्ष्यमाणं यथाविधि ॥२८॥ सर्वज्ञो नित्यतृप्तश्च बोधोऽनादिरेव हि ॥ स्वतंत्रशक्तिश्चालुप्तशक्तिश्चानंतशक्तियुक् ॥
॥३०॥ मूलमंत्रेण सर्वेभ्यश्च धाम्नेशब्दांतकैः क्रमात् ॥ षडंगानि मनोरस्य जातियुक्तानि मंत्रवत् ॥३१॥ कु
र्वीत गोलकन्यासं रक्षायै नंदिकेश्वर ॥ हृदि पक्त्रांसयोरूर्वोः कन्वे नाभौ द्विपार्श्वयोः ॥३२॥ पृष्ठे हृदि त
तो मूर्ध्नि वदने नेत्रयोर्नसोः ॥ दोःसंधिषु नखाग्रेषु विन्यसेत्तदनंतरं ॥३३॥ शिरो वदनहृत्कुक्षौ जरू
पाद द्वये पुनः ॥ हृदि पक्त्रांबुजे कंठे मुगाभयकरेष्वथ ॥३४॥ वक्त्रांसहृत्सु पादोरुजठरेषु न्यसेदथ ॥
मूलमंत्रस्य षडंगानि यथावद्धृदि शिखा नमः ॥ मूर्ध्नि पादोदरांगेषु हृदये तान्पुनर्न्यसेत् ॥ पश्चादनेन मंत्रे

३५

णकुर्यात्स्वं व्यापकं सुधीः॥३६॥ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगात्मने नमः॥ चतुर्मूर्तिवपुःछायाभासि
तांगाय शंभवे॥ एवंन्यस्ततनुर्नंदिन्वाच्य देवमनन्यधीः॥ ओं क्षीरफेनधवलं रजताद्रिसमप्रभं॥३८॥
चारुचंद्रकलाराजज्जटामुकुटमंडितं॥ पंचवक्त्रधरं शंभुं छितिकंठं त्रिलोचनं॥३९॥ शार्दूलच
र्मवसनं नागाभरणभूषितं॥ दक्षोर्ध्वहस्तपरशुं तदधस्ताद्वरं करं॥४०॥ वामोर्ध्वहस्ते हरिणं तदधान
मभयं करे॥ सुप्रसन्नमुखांभोजं निविष्टं पद्मविस्तरे॥४१॥ ब्रह्मविष्णुमहेंद्राद्यैः स्तुतं भक्त्या त्रिवायु
१० तं॥ विश्वाद्यं विश्ववपुषं भवभीतिहरं शिवं॥४२॥ इति ध्यात्वा गणश्रेष्ठ मानसैरर्चयेच्छिवं॥
उपचारैः षोडशभिः बाह्यपीठे समर्चयेत्॥४३॥ पद्मं वसुदलं कृत्वा कर्णिकाकेसरोज्वलं॥ बहि
रष्टदलद्वंद्वं चतुरस्रत्रयान्वितं॥४४॥ चतुर्द्वारसमायुक्ते मंडलेस्मिन्प्रपूजयेत्॥ एवं पीठं समभ्य
र्च्य मूर्तिं मूलेन हृज्जलां॥४५॥ आवाह्य च लिंगे मूर्ते न सपुष्पेण गणोत्तम॥ पाद्यार्घ्याचमनैर्नीरैः सुपु
ष्पैः वासितैस्तदा॥४६॥ पंचगंधैः पंचफलैर्गव्यैः पंचामृतैरपि॥ गंधपुष्पांबरालंकृत्याद्यैः सिच्य
शंकरं॥४७॥ रुद्रसूक्तेन चमकैः पवित्रपावनमंत्रकैः॥ संस्नाप्य पीठे संस्थाप्य वाससा वेष्ट्य गन्धकैः॥४८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साक्षतैर्भस्मनादिव्यैः उत्तानैर्नेरुत्तरागकैः ॥ अन्यपुष्पैर्यथालाभं मंत्रैरेतैर्गणोत्तम ॥ ४९ ॥ हरो महेश्वरः शंभुः उग्रो भीमः
.९० शिवस्त्वथा ॥ संसारवैद्यः सर्वज्ञ इत्याद्यैश्च नमोंतकैः ॥ ५० ॥ धूपं दीपं च नैवेद्यं तांबूलं च ततो गण ॥ दद्यान्मूलेन देवाय प्र
णामप्रक्रमस्तथा ॥ ५१ ॥ नीराजनं नर्तनं च पुनर्मंत्रजपस्तथा ॥ आवाहितस्य हृदये पुनरुद्वासनं तदा ॥ ५२ ॥ संक्षेपविधि
रेवायं विस्तरेश्च प्रदर्श्यते ॥ एवं भक्त गणो गणोत्तम सदा लिंगं त्रिकालं यजन् कालं चैकमथ द्वितीयमगजे रुद्रो
भवेन्मेनगे ॥ तस्यानुत्तम भोगा संपदखिला प्राप्नोति भूमंडले लिंगाराधनसाधनैकमनसा तुष्टो विशिष्टो भवेत् ॥
॥ ५३ ॥ इति श्रीशिवरहस्ये दशमांशे ईशानाख्ये शिवपूजाविधानं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीकाशीविश्वे
श्वरार्पणमस्तु ॥ श्री ईश्वराय नमः ॥ श्री ईश्वर उवाच ॥ विस्तरेण प्रवक्ष्यामि शिवलिंगार्चनक्रमं ॥ षडक्षरेण-
न्यासादि कृत्वा पूर्वोक्तवद्गण ॥ १ ॥ लघुन्यासेन वा सम्यक् पंचांगेन यथाविधि ॥ पीठांतपूजनं कृत्वा पूज
कोभस्मभूषितः ॥ २ ॥ भूशुद्धिं भूतशुद्धिं च कृत्वा वाथ समर्चितः ॥ स्थापयेच्चेद्द्वारचंडेगणैः संस्कारपूर्वकं ॥
अस्त्रेण दिग्बंधनादि कृत्वा हुत्वा च पावके ॥ भवाद्यैर्नामभिश्चाष्टौ चाहुतीः समिधश्चरुं ॥ ४ ॥ स्वगृह्योक्ते
नमार्गेण स्थाप्य वह्निं पृथक् यजेत् ॥ पंचत्वक्पल्लवोपेतमव्रणं कुंभमेव हि ॥ ५ ॥ संपूर्य शुद्धैरंभोभिरापूर्य



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विधिवत्तदा ॥ तंडुलेषु निधायैव पुण्याहं वाचयेत्ततः ॥ ६ ॥ ततो यैः प्रोक्ष्य मूलेन शस्त्रेण प्रणवेन हि ॥ प्राक् पादद्वा
रपालांश्च पूजयेद्धूपादिभिः क्रमात् ॥ ७ ॥ अंतर्गृहं प्रविश्यैवं लिंगं सं पूजयेत्ततः ॥ समुत्तार्य तथा वासो निर्माल्यं तद्बहि
स्त्यजेत् ॥ ८ ॥ चंडेशायेति तदनु श्रीं नमेत्यादि पूर्वकं ॥ तिलतैलैः पंच गव्यैः तथा पंचफलैरपि ॥ ९ ॥ शालिपिष्टै
स्तथा कल्कैः गंधपुष्पोदकैरपि ॥ बहिर्जप्ते तांम्रकुंभैरु प्रस्तु चोदकैः शिवं ॥ १० ॥ समभ्यर्च्य च लिंगं तं यथा
विभवमेव हि ॥ स्नानकाले प्रकुर्वीत वाद्यारावं मनोहरं ॥ ११ ॥ ततः शंखोदकेनेशं अभिषिंच्य च मूलतः ॥ वासो
91 भिर्वेष्टयित्वेशं गंधैर्लिंप्येत लिंगकं ॥ १२ ॥ त्रिपुंड्रादयश्च लिंगे घृतदीपावलीमपि ॥ बिल्वपत्रैस्तथोत्तरैरु
त्तरागैरथार्चयेत् ॥ १३ ॥ शताष्टनामसंख्यापि कुसुमैर्मालिकादिभिः ॥ धूपं दीपं च नैवेद्यं तांबूलमुपचा
रकं ॥ १४ ॥ छत्रचामरमायूरव्यजनादर्शकैरपि ॥ प्रणवाद्येन मंत्रेण तल्लिंगे नापि भक्तितः ॥ नीराजनं नृ
त्यगीतं वाद्यं नत्वा प्रदक्षिणा ॥ स्तोत्रं चेति समासेन स्यान्नरेभुविर्भिः शिवे ॥ १६ ॥ ततो देवीं गणेशं च स्कंद
चंडेश्वरादिकान् ॥ तत्तन्मंत्रेण विधावीतल्लिंगेष्व नमोंतकैः ॥ १७ ॥ उपचारैश्च शिववत् पूज्यास्ते गणेश्वराः ॥
मूल वेरे च संपूज्यो प्रोक्षणं धातुवेरके ॥ १८ ॥ उपचारं यथापूर्वं कुर्यान्नीराजनं पृथक् ॥ देव्यै पूर्वं गणेशं च स्कं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्यं दं च उेश्वरं वृषं ॥१९॥ नृत्येशं दक्षिणामूर्तिं सोमास्कंदं च एव च ॥ शिवस्य सप्रतिमाप्रोक्तं स्नानं वापि स्थिरे चरे ॥२०॥
२१ तावतां मधुनाचैव दध्ना क्षीरेण तावता ॥ सहस्र धारा शतकशं रवैर्गोशृंगजै जलैः ॥२१॥ पंचविंशति मूर्तीनां
मेवं नोचेत्त्रिमूर्तिषु ॥ शैवस्यां तिथौ पूजा कार्या रात्रौ दिवापि हि ॥२२॥ नित्यादपि द्विगुणितां कुर्यात्पूजां तपो
त्सवे ॥ मासक्षयिनयोरेवं ग्रहणे सोमसूर्ययोः ॥२३॥ पर्वण्यपि विशेषेण वेरे पूजां निचेरत् ॥ पंचामृतानां स्न
पने चैवमभ्यंगके शिवे ॥२४॥ स्नानं पलशतं ज्ञेयं अभ्यंगः पंचविंशतिः ॥ पलानां द्वे सहस्रे तु महा स्नानं प्र
कीर्तितं ॥२५॥ प्रतिष्ठा तु महास्नानं स्थिरे चाभ्यंगकं चरे ॥ शिवस्य सप्रतिप्रोक्तं स्नानं वापि स्थिरे चरे ॥२६॥
तावतां मधुना चैव दध्ना क्षीरेण तावता ॥ सहस्र धारा शतकशं रवै गोशृंगके जलैः ॥२७॥ प्रदोषे सोमवारे च
चतुर्दश्यष्टमीषु च ॥ पूजैवं द्विगुणा कार्या शिवरात्र्यां चयामतः ॥ षट् त्रिकाले स्वेव मेवं षट्काले काल
उच्यते ॥ प्रातः संगव मध्याह्न प्रदोषेषु निशीथके ॥२८॥ अरुणोदय काले च षट्कालं स्थावराच नि
प्रातर्मध्याह्नसायाह्ने पूजास्याच्चरलिंगके ॥३०॥ पर्जपिता निशीथं च मघ कृष्णां चतुर्दशी ॥ प्रति
ष्ठासु त्रिगुणितं स्थावरे पूजनं भवेत् ॥३१॥ दैवे चार्षे स्वयंभूते भिन्ने भग्ने भसंधिते ॥ पूजां मां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंक्ति ४ - " निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥ ३७ ॥ शान्त्यतीता कला प्रोक्ता तेजोरूपाः क्रमात्तदा ॥ आग्नेय्यां पूर्व वायव्याम व्ये दिक्षु च पूजयेत् ॥ ३८ ॥

डलिकीं कुर्यात् त्रिगुणं होम तर्पणं ॥ ३२ ॥ द्विजानां भोजनं चैव चतुर्गुणितमाचरेत् ॥ स्थावरे जंगमे चैव एष सामान्यतो विधिः ॥ चरे वा स्थावरे वापि मूर्त्तीनां पूजनं भवेत् ॥ सर्वोपचारराराध्य मध्ये वत्सततोर्चयेत् ॥ ३४ ॥ प्रथमेष्व दले मूर्तिः यजेत्पुरुषादिकाः ॥ दिक्ष्पतेषु गणश्रेष्ठाः ईशं मध्ये समर्चयेत् ॥ ३५ ॥ पीतासितश्वेतरक्त यत्राभाश्चतुराननाः ॥ वराभयमृगांश्चैव परशुं बिभ्रतीं करैः ॥ ३६ ॥ कोणत्रये षु मध्ये च निवृत्याद्याः कलायजेत् ॥ केशरेषु षडंगानि द्वितीयेष्व दले पुनः अनेनाद्यं तमनुना यजेद्देवान्प्रदक्षिणं ॥ अनंतसूक्ष्मनामाने शिवोत्तममनंतरं ॥ एकनेत्रं चतुर्बाहुं त्रिमूर्त्तिं तदनंतरं ॥ ४० ॥ शितिकंठं गणश्रेष्ठं शिखंडिनमितिक्रमात् ॥ श्वेतपीतसितारक्त कृष्णा धूसरसांजनाः ॥ ४१ ॥ किरीटार्पित बालेंदून्पद्मस्थान्ना
९२ गभूषणान् ॥ त्रिनेत्रांच्छूलवज्रेषु चापहस्तान्मनोहरान् ॥ ४२ ॥ ततोर्चयेद्गणश्रेष्ठ तृतीयेष्व दले पुनः ॥ उमां चंडेश्वरं नंदिं महाकालो गणेश्वरं ॥ वृषभो भृंगि चीरिटि नित्यहंतान्यथाक्रमं ॥ उत्तरं दलमारभ्य पीत नीलारुणासितान् ॥ ४४ ॥ उक्तानि वर्णतः श्वेत पाटलान् क्रमतः सुधीः ॥ चतुरश्रे गणश्रेष्ठ दूर्वादि क्रमतो यजेत् ॥ ४५ ॥ इंद्रं सुराधिपं पीतं वज्रहस्तं सवाहनं ॥ अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषितं ॥ ४६ ॥ यमं प्रेताधिपं कृष्णां दंडहस्तं समर्चयेत् ॥ रक्षोधिपं च नृपतिं खड्गहस्तं बलोन्नतं ॥ पाशहस्तं सुशुभ्रांगे वरुणं यादसांपतिं ॥ वायुं प्राणाधिपं धूम्रं अंकुशाढ्यं करं यजेत् ॥ ४८ ॥ यक्षाधिपं कुवेरं च शुक्लवर्णं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गदाधरम्॥ विद्याधिपं तथेशानं श्वेतं शूलकरं यजेत्॥४९॥ नागाधिपं तथानंतं गौरं च श्रीगलं यजेत्॥ लोकाधिपं विधातारं रक्तपद्मास
नं यजेत्॥५०॥ अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत्॥ त्रिशूलं नीलवर्णं च यजेदग्रे समाहितः॥५१॥ रथांगं कुरुविंदाभं पद्मं रक्तं स
मर्चयेत्॥ लोकपालांऽऽयुधान्येवं कथितानि तवानघ॥५२॥ य एवं पूजयेद्देवं स सद्यः शिवतां व्रजेत्॥ यद्यशक्तः चरे वापि स्थावरे वा
गणेश्वर॥५३॥ केवलं पंच मनुभिः पाद्यार्घ्याचमनीयकं॥ मूलेन त्र्यंबकेणापि शिवमावाह्य पूजयेत्॥ शताष्टोत्तरसंख्याकं जपे
त्तत्र षडक्षरं॥ भवाद्येतितथाष्टौ च नामभिः पूजयेत्ततः॥५५॥ मूलेन धूपदीपादि नैवेद्यांतविसर्जनं॥ श्रीरुद्राणां नमोंतेन पूजनं
परिकीर्तितं॥५६॥ प्रणवाद्यंतवर्णेन यतिः पंचाक्षरेण हि॥ पूजयेल्लिंगमीशानं अन्येषां च यथाविधि॥५७॥ नास्ति लिंगार्च
नसमं तपस्त्रिभुवनेश्वरि॥ यथाचरत्येवमेव मां प्राप्णोत्यंगणोत्तम॥५८॥ स एव रुद्रगणपः स भक्तः स च शांभवः॥ तदेकस्मिन्दि
नेत्यक्त्वा पंचाब्दं नरकं व्रजेत्॥५९॥ ॥श्रीस्कंद उवाच॥ ॥एवं स्थिरा चरमये परमेश लिंगे संपूजयेद्भुवि मुनेवर भोगभ
क्त्या॥ पारत्रिकीं स च गतिं लभतेनुरूपां मुक्तोथ भक्तिपरमो भयि सत्यमेव॥५८॥६०॥ ॥इति श्री शिवरहस्ये ईशाना
ख्ये दशमांशे पूर्वार्द्धे चरस्थावरलिंगार्चनं नाम पंचचत्वारिंशोध्यायः॥४५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीईशानाय नमः॥ ॥श्रीशिव उवाच॥ ॥अतः परं प्रवक्षामि नित्यनैमित्तिके फलं॥ कालं लिंगविशेषं च ब्रह्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षत्रविशां तथा ॥१॥ आश्रमाणां च सर्वेषां एष लिंगार्चने विधिः ॥ नित्य लिंगार्चने शस्तं धातुस्फाटिकसंभवं ॥२॥ बाणलिंगं म
रकतं रसेन्द्रकक्रतं शिवे ॥ पार्थिवं कामदं ज्ञेयं सर्वकर्मसु शोभने ॥३॥ न यस्यां शिवलिंगार्चा गृहे भवति शंकरि ॥ स नित्य सूतकी
ज्ञेयो ब्राह्मणो वान्त्यजोपि वा ॥४॥ बाणलिंगं न यस्यास्ति गृहे बिल्वादिपूजितं ॥ तद्गृहे जलमन्नं वा न पेयं सर्वदा बुधैः ॥५॥ एककालं
द्विकालं वा त्रिकालं नित्यमेव वा ॥ ये र्चयंत्येव नियतं मम लिंगं महेश्वरि ॥६॥ ते वै गणेंद्रा विज्ञेयाः मम तोषप्रदाः शिवे ॥ प्रदोषेषु
विशेषेण यः पूजयति शंकरं ॥७॥ स महापातकैर्मुक्तो भविष्यति न संशयः ॥ ऋणदारिद्र्य नाशाय प्रदोषे पूजयेच्छिवं ॥८॥ घृता
भिषेकं कुर्वीत कुर्यात्फलदशेन वै ॥ उत्पलैर्बिल्वपत्रैश्च पूजनीयो महेश्वरः ॥ सोमवारेर्चने शंभोर्नक्तमायुष्यवर्धनं ॥ क्षीरेण
उ स्नापयेद्देवं गवां कापिलजेन वा ॥१०॥ कमलैर्बिल्वपत्रैश्च पूजनीयो भवो मुने ॥ चतुर्दश्यां निशीथिन्यां अपामार्गैश्च बिल्वकैः ॥
पूजयेल्लिंगमेकाग्रो दध्ना संस्नापयेच्छुचिः ॥ कालाष्टम्यां कालकालमर्चयन्नियतव्रतः ॥१२॥ मधुना स्नापयेद्देवेशं बिल्वपत्रैः प्र
पूजयेत् ॥ वेधायनोक्तविधिना सर्वनक्तंव्रतं शिवे ॥१३॥ तत्रावाहनपूजां च प्रवक्षामि शिवे तव ॥ यथाभिरुचिते लिंगे धातुजस्फा
टिकेपि वा ॥१४॥ बाणे रसेंद्रकलिते तथा मरकतोद्भवं ॥ स्थाप्य पीठे रंगवल्ली मंडिते चोपलेपिते ॥१५॥ भूमौ नक्तव्रते मौनी स्ना
तो भस्मत्रिपुंड्रधृक ॥ रुद्राक्षमालाभरणः जपेत्पंचाक्षरं मनुं ॥१६॥ संपाद्य पूजाद्रव्याणि शतमष्टोत्तरं शिवे ॥ जपेत्षडक्षरं मंत्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० सदाजपपरायणः ॥१७॥ ऋषिछंदोदेवतादीन् ज्ञात्वान्यस्य तनौ मुने ॥ करेकरतले चैव हृदये च न्यसेद्बुधः ॥१८॥ ध्यायेत्तत्र महादेवं ईशा०द०पू०
८३ पूजादौ जपकर्मणि ॥ मूले कल्पद्रुमस्य द्रुतकनकनिभं हेमसिंहासनस्थं वामांकारूढगौरीनिबिडकुचभराभोगगाढोपगूढं ॥ सर्वा अ०४६
लंकारदीप्तं वरपरशुमृगाभीतिहस्तं त्रिनेत्रं वंदे चंद्रार्धचूडं गुहगणपशिवाश्लिष्टपार्श्वं महेशं ॥२०॥ ध्यात्वैवं मूलमंत्रं तु जपेदष्टो
त्तरं शतं ॥ सोदकं कलशं पूज्य गंधपुष्पाक्षतैर्युतं ॥२१॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले चास्य स्थितो ब्रह्मा मध्ये मा
तृगणाः स्थिताः ॥ कुक्षौ तु सागरा नद्यः कलशस्य समाश्रिताः ॥ आयांतु शिवपूजार्थं दुरितक्षयकारकाः ॥ एवं कलशमभ्यर्च्य पश्चा
च्छंखं समर्चयेत् ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥२५॥ पूजितस्त्वं सर्वदेवैः पांचजन्य नमोस्तु ते ॥ ततः शंखस्थतोयं तु
समंतात्परितः क्षिपेत् ॥ गंगे च यमुने चेति कलशस्थजलं स्पृशेत् ॥ पीठपूजां ततः कुर्याद्गुरून्प्रजापतिं तथा ॥ २६॥
दक्षे वामे तथाधारशक्तिं च प्रकृतिं परं ॥ अनंतं पृथिवीं चैव ... रत्नमंडपं ॥ २७॥ कल्पवृक्षं रत्नवरसिंहा
सनमनुत्तमं ॥ श्वेतछत्रं चामरं च प्रागादिक्रमयोगतः ॥ २८॥ धर्म ज्ञानादि वैराग्य ऐश्व
र्यं प्राक्समर्चयेत् ॥ अध र्मं च तथा ज्ञानं अवैराग्यमनैश्वरं ॥ २९॥ दक्षिणे पूजयेदेतान् सत्त्वं चैव रजस्त
मः ॥ मायां विद्यां च वह्निं च अर्कं सोमं तथैव च ॥ ३०॥ आत्मानं तौ ज्ञान परं ... प्राणादि दलेषु यजेत् ॥ वामां ज्ये
ष्ठां तथा रौद्रीं कालीं कलविकारिणीं ॥ ३१॥ बलां बलप्रमाथां च सर्वभूतदमन्यकां ॥ मनो न्मनीं तथैवान्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूजयेत्साक्षतादिभिः॥ आवाह्य क्षणिके लिंगे पार्थिवे धातुजे तथा॥ बाणवर्ज रसेंद्रे वा स्फाटिके रत्नजे ध्रुवा॥३३॥ साक्षतं च स
पुष्पं तु गृह्य स्वहृदयांतरे॥ ध्यायेद्देवं विरूपाक्षं निमील्याक्षीणि सत्तम॥३४॥ वंदे महेशं सुरसिद्धसेवितं स्फुरद्द्रुमैः पूजितपाद
पद्मं॥ विद्याप्रदं भक्तजनैश्च सेवितं ध्यायेत्सदा सांबशिवं प्रसन्नं॥३५॥ सर्वाधारे धरे देवि पूजार्थं शंकरस्य हि॥ स्थानं देहि महादे
वी पूजिता भव मे सदा॥३६॥ इत्यक्षताभिः संपूज्य घंटामाताडयेत्ततः॥ आगमार्थं तु देवानां गमनार्थं तु रक्षसां॥३७॥ घंटानादं करो
म्यद्य तेन प्रीतो भवेच्छिवः॥ लिंगं पीठे च संस्थाप्य देव्या सह तत्तोयजेत्॥३८॥ सपुष्पं साक्षतं गृह्य प्रार्थयेत महेश्वरं॥ आराधितो मनुष्यै
स्त्वं सिद्धैर्देवासुरादिभिः॥३९॥ आराधयामि शक्त्या त्वां मनुगृह्णन्महेश्वरः॥ आत्वा वहं त्विति शानं सोदकेनाभिषेचयेत्॥४०॥ मधु
पर्कं ततो दद्यात् मूलेनैव तथा मुने॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि॥४१॥ घृतं मिमिक्षे इति घृतं मधुवातेति वै मधु॥ स्वा
दुः पवस्वेति सितां नारिकेलजलं तथा॥४२॥ रंभाफनसचाम्रादि जंबीरेक्षुरसैरपि॥ षडक्षरेण संस्नाप्य गंधरत्नसुमादिभिः॥४३॥ अभि
षिच्य ततोऽन्नस्य अंधसस्पतये त्यपि॥ कुर्वीतान्नाभिषेकात् तं तन्निवृत्य सुशीतलैः॥४४॥ धारापात्रगतां भोभिः अविच्छिन्नादि धारया॥
गोशृंगैरपि वा सम्यक् रुद्रावृत्त्याभिषेचयेत्॥४५॥ एकवारं त्रिवारं वा तथैकादशिनीमपि॥ संस्नाप्यासाद्य पीठे च वासश्चैवोपवीत
कं॥४६॥ दद्याच्च त्र्यंबकेनैव भूतिगंधाक्षतास्तथा॥ पुत्रानैस्तत्त रागैश्च बिल्वैः संक्षालितैर्यजेत्॥४७॥ मालाभिः कुसुमैश्चैव शलाक्षो

शि०र०१० ष्टोत्तरनामभिः॥भवाचेतितथैवाष्टो निधनेत्यादिभिस्तथा॥४८॥धूपंदीपंचनैवेद्यं तांबूलंचविशेषतः॥देवींपार्श्वेयजेच्छंभोः ई॰शा॰द॰पू
वामेदक्षेथवामुने॥४९॥देवींमंत्रेणाभिषिच्यगंधधूपादिवाससा॥पूजयेल्लिंगपार्श्वेतुस्कंदंचगणपंतथा॥५०॥नीराजयेत्ततोलिंगं अ०४६
५८ देवींस्कंदविनायकौ॥कांस्यवादित्रनिनदैःघोषयेच्छिवमंदिरं॥५१॥प्रदक्षिणात्रयंकृत्वा नमस्कारादिपंचकं॥षडक्षरेणमंत्रेण
कुर्वीतमुनिसत्तम॥५२॥छत्रंचचामरेदिव्ये व्यजनादर्शकंततः॥नृत्यंगीतंतथावाद्यं प्रदद्यान्मूलमंत्रतः॥५३॥स्तोत्रमेतत्पठे
द्विद्वान्वेदत्रयगतंद्विज॥देवार्पवाजपेद्विद्वान् एतत्स्तोत्रं पठेत्सदा॥५४॥नमोनादात्मनेतुभ्यंनमोबिंदुकलात्मने॥अलिंगलिं
गरूपाय रूपातीतायतेनमः॥५५॥त्वंमातासर्वलोकानां त्वमेवजगतांपिता॥त्वंभ्राता त्वंसुहृन्मित्रंत्वमेवप्रपितामहः॥५६॥न
मः सद्यायदेवाय नमस्तत्पुरुषायच॥अघोरायनमस्तेऽस्तुवामदेवायतेनमः॥ईशानायनमस्तेऽस्तुदेवदेवायतेनमः॥शर्वायक्षितिरूपा
यशुद्धमात्रायतेनमः॥५८॥नमःपशूनांपतये यात्रिकायामितौजसे॥भवायवायुरूपाय शब्दरूपायतेनमः॥५९॥महादेवायसोमा
यअमृतायनमोनमः॥उग्राययजमानाय नमोऽस्त्वाकाशमूर्त्तये॥६०॥त्वदष्टमूर्तिभिर्व्याप्तंजगत्सर्वंचराचरम्॥मयाह्यज्ञानतः
शंभोयत्कृतंपूजनंतव॥६१॥तत्क्षमस्वमहादेव शरणागतवत्सल॥इतिस्तुत्वाजपेन्मंत्रं षडक्षरमतंद्रितः॥६२॥न्यासंदिग्मोच
नंकृत्वा शंखतोयंभ्रमेत्तत॥तेनैवमोक्षयेद्देहं निर्माल्यंवुपिवेत्त्रिधा॥६३॥नात्यंतंतत्प्राशयेच्च नमूत्रपरिणामियत्॥हृत्पद्म ८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्णे कामध्यमुमयासह शंकर ॥६४॥ प्रविश त्वं महादेव सर्वैः शवरपैः सह ॥ अयं मे हस्त इत्याद्यैः स्पर्शो लिंगे विधीयते ॥६५॥ एवंचा
हरहः पूज्यो लिंगे देवः सनातनः ॥ एककालं द्विकालं वा त्रिकालं वा यथाबलं ॥६६॥ अष्टम्यां सोमवारेषु प्रदोषे दोषवर्जिते ॥ चतुर्दश्यां
तथा नक्तं नित्ये नैमित्तिके पि च ॥६७॥ ग्रहणे विषुवे चैव पूजेयं कथिता तव ॥ नास्ति शंभोः पूजनेन सदृशं न वृषं भवेत् ॥६८॥ पूजया
भोगमोक्षौ च सिध्यतः किं बहूक्तितः ॥ ॥श्रीस्कंद उवाच॥ ॥तुरंगमातंगशतांगसंघास्युस्तुंगलिंगार्चकगेहनिष्ठाः॥ धनं च धान्यं
वरवस्त्ररत्नभुक्त्यन्नसिद्धिं गृहसौधपंक्तिं ॥ पराक्रमं सर्वकलासु दक्ष्यं पुत्रांस्तथा व्यक्षसमर्चनाल्लभेत् ॥७०॥ ॥इति श्रीशि
वरहस्ये ईश्वराख्ये दशमांशे षट्चत्वारिंशोध्यायः ॥४६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईश्वराय नमः॥ ॥
श्रीस्कंद उवाच॥ ॥जैगीषव्य शृणुष्वाद्य संवादं परमेशयोः॥ कदाचिद्विहसंती सा देव्यपृच्छत शंकरं ॥१॥ ॥श्रीदेव्युवाच॥
95 देवदेव महादेव करुणाकर शंकर ॥ वेदांते निर्गुणो देवः कथितस्त्वं महेश्वर ॥२॥ त्वल्लिंगं निर्गुणं साक्षात्पूजितं मुक्तिदायकं॥
अमूर्तस्यापि मूर्तित्वं कथं देव महेश्वर ॥३॥ ॥श्रीस्कंद उवाच॥ ॥इति देवस्तया देव्या पृष्टस्तुष्ट उवाच तां॥ रहस्यं
गोपनीयं ते, नाख्येयं यस्य कस्यचित् ॥४॥ ॥श्रीशिव उवाच॥ ॥शृणुष्व गिरिजे धन्यं मूर्तीनामुद्भवं मम॥ अमूर्त
स्यापि मे मूर्तिः कल्पिता लोकसेतवे ॥ लिंगं मे निर्गुणं साक्षात् परमानंददायकं॥ सकृत्पूजा कृता पुंसा उत्सवार्थ शिवागमे॥
॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० सद्योजातोद्भवाः पंच, पंचतत्पुरुषोद्भवाः॥ अघोरसंभवाः पंच, वामदेवभवाः शिवे॥७॥ ईशानसंभवाः पंच, तेषां नामानि मे शृणु॥ ईशा·द·पू
९५ महालिंगोद्भवं श्रीमत् दक्षिणामूर्तिमीश्वरि॥८॥ एकपादं सुखासीनं विघ्नेशानुग्रहे रतं॥ सद्योद्भवा मूर्तयो मी, तत्पुरुषभवा अ·४७
शृणु॥९॥ सोमस्कंदं वृषारूढं पुरत्रयविदारणं॥ चंडीश्वरानुग्रहदं कामघ्नं कालदारणं॥१०॥ अघोरसंभवं देवी कालदारणतः
प्रिये॥ गजसंहरणं वीरभद्रं भिक्षाटनेश्वरं॥११॥ किरातरूपकं कालं कल्याणाकृतिसुंदरं॥ वामदेवभवाः पंच मूर्तयो मी गिरींद्रजे
॥१२॥ विष्णुचक्रप्रदातारं देवकांतारविग्रहं॥ गौरीसहायं वैकुंठनेत्रार्च्यं चंद्रशेखरं॥१३॥ ईशानवक्त्रसंभूता मूर्तयो मी इमे वहि॥
जलंधरारिकं नाट्यकोविदं कालभैरवं॥१४॥ शरभं विद्धि गोविंदजनकं नागभूषणं॥ अंधकारिं विरूपाक्षं विराड्रूपं दिगंबरं॥१५॥ कै
लासनाथं कल्पांतरुद्रं कर्पूरसुंदरं॥ कालाग्निरुद्रं शूलासिधरं व्याघ्राजिनांबरं॥१६॥ पंचवक्त्रं वृंदवृत्तरूपिणं मुनिरूपिणं॥ षोडशाकृ
कृतिं साक्षात् घोराग्निविनिवारणं॥१७॥ ज्वरार्तिशमनं विष्णुवल्लभं भक्तवत्सलं॥ विधिमस्तकसंहर्तृ पार्वतीप्रणयात्मकं॥१८॥
गंगाधरं चंद्रधरं मृडहस्तं चतुर्भुजं॥ भूतेश्वरं कोटिरुद्रमूर्तिं शक्तिनमस्कृतं॥१९॥ पंचब्रह्मोद्भवाः सर्वाः कामदाः शांतिविग्रहाः॥ एवं
ध्यायंति मे मूर्तीस्तेषां ज्ञानं भवेच्छिवे॥२०॥ तेभ्यो विशिष्टा देवेशि मूर्तयस्तु त्रयो मम॥ ज्ञानदा दक्षिणामूर्तिः सच्चिद्रूप निरामया॥
मुनीनां ज्ञानदात्री च सदे वोपनिषद्भुता॥ कैवल्यश्रुतिबोध्यानि श्रीमूर्तिर्मे महेश्वरी॥२२॥ उमासहाया त्र्यक्षा च नीलकंठ विमुक्तिदा॥ ८१

श्रीरुद्रकथिता चेयं सभापतिरितिस्थिरा ॥२३॥ आसां मूर्तिषु चोत्कृष्टा केवल्य श्रुतिदर्शिता ॥ मूर्तिः परतरा शंभोस्तन्मूर्तस्याप्यसंगिनः ॥
॥२४॥ कल्पयंति यथाज्योषं स्वाधिकारानुरूपतः ॥ ध्यायीतीशानमित्याद्याः श्रुतयो ध्यानकर्मणि ॥२५॥ प्रवृत्तास्ता महादेवी ध्यान
मीशो विमुक्तिदं ॥ विष्णुब्रह्मेंद्ररुद्राणां जननीया पराशिवा ॥२६॥ सैवोमा प्रोच्यते वेदैः तया युक्तो महेश्वरः ॥ असंगोपि परानंदः सच्चिद्
धर्मसुखाद्वयः ॥२७॥ माया सा प्रकृतिर्ज्ञेया समायी परमेश्वरः ॥ तस्यावयवभूतं यत् जगदेतत्प्रकाशते ॥२८॥ नैव नानास्ति भूतेभ्यो
प्यतिरिक्तं जगन्मुने ॥ तपसैव मुने ज्ञात्वा निष्क्रियं शांतमव्ययं ॥२९॥ अगाधरसरूपादि मस्पर्शं तन्मनोतिगं ॥ ध्यानध्येयादिरहितं नि
ष्कलं तत्तुरीयकं ॥३०॥ मनोधर्मो ध्यानविधिः तन्मनोतिगमं मुने ॥ तत्तस्मात्सकलं शंभुं निष्कलं संप्रपूजयेत् ॥ हृदाकाशं भास
मानं "निवारंशकणाकृति ॥ ज्वलंतमनिशं वन्हिं तच्छिखायां महेश्वरं ॥३२॥ आकाशे निर्मले शुद्धे भासमानं सुशीतलं "सोममंडलमापू
१८ र्णमचलं दृष्टिगोचरं ॥३३॥ ध्यात्वा मध्ये महादेवं उमया सहितं शिवं ॥ शुद्धस्फटिकसंकाशं चंद्ररेखावतंसकं ॥ त्रिलोचनं चतुर्बाहुं नील
ग्रीवं परात्परं ॥ ध्यायेन्नित्यं धारणाया घटिकापंचकं मुने ॥ आदित्यमंडलेवापि सोहमित्यपि सत्तम ॥ हिरण्मयश्मश्रुकेशं हिरण्मयनखं
शिवं ॥३६॥ हिरण्यबाहुं वरदं अंबिकापतिमीश्वरं ॥ ध्यायेन्नित्यं सदाभ्यस्य सोहमस्मीति भावयेत् ॥३७॥ स्थानेष्वेतेषु विप्रेंद्र ध्यायीत
परमेश्वरं ॥ श्रीपर्वतं शिरस्थाने केदारं तु ललाटकं ॥३८॥ वाराणसी भ्रुवोर्मध्ये विज्ञेया ध्यानकर्मणि ॥ कुरुक्षेत्रं कंठमेतत् प्रयागं कुचमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 च्युते ॥३९॥ चिदंबरं तु हृन्मध्यमाधारः कमलालयः ॥ एषु स्थानवरेष्वीशं भावयेद्देहगेषु च ॥४०॥ हृदये नित्यमात्मानं मां ध्यायित्वैवं त्व 

 या सह ॥ आत्मतीर्थाभिनिरतो भौतिकं तीर्थमुत्सृजेत् ॥४१॥ अत्यल्पोऽपि यथा वह्निः शुष्कमार्द्रं च नाशयेत् ॥ ध्यानाभ्यासः तथाल्पो 

पि महत्पापं व्यपोहति ॥४२॥ ॥ईश्वर उवाच॥ ॥ध्यानमेतद्गजे विमुक्तिदं चंद्रचूडचरणास्य केवलं ॥ यस्य तस्य हृदये वसती

शः यस्य मुक्तिमपि त्वस्य दिशामि ॥४३॥ ॥इति श्री शिवरहस्ये ईशानाख्ये दशमांशे पंचविंशतिमूर्तिकथनं नाम सप्तचत्वारिंशोध्या

यः ॥४७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईश्वरायनमः॥ ॥श्रीईश्वरउवाच॥ ॥पूजाकोटिप्रदं ध्यानं ध्यान

मेवं मम प्रियं ॥ निर्वाते निर्भये शुद्धे सर्वालंकारशोभिते ॥१॥ गंधपुष्पामोदवरे मृदुतूलोपरिस्थितः ॥ ध्यायीतैवं महादेवम हा

कैलासवासिनं ॥२॥ भस्मत्रिपुंड्ररुद्राक्षमालालंकृतविग्रहः ॥ पंचाक्षरवरास्योथ निमील्याक्षियुगं शिवे ॥३॥ धारणाभिः समाहृ

त्य, योगेनाप्लाव्य वै तनुं ॥ सर्वतश्चित्तमाकृष्य हृदयांभोजमध्यमे ॥४॥ प्राणायामैः विकसिते परमेश्वरमंदिरे ॥ अष्टैश्वर्यदलोपे

ते विद्याकेसरसंयुते ॥५॥ ज्ञाननाले महाकंदे प्रणावेन प्रबोधिते ॥ मध्ये हृदयपाथोजे महादेवासनोचितं ॥६॥ महिताकारशोभा

ढ्यं मंडपं परिचिंतयेत् ॥ अतिचिंतामणिप्रख्यैः अतिकौस्तुभकांतिभिः ॥७॥ रत्नैरप्राकृतैर्लोकं रंजयंतं समंततः ॥ दक्षिणद्वारपा

र्श्वस्य संस्मरेन्नंदिकेश्वरं ॥ अनेकरुद्रप्रमथभूतसंघैर्निषेवितं ॥ शिवधर्ममहाध्यक्षं शिवांतःपुरपालकं ॥८॥ चामीकराचल 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्ररव्यंसर्वाभरणभूषितं॥ बालेंदुमकुटंसौम्यंचतुर्बाहुंत्रिलोचनं॥ दीप्तशूलमृगंटंकं स्वर्णवेत्रधरंप्रभुं॥ चंद्रबिंबाभवदनं फाल
पुंड्रंजटाभरं॥ उत्तरद्वारपार्श्वे तु तत्पत्नींमरुतांसुतां॥ सुयशांसुव्रतामंबा पादमंडनतत्परां॥१२॥ सहितांरुद्रकन्याभिः सखीभिश्चा
प्यनेकशः॥ मध्येथमंडलस्यास्य वेदिकां विद्रुमप्रभां॥१३॥ चतुस्तंभयुतांध्याये चतुरश्रीमनोहरां॥ तस्यां शक्त्यादियुक्तां च
तन्वीतपरमानसं॥१४॥ आधारशक्तिं श्यामांगीं करैर्धृतवराभयां॥ तस्याःपुरस्तादाकंठंअनंतं कुंडलाकृतिं॥१५॥ तस्योपरि
भुभंध्यायेसिंहासनमुमापतेः॥ धर्मज्ञानंचवैराग्यं ऐश्वर्यंचतरंध्रयः॥१६॥ आग्नेय्यादिस्थिताश्वैतत् पीतरक्तहरिप्रभाः॥ सिंहा
कारासिंहकोठ्या प्रत्येकंपरिवारिताः॥१७॥ अधर्मादीनिपूर्वादिफलकानिसमंततः॥ वाणावर्तप्रकाशानि ताराकारधराणि च॥
॥१८॥ मध्येतत्फलकस्यास्य साक्षाल्लक्ष्मीपतिस्थितः॥ मध्येप्राकादिमध्यस्थःप्रणवादिस्वराष्टकं॥१९॥ योगासनं विभोर्ध्यायेत्
97 कूर्माकृत्यनलप्रभं॥ अस्याधःछदनंपद्ममासनंविपुलंस्मरेत् ॥२०॥ शिवधर्ममहाकंदं शिवज्ञानैकनालकं॥ अष्टैश्वर्यदलोपेतं
पूर्वादिक्रमयोगतः॥२१॥ अष्टवामादि शक्त्यंगरुद्रकल्पितकेसरं॥ वैराग्यकर्णिकांतस्थं वामादिनवबीजकं॥२२॥ वामाज्येष्ठातथारौ
द्री कालीविकरणीतथा॥ बलपूर्वाविकिरणी बलप्रमथिनीतथा॥२३॥ अष्टावेताः सर्वभूताः दमन्योनवशक्तयः॥ केसरेषुस्थिताध्ये
यारक्तभाधृतचामराः॥२४॥ कलाधर कलाद्योत कर्णिकायांमनोन्मनीं॥ भर्तुरीशानदिग्भागे पाशांकुशवराभयां॥२५॥ पद्मासनस्थि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९० तं ध्यायेदेवस्य विमलासनं ॥ गणांबिका महादेवीं ततो गौरीं प्रचोदयात् ॥२६॥ क्रांतं शक्तिभिरन्याभिः सौम्याभिर्विमलासनं ॥ तस्योप ईशा-द-पू अ४८
९७ रि गुणानां च मंडलानां च साधकः ॥२७॥ तत्वानामपि मूर्त्तीनां त्रितयानां विभावयेत् ॥ सर्वासनोपरि रचितं विचित्र कुसुमास्परं ॥२८॥
परं व्योमावकाशाख्यं आसनं कल्पयेत्प्रभोः ॥ अस्मिन्सदाशिवं ध्याये द्धृत्पद्मासनस्थितं ॥२९॥ शुद्धस्फटिकसंकाशं प्रसन्नं शीत
लद्युतिं ॥ विद्युद्वलयविद्योति जटामुकुटधारिणं ॥३०॥ शार्दूलचर्मवसनं मंदस्मित मुखांबुजं ॥ रक्तपद्म दलप्रख्य पाणिपादतलाधरं ॥
॥३१॥ द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितं ॥ दिव्यगंधानुलिप्तांगं दिव्यमाल्यैरलंकृतं ॥३२॥ पंचवक्त्रं दशभुजं प्रतिवक्त्रत्रिलोच
नं ॥ दक्षिणे शूलवज्रासिपरश्वाभयमुद्रिकं ॥३३॥ वामे च दधतं नागं पाशं घंटां तथांकुशं ॥ अस्योर्ध्ववक्त्रं विलसद्बालेंदु मुकुटो
ज्ज्वलं ॥३४॥ ध्यानस्य मूर्ध्वाभिमुखं गगनच्छाययासितं ॥ पूर्ववक्त्रं महेंद्रस्य छायया कनकप्रभं ॥३५॥ बालेंदुमुकुटं सौम्यं संप्रा
प्तनवयौवनं ॥ दक्षिणं वदनं कालच्छायासन्नांजनप्रभं ॥३६॥ भ्रुकुटी कुटिलं घोरं रक्तवृत्तत्रयेक्षणं ॥ दंष्ट्राकरालदुर्धर्षं स्फुरि
ताधरपल्लवं ॥३७॥ चंद्रापीडं चलत्केशं किंचिच्चलितयौवनं ॥ उत्तरं यक्षराजस्य छायया विद्रुमप्रभं ॥३८॥ ललाटतिलकोपेतं
नीलालकविभूषितं ॥ सविलासं त्रिनयनं चंद्राभरणभास्वरं ॥३९॥ इच्छाज्ञान क्रियारूप विलसल्लोचनत्रयं ॥ पश्चिमं पाशह
स्तस्य छायया चंद्रसंनिभं ॥४०॥ चंद्रोत्तंसं सिताकारं कृतभस्म त्रिपुंड्रकं ॥ इति ध्यात्वा पुनरपि ध्यायेद्देवं सदाशिवं ॥४१॥ सूर्यचंद्र ४३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिनयनं नीलकंठं जटाधरं ॥ ज्ञानं चंद्रकलाजूटं उद्यद्बाहु चतुष्टयं ॥४२॥ त्रैगुण्यामलसंभूतैः दिव्यैर्दशभिरायुधैः ॥ सर्वज्ञातादिसंसिद्धिहृदयादिष
डंगके ॥४३॥ पंचब्रह्मात्मवदने पंचसादाख्यमूर्तिकं ॥ श्रीमत्पंचाक्षरमयं प्रणवाकारशालिनं ॥४४॥ समस्तवर्णरूपं च पंचब्रह्मकलामये ॥
निवृत्तिज्ञानवैराग्ययोगमोक्षप्रतिष्ठया ॥४५॥ आकंठविद्यया सिद्धमालताद्द तु शांतया ॥ तदूर्ध्वं शांत्यतीताख्यकलया परिकल्पितं ॥ एवं
पंचकलारूपमिदं सदाशिवं वपुः ॥ चतुर्मूर्तिं तडिद्वर्णां प्रतिवक्त्रांशुमंडलां ॥४७॥ एकवक्त्रां शशांकाभां प्रतिष्ठा पद्मधारिणीं ॥ अग्निवर्णां त्रि
वदनां विद्या शांतिनमस्करां ॥४८॥ कृष्णावर्णा चतुर्वक्त्रां शांतिध्वजविराजितां ॥ पाशहस्तं च वदनां शांत्यतीतां शशिप्रभां ॥४९॥ सर्वाः पद्मा
क्षमालाढ्या अभयेन विराजिता ॥ चतुर्भुजास्त्रिनयनाः पीनोन्नतपयोधराः ॥ आसां पंचाध्वगर्भाता षडध्वांता सदाशिवः ॥ मंत्राध्वा च पदाध्वा च
१८ वर्णाध्वा भुवनाध्वकः ॥५१॥ तत्वाध्वा च कलाध्वा च षडध्वा च इतीरिताः ॥ चतुर्विंशत्युत्तराणां भुवनानां शतद्वयं ॥५२॥ भुवनाध्वा च संचिंत्य
रोमवृंदात्मनाविभोः ॥ पंचरुद्रादिरूपे तु वर्णैर्वर्णाध्वकल्पना ॥५३॥ असौ त्वगात्मना चिंत्यो देवदेवस्य शूलिनः ॥ सप्तकोट्यो महामंत्रैः मूलविद्यास
मुद्भवैः ॥५४॥ मंत्राध्वा रुधिरात्मा सौ विचिंत्यः पार्वतीपतेः ॥ अनेकभेदसंभिन्नां मंत्राणां पादसंहतिः ॥५५॥ पादाध्वा सौ पशुपतेः सिरामांसतया मतं ॥
पृथिव्यादीनि षट्त्रिंशत् तत्वान्यागमवेदिभिः ॥५६॥ उक्तान्यमीभिस्तत्वाध्वा शुक्लमज्जास्थिरूपभृत् ॥ नास्य देहोस्ति रुधिरं न मांसं नास्ति किंच
न ॥५७॥ प्रतिबिंबमिवाकाशे शक्रचापमिवांबरे ॥ ज्योतिर्मयतया सिद्धमिदं सदाशिवं वपुः ॥५८॥ तथापि कल्पनामात्रं कालव्याप्याध्वनामिदं ॥ ब्रह्म
स्वीशानमूर्धानः पुरुषेण चतुर्मुखः ॥५९॥ हृदयादीन्यघोरेण गुह्यादीन्य तु वामतः ॥ सद्योजातेन मंत्रेण पादादीनि जगत्पतेः ॥६०॥ पंचमंत्रतनुः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शंभुरेवं कल्पनया भवेत् ॥ ॐकारबीजप्रभवः कलापंचकसंयुतः ॥६१॥ शुद्धस्फटिकसंकाशः शुभमेधाविवर्धनः ॥ सदाशिवात्माव्योमस्थः ईशानः परिकीर्तितः ॥६२॥ गायत्रीप्रभवो मंत्रः स्वर्णवर्णश्चतुष्कलः ॥ वश्यकृद्वायुवाहस्थः ईश्वरः पुरुषस्मृतः ॥६३॥ अथर्वःप्रभवो मंत्रः कलाष्टकविभूषितः ॥ आभिचारकृत्यर्थं अंजनाद्रिसमप्रभः ॥६४॥ अशेषाघहस्पुंसा मघोरारुद्रविग्रहः ॥ सामवेदभवो मंत्रः त्रयोदशकलान्वितः ॥६५॥ वामदेवप्रवाता भोवारितत्त्वस्थितो हरिः ॥ यजुर्वेदोद्भवो मंत्रः कलाष्टकयुतःस्थितः ॥६६॥ शांतिकृत्पृथिवीसंस्थः सद्योजातपितामहः ॥ तत्पूर्वः चंद्रबिंबाभो ऋग्वेदवदनोऽशुमत् ॥६७॥ कलापंचदशैर्युक्तो मुख्यमंत्रात्मको हि सः ॥ पंचवक्त्राः स्मृताः सर्वे दशदोर्दंडभूषिताः ॥ खड्गखेटधनुर्बाणकमंडल्वक्षधारिणः ॥ वराभयोपेतकराः शूलपंकजपाणयः ॥६८॥ अघोरो घोररश्तेषु तदन्ये सौम्यविग्रहाः ॥ एवं ध्यात्वा महेशस्य पंचब्रह्मात्मतां विभो ॥६९॥ तत्तद्ब्रह्मकलाभेदैः विचित्यांगानि कल्पयेत् ॥ ॥श्रीस्कंद उवाच ॥ ॥ बुध्याऽभिध्याय रुध्वा विषमविषयजागाधबोधे प्रमुग्धं दुग्धप्रायमदिग्धसर्वविषयाकारोघदग्धाघकं ॥७२॥ ध्यायीत तत्क्षणमेव शिक्षणाचक्षणं त्र्यक्षं महोक्षस्थितं सर्गापारविचक्षणोक्षणमुमे विक्षीणचित्ताक्षकः ॥ वारंवारमपारसारकरुणो वाराशिभाराशि हृद्वाराशीविषयानुभूषितभवो भावोप्यभावोज्झितः ॥७३॥ योषार्धांक्षलिकाप्रकायदहनः संमोहिनां मोहनो हेयानामपि हायिना मगमुते भूमैकसीमा शिवः ॥७४॥ ॥इति श्रीशिवरहस्ये ईश्वराख्ये दशमांशे पूर्वार्धे शिवध्यानं नाम अष्टाचत्वारिंशोऽध्यायः ॥४८॥

श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईशानायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीस्कंद उवाच॥ ॥ईशानः सर्वविद्यानामित्येषा शंखपांडुरा॥ धूर्जटेरूर्ध्वमूर्धासा शशिना सहिता कला॥१॥ ईश्वरः सर्वभू
तानामित्येषा कुंदसन्निभा॥ शर्वस्य पूर्वमूर्धा सौ शक्त्या युक्तां गदाख्यया॥२॥ ब्रह्माधिपतिरित्यग्रे ब्रह्मणोधिपतिः सदा॥
ब्रह्मेत्येषा शशांकांका सैषा मूर्धास्य दक्षिणा॥३॥ शिवो मे अस्त्विति कला शुद्धस्फटिकभास्वरा॥ महेशस्योत्तरं मूर्धा मरीचिर
सवीचिका॥४॥ सदाशिवोमितिकला गोक्षीरधवलाकृतिः॥ शिवस्य पश्चिमो मूर्धा ज्वालनी मेलनोज्वला॥५॥ कलातत्पुरुषा
येति पूर्वा विद्महइत्यसौ॥ शांतियुक्ता जपावर्णा पूर्ववक्त्रं पुरद्विषः॥६॥ महादेवाय पूर्वाय धीमहीतिकलाश्रुता॥ साविद्यास
हिता कृष्णा दक्षिणा वक्त्रमीशितुः॥७॥ कलाप्रतिष्ठासहिता तंनो रुद्र इति श्रुता॥ वक्त्रमुत्तरईशस्य वर्णेन स्फटिकोपमं॥८॥
९९ प्रचोदयादितिकला प्रतप्तकनकोपमा॥ शिवस्य पश्चिमं वक्त्रं निवृत्या नित्यसंहितं॥९॥ अघोरेभ्यः कला नीलहृदयांतमयायुता॥
अथघोरेभ्य इत्येष रक्तमोघा सखीगणाः॥१०॥ पीता घोरा कलास्कंधो दक्षिणः क्षुधया युतः॥ वामानिद्रा युता घोरतरेभ्य इति
कीरभाः॥११॥ नीला मृत्यु युता नाभिः सर्वतः शर्वरूपिणी॥ कुक्षिः सर्वेभ्य इत्येषा कला सिंदूरसुंदरा॥१२॥ रजतसाहिता या
ति मूलाधार धरात्मतां॥ लिंगमौलि युता पीता ज्येष्ठाय नमइत्यसौ॥१३॥ सद्योरुस्थ विरानीला स्यात् रुद्राय नमः कला॥ पी
ता सवात्यवामेरुः कालाय नम इत्यसौ॥१४॥ शुक्ला काम कला कामा सहितांजन दक्षिणा॥ वामाविकारणायाथ नमः श्यामा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहृ०१० ससंयमाः॥१५॥सक्रिया दक्षिणा जंघा नीला बलकला विभोः॥ वामा विकारणा याथ बुद्धिसिद्धियुता रूपा॥१६॥ विद्युद्वर्णा ब ईशाङ्‌पू
९९ लकला सव्यस्फिक्कार्यया युता॥ वामः प्रमथनाथाय नमो धात्रीयुता सिता॥१७॥ बला कामा युता सौम्या बलप्रमथिनी कला॥ अ·४६
मन्मनीयुतां ध्यायेत् वामपार्श्वे पिनाकिनः॥१८॥ सद्योजातं प्रपद्यामीत्येषा बालार्कसंनिभा॥ कलासिद्ध समायुक्ता धूर्जटे
र्दक्षिणं पदं॥ सद्योजाताय वै पूर्वा नमः स्त्यसिता कला॥॥ ऋद्धिशक्तेः सहचरी बामगौरीपतेः पदं॥२०॥ नीला भवे कलायुक्तास
हितो दक्षिणः करः॥ नीला भवेत्कलान्या तु वामो लक्ष्मीयुतः करः॥२१॥ मेधा सहचरी सीता सा पीबातिकवे कला॥ भवोद्भवे
निति कला सा कांतिररुणा शिरः॥२२॥ नीला वभकलाबाहुः दक्षिणः स्वधया युतः॥ उद्यदर्ककराभासा मुद्भवाय नमः कला॥२३॥ धृ
तशक्तियुतां ध्यायेद्वामबाहुं जगत्पतेः॥ अष्टत्रिंशत्कला देवाः त्रिनेत्राश्च चतुर्भुजाः॥२४॥ वराभयपरश्वेणा विलसत्करपंकजाः॥
तत्तद्ब्रह्मसमाकारवर्णायुधभृतोथवा॥२५॥ एतेषां वामभागे तु विचिंत्याः शक्तयस्त्विमाः॥ पाशांकुशाभयवरद्योतमानकरांबु
जाः॥२६॥ श्रीकंठप्रमुखान् रुद्रान् वर्णरूपान्सशक्तिकान्॥ प्रभो रवयवान् ध्यायेद्वायूक्तन्यायवर्त्मना॥२७॥ स्मरेत्सशक्तिवान्
रुद्रान् अर्धनारीश्वराकृतीन्॥ सिंदूरकांचनप्रख्यान् वामदक्षिणपार्श्वगान्॥२८॥ पाशांकुशाक्षवलयशूलमुद्राविराजितान्॥
प्रसन्नवक्त्रकमलान् विश्ववांछितदायकान्॥२९॥ कामिकं पादकमलं योगजं गुल्फयोर्युगं॥ चिंत्यं पादांगुली रूपं कारणं प्रस ८५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताद्वयं ॥३०॥ अजितं जानुनी युग्मं दीप्तमूरुद्वयं विभोः ॥ गुह्यं बीजात्मकं सूक्ष्मं सहस्रं तु कटीतटं ॥३१॥ पृष्ठभागोंशुमानस्य
नाभिश्रीसुप्रभेदकं ॥ विजयं जठरं प्राहुः निश्वासं हृदयात्मकं ॥३२॥ स्वायंभुवं स्तनद्वंद्वमनलं लोचनत्रयं ॥ वीरागमः कंठदेशः रो
रवं श्रवणद्वयं ॥३३॥ मकुटं मुकुटं शंभोः बाहवो विमलागमाः ॥३५॥ चंद्रज्ञानं मनः शंभोः बिंबं वदनपंकजं ॥३४॥ जिह्वा प्रोद्गीतमीशस्य
ललितं गंडयोर्युगं ॥ सिद्धं ललाटफलकं संतानं कुंडलद्वयं ॥ यज्ञोपवीतं शर्वोक्तं हारस्त्वस्यारमेश्वरं ॥ किरणं रत्नभूषास्य वातुलं
वसनात्मकं ॥३६॥ एवं तंत्रात्मकं रूपं ईश्वरस्य विचिंतयेत् ॥ शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकं ॥३७॥ प्रणवस्य च मात्राभिः
वर्णैः पंचाक्षरस्य च ॥ वदमांसोश्चविकलं कल्पयेदंबिकापतेः ॥३८॥ विशुद्धं शिवसादाख्यं विद्युद्वृंदमिमांबरे ॥ विश्वतः स्फुरितं
१०७ ज्योतिः विद्यादूर्ध्वमुखं विभोः ॥३९॥ अमूर्त्तमथसादाख्यं मूलस्तंभइतिश्रुतं ॥ ज्योतिस्तंभमयं लिंगं स्मरेदस्योत्तरं मुखं ॥४०॥ ज्यो
तिर्लिंगैकभागोर्ध्वे एकवक्त्रं त्रिलोचनं ॥ मूर्त्तिसादाख्यमित्युक्तं ध्यायेत्पश्चिममाननं ॥४१॥ शूलं च परशुं वज्रमभीतिं दक्षि
णैः करैः ॥ पाशं वह्निं च घंटां च वरं वामैः करैरपि ॥४२॥ दधानं कर्तृसादाख्यं पुरारेः पूर्वमाननं ॥ ब्रह्मपंचान्यूर्ध्वपूर्वदक्षिणो
त्तरपश्चिमान् ॥४३॥ वक्त्रपद्मं विभोर्ध्यायेत् ईशानप्रभृतिक्रमात् ॥ सर्वज्ञता तृप्तिरनादिबोधं स्वतंत्रता नित्यमलुप्तशक्तिः ॥
अनन्तशक्तिश्च विभोर्विधिज्ञा षडाहुरंगानि महेश्वरस्य ॥ हृदयं हृदये शंभोः शिरः शिरसि पिंगलं ॥ शिखां शिखास्पदे रक्तां क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० वचं पार्श्वयोःस्थितं ॥ नेत्रेषु श्यामताम्रक्तं करे स्वमसितं स्मरेत् ॥ ४६ ॥ चतुर्भुजास्त्रिनेत्राश्च जटामकुटमंडिताः ॥ वराभये कपालं च ईशा॰द॰पू॰
शूलं चदधतः करैः ॥ ४७ ॥ अंगदेवास्स्म तासौम्याः नेत्रास्त्रोरुग्रहे ॥ त्रिशूलं त्रिगुणं प्राहुः परशुः सत्वनिष्ठितः ॥ ४८ ॥ खड्गं प्रण अ॰ ४९
१०० तो वज्रं शंभोः शक्तिरभिद्यता ॥ वन्हेः संहारिणीशक्तिः चक्रं नागोप्यधृष्यता ॥ ४९ ॥ मूलमाया कर्मपाशो घंटानादस्वरूपिणी ॥ अभये
मालिनीशक्तिः विवर्णं चांकुशं विदुः ॥ ५० ॥ एवं दशभुजश्चिंत्यः लिंगैर्दशभिरायुधैः ॥ जपकाले तु मंत्रस्य ध्येयो देवश्चतुर्भुजः ॥
॥ ५१ ॥ वराभयपरश्वेण नमस्कार सरोरुहः ॥ वक्त्रैर्थ्वेशानवक्त्राय ऊर्ध्वाशाभिमुखं सदा ॥ ५२ ॥ पूजाकालेषु तत्पूजाद्वाराभिमुखतां व्र
जेत् ॥ पुरुषाघोरजाताख्य वामदेवाननानि तु ॥ द्वारभेदान्नभिद्यंते स्वस्वस्थानव्यवस्थया ॥ अथवा मंडपेद्वार दिगादि परी
तः क्रमात् ॥ ५४ ॥ चत्वार्येतानि वक्त्राणि प्रादक्षिण्येन कल्पयेत् ॥ एवं सदाशिवं ध्यात्वा निश्चलेनांतरात्मना ॥ ५५ ॥ मंत्र
न्यासादिकान्यापि कृत्वास्वस्यां तनौ यथा ॥ मूर्त्तित्वे नैव संकल्प्य शिवस्य परमात्मनः ॥ ५६ ॥ अभ्यर्च्य गंधपुष्पाद्यैः मनसैवो
पपादितैः ॥ तस्यां मूर्तौ मूर्त्तिमंतं शिवं सदसतः परं ॥ ५७ ॥ प्राणस्थानं महेशस्य चिंतयेदंबिकापतेः ॥ ब्रह्मा विष्णुश्च रुद्रश्च
तथान्ये व सुरासुराः ॥ ५८ ॥ तपोभिरुग्रै रद्यापि यस्य दर्शनकांक्षिणः ॥ यस्मात्सर्वमिदं ब्रह्म विष्णुरुद्रेंद्रपूर्वकं ॥ ५९ ॥ सह भूतेंद्रि
य ग्रामैः प्रथमं संप्रसूयते ॥ कारणानां च यो ध्याता ध्येयः परमकारणं ॥ ६० ॥ न संप्रसूयते न्यस्मात् कदाचन कुतश्चन ॥ सर्वैश्च ४६

र्येण संपूर्णो नाम्ना सर्वेश्वरः स्वयं ॥६१॥ सर्वैर्मुमुक्षुभिर्ध्येयः शंभुराकाशमध्यगः ॥ सर्वोपरिकृतावासः सर्वावासश्च शाश्वतः ॥ षड्वि
धाध्वमयस्यास्य सर्वस्य जगतः पतिः ॥ उत्तरोत्तरभूतानां उत्तरश्च निरुत्तरः ॥ अनंतमहिमांभोधिरपरिच्छिन्नवैभवः ॥ अशेषवि
षयामोघशुद्धशुद्धिविजृंभणः ॥६४॥ आत्मशक्त्यमृतास्वादप्रमोदरसलालसः ॥ अनंतानंदसंदोहमकरंदमधुव्रतः ॥६५॥ अशेषव
जगदंडानां पिंडीकरणपंडितः ॥ औदार्यवीर्यगांभीर्यमाधुर्यमकरालयः ॥ अतुलः सर्वभूतानां राजराजो महेश्वरः ॥ अप्राकृतशरी
रं तं अतिमन्मथरूपिणं ॥६७॥ घृतरीतिघनीभूतसच्चिदानंदविग्रहं ॥ सर्वलक्षणसंपन्नं सर्वावयवशोभितं ॥ सर्वातिशयसंयुक्तं
सर्वाभरणभूषितं ॥ संरक्तपाणिचरणं कंदमंदस्मिताननं ॥६९॥ शुद्धस्फटिकसंकाशं फुल्लपद्मत्रिलोचनं ॥ चतुर्भुजमुदारांगं
१०। चारुचंद्रकलाधरं ॥७०॥ वरदाभयहस्तं च मृगटंकधरं हरं ॥ सर्वकल्याणनिलयं चारुनीलगलांतरं ॥७१॥ सर्वोपमानरहि
तं सर्वात्मानं विचिंतयेत् ॥ ततः संचिंतयेत्तस्य वामभागे महेश्वरीं ॥७२॥ प्रफुल्लोत्पलपत्राभविस्तीर्णायतलोचनां ॥ पूर्णचं
द्राभवदनां नीलकुंचितमूर्धजां ॥७३॥ नीलोत्पलदलप्रख्यां चंद्रार्धकृतशेखरां ॥ अतिवृत्तघनोत्तुंगपीनोन्नतपयोधरां ॥
॥७४॥ तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मोत्तरांबरां ॥ सर्वाभरणसंपन्नां ललाटतिलकोज्वलां ॥७५॥ विचित्रपुष्पसंकीर्णकेश
पाशोपशोभितां ॥ सर्वातीतगुणाकारां किंचिल्लज्जानताननां ॥७६॥ काव्याकारस्फुरद्भ्राजल्लसन्मुक्ताफलांचितां ॥ हेमार

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ ५० विंदवितत्सद्ध्यानां दक्षिणे करे ॥७७॥ दंडवज्रापरं हस्तं तस्यासीना सहासनां ॥ पाशविच्छेदकां साक्षात्सच्चिदानंदरूपिणीं ॥७८॥ ईशा॰द॰पू॰
सदाशिवेश्वरहरश्रीशद्रुहिणमातरं ॥ समस्तगौरीवाण्यादिलक्ष्म्यादिपरिसेवितां ॥७९॥ एवं देवं च देवीं च ध्यात्वा तरुणविग्रहो ॥ स अ॰ ४९-५०
१०१ र्वोपचारवद्भक्त्या भावपुष्पैस्समर्चयेत् ॥८०॥ एवं ध्यात्वा क्षणमहो अग्निष्टोमायुतं फलं ॥ उमासहायं विश्वेशं ध्यात्वा प्राप्नोति
मानवः ॥८१॥ ॥श्रीस्कंद उवाच॥ ॥ शंभुश्चिदाकाशगकोशकाशो ध्येयश्चिदानंदघनो व्ययात्मा ॥ शाखाशिखाभिर्ग
दितो हराजमुकुंदशक्रादिसुरप्रसूतिः ॥ हेयादिदुःखमपहाय भवोरुमाया निर्वापकाय हृदि वैचिरभाविताय ॥ कैवल्यवल्लीगतवैभ
वो यो ध्येयो विमुक्तिपरमैः स उमासहायः ॥८३॥ ॥ इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे पूर्वार्द्धे एकोनपंचाशोध्यायः ॥४९॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईश्वरायनमः॥ ॥श्रीस्कंद उवाच॥ ॥ ध्यानमेतत्तवोक्तं मे महादेवस्य मुक्तये ॥ उ
मासहायं विश्वेशं ध्यात्वा मुक्तो भवेद्द्विजः ॥१॥ श्रुतिप्रकथितेयं ते मूर्तिः परमेशितुः ॥ कैवल्यश्रुतिनिर्दिष्टा साक्षान्मोक्षप्रदायिनी ॥
॥२॥ ब्राह्मणक्षत्रियविशां आश्रमाणां च सर्वदा ॥ संन्यासिभिर्विशेषेण हृदिन्यस्यैव केवला ॥३॥ भस्मदीप्तत्रिपुंड्रांकैः सदारुद्राक्षधारि
भिः ॥ रुद्रसूक्तजपासक्तैः सदापंचाक्षरादरैः ॥ ध्येया हृत्पंकजोत्फुल्लकर्णिकायां विमुक्तये ॥ क्षणमेकं क्रतूनां च चतुस्सप्ततिजं फ
लं ॥५॥ प्राप्नोति मनुजः सद्यो हृत्याह श्रुतिरेव हि ॥ ध्यानमेव परा पूजा नान्या पूजा महेशितुः ॥६॥ ज्ञानध्यानाभियुक्तस्य शिवः शीघ्रं ४७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विमोक्षकः॥ भवोरूपाश्रवंधेभ्योरहस्यंतेमयोदितं॥७॥ सर्वेषामपिपापानां ध्यानं शंभोर्विनिष्कृतिः॥ अन्याधिकारिभेदेषु

पूजास्थानादिभेदतः॥८॥ शिवोदितोयं चविधिः शृणुवध्यायांतिमं मुने॥ देव्यैदेवेन कथितं सर्वसंशयनाशनं॥९॥ ॥ईश्व

रउवाच॥ ॥अर्केंदुबिंबेष्वनलेचलिंगे हृद्युत्तमांगेममदेविपूजनं॥ प्रशस्तमाहुः निगमागमाः शिवेतत्पूजनं सफलमेव भवेद्भ्र

वानि॥१०॥ पुण्यान्यतुल्यगणितानि भवंति तस्य॥ प्रातर्दर्शनमीश्वरस्याघहरं, नैशं विनश्येत्त्वघं॥ मध्याह्ने हयमेधपुण्यफ

लदं, सायंतने, जन्महृत्स्यादर्धेंदुकलावतंसभजनं संपूजनं लोकनं॥१०॥ धन्यानां किलजायते त्रिभुवने पापौघतापौघहृत् अ

र्वागादर्मलकात्स्वतोलघुतरं लिंगं नशस्तं शिवे सर्वद्रव्यभवं हि सूक्ष्ममपि तद्रत्नोद्भवं शस्यते, नैतत्स्फाटिक धातुमारकतकेस

त्रातको त्तुंगिते लिंगेनैवहिदोषभागकलनं, तुंगं हि शस्येतमे॥११॥ सूक्ष्मेस्फाटिकजे तथामरकतेसद्विद्रुमेकी

रते त्रासस्त्रासकरो भवेत गिरिजे, तुंगं न लिंगं त्वघम्॥ मृत्स्नाचापि चतुष्टयांगुलिहितं अर्वाक्ततोदोषकृत्॥

पाषाणप्रभवं गृहेषु निहितं हन्त्येव पुण्यं कृतम्॥१२॥ धातुभ्योऽप्यधिकं सुरत्ननवकैः क्लृप्तं, ततः पार्थिवं, तस्मा

दप्यपुतं फलर्द्धिजनकं स्याद्बाणलिंगं रसम्॥ त्वां भो रुत्तमवीर्यजात्त्वहि परं लिंगं, तथा वै चरस्थैर्यदैवतमा

र्षमानुषकृतं स्वायंभुवस्याफलम्॥१३॥ पार्थप्रहारांकितहेमबिन्दुचित्रं भवेन्नार्मदलिंगमीत्रं त्रिपंचवारं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नार्मदं वा

शिवर०१० तुलयानसाम्यं प्रयाति तद्धुण भवं प्रशस्तम् ॥१४॥ त्र्यवेतं मुक्तिदमंबिके सितमहो पुण्याभिवृद्ध्यै ईशा० द०पू
१०२ द यर्चने ॥ रक्तं नार्मलिंगमप्यघहरं दारिद्र्यदं पूजनात् ॥ प्रादेशादधिकं चरार्चनविधौ नैत्तच्छतं तत् अ०५०
स्थावरम् ॥ १५॥ स पीठापीठं वा भवतु गिरिजे नार्मदं भवम् ॥ प्रशस्तं हस्ताभ्यां स्पृशति यदि मुक्तेरु
भयतः ॥ तथैवार्चन् बिल्वैर्यदि परममुक्तिं किल लभेत् ॥ गृहे संस्थं क्षेत्रे प्रभवति ततः क्रो
शमाज्ञे ॥१६॥ चराचरं वा विपिने नगे वा स्थितं च लिंगं यदि पूज्य दृष्टं ॥ तद्धुणलिंगं पर पूज्य
दृष्टं तत्स्थावरार्चेक्षणपुण्यभाक्स्यात् ॥ यद्दत्ते नियमार्चनाय गुरुणा लिंगं प्रपूज्यं सदा ॥ र
त्नस्फाटिक धातु वाणकलितं तल्लिंगमंगेशिवे ॥१८॥ प्राणान् समीक्ष्य यस्त्यजति सः स्याद्धुक्त
वर्यो बिके ॥ तस्याहं वितरामि मुक्तिमधिकां तत्तुल्यमेकं चेर्यतवा ॥१९॥ ईशार्चना विरहितं यदि
भक्ष्यभोज्यमन्नं फलं कीटकसंमितं भवेत् ॥ त्यक्त्वा नरोऽदन् स तु पंचवत्सरं प्रतप्तशैले नि
वसेच्छिवार्चनाम् ॥ २० ॥ नियमाच्छिवलिंगमर्चयन् मरणे वापि त्यजन् स एव पापी ॥
यदि संत्यज्य प्रमादतो हरार्च्यां सहि कुर्यात्स उपोष्य भक्तियुक्तः ॥२१॥ न प्राणलिंगानि यमः ४८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कलिजद्दि जानां शस्तः प्रशस्त मगजे किल हस्तबद्धम् ॥ त्लिंगं गले च हृदये किल तां त्रिकाणां देवस्य धारण
विधिं प्रवदन्ति वेदाः ॥ २२ ॥ नायं वैदिक संमतो विधिरयं लिंगार्चनं केवलम् ॥ भस्माक्षादिकधारणं च नियतं
त्याज्यं न चेत द्विजैः ॥ सर्वेन्द्रियादिरहितो यदि पुत्रकृत्यं तस्यार्चनं भवति शैलसुते नितसत्यम् ॥ २३ ॥ तुंगं याव
च्च लिंगं परिमितिरपि सा तावती योनि रूक्ता विस्तीर्णवृत्ता भवति गिरिसुते गोमुखी पीठतोर्ध्वा ॥ पीठं चापि चतु
ष्कवृत्तकलितं तल्लिंगमानां गुलं व्यायामो च्छ्रितवृत्तमध्यरहितं न्यूनाधिकं दोषकृत् ॥ २४ ॥ नेदं मानं मनोज्ञं
भवति गिरिसुते लिंगमाने स्वयंभो ॥ देवार्षेऽपि, वदन्ति मानुष विधौ तत्स्थावरे चावरे ॥ रत्नेर्धातु विनिर्मिते स्फा
103 टिकजे स्यान्मृत्तिकाकल्पिते सूत्री पंचकमेतदेव कलितं स्याद्भोग मोक्षप्रदम् ॥ २५ ॥ न्यूनाधिका भवति दोषक
रं हि लिंगमायुः प्रजां धन पशून्प्रविनाश हेतुः ॥ तस्मात्तमांगुलमिदं प्रविचार्य कुर्यात्लिंगं मनोज्ञमगजे वि
धिरेषु शुद्धः ॥ २६ ॥ शंभो लिंगे स्वयंभो ऋषिसुरनिहिते बाणलिंगे चरे वा रत्नास्फाटिक धातु संभव महालिंगे
मृदापारदे ॥ ध्यात्वा वाहृदयां बुजे द्विजवरश्चंडेश निर्माल्य भाक् नो भूपादितरेषु वैदिकचरः तं न स्पृशेद्दूष
थ कम् ॥ २७ ॥ एतेषाम् वारि निर्मलतरं निर्माल्यमप्य द्विजे चंडेशापि कृति नेतत्र कलिता तद्ग्राह्यमेव द्विजैः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० १०३

तत्रेष्वागमपल्लमन्त्रसहितेस्त्रीशूद्रसंपूजिते न ग्राह्यं, किल चण्डभक्तमगजे तद्वैदिकैः केवलम् ॥ २९॥ ईशा०द०२
बाणस्फाटिकधातुलिंगनिवहे पुण्ये रसेन्द्रोद्भवे ॥ स्वायंभौ हृदयाब्जकोशकलिते दत्तं पुरस्ताद्धि यत् ॥ अ०५०
॥३०॥ नैवेद्यं च वरान्नभक्ष्यफलजं ग्राह्यं तथा वैदिकैः ॥ अन्यत्प्रक्षाल्यमेषां फलरसगणजं त्वाज्यमन्नं
तथान्ये शाने चापि च सूतकेऽपि गिरिजे मल्लिंगसंगोज्झितः ॥ दूराद्बिल्वदलं त्यजन्ति सुधियः नित्यार्चनात्
नहि ॥ स्यादेवं नियमोऽपि जायते शिवस्तेनैव संतुष्यति ॥ न ग्राह्यं जलमन्नभोज्यमपि नो विप्रैः शिवार्चावि
ना त्यक्त्वार्चाऽन्त्यजयोनिमेति नरके संधुक्षितोऽसौ मृतः ॥ ३२॥ यस्त्वेकाहमपि प्रदोषसमये स्वं वा पीयि
त्वा शिव॥ पूजां चापि विधाय तद्द्विगुणितां तत्पापमुक्तो भवेत् ॥ स्त्रीशूद्रार्चनमेतदेव गिरिजे मृद्धातुलिंगे स
दा बिल्वाद्यैः सततं नमोन्तविहितैः पंचाक्षरैः केवलम् ॥३३॥ अन्त्यसंकरजातयोऽप्यगसुते मल्लिंगलो
कोत्सवे मद्धामादिविलोकनेन निलयं ते प्राप्नुवन्ते मम ॥ ३४॥ चक्रांकग्रावसाम्यार्चनमगतनये एकरूपी
टं स्थितं मे॥ तस्यैवाशुचिपूजनं किल भवेत् पापौघदं केवलम् ॥ एकं मे शिवलिंगमेव नियतं संपूज्य मुक्तो
भवेत् ॥ बिल्वैः कोमलपल्लवैरहरहः भस्माक्षधृक् शांकरः ॥ ३५॥ भस्मत्रिपुंड्ररहितो मम लिंगपूजां कृ- ४९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लापि चोरनरकं स शिवे प्रयाति ॥ रुद्राक्षभूषण विवर्जित सर्वकायस्तत्पूजनं मम शिवेप्रिय कृत्स्न
वैव ॥ ३६ ॥ यस्तूर्ध्वपुण्ड्रकलिता धमकालदेशः संपूजयन्ममवरं शिवलिंगमीशे ॥ सोऽन्धं तमोहि
नरकं प्रसभं प्रयाति तत्पूजनं सुकृतमप्यकृतं सदा स्यात् ॥ ३७ ॥ यन्नानि दीक्षानियमेषु लिंगसंपूजनं पू
र्वतएव कार्यम् ॥ यावच्च तत्कालसमाप्तिमानं चाकृष्य पूजां रचयेत लिंगे ॥ ३८ ॥ संत्रेषु लिंगं चसदै
व पूजयेदुर्ल्लभ्यदेहं भसितत्रिपुण्ड्रैः ॥ रुद्राक्षवक्षोऽपि भवेत नित्यं त्र्यक्षार्चनाधुक्षित पातकौघः ॥
॥ ३९ ॥ नष्टे भिन्ने श्लथे वा मम जनि मवरं सज्यदाध्यं तथाप्सु ॥ तस्यैवाकृतिमारदीत नियतं संधीतचेत्
संधि कृत ॥ ४० ॥ लिंग प्रोक्षण संस्कृतिं पुनरुमे कुर्वीत संपूजयेत् ॥ शूद्रप्रतिष्ठित शिलाशिवलिंगमी
शो हृष्टं यदि क्षितिसुरैः कृतपुण्यनाशः ॥ ४१ ॥ तद्बाणलिंगसहितं यदि शूद्रलिंगं स्यादेव पुण्यफल
दं शिवदर्शनेन ॥ पाषण्ड शूद्र पतिता धमनीचदुष्टचंडालपुल्कसजनैः यदिस्पृष्टलिंगं ॥ देवत
थार्षमनुजैश्च स्वयंभुलिंगं संप्रोक्षितं भवति वै स्थिरजं चरं वा ॥ पत्रं त्रिनेत्रप्रियमेव बिल्वममपात्रमप्य
ग्निसुतेसुतात्वम् ॥ ४२ ॥ करोति मे लिंग समर्चनासु शुष्कं तथा पर्युषितं पवित्रम् ॥ नेतत्त्याज्यमुमेवदन्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰१० निर्गमाः स्याच्छुद्रकेणाहृतं॥ विध्या वाप्यविधानतो हृतमुमे श्रीपत्रमेवं प्रियम्॥४४॥ शुष्कं पर्युषिता-द-पू-

१०४ षितं च कीटसहितं न त्याज्यमेवं शिवे॥ तत्रालभ्यमहो तथान्यकुसुमं बिल्वाख्यया पातयेत्॥ रत्नस्व अ॰५०

र्णविनिर्मितोरुकुसुमं मादृक् च संक्षालितं पूर्वैर्युः प्रदिपादितं गिरिसुते सम्यक् पुनः पूजयेत्॥४५॥

तद्वत्क्षालितमेव बिल्वमगजे संक्षालितं पूजयेत्॥ तत्रालाभ यिधौ शिवार्चकजनैः निर्माल्यता नोचि-

ता॥ उत्तुंगं शांगलिंगं यदि सितभसितोद्धूलितांगाक्षसंगं॥ पापापारमहोत्तमांगसुमहाभंगापतत्पावेति

॥४६॥ वीतेदोषप्रदोषे प्रथितजनुजगन्नाथसंस्थात्सुरान्नुवत्॥ संवीक्ष्य निपमे गुणांभववरो भूयाद्दृशो शो-

मम॥ प्रदोषकाले शशिखण्डचूडलिंगं विलोक्य वृषभंगमुविषाणयोगे॥४७॥ तदंडसंस्पृष्टकोटि

नरो वरः॥ स सर्वतीर्थाप्लुतविग्रहो भवेत्॥ हरिं न बिक्षेत कदाचिदीशे॥ प्रदोषकाले यदि दर्शकं भवेत्॥

॥४८॥ प्रज्ञायुरूपाद्विरहो भवेत पुण्यस्य नाशः प्रभवेत तस्य॥ मन्दप्रदोषेषु विशेषदर्शिनो विभूतिभूषास-

हयोषवर्गाः॥ सानन्दमिन्दुशकलाभरणोत्तमांगलिंगार्चनेन रसुराश्च नयन्ति कालम्॥ ऋणत्रयापाक-

रणाय शस्तं प्रदोषकालीनशिवार्चनं मे॥५०॥ सदुःखदारिद्र्यविनाशकं शिवे नित्यं च नैमित्तिककाम ५०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दं च ॥ वारव्रते, द्विजगणेषु निषिद्धितेऽपि, न त्याज्यमेतदगजे किल सोमवारः ॥ ५१ ॥ सर्वेषु मासगणनासु विशिष्टमासो यच्छ्रावणाऽजे परमोऽपि स पुण्यभाक् स्यात् ॥ सोमा मास्वपि नक्तभोजनरतो भक्तोऽथ मुक्तो भवेत् ॥ ५२ ॥ मुक्तो वाप्यघसंचयेन गिरिजे मुख्यत्वमेवोच्यते ॥ शङ्के दुपवासकर्मणि सदा, नो चेद्दिवां त्यक्षेण ॥ ५३ ॥ क्षीणाचः किल शंकरार्चनरतो भुक्त्यैव मुक्तो भवेत् ॥ कालाष्टम्यां निशीथे शतपथगदिते यामिनीनाथचूड" ध्यानानन्देन, लिंगार्चनविधिनिपुणो, मूढ एव दंसः ॥ ५४ ॥ यस्यां पंचास्यलिंगं हृदि भुवि विहितं पूज्य बिल्वैस्तथाज्यैः ॥ हुत्वा मामगकन्यके शिवमुखैः सायुज्यमाप्नोति मे ॥ चतुर्दश्यामीशे शशिरहितपक्षान्त्यदिवसे निशीथव्याप्तिन्यां यदि यजति लिंगं मम परम् ॥ ५५ ॥ प्रशस्तं हस्तायां परिदलितबिल्वच्छदवरैः ॥ अपामार्गैः, मार्गं सकलयति मुक्त्यै, र्चनपरः ॥ क्षीरेणैव स्नातापराध मगजे, दध्ना सहस्नं, घृतैः ॥ स्याहस्नं दशकं, तथैव मधुना, तच्छायुक्तं वासिताम् ॥ ५६ ॥ दत्वा मल्लिंग मौलौ फलकुलजरसैः सर्वमीशे सहेयं" तस्मै तद्धितरामि भक्तिपरमानन्दं मुहुः शांभवं ॥ शास्त्रं प्राङ्मुखलिंगतोऽपि गिरिजे पार्श्वान्मुखं मोक्षदं" वायव्यां किल चंद्रभागकलितं तं प्राङ्मुखं नेयके ॥ ५७ ॥ यस्या चार्चां रचयेत

शिवर॰१० प्राङ्मुखगते पश्चान्मुखे वा शिवे ॥ तत्सान्मुख्यमपास्य घोरवदनं नैवार्चयेद्वै गृही ॥ ५९ ॥ प्रदक्षिणपदं ईशा॰द॰पृ॰
१०५ यदि क्षिपति पापसंक्षेपकृत् नमन्मयि सदा कमे विमलमुक्तिमार्गे शिवे ॥ लुठन्यदि पठन्मनुं शिवध्यानं अ॰५०
विमुक्त्याख्यकं सख्वा किल लुंठको भवति नीलकण्ठालये ॥ ५९ ॥ सव्यासव्यप्रक्रमो वर्णिनां वै कर्मे
क्षिनामुभयं तत्प्रशस्तं ॥ साष्टाङ्गा वै प्रणतिः सा प्रशस्ता शम्भोरेषा प्रक्रिया वै मनोज्ञा ॥ ६० ॥ गृहस्थो
वन्यो वा प्रकृति वरदाक्षिण्यमगजे वृषं चंडं सूत्रं पुंसूपि वृषाघं प्रभवति ॥ न शस्तं त्वेकं शतमवरसा
हस्त्रपरमं त्रयं चानत्वे कं पदि भ्रमरीति निर्यां जलि परः ॥ ६१ ॥ यदि शिववृषभान्तराभि गच्छेद्गुरुमी
शो प्रणतो हि, चंडकेशं ॥ बलमायुः पशवास्त्रि पुत्रा विनश्येयुस्त्वरया शिवेहितस्य ॥ ६२ ॥ पंच ब्रह्मैर्गृ
हस्थो ममजनिमवरं त्र्यंबके ब्रह्मचारी वन्यो धन्यो चरुद्रं जपति मनुवरं पूजयन् लिंगमेशम् ॥ क्षत्रोपी
श्वरलिंगपूजनविधौ नीलादिरुद्रं जपेत् ॥ वैश्यः पावनपावमानमनुभिः पंचाक्षरैः पूजयेत् ॥ ६३ ॥ सन्या
सी प्रणवेन लिंगमगजे संपूजयेत् पावनैः पत्रैर्भूमिनिपातितैः ताः नराश्चक्षीरुद्रपंचाक्षरैः ॥ तं त्र्ये त्र्यंबक
मंत्रितैः सुभसितैः संपूजयन्मुक्तिभाक् भस्माक्षादि विधारितां नमतनुः ज्ञानं मम प्राप्नुयात् ॥ ६४ ॥ ५१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४१ नद्यां गोष्ठे गृहे वा शिखरिशिखरके मन्त्रितैः शुभ्रसौतैः पुण्यदेशे वने वा ॥ बिल्वस्याधो शिवाग्रम
मयादि विमलं लिंगमर्चन् प्रशस्ताः ॥६५॥ तत्त्वेकाधिकमुत्तरोत्तरगुणं प्राहुः शिवार्चाविधौ गंगायां यदि
लिंगपूजनविधिः स्यात्कोटिपुण्यः शिवे ॥ धातुभ्यो रत्नलिंगं विमलविमलमहो पूजयेद्बाणलिंगे ॥
तस्मादप्यगजे रसेन्द्रककृते स्यात्कोटिलिंगार्चनं पुण्यं चापि दिशेत मुक्तिमपि वै नातोऽधिकं कोऽत्ये
ते ॥६६॥ शुद्धं चेद्यदि मुक्तिदायकमतो नो चेत्सुखायुःप्रदम् ॥ संतप्तायसचक्रचिह्नित तनुर्ने
क्षेत पूजाविधौ ॥ श्वानं चांत्यजसूतकं मलवतीं दृष्ट्वानुतिष्ठेच्छिवे ॥ स्नात्वा चैलयुतं पुनश्च भ
106 सितैरुद्धूल्य गात्रं तदा छित्त्वा शतरुद्रजापन शुचिः देवं यजेद्वै ततः ॥६७॥ न दृष्टिदुष्टं न विशिष्ट दुष्टदृष्टं
मीशेनैवेद्यमाहुः फलपुष्पदानं कनिष्ठजन्मापि भवेत तेन दत्त्वैव कुष्ठी प्रभवेत कुष्ठी ॥ निर्माल्यलं
घनमुमे बलपुष्टिहानिः तीर्थे शिवस्य न यथेष्टनियोजकं स्यात् ॥६८॥ दानं च शास्त्रमगजे कि
लशाम्भवेषु नान्यैरशैवजनुभिः विनयोज्यमाहुः ॥ शिवाभिषेकांबु पिबेद्य चचुं विंदुत्रयं वै शि
व पूजनान्तो ॥६९॥ नातोऽधिकं माह्यमुमे मलोदरे स्यान्मूत्ररूपं यदि पापकृत् भवेत् ॥ वंध्यं कु

शिवर०१० यो नन्दिवसमुमे विघ्यगवीपहं तं ध्येयं यत्तत्पदवरमहो पूज्यसंपूर्णकामः॥ ७०॥ लोका निष्टे स शिव भज ई.शा.द.पू.
१०.६ ना त भाजनं मुक्तये यो सो सर्वेषां वै विधिरयमुमे गोपनीयो मयोक्तः॥ मस्तं यद्भसितत्रिपुण्ड्रकलितं विश्वेश्व अ.५०
रे यन्नतं हस्तौ तौ शिवलिंगपूजनरतौ श्रोत्रौ च बिल्वाजे क्षौ॥ ७१॥ नसां यच्छिव पादपंकजलसत् सुष्यां
बुजाघ्रेयकं तन्नेत्रे सफले त्रिनेत्र बिलसत् लिंगावलोकेन तौ॥ तत्पादौ शिवलिंगधामगति दौ तत्
प्रक्रमे पूजतो॥ चित्तं तच्छिव मूर्त्ति चिन्तनरतं वाणी शिवाख्यास्तुतौ॥ ७२॥ हस्तं तस्य समस्त भाग्यमग
जे पापं विनाशं भवेत्॥ ७२॥ धन्यास्त एव हि तभस्मलसत्त्रिपुण्ड्राः मान्यास्त एव शिवलिंगसमर्चका
मे॥ अन्ये पुनर्भुवि भराय भवन्ति जन्या वन्या वनी प्रभव लोक खरादि कान्याः॥ ७३॥ यान्तु झिताहि
गिरिजे प्रभवन्ति शून्याः॥ ७३॥ विहाय शिवपूजनं किमिति कायदुःखाधिक श्रमाश्रम निषेवणे र्नियम
योगसंसेवनैः॥ अपायदमिदं शिवे विमलमुक्तिसंदर्शने॥ उपायमिदमेव यच्छिवकथासुसक्तं मनः॥
॥७४॥ सुगमो ऽयं विधिरेक केवलो निगमान्तेषु नितान्त गोप्यथोक्तः॥ आगमादधिक पापवर्गहृत् ५२
भागनेत्रघ्नमुदे भवतकतौ॥ ७५॥ यदा योनिवक्त्रोज्झितोजीवसंघः तदेवामुकालास्य केसंयोतत॥ तदे
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मो...ने एव                                                                  ष्व

तस्य संयोगवशेनैक धन्यं मदन्यं न मन्ये धराधीशकन्ये ॥ ७६ ॥ आयुर्गीलिनप्रदृष्टिततांबुदपतत्त्वायुरत्थवृक्षा
गतव्यालोलाधरवक्त्रपल्लवगलल्लंबांबुवद्बुद्बुदम् ॥ तस्मिन्नायुषि शांगलिंग भजनं स्याच्चेत्तदायुः शि
वे सार्थक्यं समुपैति, तद्विरहितं व्यर्थं भवेत्कष्टकृत् ॥ ७७ ॥ यमभटविकटाभटीरवं निकटे भूयतरा
वतद्वहानाम् ॥ वरघोटारि विषाणकोटिधृष्टाः परिद्रवयन्ति द्रुमकृतान्तवृक्षाः ॥ बाधागाध भवहृ
दान्तरगताः तापत्रयाकीशुभिः संतप्ता जनुनाशसंस्थितिमहादुःखाभिघातोद्यताः ॥ ७८ ॥ विष
107 यामिषभोजिनो मनुष्या झषजाला इव कालजालिकाहृतान्ते ॥ कालव्यालोरुदंष्ट्रानलकुलतुल
नाहीनदुःखार्दितांगाः ॥ तेमी मानववेशेन मौढ्यगतयस्स्वास्यांतरालागतं कीटं जीवितुमेव
भक्षयन्ति सः तद्विमूढा नराः ॥ कालेचाप्यसमीक्ष्य भोगनिरतास्तेस्था वरत्वभ्रमैः नित्यानित्यवि
वेकशून्यमतयो तिष्ठन्ति विद्माशुनाः ॥ ८१ ॥ आयुःप्रयाति गिरिजे तटिनीरयांबुप्राग्भागसंगतमिव
प्रसरत्न पश्चात् ॥ व्याध्याधिभिश्च नियतं नरका नराणां तस्मान्नारायदि शिवेर्चित एव साधु ॥ ८२ ॥
भवोरुविपिनावनीप्रभवमृत्युसंस्थाहृदः तरान्ता विषयाचटप्रसृतकाममषट्कटकम् ॥ ८३ ॥ गदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० श्च मृगसप्रभाः परिचरन्ति तस्मिन्दिवे जरा वृकतृषाशिवावृतमपारदुःखद्रुमैः ॥ ८४ ॥ विधिसृष्टिईशान्दनू:
गिरीन्द्रजातधाराप्रभावासा तटिनी भवोरुभीरा ॥ जनिमृत्युविवर्त्तितर्त्तिफेना जगदेतन्नयते यमांअ०५०
१०८
बुराशिम् ॥ ८५ ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ तदेवं विधिमाकर्ण्य शिववक्त्राद्गिरीन्द्रजा ॥ तु
ष्टा तुष्टाव हृष्टान्तःकरणेन महेश्वरी ॥ ८६ ॥ ॥ देव्युवाच ॥ ॥ वसुधाधरहार वासशांभो वसु
धाराधिप पूज्यपाददेव ॥ ससुधाधर शेखर त्वमीशोऽस्यसुनाथोऽस्य धराश्रितार्धदेहः ॥ ८७ ॥
ताराकारसुहीरहारक भवत्काकोदराकारधृक् कर्पूराभकलेवरादिविलसन्मारांगभस्माक्षधृ
क् ॥ पारावार भवोरुमाम्महावैश्वानरा याद्यते सारासारविचारकारण विभो पादौ भजाम्येव
ते ॥ ८८ ॥ भवभव शंकर हर मृड गरधर कुरु कुरु करुणां शशिमौले ॥ शिव तव वदनांबुजरस
मधुना मधुविधुसुरसं विधुनोति ॥ ८९ ॥ ॥ श्रीस्कन्द उवाच ॥ उमापति वृंदं द्वंद्वं न हि भ
जन्ति मूढा जनाः ॥ विमूढमतयो भृशं परिविशन्ति गाढं तमः ॥ असारभवसागरे सुचिरमेव पा 43
पराश्चरन्ति विषयातुराः शिवपदार्चनावर्जिताः ॥ ९० ॥ अंशोऽयं दशमः सदा शमधनैः सेव्यो

तरिः
शिवर.१.यमीशार्चकैः॥ आशापाश विहीन चारुमतिभिः संसेवनीयो विधिः॥ घोरापारविकारसागररतिः ईशा.द.पू.
सम्यक्श्रुतोऽयं भवेत्॥ चंद्रोत्तंसकिरीट पाद भजने चित्तं प्रवृत्तं भवेत्॥११॥ हृत्त्वा पादविरहीभ अ.५०
वेत नियतं पापैर्विमुक्तो भवेत्॥ गोभूहिरण्यकलधौतनगप्रभोरु दानैरनेक जनुभिः यदि पुण्य
भाक्स्यात्॥ तस्यायमीक्षणपथे भवति प्रकाम मस्यां शले शमहिमा गदितस्तवाद्य॥१२॥
॥ इति श्री शिवरहस्ये दशमांशे ईश्वराख्ये शिवगौरी संवादे पूर्वार्धे पंचाशोऽध्यायः॥
॥५०॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ अन्नपूर्णा गंगा विश्वेश्वरार्पणमस्तु॥ ६ ॥ ५४

१०४

॥ श्रीः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०८

इतिश्री शिवरहस्यपूर्वार्धदशमांशः समाप्तः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथशिवरहस्यदशमांशउत्तरार्धप्रारंभः॥

109 श्रीकाशीविश्वेश्वरायनमः॥शिवायगुरवेनमः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० श्रीगणेशायनमः॥ ॥श्रीशारदायैनमः॥ ॥श्रीगौरीशंकरायनमः॥ ॥श्रीदक्षिणामूर्तयेनमः॥ ॥अथशिवरहस्यदशमांश ई०द०उ०
१ उत्तरार्धप्रारंभः॥ ॥इंदुखंडशिरसोवरात्मजं वक्रतुंडमगजातनूभवं॥ नौनुमःप्रणतदुःखखंडनं विघ्नपंस्वरदखंडसत्करं॥१॥॥ अ०१
मुनिरुवाच॥ ॥नमस्तेतारकाराते पुरारातिकथारते॥ हरतेवृजिनौघानां स्मरतेशिवपादयोः॥२॥ शिवधर्मोमहासारः सर्वधर्मोत्त
मोत्तमः॥ शिवप्रसादजनकः सर्वेषामेवदेहिनां॥३॥ वर्णाश्रमायासधर्मः सुकरः सर्वदाकथं॥ किंतेनाचरितेनेशः प्रसीदतिमहेश्वरः
॥४॥ क्षिप्रंप्रसादजनको देवदेवस्यशूलिनः॥ तस्यस्वरूपमधुना वदसेनापतेधुना॥५॥ शिवद्रोहः कथंप्रोक्तः यः प्रायश्चित्तवर्जितः॥
तस्यस्वरूपं वदमे श्रोतुमुत्कंठतेमनः॥६॥ कोवास्यप्रश्नभारस्य वक्तात्वादृगृतेनघ॥ पावयास्मान्कथासारैर्गणान्देवान्मुनीनपि॥
॥७॥ ॥सूतउवाच॥ ॥इत्थंस्कंदस्तदापृष्टोजैगीषव्येनसत्तमः॥ उवाचनत्वादेवेशंवीक्ष्यदेवान्मुनीन्गणान्॥८॥ ॥
श्रीस्कंदउवाच॥ ॥स्मरारातिप्रसादायक्षिप्रंधर्मोयमुत्तमः॥ शिवधर्मोडुपःश्रीमानुत्तारकउदाहृतः॥ संसारार्णवमग्नानां
पापिनांसुकृतामपि॥ कैलासशिखरेगौर्यापुरापृष्टोमहेश्वरः॥१०॥ शिवधर्मंमहासारंअल्पायासंमहत्फलं॥ अनिष्कृतिमहत्तर
पापंशिवद्रोहंतथामुने॥ सेतिहासंवदद्गौर्यैमयातच्छ्रुतमोजसा॥ तच्छृणुष्वविशेषेणसर्वैभिःसावधानतः॥१२॥ रत्नप्रासादम
ध्यस्थं कैलासेंबामनोहरं॥ प्रांजलिर्विनयोपेता उवाचपरमेश्वरं॥१३॥ सुप्रसन्नंमुखांभोजंरत्नाभरणभूषितं॥ अनेकचंद्रसू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगिनि भासा भासितविग्रहं ॥१४॥ त्रिपुंड्रविलसत्फालं भस्मपांडुरशोभितं ॥ सुधाकरधरं शंभुं गंगाधरमुमासखं ॥१५॥ नंदि
भृंगिमहाकालचंडतंडुनिषेवितं ॥ षड्वक्रेण भवक्रेण पार्श्वतः परिसेवितं ॥ उवाच देवी सानंदं विनयोदारसद्वचः ॥ १६ ॥
श्रीदेव्युवाच ॥ ॥ भगवन्भवभूतेश व्योमकेश सदाशिव ॥ वृषध्वज विरूपाक्ष कलधौतगिरिप्रिय ॥१७॥ त्र्यंबक जगन्मू
र्ते सच्चिदानंदविग्रह ॥ कालकाल पुराराते मन्मथांधकसूदन ॥ नीलकंठ महादेव सांब सर्वजगत्पते ॥ विश्वसर्गस्थितिलय
प्रकाशकरलोचन ॥१८॥ गंगाधर विरूपाक्ष दक्षदीक्षापहारक ॥ प्रसीद देव सर्वज्ञ विज्ञप्तिः काचिदस्ति मे ॥२०॥ तां तूर्णं कुरु देवे
श शीघ्रं कर्णरसायनं ॥ भवार्णवनिमग्नानां प्रजानामविवेकिनां ॥२१॥ क्षिप्रप्रसादजननमल्पायासं महत्फलं ॥ शिवधर्मं
महापुण्यं सर्वधर्मोत्तमोत्तमं ॥२२॥ शिवद्रुहां पापभोगं कथयस्वामरेश्वर ॥ शिवधर्मप्रकारः कः शिवद्रोहश्च को भवेत् ॥२३॥ श्रुत्वा
110 तेऽभिमतस्ते शिवधर्ममहत्फलं ॥ संप्रापुस्तव सान्निध्यं विष्णुब्रह्मादिदुर्लभं ॥२४॥ दक्षिणोत्तरकैलासवासदं परमेश्वर ॥ भक्तानां
तारतम्येन ब्रह्मक्षत्रविशां प्रभो ॥२५॥ संकराणां च शूद्राणां तिरश्चामपि भोगदं ॥ देवगंधर्वयक्षाणां मुनीनां च गणत्वदं ॥२६॥ सारूप्यं
चैव सामीप्यं सायुज्यं च सलोकतां ॥ स्वभक्तितारतम्येन भक्तानां तव सिद्धिदं ॥२७॥ शिवधर्मं महापुण्यं सेतिहासं वद प्रभो ॥ यच्छ्रुत्वा निग
मैर्गोप्यं स्मृतिभिर्नोदितं क्वचित् ॥२८॥ स्मर्तारः स्वाधिकारेण प्रवदंत्यल्पसिद्धिदं ॥ वर्णाश्रमायासधर्मैई बद्धे गुण्यपापदं ॥२९॥ कृतेय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० त्यजपुण्यं च मुनयोऽन्येवदंत्यपि॥तद्धर्माचरणेनैव विश्रांताजनताभुवि॥३०॥कथंत्वद्धृतंशंभो धर्मंजानंतिपामराः॥येनची ई०र०उ
२ र्णेनमुक्तास्युःदेवतिर्यङ्नरागणाः॥३१॥शिवद्रोहांपापभोगोनिष्कृतिर्वामुनीश्वरैः॥शिवधर्मशिवद्रोहस्वरूपंतेनवैश्रुतं॥३२॥ अ०१-२
श्रुतिस्मृतिपुराणेषु नवैदृष्टेन चश्रुतः॥तैश्चषोडशदानानां गोभूम्यन्नप्रदायिनां॥३३॥ मखादिकर्मकर्तॄणां स्वर्गभोगंव
दंतिते॥महापापादिमुख्यानां क्षुद्राणां महतामपि॥३४॥प्रोचुस्तेनिष्कृतिंशास्त्रे मुनयः स्मृतिपारगाः॥शिवधर्मशिवद्रोह
स्वरूपंतैर्नहिश्रुतं॥३५॥तस्मादेतत्फलंशंभो शिवद्रोहस्यनिष्कृतिः॥तैर्नोक्तंदेवदेवेश त्वमेववदमेधुना॥३६॥देव्युवाच॥॥
हे कृत्तिवासकलधौतनगाग्रवास चंद्रावतंस मुनिमानसराजहंस॥मद्वक्त्रपद्मसुविकासनमुख्यहंस स्कंदेभवक्कूपारि वक्त्रे
लोकनमंदहास॥३७॥ ॥इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे प्रथमोध्यायः॥१॥ ॥श्रीकाशीविश्वेश्व
रार्पणमस्तु॥ ॥श्रीईश्वरउवाच॥शृणु शैलसुते बाले विशालेविमलोज्वले॥तिलकांकितसत्फाले कर्णालंबिमहोत्प
ले॥१॥तवोदारवचोमाध्वी साध्वीसर्वानुकंपिनी॥संसाराब्धितरेः पुण्यआतरस्ताकरोनृणां॥२॥सर्वेधर्माः श्रुतिप्रोक्ता यां
जनाध्यायनेफलाः॥स्मृत्युक्ता वर्णधर्मास्ते पौराणाव्रतकीर्तनाः॥३॥सर्वभोगप्रदाः सर्वेभुवि दुरवैकसाधनाः॥फलांतपा
तदाधर्माइष्टापूर्तादयोंबिके॥४॥इष्टतुष्टाश्च मुनयोपूर्तागर्तगतिप्रदाः॥देवभोगप्रदा एते पशुधर्माः स्मृताः शिवे॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पशवो देवताः सर्वास्तेषां पतिरहं शिवः ॥ स सर्वधर्मराट् देवि अल्पायासो महत्फलः ॥ ६ ॥ पतिधर्मो मम प्रोक्तः शिवधर्मोऽयमेव हि ॥
भक्तानां अधिकारोऽत्र शिवधर्मे सनातने ॥ ७ ॥ पुरुषार्थप्रदोऽप्यत्र क्षिप्रं मत्प्रीतिदायकः ॥ इष्टापूर्तात्मकाः केचिज्जपाः प्रोक्ताः क्रतवा
स्तथा ॥ ८ ॥ अतिरुद्र महारुद्र शिवहोमाग्निकार्यतः ॥ भावनाः शिवधर्मेऽत्र कीर्तिताः परमेश्वरि ॥ ९ ॥ मन्मूर्तिध्यानतो देवि शिवधर्मो
हि मानसाः ॥ कायिकाः शिवधर्मो हि शिवलिंगे शिवार्चनं ॥ १० ॥ बिल्वपत्रार्जनं हस्तैः पादाभ्यां च प्रदक्षिणाः ॥ अंगेन लुंठनं शंभोः
प्रणामोपि च भक्तितः ॥ ११ ॥ स्वांगे भस्मत्रिपुंड्रादि धारणं मनुसप्तभिः ॥ रुद्राक्षधारणं स्वांगे कायिकाः शिवधर्मजाः ॥ १२ ॥ शिवोत्स
वालोकनार्थं गमनं च निवासिता ॥ वाचा धर्मः स्मृतो ह्येष रुद्रपंचाक्षरी जपः ॥ १३ ॥ शिवनाम्नां जपश्चैव तिस्तोत्रं शंभोस्तु वाचिकः ॥
शिवधर्मोऽत्र कथितो वाचिकोऽयं महेश्वरि ॥ १४ ॥ नेत्राभ्यां लिंगवीक्षा च शिवमूर्तेर्निरीक्षणं ॥ शिवोत्सवादिवीक्षा च चाक्षुषो धर्म उ तें मीरी
च्यते ॥ १५ ॥ श्रावणोऽयं महाधर्मः शिवशब्दश्रवस्तथा ॥ शिवे शिवपुराणानां श्रवणं लेखनं विदुः ॥ १६ ॥ मार्जनं पेषणं पुष्पाहरणं
तोयपूरणं ॥ मालाग्रथनमात्रोक्तं दीपधूपानुदापनं ॥ १८ ॥ नैवेद्यपाककरणं शिवागारे गृहेपि वा ॥ पुष्पारामादिकरणं गोपुराट्टाल
बंधनं ॥ १९ ॥ आलये कूपखननं शिवातीर्थानुबंधनं ॥ शिवलिंगोद्धृतिः प्रोक्ता अष्टबंधवितानतः ॥ २० ॥ मृद्दार्विष्टकपाषाणैः शि
वागारानुबंधनं ॥ धातुपात्रोपकरणं शिवागारे प्रदापनं ॥ २१ ॥ वृषवाहादिकरणं पुष्पस्यंदनकल्पनं ॥ भेरीमृदंगशंखानां तौर्यत्रिक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० ३ निवेदनं ॥२२॥ नाट्यं गानप्रदानं च वीणादुंदुभिदापनं ॥ वेदपारायणस्यार्थे ब्राह्मणानां च रक्षणं ॥२३॥ पूजार्थं देवदेवस्य पद्मोत्पलवना ६०८०५० अ०२
र्पणं ॥ बिल्वानां रोपणं देवि रंभाम्रामलकादिकं ॥२४॥ नारिकेलमधूकानां जंबीरवनरोपणं ॥ पुंड्रेक्षुयवगोधूमशालिभूमिप्रदापनं ॥२५॥
गजाश्वोष्ट्रखराजाविगोवृषादिप्रदापनं ॥ धान्यागारादिकरणं शिवागारे महेश्वरि ॥२६॥ तद्रक्षणं वीक्षणं च तद्वृद्धिपरिकल्प
नं ॥ दासीदासप्रदानं च शिवक्षेत्रेषु शैलजे ॥२७॥ शिवार्चकानां भरणं धान्याच्छादनगोधनैः ॥ भूषणानां प्रदानं च वस्त्राणां दाप
नं शिवे ॥२८॥ छत्रध्वजपताकाश्च चामरादर्शदापनं ॥ दीपमालाप्रदानं च तैलैरपि च गोघृतैः ॥२९॥ पुष्पमंडपनिर्माणं पर्वकालेषु शं
करि ॥ पंचामृतैः पंचगव्यैः लिंगबेरादिसेचनं ॥३०॥ तथा फलरसैः पुष्पैः नारिकेलप्रपानसैः ॥ जंबीरगंधकर्पूरइक्षुरंभारसा
र्पणं ॥३१॥ त्रिकालेषु तथा लिंगे प्रदोषे पर्वणोर्द्वयोः ॥ विषुवायनयोर्वापि संक्रांतिषु च पातयोः ॥३२॥ षडशीतिमुखे वापि
महा ८ ग्रहणे सोमसूर्ययोः ॥ महाभिषेककरणैः अभ्यंगकरणैः शिवे ॥३३॥ यक्षकर्दमलेपैश्च दीपैः कर्पूरखंडजैः ॥ ग्रीष्मकाले ग
लंतीनां प्रदानं शिवमस्तके ॥३४॥ स्वर्णरौप्यघटैः पुण्यैस्ताम्रपैत्तलकांस्यजैः ॥ मृद्भैर्वा महादेवि शीतलांबुप्रपूरितैः ॥ पाटलो
सीरकर्पूरकरवीरादिवासितैः ॥ गंधानुलेपनं लिंगे शिवागारादिलेपनं ॥३६॥ शिववेश्मसु चाग्रीष्मे शीतलांबुप्रसेचनं ॥ सांम्राणिगु
ग्गुलूद्दाम धूपसौरभ्यकल्पनं ॥३७॥ वीजनं तालवृंतैश्च मायूरव्यजनैः शिवे ॥ तत्र पानकदानैश्च भक्ष्यभोज्यनिवेदनैः ॥३८॥ दध्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंक्ति१- शत साहस्र धाराणां कलशस्नपनैः शिवे ॥३९॥ सव्यदक्षिणशंखानां गोशृंगासेचनैरपि॥ कृसरान्नप्रदानैश्च शिवलिंगनिवेदनैः॥

न्नविनिवेद्यैश्च तांबूलविनिवेदनैः॥४०॥ नवरत्नाभिषेकैश्च नवधान्याक्षतार्पणैः॥ सौवर्णरत्नबिल्वानां पुष्पपत्रार्पणैस्तथा

॥४१॥ उत्पलासितमालानां प्रदानैश्चापि पार्वति॥ सहस्रबिल्वपूजाभिर्लक्षकोटिदलार्चनैः॥४२॥ तत्तत्कालोद्भवसुमनसामा

मर्चनैः शिवे॥ ॥श्रीईश्वर उवाच॥ ॥एवंते शिवधर्मसारमखिलं प्रोक्तं शिवे नूनमप्यद्योक्तं च सुगोप्यमप्यतितरां मत्प्रेमह

द्भक्तिभाक्॥ जानन्नेव करोति मत्फलमुमे भुंक्ते स कैलासगो मत्यार्श्वे गणपुंगवश्च स भवेद्यो देवधर्मं चरेत्॥४३॥ ॥इतिश्रीशि

वरहस्ये ईशानाख्ये दशमांशे उत्तरार्द्धे शिवगौरीसंवादे शिवधर्मकथनं नाम द्वितीयोध्यायः॥२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥

श्रीईशानाय नमः॥ ॥श्रीदेव्युवाच॥ ॥देवदेवारविंदाक्ष पूजितांघ्रिसरोरुह॥ मूलमध्यांतरहित सनातन जगत्पते॥१॥

112 शिवधर्मस्वरूपं मे त्वयोक्तं परमेश्वर॥ शिवद्रोहः किंप्रकारो विस्तराद्वद शंकर॥२॥ निस्तार रहितः सोद्य श्रोतुं कौतूहलं मम॥

श्रीस्कंद उवाच॥ ॥पार्वत्यैवं पुरा पृष्टः कैलासे परमेश्वरः॥ तामुवाच प्रसन्नात्मा जैगीषव्य शृणुष्व मे॥३॥ शिवद्रोहान्स्मर

णातो कंपते मे मनो मुने॥ तथापि शृणु वक्ष्यामि शिवेनोक्तं श्रुतं मया॥४॥ मुने त्वं गणपैः सार्धं देवैर्मुनिभिरेव च॥ ॥श्रीईश्वर

उवाच॥ ॥शिवे त्वं शृणु कल्याणि शिवद्रोहः सुनिष्ठुरः॥ यच्छ्रुत्वा न मनो भूयाच्छिवद्रोहे महेश्वरि॥५॥ विभूत्युद्धूलनत्यागः

त्रिपुंड्रधारणं शिवे॥ शिवद्रोहः स विज्ञेयः प्रायश्चित्तविवर्जितः॥६॥ रुद्राक्षधारणत्यागः सर्वांगेषु महेश्वरि॥ शिवद्रोहः स०॥७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचाक्षरजपत्यागः प्रसंगादपि शंकरि ॥ शिवद्रो० ॥ ८ ॥ रुद्राध्यायजपत्यागः सर्वदा देवि पूजने ॥ शिवद्रो० ॥ ९ ॥ शिवलिंगार्चनत्यागो
नित्यमेकाहमेव वा ॥ शिवद्रो० ॥ १० ॥ प्रदोषपूजनत्यागः सोमवारेष्वमीषु च ॥ शिवद्रो० ॥ ११ ॥ प्रदोषसोमभूतासु अष्टमीषु दिवा भुजां ॥ शि
वद्रो० ॥ १२ ॥ बिल्वपत्रार्जनत्यागो शिवलिंगार्चनाय च ॥ शिवद्रो० ॥ १३ ॥ शिवध्यानपरित्यागो हृदये परमेश्वरि ॥ शिवद्रो० ॥ १४ ॥ म
न्त्रिकालेपि नः फाले न प्रचक्रांगकाः सदा ॥ शिवद्रो० ॥ १५ ॥ भूतिरुद्राक्षहीनं च महेशस्यैव पूजनं ॥ शिवद्रो० ॥ १६ ॥ शिवलिंगादिसान्नि
ध्यमन्यदेवार्चनं शिवे ॥ शिवद्रो० ॥ १७ ॥ भूतित्रिपुंड्रफालं यो दृष्ट्वा मूढो न नंदति ॥ शिवद्रो० ॥ १८ ॥ रुद्राक्षधारिणं दृष्ट्वा यो मूढो नाभिनं
दति ॥ शिवद्रो० ॥ १९ ॥ पंचाक्षरजपासक्तं दृष्ट्वा यो नाभिनंदति ॥ शिवद्रो० ॥ २० ॥ रुद्राध्यायजपासक्तं दृष्ट्वा० ॥ शिवद्रो० ॥ २१ ॥ अनालोक
नमीशस्य अनभ्यर्च्यान्नभोजनात् ॥ शिवद्रो० ॥ २२ ॥ अनिवेद्यान्नभोक्तारः जलं तांबूलमेव वा ॥ शिवद्रो० ॥ २३ ॥ शिवनामपरित्यागो
विष्णुनाम्नश्च कीर्तनं ॥ शिवद्रो० ॥ २४ ॥ शिवं यो मनुते मूढो विष्णुब्रह्मसमं शिवे ॥ शिव० ॥ २५ ॥ शिवरात्र्यान्नभोक्तारः शिवशैवव्रतेषु च ॥ शि
व० ॥ २६ ॥ शिवोत्सवशिवक्षेत्रे गमनालोकनोज्झितिः ॥ शिव० ॥ २७ ॥ शिवालयध्वंसनं च शिवतीर्थस्य नाशनं ॥ शिव० ॥ २८ ॥ शिवारामछेद
नं च शिवकूपप्रपूरणं ॥ शिव० ॥ २९ ॥ स्नानीयहरणं शंभोर्गंधतैलादिहारणं ॥ शिव० ॥ ३० ॥ कदलीनालिकेलाम्ररंभाजंबीरहारणं ॥ शिव
द्रो० ॥ ३१ ॥ शिवपूजोपकर्तॄणां हरणं परमेश्वरि ॥ शिव० ॥ ३२ ॥ शिवालये शिवारामे मलमूत्रोज्झितिस्तथा ॥ शिव० ॥ ३३ ॥ विनाशकरणं



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रुंभोःकृत्स्नस्यमेहेश्वरि ॥ शिवद्रो० ॥ ३४ ॥ शिवक्षेत्रसमत्वेनविष्णुक्षेत्रानुचिंतनं ॥ शिवद्रो० ॥ ३५ ॥ बिल्वानांछेदनंदेविपुष्यारामं
विनाशनं ॥ शिव० ॥ ३६ ॥ शिवेशिवपुराणानांनिंदनाश्रवणंतथा ॥ शिव० ॥ ३७ ॥ शिवनाम्नोविनिंदाचअन्यनामप्रशंसनं ॥ शिव० ॥ ३८ ॥
शिवभक्तविनिंदाच अन्यभक्तार्चनंमुदा ॥ शिव० ॥ ३९ ॥ अविमुक्तविनिंदाचज्ञानवाप्यादिनिंदनं ॥ शिव० ॥ ४० ॥ शिवोत्तमांगजातायाःगं
गायाश्चविनिंदनं ॥ शिव० ॥ ४१ ॥ निर्माल्यफलपुष्पांबुसोमसूत्रस्यलंघनं ॥ शिव० ॥ ४२ ॥ शिवनिंदाश्रवोनित्यंहर्षेणपरमेश्वरि ॥ शि० ॥ ४३ ॥
प्राणत्यागोदेहिनांतुदर्शनात्स्पर्शनात्तथा ॥ शिव० ॥ ४४ ॥ निंदाचशिवभक्तानांतेषांवृत्तिपरिग्रहः ॥ शिव० ॥ ४५ ॥ शिवभूम्यादिहरणेहा
रकाणामुपेक्षणं ॥ शिव० ॥ ४६ ॥ गवादिहरणंशंभोःतत्पयःपानमेवच ॥ शिव० ॥ ४७ ॥ वृषाश्वगजगोजाविहरणंमारणंशिवे ॥ शिव० ॥ ४८ ॥
113 तैलापहरणंशंभोर्गंधमाल्यादिहारणं ॥ शिव० ॥ ४९ ॥ शिवधर्मेषुविघ्नानांकरणंमनसाशिवे ॥ शिव० ॥ ५० ॥ शिवधान्यापहरणंशिवछा
दनहारणं ॥ शिव० ॥ ५१ ॥ शिवस्वर्णापहरणंरत्नानांहरणंमुदा ॥ शिव० ॥ ५२ ॥ शिवदास्याभिगमनंहरणंपरमेश्वरि ॥ शिव० ॥ ५३ ॥ शिव
वाद्यापहरणंघंटानांहरणंशिवे ॥ शिव० ॥ ५४ ॥ शिववृक्षादिहरणंस्वगृहस्यचबंधनं ॥ शिव० ॥ ५५ ॥ शिवालयेतीर्थवरेमहामार्गस्यना
शनं ॥ शिव० ॥ ५६ ॥ शिवव्रत्युपरोधश्च असूयाशिवदर्शने ॥ शिव० ॥ ५७ ॥ ॥ श्रीईश्वरउवाच ॥ ॥ एवंशिवद्रोहरतात्मनांशिवेननिष्कृ
तिर्नापिचनिस्तरःसदा ॥ कदाचिदेवाद्यनकल्पकोटिभिःतांदुर्गतिंवर्णयितुंनशक्यः ॥ ५८ ॥ इच्छेसदादेविननारकोद्भूतेंपश्यामितेषांन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० तुसौरिलक्षकैः॥ ॥इतिश्रीशिवरहस्ये ईशानाख्येदशमांशेउत्तरार्धे शिवगौरीसंवादे शिवद्रोहकथने तृतीयोध्यायः॥३॥ ॥ ई०द०उ०
५ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ॥शृणुदेविप्रवक्षामिनानारत्नविचित्रिते॥ अ०४

कदाचिन्ममकैलासेशिवधर्मप्रशंसनं॥१॥तत्कर्तॄणांफलंदेवि सेतिहासंवदाम्यहं॥सिंहासनवरासीनंचतुर्बाहुंत्रिलोचनं॥२॥नव चंद्रकलामौलिंपंचास्यंनागभूषणं॥अंबिकासहितंमांतुस्कंदेभाननसेवितं॥३॥चामराभ्यांवीज्यमानंतरुणार्कलसच्छवि॥सुप्रस न्नमुखांभोजंपंचब्रह्मादिदैवतं॥४॥भासमानंस्वांगभासाकलधौतमहागिरिं॥नंदिभृंगिमहाकालचंडिनंदीशसेवितं॥५॥ तुंडुंडुंडुगणकसोमनंदिसुनंदकैः॥वीरभद्रमहाभद्रदिव्यकालाग्निरुद्रकैः॥व्योमरुद्रमहारुद्रदेवरुद्रादिसेवितं॥कालभैर व संहाग्निभैरवाद्यभिसेवितं॥७॥कपालखड्गांकुशधरमहाभैरवसेवितं॥नागहारमहापाशघंटामुद्गरशूलधृक्॥८॥चंद्रार्क शेखरोत्भासिमस्तकेरश्मिमन्युभिः॥गणेंद्रैर्वारणेंद्राभैर्मृगेंद्रसमविक्रमैः॥९॥तथान्यैर्गणवृंदैश्च नानावेषैर्दुरासदैः॥वानराख मुखैर्भीमैस्तरक्षुवृकगोमुखैः॥१०॥सर्पास्यैर्गजगोमायुअश्वश्वोष्ट्रमुखैःशिवे॥मयूरशुकमार्जारसूकरव्याघ्रवक्त्रकैः॥११॥ मन्युसिंहमुखैर्भीमैर्भोगिभूषांगभूषणैः॥पिचिंडिलैरूर्ध्ववक्त्रैः करालैर्विकटैस्तथा॥१२॥ऊर्ध्वनासामहानासामहोष्ठैर्लंबक र्णकैः॥उन्नतैर्वामनैर्मुंडैःजटिलैःशरभास्यकैः॥भस्माभ्यक्तैस्त्रिपुंड्रांकैःसर्पहारैर्विभूषणैः॥मुसलोलूखलधरैःशूलहेतिगदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धरैः॥१४॥बाणबाणासनकरैः व्याघ्रेभांबरधारकैः॥मृगत्वचालंकृतांगैः वल्लकीहल्लकीकरैः॥१५॥महाडमरुभेरीणांशंख
ढक्कासमस्वनैः॥निःसाणमर्दलकरैः कपालावलिभूषितैः॥१६॥दैत्येंद्रा मां पुराभ्यर्च्य तामसाच्च्योप्रभावतः॥प्रापुरेवंगणात्वंमे
नित्यंप्रहसनंमम॥१७॥विनोदहेतु कैलासेसंमतेगणपोत्तमाः॥नृत्यंतिप्रहसंत्यन्येवादंतेगीतकौशलैः॥१८॥मड्डुमड्डुमझ्झ
र्झूकपटहानकगोमुखान्॥हल्लकींवादयंत्यन्येहल्लीसंलास्यमातनुः॥१९॥ त्वयासहाहंकैलासेतान्पश्यामिगणोत्तमान्॥ततः
कतिपयेकालेबहुलेपरमेश्वरि॥२०॥कैलासमूलभागस्थजंबूद्वीपभुविस्थिताः॥भारतेपुण्यवर्षेवैकेचिद्भक्तवरामम॥२१॥चातुर्व
र्ण्येषु विख्याता ब्रह्मक्षत्रविशस्तथा॥शूद्रास्तथान्येदेवेशि शिवधर्माणितन्वते॥काश्यांकांच्यामवंत्याचअयोध्यामधुरा सुच॥पु
114 ष्करेचकुरुक्षेत्रे प्रभासेरुद्रकोटिके॥२३॥कालंजरेमहाकाले केदारेवनखंडके॥प्रयागेपृथुशैलेच चित्रकूटे महेश्वरे॥२४॥त्र्यंबकेचैव
गोकर्णे श्रीशैले पुंडरीकके॥श्रीकंठेचैवहालास्ये रामेशेवेणुकानने॥शुचींद्रे पापनाशेच पुण्येचोत्तरकोशके॥रत्नाद्रौमातृशैले
चतत्पाज्योतौचजंबुके॥२६॥घृतस्थानेचजप्येशे तंजेशेकुंभघोणके॥मध्यार्जुनेत्रिकोटेच कुद्दालेचमयूरके॥२७॥श्रीका
लेचघटेशेच श्रीवांछेचजयायुके॥वल्मीकेवेदविपिने दुर्गेशे तेजनीवने॥२८॥सुंदरक्षीरविपिनेमंगलेकंतुकेपुरे॥ताम्रपर्ण्याः
सह्यजायाःपिनाकिन्यास्तटद्वये॥२९॥गोदावर्याश्चकृष्णायाःहस्तिकातटयोर्द्वयोः॥पयोष्ण्याश्चतुंगायानर्मदायास्तट

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० द्वये॥३०॥यमुनागंगयोस्तीरे दृषद्वत्यास्तटद्वये॥अन्यासामापगानां तु तटयोः क्षेत्रजा नराः॥शिवधर्मं वितन्वंते बहुपुण्यवशादुमे॥ ॥ ६० द०५०
८ एतस्मिन्नन्तरे तत्र विमानवरमास्थिताः॥३२॥नानाध्वजपताकाढ्यमुक्तादामविचित्रितैः॥अत्यर्कभासमानैश्च वृषध्वजविभूषितैः॥३३॥ अ०४-५
माहेश्वरैः गणेंद्रैश्च पूजितास्तेष्वधिष्ठिताः॥धूयमानाश्चामरौघैः वीज्यमानाश्च वीजनैः॥३४॥रुद्रकन्यावृताः सर्वे नाकिहस्तसु
मार्चनैः॥वेणुवीणादिनिनदैः शंखमर्दलदुंदुभिः॥३५॥वाद्यमाना सुवर्णाढ्य आनदन्नभिनाडिताः॥जितसप्तांबुधिरवाः चक्षुश्रोत्रसु
खावहाः॥३६॥रुद्राणीनर्तनालोकैर्यांति ते मेरुमस्तके॥चंद्रार्धमस्तकाः सर्वे भस्मपांडुरविग्रहाः॥३७॥त्रिनेत्रा नीलकंठाश्च पश्येता
न्कमलेक्षणे॥मत्कैंकर्यरतान्भूमौ क्षेत्रेष्वेतेषु शैलजे॥३८॥जंबूद्वीपस्थकैलासे गच्छंत्येते मनोरमे॥तव कारुण्यलोकेन तेषां
वासो भवेच्छिवे॥३९॥जंबूद्वीपस्थकैलासे भक्तानां मम पार्वति॥मत्सारूप्यं प्रपन्नानां ब्रह्मक्षत्रविशां शिवे॥४०॥ ॥श्रीस्कं
द उवाच॥ ॥एवं कैलासशैले गिरिवरसुतया संवदन्नास्त ईशस्तानालोक्य विमानरत्नशिखरैः रुद्रैस्तथा संगतान्॥भक्तांस्ता
न्शिवधर्मवर्यनिरतानार्यामुखांभोरुहं पश्यंस्तान्प्रश्नभारं प्रवदद्दथ मुने सेतिहासं मनोज्ञं॥४१॥ ॥इति श्री शिवरहस्ये
दशमांशे उत्तरभागे शिवगौरीसंवादे चतुर्थोध्यायः॥ ४ ॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीईश्वरायनमः॥ ॥
श्रीपार्वत्युवाच॥ ॥एते केन तव सारूप्यं प्राप्य यांति महेश्वर॥जंबूद्वीपस्थकैलासं रुद्रैः संपूजितं वद॥१॥ ॥श्रीईश्वर उवाच॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवधर्मपराः सर्वे एते भारतभूतले ॥ नानाजात्यानरादेविमह्यमाचरणाभुवि ॥२॥ तेनदक्षिणकैलासं समायांति सहस्रशः ॥ मत्सा
रूप्यधराः सर्वेपूजितागणपुंगवैः ॥३॥ भोगभाजोवसंत्यत्रयावत्कल्पायुतंशिवे ॥ शिवधर्मेत्रदेवेशि भंक्ता एवाधिकारिणः ॥४॥
ब्रह्मक्षत्रविशः शूद्राः श्रमणाः संकरास्तथा ॥ नेष्टधर्मवदत्राय मधिकारीनिगद्यते ॥५॥ इष्टधर्मेप्यधिकृताब्रह्मक्षत्रविशः शिवे ॥
तत्राप्यधिकृतोवेदेविद्वानाढ्योमखीभवेत् ॥६॥ तत्तद्वर्णाश्रमाचारः तत्तद्वर्णेषुनान्यतः ॥ इत्थंसम्यक्प्रवृत्तानांवैकल्परहि
तंशिवे ॥७॥ कर्मतत्फलतिप्रेत्यस्वर्गमात्रफलप्रदं ॥ फलांतेपतनंभूमौविकलंकर्मनोयदि ॥८॥ पूर्ताधिकारिणामत्र स्वर्गमात्र
फलंशिवे ॥ वर्णोष्वाढ्योधिकर्मोत्रनविद्वत्तात्रशस्यते ॥९॥ स्वर्गापातांतफलदः पूर्तधर्मोपि पार्वति ॥ सर्वेषामेववर्णानां भक्तिभाजा
मुमेत्रतु ॥१०॥ शिवधर्मोधिकारोत्र प्रसादादेवमेंबिके ॥ संसारसागराद्घोरादुत्तारकउदारकः ॥११॥ शिवधर्मोद्भुपः श्रेयान्गाणापत्य
115 प्रदायकः ॥ जंबूद्वीपस्थकैलासदायकोयंमहेश्वरि ॥ मत्सारूप्यप्रदोदेवि देवानामपिदुर्लभः ॥ देवापिभारतेवर्षेप्राप्यभूतलमुत्तमं
॥१३॥ समभ्यर्च्यैवमल्लिंगंशिवधर्मकराभवन् ॥ भूतलेकर्मकृत्वैवस्वर्गलिप्संतिमानवाः ॥१४॥ कर्मभूमिरयंलोकः तत्रभारतमुत्तमः ॥ त
त्रसर्वापगातीरक्षेत्रेषुमुनिदेवताः ॥१५॥ कृत्वेष्टापूर्तकर्माणि स्वर्गंभुंजंतिपार्वति ॥ शिवधर्मप्रभावेनदेवतिर्यङ्नराभुवि ॥१६॥
जंबूद्वीपस्थकैलासं समायांतिगणार्चिताः ॥ ममसारूप्यभाजोहि वसंत्ययुतकल्पकं ॥१७॥ ततश्च्युतान्नृपतयोभवंतिभुविभोगिनः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ७ ९०

अष्टैश्वर्ययुता देवि अष्टमूर्तिकृपावशात् ॥१८॥ ते तु वासनया भूमौ शिवधर्मं वितन्वते ॥ देहान्ते भारते वर्षे मत्सारूप्यमवाप्य च ॥१९॥ ६० २०५० अ० ५-६
जंबूद्वीपस्थ कैलासे भोगभाजे वसंति ते ॥ तेषां न स्वर्गवसतिः भवते पातदायिनी ॥२०॥ ॥देव्युवाच॥ ॥देवदेव महादेव महाकैलासवासि
नः ॥ न भवंति कथं सर्वे देवास्तिर्यङ्नरा भुवि ॥२१॥ महाकैलासवासाय तव सामीप्यवर्तनं ॥ केन धर्मप्रभावेन भविष्यति च तद्वद ॥२२॥ सुगोप्य
मपि तद्ब्रूहि श्रोतुमिच्छामि तत्त्वतः ॥ न गोप्यमस्ति मयि ते प्रसादेन वरस्त्वमां ॥२३॥ ॥देव्युवाच॥ ॥प्राक्पश्चादुदयास्तशेखरलसन्न्यस्तं
विशस्तांतकं कंजाक्षासनभक्षमौलिजमहामाणिक्यमालाधरं ॥ कंजोद्भूतकपालजालविलसत्स्कंधप्रभाकंधरं कंदर्पांधकदारणं भजहृदं
चेतः सदा शंकरं ॥२४॥ कष्टकूटगपोरभीष्ट तांघ्रिंकरटित्वक्पटभूष्य सत्कटिं ॥ भज भूधरदारखेटदंष्ट्राविलसन्मौलिधरं हरं परं तं ॥२५॥ ॥
इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे पंचमोऽध्यायः ॥५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानाय नमः॥ श्रीईश्वर उवाच॥
सम्यक्पृष्टं त्वया देवि रहस्यमिदमद्भुतं ॥ न चोत्तरे सुधासिंधुसागरोर्मिपरिप्लुते ॥१॥ महाकैलासमौलौ तु निवासी को भवेत्प्रिये ॥ बहु
जन्मसहस्रेषु चरस्थावरदेहिषु ॥२॥ जरायुजांडजस्वेद उद्भिज्जेषु महेश्वरि ॥ जातानामथ मर्त्यत्वं तत्र विप्रत्वमंबिके ॥३॥ सख्यावनाच
विप्रत्वे मयि भक्तिस्ततः परा ॥ तया भक्त्यार्चनं लिंगे अनन्यसुरतुल्यता ॥४॥ भस्मरुद्राक्षधारित्वं रुद्रपंचाक्षराश्रयः ॥ शिवक्षेत्रनिवास
श्च शिवनामजपः शिवे ॥५॥ शिवनैवेद्यभुक्तिश्च नित्यं शिवकथारतिः ॥ एतेन क्रमयोगेन भक्तानामत्र सुंदरि ॥६॥ भारते भुवि देहांते कैला

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोरक्षिणो लभेत्॥ नचात्रोत्तरकैलासवासायाधिकृतो भवेत्॥७॥ महाकैलासमौलौतु निवसामित्वयांबिके॥ नचात्रचंद्रसूर्याभुप्रवेशो
नानिलस्यहि॥८॥ कुतोदेवमनुष्याणां मुनीनां तपसापिवा॥ नलभ्योयं शिवे शैलो विष्णुब्रह्मादिदुर्लभः॥९॥ नविष्णोः तपसासक्यः कै
लासोधरणीधरः॥ नब्रह्मणास्तुतपसा शक्योयं नगउत्तमः॥१०॥ नवज्रिसूर्यवन्हीदुवस्वश्वि मरुतांबिके॥ गंधर्वयक्षरक्षांसि नागाविद्या
धरादयः॥११॥ महाकैलासवासाय ईशास्ते तपअर्जितुं॥ नयागकोटिजफलं तद्वासे तुच्छमेवहि॥१२॥ नमहादानकोट्याच तद्वासोनैवल
भ्यते॥ नकोटिकन्यादानैश्च नद्वासो नैवलभ्यते॥१३॥ गवांकोटिप्रदानैश्च त०॥ गजाश्वकोटिदानैश्च०॥१४॥ भक्षभोज्यादिसंयुक्तै र
त्नदानैश्च कोटिभिः (शः)॥ नयागकोटिशोदैर्विनयमासन कोटिभिः॥१५॥ नकोटिमंत्रजाप्येन शक्योवस्तुं महीधरः॥ नवर्णाश्रमनिष्ठा
दिधर्मावृत्तिशतैरपि॥१६॥ महाकैलासमौलौतु सक्यतेवासअद्रिजे॥ तन्मौलौ मत्प्रसादेन निवसंतिमृगांडजाः॥ तरवोपिसदादेवि
116 तृणवल्लीद्रुमाअपि॥१७॥ ॥पार्वत्युवाच॥ ॥कैलासमौलिवासोयं विष्णुनाब्रह्मणापिच॥ देवैर्महर्षिभिस्तप्तं तेनलब्धोमही
धरः॥ नंदिकेशादिगणपैस्तवसामीप्यवर्तिभिः॥ महाकैलासमौलौतु वासोलब्धः कथंनुतैः॥ तद्वेदितुमिच्छामि वदमेकरुणार्ण
व॥ ॥श्रीईश्वरउवाच॥ ॥नंदिकेशादिभिस्तप्तं त्वयानज्ञातमीश्वरि॥ नविष्णुनाब्रह्मणावा नदेवैर्मुनिभिस्तथा॥२०॥ नंदिकेशा
दिभिस्तप्तं तेनवासोत्रसर्वदा॥ त्रिकोटिरुद्रजाप्येन नंदिकेशेनमत्परं॥२१॥ तेनलब्धमहादेवि मल्लिंगस्यैव पूजया॥ चंडिशेनात्रवसतिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० १० भृंगिणा च प्रदक्षिणैः ॥२२॥ पंचाक्षरी कोटिजपाद्वीरभद्रेण शैलजे ॥ दश कोटिनमस्कारैः रुद्रावृत्त्या तु हुंडकः ॥२३॥ वृषेंद्रो मां सदा ६० ८० ५०
८ स्तोत्रैस्तु(त्वा) महीधरं ॥ ॥ ईश्वर उवाच ॥ ॥ एवं मे गणपुंगवा गिरिवरात्मजाते रहस्यार्चनैः संप्राप्ता धरणीधरं द्रुमथते तेनैव ते अ० ६-७
सर्वदा ॥ मत्सारूप्यधरा वसंति नियतं मत्प्रेमभक्त्या गणा नान्येषां विबुधाद्यगम्यविषयः कैलास एवंविधः ॥२५॥ ॥ इति श्री
शिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे षष्ठोध्यायः ॥६॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥
श्रीदेव्युवाच ॥ ॥ विश्वाधिक महादेव विश्वाधार जगत्पते ॥ विमानवरमास्थाय पूजिता गणपुंगवैः ॥१॥ क एते शिवधर्मज्ञाख्या
तिं तत्कारिणो हर ॥ जंबूद्वीपस्थकैलासे प्रत्येकं तान्वदस्व मे ॥२॥ ॥ श्रीस्कंद उवाच ॥ ॥ इत्थं देव्या तदा पृष्टो तानालोक्य
विमानगान् ॥ शिवधर्मपरान्नाह तेषां तद्धर्मकारणं ॥३॥ ॥ श्रीईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्षामि आवंत्योयं द्विजाधमः ॥
बहुयाचनको नित्यं भार्यायाः जीर्णवस्त्रधृक् ॥४॥ अवंतिपुरमध्यस्थो नित्यमेकाह्नभोजनः ॥ और्ध्वदेहिककर्माणि कारयत्ये
षपापकृत् ॥५॥ न संध्यावंदितानेन पर्वण्यपि परान्नभुक् ॥ न भस्मधृक्कपालनले नांगे रुद्राक्षमालिका ॥६॥ न रुद्रपंचाक्षरभा
क् न कृतं लिंगपूजनं ॥ न पंचयज्ञप्रवणः प्रवीणः प्रेतयातने ॥७॥ आद्यं तु गोद्वयं तेन गृहीतं च सहस्रशः ॥ नित्यं साहसकृन्मूर्खो
भार्यया प्रेतभोजने ॥८॥ लोकोपहासभीत्या यं स्नाति नित्यं नदीजले ॥ स नित्यं सूतकाभावे देवि पापवरो द्विजः ॥९॥ एवं स्थिते ग्राममम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यंगतोभार्यासहायवान्॥सापिंड्य भोजनंकर्तुं धनलोभेनशंकरी॥१०॥मध्यंवनंप्रविष्टोसौदवभस्मांकितोभवत्॥भस्मनोद्धूलि
तोतत्र दंपतीधूममोहितौ॥११॥दावाग्निनातौममृ तुर्नीतौ वैवस्वतांतिकं॥शिवदूतै मोचितोच विमानवरमास्थितौ॥ दिव्यभो
गसमृद्धौच यातःकैलासमद्यमे॥ ॥देव्युवाच॥एतादृशोयंपापीयान्कथं कैलासमर्हति॥विचित्रंतेमहादेव चरित्रं परमाद्भु
तं॥१३॥ ॥श्रीईश्वरउवाच॥ ॥अज्ञानतोप्ययमुमेदेहांतेभस्मधार्यभूत्॥ममारोद्धूलितांगोयं विध्या बुध्यापिवर्जितः॥
॥१४॥किंपुनःसप्तभिर्मन्त्रैर्यःस्नातिशितभस्मना॥नित्यंपर्वसुवादेवि किंपुनः कायनाशने॥१५॥ तेनपुण्य प्रभावेनशिवधर्मेण
भामिनी॥भस्मांगमात्रतोयातिकैलासंदक्षिणंद्विजः॥सभार्यः पापनिर्मुक्तोयमेनापिप्रपूजितः॥ यावत्कल्पमुषित्वासौ रा
जाभवतिधार्मिकः॥पुनश्चशिवधर्माणिकृत्वाकैलासमेष्यति॥ तत्पार्श्वगोभ्राजतेन्योवैश्यो वेश्यासहायवान्॥१८॥पित्रामा
117 त्रापोरित्यक्तो उज्जयिन्यां वसन्नसौ॥पित्रावाणिज्यलाभेनधनंयत्समुपार्जितं॥१९॥भोगार्थं वश्य वेश्यायैदत्वाधनमनाशय
त्॥ तेनविद्रावितःपित्रा मात्राबंधुजनैरपि॥२०॥भिक्षुरित्वादिवान्नादिरात्रौ पौरगृहेष्वयं॥ चोरयित्वाधनंधान्यंवासोरत्नवि
भूषणं॥२१॥ वेश्यायै प्रददात्येव ग्रामपालैरलक्षितः॥कदाचिद्राजभवने अंधकारावृतेनिशि॥२२॥भित्वाकोशागारंहेमं कटिसू
त्रमपाहरत्॥यावद्गंतुं समुद्युक्तो तत्पालैरप्यनुद्रुतः॥२३॥तंराज्ञेदर्शयामासुः कटिसूत्रकरांश्रिवे॥बध्वाकारागृहे राजावर्षमात्र म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पातयत् ॥ २४ ॥ राजा संप्रार्थितो वैश्यैः वैश्यपुत्रममूमुचत् ॥ छित्वा कर्णनासिकां च धावमान इतस्ततः ॥ २५ ॥ वेश्यया पि निरस्तोऽसौ
नित्यमाद्रवणस्तदा ॥ निर्धनोप्ययमुन्मत्तो याति संताडितस्तया ॥ २६ ॥ कदाचिद्दैववशतो मंदवारे प्रदोषके ॥ स्ववश्यां वेश्यां नृत्यं
तीं महाकालेश्वराग्रतः ॥ २७ ॥ धृतत्रिपुंड्ररुद्राक्षां पीनोन्नतपयोधरां ॥ समालिलिंग बाहुभ्यां सुहृदं गाढहृज्ज्वरैः ॥ २८ ॥ संताडितो
मस्तकेथ स वैश्यो मृतिमाप्तवान् ॥ नीतोंतकपुरं दूतैः याम्यैस्तेनार्चितोप्यसौ ॥ २९ ॥ पापमुक्तः समायाति कैलासं दक्षिणं शिवे ॥ ॥
देव्युवाच ॥ ॥ वेश्यासक्तः कथं वैश्यो कैलासं प्राप्तवान्विभो ॥ वेश्यया त्र विमानेन तन्मे वक्तुमिहार्हसि ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥
स्ववश्यवेश्यां थवणिक्पतेः सुतो ममार शंभोः सविधं प्रदोषे ॥ गाढं समालिंगनतस्तदंगात्तत्काल वक्षोजगत त्रिपुंड्रं ॥ ३१ ॥ दधन्नसौ फा
लतले स्ववक्षः तदा जहौ प्राणमथो स वैश्यः ॥ यस्त्वं तकाले शिवसन्निधौ मृतिं विभूतिपुंड्रैरपि मंडितांगः ॥ ३२ ॥ स मे छ्यतिज्ञानवतां
परिष्ठो प्यज्ञानतो वैश्यसुतो यथायं ॥ तेनायमभ्येति च पापवर्जितः कैलासमेवेह न विस्मयस्त्वया ॥ ३३ ॥ कार्यः शिवे वैश्यसुतः स वै
श्यो त्रिपुंड्रमाहात्म्यमिदं सुपुण्यदं ॥ ३४ ॥ ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्द्धे भस्मत्रिपुंड्रधारणमहिमानाम
सप्तमोध्यायः ॥ ७ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ श्रीदेव्युवाच ॥ ॥ अत्यर्को
भ्राजते कोयं विमानोत्तममाश्रितः ॥ छादयन्मंडलं भानोर्यातिरुद्रैः परिवृतः ॥ १ ॥ तन्मे वद अमरश्रेष्ठ अर्धेंदुकृतशेखर ॥ शिवधर्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रभावंते श्रोतुं कौतूहलं मम॥२॥ ॥श्रीईश्वर उवाच॥ ॥गौडेथ नर्मदातीरे क्षत्रियः सोमवर्मकः॥ नाम्ना धनुर्धरो याति मृगया
यै वनं प्रति॥३॥ पाशपाणिः शुनां व्यूहैः मृगान्हन्ति रुरून्वृकान्॥ बलकान्हकान्कपोतांश्च व्याघ्रभूआरगोमृगान्॥४॥ एवं
तस्य कियान्कालो गतो मांसानि भुंजतः॥ कदाचिद्दिमिनं याते तस्मिन्वै सोमवर्मणि॥५॥ धनुर्बाणकरो हस्ती निपातार्थसमा
ययौ॥ मदांधः करिणी व्यूहैः का लभै रपि संवृतः॥६॥ विलोक्य नर्मदां स्वैरं स्वपुष्करजलैः करी॥ घर्मांशुकिरणैस्तप्तः धरणी
रेणुरूषितः॥७॥ सस्पृष्ट पुष्करेणैव करेणुकलभांस्तदा॥ स नर्मदाजलासारैः स्वांगतापमनीनशत्॥८॥ तं तादृशं करिवरं गि
रिशिखरोपमं॥ कर्णतालसमुद्भूतवायुनोद्भूलषट्पदं॥९॥ रुद्राक्षवृक्षखंडस्थो जघानेकेषुणा करीं॥ क्षत्रिये घुसमाधूतो
पश्चीतीर्यद्भि रीक्ष्यतं॥१०॥ रुद्रा वक्षात्रियं तत्र पुष्करेण धृतस्तदा॥ पादेनाक्रम्य तद्वक्षो करो देहं द्विधाकरोत्॥११॥ भागं तु क्ष
॥8 त्रियांगस्य रुद्राक्षद्रुममस्तके॥ स्वपुष्करेणोर्ध्वगं तु क्षेपयामास पाशिराट्॥१२॥ स केशलग्नशाखाग्रः रुद्राक्षस्य सदाशिवे॥
रुद्राक्षबीजसंस्पर्शात्तदंगस्यापसद्गतिं॥ विमानमध्यगो याति क्षत्रियोयं महेश्वरी॥ संकरोन्योप्ययं पापी केदारशिखराश्रयः॥
॥१४॥ व्याधो मृगजमांसेन संपोष्य स्वकुटुंबकं॥ मत्स्यान् जलेन धृत्वायं तद्विक्रीयांग पोषकः॥१५॥ जीवंत्य त्वं तर्हिंस्त्रोयं म
त्निनो मधुभूलभाक्॥ दाशोवृत्तः सदा नावा तारयन् जलसंघकं॥१६॥ आतरैः जीवते नित्यं लशुनासी शुनावृतः॥ कदाचिदेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० पापीयान्वासं तारयन् जनं ॥ १७ ॥ उन्मत्तगंगास्रोतेन नीतो नावा विभिन्नया ॥ ममार क्षसैः सजनैर्गंगांभः प्रपिबंस्तदा ॥ १८ ॥ अन्योन्यं कंठमालिं ६०८-३

१० ग्य तत्र ते मम्रिरे जनाः ॥ तन्मध्ये कश्चिद्दासस्तेन्यो रुद्राक्षस्रगलंकृतः ॥ १९ ॥ शूद्रस्तदालिंगनतो व्याधोयं गांगजे भसि ॥ ममृतुस्तत्र केदारे शूद्र अ०८-९

व्याधो महेश्वरि ॥ २० ॥ विमानेन समायातौ रुद्राक्षस्पर्शतोंबिके ॥ गंगांभस्तु पानेन रुद्राक्षस्पर्शनेन च ॥ २१ ॥ विमुक्ताघो समायातो धूतपापो

मनोरमे ॥ रवासन्नांसे पिबन्मध्ये सगच्छन्नंत्यजामपि ॥ पातकेभ्यो विमुच्येत रुद्राक्षस्रगलंकृतः ॥ किं पुनः कायपतने दधन् रुद्राक्षमुत्तमं ॥

॥ २३ ॥ समायाति च कैलासं सत्यमेव वचनं प्रिये ॥ ॥ श्रीईश्वर उवाच ॥ ॥ देहांते विधृतं ममाक्षजवरं पापैर्विमुक्तो भवेत् ॥ कैलासे ग

णपुंगवार्च्चितोप्यनुदिनं कल्पं तदाप्यद्रिजे ॥ राजा भूमितले भवेदथ शिवे रुद्राक्षसंधारणात् को वा वेद तथास्य जात महिमा अज्ञानतोप्ये

व मे ॥ २४ ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरार्धे रुद्राक्षमहिमावर्णनो नामाष्टमोध्यायः ॥ ८ ॥ ॥ श्रीकाशीविश्वेश्व

रार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ श्रीईश्वर उवाच ॥ ॥ आनर्तविषये कश्चिद् ब्राह्मणो वेदपारगः ॥ ब्राह्मणान्तत्र तत्र त्यानध्याप

यति पार्वति ॥ १ ॥ वेदांश्च स्मृतिशास्त्रं च तर्कं व्याकरणं तथा ॥ मीमांसां सांख्ययोगौ च नाटकं च प्रहेलिकां ॥ २ ॥ तस्यासन्बहवः शिष्या नानादेश्य

द्विजोत्तमाः ॥ तस्य भार्या गुणवती रूपयौवनसंयुता ॥ ३ ॥ भर्तृशुश्रूषणरता शिष्याणां पोषणे रता ॥ कश्चित्तत्रास्ति विख्यातो शूद्रो देविकृषीबलः ॥ ४ ॥

त्रिपुंड्ररुद्राक्षधरो बहुगुः शिवतत्परः ॥ धनधान्ययुतः शूद्रः पंचाक्षरपरायणः ॥ ५ ॥ तत्र धर्मेश्वरागारे प्रातः सायं शिवाग्रतः ॥ पंचाक्षरं जपत्येव ध्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यमानोमहेश्वरं ॥६॥ एवंनित्यंस्थितस्यास्य तत्पुर ब्राह्मणस्यच ॥ एककाले भवत्कालः जग्मतुस्तौ यमंप्रति ॥७॥ यमेन पूजितोश्र
ष्ठोद्विजःपार्श्वेनिवेशितः ॥ तत्रान्तरेशिवगणैः विमानंसर्वतोज्वलं ॥८॥ समानीतंतुशूद्राय तदारुह्यमनोजवं ॥ समायात्स्यमीशा
निकैलासंदक्षिणंमम ॥९॥ विभ्राजमानो वपुषा रुद्रवृंदार्चितोप्ययं ॥ शूद्रः पंचाक्षरजपाद्ब्राह्मणादत्यारिच्यते ॥१०॥ यममाह तदावि
प्रः सुशर्माख्यःकृतांजलिः ॥ ॥सुशर्मोवाच॥ ॥त्वंयमोधर्मवेत्तासिशूद्रः संपूजितः कथं ॥ ब्राह्मणंमां परित्यज्य पंचयज्ञपरा
यणं ॥११॥ त्वयासंपूजितोस्म्यत्र कर्मणां फलभागहं ॥ सुशर्मणोवचः श्रुत्वा यमः प्राहद्विजोत्तमं ॥१२॥ ॥यमउवाच॥ ॥
पंचाक्षरपरः शूद्रः कैलासंयातिसत्तम ॥ पूजितोगणवृंदैश्च कल्पंतत्रवसेद्द्विज ॥१३॥ सभूमौनृपतिर्भूयात्सर्वभोगसमृद्धिमान् ॥ शि
वधर्मप्रभावोयं त्वंतुस्मृतिपरायणः ॥१४॥ स्वर्गलोकंव्रजमुने स्वर्गान्ते पतनं भवेत् ॥ पुनश्चविप्रजातीयो भूत्वाकर्मण्यथादृतः ॥१५॥
119 पुनः पुनर्व्रजमुने स्वर्गलोकंसुखावहं ॥ एवंस्मृतिपुराणानां स्वर्गमात्रफलंद्विज ॥१६॥ धर्ममेवंविजानामि नात्रकार्याविचारणा ॥
नत्वंकैलासवासाय योग्योसिद्विजपुंगव ॥१७॥ गच्छत्वंस्वर्गमेवाद्यशूद्रः पंचाक्षराश्रयः ॥ तस्माद्गच्छतिकैलासं नैवतोविस्मयोभ
वेत् ॥१८॥ ॥यमउवाच॥ ॥कोवावेद महेश्वरस्य महिमा पंचाक्षरोजापिनां सर्वाघाद्रिपविः सदैवजपतां पंचाक्षरः पावनः ॥
त्वंगच्छासुमुक्षे मुनेफलप्रदमहो स्वर्गंतथाकर्मिणां इत्युक्तोथयमेन विप्रतिलको तूष्णींययौमानयन् ॥१९॥ ॥इतिश्रीशिवरहस्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दशमांशेउत्तरभागे पंचाक्षरमहिमा नाम नवमोध्यायः॥९॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ई० द० उ
रुद्राध्यायमहिमाजापिनामभिषिंचतां॥यजुर्वेदेचतुर्थेतु कांडेपावनउत्तमः॥१॥शैवमंत्रमहारत्नखनिरेवायउत्तमः॥सर्वपापक्ष अ० १०
यकरः स्मृतिमात्रेणशंकरि॥२॥महापातकपंचानांशुष्कार्द्रणांहरस्ततः॥प्रायश्चित्तंजपोस्यैवश्रीरुद्रस्यैवमेंबिके॥३॥ममनाम्नांसमू
होयंसर्वमंत्रोत्तमोत्तमः॥भस्मधारीजपस्यास्यअधिकारीप्रकीर्त्यते॥४॥आमनंत्येवकैवल्याजाबालाआमनंत्यपि॥अथर्वणोप्याम
नंतश्रीरुद्रमहिमांशिवे॥५॥सर्वैर्वर्णाश्रमैर्जप्यः शूद्रवर्जोमहामनुः॥जपन्शूद्रोमनुंरुद्रंनरकान्नैतिसान्वयं॥६॥ऊर्ध्वपुंड्रधरैर्नैवज
प्योरुद्रोमहेश्वरि॥जपन्द्विजोपिनरकंप्राप्नुयान्नात्रसंशयः॥७॥शतशाखागतामंत्राःशतरुद्राइतीरिता॥एतेषांजपमात्रेण मु
च्यतेसर्वपातकैः॥८॥सर्वायुर्दायकोमंत्रःसर्वरोगहरोमनुः॥सर्वपापप्रशमनोजपतांसर्वसिद्धिदः॥९॥ममप्रसादजनकोकैनास
फलदोनृणां॥अत्रेतिहासंश्रृणुमेपापनाशनमुत्तमं॥१०॥अस्येतिहासश्रवणाद्रुद्राध्यायेमतिर्भवेत्॥अविमुक्तेपुराकश्चित्सुधर्मा
ख्योद्विजोत्तमः॥११॥गंगास्नानपरोनित्यंभस्मरुद्राक्षभूषणः॥रुद्राध्यायपरोनित्यंविश्वेशार्चनतत्परः॥लिंगार्चनपरोनित्यंबिल्व
पत्रैर्मनोहरैः॥धनीमान्योवदान्यश्च पंचयज्ञपरायणः॥१३॥कदाचिदेवंवसतःतस्यकाश्यांमहात्मनः॥माघेमासिमहापुण्येशिव
रात्रिःसमागता॥१४॥तस्यांरात्र्यांससंभारैःभक्ष्यभोज्यैर्महेश्वरं॥विश्वेशमर्चितुंयातःपंचामृतघटैस्तदा॥१५॥क्षीरसर्पिर्दधिक्षौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रनारिकेरांश्चफानसैः॥जंबीरैक्षूत्थसारैश्च गंधपुष्पाक्षतैरपि॥१६॥शर्करा बिल्वपत्रैश्च कमलैरुत्पलैरपि॥धूपैर्दीपैस्तथा विप्रोद्यो
तयच्छंकरालयं॥१७॥तत्रालये लिंगपूजां कुर्वतां च द्विजन्मनां॥दीपानारोपयामास अन्नपूर्णालयेपि च॥१८॥निमंत्रयदथो विप्रोद्वि
जानेकादशोत्तरं॥विश्वेश्वराभिषेकार्थं गोहेमांबरदापनैः॥१९॥सुधर्मणा प्यर्थितास्ते केचिद्विप्रा धनाशया॥विश्वेश्वराग्रतो देवि
जेपुस्ते शतरुद्रियं॥२०॥चतुर्ष्वपि च यामेषु विश्वेशस्याभिषेचने॥सुधर्मा प्यर्चयामास विश्वेश्वरमकल्मषः॥२१॥शिवरात्र्यां स प
र्याभिः षोडशैरुपचारकैः॥ततः प्रातः कृतस्नानो धनं गाः प्रददौ मुदा॥२२॥विप्रेभ्यो रुद्रजापिभ्यः तत्रैको नैच्छदीश्वरि॥ममाधिकां
ददस्वेति दक्षिणामित्यथ द्विजः॥२३॥सुधर्मा प्राह तं विप्रं मयोद्दिष्टा तु दीयते॥नाधिकां प्रददाम्यद्य गच्छ वा तिष्ठ वेति च
120 ॥२४॥सुधर्मणो दक्षिणां तां त्यक्त्वा क्रोधाद्ययो गृहं॥स विप्रोप्याह सक्रोधं जाप्येन प्रीयतां शिवः॥१५॥स एवांते विमानेन शि
वार्पणकृताज्जपात्॥समायाति च कैलासं धनेच्छात्यागतो द्विजः॥२६॥द्विजार्थमविमुक्तेपि रुद्रजाप्यपरा द्विजाः॥प्रापुस्ते रुद्र
पैशाच्यं घोरं वै धनलोभतः॥२७॥तां दक्षिणां द्विजोऽन्याय प्रददौ स सुधर्मकः॥विप्राय स तदा देवि प्रसादार्थं ममैव सः॥२८॥
क्षेत्रेष्वन्येषु वा शैवे रुद्रजाप्यं धनार्थिनः॥तेषां द्विजार्थजाप्यानां किं पुनः शूद्रसात्कृते॥२९॥नरकान्नैव निस्तारस्तेषां शूद्रार्थ
जापिनां॥न कुर्वीत न कुर्वीत रुद्रमन्यार्थमीश्वरि॥३०॥न ग्राह्यं तद्धनं विप्रैः प्राणैः कंठगतैरपि॥वरमेव सुरापानं वरं गोमांसभक्षणं॥
॥३१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० वरंतुलादानधनंनरुद्राध्यायजाप्यजं॥विप्राद्गातंकराद्वापिरुद्रजाप्यार्थमीश्वरि॥३२॥नग्राह्यंनैवजाप्योयमन्यार्थंरुद्रउत्तमः॥ ई०द०५
१२ नरुद्रार्थावगाहीयोपारीणोपिसमूढधीः॥३३॥रुद्राध्यायीसर्ववेदेषुनिष्ठःरुद्राध्यायीसर्वयज्ञेषुनिष्ठः॥रुद्राध्यायीसर्वयोगेषु अ०१०-११
निष्ठोरुद्राध्यायीमुक्तएवेहदेवि॥३४॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेरुद्राध्यायमहिमावर्णनंनामद
शमोध्याय॥१०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ॥शृणुष्वाज्ञानतोगौ
रिममनाम्नांचकीर्तनात्॥वेश्यावश्यंतुवेश्यानामोक्षंप्रापचात्रहि॥१॥ ॥श्रीदेव्युवाच॥ ॥कथ्थायंवेश्यवर्योत्रतव
नाम्नांचकीर्तनं॥कथंचकारज्ञानेनतन्मेकथयशंकर॥२॥शिवधर्मश्रवणतोविस्मयोममजायते॥ ॥देवउवाच॥ ॥
मायापुरीतिविख्याताबाहुदातीरसंगता॥नरनारीगणाकीर्णाविपणापणशोभिता॥३॥नरनर्तकवेश्यानांसंघशःपरिसंवृ
ता॥ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरपिसमन्विता॥४॥धनधान्यसमोपेतानानाश्रमनिषेविता॥मुक्तिदावसतांनृणांपुण्यामा
यापुरीशिवे॥५॥तस्यापुर्यांशिवस्थानंनाम्नारुद्रेश्वराभिदं॥तत्ररुद्रसरोनामतीर्थमस्त्येकमुत्तमं॥६॥तत्तोयस्नानमात्रेणन
रोरुद्रगणोभवेत्॥तत्तोयैःस्नपयेद्रुद्रंरुद्रमंत्रैर्महेश्वरि॥७॥मुक्तएकेनजन्मेनएकाबिल्वार्पणेनच॥तत्रस्नात्वाजपीत्वाचरुद्रंदृ
ष्ट्वाचमानवः॥८॥मायापुर्यांमहादेविमाययामुच्यतेंबिके॥शिवज्ञानमवाप्नोतिशिवेनसहमोदते॥९॥तस्यापुर्यामभूत्कश्चि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वैऽस्यो वेश्या वशंकरः ॥ नाम्ना बद्धांगदो नाम भिषक्कर्मणि निष्ठितः ॥१०॥ मूलिकातिलकं चूर्णं लेह्यं पेयं च लेपनं ॥ एवमौषधजा
लानि संपाद्य स्वसुतैः सह ॥११॥ वेश्यावीथ्यां चेटिकानां स्त्रीणां तु अंगजीविनां ॥ हास्यादिस्थानगो भूत्वा स माक्रोशत् क्वचिद्वणिक् ॥१२॥
वैश्य उवाच ॥ ॥ अपि वाताशिपर्णा शिवशंकरमौषधं ॥ मन्नोग्र दुर्द्ध्वममलाः पतयो वशगा हि वः ॥१३॥ हे वेश्या गृण्हत तत्क्षिप्रं वशं
करमहौषधं ॥ भुजंगा वशगा वो ऽद्य सर्वस्वं ते ददत्ययं ॥१४॥ इति तद्वचसा सर्वे गृण्हंत्यौषधमीश्वरि ॥ एवं वदन्मृतो वैश्यः कालेन किल
तत्र वै ॥१५॥ यमेन पूजितः पापैर्मुक्तोऽभ्यागाच्छिवे त्वतु ॥ शिवशंकरनाम्नो स प्रवादेनाप्यहर्निशं ॥१६॥ अजानन् वैश्य एवायं किं पुन
र्ज्ञानवादिनां ॥ गोंडारण्ये पुरा कश्चिद्व्याधः श्रीशैलमूर्धनि ॥१७॥ धनुर्धरः पक्षिजालं निहंति च मृगान्बहून् ॥ जालेन मत्स्यान्धृत्वै
121 व भुंक्ते कीडातिपापकृत् ॥१८॥ पुत्रैः सह तदा व्याधः कालेनाथ तनुव्यये ॥ पुत्रानुद्दोध्य एवं हि ममारे सौ गिरेस्तटे ॥१९॥ प्रह राहर तक्षि
प्रं मधुमांसमृगादिकं ॥ हरशब्दोच्चारणेन मृतिकाले महेश्वरि ॥२०॥ विमुक्तपातको व्याधः यमेनापि च पूजितः ॥ याति दक्षिणकैला
सं नाम माहात्म्यमीदृशं ॥२१॥ ॥ ईश्वर उवाच ॥ ॥ मृतिकालीन मन्नाम स्मरणेनाघकोटयः ॥ प्रयांति नलिकाघात घोषादिव
विहंगमा ॥२२॥ को वा वेद महेशनाममहिमा सर्वाघनाशक्षमा तद्दुह्येसुचिरं रमेत चरमा वश्या च भासा समा ॥ कामाराति पदाब्ज भक्तिगरि
मा वेदांतसीमा शिवे भोमानंदपदप्रदानपरमा व्योमावकाशप्रभा ॥२३॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवनाम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० महिमावर्णनंनाम एकादशोध्यायः ॥११॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीशिवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥ ई०द०उ
१२ चित्रकूटेद्विजः पूर्वं सोमशर्माह्वयः शिवे॥ पंचयज्ञपरोनित्यं स्वाध्यायनिरतः सदा॥ काशींगच्छन्न्ययो तत्रचित्रकूटेश्वरालये॥ वर्षेणपी अ०१२
डितोविप्रः प्राकंचक्रेशिवाग्रतः॥२॥ सोमार्द्रापातभूतायां निशायां सशिवाग्रतः॥ मार्गयातेनदेवेन मासोभूच्चापिकार्तिकः॥३॥ सद्विद्र
वाससोंतेन भोजनार्थेग्रतोज्वलं॥ शिवाग्रतोदधन्दीपं तज्ज्वालोज्वलमंडपं॥४॥ सूपाज्यापूतमन्नंचशिवाग्रेबुभुजेनिशि॥ द्विजोयंतेनपुण्ये
नव्याजेनात्रागतः प्रिये॥५॥ इयंव्याधांगनाबल्यास्वैरिणीजारणीतथा॥ पापिष्ठादुर्भगाचैव मधुमांससुराशना॥६॥ स्थितेयंनर्मदातीरेव
नेशून्यशिवालये॥ आगतंसापपोमाध्वींकौक्कुटंपललंत्वदन्॥७॥ स्नात्वांविवसनेसायंनर्मदायांतदांबिके॥ दवभस्मांगकातत्रसुरासव
विमोहिता॥८॥ ननर्तशिवलिंगाग्रे प्रदोषेयाममात्रके॥ सायंकालेनिधनात्यक्तपापायमार्चिता॥९॥ राजमानाविमानेषा राजसंसीव राजते॥
शिवाग्रेतुप्रदोषेत्र नर्तनाध्वानतोंबिके॥१०॥ किंपुनस्तोत्रवाक्येनन्त्यतांकरताडनैः॥ अयोध्यायांपुराकश्चिदिंद्रवर्माथबाहुजः॥११॥ सगरेशा-
-सतिभुवंराज्ञः सेनापतेःसुतः॥ इंद्रवर्मायुवास्वैरंकांचिद्वेश्यांसुसुंदरीं॥१२॥ संकेतोपवनेस्थाप्यभद्रेश्वरशिवालये॥ रमतेप्रत्यहं तत्रधनंदत्वा
सुभूरिशः॥१३॥ राज्ञः सभायांनिशिवे तस्यसेवार्थवासिनः॥ यामत्रयंत्रियामायाः समभूज्जनसंसदि॥ राज्ञा विसर्जिताः सर्वे समायातागृहं
प्रति॥ चंद्रिकायांसगंधांगः पुष्पापीडोभटेनवै॥१५॥ संकेतोपवनंप्राप भद्रेश्वरशिवालयं॥ स्रक्चंदनेनपुष्पेण फलान्नैः शीतलैर्जलैः॥१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सावेश्याचिरकालेननिद्राभंगेनमोहिता॥इंद्रवर्माणमासाद्यक्रुद्धामदनमोहिता॥१७॥तदानीतंचंदनंच पुष्पंतच्छीतलंजनं॥प्र
त्यूषेसाधनुर्मासेपातयुक्तेविशेषतः॥१८॥लिंगेभद्रेश्वराख्येसापातयामासतज्जलं॥चंदनंलिंगमोलौतुसक्रोधापातयत्शुभं
॥१९॥प्रसादितासासुदतीतदानीमिंद्रवर्मणा॥बुभुजेकुसरान्नंसाफलंतांबूलमुत्तमं॥२०॥भद्रेश्वराग्रतोदेवि धनुर्मासस्यरूपो
दये॥तेनपुण्यादिह्याताता लिंगेचंदनदानतः॥२१॥तच्छीतलांबुपुष्पाणांप्रदानेनमहेश्वरि॥विमानेनार्कवर्णेन वेश्याक्षत्रि
यनंदनौ॥२२॥भोगार्थाज्ज्ञानतोदेविकिंपुनर्भक्तिभावतः॥ ॥श्रीईश्वरउवाच॥ ॥एवंतवेशानिसदेव धर्मं शिवप्रसादं
सुगुणंमहर्तदं॥दीपप्रदातुर्निशिसोमवारे ऊर्जेशिवाग्रेप्रविनृत्यतांतथा॥२३॥लिंगार्चकानांतुसुशीतलैर्जलैःस्रक्चंदने
र्वामनसाप्यथान्यतः॥फलंमयोक्तंविहितंमयैव प्रसादएषः कथितोंबिकेनव॥स्वल्पोप्ययंतारयितुं भवार्णवात्स्यात्क
र्णधारःशिवधर्मएषः॥२५॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेशिवधर्मप्रभावेद्वादशोध्यायः॥१२॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥श्रीईश्वरउवाच॥ ॥शृणुष्वान्यामपिकथांशिवधर्म
प्रशंसनीं॥अज्ञानाद्गोंददन्छंभोःयात्यसोमद्गणार्चितः॥१॥कैलासंदक्षिणंदेविद्रष्टापूर्तोद्यतनभ्यकं॥ ॥पार्वत्युवाच॥ ॥
कोशावायातियानेनभास्करप्रतिमप्रभः॥अनेनतेकथंदत्तागोस्तन्मेवदसुप्रभो॥२॥श्रीस्कंदउवाच॥ ॥इत्थंगिरिजया

122

पृष्टः तामुवाचमहामुने॥ कैलासेगोप्रदस्याद्य अज्ञानेन शृणुष्वतां॥३॥ ॥देवउवाच॥ ॥शृणुपद्मपलाशाक्षि शूद्रोयं
कुरुजांगले॥ सर्वस्वहारिविप्राणा मन्येषां तस्य का कथा॥४॥ नित्यंसयात्रिकान्हत्वा तद्धनैः स्वकुटुंबकं॥ संपोषयतिधान्यैश्च
धनैर्देवियदृच्छया॥५॥ सकदाचिन्निशिस्वैरं तमसादिशिसंवृते॥ जगामराजभवनं राज्ञो गांसमुपाहरत्॥६॥ विवत्साधेनवस्तत्र
तेनकालयताशिवे॥ हुंभारावोत्थिता गोपाः ययुर्वत्साशयेनगाः॥७॥ तत्रैकाजरती व्यंगा निर्मांसस्नायुबंधना॥ सगर्भा धाव
मानेनदेवायेतिविसर्जिता॥८॥ तांजांगलेस्वरद्वारिप्रातर्दृष्ट्वालयेक्षकाः॥ मासंसंपोष्यतां घासैर्व्यधुः शूलवरांकितां॥९॥
तत्पोषणेनपुष्टांगी वत्संवृषमजीजनत्॥ दशरात्रेगतेमह्यं तास्मिंश्च न् पयउत्तमं॥१०॥ प्रातर्नित्यंप्रदोषेषु तल्लिंगासेचना
दुमे॥ यावद्रोरोमसंख्याता राजा चोरोपिपादजः॥११॥ उभावज्ञानतो गांमेदद्तुः किंपुनः शिवे॥ ममाभिषेककरणे कपिलांचा
न्यवर्णकां॥१२॥ दत्वाऽपि तांमहे स्वस्यशिवसारूप्यभाक्भवेत्॥ ज्ञानेनपयसासिच्यलिंगेमेमंगलावहे॥१३॥ सोदरं स्तन्यपयसा
पुनर्भूमौ न सिंचति॥ वनेरंभातरोर्देवि फलगुच्छमथाहरत्॥१४॥ विप्रपुत्रस्तु वेश्यायै ददातिप्रतिवासरं॥ राज्ञ स्तूपवनेतत्रसो-
राष्ट्रे च महेश्वरि॥१५॥ पयोब्धीतीरजातेषु वनेषु कदलीतरोः॥ कदाचिद्ग्रामपालेन दृष्टोऽसौ विप्रपुत्रकः॥१६॥ गृहीतुंप्रधष्टतस्त
स्य धावन्धावत एवसः॥ पक्कंतुकदलीगुच्छं तत्र सोमेश्वरालये॥१७॥ अपातयद्धावमानः ग्रामपालैर्विसर्जितः॥ प्रदोषकाले

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवस्यअभिषेकंसमाचरत्॥१८॥ तेनपुण्यप्रभावेनशिवलोकंप्रयात्यसौ॥नारिकेरफलंशूद्रबालोघर्मार्भुतापितः॥१९॥भू
न्यलिंगेननिर्भिद्यपपौबालः तृषार्दितः॥तदंबुनाभिषिक्तंमेभून्यलिंगंव्यवस्थितं॥२०॥ तेनपुण्यप्रभावेन शिवधर्मेणपा
वीति॥विमानेशूद्रबालोऽयंकैलासंयातिपश्यवै॥२१॥ ॥ईश्वरउवाच॥ ॥अज्ञानाद्वैशंकरेगोप्रदानादुंभादानाद्वैचवैवा
भिषेके॥सन्नारिकेरांबुसुसेकमात्राद्बालोप्ययंयातिशिवांतिकंशिवे॥२२॥ ॥इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्त
रभागेशिवधर्मप्रभावोनामत्रयोदशोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥ ॥
श्रीईश्वरउवाच॥ ॥कश्चिद्गोपसुकेदारवनखंडेस्थितोऽभवत्॥अजाविपालकोनित्यंमहिषीणांतथागवां॥तृणेषुपुष्क
123 लेष्वेवचारयन्गोपबालकैः॥क्षीरंदधिघृतंनित्यंविक्रीणातिसदापपौ॥२॥सतेनजीवतेगौरिदधिभांडंसमापयन्॥भू
न्यलिंगंभूमिगतंप्रास्खलत्तस्यपादयोः॥३॥दधिभांडंपतद्भिन्नंतल्लिंगस्यैवमस्तके॥दध्नाभिषेकेनैवेशितस्याभूच्छिव
संनिधिः॥४॥कश्चित्संकरजातीयःवनेषुमधुशालिषु॥पीत्वामधुप्रलिप्तेनमधूच्छिष्टेनघर्षयत्॥५॥शून्यलिंगंवनस्थंतु
रुद्रकोटेमहेश्वरि॥समधुस्नानकृदितिसमानीतोगणैर्मम॥६॥घृतंघटेनबिभ्रन्सःकश्चिच्छूद्रकुलोद्भवः॥वनेभुक्त्वाशि
वागारेऊर्ध्वउन्नामयद्घटं॥७॥कृष्णाष्टम्यांनिशिशिवेरज्जुर्मूषिकखंडिता॥तद्घटस्यघृताक्तस्यप्रापतल्लिंगमस्तके॥८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० घृताभिषेकस्तेनाभून्निशि पापक्षयावहः ॥ तेन तत्पापमखिलं प्रदग्धं तत्र पार्वति ॥ ९ ॥ लिंगस्य दर्शनं पुण्यं दर्शनात्स्पर्शनं व ईशा० स० ३
१५ रं ॥ कृष्णाष्टम्यां निशि शिवे घृतस्नानमघापहं ॥ १० ॥ अयत्नलभ्यं तस्याभून्निशि शूद्रस्य तस्य वै ॥ कृष्णाष्टम्यां शिवागारे अज्ञा अ० १४
नात्घृतसेचनं ॥ ११ ॥ प्रातर्दृष्ट्वा वसिष्ठं च ययौ शूद्रो घृतग्रहः ॥ कालेन निधनं प्राप्य मम सारूप्यभाग् भूत् ॥ १२ ॥ इक्षुकांडं हरन्
कश्चिदिक्षुयंत्रकरो वणिक् ॥ इक्षुयंत्रेण तत्सारं गृहीत्वा स्वगृहे तदा ॥ १३ ॥ धावमान स्खलत्पादः प्राप तच्छून्यलिंगके ॥ इक्षुसा
रघटे लिंगे प्राप तद्दैवयोगतः ॥ १४ ॥ इक्षुसारसेचनं च तल्लिंगस्याभवच्छिवे ॥ माघ्यां पर्वणि देवेशि तस्य भाग्यवशादुमे ॥ १५ ॥
तेन पुण्येन स वणिक् प्राप्तां ते सद्म मे बिंके ॥ काचिन्नारी शून्यलिंगे वनमध्ये भयातुरा ॥ १६ ॥ शर्करासारमाबध्य वनखंडे नदी
जलैः ॥ दुर्गमे पंकिले मार्गे शून्यलिंगे प्रपातयत् ॥ १७ ॥ पिपीलिका भयाद्रात्रौ भूता भूत्तत्र भाग्यतः ॥ तया तत्पुण्यमात्रेण
विमुक्ता सर्वपातकैः ॥ १८ ॥ धौतयंती विमानेन समायाति मदंतिकं ॥ बालोयं खेलनासक्तः सिकताभिर्नदीतटे ॥ १९ ॥ नर्म
दायाः नर्मदाया लिंगं बाणांकितं शिशुः ॥ प्राकारगोपुरं कृत्वा सर्वं ससिकतामयं ॥ २० ॥ वन्यपुष्पैर्वन्यफलैस्तत्र संस्थाप्य पू
जयत् ॥ तेनाभ्येति विमानेन वृषभध्वजशोभिना ॥ २१ ॥ अपेक्षकाभिर्यः कुर्याच्छिवालयमनुत्तमं ॥ गणेंद्रैरर्चितो याति
कैलासं मम पार्वति ॥ २२ ॥ ॥ ईश्वर उवाच ॥ यः कुर्याच्छिवधर्मं मेवमबले ज्ञानादथाज्ञानतः संस्मृष्टो निखिलं दहेद्दु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तवहस्तक्षत्तथायंवृष ॥ भक्त्येवप्रभवेत मत्पदधियां पापौघभित्केवलं कैलासप्रद एवनित्यकुतुकैः संसेवनीयोंबिके ॥ २३ ॥
इतिश्री शिवरहस्ये ईशानाख्ये उत्तर भागे शिवधर्मप्रभावे चतुर्दशोध्यायः ॥ १४ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥
श्रीईशानायनमः ॥ ॥ श्रीईश्वरउवाच ॥ ॥ शृणुदेविपरांगे च शिवलिंगनिरीक्षणात् ॥ केचिद्व्रजंति कैलासं गणेंद्रैरभिपू
जिताः ॥ १ ॥ कश्चिद्विप्रोदेवशर्मायुवानित्यंमदोद्धतः ॥ स्रक्चंदनानि संपाद्य तांबूलंधूपवर्तिकाः ॥ २ ॥ पित्रामात्रा चकलहं
कुर्वन्नित्यं सज्जनः सदा ॥ नाध्येतिशास्त्रमुक्तंच वेदांश्चस्मृतयोपिच ॥ वेश्यासक्तेन मनसानित्याध्यायरतोप्यसौ ॥ विस्मृत्या
नध्यायकाले प्रदोषेष्वष्टमीषु च ॥ ४ ॥ चतुर्थ्यांच चतुर्दश्यां सप्तम्यां निशामुखे ॥ सुखेनगत्वानध्यायेष्व र्धरात्रावधिप्रि
124 ये ॥ ५ ॥ शूलहस्तेश्वरस्याग्रेनृत्यंती वारसुंदरी ॥ तदा तस्यां हृच्छयेन शूलेश्वरविलोककः ॥ ६ ॥ एतेषु पुण्यकालेषु अनाध्याय
मिषाच्छिवे ॥ पितरं वंचयित्वायं रिरंसयितुमिच्छया ॥ ७ ॥ हृच्छयाविष्ट हृदयो वेश्यासंगमलालसः ॥ अलसोध्ययने प्राप्तोवि
लासासक्त मानसः ॥ ८ ॥ धूपंतदर्थमानीतं संधूप्य च शिवाग्रतः ॥ नर्तनांते सवेश्यायै फलंपुष्पंददात्यसौ ॥ ९ ॥ तयासक्तः सुदुर्मे
धात्यक्तवर्णाश्रम क्रियः ॥ कदाचिन्निशि काले तु शिवोत्सवदिदृक्षया ॥ १० ॥ तस्यामासक्तहृदयो पादेद ष्ट भुजंगमः ॥ पितृ
गेहे ममारायं सोयमायातिविप्रकः ॥ ११ ॥ विमानेसद्रूपाकारः साकाद्र्वमन्मथः ॥ दिव्यदेहेन भात्येष भानुवच्छिवधर्मकृत्
॥ १२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰१० प्रदोषे प्यब्द मीष्वेवसप्तम्यां चचतुर्दशीं ॥ सोमवारे नथासायं शिवलिंगनिरीक्षणात् ॥१३॥ वेश्यासक्ते नचित्ते न शिवदृष्टिर्वि ई॰ ८०५०
१६ वर्जितः ॥ अज्ञानाद्दर्शनादेव किंपुनर्ज्ञानिनां प्रिये ॥१४॥ तथान्यो वैश्यपुत्रोयं चेटीवाटीप्रियः सदा ॥ तत्रवंगे शिवागारे निशिशिवे अ॰१५
शिवोत्सवे ॥१५॥ साम्राणि बहुलं गृह्य वेश्याकेशसुधूपनं ॥ करोमीति विनिश्चित्य निद्रयापहृतो भवत् ॥१६॥ तांबूलं नागवल्ली
नां दलसाहस्रमुत्तमं ॥ क्रमुकानां पंचपलं त्यक्त्वागारे शिवस्यहि ॥१७॥ जंबीरं पंचकं प्रातः तथायुक्तोयये जवात् ॥ तन्मंडप
गतं दृष्ट्वा शिवालयविचारकाः ॥१८॥ तांबूलं विनिवेद्येशे साम्राणि धूपभातनुः ॥ जंबीरजरसेनेशं शिषुचुः तत्रतेर्चकाः ॥१९॥ त
द्भागधेयमुद्भूत्यापिच्छो वणिजः शिवे ॥ सस्ववधनधान्येन वर्धमानोथ भूतले ॥२०॥ स्ववश्यवेश्यावैश्यो सोरमते मदमोहितः ॥
धूपतांबूलजंबीरदाने नाज्ञानतो मयि ॥२१॥ कालेन निधनं प्राप्य समायाति विमानगः ॥ मधुरायां पुराशूद्रो मधुरेश्वर मंदिरे ॥२२॥
क्रयार्थमर्थविध्येव धान्यं संस्थाप्य विक्रयं ॥ करोति पणदातृणां दायने सधनेच्छया ॥२३॥ दुर्भिक्षे च तदा प्राप्ते नैवेद्यार्थं शिवा
यवै ॥ अचूचुरन्नत्र धान्यं शिवेतस्य शिवार्चकाः ॥२४॥ विनिवेद्य तदा तानि शूद्रधान्यान्नमीश्वरि ॥ एवं स्थिते तेन पृष्टाः
शूद्रेणैवं शिवार्चकाः ॥२५॥ ॥ शूद्र उवाच ॥ ॥ नदृश्यते मानहीनं धान्यं मम शिवार्चकाः ॥ शिवालयस्थं स्वाधीनं भवतां
प्रवदंतु मे ॥२६॥ तेप्यर्चकाः प्राहुरेवं मूषिकैर्भक्षितं निशि ॥ नजानीमोत्र ते धान्यं यथेच्छं कुरु माचिरं ॥२७॥ तथ्यं तद्वचनं मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यं धान्यं मेने समूषिकैः॥ भक्षितं भिक्षुणा देवि मया प्राप्तं तदा प्रिये॥२८॥ तेन धर्मेण भूद्रोयं धान्यदो याति मत्पदं॥ ॥ईश्वर उवाच॥ ॥इ
त्थं प्रदोषे शिवलिंगलोकनात्साम्राणि जंबीर फल प्रदानात्॥ धान्य प्रदानात्पाद जविप्र वैश्याः क्रमेण याताः शिवलोकमंबिके॥२९॥ ॥
इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तर भागे शिवधर्म प्रभावो नाम पंचदशोध्यायः॥१५॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥ईशानाय नमः॥
श्री ईश्वर उवाच॥ ॥विदर्भनगरे देवि उग्रेशाख्ये शिवालये॥ तंतुवाया ब्राह्मणी च रजकी बुरुडी तथा॥१॥ वेश्या गनेयं तत्रैव बाल्य वैधव्यतो भ
मा॥ उन्नता उन्नत कुचा जारतः किल संगताः॥२॥ व्याजेन शिव कैंकर्य मातेनुस्ताः शृणु प्रिये॥ ॥देव्युवाच॥ ॥बाल्ययौवन दृप्ता गा जारि
पयो विधवा हिताः॥ शिवधर्म कथं चक्रुः तन्मे वद महेश्वर॥ ॥श्री ईश्वर उवाच॥ ॥तास्तदा मदमत्तांग्यः पीनोन्नत पयोधराः॥ नित्यं स्नात्वा नदी
तोयं बंधुशाप भयादुमे॥४॥ प्रातर्घटे जलं शीतं समानीय शिवालये॥ शिवागारस्थितान्वृक्षान् नारिकेल मधूककान्॥५॥ बिल्वाम्रफलमादीश्वरं मा
जंबीर जंबुजान्॥ जलैस्तान्ग्रीष्मकालेपि क्षालयन्त्ताम मालयं॥६॥ अवर्धयन्त्तथा वृक्षान् फलपत्र सुमांकुरैः॥ पट साधन सामग्री तंतुवायी तु चातु
री॥७॥ शिवाय वस्त्रं कार्पासं कृत्वा दात्तत्र पार्वति॥ ब्राह्मणी रंगवल्या सा शिवस्याग्रे बिकालये॥८॥ पंचवर्णैः पिष्टैश्च नाना वर्णानुरंजितं॥ पत्रस्वस्ति
क पुष्पाणि चकार प्रत्यहं शिवे॥९॥ वेश्या संमार्जनपरा शिवागारोपलेपनी॥ रजकी शिव निर्माल्य वस्त्राणां क्षालनं व्यधात्॥१०॥ भोजनार्थं समायांति
स्वगृहे तास्त्रियः स्वयं॥ एवं कैंकर्ययुक्तास्ता निशि जारेण संगताः॥११॥ समकालमभूत्कालः नितास्ता सौरि पांतिके॥ विचार्य शिवधर्मं तत्पूजिता

125

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० स्तेनतत्रवै ॥१२॥ प्रयांतिताविमानेनपश्यधर्मस्यसूक्ष्मतां ॥ तत्कराग्रांबुसेकेनवृक्षापुष्टिमथाययुः ॥१३॥ तेनमल्लिंगपूजार्थं दुपयोगोभवेच्छिवे ॥ ई०द०पु०

९७ यावत्तत्पत्रकुसुमफलबीजादिसंख्यया ॥१४॥ तावत्कल्पायुतंभूयात्कैलासेवासइष्टदः ॥ तांतवीवस्त्रदानान्मेयावत्तत्तंतुसंख्यया ॥१५॥ शिवलो अ०१६

कमवाप्यैवमुक्तपापासमागता ॥ रंगवल्यादिकरणाद्धात्स्णीचैवपार्वति ॥१६॥ यावत्तत्पिष्टकणाजसंख्ययावासएवमे ॥ संमार्जनोपलेपेन

यावत्तद्रजसःकणाः ॥१७॥ तावत्कैलासवासाययोग्येयंशिवधर्मतः ॥ तत्रान्योयंयुवापापीवेश्यार्थंचंदनंपिबन् ॥१८॥ शूलेश्वरालयेकाश्यां

गंधघर्षणजांशिलां ॥ भक्ष्यांदृष्ट्वासवेश्यार्थंस्वांगलेपनहेतवे ॥१९॥ श्रीखंडखंडंसंपाद्यचंद्रकेसरकुङ्कुमैः ॥ संयोज्यघर्षयत्येवतत्रदेवायसोवि

टः ॥२०॥ प्रददातिसजंबीरमात्रमुत्कृष्टचंदनं ॥ शिवार्चकास्तेग्रीष्मेवैलिंगालेपनमादधुः ॥२१॥ तेनपुण्यप्रभावेनसचेतोऽपिपुरागतः ॥ कश्चि

ड्ढुंडीरकपुरेव्याघ्रेश्वरशिवालये ॥२२॥ बालकंस्वस्यगोवत्संपोषणार्थंतदांबिके ॥ अजाविपालनार्थायनित्यंगत्वाशिवालये ॥ तृणखंडनि

कापाणिःशिवांगणमचीकरत् ॥ शिवांगणास्तृणापारइष्टकासंधिसंभवान् ॥ तृणानितत्रभूदोयंप्राकारेगोपुराग्रजान् ॥ तृणगुल्मलतावृ

क्षान्सोन्मूलान्पातयत्यसौ ॥२५॥ अजाविवत्सपालार्थंनशिवागाररक्षणे ॥ मतिरस्याभवद्गौरितेनायंशिवधर्मभाक् ॥२६॥ समायास्यतिकै

लासंपूज्यमानोगणेश्वरैः ॥ लिंगमालोकयन्धर्मेगर्भगेहेशिवस्यतत् ॥२७॥ वीजयामाससस्वांगंतालवृंतेनपार्वती ॥ तद्धातपोतस्तत्राभून्म

मलिंगेक्षणार्धकं ॥२८॥ तेनपुण्येनविप्रोसावागतोमुक्तपातकः ॥ कश्चिच्चामरहस्तेनवारयन्स्वांगमक्षिकाः ॥२९॥ निवारणार्थंदुधुवेशिवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोरन्नपात्मजः॥ किंपुनर्ज्ञानतो भद्रे कर्मैवं कुर्वतां मम॥ ३०॥ ॥श्रीईश्वर उवाच॥ ॥एवं स्त्रियस्ताः सुविमानमध्यगा यु वापि सच्चंदनपेषणादु
पे॥ अजाविपालो पिच लिंगवीजकः सच्चामरासक्तकरस्स पुण्यभाक्॥ ३१॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्मप्रभा
वो नाम षोडशोध्यायः॥ १६॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानाय नमः॥ ॥श्रीईश्वर उवाच॥ अथापरं शृणु शिवे कथां पापप्रणाशि
नीं॥ मालवे पुरा कश्चित्व्याधः साधुविनिंदितः॥ १॥ मद्यं मांसं चलशुनं खादन्नित्यं श्वभिर्वृतः॥ वने सरस्तटे वृक्षषंडमध्यमनोरमे॥ २॥ मृगप
क्षिसमूहैर्वा झिल्लिकागणसेविते॥ तस्मिन्वने निवसति सदारः ससुतैर्वृतः॥ ३॥ जालेन पक्षिजालानि मत्स्यानि प्रबबंध वै॥ शिवागारे तत्र शिवे
निवसन्मांसभोजनः॥ ४॥ मत्स्यमांसं सपक्वं वै लिंगाग्रे भोजनं निशि॥ एवं भस्मांकिततनुः स्वकटीतटजं पटं॥ ५॥ समासमारं शिरसि शिवलिंगस्य
तं पटं॥ वितानदानतस्तेन पापमुक्तः शिवं ययौ॥ ६॥ कश्चिच्छूद्रकुलोत्पन्नः चेटीवीटीमुखांबुजः॥ शून्यलिंगस्य शिरसि सपर्णाच्छत्रमादधत्॥ ७॥
126 ग्रीष्मे तच्छायया न्नं स बुभुजे क्षुत्तृषाकुलः॥ तदन्नं तत्र लिंगाग्रे तन्नैवेद्योपमं भवत्॥ स एवात्रागतो देवि छत्रदो मे विमानगः॥ कश्चिद्विप्रो वेदधनः द
रिद्रों छन्नजीवति॥ ९॥ तंडुलं तत्र संपाद्य शाकं किंचित्तदांबिके॥ सोमवारे निशि तदा प्रदोषे शिवसंनिधौ॥ १०॥ बुभुजे दुर्वया पूज्य बिल्वैस्तल्लिंगम
स्तकं॥ तेन पुण्यप्रभावेन शिवधर्मोत्तरेण च॥ ११॥ विमानमध्यगो भाति पश्य तं कमलेक्षणे॥ कदाचिदविमुक्ते त्र विश्वेशस्यालये तदा॥ १२॥ वेदश
र्माद्विजवरो धनी गोक्षीरतः शिवं॥ संसेचयति पुण्यात्मा तस्यैका नागता च गौः॥ १३॥ वनमध्यं प्रविष्टासा नज्ञाता गोपकेन च॥ सायमन्यास्तदागा
वो दृष्ट्वैकां गां तदानसः॥ १४॥ गोपं निर्भर्त्सयामास गां समानय मेंतिके॥ स स्वामिना च क्रुद्धेन समाज्ञप्तः स गोपकः॥ १५॥ चैत्रकृष्णाचतुर्दश्यां निशि क्षेत्रं परि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० उ० १० १८ भ्रमत्॥क्षेत्रप्रदक्षिणा जाताशिवलिंगात्मकस्य च॥१६॥निराहारस्य गोपस्यसहारस्य पशोस्तथा॥प्रदक्षिणादिव्याजेन तावुभौ गोपगोः शिवे॥१७॥कालेन ई० द० उ०
निधनं यातौ ययुतुस्तौ शिवांतिकं॥अज्ञानात्तत्र गोगोपौ प्रादक्षिण्येन पार्वति॥१८॥शिवलिंगात्मकस्यैव प्रादक्षिण्येन मोचितौ॥कश्चिद्दासीसुतो मेशित्र्यं अ० १७
बके गौतमीतटे॥१९॥शिवोत्सवे तदा गौरि नानादेश्या नरांगनाः॥समागतास्तदा तत्र सिंहसंस्थे बृहस्पतौ॥२०॥चोरयामास तत्रत्य जनानां धनधान्यकं॥गो
दावर्यां तदा शूद्रः स्नात्वा भस्मत्रिपुंड्रधृक्॥२१॥तत्स्नानधूत पापोयं त्र्यंबकेश्वरदर्शनात्॥सद्यो विगतपापोयं प्रापांते सद्म मेंबिके॥२२॥कश्चित्संकरजा
तीयः श्रीशैलेशस्य कानने॥पुष्पाण्यपचिनोति स्म मल्लिकामालतीभवं॥२३॥वेश्यायै दातुकामोयं कदाचिद्वनपालकः॥प्रत्यूषे तं तदा दृष्ट्वा सूक्ष्ममार्गाग
तं नरं॥२४॥दृष्ट्वा बध्वा रज्जुना तं पादे गलमयोजयत्॥तं च याचन्नलान्नादिदयया तेन मोचितः॥२५॥तत्र पुष्पोपहारार्थं स वेश्याहृच्छ्रयेधितः॥तद्वनासे
चनं ग्रीष्मे कुंभाहृतजलैः शिवे॥२६॥अकरोद्वनपालेन तत्पुण्यवनसेचनात्॥तच्च पुष्पांकुरैः पूर्णं वनं कुसुममंडितं॥२७॥निबिडं फलपुष्पौघैः श्रीशैलेशार्चनसाध
नं॥स तदा तच्च कालेन मृतः शिवपुरं गतः॥२८॥शिवे स संकरो याति विमाने नार्कराचिषा॥एवं स शिवधर्मेण शिवपुष्पवनावनात्॥२९॥प्रयाति मम लोके स तेन पुण्ये
न पार्वति॥ ॥ईश्वर उवाच॥ ॥एवं पुष्पवनावनेन गिरिजे स्यात्संकरः शंकरं॥प्रापांते स्व कटीतटोद्धृतपटं दत्वावितानात्मकं॥३०॥प्रादक्षिण्यवशेन गोपग विच्च
स्नेहो मया दर्शितो॥गोदायां पुतिशंकरेक्षणफलं चोरस्य पापोज्झितिः॥प्रोक्ता ते शिवधर्मसारपदवी साध्वी च माध्वी रसात्स्वाद्वी श्रोतृगणस्य चेतसि सदा मोदप्रदा पार्वति॥
कल्यानल्पसुगम्य वासमहिताः कैलासवासोत्तराः ते धीराः शिवधर्मसिंधुरवसा ते शंकराः सर्वदा॥३१॥इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्ममहिमा
नाम सप्तदशोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानाय नमः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानाय नमः ॥ ॥ श्रीईश्वर उवाच ॥ ॥ शृणु पद्मच्छदाकारलोचने स्वच्छमानसे ॥ गोकर्णे पुल्कसी काचित्पती-
नांधेन संयुता ॥ १ ॥ वामदेवादि मुनयः कदाचिद्दैवयोगतः ॥ महाबलेशं गोकर्णे शिवरात्र्यां विलोकितुं ॥ २ ॥ प्रययुस्त
त्रते मार्गे नानाजनसमन्विताः ॥ ब्रह्मक्षत्रविप्राः शूद्राः संकरा वणिजस्तदा ॥ नदीनदान्तपाशैलान्वनानि सरितस्त
टान् ॥ विलंघ्य सुबहून्देशान् तत्रागच्छन्तदांबिके ॥ ४ ॥ पुल्कसेन तदान्धेन पुल्क~~सेनतत्वं~~स्य पि समागता ॥ याच-
मानाजलान्नादि पांथांश्च पथि संगतान् ॥ ५ ॥ तैर्दत्तं जलमन्नं च भुक्त्वा यातौ च पुल्कसौ ॥ शिवरात्र्यां तदा रात्रौ सर्वे सं
पूजने रताः ॥ ६ ॥ वामदेवादि मुनयो नरा नार्यो महेश्वरं ॥ गोकर्णेशं बिल्वदलैः समुद्रस्नानतत्पराः ॥ ७ ॥ तत्रैतावा
127 पणस्थौ च स्नानं घर्मप्रणाशनं ॥ कृत्वा सायं पुल्कसौ तौ आपणस्यान्वणिग्वरान् ॥ ८ ॥ याचमानौ जलान्नं च शिवरात्र्यां
नते ददुः ॥ कश्चित्तद्धस्तपुटके पुल्कसाध्रस्य पातयन् ॥ ९ ॥ त्रिदलान्यथ बिल्वानि पातयत्पुल्कसांजलौ ॥ परामृश्यान्य
करतो पुल्कसो थ सभार्यया ॥ पातयामास निकट स्थित लिंगस्य मूर्धनि ॥ ततः प्रातः कणादीनि दत्तानि पथि पांथिकैः ॥ ११ ॥
भुक्त्वा तत्रैव गोकर्णाज्जग्मतुर्म मृतुः पथि ॥ तावागतौ विमानेन बिल्वपत्रार्चकौ मम ॥ १२ ॥ गोकर्णे शिवरात्र्यां तौ
महापुण्यमवापतुः ॥ स्वैरिणी जारिणी वैश्याबंधूनां धनहारिणी ॥ १३ ॥ आरटसंस्थिता देवी मारिणी स्वपतिं निशि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संगतान्येन वैश्येन यौवनेन च संयुता ॥१४॥ तं च वृद्धं परिज्ञाय तस्य मूर्ध्नि शिलां निशि ॥ न्यपातयन्ममारासौ तद्धनं
१९ साप्य पाहरत् ॥१५॥ तदान्यं ग्राममासाद्य शूद्रेणान्येन संगता ॥ शूद्री चंडी तया नित्यं कलहं साच कार वै ॥१६॥ स्वास्मि
न्पराङ्मुखं वीक्ष्य स्वपतिं वैश्ययायुतं ॥ मारणौषधदानेन तां वैश्यां साप्य मारयत् ॥१७॥ नीता वैवस्वतपुरं साय
मेनाथ पूजिता ॥ यमस्तदाह पुरतः चित्रगुप्तं कृतांजलिः ॥ यम उवाच ॥ वैश्यया किं कृतं भूमौ पुण्यं वा पापमेव
वा ॥ वदेति तस्य वचसा चित्रगुप्त उवाच तं ॥१८॥ चित्रगुप्त उवाच ॥ जारिण्यपि च वैश्येयं निरस्ता बंधुभिर्यम ॥
वैश्येन संगतान्येन तं हत्वा शूद्रसंगता ॥२०॥ शूद्र्यौषधप्रदानेन मृते यं त्वत्पुरं गता ॥ अनया वैश्यहनने या
शिला तत्र पातिता ॥२१॥ तां शिलां मार्गमध्यस्थां मादधुस्ते शिवालये ॥ देवेश्वरस्य प्राकारे जीर्णे धोरे नृपाज्ञ
या ॥ तच्छिलास्पर्शकर्त्रीयं कैलासं यातु सांप्रतं ॥ एतस्मिन्नंतरे तत्र विमानं मद्गणेरितं ॥२३॥ तामारोप्य समा
यातं कैलासं दक्षिणं मम ॥ कश्चिद्दुर्मेश्वरागारप्राकारच्छायया विटः ॥२४॥ संगच्छन्पथि दुर्मेधः तांबुलितमुखो
बुजः ॥ अवसिष्टं करे चूर्णं लेपयामास संधिषु ॥२५॥ प्राकारस्थेष्टकासंधौ गच्छन्पण्यांगनागृहं ॥ ईश्वर उ
वाच ॥ सुधाप्रदोयं विट इत्युमे मया सुधांशुमस्तोरु सुधाम संधिषु ॥ बिल्वार्चकौ पुल्कसदंपती शिवे वैश्या=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिलादापनतो विमानगा॥३६॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवधर्मप्रभावो नाम अष्टादशो-
ध्यायः॥ १८॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीईशानाय नमः॥ श्रीईश्वर उवाच॥ पुनरन्यां कथां धन्यां मान्यां
शृणु गिरीन्द्रजे॥ शिवधर्मप्रबोधार्थं सर्वेषां विस्मयावहं॥१॥ आर्यावर्त्ते विन्ध्यपृष्ठे कौशिक्याश्च तटे शिवे॥ हरिकेशे
शधाम्नोर्थे शिलानयनहेतवे॥ २॥ शतं च शकटं यातं हयारिगणसंकुलं॥ तन्मध्ये निश्चितत्रस्ये शकटीनां समूहके॥
महिषः तेषु चैवैको तृणार्थं धावते तदा॥ तत्र शालिवनं स्फीतमचरच्चारुणोदये॥ ४॥ कृषीवलस्तदेशाय महि
षं स्वगृहांगणे॥ बबंध रज्जुना सत्यं स गृहार्गलमातनोत्॥ ५॥ प्रातस्ते शकटीवाहा अदृष्ट्वा महिषं स्वकं॥ ग्रामपालां
(१२८) तिके गत्वा प्राहुस्ते महिषं गतं॥ ६॥ कृषिकर्तुस्तदान्यस्य महिषं समयोजयत्॥ किंचिद्दूरं व्रजस्वेति शकटीवाहमब्रवी-
त्॥ ७॥ यावन्न दृश्यते तेवै महिषः शकटीवहः॥ तावत्त्वं निकटस्यायं नीयतां महिषो लघु॥ ८॥ इत्युक्तो स मिदं कृत्वा शकटी-
वाहपालको॥ बध्वा तं शकटीयंत्रे मार्गे वै घटिकाद्वये॥ ९॥ प्रातर्दृष्ट्वा तु महिषं गृहे बद्धं कृषीवलः॥ हरिकेशालय
स्यार्थे अस्मयं त्रपुरावहं॥ १०॥ शूलांकितमपो दृष्ट्वा भिया तं शकटीवहे॥ पादादन्यं तदा मुक्त्वा भ्रान्ते स्वं महिषं
ददौ॥ ११॥ तावुभावागतौ शूद्रौ विमानेन शिवालयं॥ हरिकेशालयार्थीय शिलावहनजेश्रमम्॥ १२॥ कशाघातवि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिन्नार्द्रव्रणंतं महिषा र्दितं ॥ यावत्सस्यं शालितृणंतावत्क्षयन संख्यया ॥ शिवलोकोस्य वैभाविंतथान्य महिषस्य
च ॥ ऊह्यमानस्य पदजसंख्यया मार्गमध्य मे ॥१४॥ तावद्यो महिषस्वामी समायास्यत्यघोज्झितः ॥ कैलासदक्षि
णेदेवि शिवधर्मो ममेदृशः ॥१५॥ नपूर्त्त धर्मैरिष्टाद्यैः कैलासेव संतेनरः ॥ वटवः पटवः केचिल्लीलार्थं काष्ठयंत्र
के ॥१६॥ सोमेशकदली षंडेबाहुदातीरजे शिवे ॥ तेकटौ पटमाबध्यतत्तीरे काष्ठयंत्रके ॥१७॥ वंशहस्ताः समारुह्य ली
लार्थमरुणोदये ॥ आपातः कदली षंडे सं शुष्केजल वर्जिते ॥१८॥ सोमेशकदली षंडंतेन सिक्तम भूच्छिवे ॥ पत्रपु
ष्प फलैः पूर्णं रंभास्तं भवनं महत् ॥ तैः फलैः रभ्यषिंच्यं स्ते पुण्ये पर्वणि शंकरं ॥ शिवार्चकास्ते वटवः समायास्यंति
मत्पदं ॥२०॥ हेलयालीलया वापि शिव धर्मं प्रकुर्वते ॥ शिवलोको हि नियतं नान्यया धर्मकोटिभिः ॥२१॥ कश्चिद्द्रा
व्रस्तथा स्थानं कर्त्तुं मंटप उत्तमे ॥ ओंडीश्वर शिवागारे मार्गे यातस्य शंकरि ॥२२॥ तत्राकुर्वन् ग्रामणयः सुधा
लेपन लेखनं ॥ पंचवर्णजचित्रैश्च रं भातोरण मंडितं ॥२३॥ राज्ञो धनं शिवस्यार्थे क्षणं विश्रांतिदायकं ॥
तेनधर्मेण राजासौ तथा ग्रामणयोपि च ॥२४॥ शिवागारे सुधालेप चित्रलेखानतो मम ॥ कैलासंदक्षिणं
यांति विमानस्था स्तदोज्वलाः ॥२५॥ श्रीईश्वर उवाच ॥ पीयूषदीधितिधरालयवेश्मयंत्रसंकर्षमाणकह-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यारिसुधासदानैः ॥ सोमेश्वरस्य कह्लौ परिसेचनेन काष्ठोर्ध्वयंत्र परिशीलकबालकास्ते ॥ २६॥ भूपागमा
र्थ शिवमंटपचित्रकर्मशोभ्यमानमम सद्मनि वासिनस्ते ॥ २७॥ इतिश्री शिवरहस्ये दशमांशोत्तरभागे
शिवधर्मप्रभावे एकोनविंशोध्यायः ॥१९॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ श्रीईश्वर उ-
वाच ॥ कश्चित्पुष्करमध्यस्थो विप्रो वेदशिराह्वयः ॥ गर्गगोत्रो दुर्योदेवि वीतिहोत्रसमौजसा ॥१॥ पुष्करेषु तदा
स्थातुं कृत्तिकापौर्णिमौर्जकौ ॥ गतः शिष्यैः परिवृतो मध्यमार्गे वने तदा ॥२॥ ताडपत्रं विलुलितं दृष्ट्वा सूत्रविवर्जितं ॥ अले
खमय दृष्ट्वा सौ विचिनोति स्म शिष्यकैः ॥३॥ तदाले ख्यं ताडपत्रं संगृह्य द्विजोत्तमः ॥ विसर्जितं वनेतत्र सूत्रप्रोक्तं
तदाकरोत् ॥४॥ पुष्करेषु त्रयेष्वेव स्नात्वा संतर्प्य वै पितॄन् ॥ बिल्वैः पुष्करजांभोभिः समभ्यर्च्य महेश्वरं ॥५॥ पुष्करेशं
129 प्रतुष्टाव तत्र मासमुवास सः ॥ सतस्मिन्ताडपत्रे तु लिलेख दशमांशकं ॥६॥ शिवे शिवरहस्यं च पावनं विप्रसत्तमः ॥ तेन
पुण्येन विप्रो सावायाति मम संनिधिं ॥७॥ विमानेनार्कवर्णेन भ्राजमानः सशिष्यकः ॥ विप्रस्य कस्य चित्पूर्वं ताडप-
त्रं वनेतदा ॥८॥ तत्तंडुलं गृहीत्वायं चोरो लेखं ससूत्रकं ॥ तत्सूत्रं कटिसूत्रार्थं मगृहीत व्यसर्जयत् ॥ यावदक्षरसंख्या
तः शिवशास्त्रविलेखनात् ॥ शिवलोके स निवसेच्चौरो विप्रः सशिष्यकः ॥१०॥ शिवेशिव पुराणानां लेखनेन शिवं ययुः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुलालः शिवसद्मार्थं शिवलिंगस्य शेचनात् ॥११॥ शिवाभिषेके मृत्कुंभं दद्यावेकं तदा शिवे ॥ शिवार्चककरे देविगौ
२१ डेशस्य शिवालये ॥१२॥ तेन पुण्यप्रभावेन कौलाली याति मत्पदं ॥ मृत्कुंभदानं लिंगस्य धातुपात्रेषु किं पुनः ॥१३॥
गुडभक्ष्यकरः कश्चिदापणस्थो द्विजाधमः ॥ तदा तच्चोरयित्वा तु बालः कश्चित्तु भक्ष्यकं ॥१४॥ गुडमाषकृतं तैलप=
क्वपत्रकशाष्कुलीः ॥ शिवालयं धावमानस्तेनाप्यानुद्रुतः पथि ॥१५॥ शिवालये शिवं दृष्ट्वा शिवार्चककरे ददौ ॥ आप=
णी मांसमायाति भक्ष्यचौर्यं कृतं मया ॥१६॥ शिवे निवेदितमिति तत्वं ब्रूहि ममाग्रतः ॥ तवार्धं संप्रदास्यामि भक्ष्य या-
म्यहमर्धकं ॥१७॥ इत्थं द्विजार्भकेनोक्तं श्रुत्वा गौडेश्वरार्चकः ॥ तं तथेत्यनुमान्याह तमापणपतिं द्विजं ॥१८॥ ॥
॥ शिवार्चक उवाच ॥ नानेन भक्ष्यचौर्यं ते कृतमापणसंस्थितं ॥ शिवे नैवेद्यमेतन्मां याचते काचदापनैः ॥१९॥ तं
तथेत्यनुमान्यासौ ययौ हित्वा तमापणी ॥ यथा कथं चिदेवात्र शिवः प्रीयत भक्ष्यकैः ॥२०॥ गुडमाषापूपकार्धं
गृहीत्वा बालको ययौ ॥ आपणी बालकश्चैव तदा गौडेश्वरार्चकः ॥ त्रयोऽपि समभागास्युः शिवे नैवेद्यवाक्यतः ॥
शिवलोकं प्रापुवंस्ते तेन पुण्येन पार्वती ॥२२॥ किं पुनर्गुडमाषाक्तभक्ष्यभोज्यप्रदायिनां ॥ अलकानगरे क-
३ श्चिद्द्विजः पांथः श्रमातुरः ॥२३॥ अलकेश शिवागारे ग्रीष्मे माध्यंदिने तया ॥ तंडुलं शाकसूपाज्यं दत्तं केन चिदी=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चीरं ॥ २४॥ पाकं कर्त्तुं शिवागारे मंडपे द्विज सत्तमः ॥ स्नात्वा वासों चलेनैव गो मयेनोप लिप्य गां ॥ २५॥ शिवागारे
मध्य गतं पाकं कर्त्तुं मथार भत् ॥ सचान्नंव भुंजे तत्र शिवागारे स्व भार्यया ॥ २६॥ तेन संमार्जनालेप पुण्ये
नायाति मत्पदं ॥ कुंदेश्वराग्रत स्तीर्थं शिव स्या भूत्पुरा तनं ॥ २७॥ पंकिलं तद भूद्दि वितत्पार्श्वे गृहबंधने ॥ उ-
द्घाट्य मृत्तिकां भित्तिंबबंध द्विज सत्तमः ॥ २८॥ शिवतीर्थं च निष्पंकम भूद्वर्षांबुपूरितं ॥ समीचीनम भूत्ती
र्थं शंभो रग्रे स्थितं शिवे ॥ तेन पुण्य प्रभावेन शिवतीर्थोद्भूतैः फलैः ॥ शिवलोक मवाप्यंते कैलासे दक्षिणे व
सत् ॥ २९॥ कस्मिंश्चिच्चं करागारे शिवे धान्या वनाय च ॥ अवटं न्यखनद्दौ रि धान्यं तस्मिन्न पूरयन् ॥ ३० ॥
130 शूद्र वर्षो मास मात्रादूगृही ला धान्य मुत्तमं ॥ स्वगृहं प्रययौ तत्र तद्वर्षांबुप्र पूरितं ॥ ३१॥ अवटः कूप उद्भूत्तत्र दे
व्यंबु पूरितः ॥ शिवागारे कूपखनः शूद्रोयं धान्यपूरणात् ॥ ३२॥ तेन पुण्य प्रभावेन शिवलोकं व्रजत्यसौ ॥ ॥
॥ ईश्वरउवाच ॥ एवंते शिवधर्मसूक्ष्म जगति प्रोक्ता हि पापात्मनां पापान्मुक्तिरपा भवद्गिरि सुते भक्ष्य प्रदाना च्छिवे ॥
मृत्कुं भस्य च दानतो वट करात्सत्तीर्थ तो लेपतः कैलासाचलमौ लिवासज सुखं संप्राप्नुवंति ध्रुवं ॥ ३३॥ ॥
इति श्री शिवरहस्ये इशाना ख्येदशमांशे उत्तर भागे शिवधर्म कथने विंशो ध्यायः ॥ २० ॥ श्री काशी विश्वेश्वरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्पमस्तु ॥ श्रीईशानायनमः॥ श्रीईश्वरउवाच॥ केचित्तदाक्रजन्मार्गे गंधमादन पर्वते ॥ रामेश्वराभिषेकार्थं
२२ वहंतो गांगजं पयः॥१॥ कार्पटिकाः पाटयंतः स्वाघौघं तत्र पार्वति ॥ तेषां शिवाभिषेकार्थं व्रजतां पापकर्मकृत्॥ २॥
शूद्रः चौर्याय गच्छन्स शिवयात्रापरैर्जनैः॥ नरनारीगणैर्देवि चातुर्वर्णैर्विशेषतः॥ धनानि पश्यन् छिद्रेषु हर्तुकामः सपादजः॥
तैः सह प्रविशत्येव शिव मालोक्य पापधीः॥४॥ स स्नौ धनुष्कोटितीर्थे ब्रह्मघ्नाघविनाशने॥ मासमात्रं च तत्रत्यैरुषवासो-
च्छान्नभोजनः॥ भस्मरुद्राक्षधृक् भूत्वा साधुवत्परिनिष्ठितः॥ तैः सह प्राक्तमन्मार्गे कस्यचिद्धनमाहरत्॥६॥
तद्ग्राम पाल निकटे प्राप यावध्यते धनं॥ गृहीत्वा निर्ययुर्भोगं तेन छिन्नकरांघ्रिकः॥७॥ पादेनान्येन सर्पन्स अरु
णाचलमासदत्॥ तत्रैवं वसत स्तस्य दीपोत्सव विलोककाः॥८॥ समायाता विशः शूद्रा ब्राह्मणा विधवांग-
नाः॥ प्रसर्पन्याचमानोसौ जलान्नं तेभ्य एव सः॥९॥ तेषामपाहरद्वस्त्रं तैर्हतो मुष्टिजानुभिः॥ क्रमात्प्रस
र्पन्नायातो आद्र्योत्सव विलोककैः॥१०॥ पुंडरीकपुरे तत्र देवं तांडवपंडितं॥ देवीं च ददृशे शूद्रः तत्रौदनमपाहरत॥
॥११॥ शूद्रः सार्थस्य विवदन् शुनानीतमथोदनं॥ तस्मान्निवारितः क्षेत्रात्कालहस्तिपुरं गतः॥१२॥ सुवर्णमुखरी
४ तीरे स्नास्यंतं अबला गणं॥ विलोक्य भूषणं तत्र कस्याश्चित्स मुपाहरत्॥१३॥ शिव सत्पुत्सवालोक समागतजना त्मजं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बालं तत्र क्रीडमानं तं हत्वा तद्गल स्थितं ॥१४॥ कंठाभरण माबध्य स्वकटीपट खंडके ॥ दृष्टो बालं विचिन्वद्भिः
बांधवैः पंगुपादजः ॥१५॥ तदभ्यर्णा वटे बालं मृतं च परीवीक्ष्य तं ॥ तं कंठाभरणे हीनं बोधयं तत्कटी पटं ॥१६॥
शूद्रं बालघ्नमाली क्य रुदंतः तत्पुराधिपं ॥ समासाद्याशु शूद्रेण तत्कंठाभरणं सह ॥ उच्चुक्रुशुस्तत्र भृशं बालघ्ना
कल्पहारकं ॥ तच्छ्रुत्वा तं च शूद्रं स शूलमारोपयत्तदा ॥१८॥ कालहस्ती पुरांते च सुवर्णमुखरी तटे ॥ तच्छीतवायुस्प-
र्शेन तत्रैव मरणं गतः ॥१९॥ शूले प्रोतः स पापोपि शिवोत्सव विलोकनात् ॥ अरुणाद्रौ पुंडरीके धनुष्कोट्यालवादुमे ॥
॥२०॥ कालहस्त्यां च मरणान्मुक्ता घोयाति सद्मने ॥ क्रयार्थं वनकृद्भ्यः शूद्रैरन्यैश्च संगतः ॥ खनित्रैः पिटकैः कुं-
भैः कूपयं चैर्जलोधृतैः ॥ अकरो द्विल्व मंदार पद्मोत्पल उशीरकैः ॥२२॥ कपित्थाम्रमलक द्राक्षारं भाम्र फनसो घिकैः ॥
नारिकेल मधूकानां पूगनागदलावनं ॥२३॥ मल्लिका मालती जाजीवल्लीभिश्च विराजितं ॥ तिरस्कृतिं वनस्थै
व कंटकैः सव्य धादुमे ॥२४॥ तत्र पाल्यव्यव पदुः पुष्पाहरण हेतवे ॥ तत्पुष्पजालैर्वैश्यो सौ विक्रीणाति धनादिभिः ॥
शिवागारे राजगेहे पुष्पाहारैरनेकशः ॥ तद्धनैरूपजीव्यांश्च पोषयत्येव नित्यशः ॥ २६ ॥ क्रयार्थं पुष्पवृक्षाणां विल्वा
नां च वनाद्वनात् ॥ प्रदोषेषु शिवागारे शिवरात्र्यो शिवालये ॥२७॥ बिल्वच्छदानि विक्रीय स पणग्रहणेच्छया ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरात्र्यां शिवद्वारि विनिद्रो सौख्यदार्पणं ॥२८॥ बिल्वानां स करोतीशे तेन याति विमानगः ॥ ईश्वर उवाच ॥ ॥
२३ बिल्वछदक्रयण कृच्छिव सद्म याति शूद्रोपि पांथधन हृच्छिवमात्रयैव ॥ शूल प्रहार रुजमात्र तनुव्यपायेप्रापे-
श्वरं पदमुमे सदयस्य मेद्य ॥२९॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तर भागे शिवधर्मप्रभावे एकविंशो
ध्यायः ॥२१॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ ईश्वर उवाच ॥ अपर्णे शृणु धर्मं मे शिवाख्यं परमा
द्भुतं ॥ यच्छ्रुत्वा मुनयो गौरि विस्मयं त्व मरा अपि ॥१॥ कश्चित्कांच्यां वणिक्वर्यश्चंद्रश्री खंड खंडकान् ॥ विक्रेतुमा
ययौ तत्र नगर्यामापणेषु च ॥ तत्रा न्निवाधा भीत्या यं आषाढे मासि तत्र वै ॥ एकाम्रेश्वर धाम्न्येव स्यापयामास
पार्वति ॥३॥ आपणेष्वर्धमाधाय निशि शिश्ये शिवाग्रतः ॥ तदानीं तत्र दीपाय कर्पूर वर्तिका हृता ॥४॥ गर्भ गेहाग्रतः
शंभोः कवाटागलदापिते ॥ कर्पूर खंड ज्वालाभिः सोज्वलं सद्म शांकरं ॥५॥ आरार्ति क्यम भूच्छंभोः अज्ञानाद्व
णिजः प्रिये ॥ प्रातर्दृष्ट्वा हा हतो हं चंद्रदाहाच्छिवालये ॥ केचिदाहुश्च वणिजं शिवापर्य योज्वलं ॥ तछ्रुत्वा दुःखव
चसा शिवायेत्यब्रवीद्वणिक् ॥७॥ तेन श्री खंड षंडोत्स ज्वालादीपित मंटपं ॥ शिवस्य तत्कृतं तेन त्यागतो मम वेश्-
५ मसः ॥८॥ कार्पास सूत्र माधाय द्रोणिभिः समुपागतः ॥ मार्गसहाय देवेशे जलार्द्र मद्दा द्वणिक् ॥९॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेन पुण्येन दीपानां वर्त्तिदानान्ममाधुना ॥ सर्वपापविनिर्मुक्तः ममसज्जगतोंबिके ॥ १० ॥ हालास्ये पुल्कसः कश्चिच्छि
ववाद्यार्थं च मर्दः ॥ मृदंगढक्कापटहदुंदुभीचर्मदापकः ॥ ११ ॥ शिवागारावलोकैश्च यादत्तात्र सो भृतिं ॥ गृहीत्वा
स्नाति तत्रैव शिवगोपुरलोककः ॥ १२ ॥ दुंदुभ्याश्चर्मदत्तं च तेन पुल्कसकेन हि ॥ न दत्तात्तद्भृतिस्तस्य शिवसद्म
विलोककैः ॥ १३ ॥ क्रोशमानस्तदाशंभोर्द्वारि नित्यं स पुल्कसः ॥ तच्छ्रुत्वाक्रोशतस्तस्य गच्छगच्छेत्य भर्त्सयन् ॥
॥ १४ ॥ मासमात्रं क्षुधाविष्टः शिवार्पणमितिब्रवीत् ॥ दुंदुभ्याश्चर्मदानं मे तदा निर्गल्य पुल्कसः ॥ मृतो दैव
वशाद्याति विमानेनार्करोचिषा ॥ यावद्दुंदुभिनादो भूच्छिवालयसमुद्भवः ॥ १६ ॥ तावत्स पापजनुषा श्रवणेंद्रिय
132 गोध्वनिः ॥ नाशयत्यखिलं पापं चर्मदानाद्यथागतः ॥ १७ ॥ वैद्यनाथालयद्वारि कश्चिद्द्विजः स्थितो भवत् ॥ स्वग-
वाम्रियमाणं तु पुंवत्सं दुःखितं तदा ॥ १८ ॥ शिवायेत्यब्रवीद्द्विजो रोगान्मुक्तो भवच्च सः ॥ शूलांकितं वृषं कृत्वा वै-
द्यनाथाय दत्तवान् ॥ १९ ॥ शिवदुंदुभिवाहाय तेन पुण्येन भूसुरः ॥ शूद्रान्नयाचको वापि मल्लोके शिवधर्मकृत् ॥
समानतो विमानस्थो वृषरोमाब्दसंख्यया ॥ निवसेदत्र कैलासे स्नानदानाच्च किं पुनः ॥ २१ ॥ तुन्नवायस्य तनया
शूचींद्रेशंकरालये ॥ विसृष्टा तेन पित्रा सा वसूर्याम्रियमाणका ॥ २२ ॥ सा यौवनं परं प्राप्य विटचित्तप्रमाथिनी ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवायदत्ता नृत्यंतौ शंकराग्रेशिवालये ॥ अनिच्छन्नर्त्तकीदानात्त मिताजननौ उभौ ॥ समायातौ विमानेन पूजितौ गण
२४ चैर्मम ॥ २४ ॥ तिस्रः कोट्यर्धकोटिश्च यानिरोमाणि वर्ष्मके ॥ तन्नार्यश्चाभवन् गौरितावत्कैलासमावसेत् ॥ २५ ॥
शिवे तत्रोत्तरे कोशे अजानन्नपि वै द्विजः ॥ क्रयार्थमुपवीतानि करोति प्रत्यहं दश ॥ २६ ॥ तत्रैकं छिन्नमभवच्छिवा-
येति शिवालये ॥ उपवीतप्रदो विप्रः नित्यं दुःश्राद्धभोजनः ॥ २७ ॥ मुक्तः पापात्स कैलासं प्रयाति च विमानगः ॥ क-
श्चिद्दक्षिणगोकर्णे वैश्यपुत्रो नटोप्रियः ॥ २८ ॥ सायं प्रफुल्लमल्लीनां कुड्मलानि विचिन्वते ॥ सुशीतजलसि-
क्तानि कृत्वा मल्लीनि सूत्रके ॥ २९ ॥ विविधं राजयोग्यं स आपीडं प्रबबंध सः ॥ तानि वेश्या सुधं मिल्ल मल्लीभू-
तं तनोति सः ॥ ३० ॥ एवं वसंते संकेतस्थाने वारविलासिनीं ॥ रमयत्येष दुर्बुद्धिस्तस्मात्तद्वनपेन च ॥ संदृष्ट-
स्तं ताडयितुमायातः सकशाकरः ॥ तदानीं सिकतालिंगं कृत्वा मालां समर्पयत् ॥ ३२ ॥ तमाह भीत्या पूजा मे लिंगस्या-
त्र कृता मया ॥ मल्लिमालादिभिर्नित्यं नाहं चौर्यार्थमागतः ॥ तस्मिन् सायं प्रदोषे भूत्सोमवारसमन्वितः ॥ ते-
नैकदिवसे सायं मल्लीमालादिभिः शिवः ॥ ३४ ॥ पूजितः सिकतालिंगे तेन वैश्येन तत्र हि ॥ वनपालेर्पितं दृष्ट्वा पूजयं-
६ तं महेश्वरं ॥ ३५ ॥ बहिर्गच्छेत्यशात्पूजानोचेत्वांहन्मिदंडतः ॥ निर्माल्यमालार्धमसौ दत्वा तस्मै वनावने ॥ ३६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वयं गृहीत्वा मालार्धं वैश्यावेश्मन्यथा ययौ ॥ तया सह मते वैश्यो काले नायाति मत्पदं ॥ ७७॥ सोमवारमहोषोत्रसा-
यं मल्लो सुमार्चनात् ॥ तेन प्राप्तं गाणपत्यं वेश्या पत्या पितेन वै ॥७८॥ वेदारण्ये पुरा कश्चिन्नाविको नौकया
ब्धिगः ॥ संचरन्नवरत्नानि हेम रौप्य प्रवालकं ॥७९॥ पीतांबराण्यथान्याश्च शंखसाहस्रमुत्तमं ॥ श्रीखंडचंद्र
कस्तूरीक्रमुकेलालवंगकं ॥ ८०॥ जाजीपत्रं जाजिफलं तक्कोलसुमनःशिलाः ॥ मुक्तामुक्तिसमूहं च गृहीत्वा
वाणिजां वरः ॥ मध्ये महावातहता सागरे भ्रमते च नौः ॥ तदा वेदवनाधीशं प्राप्तोमे वणिजां वरः ॥ ८२॥ वणिगुवाच ॥
ददामि शंखसाहस्रं नवरत्नार्चनं शिव ॥ करोमि नवधान्यानामर्चने वेदनायके ॥ ईश्वर उवाच ॥ इत्थं विचिं
133 तयति तत्र वणिग्वरेऽस्मिन्धारां तथाब्धेः परमापसा नौः ॥ तेनैव तच्छंखसहस्रदानाद्रत्नार्चनाद्धान्यसमर्चना
च्च मद्धर्मे ॥ कैलासमौलिः करगो वणिक्स्थितिः ॥ इति श्री शिवरहस्ये दशमांशे ईशानाख्ये उत्तरभागे शिवधर्म
कथने द्वाविंशोध्यायः ॥२२॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ ईश्वर उवाच ॥ अथान्यं शिव
धर्मं मे शृणु शैलात्मजेऽमले ॥ श्रीकंठे सह्यजातीरे धातूनां क्रयकारकः ॥१॥ घटं द्रव्यं पाकपात्राण्यादाय स वणि-
क्पथि ॥ मध्ये मार्गं प्रविष्टो सौ अश्वोष्ट्रैरुरुरास भैः ॥२॥ भारं वहन्पात्रगणं ताम्र पैतल कांस्यजं ॥ श्रीकंठेशाल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्वारि विक्रीणाति ससिलिङ्गजः ॥३॥ मासमेकमुवासायं तत्र देवस्य उत्सवे ॥ विलोकनजनैः शुंभोः क्रयन् स्ताम्रमयो घटः ॥
२५ केन चिच्चौर्य भावेन तत्रा गारे शिवस्य वै ॥ स विलोक्यापणे स्वस्य स्थितं ताम्रघटं नवं ॥ ५॥ ददौ शिवाय स वणिक्
तेनायं मम सङ्गगः ॥ विमानेन समायाति शिवे ताम्रघट प्रदः ॥६॥ कश्चिद्रत्नाद्रि शिखरे नव धान्योद्वहान्वृषान् ॥
समादायाथ बहुशः वणिग्भिः सह च क्रयं ॥ करोति चापणं प्राप्य क्रयं स्तात्र जनास्तदा ॥ गृण्हंत धान्यजातं तु तत्र धा
न्येष्वसौ वणिक् ॥ ८॥ शिवाय मुष्टि मात्रं स गोणीषु प्रति गृण्हते ॥ तत्प्रत्येकं प्रस्थशतं संपाद्य शिवमर्चयेत् ॥ ९ ॥
वन धान्याक्षताच्चितो मम कैलासवास्य भूत् ॥ गोशृंग विक्रयपरः तथा मरकताचले ॥ १०॥ वलयानां क्रयकरः म
तथा मरकताचले ॥ वलयानां क्रयकरं चमरीकेश मेव च ॥ ११॥ शितासितं विक्रीणात्ययं पौरांगनास्वपि ॥ तत्राह
चास्य विट् कांता देवागार स्थिता तदा ॥ १२॥ वेश्या चामरते प्राप गोशृंगमभिषेचितुं ॥ शिवं मरकतेशानं तव सं
ग फलं मम ॥ तस्यै प्रादात्स वणिक् नित्यं तत्संगलालसः ॥ वेश्या वश्यार्थमुत्कृष्टं चामरं शृंग मेव च ॥ १४॥ सादं
ड चामरं कृत्वा तेन देवमधूधुवत ॥ गोशृंगेण तदा देवं लिंगं मरकतेश्वरं ॥ १५॥ सुशीतलैर्जलै ग्रीष्मे सेचयत्
१ सह्यजाजलैः ॥ सर्वेभ्यो यं वणिग्याति विमानेन मम क्षयं ॥ १६॥ कादंब पक्षसंकाशगोशृंग चमर प्रदः ॥ तृणनि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दत्वा देवस्य तृणज्योतिः शगौ पुरः ॥१७॥ कश्चिच्छूद्रो भृतिपरः तृणभारं वहेन्निशं ॥ जीवितेत्यं तभारार्तेः स्वकुटुंबम
पोषयत् ॥ एवं प्रतिदिनं शूद्रः तृणज्योतीश्वरस्थले ॥ विप्रः कश्चित्स्वगां प्रादात्तृणानयनहेतवे ॥१९॥ आहर
न् स तृणभारं शिरसा तत्र पादजः ॥ तृणज्योतीश्वरद्वारे स्थिता गौः क्षीरदा शिवे ॥ २०॥ तया गवा तृणार्थाय स घासस्तत्र
पातितः ॥ तस्य गृह्य तृणं सर्वं भक्षयत सा च गौः ॥२१॥ विनष्टतृणकः शूद्रः प्रारुदत्स द्विजाग्रतः ॥ दंडेनाताडयच्छूद्रं तृणना
| शेन दुःखितं ॥ २२॥ उवाच विप्रः कोपेन तं शूद्रं स्फुरिताधरः ॥ विप्र उवाच ॥ अग्निदग्धं गृहं मेद्य सद्यस्तत्क्षणदानतः ॥
तृणनाशेन नष्टोस्मि शिवगौ भक्षितं तृणं ॥ २३॥ किं करोम्यद्य नाहं ते भृत्तिं दास्यामि गच्छ भोः ॥ हा शिवः प्रीयतामत्रे
134 त्युक्त्वा स्वगृहं ययौ ॥ २४॥ शूद्र विप्रौ च कालेन समायातौ ममालयं ॥ शिवगौर्या सतो देवि तस्मिन्क्षीरं दिने दुहत् ॥
॥२५॥ अभिषेको भवत्तेन तत्पुण्येन समागतौ ॥ विधूय पापजालानि विधुवन्मेघमध्यतः ॥ २६॥ शुशुभाते विमान
स्थौ शिवधर्मप्रभावतः ॥ मातृभूतगिरौ पूर्वं कश्चिद्दासीकुलालजः ॥ २७॥ क्रयार्थमिष्टकास्तेन दग्धाः काष्ठैरनंतः
शिवे ॥ किंचिद्दग्धावशिष्टा वै नता सांतु प्रतिगृहे ॥ २८॥ काचिद्दासी च्छिवागारे प्रददौ ताः सहस्रशः ॥ तन्नटीगम
नासक्तः तया संप्रार्थितः सदा ॥२९॥ तेन पुण्येन संयाति कैलासं दक्षिणं मम ॥ ईश्वर उवाच ॥ एवं स धातुक्रयकृ=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रुटप्रदो धान्याक्षतार्चापरमो वणिग्वरः ॥ वेश्यार्थ सच्चामरश्रृंगादौ विकेतृणप्रदानाद्द्विमे विमानगौ ॥ तौ शूद्रवि
२६ प्रौ शिवधर्मेशौ सरौ समागतौ मत्पदसंन्निधिं शोभे ॥ ३१ ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिव
धर्मप्रभावे त्रयोविंशोध्यायः ॥ २३ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानायनमः ॥ श्रीईश्वर उवाच ॥ पुनश्च-
शृणु मे देवि शिवभूमिप्रदायिनः ॥ कथां कथयतो मेद्य सद्यः सर्वाघनाशिनीम् ॥ १ ॥ तं जेश्वरांतिकं देवि केचिदासन्
कृषीवलाः ॥ गोवृषाजमहिष्यादिपालका कृषितत्पराः ॥ २ ॥ कृषंतो लांगलै र्भूमिं सर्वसस्यप्ररोहिणीम् ॥ सर्वे वीरा
वशिष्ठां तां भूमिमन्योन्यवादिनः ॥ ३ ॥ मह्यं मह्यं मह्यमिति कलहं च क्रिरे सदा ॥ न च धान्यगणं सर्वे अभिवृद्धि
मनीनयन् ॥ ४ ॥ तत्र केचिद्द्वयो वृद्धा ऊचुस्तत्र कृषीवलाः ॥ वृद्धा ऊचुः ॥ नास्माभि र्भूरियं भोज्या विवादासक्तमा
नसैः ॥ तं जेश्वरायदत्तेयं विवादो मास्तु नोंधुना ॥ ५ ॥ यथेत्यवावदन्सर्वे शर्वायाथ ददौ र्वरा ॥ प्रददुस्ते कृषिं कृत्वा
नवधान्यं तथेक्षवः ॥ ६ ॥ तदान्येन शिव स्वं भूर्नैवेद्यं भक्ष्यभोज्यकैः ॥ इक्षुकांडरसेनेशमभ्यषिंचन् शिवार्चकाः
॥ ७ ॥ शर्वाय पर्वकाले ते उर्वरां सर्वपाददुः ॥ तेन वै शिवधर्मेण सर्वे चैव कृषीवलाः ॥ ८ ॥ विमानेन समाजग्मुः कैलासं
८ मम दक्षिणं ॥ अज्ञानाद्द्विवदंतस्ते सदंतः करणोज्झिताः ॥ ९ ॥ किं पुन र्भक्तिभावेन शिवे भूमिप्रदानराः ॥ यावत्तद्भू-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिरजसः संख्यया शिवलोकगाः ॥१०॥ तत्रा खंड भुवः खंडं आखंड लइवै धि ताः॥ यावच्चंद्रार्क भगणे शैलद्वीपा
ब्धिमंडलाः॥११॥ भुवं भुंजंति भूपालाः तेन धर्मेण पार्वति ॥ कश्चिज्जप्येश्वरं पूर्वं मरणान्ममलोकदं ॥१२॥ स्ना
त्वा सहस्रो दूवातीर्थे दृष्ट्वा सायं तु विप्रजः॥ ग्रहणे सोम सूर्यो ये दृष्ट्वा नत्वा तु मां द्विजः ॥१३॥ शिवलोकं प्रयात्येष
विमानेनैव भास्वता॥ कुंभघोणेश्वरं प्राप्य स्नात्वा नद्यां महेश्वरं ॥१४॥ प्रणम्याच्छेनजीवन्समार्जन्या
मार्जयंस्तदा॥ शिवालयं तदा नित्यमासायं तत्र वर्त्तनात्॥१५॥ कृत्वा कैलासमाप्यांते गणो भूत्स विमानगः॥ श्रीप्र
याणे पुरे काचिद्विप्रकन्या शिवालये॥ गो गोमयेनोपलिप्य भर्त्तारं प्राप्य भूतले॥ पुत्रपौत्रैः परिवृता शिवलोकमप
135 ययौ ॥१६॥ मध्यार्जुने महादेवं दृष्ट्वाष्टम्यां नदीसुतः॥ उष्यरात्र्यां स शूद्रो सौ वेश्यासंगमलालसः॥१७॥ तेनधर्मेण
कैलासं संप्रापायं सुदुर्लभं॥ श्रीमंगले तु विधवा शिवेदादभिषेचनं॥१८॥ मृत्कुंभाहृततोयेन सहस्रजाया
स्तदांबिके॥ तेनेयं विधवा याति शिवधर्मैर्विमानगा॥२०॥ त्रिकोटौ पापधीर्विप्रः सानित्य शिवसेचने॥ रुद्रं
जपन्नुंछवृत्तिः कैलासं प्रापतेनवै॥२१॥ कुद्दाले शिवदीक्षातो कार्त्तिके सहस्रजातप्रवात्॥ संकरः शिवलोकं वै सं
प्राप सविमानगः॥२२॥ वैश्यस्कंधे वहन्क्षीरं याचते शिवसेचने॥ पयोग वांघटं द्वंद्वे भिक्षाभोजी शिवं ययौ॥२३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पयःप्रादाच्छिवस्यार्पिते प्यागच्छन् शिवालयं ॥ दुर्गेश्वरे सेचनेन पयसोयाति वैश्यकः ॥२४॥ विमानेनार्कवर्णेन वृषभ-
२१ ध्वजशोभिना ॥ मायूरे श्रृपुरद्वारि कुंभाग्रेश्च मणौ निशि ॥२५॥ घृतमापणजं नित्यं याचयित्वा मरुद्भ्यच ॥ दीप
द्वंद्वं ददौ लेवतेन पुण्याद्विमानगः ॥२६॥ घोटशायकनं चक्रे नालिकेरस्य पादजः ॥ ग्रीष्मे जलं समादाय मृत्कुंभेन स
पादजः ॥२७॥ प्रदत्वा वर्धयामास भिक्षाग्रासमव्यवर्धयत् ॥ तन्नारिकेलसुजलैर्घटैरामभिषेचयन् ॥२८॥ तेन पुण्ये
न शूद्रो सौ याति याने मनोरमे ॥ श्रीकाषे श्रमणः कश्चित्कृत्वा माधूककं वनं ॥२९॥ तत्फलोत्थेन तैलेन दीपानारो-
पयच्छिवे ॥ तेनैव शिवधर्मेण याति कैलासमद्यमे ॥३०॥ तैलिकौ वैद्यनाथाय तैलयंत्रे तिलांस्तदा ॥ संपीड्य तैलं
सम्प्रस्पंदत्वा देवाभिषेचने ॥३१॥ याति शंभोः परं धाम तेनैव शिवधर्मतः ॥ रथकारः पुरा कश्चित्कृत्वा पुष्परथं तदा ॥३२॥
भूतिं विहाय चक्रे सौ केनचिच्चित्रकारिते ॥ श्रीसुंदरे तेन शिवे विमानेन प्रयाति सः ॥३३॥ क्षीरिणीशे वृषं तक्षा कृ
त्वा दारुभवं नवं ॥ रंगेण शोभितं कृत्वा वृक्षं संपादयतनतः ॥३४॥ वृषध्वजविमानेन तेन संयाति मत्पदं ॥ दुर्गेश्वरे पु-
ष्पमालापरिशोभितमुन्नतं ॥३५॥ यानं कृत्वा पुष्पकारः प्रयाति ममसद्मवै ॥ श्रीवांछे ग्रीष्मकाले तु गंधं पिष्ट्वोपलि
८ प्यमां ॥३६॥ संवीज्य तालवृंतेन विप्रौ छेनैव जीवति ॥ देहांते शिवसारूप्यं प्रयाति च विमानगः ॥३७॥ कंतु केशो वृषस्तं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भं दत्वा शूद्रः शिवं ययौ ॥ तालेशो गोपुराग्रस्थकलशो केतुदायकः ॥ ३८ ॥ तेनैव शिवधर्मेण वृषकेतुर्विमानगः ॥ शि-
वं प्रयाति शूद्रोऽसौ सदारः ससुतस्तदा ॥ घंटाप्रदः शिवागारे बध्वा घंटाश्च नादिनीः ॥ ४० ॥ तत्रैवाम्रवनेशस्य कांस्यकारः
प्रयाति मां ॥ पुष्पद्रुतीश्वरपुरे ससुरामागलं पिबन् ॥ ४१ ॥ चंडालो विलुटद्भूमौ शिवप्रासादपार्श्वतः ॥ अंगप्रदक्षिणा
तेन संजाता याति तेन मां ॥ ४२ ॥ वल्मीकेशे पुरा विप्रः शिवार्चककुलोद्भवः ॥ त्यागराजमहेशानं गायन् सगणिको
ययौ ॥ ४३ ॥ मत्पदं टंकधृक्कोपि जीर्णो धृक् बदरीवने ॥ उंछेनजीवं देवाय शिलाशिल्पकरो ययौ ॥ ४४ ॥ वृषाद्रौ तै
लिकागारवृषभो निसृतो निशि ॥ अनुद्रुतस्तैलिकेन शिवागारप्रदक्षिणं ॥ ४५ ॥ त्रिवारं तैलिकवृषो
136 चक्राते मास्य तो हि मां ॥ गोवेटे शिवभक्तं च कश्चिद्द्विजं स्व वंधुवत् ॥ ४६ ॥ निशीथे तमसि प्राप्ते भो
जयत्तेन याति मां ॥ गोपर्वते श्रेदेवे शिकश्चिद्वणिजनंदनः ॥ ४७ ॥ मदालये महादर्शं दत्वा सोपि विमानगः ॥
गणकस्ताडितो राज्ञा शिवागारनिरीक्षकः ॥ ४८ ॥ धनं शिवस्यं देहो तिजहौ प्राणांस्तदां बिके ॥ श्रीम=
न्नलपुरे तेन यात्यतः सविमानगः ॥ ४९ ॥ समस्त्या गालये पूर्वं विप्रः शूद्रो वणिक्कगौः ॥ राजा च वनपालश्च
राज्ञी दासी मदानकृत् ॥ ५० ॥ विप्रः शिवागारमध्ये धर्मार्थध्यायनाद्ययौ उंछजीवी सशिष्यो सौ शूद्रो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२८ वीणादिगायनैः ॥ ५२॥ शिवागारे प्रदोषेषु भस्मरुद्राक्षधारकः ॥ वणिग्गुग्गुलदः शंभोः गोशंभोः सिंचती
पयः ॥ ५२॥ ग्रामेतृणान्यदिलाच त्रिकालंदापयत्पयः ॥ राज्ञा दुष्टो गजो दत्तः तथाश्वोष्ट्रौ च शंकरे ॥ ५३॥ श्री
मन्मंदो पुरेशायं वनपालोपि मालिकां ॥ नीलोत्पलानामाबध्य ददौ पुष्पद्रुतीश्वरे ॥ ५४॥ दुष्टां दासींतु संताड्-
यया न्यादेवे द्रुतीश्वरे ॥ विसर्जिता तेन पुण्यैः विमानस्थो ममागतः ॥ ५५॥ खंडीश्वरे लक्ष बिल्वमभ्य-
र्च्य सघनो वणिक् ॥ याति कैलासमुत्कृष्टं पुनर्यत्र व सन्नरः ॥ ५६॥ नशोचेन्नैव रुक्षेत शिवधर्मी यमी
दृशः ॥ यद्धर्मश्रवणाद्गौरि भक्तिर्मयि दृढा भवेत् ॥ श्रुत्वा संतुष्टहृदया देवी शंभोर्मुखांबुजात् ॥ श्रीस्कं
द उवाच ॥ एवं कैलासशैले विहरति गिरिशे शैलपुत्र्या समेते प्रोक्ते यं शिवधर्मसार पदवी श्रेयस्करी संश्रुता ॥
तत्तुभ्यं गदिता शिवेन विहिता नित्यं मुदे धार्यतां ॥ यावद्वर्षति वासवस्त्रिदिवतो वर्षांबुभिर्भूतले ॥ यावच्चैलव
नीनदाब्धितटगाः सूक्ष्माः शिकत्याः शिवे ॥ ५७॥ तावत्संख्यककल्पकान् विषदामूर्ध्वं च मत्यार्थगाः ॥ कैलासे शिव
धर्मकारि जनता तोहि धर्मी धिकः ॥ नैष्कर्म्याश्रमधर्मसंभवफलैः स्वर्गस्तदन्ते शिवे ॥ भस्ये देवत तस्तु धर्म
इतिमे दुष्टो न तुष्टे सदा ॥ ६०॥ पूर्त्तो प्यार्तिदकीर्तियुक्त सुमहा गर्त्ते वसो धोनरः ॥ तद्भूत्वात्र पतत्यनुमहाकल्पां =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिमे भूमिपो भूयात्तेन करिष्यति प्रतिजनिं स्याद्दुर्गमेवं शिवे ॥ ६१॥ शक्तेर्भक्तेरशक्तेर्विधिसुधिरहितैर्बोधबाधाद्युगा
धैः सेव्यः सर्वैरयं मे शिवतरकृपयालभ्य धर्मोयमेव ॥ वित्ते क्षिते श्रद्धाहीना द्विजवरपतयो मुक्तिमार्गप्रपन्नाः सन्नाभिन्ना
स्त्ववर्णा अपि सगुणा सक्तचित्तामयीदं ॥ ६२॥ धर्मं वर्ममिदं मेव मनोज्ञं कर्मपाशजनिजं शिवधर्मं ॥ नाशयेद्दुरित
जालमपीशे पर्वजात इव शर्वरिनाथः ॥ ६३॥ गर्वपूर्वशपथो हि ममैषः सर्वसद्गतिद एव नृणां मे ॥ पूर्तकर्मनिरता हि-
गर्तगा इष्टबुद्धिनिरताश्च भ्रष्टकाः ॥ ६४॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवगौरीसंवादे
शिवधर्मकथने चतुर्विंशोऽध्यायः ॥ २४॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ जैगीषव्य उवाच ॥
137 श्रुतस्ते तारकाराते शिवधर्मोऽद्भुतो महान् ॥ सेतिहासः शिवोक्तोऽयं गौर्यै कैलासमूर्धनि ॥ १॥ तद्द्रोहकथनं त-
त्र कथं शंभुरथोक्तवान् ॥ गौर्यै तन्मे वद श्रुत्वं यच्छ्रुत्वा मनुजा भुवि ॥ २॥ न कुर्वन्ति शिवद्रोहं तन्मे स्कंद
वदाधुना ॥ सहैभिर्गणवृंदैश्च मुनिर्देवैश्च शांकरैः ॥ ३॥ तज्जैगीषव्यवचनं श्रुत्वा प्राहाथ षण्मुखः ॥ नम-
स्कृत्वा शिवं तत्र शिवद्रोहकथानकं ॥ ४॥ श्रीस्कंद उवाच ॥ शृणुध्वं मुनिभिर्देवैर्गणैश्च मुनिपुंगव ॥ पुरा कै
लासशैलेंद्रे रत्नमंटमपध्यमे ॥ ५॥ भ्राजमानमणीमंचे संस्थितौ परमेश्वरौ ॥ देवाद्देवीचतच्छ्रुत्वा शिवोक्तं शि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वधर्मजं ॥६॥ सेतिहासं इतिहासे पुण्ये शिवरहस्यके ॥ श्रोतृणां भक्तिफलदे पापौघविनिवारके ॥ पुनःक्षणे न कल्पो
२९ भूत्तयोः संवदतो मुने ॥ तमिंगितज्ञामोवाच सर्वज्ञा प्रांजलिः शिवा ॥ ७ ॥ देव्युवाच ॥ देवदेव महादेव शरणा
गतवत्सल ॥ पाहि मां देव कृपया वद त्वं द्रोह ~~मतिर्भूयात्सर्वे~~ जां कथां ॥ ८ ॥ सेतिहासां महादेव श्रोतुमिच्छामि ते
मुखात् ॥ यत्कथा श्रवणादेव श्रोतृणामुपकारकं ॥ १० ॥ न त्वाद्रोहमति र्भूयात्सर्वेषामुपकारकं ॥ प्रश्नमेनं वद
विभो निस्तारार्य भवांबुधेः ॥ ११ ॥ जनानां तारणायाशु हे देव वद मे प्रभो ॥ श्रीस्कंद उवाच ॥ अपर्णा वचसा पू
र्णप्रसादस्तूर्णमेव तां ॥ उवाच तां महादेवः सदयां भोगिरीश्वरः ॥ श्रीईश्वर उवाच ॥ शृणु पर्णे महादेवी पु=
त्रा त्वं गणपुंगवैः ॥ शिवे शिवरहस्ये च पुण्ये श्रोतृसुखावहं ॥ १३ ॥ कथां सुधाधिक्कारिणीं वारिणीं सकलापदां ॥
हारिणीमखिलाघानां तारिणीं भववारिधेः ॥ १४ ॥ हारिणेक्षणे पुरा याम्यं लोकं प्राप सुनंदकः ॥ गणेंद्रो मम
कैलासाल्लोकपालैरथार्चितः ॥ १५ ॥ प्रणाम भोजनार्घ्याभिर्यमलोकं निरीक्षितुं ॥ सुनंदमागतं श्रुत्वा=
विमानेनार्करोचिषा ॥ १६ ॥ भ्राजमानपताकेन मणिकुंभोपशोभिना ॥ मृत्युज्वरादिगणपैः चित्रगुप्तादि=
११ भिः सह ॥ सार्घ्यहस्तो यमो भ्यागात् गांचतस्मै न्यवेदयत् ॥ प्रणम्य तत्पादयुगं प्रफुल्लांबुजसंन्निभं ॥ १७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवरत्नैस्तथा पुष्पैस्तमभ्यर्च्याभ्यवोचत ॥ प्रांजलिस्तत्र सानंदं सुनंदं गणपोत्तमं ॥ १९ ॥ यम उवाच ॥ अद्य मे तप
सा सिद्धिरद्य मे भाग्यगौरवं ॥ यन्मदक्षिपदं द्वंद्वं निर्द्वंद्वं तव शांकर ॥ २० ॥ मम भाग्यस्य नांतोस्ति सुनंद तव दर्श
नात् ॥ यत्र शांभव पादाब्ज रजो लेशः पतिष्यति ॥ तत्पवित्रतरं धन्यं मान्यं मन्येऽऽगमात्तव ॥ भुवने भवनं मेद्य तद
न्यद्वनवद्भवेत् ॥ २२ ॥ शांगांगसंगवातोपि पुनाति भुवनत्रयं ॥ न सामान्यमिदं मन्ये पुण्यस्य फलमीदृशं ॥ २३ ॥
सदयं हृदयं त्वद्य मयि भाग्योदयेन ते ॥ समागमो भवच्छंभोः गणेंद्रेणाथ सादरं ॥ २४ ॥ यन्मनोषि पदांभोज
रजः कणपवित्रितं ॥ तदेव भुवनं मन्ये नो चेद्वननिभं भवेत् ॥ २५ ॥ शांगसंगः पापसंघभंगं किं न करोति मे ॥
138 किं किं न सूते भाग्यानि पचेलिम तपः फलं ॥ २६ ॥ सफलं मम भाग्यं वै फलेनानेन ते पदं ॥ स्पृशामि शमिताघौघः
दिक्पालेषु नमस्समः ॥ २७ ॥ तमुक्त्वाप्येवमीशानि स पद्म माप्य तेनवै ॥ सिंहासनवरे स्थाप्य तत्र रत्नैरलं
कृतः ॥ २८ ॥ भोजयामास तत्रैव कृतलिंगार्चनं शिवे ॥ सुनंदं तच्च सानंदं यमः शिवनिवेदितैः ॥ २९ ॥ स्वयम
भ्यर्च्य देवेशं भक्ष्यैर्भोज्यैरनेकशः ॥ तद्गंधवासोभिरलंकृतांगतांबूलवक्त्र परिवीजित चामरं च ॥ सिंहा
सनस्थं स्वसुनंदकं गणं माहेंदुमौलेः पदपूजकं मम ॥ ३० ॥ इति श्री शिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३० सुनंदागमे पंचविंशोध्यायः॥२५॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥श्रीईशानायनमः॥ श्रीईश्वर उवाच॥ यमः सं=
पूजयित्वातु सुनंदं गणपं मम॥ धृतत्रिपुंड्र फालेंदुमुकुटं भस्मपांडुरं॥१॥एतादृशानुग्रहायपात्रभूतः कृतोस्म्यहं॥
यतस्त्वत्पादरजसा पूतमद्यगणेश्वर॥२॥इंदिरामंदिरमभूत्सुंदरं मम कंदरं॥ नित्यमाज्ञां महेशस्य वहामि म
कुटीतटे॥३॥बिभेमि शैवान्प्राणपान्दृष्ट्वान्यान्सुरोत्तमान्॥ विष्णुब्रह्मादिकान्नाहं गणये सत्यमुच्यते॥वि-
भेमि भस्मरुद्राक्षधारकान्छिवपूजकान्॥रुद्रपंचाक्षरपरान् शिवलिंगैकपूजकान्॥५॥ शिवक्षेत्रनिवा
सांश्च अविमुक्तनिवासिनः॥शिवभक्तार्चकान्साधून्छिवधर्मप्रवर्तकान्॥६॥प्राकारगोपुरारामवापीकूप
कारान्सदा॥शिवपुष्पार्चनचरान् प्रदोषे शिवदर्शकान्॥७॥शिवोत्सवालोककांश्च घंटाछत्रप्रदानहं॥धूप
स्रग्गंधदीपालिदायकान्छिवमंदिरे॥चामरादर्शदातॄंश्च सोमवाराष्टमीषु च॥चतुर्दश्यर्चनरतान्सप्र
म्यां सायमेव च॥९॥ये पूजयंति देवेशं तान्दृष्ट्वा प्रणतोस्म्यहं॥केदारे अविमुक्ते च रुद्रकोटामरेश्वरे॥१०॥
कालंजरे महाकाले श्रीशैले त्र्यंबके तथा॥अरुणाद्रौ च गोकर्णे कालहस्त्यां च दभ्रके॥वृद्धाद्रौ शोणनगे चैव=
श्रीखंडे रत्नपर्वते॥मातृभूते च जप्ये च तंजेरे कुंभघोणके॥१२॥ मध्यार्जुने च मायूरे घटेशे द्रोणिकेश्वरे॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री काशीवैश्वनाथे च श्रीबांछेवेद कानने ॥ शुचीन्द्रे पापनाशे च गंधमादन पर्वते ॥ तांम्रपर्ण्याः सह्यजायाः तट द्वंद्वे स्थि
ताजनाः ॥ शिवोत्सवालोकनेन शिवागार निरीक्षणैः ॥ १५ ॥ तत्तक्षेत्र निवासाश्च नानीतान्मम सद्मनि ॥ शिवाज्ञो
ल्लंघनं नाहं कर्त्तास्मि गणसत्तम ॥ १६ ॥ येनकेनापि पुण्येन शिव धर्मोत्तरेण च ॥ नदीद्वयतट क्षेत्र वासिनः शिव
लोकगाः ॥ १७ ॥ यथा कथंचिद्भस्मांकाः शिवागार निरीक्षकाः ॥ शिवोत्सवालोकिनश्च रथोहाश्चापि सर्वशः ॥ सं
कराअंत्यजाश्चापि न राद्रुमलतांडजाः ॥ नैवानीता भया चैव भोः शिवधर्मो हि सूक्ष्मकः ॥ १९ ॥ नदी द्वयस्नानपरा
व्याजेनापि शिवेक्षकाः ॥ अन्य धर्म परा मर्त्याः तत्तलोके निवासिनः ॥ २० ॥ सपुण्या अपि मो दष्ट्वा यांतेव स्वर्गवा
139 सिनः ॥ यागयोग पराः ~~...~~ ^कवि^ ब्रह्म विष्ण्वादिपूजकाः ॥ २१ ॥ महाषोडशभागो भूमिकन्यान्नादि प्रदानराः ॥ मां दष्ट्वा यां-
तिते स्वर्ग सपापा ^घा^ ये च मानवाः ॥ २२ ॥ असिपत्रे कुंभिपाके तप्तलोहे शिलाशने ॥ रौरवे कालसूत्रे च महारौर
व दुर्धरे ॥ २३ ॥ त्रिकोटिनरकेष्वेवं पातितास्ते शिवाज्ञया ॥ भुज्यते यातनास्ते हि सदा नारकिभिर्मम ॥ २४ ॥ ब्रह्मघ्ना
श्च सुरापाश्च अगम्यागामिनस्तथा ॥ सुवर्ण रौप्य धातूनां हर्तारो रत्नवाससां ॥ २५ ॥ गोकन्याधान्यजातीनां
गंधकर्पूरचर्मणां ॥ गजाश्वरासभवृषउष्ट्राजाविहर्तो पिये ॥ २६ ॥ परान्नादाश्च ये कान्ताः परदूषण कारिणः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोघ्ना कृतघ्ना वालघ्ना स्त्रीघ्ना जीवहनास्तथा ॥२७॥ तटाकाराम भेत्तारः कूपं तीर्थं नदीतटं ॥ दान विघ्न वृत्ति विघ्नका
३१ रिणां वास एव हि ॥२८॥ नरकेषु विचित्रेषु यातनाश्च्याति दुःखदाः ॥ दास्यं ति मद्गणा अत्र नरकेषु गणेश्वर ॥
॥२९॥ आक्रंदः श्रूयते नित्यं रुदतां नरकार्णवे ॥ जनानां पापिनां रौद्र नरनार्य खिलात्मनां ॥ ३०॥ दुःखितोऽस्मि
सदा शंभुं स्मरामि मनसा सदा ॥ हाधिकारो मदीयोऽत्र शिवाज्ञा किं करोम्यहं ॥३१॥ रात्ता दृष्टो मद्भवने त्वात्रागम
नं कथं ॥ ~~रात्ता दृष्टो मद्भवने त्वात्रागमनं कथं~~ ॥ त्वां दृष्ट्वा भयहर्षाभ्यामविष्टोऽस्मि गणेश्वर ॥३२॥ अपराधस्तु को
वा मे मयि नित्यापराधिनि ॥ कृपां करोति भगवन् भगनेत्रनिपातन ॥३३॥ सूक्ष्मोऽत्र शिवधर्मो हि नाहं जानामि
तत्वतः ॥ कारणेनात्र केन त्वं दययामामुपागतः ॥३४॥ तन्मे ब्रूहि गणश्रेष्ठ शिरसा ते पदांबुजं ॥ प्रणमामि जगद्वंद्य
द्वितीयः शंकरोऽसि मे ॥ ३५॥ श्रीस्कंद उवाच ॥ इत्थं सुनंद गणपं प्रतिवाचमुक्त्वाहं सालजोमुकुटवद्धकरस्तदानीं ॥
आज्ञापयाशु करवाणि तवाद्य वाणीमित्थं चिचानयमुनेसगणस्तदानीं ॥३६॥ इति श्री शिव रहस्ये इशानाख्ये द
शमांशे उत्तरभागे यमसुनंद संवादे षड्विंशोऽध्यायः ॥२६॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥
श्री ईश्वर उवाच ॥ सुनंदो वचसा तुष्टो यमस्य प्रणतस्य वै ॥ तमाह विनयोपेतं तच्छृणुष्वां विकेऽद्य मे ॥१॥ सुनंद उवाच ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धन्योसित्वंलोकपालः शिवाज्ञाकारकोह्यसि ॥ धर्माधर्मविचारार्थं जनानांपापिनांयमः ॥२॥ शृणुपुण्यवतांचापि
धर्मंजानासि सत्तम ॥ शिवाज्ञयात्वं सर्वेषां नियंतारविनंदन ॥ नज्ञात्वण्वपिदुःखंवैत्वया कार्यं विचारणे ॥ अधि
कार्यसिलोकानांत्वद्भयात्सकलाजनाः ॥४॥ पापेषु नैवनिरताः पुण्येषु परिशीलकाः ॥ प्रजाहितकरोसित्वं धर्मा-
धर्मविचारणैः ॥५॥ यथा भिषग्वरोरुग्णान् नैलंघकटुकौषधैः ॥ पथ्यैस्तान्सुखिनःकुर्याद्दादौदुःखंततःसु-
खं ॥६॥ तथात्वयात्र नरके दुःखितायेऽत्र मानवाः ॥ उत्तीर्णनरकाः सर्वेशुद्धायांतिततोभुवं ॥७॥ जायंते कर्मवैचित्र्यै
र्जंतुभिर्ब्राह्मणोत्तरैः ॥ पापान्येपिच ते भूमौ चरस्थावरजातयः ॥ अंडजा स्वेदजा भूमौ उद्भिज्जाश्च भवंतिवै ॥
140 पुण्यैः स्वर्गसमायांति तदंतेऽत्र मनुष्यजाः ॥९॥ भवंति भाग्यवंतस्ते धनधान्यगृहांवरैः ॥ पुत्रदारसमृद्धास्ते-
पुनःपुण्येन स्वर्गगाः ॥१०॥ एवं परं परा प्राप्तं धर्मस्यत्वं विचारकः ॥ तस्मात्वं सर्वधर्मज्ञःनदुःखंकर्तुमर्हसि ॥११॥
शिवधर्मपराः सौरे नत्वां पश्यंति ते नराः ॥ तद्धर्मसौक्ष्म्यंकेनापिनज्ञायेतेश्वरं विना ॥१२॥ किंचित्किंचित्प्रजा
नामि शिवपादसमाश्रयात् ॥ पृच्छाम्यहंत्वां ज्ञात्वा शिवद्रोहकथानकं ॥१३॥ क एते नीरकैर्दुःखं भुक्तं वेत्रशतो-
त्तरं ॥ श्रोतुं नशक्यते चात्र दुष्टुमीशोत्रको भवेत् ॥१४॥ श्रीस्कंद उवाच ॥ सुनंदवचनंश्रुत्वा यमः प्रांजलिरब्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वीत् ॥ यमउवाच ॥ क एतेंत्र नजानामि शिवद्रोहेण पातिताः ॥ मत्पूर्वैः कैर्यमैरत्र पीडितास्ते शिवद्रुहः ॥ १५ ॥ नकल्प
संख्या एतेषां मया ज्ञाता गणेश्वर ॥ पूर्वे कोयं चित्रगुप्तो जानात्येषां कथानकं ॥ १६ ॥ ईश्वर उवाच ॥ यमस्य
वचसा तुष्टः सुनंदो गणपो मम ॥ आहूय चित्रगुप्तं तं यमस्य पुरतः स्थितं ॥ १७ ॥ कृतांजलिपुटं वीक्ष्य प्रणतं गणपुं
गवः ॥ शृण्वतां यमसभ्यानां वचनं प्राह सत्तमे ॥ १८ ॥ सुनंद उवाच ॥ शिवद्रुहः क एतेंत्र पातिताः पूर्वकैर्यमैः ॥
कैरेतद्रोहवैचित्र्यैः शं भो रेते निपातिताः ॥ १९ ॥ पापिनोप्यधिकं दुःखं भुंजंते तेशतोत्तरं ॥ कुंभिपाकासिप
त्रेषु महारौरवरौरवे ॥ २० ॥ संतप्तवालुकामध्ये तप्तभ्राष्ट्रेषु भर्जिताः ॥ अयः पिंडैस्ताड्यमाना आयसै
र्वायसैस्तदा ॥ २१ ॥ वज्रतुंडैश्च नेत्रेषु दंशितांगाः सदा नराः ॥ व्रणेषु पूयरक्तांत्र धारा निर्यांति तेषु च ॥ २२ ॥
क्षारैः संसिंचमानेषु तप्तसूचीप्रपूरणैः ॥ सर्वांगसंधिषु सदा अयोक्ष्मा भरणाः सदा ॥ २३ ॥ क्रोशमानेषु च त
दा अत्र संवसतां सदा ॥ शिवद्रुहां कथा मद्य श्रोतुमिच्छामि चित्रक ॥ २४ ॥ विलोक्य बहुकालीनां लेखां तत्र
शिवद्रुहां ॥ तन्मह्यं सावधानेन वद त्वं पूर्वको ह्यसि ॥ २५ ॥ तदा गणेश्वरवचः श्रुत्वा चित्राच चित्रकः ॥ विलो
क्य बहुकालीनां लेखां तत्र शिवद्रुहां ॥ वक्तुमारभतेत्र यमं दृष्ट्वा गणेश्वरं ॥ एतस्मिन्समये प्राप्ताः काल=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दूताः सहस्रशः ॥२७॥ करालाविकटामुंडाऊर्ध्वकेशोरुदंष्ट्रकाः ॥ पाशमुद्गरहस्ताश्च दंडकांडेकृपाणयः ॥२८॥
प्रणम्यतेयमं तत्रसुनंदं चित्रगुप्तकं॥ प्राहुः कृतांजलिपुटाः स्वेदधारावृतांगकाः ॥ २९॥ यमभटाऊचुः ॥ अनल्प
कल्पेषुवयं भवत्पूर्वयमाज्ञया ॥ नरकेषुविचित्रेषुइतरस्माच्छतोनरं ॥३०॥ पीडांकर्तुमशक्तास्मनेतेषांनि-
स्तरोभवेत् ॥ सुदुस्तराद्घोरतमात्पापाच्छंभोर्द्रुहः सदा ॥३१॥ अन्येसंयोजनीयाये वैभटाः खेटासिपाणयः॥
तैरपिकल्पसहस्रांतं पीडयंतु शिवद्रुहः ॥ पुनरन्येयोजनीयाएवमत्रपरंपरा॥ अनुग्रहोऽयमस्माकंदयया
क्रियतांयम ॥३३॥ अशक्तास्मः पीडयितुंबहुकालंशिवद्रुहः ॥ नारकेष्वितरेष्वेवबलंनोत्रावधार्यतां ॥३४॥
गच्छामोभूतलंसर्वसमादास्यामपातकान् ॥ भस्मत्रिपुंड्रहीनांश्च रुद्राक्षपरिवर्जितान् ॥३५॥ रुद्रपंचाक्षरैर्हीनान्
1f1 शिवलिंगार्चनोज्झितान् ॥ शिवक्षेत्रान्यदेशेषुवसतानानयामवै ॥३६॥ प्रदोषेसोमवारेषु चतुर्दश्यष्टमीषुच॥
नक्तार्चनावर्जितांश्च दिवातेष्वन्नभोजनान् ॥३७॥ शिवनामोज्झितान्पापान् अन्यनामपरायणान् ॥ शिवयात्रो-
ज्झितान्पापान् लिंगालोकनवर्जितान् ॥३८॥ शिवनिंदापरानत्र समादायाऽनयामच ॥ नरकेषुविचित्रेषुविप्र
गोद्रोहिणोयम ॥३९॥ शुष्कार्द्रपातकाढ्यांश्च विविधाघसमावृतान् ॥ संताड्यानीयनरकेपातयामतवाज्ञया ॥४०॥
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नियोजनीयाः
शिवद्रुहां पीडनेऽत्र कल्पे कल्पेऽन्यकागणाः ॥ पीडायैवयं खिन्नाश्रमातुराः ॥ ६१ ॥ स्कंद उवाच ॥ इत्थं यमः स्वभटवाक्यमथो सुनंदयुक्तः प्रशुश्राव्य च चित्रकेन ॥ अन्यान्भटान्यमनियुंक्त शिवद्रुहां वै सं पीडितुं प्रतिकृचः प्रददौ सुनंदं ॥ स चित्रगुप्तः परिलोच्य लेख्यं शिवद्रुहां प्राह कृतांजलिस्तदा ॥ ६२ ॥ सुनंदकं नंदितसर्वलोकं शिवार्चकं तत्र यमेन चोदितः ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे सुनंदयमसंवादे सप्तविंशोऽध्यायः ॥ ॥ २७ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ श्रीशिव उवाच ॥ चित्रगुप्तस्तदा प्राह लेख्यं दृष्ट्वा शिवद्रुहां ॥ सेतिहासं तदाख्यानं अपर्णे शृणु सादरं ॥ १ ॥ श्रुण्वतः सभसदस्याययमायाथ तदा भयात् ॥ गणेश्वरस्य पुरतः सुनंदस्य तदांबिके ॥ स्कंद उवाच ॥ इत्थं देव्यै वदद्देवः कैलासे वै शिवद्रुहां ॥ सेतिहासं तदाख्यानं गणैर्मुनिगणैः सुरैः ॥ ३ ॥ यच्छ्रुत्वा भूगत नरा नद्रोहं शां भवे नमः ॥ कुर्वंति दुःखभीत्यैव तस्मात्त्वं शृणु वै मुने ॥ ४ ॥ सर्वलोकोपकाराय अविनाश्यं हि पातकं ॥ न निष्कृतिः शिवद्रोहे शिवायै शंकरोदितं ॥ ५ ॥ चित्रगुप्तानुवादेन गणेशं प्रति भाषितं ॥ तच्छृणुष्व मुनेऽनलं सर्वज्ञोऽसि सदा मुदा ॥ ६ ॥ चित्रगुप्त उवाच ॥ बृहद्रथंतरे कल्पे मनुः स्वारोचिरासवै ॥ तत्रावंत्यां सुभावास्तं मित्रौ विप्रौ तदाख्यया ॥ ७ ॥ देव शर्म सुशर्माणौ वेदशास्त्रेच निष्ठितौ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तौकार्त्तिके तु सोमेशं सोमवारे विलोकितुं ॥ ८॥ निर्जग्मतुः सोपहारावुपवास परायणौ ॥ अवंत्यामुदभूत्कश्चि
द्वणिक् गुप्तधनाह्वयः ॥ सोमेश्वराय कृतवान्घृताक्तां दीपमालिकां ॥ कार्त्तिके सोमवारे तु महापूजामकारय-
त् ॥ १०॥ धूपदीपैश्च नैवेद्यैर्गंधपुष्पाक्षतार्चनैः ॥ बिल्ववृंद सहस्रैश्च चंद्रारार्त्तिक्य पूर्वकं ॥ ११॥ तदा सर्वे
महेशानं सोमेशं लोकने रताः ॥ नरा नार्याः शिशिवः शूद्रा ब्राह्मणा यतिवर्णिनः ॥ १२॥ सव्यापसव्य मार्गेण प्रदक्षिण
विधिं परं ॥ चक्रुस्तु भक्ति भावेन चक्रु रंगप्रदक्षिणाः ॥ न पुनर्विलुठन्कुक्षौ मातुः क्रिमिमलाकुले ॥ पदे पदांतरे
नत्वा केचिच्चक्रुः प्रदक्षिणाः ॥ १४॥ सोमेश्वराय बाह्ये तु प्राकारे सोमवासरे ॥ देवशर्मसुशर्माणावुभावपि शिवंतदा ॥
१५॥ नत्वांतरे च प्राकारे तत्र दीपशताकुले ॥ धून्वन्करौ देवशर्मा प्रदक्षिणकरौ भवत् ॥ १६॥ तत्रैकदीपना-
शोभूत्तत्करांगुलिवाततः ॥ सुशर्म पार्श्वगोप्यासीत्तावदद्दीपनाशनं ॥ १७॥ समुज्वलं कुरुष्वेति तदान्यमपि कं
चन ॥ नखाग्रेणापि शूद्रोऽपि शिवदीपोज्वलन्तदा ॥ १८॥ तन्नखाग्रस्य तैलेन स्वशिखायां समादधे ॥ मौन-
हीनं तदान्यो सौ वैश्यो वैश्याकरांगुलीः ॥ १९॥ समालंव्य सतांबूल मालयेष्ठीवनं करोत् ॥ प्रदक्षिणायां स क्रोऽ
पि नरकं प्राप्य सान्वयाः ॥ २०॥ भुंजंते यातनामत्र मतिकल्प ममोसदा ॥ पुनरन्यो वैश्य सुतः दास्यात तत्र शिवोत्सवे ॥ २१॥

३४ समागम्यालय प्रांते संगम्य-चतया सह ॥ रेतोमूत्र मलोत्सर्गं कांच्यामेकाम्र धामनि ॥ २३ ॥ अकरोत्स शिवद्रोही ते
नरेतोह्रदांतरे ॥ सवैश्यः प्रतिकल्पेवै निस्तार रहितोऽपतत् ॥ कश्चिन्मार्गसहायेश उत्सवेशंभवे सति ॥ अधि-
कारी तदा स्वस्य शिव तैलेन दीपकान् ॥ २४ ॥ दधन्नारूढ तुरगः सोत्सहं तिष्ठते भुवि ॥ सतेनशं भुद्रोहेण
संतप्ताय सवाहनः ॥ २५ ॥ तद्वासः तुष संख्यानां कल्पानां वेश्मिनी यम ॥ हालास्ये उत्सवे शंभोः पुष्पमा
कल्यं हेतुकं ॥ अपाहरत्स वेश्या यैदत्वां पद्रोहमीदृशं ॥ गंधापहार्ययं शंभोः स्वांगलेपनहेतवे ॥ २७ ॥
संतप्ताग्नि कणां गोयं द्रोही भुंजति यातनाः ॥ साम्राणि हार्ययं शूद्रः मध्यं गारमवस्थितः ॥ २८ ॥ श्रम-
णोयं शिवद्रोही शिवगोक्षीरपान कृत् ॥ शिवधान्यं धनं वस्त्रं अधिकार मिषाद्यम ॥ २९ ॥ तस्य चोराणि
दिव्यानि हेमकांतोज्वलानि-चा ॥ शिवाभिषेकमुत्सृज्य राजकीये च्छदान्मुदा ॥ ३० ॥ स्वांगपुष्ट्यैपिवत्क्षी
रं श्रमणः पूयपानकृत् ॥ संतप्तवन्हिज्वालांगः क्रंदतेहर्निशं यम ॥ ३१ ॥ वैश्येयं शूलमुद्रां गाननृत्यति शि
वाग्रतः ॥ यौवने न्च दृप्तांगी राजकीयेषु नृत्यती ॥ ३२ ॥ ब्रह्मक्षत्रविशः शूद्रान् स्वांगसंगमलालसान् ॥
सधनान्निर्धनान्-चक्रे भूविक्षेपाद्वियं भुवि ॥ ३३ ॥ संतप्तसौम्यो नोयं तिष्ठते कल्पमीदृशं ॥ शिवार्चकोयं पापी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यान्भृत्यार्चयतिशंकरं ॥३४॥ पंचामृतं पंचगव्यं निःशेषं नाभ्यषेचयत् ॥ किंचित्किंचित्सेचयानो अधिका-
रिभयाद्यम ॥३५॥ गर्भगेहाद्दूर्ध्वभागे तैलं क्षीरं घृतं दधि ॥ क्षौद्रं शर्करया सार्धं सुगंध पुष्पकं ॥३६॥ स्रजः
प्रफुल्लमल्लीनां नैश्याभ्योऽदाच्छिवार्चकः ॥ अभिषेकाय परं भानां फलसाहस्रमुत्तमं ॥३७॥ नालिकेरश
तं कश्चिद्वणिक्योदाच्छिवायतु ॥ विचर्मकदलीजालं कुर्वन्तत्रासपाद्जः ॥३८॥ प्रस्फोटयन्नालिकेरं तुसे
चनायघटं शिवे ॥ क्षुधार्त्तश्चाप्ययरं भा फलद्वयमभक्षयत् ॥३९॥ नालिकेरं तृषार्त्तोसावपिबत्केवनेस्थि
तः ॥ तेनासृक्पूयपोष्यास्ते शुष्ककंठः सदैवहि ॥४०॥ एवं शिवद्रोहवतां गतिः परा न कल्पसंख्यात्र निवासिनां यमः ॥
१८३ ज्वालांगकावत्र च दीपनाशकौ द्विजौ सदा वेदविदावरिष्टौ ॥४१॥ इति श्रीदक्षमोशे शिवरहस्ये उत्तरभागे शिवद्रोहक-
थने अष्टविंशोध्यायः ॥२८॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशायनमः ॥ चित्रगुप्त उवाच ॥ महाकालेपुरा
कश्चिद्दुर्गगोत्रो द्विजाधमः ॥ शिवालये समागत्य साधुवत्संततं यम ॥१॥ शिवरात्र्यां शिवागारे भस्मरुद्राक्षभू-
षणः ॥ लिंगमभ्यर्च्य रात्रौ महाकालेश्वराग्रतः ॥२॥ शिवभक्ता महात्मानो रात्रौ यामचतुष्टयं ॥ तेषां शुश्रूष-
णमिषाद्दृष्ट्वान्येषां घटानपि ॥३॥ अपहृत्य गतः पापः पंचत्वं समगतोऽन्यतः ॥ शिवभक्तवरद्रोहाद्दधः शीर्षोर्ध्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३५

पार्श्वतः ॥४॥ कवाटमूले संस्थाय विप्रकन्याकरग्रहं ॥ कुचामर्शी करोत्पापी काश्यां स्थित्वापि पापधीः ॥५॥ प्रदोषका
लेतद्द्रोहाद्दसि पत्र वनेऽस्थितः ॥ त्रिपुंड्र फालं वीक्ष्यैव निंदत्येष सुदुर्मतिः ॥१६॥ तेनद्रोहेण नष्टायुः नरके ऽयसवायसाः
॥ तदास्यागतां जिह्वां खंडयंत्येवदुर्मतेः ॥७॥ रुद्राक्षधारिणं दृष्ट्वा सायूयं समुदीक्षते ॥ शिवद्रोहेण तस्याक्षितुदंत्या
यसवायसाः ॥८॥ रुद्राक्ष विहीनावै एतेत्रैव शिवद्रुहः ॥ पातयंत्येवतान् क्रुद्धाः संतप्त गिरिमस्तके ॥९॥ पंचा-
क्षरोज्झिता एते तान्हृदि भिद्यशूलतः ॥ पातयंति भयानित्यं शिवद्रोहेण तेनवै ॥१०॥ शिवद्रोहस्याके चिन्मकारे
मंटपे तथा ॥ मलमूत्रोत्सर्जनेन शिवतीर्थेनदीतटे ॥११॥ शिवतीर्थ शिवागार दूषका ये शिवद्रुहः ॥ तेनांगारहृदेऽग्ते
तिष्ठंत्याभूतसंप्लवं ॥१२॥ विल्वार्चकोयं नित्यंवै शिवदर्शनकारिणां ॥ निर्माल्य बिल्वक्रयणं काचार्यमकरोन्निशि॥
॥१३॥ सएवायं शिवद्रोही विष्ठापूर्णहृदेस्थितः ॥ निशीथे समनुप्राप्ते दीपमालाप्रदाः शिवे ॥१४॥ दीपान्नाशय
ते पापी तैलं गृह्य गृहं गतः ॥ संतप्त तैलमध्यस्थः तेन पापेन शूद्रकः ॥१५॥ गृहे गच्छन्निशीथे तु शिव सद्मगवर्ति
कां ॥ तैलाक्तां स्योज्वलां गृह्यगृहे याति सदा निशि ॥१६॥ शिवद्रोही च नियतं जीर्णैः संवेष्टितं पटैः ॥ तैलाक्तैर्दीप
यंत्येते तत्सर्वांगं सदा यम ॥१७॥ गंधपेषण कूर्च्चायं श्रमणोन शिवालये ॥ कर्पूर पङ्कलेपेतं चोरइत्वांगलेपकः ॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदंग खंडशश्चापि भटाः कृत्वा शिवद्रुहः ॥ शिवालयस्य गोग्रासं अन्नं तूषकणान्बहून् ॥ १९ ॥ चेटीयं तेन पापेन
स्थिता कल्पं मले ह्रदे ॥ दधिप्रदाता देवाय गोपोयं कृमतः सदा ॥ २० ॥ अर्घ्यमूल्येन तेनात्र सोयं श्लेष्मह्रदे स्थितः ॥
कश्चित्संकरजातीयः शिवधान्यमपाहरत् ॥ २१ ॥ निर्भिद्य धान्यकोशं च तद्धान्यानां च संख्यया ॥ कल्पं स नर
के भुंक्ते यदंगारकणान्ययं ॥ २२ ॥ शिववृक्षच्छेदकोयं जानः शूलांकमप्यसौ ॥ यावत्तत्पत्रकुसुमबीजमूलफला-
नि च ॥ २३ ॥ तत्संख्याकं (त्सरव्याकं) तदंगं च तिलशः छेदयंति वै ॥ नालिकेरमधूकानां फलबीजापहारकः ॥ २४ ॥ यंत्रैः
14 4 संपीड्यते तत्र तदंगं खंडशोयम ॥ जंबीरहा गिरीशदेवस्य स्वगृहे सोपदंशकृत् ॥ तन्मांस खंडतह्रके उत्कृत्याप तदंगतः ॥
ददाति यमदूतोसौ तदात्र रुदतो निशं ॥ २६ ॥ अप्रणम्य महेशस्य लिंगं तस्यौ शिवालये ॥ तेन द्रोहेण तन्मुंडं खंडयंति स्व
दंडतः ॥ २७ ॥ भटा उद्भटशस्त्रेण शिवादर्शिनरान्सदा ॥ तन्नेत्रगोलके सूचीः पूरयंति दिवानिशं ॥ २८ ॥ एते शिवकथा
हीनश्रवणाः कुंडलैर्युताः ॥ त्रपुसीसैश्च संतप्तैः श्रवश्चासिच्यते त्र वै ॥ २९ ॥ अयं सांख्यमतां मुख्यस्तर्कैश्च शिव
शास्त्रकैः ॥ तत्राथर्वशिरोभागं शिखाकैवल्यमंत्रकान् ॥ ३० ॥ विष्णूत्कर्षपरांश्चक्रे शिवद्रोहात्र न पाच्यते ॥ सां
ख्यवाक्कुल्प संख्यातः जिह्वामुत्पाट्य चास्य वै ॥ ३१ ॥ संतप्तायस संदंडैरूर्ध्वपुंड्रांकमस्य यत् ॥ शूलपादैश्च सं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अ.२९

३६ तप्तैस्तत्कालं दाहयंति वै ॥३२॥ प्राकारे च शिवागारे निष्ठीवं श्लेष्मणां करोत् ॥ वैश्यो यमत्र संतप्तक्रकचैर्दारितो
भवेत् ॥३३॥ शिवालयस्य वृषभैर्घोणीः संपूर्णधान्यकाः ॥ क्रयकृच्चापणे नित्यं वणिक् धान्याभृतिः शिवे ॥
३४॥ द्रोहीते नात्र पापेन यावत् घोणीप्रसंख्यया ॥ संतप्तवालुकामध्ये शयानो त्राव तिष्ठते ॥३५॥ शिवालयतृ-
णं गृह्य स्वगोरक्षणमातनोत् ॥ शिवद्रोहप्रमुन्मत्तस्तदा ततृणसंख्यया ॥३६॥ संतप्तास्त्रसदूर्वाभिः पूरयं
ति भटाः सदा ॥ ईश्वर उवाच ॥ एवं शिवद्रोहपरायणा नराः संदग्धसर्वांगकसंधिभागाः ॥ विदारिताः श-
स्त्रसमुच्चकैः सदा तिष्ठंत्यनल्पं परिसंख्यचारकाः ॥३७॥ इति श्री शिवरहस्ये दशमांशे उत्तरभागे शिवद्रो
हकथने एकोनत्रिंशोध्यायः ॥२९॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः चित्रगुप्त उवाच ॥
अथापरे शिवद्रोहात्पतंति नरकार्णवे ॥ तान् शृणुध्व गणेंद्रेशाय मेनात्र सभासदैः ॥१॥ जीर्णोद्धारे शिवागारे
श्रमणो भैक्ष्यभोजनः ॥ भिक्षयार्ज्यधनं स्वल्पं दाहयामास चेष्टकाः ॥२॥ शूलहस्तेश्वरागारे जीर्णोद्धारण
हेतवे ॥ पिनाकिन्याः पुरातीरे पूजापितापदात्सधीः ॥३॥ त्रिंशत्सहस्त्रसंख्याकाः सुधाश्चापेषयत्तदा ॥ सं
पादयामास गुडं नवं स्वधनदानतः ॥४॥ तत्र राशो भिषक्प्रमुख्यः चित्रधर्मेति नामतः ॥ तदा श्रमणमाहूय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवालय विचारकं ॥ प्राह तत्रेष्टकामह्यं दश साहस्रसंख्यकाः ॥ मदे हि गृहय च पणा निष्टकाश्च सुधां

तथा ॥ ६ ॥ वर्षाकाले अतीते त्वं शिवागारं कुरु ध्रुवं ॥ मद्गृहांगणसंस्तीर्णे पंकोत्र मम सद्मनि ॥ ७ ॥ जायते हर्नि

शं तेन क्षिप्रं मेद्य वचः कुरु ॥ श्रमणः तद्वचः श्रुत्वा तमुवाच तदा क्रुधा ॥ ८ ॥ श्रमण उवाच । वर्षाकाले लिंग

मूर्ध्नि पतंत्या सारविंदवः ॥ तत्पूर्वमालयस्यात्र जीर्णोद्धारं करोम्यहं ॥ ९ ॥ भिक्षुत्वा धनं वैद्य सद्दैवापाणि

भिर्मया ॥ प्रदाह्या इष्टकाः काष्ठैः तान्ना हं प्रददामि ते ॥ १० ॥ गृहाणान्यत्र सधनः माद्रोहं कुरु शांकरं ॥

शिवद्रोहेण नष्टं ते कुलं सर्वं भविष्यति ॥ श्रमणस्य वचः श्रुत्वा वैद्यः क्रोधांधमानसः ॥ उवाच क्रोधतां

145 म्राक्षः श्रमणं शिवकिंकरं ॥ १२ ॥ धृतत्रिपुंड्ररुद्राक्षं प्रांजलिं पुरतः स्थितं ॥ वैद्य उवाच ॥ पश्य मे विक्रमं शूद्र श्वः

परश्वस्त्र वेष्टकाः ॥ सर्वास्ताना श्यायाम्यद्याथ परश्वः प्रपश्य मे ॥ १३ ॥ इत्युक्तो निर्गतः क्रोधात् वैद्यो राज

गृहांतरं ॥ राजपत्न्याश्च गर्भिण्याः दत्वौषधमयं तदा ॥ १४ ॥ शूलं किंचित्समुत्पाद्य तच्चिकित्सामकारय-

त् ॥ तत्र राजभटान् प्राह समानीय नवेष्टकाः ॥ १५ ॥ संचूर्ण्य पोट्टलैः तस्तैर्वस्त्रै राबध्य चूर्णकं ॥ इष्टकाना

मिदानीं तु राज्ञाः शूलविनाशने ॥ १६ ॥ वैद्यस्य वचसा रात्रौ भटाः शस्त्रकरा ययुः ॥ अलभ्यास्तत्पुरे तत्र इष्टकाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३० क्वापिनू तनाः ।।१७।। शूलहस्तेश्वरागारइष्टकाः समुपाहरन् ।। वृषभैर्गोणिकाः पूर्य संताड्य श्रमणं तदा ।।१८।। निषिद्धं
कारिणो राज्ञो भटास्ते राजवाक्यतः ।। नीता राजभटैस्तत्र इष्टका भार्यतत्रवे ।।१९।। जहौ प्राणा श्रमणकः शिव
द्वारि तदा शिवे ।। संचूर्ण इष्टकाः सर्वा कृत्वा तैः पोटलं भिषक् ।। राज्ञः शूलचिकित्सां तु तिर्यगर्भामसारत ।। तेनैव
शंभो द्रोहिण राज्ञो नरकमागता ।।२१।। आकल्पांगारङ्गायनाक्रंदते हर्निशं यम ।। अविचार परो राजा काले नात्र गतो
यम ।।२२।। रौरवे ऊर्ध्वपादोत्र धूमपो सावधो मुखः ।। कशया ताड्यते नित्यं सदा यमभटैर्यम ।। राज्ञो भटाश्च पात्यं
ते शिवागारेष्टकाहराः ।। वैद्यो प्ययं शिवद्रोही मुख्यः शंभुद्रोही वरः ।।२४।। विषाग्निदग्धसर्वाग स्तिष्ठत्या भूतसंप्लवं ।।
उपेक्षका नृपागारे सचिवा मंत्रसूचकाः ।।२५।। नावारयं त राजानं पतं तं नरकार्णवे ।। शंभोर्द्रोहेण ते नात्र संतप्त
भुवि संस्थिताः ।।२६।। शिवकार्यार्थमुद्युक्तः श्रमणोपि विमानगः ।। शिवार्थमत्यज्य प्राणान्ते न कैलासमामवा
न् ।।२७।। ईश्वर उवाच ।। महाभिषग्वेश्म नवेष्टकाहरो भिषग्वरो यं नृपतिश्च राज्ञा ।। स्वमंत्रिसेनापतिभिस्व
कैर्भटैः ।। निमज्जमानो नरकार्णवस्थः ।।२८।। इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवद्रोहकथने त्रिंशो
ध्यायः ।।३०।। श्रीकाशीविश्वेश्वरार्पणमस्तु ।। श्रीईशानाय नमः ।। श्रीईश्वर उवाच ।। चित्रगुप्तमुवाचायनवीनो–

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यं यमस्तदा ॥ गणेशेन च स भ्येश्च वाचा शिव शिवेति च ॥ ॥१॥ यम उवाच ॥ चित्रे प्रभाषसे चित्रगुप्त त्वं वै कथानकं ॥
त्रिनेत्रद्रोहिणां घोरनरकं कः प्रपश्यति ॥ २ ॥ करणे खंडशः कृत्त सर्वांगा मुंडवर्जिताः ॥ मुंडे रायससंकाशैः आयसैः प-
रिखंडिताः ॥३॥ कोदंडशरकांडैश्च दंडमंडलताडिताः ॥ यमदूतैश्च बहुशः क्रकचैश्च विदारिताः ॥४॥ चक्रकृत्ताः
तथा केचित्केचिन्मुसलमर्दिताः ॥ मुद्गरैर्हन्यमानाश्च केचिद्राय सपिंडकैः ॥५॥ मूषासु च प्रपंच्यंते क्वाथ्यंतेऽत्र
कटाहकैः ॥ सुतैलतप्तधूमैश्च क्रंदंते केऽत्र तान्वद ॥ सर्वस्मान्नारकाद्घोरः शिवद्रोहात्पथदुःखभाक् ॥ यमस्य व-
चनं श्रुत्वा चित्रगुप्तोब्रवीत्तदा ॥७॥ सुनंद संनिधौ तत्र कथामन्यां शिवद्रुहां ॥ चित्रगुप्त उवाच ॥ श्रुत्वमत्रद्रो
146 हेण शंभोरेते निपातिताः ॥ खंडशः कृतसर्वांग संधिबंधा भटैर्यम ॥८॥ विप्रोयं नियतो भूत्वा सौराष्ट्रे संस्थितः
पुरा ॥ उद्दालगोत्रसंभूतः नाम्ना भूसूत्रवर्णकः ॥९॥ प्रदोष कृच्छिवस्यार्चां करोति नियमादयं ॥ केनचित्प्रार्थि
तो भुंक्ते श्राद्धे चायं प्रदोषकृत् ॥१०॥ धनलोभेन तत्रायं व्रतभंगाच्छिवद्रुहि ॥ तदस्योदरमध्यस्थमंत्रजालं तु
दोद्गतं ॥११॥ स्वतुंडैः कंककाकाद्यैः निःसार्यंते शिवद्रुहः ॥ अयाज्ययाजकोयं तु अध्वर्युरभवद्द्विजः ॥१२॥
तिष्ठत्सु यज्ञवृक्षेषु बिल्वच्छेदनमाचरत् ॥ तदा यूपमिषात्पापी शिवद्रोहात्र पच्यते ॥१३॥ तत्पत्रफलसंख्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ककल्पकश्चात्र पच्यते ॥ सं तप्तसीम मध्यस्थो अन्योव स्त्रं तुशां करं ॥१४॥ दत्तं चवणिजा शूभो रात्राव पहरत्तदा ॥ तद्व
स्त्रतंतु कल्योस्य संख्ययाद्रोह भाक विभो ॥१५॥ महारौरव मध्यस्थः क्रंदते त्र दिवा निशं ॥ पुष्पा पहारी गंधानां
शूद्रो रुद्रस्यवैयम ॥१६॥ क्वाथ्यते तैलु मध्येत्र शिवद्रोही महाघकृत् ॥ कार्यांतरे स्थितो भुंक्ते दिने कस्मिंश्चिदेक
दा ॥१७॥ शिवलिंगार्चनं त्यक्त्वा पापभुक्च शिवद्रुहिं ॥ संतप्तायस शैलाग्रे संस्थितः क्रंदते निशं ॥१८॥ शि
वागारे पाककर्त्ता भक्ष्य भोज्यं चूचुरन् ॥ शिवद्रोही तेन पापैः संतप्तायस पिंडकान् ॥१९॥ संभक्ष्यति कल्पां
ते द्रोही चान्य शिवस्य वै ॥ शिवगौर पहर्त्तायंत छुलां कं विना स्व वैः ॥ तद्रोम संख्यया तैले संतप्ते क्वाथ्यते नि-
शं ॥ शिवाभिषेक क्षीरे तु नीर दोप्य र्धहारकः ॥२१॥ तेनत्र पुसु संतप्तं पिबते कल्पमीदृशः ॥ नरः कश्चिच्छिवागारे
लेख्यं व स्त्रं धनं तथा ॥ २२॥ अचूचुरत्स गुणशः तेन द्रोहेण पाच्यते ॥ ककचैर्मर्दित शिरा न सते कल्पम न्वे ॥२३॥
नारी का चिदियं शूद्रा शिवागारे स्वके विटैः ॥ संगते यं ह्रदे घोरे रेत सः पतिता निशं ॥२४॥ शिवागारस्थितं कीटं
हत्वा स्वां गस्थितं यम ॥ मक्षिकां मशकं हत्वा सर्वजीव हनाघ भाक् ॥ २५॥ तेन सं पेष्यते चात्र नरके पेषणाश्मभिः ॥
पादुकाक्त पदः कश्चिच्छिवागारे स्थितो भवत् ॥२६॥ सं तप्तायसम ध्यस्थः पादत्राणेन चाप्यसौ ॥ उष्णीषीयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवागारे संस्थितः कंचुकी तथा ॥२७॥ संतप्ताग्निमहाभारं वहते ऽंदते निशं ॥ तैलाक्तपटमावद्धे कंचुकाक्तं चराहयेत् ॥२८॥ ऊर्ध्वपुंड्रांकितः शुं भोरर्चीनेन कृता भुवि ॥ तेन द्रोहेण वेशं भोः तैलैः संताड्यते त्र तु ॥
॥२९॥ चक्रांकेन समं शं भोरर्चनेंचाकरोदयं ॥ संतप्तायसपिंडेन हन्यते हर्निशं नरः ॥३०॥ चित्रगुप्त उवाच ॥
इत्थं शिवद्रोह परं पराभिरासायते यं नरकः सुघोरः ॥ जनैः सदायं परिपूर्णकल्पैः घोरैः सदा निविता प्यय मार्त्तराव ॥
॥३१॥ इति श्री शिवरहस्ये दशमांशे ईशानाख्ये उत्तरभागे एकत्रिंशोध्यायः ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥
ईशानाय नमः ॥ श्री ईश्वर उवाच ॥ ~~अत्रायं पीड्यते यंत्रे~~ ॥ चित्रगुप्तस्तदा प्राह शिवालय सुधा द्रुहः ॥ तत्कथां च
147 सुनंदाय यमाय च विशेषतः ॥ १॥ चित्रगुप्त उवाच ॥ अत्रायं पीड्यते यंत्रे शिवद्रोही सुधाहरः ॥ शं भोरंतर्गृहे
भिन्ने तत्समीकर्तुमीहते ॥२॥ वणिक् कश्चित्सुधां तत्र संपाद्यस्थापयत्तदा ॥ स्वगृहे लापनार्थाय तस्मै नादाद्दु
णिक्यम ॥३॥ वणिगुवाच ॥ शिवागारार्थमानीता सुधेयं त्वं सुधा द्विज ॥ याचस्यत्वं त संपन्नो प्यथ शं भोः सुधां
कथं ॥४॥ शिवद्रोह महाने ष जानीषे न कथं द्विज ॥ तमाह वाणिजं तत्र ग्रामणीः क्रोधमूर्छितः ॥५॥ ग्रामणी
रुवाच ॥ पन्नूय मत्तो रुषं ह्यत्र सुधां तव विना न्याये ॥ सर्वस्वहरणं [illegible] ते द्य श्वः परश्वो भविष्यति ॥६॥ वणिक्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३० श्रुत्वा च तद्वाक्यं तमाह विनयेन च ॥ वणिक् (उवाच॥) यथा कथंचिद्देवास्तु शिवालयकरोम्यहं ॥ गंधेश्वरस्य देवस्य न सुधां ते अ० ३
ददाम्यहं ॥७॥ इत्युक्त्वा निर्गतौ तौ च यथामार्गं वणिक् द्विजौ ॥ ततः कतिपये काले समतीतेऽत्र ग्रामणीः ॥८॥ रात्रिपालान्
समाहूय वणिक् धनमचोरयत् ॥ सुधांशुधरवेश्मार्थं पेषितां नवनीतवत् ॥९॥ शिवागारसुधां सर्वां रात्रिपालै
र्(न)चुरत्[illegible] ॥ स प्रातः स्वगृहं वीक्ष्य त्र्यक्षहृद्वणिजांवरः ॥१०॥ सर्वस्वं च गतं वीक्ष्य न शुचो(शो)च तदा वणिक् ॥ यथा सुधां
हृतां वीक्ष्य रुरोद विलुठन्भुवि ॥११॥ वणिगुवाच ॥ हा हतोस्म्यद्य नष्टोऽस्मि हा शंभो किं करोम्यहं ॥ सुधां सुधां
शुधरते हृता ग्रामणिना बलात् ॥१२॥ बलप्रमथन स्त्वं वै सदा देव शिवद्रुहां ॥ शिवद्रोही तत्फलं हि भुनक्तु नर
कार्णवे ॥१३॥ नाहं पश्येय शिवधनं हृतं जीवामि न क्वचित् ॥ स्वपुत्रमन्यतो गच्छेत्युक्त्वा दारयुतो वणिक् ॥१४॥
स्वगृहं दाहयामास स्वशरीरं स वह्निना ॥ तं दृष्ट्वा महदाश्चर्यं धूमज्वालावृतांबरं ॥१५॥ हाहेति चावदन्पौरा रा-
जा श्रुत्वास्य साहसं ॥ विचार्य ग्रामणेस्तस्य गृहं सर्वमलुंठयत् ॥१६॥ छिन्नहस्तपदान् चक्रे ग्रामपालांस्तदा नृपः ॥
निःसारयामास पुरात् सदारान्ससुतांस्तदा ॥१७॥ शिवार्थे मत्यजन्प्राणान्वणिग्याति विमानगः ॥ शान (राज्ञ्या) न मारितो यस्माद्
द्विज एवेति वै भयात् ॥१८॥ स ग्रामणीः शिवद्रोही तेन भुंक्ते च यातनाः ॥ राजायं तप्तशैलेषु ग्रामणेः किं वदाम्यहम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रात्रिपालाइमे सर्वे सुधाहाराः शिवालये ॥ अधोमुखोर्ध्वपादास्तैलं बंते शृंखलापदैः ॥२०॥ संतप्त वन्हिज्वालांगा दह्य

माना दिवानिशं ॥ हाहेतिक्रंदमानाश्च तिष्ठंत्या भूत संप्लवं ॥२१॥ कश्चिच्छूद्रः शिवागारे इक्षुदंडानवर्धयत् ॥

शिवस्यैवाभिषेकार्थं क्रियार्थं तदा भुवि ॥२२॥ सेनापतेर्महामात्रः याचते तं सदेक्षुकं ॥ नददाति शिवस्येति सदा

तं प्रतिषेधति ॥ कदाचिदयमुन्मत्तवारणेंद्रमधिष्ठितः ॥ धावंतं मदधाराक्तं शृंखलाबद्धपादकं ॥२४॥ इक्षुकां

डानि शिरसा धारयानं च मार्गगं ॥ शिवस्याभिषेकार्थं शूद्रं गच्छंतमीक्ष्य सः ॥ सक्रोधेनैव मनसा गजं तं समचू-

चुदत् ॥ स्वांगुष्ठेन गजस्यैव कर्णमूले तदा यम ॥ २६ ॥ स पुष्करेण धावंतमग्रहीत्स महाबलः ॥ धावंतं सेक्षु

(५८) शिरसं शूद्रमालय सन्मुखं ॥२७॥ विदारयामास रदैः निर्यज्जिह्वं गतासुकं ॥ तं च दृष्ट्वा मृतं शूद्रं धावंत्यन्ये जनाः

पथि ॥ २८॥ शिविक्षुकांडानि गजस्तस्मादाच्चाप्य भक्षयत् ॥ स्वगजेन मदाक्तेन मारितं शूद्रमीक्ष्य च ॥२९॥

सौधसंस्थो महामात्रमपृच्छत्तस्य कर्म तत् ॥ महामात्र उवाच ॥ मदाविलो मदाविष्टो सृणि भिन्नोत्तमांगकः ॥

नमद्वशं समायाति हतः शूद्रः करोमि किं ॥३०॥ तेनोक्तो मौनमाधे तत्र सेनापतिस्तदा ॥ संबध्देला नमध्ये

तु वारणे सौ जना ययुः ॥ ३१॥ सत्रां भोर्द्रीह कर्त्तायं महामात्रोप्यसौ द्विपः ॥ उभौ कल्प पर्यंतं बुभुजाते त्र यातनाः ॥३२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४० तानस्मर्तुं च मनसाशक्यं तेऽत्र गणेश्वर ॥ शूद्रोऽप्ययं शिवं याति विमाने नार्करोचिषा ॥ ३३ ॥ ईश्वर उवाच ॥ सुधांशुधृ
क् धाम सुधापहारकः सग्रामणी भूपतिर्त्रिपालाः ॥ अधोरणप्रेरणनः सवारणो भुंक्ते सदा वै नरकं सवारणं ॥ ३४ ॥
इति श्री शिवरहस्ये ईशानाख्ये दशमांशोत्तरभागे शिवद्रोहकथने द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्री काशीविश्वेश्व-
रार्पणमस्तु ॥ श्रीईशानाय नमः ॥ चित्रगुप्त उवाच ॥ कश्चित्सोमेश्वरागारे जीर्णोद्धारणहेतवे ॥ अश्मनां
शकटीभारैः लुलायवहनैस्तदा ॥ १ ॥ कुट्टकाराः शिवागारप्राकारं तं बबंधिरे ॥ तत्र कश्चिच्छिलाखंडं स्वगृ-
हे पेषणाय वै ॥ २ ॥ आनयन्निशि शिवदेवस्य शिलां तामसितां तदा ॥ शिल्पा ऊचुः ॥ प्राणतस्ते समुत्थाय चुक्रुशुर्भु-
स्तां शिलां गतां ॥ देवालयाधिपतये न्यवेदञ्छिल्पिनस्तदा ॥ ३ ॥ तदा शिलां तद्देवान्यां अगृण्हन् तत्र ते सुत
दा ॥ प्राकारमध्यगां चक्रुर्देवाश्माहारकोऽप्ययं ॥ ४ ॥ शूद्रः पाषाणकणजसंख्यया नरकार्णवे ॥ अश्मनस्तमुप्त
चूर्णानि स्वादन्नास्ते सुदुःखितः ॥ ५ ॥ अत्रान्यो घृतहार्यत्र शंभोर्नित्यं च सेचने ॥ घृताद्दस्तेन पापेन शिव
द्रोही निपातितः ॥ ६ ॥ संतप्तं च घृतं नित्यं पिबते न हि पातकी ॥ अथान्यो क्षेत्रहार्यायं शंभोरं भोजकल्पके ॥
७ ॥ निपातितोऽयं पापीयान् पद्मानां शुतसंख्यकं ॥ यावत् क्षेत्ररजस्तां कणानां सकणादनः ॥ ८ ॥ सर्वदा भ्रष्ट-

मध्यस्थो रुदते हर्निशं मूम ॥ शिवमाल्यापहारों यं घर्मेऽपि शिव सद्म नि ॥ ९ ॥ शिवालय वितानानि स्थे शो भावहान्यपि ॥
वस्त्राणि मंडपे बध्वा विवाहे छिद्रमादधत ॥ १० ॥ सतुन्नवायी सूची भिः समीचक्रेन सूत्रकैः ॥ शिवस्य नालिकेरा
णां गुच्छमाबध्य मंडपे ॥ कदली फल षंडं च ईक्षवः पूगजं फलं ॥ बध्वा मंडप शोभार्थं विवाहानंतरं मुदा ॥ ११ ॥ अ
धिकारी शिवद्रोही विक्रीणात्या पणे ददन् ॥ पणानानीयन शिवं ददौ, गृह्णात्स्वयंतदा ॥ १३ ॥ तेन पापेन तत्कन्या वि
धवा भूद्दरिद्रिणी ॥ सोऽपि कालेन निधनादूर्ध्वं गोंप्यत्र तिष्ठति ॥ १४ ॥ शिवमंडपहार्यत्र शेते संतप्तवालुषु ॥
कश्चिद्राजसुतो वीरै र्भटैरश्वे प्य धिष्ठितः ॥ १५ ॥ धावन्ता खेटके मार्गे मृगान्हत्वातपांऽन्जान् ॥ सायं परिभ्र
159 मन्तत्र कंटका विद्धपद्द्वयः ॥ १६ ॥ भ्रमन्नेशालयं प्राप्य मार्गमध्ये स्थितः स्तदा ॥ क्षुधितैः स्वभटैश्चैव स्वयंस्तु
तृट् समन्वितः ॥ १७ ॥ तैलं शिवाभिषेकानामालयस्थं रुपार्जितं ॥ जंबीराण्यपि तत्रैव स्थितानि शिवसेचने ॥
तान्यानीय बलात्कारात् जंबीराण्यपि तैलकं ॥ पादकंटकमुत्पाट्य तत्तैलं जलं फलं ॥ १९ ॥ गृहीत्वा पादमर्दं च कृत
वान् राजपुत्रकः ॥ भोक्तुं नैवेद्यमीशस्य अनिवेदित मेव हि ॥ २० ॥ स्वभटै रानयामास सतदा वैक्षुधातुरः ॥ अन्नं
त्यक्त्वा च देवाय नैवेद्यं क्रियतामिति ॥ आखेटके भटैर्युक्तो बुभुजेन्नं नृपात्मजः ॥ तेन पापेन नष्टायुः यममागा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४१ नृपात्मजः॥ २२॥ तैर्भटैः सहसंतप्ततैलमध्यस्थितो निशं॥ अनिवेद्यान्नपुलकान्यावदश्नाति वै भुवि॥ २३॥ तावत्क्रि अ॰३३
मिगणान्भुंक्ते शिवद्रोहस्य यमीशः॥ अन्नाद्यन्ये द्विजा राजा भटा भटकशाहताः॥ निपात्यंतेत्र नियतं तच्छृणुष्व गणे
श्वर॥ कश्चिद्वंगेष्वभूद्राजा नाम्ना चित्रांगदो धनी॥ २५॥ मानी मान्यो वदान्यश्च धान्यसमन्वितः॥ स नित्यायुत
विप्राणां भोजनं दापयत्तदा॥ शिवालयेत्र संधीशधाम्नि विस्तृतमंटपे॥ भक्ष्यभोज्याम्रपनसरंभाफलसम
न्वितं॥ भुंजतां तत्र विप्राणां तत्रन्यूनमभूत्फलं॥ रंभाम्रपनसादीनां शिवागारस्थितं फलं॥ २६॥ अगृण्हन्ब्रा-
ह्मणभुजिक्रियायां ते नृपाज्ञया॥ तदादातुं शिवागारस्थिता ये च शिवार्चकाः॥ २९॥ शिवार्चकाः॥ नांगीकुर्मेत्र
देवस्य फलहारणमीदृशं॥ न ब्राह्मणेषु दातव्यं महापापकृत्॥ ३०॥ तेषामुत्क्रोशतामेव शिवसेचनसाधनं॥ प्रद-
दुस्ते फलं छित्वा ब्राह्मणेभ्यो ददुर्भुजि॥ ३१॥ यथेष्टं नु भुंजुस्तेऽपि रंभाम्रपनसोद्भवं॥ शिवाभिषेककरणं
प्रशंसंतो नृपं द्विजाः॥ ३२॥ नष्टायुषस्ते शंभोर्वै द्रोहस्यान्नादनतो द्विजाः॥ राजापि कालान्निधनं प्रापयातो भटैः
स्वकैः॥ ३३॥ फलाहरणतः शंभोर्ब्राह्मणायतु भोजिताः॥ एकस्मिन्दिवसे भूमौ रंभापनसजाम्रकैः॥ ३४॥ ~~फलाहर~~
~~णतः शंभो~~॥ तत्रैव नरके घोरे पात्यंते क्रूरकर्मिणः॥ महोदरास्ते गुदतो शिरांश्चाणि च भंजते॥ ३५॥ काकैः सं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri.

तुद्यमानो गा वज्रतुंडै रथादिताः ॥ तत्र गोलक संधौ च कर्ण कंठेषु पादयोः ॥३६॥ अयुतं नियुतं घोरं नरकं चोपभुंजते ॥
छेत्तारः फल षंडानां कराल करवालतः ॥३७॥ छेत्स्यं तितत्क्षणयत्र राज्ञो भटकरा द्विकं ॥ राजाप्ययंक्रोशमानः क्रकचै
र्मूर्ध्नि भिद्यते ॥३८॥ राज्ञश्च श्वा स्राकरां जिव्हां संतप्ताय सदंडतः ॥ सदंशतः समुत्पाट्य पातयंति महाह्रदे ॥३९॥
शिवागारे छिद्रकरो राजा ब्राह्मण भोजनात् ॥ चित्रगुप्त उवाच ॥ शिवद्रोही यात्र वसंति मानवाः सुदुःख भारै
नरकाग्नि तप्ताः ॥ एते मयोक्तास्तव सूर्यनंदन शृणु चान्यानपि पापिनां वरात् ॥४०॥ इति श्री शिवरहस्ये ई
शानाख्ये दशमांशोत्तर भागे शिवद्रोह कथने त्रयस्त्रिंशो ऽध्यायः ॥३३॥ श्री काशी विश्वेश्वरार्पण मस्तु ॥ ॥
150 श्री ईश्वरायनमः ॥ श्री ईश्वर उवाच ॥ चित्रगुप्तस्तदा प्राह सुनंदं च गणेश्वरं ॥ प्रांजलि विनयोपेतः तत्र संस
दि वैकथां ॥१॥ शिवद्रुहां मुनेतत्र शिव भूस्यपहारिणां ॥ चित्रगुप्त उवाच ॥ शृणुध्वं भूमि हंतॄणां शंभोरत्र
प्रति क्रियां ॥ पश्यंतो विकला एते विप्रा वेद विदांवराः ॥२॥ दाता यं मिथिलाधींद्रः सूर्य शर्मा कवि प्रियः ॥ द्विजाः
प्रतिग्रह पराः पीड्यंते तिलयंत्रके ॥३॥ आक्रोशंति दिवारात्रं पिष्टी भूतास्तदंतरे ॥ भ्रमंति यंत्र परीतं खराणां शत
कं यम ॥४॥ रक्ता पूरित मेतद्धै तिलयंत्रं मुखं मुहुः ॥ तेषामास्ये पाययंति भूपं रक्तं नृपं द्विजान् ॥५॥ तेषां मध्येप्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संख्याकं सख्यः चानयमुद्धृतः ॥ शिवनिंदांचकारासौ मिथिलेशाग्रतो भुवि ॥६॥ सुनंदयमौऊचतुः॥ अहो दुःखमहो दुःखं एत
योर्नृपविप्रयोः ॥ श्रोतुं न शक्यते द्रष्टुं किं पुनर्मांसचक्षुषा ॥७॥ एतेषां च द्विजानां च नृपस्य च विशेषतः ॥ क्षेत्र
प्रतिग्रहीतॄणां शिवभूम्यपहारिणां ॥ अभूत्कथं वदस्वाद्य तन्नौ श्रण्वावसादरं ॥९॥ श्रुत्वा वचो चित्रगुप्तः तयोर्य
मगणेशयोः ॥ उवाच प्रांजलिर्भूत्वा नृपविप्रशिवद्रुहः ॥१०॥ यम पूर्वं सूर्यवर्मा मैथिलेशो द्विजोप्ययं ॥ वेदमि
त्र इति ख्यातः ~~सख्यातः~~ सखा स्याभून्नृपस्य वै ॥११॥ काव्ये व्याकरणे तर्के पांडित्यं कुरुतां सदा ॥ सूर्यवर्मपिता प्रा
दात्तत्र धर्मेश्वराय वै ॥१२॥ ग्रामार्धं देवपूजार्थं धर्मवर्मा नृपोत्तमः ॥ शूलमुद्रांकिता शीलां अर्धग्रामांतसीम
नि ॥१३॥ धन्या तदा महेशेन भूरियं परिसंख्यया ॥ एवं स्थिते सूर्यवर्मा वेदशर्मानुजे द्विजे ॥१४॥ ददौ ग्रामार्धमे
तेषां शिवदत्तार्धभागकं ॥ द्विजैरन्यैर्वेदमित्रः गृहीत्वा नृपशासनं ॥१५॥ बुभुजे सस्यजातं सः राजमित्रत्वगर्वि
तः ॥ शूलांकितां शिलां हित्वा किंचित्किंचिदुपाहरत् ॥१६॥ शंभो भूमिं राजमित्रो द्विजैरन्यैश्च संगतः ॥ विना
दः सुमहान् जातः स शिवार्चकभूसुरैः ॥१७॥ शिवार्चकाऊचुः ॥ महाराज द्विजा यूयं शंभो भूमिरियं पुरा ॥
धर्मेश्वराय दत्तेयं राज्ञा वै धर्मवर्मणा ॥१८॥ शूलांकितां शिलां खात्वा दत्तेयं तेन भूभुजा ॥ माकुरुध्वं शिवद्रोहं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यूयं वेदविदां वराः ॥ वेदांतवेद्यो भगवान्संबिकापतिरीश्वरः ॥ प्रमाणं यदि वो विप्राः शिवद्वारि वदंतु वा ॥ २० ॥ भूरि
यं न शिवस्येति गम्यतां शंकराग्रतः ॥ इत्थं शिवार्चकवचः श्रुत्वा सक्रोधमीक्ष्य च ॥ २१ ॥ उवाच विप्रैः सहितो वेद
मित्रो शिवार्चकं ॥ वेदमित्र उवाच ॥ यूयं मूढतमाः सर्वे शंकरः कः शिलागतः ॥ उक्तोपि तत्पुरः किं स मदीयमिति
वक्ष्यति ॥ राज्ञः पित्रा पुरा दत्ता भूरियं धर्मसंकरे (वर्मणा) ॥ २३ ॥ तत्पुत्रोयं सूर्यवर्मा तत्पुरः परिकथ्यतां ॥ तेनास्मभ्यं ग्रा
ममर्धदानं च कृतवान्हि ॥ २४ ॥ शिलाग्रे कथने किं वा ततो द्वारि प्रगच्छत ॥ तत्पूर्वमेव गत्वा सौराज्ञोथ निकटे
स्थितः ॥ २५ ॥ वेदमित्रो मित्रभूतः परिषन्मंडलं गतः ॥ काव्यप्रहेलिकाभिश्च रंजयंस्तं नृपं तदा ॥ २६ ॥ एत
(s) स्मिन्नंतरे राज्ञो द्वारि धर्मेश्वरार्चकाः ॥ धर्मेश्वरार्चकाः सर्वे विवादेन द्विजैः सह ॥ २७ ॥ समागता नृपद्वारि द्वास्थो (स्थाः)
यूयं विशेषतः ॥ तान्नमस्कृत्य ते द्वास्था नृपं प्राप्ता न्यवेदयन् ॥ २८ ॥ प्रवेशयंतामित्यशात्स राजा विप्रैः सभागतः ॥
धर्मेश्वरार्चकान्दृष्ट्वा सह सन्पार्श्वगं द्विजं ॥ २९ ॥ अपांगकोणतः पश्यन्वेदमित्रं तदा नृपः ॥ उवाच तत्र धर्मेशपू
जकानर्चकोत्तमान् ॥ ३० ॥ भूप उवाच ॥ भवदागमने हेतुः कोऽत्र मह्यं वदंतु वः ॥ नृपश्च यवच नात्तेतं राजानं प्राहु
र्र्चकाः ॥ ३१ ॥ अर्चका ऊचुः ॥ महाराज भवत्पित्रा दत्ता धर्मेश्वराय भूः ॥ भवता चार्धभूर्दत्ता वेदमित्राय भूपते ॥ ३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४३ हरत्ययं भूमिमेनांहा यनेहायने द्विजैः॥ शिवद्रोहा यमुन्मत्तो त्वसा[हा]य्यतो नृप॥३३॥ वेदमित्रस्ततः क्रुद्धो प्राह
तत्र शिवार्चकान्॥ [वेदमित्र] विप्र उवाच॥ यूयं वेदविहीनाश्च भृत्यर्थं शिवपूजकाः॥ धर्मेश्वरार्चन मिषाद्भवद्भिर्भूः
प्रभुज्यते॥३४॥ निवेद्य देवायान्नं वः वयं वेदोक्त कर्मठाः॥ अस्मिन्मंत्रेण देवानां निलानां सन्निधा परा॥
३५॥ शिला किं भुज्यते चान्नं गच्छंत्वद्य यथागतं॥ शिवार्चकः [उवाच]॥ यस्येश्वरस्य निश्वासो वेदो विप्र धनं द्विजाः॥
तं महेशं विनिंद्यैवं कां गतिं समवाप्स्यथ॥३६॥ अष्टमूर्तेः परं चागः तदृसन्नान्नभोजिनः॥ यूयं तन्निंदया-
विप्रा नरकानेव गच्छत॥३७॥ राजोवाच॥ सत्यं ब्रवीत्ययं विप्रो वेदमित्रः शिवार्चकाः॥ शिलासंस्थो महादे-
वः किमास्येन प्रखादति॥३८॥ देवाः सर्वे विप्रमुखैरदंत्यन्नं सदा मुदे॥ तेन प्रीता भवंत्येव यूयं गच्छत मा
चिरं॥३९॥ द्विजैर्गोभिस्तथाक्रम्य भुक्त्वा गृह्णाति गां शिवः॥ विप्रेषु विश्वासपरा राजानो दिवि
संस्थिताः॥४०॥ प्रत्यक्ष देवा विप्रा वै शिवो मंत्रैः शिलां गतः॥ यथा कथंचिद्देवास्तु यूयं गच्छंतु चालयं॥
॥४१॥ तच्छ्रुत्वा निर्ययुः शं भोरगारस्थाः शिवार्चकाः॥ धिक्त्वां राजानमितिते शिवद्रोहवतां वरं॥४२॥
शिवद्रुहा द्विजा एते नरकानेकविंशतिं॥ भुंजंति प्रतिकल्पं वै यावद्दूरे णु संख्यया॥४३॥ इ[त्यु]क्त्वा निर्ययुः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुद्दाधर्मेशद्वारिते ऽर्चकाः ॥ ॥ शिवार्चका ऊचुः ॥ ॥ अहो महादेवस्या निधान शर्वार्चनासाध
न जात भूमिं ॥ नृपोहरत्येष द्विजाधमार्चकः कुरुष्व तस्यानु पदं भयं सदा ॥ ८४ ॥ शिवोपिका
लेन नृपस्य तस्य भूमिं सदा ष्ट्रां युधितं प्रणाश्य नृपोऽन्यकोवंगपति स्तदानीं तत्पर्श्वगा मंत्रिगणाः
प्रदुद्रवुः ॥ सदैव विप्रोपि सुतैः स्वभार्यया कालान्मृतो ऽसौ यम माप भूभुजः ॥ पित्रा नृपोप्यत्र
दर्शा द्विजै स्तदा भुंक्ते विचित्रां नरकार्णवं गतः ॥ ८५ ॥ तां देवे मित्रस्य ललाट मूलं जिह्वां समु-
त्पाट्य शिवस्य निंदकां ॥ संभोजयंत्यत्र च शंभु भूमेः तत्पांशु संख्या नक कल्प मत्र ॥ ८६ ॥
152 द्विजा स्तदा तत्र महोदरे मृताः शिवस्य ये सस्य भुजो ऽत्र भूमेः ॥ तेवायसै रायसतुंडकं
कैः तुद्यंत एवात्र वसंति भर्जिताः ॥ ८७ ॥ राजाऽप्य यंचाप सतैल यंत्रैः सं पीड्यते क्रंद-
ति वै दिवानिशं ॥ शिवस्य भूमे हरणेन ते द्विजाः संप्रापुरित्थं प्रति कल्प नारकाः ॥ ८८ ॥
तस्माच्छिवद्रोह मिमं नवा स्मरेत् शंभोः कदाचिन्मनसा पि कर्त्ता ॥ उक्त्वाप्य हं चापि
समूह्य दंग कंपे नवक्रेण सगद्गदोद्भवं ॥ द्रोह प्रसक्त्यै शिव संस्मरेण नान्योप्यु पायो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्ति गणेश्वराद्य ॥ ४१॥ ॥ इति श्री शिव रहस्ये ईशानाख्ये दशमांशे उत्तर भागे अ॰ उ॰
४४ शिव भूम्यपहारकथने चतुस्त्रिंशो ध्यायः ॥ ३४॥ ॥ श्री काशी विश्वेश्वरार्प
मस्तु ॥ ॥ श्री ईशानाय नमः॥ ॥ ईश्वर उवाच ॥ ॥ श्री ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानायनमः॥ ॥ईश्वरउवाच॥एवंशंभोर्भूमिहरकथांश्रुत्वायमस्तदा॥विस्मयाविष्टहृदयावास्तांयमग
णेश्वरौ॥१॥ ऊचतुश्चित्रगुप्तंतंतत्रसभ्यैःसहावरात्॥ ॥यमगणेश्वरौ॥ ॥केयमत्रस्थितावेश्यावैश्यःकस्त
त्रपात्यते॥शेषेणश्रोतुमिच्छावःवदारभ्यचतत्कथाम्॥२॥केनैतौशिवद्रोहेणभुंजातेयातनाश्चिरम्॥अधोमुखोर्ध्वपा
दौतौसंतप्तायसशृंखलैः॥३॥खदिरांगारमध्यस्थौवेश्यावैश्यात्रतिष्ठतः॥क्रंदतस्तौदिवारात्रमविश्रांतंवदाद्यवै॥४॥
गणेशस्ययमस्यैतच्छ्रुत्वावाचंसचित्रकः॥तांडयाचांजलिंकृत्वावेश्यावैश्यकथातदा॥५॥ ॥चित्रगुप्तउवाच॥ ॥
153 शृणुतंवैश्यवेश्यायाःशिवद्रोहस्यकारणम्॥एतानास्तांपुरागौडेचर्मण्वत्यास्तटेपुरे॥६॥नाम्नाकुंदपुरेतत्रकुंदेश्वर
शिवालये॥वैश्योयमापणीतत्रप्रसार्यापणमुज्ज्वलम्॥७॥नवधान्ययुतंतैलंगुणतंडुलविक्रयम्॥करोतिसज्जनानांवैनि
त्यंरात्रावधिप्रिये॥८॥तत्रकुंदेश्वरागारेवेश्यांशूलांकनांकिताम्॥नृत्यंतींशंकरागारेवशीचक्रेधनार्पणैः॥९॥तां
तदागृहमानीयभार्यावत्तोषयद्धनैः॥वस्त्रैराभरणैःखाद्यैःमंचास्तरणवद्गृहैः॥१०॥एवंसावर्धितावेश्यावैश्यस्यैन
गृहेस्थिता॥नागच्छच्छंकरागारेसायंनर्त्तनमंटपम्॥११॥विचिन्वंतिचतांतत्रवेश्यानांचगृहेतदा॥तामदृक्षामासमात्रंकेन
चिद्वेश्ययमंदिरे॥१२॥दृष्टेतिवदताथेतितमाजग्मुश्चवैश्यकम्॥शिवालयस्थास्चनरानटावेश्यातदापरे॥१३॥गत्वान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० त्वातदा वैश्यमनुवृत्तत्संचरः॥ ॥शिवनराः॥ नेयं वेश्यातवागारे संस्थाप्या शिवनर्तकी ॥शूलांकिता विशेषेण ईशा०इ०उ
४८ ण त्याज्येयं मातृवत्त्वया ॥१४॥ शास्त्रमस्त्येव विहितं तच्छृणुष्व विशांवर॥ अपि वा मातरं गच्छेन्न गच्छेद्देवदारिकाम्॥अ०३५
न मुंच तां शिवद्रोहं कर्तुमर्हसि मानद॥स्त्रीणां नर्तनमुत्कृष्टं शंभोरग्रे सदा निशि॥१६॥तौर्यतृकादिकरणाच्छिवायां
नं स मश्नुते॥स्त्रीदानेशंकरागारे यावत्स्त्रीरोमसंख्यया॥१७॥ कल्पानां कल्पसंख्यानां कैलासे वसते नरः॥नर्तक्या
हरणाच्छंभो यावत्तद्रोमसंख्यया॥१८॥शिवद्रोही कल्पकोट्या वसते नरकार्णवे॥मुंचेमां नर्तकीं शंभो र्वैश्याद्य त्वमि
मां शिवे॥१९॥इत्थं शिवालयस्थानां नराणां वचसा वणिक्॥प्राह स तान् समुद्दिश्य त्वपक्ष वेश्याधरप्रियः॥२०॥उवाच का
मी वैश्यो ऽयं वेश्यासंगमलालसः॥ ॥वैश्य उवाच॥ ॥मयेयं चारुसर्वांगी पीनोन्नतपयोधरा॥ वृत्ता संगार्थमेवाद्य नैव मुंचा
मि वै क्वचित्॥दृष्ट्वेमां मानसं मेऽद्य न दारे रमते नराः॥नाहं तामद्य मुंचामि प्राणेभ्योऽपि गरीयसीम्॥२२॥दासीं मे यौवनोपेतां
मदीयां नयतालयम्॥तस्यै नर्तनशिक्षां च कारयिष्ये धनार्पणैः॥२३॥तमूचुस्ते नरा वैश्य मिमां शूलांकितां त्यज॥न त्य
क्ष्यामीति वैश्येन राजद्वारमुपागताः॥२४॥राजानं धनदानेन स्ववशे प्रीतिमथाकरोत्॥सचिवास्तस्य वै राज्ञः सर्वे वैश्योप
नदानतः॥२५॥ते सर्वे वश्यवैश्यं तं वैश्यमालपिनो नरात्॥ दृष्ट्वोचुर्नृपतेरग्रे वैश्यो नः पुरभूषणम्॥२६॥ प्रदेयास्यैव मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेश्याशिनागारे च चेटिकाम् ॥ प्रेरयेद्वेश्यवेणीऽयं तथैवाह नृपोप्यसौ ॥ २७ ॥ यथाकथंचिद्देवाग्रे नृत्ता विघ्नो नैव भवेत् ॥
गच्छध्वं शंकरागारे गृहीत्वा वेश्यचेटिकाम् ॥ २८ ॥ वेश्यया रमतां वेश्यो महाराज्ञः प्रियो ह्यसौ ॥ इत्युक्तमात्रे ततः स
र्वे सचिवैस्तैः दुरासदैः ॥ २९ ॥ ऊचुः शिवद्रुहा मग्रस्था तु मे वचनक्षमम् ॥ वेश्यचेटीं परित्यज्य जग्मुः सर्वे शिवा
लयम् ॥ ३० ॥ कुंदेश्वराग्रतः सर्वे दुःखिता मौनमास्थिताः ॥ ततः काले न राजापि वेश्या वेश्यश्च मंत्रिणः ॥ ३१ ॥
श्मशानाभ्याशमाजग्मुर्भद्रदंडेश्वरवंदिताः ॥ बाहुबद्धकशाभिस्ते पातितास्त्वमलाह्रदे ॥ ३२ ॥ वेश्येयमपि सोन्म
154 त्ता पुरा वेश्येन संगता ॥ संतप्तशीलसुभगा क्रंदतेऽहर्निशं यम ॥ ३३ ॥ राज्ञाप्ययं शिवद्रोही अविचारणपापकृ=
त् ॥ धनाशयोर्ध्वपादोऽयं लंबते भूरवलापदः ॥ ३४ ॥ संतप्तखादिरांगारमध्यस्थो मंत्रिभिः सदा ॥ क्रूरा संताडितो
नित्यं सर्वांगार्द्रव्रणो निशम ॥ ३५ ॥ क्षारैः संसेच्यते वेश्यो वेश्यया क्रंदते सदा ॥ हा हा मन्मथचेष्टया मुविमया=
शंमोश्च वेश्यां गता संभोगाधरपान चुंबनवशात् धिक् दुर्दशामीदृशीं ॥ प्राप्तोस्म्यद्य परत्र दुष्कृतभयं नि
स्तारविस्तारितं को वा सह्यतमं महाग्नि नरकं सह्येत कामादृशः ॥ ३६ ॥ ॥ इति श्री शिवरहस्ये दशमांशे उत्तर=
भागे शिववेश्याहरणकथनं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चित्रगुप्त

 श्रीईशानाय नमः॥ ॥श्री ईश्वर उवाच॥ ॥ कश्चिद्ग्रामं हरच्छंभोः तद्दोत्रं महानभूत्॥ तां कथां कथ्य इशा॰ द॰ उ

४६ मानां मे श्रुणु नारकिणोऽत्र वै॥१॥ गोदावर्यास्तटे कश्चित्त्र्यंबकेश्वरगास्तदा॥सहस्रसंख्यं गोपास्तु संवसन् अ॰ ३९

भुवि चारयन्॥ शष्पावृत्तेऽथ गोदायास्तटे पावन उत्तमे॥२॥ पिबंति गोदानीरं ता दुहंत पयमुत्तमम्॥३॥ तद्दोयदो

ह्लिषिं च तस्त्र्यंबकेशं शिवार्चकाः॥ तत्राधिकारिणो गावः तद्दोभिः संगताश्चरन्॥४॥ शतसंख्यास वत्सास्ता

स्तत्तटेऽपि सुवासके॥ त्र्यंबकेश गवां मध्ये दश वर्षीत दायम॥५॥ गोपैः संकालिता काश्चिद्गावः सायं ग्रहं ययुः

चौरापनीता देवस्य गावः शूलांकितास्तदा॥६॥ विसर्जेयत्तदा गावः वत्सैर्वत्सतरीयुताः॥ पुनः कतिपये

काले अधिकारि गवां दश॥७॥ शूलांकेनोज्झिता गावः गृहीताः ताहि चोरकैः॥ तदागत्य समं गोभिर्गो

पाधिकृतिकारिणे॥८॥ अब्रुवन्प्रीतहृदयाः गोपाः प्रांजलयस्तदा॥ ॥ गोपा ऊचुः॥ ॥शिवगोभिस्स

वत्साभिस्त्वद्गावो वत्सकैर्युताः॥ पूर्वं चौरापनीतास्ते दृष्ट्वा शूलांकनं विभोः॥९॥ शूलांकनं ते दृष्ट्वै वप्रात गो

वो विमोचिताः॥ तव गावो दश वृषैर्वत्सैर्नीता हि चोरकैः॥१०॥ तेभ्यो यथोचितां शिक्षां कुरु त्वमविचारतः॥ सत

दा श्रुतवृत्तांतः गोपेभ्यो गोहृतां तदा॥११॥ चोराणां शासनं कृत्वा आहराम्यद्य गो मम॥ तावन्मदीयसदने शिव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गावो दुहंतु वै ॥ १२ ॥ दशसंख्यावधि वृषा शतं लांगलधारिणः ॥ कृषिं कुर्वंतु मद्भूमेः वृषेभ्यो नः प्रयोज
नम् ॥ १३ ॥ तदाधीकारिवचनाद्गोपा ऊचुः परस्परम् ॥ ॥ गोपा ऊचुः ॥ ॥ अधिकारी वदत्येव शिवद्रो
होऽत्र नो भवेत् ॥ उपेक्षायां महान्दोषो भविष्यति च नो महान् ॥ १४ ॥ शिवाभिषेकविघ्नश्च भविष्यत्यस्य दे
हनात् ॥ गावो दुहंत्वस्य गृहे शंभो वैदंशसंख्यया ॥ १५ ॥ अधिकारी भवेत्क्रुद्धो नात्र दोहो गवां गृहे ॥ गावो
विवर्धमाना वै शंभो द्रोहो भिषेचने ॥ १६ ॥ अन्यासामस्य च गवां शंभोर्गोभिः समं दुहे ॥ गावो नाशं प्रयास्यंति अ
धिकारिणयो त्र तु ॥ १७ ॥ तस्मान्न दोहं कुर्वंतु मास्य गोभिः शिवद्रुहः ॥ शिवगोपयसा वृद्धिं कांक्षमाणो विनश्यति ॥
155 किं कुर्मोऽत्र बलात्कारैरधिकारैर्मुहुर्मुहुः ॥ इत्युक्त्वा गाः दुहन्गोपाः शंभोर्निसाभिषेचनाः ॥ १९ ॥ अधिकारिभ
या गोपाः वृषा हलयुजोऽभवन् ॥ शिवगोपयसा तुष्टः पुष्टश्चासीत्र दापिबन् ॥ २० ॥ अधिकारी शिवद्रोहीतेन
पापेन वै मृतः ॥ कालेन मृत्युभवने यातनां भुंजते सदा ॥ २१ ॥ पूयधारासु संतप्ताः पिबत्यत्यंतदुःखितः ॥ गोपा
निर्बंधतोऽप्यत्र गा दुहन्नीश्वरस्य च ॥ २२ ॥ तद्दुस्तच्छेदनं चक्रुः करबालेन ते गणाः ॥ यावद्रोमसंख्याकं शि
वगोहार्यतस्थितः ॥ २३ ॥ संतप्तकंटके शेते निर्यत्सर्वांगपूयकोः ॥ गोपानां नखसंधीषु सूच्यः प्रोता भवन्क्षिवे ॥ २४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१०॥ईश्वर उवाच॥एवं शिवद्रोहवतां वरिष्ठो गावोदुहन्नीशपयोपि बंश्च॥ वृषान् नियोज्यस्वकलांगलेऽथ ई॰ श॰ द॰ उ
४६ पांसुप्रसंख्यान्नरकान्प्रयाति॥२५॥ ॥इतिश्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे शिवद्रोहस्य कथनंनाम अ॰ ३६
मषड्त्रिंशोऽध्यायः॥३६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ईशानायनमः॥ ॥शिवगुरु उ-
वाच॥ ॥कश्चित्कृषीबलश्चोरः शिवधान्यं छलाद्हन्॥ नरकान्धान्यसंख्यातो भुनक्त्यत्रैव पश्यत॥१॥
शंभोर्द्रोहेण चोरेण धान्यहृत्शिवमंदिरात्॥ अयोमयं धान्यराशिं तप्तांगारप्रभामयम्॥२॥खादन्नल्पायुतं शूद्रः ते
ष्टूऽद्यापि चात्रैव॥कश्चिद्धुंडीरदेशेवै राजा पूजार्थमीशितुः॥३॥दशसाहस्रधान्यं वै तत्रादात्कुल नामतः॥भां
डेश्वराय नैवेद्य कल्पनार्थं नृपोत्तमः॥४॥तस्मिन्कृषीबलवरोधान्यं गोपोऽपिनामतः॥लेख्यमानं ततो राज्ञे दद्दौस
गणकेषु च॥५॥राज्ञाशिवार्थं यद्दत्तं धान्यमन्यायतोऽपितत्॥सूक्ष्मद्रोहेण पापात्मा तुषसंमेलितं तदा॥६॥मा
पयत्सशिवागारे सर्वधान्यमचूचुरत्॥दत्तंशंभोर्मयाधान्यं राजा ज्ञातः शिवार्चकाः॥७॥शिवागारं नयत्वद्यम
यिदोषो नविद्यते॥नचेतवलस्थितं धान्यं चोरमूषिकतो हृतं॥८॥भांडेष्यत्वेवसहस्रान दास्येहंतदण्वपि॥इत्यु
क्त्वासौ शिवागारं दशसाहस्रसंख्यकम्॥९॥नेतुमुद्युक्तमनसः स्वबलेतत्रैवतेऽर्चकाः॥भांडेश्वरागारमध्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धान्यागारं शिवायते ॥१०॥ चक्रुर्मासेन तत्काले समुद्रां तृणबंधिताम्॥ धान्यराशिं तदा चक्रुः खले तत्र
वचार्चकाः॥११॥ ॥ अर्चकाः ऊचुः॥ ॥ यावद्बध्येत हि धान्यानां आगारं शंकरालये॥ तावत्वं ग्रामपा-
लोऽसि संरक्ष्यं धान्यमीशितुः॥१२॥ तथेति स प्रतिज्ञाय ग्रामपालः शिवार्चकान्॥ समुद्रां धान्यराशिं तां दृष्ट्वा
तां पालयन्निशि॥१३॥ दंडहस्तोऽभवत्तस्य तद्धान्यं शंकरार्पितम्॥ एतस्मिन्नन्तरे रात्रौ धान्यपालान्कृषी
बलः॥ भेदयामास दूतैर्वै क्षेत्रद्धान्यहारिणे॥ ॥ कृषीबल उवाच॥ ॥ युष्माये नीत्र धान्यं वै राज्ञा दत्तं शि
वाय वै॥ मासमात्रं खलस्थायी भविष्यत्यत्र संख्यया॥१५॥ मया यूयं समेतास्थ धान्यपा संनुजोऽमिथः॥
156 समाहरिष्याम वयं शुकमूषिकभक्षितम्॥ कृषीबलस्य वचसा सर्वे ते ग्रामपालकाः॥१७॥ मुद्रां तृणांकितां
स्थित्वा किंचित्किंचिदचूचुरन्॥ एवं मासन्निशि तदा द्विसहस्रकलाविधि॥१८॥ शंभुधान्यमगृह्णंते
प्रातर्मुद्रां दधुस्तृणैः॥ सज्जानि तु समुद्धृत्य गोणीभारवृषैर्मितम्॥१९॥ चक्रुर्धान्यमितिं तत्र तत्रोनामभिवी
क्ष्यते॥ ग्रामपालान् चुक्रुधुस्ते क्व धान्यं मानहीनकम्॥२०॥ दद्वं तु शंभोर्नो च है राजे ब्रूमो वयं सदा॥ तथेत्येव ब्रु
वन्सर्वे न वो धान्यस्य चोरकाः॥२१॥ धान्यमुद्रां प्रपश्यंतु यथा पूर्वमवस्थिताम्॥ राजापि श्रुतवृत्तांतो दं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १० डयामासतांतदा ॥२२॥ कृषीबलकृतंतत्र दृष्ट्वा धान्यस्य चोर्यकम् ॥ तद्धनंदत्तवान्राज्ञे राजाप्याह हरिः इशा० द० उ
४८ वार्चिकान् ॥२३॥ यथागतंप्रगच्छंतु अवशिष्टं शिवस्यवै ॥ दुग्धेनतेऽप्युभौ डीरेशार्चकास्तदा ॥ ॥ ॥ अ० ३७
श्रीईश्वर उवाच ॥ ॥ राजाप्ययंचात्र कृषीवलोऽयंते ग्रामपालाः शिवधान्यहारिणः ॥ कल्पायुतंरौ
रवमध्यसंस्था भुंजंति धान्यंलयसः सुतप्तम् ॥२५॥ ॥ इति श्रीशिवरहस्ये दशमांशे ईशानाख्ये उत्तरार्धे शि
वद्रोहकथनं नामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥
चित्रगुप्तउवाच ॥ ॥ पुनस्त्वांकथांवच्मि शिवस्वर्णापहारिणाम् ॥ संतप्तायस संदंशैः सर्वांगोत्कृत्तमांसकाः
॥१॥ निर्यद्रक्तवसामेदा भक्ष्यमाणाः शिवेडजैः ॥ हाहेति क्रंदमानास्ते अविश्रांतं दिवानिशम् ॥२॥ सोरा
ष्ट्रे सोमनाथस्य वेश्माभरणकोशपः ॥ अभवत्कुलिजिन्नाम्ना शिवाकल्पकरक्षकः ॥ ३ ॥ शंभोर्वैगोलकं
पुंड्ररत्नाभरणमुज्वलम् ॥ देव्याश्च टंकपाण्यंघ्रिभूषणानि महांति वै ॥ ४ ॥ शिवागारे कोशबंध वेश्मार्गल
युतेसदा ॥ कोशपः कुलिजस्तत्र नित्यंदापयति स्वयम् ॥ ५ ॥ वसनानि महार्हाणि क्षौमकार्पासजान्यपि ॥ पू
जाकालेषु दत्वा दत्वायं शिवार्चककरात्तदा ॥ ६ ॥ ग्रहणे सोमसूर्यस्य प्रदोषे सोमवासरे ॥ अष्टम्योश्च चतुर्दश्यां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राकाकुहमुखेषु च ॥ ८ ॥ गोलकं नवरत्नाढ्यं सनागाभरणान्वितम् ॥ त्रिपुंड्रहीरतिलकं देव्याभरणमु
त्तमम् ॥ ८ ॥ ददाति प्रति गृह्णाति कोशे संस्थापयत्यपि ॥ शिवकोशाधिकारोऽयं जीर्णं नै स्वर्णकारकैः ॥ ९ ॥
सकारयति शंभोर्वै धनेन नियमात्तदा ॥ वस्त्राणि च मनोज्ञानि पेटिकायां दधात्ययं ॥ १० ॥ तस्यै कामि-
णिका वेश्या सोमेशागारनर्तकी ॥ तत्संगनित्यमुदितः कुलिजिच्छिवकोशपः ॥ ११ ॥ ॥ वारांगनोवाच ॥
कुलिजित्वं प्रसन्नश्चेत्त्वसंगफलं मम ॥ तप्तचामीकरमयीं देव्याः कंठसरावलिम् ॥ १२ ॥ शिवत्रिपुंड्रही
157 रं मे देहि नासासमुज्वलम् ॥ करोम्याभरणं विप्र मुक्ताभरणसंगतम् ॥ १३ ॥ तत्पट्टं महादेव्या वसनं मम धा
रणे ॥ तच्छ्रुत्वा नृत्यती स्वैरं सोमेशाग्रे मनोहरा ॥ १४ ॥ युवचित्तप्रमथिनी रंस्येऽहं च त्वया सह ॥ पण्यांगना
तदा प्राह कुलिजित्कामुकस्तदा ॥ १५ ॥ ॥ कुलिजिदुवाच ॥ ॥ कथं करोमि देवस्य दास्याभरणं
त्वयि ॥ जना जानंति सर्वेऽपि राजदत्तं त्रिपुंड्रकम् ॥ १६ ॥ अमूल्यहीरं फालाक्षफाले गोभावहं सदा ॥ दे
व्याः कंठसरं तप्तचामीकरमयं नवम् ॥ १७ ॥ वणिक्दत्तं कथं वेश्ये दास्याम्यहमिदं तव ॥ विश्वासेन
मयि न्यस्तं राज्ञा चात्र शिवार्चकैः ॥ १८ ॥ कथं दास्यामि शुभगे तदुपायो विचिंत्यताम् ॥ कुलिजिद्द

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

।शिवर०१०चनं श्रुत्वा स्त्री साहसवशादियम् ॥१९॥ प्राहृतं मदमत्ताक्षी तदा कुलिजितं यम ॥ ॥ वेश्या० उवाच ॥ ॥ त ईशा०द०
४९ वसंगे फलं किं मे उपायं ते वदाम्यहम ॥२०॥ स्वर्णकारः शिवागारे स्थितोऽयं त्वद्वशंवदः गतः ॥२०॥ तेनोद्घाट्य त्पाट्य अ०३८
पुंड्रस्थं हीरं खचितमीशितुः ॥ शुद्धस्फाटिकखंडं च पुंड्रे स्थापय माचिरम् ॥२१॥ तद्द्रव्येण मोहं ह्री तत्कुर्वेम
मनासकं ॥ अनेन स्वर्णकारेण नाथोऽस्मात्सत्यमुच्यते ॥२२॥ संशुद्धं पैतलमयीं देव्याः कंठसूत्रावलिम्
कृत्वानेन प्रदेहि त्वं देव्या मम सुकांचनीम् ॥२३॥ वस्त्रं पट्टमयं देव्याः वणिक्दत्तमिति स्फुटम् ॥ वदाम्यहं
जनेष्वेवमेवं मत्प्रीतये कुरु ॥२४॥ समासमानं निर्बंधाद्वेश्यायाः स्वर्णकारतः ॥ उत्पाट्य च त्रिपुंड्रस्थं
स्फाटिकं स्थाप्य तत्रैव ॥२५॥ हीरं ददौ स वेश्यायै पैतलीं कंठमालिकाम् ॥ धनं रहीरकिंचिद्दे दत्वायं स्व
र्णकारिणे ॥२६॥ तत्माहूय स संकेतं कुलिजिद्वेश्यया हृतः ॥ कामासक्तो ददौ शंभोः हीरं देव्याश्च कंठगम्
निवृत्य कंठाभरणं वेश्यायै शिवभूषणं ॥ तेन पापेन नष्टायुः शिवद्रोहेण पातकी ॥२८॥ स स्वर्णकारि
णो हस्ते व्रणो भूत्तेन वै मृतः ॥ भगंधरेण वेश्यापि मृता त्व सुरमागता ॥२९॥ कुलजित्पुत्रदारेण सहितो मृति
माप्तवान ॥२०॥ बद्धोऽयं यमभटैर्नीतो तत्पूर्वं यमांतिके ॥३०॥ यमोऽपि दृष्ट्वा शंभोर्वै द्रोहिणां च वरं तदा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वर्णकारं च वेश्यां च मामुवाच तदा यमः ॥ ३१ ॥ ॥ यम उवाच ॥ किमेनेन कृतं कर्म वेश्यया चात्र मां वद ॥ स्वर्णकारेण चाप्यत्र वद त्वं चित्रगुप्तक ॥ ३२ ॥ तदान्तकवचः श्रुत्वा तमावोच महं तदा ॥ सौराष्ट्रे सोमनाथेऽत्र कोशपः कुलिजिद्द्विजः ॥ ३३ ॥ तत्संगलालसा वेश्या स्वर्णकारोऽस्य मित्रकः ॥ उभावपि शिवद्रोहं कुर्वते स्वर्णहारिणौ ॥ ३४ ॥ रत्नापहारिणावेतौ वेश्यार्थं काममोहितौ ॥ तदा तत्सर्ववृत्तांतं कोशपस्वर्णकारयोः ॥ ३५ ॥ वेश्यायाश्च तदा प्रोक्तं मया तत्र यमाज्ञया ॥ यमाज्ञयैतौ वेश्या चाप्यत्राकल्पमवस्थिताः ॥ ३६ ॥ सतप्तक्रकचाकारविदारितशरीरकाः ॥ निर्मद्दक्रवसापारवायसापस तुंडकैः ॥ ३७ ॥ तुद्यमाना दिवा रात्रं क्रंदंति स्वर्णहारिणः ॥ ॥ ईश्वर उवाच ॥ ॥ शंभोः सुवर्णहरणानवरत्नहाराः संदीप्तवह्निपरिवर्त्तित सर्वगात्राः ॥ आकल्पमेव नरकान् परिभुंजते ते प्रोक्ताः शिवद्रुहवतां प्रवरा वराकाः ॥ ३८ ॥ ॥ इति श्री शिवरहस्ये ईशानांश्ये दशमांशे उत्तरभागे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री ईशानाय नमः ॥ ॥ ६ ॥

150

॥ चित्रगुप्त उवाच ॥ ॥ शंभोर्द्रोह परा लोपि केचिद्रात्रिचरा निशि ॥ भद्रेश्वर शिवागारे नर्मदाती

शिवरह० १० रोपुरः ॥१॥ शिवालयस्य प्राकारं रज्जुना नध्यंतें पतन् ॥ उद्दीप्य दीपिकां रात्रौ भर्गेश्वर शिवालये ॥२॥ द० अ०
९० अर्धरात्रिभवां पूजां कृत्वा जग्मुः शिवार्चकाः ॥ शिवद्वारस्थितं शूद्रं हत्वा तत्र निशाचराः ॥३॥ अ०३
तत्कवाटार्गलोद्घाटं गृहीत्वा शिवधामनी ॥ उद्दीप्य दीपिकास्तत्र आहरन् तत्र भूषणम् ॥४॥
वस्त्राणि क्षौमजातानि ताम्रभांडान्यपि ध्रुवम् ॥ शिवतैलेरथो द्वाप्य दीपान्नि शिशिवालये ॥५॥
कांस्यपैतलपात्राणि धूपदीपार्तिकान्यपि ॥ पिठराणि च स्थाल्यश्च आर्तिक्यान्यपि च ध्रुवम् ॥
निन्युरन्योऽन्यसंसक्ताः पाणिष्ठास्ते शिवद्रुहः ॥ ते गच्छंतोऽत्र विपिने गृहीत्वा शंकरं धनम् ॥७॥
वनेऽग्निना दह्यमानाः चोरास्तत्र वने मृताः ॥ तन्नीता निरये घोरे द्रोहिणस्ते निशाचराः ॥८॥ संतप्तां
गारशयना भुंजतेऽत्रैव यातनाः ॥ केचिन्नृपाश्च मनुजा विवाहे वरयोस्तदा ॥९॥ चामराणि च छत्रा
णि दधुः स्वांगे शिवद्रुहः ॥ वस्त्राण्यपहरन् कुंभोः वाद्यान्यप्यथ वादयन् ॥१०॥ शिवस्य नर्तकी
नित्यं यमस्य निशिते गृहे ॥ गंधान्यपाहरन् केचित् सुगंधीनि सुमान्यपि ॥११॥ वाहनान्यपि यानानि
शिवभोग्यानि यानि च ॥ आहरन् पापिनः केचि द्यातना नारकोत्तराः ॥१२॥ भुंजंति ताश्च शृणु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षांमंतो ममगणेश्वरो ॥ ॥चित्रगुप्त उवाच॥ ॥संतप्तायस भृंखलांकित पदा लंबं त्वधोम
स्तका उत्क्रोशंति विलंबकेश निचयास्ते संचितैः कर्मभिः ॥ पापं शर्व विनिंदनं श्रुतिपुटैः श्रोतारये=
आसते ते स्मीसत्र पुतप्तक भ्रुतिगणे भस्मोज्झितफालांगकाः ॥१३॥ संतप्तायस मुद्रया शिवमहालिंगा धला
कांश्चये तन्नेत्रेषु च सुचिकाश्च निभृतं संपूरयंते गणाः ॥ भावानां भगनेत्र पूज्यरहिताः तेषां करं छिं
दते ॥ शंभोरुत्सवयात्रयोज्झित पदा नो वंदते मस्तकैस्तेषां तैलसुधौत कोश रहितैः छिंदंति खड्गैर्गणाः ॥
॥१४॥ येनैवेद्यमहोमहेश भुजितं खादंति नो वापयः ॥ पीतं ये नरकार्णवे मलजलं खादंति ते पांति च ॥ तेषांम
159 स्तकं तप्तसुम हादंडैश्च ते खंडिताः मुंडैः षंडविदंड कांडुशाजैः विध्याधिना वर्ष्मणि ॥१६॥ येने न प्रलुठं
ति शंकर महा गोरस्नति प्रस्तुतिं नो कुर्वन्ति न वीक्ष्यंते नयनयोर्लिंगं सदा शंकरम् ॥ ये छिंदन्ति शिवालयं तट
महाकूपं च तीर्थं विभोः संपूर्यंति च तद्द्रुमं स्वभवने छिंदंति पुष्पाण्यपि ॥ गंधानप्यथ लाप्य च स्वकतनौ
संदग्ध सर्वांगकाः ॥ ते तिष्ठन्ति दिवानिशं प्ररुदतामत्र ध्वनिः श्रूयते ॥१८॥ ते कुंभिपाकमस्ति पत्र वने प
तत्रि संचाइव प्रसिद्धिलांगकरांघ्रयस्तु ॥ त्र्यक्षध्यान विहीनमानस नराः संतप्त लाक्षाक्षार सैः सिंच्यंते न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० रवकार्णवे भटगणैर्यमस्यैरुदंत्यन्वहम् ॥ संतप्ततैलसुमहाज्वलवह्निज्वाल धूमांकितांगसशिराः स्वकवङ्ग्रा-दग्ध

५१ पाके ॥ पक्वाः पुनःपुनरयो घनभारवाहः शिश्नवृषे च महदग्निकणान्वहंतः ॥ संतप्तवालुकसुभर्जि अ० ३९

तप्राष्ट्रमध्यसंस्थाः ततोऽपि शिवलिंगसमर्चयंतः ॥ २१ ॥ एकाम्रहप्यत्र वसंति मूढाः शंभोस्तथा

क्षेत्रविहीनमानसाः ॥ फला न्यथाऽदंति शिवार्चनोज्झिताः पानीयमप्यत्र पिबंति ये नराः ॥ २२ ॥ ते रेत

सः पानमिदं सुघोरं पिबंति रेतः परिपूर्णक ॥ श्रीनीलकंठेन सहान्यदेवं संपूज्य संयाति नरोऽसिपत्रम् ॥

यस्तूर्ध्वपुंड्र तिलके दधानो जपेच्च पंचाक्षररुद्रमीशम् ॥ समर्चयेद्वा नियतं विभूतिरुद्राक्षहीनो लभ

तेऽन्धकूपम् ॥ २४ ॥ शक्तोऽपि नक्तार्चनवर्जितो भवेत्प्रदोषभूतास्वथवाष्टमीषु ॥ सोमव्रते चात्र दिवा

भुजिक्रियां कुर्वंति ते चात्र हि कीटराशिम् ॥ २५ ॥ भुंजंति ये चात्र शिवद्रुहः सदा ये वा शिवागारनिरीक्ष

णोज्झिताः ॥ तदुत्सवालोकनवर्जिता ये ये शंभुयात्रास्वपि विघ्नकारिणो निघ्नंति दंडैर्गदया च रवं ढि

ताः ॥ निर्यन्महारक्तवसां च मेदः समुक्षितांगा न वसंति कल्पं तेन च्युता भूमितलं प्रपन्नाः पापा नरा रासभसू

कराः पुनः ॥ २६ ॥ भवंति ते कंटकिवृक्षसंघाः सूर्याभितप्ता हरिणेषु संस्थाः ॥ ककंकाक बकघूक व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रैरापसोऽग्रभुनकैर्विदारिताः ॥ २७ ॥ निर्यदांत्रगुदकांडजकंठा यांतिते नरकजालविचित्रम् ॥ उ
त्क्रोशकोशासिलतावगाढकंठांगका निर्भररक्तमांसाः ॥ २८ ॥ पतंतिते मुंडकबंधभूगता नृत्यत्कबं
धामवगाढमास्थिताः ॥ भूस्वर्णसद्वस्त्रसमांसमीनाः शिवस्य ये भूमिगता हरंति ॥ २९ ॥ गृणंति ये नाममम
हेश्वरस्य विष्णोश्च साम्यं प्रवदंति वाचा ॥ तेषां ललाटाद्रसनां प्रगृह्य निःसारयंत्यत्र गणास्त्वदीयाः ॥
शिवद्रुहां यत्र सुदुःसहाः सदा या यातनास्ता अपि नहि वक्तुमक्षमाः ॥ द्रष्टुं न शक्या नहि दर्शनाय योग्याः कथं पाप
160 जदर्शनेन ॥ ३१ ॥ संस्पर्शने नापि शिवद्रुहां सदा न तादृशं पापगणं भवेद्यम ॥ निरस्ताभिशस्तास्वहस्तोरु
दंडैः पुरस्तादधस्ताच्च यं ते विशस्ताः ॥ ३२ ॥ स्वतिष्ठासु तिष्ठं वरिष्ठे र्नयिष्टां महातेषु वागारिष्टा विदग्धा ॥
निरुद्धा भटैस्ते विरुद्धा शिवाचारहीनादिनाते सुबद्धाः ॥ ३३ ॥ कशापाशसंदंशतः कृत्तगात्राः शिवद्रो=
हिसंसर्गिणां चांगभंगाः ॥ सौरिसौनिकगृहांगणं बद्धपातितास्च पतिताः नरवसाः ॥ ३४ ॥ भीतिलोल
नयनाहि कृपालाः कंठवर्त्म निहितेश्च विशस्ताः ॥ मुस्तादिनास्वमरणे रवतोऽन्यादृक् तादृक् शताधि=
करवाजि शिवद्रुहस्तो ॥ ३५ ॥ ऊर्ध्वलंबितपदैरथ वृक्णाः स्वागतोत्कृतवाजिनरक्तः ॥ ब्रह्मघ्नगोघ्नाश्च सु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० रा३३ सपादां गुरोस्तु भार्याहरणात् सुवर्णात्॥३६॥ तत्संगिपापादपि घोरमेतन्न कार्यमेतत्सहसा शिवद्रुहः॥ ईशा०द०उ०
५२ तस्मान्नरै भक्तियुतैर्न कार्यः शिवद्रुहं वै मनसा न कायतः॥३७॥ न चेन्द्रियैर्वापि कदाचिदित्थं मयोक्तमे अ०३९
षां चरितं पुरातनम्॥ न कल्पकोट्यापि न निस्तारो भवेद्धि स्तारमेषां कथितो मया वाम्॥३८॥ ॥छ॥ ॥
इति श्रीशिवरहस्ये दशमांशे उत्तरभागे शिवगौरीसंवादे शिवद्रोहकथने एकोनचत्वारिंशोऽध्यायः॥३९॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईश्वरायनमः॥ ॥चित्रगुप्त उवाच॥ ॥समांसमीना
मांसादात् यमविप्रहणाद्घात्॥ घोरोऽयं वै शिवद्रोहो न कार्यः सर्वथा नरैः॥१॥ स्वर्णस्तेयसुरापानात्
स्त्रीबालवधतोऽपि च॥ घोरोऽयं वै शिवद्रोहो न कार्यः सर्वथा नरैः॥२॥ मातृगम्यादघाच्चैव स्नुषाकन्या
समागमात्॥ घोरोऽयं वै०॥३॥ तत्संगिसंगपापाच्च नवधान्यहरादघात्॥ घोरोऽयं वै०॥४॥ रत्नाप
हरणात्पापात् न्यासापहरणादपि॥ घोरोऽयं वै०॥५॥ विश्वस्तास्वस्त घाताच्च बालवत्सगवां दुहा
त्॥ घोरोऽयं वै०॥६॥ असत्यवचनात्पापात् कूटसाक्षाद्दि आगमात्॥ घोरोऽयं वै०॥७॥ गजा-
श्वगोवधात्पापाद् नडुव द्दुधपातकात्॥ घोरोऽयं वै०॥८॥ विप्रवृत्युपघाताच्च गवांवृत्युपरोधतः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घोरोऽयं वै शिवद्रोहो न कार्यः सर्वदा नरैः ॥ ९ ॥ अग्निदा गरदा श्चापि निंदकाश्चापि वै यम ॥ घोरोऽयं वै० ॥
दुःश्राद्धभोजनाच्चापि शूद्रवैश्य वधादपि ॥ घोरोऽयं वै ॥ ११ ॥ सस्यनाशकराच्चापि तडागाराम भेदकात् ॥
घोरो० ॥ १२ ॥ वृथा वृक्षच्छेदनाच्च राजगाम्याघतोऽपि च ॥ घोरोऽयं वै० ॥ १३ ॥ संकरांत्यजनाशाच्च क्षत्रियादि
विनाशनात् ॥ घोरोऽयं वै० ॥ १४ ॥ वृथाभिशाप जात्पापाद्याज्यानां च याजनात् ॥ घोरोऽयं० ॥ १५ ॥ अपेय
पानाच्च यम अभक्ष्याणां च भक्षणात् ॥ घोरोऽयं वै० ॥ १६ ॥ राजस्त्रीगमनाच्चापि राज्ञश्चैव वधात्तथा ॥
घोरोऽयं० ॥ १७ ॥ वर्णाश्रमाणां धर्माणां परित्यागोद्भवादघात् ॥ घोरो० ॥ १८ ॥ असाक्ष्य भोजनाच्चा
/6/ पि पंचयज्ञोपघाततः ॥ घोरोऽयं० ॥ १९ ॥ पितृमातृ परित्यागाद्भ्रातृतद्धनहारणात् ॥ घोरो० ॥ २० ॥ पण्यां
गनासु संभोगात्सोमविक्रियजादघात् ॥ घोरोऽयं० ॥ २१ ॥ सदा वार्धुषिकत्वाच्च तिलतंडुलविक्रया
त् ॥ घोरोऽयं० ॥ २२ ॥ त्रपुसीसगुडादीनां कंबलाजिनवाससाम् ॥ घोरोऽयं० ॥ २३ ॥ ब्रह्मस्वहरणा
च्चापि बालस्त्रीधनहारतः ॥ घोरोऽयं० ॥ २४ ॥ कन्यकानां क्रयाच्चापि भृतकाध्यापनादपि ॥ घोरोऽयं०
॥ २५ ॥ अपालितप्रजस्यैव राज्ञश्चैव तु पातकात् ॥ घोरोऽयं वै० ॥ २६ ॥ अन्यासूयाभिकरणात्पाक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० भेदाद्वयप्रदात्॥ घोरोऽयं वै०॥२७॥ तिलहोमा द्गुरुजपादन्यार्थे धनमानतः॥ घोरोऽयं वै०॥२८॥ रसानां

५३ विक्रयाच्चैव रणेभीत्यापलायनात्॥ घोरोऽयं वै०॥२९॥ यति निंदाकराद्घोरान्मर्मोद्घाटनकादघात्॥ घो- अ०४

रोऽयं वै०॥३०॥ महामार्गोपरोधाच्च दानविघ्नकरात्तथा॥ घोरोऽयं वै०॥३१॥ पर्वण्यन्यान्नभोज्याच्च शूद्रा

न्नादात्कदन्नदात्॥ घोरोऽयं वै०॥३२॥ फलपुष्पापहरणात मृतशय्याप्रतिग्रहात्॥ घोरोऽयं वै०॥३३॥ आद्यं

गोग्रहाच्चापि भ्रूणघ्नात्पांथहारणात्॥ घोरोऽयं वै०॥३४॥ धातुहारात्पात्रहारात्तथा वासोहरादपि॥ घोरो यं

वै०॥३५॥ कन्यासंदूषणाच्चापि अद्वेष्यस्त्रीविनिंदनात्॥ घोरोऽयं वै०॥३६॥ अग्नित्यागात्सुतत्यागाद्भार्या

त्यागाच्च मत्सरात्॥ घोरोऽयं वै०॥३७॥ अपूज्यपूजनाच्चापि पूज्यानां चाप्यपूजनात्॥ घोरोऽयं०॥३८॥

स्त्रीधर्मिण्यभिगम्याच्च पुंसायेमैथुनादघात्॥ घोरोऽयं वै०॥३९॥ कुमार्थं वैद्यकरणाच्छिल्पजीवाच्च

कर्षणात्॥ घोरोऽयं वै॥४०॥ आमध्याह्नहलादीनां वृषसंधारणादघम॥ घोरोऽयं वै०॥४१॥ शूद्रमन्त्रप्रद

नाच्च विद्यापुस्तकहारणात्॥४२॥ घोरो०॥४२॥ गुरुद्रोहादुपाध्यायनिंदनात्महतापम॥ घोरो०॥४३॥ भू

हराद्राष्ट्रनाशाच्च पुरग्रामविनाशनात्॥ घोरो०॥४४॥ विधवाभिगमाच्चापि वियोनौमैथुनादपि॥ घोरो०

॥४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्राभिशंकनात्पापात्सर्वेषां लंघनाद्घात॥ घोरोयं वै शिवद्रोहो न कार्यः सर्वथा नरैः॥४६॥ भृत्यानां भ्र
तिनाशाच्च वृथाकृशरभक्षणात॥ घोरोऽयं वै०॥४७॥ घृततैलापहाराच्च दध्नः क्षीरमधो हरात्॥ घोरोऽयं
वै०॥४८॥ शुष्कार्द्र पातकानां च करणाज्ज्ञानतो यम॥ घोरोऽयं वै०॥४९॥ ॥ चित्रगुप्त उवाच॥ ॥
सर्वपापादपि दुस्तारोऽत्र विहितो घोरः शिवद्रोहको यत्पापं न च शांतिमेति सहसा कल्पैश्च नल्पेष्वपि॥ तस्मा
द्द्रोहमिमं न कार्यमधुना शंभोः कदाचिन्नृभिः कृत्वा निस्तरणं कदापि न भवेत्सत्यं त्रिसत्यं यम॥५०॥
इति श्री शिवरहस्ये दशमांशे उत्तरभागे चत्वारिंशोऽध्यायः॥४०॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु॥
162 श्री ईश्वराय नमः॥ ॥ यम उवाच॥ ॥ सुनंदन गणपश्रेष्ठ चित्रगुप्तोदितां कथाम्॥ श्रुतात्व
या मया चापि शंभोर्वै द्रोहिणां तथा॥१॥ विचित्रमिदमाख्यानं त्वया ज्ञातं विशेषतः॥ लोकोपकृतये त्वा
त्र त्वया प्रश्नः कृतोऽत्र वै॥२॥ दृष्टः शिवद्रुहां पार यातनानरकेष्वयम॥ उत्तारितोऽहं यस्मात्तु भावपादां
गसंगतः॥ दुःखाधिकारपापौघसंगभंगः कृतो मम॥३॥ नाज्ञातं च त्वया किंचिद्विद्यते भुवनत्रये॥४॥
भवपादाब्जसंसक्तमानसस्त्वं गणेश्वर॥ मल्लोकवासिनः पापाः पावना भवदागमात्॥५॥ शांभवानां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१ पादपद्मरजसा सद्म पावितम् ॥ मदीयमेव भवनं भवनेऽत्र विराजितं ॥ ६ ॥ सुनंदतवसंगेन पापभंगो भव ईशानद

५४ न्मम ॥ त्वत्संवादमिषेणात्र दुष्टलेख्य विलोककः ॥ ७ ॥ तव पादांबुजद्वंद्वं लोकनेनास्य वीक्षणे ॥ क्षणाद अ०४४

क्षीणपापोऽचभवतः सर्वदानकिम् ॥ ८ ॥ अपायभयदापारनरकाणां विशेषतः ॥ प्रतिबंधकसामग्रीशं

भोः पादांबुजस्मृतिः ॥ ९ ॥ तत्कथं जायते पुंसां भूतांगसंगं विना घहूत ॥ पापांबुधेः कर्णधारस्तव संगमहो-

दयः ॥ १० ॥ पापांधकारदीपो वै शंभवानां समागमः ॥ सुधामः सर्वपुण्यानामागमः सुखसंपदाम् ॥ ११ ॥ दुर्गमो

विपदां प्राप्तौ मार्गो निगमचोदितः ॥ आगमानां च महतां तवागमनसंभवः ॥ १२ ॥ विभवैः प्राप्यते पुं-

भिः पुरुषार्थचतुष्टयम् ॥ तुष्टये शांकराणां तु यत्कृतं कर्म पावनम् ॥ १३ ॥ अर्चनं वंदनं पादसंवाहनमता

धिकम् ॥ तस्मात्त्वया दयाकार्या मयि रुष्टो न वै भवेत् ॥ १४ ॥ भवोद्भवो महादेवो बलप्रमथनो हि सः ॥ सा

वधानेन विज्ञाप्यो घृणामप्यादिता भवेत् ॥ १५ ॥ शिवधर्मं महासूक्ष्मं न जानामि पुनः पुनः ॥ नायं जा

नाति तत्वेन चित्रगुप्तोऽपि गुप्तधीः ॥ १६ ॥ पुनः पुनर्गणैः शैवैः ताडितो बोधितोऽपि च ॥ न जाना

ति स तं धर्मं तेन शंभोर्दुहां वरः ॥ १७ ॥ भविष्यामीति मनसा बिभेम्यहमतंद्रितः ॥ तेन धर्मेण शं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भोर्वै यांति पापा विमानगाः ॥१८॥ देवदुर्लभमासाद्य कैलासं दक्षिणं विभोः ॥ यांति ते जितपा
पौघ ओघाद्दुर्वहि सागराः ॥१९॥ त्रिनेत्रचित्रचारित्रं नगानामिगणेश्वर ॥ कैलासगमने शक्तिः
सुदुर्लभतरा मम ॥२०॥ कैलासमौलिवांतोऽपि दुर्लभोऽद्यत्र मादृशाम् ॥ ता(त्वा)दृशानां सदा वासो प्रसा
देन महेशितुः ॥२१॥ तस्मात्त्वया महेशस्य प्रसादकारणं विभोः ॥ अवर्ज्यवर्जबोधोऽपि न भवेद्यदि
मे सदा ॥२२॥ शंभोः प्रसादकोपाभ्यां भीतो दृग्धो भवाम्यहम् ॥ किं वा महत्पुण्यफलैः प्राप्तागाणा
63 धिपत्यताम् ॥२३॥ कर्मणा मनुजाः सर्वे देवत्वमुपयांत्यपि ॥ देवा अपि मदीच्छंति गणत्वं धूर्जटेः
सदा ॥२४॥ तन्नैव तपसा शक्यमिष्टापूर्तगणैरपि ॥ तत्फलैरपि वा स्वर्गे प्राकृतैः किं करोम्यहम् ॥
भक्तिभाजां च सुलभो दुर्लभो मादृशां सदा ॥ भक्तिप्रियो हि भगवानंबिकापतिरीश्वरः ॥२६॥ प्रा
कृतेनैव भावेन तुष्यत्येव महेश्वरः ॥ न मया योगदानौघैस्तपसा शक्यते व्रतैः ॥२७॥ कृच्छ्रैर्यमादि
नियमैः स संतुष्टो भवेत्प्रभुः ॥ स कथं मयि तुष्येत तदुपायं वदस्व मे ॥२८॥ त्वं मे माता पिता चैव सुनंद
गणपोत्तम ॥ मदीयं दयया चेतानंदमस्व महेशितुः ॥२९॥ कारवापि प्रियं नित्यं मृगशावसुपाणिनः ॥

 क्रूराधिकारोमध्यद्यमहेशेनिपातितः ॥३०॥ पापानांसंगतिवशादवशःक्रूरचेतनः ॥ किंकरोमिक 
 गच्छामिश्रेयपादयुगंतव ॥३१॥ पश्यमांचक्षुषानित्यंसौम्येनत्वंगणेश्वर ॥ ॥स्कंद उवाच ॥ 
शमनवदनवाक्यंतन्निशम्यार्थयुक्तं गुणगणसहितंयत्सुनंदोगणेशः ॥ विदितसकलभावः शं
करंतवमूचे निगमशिरसिगोप्यंभक्तिभाजांसुगम्यम् ॥३२॥ ॥इतिश्रीशिवरहस्ये ईशानाख्ये
दशमांशे उत्तरभागेयमसुनंदसंवादोनामएकचत्वारिंशोऽध्यायः ॥४१॥ ॥श्रीकाशीविश्वे
श्वरार्पणमस्तु ॥ ॥श्रीईशानायनमः ॥ ॥श्रीस्कंद उवाच ॥ ॥यमस्यवचनंश्रुत्वा
सुनंदोगणसत्तमः ॥ प्रहर्षंपरमंप्राप्ययमस्यविनयेनवै ॥१॥ शिवाश्रयमुवाचायंयमस्य(पि)कृतांजलेः
॥सुनंद उवाच॥ ॥शृणुसूर्यसुताद्यैवशिवप्रीतिकरंतव ॥२॥ सूक्ष्मंत्वयानविज्ञातंधर्ममेनंसुसू
क्ष्मकम् ॥ देव्यैशिवेनकथितंकैलासेशंकरालये ॥३॥ स्कंदेनचश्रुतंतत्रगजास्येनापितत्रैव ॥ नंदि
केशेनचमयागणमुख्यैस्तदामुदा ॥४॥ पार्वत्यैवपुरापृष्टोमहादेवोऽभ्युवाचताम् ॥ ॥देवी उवा-
च ॥ ॥देवप्रीतिकरंकिंतेप्रसादकरणंहरः ॥ यातनारहिताकेतेममत्वंकुरुशंकर ॥५॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार्वत्या वचसा तुष्टस्तामुवाच प्रसन्नधीः ॥ रहस्यं हृदि संधार्य गणान्बोधय चांतक ॥ ६ ॥ ॥
॥ श्रीशिव उवाच ॥ ॥ शृणु पर्णे प्रसादं मे क्षिप्रं येन भवेन्मम ॥ नं ते यमस्य वशगा भवंति मनु
जा भुवि ॥ ७ ॥ तान पर्णे वदाम्यद्य रहस्यं हृदि धार्यताम् ॥ अग्निरित्यादिभिर्मंत्रैः भस्मोधूलित
विग्रहाः ॥ ८ ॥ नं ते यम० ॥ त्रियायुषत्रिपुंड्राका सर्वांगेषु महेश्वरि ॥ नं ते यम० ॥ ९ ॥ रुद्राक्षांगद
मालाभिर्मुकुटोद्भासिमस्तकाः ॥ नं ते यम० ॥ १० ॥ पंचाक्षरजपासक्ता नित्यं पंचसहस्रकम् ॥
नं ते यम० ॥ ११ ॥ रुद्राध्यायजपासक्ता एकमेकदशोत्तरम् ॥ नं ते यम० ॥ १२ ॥ शिवलिंगार्चिका
164 नित्यमेकवारं त्रिवारकम् ॥ नं ते यम० ॥ १३ ॥ बिल्वार्चनार्चनपराः सहस्रशतसंख्यया ॥ नं ते य
मस्य० ॥ १४ ॥ प्रदोषे शिवलिंगार्चीः शिवालयविलोकिकाः ॥ नं ते यम० ॥ १५ ॥ सोमवारे निशि स
दा भुक्तिमुक्त्यर्चनेरताः ॥ नं ते यमस्य० ॥ १६ ॥ शिवक्षेत्रेषु नियमाद्वसंति शिवपूजकाः ॥ नं ते य
मस्य० ॥ १७ ॥ शिव शंकर सर्वेश प्रसीदेति वदंति ये ॥ न ते यमस्य० ॥ १८ ॥ शिवभक्तार्चनरताः
धनधान्यगृहांबरैः ॥ नं ते यमः ॥ १९ ॥ न विष्णुसाम्यं शंभोर्वै वदंत्यर्च्येति ये नराः ॥ नं ते यम०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० ॥२०॥ बिल्वपत्रैर्बिल्वमूले लिंगसंपूजका नराः ॥ न ते यम० ॥२१॥ अयं मे हस्त मनुना शिवलिंग इशा-स्-
९६ स्पृशंति नराः ॥ न ते यम० ॥२२॥ प्रदोषे वृषभृंगाग्रविलोकनपराश्च ये ॥ न ते यम० ॥२३॥ पश्यंति शि अ०४
वलिंगस्य पूजामन्यप्रकारितां ॥ न ते य० ॥२४॥ शिवाय गोगृहारामपुष्पारामाणि कुर्वते ॥ न ते य०॥
क्षीरं दधि घृतं क्षौद्रं सितयाभिषिंचते ॥ न ते य० ॥२५॥ नारिकेलाम्रफलं लिकुचादि रसेन वै ॥
न ते य० ॥२७॥ चंद्रचंदनकस्तूरी यक्षकर्दमलेपकाः ॥ न ते य० ॥२८॥ दीपधूपप्रदा गौरि घृतदीप
वर्तीप्रदाः ॥ न ते य० ॥२९॥ तगरागरुसाम्राणि गुग्गुलुं देवदारुदाः ॥ न ते य० ॥३०॥ गोप्रदा भूमिदाः
शंभोः वस्त्रभूषणदायकाः ॥ न ते य० ॥३१॥ सुछत्रचामरादर्शघंटाप्रदायिनः ॥ न ते य० ॥३२॥
शिवोत्सवकरा गौरि रथेन वृषभेण च ॥ न ते य० ॥३३॥ ते यत्रिकमदातारो वीणाशंखमृदंगदाः ॥३४॥
न ते य० ॥ नाट्यांगना प्रदातारो नित्यं पर्वणि वा शिवे ॥ न ते य० ॥३५॥ ग्रहणे विषुवे चैव व्यतीपाते च वैधृ
तौ ॥ न ते य० ॥३६॥ संक्रांतिषु शिवार्चातो मुक्तपापाः सदा नराः ॥ न ते य० ॥३७॥ अविमुक्ते वसंति ये
गंगास्नानपरा नराः ॥ न ते य० ॥३८॥ अंतर्गृहे स्नानवाप्यां मणिकर्ण्यां प्लुवा नराः ॥ न ते य० ॥३९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्वेशदर्शनपरा अन्नपूर्णार्चनकानराः॥ नतेयमस्यवशगा भवंतिमनुजाभुवि॥४०॥ श्रीढुंढिदंड
पाणीशभैरवार्चनकारिणः॥ नतेयमस्य०॥४१॥ वीरेश्वरार्चनपरा कृत्तिवासेशपूजकाः॥ नतेय
मस्य०॥४२॥ केदारेशत्रिनेत्रेश पूजकाये प्रदोषके॥ नतेय०॥४३॥ सोमवारेत्वमायांवै वृषभध्व
जपूजकाः॥ नतेय०॥४४॥ केदारे चकुरुक्षेत्रे रुद्रकोट्यमरेश्वरे॥ नतेय०॥४५॥ कालंजरे महा
काले श्रीशैलेत्र्यंबकेस्थिताः॥ नतेय०॥४६॥ अरुणाद्रौकालहस्त्यां वृद्धद्रोणेगोकर्णके॥ नते
य०॥४७॥ श्रीकंठेमातृरत्नाद्रौ जप्येतंजेश्वरेवशाः॥ नते०॥४८॥ पुष्पदंतेघृतेशेच श्रीप्रयाणे
165 चकुंभके॥४९॥ नते०॥ मध्यार्जुनेमंगलेच त्रिकोटेतेजनीवने॥ नतेयमस्य०॥५०॥ कुद्दालेचैवमा
पूरेघटेशेकंतुकेतथा॥ नते०॥५१॥ तालेशेश्वेतविपिने छायावरवनेतथा॥ नतेयम०॥५२॥ व
ल्मीकेलिंगदानेचमदनांतकलांबुकाः॥ नतेय०॥५३॥ रामेश्वरेचहालास्येशुचींद्रेवेदकवने॥
नतेयमस्य०॥५४॥ ॥श्रीईश्वर उवाच॥ ॥एवंयेनियमाद्वसंति गिरिजेसह्यापगानंतरातीरस्थेषु
चलिंगसद्मसुशिवंयेवीक्षका शिक्षया॥ हीनास्तेरदनैः कठोरवसनं याम्यंनपश्यंतिते॥ एवंगौरिरहस्यमे

शिवर०१० तदद्युना प्रोक्तं रहस्यं तव ॥ ५५ ॥ ॥ इति श्रीशिवरहस्ये दशमांशे उत्तरभागे द्विचत्वारिंशोऽध्यायः ॥४२॥ ईशा०र०उ०

५७ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥ ॥ श्रीगणेशायनमः ॥ ॥ गणेश उवा० अ०४२-३

च ॥ ॥ सूर्यनंदनदैव्येवं पृष्टः प्रोवाच शंकरः ॥ रहस्यं धार्यते चित्ते हृत्तापस्त्यज्यतां त्वया ॥ १ ॥ ॥ ॥

॥ यम उवाच ॥ ॥ के मद्दश्या नरा भूमौ भवंत्यपि च तद्वद ॥ यथा विरोधो न भवेच्छंकरस्य परात्मनः ॥

तान्विक्ष्य यामि नरके गणेश मयि कथ्यताम् ॥ ~~एतन्मे कौतुकं शंभो~~ ॥ गणप उवाच ॥ ॥ इममर्थमपि

प्राह देवदेवः पिनाकधृक् ॥ ॥ देवी उवाच ॥ यमेन शासनीयाः के अशास्याः मयि कथ्यताम् ॥ एतन्मे

कौतुकं शंभो त्वया गोप्यं न मां क्वचित् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु पार्वति वक्ष्यामि यमशा

स्यनराधमान् ॥ नान्यचित्ता भवात्र त्वं त्वयि गोप्यं न विद्यते ॥ ५ ॥ भस्मत्रिपुंड्ररहिताः ऊर्ध्वपुंड्रधरा

श्च ये ॥ यमशास्या भवंत्येव पतंति नरकार्णवे ॥ ६ ॥ रुद्राक्षमालाहीनांगा निंदंत्यपि च धारकान् ॥ यमा

शास्या भवं० ॥ ७ ॥ पंचाक्षरोज्झितास्तद्वद्रुद्राध्यायजपोज्झिताः ॥ यमाशास्या भवं० ॥ ८ ॥ शिवक्षेत्रान्य

देशेषु वसंत्यपि च ये नराः ॥ यमाशास्या० ॥ ९ ॥ शिवलिंगार्चनाहीना बिल्वपत्रार्चनोज्झिताः ॥ यमशा० ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुनाशिवलिंगार्चासमं कुर्वंति येनराः ॥ यमशा० ॥ ११ ॥ प्रदोषत्यागिनो ये च सोमवारे दिवा भुजः ॥
यमशा० ॥ १२ ॥ चतुर्दश्यष्टमीपूजां नक्तं ये वै न कुर्वते ॥ यमशास्याभवं त्येवपतंति नरकार्णवे ॥ १३ ॥ शि
वनाम्नान्यनामानि समबुध्या वदंति ये ॥ यमशा० ॥ १४ ॥ शिवभक्तं विनिंदंतः अन्यभक्ताश्च नारताः
यमशा० ॥ १५ ॥ शिवक्षेत्रान्यदेशेषु ये वसंति नराधमाः ॥ यमशा० ॥ १६ ॥ अविमुक्तं विनिंदंति विष्णु
क्षेत्रप्रशंसकाः ॥ यमशा० ॥ १७ ॥ शिवे शिवपुराणानां निंदका ये नराधमाः ॥ यमशा० ॥ १८ ॥ वि
ष्णुस्तुतिपरा गौरी शिवस्तुति विवर्जिताः ॥ यमशा० ॥ १९ ॥ प्रदोषे विष्णुबिंबानां लोककानामजाप
166 काः ॥ यमशा० ॥ २० ॥ शिवागारच्छिद्रदा ये च शिवतीर्थप्रपूरकाः ॥ यमशा० ॥ २१ ॥ शिवद्रुमाणां छेत्तारः
फलादा नराधमाः ॥ यमशा० ॥ २२ ॥ शिवोत्सवादिषु तथा विघ्नकर्त्तार एव वा ॥ यमशा० ॥ २३ ॥ शिवः
धान्यापहर्त्तारो भूमेर्गोवांबराण्यपि ॥ यमशा० ॥ २४ ॥ शिवनिंदाकरा गौरी शिवक्षेत्रविनिंदकाः ॥ यम
शा० ॥ २५ ॥ शिवरत्नापहर्त्तारो हेम्नः कांशस्य वै शिवे ॥ यमशा० ॥ २६ ॥ शिववाद्यापहर्त्तारः नर्त्तनोच्छेदका
रिणः ॥ यमशा० ॥ २७ ॥ शिवयात्रापराणां वै मार्गघ्ना लुंठकाश्च ये ॥ यमशा० ॥ २८ ॥ वेदनिंदापरा ये त्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० शिवक्षीरापहारिणः॥ यमशास्या भवंत्येव०॥२९॥ शिवभूम्यपहर्त्तारो गावश्चापि महेश्वरि॥ यम०॥ इश्रा०८ उ
५८ ॥३०॥ शुंभुविष्णुसमं ये तु त्वां च पश्यंति पद्मया॥ यम०॥३१॥ शिवरात्र्यन्नभोक्तारः शैवव्रतविनिं अ०५ उ
दकाः॥३२॥ बिल्वच्छेदकरा ये त्र शिवोद्यानछिदश्च ये॥ यम०॥३३॥ पंचगव्यापहर्त्तारः भेत्तारो
लिंगमस्तकम्॥ यम०॥३४॥ रथदाहकरा ये त्र छत्रध्वजहराश्च ये॥ यमशा०॥३५॥ शंखवा-
दित्रघंटानां दुंदुभीनां विनाशकाः॥ यम०॥३६॥ सुवर्णताम्ररौप्याणि निरा ये कुप्यहारिणः॥ यम०॥
॥३७॥ एवं ते कथिताः साध्वी ये त्वां प्रति दुराशयाः॥ भुंजंति नरकं घोरं प्रतिजन्मनि दुर्भगाः॥३८॥
॥ शिव उवाच॥ ॥ एवं महेशानि तवोदितो यं पथा यमस्यैव निरंतरः सदा॥ ते संभवा दुर्भगरासभोद्भ
वा भवोद्भवा च विमुखाः सदा नराः॥३९॥ ये काशीं न विशंति शांतिरहिता भ्रांतिप्रधाना नराः॥ अन्य
त्रैव वसंति तत्समकथां निंदंति भिंदंति तान्॥ नाणौ घोरे नरके यमालयभटाः छिंदंति तन्मस्तकं वांता
शं नरकं कृतांतवशगास्ते प्राप्नुवंति ध्रुवं॥ ये काशिकां तां सुकृते कराशिकां भवांबुधे निस्तरणे सुनौ
काम्॥४१॥ भूम्यां गनामौक्तिकशोभिनासिकां गाहंति नो ये त्र हि शान वापिकाम्॥ ये काश्यां निवसंति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वशांतमनसो विश्वेश्वरार्च्यानतिध्यानालिंगनवंदनादिरहिताः भस्माक्षहीनांगकाः ॥४२॥ तेतूर्णेनि
पतंति पूर्णफलतो येनान्नपूर्णार्चनाः ॥ धुंडे ईडिकरस्यपूज्यरहिता ये भैरवार्चोज्झिताः ॥४३॥ काशींना
शितपातकां दुरितदां क्लेशाहसंहारिकां दिव्यश्रीमणिकर्णिकां शिवमहाकैलासनिश्रेणिकाम् ॥
नं देऽघः श्रुतिवेणिकां शिवमहादेव्याश्च हर्षोत्सुकाम् ॥ पापध्वांतविनाशनोज्वलमहासंदीपि
कां भासकाम् ॥४४॥ तत्रत्यामललिंगलोकननतिध्यानार्च्ययात्रोज्झिताः ॥ ते सर्वेऽपि शिवद्रुहो
ऽत्र नरके संपूर्णताः पोथिताः ॥ तद्भिन्ने भुवि चांत्यमृत्युवशगाः तत्रैव चेद्भैरवः ॥ शास्ता तस्य कृशा
167 भिघातजमहद्दुःखं सहेता त्रकः ॥४५॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये स्वांशे उत्तरभागे
शिवगौरीसंवादे नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥
॥ श्रीशिवाय नमः ॥ ॥ गणेश उवाच ॥ ॥ एवं सदाशिवेनोक्तं कैलासशिखरे तदा ॥ पार्वत्यै य
मपृच्छत्सा शिवस्य हृदयंगमम् ॥१॥ तुभ्यं मयात्र कथितं गणान्बोधय सत्तम ॥ ततः स चित्रगुप्तोऽसौ स्व
गणान्पुरतस्स्थितान् ॥२॥ ॥ यम उवाच ॥ ॥ भो चित्रगुप्त गणपान्मदीयान्ख्यापयाधुना ॥ यमस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वचनात्तत्रगणनाहसचित्रकः॥ ३॥ ॥चित्रगुप्त उवाच॥ ॥मागच्छंतु भ्रमेणात्र भस्मधारिगृहान्प्रति इशा०द०उ०
मागच्छंतु भ्रमेणात्र श्रीपंचाक्षररत् दृहान्॥४॥ मागच्छंतु भ्रमेणात्र रुद्राध्यायी ग्रहान्प्रति॥ मागच्छंतु भ्रमेणा अ०४इ०
त्रलिंगार्चकगृहान्प्रति॥५॥ मा० भ्र० बिल्वांगणगृहान्प्रति॥ मा० भ्र० प्रदोषार्चकसद्मनि॥६॥ मा० भ्र०
सोमवारार्चिकक्षयम्॥ मा० भ्र० अष्टम्यार्चकसद्मनि॥७॥ मा० भ्र० चतुर्दश्यर्चकक्षयम्॥ मागच्छंतु
भ्रमेणापिक्षीरं पंचामृतप्रदान्॥ मा० भ्रमेणैव गंधकर्पूरदीपदान्॥ मानयंतु भ्रमेणात्र शिवोत्सवविलोक
कान्॥ मा॥ऽऽनयंतु शिवागारे प्रणामप्रक्रमान्नरान्॥ माऽऽनयंतु शिवागारे अंगप्रादक्षिणान्नरान्॥१०॥ दीपदान
धूपदान्नित्यं छत्र चामरदायकान्॥ सुवर्णभूमिगावोन्नदायिनो मानयंतु माम्॥११॥ वाद्यनाट्यांगनाभ
क्ष्यभोज्यादान्माऽऽनयंतु माम्॥ पुष्पस्रक्बिल्वतांबूलफलदान्माऽऽनयंतु माम्॥१२॥ रथदान् वृषधूपभोऽम
होत्सवकरान्नरान्॥ मानयंतु भ्रमेणापि दीपकान् करालये॥१३॥ घृतं मधुतिलं धान्यं तंडुलान्गुडदायि
नः॥ माऽऽनयंतु भ्रमेणापि शिवाग्रे नर्तकान्नरान्॥१४॥ वितानवस्त्रघंटानां चदानां दायिनो भटाः॥ मा
ऽऽनयंतु भ्रमेणापि शिवतीर्थप्लुतान्जनान्॥१५॥ कूपारामतटाकादि शिवपुष्पवनप्रदान्॥ मानयंतु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्रमेणापि शिवागारपान्नरान्‌ ॥१६॥ मा॥ नयंतु भ्रमेणापि सह्यजातीरसंस्थितान्‌ ॥ तद्वातपोतपूतांगा-
न्लिंगापांगान्नरोत्तमान्‌ ॥१७॥ ताम्रपर्णीतटवसान्तत्रत्यलिंगलोककान्‌ ॥मा॥न० भ्रमेणापि श्रीकं
ठेशविलोककान्‌ ॥१८॥ मा॥न० भ्र० गोकर्णेशानलोककान्‌ ॥मा॥न० भ्र० रत्नाद्रीश्वरलोक-
कान्‌ ॥१९॥ मा॥न० भ्र० मातृभूतेशलोककान्‌ ॥ मा॥न० भ्र० जपेश्वरविलोककान्‌ ॥२०॥ मा॥न०
भ्र० तंजेश्वरविलोककान्‌ ॥ ~~मा॥न० भ्र० त्रिकोटीश्वरलोककान्‌ ॥२१॥~~ मा॥न० भ्र० कुंभघोणेश्वरे-
68 क्षकान्‌ ॥२१॥ मा॥न० भ्र० मध्यार्जुनविलोककान्‌ ॥ मा॥न० भ्र० मंगलेशविलोककान्‌ ॥२२॥ मा॥न०
भ्र० त्रिकोटीश्वरलोककान्‌ ॥ मा॥न० भ्र० कुद्दालेशविलोककान्‌ ॥२३॥ मा॥न० भ्र० मयूरेशविलो-
ककान्‌ ॥ मा० भ्र० वैद्यनाथविलोककान्‌ ॥२४॥ मा॥न० भ्र० च्चेटेश्वरविलोककान्‌ ॥ मा॥न० भ्र०
श्रीकंठेश्वरविलोककान्‌ ॥२५॥ मा॥न० भ्र० श्वेतारण्येश्वरेक्षकान्‌ ॥ मा॥न० भ्रमे० हालास्येश्वरलो-
ककान्‌॥ मा॥ नयं० भ्र० श्रीकंठेशविलोककान्‌ ॥२६॥ मा॥न० भ्र० वृण्याधीशविलोककान्‌ ॥ मा० भ्र०
शुचींद्रेशविलोककान्‌ ॥२७॥ मा० पापनाशेशलोककान्‌ ॥ मा॥न० केदारेशविलोककान्‌ ॥२८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रिवर० १० माऽऽनयंतु क्षेमेणापि वनखंडेश लोककान् ॥ मा ऽऽ न० भ्र० कुरुक्षेत्रेश लोककान् ॥ २९ ॥ माऽऽनय॑ईशान० रुद्र० ॥
६० ~ भ्र० पुष्करेश्वर लोककान् ॥ माऽऽन० भ्र० रुद्रकोटीश लोककान् ॥ ३० ॥ माऽऽन० भ्र० महाकालेश ओं० ४४
लोककान् ॥ माऽऽन० भ्र० अमरेशविलोककान् ॥ ३१ ॥ माऽऽन० भ्र० सौराष्ट्रेशविलोककान् ॥ मा॥
न० भ्र० आवटेशविलोककान् ॥ ३२ ॥ माऽऽन० भ्र० श्रीशैलेशविलोककान् ॥ मा॥न० भ्र० त्र्यंबकेश्व
रलोककान् ॥ ३३ ॥ माऽऽन० भ्र० अरुणाद्रीश्वरेस्वकान् ॥ मा न० भ्र० वृद्धाद्रीशविलोककान् ॥
मा० भ्र० गोनगाग्रेशवीक्षकान् ॥ मा० भ्र० पुंडरीकेशवीक्षकान् ॥ ३५ ॥ मा० भ्र० कालहस्तीशलो
ककान् ॥ माऽऽनयंतु सदा काश्यां चान्यत्रापि भटा न्मृतान् ॥ ३६ ॥ अन्नपूर्णां च विश्वेशं दंडपाणि
रवेक्षका॥ मणिकर्ण्यां स्नानवाप्यानि त्यां तर्गृहिकारिणः ॥ ३७ ॥ तत्क्षेत्रपदविन्यासान्
मानयंतु भ्रमाद्भटाः ॥ ॥ यम उवाच ॥ काश्यां ये निवसंति संततमुमाकान्तार्चकाः शांकराः ॥
पापास्तेऽपि च भैरवाभिः भटैः संशिक्षणीया हिते ॥ ये काश्यां श्वगता मृताश्च नरके नो पातनीया
हिते ॥ तेषां भैरवया तनात्र विहिता विश्वेश्वरस्याज्ञया ॥ ३८ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भां॰ ड्रो उत्तर भागे यमभटानुशासनं नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु॥
॥श्रीईशानायनमः॥ ॥श्रीस्कंद उवाच॥ ॥यमाज्ञां ते भटाः श्रुत्वा पुनरूचुर्भटा यमम्॥ ते कृतांजलयः
सर्वे गदादंडासिपाणयः॥१॥ ॥भटा ऊचुः॥ ॥के च नेयाश्च नरके पातनीयाश्च के वद॥ त्वद्वाक्यमवधार्यात्र
समादास्यामतान्वयम्॥२॥ इत्थं गणवचः श्रुत्वा यम प्राह तदा मुने॥ शृण्वंतो वै गणेंद्रस्य नारकानयनं तदा॥३॥
॥यम उवाच॥ ॥भस्म त्रिपुंड्रहीनांगाः ऊर्ध्वपुंड्राश्च चक्रिणः॥ तान् पातयंतु नरके ध्वांतघोरेषु सादरम्॥
॥४॥ रुद्राक्षाभरणैर्हीनान् रुद्रपं चाक्षरोज्झितान्॥ तान् पातयंतु नरके॰॥५॥ रुद्रलिंगार्चनाहीनान् बिल्वपत्रार्च
१८९ नोज्झितान्॥ तान् पातयंतु नरके॰॥६॥ रुद्रक्षेत्रविहीनांग वासान्लिंगेक्षणोज्झितान्॥ तान् पातयंतु॰॥७॥ प्रदो
षसोमवारे ची अष्टमीभूतयोरपि॥ तान् पा॰॥८॥ शिवनिंदाभक्तिनिंदा तद्धुनानां च हारकान्॥ तान् पा॰॥९॥
भस्म त्रिपुंड्र रुद्राक्ष शिवनाम्नां विनिंदकान्॥ तान् पा॰॥१०॥ शिवक्षेत्र शिवागार नाशकान् तीर्थदूषकान्॥ तान्
पा॰॥११॥ धूपदीपान्नभक्ष्याणां गंधपुष्पाक्षताहरान्॥ तान् पा॰॥१२॥ छत्रचामरघंटादि घटोपहिरण्यहान्॥
तान् पा॰॥१३॥ गोभूमिवस्त्रभूषान्नहारान्क्षीररसानपि॥ तान् पा॰॥१४॥ भ्रूणहानपि शास्तांश्च शिवसद्मप्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 भेदकान्॥तान्पा०॥१५॥नर्त्तकीविधवासंगान्गोघ्नांश्चैवकृतघ्नकान॥तान्पा०॥१६॥व्रतघ्नांश्च 
 सुरापांश्च अगम्यागामिनस्तथा॥तान्पा०॥१७॥बालस्त्रीवधकर्त्तॄंश्च शिवशब्दविरोधिकान्॥ता० 
॥१८॥निंदकान्शिवमाल्यानांबालवत्सगवांदुहान॥तान्पा०॥१९॥ब्रह्मज्ञानवृत्तिनाशांश्च शिवा-
गारविरोधकान॥तान्पा०॥२०॥विष्णूत्कर्षपरान्शंभोरुत्कर्षसहनान्नरान्॥तान्पा०॥२१॥भाष्यैः
शिवपुराणानांनिंदकान्पंक्तिभेदकान्॥ता०पा०॥२२॥शिवभोज्यान्नरहितान्निकान्नानतिथेय
कान्॥तान्पा०॥२३॥शिवरात्र्यन्नभोक्तॄंश्च सोमवारदिवाभुजः॥तान्पा०॥२४॥पर्वदीनार्चनाहीना
येनस्नांतिनदीजले॥तान्पा०॥२५॥माघेकार्त्तिकवैशाखतुलामार्गशिरस्वपि॥तान्पा०॥२६॥
ताम्रपर्ण्यासह्यजायांगंगायांनर्मदांभसि॥तान्पा०॥२७॥अप्रदक्षिणकर्त्तॄंश्च प्रणामरहितान्विभोः॥
तान्पा०॥२८॥कीकटेष्वेवनिवसान्क्षेत्रत्यागान्गुरुद्रुहः॥तान्पातयंतुनरकेष्वतिघोरेषुसाद
रम्॥२९॥कन्याश्रीबालवृद्धानांधनहारान्सपापिनः॥ता०पा०॥३०॥सदावार्धुषिकांश्चैवपरा
न्नादान्शिवव्रते॥तान्पा०॥३१॥गोरसानांक्रयकरान्तंडुलक्रयणान्नरान्॥तान्पा०॥३२॥तिलहोमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यरुद्रांश्च ह्यन्यार्थे शिवपूजकान् ॥ तान्पातयंतु नरके च्छ्वीनि चोरेषु सादरम् ॥ ३३ ॥ गोभूसोपस्करागार
प्रतिग्रहपरान्द्विजान् ॥ तान्पा० ॥ ३४ ॥ पण्यन्यान्नभोक्तृंश्च क्षेत्रश्राद्धविवर्जितान् ॥ तान्पा० ॥ ३५ ॥
नित्यंप्रतिग्रहपरान्निंदकान्पिशुनान्खलान् ॥ तान्पा० ॥ ३६ ॥ नित्यंदंभपरान्स्तेनानग्निदान्गर
दान्नरान् ॥ तान् ० ॥ ३७ ॥ भार्यापुत्रपरित्यागान्नित्यंदुर्भिक्षचिंतकान् ॥ तान् ० ॥ ३८ ॥ अभक्ष्यभ
क्षणापेयानग्निनाश्रमवर्जितान् ॥ तान् ० ॥ ३९ ॥ एकादश्यन्नभोक्तृंश्च राजानश्चाप्यरक्षकान् ॥
तान् ० ॥ ४० ॥ वेश्यानर्थक्रयपरानशुश्रूषूंश्च पादजान् ॥ ता० ॥ ४१ ॥ क्षत्रियांश्च रणे भीतान्यस्त
120 शस्त्रपलायितान् ॥ तान्पा० ॥ ४२ ॥ नानाहारविहारांश्च उत्कृक्षेत्रेषु पातकान् ॥ तानपा० ॥ ४३ ॥ शि
वोत्सवशिवोद्यानयतिविप्रादिनिंदकान् ॥ तानपा० ॥ ४४ ॥ वेदवाक्यान्यथाकर्तृंस्तान्निंदास्मृतिनिंद
कान् ॥ तानपा० ॥ ४५ ॥ न्यासापहारकान्दुष्टान् शिवलिंगप्रतिग्रहान् ॥ तान्पा० ॥ ४६ ॥ अनृता
स्तेयिनः क्रूरानभिशस्तांश्च तस्करान् ॥ तान्पा० ॥ ४७ ॥ ऊर्ध्वपुंड्रेण देवेशमर्चकानरुद्रजापका
न ॥ तान्पा० ॥ ४८ ॥ चक्रांकितशिलयासार्धं शिवलिंगसमर्चकान् ॥ तान्पातयंतु नरके आनयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० तुममाज्ञया ॥४९॥ ॥स्कंद उवाच॥ ॥एवं भटांस्तानुशास्य सौरिः गणेंद्रमुख्येन समन्वित ईशा०द०उ०
६२ स्तदा ॥ सचिवगुप्तो विनयेन तं तदासं पूजयामास विभोर्गणेंद्रम् ॥५०॥ ॥इति श्री शिवरहस्ये अ०४५
ईशानाख्ये दशमांशे उत्तरभागे पंचचत्वारिंशोऽध्यायः ॥४५॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥श्री ईशानाय नमः॥ ॥श्री स्कंद उवाच॥ ॥ततः सुनंदः सानंदं यमेनेत्थं सुपूजितः॥
विश्रांतश्च प्रसन्नश्च तमाह सुकृतांजलिम् ॥१॥ ॥सुनंद उवाच॥ ॥धन्योसि त्वं सदा मान्यः सर्वेषां धर्मराडसि ॥ शिवपादाब्जभृंगोसि शिक्षकोसि शिवद्रुहान् ॥२॥ नत्वा दृशो धर्मवेत्ता सभ्याश्चेमे
सदोज्वलाः ॥ मुनयो विनयोपेता धर्माधर्मविचारकाः ॥३॥ हारकाः सर्वपापानां सूक्ष्मशास्त्रार्थनिश्चये ॥ भवल्लोकमिमं द्रष्टुमागतोस्मि शिवाज्ञया ॥४॥ दृष्टो हि नरको घोरो दुस्तरोऽयं शिवद्रुहाम्॥
उग्रोऽप्यनुग्रो भक्तेषु उग्र एव शिवद्रुहाम् ॥५॥ स्वभावतो महादेवः सहमानो दयानिधिः ॥ स्वभक्तकृतपापानि नाशयत्येव सर्वथा ॥६॥ काशीस्व प्रपीतस्य जलस्य लक्षणं यथा ॥ तथा शैवकृताघानि नाशयेदिंदुखंडधृक् ॥७॥ यथांधतमसो राशिं नाशयेत प्रभाकरः ॥ तथाशांभव २

पापानि नश्यंते तूलवह्निवत् ॥८॥ मृतस्य जीवतो वापि शिवभक्तस्य वै यम ॥ न त्वं शास्ता शिवः शास्ता तं
न पश्य भ्रमादपि ॥९॥ शिवकृत्यक्षरद्वंद्व भर्जिताखिलपातकम् ॥ न दुःखफलदं भूयाद्दुःखबीजं
यथोरखरे ॥१०॥ तदाह रहरेशान महादेव प्रसीद माम् ॥ नारकानुद्धर हरे खपुत्क्रोशद्गणपोत्तमः ॥११॥
पतत्रयातनासंस्था महापापोपपातकैः ॥ शिवशब्दश्रवणतः तेप्युच्चार्याथ दुःखिनः ॥१२॥ निस्ता
र रहिते दुःखे निरये पातिताः पुरा ॥ दिव्यदेहधराः सर्वे महार्हवसनार्हणाः ॥१३॥ विमानमास्थिताः
सर्वे शिवद्रोहिविना सदा ॥ ये चान्यपातकाक्रांताः कृतांतस्यैव पश्यतः ॥१४॥ पश्यतश्चित्रगुप्त
(7) स्य भटानां तत्र पश्यताम् ॥ व्यापाररहितास्सर्वे भटा आसन् यमस्य तु ॥१५॥ तान्प्रमोच्य यमेनाशु
सुनंदः पूजितो ययौ ॥ सुनंदं प्रांजलिः प्राह विनयेन यमस्तदा ॥१६॥ ॥यम उवाच॥ ॥शिवना
म्नः प्रभावं हि को जानाति शिवं विना ॥ त्वयेत्थं तारिताः सर्वे निर्व्यापारोऽस्मि सांप्रतम् ॥१७॥ मा
मा नाप प कृत्यं मे किं वात्रैव करोम्यहम् ॥ ततो गणेश्वरः प्राह मद्दृष्टिपथपूतकाः ॥१८॥ नारकोपि
दिवं यांतु शिवनाम्नः प्रभावतः ॥ को वेदास्य प्रभावं वै शिवनाम्नो द्रुनात्मज ॥१९॥ पुनः पुनश्चाप्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० र्णस्तेनरकः संभविष्यति॥ अविश्वासपरायांतुतवाद्यनरकालयम्॥२०॥मोत भूत्तवैवे दुःखंशिवद्रो ईशा॰द॰उ॰

६३ हांश्चशिक्षय॥ येव्यक्षविमुखापापास्तान्शिक्षय मुहुर्मुहुः॥२१॥ युगेयुगेमदीयान्नां पाल्यतांरविनं अ॰४६

दन॥स्वस्तितेंस्तुगमिष्यामित्वमत्रैववसाद्यवै॥२२॥ इत्युक्तोगणपंप्राह यमः प्रांजलिस्त्वतु॥ ॥

॥ यम उवाच॥ ॥पुनः पुनः समागत्यमां शिक्षयगणेश्वर॥ यथामेशिनभक्तानांर्चाानिष्ठाभवे

त्तथाकुरु॥२३॥दययापाल्यमाांयायंजनोत्वां शरणंगतः॥ बिमानस्थंगणेशानंप्रणम्याभ्यागतो

यमः॥२४॥ सतथेत्यनुमान्याथयमंतत्रसनंदकः॥ पश्यन्शिवद्रुहांदुःखंयातनायमकारिताः॥२५॥

विद्रूयमानहृदयः सदयस्तान् गणेश्वर॥ तेषामाक्रंदवचनमस्मान्मोचयपश्यनः॥२६॥ ॥शिव

द्रुहउवाच॥ ॥ नपक्षपातः कर्तव्यः व्यस्य पादांबुजार्चक॥ ततस्तानाह दुःखेनसुनंदोगणपुंगवः

॥२७॥चिंतयानोमुहुः सांबरवेबाणीमभ्रुणोत्तदा॥ ॥बाणिउवाच॥ ॥त्रिकोटिशिवनाम्नां

वैसमुच्चार्यशिवद्रुहः॥सोऽघंतत्कालपर्यंतं दुःखमत्रयमालये॥२८॥ पश्चात्तापविभुद्धास्तेब्रिविध्या

नाच्छिवद्रुहाम्॥ मुक्तिर्भवतुनान्यत्र उपायस्तेषुमोचने॥२९॥ ततोसुनंदस्तान्तत्रश्रावयामासतद्वचः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥सुनंद उवाच॥ ॥हा भवद्भिः शिवद्रोहः कृतो भुवि महत्तरः॥ तस्माद्यस्मिन्निति नाम्नोयोऽयं घोरो द्रोहो
यमीशितुः॥३०॥ किंचित्कालं वसेत्स्व द्यानिरये यातनाश्रितेः॥ मनसाध्यायत शिवं त्रिकोटि शिवनाम
हो॥३१॥ विश्वासेन जपः कार्यः तेन मुक्ता भविष्यथ॥ निस्तीर्णनरका यूयं पुनर्गच्छत मेदिनीं॥३२॥
स्थावरं जंगमं वापि देहं गृह्णात माचिरम्॥ यथा कथंचिन्निस्तारो भवतां संभविष्यति॥३३॥ इत्युक्त्वा
च गणश्रेष्ठो वृषभध्वजशोभिना॥ विमानेनार्क भासा कैमप्युल्लंघत सोगणः॥३४॥ रभसा ससमाया
तो महसा भासयन्दिशः॥ ततः कालेन महता नरकात्सो शिव द्रुहः॥३५॥ त्रिकोटि शिवनाम्नां ते जपध्या
172
नान्महेशितुः॥ मुक्तपापा भुवं प्राप्य जाता द्रुमलतांडजाः॥३६॥ रासभे भाश्च वृषभाः शुनकाश्च शिवा
स्तथा॥३६॥ स्कंद उवाच॥ ॥एवं सुनंदोऽथ यमप्रशास्य सं पश्यतान्वै नरकाच्छिव द्रुहः॥ उद्धा
र्य तं श्राव्य महेशनाम ययौ विमानेन मुदार्कभासा॥३७॥ ॥इति श्री शिवरहस्ये ईशानांशे उत्तरभागे
शिवगौरीसंवादे नारकोद्धारो नाम षट्चत्वारिंशोऽध्यायः॥४६॥ ॥श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥श्री ईशानाय नमः॥ ॥मुनिरुवाच॥ ॥शिवनाम प्रभावेन निस्तीर्णस्तेशिवद्रुहः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० क्व गतो ऽत्र सुनंदो ऽत्र तन्मे स्कंद वदाधुना ॥१॥ ॥स्कंद उवाच॥ ॥ततो ययौ स कैलासं दक्षिणं सगणेश्वरः ॥ भ्राजमानपताकेन विमानेनार्करोचिषा ॥२॥ रत्नमालावलंबेन वृषभध्वजशोभिना ॥ चलत्पताकानिचयचामरादर्शशोभिना ॥३॥ गणैरन्यैः परिवृतः सुनंदो नंदितांतरः ॥ शिवपादांबुजध्याननिहताशुभसंचयः ॥४॥ मेरोः समस्तं पश्यत्कैलासं सगणेश्वरः ॥ गोपुरैर्बहुसाहस्रैः रत्नस्फटिकसंभवैः ॥५॥ प्राकारैः परिघैः शुभ्रैः महाकैलाससप्रभैः ॥ भवनैः मणिसंक्लृप्तैः पूर्णचंद्रसन्निभैः ॥६॥ पद्मरागैर्हरिद्वर्णैर्महानीलमणिप्रभैः ॥ गोमेदवर्णैरपरैः पुष्परागमयैरपि ॥७॥ महामरकतागारैः सुधांशुधवलांतरैः ॥ हंसाकारैर्वृषाकारैः सिंहाकारैः मनोहरैः ॥८॥ गोपुरैर्भासुरैस्तत्र भूधराकारसौधकैः ॥ गवाक्षवलभीनिर्यत्पारावतगणायुतैः ॥९॥ शुकैर्हंसैर्मयूरैश्च चक्रवाकोपकूजितैः ॥ परिभृत्सारसारावैर्विनादितगुहामुखैः ॥१०॥ मयूरकेकाभिरवैर्दात्यूहकुलनादितैः ॥ गिरींद्रशिखराकारवारणैर्मेघसन्निभैः ॥११॥ हयारिसंघैर्विविधैः कोलदंष्ट्राक्षतभूतलैः ॥ न्यंकुसंघैश्च चमरपुच्छभारविधूननैः ॥१२॥ मृगेंद्रशब्दवित्रस्तैः लोलापांगैश्च शंबरैः ॥ संवृताधारशिखरं कैलासं दक्षिणं तदा ॥१३॥

६४

उरगेंद्रफणारत्नकांतिकांतितदिकूटैः ॥ सिद्धविद्याधरगणैः किंनरीगीतनादितैः ॥१४॥ अप्सरोगण
संगीतमृदंगध्वनिशोभितैः ॥ मेघशब्दैश्च विपुलैर्नृत्यकेकिगणारवैः ॥१५॥ देवगंधर्वसदनैः शिवागारै
र्मनोहरैः ॥ सरोवरैः स्वच्छनीरैरुत्फुल्लकमलोत्पलैः ॥१६॥ तत्केशरारुणैः पुष्पपादपोद्भूतमारुतैः ॥ सं
चरद्भिर्मणिमयवालुकापुलिनैरपि ॥१७॥ स्वच्छादर्शतलाकारशिलातलभुवस्तटैः ॥ स्वच्छाच्छशी
तलच्छायावटोरुविटपैरपि ॥१८॥ कोविदारमहाशाखाविदारितनभस्तटैः ॥ कर्णिकारैश्च पालि
173 श्चकदंबैः सर्जकैरपि ॥१९॥ लोध्रैर्वृषैश्च बकुलैर्नारिकेलैः फलानतैः ॥ रंभाम्रपनसैर्भल्लैर्वेणुभिः
ध्वनिपूरितैः ॥२०॥ दाडिमैश्चैवाशोकैश्च फुल्लबंधूककेसरैः ॥ नागपुन्नागहिंतालैस्तालैः फल
भरानतैः ॥२१॥ संदारितनभोमार्गैर्बिल्वीफलसुमावृतैः ॥ अशोकैस्तबकैर्युक्तैः कोविदारैः सुपुष्पि
तैः ॥२२॥ देवदारैश्च तगरैर्नारिंगैर्मातुलिंगकैः ॥ फलपुष्पच्छदभरैरपारैर्मधुकैरपि ॥२३॥ तत्र दक्षि
णकैलासे आलुलोके गणेश्वरः ॥ तत्रोपवनभागेषु विहरंति च शंकराः ॥२४॥ स्रग्गंधपुष्पाभर
णैर्मनोज्ञैर्धृतत्रिपुंड्राक्षहारैः समुज्वलाः ॥ प्रासादमंचेषु सुरुद्रकन्याः कराग्रवीणाध्वनिभिः सुह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१० षिताः॥२५॥शिवादिशब्दैर्मधुरैः शुकास्यगैः शृण्वंति भक्ष्यैर्मधुरैः फलादनैः॥सुधां पिबंतोऽत्र सुदिव्यगंधपु
६५ धां शुधारकाः प्रहर्षिताः रुद्रगणैः समर्चिताः॥२६॥ये धूपदाः शंकरमंदिरे भुवि दीपप्रदा गंधसुमफलअ०४७
प्रदाः॥शिवालये प्रक्रमणे नतिस्तुतिसमर्चिकालिंगशिरःसुबिल्वकैः॥२७॥प्रदोषपूजादिकराः शिवस्पृ
शो वस्त्रप्रदा छत्रसुचामरप्रदाः॥वितानघंटासुघट प्रदायकाः शंभोर्निवद्यान्नभुजोऽत्र शांकराः॥२८॥
गोभूहिरण्यांबरदा महेश्वरे विभूतिरुद्राक्षधराश्च हाराः॥शिवालये कूपसुतीर्थवापिकापुष्याढ्यसत्का
ननदापुरप्रदाः॥२९॥प्राकारसन्मंटपगोपुरादिकर्त्तारएवात्र वसंति भक्ताः॥ये शांभवं धर्ममिदं भुवि
स्थिताः कुर्वंति भक्ताः शिवसंमताये॥३०॥वसंति ते त्रैव सुदक्षिणे महत्के लोस शैलेगणपैस्समर्चिताः॥
ते भाववद्देवभोगाद्धिकं च भोगं भुंजंति तत्रैव च शिवप्रसादतः॥३१॥तान्वीक्ष्य तत्रैव तदा सुनंदो विमानगास्ते-
श्च नतोऽथ पूजितः॥तदेशपूजार्थमवातरद्गणैः विमानवर्येण समेरुमस्तकम्॥३२॥समानसे तत्र स
रोवरे गणैः पुष्पाणि संपाद्य फलानि बिल्वैः॥स्नात्वा समभ्यर्च्य घृतत्रिपुंड्रो रुद्राक्षमालः शिवलिंग
मैशम्॥३३॥धूपैश्च दीपैर्वरपंचगव्यैर्सुसेचनैर्गंधजलाभिषेकैः॥निवेद्य भक्ष्यैः सफलैर्मनोहरैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताबूलनीराजन शंखमर्दलैः ॥ सत्काहलै र्दुंदुभिनादघोषै र्जयेश शंभोपरिपाहि मामिति ॥ ३५ ॥ छ ॥ ॥
इतिश्रीशिवरहस्ये ईशानाख्येदशमांशे उत्तरभागे सुनंददक्षिण कैलासगमनं नाम सप्तचत्वारिंशो
अध्यायः ॥ ४७ ॥ ॥ श्री ॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥ ॥ श्री
स्कंद उवाच ॥ ॥ तदा तत्काहलरवं शंभोः पूजावसानके ॥ सुनंदस्य गणेंद्रस्य श्रुत्वा वै मेरुमस्त
के ॥ १ ॥ हर्षभारसमाक्रांतो ईशानोऽथ गणेश्वरैः ॥ शंकरस्यापरामूर्त्तिः शिलादज इवमलः ॥ २ ॥ धृतभस्म
त्रिपुंड्रांकोरुद्राक्षावलिशोभितः ॥ मृगबाण गदाटंक शशिधृक् धवलच्छविः ॥ ३ ॥ त्रिनेत्रो नीलकंठश्चस
125 पार्श्वे धृत चामरः ॥ शशिप्रभेण छत्रेण कांचनश्चाविदंडिना ॥ ४ ॥ शोभमानो गणेंद्रौघैः विमाने नार्करोचि
षा ॥ वृषभध्वज शोभांक चित्रघंटान्वितेनसः ॥ ५ ॥ समभ्यागात्कुबेरेण यक्षैः र्यक्षपदार्चकैः ॥ तदोत्तरा
शापतिनास्वयमीशानदिक्पतिः ॥ ६ ॥ तेनेशानेन हि पुरा देवः सख्यमकारयत् ॥ स कुबेरसखो भूत्वा
कैलासं दक्षिणं मुने ॥ ७ ॥ सुमेरुशिखरस्थं वै पालयन् शंकराज्ञया ॥ शिवधर्मकृतो भक्तान् भोगैस्त
दनुरूपकैः ॥ ८ ॥ स भोजयं स गणपैः शिवभक्तान्युगेयुगे ॥ पालितत्र संदेशानः कैलासं दक्षि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰१०णं सदा ॥९॥ तत्रागतमुपश्रुत्य सुनंदं गणपोत्तमम् ॥ मन्वान आगतं त्वां भीरं तरं गं गणेश्वरम् ॥ ईशा॰ द॰ उ
६६ अनुनंदिनमासाद्य हर्षभारेण भूयसा ॥ महसा भासमानोऽसौ कुबेरेण समं तदा ॥११॥ यक्षैर्गणेश्च अ॰ ४८ ॰ ८
रैश्चैव शिवभक्तैर्महात्मभिः ॥ शिवधर्मप्रभावेन यैवै तत्र समागताः ॥१२॥ भूतलात्तैर्गणाकारैः भो
गभाग्य धुरंधुरैः ॥ गंगाधरार्चकैः शांत विमानैर्ह्युज्ज्वलप्रभैः ॥१३॥ ते वेतरुर्विमानाग्रैः सुमेरुशि
खरे तदा ॥ पूजयंतं महेशस्य लिंगं तत्र सुनन्दकम् ॥१४॥ सुमेरुशिखराद्भूतबिल्वमूले स्थितं तदा ॥
धृतभस्मत्रिपुंड्रांकं रुद्राक्षस्रगलंकृतम् ॥१५॥ चंद्रखंडोत्तमांगं तं चंद्रचूडार्चकं तदा ॥ गणैश्चैव वृ
तं तत्र सुनंदं नंदिनोपमम् ॥१६॥ पद्भ्यां तौ ययतुस्तत्र ईशानोऽथ कुबेरकः ॥ अभ्यर्णमागतौ दृष्ट्वा सुनंदो
गणपोत्तमः ॥१७॥ तूर्णमुत्थाय मानंदमालिलिंगे च तौ तदा ॥ भुजाभ्यामथ पीनाभ्यामीशानं यक्षना
यकम् ॥१८॥ सिंहासने पूर्वे विन्यस्वैः स्वैः परिवृतौ गणैः ॥ मुदेशान सुनंदौ च कुबेरेण तदा मुने ॥
ऊचुस्ते कुशलप्रश्नं स्नेहभारपुरःसरम् ॥ तमुवाचांजलिं कृत्वा ईशानो यक्षराडपि ॥२०॥ ॥ईशा
न उवाच ॥ ॥सुनंद नंदितहृदा त्वत्समागमनोत्सुकः ॥ शिवोऽयं संगमो भाति चावयोः सुखदायकः ॥
॥२१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवभक्तांगसंगोऽयं पापभंगाय जायते॥ मुक्त्यंगनायाः संगोऽयं त्वदपांगावलोकनम्॥२२॥ अद्यैवा
यं महामेरुः धन्यो मान्यो गिरिव्रजे॥ यथा गुरुत्वे हिमवान् पार्वत्या गिरिराड् बभौ॥२३॥ यथा गिरीश
वसति र्महाकैलास उत्तमः॥ तव पादांबुजस्पर्शात् शंकरांघ्रिसमागमात्॥२४॥ धन्योऽयं मेरु
रीशाननिवासो मम दक्षिणः॥ कैलासः शिवभक्तानां निवासाय शिवेन हि॥२५॥ तेषां भोगप्रदा
नाय संस्थितोऽस्मि शिवाज्ञया॥ भवदागमने हेतुं न काहमुपलक्षये॥२६॥ महाकैलासमौलौ तेनि
वासः शंकराग्रतः॥ तवाप्यागमने हेतुं न तर्केरुपलक्षये॥२७॥ कुबेरो यक्षराडत्र सखायं मम पार्श्व
गः॥ महेशेन कृतं सख्यमुत्तराशापतिस्त्वयम्॥२८॥ अहं चेशानदिग्भागे शिवभक्तार्चकः सरा॥
निवसामि सदा शैले मेरौ सर्वसुरालये॥२९॥ अयं दक्षिणकैलासः सुमेरुशिखराश्रयः॥ शिवभक्ता
हि भुवि ये शिवधर्मं प्रकुर्वते॥३०॥ तेषामत्रैव वसतिः कृता वै शंभुना पुरा॥ युगे युगे गणेंद्रेश शि
वभक्ता प्रपूजया॥३१॥ तेषां भोगप्रदानेन पावनोऽहं सदैव हि॥ भवदागमनेनापि महाशंभवपू
जया॥३२॥ धन्योऽस्म्यनुगृहीतोऽस्मि महाशांभवसंगतः॥ महेश दर्शने यावत्तावत्त्वद्दर्शनान्मम॥३३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शैवर०१० प्रीतिरुत्पादिता चानेन जानेन सुकृतं मया ॥ किं किं कृतं पुण्यजालं मया तव समागमः ॥३४॥ चिराय खं ईशा० ६-७
९७ त्वमे पूर्णो पिचलिमममनोरथः ॥ यथा शैवांगसंगात्म आनंदांबुधि वीचयः ॥३५॥ उद्धोलाः सहसायां अ० ४-८
तितथाम न्मानसांबुधिः ॥ तवसंदर्शनापार तरंगाकुलमुन्नतः ॥३६॥ भवत्येवमहादेवकृपयामम
सांप्रतम् ॥ तवदृष्टिपथं प्राप्य पीरपूर्णमनोरथः ॥३७॥ भवभक्ता चनफलं सफलं जातमद्यमे ॥
सुनंद तवसानंददर्शनेसफलं मम ॥३८॥ उत्फुल्लकमलाकारलोचनत्रितयं सदा ॥ भवान्महादे
वगिरौ महाकैलासमौलिगः ॥३९॥ सर्वदा संस्थितः पुत्रौ दूरगोहि सदा विभो ॥ अभ्यर्णगः सेवको
हि से यथा प्रीतिदो भवेत ॥४०॥ तथा त्वयि महेशस्य प्रीतिर्द्दृढतरी भवेत ॥ अंतरंगगणेंद्रोऽसि नंदिकेशस
मोह्यसि ॥ त्वद्दयापात्रभूतोऽस्मि पात्यतामत्रमाचिरम् ॥ पश्यत्वमत्र कैलासे पूजिताः शिवशास
नात ॥४२॥ भस्मरुद्राक्षपूतांगा रुद्रपंचाक्षरादराः ॥ शिवलिंगार्चकाः शैवाः शिवोत्कर्षार्थवा
दिनः ॥४३॥ सदा शैवपुराणानां श्रोतारः सर्वदा भुवि ॥ बिल्वैः पुष्पैः सदा लिंगं बाणस्फाटिकरत्न
जे ॥४४॥ हैमे रौप्ये च कांश्ये वै पैत्तले सिकतामृदि ॥ कृत्वा लिंगानि भुवि ये पूज्य चाचमयार्चिताः ॥४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवसंतिसदापूताःप्यत्राराध्यमहेश्वरम्॥कल्पकोट्यावसंत्येतेकैलासमयदक्षिणे॥४६॥एते
प्रदोषनिरताःसायंशिवपदार्चकाः॥सोमवारेशिवस्तायैरेतैःसंपूजितोभुवि॥४७॥अष्टम्यांपूज
यित्वेशंचतुर्दश्यांनिशिप्रभुम्॥संपूज्यबिल्वकुसुमैर्धूपदीपैर्निवेदनैः॥४८॥पूजयित्वावसं
त्यत्रभक्ताभोगसमृद्धिनः॥धूपदादीपदाएतेपुष्पभक्ष्यान्नदायकाः॥४९॥छत्रध्वजपताकादि
घंटादर्शप्रदायिनः॥पंचामृतप्रदायेतेपंचगव्यप्रदायिनः॥५०॥शिवसद्मकराएतेप्राकारंगोपुरंवि
भोः॥लिंगप्रतिष्ठाकर्त्तारःअष्टबंधविधायिनः॥५१॥प्राकारकारकाएतेमंटपादिकराःशिवे॥शि
176 वोत्सवकराएतेपुष्पमालाप्रदाःपरे॥५२॥रथोत्सवादिकर्त्तारोवाहनादिकरास्तथा॥शिवपुष्प
वनानांचकर्त्तारःसमुपूजिताः॥५३॥नारिकेलमधूकानांतथेक्षुवनकारिणः॥लिकुचाम्रा
दिपनसवनादिकारणाद्विभोः॥५४॥शिवभक्तार्चकाएतेगोगृहांबरधान्यकैः॥शिवायगोप्रदा
तारोवस्त्रभूमिप्रदास्तथा॥५५॥वितानछत्रदातारोरत्नभूषणहेमदाः॥गंधदाःक्षीरदधिदाः
घृतक्षौद्रसिताप्रदाः॥५६॥तौर्यत्रिककराएतेनृत्यनारीप्रदायकाः॥शंखदुंदुभिदातारोवीणामृदं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

55

शिवर॰१०लदायकाः ॥५७॥ शिवालयेकांस्यघटाघटदार्द्धूदाशिवे ॥ दीपमालाप्रदातारः घृताक्ताः शि॰ द॰ अ॰
६८ कार्त्तिकेशिवे ॥५८॥ साम्राणिगुग्गुलादानात्तगरागरुदायकाः ॥ पाटलेशिरचंद्राक्तसुशी अ॰४८
तलजलप्रदाः ॥५९॥ ग्रीष्मेगलंतिदातारः शिवलिंगस्यमूर्धनि ॥ ध्वजदातारएवात्र पताका
वृषभांतिकाः ॥६०॥ नव धान्याक्षताः शंभोः प्रदातारोऽत्र आसते ॥ नवरत्नप्रदातारोहेमबि
ल्वप्रदायकाः ॥६१॥ सुवर्णकमलौघादिमालादातारएवते ॥ नीलोत्पलाब्जबिल्वानां मालादा
तार एवते ॥६२॥ चंद्रकस्तूरिदातारोतांबूलादिप्रदायकाः ॥ए लालवंगजातीनां फलपत्रप्रदा
यकाः ॥६३॥ गोशृंगशंखदातारो शिवलिंगाभिषेचने ॥ हंसकुंदेन्दुसंकाशचामरादिप्रदायकाः ॥
ग्रहणेपर्वकालेषु पूजाकाराः सदाशिवे ॥ उद्वर्ततैलपिष्टानां दातारोऽत्र शिवस्यवै ॥६५॥ शिव
स्तुतिपरा एते शिवलिंगाग्रनर्तनाः ॥ शिवप्रदक्षिणपदासोमसूत्रांगलोलकाः ॥६६॥ नत्वानत्वाशि
वागारे प्रदक्षिणपरानराः ॥ सहस्रनामतः शंभोः बिल्वपत्रसुमार्चकाः ॥६७॥ एवंसर्वेऽत्रभूलोके
शिवधर्मकरानराः ॥ त्यक्त्वादेहं विमानेन यांति मरुद्गणपूजिताः ॥६८॥ दिव्यदेहाः दिव्यगंध॰

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुष्पाभरणवाससः ॥ हेमरत्नांगभूषाभिः भूषिता मधुरस्वरैः ॥ ६९ ॥ नृत्यंत्यप्सरसो नित्यं चा
मरैरभिज्ञैर्वीजिताः ॥ वर्षत्सु पुष्पसारेषु नादभेरीगणेषु च ॥ ७० ॥ शंखेषु ध्मायमानेषु यांति दक्षि
णमुत्तमम् ॥ कैलासं शंभुना पूर्वं निर्मितं विश्वकर्मतः ॥ ७१ ॥ शिवभक्तनिवासार्थं मद्गणैरभि
पूजिताः ॥ वसंति ते तु तत्र भोगाढ्या मया शंभोरथाज्ञया ॥ ७२ ॥ समर्चिताः सुभोगाढ्याः पश्य त्वं
गणपुंगव ॥ ॥ ईशान उवाच ॥ एते भक्ततमा महेश्वरदयापात्रास्त्रिनेत्रप्रिया रुद्राक्षाभरणा
स्त्रिपुंड्रविलसत्फाला महेशार्चकाः ॥ नक्ताशा भुवि सोमवासरचतुर्दश्यष्टमीषु ध्रुवं मस्ते दोष
१२२ केरे प्रदोषसमये बिल्वार्चकाः शंकराः ॥ ७३ ॥ एतेऽत्रैव वसंति भोगविभवैः भाग्यं गभोगोऽर्च्ये
काः ॥ एते शंकरसद्मनि त्रिभुवनाधीशस्य लिंगार्चने ध्यानेक्षा विहितप्रणामरचना प्रादक्षि
णाकारिणः ॥ सायं पुण्यतमप्रदोषसमये प्रातश्च मध्याह्नके तन्नैवेद्यभुजो वसंति नियतास्त
तीर्थपानादराः दारा हारविहारके हर हरेत्युक्तोशकाः शंकरम् ॥ मामेव प्रथमं वदंति भुवि ते ते
नात्र पूज्या गणेः ॥ ७५ ॥ भस्मत्रिपुंड्रपरिमंडितफालदेशा रुद्राक्षमालाचरहारकोटराः ॥ गंगा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शि०र०१० धराश्चंद्रकलाललामा॥ वसंतितान्यवस्थगणेंद्रसतमा॥ पंचाक्षरीजपपरानियमात्रिकालं रुद्रार्थवाई शा०द०उ०

६९ दमहिमाविद्जापिनोऽत्र॥७६॥ भस्मांगकाः श्रुतिशिरःप्रणवप्रधानाः॥ शिवार्चकाश्चान्यसु॥ अ०४८

चीनोज्झिताः॥ स्वप्नेऽपि शंकर शिवेति वदंति ये ते॥ नान्यं मनो ध्यायति धामेषाम्॥७७॥ संधुक्षिताघ

च निचया विषमाक्षलिंगं॥ संपूजकास्त्रिदलकोमलबिल्वपत्रैः॥ एतेऽविमुक्तनिवसा शशिधामजूट

पूतो द्रवा प्लुतिनिरस्तसमस्तपापाः॥७८॥ विश्वेश्वराद्यकरुणावरुणालयाढ्य॥ तारंगसंघवलितामि

लिताः शिवांगम्॥ एतेऽन्नपूर्णापदपूजनतत्परा वै॥ श्रीढुंढिदंडकरभैरवमाधवधाम वार्चम्॥ कुर्वंति ते

शिव महेशसुयात्रयेवं॥ कालं नयंति च वदंति महेशनाम॥ एते कृदारमौलौ शशिधरमहसो धारके

क्षास्तुतिर्भिः॥ नीतस्तौर्दिवसोऽत्र तन्निवसति त्यक्तांगसौवैसदा॥ एते कामदवैद्यनाथमग

जाकांतसुगंगांभसा॥ भारं स्कंधगतं वहंति नियतं सिंचंति तन्मस्तके॥ माघे प्रयागाप्लुतिधूत

पापाः सुमित्रजावारिणि हंसाम॥ जप्येश्वरस्याशिवसत्यमहेश धाम॥ प्रादक्षिणान्निशिभु

जः शिवलोकभाजः॥ ८१॥ मालूरमूलशिवपूजनसक्तचित्ताः त्यक्ताघशैलनिचयाभुचपा:

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रसंस्थाः॥ ब्रह्मांडभांडस्थिततीर्थषंडान्यायांति सर्वाणि वृषस्य चांडम्॥ नरः कराभ्यांस्पृश
ते विषाणयोर्मध्यप्रदोषेष्वभिवीक्षितेशम्॥ ८२॥ तीर्थाप्लुतानामपुत्रायुतानां फलं प्रपद्येव
शिवप्रसादभाक्॥ श्रीशैले पिच त्र्यंबके भुवि नराः गोदाप्लुतांगा गुरौ॥ सिंहस्ते वरतौल्लि भास्करयुते
मायूरके सह्यजा॥ ८३॥ वारिण्याप्लुतविग्रहाः शिवशिवावीक्षाच संशिक्षकाः॥ माघ्यामप्यविशेषतो हरिगते
देवेज्यकुंभेश्वरागौरपुण्यसरोवराप्लुतशरीरा वै शिवेक्षा नराः॥ ८४॥ तिष्येविशिष्य शिवदर्शन धूतपापा मध्या
र्जुनेशपरिवीक्षणतोऽपि पुण्ये॥ स्नानात्कवेरजनितारमणीयवारिण्याद्याप्लुता नरवरा निवसंति चात्र॥ ८५॥
178 एतेऽत्रताम्राजलपूतगात्रा मार्गप्रदेशवसतो किलमार्गशीर्षे॥ हालास्यं वपुविपिनेश्वर पापनाशसंदर्शनाच्छु
नराः चिपराश्च शुचींद्रे॥ ८६॥ रामेश्वरे शिवधनुर्भवजाब्धिकोटि संस्नानतो शिवमहेश्वर वीक्षणोऽत्र॥ वल्मीक
वेदविपिनेकमलाक्ष - - - - - - - - तृशिखरेश्वर दर्शकाये॥ ८७॥ श्वेतादवीशघटजेश्वर दक्षकेशतांड
वं भुवि विलोकिन एवचार्द्रोम्॥ पुण्यारुणाद्रि शिखर स्मृति धूतपापादीपावलोकनकृता हि वसंति चात्र॥ ८८॥
वृद्धाद्रिगोनगनिवाससुकृत्तिवासपादार्चिकाः सुनियता ममतादिहीनाः॥ श्रीकालहस्तिमुखरीजलपूतगात्राः सुत्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ममान्यपदवीमदवीयसीं ते ॥ संप्राप्नुवंति शिवरात्रिदिने महेशहस्तीशदेवी पदपद्मसुपूजकाये ॥ श्रीकंठगो ईशा.द.उ.
७० कर्णविलोकिनोऽन्न तूर्णंप्रसादं समवाप्यपूर्णम् ॥ १० ॥ पूर्णेति निंद्रालसलोलनेत्रामंत्रेष्वथात्रेव हिपुण्य अ०४८
भाजः ॥ शिवाग्नुयेतेपरिपूजिताःसदा मुदे महेशाप्यसुभक्तवर्याः ॥ ११ ॥ आर्यातथाचार्य धुरंधरामयासंपद्मय
कैलासनगेविलासम् ॥ किमत्र चित्रं करवाणि वाण्यासंयोज्य मां पाहि पुनीहि भक्तम् ॥ १२ ॥ त्वद्दृष्टिकारुण्य
सुपूर्णवर्षेणमामिद्य तृप्तं कुरुवे सुनंदाद्यवाच्यं महेशायतथा शिवायै स्वभक्तपूजां विहितां मयात्र ॥ १३ ॥
इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे ईशानसुनंदसंवादेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥
॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ ईशानव
चनं श्रुत्वा संवीक्ष्य च शिवाब्जिकान् ॥ संतुष्टहृदयो भूत्वा तमुवाच गणेश्वरः ॥ ॥ सुनंद उवाच ॥ ॥ ई
शान त्वं हि धन्योसि सदाशिवपदार्चकः ॥ १ ॥ शिवार्चनात्वयाप्राप्तं सारूप्यं परमीशितुः ॥ २ ॥ त्रिनेत्रोनी
लकंठश्च बालेंदुकृतशेखरः ॥ शिवाज्ञया वसन्नत्र कैलासे दक्षिणे गणैः ॥ ३ ॥ शिवधर्मकृदर्च्यीतः
त्वयि प्रीतो भवेच्छिवः ॥ नेतसमो लोकपालः शिवाज्ञापरिपालकः ॥ ४ ॥ तव कैलासमौलिस्थाः सर्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एते शिवार्चिकाः ॥ त्वया संपूजिता भोगान्भुंजंतेऽत्र शिवाज्ञया ॥ ५ ॥ शिवाय देवदेवाय शिवायै वेदयाम्यहम् ॥
स्कंदाय नंदिकेशाय विघ्नेशायाथ चंडिने ॥ ६ ॥ त्वया संपूजिताः प्रीताः निवसंतीति सादरम् ॥ तव दक्षि
णकैलासे शिवावासे मनोहरे ॥ ७ ॥ कृत्तिवासपदद्वंद्वे निवसंत्येव ते सदा ॥ चारुचंद्रावतंसास्ते त्वयात्रै
व समर्चिताः ॥ ८ ॥ उदारास्ते महोदारा ह्याराएव हि सादराः ॥ तेषामत्र विहारो हि कैलासे दक्षिणे तव ॥ ९ ॥
सर्वभाग्ययुताः सर्वे सौभाग्यपतिपूजया ॥ तव भाग्यस्य नांतोऽस्ति शिवसंपूजनादथ ॥ १० ॥ अत्रत्या ये
जनाः सर्वे शिवधर्मकृतोऽत्र ते ॥ शिवसारूप्यमापन्नाः संपन्नाः शिवपूजया ॥ ११ ॥ पंचाक्षरेण चाप्यत्र रु
179 द्रसूक्तजपेन वै ॥ मेरुमस्तककैलासदक्षिणे बिल्वमूलके ॥ १२ ॥ पूजयंति सदाकालमीशानं भुवनेश्व
रम् ॥ तस्मात्त्वं संवसन्नत्र शिवधर्मपरः सदा ॥ १३ ॥ समागतांश्च देहांते पूजयस्व युगे युगे ॥ महाकैलास
सद्मनं मदनांतकरप्रियम् ॥ १४ ॥ गच्छाम्यहं मुदेशान शिवसेवार्थमेव हि ॥ विलंबनात्ते रकानां स्वामिनः को
प आविशेत् ॥ १५ ॥ न तथा भगणानां च शंभुः सहमानः सेरवा ॥ स्वभक्तेषु न च क्रोधं करिष्यति सदा मुदा ॥
गमिष्यामि शिवागारं त्वयानुज्ञात एव हि ॥ इत्युक्तोऽथ सुनंदन ईशानोऽथ तदा मुदा ॥ १६ ॥ स तस्य करमालं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१० व्यस्वगृहं प्रापय त्तदा॥ यक्षराजेन सहितः स्नात्वा मानसवारिणि॥१८॥ सुनंदेन गणेंद्रेण गणेशैः यक्षपुंगवैः॥ ईशा० द० उ०
७१ भस्म धृत्वा त्रिपुंड्रांकाः शिवलिंगार्चका भवन्॥१९॥ बिल्वैः पुष्पैर्धूपदीपैर्नैवेद्यैर्भक्ष्यभोज्यकैः॥ नि अ० ४९॥
विचित्रैश्च बुभुजुः मुदेशान गणेश्वरौ॥ २०॥ यक्षराजेन सहितः यक्षैर्गणवरैः सह॥ तांबूलैर्भूषणैर्वस्त्रैरीशा
नः पूजयद्गणम्॥२१॥ गंधैर्मनोहरैस्तत्र रुद्राणी नृत्तदर्शनैः॥ ऊचतुस्तं गणपं यक्षेशानौ तदा मुदा॥२२॥
॥यक्षेशानौ ऊचतुः॥ ॥ पाहि त्वं गणपः श्रेष्ठ विज्ञाप्यो वां स्थितौ सदा॥ शिवभक्त्यार्चनपरौ यक्षेश
शानगे स्थितौ॥२३॥ सौम्येन चक्षुषा पश्य पुनर्नस्तु समागमः॥ ओमित्युक्त्वा थसानंदं यक्षेशेशानपूजि
तः॥२४॥ महाकैलासनिलयं सेवितुं प्रययौ तदा॥ दूरतः शिखरं दृष्ट्वा विमानादवरुह्य च॥२५॥ महाकै
लासमौलिर्वै प्रणामम करोत्तदा॥ ततो पश्यद्गणश्रेष्ठो नंदिकेशपुरोगमान्॥२६॥ प्रणम्य नंदिकेशा
नमन्यानालिंग्य तत्र वै॥ सेवावसरमासाद्य नंदिना सहितो ययौ॥२७॥ दृष्ट्वा तत्र महादेव्या संस्थि
तं वरदासने॥ प्रवालमंटपे दिव्ये मयागजमुखेन च॥२८॥ पार्श्वतो वीजितसितचामरद्वयशोभितम्
॥ धूपदीपैश्च वितते सर्वाभरणभूषितम्॥२९॥ त्रिपुंड्रविलसत्फालं शशिगंगाधरं हरम्॥ त्रिनेत्रं नी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लकंठं च मंदस्मितमुदीक्ष्य सः ॥ ३० ॥ प्रणाममकरोत्तत्र गणेंद्रोऽथ सुनंदकः ॥ तमाह प्रणतं सांबो वत्सोत्ति-
ष्ठेति सादरम् ॥ ३१ ॥ ॥ ईश्वर उवाच ॥ ॥ चिरायसे किमाश्चर्यं त्वया दृष्टं वदस्व मे ॥ तदा हरमुखां-
भोजा च्छ्रुत्वा वाक्यं स्तुवन् जगौ ॥ ३२ ॥ ॥ सुनंद उवाच ॥ ॥ प्रसीद प्रसीद प्रभो चंद्रमौले प्रसीद प्रसी-
द प्रभो दीनबन्धो ॥ प्रसीद प्रसीद प्रभो विश्वमूर्ते प्रसीद प्रसीद प्रभो पुण्यमूर्ते ॥ ३३ ॥ अंभोजजातवरनोद्गत
घोषतोषपोषाविशेषपरिभूषिताशेषकाय ॥ पोषार्धकाय भगवन् ---- रशेषमेतत् ॥ भक्षीभूतवि-
180 षप्रचोषदयया संशोषिता नं गमामीषत्कार्यं जगत्त्रयस्थितिभवत्पूषेंदुसन्मील प्रभो ॥ जय प्रमथनाथ मे
विलसद्युद्यदिंदुप्रभा विराजितकपर्द कत्रिस्रोभाल्य काशगवस ॥ प्रपंचरचनेक्षणे तवविनोदहेतुस्थलम् ॥
भुवस्थलमथो गतो यमसुराजधानीमपि ॥ ३४ ॥ विलोक्य चत्रि वद्दुहां विविधयातनासंभ्रमं शिवस्मरण
तोऽतिविलानरखलनतमानहं पावये ॥ शिवद्रुहस्ते नरकेष्वधाहिताः यमेन नित्यं स्वकशाभिताडिताः ॥ त्वद्भक्ति-
भाजोऽत्र जनाः समाहिता ईशान मुख्यैर्गणपैः समर्चिताः ॥ न यमं न यमांतिकं विभो नियमाद्धेतव नाममात्र-
जाप्यात् ॥ इति संततमंतकांतकद्रुहाम् श्रृणोमीश सदेव शब्दभारम् ॥ ३५ ॥ हे लालीहातवयं यमदिशि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कलये कालकालानलाक्ष ॥ ज्वालाकीलितनारकौघनिलये कोलाहलः श्रूयते ॥ शूलाग्रैर्विनिकोल
७२ दंष्ट्रनिवहै र्यम्यैस्तुलायोऽग्रकैः ॥ शृंगैः पार्दलाभिघातकुटिलं तन्नारकैरुज्वलम् ॥ ३८ ॥ न पक्षपातं अ०४९
कुरुते यमोऽसौ शिवद्रुहां नारकिदंडधारणे ॥ त्वद्भक्तवर्या अपि दक्षिणेऽत्र वसंति ईशानसमर्चिता मुदा ॥ ३९ ॥
॥ श्रीस्कंद उवाच ॥ ॥ सुनंदमानंदवचो निशम्य शम्पाकमौलिः शिवयातुतोष ॥ तदामयाश्रावि च
रित्रमेषां शिवद्रुहां वै शिवधर्मिणामपि ॥ ४० ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये दशमांशे उत्तरभागे
सुनंददर्शनं नाम एकोनपंचाशोऽध्यायः ॥ ४९ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीअन्न
पूर्णागंगार्पणमस्तु ॥ ॥ श्रीशंकराय नमः ॥ ॥ श्रीकालभैरवाय नमः ॥ ॥ मंगलानि भवंतु ॥

॥ श्री ॥ ॥ छ ॥

॥ इति श्रीशिवरहस्ये दशमांशे उत्तरार्धः समाप्तः ॥ छ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्री॥ ❀ ❀

॥श्रीशिवरहस्ये दशमांशे उत्तरार्धः संपूर्णः ॥ ६ ॥

॥इति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥अथशिवरहस्यएकादशांशप्रारंभः॥

182

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ पंक्ति४- शौनक उवाच ॥ जैगीषव्यस्तारकारिं किमपुच्छत् किं कथानकं ॥ तन्नो वद महाभाग सूत पौराणिकोत्तम ॥ ३ ॥

शिवरह० ११ श्रीगणेशायनमः॥ ॥श्रीसारदायैनमः॥ ॥श्रीशिवायगुरवेनमः॥ ॥श्रीगौरीशंकराभ्यांनमः॥ ॥अथशिवरहस्यएकादशांश महा० ए ११
१ प्रारंभः॥ ॥श्रीशिव॥ ॥विघ्नाद्रिभंगकुलिशाकृतिचारुशुंडादंडाग्रधारितरदंद्विरदेंद्रवक्त्रं॥वर्णांतरालसितराजितचामरौघसं
वीजनप्रसृतदानकरंनमामि॥१॥ ॥सूतउवाच॥ ॥शृणुशौनकभूयोपिसंवादंपरमंशुभं॥जैगीषव्यस्यचमुनेः तारकारेः
शुभास्पदं॥सद्भिरेभिर्मुनिभिः विप्रशांभवैः शंभुसत्कथां॥२॥ त्वमतीवशिवेभक्तः शिवलिंगार्चनप्रियः॥ भवभक्तोसिनितरां भस्मरुद्रा
क्षभूषण॥त्वद्वाक्पंकजनिष्पंदिमकरंदोपमाः कथाः॥४॥सद्भिरेभिर्मुनिभिः सूतमच्चित्तभ्रमरोधुना॥पातुमिच्छतिनिःशंकं कृतां
तद्धरसत्कथां॥५॥ ॥सूतउवाच॥धन्या यूयंसदामान्या मुनयःशांभवोत्तमाः॥वदामिभवतां भूयोरहस्यंशैवमुत्तमं॥६॥
दशधर्मार्थकथनं श्रुत्वा, पृच्छतिषण्मुखं॥जैगीषव्यःपुरायोगी शिवभक्तोजितेंद्रियः॥७॥प्रणम्याहलदास्कंदं प्रांजलिर्विन
यान्वितः॥ ॥जैगीषव्यउवाच॥ ॥नमोब्रह्मण्यपतयेसुब्रह्मण्यायतेनमः॥पंचास्यामलपाथोजमित्ररूपायतेनमः॥८॥
अपर्णाहृदयानंदसंदोहायामलात्मने॥ क्रूरतारकसंहार शक्तिहस्तायतेनमः॥९॥ प्रणवार्थमहासार प्रवणायाखिलात्मने॥द्विज
राजकलामौलि पादपंकज चेतसे॥१०॥देवसेनापतेतुभ्यं वल्लीपतयेनमः॥ केकीकुक्कुटवाहाय कुमारायनमोनमः॥११॥गजा
ननानुजायाथ सर्वप्रंचात्मनेनमः॥शैवानंदरहस्याब्धि सोमधाम्नेनमोनमः॥१२॥ त्वत्तो वेदांतसारार्थो दशमांशः श्रुतोमया॥भस्मरु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्राक्षमहिमा तथा पंचाक्षरस्य च ॥ रुद्रस्य महिमा चैव शिवलिंगार्चने विधिः ॥ शिवधर्मस्य महिमा शिवनाम्नः फलं स्मृतः
॥ १४ ॥ शिवभक्तस्य महिमा भक्तलक्षणमेव च ॥ शिवद्रोहवतां पुंसां दुःखानि विविधानि च ॥ १५ ॥ श्रुतो हि विस्तरेणैव गणेशः
सुरगणैर्मया ॥ पुनश्च श्रोतुमिच्छामि शंभोश्चान्यत्कथानकं ॥ १६ ॥ यद्यप्यन्यत्सुगोप्यं स्याद्वदैवमम शंकर ॥ ॥
सूत उवाच ॥ ॥ स चेत्थं मुनिना पृष्टः तुष्टः सेनापतिस्तदा ॥ जैगीषव्यमुखांभोजं वीक्ष्य तान्गणपान्सुरान् ॥ षड्वक्त्रनेत्र
183 भ्रमरैः प्रपिबन्निव संभ्रमात् ॥ तत्स्तुत्या चैव संतुष्टः चंद्रोदय इवांबुधिः ॥ १८ ॥ प्रावर्धत महासेनः पात्रं वीक्ष्यातुलप्रभं ॥
जैगीषव्यं मुनिं शांतं जितषड्वैरिविक्रमं ॥ सस्मार देव्यै यत्प्रोक्तं महेशेन दयालुना ॥ कैलासे लास्यसदने मदनांतकेऽरहि ॥ २० ॥
तदा शिवरहस्येऽस्मिन् पूजाविधिविनिर्णयं ॥ उवाच वीक्ष्य प्रसभं त्र्यक्षपादांबुजाश्रयः ॥ २१ ॥ तद्धो वदामि सरसं संवादं श्रवणाद्भु
तं ॥ कुमारस्य मुनेस्तस्य भवद्भ्यो ब्राह्मणोत्तमाः ॥ २२ ॥ सुब्रह्मण्य उवाच ॥ ॥ शृणुष्व शांभवश्रेष्ठ रहस्यं श्रुतिसंमितं ॥ पुरा कैला
सशिखरे सुखासीनं महेश्वरं ॥ २३ ॥ रत्नसिंहासने दिव्ये वैडूर्ये मंडपोत्तमे ॥ सायंतनाभ्रपल्ली प्रभाधिक्ये विराजिते ॥ २४ ॥ शोभ
न्यस्तंभकुंभाग्रवृषभाराजिते मुने ॥ धूपदीपादिवितते गणवृंदविराजिते ॥ २५ ॥ रम्यपुष्पवनापारगंधमेदुरदिङ्मुखे ॥ विता
नप्रच्छदपटपाटितांतरसुंदरे ॥ २६ ॥ चंपकाशोकपुन्नागसौगंधिकसुमावृते ॥ प्रोत्फुल्लकेतकोद्दाममल्लीपंकजगंधिते ॥ २७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११
ई वेकुञ
२

नंदिभृंगिमहाकालचंडभैरवसेविते॥ मयाद्विरदवक्रेणपार्श्वतःपरिसेविते॥२८॥ पप्रच्छपार्वतीकांतंनितांतंशांतविग्रहं॥ कृतांतह महा०ए०
रमाशास्यंवेदांतार्थैकगोचरं॥२९॥ प्रणम्यप्रांजलिर्देवी भक्तं वक्त्रं मुदेक्षत॥ उत्पलाभकटाक्षेणसरसाननपंकजा॥३०॥ सर्वद्रष्टप्र अ०१
वणोदारजगच्चक्रप्रवर्तकः॥ इंगितज्ञस्तदाप्राहदेवीमानंदनिर्भरां॥३१॥ सरसेनकटाक्षेण कृपामूर्तिर्महेश्वरः॥ ॥ईश्वरउवा
च॥ ॥काविवक्षास्तितेसुभ्रुनिःशंकंमेवदाग्रतः॥३२॥ त्वंमेशक्तिःपरादेवि त्वयाहंशक्तिमान्शिवे॥ त्वत्तेजसाजगद्व्याप्तंसदेवा
सुरमानुषं॥३३॥ रहस्यंवाप्रकाशंवावदामिप्रमुदेत्वयि॥ त्वंमेशरीराधिकृता वदमे त्वद्धृदिस्थितं॥३४॥ ॥कुमारउवाच॥ ॥
इतिशंभोर्वचःश्रुत्वागिरिजाहर्षनिर्भरा॥ समुद्यदश्रुपुलकाप्राहस्मारारिमीश्वरं॥३५॥ ॥गिरिजोवाच॥ ॥देवदेवमहादे
वशरणागतवत्सल॥ स्वानंदराशिवाराशेकृपाराशेमहेश्वर॥३६॥ शिवार्चनविधानंमेकालतिथ्यर्क्षकेतव॥ लिंगेभिषेक
संभारःफलपंचामृतेःकृतः॥३७॥ पुष्पधूपादिदानेचदीपनैवेद्यकल्पनैः॥ धातुपात्रेतारतम्यंअर्घ्यतांबूलकल्पनं॥३८॥
तत्फलेतारतम्यंचवदमेकरुणार्णव॥ ॥सूतउवाच॥ ॥इत्यपर्णावचःश्रुत्वा संपूर्णहृदयःशिवः॥ प्राहप्रमोदभरितःदृष्ट्वा
तामद्रिकन्यकां॥३९॥ महादेवोमहानंदःपरानंदमहोदधिः॥ ॥ईश्वरउवाच॥ ॥अयेसुगिरिकन्यकेतवसरोजराजाननं॥ वि
लोक्यमुदमादितःप्रभृतिपारसांगतः॥४०॥ अनंतमहिमास्पदंशिवरहस्यरत्नाकरं सुगोप्यमपितद्ददे शिवगणेषुतुष्टिप्रदं॥ प्रका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुह्यमिदमेव ते मम हृदि प्रकृष्टं चिरं प्रतुष्टिदमिदं शिवे विहितसर्वधर्मैरपि॥ नयागशतकोटिभिः विविधदानकोट्यापि च॥ तुरंग
गजगोगणैर्द्विजवरेषु दत्तैर्न किं सुमंत्रशतजाप्यतोप्यखिलभूमिदानाधिकं॥४३॥ विमुक्तिदमिदं प्रिये मम सदैव लिंगार्चनं॥ भक्तो
मेयदि तुंगलिंगविहितानंगांगसंगोज्झितो गंगातुंगतरंगचंचलमनस्तापांतरंगच्युतः॥ भूयाद्भावुकभक्तिभावहृदयो भावो भवे
प्यध्रुवे लिंगार्चासु निर्बंगा मुक्तहृदयो व्यक्तां समुक्तिं गतः॥४५॥ ॥इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे प्रथमोध्यायः॥१॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवाय नमः॥ ॥श्रीपार्वत्युवाच॥ ॥देवदेव महादेव वामदेव सनातन॥ विश्वरूप वि
184 रूपाक्ष सर्वेश्वर महेश्वर॥१॥ सुखोपायमतो ब्रूहि शिवधर्मं सनातनं॥ विमुक्तिदं विरूपाक्ष सर्वेषां भक्तिवर्धनं॥२॥ तव प्रियकरं शंभो ध
र्मसर्वस्वमुत्तमं॥ सुगोप्यमपि मे ब्रूहि शिव शंकर सर्वग॥३॥ भ्रांतस्य घोरसंसारे जन्ममृत्युजरार्तिदे॥ जरायुजांडजस्वेदभूमिजातेषु जंतुषु॥
॥४॥ चराचरेषु जातस्य सुखदुःखाभिमानिनः॥ पुरुषस्य भवे भक्तिः कदाचिज्जायते विभो॥५॥ तव प्रसादसंपन्नो यदा जंतुर्भविष्यति॥ तदेव
लभते भक्तिं ततो मुक्तिं च विंदति॥६॥ कीटो वापि पतंगो वा सुरो वापि नरोपि वा॥ ब्राह्मणो वांत्यजो वापि तव भक्त्या विमुच्यते॥७॥ सर्वेषां मुक्तिदं
धर्मं वद मे करुणाकर॥ ॥सुब्रह्मण्य उवाच॥ ॥एवं देव्या तदा पृष्टो भगवान्परमेश्वरः॥ कैलासनिलयो योगी सर्वज्ञः सर्वभावनः॥८॥ पा
र्वत्यै प्राह देवेशः सुखोपायं महोदयं॥ परमं सर्वधर्माणां शिवधर्मं महामुने॥९॥ श्रूयतामभिधास्यामि गणैः सुरगणैर्मुने॥ शिवेन कथितं देव्यै देवी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ २

मामाहसादरं॥१०॥तद्वक्षामि सुविस्तारं शिवप्रियकरं मुने॥शिवधर्मं शिवप्रीतिकरणं कारणं नृणां॥११॥सर्वेषां प्राणिनां विप्र संसाराब्धेस्तु तारकं॥ मह०९० अ०२
अज्ञानार्णवमग्नानां सर्वेषां प्राणिनामयं॥१२॥संसारोदधिमग्नानां जन्ममृत्युजरावतां॥शिवधर्मोडुपः श्रीमानुत्तारक उदाहृतः॥१३॥स्वर्गकामप्रदाध
र्मा यज्ञाद्याः सकला अपि॥महादानादयो धर्माः अन्नगोभूमिपूर्वकाः॥१४॥व्रतकृच्छ्रादिचरणा आश्रमश्रमदायकाः॥इष्टापूर्तादयः सर्वे सौख्यपातांतसुंदराः॥
॥१५॥बह्वायासप्रदा विप्र नैव मुक्तिप्रदायकाः॥शिवधर्मोऽत्र विहितः शिवेनैव दयालुना॥१६॥अज्ञानज्ञानिनां तुल्यो भुक्तिमुक्तिप्रदायकः॥साक्षात्त्र्यक्षप्रीतिकरा
मोक्षज्ञानैकसाधनाः॥१७॥शिवधर्माः शिवप्रोक्ताः शिवायै ते शिवाय च॥तद्वक्ष्यामि मुनिश्रेष्ठ संवादं शिवयोर्वरं॥१८॥ ॥श्रीशिव उवाच॥ ॥शृणु
शैलसुते भद्रं सुखोपायं महोदयं॥संसारे क्लिश्यतां नृणां मया चोत्तारकः कृतः॥शिवधर्मो विशिष्टोऽत्र शिपिविष्टपदाश्रयः॥संसेव्यो यं परो धर्मः शिवाख्यो
ऽयं शिवार्थिभिः॥२०॥ये सेवंति परं धर्मं ते रुद्रा नात्र संशयः॥ग्रामे वा यदि वारण्ये जले वापि स्थलेऽपि वा॥२१॥क्षेत्रे वा नगरे वापि कीटके वा जनावृते॥यत्र वा वि
द्यते लिंगं सर्वतीर्थानि तत्र वै॥२२॥यत्र वा रमते चित्तं तत्रैव शिवमर्चयेत्॥एककालं द्विकालं वा त्रिकालं नित्यमेव वा॥२३॥येऽर्चयंति महादेवं विज्ञेयास्ते
गणाः शिवे॥कीर्तयिष्यंति मामीशे सकृद्दध्याथु ये नराः॥२४॥सर्वपापैर्विमुच्यंते कोटिजन्मकृतैरपि॥ये पूजयंति लिंगं मे त्रिकालं बिल्वपल्लवैः॥
॥२५॥ये पश्यंति सकृद्दृष्टि शिवलिंगं ममाश्रयं॥भूभागसंचरा रुद्राः ते कृतार्था न संशयः॥२६॥प्रातः संगवमध्याह्ने प्रदोषे वापि शंकरं॥ये पश्यंत्यर्चयं
तो वा त एव गणपुंगवाः॥२७॥अस्मिन्कैलाससदने वस्तुं योग्या भवंति हि॥यः क्षणं वा मुहूर्तं वा शिवं मां यो विचिंतयेत्॥२८॥सर्वोऽपि दिवसो वंध्यो भव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्येवगिरीशं द्विजे॥ दुर्लभं प्राप्य मानुष्यं ये र्चयंति सदाशिवं॥२९॥ तेषां हि सफलं जन्म भस्मरुद्राक्षधारिणां॥ शिवभक्तिपरा ये तु शिव
प्रणतमस्तकाः॥३०॥ शिवलोके क्षणादेवि विक्षीणाघा भवंति ते॥ शिवपूजाकरकराः शिवालयगतांघ्रयः॥३१॥ शिवार्पितलस
त्घ्राणाः नैवेद्यास्वादजिह्वकाः॥ शिवध्यानैकहृदयाः न ते दुःखस्य भाजनं॥३२॥ तेषां हि सफलं जन्म कृतार्थाः शांभवोत्तमाः॥ भ
वनानि मनोज्ञानि मंचाश्चाभरणं स्त्रियः॥३३॥ धनं चा दिष्ट पर्यंतं मम पूजाविधेः फलं॥ तुरंगवरमातंग गोमहिष्यादिकोटयः॥३४॥
तडागारिवरवृक्षाश्च नित्यं संनिहिताः शिवे॥ ये वांछंति महाभोगं राज्यं च त्रिदशालयं॥३५॥ ब्रह्मत्वं वाथ विष्णुत्वमिंद्रत्वं चापि पा
वेति॥ ते र्चयंति सदाकालं ममैव चरणांबुजं॥३६॥ सौभाग्यं कांतिमद्रूपं शौर्यं त्यागप्रभावता॥ यशश्च जगति ख्यातिः शिवमर्च्च
105 यतो भवेत्॥३७॥ देवासुरेषु मुनिषु यद्यदुत्कृष्टमीश्वरि॥ तत्सर्वं मत्प्रसादेन लब्धमीशे शिवार्चनात्॥३८॥ ममैव पूजया विष्णुः
पालये जगतीत्रयं॥ ममैव पूजया ब्रह्मा जगत्सर्वं करोत्यपि॥३९॥ ममैव पूजया रुद्रो अंते संहरते जगत्॥ ममैव पूजया शक्रः पालयत्य
मरावतीं॥४०॥ ममैव पूजया देवा दिक्पाला वरुणार्यमाः॥ वसवो द्वादशादित्या मरुत्त अश्विनावपि॥४१॥ रुद्रा एकादश गणा वायवो
ग्रहनायकाः॥ मनवो मुनयः सिद्धाः गंधर्वा गरुडाः खगाः॥४२॥ यक्षाः किंपुरुषा नागा नृपा ये कालसंभवाः॥ युगे युगे प्रजा यास्ताः सर्वे म
त्पूजया वराः॥४३॥ भांत्येव भानवः सर्वे वांति वाताः सदाशिवे॥ वर्षंति मेघाः सततं पांति दिक्पतयो जगत्॥४४॥ ज्योतींष्यपि प्रकाशं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ तेनगानागाश्चभूधराः॥शेषोऽप्यशेषशिरसा भुवंधत्तेशिवार्चनात्॥४५॥स्वांशुभिः पोषयत्येव सोमोप्योषधिमंडलं॥नद्यः समुद्राश्च महा० ए०
४ शिवेनोद्वेलाः संवहंत्यपि॥४६॥किंशिवेबहुनोक्तेन सर्वं मत्पूजयास्थिरं॥चरंवाप्यचरंवाद्य जगच्चक्रं प्रवर्तते॥४७॥नारुद्रः संस्मरेद्रुद्रं अ०२
नारुद्रोरुद्रमर्चयेत्॥नारुद्रः कीर्तयेत्रुद्रं नारुद्रोरुद्रमाप्नुयात्॥४८॥संपर्कात्कौतुकाल्लोभात् भयाद्वापिचसंस्मरेत्॥कीर्तयेदर्चये
द्योमांसमेप्रियतरोगणाः॥४९॥शिवधर्मस्यसारोयं शिवभक्तिस्सुनिश्चला॥साचाष्टांगमयैवोक्ताकार्यानित्यंविशेषतः॥५०॥मद्भक्त
जनवात्सल्यं पूजायाश्चानुमोदनं॥स्वयमभ्यर्चनंभक्त्या ममार्थेचांगचेष्टनं॥५१॥मत्कथाश्रवणेभक्तिःस्वरनेत्रेषुविक्रिया॥ममानु
स्मरणंनित्यंयश्चमांचोपजीवति॥५२॥भक्तिरष्टविधाह्येषायस्मिन्म्लेच्छेऽपिवर्तते॥सशांभवोमुनिश्रेष्ठः सयाति[यतिः]सचपंडि
तः॥नमेप्रियश्चतुर्वेदीसत्रयाज्यपिशंकरि॥ब्राह्मणोवांत्यजोवापिमद्भक्तः श्वपचोवरः॥५४॥तस्मैततो ···· ग्राह्यं सहिपूज्यो
यथाह्यहं॥पत्रंपुष्पंफलंतोयं योमेभक्त्याप्रयच्छति॥तस्याहंनप्रणश्यामिसचमेनप्रणश्यति॥नार्चयेद्यःसदात्मस्थं यो मां
समयमास्थितः॥५६॥समांपर्वतदुर्गेषु मार्गमाणोनपश्यति॥योमांसर्वगतंपश्येत्सर्वंचमयिपश्यति॥५७॥तस्याहंनित्यमात्मस्थः
सचनित्यंमयिस्थितः॥सुदुर्लभाशिवेभक्तिः दुर्लभंचशिवार्चनं॥५८॥सुदुर्लभंशिवेदानंशिवमोह[होम]श्चदुर्लभः॥सुदुर्लभंशिवज्ञानंत
दभ्यासोतिदुर्लभः॥५९॥सुदुर्लभतरंज्ञेयंजपध्यानंशिवात्मकं॥अत्यंतदुर्लभंदेविशिवलिंगेशिवार्चनं॥६०॥सुदुर्लभातुतद्भक्तिः त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्भ्यासोऽतिदुर्लभः॥ सुदुर्लभमिदं ज्ञात्वा शिवभक्तिं समाश्रयेत्॥६१॥ ताभक्तेषां जयस्तेषां यशस्तेषां पदे पदे॥ येशिवं शरणं प्रा
प्ताः शिवार्चनपरायणाः॥६२॥ येषां दिवा च रात्रौ च नित्यं च शिवतास्मृतिः॥ नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयं॥६३॥ जिह्वाग्रे
वर्त्तते यस्य सफलं तस्य जीवितं॥ यदंगं भस्मसंयुक्तं त्रिपुंड्रललिताननं॥६४॥ रुद्राक्षमालाभरणं चंद्रचूडालयं शिवे॥ जातेनास्मद्दुहा
येन भगवान्समर्चितः॥६५॥ सचिरं संचरत्यस्मिन्संसारे दुःखसागरे॥ दुर्लभं प्राप्य मानुष्यं न मूको वधिरो भवेत्॥६६॥ यदि सर्वगता
सिद्धिः विप्रत्वं च नरेषु च॥ इहामुत्र सुखप्राप्त्यै शिवे भक्तिं समाश्रयेत्॥६७॥ दुर्लभा दुर्लभा देवि मम भक्तिः सुदुर्लभा॥ भुक्तिदा मोक्ष
दात्री च पशुपाशनिकृंतनी॥६८॥ ॥ईश्वर उवाच॥ ॥ये कालकालललनेन नयंति कालं शीलेन फाललयनार्चनतस्त्रिकालं॥ धन्या
१८६ स्त एव जगतीतलचारिरुद्रा विद्राविताघनिचयाः शुचयो भवानि॥६९॥ क्षणं क्षीणाघौघः कलयति कृतांतांतकमुमे निरातंकं शांतो
भवभयजतांतो मुहुरहो॥ तनुः शेषे शोषो भवति विपुले चायुषि रयो विशेषो नो भाग्ये प्रशिथिलगतो क्षोणिवलये॥७०॥ वैराग्यभाग्य
रहितस्य भवोरुदुःखं संजानतो जनिविनाशनलोकजालं॥ आलोकयन्नघकुलानलशीलनेनं आरोग्यभाग्यरहिताः प्रचलंत्यभाग्याः
॥७१॥ ॥इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे द्वितीयोध्यायः॥२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहा
देवाय नमः॥ ॥श्रीपार्वत्युवाच॥ ॥लिंगार्चनविधिं पुण्यं श्रोतुमिच्छामि शंकर॥ त्वत्प्रसादादशेषेण भगवन् चन्द्रशेखर॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ यत्पुण्यं स्थापिते लिंगे कृते यच्च शिवालये॥ मृद्दाविष्टकपाषाणासुधाभिः परिकल्पिते॥२॥ लिंगबेर प्रतिष्ठायां चरस्थावर पूज महा० ए०
५ ने॥ संमार्जनेन यत्पुण्यं यत्पुण्यमुपलेपने॥३॥ नीराजनौषधीबीजस्नानमंगलवादनैः॥ वाहनोत्सवदीपानां प्रदाने वा किं यत्फ अ०२
लं॥४॥ यत्पुण्यमर्घ्यदानेन तोयस्नानेन यद्भवेत्॥ क्षीरस्नानेन यत्पुण्यं खंडदध्ना महेश्वर॥५॥ घृतस्नानेन यत्पुण्यं शर्कराभि
र्महेश्वर॥ मधुस्नानेन यत्पुण्यं तथा पुंड्रेक्षुसारतः॥६॥ पंचगव्यवरस्नाने तैलाभ्यंगेन यद्भवेत्॥ गंधचंदनतोयैश्च कर्पूरागरु
मिश्रितैः॥ नारिकेलेक्षुजंबीरमोचाम्रवरफानसैः॥ तत्तद्रसवरैः शंभोप्यभिषेके फलं च किं॥८॥ स्वर्णरत्नादितोयैश्च पुष्पमि
श्रांबुभिः शिव॥ कर्पूरागरुतोयैश्च वस्त्रपूतैश्च वारिभिः॥९॥ सहस्रधाराकलशैः शतधाराघटैस्तथा॥ सहस्रशतशंखानां स्न
पनैः पुण्यवारिभिः॥१०॥ नदीनदसमुद्राणां वापीकूपोद्भवैर्जलैः॥ गवांशृंगोदकस्नाने कुशोदकविशोधने॥ यवगोधूमपिष्टानां
लेपनस्नपने च किं॥ विलेपनैश्च गंधाद्यैर्विलिप्तेन च यद्भवेत्॥१२॥ सुवर्णरौप्यताम्रादिकांस्यपैत्तलमार्तिकैः॥ दारवाश्ममयैः पा
त्रैः तथा पर्णपुटैरपि॥१३॥ पात्रकल्पनतो वापि किं फलं स्यान्महेश्वर॥ श्रीखंडागरुकस्तूरीमिश्रगंधविलेपने॥१४॥ यक्षकर्दमजा
तेन फलं स्याच्छिवपूजने॥ हेमकार्पासकौशेयवस्त्रदाने च यत्फलं॥१५॥ घृततैलवराणां च कर्पूरवरदीपतः॥ फलं किं यन्महादेव
धूपेषु परमेश्वर॥१६॥ सांम्राणिगुग्गुलकृते बिल्वत्वक्परिकल्पिते॥ पंचवर्णकपिष्टैश्च रंगवल्या च किं फलं॥१७॥ किं फलं स्याच्छि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदत्तेवद शंकरसर्वग॥मुक्तपुष्पार्चनेयच्च मालाभिः लिंगपूरणे॥१८॥पुष्पमंटपिकायाश्च पुष्पमालावलंबने॥तथापुष्पविशेषे च
ग्राम्यारण्योद्भवेषु च॥१९॥किंफलंश्रीमहादेवबिल्वैरभ्यर्चने कृते॥नवरत्नादिपुष्पेषु स्वर्णरौप्यसुमेषु च॥२०॥नवधान्यमहापूजाफलं
किं वा महेश्वर॥अन्नाभिषेके यत्पुण्यं अविच्छिन्नांबुधारया॥२१॥अभिषेके कियत्पुण्यं फलं किं वा महेश्वर॥उद्वर्तनांतरस्नाने कोष्णे
न च सुवारिणा॥२२॥नानारत्नादिमालानां प्रदाने च महाफलं॥रत्नगोलकदाने वा स्वर्णरौप्यविनिर्मिते॥२३॥सहस्रव्रातदीपानां दर्शने च कि
यत्फलं॥यवगोधूमशाल्यान्नभक्ष्य भोज्यप्रदानतः॥२४॥शाकापूपादिदाने च फलं कं दनिवेदने॥छत्रदाने महादेव चामराणां प्रदानतः॥
॥२५॥तालवृंतमयूराच्छपक्षतोतविनिर्मिते॥चित्रध्वजपताकानां दर्पणानां च दर्शने॥२६॥तांबूलदाने यत्पुण्यं वादित्राणां प्रदान
187 तः॥घंटावादित्रशंखानां काहलानां च वादने॥२७॥वेणुवीणामृदंगानां दुंदुभीनां रवेषु च॥स्त्रीणां संगीतनाट्ये न कृते न च फलं कि
यत्॥२८॥रथोत्सवादिवरपोनगरांतपरिभ्रमैः॥कियत्फलं महादेव महोक्षवहदानतः॥२९॥वितानदाने यत्पुण्यं बलिहोमक्रिया
सु किं॥गवाश्वभृत्यनागानां भूमिदाने महेश्वरे॥३०॥ग्रामखेटपुराणां च देशदाने च यत्फलं॥नीलोत्पलसहस्राणां मालादाने फलं
च किं॥३१॥स्वयंमाल्योपहारेण पुंसां पुण्यं च यद्भवेत्॥तत्मालनापहारेण पुण्यापुण्यं च यद्भवेत्॥३२॥प्रातःकालार्चने किं वा मध्या
ह्ने वा फलं कियत्॥सायंतने प्रदोषे वा निशीथे वा महेश्वर॥३३॥भूतासु सोमवारेषु अष्टमीषु च पर्वसु॥शिवरात्र्यां महादेव पूजया किं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ फलंभवेत् ॥३६॥ तिथिनक्षत्रपूजायामासिमास्यर्चनेचकिं ॥ मासिमासिचपूजासुद्रव्येलिंगेषुकिंफलं ॥३५॥ प्रदक्षिणानम महा० ए०
६ स्कारेस्तुतौवाचकियद्भवेत् ॥ शिवक्षेत्रेनदीतीरे गोष्ठेवावनपर्वते ॥ बिल्वमूलेषुपूजायांकियत्फलमुदीरितम् ॥ घृतकंबलपू अ० ३
जाभिःपवित्रारोपणेशिवे ॥३७॥ श्रावणेकार्तिकेवापिपूजयाकिंफलंभवेत् ॥ धनुर्मास्युषसिप्रीत्यापूजयाकिंफलंभवेत्
॥३८॥ ग्रहणेसोमसूर्याणांविषुवायनयोरपि ॥ संक्रांतौचव्यतीपातेमहापूजाप्रकल्पने ॥३९॥ स्नानाभ्यंगेकिंफलंस्याद्वद
मेकरुणाकर ॥ शिवारामकराणांचपुष्पार्थंशिवपूजने ॥४०॥ किंबिल्ववनकर्तॄणांवापिकूपक्रियासुच ॥ शिवालयेविशे
षेणशिवक्षेत्रेषुवापथि ॥४१॥ छायावृक्षाग्रहाराणांकरणेशांभवेषुच ॥ वेदानांपठनेवापिब्रह्मचारिषुपोषणे ॥४२॥ य
तीनामन्नपानादिमठोपकरणानिच ॥ नमस्कारेतथातेषांप्रत्युत्थानाभिवादने ॥४३॥ भिक्षांप्रतिश्रयंवस्त्रंदत्वाथशिवयो
गिषु ॥ सर्ववर्णेशांभवेषुदत्वान्नंलभतेफलं ॥४४॥ शिवप्रीत्यर्थमेवेहमखानांकरणेचकिं ॥ शिवभक्तार्चनेकिंस्यात्फलंमे
वदशंकर ॥४५॥ तत्सर्वंकृपयापुण्यंसुसूक्ष्ममपितद्वद ॥ सुगोप्यमपिदेवेशयद्यनुग्राह्यतामयि ॥४६॥ नाहंवदाम्यभक्तेषु
सत्यंसत्यंमहेश्वर ॥ अस्मिन्कैलाससदने मदानान्नकरप्रिये ॥४७॥ शपामिशिवपादाब्जेत्रिःसत्यंनात्रसंशयः ॥ ॥
देव्युवाच ॥ ॥ एवंमेशिवधर्मसारमतुलंकुर्वंति तेषांफलंकिंवास्यात्परमेश्वरत्रिभुवनेतन्मेवदैवादरात् ॥ एवंत्वत्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रपूजनैकमनयोभक्तास्तरवध्रुवं पुण्यं चाद्यदरिद्रकेषु चकथंप्राप्नोतितत्कंकर ॥४८॥ ॥स्कंदउवाच॥ ॥इत्थंपर्वतनं
दिनोप्रियवचो वीचीभिराप्लावितः॥सद्योहृद्यमभेद्यमद्भुतमहाधर्मेषु सारंशिवः प्राह्मानंदभरेणभावितमहानंदैकसारादरोमो
चाधिक्यसुधाधरीकृतमहावाचानगेंद्रात्मजां॥४९॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवगौरीसंवादेशि
वधर्मप्रश्नोनामतृतीयोध्याय॥३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥
शृणुपर्वतराजेंद्र तनये गोप्यमप्यथ॥प्रकाश्यंत्वयिमेसत्यं त्वत्तःप्रियतरानमे॥१॥तेनतेचाखिलंवक्षेशृणुष्वैकाग्रमानसा॥
पूर्वमेकार्णवेघोरे नष्टेस्थावरजंगमे॥२॥विवादःसुमहानासीद्ब्रह्मविष्णोःपरस्परं॥अहंकर्त्ताह्यहंकर्त्तानमत्तोन्योजग
188 त्पिता॥३॥एवमाहहरिंब्रह्माब्रह्माणंचहरिस्तथा॥तयोर्दर्पापहारायप्रबोधार्थंचदेवयोः॥४॥मध्येसमभवल्लिंगमैश्वरं
तैजसंपरं॥ज्वालामालावृतंदिव्यमप्रमेयमनूपमं॥५॥योजनायुतविस्तीर्णंस्थितंतत्रामलांभसि॥ज्वालाभिर्मोहितौतस्य
लिंगस्यसुरसत्तमौ॥तदाविस्मयमापन्नौपश्यंतावमराधिपौ॥गताऊर्ध्वमधस्तस्यसंप्रधार्यपरस्परं॥७॥अधोद्रष्टुंगतो
विष्णुस्गादूर्ध्वंपितामहः॥अदृष्ट्वांतमधश्चोर्ध्वंतौसमेत्यपरस्परं॥८॥कृतांजलिपुटौभूत्वालिंगंतुष्टुवतुस्तदा॥ ॥
ब्रह्मविष्णूऊचतुः॥ ॥अनादिदेवदेवेश विश्वेश्वरमहेश्वर॥सर्वज्ञज्ञानविज्ञानप्रदानेशानमोस्तुते॥९॥अनेककांतिसंपन्न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनंतासनसंस्थित॥ अनंतशक्तिसंभोग परमेश नमोस्तुते॥१०॥ परात्पर परातीत उत्पत्तिस्थितिकारण॥ सर्वार्थसाधनोपाय विश्वेश्वर
नमोस्तुते॥११॥ बहुरूप महारूप सर्वरूपोत्तमोत्तम॥ पशुपाशार्णवातीत वरारोह नमोस्तुते॥१२॥ स्वभावनिर्मलाभोग सर्वस्वामिमहेश्वर॥ योग
योगिन्महायोगिन् योगेश्वर नमोस्तुते॥१३॥ निरंजन निराधार स्वाधार निरुपप्लव॥ प्रसन्न परमेशान योगेश्वर नमोस्तुते॥१४॥ जिह्वाचपल
भावेन यदिदं गदितं मया॥ तत्क्षंतव्यमनौपम्य कर्त्तस्तोति गुणार्णवं॥१५॥ नमस्ते नामलिंगाय शिवलिंगाय ते नमः॥ नमस्ते गू
ढलिंगाय परलिंगाय भोगिने॥१६॥ नमस्ते ज्योतिर्लिंगाय देवलिंगाय लिंगिने॥ नमस्ते सूक्ष्मलिंगाय बुद्धिलिंगाय बुद्धये॥१७॥
नमः पर्वतलिंगाय भावलिंगाय ते नमः॥ जगत्कारणलिंगाय जगतां पतये नमः॥१८॥ आवयोः पतये चैव यतीनां पतये नमः॥ स
र्वेषां पतये चैव देवानां पतये नमः॥१९॥ ज्ञानानां पतये चैव मोक्षाणां पतये नमः॥ जनानां पतये चैव धर्माणां पतये नमः॥२०॥
लिंगोत्पत्तिस्तवं पुण्यं यः शृणोति नरः सदा॥ नोत्पद्यते ति संसारे स्थानमाप्नोति शाश्वतं॥२२॥ तस्मात्सर्वप्रयत्नेन शृणुयाद्वाचयेत्त
था॥ पापकंचुकमुत्सृज्य प्राप्नोति परमं पदं॥२३॥ एवं स्तुत्वा महादेवं प्रणम्य शिरसा प्रभुं॥ ब्रह्मविष्णू समापन्नौ भक्त्या परमया युतौ॥
॥२४॥ लिंगमध्ये परं लिंगं स्थितं प्रादेशसंमितं॥ समाधिस्तौ च संपन्नौ दृष्टवंतौ शिवात्मकं॥२५॥ नैव तत्कांचनं रौप्यं न भूस्फटिकमौक्तिकं॥
लक्षमात्रं स्थितं शांतं केवलं तच्छिवात्मकं॥२६॥ तयोस्तुष्टो महादेवः प्रदाय वरमुत्तमं॥ कारणात्वमनुज्ञाय तत्रैवांतरधीयत॥२७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाप्रभृतिब्रह्माद्याः प्रतिष्ठाप्यसुरासुराः ॥ तल्लिंगानुकृतिंलिंगंपूजयेयुस्तपोधनाः ॥२८॥ परंशुद्धशरीरं वलिंगक्षेत्रमनादि
मत् ॥ यदाद्यमैश्वरंतेजः तल्लिंगंपंचसंज्ञितं ॥२९॥ कल्पांतेतस्यलिंगस्यलीयंतेसर्वदेवताः ॥ दक्षिणेलीयतेब्रह्मा वामतस्तु
जनार्दनः ॥३०॥ हृदयेचैवगायत्री सर्वदेवोत्तमोत्तमा ॥ मूर्ध्निलीयंतिवैवेदाः सषडंगपदक्रमाः ॥३१॥ जठरेलीयतेसर्वंजगत्स्था
वरजंगमं ॥ उत्पद्यतेपुनस्तस्माद्ब्रह्मादिसचराचरं ॥३२॥ आकाशंलिंगमित्याहुः पृथिवीतस्यपीठिका ॥ आलयः सर्वभू
तानां लयनाल्लिंगमुच्यते ॥ तस्माल्लिंगंप्रतिष्ठाप्यसर्वदेवभवोद्भवं ॥ स्थापितंतेनसर्वंस्यात्पूजितंचनसंशयः ॥३४॥ कृतां
जलिपुटौविष्णुर्ब्रह्माचापिविशेषतः ॥ पूर्वंलिंगंसमभ्यर्च्यपश्चात्कर्माणिचक्रतुः ॥३५॥ ब्रह्माब्रह्माक्षरैर्दिव्यैः लिंगंपूज
189 यतेसदा ॥ गंधपुष्पादिभिर्नित्यंविष्णुः पूजयतेसदा ॥३६॥ ब्रह्माशैलमयंभक्त्यालिंगंपूजयतेसदा ॥ तस्यसंपूजनादे
वप्राप्तंब्रह्मत्वमुत्तमं ॥३७॥ इंद्रनीलमयंलिंगंविष्णुरर्चयतेसदा ॥ विष्णुत्वंप्राप्तवांस्तेनसोऽच्युतैकंसनातनं ॥३८॥ शक्रोपि
देवदेवस्यलिंगंमणिमयंशुभं ॥ नित्यमर्चयतेभक्त्या तेनशक्रत्वमाप्तवान् ॥३९॥ लिंगंहेममयंकांतंधनदोर्चयतेसदा ॥
तेनासौधनदोदेवो धनदत्वमवाप्तवान् ॥४०॥ विश्वेदेवामहात्मानो रौप्यलिंगमयंहरं ॥ अर्चंतिविधिवत्तेन विश्वेदेवत्व
माप्नुयुः ॥४१॥ वायुः पूजयतेनित्यंलिंगंपित्तलसंभवं ॥ वायुत्वंतेनसंप्राप्तंसर्वप्राणिशरीरगं ॥ वसवः कांस्यकंलिंगंपूजयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ तिविधानतः॥प्राप्तास्तेन महात्मानो वसुत्वं सुमहोदयं॥४२॥अश्विनौ पार्थिवं लिंगं पूजयंतौ विधानतः॥तेन तावश्विनौ महा० ए
८ देवौ देवानां च भिषग्वरौ॥४३॥स्फाटिकं निर्मलं लिंगं वरुणोऽर्चयते सदा॥तेन तद्ध्रूपात्वं हि प्राप्तवानप्पतित्वतां॥४४॥लिंग अ० ४
मन्नमयं देवि हव्यवाड्यजति स्वयं॥अग्नित्वं प्राप्तवांस्तेन तेजोरूपगुणान्वितं॥४५॥ताम्रलिंगं सदा कालं भक्त्या देवो दि
वाकरः॥त्रिकालं यजते तेन प्राप्तं सूर्यत्वमुत्तमं॥४६॥मुक्ताफलमयं लिंगं सोमः पूजयते सदा॥तेन सोमत्वमापन्नः सर्वकां
तशरीरभृत्॥४७॥प्रवालकमयं लिंगं नागाः संपूजयंत्यपि॥तेन नागाः सुभोगाढ्याः पाताले नित्यमास्थिताः॥४८॥कृ
ष्णायसमयं लिंगं पूजयंत्यसुरोत्तमाः॥राक्षसा दैत्यनाथाश्च तेन तेऽमितविक्रमाः॥४९॥त्रपुसीसमयं लिंगं पिशाचाः पूजयंति हि॥
गंधर्वाप्सरसो यक्षा यातुधाना महेश्वरि॥५०॥वज्रवैडूर्यगोमेदपुष्परागोद्भवानि च॥लिंगानि पूजयंत्येव भक्त्या सर्वेश्वरस्य हि॥५१॥
तेन ऋद्धिबलोपेताः प्राप्तास्ते परमं पदं॥त्रैलोहिकं महालिंगं यजंते गुह्यकाः सदा॥५२॥तेन भोगबलोपेताः प्रयांति परमं पदं॥
वन्यदारुमयं लिंगं यजंते मातरस्सदा॥५३॥मातृत्वं प्राप्य ताः सर्वाः प्रयांत्येव महेश्वरं॥मुनयो मनवोऽप्यक्षा रक्षोरगमरुद्गणाः॥५४॥
देवा दैत्याः सगंधर्वा विद्याधरमहोरगाः॥पूजयंति शिवे लिंगं मामीशं देवनायकं॥५५॥सर्वो लिंगमयो लोकः सर्वं लिंगे प्रतिष्ठितं॥त
स्मात्संपूजयेल्लिंगं यदिच्छेत्सिद्धिमात्मनः॥५६॥लिंगे त्वयाहं देवेशि सर्वदा संस्थितो ह्यहं॥अनुग्रहाय लोकानां तथा लिंगे प्रपूजयेत्
॥५७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योनपूजयते लिंगे मामीशं भुवनेश्वरि ॥ नासौ स्वर्गस्य मोक्षस्य नैव राज्यस्य भाजनं ॥ ५८ ॥ तस्मादेकमना देवि यावज्जीवं प्रतिज्ञया ॥
अर्चयेत सदा लिंगे मामीशं भुवनेश्वरि ॥ ५९ ॥ वरं जीवपरिच्छेदः स्वशिरश्छेदनं वरं ॥ नत्वनभ्यर्च्य भुंजीया द्भगवंतं महेश्वरं ॥ ६० ॥ मानुषे
रूपपद्येवल भेदुर्दुगणात्वतो ॥ देवि लिंगार्चनात्पुण्यमधिकं नास्ति किंचन ॥ ६१ ॥ इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥ नास्ति लिं
१. गार्चनसमं तपो वा गिरिकन्यके ॥ ६२ ॥ तपो न्यत्क्षरते सर्वममुत्र फलभोगतः ॥ न लिंगार्चनपुण्यस्य क्षयो नास्ति गिरींद्रजे ॥ ६३ ॥ वर्धते
भक्तिभावेन अल्पमल्पं ततः कृतं ॥ योवा लिंगार्चनं द्वेष्टि धिक् धिक् तस्य कुमानसं ॥ ६४ ॥ संकरोत्पन्न एवस्याद्ब्राह्मणोपि सचान्त्य
जः ॥ तादृशं तु सकृद्दृष्ट्वा सवासा जलमाविशेत् ॥ ६५ ॥ नरो नरकगामी स्यात्तस्य संभाषणादपि ॥ महेश्वरं महादेवि ये द्विषंति मम
190 हीतले ॥ ६६ ॥ ते कृतघ्ना भवंतीह येन भक्ता महेश्वरे ॥ रुद्रपिंडसमुद्भूता ब्राह्मणा रुद्रदेवताः ॥ ६७ ॥ तस्माद्रुद्रार्चनं श्रेष्ठं ब्राह्मणा
नां महेश्वरि ॥ तस्माल्लिंगार्चनं सर्वैः कार्यं वर्णाश्रमैरपि ॥ ६८ ॥ यस्मात्सर्वेषु भूतेषु गतिर्देवो महेश्वरः ॥ तस्मात्सर्वप्रयत्नेन शि
वमेव समाश्रयेत् ॥ सागराणां क्षयोस्त्येव क्षीयते हिमवानपि ॥ ६९ ॥ रुद्रार्चनस्य जपं पुण्यं क्षयो नास्त्येव शांकरि ॥ एष्टव्या
बहवः पुत्राः शर्वलिंगार्चकाः सदा ॥ ७० ॥ यद्येको मम लिंगार्चयिष्यंति भूतले ॥ समुद्धरंति ते गोत्रं रज्जुः कूपाद्घटं यथा ॥ ७१ ॥
समुद्धृत्य यथाह्यंते कुलानामेकविंशतिं ॥ शिवत्वं यांति ते क्षिप्रं धर्माधर्मविवर्जिताः ॥ ७२ ॥ ॥ ईश्वर उवाच ॥ ॥ लिंगोत्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९१ त्तिस्तवमिदमुमेयःशृणोतीहभक्त्यातस्यापारमहाघसंघनिचयंसद्योविनाशंव्रजेत्॥लिंगस्थापनपुण्यमप्यतितरांसंप्राप्यगा महा०ए०
८ णत्वमप्यंतेयातिममाद्रिराजशिखरंसत्यंवदाम्यद्रिजे॥७३॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवगौरि अ०५
संवादेलिंगोत्पत्तिस्तवोनामचतुर्थोध्यायः॥४॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
श्रीस्कंदउवाच॥ ॥एवंदेव्यातदापृष्टो महादेवोभ्युवाचतां॥लिंगप्रतिष्ठासुविधिंदेव्येप्रोवाचशंकरः॥१॥तत्तेहंसंप्रवक्ष्या
मिसमाहितमनाःशृणु॥ ॥जैगीषव्यउवाच॥ ॥तत्कथंतारकारातेदेव्येप्रोवाचशंकरः॥२॥लिंगप्रतिष्ठानविधिंतन्मे
वदविशेषतः॥सुरेश्वगणवृंदैश्चश्रोतुमुत्कंठितंमनः॥३॥ ॥सूतउवाच॥ ॥तस्यस्कंदोमुनेःश्रुत्वावचनंप्रत्यभाषत॥
श्रीस्कंदउवाच॥ ॥पुराकैलासशिखरे सुखासीनंजगत्प्रभुं॥पार्वती प्रणताप्राह महादेवंघृणानिधिं॥४॥पार्वत्युवाच॥
देवदेवमहादेव महाकारुणिकोत्तम॥लिंगप्रतिष्ठामहिमां वद मे परमेश्वर॥५॥यत्पुण्यंस्थापितेलिंगेस्थावरेवाथजंगमे॥किं
तत्पुण्यफलंशंभोकस्मिन्कालेविशेषतः॥६॥कोधिकारीविशेषेणआगमेवैदिकेपिवा॥केषुस्थानेषुभगवन्प्रतिष्ठासुफलप्र
दा॥७॥प्रसीददययाशंभोहृद्रुच्छयंवक्तुमर्हसि॥ ॥श्रीमहादेवउवाच॥ ॥शृणुपद्मपत्राक्षिप्रतिष्ठाविधिमुत्तमं॥शिव
लिंगस्यमेदेविजंगमस्थावरस्यच॥शिवक्षेत्रेगिरौनद्यां वने गंगातटे शुभे॥हिमालयेचकेदारे वाराणस्यांमहेश्वरि॥८॥गंगाब्धिसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गामेवापिवैद्यनाथेकुरुस्थले ॥ तथाभद्रवटेपुण्येरुद्रकोटौप्रभासके ॥१०॥ पुष्करेचतथोंकारेमहाकालेत्रिशूलके ॥ पिंडारकेत्र्यंबके
वाप्रतिष्ठानेचविंध्यके ॥११॥ श्रीशैलेदंडकारण्येगोकर्णेवामहेश्वरि ॥ नदीनांचैवतीरेषु लिंगंस्थाप्यसुपुण्यभाक् ॥१२॥ कृष्णावेण्या
पयोष्ण्याश्च गोदावर्यांमहेश्वरि ॥ तुंगायाश्चाथपंपाया वेगवत्यां तथातटे ॥१३॥ क्षिप्रायानर्मदायाश्च गंगायमुनयोस्तटे ॥ नीरा
या भीमरथ्यायाश्चर्मण्वत्यामहेश्वरि ॥१४॥ कवेरजायास्तीरेषुक्षेत्रेष्वेतेषुशंकरि ॥ श्रीकंठेच तृणावर्तेमातृरत्नगिरौतथा ॥१५॥
श्वेतारण्येब्रह्मवने पुण्यछायावनेशिवे ॥ जंबुकेशेपंचनदे कुंभघोणेर्जुनेतथा ॥१६॥ घंटेश्वरे सुंदरेच वेदारण्येमहेश्वरि ॥ कमला
लयसंज्ञेचहालास्येगंधमादने ॥१७॥ श्रीमद्दक्षिणकैलासेशिवेशोणाचलेमम ॥ श्रीमदभ्रसभायांवावृद्धाद्रौगोनगेतथा ॥१८॥
लिंगप्रतिष्ठादेशास्तुः नदीक्षेत्राण्यमूनिमे ॥ पुण्यानिचप्रतिष्ठासुनवारण्यानिशंकरि ॥१९॥ नैमिषंदण्डकारण्यं ब्रह्मारण्यंम
१७ हेश्वरि ॥ कुशारण्यंदेववनंरुद्रारण्यंबृहद्वनं ॥२०॥ कालंजरंपद्मवनंसप्तपुर्योत्रपुण्यदाः ॥ प्रतिष्ठायांमहादेविशिवलिंगस्यसत्तमे
॥२१॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीदेवि प्रतिष्ठासुमहाफलाः ॥ ॥ निषधः कुमुदोविंध्यःपारियात्रश्च
नीलकः ॥२३॥ मेरुर्दर्दुरकैलासौदक्षिणोहेमकूटकः ॥ कुलाचलेष्वथैतेषुस्थाप्यलिंगंमहाफलं ॥२४॥ महाकैलासमौलौतुशिव
लिंगप्रतिष्ठितिः ॥ दुर्लभासर्वदेवानांमनुष्याणांचकिंपुनः ॥२५॥ सर्वक्षेत्रनदीतीरनुवपर्वतमौलितः ॥ विशिष्टात्रमहादेविको

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ टिकोटिगुणाधिका॥२६॥स्वायंभुवंतथादैवमार्षंमानुषमेवच॥स्वायंभुवस्यलिंगस्यपरितः क्रोशमेवहि॥२७॥तत्रवासोविशि म०शा० ५०
१० ष्टानांभवतीत्येवमेमनः॥तत्रैवमरणाज्जंतोःशिवलोकेनसंशयः॥२८॥दैवेचापितदर्धस्यात्परिमाणंतुमानुषे॥पादन्यू अ० ५
नंमहादेविमार्तिकेतुफलंविदुः॥२९॥बाणंस्वयंभूतुल्यंस्यात्क्षेत्रमानंसदैवहि॥क्षेत्रेलिंगस्थापनाच्चपुण्यंनद्याःतटेकृ
तं॥३०॥वनेषुस्थापितेतस्मात्ततोपिगिरिमौलिगं॥नवधातुजलिंगानिसमुत्कृष्टानिशंकरि॥३१॥नवरत्नोद्भवान्येवततोकृ
ष्टानिशैलजे॥ततोरसेंद्रकलितंबाणलिंगंततोधिकं॥३२॥नप्रतिष्ठानचास्यशौवाणलिंगेक्वचिद्विद्यते॥सपीठमस्त्वपीठंवाबा
णलिंगंप्रपूजयेत्॥३३॥बाणलिंगंतुशूद्रेणयदिदेविप्रतिष्ठितं॥सर्वेषांदर्शनार्चासुअधिकारोभविष्यति॥३४॥केवलंस्याच्छि
लालिंगेनद्रष्टव्यंसर्वथाद्विजैः॥अर्वागामलकाल्लिंगंनकार्यंरत्नवर्जितं॥३५॥धातुजंचांगुलैःषड्भिःस्फाटिकंस्याद्यथोचि
तं॥वितस्तिमात्रंमृल्लिंगंकार्यंवैसर्वथाशिवे॥३६॥ततोन्यूनंहरेदायुःबाणंप्रादेशसंमितं॥गृहस्थैश्चगृहेपूज्यंस्थावरेषुत
तोधिकं॥३७॥लिंगमस्तकविस्तारोलिंगोच्छ्रायसमःशिवे॥वेदीचतद्द्विगुणितातद्वत्पीठमुमेस्थितं॥३८॥गोमुखीतद्द्विगु
णितापंचसूत्रंविदुःशिवे॥पंचपातकनाशायपंचसूत्रसमंसदा॥३९॥न्यूनाधिकेहरेदायुः।कीर्तिरारोग्यनाशनं॥सर्वद्रव्य
कृतेलिंगेपंचसूत्रंप्रशस्यते॥४०॥नैवायंनियमोदेविस्वयंभूतेथशस्यते॥अरत्निमात्रादूर्ध्वंयत्स्थावरंलिंगमेवहि॥४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नस्थाप्यं तद्गृहे गौरि स्थाप्यं तच्च शिवालये ॥ प्रतिमा वा महेशस्य देवतानां महेश्वरि ॥ ४२ ॥ वितस्तिमात्रादूर्ध्वा चेन्नाचर्या सा
वै गृहे सदा ॥ मृदा तु निर्मिता वा स्यात्पाषाणप्रभवाथवा ॥ ४३ ॥ प्रतिष्ठाप्यार्चयेत्सा नु तदूर्ध्वा स्याच्छिवालये ॥ मूर्तयोऽष्टौ
महेशस्य पंचविंशत्परीमिताः ॥ ४४ ॥ समाकारस्य नेत्रास्ताः प्रतिष्ठाप्य गणो भवेत् ॥ गृहे शिवालये वापि मूर्तयो मीम
हेश्वितुः ॥ ४५ ॥ उमासहायो नृत्येशो दक्षिणामूर्तिरेव वा ॥ कंकालो लिंगभागस्थः तथा शूलधरो हरः ॥ ४६ ॥ चंद्रचूडो
वृषांगस्थ अर्धनारीश्वरः शिवे ॥ कपालपाणिर्वरदो विष्णावे ब्रह्मणोः शिवे ॥ ४७ ॥ दिगंबरः कालनाशः गजचर्मपरी
वृतः ॥ कैलासवासो घोरात्मा सद्योजातो ऽथ पूरुषः ॥ ४८ ॥ वामदेवस्तथेशानो त्रिपुरांतकरो हरः ॥ एताश्चान्या मूर्त
192 योथ प्रतिष्ठाप्यार्चयेच्छिवे ॥ ४९ ॥ धातुजानां च लिंगानां प्रतिमानामपीश्वरि ॥ चराणां च स्थिराणां च शतवर्षात्प्रति
ष्ठितिः ॥ ५० ॥ वैदिकी चागमीया च प्रतिष्ठा द्विविधा शिवे ॥ खंडस्फुटितदग्धं वा पाखंडपतितां त्यजेः ॥ ५१ ॥ शूद्रैः स्पृष्टे
प्रतिष्ठा स्यात्पुनः संस्कारमेव वा ॥ अत्यंतोपहृतानां तु परित्यागो जले भुवि ॥ ५२ ॥ चराणां स्थावराणां च तथा स्वायंभुवे
पि वा ॥ स्वायंभुवीयलिंगस्य शकलं वेदिकास्वपि ॥ ५३ ॥ अष्टबंधकद्रव्येण योज्य बध्वा प्रतिष्ठितिः ॥ आगमी चागमीया
नां वैदिकानां तु वैदिकी ॥ ५४ ॥ यस्तु प्रतिष्ठयेल्लिंगं प्रतिमां वा स्थिरां चरां ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः
॥ ५५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ तस्याहमर्चयिष्यामि मौलौ चंद्रविभूषिते॥ वसंतोथऋतुर्देवि वार्षिकः शिशिरोऽथच॥५६॥ ग्रीष्मे वापि भवेद्देवि प्रतिष्ठा सुमहा म०हा० ९०
११ फलः॥ उत्तरायणगे देव प्रतिष्ठा सुविधीयते॥५७॥ उत्तराशागते भानौ लिंगं स्थाप्यार्चयेच्छिवे॥ माघफाल्गुन वैशाख ज्येष्ठाषाढे अ०५
चपंचसु॥५८॥ मासेषु शुक्लपक्षेषु लिंगस्थापनमुत्तमं॥ अष्टम्यां वा चतुर्दश्यां पर्वणोश्चमहेश्वरि॥५९॥ सोमवारेऽथवा भद्रे रविभौ
मबुधावपि॥ स्थिरप्रतिष्ठा सुभवेत्स्थिरर्क्षे च चरे चरं॥ शांतैर्द्विजवरैर्देवि शिवभक्तैर्जितेंद्रियैः॥ शतावरा स्थावरेषु ऋत्विजः परिकी
र्तिताः॥६१॥ शतत्रयो वा विप्रेंद्राः शिवभक्ताः सुवाससः॥ भस्मरुद्राक्षसंपन्ना स्त्रिपुंड्रपरिमंडिताः॥६२॥ चरलिंगप्रतिष्ठायां वर
णीया द्विजोत्तमाः॥ ब्रह्मा सदस्यश्चाचार्यः सर्वे मधुपर्केण पूजिताः॥६३॥ वासोभिरहतैश्चैव गोभिः पूज्या यथाबलं॥ वस्त्रालंकर
णैरत्नैर्धनधान्यैर्गृहैरपि॥६४॥ पूजनीयाः प्रतिष्ठादौ ब्राह्मणा वेदपारगाः॥ धान्यादिवासः कर्तव्यो जलवासश्च शंकरि॥६५॥ प्र
तिमायाश्च लिंगस्य कर्तव्योऽर्थविजानता॥ द्रोणत्रयं धान्यमिति जलकुंभं सपल्लवं॥६६॥ नदीनदाहृतं तोयं तडाकं कूपजं
तथा॥ नवधान्यानि वा सांसि समाहृत्य द्विजैः सह॥६७॥ तथैवौषधयः पुण्या विष्णुक्रांतापमार्गकाः॥ दर्भाग्रश्च तथा दूर्वा
यवाग्रा घयथ मुंडिका॥६८॥ पल्लवान्युत्तमे पंचकल्कान्यपि सुमध्यमे॥ समाहृत्य शुभे देशे गोमयेनोपलेपिते॥६९॥ रंगव
ल्यादिशोभाढ्ये मंडपे पुष्पमंडिते॥ गणेशमादौ संपूज्य नांदीश्राद्धं विधाय च॥७०॥ ततः प्रतिसरं कृत्वा ब्राह्मणाननुमंत्र्य च॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पत्न्या सह समासीनः अरजे वाससी दधन् ॥ ७१ ॥ संकल्प्य वरयेद्विप्रान् आचार्यं च सदस्यकं ॥ ब्रह्माणं च प्रतिष्ठाप्य दिनत्रय
मथेश्वरि ॥ ७२ ॥ बोधायनोक्तविधिना प्रतिष्ठाप्य महेश्वरं ॥ हावयेत्पायसैर्विद्वान् चरुणा सघृतेन वा ॥ ७३ ॥ स्वस्वशाखोक्त
मार्गेण प्रतिष्ठाप्य हुतासनं ॥ कुंभाभिषेकं कृत्वैव मूलेन प्रणवेन वा ॥ ७४ ॥ नेत्रोन्मीलनवर्ज्यं वै लिंगे वै प्रतिमास्वपि ॥ कुर्यान्नेत्रो
न्मीलनादि प्रतिमास्वेव शंकरि ॥ ७५ ॥ महाभिषेकविधिना पूजयेल्लिंगमेश्वरं ॥ पंचामृतैः पंचगव्यैः तथा फलरसैरपि ॥
॥ ७६ ॥ श्रीरुद्रेणाभिषेकोऽत्र कर्तव्यश्चमकैरपि ॥ वस्त्रैर्गंधैश्च धूपैश्च दीपैर्नैवेद्यकल्पनैः ॥ ७७ ॥ तांबूलनीराजनतः पूजये
च्छत्रचामरैः ॥ प्रदक्षिणानमस्कारैः संस्तुवीत महेश्वरं ॥ ७८ ॥ नमस्ते देवदेवाय शिवायाकाशमूर्तये ॥ भवाय भव्यरूपाय हर
103 भूम्यात्मने नमः ॥ ७९ ॥ व्यक्ताव्यक्ताय सोमाय जलरूपाय ते नमः ॥ उग्राय भीमरूपाय वायुमूर्त्यात्मने नमः ॥ ८० ॥ व्योम
केशाय नित्याय तेजोमूर्त्यात्मने नमः ॥ एवं संस्तुत्य देवेशि क्षमाप्य परमेश्वरं ॥ ८१ ॥ ज्ञानतोऽज्ञानतो वापि प्रतिष्ठा या मया
कृता ॥ तां क्षमस्व महादेव लिंगेस्मिन्सुस्थिरो भव ॥ ८२ ॥ ततोर्चयन् गंधपुष्पैर्धनैर्गोभिः प्रपूजयेत् ॥ आचार्यमृत्विजै
श्चैव दीनानाथद्विजोत्तमान् ॥ ८३ ॥ भोजयेच्छिवभक्तांश्च दक्षिणाभिः प्रतोषयेत् ॥ सहस्रं त्रिशतं वापि शतं द्वादश एव वा
॥ ८४ ॥ हंत्यर्थहीनं कर्तारं मंत्रहीनं तु ऋत्विजं ॥ स्त्रियं लक्षणकं हीनं न प्रतिष्ठासमो रिपुः ॥ ८५ ॥ वित्तशाठ्यं न कुर्वीत फ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ फलमाढ्यदरिद्रयोः॥एवंसंक्षेपतःप्रोक्तःप्रतिष्ठाविधिरुत्तमः॥ ॥सूतउवाच॥ ॥प्रतिष्ठादिनिष्ठायदस्यांद्विशिष्टामह्ला महा० ५
७२ तुंगालिंगेगरिष्ठासदिष्टा॥महाकष्टहंत्रीधनिष्ठासुशस्तागरिष्ठामहाजेष्ठलिंगेविशिष्टा॥८७॥अनंतंमहीमंडलदानजालेएखंड अ०५-६
लप्रीणनयज्ञसंघैः॥आखंडकृच्छ्राचरणावृतेयल्लिंगस्यतत्कोटिगुणंप्रतिष्ठिते॥८८॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येए
कादशांशेशिवलिंगप्रतिष्ठानामपंचमोध्यायः॥५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
देव्युवाच॥ ॥प्रासादगोपुराणांचकरणेवाफलंचकिं॥प्राकारगोपुरद्वारवाहनानांप्रकल्पने॥१॥मंडपानांचकरणेवापीकूपो
दपानकृत॥शिवागारेविशेषेणशिवपुष्पवनस्यच॥२॥किंफलंस्यान्महादेवतन्मेवददयानिधे॥ ॥ईश्वरउवाच॥ ॥मृद्दार्वि
ष्टकपाषाणैर्यःकुर्याद्वाशिवालयं॥त्रिसप्तकुलसंयुक्तःशिवलोकेमहीयते॥३॥मृन्मयात्कोटिगुणितंपुण्यंस्याद्दारुभिःकृ
तं॥त्रिगुणंचेष्टकादिभ्यःसुधयापरिकल्पितं॥४॥शैलैरनंतंदेवेशिकल्पितंशिल्पिभिर्दृढं॥कोटिकोटिगुणंपुण्यमुत्तरत्रमहे
श्वरि॥५॥मृच्छैलयोःसमंज्ञेयंफलमाढ्यदरिद्रयोः॥यत्रक्वापिशिवेभक्त्याकुर्याच्छैलेष्टकादिभिः॥६॥नवंपुराणरहितंजीर्णंपति
तमेववा॥नवादुत्कृष्टं जीर्णोद्धारंमहेश्वरि॥७॥अष्टेष्टकाभिर्वाकुर्यात्क्रीडमानःशिवालयं॥सोपिरुद्रगणोभूयात्भक्त्यावित्ता
नुसारतः॥८॥गर्भगेहंमहेशस्ययःकुर्यादुक्तधातुभिः॥पट्टिकावेष्टितंदेवदेवकोष्ठेश्वशोभितं॥९॥रुद्रावतारचरितैर्वृषकंभवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजितं॥यावद्युगसहस्राणि रुद्रलोके महीयते॥१०॥तत्पाषाणसुधालेपकर्णौः साहस्रसंख्यया॥तावत्कालं वसेत्स्वर्गे यावदिंद्राश्च
तुर्दश॥११॥मंडपं दशस्तंभैश्चयुतं यः कारयेच्छिवे॥शतस्तंभं ततोपीशे सहस्रस्तंभमंडितं॥१२॥सुपीठवेदिकोपेतं वलभीकुंभमं
डितं॥जालकं तोरणोपेतं चित्रविद्रुमपुत्रिकं॥१३॥तावद्युगसहस्राणि रुद्रलोके महीयते॥तावत्कालं वसेत्स्वर्गे यावदिंद्राश्चतु
र्दश॥१४॥तत्पाषाणसुधालेपकर्णौः साहस्रसंख्यया॥गोपुरैः भूधराकारैः सहस्रतलमंडितैः॥१५॥कारयेच्छिल्पशास्त्रज्ञैः रुद्र
रूपविचित्रितैः॥दशैकादशसाहस्रं तलैः शतपरीमितैः॥१६॥कुंभैर्वृषै रुद्ररूपैः योलंकुर्याद्द्वारं गतः॥यावंति रुद्ररूपाणि स्वरूपा
पयपिलेखयेत्॥१७॥तावद्वर्षसहस्राणि शिवलोके महीयते॥शिवालयस्य परितः चतुर्दिक्षु विराजिते॥१८॥प्राकारं कारयेद्यस्तु मारमार
10८ स्य शंकीरे॥यावत्तस्मिन्विरचिताः पाषाणाद्दृष्टकास्तथा॥१९॥तावद्वर्षसहस्राणि मम लोके महीयते॥खंडस्फुटितसंकाशं [स्कारं] यः कुर्वीत शिवा
लयं॥२०॥प्राकारगोपुरं वापि मंडपं वासपीठकं॥नूतनादपि चोत्कृष्टं जीर्णोद्धारे प्रशस्यते॥२१॥दूरगः शिखरं दृष्ट्वा गोपुरस्य महेशितुः॥सप्तज
न्मकृतं पापं तत्क्षणादेव नश्यति॥२२॥पश्चात्प्राङ्मुखलिंगस्य गर्भागारं तु कारयेत्॥देवालयं ततः कृत्वा देवीमूर्तिभिरन्वितं॥२३॥शिवलोकगणो
भूत्वा मोदते शाश्वतीः समाः॥स्कंदालयं गणेशस्य भैरवस्य महात्मनः॥२४॥चंडीश्वरालयं कृत्वा स लभेत्पुण्यमुत्तमं॥वृषालयं प्रकुर्वीत तदग्रे ब
लिपीठकं॥२५॥तस्याग्रतो ध्वजस्तंभं कुर्याद्दूर्ध्वसुवर्तुलं॥पंचविंशतिमूर्तीनामालयानि समंततः॥२६॥श्लक्ष्णानि सुमनोज्ञानि सुकुट्टिमयुतानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ १२ च॥चित्रध्वजपताकाग्रस्वर्णकुंभयुतानि च॥२७॥कृत्वा यत्फलमाप्नोति तदेकाग्रमनाः शृणु॥स्कंदोमासहितं देवमासीनं परमासने॥२८॥कृ ब्रह्मा० ९० अ०६
त्वा भक्त्या प्रतिष्ठाप्य सर्वान्कामानवाप्नुयात्॥कैलासे संवसेद्देव दक्षिणे विष्णुपंचकं॥२९॥यावत्कालेन संतिष्ठेत्तावद्भोगभुगव्ययः॥
एकपादं चतुर्बाहुं त्रिनेत्रं शूलसंयुतं॥दृष्ट्वा स्थितं हरिं वामे दक्षिणे विधिमव्ययं॥अष्टविंशतिकोटीनां रुद्राणां स्वागतो हरः॥३१॥विनिर्माय थ
मूर्तीनां पंचविंशतिकं तथा॥पुरुषं हृदयाद्देवि सद्योजातं तु पादतः॥३२॥अघोरं वक्त्रतुः(कृत्रतः) शंभुर्हस्ताभ्यां वाममीश्वरं॥ईशानं मूर्धतः शंभुः नि
र्माय अग्रे स चासृजत्॥३३॥प्रकृतिं वामतश्चैव बुद्धिं वै बुद्धिदेशतः॥अहंकारादहंकारं तन्मात्राणि च मात्रया॥३४॥इंद्रियाणींद्रियाद्देवतील
या परमेश्वरः॥पृथिवीं पाददेशात्स गुह्यदेशाज्जलं तथा॥३५॥नाभिदेशान्महावह्निं हृदयात् भास्करं तथा॥कर्णात्सोमं तथात्मानं भ्रूमध्या
न्मस्तकाद्दिवं॥३६॥दृष्ट्वैवं संस्थितः साक्षाज्जगत्सर्वं चराचरं॥पंचविंशतिमूर्तीश्च प्राविशत्स्वेन तेजसा॥३७॥एकांशेन महादेव एकधा बहुधा श्रुतः॥
वामांगस्थितलोकेश हरिणा चैव सेवितः॥३८॥सर्वज्ञं सर्वगं देवं कृत्वा भक्त्या विधानतः॥प्रतिष्ठाप्य यथान्यायं शिवसायुज्यमाप्नुयात्॥३९॥त्रिपा
दं सप्तहस्तं च चतुःशृंगं त्रिशीर्षकं॥कृत्वा यज्ञेशमीशानं अग्निलोके महीयते॥४०॥तत्र भुक्त्वा महाभोगान्कल्पलक्षं सुखी नरः॥क्रमादागत्य लोके
स्मिन्धराधीशो भवेन्नृपः॥४१॥वृषारूढं तु यः कुर्यात्सोमं सोमार्धभूषणं॥हयमेधायुतं पुण्यं कृत्वा प्राप्येंद्रवल्लभः॥४२॥कांचनेन विमानेन किं
किणीजालमालिना॥गत्वा शिवपुरं दिव्यं तत्रैव स विमुच्यते॥४३॥नंदिना सहितं देवं सांबं सगणमव्ययं॥कृत्वा यत्फलमाप्नोति तत्ते वक्ष्याम्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुत्तमं॥४४॥सूर्यमंडलसंकाशैर्विमानैर्वृषसंयुतैः॥अप्सरोगणसंकीर्णैः देवदानवदुर्लभैः॥४५॥नृत्यद्भिरप्सरःसंघैःपुष्पगंधमनोहरैः॥गत्वा
शिवपुरंदिव्यंगाणापत्यमवाप्नुयात्॥४६॥नृत्यंतंदेवदेवेशंशैलजासहितंप्रभुं॥सहस्रबाहुंदेवेशिचतुर्बाहुमथापिवा॥४७॥नंद्याद्यैर्भूतसंघैश्च
संवृतंपरमेश्वरं॥ब्रह्मेंद्रविष्णुसोमाद्यैःकृतांजलिपुटैर्गणैः॥४८॥मातृभिर्मुनिभिश्चैवसंवृतंपरमेश्वरं॥कृत्वाभक्त्याप्रतिष्ठाप्ययत्फलंत
द्वदाम्यहं॥५०॥सर्वयज्ञतपोदानतीर्थवेदेषुयत्फलं॥तत्फलंकोटिगुणितंलब्ध्वायातिशिवंपदं॥५१॥तत्रभुक्त्वामहाभोगान्यावदा
भूतसंप्लवं॥सृष्ट्यंतरेततःप्राप्तेमानवंपदमाप्नुयात्॥५२॥नंदिंचतुर्भुजंश्वेतंत्रिनेत्रंसर्पमेखलं॥कपालहस्तंदेवेशंकृष्णाकुंचितमूर्धजं॥
॥५३॥सृष्ट्यन्तरेततःप्राप्तेमानवंपदमाप्नुयात्॥नंदिंचतुर्भुजं०॥कृत्वाभक्त्याप्रतिष्ठाप्यशिवसायुज्यमाप्नुयात्॥५४॥द्रुहेंद्रदारकंदेवंसांबं
सिद्धाकृतिंप्रभुं॥सुधूम्रवर्णरक्ताक्षंत्रिनेत्रंचंद्रशेखरं॥बकपक्षधरंमूर्ध्नानागटंकधरंहरं॥५५॥सिंहाजिनोत्तरीयंचमृगचर्मांबरप्रियं॥तीक्ष्ण
दंष्ट्रंगदाहस्तंकपालोद्धृतपाणिनं॥५६॥हुंफट्कारमहाशब्दंशब्दिताखिलदिङ्मुखं॥पुंडरीकांबरंदोर्भ्यांबिभ्रद्देकंकतंतथा॥५७॥हृ
195 संतंचनदंतंचपिबंतंसप्तसागरं॥नृत्यंतंभूतसंघैश्चसंवृतंसगणंप्रभुं॥५८॥कृत्वाभक्त्याप्रतिष्ठाप्ययथाविभवविस्तरं॥यस्माद्विघ्नाद्विनिर्जि
त्यशिवलोकेमहीयते॥५९॥तत्रभुक्त्वामहाभोगान्यावदाचंद्रतारकं॥ज्ञानंविचारतोलब्ध्वारुद्रेभ्यस्तत्रमुच्यते॥६०॥अर्धनारीश्वरंदेवं
चतुर्भुजमनुत्तमं॥वरदाभयहस्तंचशूलपद्मधरंशिवं॥६१॥भावेनसंस्थितंतत्सर्वंसर्वाभरणभूषितं॥कृत्वाभक्त्याप्रतिष्ठाप्ययथाविभव

शिवरह० ११ ७८

कृत्वा

विस्तरं॥ ६२॥ यस्माद्विघ्नाद्विनिर्जित्य शिवलोके महीयते॥ तत्र भुक्त्वा महाभोगान् यावदाचंद्रतारकं॥ ६३॥ ज्ञानं विचारतो लब्ध्वा रु महा० ३६० अ० ६

द्रेभ्यस्तत्र मुच्यते॥ अर्धनारीश्वरं देवं चतुर्भुजमनुत्तमं॥ ६४॥ वरदाभयहस्तं च शूलपद्मधरं शिवं॥ भावेन संस्थितं तत्सर्वं सर्वाभरण

भूषितं॥ कृत्वा भक्त्या प्रतिष्ठाप्य शिवलोके महीयते॥ तत्र भुक्त्वा महाभोगानणिमादिगुणैर्वृतः॥ ६६॥ आचंद्रतारकं ज्ञानं ततो ल

ब्ध्वा विमुच्यते॥ यः कुर्याद्देवदेवेशं सर्वज्ञं नकुटीश्वरं॥ ६७॥ वृतं शिष्यैः प्रशिष्यैश्च व्याख्यानोद्धृतपाणिनं॥ कृत्वा भक्त्या प्रति

कृत्वा

ष्ठाप्य शिवलोकं स गच्छति॥ ६८॥ भुक्त्वा तु विपुलांस्तत्र भोगानुग्रतरं नरः॥ ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते॥ ६९॥ पूर्वदेवामरा

णां च तदा स्वांशकलैः स्थितैः॥ कृतमुद्रस्य रुद्रस्य चिताभस्मानुलेपनः॥ ७०॥ त्रिपुंड्रधारिणस्तेषां शिरोमालाधरस्य च॥ ब्रह्मणः केश

जं नैकमुपवीतं च बिभ्रतः॥ ७१॥ बिभ्रतो वामहस्तेन कपालं ब्रह्मणो वपुः॥ विष्णोः कलेवरं चैव बिभ्रतः परमेष्ठिनः॥ ७२॥ कृत्वा भक्त्या

प्रतिष्ठाप्य विष्णुलोके महीयते॥ कालकूटं करांभोजे निधायासीनमासने॥ ७३॥ कृत्वा भक्त्या प्रतिष्ठाप्य मुच्यते भवबंधनात्॥ ॐ

नमो नीलकंठाय पद्धतिपु पयाक्षराष्टकं॥ मंत्रमाह स कृद्ध्यायः पातकैः स प्रमुच्यते॥ मंत्रेणानेन गंधाद्यैर्भक्त्या वित्तानुसारतः॥ ७५॥

संपूज्य देवदेवेशं शिवलोके महीयते॥ जलंधरांतकं देवं सुदर्शनकरं प्रभुं॥ ७६॥ कृत्वा भक्त्या प्रतिष्ठाप्य विष्णुलोके महीयते॥ ति

ष्ठतो थनिकुंभस्य प्रयतश्चरणांबुजं॥ ७७॥ वामेतरं प्रविन्यस्य वाममालिंग्य चाद्रिजां॥ शूलाग्रे खर्परं स्थाप्य कं कपोहितपन्नगं॥

॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संप्रेक्ष्य चांतकं पार्श्वे कृतांजलिपुरःस्थितं ॥ रूपं कृत्वा यथान्यायं शिवसायुज्यमाप्नुयात् ॥ ७९ ॥ यः कुर्याद्देवदेवेशं त्रिपुरांतकमीश्व
रं ॥ धनुर्बाणसमायुक्तं सोमं सोमार्धभूषणं ॥ ८० ॥ रथे तु संस्थितं देवं चतुराननसारथिं ॥ तदाकारतया सोपि गत्वा शिवपुरं सुखी ॥
॥ ८१ ॥ क्रीडते नात्र संदेहो द्वितीय इव शंकरः ॥ तत्र भुक्त्वा (कृत्वा) महाभोगान् यावदिच्छेद्द्विजोत्तमाः ॥ ८२ ॥ ज्ञानं विचारितं लब्ध्वा तत्रैव स
विमुच्यते ॥ गंगाधरं सुखासीनं चंद्रशेखरमेव च ॥ ८३ ॥ उमया सहितं देवं वामोत्संगांबिकायुतं ॥ विनायकं तथा स्कंदं ज्येष्ठं दु
र्गां सुशोभनां ॥ ८४ ॥ भास्करं च तथा सोमं ब्रह्माणीं च महेश्वरीं ॥ कौमारीं वैष्णवीं देवीं वाराहीं वरदां तथा ॥ ८५ ॥ इंद्राणीं चैव चामुंडीं
वीरभद्रसमन्वितां ॥ विघ्नेशेन च यो धीमान् शिवसायुज्यमाप्नुयात् ॥ ८६ ॥ लिंगमूर्तिं महाज्वालामालासंवृतमव्ययं ॥ लिंगस्य मध्ये वै कृत्वा
चन्द्रशेखरवत्तनुं ॥ ८७ ॥ व्योम्नि कुर्यात्तथा लिंगे ब्रह्माणं हंसरूपिणं ॥ विष्णुं वराहरूपेण लिंगस्याधस्त्वधोमुखं ॥ ८८ ॥ ब्रह्माणं दक्षिणे तस्य
१६ कृतांजलिपुरःस्थितं ॥ वामे विष्णुं महाबाहुं कृतांजलिपुरं तथा ॥ ८९ ॥ मध्ये लिंगं महाघोरं महांभसि सुसंस्थितं ॥ कृत्वा भक्त्या प्रतिष्ठाप्य शिवसा
युज्यमाप्नुयात् ॥ ९० ॥ क्षेत्रसंरक्षकं देवं क्षेत्रपालकनामकं ॥ कृत्वा तथा यथान्यायं शिवलोके महीयते ॥ ९१ ॥ ये पंचविंशत्परमेशमूर्तीः कृ
त्वालयाभ्यंतरपीठसंस्थाः ॥ सुरूपवर्णाभरणाः मनोज्ञाः शिवे प्रतिष्ठाप्य सुपुण्यभाक् भवेत् ॥ भूयाद्गुणेभ्यो रजताद्रिमौलौ यो गोपुरं रम्य
कवाटजालं ॥ वृषाग्रकुंभैः सुपताकजालैः सन्मंडपालीवलभीप्रतोलिका ॥ ९२ ॥ सुपालिकापुत्तलिका विचित्रं सत्यं च वर्णोत्तमगर्भगेहं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्वासुधाचित्रितमीशतुल्यः लिंगंप्रतिष्ठाप्यसुपुण्यभाक्भवेत्॥९३॥देवींगणास्कंदवृषेशचंडं॥यावद्ब्रह्मशतंमुकुंदसदनेस्थित्वा
चिरंभोगभाक्भूयात्स्वान्वयकोटिभिर्ममशिवेनारायणेनार्चितः॥पश्चान्मेगणमुख्यतामुपगतःसर्वोऽप्यखर्वोजनःसर्वस्मादधिकं
फलंसलभतेपुण्यस्यशैलेंद्रजे॥९४॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवलिंगप्रतिष्ठानामषष्ठोध्यायः॥६॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥कैलासाचलसंकाशं गोपुरावलिभासुरं॥प्रा
कारवरशोभाढ्यंमहामंडपसुंदरं॥१॥पर्यंतराजद्वृषभंचित्रविद्रुमवेदिकं॥गवाक्षतोरणयुतंवलभीकुलभूषितं॥२॥नानाद्रुमलतोपेतं
वापीकूपनदावृतं॥सरोभिःफुल्लकल्हारकमलोत्पलमंडितैः॥नानाविहगशोभाढ्यंमृगोन्नृत्तमयूरकं॥कृत्वानगोर्ध्वशिखरजालजा
लकितांबरं॥२॥रम्यनिर्झरकंरीतिरंगवल्लीविचित्रितं॥तन्मध्येममदेवेशिकुर्यात्प्रासादमुन्नतं॥३॥शतंसहस्रमयुतस्तंभकुंभविराजि
तं॥वेदिकापट्टिकोपेतंचित्रविद्रुमपुत्रिकं॥प्रतोलीवलभीनिर्यद्धारासारगृहांतरं॥पुष्पमालापरिक्षिप्तंधूपदीपविराजितं॥५॥मध्येसिं
हासनयुतंडोलास्तरणशोभितं॥वितानशोभितोर्ध्वांतं सोपधानशतास्तृतं॥६॥तस्मिन्नासनपर्यंकेमूर्तिंसोमांमहेश्वरीं॥त्रिनेत्रांचारुचं
द्रार्कांत्वत्सहायांसुशोभनां॥७॥स्कंदान्वितांनीलकंठांत्रिपुंड्रपरिशोभितां॥प्रतिष्ठाप्यचकैलासप्रासादेपरमेश्वरि॥८॥सयत्फलमवाप्नोति
तदेकाग्रमनाःशृणु॥सूर्यकोटिप्रतीकाशैर्यानैःकैलाससप्रभैः॥९॥औमंकौमारमैशानंवैष्णवंब्राह्ममेवच॥प्राजापत्यंमहातेजाजनोलोकं



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महत्तथा॥१०॥ऐंद्रमासाद्य चैंद्रत्वं कृत्वा कल्पायुतं दिवि॥मन्वंतर परीवृत्तं यावदिंद्रशतं शिवे॥११॥भुक्त्वा चैव भुवर्लोके भोगान् देवेषु
दुर्लभान्॥यावदायुर्ब्रह्मणोऽथ वसेत्कैलासपर्वते॥१२॥मेरुमासाद्य देवानां भवनेषु प्रमोदते॥किंपुरुषाप्सरो लोके नागविद्याध
रालये॥१३॥भुक्त्वा भोगांस्तु विपुलान्यदि स्याद्दैच्छिको भुवि॥आखंडलाधिको भूयान्महीमंडलमंडनः॥१४॥एकच्छत्राधिपो
राजा भवेद्वीजितचामरः॥जातिस्मरो भवेद्भूम्यां कृत्वा धर्मं शिवस्य तु॥पुनर्मे गणपो भूयात् नास्यांतो धर्मवर्त्मनः॥मंदरादिं प्रकु
र्वीत मम प्रासादमुत्तमं॥१६॥शिखरायुतसंयुक्तं प्रासादं दिव्यवेदिकं॥रुद्रावतारक्रीडाभी रप्सरोगणचित्रितं॥१७॥देवदानव
गंधर्वप्रतिमापरिशोभितं॥संतानपारिजातादि मंदाराद्यैरलंकृतं॥१८॥देवोद्यानोद्भवैर्वृक्षैः समंतादुपशोभितं॥सुधाविचित्रि
107 ताः सर्वाः कारयेत्प्रतिमाः शुभाः॥रंगिताः पंचवर्णैश्च तत्प्रासादे विशेषतः॥ममदेव्या गणेशस्य स्कंदभैरवनंदिनः॥२०॥
वृषाग्रैः चारुशृंगैश्च शोभितं कारयेन्नरः॥तत्प्रासादे महापीठे पुष्पमालाविराजिते॥२१॥गंधधूपादिवितते दीपमालावृतां
तरे॥नृत्यमानं त्रयीनेत्रं सोमं सोमार्धशेखरं॥२२॥मत्पार्श्वे त्वां महादेवि पश्यंतीं मत्पदांबुजं॥कृत्वा भक्त्या प्रतिष्ठाप्य स
मे प्रियतरो गणः॥मंदराद्रिप्रतीकाशैर्विमानैर्विभ्रतो सुरैः॥हावभावसमायुक्तरुद्राणीनृत्तनिर्भरैः॥२४॥गत्वा शिवपु
रं दिव्यं भुक्त्वा भोगाननुत्तमान्॥ज्ञानयोगं समासाद्य गाणपत्यं लभेन्नरः॥२५॥यः कुर्यान्मेरुनामानं प्रासादं मे महेश्वरि॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ ९६

सहस्रशृंगसंयुक्तं स्तंभसाहस्रसंयुतं ॥ २६ ॥ वेदिकातोरणोपेतं वलभीजालकान्वितं ॥ दिक्पालैर्देवसंघैश्च तत्तद्धर्मायुधान्वि

तैः ॥ २७ ॥ कल्पितं शिल्पिवर्यैश्च तत्प्रासादांतरपीठके ॥ दीपधूपसमामोदप्रसारिततदिगंतरे ॥ २८ ॥ वामदक्षिणपार्श्वस्थविष्णु

ब्रह्मादिसेवितं ॥ उमान्वितां ममैवेशि मूर्तिं संस्थाप्य पूजयेत् ॥ २९ ॥ सयत्फलमवाप्नोति न तत्सर्वं महामखैः ॥ सर्वयज्ञतपो

दानं सर्वतीर्थेषु यत्फलं ॥ लब्ध्वा विमानवर्येण जितसूर्येण याति मां ॥ निबद्धमल्लामतः कुर्यात्प्रासादं भक्तिमान्नरः ॥ ३१ ॥

सहस्रशिखरोपेतं स्तंभकुंभसमन्वितं ॥ वलभीकुलसच्छन्नं तोरणारूपमंडितं ॥ ३२ ॥ वेदिकापट्टिकोपेतं मुनिवर्यैश्च शोभि

तं ॥ वैखानसैर्बालखिल्यैर्देवगंधर्वशोभितं ॥ ३३ ॥ तादृग्विधसुधाकूप्त मूर्तिभिः परिशोभितं ॥ तत्रासने सुखासीनं चंद्र

खंडजटालकं ॥ ३४ ॥ त्रिपुंड्रफालं मां देवि योगपट्टासनोज्वलं ॥ चिन्मुद्रा द्राविताज्ञानं मुनीनां भावितात्मनां ॥ ३५ ॥ संवृतं मु

निभिस्तत्र नतिप्रांजलिभिः शिवे ॥ कृत्वा प्रदक्षिणा मूर्तिं वटमूलेप्रतिष्ठितां ॥ ३६ ॥ देवलोकं यानवर्यैः हंसयुक्तैर्विराजितः ॥

विमानैश्चंद्रगौरैश्च वृतमप्सरसां गणैः ॥ ३७ ॥ भुक्त्वाथ सुचिरंकालं देवभोगाननुत्तमान् ॥ आभूतसंप्लवं देवि पश्चान्मे ज्ञान

मैश्वरं ॥ ३८ ॥ लब्ध्वा मय्येव लीयंते भक्तियुक्तः प्रमुच्यते ॥ कुर्याद्वायः शिवे भक्त्या हिमशैलाख्यमुत्तमं ॥ ३९ ॥ प्रासादं प

रया भक्त्या दिव्यस्तंभशतैर्युतं ॥ जालिकामालिकामध्यस्तंभगुंभशतावृतं ॥ ४० ॥ वेदिकातोरणोपेतं दिव्यपीठमनोहरं ॥ धू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदीपावृतं पुष्पमालामुद्रितमेदुरं ॥ नंदिभृंगिमहाकालमूर्तिभिः परिशोभितं ॥ तिष्ठंतं मां तत्रमूर्तिं कृत्वा वृषमुखे करं ॥ सोषी
षं सोममकुटं पुष्पपीडमुमान्वितं ॥४१॥ प्रतिष्ठाप्य लभेद्गौरि विमानं सार्वगामिकं ॥ हिमशैलोपमैर्यानैः भुक्त्वा देवपुरे सुखं ॥४२॥
नंदनादिवने देवि पीत्वा ऽमृतमनुत्तमं ॥ स्रग्गंधवासो बिभ्राजदप्सरोभिः प्रमोदते ॥४३॥ यावदिंद्रायुतं देवि पश्चान्मे गणपो भवेत् ॥ नी
लाद्रिशिखराख्यं वा प्रासादं तोरणान्वितं ॥४४॥ वेदिकापङ्क्तिकोपेतं गोपानसिविराजितं ॥ पंचाशत्स्तंभविततं चित्रविद्रुमपुत्रिकं ॥ रा
जितवृषाग्रं च धूयमानपताककं ॥ वेणुवीणारवानेकं सुमधूपादिदीपितं ॥४६॥ पीठे देवि प्रतिष्ठाप्य गजघ्नीं मूर्तिमव्ययां ॥ त्रिनेत्रां
बारुचंद्रांकां गजमस्तलसांघ्रिकां ॥४७॥ देदीपितमहाशूलकरां दंष्ट्रांकुरास्यकां ॥ यानैर्वृषयुतैर्देवि तिष्ठेत्स परमेष्ठिनः ॥४८॥
लोके भोगयुतो धीमानधीते ज्ञानमुत्तमं ॥ पश्चात्तेनैव मां प्राप्य ब्रह्मपापैः प्रमुच्यते ॥४९॥ वृषभाख्यं तु यः कुर्यात्प्रासादं परमेश्वरि ॥
मेरुपं वा सुविहितं स्तंभकुंभशतावृतं ॥५०॥ राजद्वृषाग्रकलशं पुष्पमालापरिष्कृतं ॥ तत्र पीठे कालहरं मां प्रतिष्ठाप्य शांकरि ॥५१॥ का
लस्य मकुटे पादहस्तशूलेन ताडितं ॥ कालं च पतितं चाग्रे उग्रं मां चंद्रशेखरं ॥५२॥ दंष्ट्राकरालवदनं कृत्वा बेरं लभेन्नरः ॥ गाणापत्यं प्रियं
मे स्याद्विमाने नार्कभास्वता ॥५३॥ गत्वा शिवपुरं देवि ज्ञानं लब्ध्वा विमुच्यते ॥ महेंद्राख्यं तु यः कुर्यात्प्रासादं परमेशितुः ॥५४॥ नाना
लंकारशोभाढ्यं स्तंभकुंभशतावृतं ॥ गवाक्षपंक्तिमध्यस्थशिखरप्रकरान्वितं ॥५५॥ वेदिकाद्वारविहितं दृषद्भिः पिहितं दृढैः ॥ तस्मिन्वा

श्रीवर इ०७१ ९७

सनवर्येमां प्रतिष्ठाप्य त्वयासह ॥५६॥ मूर्तिंकृत्वा ताम्रमयीं राजतीं स्वर्णनिर्मितां ॥ चंद्रापीडां त्रिनयनां मंदस्मितमनोहरां ॥५७॥ म०इ०१० अ०७
वामदक्षिणभागे मे गणेशगुह संयुतां ॥ स फलं लभते मर्त्यो भुवि भाग्यसमन्वितः ॥५८॥ पुत्रपौत्रयुतो सौरेः वंशलक्षसमन्वितः ॥ रवि
संशोभियानेन पुष्पमालाविराजितं ॥५९॥ कैलासं दक्षिणं प्राप्य यक्षेंद्रार्चित भोगभाक् ॥ प्रासादं हेमकूटाख्यं कृत्वा स्तंभायुता
न्वितं ॥६०॥ गवाक्षलक्षैर्विततं यक्षप्रीतिकरं शिवे ॥ संराजद्वेदिकाकुंभ पताकावलिशोभितं ॥६१॥ तत्र सिंहासनासीन मर्धना
रीश्वरं हिमां ॥ प्रतिष्ठाप्य लभेन्मुक्तिं भुंक्ते भोगाननुत्तमान् ॥६२॥ विषयान्विषवत्त्यक्त्वा निःशेषं मामवाप्नुयात् ॥ हेम्नावा राजतेना
पि ताम्रकांस्यमुपेत्तलैः ॥६३॥ मणिभिः स्फटिकैर्वापि विद्रुमैर्वा महेश्वरि ॥ आढ्यो वा द्रव्यरहितो भक्त्या कुर्याच्छिवालयं ॥६४॥
मृन्मयात्कोटिगुणितं पुण्यं स्यात् दारुभिः कृतं ॥ कोटिकोटिगुणं पुण्यं मृत्काष्ठादिष्टकामये ॥६५॥ त्रिगुणं चेष्टकादिभ्यो शैले
देवि शिवालयं ॥ दृषद्भिः कृष्णवर्णैश्च ततः कोटिगुणं भवेत् ॥६६॥ मृच्छैलयोः समं ज्ञेयं फलमाढ्यदरिद्रयोः ॥ वने वापि नदी
तीरे पुण्यपर्वतमूर्धसु ॥ तीरे नदीपतेर्देवि भक्त्या कुर्याच्छिवालयं ॥ स्थावरं शिवलिंगस्य गेहे वा पुरुषाधिकं ॥६८॥ न कार्यमा
लयं देवि चरलिंगस्य शंकरि ॥ यत्र क्वापि शिवे भक्त्या कुर्याच्छैलैः शिवालयं ॥६९॥ जीर्णं वा पतितं वापि खंडितं स्फुटितं
तथा ॥ पूर्ववत्कारयेद्यस्तु सर्वस्मात्ल्लभते फलं ॥७०॥ नवादपि महादेवि जीर्णोद्धारं प्रशस्यते ॥ प्रासादं गोपुरं वापि प्राकारं मंडपं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुवा॥७१॥कर्तुरभ्यधिकं पुण्यं लभते नात्र संशयः॥भक्त्या वित्तानुसारेण कुर्यात्प्रासादमक्षयं॥ अन्ये (ल्पे) महति वा पुण्यं सम
माख्यसरिद्रयोः॥वित्तशाठ्येन यः कुर्यात्पुण्यमाढ्योपि मानवः॥न तत्फलमवाप्नोति प्रलोभाक्रांतमानसः॥७२॥तस्मान्मदा
लयं देवि कुर्याद्वित्तमवंचयन्॥अष्टेष्टकाभिरपि वा कुर्याद्देवि शिवालयं॥७३॥प्रसादार्थं महेशस्य प्रासादं परमेश्वरि॥तथैवान्य
स्य करणे साहाय्यमपि वा स्वयं॥७४॥वाचा धनेन वा देवि स्वस्य शक्तौ सदाशिवे॥कुर्याद्विघ्नकरो यस्तु नरके पच्यते चिरं॥७५॥
यावद्वर्षशतं गौरि यः शिवालयभंगकृत्॥किंपुनर्बहुनोक्तेन भक्त्या वित्तानुसारतः॥७६॥कुर्याद्देवि शिवक्षेत्रं जन्म प्राप्येह मा
नवं॥वापीकूपकरा ये स्युः तडाकं वा शिवालये॥७७॥यावत्तद्बिंदुतोयानां सहस्रं परिवत्सरं॥सुधासागरमध्यस्थो निवसेत्स पिताम
हैः॥७८॥वनवाटिं करो यस्तु पुष्पार्चार्थं महेश्वरे॥एकं बिल्वतरुं वापि रोपयेद्यः शिवालये॥७९॥यावत्तत्पत्रकुसुमबीजमूल
195 फलानि च॥तावद्वर्षसहस्राणि मम लोके महीयते॥८०॥उत्सवार्थं महेशस्य वाहनानि चकार यः॥गजमश्वं भूतगणं वृषं चा
पि महेशितुः॥देवीस्कंदगणेशानां मारवुकेकिहरीमुमे॥सौवर्णं रजतं वापि दारुणा रंगचित्रितं॥कृत्वा भवेद्गणेंद्रो सो मम कैलास
मोतिषु॥रथं च मम देवेशि ध्वजकुंभपरिष्कृतं॥८३॥सहस्रशतचक्रं वा दशचक्रं मनोहरं॥उत्तमं शतचक्रं स्यात्तु दशचक्रं तु मध्य
मं॥८४॥अधमं षट्चतुश्चक्रं रथं शिल्पविदो विदुः॥तादृक्फलैः परिवृतं पुष्पमालापरीवृतं॥८५॥कर्बर्द्धि देवगंधर्वैः ब्रह्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११
१८

सारथिमुन्नतं॥ कृत्वा मल्लोकमाप्नोति पुनरावृत्तिवर्जितं॥ ८६॥ गृहोत्सवार्थे कुर्वीत पुरुषो ध्वरथं शिवे॥ ॥ईश्वर उवाच॥ ॥मुदे शिभ

क्त्या परमेश्वरस्य कृत्वाब्द लोच्छे रपि रुद्रलोके॥ प्रयाति दिव्येन विमानवर्यैः सुरेंद्र पद्मोद्भवविष्णुवंद्यः॥ ८८॥ बाल्येन लोच्छेन शिवं च कृ

त्वा मृदापि वा पांसुभिरीशलिंगं॥ संपूज्य पुण्यैर्लभते गणेंद्रतां भक्त्या कृता नाम गणाख्य पुण्यं॥ ८९॥ प्रासादप्रसरं महेशसद्नं कृत्वा प्र

सादं लभेत्॥ अंभोमुख्य गणेंद्रतामुपगतो मंदारवृंदार्चितः॥ ९०॥ तस्मिन्नीश्वरमूर्तयः सुविहिताः संस्थाप्य मे धायुतं॥ पुण्यं प्राप्य स

मोदते गिरिसुते पाताद्दिशं कोज्झितः॥ ९१॥ यो वाहनानि रुचिराणि गजाश्वभूत कैलासवर्यमगजे प्रकरोति भक्त्या॥ दिव्यं सुधांशुवरदी

धितिसन्निभांगं कृत्वा वृषं मम महोत्सव कृत्समुक्तः॥ ९२॥ कृत्वा रथाधिपतये वरचारुचक्र प्रोद्यत्पताक कनकोत्तम कुंभमौलिं॥ वे

दाश्च सारथिविधिं रथमीशमूर्तिं संस्थाप्य कर्षति महोत्सव कृत्समुक्तः॥ ९३॥ ॥इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे

प्रासादकरणं नाम सप्तमोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवाय नमः॥ ॥श्रीईश्वर उवाच॥ ॥

शृणु देवि प्रवक्षामि सूक्ष्मं धर्मं ममैव हि॥ प्रसादजनकं साक्षादल्पायासं महत्फलं॥ गोप्यमेतत्प्रयत्नेन नाभक्तेषु प्रकाशयेत्॥ रहस्यं नो

क्तपूर्वं मे तस्माद्यत्नेन धारय॥ २॥ दरिद्रोपि शिवे कर्तुं प्रासादं वा शिवालयं॥ संमार्जनादिभिर्वापि प्रसादं शांभवं लभेत्॥ ३॥ कृत्यर्थं वा महा

देवि शिवक्षेत्रे च कर्म कृत्॥ संमार्जनं तु यः कुर्यान्मार्जन्या मृदु सूक्ष्मया॥ ४॥ चांद्रायणायुतस्येह फलमामासाद्य शिवालये॥ नाहार वस्त्र जीर्णा

धि० प्र०
अ० ८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

याबंध्यायाक्षीणवत्सका॥५॥रोगार्तायागोमयंतु नाग्राह्यमुपलेपने॥अन्याभ्योगोमयंग्राह्यंस्थानेवापतितंभुभे॥६॥उपर्यधश्चसंत्य
ज्यगृह्णीयान्मध्यमंभुभं॥वस्त्रपूतेन तोयेन यःकुर्यादुपलेपनं॥७॥शिवालयेंति रात्रस्य यज्ञस्यफलमाप्नुयात्॥व्रीहिपिष्टैःप्रकुर्याद्योरं
गवल्लीं ममालये॥८॥अग्निष्टोमस्यसफलं प्राप्नोतीशो नसंशयः॥पंचवर्णकपिष्टैश्च पद्मशंखसमाकृति॥९॥रंगवल्लीशिवस्याग्रे स्वस्तिकाद्यै
रलंकृतां॥वाजिपेयस्यसफलं नरःस्त्रीवासमाप्नुयात्॥१०॥कदलीस्तंभवितनंतोरणाद्यैरलंकृतं॥शिवालयंप्रकुर्याद्यःसचोक्तंफलमाप्नुयात्॥११॥
पात्राणिशिवपूजार्थमाहरेच्चयथाबलं॥मृद्रुमदारुजानीशेधातुजान्युत्तरोत्तरं॥१२॥अस्मपात्राद्दारुमयंबिल्वोदुंबरपर्णजं॥स्नानार्घ्यदानवि
धिषुप्रशस्तंशिवपूजने॥१३॥दारवेणार्घ्यपात्रेणयद्दत्वालभतेफलं॥तस्माच्चतुर्गुणंपुण्यंशिवेमृत्पात्रदानतः॥१४॥ताम्रपात्राद
पिश्रेष्ठंकांश्यपेत्तलसंभवं॥ताम्रपात्राभिषेकेणफलंशतगुणंभवेत्॥१५॥पलासपद्मपत्राभ्यांअर्घ्यंताम्रसमंभवेत्॥रौप्यपात्रेण
४० विज्ञेयंतस्माल्लक्षगुणाधिकं॥१६॥सुवर्णपात्रंचततोकोटिदेविगुणोत्तमं॥एवंस्नानार्घ्यनैवेद्यबलिधूपादिभिःक्रमात्॥१७॥
पात्रोत्तरविशेषेण फलंस्यात्परमेश्वरे॥मृत्कुंभात्ताम्रकुंभेन स्नानंशतगुणोत्तरं॥(आपःक्षीरकुशाग्राणिघृतंदधिचतंडुलाः॥)१८॥
रौप्यंलक्षाधिकंपुण्यंहैमंकोट्याधिकंभवेत्॥अर्घ्यंपुष्पजलोपेतंयःशिवायनिवेदयेत्॥१९॥सपूज्यःसर्वलोकेषुशिववन्मोद
तेभृशं॥गंधतोयेनसंमिश्रंपुष्पार्घ्यादुत्तरोत्तरं॥२०॥पंचगव्यसमायुक्तमर्घ्यंशतगुणोत्तरं॥आपःक्षीरकुशाग्राणिघृतंदधिच

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवा०र्ह०११ १९

तंडुलाः॥२१॥तिलाः सिद्धार्थकाश्चैव मर्घ्यमष्टांगमुच्यते॥घृतं विनाक्षतं ग्राह्यमिति केचित्प्रचक्षते॥२२॥यवतंडुलगोधूममा मह०प०अ०८
षैरक्षतमादिशेत्॥अर्घ्यमष्टांगमापूर्य लिंगमूर्ध्नि विशोधयेत्॥२३॥दशवर्षसहस्राणि शिवलोके महीयते॥देवाग्निकार्यमुद्दिश्य
देहशुद्ध्यर्थमेव च॥२४॥कपिलामाहरेद्विद्वान् मुनिदेवादिवंदितां॥अन्यवर्णगवां क्षीरं स्नाने नापि महेश्वरि॥२५॥कपिलापंचगव्ये
न घृतक्षीरयुतेन च॥स्नानं दशगुणं ज्ञेयं इतरस्मान्न संशयः॥२६॥स्नानं फलं शतं ज्ञेयमभ्यंगः पंचविंशति॥फलानां द्वे सहस्रे तु महा
स्नानं विदुः शिवे॥२७॥पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात्॥ईशादिमंत्रैः संस्नाप्य शिवलोकमवाप्नुयात्॥२८॥योमां तिलकतैले
न करयं त्रोम्र्नवेन च॥शिवाभिषेकं कुरुते स मे प्रियतमो भवेत्॥२९॥अभिषेको दश फलः स्नानार्धं शतमीश्वरि॥महास्नाने प्यशक्तस्य
कुंभं द्रोणत्रयं शिवे॥३०॥पंचविंशत्फलेनैव लिंगेभ्यंगं तु कारयेत्॥घृतेन वाथ तैलेन गंधयुक्तेन वा शिवे॥३१॥शिवस्य सर्पिषा स्नानं
प्रोक्तं फलशतेन वै॥पलानां द्विसहस्रेण महास्नानं विधीयते॥३२॥तस्यार्धं मधुना देवि दध्ना तत्समं मीश्वरि॥तत्पादतः शर्करया स्नानमे
तद्धि वेम म॥३३॥क्षीरस्नानायुतं देवि दध्ना घृतभवं ततः॥मधुना सितया देवि पुण्यं स्यात्तच्छताधिकं॥३४॥पादस्नानं महादेवि कुंभत्रय
मितीरितं॥क्षीरस्नानं महेशस्य कपिलेनेतरेण वा॥३५॥कुर्यात्तस्यापराधानि क्षमते शंकरः शतं॥खंडदध्ना यो भिषिंचेत्सहस्रं क्षमते शि
वः॥३६॥वर्षकोटिसहस्रैस्तु यत्पापं समुपार्जितं॥घृताभिषेको लिंगस्य दहेत्सर्वं न संशयः॥३७॥लिंगस्य दर्शनं पुण्यं दर्शनात्स्पर्शनं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरं॥ स्पर्शनाद्दर्शनं श्रेष्ठं घृतःस्नानमतःपरं॥ ३८॥ मधुस्नानेन देवेशि अश्वमेधफलं भवेत्॥ मधुखांडत्रयं देवि गिरिद्रोणि भवं वरं॥
॥ ३९॥ मध्यमं पुष्परसजं वल्मीकं कृष्णमाधवं॥ सितया स्नाप्य मां देवि सर्वजीववधोद्भवैः॥ ४०॥ पापैर्न लिप्यते गौरि पुण्यं महदवाप्नुयात्॥
कृष्णाष्टम्यां सोमवारे प्रदोषे वा महेश्वरि॥ ४१॥ घृतस्नानकरो यस्यास्तत्फलं लभते शिवे॥ कुलैकविंशमुत्तार्य शिवलोके महीयते॥ ४२॥ क्षीर
स्नानात्क्षरत्यंहो देवि जन्मशतार्जितं॥ क्षीरेणाद्धाज्ये नापि सितया मधुना फलं॥ ४३॥ अभिषिच्य मुदा लिंगे लभेत्पर्वणि वा शिवे॥ संक्रांतावयने
पाते ग्रहणे सोमसूर्ययोः॥ ४४॥ अयुतं योगवां दद्या दोग्ध्रीणां शोभवेषु च॥ सवस्त्रहेमवत्सानां द्विजवर्येषु तल्लभेत्॥ नारिकेलोदके नापि यो भिषिं
चेन्महेश्वरि॥ चरं वा स्थिरलिंगं वा स्नानमात्रेण पुण्यभाक्॥ गवामयनयज्ञस्य कदलीफलमानतः॥ फलानां च सहस्राणि स्नानं रंभाफलैर्विदुः॥ ४७॥
शतं वा दशकं वापि मध्यमाधममुच्यते॥ स्नाप्य रंभाफलैर्लिंगं उर्वरादानजं लभेत्॥ ४८॥ कौशेयः फनसानां तु अभिषेके शतं शिवे॥ सहस्रपरमं देवि शतं
२०१ मध्यममुच्यते॥ ४९॥ एषामेकतमं स्नानं गोदानदशकं फलं॥ स्नानमिक्षुरसेनापि यो लिंगे सकृदाचरेत्॥ ५०॥ लभेच्छ्रियं वंशशतैर्ब्रह्मलोके महीय
ते॥ पक्वाम्रसुरसैर्देवि अभिषिच्य महेश्वरं॥ ५१॥ जंबीररसैर्यो लिंगं स्नापयेद्भक्तिसंयुतः॥ विधूयपापकलिलं सोमवद्राजते शिवे॥ ५२॥ कुशतोयेन यो
लिंगं स्नाप्य भक्त्या सकृन्नरः॥ कांचनेन विमानेन ब्रह्मलोके महीयते॥ ५३॥ गंधचंदनतोयेन यो लिंगं स्नापयेच्छिवे॥ गंधर्वलोकमाप्नोति दिवि गं
धर्वपूजितः॥ ५४॥ पुष्पोदकेन सावित्रं कौबेरं हेमवारिणा॥ रत्नोदकेन चाप्यैन्द्रं लोकं संप्राप्य मोदते॥ ५५॥ द्रोणत्रयं धसां राशिं द्रोणपुष्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११
२०

निभांशिवे॥दत्वालिंगस्यमौलौमेसिक्थेसिक्थेऽश्वमेधजं॥५६॥पुण्यंसंभवतेगौरि शिवरात्रौशताधिकं॥शितेनभस्मनास्नाप्य गंधिनाशो

धितेनच॥५७॥द्रोणपंचकमानेन सोमधाम्निप्रमोदते॥कूपोदकाश्चताडाकंतडकाद्वाप्यमुत्तमं॥५८॥नदीनांचैवसर्वासांपुण्यानांचा

ब्धिसंगजं॥वरंगांगेमहादेविस्नानेपर्युषितंनमे॥५९॥वस्त्रपूतेनतोयेनयोलिंगंस्नापयेत्सकृत्॥सर्वकामसमृद्धात्मावारुणंलोकमाप्नु

यात्॥६०॥पाटलोत्पलपद्मानिकरवीराणि चंपकं॥स्नानकालेबुयोज्यानि कल्कानिसुरभीणिच॥६१॥तेनाभिषिच्यलिंगेमे राजसूयफ

लंलभेत्॥कर्पूरागरुतोयेन योलिंगंस्नापयेत्सकृत॥६२॥सर्वपापविनिर्मुक्तःप्रयातिशिवमंदिरं॥पितॄन्नुद्दिश्ययोलिंगंस्नापयेच्छि

तवारिणा॥६३॥तृप्ताःसर्वेप्रयास्यंतिपितरोनरकादपि॥लिंगंस्नाप्यमहादेविजलविच्छिन्नधारया॥६४॥ग्रीष्मेगलंतिकाभिर्वानेरं

तर्यदिवानिशं॥समेगणेशतुल्यस्स्यादश्वमेधायुतंलभेत्॥६५॥श्रीखंडद्रवसारेणयोविलिंपेदुमासखं॥ग्रीष्मर्तौ सकलर्तौवापौंडरी

कफलंलभेत्॥६६॥कृष्णागरुंदेवदारुप्रभवश्चीतरोरपि॥गंधंदत्वाचंद्रमौलेद्वादशाहफलंलभेत्॥६७॥त्रिपलं चंदनंप्रोक्तं कुंकुमंतत्स

मंस्मृतं॥कर्पूरंतुतदर्धंस्यादघनसारश्चतत्समः॥६८॥पलमेकंतुकस्तूर्या मेलनाद्यक्षकर्दमः॥यक्षकर्दमपंकेन योविलिप्यमहेश्वरं॥६९॥

साग्निचित्यायुतमखफलमाप्नोतिमानवः॥लिंगमूर्तेर्ममैकंतु कस्तूर्यामेलनाद्यक्षकर्दमः॥७०॥यक्षकर्दमपंकेनयोविलिप्यमहेश्वरं॥

साग्निचित्यायुतमख फलमाप्नोतिमानवः॥७१॥लिंगमूर्तेर्महेशस्य शिवस्यपरमात्मनः॥स्नानकालेप्रकुर्वीत नीर्यत्रिकरवंशिवे॥७२॥

म० १०६
अ० ०८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेरीमर्द्दलशंखानां काहलं वर दुंदुभिः॥ वीणावेणु महाढक्का पटहानकडंबरः॥७३॥ कांश्यझल्लरवाद्येभ्यः चर्मवाद्यं विशिष्य
ते॥ ततो मुखेन चाध्मातं ततस्तंत्री भवंतिते॥७४॥ एवं वादित्रघोषैयः प्रकुर्यात्स्नानकर्मणि॥ वंशलक्षयुतो धीमान्ममलोके महीयते॥
॥७५॥ नाट्या(ट्या)र्थ मंगनाजालं लयशिक्षासमन्वितं॥ तरुणं रूपसंपन्नं गेयवादित्रकोविदं॥७६॥ दत्वा लिंगालये भद्रे सर्वां ऋद्धिमवा
प्नुयात्॥ घृताभ्यंगे घृतस्नाने लिंगं स्यात् यद्विरूषितं॥७७॥ यवगोधूमजैश्चूर्णैः कषायैर्गंधयोजितैः॥ कवोष्णेनांबुनादेवि स्ना
पयेत्तदनंतरम्॥७८॥ घर्षयेद्विल्वपत्रैश्च लिंगपीठं तु शोधयेत्॥ दश धेनुसहस्राणि ददतः फलमाप्नुयात्॥७९॥ कपिलापंचगव्ये
नकुशवारियुतेन च॥ स्नापयेन्मंत्रपूतेन ब्रह्मस्नानमघापहं॥८०॥ ॥ईश्वर उवाच॥ ॥शंखानां च सहस्रकैश्च शतकैः धारा
सहस्रौघकैः कुंभैश्छिद्रशताढ्यकैर्वरगवां शृंगाग्रधारादिभिः॥ स्नाप्यांबुप्रभवैर्महेशजनिम श्रीरुद्रमंत्रैः शिवे क्षिराज्यादि दधीम
८०२ धु प्रभवजासारोरुधारायुतं पुण्यं प्राप्य समोदते गिरिसुते कैलासमौलौ गणः॥८१॥ ॥इति श्रीशिवरहस्ये महादेवाख्ये एका
दशांशे अष्टमोध्यायः॥८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीशंकराय नमः॥ ॥पार्वत्युवाच॥ ॥पुष्पैः
कतिविधैः पूजा कर्त्तव्या कथयस्व मे॥ ॥ईश्वर उवाच॥ ॥पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः॥ अपर्युषितनिश्छिद्रैः
प्रोक्षितैर्जंतुवर्जितैः॥ आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवं॥२॥ पुष्पजातिविशेषेण भवेत्पुण्यं ततोधिकं॥ तपः शीलगुणे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०७१
२१

पेते पात्रे वेदस्य पारगे ॥४॥ दत्वा सुवर्णमयुतं तत्फलं कुसुमे शुभे ॥ दश दत्वा सुवर्णानि यत्फलं तदवाप्नुयात् ॥२४॥ अर्कपुष्पेपि चैक महा०१० अ०६

स्मिन् शिवाय विनिवेदयेत् ॥ एवं पुष्पविशेषेण फलं तस्य ततोधिकं ॥५॥ पुष्पजातिविशेषेण यथा स्यात्तन्निबोधत ॥ अर्कपुष्पसह

स्रेभ्यो बकपुष्पं विशिष्यते ॥६॥ बकपुष्पसहस्रेभ्यो एकं धुर्धुरकं परं ॥ धुर्धुरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ॥७॥ बृहत्पुष्पसहस्रेभ्यः क

रवीरं विशिष्यते ॥ करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ॥८॥ बिल्वपत्रसहस्रेभ्यो पद्ममेकं विशिष्यते ॥ पद्मपुष्पसहस्रेभ्यो द्रोणपुष्पं विशि

ष्यते ॥९॥ द्रोणपुष्पसहस्रेभ्यो कुशपुष्पं विशिष्यते ॥ कुशपुष्पसहस्रेभ्यो समीपुष्पं विशिष्यते ॥१०॥ शमीपुष्पसहस्रेभ्यः श्रीमन्नीलोत्प

लं वरं ॥ सर्वेषामेव पुष्पाणां प्रवरं नीलमुत्पलं ॥११॥ नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ॥ अलाभे तु सहस्राणां तदर्धार्धेन मालिकां

॥१२॥ शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥ कल्पकोटिसहस्राणि कल्पकोट्ययुतानि च ॥१३॥ वसेच्छिवपुरे श्रीमान् शिवतुल्यप

राक्रमः ॥ शेषाणां पुष्पजातीनां यत्फलं परिकीर्तितं ॥१४॥ तत्फलस्यानुसारेण शिवलोके महीयते ॥१५॥ करवीरसमा ज्ञेया जाती विजयपा

टला ॥ श्वेतमंदारकुसुमं सितपद्मसमं भवेत् ॥१६॥ नागचंपकपुन्नागधुर्धुरकसमाः स्मृताः ॥ केतकी माधवा (गधा) चैव ह्यादिका च मदंतिका ॥

॥१७॥ शिरीषसर्जबंधूककुसुमानि विवर्जयेत् ॥ अंकोलकूर्मपत्रं च करजेंदु तरुद्भवं ॥१८॥ वैभीतकानि पत्राणि तत्पुष्पाणि विवर्जयेत् ॥

निर्गंधान्युग्रगंधानि यानि तानि विवर्जयेत् ॥१९॥ गंधवंत्यपवित्राणि यानि तानि विवर्जयेत् ॥ गंधहीनमपि ग्राह्यं पवित्रं यत्कुशादिकं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सात्त्विकं तद्धि कुसुममपवित्रं तु तामसं॥ कनकानि कदंबानि रात्रौ देयानि शंकरे॥ दिवाशेषाणि पुष्पाणि दिवा रात्रौ च मल्लिका॥
पात्रौ स्वर्णाकदंबानि अर्धरात्रौ च मल्लिका॥२२॥ प्रहरं तिष्ठते जाति करवीरमहर्निशं॥ कीटकेशापविद्धानि शीर्णपर्युषितानि च॥
॥२३॥ स्वयंपतितपुष्पाणि त्यजेदुपहृतानि च॥ मुकुलैर्नार्चयेद्देवं अपक्वं न निवेदयेत्॥२४॥ फलं क्वथितविक्लेन यज्ञात्पक्वमपि
पित्यजेत्॥ अलाभे सति पुष्पाणां तत्पत्राणि निवेदयेत्॥२५॥ पत्राणामप्यलाभेन फलान्यपि निवेदयेत्॥ फलानामप्यलाभे भावे
तु तृणगुल्मौषधीरपि॥२६॥ औषधीनामभावे तु मानसं प्रवरं शुभं॥ प्रत्येकमुक्तपुष्पेषु दशासो वर्णकं फलं॥२७॥ स्वकृनिबंधे
षु तेष्वेव द्विगुणं फलमिष्यते॥ यः सुगंधैर्मुक्तपुष्पैः लिंगं सम्यक् प्रपूजयेत्॥ मालाभिर्वा सुगंधाभिः सोऽनंतफलमाप्नुयात्॥ बिल्व
पत्रैरखंडैर्यः सकृल्लिंगं प्रपूजयेत्॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ धत्तूरैः केनेनयो लिंगं सकृत्पूजयते नरः॥ स गोलक्ष
४०३ फलं प्राप्य शिवलोके महीयते॥ बृहतीकुसुमैर्भक्त्या यो लिंगं सकृदर्चयेत्॥३०॥ गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत्॥ म
ल्लिकोत्पलपद्मानि जातीपुंनागचंपकैः॥३१॥ अशोकश्वेतमंदार कर्णिकारसुमानि च॥ करवीरार्कमंदारशमीपाटलकेसरं॥३२॥
कुशापामार्गकुमुदं दंवद्रोणकानि च॥ सौगंधिका समानाग सिंधुशेफालिकार्जुनैः॥३३॥ तुलसी कुरवांकोल नागचंचलसंभवैः॥
नंद्यावर्तोश्च शाम्यारुतिलकं नवमालिका॥३४॥ तरुपुंनागदंती च मालती कूटजातयः॥ पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवं॥३५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ २२

सचयत्फलमाप्नोति तदेकाग्रमनाः शृणु ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सर्वकामिकैः ॥३६॥ पुष्पमालापरिक्षिप्तैः गीतवादित्रनिःस्वनैः ॥ महा०पु० अ०९
तन्त्रीमधुरवाद्यैश्च स्वच्छंदगमनालसैः ॥३७॥ रुद्रकन्यासमाकीर्णैः देवदानवकिन्नरैः ॥ चामरैर्वीज्यमानैश्च स्तूयमानसुरासुरैः ॥३८॥
गच्छेच्छिवपदं दिव्यं यत्र वा रुचिरं भवेत् ॥ येस्तैर्वापीह कुसुमैर्जलस्थलरुहैः शिवं ॥३९॥ संपूज्य प्रोक्षिते भक्त्या शिवलोके महीय
ते ॥ शिवस्योपरि यः कुर्यात्सुरवसंपुष्पमंडपं ॥४०॥ शोभितं पुष्पमालाभिरापीडं तत्फलं विन ॥ अत्याश्चर्य महायत्नैः दिव्यपुष्पोपशो
भितैः ॥४१॥ सर्वोपरिचर श्रीमान् गच्छेच्छिवपुरं सुरवी ॥ अनेककारविन्यस्तैः सुगंधकुसुमैर्गृहं ॥४२॥ यः कुर्यात्सर्वकाले षु विचि
त्रकुसुमोज्वलं ॥ सुपुष्पकविमानानां सहस्रैः परिवारितः ॥४३॥ दिव्यस्त्रीसुरवसंभोगक्रीडारतिसमन्वितः ॥ अक्षयं मोदते का
लं मतिरं शेत शाश्वतनः ॥४४॥ शिवादिसर्वलोकेषु यत्रेष्टं तत्र याति सः ॥ पूजासु भक्तिविन्यास वेदनादिषु सर्वदा ॥४५॥ फलमेवं
समासेन दातुर्वित्तानुसारतः ॥ फलमिष्टं समाप्नोति लिंगं संपूजयन्नरः ॥४६॥ शिवत्वसमुपस्थानं दवन्मोदते चिरं ॥ लिंगवेदी भवेद्देवी
लिंगं साक्षान्महेश्वरः ॥४७॥ तयोः संपूजनं भक्त्या देवीदेवश्च पूजितो ॥ स्वयमुत्पाट्य पुष्पाणि यः शिवं पूजयेत्सदा ॥४८॥ ता
नि साक्षात्प्रगृण्हाति तद्भक्तः सततं शिवः ॥ यः कुर्यात्तु शिवारामं आम्रबिल्वादिशोभितं ॥४९॥ जातीविजयराजार्जुनकरवीरार्क
कुब्जकैः ॥ पुन्नागबकुलैश्चैव अशोकोत्पलचंपकैः ॥५०॥ कदलीयूथहेमाद्यैः तस्य पुण्यफलं शृणु ॥ यावत्तत्पत्रकुसुमबीज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूलफलादिकं ॥५१॥ तावद्वर्षसहस्त्रेण रुद्रलोके महीयते ॥ नपर्युषितदोषोस्ति बिल्वपत्रस्य शंकरि ॥५२॥ बिल्वानां चूर्णमपि वा
पातयेल्लिंगमूर्धनि ॥ नाबिल्वं पूजयेल्लिंगं अन्ये तन्नाम यो जयेत् ॥५३॥ अपामार्गैः दर्भपत्रैः पूजने पत्रसंभवैः ॥ अहर्निशं कृतैः
पापैः मुच्यते नात्र संशयः ॥५४॥ पत्रेषु बिल्वपत्रं स्यात्पुष्पे नीलोत्पलं प्रियं ॥ तत्तत्कालभवं चान्यत्प्रियं मे परमेश्वरि ॥५५॥ प्र
हरं तिष्ठते जाजी करवीरं महर्निशं ॥ तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च ॥५६॥ नपर्युषितदोषोस्ति बिल्वस्या वर्षमीश्वरि ॥
पद्मं पंचदिनात्त्याज्यं शेषं पर्युषितं दिनात् ॥५७॥ एभिर्यः लक्षपुष्पैर्मां समभ्यर्च्यैव मुक्तिभाक् ॥ तस्याहं मुक्तिदं ज्ञानं प्रयच्छामि ये
वशंकरि ॥५८॥ ॥ईश्वर उवाच॥ ॥बिल्वापामार्गजाजी तुलसी शमि बृहत्केतकी भृंगदूर्वा ॥ मंदांभोजाहिदर्भा मुनिबक
गरब्रह्मकल्हारमल्ली ॥ पंचाश्वारातिकुंभीदमनमरुबका बिल्वतोहानिशस्ता ॥ एतत्पर्युषितं नचैव कलितं वृत्तैर्विहीनां शिवे
२०४ ॥५९॥ दुर्गंधाद्युपहं न्नकेतकमहापद्मादिना च्येंशिवे ॥ छित्वा नैव निपातयेत्सुमनुमे संपूर्णमेवार्चयेत् ॥६०॥ सौवर्णेषु च राज
गर्भकलितै नौ पर्युषत्वे विधिः ॥ स्वारामोद्भवमेव पुष्पमगजे भत्त्यू नार्हं भवेत् ॥६१॥ नो भूद्रुक्रय तब्धमाहृतमधो यात्येव तत्पूज
नात् ॥ भूमौ वा पतितैरपि स्पृशातिचे स्नानाद्विहीनो नरः ॥६२॥ पुष्पे त्वेवमयं विधिः भवति मे नो बिल्वपत्रोत्तमे ॥ भुकारव्यपत्रं च
कपित्थपत्रं निर्गुंडिका वारण बिल्वपत्रं ॥ पंचैव बिल्वानि ममेशि पूजने प्रशस्तरूपं प्रियमेव बिल्वं ॥ वसुधाराधिपमित्रपाद पूजा

शिवरह०११
२३

म०ह०५०
अ०

वसुधाधवरहारपादसाराः॥६४॥सकृदारग्वधपुष्पतोर्च्यलिंगे सकलप्राणिवधोत्थपापमुक्तः॥गौरीपल्लकलिंगपूजनरतो मल्ली
भिरेवादरान्मल्लीभिर्नियमेन मल्लयरतो गल्लस्य वाद्यं चरन्॥ इल्लीलास्यलयानुगे मम कृपावल्लीप्ररोहं गता तस्मिन्नेव समुल्लसत्य
नुदिनं सल्लापतस्तस्य हि॥६६॥शम्याकबंधूकमधूककिंशुकैः धत्तूरकार्कैश्च बकैस्समर्च्य। न शोकभूलं लभते मनुष्यो प्यशेष
सौख्यं लभते धरायां॥ गर्जंति पापानि किलांड्रि कल्ये मन्येर्जुनीसुमगणैर्मम पूजकश्चेत्॥ तर्जेत्सवैयमभटौघकुलानि तस्य भर्जे
तिफालफलकीकलिताक्षराणि॥ कः शोकशंकावसरो भवानि अशोककाशार्चनवंशकोटे॥६८॥परा कृकृच्छ्राचरणादपीष्टं व
राककस्यापि विशोध्यमंहसं॥बकुलार्चनतो न चाकुलो भवते हीनकुलोपि लिंगमौलौ॥ सहिकालानलजालफालमूलं नहि पश्ये
त्किल शैलबालकन्यके॥ परिभद्रसुमपूजया शिवे वीरभद्रगणपो मम ल्हीतः॥भद्रमेव लभते जितनंदी रुद्ररूप एव सभवेन्न दरिद्रः॥
शिवेमरुवकैर्बकैर्दमनकैश्च सच्चंपकैः तथा कुरुबकैर्ध्रुवैः॥७१॥ कनकनागपुंनागकैः समर्च्य शिवमंहसां प्रवरराशिपारंगतो
प्युताहरहरेकमप्यतुलतुंगलिंगे मम॥७२॥कदलीफलपुष्पपूजया दलितान्येव भवंति पातकानि॥ गलितान्यथ तस्य दुःख
जालान्यमितान्यप्यथ सत्यमेव गौरि॥ ध्रुवं लोध्रैर्वधुः ध्रुवशतजकालेप्यचलितो चलेमे शैलांगजे शिवशिरसि पुष्पार्चकवरः॥७३॥
नथा जंबूनिंबप्रभवसुमसेफालिकुसुमैः कुरंटैरर्चा मे भवति कुटजैरप्यतुलिता॥ कुशकाशसुमार्चको यदि स्यात् मयि भक्तोंबरकेश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिंगे॥७५॥यमपाशकशाभिघातदुःखंनभवेज्जातुकदाचिदस्यगौरी॥भूलास्वपामार्गदलैःसमर्च्यलिंगंममांगेविशतेसधन्यः
॥७५॥कनिष्ठजन्मापिसगर्भदुःखंनैवाप्नुयाज्जातुसुदर्भतोद्यं॥जितेनंमदसौरभैरसमबिल्वपुष्पैर्दलैःसुसौरभसुमैः॥शिवेनव
वसंतकालोत्थितैःममध्वजानिमार्चनंयदिलभेतभाग्यान्निशं सुवर्केतकीकुसुमपूजकोधन्यधीः॥७७॥यःपुंडरीककुसुमैः
नवचंद्रखंडलीलालकाकलितलिंगसूपूजकश्चेत्॥आखंडलादिसुरवंदितपादपीठश्चंडांशुजातवदनंनसजातुपश्येत्॥७८॥
कमलैरमलैर्महेशलिंगंशतपत्रैःशतपत्रमित्रनेत्रं॥परिपूज्यलभेतकलत्रपुत्रंमखसत्रादधिकांतपुण्यवृद्धिः॥७९॥बिंबाभदा
डिंबकदंबपुष्पैरंबापतेःप्रियतमोत्तमचारुलिंगं॥वृंदारवृंदोत्तममौलिवंद्योबंधाद्विमुक्तिमघगंधमुमेलभेत्न॥८०॥अतसीतु
लसीभिरीशलिंगंकुमुदैरप्यमदैर्मुदाभवानि॥सकृदीश्वरीपूज्यवन्यपुष्पैःयदिसमान्यनरोभवेत्सधन्यः॥८१॥अर्कद्वयंचक
४०५ खीरमुनींद्रपुष्पैःधात्रीपवित्रकुसुमैर्वरजातिकाभिःद्रोणैश्चनंदिकुसुमैरसमैःकदंबैः॥सेमंतिकात्रयमुमेपरिपूज्यधन्यः॥८२॥
जातेनकिंतेननपारिजातैःपूजाकरंयस्यनमानसंस्यात्॥मंदोपिमंदारसुपुष्पपूजयावाचस्पतिंधिक्कुरुतेसभासु॥शमीकुसुमपू
जयासुमशरारिलिंगेशिवेशरारुखनीरगोप्युरगवैरिवेगातिगः॥भवोघचिरसंभृतेरघवराब्धिमध्यंनरोनिरंतरमनुस्मरेच्छमन
जातभीत्युज्झितः॥८४॥सर्वावमिधशतकादपिदूर्वयार्च्याशर्वेलभतिपुण्यफलंचसर्वं॥सर्वोर्वराविधिजदानकृतांचनोकंकाल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०११
२८

प्र०४०
अ०६

स्यगर्वमपनीय निसर्गरम्य: ॥८५॥ सौवर्णा वर्णासमदिव्य सुकर्णिकारैः संपूज्य लिंग मग जे सकलोपि वर्णः ॥ पर्वण्यपि प्रथित दोषहृत्प्र
दोषे पर्णापतेः प्रियत रोगणाप: सतूर्णं ॥८६॥ सिता सित सुपाटलीपटलपुष्प संपूजया सपाटयति पातकद्रुमवनं कटे मे शिवे ॥ ससंक
टकुलं सदा नहि स जातु पश्येन्नरः सकंटकपयं शिवे यम भयोरु दंडाहतः ॥८७॥ मंदार सुंदर सुमैररविंद वृंदैः कुंदैः कदंब निचयैर्वरपाप
वृंदैः ॥ माकंद कंदलदलैर्गिरिजे स भुक्तो नंदाय मे भवति चेंदु कलावतंस लिंगार्चनेन स निशा सुदिवा स्त्रपीरः ॥८८॥ दूर्वाच्छिरीष
कुसुमैर्मम लिंग मौलौ यो वानु रक्तहृदयः सविशेष येच्च ॥ पापौघ ताप गणानां गण पुंगवेंद्रो भद्राणि सोध्य लभते स सुरौघवंद्यः ॥८९॥
उत्फुल्लहल्लक कुसुमैर्मृगबाल पाणि लिंगार्चने न कलयेन्न स जातु कालं ॥ आयत्तको भवति सर्वधराद्रिनाथ वंद्यांघ्रियुग्म नरवचं
द्र रुचिर्भवानि ॥ विष्णु क्रांत सुमैर्मदीयमग जे लिंगं सकृत्पूजयन् संक्रांतावपि पालकान्यपि नरं नैवाक्रमंति ध्रुवं ॥ तस्यो क्रांतिरथां
ति मे सुखयुता भूयाच्च मुक्त्यंगना हस्ताक्रांत तरा लभेत सुलभा सत्यं न तो विस्मयः ॥ यम वदनं रदनोरु घोष भीषं नहि पश्येत्प्रसभं सभ
यं भवानि ॥ कृतसंक्रंदन वदनो महात्मा मदनारिं दमनैरथार्च्य चैत्रे ॥९२॥ मंदारांबुज मल्लिका सुकुसुमीमालां चनीलोत्पलैः युक्तां
यः प्रददाति शंकर महा लिंगे सहस्रैः कृती ॥ तस्यार्धार्ध सुसंख्यया सुविहिता स्यात्प्रीतये मुक्तिदा मुक्ता पुष्प समर्चनादपि सदा संप्री
तये मे परा ॥९३॥ पुष्पाध्यायमिमं सदैव हृदये धार्यो हि वर्यैः सदा कार्यं स्यान्मम पूजनं सुविहितं विर्यैर्नतैः शैलजे ॥ गर्वं चाप्यप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

X पंक्ति ७ – द्वितीयायां तथा स्नात्वा ब्रह्मचर्यपरायणः॥ पंचाक्षरेण मंत्रेण स्नाप्य लिंगं समाहितः॥ तिलैश्च तण्डुलैश्चैव पुष्पैः पूज्य पूर्वोक्त मार्गतः ॥

कृत्यधैर्यपरमैः स्वेनार्जितैः पावनैः रच्योहं भुविसादरं सुमगणो हीनो भवेत्पातकैः॥९४॥ ॥इतिश्रीशिवरहस्ये महादेवाख्ये एकाद
शांशे पुष्पाध्यायोनामनवमोध्यायः॥९॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥
वक्षेपूजाविधिंदेविममलिंगे विशेषतः॥ नक्षत्रेषु विशेषेण फलंस्यात्कृतपूजया॥ प्रथमायांद्विजः स्नात्वा वाग्यतो
भक्तिमान्नरः॥ भस्मत्रिपुंड्ररुद्राक्षमालालंकृतविग्रहः॥ उपलिप्यसमांभूमिंगोमयेनस्वयंशिवे॥ आसनंपरिकल्प्या
स्मिन्नावाह्यवृषभंततः॥३॥ लिंगमूर्तिंमहादेवंस्नाप्य पुण्योदकेनच॥ पंचाक्षरेणमंत्रेण प्रतिष्ठाप्यवृषासने॥४॥
पुष्पैश्चबिल्वपत्रैश्चपूजयेद्गिरिकन्यके॥ धूपदीपादिकंदत्वानैवेद्यंचैवबुद्धिमान्॥५॥ प्रदक्षिणात्रयंकृत्वा स्तोत्रैः
२०८ स्तुत्वाभिवंद्यच॥ दद्यात्पूजाफलंतस्मै नफलंकांक्षयेद्बुधः॥६॥ ब्रह्महत्याकृतंपापं छित्वा पूर्वोक्तमार्गतः॥ हविर्निवे
द्यमेधावि दिनमेकमुपोषितः॥७॥ सुरापानकृतंपापं स्वर्गेदग्ध्वाचगच्छति॥ तृतियायांतथा पूज्यशिवलिंगंसमाहि
तः॥८॥ ब्राह्मणान्भोजयित्वातु स्वर्णस्तेयाद्विमुच्यते॥ चतुर्थ्यांशंकरंभक्त्या पूज्यपूर्वोक्तमार्गतः॥९॥ यथाशक्तिधनं
दत्वा ब्राह्मणाय समाहितः॥ गुरुतल्पगदोषेण मुच्यतेनात्रसंशयः॥१०॥ पंचम्यांतंडुलेनैवपूज्य पूर्वोक्तमार्गतः॥ महापा
तकसंसर्गाद्दोषान्मुक्तोभवेन्नरः॥११॥ षष्ठ्यां घृतेनचस्नाप्य चंदनेनघृतेनच॥ महापातकदोषेण मुच्यतेनात्रसंशयः॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ २५ सप्तम्यां शुद्ध तोयेन स्नाप्य पुष्पैः प्रपूजयेत्॥क्षुद्रपापात्प्रमुच्येत मुने नात्रास्ति संशयः॥१३॥अष्टम्यां पंचगव्येन स्नाप्य तोयेन शंकरं॥ अह० ९ अ०१०
सर्वपापविनिर्मुक्तः शिवलोके महीयते॥१४॥नवम्यां पूज्य देवेशं सर्वान्कामानवाप्नुयात्॥ दशम्यामीश्वरं पूज्य सर्वपापैः प्रमुच्य
ते॥१५॥एकादश्यां शुचिः स्नात्वा भोजनेन विवर्जितः॥शिवं शुद्धोदकैः स्नात्वा शिवलोके महीयते॥१६॥द्वादश्यामभिषिच्ये
शं गुग्गुलं धूपयेन्नरः॥ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा॥१७॥त्रयोदश्यां शिवं पूज्य शंकरं चंदनैः सह॥विलिप्य सर्वपापेभ्यो मु
च्यते नात्र संशयः॥१८॥चतुर्दश्यां महादेवं स्नाप्य पूर्वोक्तमार्गतः॥तिलतंडुलपुष्पाद्यैः पूज्य विप्रं तु भोजयेत्॥१९॥अभीष्टं सकलं लब्ध्वा
शिवलोके महीयते॥पंचदश्यां शुचिः स्नात्वा तोयैर्नैवाभिषेचयेत्॥२०॥पुष्पैर्नानाविधैः पूज्य ब्राह्मणान्भोजयेन्मुदा॥ऐश्वर्यमचलं लब्ध्वा
प्रेत्य स्वर्गे महीयते॥२१॥अश्विन्यां देवमाराध्य ब्राह्मणान्भोजयेन्नरः॥अश्विनीलोकमाप्नोति नात्र कार्या विचारणा॥२२॥भरण्यां रुद्रमाराध्य
ब्राह्मणान्भोजयेन्नरः॥यमलोकमवाप्नोति यावदाचंद्रतारकं॥२३॥कृत्तिकायां शिवं पूज्य ब्राह्मणानेव पूजयेत्॥अग्निलोकमवाप्नोति यावदाचं
द्रतारकं मुने नात्र विचारणा॥२४॥रोहिण्यां शंकरं पूज्य ब्राह्मणायान्नदोन्नरः सर्वपापविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात्॥२५॥मृगशीर्षे महा
देवं पूज्यान्नं वस्त्रमेव वा॥ब्राह्मणायादरात्दत्त्वा चंद्रलोके महीयते॥आर्द्रायां देवमाराध्य दद्याद्ब्रह्मविदे धनं॥सम्यक् ज्ञानमवाप्नोति नात्र कार्या वि
चारणा॥२७॥आदित्ये योर्चयित्वेशं ब्राह्मणानेव भोजयेत्॥आदित्यलोकमाप्नोति स पुनर्ब्रह्म गच्छति॥२८॥पुष्ये पूज्य महादेवं विप्रायान्नं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ददातियः॥ बृहस्पतिसमोबुध्या भवेदत्रनसंशयः॥२९॥ आश्लेषर्क्षे महादेवं पूज्यपुष्पंददातियः॥ नागलोकमवाप्नोतिनपुनस्तत्र
जायते॥३०॥ मघेदेवंसमाराध्य तिलानामोदकंनरः॥ शिवंवाद्रोणयुग्मंवाब्राह्मणायददातियः॥ ३१॥ सर्वपापविनिर्मुक्तः पितृलोक
मवाप्नुयात्॥ भगनक्षत्रकेभक्त्या पूज्यदेवंत्रियंबकं॥३२॥ यथाशक्तिप्रदानेन भगलोकमवाप्नुयात्॥ उत्तरेशिवमभ्यर्च्यगांददाति
द्विजातये॥३३॥ हस्तेपूज्यमहादेवंदत्वाब्रह्मविदेधनं॥ सूर्यलोकमवाप्नोतिनात्रकार्याविचारणा॥ चित्रायांईश्वरं पूज्य दत्वाभक्त्यां
गुलीयकं॥ त्वष्टारंप्राप्यतेनैवसहरुद्रमवाप्नुयात्॥ स्वातौसोमंसमभ्यर्च्यब्राह्मणानपिपूजयेत्॥ वायुलोकमवाप्नोतिसौख्यंचा
नंत्यमश्नुते॥ विशाखेपूज्यदेवेशं दत्वावेदविदेधनं॥ सूर्यलोकमवाप्नोतिसौख्यंचानंत्यमश्नुते॥ इंद्राग्नित्वमवाप्नोतिशिवंप्राप्नो
त्यसंशयं॥ अनुराधादिनेसाक्षादपिपूज्यवृषध्वजं॥३६॥ दत्वाब्राह्मणाहारार्थं मैत्रलोकमवाप्नुयात्॥ ज्येष्ठायांशिवमाराध्यदत्वा
२०७ माषंद्विजातये॥३७॥ इंद्रलोकमवाप्नोतिमुनेनात्रविचारणा॥ मूलेमहेश्वरं पूज्य ब्राह्मणायददातियः॥३८॥ अन्नंसनैर्ऋतंगत्वारुद्रलो
कमवाप्नुयात्॥ पूर्वाषाढेमहादेवं पूज्यपुष्पंददातियः॥३९॥ सयातिवारुणंलोकंनात्रकार्याविचारणा॥ उत्तराषाढनक्षत्रे पूज्यदेवं
१४ त्रियंबकं॥ दत्वातंडुलमन्यद्वाब्राह्मणायानसूयवे॥४२॥ ब्रह्मलोकमवाप्नोतिनात्रकार्याविचारणा॥ रुद्रंशतभिषेपूज्यब्राह्मणायान
सूयवे॥ दत्वावस्त्रंहिरण्यंवावारुणंलोकमाप्नुयात्॥ पूर्वाभाद्रपदे पूज्यपुराणंपरमेश्वरं॥ एकपादभंयातिमुनेनात्रविचारणा॥४२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ २६

यस्तु पूज्यो नरो भद्रे शिवं परमकारणं॥ ब्राह्मणाय विनीताय ददाति धनमुत्तमं॥४४॥ अहिर्बुध्न्यमवाप्नोति नास्ति संशयकारणं॥ रेवत्यामपि पूज्येशं दत्वा विप्राय भोजनं॥४५॥ सूर्यलोकमवाप्नोति सत्यं सत्यं वदाम्यहं॥ अर्कवारे महादेवं त्रिः कृत्वा तु प्रदक्षिणं॥ ॥४६॥ प्रणम्य दण्डवद्भूमौ भक्त्या परमया सह॥ स्नानस्रक्चंदनाद्यैस्तु स्वशरीरमलंकृतं॥४७॥ भोग्यं ददाति या वेश्या यथेष्टं शिवयोगिने॥ तस्याः पुण्यफलं ब्रह्मन् शृणु वेदविदां वर॥४८॥ ब्रह्महत्या सुरापान स्वर्णस्तेयादिपातकैः॥ मुच्यते नात्र संदेहो मद्भक्तस्य हि पूजनात्॥४९॥ इह लोके मुने पुंसां वल्लभा भवति ध्रुवं॥ आयुरारोग्यमैश्वर्यमपि प्राप्नोत्यसंशयः॥५०॥ प्रेत्य सूर्यप्रतीकाशैः विमानैर्बहुभिः सह॥ पार्वतीलोकमाप्नोति सुखं चाक्षयमश्नुते॥५१॥ अर्कवारे तु विद्वांसं धनं दत्वा तु भोजयेत्॥ वेश्या मलंकृतां ब्रह्मन् तस्य पुण्यफलं शृणु॥ सर्वपापविनिर्मुक्तः सर्वैश्वर्यमवाप्नुयात्॥ प्रेत्य चेश्वरमाप्नोति मुने नात्र विचारणा॥५३॥ सोमवारे महादेवं दृष्ट्वा भूमौ प्रणम्य च॥ वस्त्रं वा धनमन्यद्वा ददाति शिवयोगिने॥५४॥ संकराश्चापि मुच्यन्ते पापैः सर्वैर्न संशयः॥ भौमवारे महादेवं प्रणम्य शिवयोगिने॥५५॥ ददाति धनमन्यद्वा स युद्धे जयमाप्नुयात्॥ बुधवारे विरूपाक्षं प्रणम्य भुवि दंडवत्॥ अभ्यंगं योगिनं कुर्वन् आरोग्यं शीघ्रमाप्नुयात्॥ जीववारे शिवं दृष्ट्वा प्रणम्य परमेश्वरं॥५७॥ ज्ञानिनं भोजयित्वा तु शीघ्रं ज्ञानमवाप्नुयात्॥ शुक्रवारे मुने दृष्ट्वा प्रणम्य वृषवाहनं॥५८॥ शिवयोगिकरे दत्वा यत्किंच धनमुत्तमं॥ वंध्यापुत्रमवाप्नोति नरश्चाप्नोति कांक्षितं॥५९॥ मंदवारे महादेवं नमस्कृत्य तु योगिने॥ ददाति

महा० ९ अ०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धनमत्यल्पमपियोमुनिसत्तमं॥६०॥सराज्ञांवल्लभोभूत्वाधनमक्षय्यमाप्नुयात्॥व्यतीपातेधनंधान्यंतिलंवातंडुलंतुवा॥६१॥न
मस्कृत्यमहादेवंयोगिनेप्रददातिसः॥सर्वपापविनिर्मुक्तःस्वर्गमोक्षंचविंदति॥६२॥बहुनोक्तेनकिंब्रह्मन्महादेवस्यपूजनात्॥निष्कृ
ष्टविप्रोमुच्येतस्वसंसारमहोदधेः॥६३॥यःशिवंपूजयेन्नित्यंलिंगंभक्त्याअनेनसः॥नयातिनरकंघोरंशिवंसाक्षादवाप्नुयात्॥६४॥दाना
नियज्ञांश्चमहातपांसिसंन्यासवृत्तिश्चजितेंद्रियत्वं॥सर्वंनतुल्यंभवतीश्वरस्यलिंगस्यनित्यार्चनमेतिबुद्धिं॥६५॥सत्रातिराजजनि
तादपिपुण्यसंघात्पात्रेषुदानकरणादपिपुण्यवर्यं॥नक्षत्रपूजनमुमेममलिंगमौलौद्वित्रैर्जलैःकुसुमपत्रबरैःकृतंस्यात्॥६६॥ ॥
इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेतिथिनक्षत्रवारार्चनमहिमानामदशमोध्यायः॥१०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीशिवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥लिंगद्वयंसमाख्यातंचलंचाचलमेवच॥चरंधातुषुसत्कृत्यमचलंपार्थिवादिषु॥१॥चलेस
४०८
दावसत्येवप्रीतियुक्तोमहेश्वरः॥अचलेमंत्रसंस्कारात्सत्यमेवसदाशिवः॥२॥जंगमस्यावमानेनस्थावरंनिष्फलंभवेत्॥तस्माल्लिंगद्व
यंदेविनावमन्येतकर्हिचित्॥३॥कृतावसानोयोमोहान्नरकेपच्यतेचिरं॥तस्मात्पत्रैःफलैस्तोयैःक्षीराद्यैःस्नापयेच्छिवं॥४॥सयत्फल
मवाप्नोतितदेकाग्रमनाःशृणु॥सर्वयज्ञतपोदानतीर्थवेदेषुयत्फलं॥तत्पुण्यंकोटिगुणितंस्नाप्यलिंगंलभेन्नरः॥मातृतःपितृतश्चैवयतः
श्चोद्धहतेस्त्रियः॥६॥कुलैकविंशमुत्तार्यममलोकेमहीयते॥गंधनुलेपनात्पुण्यंद्विगुणंचंदनस्यतत्॥७॥चंदनादगरोर्ज्ञेयंपुण्यमभ्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०७१ २७ गुणाधिकं ॥ कृष्णागरोर्देवदारोः फलं य त्सममेव हि ॥८॥ यक्षकर्दमजो लेपः ततः शतगुणो वरः ॥ लिंगस्यालेपनं कुर्याद्दिव्य गंधैः म०६० ह०
अ०
सुगंधिभिः ॥९॥ वर्षकोटिशतं पुण्यं शिवलोके समोदते ॥ चंदनागरुकस्तूरीकर्पूरैः कुंकुमादिभिः ॥१०॥ लिंगमापीठमालिप्य क
ल्पकोटिवसेद्दिवि ॥ संवीज्य तालवृंतेन वायुलोके महीयते ॥११॥ लाक्षां प्राप्य यंगनिर्मुक्तो धूपं दद्यात्स कृच्छिवे ॥ चतुर्वेदी गृहे ज
न्म प्राप्नोति श्रीविराजितः ॥१२॥ कृष्णागरुं सकर्पूरं धूपं दद्यान्महेश्वरे ॥ नैरंतर्येण मासाई तस्य पुण्यफलं शृणु ॥१३॥ कल्पायु
तं महादेवि भोगभुक् स्यान्ममालये ॥ भुक्त्वा शिवपुरे भोगं तस्यां ते समहीपतिः ॥१४॥ ससागरोर्वरातायाः राज्यं निष्कंटकं लभेत् ॥
गुग्गुलं च घृतसंमिश्रं दग्धं गृण्हाति शंकरः ॥१५॥ अपराधसहस्रं च दहामु न क्षतं क्षमेत् ॥ देवदारुं सकर्पूरं धूपं दत्वा महाफलं ॥ ॥१६॥
श्रीफलं चाज्यसंमिश्रं दग्ध्वा प्रियतरः शिवे ॥ एभ्यः सुगंधिकं धूपं च सहस्रगुणोत्तरं ॥१७॥ अगरुं दश साहस्रं द्विगुणं स्यात्सितागु
रुं ॥ गुग्गुलुर्दशसहस्रं सघृतस्यादनंतकं ॥१८॥ एतानि सद्य तं दग्ध्वा अग्निष्टोमायुतं लभेत् ॥ पापानि निर्दहत्येव तुषाग्निरिव
कांचनं ॥१९॥ मधूकतिलतैलेन कौसुंभेन महेश्वरि ॥ दद्यात्शिवालये दीपान्सितवर्तिसमुज्वलान् ॥२०॥ मधूकात्तिलतैलोत्थं
दीपं स्याद्दशकं फलं ॥ कौसुंभं तच्छतात्श्रेष्ठं घृतेनानंतमुच्यते ॥२१॥ घृतदीपप्रदानेन गव्येन शतयोजनं ॥ ममलोकं भासयि
त्वा विमानैरर्कसंन्निभैः ॥२२॥ गणश्रेष्ठो भवेद्देवि नैरंतर्येण दीपदः ॥ दद्यावरं शतं मध्यं सहस्रं वरमेव मे ॥२३॥ एकं वापि शिवस्याग्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीपदोऽज्ञाननाशकृत्॥ यः कुर्यात्कार्तिके मासि शोभनां दीपमालिकां॥२४॥ घृतेन वाथ तैलेन चतुर्दश्यष्टमीषु च॥ पौर्णिमाया
ममायां वा ग्रहणे पुण्यपर्वणि॥२५॥ यावत्प्रदीपसंख्यानं घृतेनापूर्यबोधितं॥ तावद्युगसहस्राणि शिवलोके महीयते॥२६॥ सूर्यायुत
प्रतीकाशैर्विमानैर्भासयन्दिशः॥ दीपवृक्षान् समुद्बोध्य शर्वस्यायतने शिवे॥२७॥ सर्वस्माद्द्विगुणं पुण्यं लभते नात्र संशयः॥ कृष्ण
वर्जं सितं पीतं पट्टकौशेयरांकवं॥२८॥ कार्पासजं वा देवेशि वस्त्रं दत्वा शिवाय तु॥ स्वर्णकार्पासजं वापि उपवीतप्रदो मम॥२९॥
वासांसि सुविचित्राणि स्वर्णवंति मृदूनि च॥ धूपितानि शिवे दत्वा लभते पुण्यमुत्तमं॥३०॥ यावत्तद्वस्त्रतंतूनां परिमाणं
विधीयते॥ तावद्वर्ष [युग] सहस्राणि शिवलोके महीयते॥३१॥ योऽर्कपत्रपुटे कृत्वा मधुपर्केणामंत्रितं॥ निवेदयित्वा शर्वाय सो
ऽश्वमेधफलं लभेत्॥३२॥ तंडुलं प्रस्थमानेन कुर्वन्नन्नं सुसंस्कृतं॥ शिवाय तन्निवेद्यैवाग्निष्टोमफलभाग्भवेत्॥ दिने दिने प
२०१ र्वणि वा शाल्यन्नेन सुपुण्यभाक्॥ हरिद्राकृसरं दद्याद्यवगोधूममिश्रितं॥३४॥ चणकाढकमुद्गान्नं शाकापूपाज्यमिश्रितं॥
दत्वा वर्षायुतं तत्प्रो दिवि तिष्ठति भोगवान्॥३५॥ यावंतस्तंडुलास्तस्मिन्नैवेद्ये परिसंख्यया॥ तावद्युगसहस्राणि रुद्रलोके म
हीयते॥ गोधूमशर्करापूपं घृतपाचितमुत्तमं॥ पिष्टोद्भवं मध्यमं स्याद्भक्ष्यं वै चोत्तरोत्तरं॥ केवलं पायसं दत्वा शिवायानंतपुण्य
भाक्॥ पानीयपानकानां तु प्रदद्याद्यः शिवाय तु॥३८॥ क्षीरं दधि घृतं क्षौद्रं शर्करा तक्रमेव वा॥ शीतस्य सलिलस्यापि सक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ पूरस्य चशंकरि॥३९॥ निवेदने परा प्रीतिर्मम स्यादुत्तरोत्तरा॥ कदलीनारिकेलाम्रदाडिमं मातुलिंगकं॥४०॥ फनसं वा फ महा० ९
२८ लान्येव सुस्वादुरसवंति च॥ दद्यान्नैवेद्यमीशाय फलं स्यादुत्तरोत्तरं॥४१॥ पंचसौगंधिकोपेतं तांबूलं चोत्तमोत्तमं॥ ए अ० ११
लालवंगकर्पूरजातीपत्रफलानि च ४२॥ नागवल्लीदलोपेतं दत्वा मरवफलं लभेत्॥ क्रमुकं नागवल्लीनां दलानि द
त्वयेद्घं॥४३॥ श्वेतवर्णा चपत्रं च क्रमुकस्य फलानि च॥ नारिकेलफलोपेतं मातुलिंगसमायुतं॥४४॥ एलालवंग
कर्पूरैः मुखवासं प्रचक्षते॥ मुखवासं शिवे दत्वा वसेद्वर्षशतं दिवि॥४५॥ शालिपिष्टाद्भवैर्दीपैर्निराज्य घृतवर्तिकं॥
ततो नीराजनं दीपैः षड्विंशत्या तु कारयेत्॥४६॥ शतं तु मध्यमं देवि सहस्त्रं परमं विदुः॥ वृषाकारं नराकारं नाक्षत्रं पंच
चैककं॥४७॥ कुंभदीपं ततो दद्यात्पुण्यं स्यादुत्तरोत्तरं॥ कुर्यान्नीराजनं लिंगे शिवमुद्दिश्य मंगलैः॥४८॥ अष्टम्यादि
षु सर्वेषु दिवसेषूत्सवेषु च॥ यावत्पर्वाणि विधिवत्कुर्यान्नीराजनं शिवे॥४९॥ वर्तिसंख्यासहस्त्राणि दिवि मोदति
सूर्यवत्॥ कांस्यलोहमयीं घंटां प्रबध्नीयाच्छिवालये॥५०॥ यावन्नादं तदा पुण्यं कुर्वतो गिरिकन्यके॥ भेरीमृदंगप
टह वीणावेणुरवाकुलं॥५१॥ शंखकांस्यादिवादित्रं यः शिवाय निवेदयेत्॥ स विमानैर्महाभोगैः वंशवीणास्वरोग
णैः॥५२॥ युगानामयुतं देवि वसेच्छिवपुरे सुखं॥ स्त्रीणां नाट्यादिकरणे तौर्यत्रिकपुरःसरं॥५३॥ यथेष्टमैश्वरे लो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केमोदत्याभूतसंप्लवं ॥ शिवस्योपरियोदद्याद्वितानंपट्टवस्त्रजं ॥५४॥ मुक्ताजालिकपर्यंतंमध्यपद्मेनचित्रितं ॥ योंत
र्गर्भगृहेशंभोः बध्वामुक्तोभवेन्नरः ॥५५॥ योंतःशिवगृहंभक्त्यासमुगंधैःप्रलेपयेत् ॥ कवाटमारकुंड्यांतंतिर्यगू
र्ध्वंसवेदिकं ॥५६॥ वासयेत्पुष्पमालाभिः धूपैश्चापिसुगंधिभिः ॥ यःकुर्यात्सकृदप्येवंतस्यपुण्यफलंशृणु ॥५७॥
सर्वकामसुसंपूर्णैः महायानैर्मनोहरैः ॥ आपूरयन्दिशः सर्वा आमोदैश्चसुगंधिभिः ॥५८॥ कल्पकोटिशतंदिव्यंशि
वलोकेमहीयते ॥ तस्यांतेपृथिवीपालो भवेद्राजामहेश्वरि ॥५९॥ भक्त्यानिवेद्यरुद्राय तालवृंतंसुशोभनं ॥ दश
वर्षसहस्त्राणि रुद्रलोकेमहीयते ॥६०॥ मायूरंव्यजनंदत्वा शिवायचसुशोभनं ॥ वर्षकोटिशतंसाग्रंशिवलोकेम
हीयते ॥६१॥ शिवायचामरंदत्वाहेमरूप्यादिदंडकं ॥ हंसकुंदेंदुधवलं मृदुबालमनोहरं ॥६२॥ चामरासक्तहस्ताग्रदि
२१० व्यस्त्रीपरिवारितः ॥ महाभोगैर्विमानस्थः चिरंशिवपुरेवसेत् ॥६३॥ योदद्याद्विमलंछत्रंपांडुरंगुच्छमंडितं ॥ चंद्रवृत्तश
तेषीकानिर्मितंहेमदण्डकं ॥६४॥ एकातपत्रंसाम्राज्यं त्रिनेत्रकृपयालभेत् ॥ शिवस्यपुरतोदत्वा दर्पणंचारुनिर्मलं ॥
॥६५॥ चंद्रांशुनिर्मलःश्रीमान्सुभगःकामरूपधृक् ॥ कल्पायुतसहस्त्रंच शिवलोकेसमोदते ॥ कृत्वाप्रदक्षिणंभक्त्याशि
वस्यायतनेनरः ॥ अश्वमेधसहस्त्रस्यलभेत्पुण्यंपदेपदे ॥६७॥ अंगप्रदक्षिणंकोटिनमस्कारेपरार्धकं ॥ उरसाशिरसादृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्ट्याबाहुभ्यामुरवेशिवे॥६९॥अष्टमूर्तिस्तथाष्टांगैः प्रणवन्मुक्तिमेतिच॥पश्यंल्लिंगंमहेशस्य प्रणवेनहृदाशिवे॥६९॥
स्तुवीतदेवमीशानंगिराचस्पष्टयासदा॥एवंसंस्तुवतेमुक्तिंदिशाम्यहमलंद्रुतः॥७०॥प्रातर्दृष्ट्वा महालिंगंनैशंपापंवि
नश्यति॥आजन्मसंचितंपापं मध्यान्हेदर्शनात्क्षयं॥७१॥सप्तजन्मकृतंपापं सायंदर्शनतःक्षयं॥यात्येवनिशिदृष्ट्वे
शंगोदानायुतपुण्यभाक्॥७२॥प्रदोषेदोषराहित्यं ब्रह्महत्यादिपंचकं॥नश्यत्येवशिवंवीक्ष्यशिवधर्मस्यसंग्रहः॥७३॥
ईश्वरउवाच॥ ॥यइत्थंशिवधर्मसारमघभित्ज्ञात्वैवसंपूजयन्यातिस्थानमहोगिरींद्रुतनये कैलासशैलंमम॥तत्रैवा
विरतंमदीयममलज्ञानंचवेदांतजंसंप्राप्यामरराजवंदितपदोनित्यःप्रमोदस्तः॥७४॥ ॥इतिश्रीशिवरहस्ये महादेवाख्ये
एकादशांशेशिवधर्मकथने एकादशोध्यायः॥११॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
श्रीमहादेवउवाच॥ ॥निर्माल्यंधारयेद्भक्त्याशिरसापार्वतीपतेः॥राजसूयायुतफलंप्राप्नोतिभुविमानवः॥१॥शिरसा
शिवनिर्माल्यंभक्त्यायोधारयिष्यति॥अशुचिर्भिन्नमर्यादःसर्वावस्थांगतोपिवा॥२॥निर्माल्यधारणादेवशुचिःपूतो
भविष्यति॥निर्माल्यधारणेयोग्याःत्रिपुंड्रपरिचिन्हिताः॥३॥निर्माल्यंपुरतोदत्तंहविरन्नंफलंजलं॥नचंडाधिकृतंयत्र
तद्ग्राह्यंभस्मभूषितैः॥४॥नाभिषिक्तंस्थावरेवा चरेवापिमहेश्वरि॥अन्नंविनापितद्ग्राह्यंफलानिक्षीरजातयः॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वायंभुवे पार्थिवे च धातुजे रसरत्नजे ॥ न चंडाधिकृतिर्देवि तद्ग्राह्यं वैदिकैरपि ॥६॥ मनोदरैर्नमे ग्राह्यं निर्माल्यं जलमण्वपि ॥ अन्ये
षामागमानां तु निर्माल्यं नैव भक्षयेत् ॥७॥ न लंघयेत निर्माल्यं सोमसूत्रं च पुण्यहृत् ॥ अशां भवेभ्यो निर्माल्यं दत्वा नरकमृच्छ
ति ॥८॥ शंभोः स्नानोदकं सेव्यं सर्वतीर्थमयं हि तत् ॥ विंदुत्रयाधिकं नैव ग्राह्यं तीर्थं शिवस्य वै ॥९॥ यतो मूत्रं भवेद्देहे पीत्वा मृत्युमवा
प्नुयात् ॥ कर्षणादिप्रतिष्ठांतं संस्कारस्याच्छिवालये ॥१०॥ कृत्वा कुंभाभिषेकांतां मख्त्वं धनसंस्कृतिं ॥ शिवशास्त्रविधानेन स
र्वपापैः प्रमुच्यते ॥११॥ देवखातसमा भूमिः प्रागुदक्प्रवणोंनता ॥ शिवायतननिक्षेपे विशिष्टा सा शिवे सदा ॥१२॥ कूपाराम
न्नपानादि शिवायतनकर्मसु ॥ कूपं खात्वा शिवागारे वापीमपि तटाककं ॥१३॥ यावत्तत्तोयमानेन पितृभिर्मोदते दिवि ॥ शि
वलिंगाग्रगं देवि यत्तोयं पुरतः स्थितं ॥१४॥ शिवगंगेति विज्ञेयं तत्र स्नानाच्छिवं व्रजेत् ॥ गंगाद्याः पुण्यनद्यो ये समुद्राः तत्र संस्थि
२११ ताः ॥१५॥ शिवाग्रके समुद्रेपि नित्यं स्नात्वा शिवं व्रजेत् ॥ अन्यत्र सागरे देवि स्नानं पर्वणि शस्यते ॥१६॥ दूरतः शिखरं दृष्ट्वा नम
स्कारः शिवालये ॥ सप्तजन्मकृतैः पापैः तत्क्षणादेव मुच्यते ॥१७॥ लिंगानां च शतं साग्रं शिवक्षेत्रं शिवे विदुः ॥ देहिनां तत्र पं
चत्वं शिवसायुज्यकारणं ॥१८॥ मनुष्यस्थापिते लिंगे क्रोशमानं शिवे सदा ॥ स्वायंभुवे सहस्रं स्यात् दार्षे पुण्यं तदर्धकं ॥१९॥
पापाचारोपि मनुजः मृतस्तत्र परां गतिं ॥ प्राप्नोति परमां देव बाणलिंगस्थिते गृहे ॥२०॥ तस्मादावसथं कुर्याच्छिवक्षेत्रसमीपतः ॥

शिवरह० ११ शिवेदानं शिवेहोमं शिवेस्नानं शिवेजपः ॥२१॥ अक्षयानिफलान्याहुः शिवाग्रेचेत्कृतं बहु ॥ कुरुक्षेत्रेनिवसतोयत्फ म० हा० ९
३० लंनैमिषेशिवे ॥२२॥ प्रयागेचप्रभासे च गंगासागरसंगमे ॥ रुद्रकोट्यां गयायांचसालग्रामेमरेश्वरे ॥२३॥ पुष्करे भार अ० १२
भूतेशेगोकर्णेमंडलेश्वरे ॥ श्रीशैलेत्र्यंबके देवि महाकालेजरेश्वरे ॥२४॥ वाराणस्यांतुकेदारेओंकारेवैद्यनाथके ॥ का
लंजरेतथादेवि दृष्ट्वा मां परमेश्वरं ॥२५॥ संपूज्य भक्तानपिच यथाशक्त्यान्नपानदः ॥ गोदावर्यांकृष्णवेण्यांनर्मदायांत
थाशिवे ॥२६॥ गंगायांयमुनायांवावेणा चर्मण्वतीषुच ॥ तापीपयोष्ण्यां कावेर्यां तुंगा ताम्रासुनित्यशः ॥२७॥ तत्तत्ती
रस्थितक्षेत्रेलिंगं दृष्ट्वापिनाकिनः ॥ श्रीकंठे रत्नभूताद्रौ जंबुकेशेथमातृके ॥२८॥ जप्यकुंभेश्वरे देवि अर्जुने श्वेतकान
ने ॥ छाया वने वेदवने वल्मिके पुंडरीकके ॥२९॥ वृद्धाचले गोनगेच कालहस्तौ रुणाचले ॥ कांचीहालास्यसदने पुण्ये वै गंध
मादने ॥ छित्वापरद्वयं वापि शिवक्षेत्रेत्रे वसेत्तुयः ॥ सयाति शिवसायुज्यं क्षेत्रसंन्यासकारणात् ॥ क्षेत्राणां दर्शनं पुण्यं प्र
वेशः तच्छताधिकः ॥ तस्मात्छतगुणं लिंगदर्शनं चप्रदक्षिणात् ॥३२॥ तस्माच्छतगुणं पुण्यं जलस्नानमतः परं ॥ क्षीरस्ना
नमतोदेवि शताधिकमनुत्तमं ॥३३॥ दध्नासहस्रसंख्यातं मधुनाशितयाशतं ॥ घृतस्नानेन चानंत्यमक्तपूजा ततोधि
का ॥३४॥ नास्तिलिंगार्चनात्पुण्यमधिकं देवि निश्चितं ॥ लिंगेर्चितेखिलं विश्वमर्चितं स्यान्नसंशयः ॥३५॥ यः पूजितं शिवं दृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णामेषु
सर्वाः प्रणामे भुवि शंकरि ॥ यस्तु लिंगार्चनं त्यक्त्वा देवानन्यांश्च पूजयेत् ॥ ३६ ॥ रत्नं विहाय मूढात्मा यथा कांचमवेक्षते ॥ च
तुर्दश्यामथाष्टम्यां पौर्णिमासु प्रपूजयेत् ॥ ३७ ॥ पर्वकालेषु शर्वार्च्य विशिष्टा सार्वकर्मणः ॥ ग्रहणे सोमसूर्याणां पूजानंत
फलप्रदा ॥ ३८ ॥ शिवमाल्यापनयनं पूजांतेषु प्रमार्जनं ॥ एकैकमेव तुल्यं स्याच्चांद्रायणफलं शिवे ॥ ३९ ॥ यः कुर्याद्रुद्रहोमं
च चरुणा सघृतेन च ॥ सकृत्तत्राग्निकार्येण रुद्रसायुज्यमाप्नुयात् ॥ ४० ॥ शिवालयाग्रे यः कुर्याद्दश मंडलकानि तु ॥ सर्वा
न्नबलिदानं च कृत्वा पुण्यायुतं लभेत् ॥ पंचाक्षरजपात्क्षेत्रे नास्त्यन्यत्पापशोधनं ॥ रुद्राणां प्रणवस्यापि सर्वपापविशो
धने ॥ ४२ ॥ नहि पंचाक्षरजपाच्छ्रेयोन्यद्भुवनेश्वरि ॥ एवं ज्ञात्वा जपेद्विद्वान्पंचाक्षरमतंद्रितः ॥ ४३ ॥ वृक्षाः पुण्यां गु
पत्रैश्च उपयुक्ताः शिवार्चने गावश्चैव द्विजश्रेष्ठाः प्रयांति परमां गतिं ॥ ४४ ॥ शिवालये निहत्यैकमपि तत्सकलं भ
२२२ वेत् ॥ शिवार्थं सततं कार्या पुष्पहिंसा महेश्वरि ॥ ४५ ॥ यज्ञार्थपशुहिंसावन्नास्ति दोषस्य कारणं ॥ पूजितं वामहादे
वं पूज्यमानमथापि वा ॥ ४६ ॥ श्रुत्वानुमोदतेवापि स गच्छेद्देश्वरं परं ॥ अर्चितं परमेशानं भवं सर्वमुमापतिं ॥ ४७ ॥
सकृत्प्रसंगाद्दृष्ट्वापि सर्वपापैः प्रमुच्यते ॥ आवाहनं च सान्निध्यं स्थापनं पूजनं तथा ॥ ४८ ॥ पंचभिस्तपनं देवि रुद्राद्यै
श्च विमुच्यते ॥ पंचाक्षरेण मंत्रेण बिल्वपत्रैः शिवार्चनं ॥ ४९ ॥ करोति श्रद्धयायुक्तः स गच्छेद्देश्वरं पदं ॥ दर्शनाद्बिल्वव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ क्षस्य स्पर्शनाद्वंदनादपि ॥५०॥ अहोरात्रकृतं पापं नश्यत्येव महेश्वरि ॥ सकेन बिल्वमूलेषु तोयेनाघनिवारणं ॥५१॥ शिववक्षे महा० पु०
३१ त्रे भक्तमेकं बिल्वमूलेपि वा शिवे ॥ भोजयित्वा घृतान्नेन सक्षीरेण स पुण्यभाक् ॥५२॥ बिल्वमूलं समाश्रित्य यस्त्रिरात्रमुपोषि अ० १२
तः ॥ हरनाम जपेल्लक्षं सर्वपापैः प्रमुच्यते ॥५३॥ योंतकाले बिल्वमूले मृतो याति परां गतिं ॥ बिल्वपत्रैरखंडैस्तु चंद्रचूडं समर्च
येत् ॥५४॥ कृष्णाष्टम्यां सोमवारे प्रदोषे पूजयेन्नरः ॥ पंचभिः पातकैर्देवि मुच्यते नात्र संशयः ॥५५॥ शुष्कैः पर्युषितैर्वापि बि
ल्वपत्रैः प्रपूजयेत् ॥ युगानामयुतं साग्रं शिवलोके वसेन्नरः ॥५६॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ शिवलोकमवाप्नो
ति देहांते स सुदुर्लभं ॥ शिवार्चनरतो नित्यं महापातकसंभवैः ॥ दोषैः कृतैर्न लिप्येत पद्मपत्रमिवांभसा ॥५८॥ दर्शनाच्छिवभ
क्तानां सकृत्संभावणादपि ॥ वाजिपेयस्य यज्ञस्य फलं प्राप्नोति शांकरि ॥५९॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यंत्यजन्मजः ॥
शिवभक्ताः सदा पूज्याः सर्वावस्थासु शंकरि ॥६०॥ नास्याचारं परीक्षेत न कुलं न व्रतं तथा ॥ भस्मरुद्राक्षधारी यः पूज्य एव
हि शांकरि ॥६१॥ कर्मणा मनसा वाचा यस्तु भक्तान्विनिंदति ॥ निरयान्निष्कृतिर्नास्य यावदाभूतसंप्लवं ॥६२॥ शिवभ
क्तान्वर्जयित्वा सर्वेषां शासको तकः ॥ किं पुनर्मम भक्तानामहमेव हि शासकः ॥६३॥ न शिवाश्रमिणो मौनी न दंडो न कमंड
लुः ॥ नैव काषायवासांसि भक्तिरेवात्र कारणं ॥६४॥ यदि भक्ताः पशुपतौ पापकर्मसुये रताः ॥ यमस्य वदनं देवि नैव पश्यंति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वथा ॥६५॥ येपुनः शांतमनसः शिवभक्ता जितेंद्रियाः॥ मर्त्यं धर्मं गता मीशे विज्ञेयास्ते गणेश्वराः॥६६॥ मृतस्य जीवतोवा
पि शिवभक्तस्य शंकरि ॥ यमाद्भयं न तस्यास्ति अन्येषां का कथा शिवे॥६७॥ तस्माद्भक्ताः सदा पूज्या रुद्रक्षेत्रे विशेषतः॥
यतीनां शांभवानां ये कुर्युः शुश्रूषणं मुदा॥६८॥ मूर्खोपि करणो रत्नैरभ्यंगैः पाद धावनैः॥ शिवयोगिष्वपि शिवे सुपुण्यं
महदाप्नुयात्॥६९॥ यः कुर्यात्पर्वकालेषु विचित्रकुसुमोज्वलं॥ वितानमालाविततं धूपदीपविराजितं॥७०॥ मंडपं च
सुगंधाढ्यं विततं शिवपूजने॥ त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते॥७१॥ पापकंचुकमुत्सृज्य जीर्णत्वचमिवोरगः॥
याति तत्सदनं गौरि मदनांतकरे मम॥ यः कुर्यात्तु शिवारामं माम्रबिल्वादिशोभितं॥ जाजीविजयमंदार कुंदमल्लिकयान्वि
२३ तं॥७३॥ पुन्नागनागबकुलैरशोकोत्पलचंपकैः॥ कल्हार यूथहेमाद्यैर्नारिकेलेक्षुदंडकैः॥७४॥ यावत्तत्पत्रकुसुमबी
जमूलफलानि च॥ तावद्वर्षसहस्राणि शिवलोके महीयते॥७५॥ स्वयमुत्पाद्य पुष्पाणि यः शिवं पूजयेत्सकृत्॥ तानि
साक्षात्प्रगृह्णाति महादेवो घृणानिधिः॥७६॥ न भूमौ पतितान्येव गृह्णीयादशुचिर्नरः॥ कुड्मलैर्नार्चयेद्देवीं अन्य
पुष्पैस्तु पादकं॥७७॥ न शिवार्चनतुल्योस्ति धर्मोन्यो भुवनत्रये॥ सर्वमन्यत्परित्यज्य शिवैकहितमानसः॥७८॥ शि
वपूजाविधिं कुर्याद्यदिच्छेच्छिवमात्मनः॥ त्वरितं जीवितं याति त्वरितं याति यौवनं॥ त्वरितं व्याधिरभ्येति तस्मात्पूज्यः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ सदाशिवः॥७९॥यावन्नायातिमरणंयावन्नाक्रमतेजरा॥यावन्नेंद्रियदौर्बल्यं तावत्पूजयशंकरं॥८०॥ ॥ महा० ए०
२२ सूतउवाच॥ ॥यःपूजयेत्त्रिनयनंशिवखंडचूडं बिल्वीदलैश्च कुसुमैःशिवलिंगमौलौ॥सोत्यर्कराजित विमान अ०१२
वरेणयाति॥ प्रोद्यत्सुधांशुधवलां रजताद्रिमौलिं॥ ॥इतिश्रीशिवरहस्ये महादेवाख्ये एकादशांशे शिवगौ
रिसंवादे द्वादशोध्यायः॥१२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईश्वरउवाच ॥ मासि मासि महादेवि पूजयामि सदा शिवे ॥ किंफलं कोविधिस्तस्य समासेन वदामिते ॥१॥ श्रु
णुष्व सावधानेन चेतसा मासपूजनं ॥ यत्कृत्वा मनुजः सद्यो विद्यां हृद्यां समश्नुते ॥ आसमाप्ति व्रतस्यास्य भू
शय्या नक्तभोजनं ॥ शिवे त्रिषवणं स्नानं भस्मरुद्राक्षधारणं ॥३॥ क्षमा दानमहिंसा च सत्यार्जवपरायणः ॥
ब्रह्मचर्यादिनिरतो विरतो विषयेषु च ॥४॥ पाषंडपतितोदक्यासूतकांत्यजपूर्वकान् ॥ वर्जयेत्स-
र्वयत्नेन मनसा कर्मणा गिरा ॥५॥ संतुष्टश्च प्रशांतश्च शिवध्यानरतो भवेत् ॥ संपूज्य च गणेशानं
नांदीश्राद्धं विधाय च ॥६॥ गोदानं च वृषोत्सर्गं [कुर्या] ब्राह्मणभोजनं ॥ शांतानां शांभवानां च शतं दशवरं शिवे ॥
॥७॥ तैरभ्यनुज्ञामासाद्य स्वयं नक्ताशनो भवेत् ॥ सामान्यमेतत्कथितं व्रतस्यास्य सदा शिवे ॥८॥ प्रतिमा-
२१५ संविशेषं च शिवपूजाविधिं शृणु ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥९॥ पद्मरागोद्भवं चै
त्रे पूजयेल्लिंगमैश्वरं ॥ वैशाखे वज्रलिंगं च जेष्ठे मरकतोद्भवं ॥१०॥ आषाढे मौक्तिकं विद्यात् श्रावणे नी
लनिर्मितं ॥ मासि भाद्रपदे गौरि गोमेदमणिकल्पितं ॥११॥ आश्वियुज्यां च विधियुग्माणिक्योद्भव
मुत्तमं ॥ कार्त्तिक्यां वैद्रुमं लिंगं वैडूर्यं मार्गशीर्षके ॥ पुष्परागमयं पुष्ये [पौषे] माघे सूर्यस्य कांतिजं ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फाल्गुने चंद्रकांतोत्थं लिंगं संपूज्य शैलजे ॥१३॥ समुच्चार्यमिदं स्तोत्रं स्तुवीत परमेश्वरं ॥ सर्वमासेषु पू
ज्योंसि विल्वपत्रैः सदैव मां ॥१४॥ शिवं शिवकरं शांतं शिवात्मानं शिवोत्तमं ॥ शिवमार्गप्रणेतारं प्रणतोऽ
स्मि सदाशिवं ॥१५॥ शाश्वतं शोभनं शुद्धं शश्वद्दोषप्रमोचकं ॥ विश्वं विश्वेश्वरं देवं शंकरं प्रणमाम्यहं ॥ सर्वपा
पहरं नाथं सर्वरोगहरं शिवं ॥ सर्वपापप्रशमनं नमाम्यार्तिनिवारकं ॥ अस्थानस्थानसंस्थानं संस्थिति[स्थिति]कारणं ॥
स्थिरस्थानस्थ योगस्थं स्थाणुमीशं नमाम्यहं ॥१७॥ ईशानं पुरुषं घोरं वामं सद्यं महेश्वरं ॥ ईशानं सर्वभूता
नां ईश्वरं प्रण[मा]म्यहं ॥१९॥ ईशानं नरदं देवं ईश्वरं मंत्रनायकं ॥ इत्थं मासस्तुतिर्दिव्यं स्तुत्वा नत्वा महेश्वरं ॥२०॥
समुक्तः सर्वपापेभ्यो मम लोके भवेद्ध्रुवं ॥ मासार्चनसमो धर्मो नास्त्यन्यो भुवनत्रये ॥२१॥ इति विज्ञाय य-
त्नेन पूजनीयो महेश्वरः ॥ ये भक्ता देवदेवेशं शिवं शांतमजं शुभं ॥२२॥ पूजयंति सदा भक्त्या मद्भक्ताः तप
सि स्थिताः ॥ संपूज्य पशुभ[र्ती]रं विशुद्धेनांतरात्मना ॥२३॥ इह लोके सुखं प्राप्य ते यांति परमं पदं ॥ मासिमासा
र्चने देवि नामान्यन्यानि मे सदा ॥ प्रवक्ष्यामि मुदा तुभ्यं दृष्ट्वा त्वामवधारय ॥ सर्वमासेषु रत्ना[मा]लाभे हेममये
वच ॥२५॥ हेमालाभे राजतं वा तां म्रजं नैलमेव वा ॥ मृन्मयं वाथ पालाशं क्षणिकं वान्यदेव वा ॥२६॥ सर्वगंध
1

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मयं चापि लिंगं कुर्याद्यथा रुचि ॥ व्रतावसान समये समाचरितनैत्यकः ॥२७॥ कृत्वा विशेषकीं पूजां हुत्वा पाय
समीश्वरे ॥ रुद्रमंत्रैर्मासि मासि स्वयमाचार्य एव वा ॥२८॥ पंचामृताज्य मिश्रेण विल्वानां स मिधः शुभाः ॥
स्वस्व शास्त्रोक्त मार्गेण प्रतिष्ठाप्य हुताशनं ॥२९॥ पूर्वमाद्यं समाद्यय पश्चाद्यष्ट शतं हुनेत् ॥ भवायेत्यष्टना मन्ना
दौ स्विष्टांतं होम माचरेत् ॥ ३०॥ दद्याद्गो मिथुनं देवि मासांते शं भवायतु ॥ व्रत मेतच्छिवप्रीत्यै कुर्वन्मुक्तिमवाप्नु
यात् ॥३१॥ स एव तपतां श्रेष्ठः स एव च महाव्रती ॥ नैतेन सदृशः कश्चित्कृतकृत्यो मुमुक्षुषु ॥३२॥ शिवानंतु
र्थं शिवे नक्तं भुक्त्वा मासार्चना विधौ ॥ मुक्त एव भवेत्सत्यं व्रतं द्वादश मासिकं ॥३३॥ पुरा गणेंद्रैश्च कृतं मम
प्रीत्यर्थमीश्वरि ॥ मुनीश्वरैर्देव गणैः ब्रह्म विष्ण्वीश्वरादिभिः ॥३४॥ तेनैव स्व पदं प्राप्ताः शिवतुल्यबलाः शि
२१5 वे ॥ भस्म धारण संपन्नाः त्रिपुंड्र परिचिन्हिताः ॥३५॥ नोक्तपूर्वं महेशानि मासार्चन मिदं शिवे ॥ सयत्फ
लमवाप्नोति तदेकाग्र मनाः शृणु ॥३६॥ कल्पकोटि शतं दिव्यं कल्प कोटि शतानि च ॥ वसेच्छिवपुरे देवि
शिवतुल्य बलो युवा ॥३७॥ रुद्राणी गण साहस्रैर्नासाभरण भूषितैः ॥ सविमानैर्महाभोगैर्वंशवीणा
दिभिः सह ॥३८॥ दुंदुभीनां च निर्घोषैः निर्जितांबुधि निस्वनैः ॥ युगायुत शतो महाभिव्याप्ति मंडले च =

३४ साग्रं शिवलोके महीयते ॥३९॥ तस्यान्ते धर्मशेषेण त्रैलोक्याधिपतिर्भवेत् ॥ तुंगतुंगतुरंगौघैर्मीतंगगण
संवृतः ॥ ज्ञातांगदारिताराति मंडलोच्चलितांडभूः ॥ कोदंडखंडितोच्चंडदंडिताराति मंडलः ॥४१॥ वि
धिं वक्ष्ये समासेन मासार्चनविधौ शिवे ॥ चैत्रादिषु च मासेषु स्नात्वा प्रातः समाहितः ॥ कृतनित्यक्रि
यो मौनी प्रतिष्ठाप्य महेश्वरं ॥ उक्तलिंगे विशेषेण शुद्धोदं स्नाप्य भक्तितः ॥ उपलिप्य शुभं देशं गोमये
न नवांभसा ॥ रंगवल्लिभिरापूर्य पद्मं स्वस्तिकचिन्हितैः ॥४४॥ मंटपं पुष्पमालाढ्यं कलादर्पण
चित्रितं ॥ कुसुमेषु सुगंधैश्च फलैश्च विविधैस्तथा ॥४५॥ भक्ष्यभोज्यैरनेकैश्च घृतदीपैश्च सं
युतं ॥ तस्य दक्षिणपार्श्वे तु विन्यसेद् गरुं शिवे ॥ दद्यात्पश्चिमपार्श्वे तु शोभनार्थं मनःशिलाः ॥ उत्तरे
चंदनं दद्यात् हरितालं सुपूजितं ॥ पंचामृतैः फलरसैः पंचगव्यसुपात्रकैः ॥ सामान्यर्घ्यविशेषार्घ्यौ
प्राक्स्थाप्यौ पुष्पपूरितौ ॥४८॥ पाद्यार्घ्यौ च मनैः पात्रैः शोधितैर्नीरपूरितैः ॥ पाटलोत्पलकल्हारकरवीरउ-
शीरकैः ॥४९॥ संयुक्तैः स्थापयेद्देवि मंडपाग्रे शिवस्य हि ॥ दूर्वापामार्गदर्भाग्रपूरितैः कलशोदकैः ॥ शं-
२ खैश्च दक्षिणावर्त्तै रत्नगर्भैर्महेश्वरि ॥ सव्यावर्त्तैर्यथाजोषं शंखपात्रे परिस्थितैः ॥५१॥ सपुष्पगर्भैः कुंभैश्च=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंच पल्लवचक्रकैः॥क्षीरं फूलशतं प्रोक्तं दधित द्विगुणं भवेत् ॥५२॥ घृतंतत्त्रिगुणं प्रोक्तं मधु तत्र चतुर्गु
णं॥ शिता पंचगुणा तत्र प्रोक्ता मासार्चनाविधौ ॥५३॥ सुश्वेतनारिकेलांबुघटैर्द्रासुपूरितैः॥ कदली
फलसहस्त्रैः फनसैः शतकोशकैः॥ ५४॥ पक्वाम्रजालसुरसैःजंबीररससद्घटैः ॥ गंधोदकैश्चंद्र मिश्रैः
सकस्तूरिसमन्वितैः॥ कुशरत्नोदकैर्दैविस्वर्णोदैर्वासितैर्जलैः॥ भक्त्या वित्तानुसारेण फलमाढ्य
दीरिद्रयोः ॥५६॥ त्वरितैः पावमानैश्च शतरुद्रैर्महेश्वरं॥ भूतशुद्धिं विधायादौ धृत भस्म त्रिपुंड्रवान्॥
॥५७॥ रुद्राक्षमाला भरणश्चंद्राभरणमीश्वरं॥कुशचेलाजिने स्थित्वा स्वाचांतः शिव भावनः॥५८॥
प्रागुदङ्मुख एवा य मर्चकः शिवपूजने॥ संस्थितः सुस्थिरो मौनीजपेत्पंचाक्षरं मनुं ॥५९॥ सहस्त्रमु
२/६ त्तमं देवि शतामध्योत्तर मध्यमं॥ अंगन्यासकरन्यासैर्न्यसेद्देहं स्वकं शिवे॥६०॥ शिवात्मकां तनुं कृत्वा
भावं प्राकृतमुत्सृजेत्॥ तत्तन्मासेषु पुष्पाणि नामान्यपि महेशितुः॥६१॥ प्रवक्ष्यामि महादेवि सा-
मान्यं बिल्वपल्लवं॥ पद्मानि करवीराणि उत्फुल्लानि महेश्वरि ॥ उत्फुल्लानि च ग्राह्याणि तत्तन्मा
सोद्भवान्यपि॥ चरुं सघृतमेवेहं प्रशस्तं सर्वमासिके॥६३॥ तत्तन्मासान्त पौर्णिम्यां होमः कार्यो महेश्वरि॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३५ स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनं ॥६४॥ परिस्तीर्य हुताशं तं माघाराद्यं ततश्चरेत् ॥ पायसं सघृतं देवि जु-
ह्वा च जुहुयाद्द्विजैः ॥६५॥ स्वयं दशावरैर्विप्रैः शांभवैर्भस्मभूषितैः ॥ भवाष्टनामभिस्तत्र स्वाहान्तैर्जुहुयात्त
दा ॥६६॥ शतमंत्रैस्तथा पंचैः शतं सघृतपायसं ॥ ततः स्विष्टकृदंतो हि होमः कार्यो विजानता ॥६७॥ गाव
श्च दक्षिणा देया वृषैकादशवत्सकाः ॥ सवस्त्रा कांचनखुरा रौप्यशृंगोरुकाश्यकाः ॥ शांभवेभ्यो ब्रा-
ह्मणेभ्यो मंथवाद्रोणमात्रकं ॥ दद्याद्वित्तानुसारेण वाग्यतो भक्तितत्परः ॥ विविधं तत्र मासांते स्तोत्रै
स्तुला महेश्वरं ॥ प्रसादयेत्सनक्ताशीहविष्यं लवणोज्झितं ॥७०॥ नित्यं द्वादशमासं वै त्रिकालं स्ना
नतत्परः ॥ धौतवासाः शुचिर्दांतो भस्मरुद्राक्षभूषणः ॥७१॥ अग्निरित्यादिभिर्मंत्रैः शिवसात्कृतमान
सः ॥ मासार्चनव्रतं ह्येतत्कृत्वा च विधिपूर्वकं ॥७२॥ शतावरं सहस्रान्वा मासांते ब्राह्मणार्चनं ॥ द्वादशावर
मेवेशि भोजयेद्भक्ष्यभोज्यकैः ॥७३॥ स्वस्तिवाच्य च तान्सर्वान्तांबूलैर्दक्षिणादिभिः ॥ सयत्फलमवा
प्नोति तच्च नान्यमहामखैः ॥७४॥ आद्यंते वा द्विजा भोज्या मासांते वा महेश्वरि ॥ विमानैः सूर्यसंकाशैर्या
ति शांभोर्वरालयं ॥७५॥ मातृतः पितृतश्चैव शतवंशसमन्वितः ॥ स्कंद उवाच ॥ मासार्चनाव्रतविधिस्तव-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्रुतोयं पुण्या युतार्जित गृतिमिदं एष धर्मः ॥ ज्ञान प्रदोयममलः शिव भक्त वर्यैः कार्यो धुना गिरि सुते शिवतुष्टि सिध्यै ॥ क्षेत्रेषु गिरि नदीवन पुण्य देशे श्रद्धान्वितोत्र मनुजो द्विज एव मुख्यः ॥ मासेषु-शर्वार्चन मेव मुख्यं सर्वेषु मंत्र सहितो विधिरेव सिद्धः ॥ इतिश्री शिवरहस्ये महादेवाख्ये एकादशांशे मासार्चन विधौ त्रयोदशोध्यायः ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ ॥
श्री ईश्वर उवाच ॥ ॥ चैत्रे त्रिनेत्र मभ्यर्च्य अग्निष्टोमापुतं लभेत ॥ आवाहय मंडपे तास्मिं लिंगं माणिक्य संभवं ॥ पंचपल्लव संयुक्तं कुंभं मंत्रेण मुत्तमं ॥ विलिप्य गोमयेन क्ष्मां रंगवल्याद्यलंकृतां ॥ रंभा स्तंभयुतं दिव्यं मणितोरण मंडितं ॥ गंध पुष्पाक्षतैर्युक्तं पंच गव्यं पवित्रितं ॥ पंचामृतादि संभा-
२१७ रं फलजालरसं शिवे ॥ कुशदूर्वाक्षता मिश्रैः पाद्यार्घ्याचमनां बुधैः ॥ २ ॥ गंध चंदन पात्रैश्च दीपस्तंभद्वयोज्वलं ॥ धूपैर्गुग्गुल मिश्रैश्च सघृतैः सुमपात्रकैः ॥ ३ ॥ कल्पइत्वाथ संभारं अर्चको ब्राह्मणैः सह ॥ शांभवै र्भस्म रुद्राक्ष धारिभिः संयुतोंबिके ॥ ४ ॥ अग्निरित्यादि भिर्मंत्रैः स्वयमुद्धूलयेत्तनुं ॥ नद्यां वादे वखातादौ वापी कूपोदकैः शुभैः ॥ ५ ॥ स्नास्यामीत्यथ संकल्प्य चैव स्नाने नशंकरः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३६ प्रीयतामिति देवेशि त्रियायुषत्रिपुंड्रकः ॥ रुद्राक्षहारवलयः कृतनित्यक्रियः शुचिः ॥ धौतवस्त्रधरः शान्तः सप
वित्रकरस्तथा ॥ चैलाजिनास्तृते वापि शिवे कुशमयासने ॥ स्थित्वा शिवार्चनस्थाने शिवैकगतमानसः ॥ ८ ॥
आगमं वैदिकं वापि पूजाक्रमयुतः शिवे ॥ अंगन्यासादिकं कृत्वा ध्यायेद्देवमुमासखं ॥ ९ ॥ उमासन्मुखमी
शं त्रिनेत्रं चंद्रशेखरं ॥ वरदाभयहस्तं च नीलकंठं पिनाकिनं ॥ १० ॥ मृगटंकधरं सौम्यं वस्त्राभरणभूषि
तं ॥ उमया संयुतं ध्यात्वा जपेन्मंत्रं मुदायुतः ॥ ११ ॥ पंचाक्षरसहस्रं च शतमष्टाधिकं शिवे ॥ संकल्प्य
मासपूजादौ यजेद्देवमनन्यधीः ॥ १२ ॥ अपनीयाथ निर्माल्यं त्रिनेत्रं लिंगमौलितः ॥ संशोध्य चक्षुभिर्वस्त्रै
र्लिंगमापीठमंबिके ॥ १३ ॥ अद्भिः पूते तथा पीठे देवमावाह्य भक्तितः ॥ दृष्ट्वा लिंगं तदा प्रोक्तमंत्रैः शां भवसत्तमः ॥ १४ ॥
पंचाक्षरेण तत्सर्वमुपचारं प्रकल्पयेत् ॥ गायत्र्या च समभ्यर्च्य शिवलोकमवाप्नुयात् ॥ १५ ॥ कल्पिते चासने स्था
प्य धर्मज्ञानमये शुभे ॥ वैराग्यैश्वर्यसंपन्ने दारवे धातुजेऽथवा ॥ १६ ॥ ॐकारं मध्यपद्मे तु सोमसूर्याग्निसंभवे
॥ पाद्यमाचमनार्घ्यं च दत्वा रुद्राय शं भवे ॥ स्नापयेत्तं च गव्येन मधुपर्केण वै शिवे ॥ क्षीरेण दध्नाज्येनापि क्षौद्रे
ण सितया शिवे ॥ फलोदकैस्ततः शुद्धैरंबुभिः स्वर्णमध्यगैः ॥ शोधितैर्वासितैर्दैविपाटलागरुमिश्रितैः ॥ १९ ॥

४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोशृंगेणाथशंखेन वर्धन्या वाभिषेचयेत् ॥ धारां प्रकल्पयेल्लिंगे अविछिन्नां गिरींद्रजे ॥ २०॥ धूपैश्च धूपये
त्तत्र दीपानुद्बोध्य तत्र हि ॥ ब्राह्मणैः शांभवैः सार्धं लिंगं तदभिषेचयेत् ॥ २१॥ एकवारं त्रिवारं वा जप्यो रुद्रः स
शांतिकः ॥ एकादशगुणो रुद्रो जप्यश्च मकशांतिकः ॥ २२॥ तर्पयेदभिषेकांते भवाद्यैरष्टनामभिः ॥ उद्व-
र्तयेच्छुभैर्वस्त्रैः स्थाप्य पीठे महेश्वरं ॥ चंदनेनोपलिप्येशं वस्त्रयज्ञोपवीतकं ॥ दद्यात्रिशाखा बिल्वैश्च
पूजयेन्मल्लिकासुमैः ॥ २४॥ दमनैश्च शुभैः पद्मैः पुंडरीकोत्पलादिभिः ॥ नीलोत्पलानां मालाभिः नं
द्यावर्त्तशमीभवैः ॥ २५॥ चंपकैर्जातिपुष्पैश्च बकुलैः करवीरकैः ॥ दत्वा सौगंधिकं धूपं पायसं च निवेदये
२१८ त् ॥ २६॥ सशर्करां बुसंमिश्रं एलाचूर्णविमिश्रितं ॥ पानकं दधि भक्तं च सोपदंशं निवेदयेत् ॥ २७॥ कृत्वा
प्रदक्षिणं देवि नमस्कारादि पंचकं ॥ शताष्ट नामभिः पूजां कुर्याद्बिल्वैर्महेश्वरे ॥ २८॥ नामभिः छांदसैर्देवि पूज
येतस्तु वीतच ॥ तानि नामानि वक्ष्यामि समाहितमनाः शृणु ॥ २९ ॥ नमोऽस्तु तुभ्यं देवाय सुव्रतानततेजसे
॥ नमः क्षत्राधिपतये बीजिने शूलिने नमः ॥ ३०॥ ह्रस्वायोर्ध्वाय धूम्राय दंडिने रुक्मरेतसे ॥ नमो ज्येष्ठा
य श्रेष्ठाय बलप्रमथनाय च ॥ ३१॥ नमो वन्याय पूज्याय सद्योजाताय वै नमः ॥ गह्वराय घनेशाय हव्यवाह=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३७ यचीरिणे ॥३२॥ भूतानामुद्भवायाथप्रभवे विभवे नमः ॥ देवायद्योतमानाय मानातीताय शंभवे ॥३३॥ वेदां अ·२८
गायप्रदानाय योग सांख्य विहारिणे ॥ ध्रुवाध्रुवाय शांताय विश्वाय सुमहर्षये ॥३४॥ ग्रहाय ग्राह्यरूपाय ग्रह
स्थाय यतात्मने ॥ अहोरात्राय मासाय ऋतवे क्रतवे नमः ॥३५॥ संवत्सराधिपतये युगकालात्मने नमः ॥
पराधीय प्रसन्नाय शुभ्राय हरिताय च ॥३६॥ धर्माधर्मस्वरूपाय पराय विभवे नमः ॥ पुरांतकाय भीमा
यवर्गाय धृतये नमः ॥३७॥ मन्वंतराय काव्याय विश्वाप्याय विधायिने ॥ विश्वसर्गाय भर्गाय ज्योतिषे दिव्य
चक्षुषे ॥३८॥ कल्पोदयनिबद्धाय शुभ्रधनुर्धराय हंसे ॥ ब्रह्मणे ब्रह्मभूताय ब्रह्माधिपतये नमः ॥३९॥ विद्येशाय
दिदेवाय विद्याधिपतये नमः ॥४०॥ नमो व्रताधिपतये मंत्राधिपतये नमः ॥४०॥ पितॄणां पतये चैव पशूनां पत
ये नमः ॥ शेषभूषाय तुष्टाय पुष्टाय च नमो नमः ॥४१॥ वृषभाय पुराणाय पत्नीनां पतये नमः ॥ प्रजापतीनां पत-
ये व्योमकेशाय ते नमः ॥४२॥ सिद्धाय बृहते चैव घनघोषाय ते नमः ॥ दैत्यदानवपूज्याय वायवे रुक्षघातिने ॥
॥४३॥ यक्षाय भिक्षुरूपाय कृत्तिवासाय ते नमः ॥ पक्षिनाहमपूज्याय गुह्यलिंगाय ते नमः ॥४४॥ पर्वाय पर्वमध्या-
य शर्वरीशविधारिणे ॥ भव्याय गुभ्यरूपाय मखाध्यक्षाय धातवे ॥ भववैद्याय घोराय वामदेवाय ते नमः ॥

५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सद्योजातायपुरुषायईशानायनमोनमः ॥४६॥ एवंनामाष्टकेनेशं शतैनैवप्रपूजयेत् ॥ स्तुवीतैवंमहादेवं
चैत्रेवैलिंगरूपिणं ॥४६॥ सद्योजातादिविद्याप्रभवविधिकृतेशूलिनेगोमृणेगोवृषांकाध्वा जिनवास
सेविधिमहामुंडोरुसद्वक्षसे ॥ ज्वालाकूलविशेषिताखिलमहाकालायफालोज्वलन्नीलालोलवि
षोरुकंठरभसपूषायतुभ्यंनमः ॥४८॥ सामस्तोमनुतायवेदकलितोत्सीमोतसंचारिणे ॥ वामार्धा
कृतयेसदासुकृतयेकामांगनाशायते ॥ व्योमाकारशरीरधूमपटलीकेशायपाशावृता ॥ पारावारवि
कारसंसृतिभवोत्तारायतुभ्यंनमः ॥४९॥ भस्मांगायभवायभावुकहृदोतुंगायगंगारय ॥ स्फार
घोरमहोत्तमांगक्लिसल्लिंगायशंगायते ॥ कामाद्यंगविभंगकायसुमहादिव्यांगसंगस्फुर ॥
२१९ ज्वालांगायकुरंगबालविलसद्धस्तायतुभ्यंनमः ॥५०॥ हंसाख्यनागकृतहंसकपादपद्म ॥ दूरा
द्यदृश्यवरजगत्स्थितिनाशकोशव्योमांबकाशशशिधामबिभासिधाम्ने ॥ भूम्नेविधूततमसे
रभसेविशोक ॥ सोम्नेभवायविभवायनमोनमस्ते ॥५२॥ सूतउवाच ॥ स्तुत्वैवंदेवमीशानंपुनः
संपूज्यशंकरं ॥ ईशानंपुरुषंदेववामदेवमघोरकं ॥ ५३ ॥ सद्योजातंचदेवेशिनामभिःसंस्तुवीतच ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो नीराजनं दद्याद्वादित्राणां निनादतः ॥ ५४ ॥ शंखकाहलिनिर्घोषैर्भेरीझांकारमर्द्दलैः ॥ वेणुवीणा
मृदंगैश्च जयशब्दैः सुमंगलैः ॥ ५५ ॥ पूजां समाप्य नियतः करतालसुनर्त्तनैः ॥ प्रसादयेन्महादेवं पूजां
तेशां भवैः सह ॥ ५६ ॥ निवेद्यैश्च फलैश्च तांबूलैः पूजयेद्दक्षिणादिभिः ॥ एकवारं त्रिवारं वा पूजयेद्गिरि
जापतिं ॥ ५७ ॥ छत्रैश्च चामरैर्दिव्यजनादर्शकैरपि ॥ चैत्रे त्रिनेत्रपूजातः क्षिप्रं नश्यति पातकं ॥ ५८ ॥ चित्राया
मथ पौर्णम्यां होमं कुर्याच्च शांभवैः ॥ दद्याद्दोमिथुनं तत्र मासि मासि विशेषतः ॥ ५९ ॥ प्रसंगाच्चैव संपूज्यो भक्ति
हीनैरपि द्विजैः ॥ भावानुरूपफलदो भगवान गजापतिः ॥ ६० ॥ उच्छिष्टः पूजयन्याति पैशाचं तु द्विजाधमः ॥
संक्रुद्धो राक्षसां योनिं अवभक्षः क्षयरोगवान् ॥ गानशीलश्च गांधर्वं नृत्तशीलश्च पूरुषः ॥ स्वधर्मः ख्यापको
यस्तु कूहकः प्रोच्यते द्विजः ॥ ६२ ॥ तस्माच्छीलवता भाव्यमर्चने च विशेषतः ॥ विशेषयेत्तनुं देविन शी-
क्षारवर्जितः ॥ ६३ ॥ एवं चैत्रादिमासस्य पूजनं ते प्रकीर्त्तितं ॥ यत्कृत्वा मनुजः सद्यो लभेद्रुद्रगणत्वतां ॥ ६४ ॥
पितामहैः सहैवायं नरकस्थैरपि द्विजः ॥ याति शंभोर्वरस्थानं विमानैः सार्वगामिकैः ॥ ६५ ॥ स्कंद उवा
च ॥ चैत्रे त्रिनेत्रपदपंकजमित्र भावाच्चित्रैश्च पातकभरैः स हि मुक्त एव ॥ सत्रातिरात्रशतकादपि पुण्य=



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाक्स्यात्सुत्रादिमित्रसुकलत्रयुतो भुवि स्थः ॥८६॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे चैत्रमा-
सार्चनं नाम चतुर्दशोध्यायः ॥१४॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ श्री ईश्वर उवाच ॥
वैशाखार्चनजं देवि विधिं वक्ष्यामि तेशृणु ॥ सरित्सरस्तडाकेषु देवखातोदकूपके ॥१॥ स्नायान्नित्यं च तन्मा
सि शिवं हृदि समर्च्य च ॥ धौतवस्त्रधरः शांतो आचांतः कृतनैत्यकः ॥२॥ पूजास्थानं शुभं देशं गोमयेनोपलि
प्य च ॥ त्रिशूलवज्रपद्मादिस्वास्तिकाद्यैरलंकृते ॥३॥ रंगवल्लीकृतानेकमंडपं तोरणान्वितं ॥ वितानपुष्प
मालाभिः शोभितं कदलीदलैः ॥४॥ तन्मध्ये च महापीठे स्थापयेल्लिंगमुत्तमं ॥ वज्रजं हैमजं वापि मृन्मयं
४20 वा महेश्वरि ॥५॥ तदग्रे कुंभमव्यग्रः स्थापयेत्पल्लवैर्युतं ॥ नदीनदाहृतैस्तोयैः पूरितं शोभितैः शिवे ॥६॥
सामान्यार्घ्यविशेषार्घ्यौ देवाग्रे स्थापयेत्ततः ॥ दर्भदूर्वाग्रपुष्पाढ्यौ कल्पनीयौ विशेषतः ॥७॥ पंचगव्य
कपात्रं च पूरयेत्तं च गव्यकैः ॥ तत्तन्मंत्रैर्मेलयित्वा गंधपुष्पाद्यलंकृतं ॥८॥ ततः पंचामृतं शुद्धं गव्य
मेव प्रसाधयेत् ॥ फलानां च रसं देवि गंधं तनोदकं ततः ॥१०॥ अक्षताः धवलास्तत्र साधयेत्तिलमि-
श्रिताः ॥ सुदिने शुभनक्षत्रे चंद्रताराबलान्विते ॥११॥ गंधपुष्पफलोपेतं धूपदीपैरलंकृतं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३१ पूजास्थानं समाविश्य संस्थितः प्राङ्मुखस्तदा ॥११॥ कुशचैलाजिने वापि शं भवैः सह सुव्रतः ॥ अग्निरित्या
दिभिर्मंत्रै भस्मनोद्धूलयेत्तनुं ॥१२॥ त्रियायुष त्रिपुंड्रांको दिव्यरुद्राक्षभूषणः ॥ शिवाभिषेके वरयेत्संकल्प्यैव
चतान्द्विजान् ॥१३॥ भस्मरुद्राक्षसंपन्नाँस्त्रिपुंड्रपरिमंडितान् ॥ निर्माल्यमपनोद्यैव शिवं परमकारणं ॥१४॥
मंत्रं पंचाक्षरं धीमान् जपेत्कृतसहस्रकं ॥ ऐशान्यां चंडमाराध्य निर्माल्यं तत्र दापयेत् ॥ कल्पयेदासनं पश्चा
दाधारादियथाक्रमं ॥ आधारशक्तिं तत्रत्यां श्यामां संपूज्य देशिकः ॥१६॥ अनंतं धवलं नागं आसनाधः प्रपूजये
त् ॥ भूभूतशुद्धिं कृत्वैव शं खं तत्र प्रसादयेत् ॥१७॥ न भूमिलग्नं पात्रस्थं पुण्यांबु परिपूरितं ॥ धर्मज्ञानं चवै
राग्यम धर्मादीन्ततो यजेत् ॥१८॥ तस्योर्ध्वकंदनं पद्ममासनं परिकल्पयेत् ॥ अष्टपत्राणि तस्याहुरणिमादि
गुणान्वितं ॥१९॥ केसराणि च दिव्यानि रुद्र वामादिशक्तिभिः ॥ बीजादिशक्तिपर्यंतमासनोपरि पूजयेत् ॥
आवाहनं च स्थापनं च सन्निरोधं निरीक्षणं ॥ पाद्यमाचमनं चार्घ्यं गंधपुष्पमनंतरं ॥२१॥ धूपं दीपं च तां-
बूलं दत्वा संस्नापयेत्ततः ॥ ध्यायेदीशानमव्यग्रः उग्रं देवं पिनाकिनं ॥२२॥ त्रिलोचनं नीलकंठं वरदा
भयपाणिनं ॥ उमासहायं विश्वेशं विश्वाधारं सनातनं ॥२३॥ सर्वाभरणशोभाढ्यं गंधवासाद्यलंकृतं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिपुंड्रचंद्रार्धधरं भूतिभूषितविग्रहं ॥२४॥ मंदस्मितमुखांभोजसुंदराननपंकजं ॥ ध्यायेद्देवं विरूपाक्षं नि
र्जित्याक्षाणि सुव्रतः ॥२५॥ ततः संस्थाप्य तल्लिंगं पीठे वै स्नानकर्मणि ॥ विशोध्य लिंगं शुद्धोदैः पंचगव्यैः प्र-
सेचयेत् ॥ मधुपर्कं ततो दद्यात्क्षीरमादौ प्रसेचयेत् ॥ २६॥ पावमानेन रुद्रेण दध्ना वा त्वरितेन च ॥ लिंग
सूक्तेन च घृतं मधुना स्नापयेच्छिवं ॥२७॥ कद्रुद्रायेति गौरीशं सितया स्नापयेच्छिवे ॥ इमा रुद्रेति मंत्रे
ण नारिकेलांबुना ततः ॥ त्र्यंबकेति देवेशं कदली फलसारतः ॥ यो वै रुद्रेति मंत्रेण पनसैरीशमंत्र
तः ॥ २८॥ रसालसारतो पीशं याः फलिनीति चूतमंत्रतः ॥ जंबीरसारैः सुरसैः लिंगसूक्तक्रमेण हि ॥ ३०॥
संस्नाप्य पिष्टेन स्नापयेदुष्णवारिणा ॥ तिलतैलैरपि शिवमभिषिच्य विरूषयेत् ॥ उद्धर्तनांतरे स्ना
प्य घर्षयेद्बिल्वपत्रकैः ॥ स्नापयेद्गंधतोयेन कुशरत्नैर्हिरण्यजैः ॥ तोयैः संस्नापयेदीशं नानावादि
त्रनिस्वनैः ॥ असंभवे तु द्रव्याणां यथाविभवसंभवैः ॥३३॥ केवलैर्मंत्रतो यैर्वा भक्तिपूज्यो महेश्व
रः ॥ आढ्योनापि महास्नानं कारयेन्मध्यमोपि वा ॥ ३४॥ अभ्यंगं वा महादेवि द्रव्यैरेतैर्यथाबलं ॥
कृत्वा निवेद्य पश्चात्तु हविः किंचिन्महेश्वरे ॥ ३५॥ गोशृंगैर्वा तथा शंखैः धारापात्रेण शेचयेत् ॥ अ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४० विच्छिन्नां तत्र धारां लिंगमौलौ प्रकल्पयेत्॥३८॥ अन्वारंभणकं सूत्रं बध्वांगुष्ठे भिषेचयेत्॥ एकवारं त्रिवारं वा रुद्रैका
दशकं द्विजैः॥ सशांतिकं सचमकं जपेद्वैशां भवै द्विजैः॥ भवायेति तथैवांते तर्पयेदष्टनामभिः॥ प्रक्षाल्य
वासः संशोध्य पीठे स्थाप्य महेश्वरं॥ दद्यादाचमनं गंधमुपवीतं च साक्षतं॥३९॥ सुवस्त्राभरणं गौरि
भस्म पांडरमुत्तमम्॥ अगरूद्भवमेवेशि दद्याद्वैशाखमासिके॥४०॥ धूपं घृतोद्भवं दीपं हरिद्राकुसरं शिवे॥
गुडखंडकृतं भक्ष्यं दध्यन्नं सौपदं शाकं॥४१॥ बकुलैर्बिल्वपत्रैश्च त्रिशाखैश्च प्रपूजयेत्॥ भवायेत्य
ष्टनाम्नैव निधनेत्यादिमंत्रतः॥४२॥ तांबूलमुखवासं तु दद्याद्देवाय शूलिने॥ नीराजनं ततो लिंगं श
तवर्त्तिसुपूरितं॥४३॥ घृतैस्तैलैरपि वरैः रथाकारैर्मनोहरैः॥ नीराजनसुपात्रैश्च वेणुवीणादिनिस्वनैः॥
॥४४॥ शंखकाहलभेरीणां जयशब्दैः श्रुतीरितैः॥ नीराज्य पाज्य धूपैश्च दीपैः कर्पूरखंडकैः॥४५॥ छत्रं
च चामरं देवि व्यजनं दर्पणं तथा॥ निवेदयेद्यथाजोषमुपचारं पृथक्पृथक्॥४६॥ वैशाखनामभिर्दे-
वि पूजनीयो यथाबलं॥ प्रदक्षिणनमस्कारं नर्त्तनं स्तोत्रकल्पनं॥४७॥ नाम्ना चैते प्रवक्ष्यामि शताष्टो
त्तरसंख्यया॥ स्तोत्रं चैते विशालाक्षि वैशाखे श्रीदलैर्यजेत्॥ तस्य मुक्तिः करस्थैव भविष्यति सुमध्यमे॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ भर्गाय भूतभव्याय भवरोगहराय च ॥ शार्वीय स्वर्णरूपाय दूर्वा पूज्याय शंभवे ॥५०॥ गोकर्णाय च
गोमुखे च शंकुकर्णायते नमः ॥ वराहमथनाये वरूक्षाय द्विरदाय च ॥५१॥ नमोप्सराणां पतये गणानां पत
येनमः ॥ अहिंसापतयेचैव ओजसां पतये नमः ॥ ५२॥ नमो सुपर्णपतये हेमवर्णाय वर्णिने ॥ वला
वलसमूहाय अक्षोभणाय च ॥ ५३॥ चंद्राभरणभूषाय विमशेषाहिधारिणे ॥ दीप्तशृंगैकशृंगाय
वृषभायककुद्मिने ॥५४॥ बिल्मिने बिल्वपूज्याय विशाखसुप्रियाय च ॥ उग्राय रुद्ररूपाय धन्वने धावते
नमः ॥५५॥ ज्योतिर्गणानां पतये ग्रहाधाराय ते नमः ॥ अतीताय भविष्याय वर्त्तमानाय ते नमः ॥५६॥ अजरा
य नमस्तुभ्यं तपसे वरदाय च ॥ सुवर्चसे सुवीर्याय स्मरगर्वहराय च ॥ ५७ ॥ वरदाय वरेण्याय स्वर्णवर्णाय ते-
222 नमः ॥ अर्णवांतनिवासाय दीप्तशूलधराय च ॥५८॥ पुरुषाय अप्रमेयाय अघोराय ऊर्ध्वकेशिने ॥ ज्वालामा
लावृतांगाय भुजंगाभरणाय च ॥५९॥ नमो बाह्याय गुह्याय स्वर्गाय नरकाय च ॥ हराय परमेशाय स्कं
दगोप्त्रे सुधन्विने ॥६०॥ कनिष्ठाया य ज्येष्ठाय गव्हरेष्ठाय चर्मिणे ॥ मुंडाय शितिकंठाय जटिलाय भ-
गाय च ॥६१॥ व्योमकेशाय भीमाय पर्वर्ष्याय वरणाय च ॥ व्याप्यव्यापकरूपाय कालगर्वहराय च ॥६२॥ मुंज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४१ केशाय भाव्याय लिंगाध्यक्षाय ते नमः ॥ वंकवेनागकर्णाय बालन्यंकुधराय च ॥६७॥ भवाय भजमानाय य
जमानाय ते नमः ॥ सूर्याय चंद्ररूपाय नार्यवे सागराय च ॥ निगमांतैकवेद्याय अभेद्याय वपुष्मते ॥ भद्रा
य शरण्याय वरेण्याय नमो नमः ॥ अरण्यानां च पतये भूताधिपतये नमः ॥६६॥ यक्षाधिपतये चैव रक्षा
याय कपर्दिने ॥ एवं नामाष्टशतकैः पूजयेद्बिल्वपल्लवैः ॥६७॥ वैशाखे देवदेवेशं स्तुवीतैवं महेश्वरि ॥
यत्ते रुद्र महाधनुः गिरिभवा प्राक्दक्षिणा चोत्तरा पश्चात्ता सुनम स्त्रिया सु विहिता वेदेषु निष्ठावतां ॥
विज्ञ्यासा भगवन् भवेत सुहिता इज्या युतानां फलं दद्यात्याज्य मपास्तवैरि सकलं राज्यं लभेत्तत्क्षणा-
त् ॥६८॥ शंभो भर्ग भवेंदुशेखर महागंगा तरंगोज्वलल्लोला भंगतरंग सुंदरजटाजूटोत्तमांगोज्वल ॥ पाहि श्री
प्रमथाधिनाथ गिरिजानाथावमां शंकर त्रस्तं मां वर कालहस्त सुमहापाशावबद्धं हर ॥६९॥ हे शंबरांत
क हर स्मरवरामरेश काशीशवासितजगत्पर भावकाश ॥ चर्मांबरांतक हर त्रिपुरावमर्द मूर्धन्य पाहि
भगवन् धृतशंबरांक ॥७०॥ हे काल धृत शूलवरा हि मालं फालोज्वलानल विशोषित विष्णुवाल ॥ नी
९ लाभकंठ कलनानिल पापतूलदावाग्निजाल भगवन्नवमां नमस्ते ॥७१॥ यक्षाधिपार्चितपदांबुजत्र्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षदक्ष शिक्षा विनोद भगवन् सुमहोक्षवाह ॥ वीक्षा विदग्ध सुमचापवरोरुकायरक्षाधुना पशुपते हर मां
हि तावक्ष ॥७४॥ एवं संस्तुत्य वैशाखे देवदेवं महेश्वरं ॥ एककालं त्रिकालं वा पूजयेल्लिंगमैश्वरं ॥ द-
द्याद्धोमिथुनं देवि मासांते शांभवेषु तत् ॥ सदक्षिणं सवत्सं च वस्त्रालंकारभूषितं ॥७८॥ होमः कार्यो
त्र वैशाख्यां प्रागुक्तक्रमतः शिवे ॥ नक्ताशी भस्मनिष्ठो थ भवेन्मासांतमीश्वरि ॥७५॥ वैशाख्यामथ
पौर्णिम्यां कुर्याच्च दधिकंबलं ॥ घृतकंबलमानेन विधिः प्रोक्तः पुरा मया ॥७६॥ एतत्ते भिहितं गौरि
वैशाखार्चनजं फलं ॥ स्नानपूजनमीशानि गंधपुष्पफलार्पणं ॥७७॥ पानीयं पानकं तस्मिन्मासि विं
प्रेषु दापयेत् ॥ मम प्रीत्यर्थमेवेशि तस्य पुण्यफलं शृणु ॥ कांचनेन विमानेन वंशलक्षसमन्वितः ॥ याति
शंभोः परं धाम सर्वभोगसमन्वितः ॥७९॥ ईश्वर उवाच ॥ त्रिशाखे वैशाखे शिखिविशिखनेत्रार्चन
परो मखानां सप्तानां फलसुखमवाप्यो न्नतमुखः ॥ विशाखर्क्षे यो मां भजति वरदुःखोज्झित नरो वरो-
भूसालस्यं गिरिवरसुते मय्यभिमुखः ॥८०॥ कृतांतांतकपूजयंतो हृदंतः वसंतो पि संतो न संत्येव शांताः ॥
उमाकांत नामैव ते संवदंतः भवापारदुःखाभितांताः कियंतः ॥८१॥ विशाखावैशाख्यां यदि सुकृतभा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४२ जेपि मनुजा क्षितौ वैशाखांतप्रथितपदपूजामुनिरताः॥ परं कुर्वंत्यद्धा शिवतरमहत्स्नानकलना॥ शिवेदध्नः पुण्यं त्वघहरमहो कंबलमुमे मम प्रीत्यै मुक्त्यै प्रकटतरभक्त्यैव सुजनाः॥ ८२॥ इतिश्री शिवरहस्ये महादेवाख्ये एकादशांशे शिवगौरीसंवादे नाम वैशाखमासार्चनकथनं नाम पंचदशोध्यायः॥ १५॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीमहादेवायनमः॥ श्रीईश्वर उवाच॥ ज्येष्ठमासार्चनं वक्ष्ये मत्तस्त्वं गिरिजे शृणु॥ यत्कृत्वा मनुजः सद्यो सद्योजातप्रियो भवेत्॥ १॥ ज्येष्ठे ज्येष्ठं समभ्यर्च्य विशिष्टो जायते शिवे॥ स्नात्वा सरसि नद्यां वा मासादौ स शिवं स्मरन्॥ २॥ अस्नोवाससी बिभ्रन् संकल्प्य विधिपूर्वकं॥ कृतनित्यक्रियो धीमान् भस्मधारणपूर्वकं॥ ३॥ अग्निरित्यादिभिर्मंत्रैस्त्रिपुंड्रपरिमंडितः॥ रुद्राक्षधारणं कुर्यात्सर्वांगेषु विधानतः॥ ४॥ पूजास्थानं शुभं देवि गोमयेनोपलेपितं॥ पिष्टचूर्णैः पंचवर्णैरंगवल्लीविराजितं॥ ५॥ मंडपं कारयेत्तत्र पुष्पगंधविचित्रितं॥ कदलीस्तंभविहितं वितानमणितोरणं॥ ६॥ तन्मध्ये च शिवे पीठे पट्टवासःप्रसाधिते॥ लिंगं मरकतं तत्र स्थापयेदन्यमेव वा॥ ७॥ त्रासादिदोषरहितं यदि तुंगं न दुष्यति॥ तदग्रे स्थापयेत्कुंभं हेमताम्रजमृण्मयं॥ ८॥ नदीतोयेन संपूर्णं धौतपल्ल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ववक्त्रकं ॥ तदग्रे स्थापयेदर्घ्यं गंधपुष्पांबुपूरितं ॥९॥ पाद्या(र्घ्या)चमनं पात्रं कल्पयेच्चतदग्रतः ॥ पंचग-
व्योज्वलं पात्रं शोधितं मंत्रसंयुतं ॥१०॥ कापिलं वा यथाजोषं गव्यं संपाद्य यत्नतः दधिक्षीराज्यकुंभांश्चसौ
द्रं चापि सुशर्करां ॥११॥ फलानां च रसं देवि यथासंभवमुत्तमं ॥ संपादयेच्च स्नानार्थं अभ्यंगं वापि कारयेत् ॥१२॥
यवतंडुलजा वापि सतिलाश्चाक्षताः शिवे ॥ गंधपुष्पफलैः पूर्णं धूपदीपाद्यलंकृतं ॥ मनः प्रसादजनकं पू-
जास्थानं प्रविश्य च ॥ सुदिने शुभनक्षत्रे चंद्रताराबलान्विते ॥१४॥ प्राङ्मुखो दङ्मुखो वापि कुशचै-
लाजिनासने ॥ आचम्य उपविश्यैव संकल्प्य विधिपूर्वकं ॥१६॥ मासनाम्ना शिवं स्मृत्वा शुभावान्भ
स्मभूषितान् ॥ शिवाभिषेके वरये च्छिवमर्चनमंत्रतः ॥१६॥ निर्माल्यमपनोद्यैव चंडाय गिरिजे तदा ॥ क-
224 ल्पयेदासनं तेत्र शिवाय वरमंत्रतः ॥१७॥ धर्माधर्मसुवैराग्यं अनंतासनमेव हि ॥ आधारशक्तिसहितं भूत
शुद्धिं विधाय च ॥१८॥ उद्घोध्य प्रणवेनेशं विद्याहृत्पद्मकेसरे ॥ पंचकोशोपरिष्टाच्च ध्यायेद्देवमुमा
सखं ॥१९॥ चारुचामीकरप्रख्यं नीलग्रीवं त्रिशूलिनं ॥ बालेंदुमुकुटं सोमं सर्वाभरणभूषितं ॥ २०॥
ध्यात्वैवं सजपेद्धीमान् मंत्रवर्यं षडक्षरं ॥ शताष्टं वा सहस्रं वा नान्यचित्तोऽद्भुतं शिवे ॥२१॥ आधारपात्र=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४३ मध्यस्थं शंखं वै दक्षिणावृतं ॥ सव्यावर्त्तो कोटिगुणं शिवार्चनविधौ विदुः ॥२२॥ पूजयेच्च घटं तत्र शंखं पुष्पोद
कावृतं ॥ आवाहयेन्महादेवं हृदयाल्लिंगसंस्थितं ॥२३॥ प्रसारयेत्ततो लिंगे निषेदेति महेश्वरं ॥ निरीक्षणं संनि
रोधं तदा कुर्याद्विचक्षणः ॥२४॥ पीठे स्थाप्य शिवे लिंगं पुष्पछन्ने सुधूपिते ॥ पाद्यार्घ्याचमनं तत्र देयं देवि षड
क्षरैः ॥२५॥ विशोध्य लिंगं शुद्धोदैः तैलेन स्नापयेच्छिवे ॥ गंधावसिक्तेन तदा मधुपर्कं तु दापयेत् ॥२६॥
पंचगव्यैस्ततः स्नाप्य तृणैः सूक्ष्मैश्च घर्षयेत् ॥ क्षीरेण सेचयेल्लिंगं कुंभमानं यथारुचि ॥२७॥ आवेराजे
ति मंत्रेण दधिक्राव्णेति वै दधि ॥ घृतं मिमिक्षेति घृतं मधुवातेति वै मधु ॥२८॥ पंचाक्षरेण च सितां याः फ
लिनीति फलोदकं ॥ नारिकेलजं पुण्यं कदलीफलमंडलं ॥२९॥ फनसोरुमहाकोशास्तथाम्ररसमुत्तमं ॥
जंबीरेक्षुभवं सारं कारं यंत्रप्रपीडितं ॥३०॥ गंधकर्पूरकस्तूरिपाटीरागरुजं जलं ॥ हेमरत्नजलं देवि
देयं लिंगस्य मूर्धनि ॥३१॥ सकूर्चकेण दर्भाग्रैः भर्गं संप्रोक्ष्य वारिणा ॥ ब्रह्मकूर्चं हितं देवि स्नानं शतगुणा
धिकं ॥३२॥ उद्वर्त्तनांतरे स्नानं कारयेदुष्णवारिणा ॥ यथासंभवमेतेषां कार्यं स्नपनमीश्वरं ॥३३॥ दीपान्प्र
ज्वालयेद्देवि घृताक्तान्धूपगंधितान् ॥ हविस्तत्र शिवे किंचिन्निवेद्य प्रणवेन तु ॥३४॥ धारापात्रस्थतो=
||

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येन कलशस्थेन सेचयेत् ॥ रुद्रैरेकादश गुणैरेक द्वि त्रिक्रमाद्द्विजैः ॥ नाना वादित्र घोषेण सेचयेल्लिंग
मैश्वरं ॥ भवायेति तदेवांते तर्पयेदष्ट नामभिः ॥३६॥ विशोध्य वाससा लिंग मलं गैश्च सुपीठके ॥ वस्त्रो
पवीतं गंधाढ्यं भस्म पोंड्रमुत्तमं ॥३७॥ अक्षता भरणानीशे समर्प्य परमेश्वरे ॥ बिल्वमंदारकाल्हार पुंडरी
कैः प्रपूजयेत् ।३८॥ कृष्णा गरुद्भवं धूपं देयं जेष्ठे विशेषतः ॥ घृतदीपास्ततो देयाः सोज्वलास्तत्र शंकरि ॥३९॥
त्रिशाखैर्वर बिल्वैश्च भवायेत्यष्ट नाम भिः ॥ निधने त्यादि मंत्रैश्च पूजयेत्परमेश्वरं ॥४०॥ क्षीरान्नं घृतसं
युक्तं गोधूमापूप संयुतं ॥ ज्येष्ठे देयं विशेषेण ज्येष्ठदेवाय सादरं ॥४१॥ शाखोपद्रुत तांबूलमष्ट कल्प समन्वितं ॥
जाती पत्र फलैलाढ्यं शुष्टिक्रमुकखादिरं ॥४२॥ नागवल्ली दलोपेतं शुभ्रचूर्णं च साष्टकं ॥ नीराजयेत्ततो
२२९ लिंगं शतदीपैर्मनोहरैः ॥४३॥ वेणुवीणादि निनदैः दुंदुभी काहलादि भिः ॥ कर्पूर खंडजैर्दीपैः नीराज्य
परमेश्वरं ॥४४॥ छत्रं च चामरं देवि व्यजनं दर्पणं तथा ॥ उपचार मशेषं च कृत्वा चैव प्रदक्षिणाः ॥४५॥ नमस्कारा
दिदशकं नर्त्तनं स्तुति पूर्वकं ॥ नामभिः पूजयेदेवं देवदेवमुमापतिं ॥४६॥ स्तुत्या नया स्तुवीत शं ज्येष्ठं श्रेष्ठ
गुणान्वितं ॥ नमो जेष्ठाय हृष्टाय त्रिपिपिविष्टाय धावते ॥ नमः पुष्टिप्रासादाय गोवृषाय ककुद्मिने ॥ जम्भु=

४४ दीर्णायदीप्ताय वज्रहस्ताय शस्त्रिणे ॥ ४८ ॥ नम आशावसानाय सहमानाय हेतवे ॥ ध्वजिने चैव बंराय प्रसा
रिणे ॥ ४९ ॥ उरुगव्याय काव्याय बभ्रवे भ्रमते नमः ॥ नमस्त्विष्टाय पूर्त्ताय हृताय प्रहृताय च ॥ ५० ॥ सभ्या
य च सदस्याय सभायाः पतये नमः ॥ अहिंसायाप्यलोभाय पंचास्याय सुधन्विने ॥ त्रिनेत्राय सुपार्श्वाय
तुष्टाय उदराय च ॥ शिवाय शांतरूपाय शतवर्तायते नमः ॥ ५२ ॥ अन्नायासन्नपालाय आलमालायते
नमः ॥ नमो भवाय रुद्राय कद्रुद्राय प्रचेतसे ॥ ५३ ॥ नमस्तेंद्रियहीनाय लेलिहानाय सृक्किणे ॥ विश्वा
य विश्वरूपाय विश्वतः शिरसे नमः ॥ ५४ ॥ सर्वतः पाणिपादाय सर्वेंद्रियविहारिणे ॥ रुद्राय मतिरूपाय
खंडचंद्रधराय च ॥ ५५ ॥ विश्वोत्पत्तिविनाशाय षड्ूर्मिरहिताय च ॥ नमः शुद्धाय साध्याय ध्यायमा-
नायते नमः ॥ ५६ ॥ मयोभवे शंभवे च विभवे प्रभवे नमः ॥ दुंदुभ्याय हनन्याय शंगाय प्रपमाय च ॥
सुवीराय सुघोराय अक्षोभ्य[illegible]क्षोभणाय च ॥ सुप्रजाय सुमेध्याय सुधाम्नेनंतचक्षुषे ॥ ५७ ॥ नमो
बुद्धाय शुद्धाय बद्धमोक्षायते नमः ॥ नमस्ते भूतभव्याय वर्त्तमानाय दंगते ॥ ५८ ॥ नमो भवाय भद्रा
यघनघोषायते नमः ॥ प्रपन्नजनरक्षाय भक्तपापहराय च ॥ ५९ ॥ साकेतवास गोप्याय यमगर्वहराय च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भद्राय रुद्ररूपाय तंद्राय च नमो नमः ॥६०॥ नमः स्थूलाय सूक्ष्माय दृश्यादृश्याय गोस्तृणे ॥ वर्षते ज्वलने चैव
ग्रसते ऽहसते नमः ॥६१॥ नमः सुचारुकेशाय उरुवक्ष शिखाय च ॥ नमो नमः सुवर्णाय तपनीयनिभाय च ॥६२॥
विरूपाय प्रसन्नाय सर्वरूपाय ते नमः ॥ देविनाम शताष्टेन पूजयेज्ज्येष्ठमासके ॥६३॥ स्तुवितेवं महादेवं स्तव्ये
नानेन सर्वदा ॥ तस्याहं परमं प्रीतः दिशामि परमां गतिं ॥६४॥ शंभो भूमिशतांग संगरहितानंगांगफालानलज्वाला
पांगवतंगवल्कृतमहानेत्रेशतांग प्रभो ॥ भस्माभ्यंगकुरंगसंगसुकर स्फारस्फुरन्गांगसल्लीलालोलमहोत्तमांग
भगवन्कंगावमां सर्वदा ॥६५॥ विश्वेशानदयानिधान भगवन्पाहीश पंचाननस्वामिन्मैतृककानन प्रियवस व्याघ्राजि
नालंकृत ॥ दीनानामवनाय कालकलनाहीनाय दानाधिकादानाया स्तुवते स्तुते दृशि सदा कारुण्यवारां निधिः ॥
226 मयस्कर सुतस्कर प्रवर पाहि विश्वेश्वर प्रसीद परमेश्वर त्रिपुरमारदेहं कुरु ॥ जलंधरगरंधरप्रथमदेव शंभो ऽस्तु ॥
प्रसीद दयया धुना शिवद पाहि गंगाधर ॥६७॥ शर्व सर्वदसुपर्वपूजित पर्वतेशतनया प्रियप्रभो ॥ कालगर्वहर खर्व
विष्णुहृत्कमलवास भगवन्प्रसीद मां ॥ भवभवभयहर भीम भवांतक भावहृदंतर सुंदर निग्रह ॥ पाहि शिवाव्यय
देव दया कर शंकर सुखकर शं कुरु मे ॥६८॥ स्तवेनानेन देवेशि स्तुवीत परमेश्वरं ॥ ज्येष्ठे मासि विशेषेण नक्तभो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४५ क्तोऽथ हव्यभुक्॥७०॥ स्तवेनानेन देवेशि स्तुवीत परमेश्वरं ॥ ज्येष्ठे॰॥ एकवारं द्विवारं वा त्रिवारं वा यजेच्छिवं ॥ ज्येष्ठा
यामथ पौर्णम्यां होमः कार्यो यथाविधि ॥ दद्याद्गोमिथुनं तेभ्यो सवत्सं च सदक्षिणं ॥ दीनानाथान् भोजयित्वा स्व
यं भुंजीत बंधुभिः ॥७२॥ ज्येष्ठमासार्चनं देवि कथितं ते समासतः ॥ यत्कृत्वा मनुजः सद्यो लभेत्फलमनुत्तमं ॥
॥७३॥ शिवालये लिंगमौलौ ग्रीष्मे दद्याद्गलंतिकां ॥ मासद्वयं सुशीतेन गंधितेन जलेन च ॥७४॥ सच्छिद्रं कार
येत्कुंभं धारयेत्तद्दहर्निशं ॥ कृत्वैवं याति सदनं मदनांतस्य मे शिवे ॥७५॥ वंशसहस्रसहितो विमानेनार्कशोचि
षा ॥ ईश्वर उवाच ॥ सदा काल कालं हृदा भावयंतः ॥ कृतांता भयं त्यजंत्येव संतः ॥ मुदा बिल्वपत्रैः शिवं
पूजयंतः भिदानैव पश्यं ति लोकं प्रशांताः ॥७६॥ ज्येष्ठे विशिष्टशिपिष्ट सदेष्ट लिंगं संपूज्य कोष्ठा कृतिवल्ल
भः स्यात् ॥ दुष्टः कनिष्ठोऽपि च कुष्ठितांगो रुष्टश्च मृष्टक्त तरो विशिष्टः ॥७७॥ इति श्री शिवरहस्ये महादेवाख्ये
एकादशांशे ज्येष्ठमासार्चनं नाम षोडशोऽध्यायः ॥१६॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥
श्री ईश्वर उवाच ॥ आषाढार्चनमाषाढे प्रवक्ष्यामि शृणुष्व तत् ॥ यत्कृत्वा मनुजः सद्यो मम श्रेष्ठ गणपो भवेत् ॥१॥ ग-
णपैश्च पुराचीर्णं व्रतमाषाढमासिकं ॥ स्नात्वा नद्यां बहिर्देशे सरस्यपि च पावने ॥ २॥ हृदि ध्यात्वा महादेवं=



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मामीशमुमया त्वया ॥ प्राणानायम्य संकल्प्य भैरवाननुमान्य च ॥ अप्सु संस्थान् शिवे रुद्राननुज्ञाप्य
मृदं ततः ॥ तटे संस्थाप्य संस्नायाच्चिराचम्य शिवं स्मरन् ॥ अप्‌लिंगैर्वारुणैर्मंत्रैः सपवित्रकरः शुचिः ॥
विभूया धौतवसने पादौ प्रक्षालयेत्ततः ॥ ५ ॥ अग्निरित्यादिभिर्मंत्रैः विमृज्यांगानि भस्मधृक् ॥ त्रियायु-
षेण मंत्रेण त्रिपुंड्र परिशोभितः ॥ ६ ॥ त्रियंबकेनमंत्रेण रुद्राक्षान् धारयेत्ततो ॥ शिरोललाटहृदयेकंठबा
ह्वोश्च कर्णयोः ॥ ७ ॥ द्वात्रिंशत्कंठमूले च चत्वारिंशति मस्तके ॥ भुजयोरेकं शिखायां च कर्णयोः षट् प्रकीर्ति
ताः ॥ ८ ॥ वाह्वोः षोडश देवेशि हस्तयोर्द्वादशैव हि ॥ पुण्यामलकमानेन मालां वक्षसि धारयेत् ॥ ९ ॥ शताष्ट
कलिता भक्त्यातदूर्ध्वं च प्रशस्यते ॥ जपमालां तथा कुर्यात्समास्यां लक्षणैर्युतां ॥ १० ॥ स्वर्णेनराजतेनापि
227 सूत्राक्षग्रथितां शुभां ॥ अष्टोत्तरशतं कुर्याच्चतुः पंचाशदेव वा ॥ ११ ॥ पंचविंशतिमानं वा ततो हीना ऽधमा
स्मृता ॥ मोक्षार्थी पंचविंशत्या धनार्थी त्रिंशता जपेत् ॥ १२ ॥ पुष्पार्थी पंचविंशत्या पंचदश्या भिचारके ॥
सप्तविंशति रुद्राक्षमालया स्त्रीवशंकरं ॥ १३ ॥ एवं कुर्यात्सदा माला मास्यमास्येन योजयेत् ॥ एकवक्त्रः-
शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ १४ ॥ अवध्यत्वं प्रतिश्रोतं वह्निस्तंभं करोति च ॥ द्विवक्त्रो हरगौरी=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४५६ स्यात्स्वर्णगोवधपापहृत् ॥ १५ ॥ त्रिवक्त्रो ह्यग्निजन्माद्यपापराशिंविनाशयेत् ॥ चतुर्वक्त्रः स्वयंब्रह्मानर
हत्यांव्यपोहति ॥ पंचवक्त्रः(कृत्र) स्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥ षड्वक्त्रस्तु गुहो ज्ञेयः भ्रूणहत्यादिना
शयेत् ॥ १७ ॥ सप्तवक्त्रस्त्वनंतः स्यात्स्वर्णस्तेयादिपापहृत् ॥ विनायकोष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् ॥
॥ १८ ॥ भैरवो नववक्त्रस्तु शिवसायुज्यकारकः ॥ दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः ॥ १९ ॥ एकादशमुखो
रुद्रो नानायज्ञफलप्रदः ॥ द्वादशास्यो द्वादशार्कदेवको निंदकापहृत् ॥ २० ॥ त्रयोदशास्यः श्रीकंठः शीघ्रं संकुंठ
येदघं ॥ चतुर्दशास्यो लोकात्मा लोकदानफलप्रदः ॥ २१ ॥ एवं ज्ञात्वास्य माहात्म्यं धारयेद्भुवि मानवः ॥ विना
मंत्रेण यो धत्ते रुद्राक्षं भुवि मानवः ॥ २२ ॥ स याति नरकं घोरं यावदिंद्राश्चतुर्दश ॥ रुद्राक्षामलदेहेन यत्कृ
तं पुण्यसंचयं ॥ २३ ॥ तद्भवेत्कोटिगुणितं पापं चेन्नश्यति क्षणात् ॥ यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि
सन्मुखं ॥ २४ ॥ तस्य प्रीतो भवेद्रुद्रः स्वपदं संप्रयच्छति ॥ इत्थं धार्यं च रुद्राक्षान्कृतनित्यक्रियो द्विजः ॥
॥ २५ ॥ क्षत्रियो वाथ वैश्यो वा धनाढ्यो भक्तितत्परः ॥ पूजास्थानं ततो गत्वा उपलिप्तं विचित्रितं ॥ २६ ॥ एग
वल्लीविलासाढ्यं पद्मस्वस्तिकचित्रितं ॥ मंडपं पुष्पमालाढ्यमारच्य प्यसपीठकं ॥ वितानशोभितं तंच=



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कदलीस्तंभशोभितं ॥ २७॥ तोरणेनसुविस्तीर्णं धूपदीपविराजितं ॥ आषाढे मौक्तिकं लिंगं पूजये
दन्य देववा ॥२८॥ हेमरौप्यं ताम्रजं वापित्तलं मार्त्तिकं शिवे ॥ कुम्भं संस्थापयेदग्रे नदीतोयैः प्रपूरितम्
॥२९॥ पाद्यार्घ्याचमनं पात्रं पुष्पांबु परिपूरितं ॥ स्थापयेदर्घ्यपात्रं च शिवस्याग्रे महेश्वरि ॥३०॥ पंचगव्यं-
तथा तैलं दधिक्षीरघृतं मधु ॥ सिताचवैक्षवी पुण्या फलसारं विशेषतः ॥३१॥ गन्धपुष्पाणि दिव्यानि सं
पाद्योत्पलपाटलं ॥ बिल्वपत्राणि दिव्यानि संस्थाप्यानि विशेषतः ॥३२॥ नारिकेलजलं चैव कदलीफ
लमंडलं ॥ फनसं चाम्रसुरसं सुजंबीररसं शिवे ॥३३॥ गन्धचन्दनतोयं च रत्नस्वर्णकुशोदकम् ॥ कूर्चो
दकं तथा देवि पात्रेषु स्थापयेत्पृथक् ॥३४॥ संकल्प्य शंभवे सार्धमासादौ शिवपूजनं ॥ दशावरं शताष्टं वा-
228 सहस्रं वाजपेसुधीः ॥३५॥ पंचाक्षरं परं मंत्रं प्रणवेन षडक्षरं ॥ समाषाश्चाक्षता ग्राह्याः तस्मिन्मासि
विशेषतः ॥ ३६॥ आधारपीठपूजांतं कृत्वा संस्थाप्य पीठके ॥ स्नापयेद्देवदेवेशं त्रिनेत्रं नीलसंगलं ॥३७॥ चा
रुचंद्रकलामौलिं सोमं ध्यात्वा महेश्वरं ॥ स्थाप्य प्रोक्ष्यावगुंठ्येन सन्निरोधनिरोक्षणैः ॥ पद्यार्घ्याचमनं
दत्वा मधुपर्कं च निर्मलं ॥ पंचगव्यैः ततः स्नाप्य स्नानं पंचामृतं ततः ॥ गव्यमेव प्रयुंजीत मासि मासि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवे शुभं ॥ स्नानाशक्तस्तथाभ्यंगमेतेषां देवि कारयेत् ॥४०॥ स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः ॥ पला अ·१०
४७ नां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितं ॥४१॥ शिवस्य सर्पिषा स्नानं प्रोक्तं पापक्षयंकरं ॥ तावता मधुना द
ध्ना क्षीरेण सितया पि च ॥४२॥ स्नाने पलानां प्रथितः सहस्रं परमं शिवे ॥ अभ्यंगेषु शतान्येव पलानि,
अभिषेचने ॥४३॥ नानावादित्रघोषैश्च स्नापयेत्परमेश्वरं ॥ तत्तन्मंत्रैश्च रुद्रेण श्रीमत्पंचाक्षरेण वा ॥
उद्वर्तनांतरं स्नानं कारयेद्घर्षये तृणैः ॥ सुवाससा ततश्छन्ने पीठे स्थाप्य महेश्वरं ॥४५॥ धूपं दीपं ततो
दत्वा नैवेद्यं हविरेव हि ॥ सशर्करं घृतं देवि सतांबूलमुमापतेः ॥४६॥ ब्राह्मणैः सेचयेल्लिंगमविच्छि-
न्नांबुधारया ॥ शंखैः शृंगैस्तथा कूर्चैर्वर्धन्या वा यथासुखं ॥४७॥ शतरुद्रावृत्तिपरः एकद्वित्रिसक्रांति
कं ॥ एकादशगुणं वापि सशांतिचमकान्वितं ॥४८॥ रुद्रस्यांते च नैवेद्यं पुनः पुनरतंद्रितः ॥ भवायेत्यष्ट-
नाम्नेशं तर्पयेत महेश्वरं ॥४९॥ विशोध्य वाससा लिंगं पीठे संस्थाप्य पूजयेत् ॥ उपवीतं तथा भस्म वासो
गंधं च साक्षतं ॥५०॥ दत्वाऽऽभरणपुष्पाणां मालिका बिल्वनिर्मिता ॥ बिल्वपाटलकल्हारैः कुसुमैः पूज
14 येच्छिवं ॥५१॥ निधनेति भवायेति नामभिः पूजयेच्छिवं ॥ दीपमाला विशेषेण देया देव घृतान्विता ॥५२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवदारूद्भवो धूपः देयस्तस्मिन्विशेषतः ॥ आढकान्नं घृताक्तं च सगुडं विनिवेदयेत् ॥ ५३ ॥ माषापूपाः प्रदेया
वै तांबूलं च ततः परं ॥ नीराजयेत्ततो लिंगं त्रिवारं शतदीपकैः ॥ ५४ ॥ कर्पूरखंडजैर्देवि दीपानुद्बोधयेच्छिवे ॥
वेणुवीणामृदंगादीन् शंखदुंदुभिकादिभिः ॥ ५५ ॥ हंसाभचामरे चैव छत्रं शशिनिभं शिवे ॥ पताकाव्यजनादर्शा
देयं देवाय शूलिने ॥ ५६ ॥ प्रदक्षिणत्रयं कुर्यान्नमस्कारादि पंचकं ॥ पूजयेन्नामभिर्देवं बिल्वपाप्लपंकजैः ॥ ५७ ॥
स्तुवीतैवं महादेवमाषाढे शृणु पार्वति ॥ नमइज्याय पूज्याय उपजीव्याय ते नमः ॥ नमः क्षेत्राय वृध्याय वत्सलाय
नमो नमः ॥ नमो भूताय भव्याय सव्यासव्याय बभ्रवे ॥ ५९ ॥ नमो वैपञ्चवर्णाय मृत्युघ्नाय च मृत्यवे ॥ नमो गौ
229 रशरीराय श्यामायालोहिताय च ॥ ६० ॥ महासंध्याभ्रवर्णाय चारुरूपाय दीप्तते ॥ नमः कमलहस्ताय विश्व
ग्रासाय मोदिने ॥ ६१ ॥ प्रमाणाय सुरेशाय अवध्यायामराय च ॥ नमो रुपाय रूप्याय शाश्वतायाक्षताय च ॥
बृहते महते चैव विभ्राताय कृशाय च ॥ दुर्गमाय महेशाय रोधाय कपिलाय च ॥ ६३ ॥ अप्रतर्क्यशरीराय बिल्व
नेरभसाय च ॥ सिकत्याय प्रवाह्याय रेष्माय च नमो नमः ॥ ६४ ॥ प्रसृताय पुराणाय वामदेवाय दंडिने ॥ सु-
मेधसे कुलालाय नमस्तेऽस्तु शिखंडिने ॥ ६५ ॥ चित्राय चित्रवर्माय त्रिनेत्राय त्रिशूलिने ॥ चेकिताया-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४८ नकृष्णायसुहितायहिताय च ॥६६॥ नमः क्षांतायदांतायवज्रसंहननाय च ॥ रक्षोघ्नायविषघ्नायसिति
कंठायमन्यवे ॥६७॥ नमः सोमायरुद्रायसुताम्रायारुणाय च ॥ भर्गायोग्रायभीमायतिग्मायुधधराय च ॥
सुमोदायप्रमोदायमधुप्रीतापतेनमः ॥ प्राणायप्राणवेशायसुहस्तायसुवाससे ॥६९॥ भिषजेमहतेचैव
दुर्गाध्यक्षायलिंगिने ॥ नक्तंचराययुक्तायभक्तपापहराय च ॥७०॥ अनामयायशर्वायमहाकालायधन्व-
ने ॥ पंचाक्षरप्रियायायमृगाजिनधराय च ॥७१॥ आषाढायविराधायदूतायप्रहिताय च ॥ तमोघ्नायहिम
घ्नायक्रतवेक्रतवेनमः ॥७२॥ ज्योत्स्नाजालायफालायविशालायनमोनमः ॥ ऊर्ध्वरोम्णेमहारोम्णेकृत्ति
वासायतेनमः ॥७३॥ मृगव्याधाय दक्षाय दक्षशिक्षायतेनमः ॥ इत्येतन्नामभिः पूज्योज्येष्ठेदेवोमहेश्वरः ॥७४॥ स्तवेना
नेनदेवेशमाषाढेसंस्तवीतमां ॥ ॰ सामिसोमशकलामलमौलेसोमहेममयदिव्यशुभांगा। व्योमकेशजनका
ममहेशपाहिमामखिलदुःखसमूहात् ॥७५॥ वामदेववरसामजचर्मफारशोभिकुसुमांगमहेश ॥ धूमवाह
वहनोत्तमशंभोव्योमधामभगवन्नवमांत्वं ॥७६॥ शंभोबालमृगांकशेखरमहासर्पांगमालोज्ज्वलत्कंदर्पां
१६ तकशर्वसर्वगविभोदुर्वादिलाच्यांघ्रिक ॥ वेदाद्यखिलपालरत्नघृणपूतांगसंगातुल ॥ लीलागांगसुतुं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग भंगपरमानंगागसंगावमां ॥७७॥ विश्वोत्पत्तिविनाशसंस्थितिजगत्तत्कार्यंचुतत्कारणं ॥ जीवेशाश्रय
भेदभानमखिलं यन्नामरूपात्मकं ॥७८॥ कालानल्पविकल्पशिल्पसुमहासंकल्पकल्पांतकं ॥त्वय्यानंदप
योनिधांवुलहरीविच्योततेकेवलं ॥७९॥ विष्णुब्रह्मसुरा(सुरा)नरवराःयेभासुराभूसुराःसंजातास्थितिनाशमध्यपति
ताभ्रांताश्चसंसारिणः ॥ विश्वाधीश्वरशंकर त्रिभुवनापा रोरुदुःखार्त्तिहन्कालातीत महेश्वराव भगव
न् विश्वंचविश्वाधिक ॥८०॥ इतिस्तुत्वा त्रिकालंवा पूजांतेवामहेश्वरं ॥ आषाढ्यामथपौर्णम्यांहो-
मः कार्यो द्विजैःसह ॥८१॥ दत्वागोमिथुनंदेवि सवत्सांचसदक्षिणां ॥ नक्ताशनी भवेन्मासंब्राह्मणैः
पारणं ततः ॥८२॥ एवमाषाढपूजांगोआषाढः प्रीतिमान्भवेत् ॥ चंद्राभयानैर्यत्यिंते ममलोकंसना
6230 तनं ॥८३॥ईश्वरउवाच ॥ आषाढमाषाढपदेर्च्यलिंगे मृद्दृढयोभिभवेंद्रिपुंसः ॥ पौरदृढोवै भवतेगणौ
घगण्यातत्पुण्यमुमेसुबाढं ॥८४॥ इतिश्री शिवरहस्येमहादेवाख्ये एकादशांशेआषाढार्चने सप्तदशो-
ध्यायः ॥१७॥ श्रीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवायनमः ॥ श्रीईश्वरउवाच ॥ श्रावणार्चनमीशानि
शृणुश्रावणपारणं जितोदेवि भगवानिंदुभूषणः ॥१॥ ददातिकामान् विपुलान्तद्विधिंशृणुसादरं ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४१ ब्रह्म विष्ण्वादयोदेवाः श्रावणेर्च्य महेश्वरं ॥ २ ॥ लेभिरे पर मांसिद्धिंमुनयो गणपा मम ॥ पुण्य पुण्योह्ययंमासः
गण पुण्योमहेश्वरि ॥ ३ ॥ मासादौश्रावणेदेवि नद्यां सरसिवा शिवे ॥ ध्यात्वा मांप्रयतः स्नात्वा त्रिराचम्यशुचिः स्वयं
॥ ४ ॥ सपवित्र करः शांतोसंकल्प्य विधि पूर्वकं ॥ पट्टांशुकपरीधानो भस्मरुद्राक्ष भूषणः ॥ ५ ॥ कृत नित्य क्रियो दे
विप्रा तर्हुतहुताशनः ॥ चैतानंवात याग्रहय वितानालंकृतंशुभं ॥ ६ ॥ वरिवस्याग्रहंशंभोः उपलिप्तं सुशोभनं ॥
पंचवर्णैः पद्मदलैः स्वस्तिकादिविचित्रितं ॥ पुष्पगंधाधिवासितंतोरणाद्यैरलंकृतं ॥ तन्मध्ये संस्थिते पीठे
लिंगं नील विनिर्मितं ॥ ८ ॥ हेमरौप्योद्भवं देवि स्फाटिकं वा यथा रुचि ॥ नदीतोयेन संपूर्णं धौतंकुंभं निवेशयेत् ॥
९ ॥ पाद्यार्घ्याचमनीयानि पात्राण्यग्रे निधाय च ॥ सुपुष्पांबूनि देवेशि पंच गव्यानि सादरं ॥ १० ॥ पंचामृतानि
सर्वाणि संपाद्य च यथाबलं ॥ गंधपुष्प फलादीनि धूपदीपानि शंकरी ॥ ११ ॥ बिल्वद्रोणार्कमंदार कुटजानि प्रसा
दयेत् ॥ वरयेच्छां भवान्तत्र भस्मरुद्राक्ष भूषणान् ॥ १२ ॥ श्रावणे शिव पूजार्थं स्वयमाचम्य वाग्यतः ॥ प्राङ्मु
खो [illegible] दङ्मुखो वापि चेलाजिन कुशासने ॥ १३ ॥ पंचाक्षरं जपेत्तत्र शताष्टं च सहस्रकं ॥ ध्यायेद्देवं विरू
पाक्षं नीलकंठमुमासखं ॥ १४ ॥ वरदाभय हस्तं च मृगटंक धरं शिवं ॥ त्रिपुंड्र विलसत्फालं चंद्ररेखा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विराजितं ॥१५॥ अंगादिन्यासमारभ्य पीठपूजां प्रकारयेत् ॥ भूतशुद्धिं विधायादौ पात्राण्यभ्यर्चयेत्क्रमात् ॥
॥१६॥ कुंभं सपल्लवमुखं शंखं च तदनंतरं ॥ पुष्पांबुपूरितं देवि मातृकाक्षरविद्यया ॥१७॥ गंधपुष्पफलादीनां
दोष्यदोषनिवारणे ॥ भस्म त्रियंबकेने शिदेयं पात्रेषु शोधनं ॥१८॥ क्रिमिकेशादिदुष्टानां दंष्ट्राहतक्रि
याच्छिवे ॥ आवाहयेत्ततो लिंगे देवं वै मूलमंत्रतः ॥१९॥ गायत्र्या वा महेशस्य स्थाप्य पीठे समंत्रकं ॥
निरोधं चैव सान्निध्यं प्रसादननिरीक्षणं ॥२०॥ कुर्याल्लिंगे ततो देयं पाद्यार्घ्याचमनं क्रमात् ॥ मधुप
र्कं ततो देवि पंचगव्यं ततः परं ॥ क्षीरेण स्नापयेद्देवं दध्ना चाज्येन वै शिवे ॥ मधुना सितया वापि द्रोण
23 मानेन सेचयेत् ॥ २२ ॥ नारिकेलजलैश्चैव रंभाफनसरसं भवैः ॥ इक्षुजं वीरसारेण हिरण्यकुशतोयतः ॥२३॥
पुष्पांबुभिर्गंधतोयैः कूर्चैर्दक्षिणवेन च ॥ स्नापयेद्देवदेवेशं नानावादित्रनिस्वनैः ॥२४॥ धूपश्चागरुसारोत्थो
देयस्तस्मिन्महेश्वरे ॥ घृतदीपांस्ततो दद्यात् हविः किंचिन्निवेदयेत् ॥२५॥ तांबूलं च ततो दत्वा स्नानवेद्यां निधा
य च ॥ सशान्तिचमकोपेतो जप्यो रुद्रो द्विजैः सह ॥२६॥ शिवाभिषेके देवेशि शंभवैर्ब्राह्मणैः सह ॥ एकादश
वारो रुद्रो एकद्वित्रिवरोथवा ॥ भवायेत्यष्ट नाम्नां ते तर्पणं स्यात् सकूर्चकं ॥ विमृज्य वाससा लिंगं पीठे संस्था=

प्पंमेत्रकं ॥ २८ ॥ अशून्यं मस्तकं लिंगं कुर्यात्पुष्पं तु संक्षिपेत् ॥ उपवीतं तथा वासो गंध भस्म च साक्षताः ॥ २९ ॥ य
वगो धूम मिश्रा वा तंडुला खंड संभवाः ॥ देयास्ततो महादेवि रत्नाभरणमुत्तमं ॥ ३० ॥ स्वर्णबिल्वदलान्यब्जो
देयानि च विशेषतः ॥ नपर्युषितदोषो वै स्वर्णरत्नसुमेषु वै ॥ ३१ ॥ पुनःप्रक्षाल्य सुजनैर्ग्राह्याणि वर बिल्व
वत् ॥ बिल्व मंदार कुसुमैः कुब्जैः श्रावणेऽर्चयेत् ॥ ३२ ॥ अगरुश्च ततो धूपो देयो दीपो घृताप्लुतः ॥ तिलानां कृस
रं देयं अपूपं घृतपाचितं ॥ ३३ ॥ गुडखंडं च सघृतं सोपदंशं निवेदयेत् ॥ तांबूलं फलजालं च ॥ निवेद्येक्षु
खंडकं ॥ ३४ ॥ दीपानामवलिं कुर्यात्सहस्रं शतमेव वा ॥ नीराजयेत्ततो लिंगं दीपैः कर्पूरखंडजैः ॥ ३५ ॥
प्रदक्षिणा त्रयं कृत्वा नमस्कारं च पंचकं ॥ कुर्याद्भक्तिप्रवणधीः शिवाय विधिपूर्वकं ॥ ३६ ॥ पौराणैर्वैदिकै-
स्तोत्रैस्तुवीत वै महेश्वरं ॥ नाम्नां शताष्टकेनेशं पूजयेत्संस्तुवीत च ॥ ३७ ॥ छत्रं च चामरं देवि व्यजनादर्शकेऽखिले ॥
दत्वा देवाय बिल्वाद्यैः पूजयेत्लिंगमैश्वरं ॥ ३८ ॥ विश्वेश्वराय विश्वाय हराय प्रथमाय च ॥ पूष्णो दंतविनाशा-
य भगनेत्रांतकाय च ॥ ३९ ॥ सुरधाम सुपथ्याय मन्मथांतकराय च ॥ अहिमानाय तीक्ष्णाय आर्द्रचर्मधराय च ॥ ४० ॥
श्मशानरतिनित्याय नमस्ते लुकधारिणे ॥ बर्हिबर्हावसानाय घनाय बहुगर्जते ॥ ४१ ॥ काव्यपूज्याय दृप्ताय च-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुप्ताय च पिनाकिने ॥ परावराय नित्याय सत्यधर्माय ते नमः ॥ नमो महाध्वरेशाय तंडुनृत्तप्रियाय च ॥ विभी
षणाय भीमाय भगप्रमथनाय च ॥ ४३ ॥ सिद्धसंघातगीताय महाशेषांगदाय च ॥ नमो मुक्ताट्टहासाय क्ष्वे
लितास्फोटिताय च ॥ ४४ ॥ नर्दते कुर्दते चैव नमः प्रमुदितात्मने ॥ नमो मृडाय श्वसते धावते विष्ठिताय
च ॥ ४५ ॥ ध्यायते जृंभते चैव रुवते द्रवते नमः ॥ वलते क्रीडते चैव लंबोदरशरीरिणे ॥ पिंगाग्रश्मश्रुके-
शाय अरुणाक्षाय याय च ॥ नमो विकृतवेषाय मुंडमालाधराय च ॥ ४७ ॥ नम उन्मत्तवेषाय किंकिणी
कटके ये नमः ॥ अमर्षणाय क्रूराय विष्णुबाणधराय च ॥ ४८ ॥ नृसिंहांत्रवसानाय क्रोडदंष्ट्राविदारिणे ॥
गजदंतगदायाय गोजिनांबरवासिने ॥ ४९ ॥ तरुणाय शरण्याय अरण्यपतये नमः ॥ अप्रमेयाय दीप्ताय
232 निर्गुणाय गुणाय च ॥ ५० ॥ वाद्यप्रियाय वाद्याय चूडामणिधराय च ॥ नमस्तोकाय चिंत्याय योगिध्येयाय
शंभवे ॥ ५१ ॥ नमो वेदांतवेद्याय भववैद्याय भूतये ॥ ओजसे तेजसे चैव भ्राजते ग्रसते नमः ॥ ५२ ॥ एवं वैश्रा
वणे पूज्यो बिल्वैर्नामशताष्टकैः ॥ स्तवं पापहरं स्तुत्वा मासि देवं प्रसादयेत् ॥ ५३ ॥ गंगाधरांधकहर त्रिपु
रावमर्द्दिवैदौघवेद्य भगवन् भवरोगवैद्य ॥ आद्यस्त्वमेव शशिमौलि विशालशीर्ष्णपुष्णोज्ज्वल द्वंद्व विना=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५१ शनपाहिदीनं ॥ ५४॥ विश्वाधिकप्रमथनाथ उमासनाथ मन्नाथ मन्मथहरांतक कालकाल ॥ शूलप्रभोज्वलश
रासवरकार्मुकज्यपाणे भगाक्षिमथनाव पिनाकपाणे ॥ ५५॥ गौरीपते शशिकलामल चारु मौले वृंदारवृंदमुकुटा-
र्चितपादपद्म ॥ पद्माक्षपूजितपदांबुज काल मूल निर्वापणांधकहराव सदैव मोलं ॥ ५६॥ शेषाहिभूषवरयोष
कृतार्धकाय पोषाखिलामलजगश्रुतिमाषुशंभो ॥ वेषायते किल जगत्कलना विशेषो काषायवस्त्रपरिधा
ननमो नमस्ते ॥ ५७॥ अलिंगस्त्वमालाकथं लिंगसंस्थः स्फुलिंगोपमं त्वत्त एव प्रसूतं ॥ जगन्नश्वरं श
श्वदेवं विचित्रं प्रसीद प्रसीद प्रभो चंद्रचूड ॥ ५८॥ एवं वै श्रावणे मासि पूज्य स्तुत्वा महेश्वरं ॥ दद्याद्गो
मिथुनं श्वेतं सवत्सं दक्षिणान्वितं ॥ ५९॥ शं भवे भ्योहुने ध्योमं पौर्णम्यां भोजयेद्द्विजान् ॥ स्वयं भुंजीत-
विभवं सूपापूपैर्मनोहरैः ॥ ६०॥ प्रसाद्य देवमीशानं मासांते नक्तभोजनं ॥ एवं यः श्रावणं मासं यापयेत्पूज
यामम ॥ ६१॥ सकिंकिणीयुतैर्यानैः पुष्पगंधसुशोभितैः ॥ रुद्राणीरुद्रगणपैर्गीतवादित्रनिस्वनैः ॥ ६२॥
यातिवंशसहस्रेण देहांते शंकरालयं ॥ नित्यं नक्ताशनो भक्तो कुर्यादस्मिन्विशेषतः ॥ ६३॥ सोमवारेषु वा शक्तो कुर्या
१० न्मल्लिंगपूजनं ॥ स्वयं वाशां भवैः सार्धं भस्मरुद्राक्षधारिभिः ॥ ६४॥ कृते रत्नमयं लिंगं त्रेतायां हेमसंभवं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ।। ६५ ।। नित्यं पार्थिवलिंगार्चा विशिष्टा सर्वकामदा ।। किं पुनः श्रावणे
मासि सोमवारेषु किं पुनः ।। ६६ ।। तत्रापि पार्थिवं देवि क्षिप्रसिद्धिप्रदायकं ।। पार्थिवे नतु लिंगेन बहवः
सिद्धिमागताः ।। चतुरंगुलमानेन कार्यं लिंगं महेश्वरि ।। मृदाहरण संघट्ट प्रतिष्ठार्च्या विसर्जनं ।।
६८ ।। क्रमोयं पार्थिवे देवि भवायेत्यष्टनामभिः ।। शांभवैरेव तत्कार्यं भस्मरुद्राक्षधारिभिः ।। ६९ ।।
पंचाक्षरजपासक्तैः विप्रैर्वेदविदांवरैः ।। नान्यपुंड्रधरैर्देवि पूजनं चेत्कृतं मम ।। ७० ।। कर्त्ताकारयिता
वापि न फलं सम्यगाप्नुयात् ।। विना भस्मत्रिपुंड्रेन विना रुद्राक्षमालया ।। ७१ ।। पूजितोपि महादेवः प्रसा-
दं न करिष्यति ।। तस्माल्लिंगार्चनं देवि वैदिकैरेव कारयेत् ।। ७२ ।। मृल्लिंग पार्थिवं लक्षं भुक्तिमुक्तिकरं
233 परं ।। लिंगानामयुतं देवि महाराजभयं हरेत् ।। ७३ ।। विद्यार्थी लिंगसाहस्रं धनार्थी च तदर्धकं ।। पु-
त्रार्थी सार्धसाहस्रं कन्यार्थी तु शतत्रयं ।। ७४ ।। विद्वान् लिंगायुतं कुर्यात्सर्वपापहरं शिवे ।। राज्यार्थी च
जयार्थी च कारयेदयुतत्रयं ।। ७५ ।। कांतार्थी पंचसाहस्रं द्रव्यार्थी च तदर्धकं ।। मोक्षार्थी कोटिसंख्या-
कं विनाशानेन तल्लभेत् ।। ७६ ।। भूमिकामः सहस्राणि रूपार्थी त्रिसहस्रकं ।। सुहृत्कामस्त्रिसहस्रं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५२ वस्त्रार्थी च शताष्टकं ॥ ७७ ॥ मारणार्थी च शत्रूणां ससमाह्यमुत्तमं ॥ नीलपुष्पैर्यजेल्लिंगं श्वेतैर्मोक्षमवाप्नुया
त् ॥ ७८ ॥ सर्वकामे तु रक्तानि बंधूकादीनि पूजयेत् ॥ वश्याकर्षणविद्वेषे सहस्रं क्रमतोर्चयेत् ॥ देशकालबलं
ज्ञात्वा कुर्यान्मृल्लिंगपूजनं ॥ श्रावणे तु महादेवि क्षिप्रं सिद्धिप्रदायकं ॥ ८० ॥ निष्कं निष्कार्धमेवे शिद
द्याद्ब्राह्मणदक्षिणं ॥ दरिद्रो पि तथाढ्यो वा गावो देयाः सवत्सकाः ॥ ८१ ॥ तत्तन्मानानुसारेण तर्पणं होम
भोजनं ॥ ब्राह्मणानां विशेषेण एष प्रोक्तो विधिः शिवे ॥ ८२ ॥ पवित्रारोपणं कुर्याच्छ्रावण्यां कार्त्तिके त-
था ॥ हेमरौप्यैः तथा क्षौमैः कार्पासैः शतग्रंथितैः ॥ ८३ ॥ पवित्राणि त्रिरावृत्या कीर्त्तितानि महेश्वरि ॥
उत्तमं तु शतग्रंथि मध्यमं दशग्रंथिकं ॥ त्रिग्रंथिर्वान्यूनमतो न देयं शंकराय तु ॥ प्रलंबतो जानुमात्रं कुर्या
ल्लिंगे शिवे ~~दा~~[त] ॥ संपूज्य च पवित्राणि रोपयेच्छ्रावणे शिवे ॥ पवित्राणि शिवे दत्वा पवित्रो जायते भुवि ॥ त्रि
नेत्रप्रियस्सर्वस्याच्छ्रावण्यां शंकरार्चनात् ॥ ८४ ॥ श्रीस्कंद उवाच ॥ यः श्रावणे निलसुपारणभूषणस्य ॥
लिंगानि पार्थिवमयानि च सोमवारे च ॥ न्यक्षेक्षणप्रपितदोषहरे पि मासि नक्ताशनो यदि भवेत्स पापमुक्तः ॥
२० ॥ ८५ ॥ पवित्राणि चित्राणि कृत्वा त्रिनेत्रे विचित्राणि पापानि नाशं प्रयांति ॥ सपुत्रैः कलत्रैर्युतः सर्वतंत्रैः फलं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यच्चतच्चामुते देवि सत्यं ॥२६॥ यः श्रावणे शशि विभूषण तुंगलिंगं त्यक्तेवणार्चति नरो धिषणोपमानः ॥स्नात्वा शिवे त्रिषवणंनि शिसोमवारे तन्मासि शंकर गणो भवि ताग्रगण्यः ॥२७॥ इति श्रीशिवर हस्ये महादेवाख्ये एकादशांशे श्रावणार्चनं नामाष्टादशो ध्यायः ॥१८॥ श्रीकाशी विश्वेश्वरार्पण-मस्तु ॥ महादेव उवाच ॥ रुद्रं भाद्रपदे पूज्य भद्राणि लभते शिवे ॥ नदीरुद्रो भवेज्जंतुर्वि भवे सति स कचित् ॥१॥ मासादौ देवि संकल्प्य स्नायात्तीर्थे बहिर्जले ॥ नदी नद तटाकेषु वापी कूप सु वा शिवे ॥२॥ त्रि राचम्य शुचिः शांतो उमा कांतं हृदि स्मरन् ॥ सपवित्र करो मौनी प्राणानायम्य वाग्यतः ॥३॥ अग्नि-रित्यादिभिर्मंत्रैः भस्मोध्धूलन तत्परः ॥ त्रिपुंड्रं रचयेद्भक्त्या शिरो बाहु ललाटके ॥४॥ रुद्राक्षान्धारयेद्भ क्त्या कंठे कर्णगलोरसि ॥ नित्यकर्म विधायाशु संकल्प्य नियमव्रती ॥५॥ मासार्चनार्थं वरये द्ब्राह्मणान्कुंभ वांछि वे ॥ वेदागम पुराणज्ञान् शांतान् दांतान् जितेंद्रियान् ॥६॥ भस्मरुद्राक्ष मालाढ्यान् वरयेद्वेदपारगान् ॥ तैः सार्कं मंटपं शंभोः कुर्यात्पुष्प विराजितं ॥७॥ वितानास्तरणोपेतं धूपदीप विराजितं ॥ भूमौ चैवो पलिप्तायां रंगव ल्यायुतं तथा ॥८॥ कदलीस्तंभयुक्ते च रम्यादर्श विचित्रितं ॥ तदग्रे स्थापयेत्कुंभं सौवर्णं मृन्मयं तु वा ॥९॥

234

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५३ ताम्रं वा पैत्तलं दे वि आम्रपल्लव पत्रकं ॥ नदीनदाहृतैस्तोयैः पूरितं शोधितं नवं ॥१०॥ सामान्यार्घ्य विशेषार्घ्यौ फ
लपुष्पांबुपूरितौ ॥ पाद्यार्घ्याचमनं पात्रं कल्पयेच्च तदग्रतः ॥ पुष्पांबुपूरितान्येव गंधयुक्तानि तान्यपि ॥ पंच-
गव्यं च गंधोदं मधुपर्कं तथैव च ॥११॥ पिधानपात्रसहितं पंचगव्यानि सादरं ॥ क्षीरं दधि घृतं शुभ्रं क्षौद्रं शर्क
रयान्वितं ॥१२॥ नारिकेलांबु रंभादिफलं फनसमेव च ॥ इक्षु जंबीरसाराणि कल्पयेच्च पृथक् पृथक् ॥१३॥
कुशरत्नोद हेमोदं गंधकर्पूरजं जलं ॥ पाटलोत्पलमिश्रांबुपूरितं कलशं शिवे ॥१५॥ कुर्याच्छिवाभिषेकार्थं
शोधितं गंधवासितं ॥ ब्रह्म कूर्चोदकं ग्राह्यं शंख मध्यांबु शंकरे ॥१६॥ गोमेदसंभवं लिंगं स्थापयेद्दन्यदेव
वा ॥ मंडपे स्थाप्य तल्लिंगं प्राणायामेन शोधयेत् ॥१७॥ स्वदेहं च ततो मंत्रं जपित्वाथ षडक्षरं ॥ शतं सहस्रं
देवेशि ध्यायेद्देवं महेश्वरं ॥१८॥ चारुचन्द्रोज्वलत्कांतिं जटामुकुटशोभितं ॥ गंगाचन्द्रकलामौलिं त्रि
नेत्रं नीलकंधरं ॥१९॥ सोमस्कंधधरं ध्यायेद्देवदेवं महेश्वरं ॥ पश्चादाधारपीठांतं कृत्वार्चनमुमे तदा-
॥२०॥ भूशुद्धिं भूतशुद्धिं च कृत्वा स्वात्मतनुं शिवे ॥ शैवीमेव ततो ध्यायेत् षडूर्मिरहितं तदा ॥२१॥ हृत्पद्म
२। कोशादुत्थाप्य ज्ञाननालेन शंकरं ॥ सव्यनासापुटेनेशि सपुष्पांबुकरेण हि ॥२२॥ लिंगमौलौ न्यसेत्पुष्पं प्रण=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेनैवकेवलं ॥ अवगुंठ्यच सर्वाणि सं निरीक्षण पूर्वकं ॥ पीठेस्थान मये लिंगं स्थाप्य पंचाक्षरे णहि ॥ आवा
ह्यदेवं पंचार्घ्यं दापयेन्मधुपर्ककं ॥ पाद्यमाचमनं चार्घ्यं आवाहननिरीक्षणं ॥ २४ ॥ एतत्पंचार्घ्य मित्याहुः चं
दनागरु णादितं ॥ २५ ॥ मधुपर्कं ततोदद्यात् पंचगव्य मनंतरं ॥ क्षीराभिषेकं च ततो गंधोदक कुशोदकैः ॥
॥ २६ ॥ स्वर्णरत्नोदकैर्देवि सितयाच ततः परं ॥ नारिकेलांबु सलिलैः कदली फलमंडलैः ॥ २७ ॥ फनसैश्च
महाकोशैः रसालरसकैस्ततः ॥ जंबीर सारैश्च ततो गंधोदक कुशोदकैः ॥ २८ ॥ स्वर्णरत्नोदकैर्देवि ततो लिं
गैश्च मंत्रकैः ॥ ततः शुध्योदकं देविसेचयेद्रुद्र संख्यया ॥ २९ ॥ मध्ये निवेद्य हविषा धूपदीपं प्रदापयेत् ॥ सशां
तिकः सच मको जपो रुद्रा रव्य संख्यया ॥ ३० ॥ एकावृत्या द्विरावृत्या त्रिरावृत्या पिशंकरी ॥ ब्राह्मणैः शो
235 भवैः सार्धं स्वयं भक्त्या महेश्वरं ॥ ३१ ॥ घृतदीपान् समुद्बोध्य धूपं (धूमं) मनोहरं ॥ नानावादित्र निर्घोषैः गीत
वीणारवैः शिवे ॥ ३२ ॥ भवायेत्यष्ट नाम्नाते तर्पयेत्स कुशं ततः ॥ उद्वर्त्तयेत्सु वस्त्रेण पीठे स्थाप्य महेश्वरं ॥
यज्ञोपवीतं गंधं च पांडुरं भस्मकेवलं ॥ तंडुलं चणकैर्युक्तं तस्मिन्मास्यर्चयेच्छिवं ॥ ३४ ॥ वस्त्राभरणजा
लानि प्रणवेनैव दापयेत् ॥ बिल्वपत्रं पद्मपुष्पं करवीराणि पूजयेत् ॥ ३५ ॥ कनकं च कदंबं च पूजयेन्निधना=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५४ रव्यया ॥ भवायेति महादेवि धूपं दद्यान्मनः शिलं ॥३६॥ घृताक्तं च ततो दीपं दद्यान्मंत्रेण केवलं ॥ आढकान्नं
च सघृतं सशर्करमुमापते ॥३७॥ अपूपान्यपि देयानि पाचितानि घृतेन तु ॥ गुडखंडयुतान्येशे सोप
दंशमुतं शिवे ॥३८॥ तांबूलं च ततो दद्यान्मुखवासं ततः परं ॥ नीराजयेत्ततो लिंगं वेदघोषपुरःसरं ॥ यिका-
र्त्तिक्यादि पुरुषगजवाजिवृषाकृतिः ॥ रथाकृतिश्शतैर्दीपैः नीराज्य घटदीपतः ॥४०॥ बृहत्सामेति मंत्रे
ण रक्षाबंधं विधाय च ॥ पंचार्तिकं चकुक्षार्तिं कृत्वा कर्पूरखंडतो ॥४१॥ पश्चाच्छत्रं चामरं च व्यजना
दर्शकं शिवे ॥ देयं शिवाय वादित्र निनदं शंखकाहलं ॥४२॥ दुंदुभी वेणुवीणाद्यं स्त्रीणां नाट्यं ततः परं ॥
प्रदक्षिणा प्रणामादि ततस्स्तवन नर्तनं ॥४३॥ एवं कुर्यात्सदा देवि मुगुटागमचोदितं ॥ वक्ष्यामि नामाष्ट
शतं तेनैवार्च्यो महेश्वरः ॥४४॥ पुण्ये भाद्रपदे मासि स्तवं चापि वदामि ते ॥ ॐ रुद्राय भद्ररूपाय कद्रुद्राय
प्रचेतसे ॥ ४५॥ हिरण्याय शरण्याय अरण्याय नमो नमः ॥ वरेण्याद्यादिमध्यांतरहिताय गणाय च ॥ ४६॥
प्रभासाय सुभासाय गंधगर्भाय भूतये ॥ लोकधात्रे विधात्रे च पात्रे नेत्रे पवित्रिणे ॥४७॥ कुंडलीशफणा
२२ रत्नकुंडलाय नमो नमः ॥ चंडतांडवरूपाय (खण्डा) खंडाय मुंडिने ॥४८॥ दंडिने खंडिने चैव खड्गमांसादना
यच ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूमि पादाय द्यौर्मुर्ध्ने सिद्धिरूपाय शूलिने ॥ भस्माभ्यक्ताय भद्राय भीमाय भवहेतवे ॥ विश्रांताय चक्रांता
यशमीपुष्प प्रियाय च ॥ ५० ॥ नमः काव्याय नीप्याय कूप्याय परमात्मने ॥ नक्तंचराय कूल्याय कुला-
लपतये नमः ॥ ५१ ॥ संग्रहीत्रे प्रसादाय पद्ममालाधराय च ॥ अधिष्ठानाय ज्येष्ठाय निष्ठाय प्रथयि
ष्णवे ॥ ५२ ॥ पुराणाय पुराणाय करुणाय नमो नमः ॥ तारानाथ धरायाथ गजकृत्ति धरायते ॥ ५३ ॥ पादु
का पद्मपादाय नागहंसकधारिणे ॥ गिरिशाय गिरीशाय महाकैलासवासिने ॥ ५४ ॥ श्वसते ग्रसते चैव धाव
ते वसते नमः ॥ नमो दंष्ट्राकरालाय करवालकराय च ॥ ५५ ॥ व्यक्ताव्यक्ताय मुक्ताय भक्तमुक्तिप्रदायिने ॥ पशू
नां पतये चैव विद्युताय बलाय च ॥ ५६ ॥ बलप्रमथनायैव बालपालाय शूलिने ॥ काव्याय भव्यरूपाय भावा
236 भाव रताय च ॥ ५७ ॥ एवं नामशताष्टेन पूज्यो भाद्रपदे शिवः ॥ बिल्वपत्रैः कोकनदैः पुंडरीकविशेषतः ॥ ५८ ॥
स्तवमेतत्प्रयुंजीत भावो भक्तियुतो भवेत् ॥ सुपर्वगंधर्वसुपूजिताय निसर्गसर्गादिविधानकारिणे ॥
भर्गाय शर्वाय च सर्वगाय नमो नमस्तेंतकगर्वहारिणे ॥ गुरुस्वह भोजनमौलि मणि प्रियशंकर पुरहर
शंकुरु मे ॥ ६० ॥ तुंगवृषाधिप लिंगसदोज्वल भव भव भयहर कुरु करुणां ॥ कालकाल सुतमालकंटज=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५५ ज्वालकीलगरलाशनशं भो ॥ ६१ ॥ व्यालमालसुकंकणपाणये कोलदंतहरणाय नमस्ते ॥ फालनेत्र सुपवित्र
वरांगो ध्वारपात्र धृतगंगारयत्र ॥ ६२ ॥ पद्ममित्रकृतनेत्र कलत्रार्धार्धगात्र परिपाहि गिरित्र ॥ अंडखंड
विधिमुंडवरांडोद्दंड षंड विधिमुंडकांड ॥ ६३ ॥ कुंडलीशकृतकुंडल गंडखंड कोश कलिताखिलपाल ॥
एवंस्तुवन्भाद्रपदे भद्राणि लभते नरः ॥ ६४ ॥ दत्वाशं भव वर्याणां कृष्णं गोमिथुनं शिवे ॥ सदक्षिणं सव-
संच कृत्वा होमं विधानतः ॥ ६५ ॥ मासं नक्ताशनो भूयात् भवभक्तो जितेंद्रियः ॥ मासांते भाद्रपौर्णम्यामेव
पूज्य महेश्वरं ॥ ६६ ॥ स्वयं भुंजीत सहितो बांधवैर्बंधमुक्तये ॥ एवं भाद्रपदे मासि संपूज्य परमेश्वरं ॥ ६७ ॥
यात्यंते वंश सहस्रैर्नशैर्यानैर्मनोहरैः ॥ गीतवादित्रनिनदैः विरजोंबरवाससा ॥ ६८ ॥ गंधचंदनमाल्यादि
दिव्यस्रगनुलेपनः ॥ दोधूयमानचमरैः विजितो व्यजनादिभिः ॥ ६९ ॥ विहार्ययंदाधूर्य याति मत्सदनं
शिवे ॥ तत्र मे गणपैः सार्धं मोदते कालमक्षयं ॥ ७० ॥ श्रीस्कंद उवाच ॥ यो भद्र रे भाद्रपदे समर्च्य रुद्रं दरि-
द्रो न सन्जातु भूयात् ॥ सुवीरभद्रादि समर्चितः स्यात् भद्राणि सर्वाणि लभेद्दतंद्रः ॥ ७१ ॥ उमाकांतशांतो-
२३ भजति भजतां तो द्विजगणः कृतांताद्धभीतः श्रुति शिरसि भातं यमधनः ॥ वसंते हेमंते कुसुमितदि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नार्चयेति शिवं अहोवर्षा स्विष्ठं भजति वर भाग्यैश्च निपुणः ॥७२॥ इतिश्री शिव रहस्ये महादेवाख्ये एका
दशांशे भाद्रपदार्चनंनाम एकोन विंशो ध्यायः ॥१९॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवाय
नमः ॥ श्रीईश्वरउवाच ॥ शिवेऽश्वयुजमासस्य वक्ष्ये पूजाविधिं शृणु ॥ यत्कृत्वामनुजः सिद्धंगाणप
त्यं सविंदति ॥१॥ शिवस्नान विधिं वक्ष्ये ब्राह्मणानां हिताय वै ॥ सर्वपाप हरंसाक्षान्मयैव कथितं पुरा ॥२॥
अनेन विधिना स्नात्वा यः सकृत्पूज्य शंकरं ॥ ब्रह्म कूर्चंच पीत्वा तु सर्व पापैः प्रमुच्यते ॥३॥ त्रिधास्नानं समाख्या
तंस्मृतिभिः श्रुतिभिः सह ॥ हिताय शां भवानांच तथैवाश्रमिणां शिवे ॥४॥ वारुणं पुरतः कृत्वा नदीनद तटाकके ॥
अब्लिंगैर्वारुणैर्मंत्रैः रौद्रैर्वा शिवतत्परः ॥६॥ अग्निरित्यादिनादेहं परिमृज्य सु भस्मना ॥ तदाग्नेयंसमा
237 ख्यातं सर्व पाप विशोधकं ॥७॥ धृत त्रिपुंड्र रुद्राक्षः तत्तन्मंत्रेण मंत्र वित् ॥ मासनामच संकल्प्य सकुशां
जलिरीश्वरं ॥ भावयुक्तो भवं स्मृत्वा सर्व पापैः प्रमुच्यते ॥८॥ स्नात्वापि भावदुष्टश्चेन्न सशुध्यति
सर्वदा ॥ भाव शुध्दश्चरेत्सर्वं सर्वं नित्यंच कामिकं ॥ नृणां हि चित्त कमलमप्रबुद्धं भवेद्यदा ॥ प्रसुप्तंतम
सा ज्ञानं भानो भा सा तदा शुचिः ॥१०॥ मृच्छकृत्तिल पुष्पंच स्नानार्थं भसितं सितं ॥ आनीयतीरे निक्षि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्यस्नानतीर्थे कुशांस्तथा ॥ ११ ॥ प्रक्षाल्य हस्तपादौ च त्रिराचम्य शुचिर्द्विजः ॥ पंचगव्यैस्ततस्नात्वा कूर्चो
५६ देनापि शंकरि ॥ १२ ॥ उद्धृतासीति मंत्रेण पुनर्देहं विशोधयेत् ॥ गंधद्वारेति मंत्रेण कपिलागोमयं शुभं
॥ १३ ॥ लेपयेत्सर्वगात्रेषु अंगादंगेतृचा शिवे ॥ पुनराचम्य विधिवदभिमंत्र्य नदीजलं ॥ १४ ॥ तीर्थपालां
स्ततो रुद्राननुज्ञाप्याघमर्षणः ॥ येतीर्थानीति मंत्रेण स्नातः पूतो भवेच्छिवे ॥ १५ ॥ एवं स्नात्वा यथान्या-
यं कृतनित्यक्रियो द्विजः ॥ भस्म धृत्वा च जप्त्वा च हुत्वा देवान्पितृंस्तथा ॥ १६ ॥ तर्पयित्वा प्रविश्यं ततः गृहे मं
डपमुत्तमं ॥ कारयेत्पुष्पमालाढ्यं भूलेपनपुरःसरं ॥ १७ ॥ रंगवल्ली विचित्राढ्यं पद्मसारेण मंडितं ॥
ब्राह्मणान्वरयेद्देवि शांभवान्वेदपारगान् ॥ १८ ॥ प्राणायामत्रयं कृत्वा ध्यायेद्देवं त्रियंबकं ॥ पंचव-
क्त्रं दशभुजं शुद्धस्फटिकसन्निभं ॥ १९ ॥ सर्वाभरणसंयुक्तं चित्रांबरविभूषितं ॥ सोमं सोमावतंसं च
त्रिनेत्रं नीलकंधरं ॥ २० ॥ शिवसारूप्यमाप्याथ दहनाप्लवनादिभिः ॥ शैवीं तनुं समास्थाय पूजयेल्लिं
गमीश्वरं ॥ २१ ॥ देहशुद्धिं च कृत्वैवं कलान्यासं न्यसेत्क्रमात् ॥ सर्वाद्यं प्रणवं मंत्रं शिवरूपप्रकाशकं ॥
२५ तेनाद्येन शिवायेति जप्यो मंत्रः षडक्षरः ॥ सहस्रपरमो नित्यं शताष्टकृतसंख्यया ॥ २३ ॥ पंचविंशद्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षेण कृतमालाजपेवरा ॥ जप्त्वामंत्रीयथान्यायं ध्यात्वादेवं महेश्वरं ॥ २४ ॥ सेचयेदर्चनास्थानं गंध
चंदनवारिणा ॥ द्रव्याणिसाधयेत्पश्चात्क्षालन प्रोक्षणादिभिः ॥ २५ ॥ स्थापयेद्विधिना धीमान्
अवगुंठ्य यथाविधि ॥ शृंगशंखानिशाखानिपर्णपद्मपुटानिच ॥ २६ ॥ हेमरूप्यादिताम्राणि कांस्य पैतलका
न्यपि ॥ प्रशस्तानि शिवार्चा दौक्षालितान्यथकल्कतः ॥ २७ ॥ दर्भैराच्छादिते भुविस्थाप्य पात्राणि सर्वतः ॥ क्षा
लनं प्रोक्षणं चैव प्रणवेन विधीयते ॥ २८ ॥ प्रोक्षणीं चार्घ्यपात्रं च पाद्यपात्रमनुक्रमात् ॥ यथार्घ्याचमनार्थो यपा-
त्रमेकं प्रसाधयेत् ॥ २९ ॥ तेषुतेष्वथ सर्वेषु क्षिपेत्तोयं सपुष्पकं ॥ प्रणवेन क्षिपेत्तेषु द्रव्यमालोक्य बुद्धिमान् ॥
॥ ३० ॥ उशीरं चंदनं चैव पाद्येतु परिकल्पयेत् ॥ जातीतक्कोलकर्पूर फलमूलतमालकाः ॥ ३१ ॥ चूर्णइत्वाथ संशो
238 ध्यक्षिपेदाचमनीयके ॥ एवं सर्वेषु पात्रेषु शंखे चापि विशेषतः ॥ ३२ ॥ सकुंकुमंच कर्पूरं पाटलोत्पलकानि
च ॥ अभिषेचनीके कुंभे दापयेत् शोधितेजले ॥ ३३ ॥ कुशाग्राण्यक्षतान् चैव यवव्रीहितिलानिच ॥ आज्यसि
द्धार्थपुष्पाद्यः अर्घ्याष्टांगः प्रकीर्त्तितः ॥ गंधपुष्पाक्षतादीनि नवान्येव प्रसाधयेत् ॥ सर्वपात्रेषु भसितं
दापयेत्प्रणवेनतु ॥ ३५ ॥ पंचगव्यमयं पात्रं शोधयेत्पंचमंत्रकैः ॥ सद्यादिभिः समभ्यर्च्य कुंभं पूज्य स शंख=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५७ कं ॥३६॥ मधुपर्ककपात्रं च सेचयेद्दधिक्षौद्रतः ॥ पिधानमपचो धृत्स देयं लिंगे विशेषतः ॥३७॥ आश्वयुज्यां सि
वे लिंगं माणिक्यं हेमसंभवं ॥ तत्पीठे स्थाप्य विधिवत्पीठपूजाक्रमेण तु ॥३८॥ पाद्यमाचमनीयांश्च दत्वा चैव य-
थाक्रमं ॥ मधुपर्कं पंचगव्यं गायत्र्या प्रतिपादयेत ॥३९॥ क्षीरेण दध्ना चाज्येन मधुना सितया तथा ॥ नारिके-
लांबुभिश्चैव कदलीपनसेक्षुजैः ॥ ४०॥ जंबीरनीरैर्गंधैश्च हेमरत्न॰जलैस्तथा ॥ सद्योजातादिमंत्रैश्च स
हगायत्रितो पिवा ॥ ४१॥ दद्याल्लिंगे ततो धूपं दीपं नैवेद्यमुत्तमं ॥ रुक्रुद्रैर्वारुणैर्मंत्रैस्तपायोराजसामभिः
॥४२॥ स्नापयेद्रुद्रसंख्यातः त्रिरावृत्या पिवा द्विजैः ॥ तूर्यघोषैर्वेदघोषैः रुद्रं स्नाप्य जलादिभिः ॥ ४३॥ भवा
येत्यष्टनाम्नैव तर्पयेच्च सकूर्चकं ॥ वाससा परिमृज्येशं पीठे स्थाप्य महेश्वरं ॥ ४४॥ उपवीतं च गंधं च
दद्याद्मुद्गाक्षतं नवं ॥ वस्त्राभरणमुख्यानि पुष्पाणि सुरभीणि च ॥ ४५॥ सुश्वेतपुंडरीकानि बिल्वप-
त्राणि पूजयेत् ॥ सौगंधिकानि देयानि भवायानि धनेष्वपि ॥ ४६॥ देवदारुमयं धूपं दद्यात्सघृतमीश्वरे ॥
दीपावलिं ततो दद्याद्गोघृताक्तां सुशोभनां ॥ ४७॥ गोधूमान्नं पायसं च सापूपं विनिवेदयेत् ॥ सहार्कं रं घृताक्तं-
२५ च नामैरेतैः प्रपूजयेत् ॥४८॥ नीराजयेत्ततो लिंगं सुचंद्रकर्पूरखंडकैः ॥ छत्रं च चामरं देवि व्यजनादर्शकं ततः ॥४९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षि
प्रदक्षिणा प्रणामादि कार्ये स्तवमीश्वरी॥ नामानि ते प्रवक्ष्यामि दत्वा तांबूलमुत्तमं॥ ५०॥ पूजयेद्बिल्वकुसु-
मैस्तवमेनमुदीरयेत्॥ ॐ त्रियंबकायांबिकाभर्त्रे शंबरांकधराय च॥ नमोवन्याय फेन्याय मान्याय च न-
मो नमः॥ ५१॥ नमो भवाय भव्याय भावनायोद्भवाय च॥ अनंतबलवीर्याय भूतानां पतये नमः॥ ५२॥ संहर्त्रे
चाथ शर्वाय अव्ययाय व्ययाय च॥ गंगासलिलधाराय आधाराय गुणात्मने॥ ५३॥ कंदर्पदर्पघाताय मेध्या
य च सुशिल्पिने॥ वातचक्रप्रवृत्ताय क्रतूनां प्रभवे नमः॥ क्रतुपूज्याय ईज्याय सज्यमानाय ते नमः॥
शंकराय वृषांकाय गणानां पतये नमः॥ दंडहस्ताय कालाय पाशहस्ताय ते नमः॥ सहमानाय शांताय
शक्रप्रहरणाय च॥ ५६॥ त्रयीमयाय सत्राय सुहोत्राय कपर्दिने॥ वेदतंत्रप्रधानाय शतजिह्वाय वे
239 धसे॥ ५७॥ गानप्रियाय तुष्टाय वैद्युताय प्रभावते॥ धराधराय पाराय सुपाराय रणाय च॥ ५८॥ जंज
पूकाय धर्माय दंष्ट्रिणे घोषिणे नमः॥ विचाराय हराय घोराय पशुपाय च॥ ५९॥ उरगाभरणायापदू
रगाय अमराय च॥ करंधर्माय धौम्याय शर्मवर्मकराय च॥ ६०॥ गह्वरेष्ठाय त्रिशिष्ठाय विशिष्ठायाक्षयाय
च॥ उग्रव्याय भाव्याय उर्ध्वपाय गराय च॥ ६१॥ स्तवाय स्तवमानाय स्तवप्रीताय ते नमः॥ ज्योतिषे शास्त्र=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५८ पालायवर्णाश्रमरतायच॥६२॥ वर्णिने गृहसंस्थायवन्यसन्यासिने नमः॥ भेददूरायशूरायक्षयद्वीराय
तेनमः॥६३॥ भर्गाय भजमानाय यजमानात्मने नमः॥ सोमाय सोमचूडायते नमः॥६४॥ भूतयेस्वस्तयेचै-
वपरस्तात्प्रभवेनमः शताष्टनाम्नामेतेन पूजयेच्छम्भिने शिवे॥६५॥ स्तवमेतत्प्रयुंजीतयदीच्छेत्सिद्धिमा
त्मनः॥ जयजयविजितारिसंघभूम्नेश्रुतिशीम्र्नेत्तकहारिपादधाम्ने॥ जयजय करवीरपुष्पमालाकलि
ताकंधरदिव्यदेहजन्मे॥६७॥ जयजयतुरगारिवाहना जयजयउरगारिवाहपूज्यपाद॥ जयजयत्रिपुरारये
हरायधृतसोमायकायतेनमोस्तु॥६८॥ हरहरपुरहन्पिनाकपाणे गरधर शंकर चारुदेहमूर्त्ते॥ पुरहर
भवहर शिवतरसुरवकरपुरहर शंभो हरगंगाधरसांबरुद्र पाहि॥ शम्भवप्रसीद परमेश्वरपंचवक्त्ररु
द्रत्रिनेत्र शशिखंडकलाललाम॥ विश्वाधिकांधकहर प्रमथेशशंभो पाहिप्रसन्नजनतां सुनतां महे
श॥ असमकुसुमबाणतातबाणपाणेहर भीमामरपूज्यपादपद्म॥७०॥ श्रुतिवाजिवरांगहे-
षगीतकीर्त्ते प्रपन्नशंकर पाहिमांकृपाक्ष्णा॥ एवंस्तुवन्प्रयुंजीत तस्मिन्मासिमहेश्वरि॥
२६ ॥७१॥ ब्राह्मणंदापयेद्गौरं सवत्सां गोद्वयं शिवे॥ दक्षिणादिभिरभ्यर्च्य मासांतेभोक्तुमर्हति॥७२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्यंनक्ताशनो भक्तो मुक्त एव भवेध्रुवं ॥ आश्वयुज्यांच पौर्णम्यां होमः कार्यो विशेषतः ॥ १३ ॥ दीनानाथं भोजयित्वा स्वयं भुंजीतबं
धुभिः ॥ अश्विन्यांमन्नराशिभिः ॥ आश्वयुज्यां पौर्णमास्यां ॥ सायमभ्यर्चयेल्लिंगं स्थिरं वाचरमेववा ॥ यावत्तत्सिक्थमानं नशि
वलोके महीयते ॥ एवंयः कुरुतेमासि सोश्वमेधायुतंलभेत् ॥ सोत्यर्कसूर राजित विमानेन सवंशकः ॥ याति मत्सदनं देविग-
णैंद्रैरनुमोदितः ॥ पूजितो ब्रह्मविष्णवाद्यैः शक्राद्यैर्मुनिभिः शिवे ॥ मासेचाश्वयुजिप्रसन्नहृदयो यो मां समभ्यर्च्यादरादरात्सो
लभते मदीयमगजेलोकं सभंज्यादरीन् ॥ सन्त्यायान्भविताजनेषु सुमहाइज्यायुतानां फलं भुंज्यात्तस्य भवंति भूमिपतयः
साम्राज्यं सराज्यंलभेत् ॥ १६ ॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे अश्विनार्चनं नाम विंशोध्यायः ॥ २० ॥ श्रीका-
शी विश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवायनमः ॥ श्रीमहादेव उवाच ॥ कार्त्तिकेर्चनमीशस्य शृणुवक्ष्ये गिरींद्रजे ॥ शिवार्च
240 नेविशिष्टोयं कार्त्तिकोर्त्तिविनाशकः ॥ १ ॥ ऊर्जे गर्जंति पापानि स्नानदानार्चनादिभिः ॥ पूयंते मनुजास्सर्वे इति तर्जंति
ते भटाः ॥ २ ॥ याम्यायमस्य सदने मदनांतकरार्चकं ॥ दृष्ट्वापि पलायंते सिंहं दृष्ट्वा मृगायथा ॥ ३ ॥ कार्तिके मासि संप्राप्ते स्ना
नं कुर्याद्बहिर्जले ॥ नदीतटाकवापीषु कूपेवाभिरुचिर्यथा ॥ ४ ॥ संकल्पनियमोपेतो दूर्वा मृत्स्नाकृतां भसा ॥ त्रिराचम्य
शुचिः स्नात्वा दर्भपाणिः शिवं स्मरन् ॥ ५ ॥ त्रिःप्रविश्याप्सु समंत्रेणवारुणेन विमृज्यच ॥ देवानृषीन्पितॄन्देवी संतर्प्य=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विधिपूर्वकं ॥ ६ ॥ तीरवासं प्रगृह्यैव प्रक्षाल्यांघ्रिस्त्रिराचमेत् ॥ धौतवासः परीधाय भस्म धृत्वा यथाविधि ॥ ७ ॥ त्रिपुंड्र अ॰ ४४
५९ रुद्राक्षधरो कृतनित्यक्रमो द्विजः ॥ नवं सुपूरितं कुंभं शोधितं च नदीजलैः ॥ ८ ॥ सुपल्लवमुखं देवि गृहीत्वा पाहि
मां विभो ॥ स्वकरानीतपुष्पांबु साक्षाद्गृण्हाति शंकरः ॥ ९ ॥ करानीतं पटानीतं शूद्रेण पापिनाहृतं ॥ क्रयक्रीतं भूमि
लग्नं न प्रशस्तं ममार्चने ॥ १० ॥ तस्मात्स्वयं वै कुसुममाहरेच्च जलं कशं ॥ पूजास्थानं प्रविश्याथ गोमयेनोपलेप
येत् ॥ ११ ॥ पंचवर्णकपिष्टेन पद्मस्वस्तिकचिन्हितं ॥ कुर्यांच्च पुष्पमालाद्यं मंडपं फलकैर्युतं ॥ १२ ॥ वितान
प्रच्छदपटै रलंकुर्याद्यथाबलं ॥ वरयेद्ब्राह्मणान्देवि कोविदान भिषेचने ॥ १३ ॥ भवानेष भस्मांकान्चंद्रार्कपदपू
जकान् ॥ पात्राणि क्षालितानीशे संस्थाप्य क्रमयोगतः ॥ १४ ॥ प्रोक्षणीं जलकुंभं च शंखधाराग्रपात्रकं ॥ पाद्या
चमनार्घ्यादिपात्रं च मधुपर्कजं ॥ १५ ॥ कुशेध्वासादये देवि धातूनि च महेश्वरी ॥ गंधपुष्पोदपूर्णानि कूलाभस्मा
नियोगतः ॥ १६ ॥ पंचगव्यं घृतं क्षीरं दधिक्षौद्रं सितामपि ॥ फलसाराणि सर्वाणि यथाजोषं प्रकल्पयेत् ॥ १७ ॥ =
यथालब्धानि कालेन पुष्पाण्यपि महेश्वरी ॥ धूपश्चागरुसारेण कल्पनीयो घृतान्वितः ॥ १८ ॥ दीपमालाकल्पनी
२६ या घृताक्ताष्टशतोत्तरा ॥ स्वयमाचम्य विधिवत्प्राणानायम्य मंत्रवित् ॥ १९ ॥ देशकालादि संकीर्त्य विप्रै रूर्जे=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषतः ॥ प्रयुतो नियतो धीमान् पूर्वांगं परिकल्पयेत् ॥ २०॥ गणेशमादौ संपूज्य तत्त्वार्थेन दिनं यजेत् ॥ चंडं च भैरवं
चैव निर्माल्यमपनोद्य च ॥ २१॥ कल्पयेदासनं पश्चादाधारादीन् यथाक्रमं ॥ अनंत धर्म वैराग्यं ज्ञानं पाशं त्रि-
शूलकं ॥ २२॥ कार्त्तिके वैद्रुमं वापि हेमराजतसंभवं ॥ गृह्ये त्वास्थापयेत् पीठे लिंगं संशोध्य चांबुभिः ॥२३॥
लिंगमूर्ध्नि न्यसेत्पुष्पं प्रणवेनैव शंकरि ॥ पश्चात्पंचाक्षरं मंत्रं जपेच्छतसहस्रकं ॥ २४॥ ध्यात्वैवं देव
मीशानं नीलकंठं त्रियंबकं ॥ सोमस्कंदं चंद्रचूडं दिव्यस्रक्सुविभूषितं ॥२५॥ व्याघ्रचर्मपरीधानं नागा
भरणभूषितं ॥ भस्मांगरागसुभगं सस्मितं हि मुखांबुजं ॥ २६॥ ध्यात्वावाहयेत्ततो लिंगं हृत्पद्म प्रणवे-
नहि ॥ स्नानवेद्यां ततो पाद्यमाचामं चार्घ्यमेव च ॥ २७॥ दद्याच्च मधुपर्कं च पंचगव्यं ततः परं ॥ क्षीराज्य
२५ / दधि सक्षौद्रं सितया नारिलांबुभिः ॥२८॥ अन्यैः फलरसैर्दिव्यैः स्नापयेच्छिव मंबिके ॥ स्नाप्यमंगलघो
षेणवादित्रस्वयोगतः ॥२९॥ उद्वर्त्तनांतरे स्नाप्य गंधरत्नकुशोदकैः ॥ शातकुंभांबुभिर्दिव्यैः धूपदीपनि
वेदनं ॥३०॥ दत्वा पीठे न्यसेत्स्थाप्य रुद्रावृत्याभिषेचयेत् ॥ एकादशानुवाकेन सरुद्रचमकेन च ॥३१॥
एकद्वित्रिवरं वापि पंचब्रह्मांतिमे शिवे ॥ भवाये स्वष्ठ नाम्नांते तर्पयेत्सुकुशोदकैः ॥ ३२॥ शंखोदके-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६० नाभिषिच्य प्रविमृज्य च वाससा ॥ पीठे संस्थाप्य वस्त्रं च उपवीताक्षतादिभिः ॥ ३३ ॥ यवगोधूमसहिता अक्षताः का
र्त्तिके शिवे ॥ गंधचंदनवृक्षोत्थं देयं शर्वाय भस्मयुक् ॥ ३४ ॥ बिल्वपत्रं च पकं च नंद्यावर्त्तैर्बुजे शिवे ॥ देयं तं निध
नेत्यादि पूजयेत भवादिभिः ॥ ३५ ॥ बिल्वत्वम्घृत संयुक्तं धूपं दद्याच्च कार्त्तिके ॥ घृतदीपाः प्रदातव्याः दीपमा
लाः समुज्वलाः ॥ ३६ ॥ सशुक्रत्तिलसंपूर्णं कृसरं घृतशर्करं ॥ घारिकापूपसहितं दद्यान्नैवेद्यमीशतुः ॥ ३७ ॥ तां
बूलं च ततो दद्यात्क्षीरं तत्र निवेदयेत् ॥ नीराजयेत् ततो लिंगं तौर्यत्रिकरवान्वितं ॥ ३८ ॥ शतामलकसंपूर्णं कृ
सरं घृतशर्करं ॥ कुर्यात्कर्पूरजं पश्चाच्छत्रव्यजनमाचरेत् ॥ ३९ ॥ आदर्शं वेणुवीणादिशंखकाहलदुंदुभीन् ॥
प्रदक्षिणप्रणामादीन् नर्त्तनं च महेश्वरं ॥ ४० ॥ कुर्याच्च नामभिर्देवि पूजयेत स्तुवीत च ॥ तत्र नाम्नां प्रव-
क्ष्यामि संख्यां मात्र शताष्टकां ॥ ४१ ॥ स्तुतिं च ते प्रवक्ष्यामि समाहितमनाः शृणु ॥ विश्वाधिकाय वेद्याय वेदांत निरताय
च ॥ पराचराय वार्याय सर्वदाय पिनाकिने ॥ उमाधवाय देवाय ताम्राय तरुणाय च ॥ बभ्रवे नीलकंठाय घंटाहस्ता
यशंभवे ॥ रुद्रायामेयवीर्याय सर्वदाय पिनाकिने ॥ जातूकर्णाय सोमाय भवाय भवहेतवे ॥ उग्राय घोररूपा-
य वामदेवाय मुंडिने ॥ खगमायाशमायाय घनवाहाय वर्चसे ॥ पंचाननाय पतये पतये वीतरागिणे ॥ चामराय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थ

शरण्यायवसामांस प्रियायच॥ [illegible] ॥ पन्नगाभरणायासन्नगोर्ध्वनिवासिने॥आसन्नजनपालायनील-
ग्रीवायवेधसे॥अमोघबलवीर्यायशलावर्त्तायरागिणे॥५॥ हिरण्यवरवीर्यायरसेंद्रवरबीजिने॥ध्वजिनेगर्ज
मानायहुंकारायोरुतेजसे॥६॥तिग्मायुधाययोधायरथाधिपतयेनमः॥बिल्विने बिल्वपूज्यायप्रसन्नाय
कपालिने॥७॥भिक्षवेयक्षपूज्यायन्यक्षायप्रथमायच॥उष्णीषिणेमुकुटिनेगदाहस्तायवज्रिणे॥८॥
खड्गखेटकरायाथभिषग्वर्यायतेनमः॥ भर्गायसहमानाययुगावर्त्तायभाविने॥९॥ज्वलज्ज्वालायतुष्टाय
पुष्टहृष्टायधृष्णवे॥गण प्रियायगद्यायपर्णशद्यायवैद्युते॥१०॥वामदेवायजातायसद्योजातायपाविने॥
वर्षतेग्रसतेचैवअवष्यायावटायच॥११॥काट्यायचसपथ्यायवास्तुपायगरादिने॥बलप्रमथनायाय
२४ 2 सर्वभूतदमायच॥१२॥कालनाशायदेवायकालज्वालायदंतिने॥हनाहनायपुण्यायपुण्यवासायतेनमः
॥१३॥पुरुषायपुराणायऋषयेवेदमूर्तये॥अन्नाधिपतयेचैवसर्वेषांपतयेनमः॥१४॥वीतिहोत्रायपात्राय
सूत्रात्मणेभूधरायच॥परमेशाय [illegible] भिद्यायअखिद्यायसुरायच॥१५॥ब्रह्मकंधरमालायवामनांगधराय-
च॥विष्णुरक्तप्रपानायनरसिंहहरायच॥१६॥इत्येतद्देविनाम्नामेशताष्टेन प्रपूजयेत्॥बिल्वपत्रैश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६१ कुसुमैः कार्त्तिके त्ति विनाश कृत् ॥ स्तव्येन सं स्तवे दीक्षां तस्मिन्मासि श्रृणुष्व मे ॥ पुण्येनापुष्यं दिने शिपुत्रेण
परमेश्वरं ॥ ५९ ॥ विवासनजनावनाव सित भूधरो मापते विवासनिगमांतिमप्रथिमधामसीमायते ॥
अहीनमखभूषणप्रियवरायवार्यायते हराय पुरभेदिने गजहरायतुभ्यंनमः ॥ ६० ॥ गवामधिपशंकर त्रि
नयनायपाहीश्वरप्रसीद परमेश्वर प्रथमसोमसोमांकधृक् ॥ शरावर कृताब्धिसध्रशितोरुगर्वोन्नतत्रि
पुस्थित परावर प्रकटहारि नेत्रोज्ज्वल ॥ ६१ ॥ मृगाजिन धरांधकासुर निबर्हणाग्राव सत्स मीकृत सुसार
ण प्रसरणोरुवीर्यायते ॥ भवार्णवनिवासिनोऽधृत करावलंबायते वृषांगवरचारिणेव सितचीरिणे तेन-
मः ॥ समीरणसुधारण प्रवरधारिणे चीरिणे धराधिपसुनामित प्रकटसामिसद्धर्मणे ॥ ६२ ॥ गुणातिग
गणाननप्रथमसामगण्यापते शरण्य पद पंकजानतसुपर्वशर्यायते ॥ उगणस्त्वं भगणाधिपोरुमौलिंग-
णनाथोरुगुरुः पिता सिशंभो ॥ शरणागत पालको महात्मा वरुणार्च्यो भवहा पुरत्रयारिः ॥ पतिरीशो भुव
नस्य विश्वपति स्त्वं मयि दृष्टिं वितराद्य समुंखीनां ॥ अधुनामधुनाधिकां महेश विधुनाचारुदृशा धुनो
२९ तु पापं ॥ इति स्तवेन मांस्तुत्वा नत्वा हि कं महेश्वरं ॥ कार्त्तिक्यां पौर्णिमायांतु होमः कार्यो द्विजोत्तमैः ॥ ६४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कपिला गोद्वयं देयं सवत्सं च सदक्षिणं ॥ मासं नक्ताशनो भूयः सोमवारे उपोषितः ॥ ६६ ॥ कार्त्तिके सोमवारे
षु पूजयेत्परमेश्वरं ॥ चतुर्ष्वत्तममासेषु पायसं च निवेदयेत् ॥ ६७ ॥ द्रोणधत्तूरबिल्वैश्च पूजयेत्सोमवास
रे ॥ एकं वापि च धत्तूरं मयि दत्वा विलीयते ॥ ६८ ॥ सर्वेष्वपि च मासेषु सोमवारो वरो परः ॥ तत्रापि श्रा
वणे पुण्यः कार्त्तिकस्तच्छतोत्तरः ॥ ६९ ॥ तस्मिन्नुपोषणं पूजा प्रशस्ता सोमवासरे ॥ शक्तेनोपोषणं
कार्यमन्यथा निशि भोजनं ॥ ७० ॥ धात्रीमूले विशेषेण नक्ते पूज्य महेश्वरं ॥ शांभवान्भोजयन्देवि ध
१. रित्रीफलमश्नुते । ७१ ॥ ब्राह्मणैरेव कर्त्तव्यं नवारव्रतमेव मे ॥ सदा प्रियकरं देवि सोमवारं शिवे सदा ॥ ७२ ॥ श्रु
त्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥ ये सोमवारे स्वेच्छं दिदिवा कुर्वन्ति भोजनं ॥ ७३ ॥ ते विष्टाभोजि
243 नो देवि भविष्यंति परे ॥ तकाः ॥ सोमार्द्रापातयुक्तश्चेच्छिवयोगः स एव हि ॥ ७४ ॥ विशेषात्कार्त्तिके मासि
तस्मिन्पूजा ममोत्तरा ॥ सोमार्द्रापातयुक्तोयः सोमवारः शिवे सदा ॥ ७५ ॥ सहस्रार्कग्रहैस्तुल्यः सर्वपाप-
प्रणाशकृत् ॥ तस्मिन्नभ्यर्चनं पुण्यं प्रशस्तं प्रीतिकृन्मम ॥ ७६ ॥ ईश्वर उवाच ॥ एवं यः कार्त्तिकं मासं
पूजयैव हियापयेत् ॥ तस्य पुण्यफलं वक्तुं नालं वेदाः सुरासुराः ॥ ७७ ॥ कांचनेन विमानेन वंशकोटिसम=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्वितः॥ याति मत्सदनं देवि कैलासं देवदुर्लभं ॥७८॥ आरार्त्तिक्यं कार्त्तिके यस्तु कुर्यादार्त्तिघ्नं तत्कीर्तिदं तत्त्रि- अ० २१
६२ लोके॥ वर्त्तिं घृताक्तामभितः प्रदीप्तां समार्च्य वै लिंगमूर्त्तिं महेशं ॥७९॥ दृष्ट्वा चेष्ट्वा यत्फलं सर्वरात्रैस्तल्ल
ब्ध्वा वै याति शंभोः पदं मे॥ ऊर्जेस्यूर्जे धूर्जटे र्लिंगमोक्ष्य सायं सोमे वासरे पापसंघं॥ गर्जत्येवं तर्जिता
v सौरिदूता वर्जत्येनं ते नराः स्व्यूर्जिताहि॥८०॥ पर्वण्युमे सर्वमखर्वपुण्यदं दूर्वाभिरेवार्च्य सुपर्ववंद्यः॥ औ
र्वानलेध्वा विपाप निरशेषो भवेत्सर्वनराजपुत्रि॥८१॥ धात्रीपत्रैः पूजयंस्यूर्जमासि ते वै धरित्रीप्रति
दातुः फलं हि॥ ते सावित्रीजापिनां संलभंते सावित्रीत्वं गुह्यमेतच्छृणुष्व ॥८२॥ इति श्रीशिवरहस्ये महा
देवाख्ये एकादशांशे कार्त्तिकमासार्चनं नाम एकविंशोध्यायः॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीमहादेवाय नमः॥ श्रीईश्वर उवाच॥ मार्गशीर्षे र्चयेद्देवं विशेषेणान्तरात्मना॥ मासानां परमो मासः मार्ग
शीर्षो गिरीन्द्रजे॥१॥ अस्मिन्नभ्यर्चनं पुंसां विशिष्टफलदायकं॥ मासादौ प्रथमं स्नायान्नदीनदतटाक
३० के॥२॥ समंत्रं सकुशं देवि कृतशौचो बहिर्जले॥ संकल्प्य मासनामं च अब्लिंगैर्वारुणैरपि॥३॥ परि
धाय ततो वासो द्विराचम्य च भस्मधृक्॥ अग्निरित्यादिना देवि त्रिपुंड्रपरिभूषितः॥४॥ रुद्राक्षधारणं=

कृत्वा प्रातः संध्यामुपास्य च ॥ हुत्वा च विधिवद्वह्निं कुंभमंभः प्रपूरितं ॥ ५ ॥ फलपल्लवपुष्पादि संपा
द्य विधिवत्तदा ॥ गोचर्ममात्रमालिप्य मंडलं गोमयेन तु ॥ ६ ॥ ॥ चतुरस्रं विधानेन चाद्भिरभ्युक्ष्य मं
त्रवित् ॥ पंचाशद्दलसंयुक्तमालिखेत्पद्ममुत्तमं ॥ ७ ॥ तत्तद्वर्णैस्तथा पूर्णैः श्वेतपूर्णैरथापि वा ॥ एक
हस्तप्रमाणेन कृत्वा पद्मं सुदर्शनं ॥ ८ ॥ कर्णिकायां न्यसेत्पीठं तदूर्ध्वं मंडपोज्वलं ॥ अलंकृत्य वितान
द्यैः पुष्पमालावलंबितं ॥ ९ ॥ पंचाशद्दीपमालाभिः धूपैर्दीपैः समुज्ज्वलं ॥ सितैर्विकसितैः पद्मैर्बिल्वनी
लोत्पलैः सुमैः ॥ १० ॥ समंतपारिजातैश्च कुसुमैरन्वितं शिवे ॥ कलशं शोधितपात्राणि दर्भादिदिक्षु न्यसे
त्क्रमात् ॥ ११ ॥ कुंभं संस्थाप्यांबुसंपूर्णं पल्लवाद्यं तदग्रतः ॥ पात्राण्यभ्युक्ष्य पुष्पांबुपूरितानि विधाय च ॥
248 ॥ १२ ॥ संकल्प्य शांभवांस्तत्र वरयेत्पूर्ववद्द्विजान् ॥ तैरनुज्ञामवाप्याथ मासं संकल्प्य पूजनं ॥ १३ ॥ पं
चामृतं पंचगव्यं सुक्षीराज्ये दधी मधु ॥ सिताफलरसानीक्षोः संपाद्य सकुशोदकं ॥ १४ ॥ जपेत्पंचाक्षरीं
विद्यां समाहितमनाः शुचिः ॥ आपः पूता भवंत्येव वस्त्रपूताः समुद्धृताः ॥ १५ ॥ अद्भिः कार्याणि कु
र्वीत पूताभिः सर्वसिद्धये ॥ सहस्रं वा शतं वाष्टं वा जपेन्मंत्रं षडक्षरं ॥ १६ ॥ ध्यायेद्देवं विरूपाक्षं नील

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६३ कंठमुमायुतं ॥ मृगांकशेखरं शांतं सर्वाभरणभूषितं ॥१७॥ ध्यात्वा देवं च हृत्पद्मे पीठपूजां वि धाय च ॥ भूतशु-
द्धिं च भूशुद्धिमासनार्चनमाचरेत् ॥ १८॥ कलशं शंखमावाह्य सोमामृतसुधारया ॥ दहनाप्लावनाद्यै-
स्तत्कृत्वा देहं सुधामयं ॥१९॥ निर्माल्यमपनोद्येशं लिंगं पीठे निवेशयेत् ॥ वैडूर्यसंभवं हैमं पंचसू-
त्रसमुज्वलं ॥२०॥ पाद्यमाचमनं चार्घ्यं सपुष्पं विनिवेदयेत् ॥ पंचगव्ययुतं देवि मधुपर्कं निवेद-
येत् ॥ २१॥ पंचामृतं तथा क्षीरं दध्याज्यक्षौद्रसेचनं शर्करा नारिकेलांबु रंभाभिर्गंधवारिभिः ॥२२॥
कुशोदकहिरण्योदकूर्चांबु विनियोजयेत् ॥ हविर्निवेद्य देवाय दत्वा दीपं च धूपकं ॥ स्नानवेद्यां ततो
लिंगं स्थाप्य संसेचयेच्छिवे ॥ सहस्रधाराकलशैः शतधारैरपीश्वरं ॥ २४॥ नानावादित्रघोषैश्च पु-
ण्यै रुद्रांबुसेचनैः ॥ सशांतिकः सचमको रुद्रो एकादशावृतः ॥ २५॥ जप्यो वै शांभवैः सार्धं एकद्वित्रि
क्रमादपि ॥ धूपयेद्दीपयेद्देवं ततै नी अभ्युक्षणे शिवे ॥ २६॥ भवायेति ततो ते च तर्पयेच्च कुशांबुभिः ॥ उद्वर्तयेत्सू-
क्ष्मवस्त्रैः पीठे स्थाप्य शिवं शिवे ॥२७॥ वस्त्रोपवीतं गंधं च भसितं च तथाक्षतैः ॥ अखंडतंडुला धौतास समुद्राः-
31 क्षालिताः शिवे ॥२८॥ दद्याल्लिंगे ततो भूष्यभूषणैर्हैमरत्नजैः ॥ शताष्ट बिल्वमालां च हैमीं वा कारयेच्छिवे ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजतींवायथा जोषं बिल्वपत्रेण केवलां ॥ कुटजं प्रंचंकं पद्मं सेवंतिपारिजातकं ॥ ३०॥ कुसुमैपूजयेद्देवि अपा
मार्गं तुमार्गके ॥ हविर्निवेद्यसापूपं भवायेतिचपूजनं ॥३१॥ निघनेत्यादिभिर्देवि बिल्वपत्रैश्चप्रक्षालितैः॥
उत्तराग्रैः पूजयेत्तं शिवमौलौ महेश्वरि ॥ ३२॥ सांम्राणिधूपैस्तत्रैवं धूपयेद्दीपयेच्छिवं ॥ ताबूलंचततोद
द्यात्मुखवासं फलानि च ॥ निवेदयित्वानीराज्यशताष्टवरदीपतः ॥ चंद्रखंडेन चततो चंद्रचूडशिखा
मणिं॥३४॥ भेरीमर्द्दलवीणादिशंखकाहलनिस्वनैः ॥ ऋक्सामयजुषाथर्वपौराणस्तुतिभिः शिवे॥
॥३५॥ छत्रंच चामरं शुभ्रं व्यजनादर्शकंध्वजं॥ निवेदयेत देवायप्रणामप्रक्रमं ततः॥३६॥ नर्त्तनंचप्रस्ता
दंचततोनाम्नार्चनं मम॥ मार्गशीर्षे विशेषेण मुक्तिमार्गप्रदायिनी ॥ ३७॥ स्तवंचतत्रवक्ष्यामि समा
215 हितमनाः शिवे ॥ विश्वेशः खंडपरशुः शिवः सीतांशुभूषणः ॥ ३८॥ अखंडनगकोदण्डः चंडिकेशप्रियो
हरः॥ गंभीरोगगनांतस्थः स्थाणुः सर्वशरीरिणः ॥ ३९॥ ऊर्ध्वरेतामहावीर्यो गणनाथोंबिकाप्रियः॥
जटाधरोंधकहरः त्रिशूली नीललोहितः॥ ४०॥ गरादनो विरूपाक्षः भवः संसाररोगहृत् ॥ वसनाद्रौ
भगाक्षिघ्नो वामनो मन्मथांतकः॥ ४१॥ भवामयहरो योगी कर्त्ता सर्वस्वतंत्रवान्॥ अणोरणीयान्वरदो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६४ महतोऽपि महत्तरः ॥ ४२ ॥ सर्वर्त्तुकारको धन्वी कंजजातोत्तमांगधृक् ॥ विष्णुनेत्राब्जपूज्यांघ्रिः मधुसूदनसूदनः ॥
॥ ४३ ॥ विचाररहितो मानी मनस्वी कालनाशनः ॥ सोमसूर्याग्निनयनो भीमो भव्ययुगांतकृत ॥ ४४ ॥ सरस्योधू-
म्रकेशांगो बभ्रुलुशो भयहारकः ॥ वाताशनधरो गर्तः कैलासनिलयः स्वराट् ॥ ४५ ॥ तुराषाट्पूजितपदो वे
दवाजिप्रियो युवा ॥ सनातनो दीनदयो वसुषेणः प्रसादकृत् ॥ स्तुतिप्रियो वास्तुपोऽथ हव्यकव्यभुगीश्वरः ॥
व्योमकेशो वामदेवो कृत्तिवासाः प्रभेदनः ॥ ४७ ॥ पशूनां पतिरातन्यो विघस्तासोमखांतकः ॥ आषाढः पार्वती
नाथो घोरो रुद्रो महेश्वरः ॥ ४८ ॥ कपालपाणिर्मृगधृक् पादुकापरपद्मधृक् ॥ वेनो वन्यो वैयुतात्मा गति
दो मुक्तिदायकः ॥ ४९ ॥ विषाभरणभूषाढ्यो मृडः परिवृढोंऽतकः ॥ पाशविच्छेदको देवो वेदगीतः पुरांतकः ॥ ५० ॥
विरागो विकटो मुंडः तंडुमीतो भयावहः ॥ विशालवक्षा भूषाढ्यस्त्रिपुंड्रललितालकः ॥ ५१ ॥ चक्षुःश्रवम-
हाहारो रुद्राक्षवलयोज्वलः ॥ गणाधिपो गव्हरेष्ठः शतधन्वा सहस्रधृक् ॥ ५२ ॥ एभिर्नामभिर्देवेशि मासि
बिल्वैः प्रपूजनं ॥ स्तवं च ते प्रवक्ष्यामि पुण्यं प्रियकरं मम ॥ ५३ ॥ शंभो मयस्कर हराम रघोरवीर गंगाधरप्र
३२ मथनाथ सनातनेश ॥ विश्वेश विश्व मदनांतक विश्वमूर्त्ते विश्वाक्ष विश्वमुखपाहि नमो नमस्ते ॥ ५४ ॥

नमामि शशिशेखरं पुरहरं च गंगाधरं ॥ विभूतिधरमीश्वरं गरधरं च विश्वेश्वरं ॥ हरामरवरं शिवं हरि
शराव शक्तं करांजलं धरयमीतकं सुरवरं नतोस्मीश्वरं ॥ ५५ ॥ शंभो सोमकलावतंस गिरिजावक्षोजदक्षा
यते त्र्यक्षा योक्षव हायदक्षमखहृत्क्षायरक्षांगधृक् ॥ पक्षींद्रप्रियवाहपूजितसुराध्यक्षाय मोक्षप्रदानं
गध्वांक्षवि सारिणो मयि दृशा त्वं पक्षपाताद्‌व ॥ ५६ ॥ नगकौदं हंसचण्ड दीधितवरस्फारोरुनेत्रज्वल ॥ च्चामुंडा
जनकोत्तमांगकलितागंगा रंयोल्लासित ॥ सोमोत्तंसमरीचिभिर्विकसितालोलत्पल स्राग्विणे ॥ पार
वार भवोरुसागर महाकल्लोलत्वलग्नं विभो ॥ भग्नं काम विषाग्निना जनिजरा नाशांबु मग्नं सदा ॥ मामा
मुद्धर देहि शंकरकरं संत्रावने किंकरं ॥ ५७ ॥ दीनावनप्रार्थितचारुदशा महेश श्रीव्योमकेश कुशकाशसम
246 र्चितांघ्रे ॥ कोशावकाशमहिमन्वरशेषभूष(पोषार्धकाय) मामाशुवीक्षय सुशिक्षय कामवर्गी ॥ ५८ ॥ स्तवेना-
नेन देवेशिस्तु वीत परमेश्वरं ॥ पौर्णम्यां शंभवैः सार्धं होमः कार्यो विधानतः ॥ ५९ ॥ चित्रंगो मिथुनं देयं सव
त्सं च सदक्षिणं ॥ स्वयं भुंजीत तस्यांते बांधवैः शांभवैः सह ॥ ६० ॥ मासं नक्ताशनो भूयाद् भवभक्तो जितेंद्रियः ॥
स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ॥ गीतवादित्रबहुलै रप्सरोगणनर्तनैः ॥ गंधस्रगनुलिप्तांगो दिव्या=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६५ दिव्याभरणभूषितः ॥ ६२ ॥ कांचनेनविमानेनयातिशंभोर्वरालयं ॥ चापस्थितेदिवानाथेतस्मिन्नुषसिपूज
नं ॥ ६३ ॥ कार्यंदेविप्रियकरं सदालिंगार्चनं मम ॥ समुद्गान्नं घृताक्तं च निवेद्यपरमेश्वरं ॥ ६४ ॥ यावन्मासं
विशेषेण पूजनं तत्प्रशस्यते ॥ शतवर्षासुयापूजा मासेनउषसि ध्रुवं ॥ ६५ ॥ तत्फलं लभते गौरि तस्मि-
न्मासे विशेषतः ॥ चापे रौद्रर्क्षके देवि पौर्णम्यां शशिशेखरं ॥ ६६ ॥ नृत्तमानं त्रयीनेत्रं कृशानुवरहस्तकं ॥
त्वया युक्तं विशेषेण भूषणं परमेश्वरं ॥ ६७ ॥ संपूज्य स्नापयेद्देवमभिषेचनकक्रमैः ॥ गंधं सुगंधमालिप्य
धूपदीपसुमैः शिवे ॥ ६८ ॥ नैवेद्यैः फलमूलैश्च हविषापूपसंयुतं ॥ दृष्ट्वा समुच्यते पापैः बुधिपूर्वकृतैरपि ॥
पुंडरीकपुरे वापि पश्येन्नृत्यंतमीश्वरं ॥ रौद्रार्क्षचापसंयुक्ते मास्यस्मिन्पौर्णिमातिथौ ॥ ७० ॥ स्नात्वाथ शिवगं-
गायां पश्येद्देवं पिनाकिनं ॥ ब्रह्महत्यादिभिर्मुक्तो भुक्तिं मुक्तिं च विंदति ॥ ७१ ॥ ईश्वरउवाच ॥ योमार्गशीर्षे
विधिशीर्षमालाचलत्तलद्वृक्षसमाईकर्षे ॥ संपूज्य तन्मासि मुदा ममेशि नृत्तं च संवीक्ष्य विमुक्तिमेति ॥
॥ ७२ ॥ योमार्गशीर्षविधिपूजनकृद्भवानि विमुक्तिमार्गं लभते मनुष्यः ॥ पुण्यैरपामार्गदलैर्मुदा युतो न दुर्ग-
33 मां याति गतिं मदाश्रयः ॥ ७३ ॥ इतिश्री शिवरहस्ये महादेवाख्ये एकादशांशे मार्गशीर्षार्चनं नामद्वाविंशो-
ध्यायः ॥ २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीकाशी विश्वेश्वरार्पणमस्तु॥ श्रीमहादेवायनमः॥ ईश्वरउवाच॥ पौषेपि शृणु मे मासि पूजनं सर्वकामदं॥ पुष्ये
चोषसि उत्थाय ध्यात्वा देवं त्रियंबकं॥ १॥ प्राङ्मुखोदङ्मुखो वापि वहिर्गच्छन्न दीक्षितः॥ सकमंडलु हस्तोथ सोदकं प्रावृ
तं शिरः॥ २॥ (+न) कुर्याच्चतुष्पथे नद्यां गोष्ठे कूपे पिवा भुवि॥ गुरुदेव द्विजाग्नीनां स्त्रीणां चैव तु सन्निधौ॥ ३॥ नाप्सु
मूत्र पुरीषाणि कुर्याद्विंडूष धावनं॥ स्वगृहाद्दक्षिणे देशे तृण प्रच्छादिते भुवि॥ ४॥ कुर्यान्मूत्र पुरीषाणि त-
तः शौचं यथारुचि॥ गंधलेपक्षयं नापि मनः पूतमथापि वा॥ ५॥ सक्षीरवृक्ष काष्ठैश्च दंतशोधनमाच-
रेत्॥ नदीह्रदनदे कूपे देवखाते तटाकके॥ ६॥ स्नायात्स मंत्रं सकुशं साक्षतं वारुणं जपेत्॥ त्रिवारमप्सु
निष्ठावान घमर्षणकृद्भवेत॥ ७॥ जपेद्रौद्राणि सूक्तानि अंभोलिंगानि वाशिवे॥ त्रिराचम्य शुचिर्देवान्
297 ऋषीन्पितृगणांस्तथा॥ ८॥ संतर्प्य तीरआगत्य धौतवस्त्र धरस्तदा॥ भस्मनां गानिसंमृज्य अग्निरि-
त्यादिमंत्रतः॥ ९॥ त्रियायुषेण मंत्रेण त्रिपुंड्रपरिधारणं॥ शिरो वक्षो ललाटे च बाह्वोरथ पि चंडिके॥
॥ १०॥ रेखासं सृष्टिविहितं कुर्वन्पापैः प्रमुच्यते॥ रुद्राक्ष धारणं कुर्यात्ततः संध्यामुपास्य च॥ ११॥ हुत्वान
नले च वैशाने स्मार्त्ते वापि यथाबलं॥ नदीनदाह्रदैः तोयैः स्वयं कुंभमपूरितैः॥ १२॥ वस्त्रपूतैस्तथा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६६ देविकुर्यात्संमार्जनं भुवि ॥ मार्जन्या सुक्ष्मया देवि लेपयेद्गोमयांभसा ॥१३॥ गंधचंदनतोयेन पूजास्थानं प्रसेचये
त् ॥ पद्मस्वस्तिकगोपद्मैः कुर्याद्वर्णकमंडलं ॥१४॥ पुष्पमालादिरचितं वितानाद्यैरलंकृतं ॥ मंडपं रचयेत्तत्र
धूपदीपविराजितं ॥१५॥ तस्मिन्पीठे पुष्परागलिंगं संस्थाप्य हैमजं ॥ यथाभिमतमीशानि तदग्रे कलशं
नव ॥१६॥ नदीतोयेन संपूर्णं धौतं पल्लव[illegible]शोभितं ॥ संस्थाप्य तत्र पात्राणि क्षालितानि प्रसेचयेत् ॥१७॥
गंधपुष्पांबुभिर्देवि पंचगव्यादिकं ततः ॥ सामान्यार्घ्यं विशेषार्घ्यौ शंखं पुष्पांबुपूरितं ॥१८॥ मधुपर्कं सापि
धानं क्षीराज्यदधिशर्करां ॥ क्षौद्रं फलोदकानीह गंधहेमकुशोदकं ॥१९॥ स्थाप्य पात्रेषु पुष्पाणि गंधधू-
पादि साक्षतान् ॥ स्वयं कुशासने स्थित्वा देवस्याग्रे महेश्वरि ॥२०॥ वरयेद्ब्राह्मणांस्तत्र संकल्प्य शिव-
पूजनं ॥ मासनाम च गौरीशं शिवं ध्यात्वा हृदंबुजे ॥२१॥ चंद्रगंगाधरं सौम्यं सोमकुंदद्युतिं शिवे ॥ त्रिलोच
नं नीलकंठं वरदाभयपाणिनं ॥२२॥ त्रिपुंड्रविलसत्फालं वासोलंकारभूषितं ॥ ब्रह्मविष्णवादिवंद्यांघ्रिं
तरुणं प्रियदर्शनं ॥२३॥ ध्यात्वा हृत्पद्मनिलयं देवदेवं पिनाकिनं ॥ पंचाक्षरं न्यसेद्देहे कृत्वा शैवीं तनुं
34 शिवे ॥ स्मरेत्पूर्वमृषिं छंदो देवता बीजमेव च ॥ शक्तिं च परमात्मानं रुद्रं लांच वरानने ॥२५॥ मंत्रेण पाणी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संस्पर्शेत्तलयोः प्रणवं न्यसेत् ॥ ॐकारं संपुटीकृत्य सर्वांगेषु च विन्यसेत् ॥ २६ ॥ करयोरुभयोश्चैव दशस्वं
गुलिषु क्रमात ॥ अंगुलीनां च सर्वासां तथा चाद्यंतपर्वसु ॥ सबिंदुकानि बीजानि पंचमध्यानि पर्वसु ॥
उत्पत्यादिषु भेदेन न्यसेदाश्रमतः क्रमात् ॥ उभाभ्यामथ पाणिभ्यां आपादतलमस्तकं ॥ २७ ॥ मंत्रेण संस्पृशेद्देहं प्र-
णवेनैव संपुटं ॥ मूर्ध्नि वक्त्रे च गुह्ये च हृदये हस्तपादयोः ॥ २८ ॥ कंठे चैव न्यसेदेवं प्रणवादि निभेदतः । कृत्वां
गन्यासमेवं हि मुखानि परिकल्पयेत् ॥ २९ ॥ पूर्वादिचोर्ध्वपर्यंतं नकारादि यथाक्रमं ॥ षडंगानि न्यसेत्पश्चाद्य
था स्थानं च भेदतः ॥ ३० ॥ प्रणवं हृदयं विद्यान्नकारः शिव उच्यते ॥ शिखा मकार आख्यातः शिकारं कवचं विदुः ॥
वकारो नेत्रमस्त्रं तु यकारः परिकीर्तितः ॥ इत्यंगानि विन्यस्य ततो वै बंधयेद्दिशः ॥ ३२ ॥ विघ्नेशो मातरो
२४७ दुर्गा क्षेत्रज्ञो देवता दिशः ॥ अग्नेयादिकोणेषु चतुष्वपि यथाक्रमं ॥ ३३ ॥ अंगुष्ठतर्जन्यग्राभ्यां संस्या
पसु मुर्ख्योर्द्धुभौ ॥ एवं न्यासं परं प्रोक्तं सर्वपापहरं परं ३४ ॥ सर्वसिद्धिकरं देवि सर्वरक्षाकरं शिवे ॥ न्य-
स्तमात्रेण देहे य शंकरमतिमो भवेत् ॥ ३५ ॥ न तं स्पृशंति पापानि न्यासादीशो विधानतः ॥ जपेत्पंचाक्षरं मं-
त्रं लब्ध्वाचार्यप्रसादतः ॥ ३६ ॥ आज्ञाप्रदक्षिणाहीनं श्रद्धाहीनमनात्मकं ॥ आज्ञाहीनं क्रियाहीनं मंत्रंजप्त्वाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६७ पिनिष्फलं ॥३७॥ पंचाक्षरस्य मंत्रस्य प्राणायाम उदाहृतः ॥ प्राणायामो भवेत्क्षिप्रं सर्वपापपरिक्षया ॥ ३८॥
इंद्रियाणां वशित्वाच्च तस्मात्प्राणांश्च संयमेत् ॥ गेहे जपे समं विद्याद्गोष्ठे शतगुणं भवेत् ॥ नद्यां शतसहस्रं
तु अनंतं शिवसन्निधौ ॥ अंगुलीजपसंख्यानमेकमेकं शुभानने ॥ ४०॥ रेखाभिर्द्विगुणं जप्यं पुत्रजीवैर्दशो-
त्तरं ॥ शतं वै शंखमणिभिः प्रवालैश्च सहस्रकं ॥ ४१॥ स्फाटिकैर्दश साहस्रं मौक्तिकैर्लक्ष उच्यते ॥ पद्माक्षै
र्दशलक्षं तु सुवर्णैः कोटि उच्यते ॥ ४२॥ कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं भवेत् ॥ पंचविंशतिमोक्षार्थी
सप्तविंशतिपौष्टिकं ॥ ४३॥ त्रिंशता धनसंपत्तिः पंचदश्याभिचारके ॥ तत्पूर्वाभिमुखं वश्यं दक्षिणं चाभि-
चारकं ॥ ४४॥ पश्चिमं धनदं विद्यादौत्तरं शांतिकं भवेत् ॥ अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ ४५॥ मध्य
मा धनदा शांतिं करोत्येषा ह्यनामिका ॥ कनिष्ठा रक्षणीयास्या जपकर्मणि शोभना ॥ ४६॥ यदुच्चनीचस्वरितैः
शब्दैः स्पष्टपदाक्षरैः ॥ मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ॥ ४७॥ हिंसेभ्यः सर्वयज्ञेभ्यो जपयज्ञो ह्यहिं
३५ सकः ॥ सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं ॥ ४८॥ उपगम्य गुरुं शांतं मंत्रतत्त्वार्थकोविदं ॥ तोषयेत्तं प्र
यत्नेन भावेन च धनेन च ॥ ४९॥ आददीत गुरोर्मंत्रं पुण्येऽहनि शुभर्क्षके ॥ वित्तशाठ्यं न कुर्वीत यदिच्छेत्सिद्धिमा-
त्मनः ॥ ५०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्चान्निवेदयेद्देवि आत्मानं सपरिच्छदं ॥ एवं तु षष्ठोथ स गुरुः शिष्यं संवत्सरोषितं ॥ ५१ ॥ परीक्ष्य दद्यान्मंत्रं च गु
रुर्मंत्ररहस्यवित् ॥ जपेत्त नित्यं संकल्प्य पुरश्चरणसिद्धये ॥ ५२ ॥ यावज्जीवं जपेन्नित्यं अष्टोत्तरसहस्रकं ॥
जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ॥ ५३ ॥ तद्दशांशं तर्पणं च होमं ब्राह्मणभोजनं ॥ एवं षडक्षरं जप्त्वा त-
स्मिन्मासि शिवार्चकः ॥ ५४ ॥ यो गुरुः स शिवः साक्षान्न तं दुह्यात्कदाचन ॥ पीठे लिंगं प्रतिष्ठाप्य स्नानं वै योगि
वं जपेत् ॥ ५५ ॥ पाद्यमाचमनं चार्घ्यं दद्यात्संचाक्षरेण तु ॥ मधुपर्कं पंचगव्यं मधुक्षीराज्यसद्दधि ॥ ५६ ॥ फल
साराणि देयानि गंधरत्नोदहेमजं ॥ कूर्चोदकं ततो दद्याद्गंधकर्पूरवासितं ॥ ५७ ॥ हविर्निवेद्य देवाय धूपं
दीपं च भावतः ॥ रुद्रैकादशकं जप्त्वा अभिषिंचेन्महेश्वरि ॥ ५८ ॥ शंभवे शुद्धनीरेण धारापात्रेण शं
249 करि ॥ भवायेत्यष्टभिर्देवि तर्पयेत कुशांबुना ॥ ५९ ॥ वस्त्रेणावेष्ट्य पीठस्यं कृत्वा लिंगं च साक्षतं ॥
गंधं चंद्रेण मिश्रं तु पुष्पाण्याभरणानि च ॥ ६० ॥ दत्वा धूपं च दीपं च नैवेद्यं च महेश्वरि ॥ तांबूलं फल
जालानि बिल्वैः पत्रैरथार्चयेत् ॥ ६१ ॥ नीराजयेत्ततो लिंगं चंद्रं दद्यान्मनःशिले ॥ छत्रं च चामरं देवि-
व्यजनादर्शकं तथा ॥ ६२ ॥ भेरीमर्दलशंखानी काहलादि विधाय च ॥ नाट्यं च वरनारीणां दर्शयेत सुह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पकं ।। ६७ ।। नामभिः पूजयेद्देवं बिल्वपत्रैश्च चंपकैः ।। ओं पंचाशच्छक्तिरूपाय पंचाशच्छक्तिमूर्तये ।। आत्मतत्त्वव अ॰ २४
६८ रिष्ठाय विद्यातत्त्वायते नमः ।।१।। शिवाय शिवतत्त्वाय अघोराय नमो नमः ।। अघोराख्याष्टतत्त्वाय द्वादशा
त्मस्वरूपिणे ।।२।। षट्प्रकारकृतत्वाय स्वशक्तिविहितात्मने ।। अनिर्देशादितत्त्वाय विद्युल्लयविरूपिणे
।।३।। विद्युदुत्कृष्टरूपाय स्थिरायानंतरूपिणे ।। अग्निवर्णायदेवाय अंबिकार्धशरीरिणे ।।४।। श्यामा
य शमरूपाय शक्तिदायामराय च ।। ज्येष्ठाय रुद्ररूपाय कामाय वरदाय च ।।५।। त्रिमात्राय ममिता
क्षाय अकाराय नमो नमः ।। द्वाविंशतत्त्वरूपाय उकाराय नमो नमः ।।६।। षोडशात्मस्वरूपाय उकाराय नमो नमः ।।
अष्टधात्मस्वरूपाय एकाराय नमो नमः ।।७।। ओंकाराय नमस्तुभ्यं चतुर्धा संस्थिताय च ।। गगनेशाय देवाय स्वर्गेशाय नमो नमः ।।८।।
मर्त्यलोकाय पाताल नरकेशाय ते नमः ।। अष्टक्षेत्राष्टरूपाय परापरतराय च ।।९।। सहस्रशिरसे तुभ्यं सहस्राक्षाय ते नमः ।। सह
स्रपादयुक्ताय शर्वाय परमेष्ठिने ।।१०।। नवात्मशक्तिरूपाय त्रिवर्णानां पतये नमः ।। पुनरष्टप्रकाराय तथाष्टाष्टकमूर्तये ।।११।। च-
तुःषष्ट्यात्मतत्त्वाय पुनरष्टविधात्मने ।।११।। गुणाष्टकप्रदानाय गुणिने निर्गुणाय च ।।१२।। मूलस्थाय नमस्तुभ्यं शाश्वतस्था
नवासिने ।। नाभिमंडलसंस्थाय हृदि निस्वनकारिणे ।।१३।। कंठदेशस्थिताये नतालु पृष्ठस्थिताय च ।। भ्रूमध्ये संस्थि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तायैव नाद मध्ये स्थितायच ॥१४॥ चंद्र बिंब स्थितायैव शिवाय शिवदे दिने ॥ वन्हिसोमार्करूपाय त्रिंशच्छक्तिस्वरूपिणे ॥
त्रिमात्रप्रणवायाय त्रिधामस्थितये नमः ॥ सदाशिवाय शांताय महेशाय पिनाकिने ॥१६॥ सर्वज्ञाय शरण्याय सद्योजा
तायते नमः ॥ अघोराय नमस्तुभ्यं वामदेवाय ते नमः ॥१७॥ तत्पुरुषाय नमस्तु भ्रमीशानाय नमो नमः ॥ अनंतेशाय सूक्ष्मा
य उत्तमाय नमो नमः ॥१८॥ एकाक्षाय नमस्तुभ्यं एकरुद्राय ते नमः ॥ नमस्त्रिमूर्त्तयेतुभ्यं श्रीकंठाय शिखंडिने ॥१९॥
अनंतासन संस्थाय सर्वदाय गदाभृते ॥ विमलाय विशालाय विमलांगाय ते नमः ॥२०॥ वेदागमार्थ रूपाय योगसांख्यरताय च ॥
योगसंस्थाय दिव्याय योगिने योगदायिने ॥२१॥ समस्त शोकसंहर्त्रे दृक्कुष्मातीतते जसे ॥ प्रलयहारायशुध्धाय यमाय निय
मायच ॥२२॥ ध्यानध्येयाद्यदूराय निर्व्यापारायते नमः ॥ अलिंगिने च लिंगाय लिंगस्थानायते नमः ॥२३॥ एवं नामभि
250 रेवेगशिपैषे संपूजयेच्छिवं ॥ स्तवंचते प्रवक्ष्यामि पुण्यं पापनिवारकं ॥ २४॥ दुर्वारिदुःखशमनाय भवौषधाय संसारवा-
रां निधितारकाय ॥ सर्वेश्वरायैव दयामयाय वेदांतवेद्याय नमः शिवाय ॥२५॥ जागृत्सुउत्पाद्यविदूरकाय सुस्वप्नदुःस्व
प्नफलप्रदाय ॥ वेदांतवेद्याय बलाबलाय वर्ष्यायरेष्माय नमः शिवाय ॥२६॥ उग्राय भीमाय सनातनाय रुद्राय देवाय
सदाशिवाय ॥ शिवाय शर्वाय हराय शंभो श्रीनीलकंठाय नमः शिवाय ॥२७॥ व्यालोरुमालाय पिनाकपाणये त्रिशूलहस्ता
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६९ यकपालमालिने॥ भवाय भव्याय दयाय माय भक्तानुरक्षाय नमः शिवाय ॥२८॥ सद्याय वामाय अघोर मूर्तये तत्पुरुषरूपाय चई-
पि शमूर्तये ॥ सर्वानुभाय जगत्स्वरूपिणे हेता पमे ध्याय नमः शिवाय ॥२९॥ स्तवमेतत्प्रयुंजीत पोषेषु शिप्रदं शिवे ॥ ह्या
दूनो मिथुनं रक्तं सवत्सं दक्षिणादिकम् ॥ शां भवेभ्य स्तपा हो मं कुर्यात्पर्वणि भोजने ॥ ब्राह्मणैर्बान्धवैर्देवि भुंजीतै
तैवं सनातनं ॥३१॥ राजते न विमानेन यात्यं ते मम संन्निधौ ॥ यस्त्वेतच्छृणुयान्नित्यं सोपि तत्फलमाप्नुयात् ॥ स्कंद उवाच ॥
पुष्ये विशिष्य शिवलिंग समर्चनेन तिष्यो त्भवं भयमुमेन लभेन्मनुष्यः ॥ आयुष्यमेति शतकं भुवि शंभुना मंघुष्य ग्र
याति सदनं मदनांतकारेः ॥३३॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे पुष्यमासार्चनं नाम त्रयोविंशोध्यायः ॥
॥२३॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ श्री ईश्वर उवाच ॥ माघमासार्चनं वक्ष्ये मघहारि महेश्व
रि ॥ तस्मिन्मासि शिवं पूज्य गाणपत्यमवाप्नुयात् ॥१॥ स्नानाद्दानार्चनाद्देवि विशिष्ट फलदायकः ॥ अगहा माघमा
सोयं विघसासी भवेन्निशि ॥२॥ माघकृष्णचतुर्दश्यामादिदेवो महेश्वरि ॥ शिवलिंगतपो भूतः पूजनान्मुक्तिदो नृणां ॥
तदा प्रभृति देवेशि माघकृष्णचतुर्दशी ॥ शिवरात्रिः समाख्याता प्रियेयं त्रिपुरद्विषः ॥ मासार्चनं प्रवक्ष्यामि त-
३७ त्रादौ सविशेषकः ॥ प्रातःस्नात्वा बहिर्देवि नद्यां वा देवखातके ॥५॥ माघे गर्जंति पापानि स्नानदानार्चनादिषु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विध्यास्नानं प्रकुर्वीत संतर्प्य च सुरान्पितॄन् ॥६॥ अग्निरित्यादिमंत्रैश्च भस्म धृत्वा यथाबलं ॥ त्रिपुंड्र धारणं कु-
र्यात्ततो रुद्राक्ष धारणं ॥ ७॥ पुष्पाणि बिल्वपत्राणि नदी जल सुपूरितं ॥ पल्लवाभिमुखं कुंभं स्वयमेव समा
हरेत् ॥ ८॥ कृतनित्य क्रियो धीमान् पूजास्थानं प्रविश्य च ॥ गोमयेनोपलिप्याथ कृत्वा मंडल वर्णकं ॥ ९॥ अष्टपत्रं
काढ्यं पंचवर्णैरलंकृतं ॥ वितान तोरणोपेतं मंडपं पुष्पमंडितं ॥ १०॥ कदलीस्तंभ विहितं कुर्यात्तत्र सपीठकं ॥ क्षालि
तानि च पात्राणि स्थापयान्यग्रे शिवस्य तु ॥ पुष्पांबु पूरितान्येव कुंभं शंखं न्यसेच्छिवे ॥ पाद्याचमन अर्घ्यं च पंचगव्य
सुपात्रकं ॥ ११॥ मधुपर्ककृतं पात्रं पुण्यं पंचामृतानि च ॥ क्षीराज्य दधि सुधिक्षौद्र शर्करा फल सारकं ॥ १३॥ नारिके
लाम्र फनस जंबीर कदली फलं ॥ स्नानानुगुणमीशानि कल्पयेद्गंध पुष्पकं ॥ १४॥ कुशरत्नादि हेमांबु कूर्चैर्दं सा
२९। धयेत्ततः ॥ शांभवान्वरयित्तत्रमासं संकल्प्य पूजने ॥ सूर्यकांतोद्भवं लिंगं स्थाप्य पीठे सव स्त्रकं ॥ पंचाक्षरं जपेद्धीमा
न् सहस्रं शतमेव च ॥ १६॥ ध्यायेद्देवं च चंद्रार्कसोमस्कंदं त्रिलोचनं ॥ सर्वाभरण संपन्नमुगटंक धरं शिवं ॥ १७॥
धूपदीपा दिकं तत्र रचयेत्सेचयेच्छिवे ॥ पाद्याचमनार्घ्यं च मधुपर्कं ततः परं ॥ १८॥ पंचामृतैः फल रसैः गंधपु-
ष्पांबुभिः शिवे ॥ अभिषिच्य विधानेन निवेद्य हविरुत्तमं ॥ १९॥ दत्वा दीपं च धूपं च तांबूलं शंभवे शिवे ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७० स्नानवेद्यां महालिंगं स्थाप्य नीरसुधारया ॥ २० ॥ शांभवैः सेचयेत्तत्र तीर्थैस्त्रिकसुवाद्यनैः ॥ सशांतिकः सचमको रुद्रस्सैका
दशावृतः ॥ २१ ॥ जप्यो महन्यास संयुतो एक द्वि त्रिक मैः शिवे ॥ भवांते चैव तत्रांते तर्पयेत्सु कुशांबुभिः ॥ २२ ॥ परिमृज्य ततो
वस्त्रैः पीठे संस्थाप्य शंकरं ॥ यज्ञोपवीतं वस्त्रं च भस्म गंधाक्षतैर्यजेत् ॥ २३ ॥ रत्नाभरणहेमादि बिल्वमालां च गोल
कं ॥ दद्यात्संपूजयेद्बिल्वैर्मंदारैः कर्णिकारकैः ॥ २४ ॥ धूपं दद्यात्सुगंधाढ्यं घृतदीपान्यथाविधि ॥ हविर्निवेद्य शर्वा
य सापूपं सोपदंशकं ॥ २५ ॥ तांबूलं फलजातं च दद्यान्नीराजनं शिवे ॥ कर्पूरखंडदीपं च छत्रव्यजनचामरे ॥ २६ ॥ पता
कं च तथादर्शं गीतं नाट्यं स्तुतिर्नतिः ॥ प्रदक्षिणा नर्तनं च कृत्वा नामभिरीश्वरम् ॥ २७ ॥ पूजयेद्बिल्वपत्राद्यैरेभिर्ना
मभिरेव हि ॥ तानि नामानि तेवच्मि स्तुतिं चैव महेश्वरि ॥ २८ ॥ ओं नमः शिवाय शर्वाय शंकरायार्तिहारिणे ॥ नमस्का
र्यार्य विश्वाय विष्णवे ब्रह्मरूपिणे ॥ २९ ॥ हिरण्यबाहवे साक्षाद्धिरण्यपतये नमः ॥ शर्वाय सर्वरूपाय पुरुषाय नमो
नमः ॥ ३० ॥ रुद्राय नीलरूपाय कद्रुद्राय प्रचेतसे ॥ कालाय कालरुद्राय तथा कालांगहारिणे ॥ मीढुष्टमाय देवाय शिपि
३२ विष्टायते नमः ॥ शं भवे धातवे चैव मन्यवे रुद्रमूर्तये ॥ ३२ ॥ नमः कपर्दिने तुभ्यं नीलकंठाय ते नमः । श्रीकंठाय महे
शाय भर्गाय च नमो नमः ॥ ३३ ॥ नमस्त्रीशूलहस्ताय उग्राय च नमो नमः ॥ भीमाय च मृगेंद्राय भीमरूपाय बंधवे ॥ ३४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भस्मदिग्धशरीराय दंडीमुंडीश्वराय च ॥ नमो ह्रस्वाय दीर्घाय वामनाय रुमे धसे ॥३५॥ अग्रे वधाय देवाय नमो
दूरे वधाय च ॥ धन्विने शूलिने तुभ्यं गदिने हलिने नमः ॥३६॥ चक्रिणे चर्मिणे तुभ्यं दैत्य दानव भेदिने ॥ सद्याय
हृद्य रूपाय पर्णशाय द्यायतेनमः ॥३७॥ सद्योजाताय वामाय अघोराय नमो नमः ॥ पुरुषाय पुरीशाय पुरुषार्थप्रदा
य च ॥३८॥ गव्हरेष्ठाय शिष्ठाय विशिष्ठाय नमो नमः ॥ परमेष्ठिने निरूपाय विश्वरूपाय ते नमः ॥३९॥ महा
ग्रासाय धीराय त्रिशुक्लाय सुवेश्मते ॥ ईशानाय नमस्तुभ्यमीश्वराय सुराय च ॥४०॥ ब्रह्मण्याय नमस्तेस्तु सु
ब्रह्मण्येश्वराय च ॥ ब्रह्मणे ब्रह्मरूपाय ब्राह्मणार्च्यपदाय च ॥४१॥ विश्वाधिकाय सूक्ष्माय पद्ममालधरा
य च ॥ श्वेताय हरिकेशाय नीलग्रीवाय हेतवे ॥४२॥ निषंगवर पृष्ठाय शरहेतिधराय च ॥ महादंष्ट्राय काला
252 य श्मश्रवे जटिलाय च ॥ तानाय लयमध्याय महाडमरुवादिने ॥ गरुडध्वज पूज्याय इज्याध्यक्षाय भातिने ॥
॥४४॥ विष्णुरक्तप्रपानाय मत्स्यमुंडधराय च ॥ कूर्मक्रोडास्थिमालाय नरसिंहाजिनावृते ॥४५॥ एभिर्नामभि
रीशानि पूजयेत यथाविधि ॥ शार्वं स्तवं प्रवक्ष्यामि तस्मिन्नास्ति महेश्वरि ॥४६॥ स्तुत्वानेन स्तवेने शिरु
द्रसारूप्यमाप्नुयात् ॥ वेदार्थाय महेश्वराय विधये सर्वाय सर्वेश्वराया धाराय गदाभृते वसुधृते व्योमाय =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७१ सामायते ।। सोमायाध्वरसंभृते करकृपातूर्णायतूर्णप्रभो ।। पर्णीहृत्कमलांतराय महसे देवाय तुभ्यं नमः ।। ४७ ।। विश्वाय-
स्तुतये भवाय भवते भावैकभव्यायते ।। भार्यार्धाकृतये भवाब्धिवडवाज्वालाय कालायते ।। मूलायप्रथिताय सो
मशकलालंकारमस्तायते ।। विश्वस्ताश्वसनाय घोरभवहृत्कांताय शांतायते ।। वेदांतप्रथितायतेऽद्य महसे घोरांत
कारायते ।। ४८ ।। स्मारमणसायकारुण्यपतिप्रसन्नेक्षणक्षपापतिकलाधरक्षपितपापतापायते ।। विशिष्टजन
रक्षणेक्षणविशिष्टतुष्टायते ।। सुकष्टमिदमद्य मे भवजदुष्टकष्टं हर ।। ४९ ।। भवान्नभयदोरिहाहरन्नरण्य
गण्योत्तमो ।। विगुण्यमपि मां विभो तव शरण्य पादे रतं ।। सदाकरुणया नयाशमनजातभीतिं हर हराय विभवा
धिकं ।। कुरु महेश मामर्भकं ।। ५० ।। श्रीस्कंद उवाच ।। इत्थं स्तुत्वाऽथ मां माघे पौर्णम्यां हि समाचरेत् ।। पूर्वोक्तक्र
मयोगेन शं भवे सहसादरं ।। दद्याद्गोमिथुनं देवि कपिलां च सवत्सकां ।। पौर्णम्यां च प्रकुर्वीत महेशे घृतकंब
लं ।। ५२ ।। लिंगं त्रिवेदपर्यंतं गव्येन सुघृतेन च ।। सप्तमां शोभिविधिः प्रोक्तो महेशे घृतकंबलं ।। ५३ ।। विधिनातेन
कुर्वीत महेशे घृतकंबलं ।। सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ।। ५४ ।। शिवरात्रिव्रतं वक्ष्ये शिवप्रीति
३P करं परं ।। अहोरात्रं माघमासि घृतधारां प्रकल्पयेत् ।। ५५ ।। धारारूपाणि पापानि विनश्यन्ति न संशयः ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दर्शनं स्पर्शनं लिंगे घृतस्नानं विशेषतः ॥ ५६ ॥ एवमेकगुणं ज्ञेयं ग्रहस्थे त्वेष्वतोधिकं ॥ सर्वाघौघहरो मासः माघोयं
पुण्यवर्धनः ॥ ५७ ॥ स्नानदानार्चनविधौ विशिष्टो भवतुष्टिदः ॥ प्रयागे तु विशेषेण मकरस्थे दिवाकरे ॥ ५८ ॥
गंगायमुनयोर्मध्ये मध्ये विध्यापि वर्जितः ॥ स्नानं दानार्चनं देवि श्राद्धेनानंत्यमश्नुते ॥ ५९ ॥ ईश्वर उवाच ॥ प्राज्याज्या
दिभिरीशलिंगमगजे योवाभिषिंच्याद्धा ॥ साम्राज्यं लभते किलैष भवहृच्चेज्यायुतानां फलं ॥ माघ्यां मासि मघर्क्ष-
लब्धशतभमतो मुक्त एवेह भक्तः ॥ कुर्याद्यो घृतकंबलं विधियुतं भुक्त्वैव भोगं भुवि ॥ विप्रानन्नवरैः सदक्षिणमुमे नक्ता
शनः शक्तियुक् ॥ ६० ॥ इति श्रीशिवरहस्ये एकादशांशे माघमासार्चनकथनं नाम चतुर्विंशोध्यायः ॥ २४ ॥ श्रीकाशीवि
श्वेश्वरार्पणमस्तु ॥ श्रीमहादेवाय नमः ॥ ईश्वर उवाच ॥ फाल्गुने मासि संप्राप्ते शिवं भागवतः स्मरन् ॥ न-
253 दीनदतडागेषु देवखातोदकेषु च ॥ १ ॥ सकुशं साक्षतं स्नायाद्वारुणैर्मंत्रलिंगकैः ॥ कुशाक्षतकरो देवि संतर्प्य
चसुरान्पितॄन् ॥ २ ॥ भस्म धृत्वा त्रिपुंड्रं च कृत्वा रुद्राक्षधारणम् ॥ होमं च हावयेद्देवि स्वयं वा श्रुतिदर्शितं ॥ कृतनि
त्यक्रियो विद्वान् सपुष्पांबुकुशादिकं ॥ समाहृत्य विशुध्यं च उदकुंभोदकं शुभं ॥ ३ ॥ उपलिप्य शुभं देशं रंगवल्या
द्यलंकृतं ॥ वितानतोरणोपेतं मंटपं तत्र कारयेत् ॥ गंधं दीपं च धूपं च पुष्पाणि विमलान्यपि ॥ स्थापयेद्बिल्वप=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्राणि फलमूलानि तत्र हि ॥ ६ ॥ अक्षता धवलाः तत्र शालितंडुलजाः तिलैः ॥ मिश्री कुर्याच्च गंधांबु पूरितं च घटं नवं ॥
७२ ॥ ७ ॥ पाद्यार्घ्याचमनीयानि स्थाप्य पात्राणि शंकरि ॥ पंचामृतं पंचगव्यं दधिक्षीराज्य सन्मधु ॥ ८ ॥ सुशर्करं
फलोदं चरं भाम्रफनसं शिवे ॥ जंबीरसारं गंधोदं हेमरत्नकुशोदकं ॥ संपाद्य दीपानुद्बोध्य वरये च्छांभ
वाँस्ततः ॥ संकल्प्य पूजयेद्देवं मासं नक्ताशनः स्थिरं ॥ १० ॥ पंचाक्षरं च प्रजपेत्सहस्राष्टोत्तरं शतं ॥ ध्यायेद्
हृदा महादेवं सांबं चंद्रकलाधरं ॥ ११ ॥ त्रिनेत्रं नीलकंठं च वरदाभयपाणिनं ॥ शाश्वतं शंकरं देवि हृत्पद्म
सदनस्थितं ॥ १२ ॥ चंद्रकांतमयं लिंगं स्थाप्य पीठे सपुष्पकं ॥ दद्यात्पाद्यं ततोर्घ्यं च मधुपर्कं महेश्व-
रि ॥ क्षीरेण दध्नाऽज्येनापि मधुना सितया शिवं ॥ अभिषिच्य फलोदैश्च गंधैः हेमकुशोदकैः ॥ १४ ॥
दत्वा धूपं च दीपं च नैवेद्यं किंचिदेव हि ॥ उद्धृत्य शिवलिंगं च स्नानवेद्यां निधाय च ॥ १५ ॥ सपुष्पमौलि लिं
गं च स्नानवेद्यां निधाय च ॥ सुपुष्पमौलिं देवे शिरुद्रैकादशसंख्यया ॥ १६ ॥ गोशृंगधारापात्रेण सेचये-
च्छांभवैः सह ॥ स्नानकाले महेशस्य वादित्राणि विधाय च ॥ शंखकाहलभेर्यादि वेणुवीणादिनिस्वनं ॥
४० भवायेति ततोंऽते हितर्पयेद्रुद्रनामभिः ॥ १८ ॥ संमृज्य वाससा देवि लिंगं मंगलदं मम ॥ वस्त्रोपवीतगंधाद्यैः सुभस्मभर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णार्पणं ॥ १९ ॥ पलाशबिल्वमंदारैः पूजयेद्दलैः शिवे ॥ धूपं गुग्गुलुसंयुक्तं साज्यं देयं महेश्वरि ॥ २० ॥ घृतदीपान्समुद्बो-
ध्य हविः क्षीरेण पाचितं ॥ मंडकाः फेणिकापूपं निवेद्यस घृतं शिवे ॥ २१ ॥ दद्याच्चैव सुतांबूलं पानकं तक्रमेव वा ॥ गी-
तं नाट्यं च वाद्यानि नीराजनपुरःसरं ॥ २२ ॥ चंद्रदीपं ततो दद्याच्छत्रं चामरयोर्युगं ॥ व्यजनादर्शकं तत्र प्रदक्षिण
नमस्क्रियाः ॥ २३ ॥ स्तुतिं च नर्तनं देवि यथा भक्तिसमाचरेत् ॥ तत्र नामानि वक्ष्यामि शृणु त्वमपीश्वरि ॥ २४ ॥
फाल्गुने फल्गुपापेभ्यो मुच्यते नाम पूजया ॥ बिल्वपत्रेण देवेशि मासोयं शिवतुष्टिदः ॥ २५ ॥ ओं नमः शिवाय शां-
ताय सहमानाय शंभवे ॥ भवाय शिवरूपाय शतावर्त्तीयवे धसे ॥ २६ ॥ दुंदुभ्याय वरेण्याय शरण्याय पिनाकिने ॥
योगिने ध्यानगम्याय रम्याय गुरवे नमः ॥ २७ ॥ अवसान्याय वन्याय आहनन्याय ते नमः ॥ काम नाशाय वासाय-
258 हरणाय विसारिणे ॥ २८ ॥ नमोस्तु ते महेशाय नमः शांततमायते ॥ प्रधान पुरुषेशाय योगाधिपतये नमः ॥
नमस्त्रिकाग्निकालाय त्र्यंबकाय पिनाकिने ॥ नमः कालाय रुद्राय महासत्राय शूलिने ॥ ३० ॥ नमो धूर्जटये तु-
भ्यं जटिलाय कशाय च ॥ नमो मेध्याय भेद्याय भववैद्याय बंधवे ॥ ३१ ॥ नमस्त्रिमूर्त्तये तुभ्यं ब्रह्मणो जनका-
य च ॥ ब्रह्मादिपतये तुभ्यं ब्रह्मविद्याधिपाय च ॥ ३२ ॥ विष्णोश्च जनकाय प्रकल्पकाय [illegible] नकाय च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७३ नमो वेदरहस्याय हर्षतर्षायते नमः ॥ ३३ ॥ वेदवेदांतसाराय सुपाराय नमो नमः ॥ अतीतानागतज्ञायवर्त्तमानाय अ॰ २५
बृंहते ॥ ३४ ॥ मेरु कोदंडहस्ताय गंगा मस्ताय धारिणे ॥ नमो बुधाय शुद्धाय मेध्याय परमात्मने ॥ ३५ ॥ भूतना
थाय भव्याय हव्यकव्यभुजे नमः ॥ नमो दिग्वाससे तुभ्यं दंडिने मुंडिने नमः ॥ ३६ ॥ अनादिमलहीनाय ज्ञान
गम्याय ते नमः ॥ प्रधान परमाण्वादि मूर्त्तयेऽनंतशक्तये ॥ ३७ ॥ विचित्रमहिमाधार स्वरूपाय नमो नमः ॥
भूम्ने सीम्ने वेदधाम्ने व्योम्ने साम्ने नमो नमः ॥ ३८ ॥ नमस्ताराय तीर्थ्याय सर्गादिपरमाय च ॥ नमः पा-
र्याय वार्याय शर्वाय प्रतिमाय च ॥ ३९ ॥ कुकुटाय विशेषाय मध्यांतरहिताय च ॥ प्रसन्नाय परायाथ कामां
गाय सुरतसे ॥ ४० ॥ गर्जते तर्जते चैव मार्जते ब्रह्मरूपिणे ॥ ऊर्जाय फालनेत्राय दुर्गगम्याय भावने ॥ ४१ ॥
नाट्याय तरुणायाथ कारणाय नमो नमः ॥ नमो धर्मादिगम्याय विरागाय सुरागिणे ॥ ४२ ॥ नमस्ते निष्प्रपंचा-
य निराभासाय ते नमः ॥ ब्रह्मणे विश्वरूपाय सनातन्याय मन्यवे ॥ ४३ ॥ पतीनां पतये चैव कारणाय च का
रिणे ॥ नमः पारदवीर्याय दुर्गार्तिशमनाय च ॥ ४४ ॥ एभिर्नामाभिरेवेशि संपूज्य कुसुमैः शिवे ॥ स्तवमे-
तत् प्रयुंजीत शर्वप्रीतिकरं मम ॥ ४५ ॥ देवादिदेव गिरिजायुतवामभाग भोगिप्रियाभरणकारणतारणेश ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्योमादिसंवरणसत्प्रणवानुमेयमायाविहीन भगवन्सततं नमस्ते ॥४६॥ विश्वप्रभाभसित धूसरकामकारां-
नीतांगसंगकुसुमांगपिनाकसंग ॥ गंगावतंस भगणाधिपनेत्रपद्म मित्रत्रिनेत्र भगवन्सततं नमस्ते ॥४७॥ कृपी
टापीडोर्ध्वप्रकटतर विश्वांतक विभो महाभर्गस्वर्गे विनिहतसुराश्चासुरगणाः ॥ नमन्त्ये चान्यां स्तन्त्वन तिर
हितानन्यसुकृतान् नतोहन्याम्य द्वाशिवनर शरण्यं तव पदं ॥४८॥ हे भर्गशंकर महेश पिनाकपाणे गंगाधरांत-
कहराम रधीरवीर ॥ हारीकृताहीन विभो समान मानादिमेय रहितामल पाहि हीने ॥४९॥ त्वय्येव सृष्ट
माखिलं त्वयि लीनमेतत्संकल्पशिल्प माखिलं भवजाल मीश ॥ भूतं भवज्जनन संस्थितिनाश विवर्तमान ॥
मेतन्नु वोदरगतं परिपाहि शंभो ॥५०॥ स्तवमेतत्प्रयुंजीत फाल्गुने मासि सत्तमे ॥ हृत्तमोनाशकं देवि पुण्य
255 मायुष्यवर्धनं ॥५१॥ एकवारं त्रिवारं वा पूजयेदिंदुशेखरं ॥ सर्वेष्वपि च मासेषु दद्याद्गोमिथुनं सितं ॥५२॥
सदक्षिणं सवस्त्रं च सतांबूलमुमापतेः ॥ प्रीतये शंभवे ष्वेव दापयेच्छिवपूजकः ॥५३॥ मासि तस्मिन् शि-
वे पूर्णे पर्वण्येव समाहितः ॥ मधुकंबलमीशाय कृत्वा पापैः प्रमुच्यते ॥५४॥ घृतकंबलमानेन वैशाखे दधि
कंबलं ॥ कृत्वा पापैः प्रमुच्येत शिवस्याति प्रियो भवेत् ॥५५॥ मधुकंबलकं कुर्यात्फाल्गुने पापहारि तत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७४ पूजाविशेषं मासेषु कथितं प्रीतिदं मम ॥५६॥ यत्कृत्वा मनुजः सद्यो मुच्यते भवबंधनात् ॥ समुच्चयस्तुवीते-
वं सर्वेष्वपि महेश्वरि ॥ ५७॥ स्तुवीत परया भक्त्या देवदेवं महेश्वरं ॥ त्वय्येव सृष्टमाखिलं त्वय्येव सकलं स्थितं ॥
॥५८॥ त्वया संह्रियते विश्वं प्रधानपुरुषांतकं ॥ त्वमेव पुरुषोऽनंतः प्रधानं प्रकृतिस्तथा ॥ ५९॥ भूमिरापोनलो
वायुः व्योमाहंकारमेव च ॥ यस्य रूपं नमस्यामि भवं त्वां ब्रह्मसंज्ञितं ॥ ६०॥ यस्य द्यौरभवन्मूर्धा पादौ पृथ्वी
दिशो भुजः ॥ आकाशमुदरं तस्मै विराजे प्रणमाम्यहं ॥६१॥ संतापयति यो नित्यं स्वभा॰ भिर्भासयन्
न् दिशः ॥ ब्रह्मतेजोमयं विश्वं तस्मै सूर्यात्मने नमः ॥६२॥ हव्यं वहति यो नित्यं रौद्री मग्निमयी तनुः ॥ कव्यं
पितृगणानां च तस्मै वन्ह्यात्मने नमः ॥६३॥ आप्याययति यो देवान् स्वधाम्ना सकलं जगत् ॥ सोमः सोमात्म
ने तुभ्यं ओषधीशात्मने नमः ॥६४॥ विभर्त्यशेषभूतानि योंतश्चरति सर्वगः ॥ शक्तिर्माहेश्वरी साक्षात्तस्मै
वाय्वात्मने नमः ॥६५॥ सृजत्यशेषमेवेदं यः स्वकर्मानुरूपतः ॥ स्वात्मन्येवं स्थितं चैतच्चतुर्वक्त्रात्मने नमः
॥६६॥ यः शेतेऽप्सु शिवं ध्यात्वा पालयन्जगदव्ययः ॥ तस्मै विश्वात्मने तुभ्यं विष्णवे पालनात्मने ॥६७॥ यः
संहरेज्जगज्जालं शूलेनैकेन शांकरि ॥ तस्मै रुद्रात्मने तुभ्यं नमस्तेऽस्तु पिनाकिने ॥६८॥ यं विनिद्रा जित=



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वासा पश्यंति परमेश्वरं ॥ ज्योतिः पश्यंति युंजानाः तस्मै सर्वात्मने नमः ॥६९॥ इति स्तवं प्रयुंजीत सर्वमासेषु शांक-
रि ॥ मास पूजामिमां कृत्वा संवत्सर मतं द्रितः ॥७०॥ न स भूयोभिजायेत संसारे दुःखसागरे ॥ ईश्वर उवाच ॥
यः फाल्गुने मासि शिवार्चको नरो न फल्गु पापैर्भयमेति शंकरि ॥ संवृत्ता ते नाम शिस्य यानैः न चांतिमलयो
निमवाप्य मोदते ॥७१॥ मधुकंबल कृत्तु फाल्गुने वर पर्वण्यगजे धुनोति पापं ॥ मुखमेतत्किल हायनस्य गौरि ॥
प्रथिता पौर्णमसि विशिष्ठ मासि ॥७२॥ ॥७२॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे फाल्गुनमासा
र्चननाम पंचविंशोध्यायः ॥२५॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ श्री स्कंद उवाच ॥
शृणु गुह्यतमं पुण्यं सर्वसिद्धिप्रदायकं ॥ देव्यै देवेन कथितं मासार्चन विधिक्रमं ॥१॥ कर्तुरप्यधिकं पु
२५० ण्यं लभते श्रावको नरः ॥ यदि भक्तो महादेवे श्रुत्वा वापि विमुच्यते ॥२॥ यतस्त्वं शिव भक्तेषु श्रेष्ठः स्तस्मा
द्वदा - मिते ॥ चतुर्दश्यामथाष्टम्यां पक्षयोः कृष्णशुक्लयोः ॥३॥ योऽह्नमेकं न भुंजीत शिवार्चनरतः शुचिः ॥
यत्पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां ॥४॥ सत्यवादिषु यत्पुण्यं यत्पुण्यं तीर्थगामिनां ॥ अग्निहोत्रेण
यत्पुण्यं यत्पुण्यं यज्ञयाजिनां ॥५॥ तत्पुण्यं सकलं प्राप्य शिवलोकं स गच्छति ॥ नक्तं शक्तोपि कुर्वीत भवभ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७५ क्तोजितेंद्रियः ॥६॥ पृथिवीं भाजनं कृत्वा भुंक्ते पर्वसु यो नरः ॥ अहोरात्रेण चैकेन त्रिरात्र फल मश्नुते ॥७॥
द्वयोर्मासस्य चाष्टम्यां भूतयोरपि भक्तिमान् ॥ शिवमभ्यर्च्य विधिवन्निशि बिल्वैश्च पंकजैः ॥ सोपवासः
सुगंधांगः शयीत प्रियया सह ॥ शेते निश्चल चित्तो यो रतिराग विवर्जितः ॥९॥ शिवैकगत चित्तस्य तस्य पुण्य
फलं शृणु ॥ दिव्यवर्षसहस्राणि दिव्यवर्षशतानि च ॥१०॥ तपस्तप्तं महत्तेन, संशयः ॥ भवभक्तश्च पूता-
त्मा यद्यपि स्यात्सुपापकृत् ॥११॥ विधूय पापकलिलं शिवलोके महीयते ॥ सर्व मासेषु पुण्यात्मा पक्षयोः
शुक्लकृष्णयोः ॥१२॥ शक्तोपि भवभक्तो यो मुक्तो नक्ताशनो भवेत् ॥ इह भोगमवाप्नोति परत्र च परां गतिं
॥१३॥ शिवलोके वसेन्नित्यं शिववत्संवृतो गणैः ॥ योऽब्द मेकं न भुंजीत शक्तो नक्तं च पर्वणि ॥१४॥ ब्रह्मचारी नि-
तक्रोधो भस्म रुद्राक्ष भूषणः ॥ शिवलिंगार्चनरतो विरक्तो विषयेषु च ॥१५॥ संवत्सरांते विप्रेंद्रान् शिवभक्तान्सदक्षिणं ॥
भोजयित्वा ततो भूयात्प्रीयतामिति वै शिवः ॥१६॥ भोजयेद्यदि विद्वांसं कपालव्रत धारिणं ॥ भस्माभ्यक्त शुचिं शांत
मुमांकांतरतं द्विजं ॥ भोजितास्तेन देवेशा ब्रह्म विष्णु महेश्वराः ॥ कपालपूर्णमशनं भैक्ष्यं यो यस्य गृह्णते ॥१८॥
४३ कुलं तस्योद्धरत्येव दश पूर्वान्दशापरान् ॥ पाद्याचमनीयानि गंधपुष्पैः प्रपूजयेत् ॥१९॥ पर्वस्वपि विशेषेण भोज=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येच्छिवयोगिनं ॥ पूजितः सशिवः साक्षात् यत्र शैवं प्रपूजयेत् ॥ २०॥ शिवव्रतेषु सर्वेषु नक्तभोजनमुत्तमं ॥ उपवासा
त्परं भैक्ष्यं भैक्ष्यात्परमयाचितं ॥ २१॥ अयाचितात्परं नक्तं तस्मान्नक्तेन वर्त्तयेत् ॥ आमासोमान्विता या सा तस्यां
नक्तं समाचरेत् ॥ २२॥ मुहूर्त्तोनं दिनं नक्तं न, नक्तं निशि भोजनं ॥ देवैस्तु भुंक्ते पूर्वाह्ने, मध्यान्हे ऋषिभिस्तथा
॥ २३॥ अपराण्हे तु पितृभिः, संध्यायां गुह्यकादिभिः ॥ सर्वां वेलामतिक्रम्य, नक्तभोजनमाचरेत् ॥ २४॥ शिव
क्षेत्रेषु सर्वेषु वर्षं नक्ताशनो भवेत् ॥ अविमुक्ते विशेषेण, यावज्जीवं प्रतिज्ञया ॥ २५॥ भस्मोद्धूलितसर्वांगो
भवेन्नक्ताशनो सदा ॥ हविष्य भोजनं स्नानं सत्यमाहारलाघवं ॥ २६॥ शिवाग्निकार्यं लिंगार्चा न [illegible]क्तभो
जी समाचरेत् ॥ कृष्णाष्टम्यां चतुर्दश्यां सोमवारे प्रदोषके ॥ सर्वमासेषु सर्वत्र विधिर्नक्ताशनस्य हि ॥ -
57
तत्रापि च शिवक्षेत्रे अविमुक्ते च नैत्यकः ॥ २७॥ जाबालोक्तो विधिः साक्षान्नक्ताशी मुक्तिमाप्नुयात् ॥ भस्मनिष्ठो
लिंगरतो यां गतिं लभते मुने ॥ न तां गतिमवाप्नोति वेदवेदांतवेद्यपि ॥ मार्गशीर्षे शुभे मासि शंकरं तु समर्चयेत् ॥ ३०॥
(पाठे s)
पीत्वा तु भक्त्या गोमूत्रं अनाहारो निशि स्वपेत् ॥ अतिरात्रस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ ३१॥ एवं पुष्येपि संपू
ज्य पुष्पैः शंभुं निशि द्विज ॥ कृष्णाष्टम्यां घृतं प्राश्य वाजपेयाष्टकं लभेत् ॥ ३२॥ माघमासे तु संप्राप्ते कृष्णाष्टम्यां =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अ॰ २६

७६ म पूजयेत् ॥ यवांश्च संक्लिन्नान्प्राश्य सोऽश्वमेधफलं लभेत् ॥ ३३ ॥ कालाष्टम्यां तथा काश्यां भैरवं पूजयेन्नरः ॥ वि-
श्वेश्वरार्चनरतो बिल्वपत्रैश्च कोमलैः ॥ ३४ ॥ हविर्निवेद्य साऽपूपं माषापूपांश्च सत्तम ॥ शताष्टोत्तरसंख्याभिः
भैरवं चापि पूजयेत् ॥ ३५ ॥ गंधपुष्पैस्तथा धूपैः काशीनिर्विघ्नकारिणं ॥ प्रतिमासं कृष्णपक्षे शिवरात्रिं-
च सत्तम ॥ ३६ ॥ पूजयेदविमुक्तेशमन्यक्षेत्रेऽपि वा शिवं ॥ माघ्यां कृष्णचतुर्दश्यां पूजयेदिंदुशेखरं ॥ ३७ ॥
चैत्रे त्रिनेत्रनामानं पूजयेत्परमेश्वरं ॥ द्वादशाहक्रतुफलं लभते सोऽचिरान्मुने ॥ ३८ ॥ वैशाखे शिवना-
मानं पूज्य रात्रौ कुशोदकं ॥ पीत्वा पुरुषमेधस्य फलमष्टगुणं लभेत् ॥ ३९ ॥ ज्येष्ठे पशुपतिं पूज्य गवां शृंगोद-
कं पिबेत् ॥ गवां कोटिप्रदानस्य यत्फलं तदवाप्नुयात् ॥ ४० ॥ आषाढे चोग्रनामानं दृष्ट्वा प्राश्य च गोम-
यं ॥ सौत्रामण्ययुतस्यैव स फलं प्राप्नुयान्नरः ॥ ४१ ॥ श्रावणे शर्वनामानं पूज्य पर्णानि भक्षयेत् ॥ वर्षकोटिशतं सा-
ग्रं सूर्यलोके महीयते ॥ ४२ ॥ मासे भाद्रपदेऽष्टम्यां त्र्यंबकं नाम पूजयेत् ॥ प्राश्य बिल्वफलं पक्वं सत्रयागफलं ल-
भेत् ॥ ४३ ॥ मासे चाश्वयुजेऽष्टम्यां ईश्वरं नाम पूजयेत् ॥ पौर्णमास्यामाश्वयुज्यां च अश्विन्यर्क्षे प्रदोषके ॥ ४४ ॥ अं-
७४ धसां राशिभिर्लिंगं छादयेद्धाम मार्गिकं ॥ सिक्थे सिक्थेऽश्वमेधस्य फलमाप्नोति मानवः ॥ ४५ ॥ तंडुलोदकमापी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतस्मीन्मासि शिवार्चकः ॥ पौंडरीकाख्यकस्यैवं फलं च सकलं लभेत् ॥ कार्त्तिके रुद्रनामानं पूज्य पीलाकुशो
दकं ॥ अग्निष्टोमादिदशकं फलं प्राप्य विमुच्यते ॥ ४७ ॥ मार्गशीर्षे महादेवं उग्रनाम्ना प्रपूजयेत् ॥ स उक्थ्य दश
कस्यैव फलं लभ्येत चांबुपः ॥ ४८ ॥ पुष्यमासेषु संप्राप्ते यः कुर्यान्नक्तभोजनं ॥ शिवार्चनरतो धीमान्फलमूलेन
वर्त्तयेत् ॥ अप्तोर्यामायुत फलं प्राप्नोत्येव विशेषतः ॥ माघमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनं ॥ ५० ॥ कृ-
सरं मधुसंयुक्तं भुक्त्वा संपूज्य शंकरं ॥ सषोडशीशत फलं प्राप्नोत्यमर पूजितः ॥ ५१ ॥ संप्राप्ते फाल्गुने
मासि नक्ताशी शिवपूजकः ॥ श्यामाकक्षीरनीवारैः जितक्रोधो जितेंद्रियः ॥ ५२ ॥ अत्यग्निष्टोमदशकं फलं ल-
भ्येच्छिवप्रियः ॥ सोपवासं चतुर्दश्यां भवेदुभयपक्षयोः ॥ शिवाय पौर्णमायां तु यो दद्यात्घृतकंबलं ॥ माघ्यां
258 मघायुतैर्युक्तो भवेदेव महामुने ॥ ५४ ॥ मासद्वादशमेवं स्यात्पूजयेच्छशिशेखरं ॥ वर्षांते भोजयेद्विप्रान्शि
व भक्तान् जितेंद्रियः ॥ पायसं मधुसंयुक्तं घृतेन च परिप्लुतं ॥ भक्त्या हिरण्यवासांसि भक्तेभ्यो यो निवेदयेत् ॥
वर्षमेकं चरेदेवं नैरंतर्येण यो नरः ॥ वर्षयज्ञ फलं लब्ध्वा शिवक्षेत्रे विमुच्यते ॥ अविमुक्ते तु नियतमेवं कु-
र्याद्व्रतं चरेत् ॥ जितेंद्रियः सत्यवादी वित्तशाठ्य विवर्जितः ॥ ५५ ॥ देहांते शिवसारूप्यं लभेत पुण्यफलं शृणु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२७ सूर्यकोटिप्रतीकाशैर्विमानैः सार्वगामिकैः ॥ ५९॥ रुद्रकन्यासमाकीर्णैः महावृषभसंयुतैः ॥ संगीतनृत्यवाद्याद्यैरप्स
रोगणशोभितैः ॥ ६०॥ चामरैर्धूयमानश्च स्तूयमानः सुरासुरैः ॥ गत्वा शिवपुरं दिव्यं वसेदाभूतसंप्लवं ॥ ६१॥ ज्ञा
नं लब्ध्वा शिवमुखात्सतत्रैव विमुच्यते ॥ वसंते किंशुकैः पूज्य दमनैर्मदनार्द्दनं ॥ ६२॥ गोष्ठोमफलमाप्नोति—
ग्रीष्मे ह्यपि महेश्वरं ॥ मल्लिकाभिः समभ्यर्च्य नरमेधफलं लभेत् ॥ ६३॥ वर्षासु कुटजैः पूज्य शिवं सत्र फलं लभे
त् ॥ शरत्सु च महादेवं पारिजातैः समर्चयेत् ॥ ६४॥ गवामयुतयज्ञस्य फलं लब्ध्वा विमुच्यते ॥ उमाकांतं च हेमंते
मंदारैश्च समर्चयेत् ॥ ६५॥ कर्णिकारैः साग्निचित्यक्रतोः फलमवाप्नुयात् ॥ शिशिरे करवीरैश्च सितरक्तैः समर्च
यन् ॥ ६६॥ दशरात्रफलं लब्ध्वा मोदते शिवसन्निधौ ॥ कृष्णाष्टम्यां सर्वमासि अविमुक्ते विशेषतः ॥ भैरवं पूज
येद्भक्त्या स्रग्गंधाभरणार्पणैः ॥ हविषा वापि तांबूलैर्माषापूपैः समर्चयेत् ॥ ६७॥ काश्यां निर्विघ्नवासाय भौ
माष्टम्यां विशेषतः ॥ संपूज्य संस्तुवीतैवं काश्यां श्रीकालभैरवं ॥ ६९॥ परेतभूतवेतालकरतालसमन्वितं ॥ प्र-
वृत्तितमहानृत्यं कलये कालभैरवं ॥ ७०॥ कपालमालिकाकंठं ज्वलत्पावकलोचनं ॥ कपालकरमत्युग्रं कलये
४५ कालभैरवं ॥ ७१॥ मणिपादुकपादाब्जं महाशूलकरांबुजं ॥ कंपाकंचुकसंक्रांतं कलये कालभैरवं ॥ ७२॥ दिगंबरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जपावर्णं जरामरणवर्जितं ॥ चारुचंद्रजटाजूटं कलये कां ॥७३॥ बालभानुप्रभाकारं नीलकोमलकुंतलं ॥ ~~[illegible]~~
ज्वलद्दंडकपालाढ्यं कलये कां ॥७४॥ सुरारिवनदावाग्निं सुरकैरवशीतगुं ॥ शिवाज्ञयाकारिणं साक्षात्कलये-
कां ॥७५॥ यस्याज्ञया जगत्सर्वं स्थावरं जंगमात्मकं ॥ वर्त्तते निर्भयं कालरूपं कं ॥७६॥ यइदं कालनाथस्य प-
ठेद्भक्त्याष्टकं नरः ॥ स एव लभते काशीं निर्विघ्नेन शिवाज्ञया ॥७७॥ तत्रैव वसते जंतुः पूजनात्स्तवनेन च ॥ ॥
॥ श्रीस्कंद उवाच ॥ ॥ इत्येव ते समाख्यातो मासार्चनविधिक्रमः ॥ यावज्जीवं द्वादशाब्दं त्रिवर्षं वर्षमेव वा ॥७८॥
काश्यामन्यत्र वा क्षेत्रे कृत्वा शिवसलोकगः ॥ काश्यां सायुज्यमाप्नोति विश्वेशकृपया मुने ॥७९॥ एवं कुर्वन्परं ध-
र्मं शिवज्ञानमवाप्नुयात् ॥ ज्ञानाद्दुःखांतमाप्नोति काश्यामेव प्रसादतः ॥८०॥ शंभोर्न चान्यतः पंथा विनाश-
259 र्वार्चनान्मुने ॥ वसंते यः शांतो भजति तमुमाकांतमगजे ॥ वरे ग्रीष्मे औष्म्यं भजति भवभीतो हि नितरां ॥ शिवे
वर्षे वर्णस्वपि भजति मासेषु शरदि कृतांतांतं शंभुं भजति यदि हेमंतशिशिरे ॥८२॥ इति श्रीशिवरहस्ये महा
देवाख्ये एकादशांशे षड्विंशोध्यायः ॥२६॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवाय नमः ॥ श्रीस्कं-
द उवाच ॥ पुण्यपर्वसु सर्वेषु ग्रहणे सोमसूर्ययोः ॥ अयने विषुवे चैव षडशीतिमुखेषु च ॥१॥ युगमन्वादि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७८ षुमुने पौर्णिमास्वमासु सर्वदा ॥ संक्रांति पुण्य तो पातेवे धृतौच विशेषतः ॥२॥ आषाढे चैव श्रावण्यां मार्गशीर्षे च चैत्रके ॥ अ० २७
माघ्यां च पौर्णिमा यां तु शिव पूजा विशिष्यते ॥३॥ अमा सोमान्विता यास्यात्सर्व मासेषु सत्तम ॥ कार्त्तिके पु विशेषे
ण पुष्पौषादामह त्फला ॥४॥ स्नान मभ्यर्चनं शंभोः विशिष्टं स्यात्सदा नृणां ॥ कृष्ण पक्षाष्टमीष्वेवं भूता-
स्व सित पक्षयोः ॥ ५॥ मासि की शिवरात्रीच प्रशस्ता शिव पूजने ॥ या माघे कृष्ण पक्षस्य भूता सोमान्विता
यदि ॥ ६॥ सार्द्रा पातान्विता वाऽपि निशि शर्वप्रिया हि सा ॥ सयोगो दुर्लभो नृणां तत्र लिंगो द्भवो मुने ॥७॥ ए-
केन बिल्व पत्रेण तस्यां पूज्य विमुक्तिभाक् ॥ या माघी शिव रात्रीच महत्पर्वा विशिष्यते ॥८॥ गोकर्णे साऽवि
शिष्येततथावै गंधमादने ॥ श्री कालहस्तीशैले च शिव रात्रि र्विशिष्यते ॥९॥ विष्णुब्रह्मादयो देवाः प्रार्थ
यंति मुनीश्वराः ॥ कदा गोकर्ण मेष्यामः शिवरात्रौ शिवार्चकाः ॥१०॥ भविष्यामो बिल्व पत्रैः द्वित्रैर्वा मुक्तिमाप्नुमः ॥
तत्रैव सागरे स्नानं गोकर्णेशस्य पूजनं ॥ ११॥ शिव रात्रौ शिवार्चैषा जन्मनैकेन मुक्तिदा ॥ गोकर्णे च मुनिश्रेष्ठ शिव
क्षेत्रेषु पुण्यदा ॥१२॥ तस्या मभ्यर्चन विधिं तवाग्रे कथयाम्यहं ॥ कार्त्तिके श्रावणे चैव सोमवारो विशिष्यते ॥१३॥
कृष्ण पक्षेपि च मुने सर्व मासेषु पुण्यदः ॥ भक्तिः शिवार्चको नक्तं तस्मिन्व्यक्तं तु मुक्तिदः ॥१४॥ सर्वमासप्रदोषे=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽपि प्रशस्तः शिवपूजने ॥ तत्रापि दुर्लभो ज्ञेयः मंदवारे महाफलः ॥१५॥ दुर्लभः कृष्णपक्षोत्थः शिवप्रियतमो मतः॥
तत्रैवार्चनमीशस्य सर्वसंपत्प्रदायकं ॥१६॥ सर्वत्रैव शिवागारे चोत्वा स्थावरे पिवा ॥ लिंगेषु पूजया शंभोः मुक्तिः
करगता भवेत् ॥१७॥ किं पुनस्त्व विमुक्तेऽथ त्रिलोचन समीपतः॥ त्रिलोचनेश्वरं काश्यां मंदवारे प्रदोषके ॥१८॥
पूज्य जन्मायुतैः पापैः भक्तो मुक्तिं च विंदति ॥ सद्वादशप्रदोषाणां फलं लभ्येदयतन्द्रितः ॥१९॥ मंदप्रदोषपूजातो लभे
देवं महामुने ॥ एकादश्यां महादेवं पूज्य बिल्वैर्मनोहरैः ॥ शितायां मसितायां वा रुद्रतिथ्यां मुनीश्वर ॥ उपो
ष्य शिवमभ्यर्च्य कृष्णायां नक्तभोजनं ॥२१॥ कुर्याद्देवं शिवे भक्तो महाफल जिगीषया ॥ विष्णुब्रह्मादयो
देवा एकादश्यां शिवार्चनं ॥ कुर्वंत्युपोषणं भक्त्या रुद्रतिथ्यां द्विजोत्तम ॥ एकादशानां रुद्राणां प्रीत्यर्थं गरु
260 ड्ध्वजः ॥२३॥ पक्षद्वयेपि सततं करोत्येकादशीव्रतं ॥ रुद्रप्रियकरी ह्येषा कार्त्तिकाषाढगासिता ॥२४॥ वैशाख्यां
च तथाषाढ्यां चैत्र्यां माघ्यां महेश्वरं ॥ महास्नानविधानेन पौर्णम्यां स्नापयेन्नरः ॥२५॥ पंचामृतैः फलरसैः म-
हापुण्यमवाप्नुयात् ॥ नीलोत्पलदलैर्बिल्वैः पूजयन्कुसुमैरपि ॥२६॥ सर्वपापविनिर्मुक्तो अक्षयां लभते गतिं ॥
यो माघ्यां कुरुते भक्त्या शिवाय घृतकंबलं ॥२७॥ सवंशकोटिसंयुक्तो मोदते शिवसन्निधौ ॥ वैशाख्यां पौर्णिमायां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९१ तुर्दधिकंबलकृन्नरः ॥ २८ ॥ महाकैलाससदने मदनांतकरप्रियः ॥ भवेन्नावर्त्तते विप्र अस्मिन्लोके ध्रुवं नरः ॥ २९ ॥
फाल्गुन्यामथ पौर्णम्यां मधुकंबलदो नरः ॥ शिवायविधिवद्भक्त्या गाणपत्यं लभेन्नरः ॥ ३० ॥ संक्रांतिषु शिवं पूज्य
कुसुमैः बिल्वपल्लवैः ॥ क्षीरेण मधुना दध्ना सितया च घृतैरपि ॥ ३१ ॥ अभिषिंचेच्छिवं भक्त्या तूर्यमंगल
वादनैः ॥ धूपं च गुग्गुलं दग्ध्वा ब्रह्महत्यायुतं दहेत् ॥ ३२ ॥ गच्छेच्छिवपुरं दिव्यं विमानैः सार्वगामिकैः ॥ शिवं
मकरसंक्रांतौ स्नाप्य पंचामृतैः फलैः ॥ ३३ ॥ तिलांजलिशतैः पूज्य सुधौतैः पांडुरैर्नरः ॥ बिल्वपत्रैः समभ्यर्च्य-
कृसरं तिलसंयुतं ॥ ३४ ॥ साज्यं निवेद्य सगुडं कृतकृत्यो भवेन्नरः ॥ हंसकुंदेंदुसंकाशैः यानैर्गच्छेच्छिवा
ग्रतः ॥ ३५ ॥ षडशीतिमुखेष्वीशं पूज्य भक्त्या सकृन्नरः ॥ बिल्वपत्रैः समभ्यर्च्य क्षुद्रपापैः प्रमुच्यते ॥ ३६ ॥
युगादिषु महादेवं सिंच्य पंचामृतैः फलैः ॥ हविर्निवेद्य देवाय संपूज्य कुसुमाक्षतैः ॥ ३७ ॥ सर्वपापैः प्रमुच्येत भक्तो मुक्तिं च विं
दति ॥ मन्वादिषु विरूपाक्षं पूज्य भक्त्या सकृन्नरः ॥ ३८ ॥ वसेच्छिवपुरे दिव्ये सर्वभोगसमृद्धिमान् ॥ व्यतीपाते च संपूज्य
दध्नाज्यं बिल्वसंयुतं ॥ ३९ ॥ मार्गशीर्षे विशेषेण सफलं तस्य जीवितं ॥ अणिमादिगुणैर्युक्तः शिववद्विचरेत्स्वयं ॥ ४० ॥
वैधृतौ च विशेषेण संपूज्य शिवमेव हि ॥ क्षीराद्यैर्बिल्वपत्रैश्च निवेद्य च हविर्मुने ॥ ४१ ॥ निशाकरकरप्रख्यैर्विमानैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सार्वगामिकैः॥यात्येव संनिधौ शंभोर्गणश्रेष्ठो मरेडितः ॥४२॥ संपूज्य देवं विप्रेंद्र यो लिंगमुदगायने ॥ पुष्पै धूपैश्च वि-
ल्वैश्च निवेद्य हविरुत्तमं ॥ ४३॥ भोजयित्वा महाशैवानेकं वा शिवयोगिनं ॥ प्रयाति शिवसारूप्यं गाणपत्यं लभेन्नरः ॥
संपूजयेन्नरो भक्त्या यो लिंगं दक्षिणायने ॥ घृतेनैवाभिषिच्येशं बिल्वैः संपूज्य यत्नतः ॥ ४५॥ कृसरं यवसंयुक्तं
निवेद्य शिवयोगिनं ॥ भोजयित्वा घृतान्नेन सर्वपापैः प्रमुच्यते ॥४६॥ सर्वान्कामानवाप्नोति यानै याति शिवाल-
यं ॥ अमास्वपि च कार्तिक्यां बिल्वैः सोमान्वितास्वपि ॥ ४७॥ संपूज्य च घृतैः स्नाप्य लभेत गतिमुत्तमां ॥ नक्तंभक्ता
शनो भक्तो मुक्तिं ~~अमास्वपि च कार्तिक्यां~~ याति न संशयः ॥ दिवसे तु समभ्यर्च्य वारर्क्षतिथिषु क्रमात् ॥ एकाहम
पि यो भक्त्या समुक्तः सर्वपाप्मभिः ॥४९॥ संपूज्य च घृतैः स्नाप्य लभेत गतिमुत्तमां ॥ नक्तंभक्ताशनो भक्तो मुक्तिं याति न-
संशयः ॥५०॥ प्रातः संपूजयेल्लिंगं नैशं पापं व्यपोहति ॥ संगवे नं गतापार्थं पूज्य लिंगं सकृन्नरः ॥५१॥ पापकंचुकमुत्सृज्य
शिवलोके महीयते ॥ अपराह्णे शिवं पूज्य गर्भभाक् नैव जायते ॥५२॥ मध्याह्ने हयमेधस्य फलं संपूजको लभेत् ॥ सायंका
ले शिवं पूज्य सर्वपापैः प्रमुच्यते ॥ ५३॥ निशीथे मन्मथारातिं पूज्य बिल्वैर्न पापभाक् ॥ अरुणोदयवेलायां पूज्य दे-
वं त्र्यृणी न तु ॥ षट्कालं पूजयेल्लिंगं त्रिकालं वा द्विकालकं ॥ एककालं मुने भक्त्या स रुद्रो नात्र संशयः ॥ ५४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रहरे प्रहरे नित्यं हरमेवं समर्चयेत् ॥ यतो नित्यं जीवितं हि नाश्वसेत्क्षणमत्र हि ॥ यः सप्तमीप्रदोषेषु शिवलिंगं समर्चयेत् ॥
बिल्वपत्रैश्च कुसुमैः तिर्यग्योनिं न चाप्नुयात् ॥ ५७ ॥ चतुर्थ्यां च प्रदोषेषु पूजयिलिंदुदर्शने ॥ शिवलिंगं बिल्वपत्रैः न दुर्गति
मवाप्नुयात् ॥ ५८ ॥ स प्रदोषस्त्रिधा प्रोक्तः शिवेन परमात्मना ॥ माहेश्वरस्त्रयोदश्यां सप्तम्यां च महामुने ॥ ५९ ॥ सा
रस्वतस्ततो विप्र चतुर्थ्यां च गणाधिपः ॥ सर्वेष्वपि प्रदोषेषु पूज्य एव महेश्वरः ॥ ६० ॥ माहेश्वरस्त्रयोदश्यां प्रदोषः सर्व
मासिकः ॥ तस्मिन्नभ्यर्चनं शंभोरनंतफलदं मुने ॥ ६१ ॥ मंदवारयुतो यः स्यात्प्रदोषो रजनीमुखे ॥ तत्रापि कृष्ण-
पक्षे च प्राप्तो दैवेन लभ्यते ॥ ६२ ॥ तस्मिन्प्रदोषे लिंगार्चा दोषाद्रिभिदुरा भवेत् ॥ ग्रहणे सोमसूर्याणां स्नानदानार्चनं
र्चनं विभोः ॥ ६३ ॥ कुर्याज्जपं च मंत्राणां तस्मिन्काले च सिद्धये ॥ सूर्यग्रहे कुरुक्षेत्रे स्नानदानं शिवार्चनं ॥ ६४ ॥ प्र
शस्यते मुनिश्रेष्ठ पुष्करे तु शशिग्रहे ॥ यमुनागंगयोः संधौ गंगासागरसंगमे ॥ ६५ ॥ ओंकारे भृगुतुंगे च तथैवा
मरकंटके ॥ नर्मदासागरे प्रांते गोकर्णे पश्चिमांबुधौ ॥ ६६ ॥ कावेर्युदधिसंगे च ताम्रासागरसंगमे ॥ धनुष्कोटौ मुनि
श्रेष्ठ कन्यातीर्थे निमज्जनात् ॥ ६७ ॥ सूर्येंदुग्रहणे पुण्ये स्नानं तेषु प्रशस्यते ॥ विधिं च ते प्रवक्ष्यामि सूर्येंदुग्रहणे मु-
मुने ॥ ६८ ॥ नित्ये नैमित्तिके काम्ये जपहोमांबुमज्जने ॥ शिवार्चने न विधिवन्मद्दादानमनंतकं ॥ ६९ ॥ कूपाच्छतगुणं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाप्यां नद्यां स्नानं ततोधिकं ॥ सागरेपि ततो विप्र नदीसंगे ततोधिकं ॥७०॥ शिवस्य सन्निधौ स्नानं ततोपि गुणव-
त्तरं ॥ आतुरः कोष्णतोयेन स्नायाद्ग्रहणयोर्द्वयोः ॥७१॥ वैष्णवान्स्कांदगाणेशान् शैवान्छाक्तान्जपेन्मनून् ॥ मंत्र
संग्रहणं कुर्याद्ग्रहणे सोमसूर्ययोः ॥७२॥ एकावृत्यापि मंत्राणां लक्षावृत्तिफलं लभेत् ॥ पितॄन्संतर्पयेत् श्राद्धै
र्नक्ते पि च मुनीश्वराः ॥७३॥ सर्वं गंगासमं तोयं सर्वे शिवसमा द्विजाः ॥ सर्वं मेरुसमं दानं ग्रहणे सोमसूर्ययोः ॥
७४॥ मंत्रसिद्धिकरं स्थानं नद्यां पर्वतमस्तके ॥ विपिने च शिवागारे देवब्राह्मणसन्निधौ ॥७५॥ बिल्वमूले बिल्
वपत्रैर्ग्रहणे लिंगमर्चयन् ॥ तत्र संपूज्य यल्लभ्येत् फलं तल्लक्षहायने ॥७६॥ रुद्रेण चैव गायत्र्या तथा पंचाक्षरा
णि च ॥ रोगार्तमायुषो वृध्यै होमयेच्च गडूचिभिः ॥ सहस्रपरमं श्रेष्ठं शताष्टोत्तरमेव वा ॥ नदीतोयेन संपूर्णघ-
261 टं स्पृशञ्शोभनं ॥७७॥ रुद्रावृत्तिजपे स्नात्वा परोगैः पापैः प्रमुच्यते ॥ मंत्रान्पंचाक्षरं वापि गायत्रीं वेदमातरं ॥७८॥
यावद्ग्रहणमोक्षं तु तावन्नद्यां समाहितः ॥ जपेत्समुद्रगामिन्यां पुरश्चर्याफलं लभेत् ॥८०॥ चेत्वास्यावरे वापि-
तुंगे लिंगे शिवार्चकः ॥ ग्रहणे सोमसूर्याणां योमहास्नानकारकः ॥८१॥ पंचामृतैः पंचगव्यैः तथा फलरसै
रपि ॥ घृताभ्यंगं घृतस्नानं ग्रहणे शीत तीव्र पुण्यदं ॥८२॥ शिवस्य तोषदं विप्रगाणः परम प्रदं परं ॥ तैर्यत्रिकं धूप=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८१ दीपंपुष्पगंधानुलेपनं ॥८३॥ बिल्वमालार्पणंशंभोः पुण्यंनीराजनंविभोः ॥ कुर्याद्यो ग्रहणे विप्र सर्वान्कामा अ·२७
नवाप्नुयात् ॥ ८४॥ कश्चित्पूजयते भक्त्या कश्चित्पूजांप्रपश्यति ॥ तयोः सम फलंज्ञेयं ग्रहणे लिंगदर्शना-
त् ॥ ८५॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ सहस्रवार्षिकींपूजांग्रहणे पूजकोलभेत् ॥ ८६॥ ॥
श्रीस्कंद उवाच ॥ संक्रांतीपुष्करांतिरुजं न लभेत्पातेप्यथार्च्यन पतेन्निरये कदाचित् ॥ नैवाधृतिंसलभते द्विज
वै धृतीषु मुक्तः करग्रहणकृद्ग्रहणे शिवंहि ॥ ८७॥ इतिश्री शिवरहस्ये एकादशांशेपर्वग्रहणपूजामहिमानाम
म सप्तविंशोध्यायः ॥ २७॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवाय नमः ॥ मुनिरुवाच ॥ रहस्यमन्यद्व
दमे मम शंभुतनूभव ॥ व्रतेषु केषु चीर्णेषु प्रीतो भवति शंकरः ॥ १॥ सहैभिर्मुनिभिश्चैव गणैः सुरगणैरपि ॥ श्रवणे
व धृतं मेद्य मनः शिवकथामृतं ॥ २॥ सूत उवाच ॥ इत्थं जैगीषव्यवाक्येन नंदितोस्माहरात्मजः ॥ प्राह तं तारकारातिः
शिवप्रीतिकरंव्रतं ॥ ३॥ श्रीस्कंद उवाच ॥ शृणुष्व मुनिशार्दूल त्रिपुरारिप्रियव्रतं ॥ प्रत्येकं सावधानेन गणैश्च
मुनिभिः सुरैः ॥ ४॥ कैलासे शंकरेणैव प्रोक्तानि प्रीतिदानि तु ॥ गिरिजायै विशेषेण मया तत्र श्रुतानि हि ॥ ५॥
कैलासशैलमंचस्था पार्वती पृच्छतीश्वरं ॥ प्रांजलिर्विनयोपेता त्रिकालज्ञं त्रिलोचनं ॥ ६॥ पार्वत्युवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवदेव महादेव त्रिकालज्ञ त्रिलोचन ॥ किंतव प्रीतिकृद्व्रं भो व्रतं सर्वाघनाशनं ॥७॥ पुमर्थदायकं शर्व सर्वेषां कथयस्व
मे तस्याः तद्वदनांभोजं पीत्वा लोचन षट्पदैः ॥८॥ प्राह देवीं विरूपाक्षः प्रत्यक्षमेवत द्रुतं ॥ शिव उवाच ॥ शृणु पद्म
पलाशाक्षी व्रतं मे प्रीतिदायकं ॥९॥ साधु साधु महाप्राज्ञे सर्वलोकोपकारिके ॥ यन्न कस्यचिदाख्यातं तदद्य कथ
यामि ते ॥१०॥ सर्वकामप्रदं दिव्यं सर्वरोगनिवारकं ॥ ब्रह्मविष्ण्वादिभिर्देवैः कृतमेतन्महाव्रतं ॥११॥ नरो वा यदि
वा नारी द्विजो वाप्यंत्यजोऽथवा ॥ कृत्वा व्रतमिदं दिव्यं ममलोकं स विंदति ॥१२॥ सर्वेष्वपि च मासेषु प्रशस्तं सर्वका
मदं ॥ वयं सोमव्रतेनेति स्तुतं वेदैर्महेश्वरि ॥१३॥ सोमवारव्रतं दिव्यं द्विजानामेव केवलं ॥ नराणामथ नारीणां सौ
सौभाग्यारोग्यवर्धनं ॥१४॥ श्रावणे कार्त्तिके वापि गृहीतनियमो व्रती ॥ पूजयेन्मां महादेवि सो चिरान्मुक्तिभाग्भ-
262 वेत् ॥१५॥ देव्युवाच ॥ कथं सोमव्रतं कार्यं को विधिः पूजनं कथं ॥ कास्मिन्काले च कर्त्तव्यं सर्वं विस्तरतो वद ॥१६॥
॥ शिव उवाच ॥ श्रावणेस्मिन्वरे मासि त्वत्पितुर्मौलिसंस्थिते ॥ केदारेशमहालिंगसंन्निधौ नियमाद्व्रती ॥१७॥
संकल्प्य वत्सरं वाऽपि त्रीणि द्वादशवाब्दिके ॥ संकल्प्य ब्राह्मणैः सार्धं व्रतमेतत्समाचरेत् ॥१८॥ अस्य केदारनाथस्य
श्रावणे सोमवासरे ॥ पूजा कार्या विशेषेण साधनैर्विविधैः शुभैः ॥१९॥ सोमवारव्रतं कार्यं प्रयत्नेन यथाविधि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८२ ब्राह्मणैरेव नियमादाजन्मांतं महेश्वरि ॥ २०॥ शक्तेनोपोषणं कार्यमन्यथा निशि भोजनं॥ उपवासी पूजयेन्मां रात्रौ यामचतुष्टयं ॥ २१॥ परेद्युर्मां समभ्यर्च्य निवेद्याश्नीत भावतः॥ सर्वेष्वपि च मासेषु सोमवारः प्रशस्यते ॥ २२॥ कृष्णपक्षे विशेषेण तस्य नोद्यापनं शिवे ॥ नक्तभुग्यदि भक्तः स्यात्क्षारवर्ज्यान्नभुक् भवेत् ॥ २३॥ यन्निवेदितमीशाय तदश्नीयाद्यथाविधि॥ मधु मांसं वर्जयीत नक्ताशी सर्वदा शिवे ॥ २४॥ वत्सरे वत्सरांते वा द्वादशाब्दे त्रिहायने ॥ नक्ताशनोद्यमं कुर्यादुपवासी न संज्वरेत् ॥ २५॥ अन्येष्वपि महादेवि शिवक्षेत्रेष्वथारभेत् ॥ अविमुक्ते तु [illegible] नियतं नित्यं नक्ताशनी भवेत् ॥ २६॥ सोमवारेषु वादे वि भूतायामष्टमीषु वा ॥ पर्वस्वपि विशेषेण सोमाऽमास्वपि शंकरि ॥ २७॥ मुहूर्त्तोनं दिनं नक्तं तत्र संपूज्य हव्यभुक् ॥ कार्त्तिके प्रारभेद्वापि अरुणाचलसन्निधौ ॥ २८॥ सोमवारव्रतं देवि संकल्प्यैव-हि पूर्ववत् ॥ ईश्वर उवाच ॥ अत्रेतिहासं वक्ष्यामि शृणु शैलसुतेऽनघे ॥ चाक्षुषस्यांतरे देवि दक्षो मेधाय दीक्षितः ॥ २९॥ सर्वैः सुरासुरैर्देवि ब्रह्मविष्ण्वादिभिर्द्विजैः॥ मामनाहूय त्वां चापि यज्ञविघ्नमथालभत् ॥ ३०॥ सुराद्या वीरभद्रेण शिक्षिता दीक्षितोपि हि ॥ चंद्रोऽमृतमयश्चायं निष्पीड्य कर पंकजैः॥ ३१॥ सोमो हीनामृतो गौरी रोहिणी माऽयजत्तदा॥ केदारे सोमनाथाख्यं लिंगं संस्थाप्य पूजयत् ॥ ३२॥ सपुनर्दक्षशापेन पीडितो मामनूनुषत् ॥ अ॰ २८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोमवारे ध्वेन मीशे सोमो यक्ष्मारुजार्दितः ॥ सोम उवाच ॥ बलीवर्द्दमारूढ (यन भदि) येन कुधा त्रैपुरं निर्द्द हन्नूर्ध्वतेजाः ॥ इना
क्ष्णै वह्निर्दंतमो नाशयन् लोकजालं सुशोकं धुनीते पुनीते महेशः ॥३४॥ ततस्तुष्टोऽस्म्यहं देवि तस्यस्तुत्या च भक्तितः ॥
सोमवारव्रतस्यास्य प्रभावेन गिरींद्रजे ॥३५॥ तेनोक्तं यदि तुष्टोऽसि तिष्ठात्र स्योनिरंतरं ॥ यावच्चंद्रश्च (सूर्यश्च) यावत्तिष्ठति
मेदिनी ॥३६॥ तावन्मेस्यापि ते लिंगे उमयासह तिष्ठ भो ॥ रोहिण्याश्च पतिश्चैवं प्रार्थ इत्वा च मां शिवे ॥३७॥ ततः शुद्धशरीरो
ऽसौ गगनस्थो विराजते ॥ मयोत्तमांगे देवेशि स्थानं दत्तं विशेषतः ॥ देवान्प्रीणाति सोद्यापि सोमधामप्रदानतः ॥
प्रथमां पिबते वन्हिः, द्वितीयां भास्करः शिवे, ॥३९॥ तृतीयामथ देवेंद्रः, चतुर्थी मरुतोखिलाः ॥ वसवः पंचमीं तस्य क-
लां षष्ठीं तु वायवः ॥४०॥ आदित्याः सप्तमीं देवि, रुद्रास्तस्याष्टमी कलां ॥ नवमीं ऋषभो देवि दशमीं यक्षगुह्यकाः ॥
263 एकादशीं शिवे साध्याः द्वादशीं विष्णुरेवहि ॥ ब्रह्मा त्रयोदशीं तस्य चतुर्दश्यां तु निऋतिः ॥४२॥ अमावास्यासु
पितरः कलां तस्य पिबंतिहि ॥ सोमोऽमृतमयो देवि देवानां भोजनं शशी ॥४३॥ कलाभिः पोषयेद्देवानोषधी
नां गणं शिवे ॥ सोमवल्लीषु नितरां यज्ञार्थे सोम आहितः ॥४४॥ सोमेनादित्य बलिनः सोमेन सेवितामही ॥
सर्वेषामथ नक्षत्राणां मध्ये वै सोम आस्थितः ॥४५॥ इत्येषा बह्वृचानांहि श्रुतिराह महेश्वरि ॥ सर्वेषां जानिता=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८३ सोमः शक्रविष्णुनिलात्मनां ॥४६॥ तस्मात्तदा विष्टतया सोमवल्लीभिरेवहि ॥ प्रवर्त्तयंतियज्ञांश्च सौम्या येब्रा- अ·२८
ह्मणाः शिवे ॥४७॥ सोमपाब्राह्मणाः सर्वे ममैवतनयाः शिवे ॥ ब्राह्मणानामयंराजासोमःसाक्षान्ममांशकः ॥
तवेषसदनं देवि अग्निर्मेवदनं शिवे ॥ तस्मादग्निश्चसोमश्च जगच्चक्रप्रवर्त्तकौ ॥४९॥ अग्नीषोममयं
सर्वंजगदेतच्चराचरं ॥ तस्माद्यज्ञेषुसर्वेषु अग्निषोमपशुःस्मृतः ॥५०॥ तस्माद्व्रतमिदं देवि सोमवारंममे-
ष्टदं ॥ ब्राह्मणैःसोमपैरेव कार्यंनक्तं ज्ञानात्मना ॥५१॥ शिवक्षेत्रे गृहेवापि अविमुक्तेचनैत्यकं ॥ श्रावणे
कार्त्तिकेवापि नक्तभोजनमाचरेत् ॥५२॥ ब्राह्मणानां विधिश्चायं सोमपानां विशेषतः ॥ बृहज्जाबालकथि
तो विधिरेषसनातनः ॥५३॥ विधवाविधुराणांच वनस्थानांचवर्णिनां ॥ उपवासोयतीनांच चतुर्यामेषुपूजनं ॥
५४॥ प्रशस्तं ममदेवेशि सोमवारेषु सर्वशः ॥ वर्णानामाश्रमाणांच भक्तानां नियतात्मनां ॥५५॥ शक्तोप्यु-
पोषणाहीनः चिरं विष्ठासु तिष्ठति ॥ ये सोमवासरे स्वेच्छं दिवाकुर्वंति भोजनं ॥५६॥ तान्पातयंतिनरकेक्रू-
रास्तेयमकिंकराः ॥ तदाप्रभृतियेकेचित् व्रतंकुर्वंति मानवाः ॥ ५७॥ तेपितृपदमायांति विमलांगाश्चसोम-
वत् ॥ नवारव्रतमेतद्धि श्रुत्युक्तं विधिनाचरेत् ॥५८॥ अथ किंबहुनोक्तेन विधानंतस्य कीर्त्तये ॥ ॥

श्रीस्कंद उवाच ॥ एवंजगाद गिरिजां प्रति चंद्र मौलिः ॥ सोम व्रतस्य महिमाम समां द्विजानां ॥ भक्तेपिनक्त हितभक्त
विशिष्टभुक्स्या ॥ ल्लिं गार्चन स्तवन दर्शन स्तोत्र मुक्तः ॥ ६० ॥ इति श्री शिवरहस्ये महादेवारव्ये एकादशां
शे सोमवारव्रत महिमावर्णनं नाम अष्ट विंशो ध्यायः ॥ २५ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय
नमः ॥ श्री शिव उवाच ॥ यास्मिन्कास्मिंश्च मासेच शुक्ले सोमस्य वासरे ॥ शौचं विधाय नद्यां वै स्नायायुषासिस-
त्तमे ॥ १ ॥ स्वधर्म विहितं कर्मकृत्वास्याने मनो रमे ॥ सुसमेशु भुवे रम्येन्य सेलुं भं मनो रमं ॥ २ ॥ च्यूतपल्ल
व विन्यस्तं चंदनेन मनो रमं ॥ श्वे वस्त्र परीधानः सर्वलंकार भूषितः ॥ आदौ पात्रंच विन्यस्य आधारस-
हितं शिवं ॥ अष्टौ विघ्नेश्वरा देवा सोमनाथं सशाक्तिकं ॥ ४ ॥ वाससा सहितं तत्रश्वेत पुष्पैः प्रपूजयेत् ॥ लिं-
२८ गंतुंगंच विन्यस्य पंचगव्येन सेचयेत ॥ शिवे फल रसैश्चैव गंध पुष्पांबु सेचनैः ॥ गंधाक्षतादिभिः
पूज्य रुद्रेणा वृत्तितों विके ॥ ६ ॥ विविधै र्भक्ष्य भोज्यैश्च फलैर्नैवेद्य माचरेत् ॥ धूपदीपादिकं दत्वा
नीराजन पुरः सरं ॥ ७ ॥ स्तोत्रैस्तु वीत देवेशं सोमवारे विशेषतः ॥ सोमालंकृत मस्त कायावि भवेनामा-
दिसाम स्तुति ॥ प्रख्याताय उमाधवाय महते भूमाय देवायते ॥ कामांगाखिल दाहकाय भगवन्हेमः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८४ प्रियायाददामाम्बाधिकृतये समाय जगतां पित्रे नमः शंभवे ॥८॥ स्तुत्वैवं महादेवं सोमवारे घुपूजकः ॥ उपोष्य वा नक्तं भु-
ग्वा भवेद् भक्तो दृढव्रतः ॥९॥ एवं कृते तु प्रथमे सोमवारे गदोज्झितः ॥ आरोग्यमतुलं प्राप्य शिवलोके महीयते ॥१०॥
द्वितीये सोमवारे तु करंजं दंतधावनं ॥ देवं संपूजयेद्रात्रौ गंधपुष्पैर्मनोरमैः ॥११॥ शतपत्रैर्बिल्वपत्रैः न काशीमुक्ति
भाग्भवेत् ॥ सवत्सगोलक्षफलं प्राप्य शिवलोके महीयते ॥१२॥ तृतीये सोमवारे तु वच्छं दंतधावनं ॥ सायंकाले बिल्वपत्रैः
जातिभिः पूजयेच्छिवं ॥१३॥ नैवेद्यं दापयेदन्नं तद्दक्षिणीया तदा विधिः (यथाविधि) ॥ एवं कृते तृतीये तु कन्यादानायुतं लभेत् ॥१४॥
चतुर्थे सोमवारे तु अपामार्गसमुद्भवं ॥ रुद्रेण पूजयेद्रात्रौ बिल्वैः मल्लीसुमैः शिवं ॥१५॥ स्वाद्वन्नं शर्कराक्षीरं
निवेद्याशीतसद्द्विजैः ॥ यज्ञायुतफलं प्राप्य शिवलोके महीयते ॥१६॥ पंचमे सोमवारे तु अश्वत्थं दंतधावनं ॥
शिवं संपूजयेद्रात्रौ बिल्वैः पद्मैर्महेश्वरि ॥१७॥ दधिभक्तं शिवे दत्वा ब्रह्महापि विमुच्यते ॥ सोमवारे तु षष्ठे वै दंत
धावनमार्जितं ॥१८॥ शिवं संपूजयेद्रात्रौ मंदारैर्बिल्वपल्लवैः ॥ नैवेद्यं च शिवे दद्यात्फलपायसमंडकं ॥१९॥
सषडब्दायुतफलं प्राप्य मल्लोकमाव्रजेत ॥ सप्तमे सोमवारे तु प्लक्षजं दंतधावनं ॥२०॥ श्रीकंठं पूजयेत्सायं श्रीपत्रैः
करवीरकैः ॥ विविधैर्भक्ष्यभोज्यैश्च नारिकेलफलैरपि ॥२१॥ नैवेद्यं च ततो दत्वा दीपधूपपुरःसरं ॥ सप्तसागरदान=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्य फलं लब्ध्वा ममांतिगः ॥ २२॥ अष्टमे सोमवारे तु अष्टमूर्त्तिं यजेच्छिवं ॥ पंचामृतैः फलरसैः गंधपुष्पकुशांबुभिः ॥
सुगंधिपुष्पैर्बिल्वैश्च यक्षकर्दमलेपनैः ॥ मध्वन्नं पायसापूपं कदलीफलसंयुतं ॥ निवेद्याश्नीत तद्रात्रौ भव भक्ति-
जितेंद्रियः ॥ गजानां च शतं दत्ते लक्षं चाथवा जिनां ॥ सूर्यग्रहे कुरुक्षेत्रे यत्पुण्यं स्यान्महेश्वरि ॥ तत्पुण्यं कोटिगुणितं
सोमवारार्चको लभेत् ॥ नवमे सोमवारे तु कुब्जं दंतधावनं ॥ बिल्वपुन्नागकादंबैः पूजयेन्मां महेश्वरं ॥ सायं घृ
तान्न नैवेद्यं धूपदीपमनोहरं ॥ पौंडरीकायुतफलं प्राप्य विष्णुक्षये वसेत् ॥ तेनोदितं शिवज्ञानं लब्ध्वा मल्लोक
माव्रजेत् ॥ दशमे सोमवारे तु बिल्वजं दंतधावनं ॥ महादेवं बिल्वपत्रैर्यजेन्नीलोत्पलैः शिवे ॥ नैवेद्यं वटकापू
पं स्वाद्वन्नं विनिवेदयेत् ॥ २४॥ वाजपेयायुतं प्राप्य ब्रह्मलोके महीयते ॥ ब्रह्मणा पूजितस्तत्र ज्ञानं लब्ध्वा तदंति
२६७
के ॥ २५॥ तेनैव मुच्यते देवि सोपि मय्येव लीयते ॥ एकादशे सोमवारे काष्ठमौदुंबरं भवेत् ॥ २६॥ पार्वतीशं दूर्व
यार्च्य बिल्वैश्चैवापपंचकैः ॥ कृसरं भक्ष्यभोज्यादि निवेद्याश्नीत तत्रां भवैः ॥ २७॥ राजसूयादिदशकं प्राप्य म-
ल्लोकमावसेत् ॥ द्वादशे सोमवारे तु शिग्रुजं दंतधावनं ॥ २८॥ शिग्रुपुष्पैरुग्रपूजां कुर्यात्सायं तु बिल्वकैः ॥ मुद्गान्नं स
घृतं भक्ष्यं निवेद्याश्नीत तत्रां भवैः ॥ २९॥ द्वादशाब्दफलं प्राप्य शिवलोके महीयते ॥ मासाब्दसंख्यया कुर्यात्सोमवार-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८५ व्रतं शिवे ॥ ३० ॥ नक्ताशनी भवेद्वर्षं त्रिवर्षं द्वादशाब्दकं ॥ शिवक्षेत्रेषु पुण्येषु अविमुक्ते च नैत्यकं ॥ ३१ ॥ कुर्यादुद्यापनं- अ० २१
चांते पुनः पुनर्यथा भवेत् ॥ आजन्म ग्रहणे देवि नैवोद्यापनमाचरेत् ॥ ३२ ॥ पार्वत्युवाच ॥ कीदृशं तद्व्रतं देव विधानं
तस्य कीदृशं ॥ कथं कार्यं कदा ग्राह्यं किं दानं कथमर्चनं ॥ ३३ ॥ उद्यापनविधानं च विस्तरेण वदस्व मे ॥ महादेव उवाच ॥
माघे मासस्य बष्मी शुक्ले शिवेंदुदिनसंयुता ॥ तदा ग्राह्यं व्रतमिदं अनेन विधिना शुभं ॥ ३४ ॥ प्रातः शुक्लतिलैः स्ना
या दाचार्यसहितो व्रती ॥ पूर्वाण्हे विधिवत्कुर्यादुमाशंकरपूजनं ॥ ३५ ॥ ततः पुष्पांजलिं दत्वा प्रणम्य च पुनः पुनः ॥
विधिनानेन गृण्हीयाद्व्रतं संकल्पपूर्वकं ॥ ३६ ॥ गृह्णामि भवरोगार्तः सोमवारव्रतौषधं ॥ व्रतेनानेन सुप्रीतौ भवे
तां पार्वतीश्वरौ ॥ ३८ ॥ विसर्जनं ततः कुर्यादाचार्यं वरयेत्ततः ॥ अहः शेषं ततो नीत्वा पुराणश्रवणादिभिः ॥ ३९ ॥
शयानो दर्भकूर्चेषु अभुक्त ब्रह्मचर्यवान् ॥ अनेन विधिना देवि मद्दिने वासरे शुभे ॥ ४० ॥ व्रती कुर्वन्नवाप्नोति
मद्भावं नात्र संशयः ॥ तस्मिं दिने कृतं किंचिद्धोमं दानं शिवार्चनं ॥ ४१ ॥ व्रतवान्प्रीतिदं स्कंद ममुमया सहित
स्य मे ॥ अतः सोमाख्ययावारः प्रशस्तोयं मम प्रियः ॥ ४२ ॥ एवं समाब्दकं कुर्याद्व्रतस्योद्यापनं भवेत् ॥ माघाद्यु-
पंचकं कुर्याच्छुक्लपक्षे विशेषतः ॥ ४३ ॥ शिवर्क्षतिथियोगानामेकेकेनापि संयुते ॥ सोमवारे विधातव्यं चंद्र=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताराबलान्विते ॥४४॥ विधाय रदनोल्लेखं प्रातः स्नानादिधानतः ॥ आचार्यं वरयेद्देके शिवभक्तं जितेंद्रियः ॥४५॥ पुराण-
स्मृतिशास्त्रज्ञं निगमागमवेदिनं ॥ उपोष्य सोमवारे च सायं संध्यामुपास्य च ॥४६॥ शिवालये नदीतीरे शुचौ देशे गृहे
ऽते ॥ अष्टांगुलोच्छ्रितां वेदिं वितास्तिद्वयविस्तृतां ॥४७॥ तस्यां षोडशपत्रं च तंडुलैः परिपूरितं ॥ पुष्पमंडपिकां
कुर्यात्पताकाद्यैरलंकृतां ॥४८॥ वितानैर्विविधैश्चित्रैः फलराजिविराजितां ॥ एवं प्रकल्पयेद्वेदिं चतुरस्त्रां
समां तथा ॥४९॥ आचार्येण समं कुर्यान्मदाराधनमुत्तमं ॥ पद्ममध्येन वीनं च धातुजं स्थापयेद्घटं ॥५०॥
वाससा संवृतं देवि फलपल्लवचक्रकं ॥ समंतात्कुंभकैरष्टैः पल्लवांबुप्रपूरितैः ॥ गणेशं मातृकां चैव दुर्गां क्षे
त्रपातिं हरिं ॥ ब्रह्माणमथ सावित्रीं इंद्रमैरावतास्थितं ॥५२॥ पंचामृतोदकैः स्नाप्य गंधपुष्पाक्षतैर्जलैः ॥ गृहीते
२६८ मध्यमे कुंभे ध्यायेन्मद्रूपमीश्वरी ॥५३॥ सांबं चंद्रकलाजूटं त्र्यंबकं नीलकंधरं ॥ वरदाभयहस्तं च गंधपुष्पांबरा
वृतं ॥५४॥ त्वया च स्कंदगणपनंदीभृंगीशसेवितं ॥ ध्यात्वाऽऽवाह्याथ संपूज्य शुद्धपंचाक्षरेण हि ॥५५॥ तत्तद्दे
दादिमंत्रैश्च पूर्वादिषु दले च्छप ॥ मूर्त्तयोऽष्टौ मदीयाश्च पूजनीयाः क्रमेण च ॥५६॥ अनंताय नमः सूक्ष्मशिवा-
याथ त्रिमूर्त्तये ॥ श्रीकंठाय शिखंडाय चंद्रचूडाय शूलिने ॥५७॥ पूर्वादिक्रमयोगेन तनवः पूजयेन्मम ॥ त-
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८६ इति तद्बहिर्लोकपालांश्च पूजयेन्मूलमंत्रतः ॥ ५८ ॥ विष्टराद्युपचारैश्च गंधपुष्पाक्षतैर्यजेत् ॥ बिल्वपत्राक्षतैः पुष्पैः धू अ० २१
पदीपैः समर्चयेत् ॥ ५९ ॥ मनोरथा विधातव्याः पूजावित्तानुसारतः ॥ ततो वेद्यामधो भूमौ सर्वतोभद्रमंडले ॥ ६० ॥ ब्रह्मा
द्या देवताः सर्वाः क्रमेणैव समर्चयेत् ॥ नैवेद्यानि सुहृद्यानि तांबूलानि च कल्पयेत् ॥ ६१ ॥ रात्रौ जागरणं कुर्याद्गीतमंगलवाद-
नैः ॥ पुराणेरितिहासैश्च रात्रिशेषं नयेत् व्रती ॥ ६२ ॥ अपरेद्युः कृतस्नानः प्रातः संध्यामुपास्य च ॥ पुनर्वेद्यां शिवं देवा-
न्पूजयेदुपचारकैः ॥ ६३ ॥ हवनार्थं विधातव्यं कुंडं वा स्थंडिलं शिवे ॥ स्वगृह्योक्तेन विधिना उपलेपनपूर्वकं ॥ ६४ ॥
अनाज्ञाता हविर्हुत्वा महाव्याहृतयस्तथा ॥ होतव्याः सघृताश्चैव पायसादि तिलैः सह ॥ ६५ ॥ त्वं सोमासीति मंत्रे
ण हुनेद्दद्याहुतीः शतं ॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ ६६ ॥ ततो होमावसाने च गामेकां धवलां शुभां ॥
पयस्विनीमरोगां च सवत्सां कांस्यदोहनां ॥ ६७ ॥ दद्याद्व्रतसमृध्यर्थमाचार्याय सदक्षिणां ॥ वस्त्रैराभरणैरत्
नैराचार्यं परितोषयेत् ॥ ६८ ॥ ततः षोडशसंख्याकान्ब्राह्मणान्भोजयेदथ ॥ तान्भक्त्या पूजयेद्विप्रान्शौ भवा-
न्नामभिः क्रमात् ॥ ६९ ॥ सोमेश्वरस्त्वथेशानः शंकरो गिरिजाधवः ॥ महेशः सर्वभूतेशः शंकरस्त्रिपुरांतकः ॥ ७० ॥
शिवः पशुपतिः शंभुस्त्र्यंबकश्चंद्रशेखरः ॥ गंगाधरो महादेवो वामदेव इति क्रमात् ॥ ७१ ॥ उपचारान्समर्प्याथ दद्यात्कुं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

X पंक्ति८– "पुनरन्यद् व्रतं किं ते प्रियं शंकर मे वद ॥ येन चीर्णेन जगतां मुक्तिः साधारणी भवेत् ॥१॥ ईश्वर उवाच ॥"

भान्संदक्षिणान् ॥ वस्त्रैराभरणैरन्यैराचार्यं परितोषयेत् ॥७२॥ तथैव पूजयेदन्यान्दीनानाथांश्च तोषयेत् ॥ व्रतंमम
स्तु संपूर्णमित्युक्त्वा(कृत्वा) तान्समापयेत् ॥७३॥ विसर्ज्य ब्राह्मणान्सर्वान् शिष्टैरिष्टैः समन्वितः ॥ भुंजीयाद्धृतशेषंतु आ
चार्यसहितो व्रती ॥७४॥ एवं कृते महापुण्ये व्रतस्योद्यापनाविधौ ॥ नारी वा पुरुषो वापि महेशस्य पदं लभेत् ॥७५॥
अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥ पृथिव्यां यानि तीर्थानि व्रतान्यन्यानि यानि च ॥७६॥ सोमवारव्रतस्यास्य
कलां नार्हन्ति षोडशीं ॥ ईश्वर उवाच ॥ शिवेनातः प्रातः कमलमुखि मातस्त्रिजगतां जगत्तातं भ्रांतं मम भ
जनवैधुर्यव्रातः ॥ कुतः सौख्यं (सख्यं) लभति च फलं प्रेत्य सुखदं न जैनैप्याजानैः सुखरनरैः सेवितपदे ॥७७॥ ॥
इति श्रीशिवरहस्ये एकादशांशे महादेवाख्ये शिवगौरीसंवादे सोमवारव्रतोद्यापनकथनं नाम एकोनत्रिंशो–
२६७ ध्यायः ॥२९॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ पार्वत्युवाच ॥ प्रदोषो मे प्रियकरः त्रयोदश्यां महे
श्वरि ॥ सर्वमासेषु सर्वेषां भुक्तिमुक्तिप्रदो मम ॥२॥ किं पुनर्मन्दवारेण संयुक्तः कृष्णपक्षगः ॥ तत्रोपवासः पूजा च सायं मुक्ति
प्रदा मम ॥ तद्विधानं तच्च शिवे वदाम्यद्य विशेषतः ॥ शृणु त्वं सावधानेन चेतसा जगदीश्वरि ॥ पक्षद्वये त्रयोदश्यां निराहा
रो भवेच्छिवे ॥ प्रदोषव्यापि सायं यत् घटिकात्रयभाक् यदि ॥५॥ तत्र मे पूजनं शस्तं मव्यासौ चोत्तरे भवेत् ॥ नद्यां वा देव=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्नातेवास्नानंतत्र समाचरेत् ॥ ६ ॥ शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितः ॥ भस्मत्रिपुंड्ररुद्राक्षपरिमंडितविग्रहः ॥
कृतसंध्याजपविधिः शिवपूजां समारभेत् ॥ देवस्य पुरतः सम्यक् अलिप्य नवांभसा ॥ ८ ॥ विधायमंडपं रम्यं पुष्प
मालाविराजितं ॥ वितानाद्यैरलंकृत्य फलमूलनवांकुरैः ॥ ९ ॥ विचित्रं पद्ममालिख्य पंचवर्णकसंयुतं ॥ तत्र पीठे
चतुष्पादे स्वोत्धृते स्थापयेच्छिवं ॥ १० ॥ तत्रोपविश्य सुशुभे चासने व्याघ्रमासनं ॥ पाद्यार्घ्याचमनादीनि सुपु-
ष्पाणि च विन्यसेत् ॥ ११ ॥ सम्यक्संपादिताशेषपूजोपकरणः शुचिः ॥ आगमोक्तेन विधिना पीठमामंत्रयेत्सुधीः ॥
ततः कृत्वात्मशुद्धिं च भूतशुद्धिमनुक्रमात् ॥ प्राणायामत्रयं कुर्याद् द्विजवर्णैः सबिंदुकैः ॥ १३ ॥ मातृकान्यस्य विधि-
वत् ध्यात्वा तां देवतां परां ॥ समाप्य मातृकां भूयो ध्यात्वा देवं परं शिवं ॥ १४ ॥ वामभागे गुरुं नत्वा दक्षिणे गणपं यजेत् ॥
अंसोरुयुगमे धर्मादीन्न्यसेन्नाभौ च पार्श्वयोः ॥ १५ ॥ अधर्मादीननंतादिहृदि पीठे च विन्यसेत् ॥ आधारश-
क्तिमारभ्य ज्ञानात्मानमनुक्रमात् ॥ उक्तक्रमेण विन्यस्य हृत्पद्मे साधु भाविते ॥ नवशक्तिमये रम्ये ध्यायेद्देवमुमा
पतिं ॥ १७ ॥ चंद्रकोटिप्रतीकाशं सोमचूडं त्रिलोचनं ॥ आपिंगलजटाजूटरत्नमौलिविराजितं ॥ १८ ॥ नीलग्री-
वमुदारांगं नागहारोपशोभितं ॥ वराभयहस्तं च हरिणं च परश्वधं ॥ १९ ॥ दधानं नागवलयं केयूरांगदमुद्रिकं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याघ्रचर्मपरीधानं रत्नसिंहासनस्थितं ॥२०॥ ध्यात्वा मद्वाम भागेत्वां चिंतयेद्गिरिकन्यकां ॥ भास्वज्जपाप्रसू
नाभामुद्यार्कसमप्रभां ॥२१॥ विद्युत्पुंजनिभां तन्वीं मनोनयननंदिनीं ॥ बालेंदुशेखरस्निग्धनीलकुंचितकुंतलां ॥
भृंगसंघातरुचिरनीलालकविराजितां ॥ मणिकुंडलविद्योतमुखमंडलविभ्रमां ॥२३॥ नवकुंकुमपंकांकपो
लतलदर्पणां ॥ मधुरस्मितविभ्राजदरुणाधरपल्लवां ॥२४॥ कंबुकंठीं शिखां मुद्यत्कुचपंकजकुड्मलां ॥२२॥
पाशांकुशाभयवरैः विलसत्करपल्लवां ॥२५॥ अनेकरत्नविलसत्कंकणांगदमुद्रिकां ॥ त्रिवलीवलयांहृद्यां
रत्नकांचीगुणान्वितां ॥२६॥ रत्नमालांबरधरां दिव्यचंदनचर्चितां ॥ दिक्पालवनितामौलिसन्नतांघ्रिस
रोरुहां ॥ रत्नसिंहासनारूढां मंदस्मितमुखांबुजां ॥ एवं ध्यात्वा महादेवं मां देवीं त्वां मनोरमां ॥२८॥ न्यासक्र-
२८० मेण संपूज्य देवं गंधादिभिः क्रमात् ॥ पंचभिर्ब्रह्मभिः कुर्यात्प्रोक्तस्थानेषु नाहृदि ॥२९॥ पृथक्पुष्पांजलिं देहे मूलेन-
चहृदित्रिधा ॥ पुनः स्वयं शिवो भूत्वा मूलमंत्रेण साधकः ॥३०॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् ॥ संकल्पं
चवदेत्तत्र पूजारंभे समाहितः ॥३१॥ कृतांजलिपुटो भूत्वा प्रार्थयेदिंदुशेखरं ॥ ऋणपातकदौर्भाग्यदारिद्र्य विनि-
वृत्तये ॥३२॥ अशेषाघविनाशाय प्रसीद मम शंकर ॥ दुःखशोकाग्निसंतप्तं संसारभयपीडितं ॥३३॥ बहुरोग=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८८ कुलनंदीनं पाहिमाम् वृषवाहन ॥ आगच्छ देव देवेश महादेवाभयंकर ॥ ३४॥ ग्रहाण सह पार्वत्या तव पूजां मया कृतां ॥ इति
संकल्प्य विधिवद्वाह्य पूजां समाचरेत् ॥ ३५॥ गुरुं गणपतिं चैव यजेत्सव्यापसव्ययोः ॥ क्षेत्रेशमीशकोणे च वलीका-
त्यायनीं यजेत् ॥ ३६॥ धर्मं ज्ञानं च वैराग्यं ऐश्वर्यं च नमोंतकैः ॥ सर्वैरग्न्यादिकोणेषु पादपीठेष्वनुक्रमात् ॥
आभ्यां च विंदुवर्गाभ्यामधर्मादीन सुपूजयेत् ॥ मातृरूपां चतुर्दिक्षु मध्ये नंतं सतारकं ॥ ३७॥ सत्वादींस्त्रि
गुणांस्तंतु रूपान्पीठेषु विन्यसेत् ॥ अधरूर्ध्वच्छदे मायां विद्यालक्ष्म्यौ शिवेन च ॥ ३९॥ तदंते चांबुजं भूयः सकलं
मंडलत्रयं ॥ पचकेसरकिंजल्कव्या...ताराक्षरैः क्रमात् ॥ ४०॥ पद्मत्रयं समभ्यर्च्य मध्ये मंडलमादरात् वामां ज्येष्ठां च
रौद्रीं च भागद्येर्दिक्षु पूजयेत् ॥ ४१॥ वामाद्यानवशक्तीश्च नवाक्षरयुता यजेत् ॥ हृदि बीजत्रयाद्येन पीठमंत्रेण
पार्चयेत् ॥ आवृतिप्रथमांगैस्तु पंचभिः मूर्तिशक्तिभिः ॥ त्रिंशद्भिर्मूर्तिभिश्चान्या विधिद्वयसमन्वितैः ॥
आनंताद्यापराबह्मोमातृभिश्च वृषादिभिः ॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च शिवसुरैः ॥ ४४॥ वृषभ
क्षेत्र चंडेशो दुर्गा च स्कंद नंदिनौ ॥ गणेश क्षेत्र पश्चैव स्वस्वलक्षणलक्षिताः ॥ ४५॥ अणिमा महिमा चैव गरिमा
लघिमा तथा ॥ ~~ईश~~ ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥ ४६॥ अष्टैश्वर्याणि चोक्तानि तेजोरूपाणि के

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वलं ॥ पंचभिर्ब्रह्मभिः पूर्वं हल्ले खाद्याभिरप्यनु ॥४७॥ अंगैरुमाद्यै रिंद्राद्यैः पूजो क्तामुनिभिः शिवे ॥ उमा श्चंडेश्वरा-
दीं श्च पूजयेदुत्तरादिभिः ॥४८॥ एवमावरणोपेतं तेजोरूपं सदाशिवं ॥ उमयासहितं देवमुपचारैः प्रपूजयेत् ॥४९॥
सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतैरपि ॥ पंचगव्यैः फलरसैः कुशगंधाहूमजैः ॥ ५० ॥ अभिषिच्य महादेवमुप
चारैः समाहितः ॥ कल्पयेद्द्विविधैर्मंत्रैरासनाद्युपचारकान् ॥ ५१ ॥ आसनं कल्पयेध्येमं स्वागतं विहितांज
लिः ॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुत्धोदके नतु ॥ ५२ ॥ तेनैवाचमनं दद्यान्मधुपर्कमधूत्तरं ॥ पुनराचमनं दत्वा स्ना
न मंत्रैः प्रकल्पयेत् ॥ ५३ ॥ उपवीतं तथा वासो भूषणानि निवेदयेत् ॥ गंधमष्टांगसंयुक्तं भस्मनापि निवेदये-
त् ॥ ५४ ॥ ततस्तिलाक्षतैर्युक्ता धौता धवलतंडुलाः ॥ पुष्पाणि विल्वमंदारकल्हारसरसीरुहं ॥ ५५ ॥ धत्तूरं कर्णि
२६१ कारं चद्रोणार्ककुशमल्लिकाः ॥ तुलसीमाधवी चंपकाशापामार्गदूर्वकाः ॥ ५६ ॥ बृहती कुटजादीनि यथालब्धा-
नि पूजयेत् ॥ [illegible] ॥ निवेदयेत्सुगंधीनि माल्यानि विविधानि च ॥ ५७ ॥ धूपं कालागरुं देवि दीपं च घृतसंयुतं ॥ यथापा-
यसं नैवेद्यं सघृतं सोपदंशकं ॥ मोदकापूपसंयुक्तं शर्करा घृतपाचितं ॥ मधुनाक्तदधियुक्तं जलतांबूलसंयुतं ॥ ५८ ॥
पायसेनैव हविषा जुहुयाज्ज्ञातवेदसि ॥ प्रतिष्ठाप्य हुताशं च भवाद्यैरष्टनामभिः ॥ ६० ॥ ततः स्विष्टकृदं तैर्हि नीराजन=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८९ मथाचरेत्॥ छत्रं च चामरं दिव्यं दर्पणं व्यजनं तथा॥६१॥ तौर्यत्रिकं नृत्यगीतं दद्याद्भक्त्या यशं भवे॥ समर्चयित्वा-
विधिवन्मं नैवेद्यिकतांत्रिकैः॥६२॥ यद्यशक्तः स्वयं निःस्वो यथा विभवमर्चयेत्॥ भक्त्या पुष्पेण दत्तेन प्रदोषे तुष्य
ते शिवः॥६३॥ अथांगभूतान् सकलान् गणेशादीन् प्रपूजयेत्॥ ऋक्सामयजुषोथर्वस्तुतिभिः पूजयेत्समां॥६४॥
प्रदक्षिणनमस्कारैर्नर्तनैश्च प्रसादयेत्॥ स्तुवीतैवं विरूपाक्षं प्रदोषेषु महेश्वरं॥६५॥ जयजय विश्वविधानदक्ष
शिक्षजयजय सर्वसुराधिनाथ॥ जयजय चारुशशांक फालमौले जयजय कालकला विहीनदेह॥६६॥ जयजय
कामहरांतकारे जयजय सामगणादिगण्य मूर्ते॥ जयजय पुण्यफलप्रदोरु विश्वमूर्ते जयजय सोमगभस्ति
वन्हिदृष्टे॥ जयजय नीलगलप्रसीद शंभो॥ जयजय दुरितांधकासुरारे जयजय विष्णुहराजमृगयु मूर्ते॥६७॥
जयजन्हुजयोरु शोभिमौले जयजय गरनीलचारुकंठ॥ जयजय पंकजासनाब्जनेत्र पूज्य जयजय पातकसं
ततिप्रणाशहेतो॥६९॥ जयजय कामितसर्वद स्वामी शंजयजय विश्वपते प्रसीद मां॥ जयजय सामजचर्मव-
स्त्र शंभो अनृणं मां कुरु देव मानुषादिमार्गे॥७०॥ आद्यो वाथ दरिद्रो वा स्तुवीतैवं महेश्वरं॥ तस्य यच्चिंतितं
कामं प्रयच्छति महेश्वरः॥७१॥ न तस्य पातकभयं न दारिद्र्यं ग्रहाद्भयं॥ भिषक्पतिपदाब्जं यः प्रपन्नो याति सद्गतिं॥७२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवमाराधयेद्देवं प्रदोषे लिंगरूपिणं ॥ ब्राह्मणान् शांभवांश्चैव भोजयेद्द्वादशावरान् ॥७३॥ दक्षिणाभिश्च तांबूलैः गं
धपुष्पाक्षतादिभिः ॥ शिवपूजेयमाख्याता सर्वाभीष्टफलप्रदा ॥७४॥ सर्वपापक्षयकरी ऋणदारिद्र्यनाशिनी ॥७५॥ ॥
ईश्वर उवाच ॥ कैलासे त्रिजगज्जननि त्रिसुमहान्नृत्तादरस्तेऽग्रतो भ्राजत्पन्नगमौलिरत्नसुमहामालालसद्द
क्षसं ॥ नंदिस्कंदगणेश्वरोद्धतमहातौर्यत्रिकाणां स्वनैः कैलासेश्वरपूजया त्रिभुवनं विस्मापयन्नास्थितः ॥
७५ ॥ प्रदोषेषु शेषाहिभूषाविशेषं विषं धारयंतं सुपूषो हनेत्रं ॥ सदोषाकराकारयोषार्धगात्रं प्रदोषेण संपूजय-
न्तस्तदा भस्मभूषा ॥७६॥ प्रदोषपूजारहितासदोषा दुःशोफजातजनुषो वरमानुषास्ते ॥ विद्वानका भुवि भ
वंति सुसौख्यसख्यनिद्रातितंद्रितमनस्तनवो दरिद्राः ॥७७॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे
२२० शिवगौरीसंवादे त्रयोदशीप्रदोषपूजाकथनं नाम त्रिंशोध्यायः ॥ ३० ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥
श्रीमहादेवाय नमः ॥ श्रीमहादेव उवाच ॥ त्रयोदशीप्रदोषेभ्यो मद्वारेण संयुतः ॥ प्रदोषो मे महाप्रीतिदश्च कोलोकना-
र्चने ॥१॥ शनिप्रदोषे संप्राप्ते शुक्ले कृष्णेऽथवा शिवे ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेदथ ॥२॥ ब्रह्मचारी गृही भिक्षु
र्वनी च नरनार्यपि ॥ नित्यं नैमित्तिकं काम्यमिति त्रेधास्य संस्थितिः ॥३॥ योऽयथाकामयेद्वापि द्वादशाब्दं समा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१० चरेत्॥ उद्यापनं चास्य शिवे सोमवारसमो विधिः॥४॥ कालो हि माघमासोऽस्य श्रावणे वा महेश्वरि॥ शनिप्रदोषयोगेन यदा अ॰३१
संपद्यते तदा॥५॥ कुर्यादुद्यापनं चास्य आजन्मीनैव माचरेत्॥ विधिमस्य प्रवक्ष्यामि पूजायां शृणु शैलजे॥६॥ नद्यादौ
च नरस्स्नात्वा शुक्लवासा जितेंद्रियः॥ प्रक्षाल्य पादावाचम्य यतवाक् शुद्धमानसः॥७॥ अग्निरित्यादिभिर्मंत्रैर्भस्म
नोद्धूल्य विग्रहं॥ त्रियायुषत्रिपुंड्राको रुद्राक्षोरुसरावृतः॥८॥ घटित्रयावशेषेण नित्यकर्म समाप्य च॥ लिंग-
स्य पार्श्वमागत्य कुर्यात्संकल्पपूर्वकम्॥९॥ संपाद्य पूजासंभारं काललब्धं च यच्छिवे॥ त्रयोदश्यां दिवा स्थित्वा
निराहारो महेश्वर॥१०॥ नक्तं भोक्ष्यामि देवेश त्राहि मां कृपया हर॥ सर्वपापक्षयकरो ऋणदारिद्र्यनाशकः॥११॥
दुर्लभः शनिवारेण युक्तो मुक्तिप्रदो नृणां॥ प्रदोषो दुर्लभतरः तत्र पूजापि दुर्लभा॥ देव्युवाच॥ भगवन्केन विधि
ना समभ्यर्च्य महेश्वरं॥ प्रदोषे चास्त दोषे ते शनियुक्ते शिवार्चकः॥ सर्वपापविनिर्मुक्तः सर्वान्कामानवाप्नु
यात्॥ शिव उवाच॥ सायं संध्या प्रदोषे तु त्रयोदश्यां शनेर्दिने॥ लब्धश्चेच्छुक्लकृष्णो वा शिवं दृष्ट्वा महाफलं॥
स्थावरे जंगमे वापि लिंगे तुंगे महेश्वरि॥ उदये द्वादशी किंचित्प्रदोषे लिंगमर्च्य यत्त्रयोदशी॥१५॥ शिवार्चनेन यत्
पुण्यं तत्पुण्यं नान्यधर्मतः॥ वेदवादैर्न योगैर्वा यागैर्वा किं तपस्यया॥१६॥ शनिप्रदोषे लिंगार्चा एकबिल्वप्रपूजनात्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शनिप्रदोषं संप्राप्य प्रातः कृत्यं समाप्य च॥ १८॥ स्नात्वा नद्यां तडागे वा धौतवासा जितेंद्रियः॥ उपास्य पश्चिमां
संध्यां भस्मरुद्राक्षभूषणः॥ १९॥ शिवागारं प्रविश्याथ वितानसमलंकृतं॥ पुष्पमालावृतं चारुतौर्यत्रिकनिनादि
तं॥ उपविश्यासनेशुभ्रेप्राणानायम्य वाग्यतः॥ भूतशुद्धिं ततः कृत्वा मातृकाक्षरपूर्वकं॥ २०॥ मंत्रन्यासं ततः कृ
त्वा शिवपीठं समर्चयेत्॥ आधारशक्तिपूजां च कुर्यादागममंत्रतः॥ २१॥ उमामहेश्वरं लिंगे स्थाप्य पीठे मनोरमे॥
पंचब्रह्मविधानेन देवं ध्यायेद्विचक्षणः॥ २२॥ मूलमंत्रात्मकं देवमंबिकासहितं शिवं॥ ध्यात्वा चावाहयेद्देवं पद्मस्थं
पद्मसंनिभं॥ २३॥ चतुर्भुजं प्रसन्नास्यं वरदाभयपाणिनं॥ अक्षमालाधृतकरं चंद्ररेखाविभूषितं॥ २४॥ नील
कंठं त्रिनेत्रं मौल्यां च मल्लामपार्श्वगां॥ सोमधामाननां चारुचंचच्चंद्रकलाधरां॥ २५॥ प्रसन्नास्यां सुदं
२७। तीं च ताटंकपरिमंडितां॥ सर्वाभरणशोभाढ्यां वासःस्रग्गंधभूषितां॥ २६॥ एवं ध्यात्वार्चयेद्देवं श्रद्धया परमे
श्वरं॥ अत्रागच्छ महादेव पार्वत्या सह शंकर॥ २७॥ गृहाण मत्कृतां पूजामासनं परमं शुभं॥ भवायेति शिवे
पाद्यं वामायेति तथाचमं॥ अर्घ्यं सद्येति मंत्रेण सपुष्पं विनिवेदयेत्॥ अघोरेण शिवे स्नानं वस्त्रं तत्पुरु
षेण हि॥ २९॥ ईशानेति च मंत्रेण उपवीतं प्रकल्पयेत्॥ यज्ञोपवीतमंत्रेण दद्यादुत्तरवाससं॥ ३०॥ गंध=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माल्याक्षतान्दद्यान्नमः सोमाय मेत्रतः॥ त्रियंबके तिमंत्रेण बिल्वपुष्पाणि चार्पयेत्॥३१॥ इमा रुद्रेति मंत्रेण अक्षतांश्च स-
मर्पयेत्॥ मानस्तोके तिधूपं चदीपं मातेपितेतिच॥३२॥ यच्छं चयोश्च मंत्रेण नैवेद्यं दापयेच्छिवे॥ परीणे तिपरीवा
रं पूजयेन्नेमयतन्नतः॥३३॥ ब्रह्माणं भास्करं विष्णुं जयं विजयमेव च॥ दुर्गां गणपतिं चैव यजेव्द्याच्यादियोगतः॥
३४॥ नंदीशं क्षेत्रपालं च चंडेशं भैरवं तथा॥ कैलासादीनथाद्रींश्च कपालं शूलमेव च॥३५॥ अथ संपूज्य विधिव-
न्मदग्रे वृषभेश्वरं॥ स्तुतिश्रुतेति मंत्रेण वृषं मे धर्म रूपिणं॥३६॥ मीढुष्टमेति च स्कंदं गणानां त्वा गणाधिपं॥
सर्वोपचारैर्देवस्य देव्या सह समर्चनं॥३७॥ परिवारान्समभ्यर्च्य तत्तन्मंत्रैर्विशेषतः॥ महानैवेद्यमीशाय देव-
स्य त्वेति मंत्रतः॥३८॥ प्रणामप्रक्रमं चैव नीराजनपुरःसरं॥ छत्रचामरदानं च घंटातौर्यत्रिकं शिवे॥३९॥
दद्यात्समारयेद्देवं क्षम्यतामिति सत्तमे॥ होमं चाग्यतः कुर्यात्प्रतिष्ठाप्य हुताशनं॥४०॥ अष्टोत्तरसमिद्भिश्च बै-
ल्वाज्यचरुणा शतं॥ शतरुद्रेण जुहुयाद्वास्तोष्पत्यपि स्विष्टकृत्॥ ततस्तु वीतदेवेशं शंकरं शशिशेखरं॥
भवाय भवनाशाय महादेवाय धीमहि॥४२॥ भद्राय नीलकंठाय शर्वाय शशिमौलिने॥ उग्रायोग्राघनाशाय भी
माय भयनाशिने॥ ईशानाय नमस्तुभ्यं पशूनां पतये नमः॥ यथा समस्ताभयदः पशूनां पाशमोचकः॥४४॥ तथा त्वं ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमस्तुभ्यं ऋणदौर्भाग्यनाशकः ॥ नमो गौर्यै महादेव्यै भवान्यै ते शिवे नमः ॥ ४५ ॥ शिवप्रदायै शर्वाण्यै सृष्टिस्थित्यं
त हेतवे ॥ नमो स्वात्ति विनाशिन्यै तुभ्यं सर्वभयापहे ॥ ४६ ॥ तुभ्यमानंदरूपिण्यै नमः कमललोचने ॥ विद्यायै
वेदमात्रे च वेदशक्ति स्वरूपिणि ॥ ४७ ॥ अंबिके ते नमो नित्यं ममास्तु वरदः शिवः ॥ इत्युपस्थाय मां देवि पुनः कु-
र्यात्प्रदक्षिणां ॥ ४८ ॥ कृत्वा सव्यापसव्येन प्रदक्षिण विधानतः ॥ शतमष्टोत्तरं त्वां च प्रणम्य च पुनः पुनः ४९ ॥ सव्या
पसव्यमानेन सोमसूत्रं न लंघयेत् ॥ शनैः शनैः क्रमात्कुर्यात्त्वरालस्यादिवर्जितः ॥ ५० ॥ देवं संमुखतः कृत्वा ब्रा-
ह्मणांश्च विशेषतः ॥ प्रदक्षिणं क्रमात्कुर्याद्वृषेण सहितं शिवे ॥ ५१ ॥ यानि कानि च पापानि जन्मांतरकृतानि-
च ॥ तानि तानि विनश्यंति प्रदक्षिण पदे पदे ॥ ५२ ॥ एवं प्रदक्षिणं कृत्वा नमस्कृत्य पुनः पुनः ॥ गणयित्वापरं भूयस्त-
२७२ त्कोटिगुणितं भवेत् ॥ ५३ ॥ अंगप्रदक्षिणा देवि ततः कोटिगुणोत्तरा ॥ प्रतिप्रदक्षिणं त्वां साष्टांगं प्रणमेद्भुवि ॥ ५४ ॥
शिवस्याग्रे समे देशे भूमिसंलग्नमस्तकः ॥ अवीतु विधिवद्दद्यादर्घ्यमष्टांगसंयुतं ॥ ५५ ॥ गोक्षीरं च कुशाग्रा-
णि घृतं दधि च तंडुलान् ॥ सिद्धार्थकास्तथा दूर्वाः गंधपुष्पाक्षतास्तथा ॥ ५६ ॥ अर्घ्योष्टांग इति प्रोक्तः तदभावेसु
मैर्युतं ॥ पंचामृतं पंचगव्यम् गंधपुष्पकुशोदकं ॥ ५७ ॥ फलजालरसं चापि घृताभ्यां तु कारयेत् ॥ भयरोगादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२

दारिद्र्यपापंक्षुदपमृत्यवः॥ ५८॥ ऋण शोकं मनस्तापं नश्यं तु मम सर्वदा॥ मंत्रेणानेन दत्वार्घ्यं त्रिवारं प्रार्थयेच्छिवं॥ ५९॥ प्रसीद देव देवेश प्रसीद परमेश्वर॥ प्रसीद सोम सर्वज्ञ प्रसीद करुणाकर॥ ६०॥ एवं संप्रार्थ्य देवेशमुमां चार्पितते।ऽव्रती॥ शनिप्रदोषयोगे मे व्रतं संपूर्णतामियात्॥ ६१॥ प्रसादं कुरु देवेश येन मुच्ये ऋणार्णवात्॥ जन्मांतरसहस्रेषु यदृणं च कृतं मया॥ ६२॥ दैवं पित्र्यं मानुषार्षं मुच्येऽऋणचतुष्टयात्॥ अनृणोहं भविष्यामि धनाढ्यो हं भवामि च॥ ६३॥ इत्थं संप्रार्थ्य देवेशमाचार्यं पूजयेच्छिवे॥ होमशेषं दापयेच्चाचार्यं च दद्यात्पयस्विनीं॥ अरोगां च सवत्सां च कांस्यदोहेन संयुतां॥ अणुमात्र प्रदानेन प्रदोषेऽपि शने दिने॥ ६४॥ इहामुत्राक्षयं पुण्यं भोगानाप्नोति शाश्वतान्॥ ततो वृषभमभ्यर्च्य गंधपुष्पाक्षतादिभिः॥ ६६॥ धूपदीपौ च नैवेद्यं तांबूलं श्वेतवस्त्रकं॥ वृषाय धर्मरूपाय शिवाय शिवमूर्तये॥ ६७॥ इत्यर्घ्यं प्राप्य दत्वा तु प्रार्थयेत्तं यतव्रतः॥ अंडं स्पृष्ट्वा जपेन्मंत्रमिमं तस्य वृषस्य च॥ ६७॥ शृंगमध्ये शिवं दृष्ट्वा समाहितमनाः शिवे॥ धर्मत्वं वृषरूपेण जगदानंदकारकः॥ अष्टमूर्त्तेरधिष्ठानमतः पाहि समामघात्॥ पृथिव्यां यानि तीर्थानि सागरांतानि यानि वै॥ ७०॥ अंडमाश्रित्य तिष्ठंति प्रदोषे गोवृषस्य च॥ कुर्यान्न दूषणं स्पृष्ट्वा शंकरस्य विलोकने॥ ७१॥

प्रदोषे शंकरं दृष्ट्वा वृषशृंगांतरे शिवे ॥ ब्रह्महत्यायुतं नश्येद् भुक्तिं^ च विंदति ॥७२॥ एवं दृष्ट्वा तु भुंजीयाच्छ्रां
भवैः क्षारवर्जितं ॥ व्रतं समर्प्य देवाय मंत्रेणानेन शांभवि ॥७३॥ व्रतेनानेन चीर्णेन प्रसन्नो भव शंकर ॥ त्वद्भक्ति
परमं ज्ञानं मुक्तिं चैव प्रयच्छ मे ॥७४॥ अज्ञानाज्ज्ञानतो वापि यत्कृतं पूजनं तव ॥ शनिप्रदोषयोगेस्मिन्तदस्तु प्रीतिकृत्तव ॥
॥७५॥ एवं कृत्वा व्रतं भक्त्या संपूज्य शिवमंबिकां ॥ सर्वत्र फलमवाप्नोति ममलोके सा विंदति ॥७६॥ इदं व्रतं सप्त कृत्वा यः करोति जितेंद्रियः ॥
महत्फलमवाप्नोति ऋणकोट्या विमुच्यते ॥७७॥ एकविंशति कृत्वस्तु व्रतमेतत्सुदुर्लभं ॥ पुत्रादीन्लभते सद्यो भुक्तिं मुक्तिं च विं
दति ॥७८॥ व्रतं संपूर्णतां प्राप्य गामेकां वृषभं शिवे ॥ शिवाय वाद्विजाय वा दत्वा चाशीः प्रयोजयेत् ॥७९॥ ईश्वर उवाच ॥ जीपप्रहीण
स्य समस्तलक्षणैः क्रियाविहीनस्य निकृष्टजन्मनः ॥ प्रदक्षिणीकृत्य शशांकशेखरं प्रयास्यतः कस्य न सिद्धिरग्रतः ॥८०॥=
273 शश्वद्द्विरूपाक्षपदं प्रदोषे नान्यं सुरं चिंतयते स धन्यः ॥ मान्यः समो मान्यतरोपि वा शिवे मन्येन चान्यं किल शैलकन्ये ॥८१॥
संतप्तशूले निवसेत्स मा:शतं मां विष्णुतुल्यं मनुते प्रदोषे ॥ सदोष एवेह भवेत पापकी सब्रह्महत्यायुतपातकी नरः ॥८२॥ संद
र्शनं संस्तवमं विके मुदा प्रदोषकालेषु सुरेतराणां ॥ कुर्वन्महत्पातकमभ्युपैति तस्मात्तदा नान्यमना भवेत ॥८३॥ पद्दधिक्षीर
मध्वाज्यसशर्कराभिः शिवे नारिकेलाम्रजंबीरसारैः ॥ सुगंधोदकैः पुष्पबिल्वादिभिर्मा समभ्यर्च्य मुक्तः शिवे धूपदीपैः ॥८४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९३ वरान्नैः शिवे पाय सापूप शाकैः॥ सुतांबूल नीराजन च्छत्रदानैः॥ प्रणामै स्तव प्रक्रमै र्नृत्य तूर्य गेयै॥ र्वरैश्चा मरैर्वीजको मात्रियः- अ० ३१
स्यात्॥ ८५॥ ब्रह्मांड मंडल गतानि सुतीर्थ खंडान्यायं ति द्रष्ट्र खरांड गतानि तत्र॥ शृंगां तरेषु निवसे दथ धर्मजालैस्तस्मात्प्रदो
ष समये क्षण कृत्य पूशेन्मां॥८६॥ भूमौ पुत्र कलत्र मित्र सहितः सत्रातिरात्रादिभिः॥ यष्टारो त्र भवंति धान्य धनकैः गो
भिश्च नागाश्वकैः॥८७॥ प्रासादांबर भूषणं मम शिवे प्राप्यं प्रसादोच्च यात्॥ तस्मिं त्तां प्रदिशामि संपद धिकां मुक्तिं प्रदोषा
र्चके॥८८॥ आनंदांबुज कंद एष गिरिजे मंद प्रदोषे मम मंदारोत्तम मालया सुमगणैः वृंदारवृंदोत्तमाः॥ सानंदांबुधिवीचिमग्न
हृदयाः संपूज्य यंति द्रुतं कुंदा मंद मरंदमिंदु शकलालंकार मीशं तदा॥८९॥ शशि खंड शिखंड खंड परशुं विधिमुं
डामल कुंडली शमालं नगकोदंड धरं त्व खंड बिल्वैः॥ प्रकटोच्चंड नतांडवं शिवे र्च्य नेमु॥९०॥ शत मुख मुख मुख्य लेख
जालाः॥ सुमुखा एवनमंति शंकरांघ्रिं॥ सकलाघौघहरे प्रदोष काले प्रमथा यल्लकलिंग लोक नम्रं हृष्टाः॥९१॥ इति श्री
शिवरहस्ये महादेवाख्ये एकादशांशे शनिप्रदोष माहिमा नाम एकत्रिंशोध्यायः॥ ३१॥ श्री काशीविश्वेश्वरार्पणम-
स्तु॥ श्री महादेवाय नमः॥ श्री ईश्वर उवाच॥ शिवरात्रिव्रतं पुण्यं ममैव प्रीतिदं परं॥ शिवो लिंग तयोद्भूतः तस्यां रात्रौ महेश्वरि॥
ब्रह्म विष्ण्वोर्बोधनार्थ चतुर्दश्यां निशि प्रिये॥ माघे कृष्ण चतुर्दश्यां सोम पाताद्ध ऋक्षके॥ २॥ सातिथिर्दुल भतरा योगयुक्ता विशेषतः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माघकृष्णचतुर्दश्यां पूज्योऽहं लिंगमध्यमे ॥ ३॥ रात्रौ यामचतुष्टं वै अनिद्रो पोषणादिभिः ॥ नैत्यकं व्रतमेतद्धि सर्वेषां सर्वदा शिवे ॥
त्रयोदश्य र्धघटिका यदि तस्यां गता भवेत् ॥ प्रदोषपूजा तत्रैव कार्या सामहरादिमे ॥ ५॥ निशीथ समये ग्राह्या माघकृष्णच-
तुर्दशी ॥ तस्यां समस्तपुण्यानि तीर्थान्यायतनानि च ॥ ६॥ स्थावरे वा चरे लिंगे संक्रमिष्यंति पार्वति ॥ उपवासप्रभावेन अतंद्र
निशि जागरात् ॥ ७॥ चतुर्यामार्चनाद्देवि बिल्वपत्रेण केवलं ॥ अक्षय्यं पुण्यमाप्नोति शिवसायुज्यमश्नुते ॥ ८॥ शिवे मे
शिवरात्रिं यः पूजाजागरणैर्नयेत् ॥ अखंडितव्रतीस स्यादाखंडलन्शतं वसेत् ॥ ९॥ शिवलोके सर्वभोगैः सुरासुरनमस्कृ-
तः ॥ नित्यं च कर्मिकं देवि शिवरात्रिव्रतं मम ॥ १०॥ ममैव भक्तो यो देवि शिवरात्र्यर्चको भवेत् ॥ पूजाजागरणोपेतो रात्रौ या-
मचतुष्टये ॥ ११॥ गणत्वमक्षयं तस्य मम कैलासमूर्धनि ॥ वर्षे वर्षे महादेवि नरनार्यो द्विजांत्यजाः ॥ १२॥ शिवरात्रौ महादेवं नि-
२७५ त्यं भक्त्या यजंति हि ॥ देवा विधींद्रविष्णवाद्यास्सदा राश्चासुरा द्विजाः ॥ १३॥ शिवरात्र्यां महादेवं पूजयंति दृढव्रताः ॥ शिवरा-
त्रिव्रताद्देवि त्रिःसत्यं न परात्परं ॥ १४॥ न पूजयति भक्तेशं रुद्रं त्रिभुवनेश्वरं ॥ योऽन्नभुक् क्रिमिभूक् स स्याद् अनिद्रो
ऽजागरो भवेत् ॥ १५॥ नानायोनिसहस्रेषु भ्रमतेऽसोऽधमो नरः ॥ द्वादशाब्दिकमेवं स्याच्चतुर्विंशाब्दिकं तु वा ॥ १६॥ यावज्जन्म मह-
पुण्यं कुर्वन्मद्गणपो भवेत् ॥ माघकृष्णचतुर्दश्यां भौमः सोमः प्रशस्यते ॥ १७॥ भौमवारेण संयुक्ता कृष्णांगारचतुर्दशी ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्यार्द्रा पातयुक्ता चेच्छिवयोगः सुदुर्लभः ॥१८॥ स जन्मायुत पापघ्नस्तस्य बिल्वैकपूजनात् ॥ शिवयोगस्य योगो वै तद्भवे दुत्तमोत्तमं ॥१९॥ त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ॥ अंते चैव शिनीवालो त्रिस्पृश्यां शिवमर्चयेत् ॥ अर्धरात्रादधश्चोर्ध्वं युक्ता यास्या च्चतुर्दशी ॥ तस्यामेवमर्कुर्वीत सोऽश्वमेध फलं लभेत् ॥ प्रदोषव्यापिनी चापि ग्राह्या सेयं शिवार्चकैः ॥ २०॥ प्रदोषवत्कलाव्याप्तौ परेषां संप्रशस्यते ॥ पूर्वापरे न्हि देवेशि निशीथव्याप्यगोत्तमा ॥२१॥ जागरं चोपवासं च तस्यां कुर्याच्छिवार्चकः ॥ देव्युवाच ॥ शिवरात्र्यां महादेव कथमर्चंति साधकाः ॥२२॥ को विधिस्तस्य नियमः तत्सर्वं वद मे विभो ॥ ॥ महेश्वर उवाच ॥ कथयामि विधिं तेद्य शिवरात्रौ समर्चने ॥ २३॥ शृण्व पर्णेन मकाश्यं रहस्यं परमं मम ॥ स्थावरे वा चरे वापि मद्बाण स्फाटिके पि च ॥२४॥ धातुजे वा यथा जोषं पूजा याम चतुष्टये ॥ संपाद्य पूजासामग्रीं शिवक्षेत्रे गृहेऽपि वा ॥ २५॥ प्रातः कृत्यं च निर्वृत्य दुष्टालाप विवर्जितः ॥ स्नात्वा नद्यां तटाके वा धौतवस्त्रधरः शुचिः ॥ २६॥ सितभस्म त्रिपुंड्रांकः रुद्राक्षाभरणान्वितः ॥ गांगोमयेनोपलिप्य रंगवल्ल्यादिमंडितां ॥२७॥ वितान मंडपैर्युक्तां वेदिकास्तरणावृतां ॥ कल्पयेत्पीठमुत्कृष्टं समासीनः कुशासने ॥ २८॥ पंचामृतं फलरसं पंचगव्यं सु[illegible]मान्यपि ॥ बिल्वपद्मार्क कल्हार नवनीलोत्पलानि च ॥२९॥ दमनो शीरकादीनि संपाद्यांबु च चंदनं ॥ धूपदीपौ फलानीशे=

वाग्यतो हविरेव च ॥ ३० ॥ तांबूलं सुवासांसि संपाद्य नियमान्वितः ॥ संकल्प्य च शिवस्याग्रे ध्यायन्नामेव केवलं ॥ ३१ ॥
जागरेणोपवासेन पूजा यामचतुष्टये ॥ करोमि तव देवेश गृहाणांबा समान्वितः ॥ ३२ ॥ आचम्य प्राणानायम्य
जपेत्पंचाक्षरं शिवे ॥ सांगन्यासं सहस्रं मे यामेऽपपूजकः ॥ ध्यायेद्देवं विरूपाक्षं शिवरात्र्यां शिवार्चकः ॥ देवं
नित्यं महेशं रजतगिरिवपुं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं पशुमृगवराभीतिहस्तां तरंगं ॥ पद्मासीनं
सहांबं वृतगणपगणैः व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं सर्वपापादिहारं ॥ ३३ ॥ ध्यात्वा
ऽऽवाह्य महालिंगे सपुष्पांजलिरीश्वरि ॥ पाद्यार्घ्याचमनादीनि दद्यात्पंचाक्षरेण हि ॥ ३४ ॥ पंचामृतैः पंचग-
व्यैः शिवे फलरसैरपि ॥ गंधपुष्पकुशांबूनि दद्याद्रुद्रेण भामिनि ॥ ३६ ॥ घृतदीपावलीं दद्यात् धूपं गुग्गुलुसंयुतं ॥ कु-
२७५ र्यात्धाराभिषेकं मे रुद्रैकादशसंख्यया ॥ ३७ ॥ तौर्यत्रिकैस्तदादेवि शिवरात्र्यां शिवे मुदा ॥ सकूर्चं तर्पयेदंते नायेत्य
छनामभिः ॥ ३८ ॥ किंचिद्दत्वा यनैवेद्यं परिमृज्याथवा ससा ॥ पीठे संस्थाप्य देवेशं गंधपुष्पाक्षतैर्यजेत् ॥ ३९ ॥ भ-
स्मना बिल्वकुसुममालिकाभिर्महेश्वरि ॥ भूषणैर्भूषयेदीशं पद्मकल्हारचंपकैः ॥ ४० ॥ मंदारैः कनकैः श्वे-
तपाद्मनकादिभिः ॥ शताष्टनामभिर्वापि नाम साहस्रतोपि वा ॥ ४१ ॥ मूर्तयोष्टौ शिवस्यैताः पूर्वादिक्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मयोगतः॥ पूजयेत्स्कंदनंदीशौ गणचंडेश्वरादिकान्॥ ४२॥ उमांच भव पार्श्वेच पूजयेदुपचारकैः शर्वाय क्षितिरूपाय-
भवायजलमूर्तये॥ ४३॥ रुद्राय तेजोरूपाय उग्राय पवनात्मने॥ भीमायाकाशरूपाय यजमानाय पशुपायच॥ ४४॥
महादेवाय सोमाय ईश सूर्यात्मने नमः॥ इति संपूज्य देवेशमष्टमूर्त्तिं पिनाकिनं॥ ४५॥ गणेशं भैरवं दुर्गां स्कं-
दनंदीश्वरावुभौ॥ चंडेशंच गणेशांश्च तत्तन्मंत्रैर्यजेच्छिवां॥ ४६॥ मूलमंत्रेण तां शक्तिं गंधपुष्पाक्षतादिभिः॥
धूपंदीपं ततो दद्यान्नैवेद्यं भक्ष्यभोज्यकं॥ ४७॥ तांबूलं फलजालंच पानीयं मुखवासकं॥ नीराजनं ततो दद्या
च्छत सहस्रवर्तिकं॥ ४८॥ चामरं दर्पणं छत्रं वितानं ध्वजमेवच॥ व्यजनं देवि दद्याद्वित्तमवंचयन्॥ ४९॥ नमेत्प्रद
क्षिणं स्तोत्रं ऋक्सामाथर्वयाजुषां॥ कुर्यान्नृत्तं गीतवाद्य वीणावेणुमृदंगकान्॥ ५०॥ निवेदयित्वा देवाय स्तोत्रमे
तत्पठेन्नरः॥ विश्वाधिक त्रिदशनायक देवदेववंद्यारुवंदितपदाब्ज महेश शर्व॥ पाह्यंनया शशिकलामलचारुमौ
ले मामाशु लोकय भवांबुधिवीचिलग्नं विश्वेश विश्वजनकाव्यय सोमधाम भूतावशेषमहिमागम वामदेव॥
५२॥ कामांगनाशन गराशन कालकाल मां पाहि संसृतिजगद्भयमाशु मीश॥ कंदर्पदर्पहर सर्प विशोभितांग गं-
र्तासनस्थगजचर्मपरीतदेह कर्त्तात्वमेव जगतां परमेश हर्त्ता पातात्वमीश परिपाहि भवाब्धिमग्नं॥ ५३॥ हेवि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वनाथगणनाथ सुमन्मथारे मन्नाथनाशि महाघच याव्य यचंद्रचूड ॥ पाहीशमाकधिया भवपाशलग्नं मग्नंमहाभव समुद्रसुपं क्लिंमां ॥ ५४ ॥ व्यक्षाक्षय्यफल प्रदाव्ययवि भोदक्षादिदीक्षा हिदीक्षा पहउक्षोर्ध्वांगगतामित महावीक्षा दिदग्धासुर ॥ कक्षादिस्थितपक्षपात सुदृशासंवीक्ष मामीश्वर पक्षींद्र प्रियवाहपूजितपदप्रत्यक्ष मुक्तिप्रद ॥ ५५ ॥
इत्थं याम चतुर्ष्वेवं संस्तुवीत महेश्वरं ॥ प्रत्येक मर्घ्यं दद्याद्वै सपुष्पांबु विमिश्रितं ॥ ५६ ॥ नमः शिवाय शांताय सर्वपापहरायच ॥ शिवरात्रौमहा यादत्त मर्घ्यं प्रीतिकरस्तु मे ॥ मयाकृतान्यनेकानि पातकानिच शंकर ॥ गृहाणार्घ्यमुमाकांत शिवरात्रौप्रसीदमां ॥ दुःखदारिद्र भारैश्च दग्धोहं पार्वती पते ॥ ५७ ॥ मामर्घ्य दानात्सुप्रीतः सुखिनं कुरु शंकर ॥ मयाकृतान्य
२७८ घौघानि हरशंकर शंकुरु ॥ ५८ ॥ शिवरात्रौ ददाम्यर्घ्यं शिवरात्रौप्रसीद मे ॥ प्रतिप्रहरमेवस्यादर्घ्यादला विचक्षणः ॥ ५९ ॥ दंडवत्प्रणतो भूत्वास्तुत्वारत्वार्घ्यमादरात् ॥ एकाग्रप्रणतो भूत्वास्तुत्वा देवं क्षमापयेत् ॥ ६० ॥ अंगहीनं क्रियाहीनं विधिहीनं महेश्वर ॥ पूजितोसि मयादेवतत्क्षमस्वघृणानिधे ॥ ६१ ॥ यच्चाप्युपहतैः पुष्पैरशस्तैर्भावदूषितैः ॥ केशकीटापविद्धैश्च पूजितोसिमया प्रभो ॥ ६२ ॥ अन्यथासक्त चित्तेन क्रियाहीनेनया विभो निद्रातंद्राहतांगेन क्षुत्साम फल भक्षणैः ॥ ६३ ॥ तामसेनच भावेन हीनं मंत्राक्षरेणच ॥ पूजितोसिमया=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवतत्सर्वंसम्यतां मम॥६४॥ व्रतं संपूर्णतां यातु फलं चाक्षय्य मस्तु मे॥ एवं स्तुत्वा नमस्कृत्य पूजास्थानं विसर्ज
येत्॥६५॥ नैवेद्यादि च तत्सर्वं भस्मांगाय निवेदयेत्॥ परेद्युः कृतकर्मा च संपूज्य शिवमव्ययं॥६६॥ ब्राह्मणा-
न्भोजयेच्छक्त्या गंध पुष्पाक्षतार्पणैः॥ एवमीशव्रतं कुर्यान्नैत्यकं प्रतिवर्षके॥६७॥ माघकृष्णचतुर्दश्यां सर्व
कामफलप्रदं॥ चतुर्विंशद्द्वादशाब्दे कुर्यादुद्यापनं बुधः॥६८॥ चतुर्दशी दर्शयुक्ता अष्टमी नवमीयुता॥ माघ-
कृष्णचतुर्दश्यां पूज्य लिंगं पिनाकिनः॥६९॥ आजन्मो तु न तत्कुर्यात्सोक्षय्यां लभते गतिं॥ पारणं तत्र कर्त्तव्यं रौ
द्रर्क्षे ना पुनर्वसौ॥७०॥ कलशादश चाष्टौ वा सोदकानभिपूर्य च॥ गंध पुष्पाक्षत फलन्क्रत्विजो ष्टौ निमंत्र-
येत्॥७१॥ आचार्यं वरयेदेकं ब्राह्मणं वेदपारगं॥ गणेशं स्कंद नंदीशं काली भद्रं सरस्वतीं॥७२॥ वृषभं त्वा
मुमां देवि कलशेष्वभितो यजेत्॥ मृत्युंजयेन मंत्रेण वन्हौ हुत्वाशताष्टकं॥७३॥ चरुणा सघृतेनेशि ब्रा-
ह्मणान्भोजयेच्छतं॥ यथाशक्त्या धेनु वस्त्रं हिरण्यं क्त दक्षिणां॥७४॥ ऋत्विग्भ्यो था चार्याय दद्यादुद्याप-
नं स्मृतं॥ एतद्वै संग्रहेणैव कुर्यादुद्यापनं शिवे॥७५॥ शिवरात्रिव्रतस्यास्य सर्वकामप्रपूरणं॥ ईश्वर उ-
वाच॥ भूतायामथ भूतनाथ मगजे माघ्यां ममर्क्षे नरः पापौघान्न बिभेति शंकर पद ध्यानानुरक्तः सदा॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुक्तः संसृतिघोरपाशतइमांगो सर्वदा नाधिकां॥ दत्वा यत्फलमन्युपास्ति निशितं तत्प्राप्य मामेति च ॥ ७६॥ इतिश्रीशिव
रहस्ये महादेवाख्ये एकादशांशे महाशिवरात्रिव्रतकथनं नामद्वात्रिंशोध्यायः॥ ३२॥ श्रीकाशी विश्वेश्वरार्पणम-
स्तु॥ श्रीमहादेवायनमः॥ शिवउवाच॥ मासिमास्यपि देवेशि कुर्याच्चैव चतुर्दशीं ॥ सामासशिवरात्रीति कृ
पिताकृष्णपक्षगा ॥१॥ चैत्रादिकृष्णपक्षेषु तत्तन्मासि चतुर्दशीं ॥ प्राप्य संपूजयेद्देवं लिंगमूर्त्तिं सदाशिवं ॥ रात्रौ
यामचतुष्टेषु पूजयेद्बिल्वपत्रकैः॥ एकभुक्तेननक्तेनसोपवासेनवा शिवे ॥ ३॥ तत्रकृष्णचतुर्दश्यां सायं शौचं निव-
र्त्यच॥ नद्यावादेवखातेवा स्नानमंत्रैः कुशैर्युतः॥ धृतवासाः भस्मयुतस्त्रिपुंड्राक्षधरो भवेत् ॥ संशोध्य कलशं
२२:७ शुभ्रं स्वयमंबुप्रसाधयेत् ॥ वस्त्रपूतंतदादेवि सुपुष्पाणि तदाव्रती ॥ गृहीत्वा नियमोपेतः गृहेवापि शिवालये ॥६॥
संशोध्य गोमयांभोभिः स्थंडिलं शिवपूजने ॥ वितानपुष्पजालाद्यं मंडपं परिकल्पयेत् ॥७॥ पीठं तत्र निधायै
वप्राङ्मुखोदङ्मुखोपिवा॥ चैलाजिनकुशेस्थितासंपाद्यार्घ्यांच मं शिवे॥८॥ पक्षाल्यधातुपात्राणि नवानि
कलशंतथा॥ शंखंच धूपदीपैश्चसपुष्पांबु निसाधयेत्॥९॥ पंचामृतं पंचगव्यं तथा फलरसं शिवे ॥ गंधपु-
ष्पाक्षतांस्तत्र संस्थाप्याथ निवेदनं ॥१०॥ तांबूलंचैववासोथ रत्नालंकरणानिच॥ संकल्प्य नियमोपेतः मासिकीं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरात्रिकीं ॥११॥ ततोऽथ प्रथमे यामे संपूज्यैव महेश्वरं ॥ पंचाक्षरशतं जप्त्वा सांगन्यासं महेश्वरि ॥१२॥ कलशं
पूज्य शंखं च गंधपुष्पाक्षतादिभिः॥ अंगेषु भावयेद्देवान् ततः प्रजननेति च ॥१३॥ लिंगसंस्थं महादेवमेवं ध्या
येत्त्वया सह ॥ सांबं त्रिनेत्रं चंद्रार्कं नीलकंठं पिनाकिनं ॥१४॥ वराभयहस्तं च मृगटंकधरं शिवं ॥ नागयज्ञोपवी
तादयं दिव्यालंकारभूषितं ॥१५॥ सोमधामसमानास्यां नीलेंदीवरलोचनां ॥ फुल्लकल्हारसंकाशां सर्वाभरणभूषितां॥
१६॥ मदंकसंस्थां त्वां ध्यायेत्साधकः परमेश्वरीं ॥ तत्र नान्यमना देवि पंचाक्षरपुरःसरं ॥१७॥ समावाह्य ततो लिंगे वाम
नासापुटेन हि ॥ पाद्यार्घ्याचमनादीनि मूलमंत्रेण दापयेत् ॥ पंचगव्यैर्विशोध्येशं ततः पंचामृतैरपि ॥ पुनः फ-
लरसैर्देवि गंधपुष्पकुशोदकं ॥१९॥ दद्यादनुक्रमेणैव रुद्रेणैवाभिषेचयेत् ॥ तदंते तर्पणं कुर्याद्भवाद्यैरष्टनामभिः॥
वाससा परिमृज्येशं पीठे संस्थाप्य पूजयेत् ॥ भस्मना चंदनेनापि अक्षताभिर्महेश्वरं ॥२१॥ बिल्वपत्रैः शिवे
पुष्पैर्वासोलंकारभूषणैः॥ निधनेत्यादिभिर्मंत्रैर्बिल्वैः पुष्पैः प्रपूजयेत् ॥२२॥ शताष्टनामभिर्वापि पूजयेद्दि-
दृशेश्वरं ॥ चतुर्दश्यां तथा देवि नामभिश्च चतुर्दश ॥२३॥ पूजयेद्बिल्वपत्राद्यैः नमोंतैरेव मीश्वरं ॥ चतुर्दश्यां
मृगकरं अपामार्गैः प्रपूजयेत् ॥२४॥ अनेकपाद हिर्बुध्नो भवः शर्व उमापतिः ॥ रुद्रः पशुपतिः शंभुः महेशः शिव=

ईश्वरः ॥२५॥ महादेवो हरो भीमो नामान्येवं चतुर्दश ॥ एभिर्नामभिरीशानं चतुर्दश्यां सुमैर्यजेत् ॥२६॥ सपूपा
ज्यं हविर्देवि निवेद्य प्रणवेन हि ॥ तांबूलं धूपदीपं च नीराजनमथाचरेत् ॥ कर्पूरखंडदीपं च घृतदीपो निधा
पयेत् ॥ स्तोत्रैः स्तुवीतैव मीशेम दक्षिण नमस्कृतिः ॥२८॥ छत्रं च चामरं चैव ध्वज व्यजनमेव च ॥ दद्याच्छिवा
यदेवेशि वाद्यानि विविधानि च ॥२९॥ नर्त्तनं करतालं च ऋग्यजुःसामाथर्वकैः ॥ पौराणैरितिहासोत्थैस्तोत्रवर्यैः स्तुवीत
च ॥३०॥ नमः शिवाय। थ नमः शिवायै नमोस्तु गौर्यै शशिशेखराय ॥ नमोस्तु देव्यै च नमोस्तु शंभवे नमोस्तु देवाय नमो
278 स्तु देव्यै ॥ नमः शिवाय प्रणतार्तिहारिणे नमो जगज्जन्मगतिप्रदायै ॥ नमोस्तु वेद्याय महेश्वराय नमोस्तु गंधर्वग
णस्तुतायै ॥ नमः शिवायादिविहारकारिणे नमो जनित्र्यै भवमंगलायै ॥ नमोस्तु विष्ण्वादिमदप्रदाय नमोस्तु
वाणीस्तुतिसंस्तुतायै ॥ नमः शिवायांतकगर्वहारिणे नमोस्तु भंडासुरखंडनायै ॥ नमोस्तु वेदांतवचःस्तुताय-
नमोस्तु वाणीस्तुतिसंस्कृतायै ॥३२॥ नमः शिवाय प्रमथाधिपाय नमोऽस्तु रुद्राणि वरप्रदायै ॥ नमोस्तु देवादिगणस्तुता-
य नमोस्तु [illegible] भद्रप्रदमंगलायै ॥३३॥ एवं स्तुत्वा शिवौ देवि चतुर्दश्यां सदा शिवं ॥ प्रहरे प्रहरे चापि एवमेव यथावि
धि ॥३४॥ दद्यादर्घ्यं क्रमेणैवं पूजांते च महेश्वरि ॥ आधिव्याधिसमायुक्त ऋणदौर्भाग्यपीडितः ॥३५॥ दद्या=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्यर्घ्यं महेशाय सुप्रीतस्तेन मे भवेत् ॥ एवमेवार्घ्यदानं च रात्रौ याम चतुष्टये ॥ ३८ ॥ मासि मासि महेशानि कृष्णपक्षे विशेषतः ॥ चैत्रादि सर्वमासेषु मासि मासि सितासु च ॥ ३९ ॥ एकं वा प्रहरं पूजां यदि कुर्याच्च नक्तभुक् ॥ एवं नरो वा नारी वा विधवोपवसेन्निशि ॥ सुकृतैर्लभ्यते भूता तस्यमर्चनमेव मे ॥ पुण्यलक्षैश्च लक्षैस्तेन विना मत्प्रसादतः ॥ ३९ ॥ ब्रह्मा स्वयं चतुर्वक्त्रः पंचवक्त्रः स्वयं हरिः ॥ सिक्थे सिक्थे फलं तस्य वक्तुं शक्तो न पार्वती ॥ ४० ॥ ब्रह्मांडोदर मध्यानि यानि तीर्थानि संति वै ॥ संस्थितानि भवंतीह भूतायां पारणे कृते ॥ परेद्युः पूज्य मां देवि यथाशक्त्या द्विजार्चनं ॥ एवं च ब्दं द्वादशाब्दं व्रतं कुर्याद्विधानतः ॥ ४२ ॥ संवत्सरं वा देवेशि आजन्म मीमद्गणो भवेत् ॥ उद्यापनविधिं वक्ष्ये भूतायां मासि मासिके ॥ ४३ ॥ देव्युवाच ॥ व्रतस्योद्यापनं देव किं कर्त्तव्यं च मानवैः ॥ को विधिः कानि द्रव्याणि कथं कार्यं वद प्रभो ॥ ४४ ॥ ईश्वर उवाच ॥ शृणु काम्य विधिं भद्रे लोकानां हितकाम्यया ॥ चतुर्दशाब्दं कर्त्तव्यं मास भूताव्रतं शिवे ॥ ४५ ॥ एकभुक्तं त्रयोदश्यां चतुर्दश्यामुपोषणं ॥ संपाद्य सर्वसंभारान्मंडपं तत्र कारयेत् ॥ ४६ ॥ वस्त्रैः पुष्पैः समायुक्तं फलपल्लवशोभितं ॥ तन्मध्ये विलिख्येत्पद्मं सर्वतोभद्रमंडपं ॥ ४७ ॥ धूपदीप समायुक्तं कुंभाष्टकविराजितं ॥ आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितं शिवे ॥ ४८ ॥ शिवरूपाश्च ते विप्राः पू-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्याश्चंदनपुष्पकैः॥ अनुज्ञातश्च तैर्विप्रैः शिवमावाह्य कुंभके॥ ४९॥ अव्रणं सजलं कुंभं मृन्मयं हेमताम्रजं॥ कुंभो
परि न्यसेद्देवमुमया सहितं शिवं॥ ५०॥ सौवर्णं चापि रौप्यं वा ताम्रं मृन्मयमेव वा॥ रत्नालंकारकैर्युक्तं वस्त्रैः पुष्पैः
प्रपूजयेत्॥ ५१॥ प्रतिष्ठाप्यार्चयेत् मूर्त्तिं सोमां दिक्पालकानपि॥ परितोष्ट्व तु कुंभेषु पूजयेन्मूलमंत्रतः॥ ५२॥
पूर्वेद्युः गंधपुष्पैश्च सोपवासं प्रपूजयेत्॥ धूपदीपैश्च नैवेद्यैः फलैर्नानाविधैरपि॥ ५३॥ प्रातः स्नात्वा परेद्यु
र्मीं पूजयेत्कृतनैत्यकः॥ ऋत्विगाचार्य सहितो मूर्त्तिं दिक्पालसंयुतां॥ ५४॥ पूजयेद्गंधपुष्पाद्यैर्धूपं दीपं निवे
दयेत्॥ नैवेद्यं भक्ष्यभोज्यं च अपूपांश्च चतुर्दश॥ प्रत्येकं सघृताक्तं तु संख्यया च चतुर्दश॥ स्वशाखोक्तेन मा
र्गेण प्रतिष्ठाप्य हुताशनं॥ परिस्तीर्य विलाप्याज्यं हविः संस्कृत्य श्रावयेत्॥ ५६॥ आचार्य ऋत्विक् सहितः स
२७१ पत्नीकः स्वयं शुचिः॥ रुद्रेणैव नमोन्तेन जुहुयाज्जातवेदसि॥ ५७॥ ततः स्विष्टकृतं दत्वा होमशेषं समापयेत्॥
आचार्यं ऋत्विजश्चैव पूजयेद्दक्षिणादिभिः॥ ५८॥ गां सवत्सां सवसनामाचार्याय निवेदयेत्॥ ततः स
कुंभां तां मूर्त्तिमाचार्याय निवेदयेत्॥ ५९॥ प्रीयतां मे शिवो नित्यं स्यात्तां मुक्तिप्रदो मम॥ दिक्पालमूर्तीः कुं
भांश्च ऋत्विग्भ्यो दापयेत्क्रमात्॥ ६०॥ नत्वा तान्ब्राह्मणान्देवि गंधपुष्पैः प्रपूजयेत्॥ वित्तशाठ्यमकुर्वाणो दक्षिणा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिःप्रसादयेत् ॥ ६१ ॥ पुनःसंपूज्य मां लिंगे प्रार्थयेद्व्रतसिद्धये ॥ व्रतमेतत्कृतं यन्मे पूर्णं चापूर्णमेव वा ॥ ६२ ॥ रोगपीडार्दि
तो देवि दिवा भुक्तं तु यन्मया ॥ मासि मासि चतुर्दश्यां कदाचित्तापयोगतः ॥ ६३ ॥ सर्वं संपूर्णतां यातु त्वत्प्रसादान्महे
श्वरि ॥ ब्राह्मणान्भोजयेत्तत्र परेद्युश्च चतुर्दशान् ॥ ६४ ॥ सपत्नीकान्भक्ष्यभोज्यैः गंधपुष्पाक्षतादिभिः ॥
दक्षिणाभिः प्रतोष्यैव स्वयं भुंजीत बंधुभिः ॥ ६५ ॥ एवं नरो वा नारी वा विधवापि चतुर्दशीं ॥ मासिकीं यश्चल-
भ्येत तदेकाग्रमनाः शृणु ॥ ६६ ॥ अपुत्रो लभते पुत्रं कुमारी सत्पतिं लभेत् ॥ निर्धनो धनवान्भूयादायुर्हीनस्त
थायुषं ॥ ६७ ॥ भक्तो मुक्तिमवाप्नोति विधवा पतिलोकगा ॥ भक्तो मद्गणपो भूयान् मासिभूतार्चनेन मे ॥ ६८ ॥
किं पुनर्बहुनोक्तेन सर्वान्कामानवाप्नुयात् ॥ ईश्वर उवाच ॥ एवं मासचतुर्दशीषु नियतः संपूजयेन्मां हरं शर्वा
णीसहितं स शर्म लभते सर्वेषु लोकेष्वपि ॥ पूर्वीयं च्छशिसुंदरं नगरं कैलासमाप्यादरात् पश्चान्मे गणपुंग
वेंद्रतामुपगतो ज्ञानाद्विलीनो भवेत् ॥ ६९ ॥ इति श्रीशिवरहस्ये एकादशांशे महादेवाख्ये शिवगौरीसंवादे मा
सशिवरात्र्युद्यापनव्रतकथनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादे-
वाय नमः ॥ श्री ईश्वर उवाच ॥ कृष्णाष्टम्यां महादेवि पूजयेन्मां यतव्रतः ॥ दृष्टव्रतो महादेवि बोधायन विधानतः ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रियो गृहस्थाः पुरुषा वर्णिनोपि महेश्वरि ॥ सर्वकृष्णाष्टमीष्वीशो उपोष्याहः प्रदोषके ॥ नद्यां तटाके संस्नाय धौतवस्त्र-
धरः शुचिः ॥ भस्मत्रिपुंड्रसहितो रुद्राक्षाभरणैर्युतः ॥३॥ बिल्वपुष्पाणि संपाद्य धौतकुंभोऽम्भसा युतः ॥ कुशांश्च साग्रा
न्संपाद्य कृतनित्यक्रियो द्विजः ॥४॥ पूजास्थानं समालिप्य गोमयेन नवांभसा ॥ रंगवल्लीशोभितं च पुष्पमंडप
कैर्युतं ॥५॥ वितानपल्लवोपेतं तोरणावलिभूषितं ॥ तस्मिन्संस्थापिते पीठे समावाह्य वृषध्वजं ॥६॥ सांबं
सगणमव्यग्रो उग्रार्चनपरायणः ॥ संकल्प्य देशकालादि पंचाक्षरजपादरः ॥७॥ पाद्यार्घ्याचमनादीनि शंखं
४८० कुंभं च सोदकयुक् ॥ लिंगाग्रे स्थापयेद्विसकूर्चं गंधपुष्पयुक् ॥८॥ पंचामृतं पंचगव्यं तथा फलरसानि च ॥ मधु-
पर्कं च पात्रेषु स्थापयेद्गंधपुष्पकं ॥९॥ तांबूलं च हविर्दर्वि संपाद्याखंडिताक्षतान् ॥ घृतदीपान्ततो दिक्षु पैष्टा
न्कुर्यात्सवर्तिकान् ॥१०॥ आत्वावहेति मंत्रेण शिवमावाहयेद्व्रती ॥ सांबं च सगणं देवं लिंगेभ्यर्चेत्पि-
नाकिनं ॥११॥ पाद्यार्घ्याचमनादीनि दद्याद्देवि पृथक् पृथक् ॥ मूलमंत्रेण विधिवन्मधुपर्कं ततः शिवे ॥१२॥
पंचामृतं पंचगव्यं तथा फलरसैः शिवे ॥ गंधपुष्पकुशाग्रांबु लिंगे दद्यात्षडक्षरैः ॥१३॥ शतरुद्रेण विधिवद्द्रोणशृंगेणा
भिषेचयेत् ॥ इमा आप इतीत्येवमापो दद्याच्छिवाय तु ॥१४॥ अपो हिष्ठादिमनुभिरभिषिंचेत्ततः परं ॥ ब्रह्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०० न्नैः पावमानैः रुद्रद्रये ति मंत्रतः ॥१६॥ सर्वो ह्येष महारुद्रः पुरुषो रुद्र इत्यपि ॥ विश्वं भूतमितीशानि वामदेवादिसा-
मभिः ॥ ययुः पवित्रं मापोस्मा यो रुद्रोग्ना विति मंत्रतः ॥ अभिषिच्य महादेवं शिवे लिंगस्वरूपिणं ॥१७॥ दे-
वस्यत्वेति मंत्रेण सकूर्चेणाभिषेचयेत् ॥ भवायेत्यष्टभिर्विद्वान् तर्पयेन्नामभिः पृथक् ॥१८॥ संशोध्य वास
सा लिंगपीठे संस्थाप्य पूजयेत् ॥ सित भस्म गंधवस्त्रं साक्षतं चोपवीतकं ॥१९॥ सुवर्णरत्नकपैश्च बिल्वैः
पुष्पैः प्रपूजयेत ॥ कमलोत्पलकल्हारमंदार करवीरकैः ॥२०॥ कर्णिकारार्कदमनैः कनकैः द्रोणसंभवैः ॥
शताष्टनामभिर्देवि निधनेत्यादि मंत्रतः ॥२१॥ धूपं च गुग्गुलोपेतं घृतदीपान् मनोरमान् ॥ गणांश्च परि
तः पूज्य गंधपुष्पाक्षतादिभिः ॥२२॥ महाकालाय पूर्वे तु शंकुकर्णाय दक्षिणे ॥ नंदिकेशाय पश्चात्तु वक्रतुंडाय-
चोत्तरे ॥ २३ ॥ ईशाने चंडिकेशानं धर्मे चैव शिवा[illegible]ग्रतः ॥ उत्तरे च महादेवीं पूजयेदुपचारकैः ॥२४॥ तत्तन्नामभि
रेवेशि शिवस्य परितो यजेत् ॥ उद्दीप्यस्वेति मंत्रेण चाष्टपैष्टिकदीपदः ॥ २५ ॥ हविः साज्यं च तांबूलं शिवे दद्याद्द-
णेषु च ॥ नीराजनं ततो दद्याद्वाद्यघोषपुरःसरं ॥ २६ ॥ छत्रं च चामरे देवि व्यजनादर्शके तथा ॥ प्रदक्षिणं प्रणामं
च स्तवमेतत्प्रयोजयेत् ॥ २७ ॥ जय शंकर पार्वतीपते विधिविष्णिंद्र सुसेविताब्जपाद ॥ उरगेंद्राभरणस=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सीदशंभो प्रसभं पापमपाकुरुष्व सद्यः॥ २८॥ जय सोमानलसूर्यलोचनाच्छशंभो धृतचंद्रांकजटाकुटीरगंगा॥
परिपाहि पतंगमध्यवास विधिमुंडाभरण प्रसीद देव॥२९॥ जय सोमकलावतंस शूलपाणे गणवृंदामल से
वन प्रसीद॥ हर भर्गोत्तमनंदिचंडिकेशगणस्कंदातुल शंकुकालकालैः॥३०॥ परितः सेवित पार्श्व विश्वनाथ स्थिर-
धन्वन्नमसाप्रतुष्टि मे हि॥ जय सांब महोरगेंद्रहारप्रसभं मन्मथनाशन प्रसीद भर्ग॥३१॥ भव भीम महेश्व
र शंभो मयि दृष्टिं करुणां कुरुष्व शंभो॥ इति स्तुत्वा महादेवं कालाष्टम्यां तदा व्रती॥३२॥ प्रतिष्ठाप्य ततो वन्हिं-
स्वस्वशाखोक्तमार्गतः॥ अशनीयं हविर्यत्स्यात्जुहुयात्तेन सर्पिषा॥३३॥ इमा रुद्रेत्यादिभिर्मंत्रैः पूर्वं तु जुहुयाच्छिवे॥
२४। शतं हिमेत्यादिभिश्च अर्हं बिभर्षिइत्यपि॥ ३४॥ मान आयुषि रित्येतदाते पितरिति क्रमात्॥ मानः सूर्य एवाही-
ति मानो महांतमित्यपि॥३५॥ मानस्तोकेन मंत्रेण हविष्मंत इति क्रमात्॥ वास्तोष्पते ति मंत्रेण आर्द्रया रुद्र इत्य
पि॥३६॥ प्रमुंच तु दुरितानीति मंत्रास्ते सामिदानके॥ भवायेत्यष्टभिर्मंत्रैः स्वाहांतैर्जुहुयाच्छिवे॥३७॥ भवा
येत्यपि पत्न्यैश्च इत्यष्टाभिर्जुहोत्यपि॥ देवस्य च सुतायेति जुहुयाज्जातवेदसि॥३८॥ ततः स्विष्टकृतं
हुत्वा आज्यैर्होमं समापयेत्॥ पुरष्टसुमैः पूज्य होमांते शं प्रसादयेत्॥३९॥ प्रीयतां भगवानीशः सांबः सगण=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०१ ईश्वरः ॥ अनयापूजयाहोमैः तृप्तो मां संप्रसीदतु ॥ ४०॥ दद्यादर्घ्यं महेशाय सपुष्पांबु महेश्वरि ॥ दुःखदारिद्र्यमग्नं मां स- अ· ३५
मुद्धर महेश्वर ॥ ४१॥ अष्टम्यामर्घ्यदानेन अष्टमूर्ते प्रसीद मे ॥ इत्यर्घ्यं च ततो दत्वा पूजामुद्वास्य सत्तमे ॥ ४२॥ ब्रा-
ह्मणाय हिरण्यं गां शंभवाय निवेदयेत् ॥ यत्किंचिद्वा यथाशक्ति दद्यादीशानतुष्टये ॥ ४३॥ भक्ष्यभोज्यान्न संयुक्तं भुं-
जीयाच्छंभवैः सह ॥ दक्षिणाभिश्च तान् पुष्पैः गंधतांबूल पूर्वकं ॥ भोजयेच्च स्वयं भुंजन्नक्तं शक्तो पवर्जयेत् ॥
कृष्णाष्टमीषु नियतमेष सामान्यतो विधिः ॥ ४५॥ एकाब्दं त्रीणि वाद्वे विद्वादशाब्दमथापि वा ॥ कृत्वाव्रतोद्यापनं च न
काशीवा भवेत्ततः ॥ ४६॥ सितासितास्वष्टमीषु अविमुक्ते तु नैत्यकं ॥ उपोष्येशाविमुक्तेशं पूज्य बिल्वैः सुमैरपि ॥ त्रि-
वेगंगांबुभिः सीतैः अभिषिच्य महेश्वरं ॥ धूपदीपादि नैवेद्यैः स्तुवीतैवं महेश्वरं ॥ ४८॥ कालाष्टमीषु नियतमवि-
मुक्तेश्वरं हि मां ॥ गंगाधरांधकरिपो प्रमथाधिनाथ विश्वेश विश्वगत सर्जक भर्ग कांते ॥ ब्रह्मादिविष्णुसुर-
वर्गसुपूजितांघ्रे मामीशपाहि दयया स्मरकालनाश ॥ ४९॥ इति स्तुत्वाविमुक्तेशं कालराजं प्रपूजयेत् ॥ कालाष्टम्यां
तु नियतं काशीवासी महेश्वरि ॥ ५०॥ कुलस्तंभं समासाद्य गंधपुष्पांबुभिः सदा ॥ अपूपहविषा चैव वटकैर्लड्डुकै-
रपि ॥ ५१॥ पूजयेद्धूपदीपैश्च कालाष्टम्यां स्तुवीत च ॥ भैरवं भीषणाकारं यासनिर्विघ्नहेतवे ॥ ५२॥ स्तोत्रेणाने-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नदेवेशिकाश्यां कालाष्टमीपु च ॥ स्तुवीत पर्वैर्दृष्टैस्तं ममाद्यगणपोत्तमं ॥ ५३ ॥ देवराजसेव्यमानपावनांघ्रि
पंकजं ॥ व्यालयज्ञसूत्रमिंदुशेखरं कृपाकरं ॥ नारदादियोगिवृंदवंदितं दिगंबरं ॥ काशिकापुराधिनाथकाल
भैरवं भजे ॥ ५४ ॥ भानुकोटिभास्करं भवाब्धितारकं परं ॥ नीलकंठमीप्सितार्थदायकं त्रिलोचनं ॥ कालका
लमंबुजाक्ष ~~मंबुजाक्ष~~ कंधां हरं शिवं ॥ काशिकापु० ॥ ५५ ॥ भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं ॥ नितांत
भक्तवत्सलं समस्तलोकपालकं ॥ निक्वणन्मनोज्ञहेमकिंकिणीलसत्कटिं ॥ काशिकापुराधिनाथकाल
भैरवं भजे ॥ ५६ ॥ शूलटंकपाशदंडपाणिमादिकारणं ॥ श्याममादिदेवमादिमक्षरं निरामयं ॥ भीम-
९४२ विक्रमं प्रभुं विचित्रतांडवप्रियं ॥ का० ॥ ५७ ॥ रत्नपादुकाप्रभाविराजपादयुग्मकं ॥ नित्यमद्वितीयमिष्ट
दैवतं निरंजनं ॥ मृत्युदर्पनाशनं करालदंष्ट्रभीषणं ॥ का० ॥ ५८ ॥ धर्मसेतुपालनं ह्यधर्ममार्गनाशनं—
कर्मपाशनाशनं सुकर्मदायकं प्रभुं ॥ स्वर्णवर्णकेशपाशशोभितांगनिर्मलं ॥ का० ॥ ५९ ॥ अट्टहासभानु
वर्णजांडकोशसंततिं ॥ दृष्टपाशनष्टपालकालनभ्रदावलिं ॥ अष्टसिद्धिदायकं कपालमालिकाधरं ॥ का० ॥
॥ ६० ॥ भूतसंघनायकं विशालकीर्तिदायकं ॥ काशिवासिपुण्यलोकपापशोधनं प्रभुं ॥ नीतिमार्गकोवि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०२ दं पुरातनं जगत्पतिं का०॥६१॥ कालभैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्तिसाधनं पवित्रपुण्यवर्धनं॥ शोकमो
हदैन्यलोभकोपतापनाशनं का० शिकापुराधिनाथकालभैरवं भजे॥६२॥ प्रविष्टो यो प्यपान्यत्र वसन्ने
तं स्तवं जपेत्॥ पुनः काशीं समासाद्य तत्र नष्टतनुर्भवेत्॥६३॥ कालाष्टम्यां कालराजं स्तुवीते वं प्रसाद्य च॥
काश्यामेव निवसेल्लसः नपापे रमते हि सः॥६४॥ किंपुनर्बहुनोक्तेन कालाष्टम्यर्च्य कोनरः॥ सर्वान्कामा
नवाप्नोति भुक्तिंमुक्तिंच विंदति॥६५॥ यज्ञायुतफलं प्राप्य ममलोके महीयते॥ ब्रह्महत्यादिभिः पापै-
र्मुच्यते नात्र संशयः॥६६॥ ईश्वर उवाच॥ मध्याष्टमीष्वपि तसोमकलावतंसं सर्वाष्टमीषु नगजे परिपूज
यंति॥ नष्टानि तेषु दुरितानि भवंति सद्यो हृष्टानि तेषु सहितानि विमुक्तिदानि॥६७॥ यो वा विमुक्तोसि-
त भस्मफालः कालाष्टमीषु निपतं मम कालराजं॥ संपूज्य यन्नघगणैर्न बिभेति सद्यो हृष्टो भवेदाति त-
रां सन रोति धन्यः॥६८॥ इति श्री शिवरहस्ये महारेवाख्ये एकादशांशे शिवगौरीसंवादे अष्टमीपूजा-
कथने भैरवस्तुतिनाम चतुस्त्रिंशोध्यायः॥३४॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीमहादेवाय नमः॥
श्रीदेव्युवाच॥ उद्यापनविधिं ब्रूहि कृपया भक्तवत्सल॥ कस्मिन्काले च किं द्रव्यं कृष्णाष्टम्यां महेश्वर॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तन्मेवदमहादेवव्रत षड्गुण्य हेतवे ॥ श्रीमहादेव उवाच ॥ पूर्णां तिथिमनुप्राप्य चित्त वित्तादि संयुतः ॥ निशी
थव्यापिनी ग्राह्या सिता वाप्य सिता तिथिः ॥ २ ॥ कृष्णाष्टमी विशेषेण संपूर्ण फलहेतवे ॥ सप्तम्या
मेक भुक्तः सन् भव भक्तो जितेंद्रियः ॥ ३ ॥ मामभ्यर्च्य विधानेन भस्मरुद्राक्ष भूषणः ॥ निर्वृत्यावश्य
कं कर्मव्रतांते द्वादशाब्दिके ॥ ४ ॥ वर्षे त्रिवर्षे दिने त्रिः कृत्वा नक्ताष्टमीव्रतं ॥ पूर्वोक्त विधिना देवि कामी तूद्यापनं चरेत् ॥
५ ॥ अष्टम्यां बुधवारेण युतायामैंदवे दिने ॥ प्रातरुत्थाय मतिमान् स्नात्वा संध्यामुपास्य च ॥ ६ ॥ मंडपं रचयेत्तत्र पुष्पमा
ला विराजितं ॥ वितान तोरणोपेतं कदलीस्तंभमंडितं ॥ ७ ॥ तस्मिन्सगोमयेनैव मुपलिप्तं नवां भसा ॥ रंगवल्यादि
४८३ शोभाढ्यं पद्मं कुर्यात्सकेसरं ॥ ८ ॥ शिवक्षेत्रे गृहे वापि नद्यां वा विपिने गिरौ ॥ पुण्याहं वाचयित्वा च स्थापनादौ श्राद्धं विधा
य च ॥ ९ ॥ ऋत्विजो वरयेदष्टौ आचार्य सहितान्नव ॥ भस्मरुद्राक्षसंपन्नाः शिवलिंगार्चकाः शिवे ॥ १० ॥ वेदागमपुरा
णज्ञा ब्राह्मणाः संशितव्रताः ॥ गंधपुष्पैस्तान भ्यर्च्य स्वयं चैव सदारकः ॥ ११ ॥ उमामहेश्वरं चापि सौवर्णेन वका
रयेत् ॥ पलेन वातदर्धेन कुर्याद्रौप्येण वा शिवे ॥ १२ ॥ नंदीस्कंद महाकाल शंकु कर्ण गणेश्वरं ॥ चंडेश्वरं च
वृषभं दुर्गां चैव यथाविधि ॥ १३ ॥ मृन्मयैस्ताम्रजैर्वापि कुंभैरंबु सपूरितैः ॥ फलपल्लव संयुक्तैस्तेषु तांप्र=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तिमां न्यसेत् ॥१४॥ मध्यमे च महाकुंभे सांबं पुष्पफलैर्युते ॥ उमामहेश्वरं स्थाप्य प्रतिष्ठाप्यार्चयेत्क्रमात् ॥१५॥
दिग्विदिक्क्रमयोगेन अन्यमूर्तीर्यजेच्छिवे ॥ प्राणानायम्य विधिवत्कृत्वा संकल्पमादरात् ॥१६॥ उद्यापनं करि
ष्ये हं कृष्णाष्टम्यार्चनस्य च ॥ इत्युक्त्वा पूजयेत्तत्र लिंगमूर्त्तिं सदाशिवं ॥१७॥ पंचामृतैः पंचगव्यैः तथा फल
रसैरपि ॥ गंधपुष्पकुशाद्भिश्च मंत्रपूतैर्यजेच्छिवं ॥१८॥ रुद्रैर्वाभिषिंच्येशं तर्पयेदष्टनामभिः ॥ वासोयज्ञो
पवीतं च चंदनं साक्षतं तथा ॥१९॥ बिल्वपंकजपुन्नागसौगंधिकसुमानि च ॥ पूजयेत्पार्वतीकांतं निधनेत्यादिमंत्रतः ॥
॥२०॥ धूपदीपं ततो दत्वा निवेद्य हविरंबिके ॥ तांबूलं च ततो दद्यान्नीराजनमतः परं ॥ २१॥ प्रदक्षिणनमस्का
रैः स्तोत्रैः स्तुत्वा महेश्वरं ॥ विसर्जयित्वा च ततो कुंभे मूर्त्तिं प्रपूजयेत् ॥२२॥ गंधपुष्पाक्षतैर्दिव्यैः क्तलिंगाचार्य
वक्रतः ॥ उमामहेश्वरं देवमाचार्यः पूजयेच्छिवे ॥२३॥ रुद्रदुर्गादिगायत्र्या पूज्य सर्वोपचारकैः ॥ ऋत्वि
जोष्टौ तथा मूर्तीः पूजयेयुर्यतव्रताः ॥ २४॥ दिक्कुंभेषु समंत्राच्च ततः गायत्रिभिः क्रमात् ॥ संपूज्य गंध
पुष्पाद्यैः निवेद्य हविरीश्वरि ॥ २५॥ नीराजनबलिं कुर्युस्तत्तन्मंत्रैर्दिशामुखे ॥ मंटपात्पश्चिमे भागे स्थंडि
लं चतुरस्रकं ॥२६॥ कृत्वा चोल्लेखनादीनि प्रतिष्ठाप्याग्निमीश्वरि ॥ इध्मादर्भान्परिस्तीर्य पात्रासा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दनमाचरेत॥ २७॥ पूर्णपात्रप्रतिष्ठां चब्रह्मासनमतः परं॥ इध्माधानादिचाघारं हुत्वाचैवतुचक्षुषी॥२८॥
अपामार्गसमिद्भिर्वा बिल्वैर्वापि महेश्वरि॥ हविश्च सर्पिषायुक्तं सतिलंजुहुयाच्छिवे॥२९॥रुद्रैर्नमो तैः
स्वाहेति शताष्टं स्विष्टकृत्ततः॥ गणपांश्च हवेत्तत्रस्वाहाकारेणचालते॥३०॥प्रायश्चित्ताहुतीर्हुत्वाहोमशेषं न
समापयेत॥ पूर्णाहुतिंचजुहुयाद्खंडघृतधारया॥३१॥रुद्रसूक्तेनदेवेशिओदुंबरसुचाहुता॥ मधुमिश्रेणवा
ज्येनशांत्यर्थेचमकंहुनेत॥३२॥तदंतेचाग्निम ध्यस्थं पूजयेन्मां त्वयासह॥ गंधैःपुष्पैस्तथाबिल्वैर्वास-
साहविषातथा॥ धूपंदीपंततोदत्वानीराज्याग्निं द्विजैःसह॥ त्रिःप्रदक्षिणमावृत्य समिधंजातवेदसं॥३४॥प्रो
क्षणीमध्यगांभोभिःप्रोक्षयेच्चसदारकान्॥ वासोलंकारगोभिस्तान्पूजयेच्छांभवान्छिवे॥३५॥
१४१ पृथक् ऋत्विगाचार्यंपूजयेद्दक्षिणादिभिः॥ वित्तशाठ्यमकुर्वाणोब्राह्मणंब्राह्मणंयजेत्॥३६॥दीनाना
था न्दक्षिणाभिःपूज्यान्नैः भोजयेदपि॥ प्रतिमास्ताःसकुंभाश्च देयाऋत्विक्षुमूर्तिकाः॥३७॥कुंभ-
स्थैस्तज्जलैःस्नात्वासदारोधौतवस्त्रधृक्॥ गंधपुष्पधरोविप्रोऋत्विगाचार्यपूर्वकं॥ ३८॥ भुंजीयाद्भ-
क्ष्यभोज्यान्नं शिवमभ्यर्च्यवाग्यतः॥ नवम्यां पारणंकुर्याद्बंधुभिश्च विशेषतः॥३९॥आचार्यंचसपत्नी=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कं पूजयित्वा यथा विधि ॥ प्रतिमा वस्त्र कलशान्गावो वत्स विशोभिताः। ४०॥ वस्त्राभरण घंटाढ्याः कांस्यदोहाः पयस्वि
नीः॥ दत्वा वस्त्रादि विप्रेभ्यः कलशप्रतिमास्तथा ॥ ४१॥ ब्राह्मणान्भोजयेद्भक्त्या गृण्हीयाद्वा शिषः शिवे। शिवो मे
प्रीयतां देवः सांबः सगण ईश्वरः॥ ४२॥ कृष्णाष्टम्यामर्चनेन व्रतेनोद्यापनेन च ॥ भुक्तिं मुक्तिं च मे भक्तिं ददा-
तु परमेश्वरः॥ ४३॥ इत्युक्त्वा तु प्रसाद्येशं व्रतोद्यापनकर्मणि॥ उद्यापनमिदं देवि कृष्णाष्टम्या व्रतस्य च॥
४४॥ यत्कृत्वा न पुनर्जन्म विंदते मनुजः क्वचित्॥ गाणपत्यमवाप्नोति मम कैलासमौलिगः॥ एवं नरो वा-
नारी वा कृत्वा मध्याष्टमीव्रतं॥ यान् यान्चिंतयते कामान्प्राप्य सम्येत्य मां व्रजेत्॥ ४६॥ उद्याप्य च पुनर्देवि गृ-
ण्हीयादर्थकांक्षितः॥ किं पुनर्बहुनोक्तेन नानेन सदृशं व्रतं॥ ४७॥ भुक्तिमुक्तिप्रदं पुंसां सौभाग्यारोग्यवर्धनं॥
पापदहं पुण्यदं च प्रशस्तं मम पूजनं॥ ४८॥ सर्वकामप्रदं पुत्र्यमपुत्राणां विशेषतः॥ सर्वाभद्रमवाप्नोति दुर्गा-
ण्यानुतरत्यपि॥ ४९॥ श्रीईश्वर उवाच॥ एवं कृष्णाष्टमीषु व्रतमशुभहरं पुत्र्यमारोग्यदं मे कृत्वा जन्मप्रतायुतौ
घ लुमहापापैर्न विभेद्य॥ मध्यान्मे गणपुंगवेंद्रतामुपगतो नासौ शिवे दुर्गतिं प्राप्नोतीश्वरचिंतकः सः स-
सुकृतां राशिं च विंदेदपि॥ ५०॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे कृष्णाष्टमीव्रतोद्यापनकथनंनाम=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचत्रिंशोध्यायः ॥३५॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवायनमः ॥ शिवउवाच ॥ शिवव्रतानि विधि
वत्तव प्रोक्तानि शैलजे ॥ किंपुनर्देवि मां पृच्छेस्तत्ते वक्ष्यामि सांप्रतं ॥१॥ देव्युवाच ॥ देवदेव महादेव करुणालय
शंकर ।श्रुतानि विश्रुतान्यद्यव्रतानि प्रीतिदानि ते ॥२॥ अविमुक्ते निवसतां नियतं नियमश्च कः ॥ शिवार्च
नाद्यकरणे प्रायश्चित्तं श्रुतिश्रुतं ॥३॥ तन्मे विस्तरयाद्येश विस्तारयनृणामिह ॥ श्रीईश्वर उवाच ॥ ॥
सम्यक्पृष्टं त्वया देवि लोकानां हितहेतवे ॥ रहस्यं सर्ववेदानां नोक्तं पूर्वं मयांबिके ॥४॥ बृहज्जाबालक-
थितं तत्ते वक्ष्याम्यनुक्रमात् ॥ काशीवासिजनाचारं बृहज्जाबालदर्शितं ॥५॥ शिवार्चनपरित्यागे चैकाह्नापि च
९८९ सत्तमे ॥ प्रायश्चित्तं वदाम्यद्य श्रुणु श्रवणभूषणं ॥६॥ एतदर्थं हि मुनयो मुक्तिमंडपमध्यमे ॥ विश्वे-
श्वराग्रतः स्थित्वा भस्मरुद्राक्षभूषणाः ॥७॥ प्रणम्याहुः भुसुंडं तं चंद्रखंड शिवार्चकं ॥ मुनयऊचुः ॥ ॥
किंकार्यं ब्राह्मणानां च किं धार्यं क्वच संस्थितिः ॥ कः पूजनीयो ध्येयश्च तन्नो ब्रूहि शिवार्चक ॥८॥ इतिपृष्टो
भुसुंडोऽसौ बृहज्जाबालसंभवं ॥ रहस्यं तानवोचन्मे कर्तव्यं ब्राह्मणेषु यत् ॥९॥ प्रथमं भस्मरुद्राक्षधारणे
महिमां शिवे ॥ त्रिपुंड्रं तन्मुखानां च धारणे महिमां वदत् ॥१०॥ भुसुंड उवाच ॥ सम्यक्पृष्टं मुनिश्रेष्ठाः=
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्मणानांहितायनं ॥ कैलासेयन्महादेव्यैबृहज्जाबालगंबृषं ॥११॥ प्रोक्तवाञ्छ्रीमहादेवोदेव्यैयच्छ्रुतिदर्शितं ॥ तद्भवद्भ्यो
वदाम्यद्यश्रुणुध्वं सावधानतः ॥१२॥ भासुरं भूसुराणांच शिवाचारंश्रुतीरितं ॥ उत्पन्नोब्राह्मणकुलेअष्टचत्वारि
संस्कृतः ॥१३॥ शौक्लसावित्रसोमादिदीक्षाभिः पूतजन्मभिः ॥ सतुमुख्याधिकारीस्यान्नेतरः सार्ववर्णिकः ॥
वर्णाश्रमाचाररताद्विजास्त्रैवर्णिका अपि ॥ तेघूक्तमैश्वराचारं श्रुत्वामुक्तिप्रदं द्विजाः ॥ १५ ॥ वस्तव्यं सावधाने
न अविमुक्तेऽपि चोत्तमे ॥ तच्छिवागारमतुलेक्षेत्रेष्वन्येषुवारुचि ॥ १६ ॥ प्रशस्ततृणकाष्ठाद्ये सर्वदाऽऽर्यसमान्विते
॥ अग्निरित्यादिभिर्भस्मधार्यंश्रौतानलोद्भवं ॥ १७ ॥ अष्टषोडशकांगेषु मंत्रैर्विप्रास्त्रियापुषैः ॥ ब्राह्मणैः
क्षत्रियैर्वैश्यैः शूद्रैस्तत्पावनाग्निजं ॥ १८ ॥ वर्णीवनीगृहस्थोवायतिर्वा विधवास्त्रियः ॥ प्रणवेनयतः प्रोक्तं स्त्रीणां
पंचाक्षरेणतु ॥ १९ ॥ पंचब्रह्मभिरेवेह भस्मनाप्यवगुण्ठनं ॥ अत्याश्रमेप्रकथितं त्रिपुंड्रस्यचधारणं ॥ २० ॥ शि
रोव्रतमिदंश्रौतं धार्यंसर्वाश्रमैरपि ॥ त्यक्तैतत्पतितायांति नरकं स्वपितामहैः ॥२१॥ भिक्षुर्भक्षोभवेद्देवसालाबृ
कगणे द्विजाः ॥ रुद्राक्षसंभवाश्वेताः रुद्राक्षारक्तपीतकाः ॥२२॥ कृष्णाश्चानुक्रमेणैववर्णैर्धार्याश्चमंत्रतः ॥
सर्वाश्रमैस्तथास्त्रीभिः त्र्यंबकेनैव मंत्रतः ॥२३॥ तत्यक्त्वाधारणं भक्त्याऽपोष्यासायमेहि ॥ यतिः प्रणव=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साहस्रंजपन्मुक्ताघको भवेत् ॥२४॥धारण स्पर्शने दृष्टेगोदान फलमाप्नुयात् ॥ पर्वण्यपिचरुद्राक्षं तत्तद्वर्णे-
श्चधारितं ॥२५॥ पूर्वोक्तंच फलं सर्वं दद्यात्सर्वेषु सर्वदा॥ ध्येयः सर्वैर्महादेवः शिव एकः शिवंकरः॥ २६॥
उमासहायो विश्वेशो नीलग्रीवस्त्रिलोचनः॥ब्राह्मणैरन्यवर्णैश्च स्त्रीभिश्चयतिभिस्तथा॥२७॥जप्यःप्र
णव एवेह शिवे पंचाक्षरंमम॥ त्रिकालंसर्वदा सर्वैः स्त्रीशूद्राणां नमोंतकः॥ २८॥नातः परं तारको मे मंत्रः पंचा
क्षरः परः॥काश्यामंते च शैवानां कर्णे तूर्णं विमुक्तिदं॥२९॥ददाम्यहं सप्रणवं पुनर्भवनिवृत्तये॥ गंगां वा स
ह्यजां वापि समाश्रित्य वसेद्द्विजः॥३०॥अविमुक्ते तु नियमाद्वासः कष्टतरो नृणां॥ सह्यजायास्तटे क्षेत्रे वस
७०६ न्भक्त्याथ मुक्तये॥३१॥ पूजनीयो महादेवः स्मर्तव्यश्च मुमुक्षुभिः॥ कावेर्यां वापि गंगायां नदीष्वन्यासु वा
द्विजाः॥३२॥ स्नात्वा समंत्रमुषसि कृत्वा शौचं विधानतः॥ संतर्प्य देवपित्रर्षीन् रुद्रसूक्तैश्च मार्जयेत॥३३॥
वासोथ परिधायैव भस्मरुद्राक्षमंडितः॥ संध्यां कुर्याद प्रमादं दत्वार्घ्यं संध्ययोर्द्वयोः॥ ३४॥ उद्यंतमंशुमंतं च-
ध्याये त्तिष्ठन् स्वतंद्रितः॥ सहस्रपरमां देवीं शतमध्यां दशावरां॥ गायत्रीं प्रजपे द्विद्वान् मध्यं सायं शतं भवेत्॥
श्रौते स्मार्तानले वापि जुहुयाद्वेदमंत्रतः॥ ३६॥ जपेत्पंचाक्षरं मंत्रमोंकाराद्यं षडक्षरं॥ सहस्रपरमं नित्यमाशताष्टं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाभिभावितः ॥३७॥ संभार्यपूजासंभारं कापिलं पंचगव्यकं ॥ अन्यस्मादुत्तमं प्रोक्तं मधुपर्कं फलानि च ॥३८॥
उपलिप्ते तदा पीठे लिंगमभ्यर्चयेद्द्विजः ॥ संसिंच्य तैश्च संभारैः गंधचंदनवारिभिः ॥ ३९॥ ततएकगुणो
रुद्रो जप्यो प्येकादशावृतः ॥ सकूर्चं वाससा मृज्य परिवेष्य सुवाससा ॥४०॥ पीठे स्थाप्य तदा लिंगे भस्मना-
भूषयेत्ततः ॥ गंधाक्षतोपवीतान्दद्यात्संचाक्षरेण हि ॥ त्रिशाखैर्बिल्वपत्रैश्च तथानार्द्रैरनार्द्रकैः ॥ बिल्वपत्रैः
समभ्यर्च्य कुसुमैर्वा यथाबलं ॥४२॥ नतु बिल्वं परित्यज्य सर्वदा सावधानतः ॥ धूपं दीपं च नैवेद्यं दद्यात्सक्र
मनर्त्तनं ॥४३॥ प्रणामं चास्तुतिश्चेति पूजयन्परिकीर्त्तिता ॥ ब्राह्मणानां परो धर्मः शिवलिंगस्य पूजनं ॥ ४४॥
त्रिकालमप्रमादेन वर्णानामाश्रमेषु च ॥ यतेस्तु प्रणवे नैव स्त्रीशूद्राणां तु पार्थिवे ॥ ४५॥ प्रमादेनैकदाप्य
कृत्वा उपोष्यैवापरे हनि ॥ कृत्वा सौ शिरसो वा पं पूजां तद्द्विगुणां चरेत् ॥ भुक्त्वा प्रमादाद्दीशार्च्यामकृत्वा ब्रा
ह्मणो यदि ॥ तदुद्दीर्घमुपोष्यैव पंचगव्येन शोधितः ॥ संपूज्य शांभवान्पूज्य द्विगुणं मुक्तिकिल्बिषः ॥ जपेद्रुद्रं
प्रयत्नेन दिवा नक्तं च भस्मधृक् ॥ दिवासूर्यं च पश्यन्वै रात्रौ चंद्रं च वन्हिकं ॥ प्रमादादेकदाप्यकृत्वा शिवलिं
गे शिवार्चनं ॥ प्रायश्चित्तमकुर्वन्वै नरकं पंचवत्सरं ॥ ४७॥ अन्यथा तु परित्तौ सौ विष्ठा भक्षेषु तिष्ठति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतिः त्य कल्पैकदा पूजां प्रणवं तु सहस्रकं ॥४९॥ प्रणवेन द्विगुणं पूजां कुर्यात् भस्मावगुंठितः ॥ शिवपूजां
न कुर्वन् यो फलमूलांबु भोजनः ॥५०॥ रेतो भक्षी परे तो ~~भक्षी परे तो~~ हि अन्नापः फलभुक् क्रिमीन् ॥ अन्नभुक् यदि
विष्ठाशीति अत्यल्यंत संकटं ॥५१॥ वर्णानामाश्रमाणां च विधिः शुल्पा प्रदर्शितः ॥ काशीवासी तु नियमाद्वसेदामर-
णं सदा ॥ ५२॥ सर्वक्षेत्रोत्तमं तच्च यत्र विश्वेश्वरः स्थितः ॥ शिवोऽद्वैतश्च तुर्योऽत्र साक्षाल्लिंगे प्रकाशते ॥ ५३॥ वि
श्वेश्वराख्यं यल्लिंगं वेदवेदांतसंस्तुतं ॥ तत्पूज्यं सर्वदा सर्वैः बिल्वपत्रैश्च साक्षतैः ॥५४॥ स्नापयित्वा कापि
लेन पयसा लिंगमैश्वरं ॥ विश्वेश्वराख्यं मुनयो ब्रह्महाऽपि विमुच्यते ॥ ५५॥ सुरापानी कापिलेन दध्नाज्ये
५७ न हिरण्यहृत ॥ मधुना गुरुदाराद्याच्छितया सर्वजीवहृत् ॥ ५६॥ महाप्रस्थादिमानेन स्नापयेत्पर्वणि-
क्रमात् ॥ तंडुलैश्च यवै बिल्वैस्तिलैः संपूज्य शंकरं ॥ ५७॥ सर्वान्कामानवाप्नोति सुरलोकेषु मोदते ॥ नित्यं
तद्गृहयात्रां च कुर्याद्भस्माक्षधारकः ॥ ५८॥ तत्र मूत्रपुरीषादि न कुर्यान्मोहतोऽपि च ॥ तत्र प्राच्यां प्रतीच्यां
च भैरवाः शूलपाणयः ॥ ५९॥ रक्षंति परितः क्षेत्रं पापिष्ठं दारयंति ते ॥ यमस्य सदने कल्पं यद्दुःखं समवा
प्यते ॥ ६०॥ ततोऽपि बहुधा दुःखं भैरवे घटिकात्रयं ॥ तस्माद्वसेत्सु नियतं काश्यां विप्रा विमुक्तये ॥६१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०७ विश्वेश्वरार्चनहीनानांतत्रवासोनशस्यते ॥ पंचाक्षरविहीनानांतत्रवा॰॥६२॥ भस्मरुद्राक्षहीनानांतत्रवासो॰ ॥ प्रदोषा
तत्रवासो नशस्यते
र्चनहीनानांतत्रवा॰ ॥६३॥ रुद्राध्यायविहीनानांत॰ ॥ भूताष्टमीसोमवारविहीनानांदुरात्मनां ॥६४॥ अन्नपूर्णा
क्षेत्रपालान् स्कंदविघ्नेशभैरवान् ॥ पूजयेन्नियतंकाश्यांपंचक्रोशप्रदक्षिणां ॥६५॥ कुर्यादंतर्गृहादीनांपा-
तकैश्चप्रमुच्यते ॥ स्नायाद्गंगांभसिस्थित्वामणिकर्ण्यामथद्विजाः ॥ पश्येच्चनियतंतत्रविश्वेशंचान्नपूर्ण
कां ॥ एवंवसन्तथांतेवैमुक्तिंविंदतिचोत्तमां ॥६७॥ श्रीस्कंदउवाच ॥ नैकाहमप्युषितशंकरार्चकोनिष्ठा
सुतिष्ठेच्चशतंसमानरः ॥ योऽब्वाशनोरेतपपातकोभवेदन्नाशनोविट्क्रिमिभुक्परेतः ॥६८॥ प्राय-
श्चित्तंचाचित्तेकलयति तदुदीर्णानिर्यवसेत्स्वकंमुंडमुंड्योनभवतिपरेतोयमभटैः ॥ उपोष्यैवासायंशि
नमथयजेतद्विगुणितंअहोभक्तेष्वर्ध्यंददतिहिभवेत्सोत्रनियतः ॥६९॥ येकालकालंनियमात्रिकालंद्विकालम
प्येकतरंचकालं ॥ संपूज्यकाश्यांतुशिवार्चकाद्विजाः कुर्युस्तुजाबालगानिष्कृतिंद्विजाः ॥७०॥ उमाधवंमाधवमंबिकांगणं
स्कंदंद्विजाभैरवदंडपाणिनं ॥ गंगांचदुर्गांननमंतियेनरास्तेपामराभैरवयातनारताः ॥७१॥ चतुर्दश्यांकाश्यांविधि
नियतनक्ताशनरताः शिवेभूत्वायुक्ताशिवभजनसक्ताहिसुनराः ॥७२॥ द्विजाःकालाष्टम्यांशशिशकलचूडार्चनरताः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लभंते देहांते शिवसंन्न मध्ये शिवजनाः ॥ ७३ ॥ यो वा प्रदोषे नि[?]सोमवारे त्रिलोचनं पूजयते स धन्यः ॥ वन्यैः कि
मन्यैः नरजन्मगादि भैः काश्यां च सामान्यनरैर्भरै र्भुक्तः ॥ ७४ ॥ मुक्त्या रम्या कांत भजति तमुमा कांत कृपयां प्रदो
षे विशेषेण लोकास्तद्दोषे महाशेष भूषां गलिंगार्चकश्चेत् ॥ विशेषेण दोषज्ञ एव प्रमोषो न तस्यास्ति बुधे
रशेषामरेड्यः ॥ शक्ता मुक्ते पि च देहसौख्यं मुक्ता विरक्ता [?] न महेश भक्ताः ॥ सकां ध्यधर्मेषु न न क्त भक्ता
व सुमनात्र नरा न मुक्ताः ॥ काश्यां स्थित्वापि पापाः शिवभजनहीना हि कुनराः महेशं विश्वेशं यदि स्वकदशां
नैकमलयेत् ॥ कृपापात्रीं यात्रीं प्रतिदिनमपां तर्गृहवरे त्रिनेत्रस्य प्रीतां नहि चरति पात्यं धत मासि ॥ ते मज्ज
२८८ यंत्यघगिरिं वरगोगनीरे मज्जं[?]ति नौदयविधे किल मज्जनास्ते ॥ ७६ ॥ प्राज्यां च मुक्तिपदवीमदवीयसीं ते सं
प्राप्नुवंति गिरिजे विरिजा भवंति ॥ निंसे न्नियमतोत्र भुक्तिमु क्त्यै ॥ शिवनिष्ठो हि गरिष्ठ एष धर्मः श्रुतिसीमंन वि
शिष्ठवाक्यमेतन्न विमुचेद विमुक्त गोव रिष्ठः ॥ ७९ ॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे प्रायश्चि
त्ता विमुक्तवासकथनं षड्त्रिंशोध्यायः ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ श्री ईश्वर उवाच ॥
शांत्यध्यायान् प्रवक्ष्यामि समाहितमनाः शिवे ॥ राजचोराग्निपीडासु ग्रहभूतगदादिभिः ॥ १ ॥ पीडितानां त्रिवेशां=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०८ स्ते मय्येवमनसाकृताः ॥ ततः शृणु वदाम्यद्य सर्वपापक्षयाय च ॥२॥ अतः परमिदं गुह्यं रुद्रेणोद्गीतं महोदयं ॥ महावि
घ्नप्रशमनं महाशांतिकरं शुभं ॥३॥ अकालमृत्युशमनं सर्वव्याधिनिवारणं ॥ परचक्रप्रमथनं सदाविजयवर्धनं ॥
४॥ स्तंभनं परसैन्यस्य रिपुनाशकरं सदा ॥ विषग्रहक्षयकरं समस्ताभीष्टसाधकं ॥५॥ सर्वशांत्यधिकाराख्यं
धर्मं वक्ष्ये शृणुष्व तं ॥ शशांकधारकस्त्र्यक्षो नागयज्ञोपवीतवान् ॥६॥ चतुर्मुखश्चतुर्बाहुः सितभस्मावगुंठितः ॥
वरो वरेण्यो वरदो वामदेवो महेश्वरः ॥७॥ त्रैलोक्यनमितः श्रीमान् शांतिं वाशु करोतु मे ॥ सर्वावयवमुख्येन गात्रेण
तनुमध्यमा पीतश्यामाति सौम्येन शिवरूपेण शोभिता ॥८॥ ललाटतिलकोपेता चंद्ररेखार्धधारिणी दिव्यांबरधरा दे-
वी सर्वाभरणभूषिता ॥९॥ वरस्त्री सर्वनारीणां शोभागुणमहास्पदा ॥ भावनामात्रसंतुष्टा उमादेवी वरप्रदा ॥१०॥
साक्षादागत्य रूपेण शांत्येनामिततेजसा ॥ शांतिं करोतु मे प्रीता भक्तानां भक्तवत्सला ॥ पद्मरागद्युतिः सौम्यो रक्त
माल्यानुलेपनः ॥ अबालो बालरूपेण षण्मुखः शिखिवाहनः ॥१२॥ पूर्णेंदुवदनः सौम्यस्त्रिशिखाशक्तिसंयुतः ॥
कृत्तिकोमाग्निरुद्राणां गंगोद्भूतः सुरार्चितः ॥१३॥ कार्त्तिकेयो महातेजा वरदानैकतत्परः ॥ शांतिं करोतु मे प्री
तो बलं सौख्यं च सर्वदा ॥१४॥ श्वेतवस्त्रपरीधानः त्र्यक्षः कनकसप्रभः ॥ शूलपाणिर्महाप्राज्ञो नंदीशः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवभावितः ॥१५॥ शांतिं करोतु मे शांतो धर्मेच मतिमुक्तवान् ॥ महोदरो महाकायो स्निग्धांजनसमप्रभः ॥ १६॥
एकदंष्ट्रोल्कयो देवो गजवक्त्रो महाबलः ॥ नागयज्ञोपवीती च नागाभरणभूषितः ॥ १७॥ सर्वार्थसंपदाधारो
गणाध्यक्षो वरप्रदः ॥ रुद्रस्य तनयो देवो नायकोऽप विनायकः ॥१८॥ करोतु मे महाशांतिं कर्मसिद्धिं च सर्वदा ॥ इं
द्रनीलनिभस्त्र्यक्षो दीप्तशूलायुधोद्यतः ॥१९॥ रक्तांबरधरः श्रीमान् कृष्णांगो नागभूषणः ॥ पापनीदन संशुद्धः स्व
लक्ष्मीमलनाशनः ॥ २०॥ करोतु मे महाशांतिं महाकालो महाबलः ॥ पीतांबरपरीधाना कन्यारूपा स्वलंकृता ॥२१॥
गणनाथांबिका त्र्यक्षा गुण्या गौरी सुरेश्वरी ॥ सर्वसिद्धिप्रदा देवी प्रसाद परमा परा ॥ २२॥ शांतिं करोतु मे शां
२४१ तिं ~~करोतु मे शांतिं~~ सिद्धिमाशु प्रयच्छतु ॥ स्निग्धास्या मीनवर्णे नमः हिषासुरमर्दिनी ॥२३॥ धनुश्चक्रमहर-
णाशंखयष्ट्यसिधारिणी ॥ अतर्जनीद्यताकारा सर्वोपद्रवनाशिनी ॥२४॥ सर्वमंगलमाता मे शिवमाशु प्रय
च्छतु ॥ निर्मासेन शरीरेण सुस्नाय्वस्थिनिबंधनं ॥२५॥ अतिसूक्ष्मोतिविक्रांतस्त्र्यक्षो भृंगिरिटिर्महान् ॥
रुद्रात्मजो रुद्रवीरो रुद्रैकगतमानसः ॥२६॥ सोपि शांतात्मभावेन शांतिमाशु करोतु मे ॥ प्रचंडगणसैन्येशो म
हाटंकारसूत्रधारकः ॥२७॥ अक्षमालार्पितकरः त्र्यक्षश्चंडेश्वरप्रभुः ॥ प्रचंडपापहरणो ब्रह्महत्यादिशोधकः ॥२८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०९ करोतु मे महायोगी कल्याणं परमं शुभं ।। पद्मासनः पद्मनिभः चतुर्वदनपंकजः ।।२९।। कमंडलुधरः श्रीमान्देवगंधर्व
पूजितः ।। शिवध्यानैकनिरतः शिवसद्भाव भावितः ।।३०।। ब्रह्मशब्देन दिव्येन ब्रह्मा शांतिं करोतु मे ।। शंखकुंदेंदुवर्णा
भः कंठे मारकतप्रभः ।।३१।। अक्षमाला सरोग्रस्त शिवध्यानेव्यवस्थितः ।। चतुर्मुखश्चतुष्पादस्त्रिनेत्रः सर्वतोज्व-
लः ।।३२।। क्षितेः पतिर्वृषो देवो धर्मो धर्मेत्तमो तमः ।। शिवं वहति पृष्ठेन तस्माद्धर्मो जगत्प्रभुः ।।३३।। वृषो वृषपतिः श्रीमा-
न्देवगंधर्वपूजितः ।। शिवध्यानैकसंपन्नः शिवसद्भाव भावितः ।।३४।। वृषशब्देन दिव्येन वृषः शांतिं करोतु मे ।।
तार्क्ष्यासनश्चतुर्बाहुः शंखचक्रगदाधरः ।।३५।। श्यामः पीतांबरधरो वनमालाविभूषितः ।। यज्ञो देवोत्तमो देवो मा-
धवो मधुसूदनः ।।३६।। शिवप्रसादसंपन्नः शिवध्यानपरायणः ।। शिवार्चनरतो नित्यं विष्णुः शांतिं करोतु मे ।।
३७।। पद्मरागप्रभा देवी चतुर्वदनपंकजा ।। अक्षमालार्पितकरा कमंडलुधरा शुभा ।।३८।। ब्रह्माणी सौम्यवदना शिव-
पूजापरायणा ।। शांतिं करोतु मे पीता ब्रह्मशब्देन निर्मला ।।३९।। मयूरवाहना देवी सिंदूरारुणविग्रहा ।। शक्तिहस्ता म-
हारूपा सर्वाभरणभूषिता ।।४०।। रुद्रभक्ता महापुण्या रुद्रार्चनरता सदा ।। कौमारी वरदा देवी क्षेमारोग्यं ददातु मे ।।४१।।
शंखचक्रगदाहस्ता श्यामपीतांबरप्रिया ।। चतुर्भुजा तार्क्ष्यरथा वैष्णवी सुरपूजिता ।।४२।। शिवार्चनरता भ=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारूढैकगतमानसा ॥ शान्तिं करोतु मे नित्यं सर्वासुरविमर्दनी ॥ ४३ ॥ हिमशैलनिभा देवी महावृषभवाहिनी ॥ त्रिशू-
लहस्तवरदा नानाभरणभूषिता ॥ ४४ ॥ रुद्रभक्ता महावीर्या रुद्रार्चनरता सदा ॥ चतुर्भुजा चतुर्वक्त्रा त्रिनेत्रा पाप-
हारिणी ॥ ४५ ॥ आर्त्तिं हरतु मे प्रीत्या माहेशी नित्यमुज्वला ॥ वराहघोणविकटा वराहवृषवाहना ॥ ४६ ॥ श्यामां-
गा वरदा देवी शंखचक्रगदाधरा ॥ तर्जयंती सदा विघ्नान् अर्चयंती सदा शिवं ॥ ४७ ॥ वाराही वरदा देवी क्षेमारोग्यं-
ददातु मे ॥ ऐरावतगजारूढा वज्रहस्ता महाबला ॥ ४८ ॥ नेत्राणां च सहस्रेण भूषिता कनकप्रभा ॥ ऐंद्रे देवी स-
दा काली शांतिमाशु करोतु मे ॥ ४९ ॥ ऊर्ध्वकेशोत्कटाक्षा मांसा सहस्रासु बंधना ॥ करालवदना घोरा खड्गघंटा
वरोद्धता ॥ ५० ॥ कपाल मालिनी देवी क्रूरखट्वांग धारिणी ॥ आरक्तपिंगनयना गजचर्मावगुंठिता ॥ ५१ ॥ नाना
४१० नागपरीतांगी प्रेतोपरिनिवासिनी ॥ शिवरूपेण घोरेण शिवाराव भयंकरी ॥ ५२ ॥ चामुंडा चंडरूपे-
ण ~~घोरेण शिवाराव भयंकरी~~ ॥ चित्रायंत्रासने नतु ॥ भूतप्रेतपिशाचेभ्यो मम रक्षां करोतु सा ॥ आकाशमात-
रो देव्यस्तथा भूलोकमातरः ॥ भूतानां मातरः सर्वास्तथान्याः पितृमातरः ॥ ५४ ॥ सर्वमातृगणा देव्यः स्वायुध-
व्यग्रपाणयः ॥ जगद्व्याप्यावतिष्ठंत्यो बलिकामा महोदयाः ॥ ५५ ॥ रुद्रभक्ता महावीर्या रुद्रार्चनपराः सदा ॥ शांतिं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११० कुर्वंतु मे नित्यं मातरश्च सुपूजिताः ॥ ५६ ॥ ये रुद्रा रौद्रकर्माणो रुद्रस्थाननिवासिनः ॥ सौम्याश्चैव तु ये केचित् सौम्यस्थाननि-
वासिनः ॥ ५७ ॥ मातरो रुद्ररूपाश्च गणानामधिपाश्चये ॥ विघ्नभूतास्तथैवान्ये दशदिक्षु समाश्रिताः ॥ ५८ ॥ सर्वे सुप्रीत-
मनसाः प्रतिगृण्हंत्विमं बलिं ॥ श्रीईश्वर उवाच ॥ मह्यां मह्यं च शांतिं सुततति धनगो वाजि मातंग यूथै राष्ट्रे ग्रामे पु-
रे वास्तु विहितमधुना शांतिदाः संतु सर्वाः ॥ सर्वे शर्वार्चनायां यमनियमरताः पांतु मां सर्वकाले नित्यं प्रीताः सदा मां
शिवपदनिरताः पांतु मां सर्वदेवाः ॥ ६० ॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे शांत्यध्यायो नाम सप्तत्रिंशो
ध्यायः ॥ ३७ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ श्री स्कंद उवाच ॥ सिद्धिं पुष्णंतु मे नित्यं भये-
भ्यः पांतु मां सदा ॥ ऐंद्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ॥ १ ॥ सुपीताक्षा पीतनिभाः तथा वै पीतलोहिताः ॥ दि-
व्यांतरिक्षभौमाश्च पातालतलवासिनः ॥ २ ॥ रुद्रार्चनरता नित्यं शांतिं कुर्वंतु मे सदा ॥ आग्नेय्यां ये गणाः सर्वे शक्तिह-
स्ता निषंगिणः ॥ ३ ॥ सुरक्ताक्षाः स्वर्णनिभास्तथा वै पीतलोहिताः ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः ॥
४ ॥ रुद्रार्चनरता नित्यं शांतिं कुर्वंतु मे सदा ॥ आग्नेय्यां ये गणास्सर्वे शक्तिहस्ता निषंगिणः ॥ ५ ॥ शिवप्रण-
पराः शांतिं कुर्वंतु मे सदा ॥ याम्यां दिशि गणा ये तु सततं दण्डपाणयः ॥ ६ ॥ सुकृष्णाक्षाः कृष्णनिभाः तथा वै कृष्ण-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोहिताः॥ परमेशार्चनरताः शांतिं कुर्वंतु मे सदा ॥७॥ निऋत्यां येगणाः सर्वे राक्षसाः खड्गपाणयः ॥सुनीलाक्षानीलनि
भास्तथावैनीललोहिताः ॥८॥ दिव्यांतरिक्षभौमाख्यपरमेशार्चनेरताः॥ रंगैकध्याननिरताः शांतिं कुर्वंतु मे सदा ॥वारुण्यां येगणाः
सर्वे सततं पाशपाणयः ॥९॥ सुश्यमाक्षाश्याम निभाः तथावैश्यामलोहिताः॥ दिव्यांतरिक्ष भौमाख्य पातालतलवा
सिनः ॥१०॥ परमेशा॰ वायव्यां येगणाः सर्वे सततं ध्वजपाणयः ॥सुधूम्राक्षा धूम्रनिभास्तथावै धूम्रलोचनाः ॥११॥
दिव्यांत॰ शिवभक्तिपराः सर्वे क्षेमं कुर्वंतु मे सदा ॥१२॥ कौवेर्यां येगणाः सर्वे सततं निधिपाणयः ॥सुपीताक्षाः पी
तनिभाः तथा वै पीतलोहिताः ॥१३॥ दिव्यांतरिक्ष॰ शिव॰॥ ऐशान्यां येगणाः सर्वे प्रशांताः शूलपाणयः ॥सुसूक्ष्माक्षाः
सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ॥१५॥ दिव्यांतरिक्ष॰ रुद्रप्रणामपरमाः शांतिं॰॥ १६॥ ऊर्ध्वभागेगणा ये तु-
२७। सततं चक्रपाणयः ॥सुधूम्राक्षा धूम्रनिभास्तथावै धूम्रलोहिताः ॥१७॥ दिव्यां॰ शिव॰ ॥१८॥अधोभागेगणा-
येतु सततं चक्रपाणयः ॥ सुपद्माक्षाः पद्मनिभाः तथा वै पद्मलोहिताः ॥१९॥ दिव्यां॰ ॥ शिवपूजासमायुक्ताः शां
तिं कुर्वंतु मे सदा ॥२०॥ एते गणा महात्मानो महाबलपराक्रमाः ॥ शिवं संपूज्य यत्नेन स्वं स्वं पदमवापिरे॥२१॥
ततः सुप्रीतमनसः शांतिं कुर्वंतु मे सदा ॥ ततः स्तु प्रीत मनसः शांतिमायुर्बलं श्रियं ॥२२॥ प्रयच्छंत्वाशु मर्त्यानां तत्

१११ भक्तानां विशेषतः॥ नाम्नामरावती पुण्या पूर्वभागे व्यवस्थिता॥२३॥ विद्याधरगणाकीर्णा सिद्धगंधर्वसेविता॥
रत्नप्राकाररचिता महारत्नोपशोभिता॥२४॥ तत्र देवपतिः श्रीमान्वज्रहस्तो महाबलः॥ नेत्राणां तु सहस्रेण
शोभनेन विराजितः॥२५॥ ऐरावतगजारूढो हेमवर्णो महाद्युतिः॥ देवेंद्रः परमो हृष्टः परमेशार्चनेरतः॥२६॥
शिवध्यानैकसंपन्नः शिवभक्तिपरायणः॥ शिवभक्तैस्तथा चान्यैर्देवैरिह सहानुजैः॥२७॥ शिवप्रणामपरमः करो
तु मम शांतिकं॥ आग्नेय्यां तु दिशो भागे पुरी तेजोवती शुभा॥२८॥ नानादेवसमाकीर्णा रत्नज्वालासमाकुला॥
तत्र ज्वालापरीतांगो दीप्तांगारसमद्युतिः॥२९॥ भूतिकृद्देहिनां देवो ज्वलनः पापनाशनः॥ शिवपूजासमायु
क्तः शिवधारणभावितः॥३०॥ शांतिं करोतु मे देवस्तथा पापपरिक्षयं॥ वैवस्वतपुरी नाम्ना दक्षिणस्यां व्यवस्थि
ता॥३१॥ लोहप्राकारसंयुक्ता प्रासादैर्गोपुरैः शुभा॥ सुरासुरशतानीकपितृयक्षोरगालयः॥३२॥ तत्रेंद्रनीलसंकाशो
रत्नस्रग्वस्त्रभूषणः॥ खड्गपाणिर्महातेजाः करालवदनोज्ज्वलः॥३३॥ राक्षसेंद्रश्च निर्ऋतिः शिवार्चनरतः सदा॥
करोतु मे महाशांतिं शिवभक्तिसमुत्सुकः॥३४॥ पश्चिमे तु दिशो भागे पुरी शुद्धवती शुभा॥ नानारत्नसमाकी
र्णा नानाकिंनरसेविता॥ तेजःप्रकाशपर्यंता निरौपम्या सदोज्ज्वला॥ तत्र मौक्तिकसंकाशः परिपिंगललोचनः॥३५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वेतवस्त्रपरीधानः पाशहस्तो महाद्युतिः॥ वरुणः परया भक्त्या शिवे वाहितमानसः॥ रोगशोकार्त्ति संतापं विनाशयतु-
मे सदा॥ वायव्ये तु दिशो भागे पुरी गंधवती शुभा॥ ३८॥ ऋषिसिद्धगणाकीर्णा हेमप्राकारतोरणा॥ वपा धूम्रेण
प्रत्याऽऽऽ
देहेन कृष्णपिंगललोचनः॥ श्वेतवस्त्रपरीधानः पाशहस्तो महाद्युतिः॥ पटव्यामांतरालीनो ध्वजयष्ट्यायुधो
ज्वलः॥ पवनः परमो देवः परमेश्वरभावनः॥ क्षमारोग्यं बलं शांतिं करोतु मम सर्वदा॥ महोदया नाम पुरी उत्तरे
ण व्यवस्थिता॥ ४१॥ अनेकयक्षसंकीर्णा नानारत्नोपशोभिता॥ तत्र देवो गदाहस्तश्चित्रस्त्रग्वस्त्रभूषणः
॥४२॥ ह्रस्वबाहुर्महातेजाः परिपिंगललोचनः॥ कुबेरः श्रीमुखः श्रीमान् हरपादार्चने रतः॥ ४३॥ शांतिं करोतु मे-
प्रीतः शांतः शांतेव चेतसा॥ यशोवती पुरी रम्या ईशान्यां दिशि संस्थिता॥ ४४॥ नानागणसमाकीर्णा नानाकृतसु
०१२ रालया॥ तेजःप्राकारपर्यंता निरौपम्यगुणान्विता॥ ४५॥ तत्र मौक्तिकसंकाशः शशांककृतशेखरः॥ त्रिनेत्रः शांत-
रूपात्माह्यक्षमालाधरो हरः॥ ४६॥ ईशानः परमो देवः शिवध्यानैकतत्परः॥ सोपि सर्वात्मभावेन शांतिमाशु करोतु मे॥
४७॥ शांता शिवार्चनरताः शिवपादसक्ताः ~~शिवपादसक्ताः~~ शक्तास्त एव भुवनेषु सदैव मुक्ताः॥ युक्तामरत्वायुतफलैर्व र-
भस्मभूषा रुद्राक्षवक्षस इमे शिवलिंगभक्ताः॥ ४८॥ इतिश्री शिवरहस्ये महादेवाख्ये एकादशांशे शांत्यध्यायो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११२ नामअष्टत्रिंशोध्यायः ॥ ३८ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवायनमः ॥ श्रीईश्वरउवाच ॥ ॥ भूलोकेच अ॰ ३८
भुवर्लोके स्वर्लोके चवसंतिये ॥ देवादिव्यप्रभायुक्ताः शांतिंकुर्वंतुमेसदा ॥ १ ॥ महर्लोकेजनलोकेतपोलोकेचयेस्थिताः ॥ तेतुप्र
मुदितादेवाः शांतिंकुर्वंतुमेसदा ॥ २ ॥ सत्यलोकेचयेदेवाःप्रभाज्वलितविग्रहाः ॥ शिवभक्ताःसुमनसो भयार्त्तिंना
शयंतुमे ॥ ३ ॥ तपोलोकेचयेदेवाःशुभ्रस्फटिकविग्रहाः ॥ रुद्रभक्तामहात्मानः शिवंकुर्वंतुमेसदा ॥ ४ ॥ जनलोके
चयेदेवाधौतचामीकरप्रभाः ॥ ईशानंप्रणतानित्यंशांतिंकुर्वंतुमेसदा ॥ ५ ॥ महर्लोकेचयेदेवाविमानोज्वलसंस्थि
ताः ॥ भवप्रणामपरमानाशयंतुभयंसदा ॥ ६ ॥ भुवर्लोकेचयेदेवाःदीप्तिमंतोमहाबलाः ॥ शंकरंप्रणतानित्यंकुर्वं
तुविजयंमम ॥ ७ ॥ भूर्लोकेयेस्थितादेवाभासयंतिदिशोदश ॥ शिवैकशरणादेवाः पापंप्रशमयंतुमे ॥ गिरिकं
दरदुर्गेषुमुनयोनिवसंतिये ॥ रुद्रार्चनरतानित्यंशांतिंकुर्वंतुमेसदा ॥ ९ ॥ शरच्चंद्रांशुगौरेणदेहेनामिततेजसा ॥
सरस्वती शिवेभक्ताशांतिमाशुकरोतुमे ॥ १० ॥ चारुचामीकरप्रख्यासरोजकरपल्लवा ॥ शिवभक्ताचश्रीर्देवी
श्रीमद्भूतिंददातुमे ॥ ११ ॥ चारुणामुखचंद्रेणविचित्रकनकोज्वला ॥ जयादेवीशिवेभक्तासर्वान्कामान्ददातुमे ॥
॥ १२ ॥ हारेणसुविचित्रेणभास्वत्कनकमेखला ॥ पराजितारुद्रभक्ताकरोतुविजयंसदा ॥ १३ ॥ सिंदूरारुणवर्णेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहे नायत लोचनः॥ सहस्र किरणः श्रीमान् सप्तसप्तिकवाहनः ॥१४॥ गभस्तिमाली भगवान् शिवपादार्चने रतः॥ करोतु
मम हा शांतिं ग्रह पीडा निवारणं ॥१५॥ जगदाप्यायनकरोप्यमृतांशुः सुशीतलः॥ सोमः सौम्येन भावेन ग्रह पीडां व्यपोहतु॥
१६॥ पद्मरागेण देहेन दृवः पिंगललोचनः ॥ अंगारकस्तु सततं रुद्र पूजा परायणः ॥ रुद्रसद्भावसंपन्नो रुद्रध्या
नैकतत्परः ॥ ग्रह पीडा भयं सर्वं विनाशयतु मे सदा ॥१८॥ कुंकुमछवि नाश्री मान् श्रीमान् देहेन पिंगलः ॥ बु
धोऽपि शिव धामात्मा ग्रह पीडां व्यपोहतु ॥१९॥ तप्त चामीकराभासः सर्वज्ञान सुधालयः॥ बृहस्पतिः सदा का
लमीश्वरार्चन तत्परः॥ २०॥ सोपि शांतात्म चित्तेन परमेण समाधिना ॥ ग्रह पीडां विनिर्जित्य करोतु विजयं मम॥
॥२१॥ हिमकुंदेंदु तुल्याभः सुरदैत्येंद्र पूजितः॥ शुक्रः शिवार्चको नित्यं ग्रह पीडां व्यपोहतु॥२२॥ भिन्नांजनसम
२९३ च्छायः सुरक्तनयनद्युतिः॥ शनैश्चरः शिवे भक्तो ग्रहपीडां व्यपोहतु ॥२३॥ धूम्रायमाणः सततं सर्वोत्पातसमन्वितः॥
नीलांजनसमः श्रीमान् सैंहिकेयो महाद्युतिः ॥२४॥ शिवपूजारतो राहुः ग्रह पीडां व्यपोहतु॥ धूम्रायमाणः सत-
तं०॥२५॥ नीलां०॥ शिवार्चन रतः केतुर्ग्रह पीडां व्यपोहतु ॥२६॥ एते ग्रहा महात्मानः शिवार्चन परायणाः॥ शांतिं
कुर्वंतु मे हृष्टाः सदा कालं हितैषिणः॥ २७॥ मुखे यस्या स्थितो मृत्युः पुष्टिर्नाम महाबलः॥ सुमुखी विघ्नकारी=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११२ चपुच्छेच विजयंकरी ॥ २८॥ रुद्रप्रणाम परमा शांतिमाशुकरोतुमे ॥ तृतीयासप्तमोचैव दशमी च चतुर्दशी ॥२९॥ अ॰ ३९
चतुर्थीचाष्टमीचैव एकादशीचपूर्णिमा ॥ एता विघ्नकरा भक्ताःशुक्लकृष्णसमुद्भवाः ॥ ३०॥ भवंतुमे श्रियेनि-
त्यंकुर्वंतु विजयंसदा ॥अमावास्या महापुण्यापितृदेवसमन्विता ॥३१॥ प्रियाह्येषातु परमा शिवस्यपरमात्म-
नः ॥ शिवतेजसमायुक्ता करोतुममशांतिकं ॥ ३२॥ प्रतिपद्वन्हि संयुक्ता द्वितीया विधिदेवता ॥तृतीयाचम-
हाभागा धनदेन समन्विता॥ चतुर्थीच महापुण्या गजवक्त्राधिदेवता ॥ पंचमी नागदैव[illegible]त्या षष्ठीस्कं-
दाधि देवता ॥३४॥ सप्तमी रविसंयुक्ता अष्टमी रुद्रसंयुता ॥ नवमी तिथि रत्युग्रा दुर्गा देव्यधिदेवता ॥३५॥
दशमीधर्म संयुक्ता रुद्रेणैकादशी युता ॥ द्वादशी विष्णु संयुक्ता मदने नत्रयोदशी ॥ ३६॥ चतुर्दशी महेशेन पूर्णि
मासु विनाभुना ॥ एतास्तु तिथयस्सर्वाः ईशानार्चनतत्पराः॥ ३७॥ शांतिं कुर्वंतुमे नित्यं सदाकालं हितैषिणः॥
विष्कंभप्रीतिरायुष्मान् सौभाग्यं शोभनंतथा ॥ ३८॥ अतिगंड सुकर्माच धृतिः शूल[illegible]स्तथैवच ॥ गंडोवृद्धिध्रु-
वश्चैव व्याघातो हर्षणस्तथा ॥ वज्रं सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः ॥ ४०॥ सिद्धः साध्याः शुभंशुक्लोब्र-
ह्मो माहेन्द्रवैधृती ॥ इन्द्रस्य भानोरुत्पन्नाह्येते योगा महाबलाः॥ ४१॥ शिव भक्तियुताः सर्वे शिव भक्तिविधा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यिनः॥ शांतिं कुर्वंतु मे नित्यं शिवध्यान परायणाः॥४२॥ कृत्तिका परमा देवी रोहिणी रुचिरानना॥ श्रीमान् मृगशिरा-
भद्रा आर्द्रा च परमोज्वला॥४३॥ पुनर्वसुस्तथा पुष्य आश्लेषा च महोज्वला॥ नक्षत्र मातरो ह्येताः प्रभामाला वभा
स्वराः॥४४॥ महादेवार्चनरता महादेवानुभाविताः॥ पूर्वभागे स्थिताश्चैताः शांतिं कुर्वंतु मे सदा॥४५॥ मघासर्-
वगुणोपेता पूर्वा चैव तु फाल्गुनी॥ उत्तरा फाल्गुनी श्रेष्ठा हस्तश्चित्रा तथोत्तमा॥४६॥ स्वाती विशाखा न रुद्रा दक्षि
ण स्यां सु संस्थिताः॥ अर्चयंत्यः सदा कालं देवं त्रिनयनं प्रभुं॥४७॥ ममापि शांतिं चैवैताः कुर्वंतु शिवचोदिताः॥
अनुराधा तथा जेष्ठा मूला वृद्धिसमन्विता॥४८॥ पूर्वाषाढा महावीर्या आषाढा चोत्तरा शुभा॥ अभिजिन्नाम नक्षत्रं
श्रवणं परमोत्तमं॥ एताः पश्चिमतो दीप्ता राजंत्यश्चारुमूर्तयः॥ ईशानं पूजयंत्येताः सर्वकालं सुमैः शिवे॥५०॥
५९४ प्रशांतिं मम कुर्वंतु विभूतिं च समाहिताः॥ श्रविष्ठा शतभिषश्चैव पूर्वभाद्रपदा तथा॥५१॥ उत्तरा भाद्र रेवत्या अश्व
नी च महार्थिका॥ भरणी च महावीर्या नित्यमुत्तरतः स्थिताः॥५२॥ शिवार्चनरता नित्यं शिवध्यानैकमानसाः॥
शांतिं कुर्वंतु मे नित्यं सर्वकालं सुखोदयाः॥५३॥ अथ मेषो मृगाधीशो धनुर्दीप्तिमतां वरः॥ पूर्वेण भाषयंत्येते
शिवपूजा परायणाः॥५४॥ शांतिं कुर्वंतु मे नित्यं बलं सौभाग्यमेव च॥ वृषकन्या च वरदा मकरश्च महार्थिकः॥५५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११४ ह्रूपास्रता नित्यं शिवभावेन भाविताः॥ एते दक्षिण दिक्संस्थाः पूजयंतिसदा शिवं॥५६॥ भक्त्या च परया
नित्यं शांतिं कुर्वंतु मे सदा॥ मिथुनं च तुला कुंभौ पश्चिमस्यां दिशि स्थिताः॥५७॥ शिवपादार्चनरताः शांतिं—
कुर्वंतु मे सदा॥ कर्कटो वृश्चिको मीनो ह्येता उत्तरतः स्थिताः॥५८॥ यजंतेते सदाकालं रुद्रं भुवननायकं॥ शांतिं कुर्वंतु मे
नित्यं शिवध्यानविधायिनः॥५९॥ ऋषयः सप्त विख्याता ध्रुवांताः परमोज्वलाः॥ भस्मरुद्राक्षभूषाढ्याः त्रिपुंड्रपरिमंडि
ताः॥६०॥ शिवलिंगार्चनपरास्त्रिकालममितौजसः॥ कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनिः॥६१॥ भृगु
र्दक्षो वसिष्ठश्च मृकंडुः पुलहः क्रतुः॥ नारदो मनुरत्रिश्च भरद्वाजोंगिरा मुनिः॥६२॥ वाल्मीकः कौशिकः कर्णाः एवः
शाकल्योथ पुनर्नसुः॥ शालंकायन इत्याद्या मुनयो यतपश्विनः॥६३॥ शिवार्चनरता नित्यं शांतिं कुर्वंतु मे सदा॥
ऋषिपत्न्यो महाभागाः ऋषिकन्याः कुमारकाः॥६४॥ शिवार्चनरता नित्यं शांतिं कुर्वंतु मे सदा॥ कुर्वंतु शांतिं वि-
विधाः सुरोत्तमाः शिवार्चका भस्मत्रिपुंड्रभूषिताः॥ लिंगार्चकाः शाश्वतधर्मयुक्ता भवंतु शांत्यैव शिवप्रसादात्॥
॥६५॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे शांतिध्यायो एकोनचत्वारिंशोध्यायः॥३९॥ श्रीकाशीवि
श्वेश्वरार्पणमस्तु॥ श्रीमहादेवायनमः॥ श्रीईश्वरउवाच॥ सिद्धाश्च शुद्धतपसो गंधर्वाप्सरसांगणाः॥ विद्या—

धरामाहात्मानो गरुडश्च महार्थिकाः ॥१॥ महेश्वरपराह्येते महेश्वरपदार्चकाः ॥ सिद्धिमाशु प्रयच्छंतु शिवधर्मप
रायणाः ॥ २॥ नमुचिर्दैत्यराजेंद्रः शंभुपूजापरायणः ॥ महानादोपि विख्यातो दैत्यः परमवीर्यवान् ॥ हाटकेश्वरदेव
स्य नित्यं पूजापरायणः ॥ बलं वीर्यं च मे क्षिप्रं प्रयच्छंतु महार्थिकाः ॥४॥ महाजंभो हयग्रीवो प्रल्हादो दैत्यपुंगवः ॥
तारकाग्निमुखा दैत्याः कालनेमी महाबलः ॥ ५॥ एते दैत्या महात्मानः शिवसद्भावभाविताः ॥ पुष्टिं बलं तथा वीर्यं
प्रयच्छंतु च मे सुखं ॥६॥ वैरोचनो हिरण्याक्षः सुपर्वा च सुलोमकः ॥ मुचुकुंदः सुकंसश्च दैत्यो रोचनकस्तथा
॥७॥ भावेन परमेणाशु यजंतः सर्वदा शिवं ॥ सततं शिवभावेन पुष्टिं कुर्वंतु मे सदा ॥८॥ आरक्तेन शरीरेण कर्णान्ता
२९५ यतलोचनः ॥ महाभोगकृताटोपशेखाभ्रकृतलांछनः ॥९॥ अनंतो नागराजेंद्रः शिवपादार्चने रतः ॥ महापापविषं
हत्वा शांतिमाशु करोतु मे ॥१०॥ सुश्वेतेन शरीरेण सुश्वेतोत्पलशेखरः ॥ चारुभोगकृताटोप चारुहारविभू-
षणः ॥ वासुकिर्नागराजेंद्रः शिवपादार्चने रतः ॥ सर्वरोगविषं हत्वा ह्यारोग्यं ददातु मे ॥१२॥ अति पीतेन देहे
न प्रस्फुरद्भोगसंपदा ॥ तेजसा चातिदीप्तेन कृतस्वास्तिकलक्षणः ॥१३॥ नागेंद्रस्तक्षकः श्रीमान् ना-
गकोट्या समन्वितः ॥ करोतु मे महाशांतिं सर्वसर्पविषापहं ॥१४॥ अतिकृष्णेन देहेन स्फुरद्विकटमस्तकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११५ कंठरेखात्रयोपेतो घोरदंष्ट्रायुतोद्यतः ।।१५।। कर्कोटको महातेजा विषदर्पसमन्वितः ।। विषशस्त्रादिसंतापं हत्वा-
शांतिं करोतु मे ।।१६।। पद्मवर्णेन देहेन पद्मपत्रायतेक्षणः ।। पद्मविंदुकृताभासो ग्रीवायां मेकरेखया ।।१७।। ख्या-
तः पद्मो [illegible] महानागो हरपादार्चने रतः ।। करोतु मे महाशांतिं महापापविषक्षयं ।।१८।। पुंडरीकनिभेनापि
षृ देहेनामिततेजसा ।। शंखशूलाअरूपैरै भूतो मूर्ध्नि विंदुभिः ।। महापद्मो महानागो हरपादार्चने रतः ।। विनिह-
त्य विषं घोरं शांतिमाशु करोतु मे ।।२०।। अतिगौरेण देहेन चंद्रार्धकृतशेखरः ।। दीप्तभोगकृताटोपः शंभुलक्षण-
लक्षितः ।।२१।। श्यामेन देहरागेण श्रीमान्कमललोचनः ।। विषदर्पबलोपेतो ग्रीवायामेकरेखया ।।२२।। शंखपाल
श्रिया दीप्त्या शिवपादाब्जपूजकः ।। महाविषं महाघोरं शांतिमाशु करोतु मे ।।२३।। गुलिको नागराजेंद्रो नि-
त्यं हरपरायणः ।। अपहृत्य विषं घोरं करोतु विषशांतिकं ।।२४।। अंतरिक्षचरा नागा ये नागा भुवि संस्थिताः ।।
पाताले संस्थिता नागाः सर्वे पुत्रसमन्विताः ।।२५।। रुद्रपादार्चनोद्युक्ताः शांतिं कुर्वंतु मे सदा ।। नागिन्यो नाग-
कन्याश्च तथा नागकुमारकाः ।।२६।। शिवभक्ताः सुमनसः शांतिं कुर्वंतु मे सदा ।। य इदं नागसंस्थानं कीर्त
ये द्वा श्रुणोतु वा ।।२७।। न तं नागा विहिंसंति विषं नाक्रमते तथा ।। गंगा पुण्या महादेवी यमुना नर्मदा नदी ।।२८।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोमती चापि कावेरी वरुणा देविका तथा ॥ सर्वभूतपतिं देवं परमेशं महेश्वरं ॥२९॥ पूजयंति सदानंदा सदा
तद्भावमास्थिताः ॥ शांतिं कुर्वंतु मे नित्यं सदा पापपरिक्षये ॥३०॥ चंद्रभागा महापुण्या नदी गोदावरी शुभा ॥ शरयू गंडकी
श्रेष्ठा कौशिकी च सरस्वती ॥३१॥ पं पावेती पुण्या श्रेष्ठा विष्णुनदी तथा ॥ एता नद्यो महाभागा शिवपादार्चने रताः ॥३२॥
शांतिं कुर्वंतु मे प्रीताः शिवध्यानैकमानसाः ॥ नैरंजना नाम नदी शोणश्चापि महानदः ॥३३॥ मंदाकिनी च परमा तथा
सन्निहिती शुभाः ॥ एताश्चान्यो महानद्यो भूमिदिव्यंतरिक्षगाः ॥३४॥ रुद्रार्चनपरा नद्यः कुर्वंतु मम शांतिकं ॥ गुप्ता
नियानि तीर्थानि आसमुद्रात्सरांसि च ॥३५॥ कुर्वंतु मे शांतिकं तानि कीकठा धिष्ठितानि च ॥ महावैश्रवणो
२९८ देवः यक्षराजो महार्धिकः ॥३६॥ यक्षकोटिपरीवारः यक्षासंख्येयसंतः ॥ महाविभवसंपन्नो हरपादार्चने रतः ॥३७॥ शां-
तिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः ॥ माणिभद्रो महायक्षः मणिरत्नविभूषितः ॥३८॥ मनोहरेण हारेण कंठलग्नेन राजते ॥
शिवध्यानपरो नित्यं शिवपादाब्जपूजकः ॥ शांतिं करोतु मे नित्यं सर्वरोगनिवारणं ॥ यक्षिणी यक्षकन्याभिः परि
वारितविग्रहः ॥४०॥ रुद्रार्चनरता नित्यं करोतु मम शांतिकं ॥ सुवीरो नाम यक्षेंद्रो मणिकुंडलभूषणः ॥४१॥ लला
टहेमपट्टेन शोभनेन विराजितः ॥ बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः ॥४२॥ शिवपूजाकरो नित्यं करोतु मम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११६ शांतिकं ॥ पद्मगो नाम यक्षेंद्रः कर्णिकाकरकोज्ज्वलः ॥ ४३ ॥ मकुटेनविचित्रेणकेयूराभ्यांविराजितः ॥ यक्षकन्या- अ० ४०
समायुक्तो यक्षकोटिसमन्वितः ॥ ४४ ॥ हरार्चनरतः श्रीमान् करोतु मम शान्तिकं ॥ श्रीमान्विभंडको यक्षोनाना-
रत्नविभूषितः ॥ ४५ ॥ चारुकुंडलयुग्मेन कर्णेनित्यंविराजितः ॥ यक्षेंद्रो यक्षनमितो यक्षसेनापतिर्बुधः ॥ ४६
हरपादार्चनरतः करोतुमम शान्तिकम् ॥ धृतराष्ट्रोमहातेजा यक्षो यक्षाधिपः प्रभुः ॥ ४७ ॥ दिव्यपट्टांशुकच्छ
न्नो मणिकांचन भूषणः ॥ ४८ ॥ शिवप्रसादसंपन्नः करोतु मम शातिकं ॥ पूर्णभद्रो महा यक्षोसर्वालंकार भूषितः ॥ ४९ ॥
रक्तदीप्तेन देहेन पट्टेनाति विराजितः ॥ यक्ष कोटिसहस्रेण परिवारित विग्रहः ॥ ५० ॥ रुद्रप्रणाम परमो रुद्र भक्तिर-
तः सदा ॥ रुद्रार्चनसमुद्युक्तः करोतु मम शांतिकं ॥ ५१ ॥ सूत उवाच ॥ शांतिं कुर्वंतु सर्वे हर पद कमलोदार भावैक भृंगाय
क्षास्त्र्यक्ष पदांबुजार्च नरताना गानगाः पांतु मां ॥ सद्योजात प्रियास्ता वर गिरिज निताः पुण्य नद्यो पि सद्यः पापं मे प्रवि
नाशयंतु सततं शर्वार्चना सूद्यताः ॥ ५२ ॥ इति श्री शिवरहस्ये महादेवाख्ये एकादशांशे शांत्यध्यायो नाम चत्वारिंशो ध्यायः ॥
॥ ४० ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री महादेवाय नमः ॥ शिवाय गुरुवे नमः ॥ श्री स्कंद उवाच ॥ पूर्णभद्रो महाय-
क्षो सर्वालंकार भूषितः ॥ रक्तदीप्तेन देहेना पट्टेनाति विराजितः ॥ १ ॥ यक्ष कोटि सहस्रेण परिवारितविग्रहः ॥ रुद्रप्रणाम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पर मोरुद्र भक्ति रतः सदा ॥ रुद्रार्चन समुद्युक्तः करोतु मम शांतिकं ॥ विरूपाक्षश्च यक्षेंद्रः श्वेतवासा महद्युतिः ॥ चारु-
कांचनमालाभिः किंकिणीरवकांचितः ॥१॥ विभूषितः सदा कालं वरदानैक तत्परः ॥ रुद्रपूजाकरो नित्यं करोतु मम
शांतिकं ॥२॥ अंतरिक्षेचये यक्षाः येयक्षाः सर्वसंस्थिताः ॥ गिरिकंदरदुर्गेषु येयक्षा भुविवासिनः ॥ पातालवासिनो
यक्षाः नानारूपायुधोद्यताः ॥ शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः ॥४॥ शांतिं कुर्वंतु मे हृष्टाः शांताः शान्तेन
चेतसा ॥ यक्षिण्यो विविधाकारास्तथा यक्षकुमारिकाः ॥५॥ यक्षकन्या महाभागाः शिवध्यानैकतत्पराः ॥ शांतिं
स्वस्त्ययनं क्षेमं बलं कल्याणमेव च ॥ सिद्धिमाशु प्रयच्छंतु नित्यमेव समाहिताः ॥ पर्वताः सर्वतः सर्वे पर्वतयश्च
महार्घकाः ॥७॥ शिवभक्ताः सुमनसः शांतिं कुर्वंतु मे सदा ॥ समुद्राः सरितः सर्वे सागराश्च महाधिकाः ॥८॥ र-
७९७ त्नगर्भाश्च विविधा ये चान्ये सागरा भुवि ॥ रुद्रपूजापरा नित्यं कुर्वंतु मम शांतिकं ॥९॥ राक्षसाः सर्वतः सर्वे
राक्षसा घोररूपिणः ॥ राक्षसा ये महावीर्या राक्षसाश्च महाबलाः ॥१०॥ स्थलस्था राक्षसा ये च अंतरिक्षेचरा राक्ष-
साः ॥ पाताले राक्षसा ये तु नित्यं रुद्रार्चने रताः ॥११॥ भैवं यस्य रूपं तु प्रेत भस्मावगुंठितं ॥ अनेकरूपधारिण्यो-
डाकिन्यश्च महाबलाः ॥१२॥ अन्तरीक्ष गता याश्च डाकिन्यः स्वर्गसंस्थिताः ॥ पाताले भूतले याश्च गिरिदुर्गेषु या स्थिताः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११८ रुद्रप्रणामपरमारुद्रपूजापराः स्थिताः॥तुरीयंलोचनंयस्यत्रिशूलंकरपल्लवे॥१३॥तेजसातस्यदेवस्यशांतिंकु(र्वन्तु मे सदा)॥सर्वतोभू
तरूपाढ्याः महाभूतामहोज्वलाः॥सर्वभूतस्थिताःसौम्याः सर्वभूतमनोहराः॥अंतरिक्षेचयेभूतायेभूतादिविसंस्थिताः॥
१५॥ पातालेभूतलेभूतायेचभूताः त्रिधामकाः॥खट्वांगंयस्यविमलंकपालंकरपल्लवे॥१६॥तेजसातस्यदेवस्यशां-
तिंकु॰॥प्रेतप्रेतगणाः सर्वे तेप्रीताः सर्वतोमुखे॥१७॥अंतरिक्षेचयेप्रेतायेप्रेतादिविसंस्थिताः॥पातालेभूतलेभू-
ताःयेचभूताःत्रिधामकाः॥ पातालेभूतलेचैवयेप्रेताःकामरूपिणः॥ स्मशानंनिलयोयस्यवृषभोयस्यवाहनं॥२१॥
तेजसातस्यदेवस्यशांतिंकु॰॥ येपिशाचामहावीर्यायेपिशाचामहार्धिकाः॥ २२॥ येपिशाचामहावीर्याः पिशाचाः
कामरूपिणः॥ नानारूपधराः सर्वे सर्वेतलगुणोत्तराः॥अंतरिक्षेपिशाचायेस्वर्गेयेचपिशाचकाः भूतलेयेपिशा
चायेपातलतलवासिनः॥चंद्रार्धंमस्तकेयस्यभस्मयस्यविभूषणं॥तेजसातस्यदेवस्यशांतिंकु॰॥२५॥अपस्मार
ग्रहाःसर्वेचापिज्वरग्रहाः॥गर्भबालग्रहायेतुनानारोगग्रहाश्चये॥ २६॥ अंतरिक्षेग्रहायेचस्वर्गेयेचग्रहोत्तराः॥
पातालेभूतलेयेचयेग्रहाःसर्वतोदिशः॥ २७॥ कंठेयस्यमहानीलंभूषणंयस्यपन्नगः॥तेजसातस्यदेवस्यशांतिं
कुर्वंतुमेसदा॥२८॥इतिदेवाद्यः सर्वे शिवज्ञानविधायिनः॥कुर्वंतुशांतिंजगतःशिवभक्तेषुसर्वदा॥२९॥शिवज्ञान=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परोभूत्वास्तुत्वैवं शिवभक्तकान्॥ शिवध्यानपरो भूत्वायतःस्तोत्रमुदीरयेत्॥ ३०॥ इत्युक्तो देवदेवस्य संन्निधौ
नंदिकेश्वरः॥ कृतांजलिपुटो भूत्वा देवंतुष्टाव हृष्टधीः॥३१॥जयात्मयोगसंस्थायजयसंशुद्धचेतसे।जयदानै
करूपायजयेशाय नमोस्तु ते॥ ३२॥जयोत्तमाय देवायजय कल्याण रूपिणे॥जयप्रणष्टमोहायजयाजय्यायतेन
मः॥३३॥जयशर्वाय देवायसर्वेशाय महात्मने॥जयलक्ष्मीविधानायजयकांति विधायिने॥३४॥जयवाक्यविशु
द्धायअतीताय नमोनमः॥जय विष्णवेंद्र वंद्याय शिव शांतायते नमः॥ ३५॥जयविज्ञानशुद्धाय सर्वव्यापिन्नमो
नमः॥जयकांतार्धदेहायजयचंद्रार्धधारिणे॥ ३६॥जयदेवादिदेवायजय रुद्राय ते नमः॥जयत्रिभुवनेशायजय-
विख्यातमूर्तये ॥३७॥जयाधाराय शर्वायजगत्कर्त्रे नमोस्तुते ॥जय निर्मलदेहायजयसर्वार्थदायिने॥३८॥
२१४ जय भर्त्रे चहंत्रे चजय त्रिपुरभेदिने ॥जय मन्मथ नाशा[य ईशानी]यनमो नमः॥३९॥श्रीस्कंद उवाच॥जैगीषव्य महाभा
ग शिवप्रोक्ताश्च शांतयः॥सर्वेषां शांति काध्यायाः श्रुत्वा भक्तियुताश्च ये॥४०॥ इत्येवं शांतिकाध्यायं यः पठे
च्छृणुयादपि॥ विधूयसर्वपापानि शिवलोके महीयते॥४१॥कन्यार्थी लभते कन्यांजयार्थीजयमाप्नुयात्॥अर्थ
कामोलभेदर्थं पुत्रकामोबहून्सुतान्॥ विद्यार्थी लभते विद्यांयोगार्थी योगमाप्नुयात्॥४३॥राज्यार्थी लभते राज्यंप्रा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११८ मार्थो ग्राममाप्नुयात् ॥ गर्भिणी लभते पुत्रं कन्या विंदति सत्पतिं ॥ योयान्कामान्कामयते मानवः श्रवणादिह ॥ तत्स
र्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत् ॥ ४५ ॥ श्रुत्वाध्यायमिमं पुण्यं संग्रामं प्रविशेन्नृपः ॥ स निर्जित्य भयं शत्रू
न्कल्याणैः परिपूर्यते ॥ ४६ ॥ अक्षय्यं मोदते कालं अतिरस्कृतशासनः ॥ सर्वव्याधिविनिर्मुक्तः पुत्रपौत्रैः प्रतिष्ठि
तः ॥ श्रुत्वाध्यायमिमं पुण्यं यमुद्दिश्य सकृत्पठेत् ॥ तस्य रोगा न बाधंते वातपित्तादिसंभवाः ॥ ४७ ॥ नाकालम-
रणं तस्य सर्पैश्चापि न दश्यते ॥ विषं नाक्रमते देहे न जडत्वं न मूकता ॥ ४८ ॥ नोपसर्गभयं तस्य न चोत्पातभ
यं तथा ॥ नाभिचारकृतैर्दोषैर्लिप्यते स कदाचन ॥ ५० ॥ सर्वकामसमृद्धार्थो यः पठेत्तु दिने दिने ॥ नित्यमूर्जित
भक्त्या च दुर्व्याघातादिवर्जितः ॥ ५१ ॥ यत्पुण्यं सर्वतीर्थानां गंगादीनां विशेषतः ॥ तत्पुण्यं कोटिगुणितं प्राप्नोति
श्रवणादिह ॥ ५२ ॥ दशानां राजसूयानां अग्निष्टोमशतानि च ॥ श्रवणात्फलमाप्नोति कोटिकोटिगुणोत्तरं ॥
५३ ॥ कोटिजन्मसु यत्पुण्यं जनार्दनसुपूजया ॥ तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ॥ ५४ ॥ अवध्यः सर्व
भूतानां अन्येषां च विशेषतः ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ५५ ॥ गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गु
रुतल्पगः ॥ शरणागतघाती च मित्रविश्वासघातकः ॥ दुष्टपापसमाचारो मातृहा पितृहा तथा ॥ श्रवणा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रस्य भावे न मुच्यते सर्वपातकैः॥ शांत्यध्यायमिमं पुण्यं नदेयं यस्यकस्यचित्॥ शिवभक्ताय दातव्यं शिवेन कथितं
पुरा॥ नित्यमूर्जितभक्तिश्च भक्तिव्याघातवर्जितः॥ सर्वकामसमृध्यार्थीयः पठेत्तु दिने दिने॥ तस्माद्भक्त्या पुण्य-
मिदं श्रोतव्यं शिवमिच्छता॥ ईश्वर उवाच॥ यः शांत्यध्यायवरा शिवे हृदि गता कुर्वन्स शांतिं लभेद्रोगाणामयु
तात्तथा नृपभयात् भूयोपि मुक्तो भवेत्॥ चोरारिप्रभवाद योग्रहभवापस्मारबालग्रहैः सद्यो मुच्यत एव शां
तिकजपाद्भक्तोथ मुक्तो भवेत्॥ मुक्तास्ते भवंति सक्तहृदया मय्येव भक्ताः शिवे॥ शांतास्ते भुवनावने द्विजवरा
स्वालोकने किंपुनः॥ व्यक्ताव्यक्तगतेषु तेषु सुलभो मोक्षस्तांगेषु वैवक्तव्यं किमु मासहायचरणांभोजप्र
२९९ भावादृते॥६४॥ इतिश्री शिवरहस्ये महादेवाख्ये एकादशांशे शांत्यध्यायकथनं नाम एकचत्वारिंशोध्या
यः॥४१॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीमहादेवायनमः॥ श्रीस्कंद उवाच॥ ये स्मरंति सदा कालं ईशा
नं पूजयंति वा॥ रुद्रलोकात्परिभ्रष्टाः विज्ञेयास्ते गणेश्वराः॥१॥ अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षि-
णाः॥ शिवलिंगार्चनस्यैते कोट्यंशेनापि नो समाः॥२॥ सदा यजति यज्ञेन सदा दानं प्रयच्छति॥ सदा स वायु
भक्षः स्यात्सदा योऽर्चयते शिवं॥३॥ यः शिवं पूजयेन्नित्यं मणमेक्षापि भक्तितः॥ तस्य योगं च मोक्षं च शिवप्री-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तःप्रयच्छति ॥४॥ यःकुर्याद्दर्चनंमासं एकाहारो जितेंद्रियः॥ सचयत्फलमाप्नोति नतत्सर्वैर्महामखैः ॥५॥ पौ
र्णमास्याममावास्यांचतुर्दश्याष्टमीषु च॥ स्नापयित्वा भसानित्यं सर्वयज्ञफलंलभेत् ॥ कृष्णपक्षत्रयोद=
श्यां उपोष्य परमेश्वरं ॥ प्रातर्मध्याह्नयोः पूजां चतुर्दश्यां समारभेत् ॥ ७॥ पंचगव्यं सकृत्पीत्वा हविर्भुंजीतवा
ग्यतः ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ कृष्णाष्टम्यामुपोष्याथ शंकरं योर्चयेन्नरः ॥ प्राप्नोतिप
मं स्थानं यत्र देवो महेश्वरः ॥ १ ॥ ब्रह्मचारी शुचिर्भूत्वा त्रिसंध्यं योर्चयेच्छिवं ॥ त्रिसप्तकुलमुध्धृत्य शिवलो
के महीयते ॥ १०॥ दानोपवास नियमैः पूजाजागर भोजनैः ॥ महास्नानादिविधिना शिवं पर्वसु पूजयेत् ॥ ११॥
~~स्नानादिविधिना शिवं पर्वसु पूजयेत्~~ ॥ यावच्च सर्वकालेषु यावदर्च्यते शिवं ॥ तावत्कालार्चनं पुण्यं यावत्पर्वार्चकोल
भेत ॥ १२॥ स्नात्वा पर्वसु यत्नेन यथा विभव विस्तरैः ॥ पूजनीयः शिवो नित्यं महापुण्य जिगीषया ॥ १३॥ नैरंतर्येण ष-
ण्मासान्विधिना पूज्य शंकरं ॥ पुण्यं तदेव लभते सकालं विषुवार्चनात् ॥ एवमेव फलं ज्ञेयं ग्रहणायनयोरपि ॥ सं
क्रांतौ च दिनछिद्रे षडसीतिमुखेषु च ॥ १५॥ मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शंकरं ॥ तत्कार्त्तिक्यां भवेत्पुण्यं
पौर्णमास्यां शिवार्चनात् ॥ १६॥ पुण्यं तदेतत्फाल्गुन्यां आषाढ्यामेवमेव च॥ चातुर्मास्यार्चनादेतन्महत्पुण्यफलं =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लभेत् ॥ १७॥ माघमासे समुद्दिश्य त्रिसंध्यं योर्चयेच्छिवं ॥ लभेत्षण्मासिकं पुण्यं मासे नैव न संशयः ॥ १८॥ यथा
माघे तथाषाढे माघे चैव तु कार्त्तिके ॥ त्रिषु पुण्यं समं ज्ञेयं मासे द्वे तेषु यत्कृतं ॥ चातुर्मास्यकृतं पुण्यं पौषमासार्च
ने भवेत् ॥ चैत्रफाल्गुणयोः पुण्यं द्विमासजनितं भवेत् ॥ २०॥ चतुर्दश्याममावास्यां पौर्णमास्यां च पाक्षिकं ॥ पु-
ण्यमष्टगुणं ज्ञेयं अष्टम्यामर्चयेत् शिवं ॥ २१॥ यः प्रदद्याद्गवां लक्षं दोग्धीणां वेदपारगे ॥ एकाहं योर्चयेल्लिंगं त
स्य पुण्यं ततोधिकं ॥ २३॥ मासे मासे तु यो श्नीयात् यावज्जीवं सकृन्नरः ॥ यश्चार्चयेत्सकृल्लिंगं सममेव न संश-
यः ॥ २३॥ एतेन क्रमयोगेन पुण्यवृद्धिर्दिने दिने ॥ ज्ञेया संवत्सरस्यापि यावद्वा कालमर्चयेत् ॥ २४॥
यः पुनः संगमुत्सृज्य इदमब्दं प्रपूजयेत् ॥ नैरंतर्याच्छत गुणं तस्य पुण्यं विवर्धते ॥ २५॥ पंचाशद्गुणितं पुण्यं
३०७ अब्दार्धं योर्चयेच्छिवं ॥ ऋतावृतौ तदर्धं स्यान्मासे मासे तदर्धकं ॥ २६॥ मासार्धमपि यो लिंगं नैरंतर्ये
ण पूजयेत् ॥ पुरुषोत्तमः स विज्ञेयो नैरंतर्यं हि दुष्करं ॥ २७॥ प्रातः स्नात्वा य यो लिंगं सकृद्भक्त्या प्रपूजयेत् ॥
कपिलानां शतं दत्वा यत्पुण्यं तदवाप्नुयात् ॥ २८॥ मध्यं दिनकरे प्राप्ते यो लिंगं पूजयेन्नरः ॥ संपूर्णां पृथिवीं दत्वा
यत्पुण्यं तदवाप्नुयात् ॥ २९॥ वारुणीमाश्रिते सूर्ये यः शिवं संप्रपूजयेत् ॥ गवां शतं सहस्रस्य दत्तस्य फलमाप्नुयात् ॥ ३०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२०
यो लिंगमर्धरात्रे तु शुचिर्भूत्वा प्रपूजयेत् ॥ अग्निष्टोमसहस्रस्य धर्मस्य लभते फलं ॥३१॥ एवं वेलासु सर्वासु अवेला
स्वपि शंकरं ॥ संपूजयेन्नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥३२॥ शिवलिंगं महापुण्यं सर्वदेवनमस्कृतं ॥
यः स्पृशेदपि पाणिभ्यां न स पापैः प्रलिप्यते ॥३३॥ न ते भूयः प्रयास्यंति योनिमार्गं सुकंटकं ॥ क्रमान्मोक्षं गामि
ष्यंति ये नरा लिंगमाश्रिताः ॥३४॥ कांचनं मेरुमात्रं च सर्वां दत्वा वसुंधरां ॥ सागरान्तेन पूर्णां च न लिंगार्चयितुः
समं ॥३५॥ मेरुमंदरमात्रोऽपि राशिः पापस्य कर्मणः ॥ ईश्वरं वैद्यमासाद्य नश्यते दुष्टरोगवत् ॥३६॥ शिवार्चनरः
तो नित्यं महापातकसंयुतैः ॥ दोषैः कृतैर्न लिप्येत पद्मपत्रमिवांभसा ॥३७॥ छित्वा क्षिप्त्वा च भूतानि हत्वा सर्व
मिदं जगत् ॥ यजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते ॥३८॥ सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ॥ शिवं दृष्ट्वा
नरः सोऽपि प्रयाति परमां गतिं ॥३९॥ शिवं सर्वत्र संपूज्य सविशेषं सविस्तरं ॥ अश्वमेधायुतं पुण्यं लभते नात्र
संशयः ॥४०॥ सरित्समुद्रतीरेषु पर्वतेषु वनेषु च ॥ गिरिकंदरदुर्गेषु गह्वरेषु वनेषु च ॥४१॥ पुष्करिण्यां तटाके
षु तीर्थायतनसंश्रये ॥ यत्र वा रमते बुद्धिः तत्रैव शिवमर्चयेत् ॥४२॥ सर्वयज्ञेषु यत्पुण्यं तल्लभेन्नात्र संशयः ॥
यः समर्चयते भक्त्या तस्य पुण्यं ततोऽधिकं ॥ अर्चनापि हि मंत्रेण पुण्यराशिः प्रकीर्तितः ॥ स्याद्यं मंत्रसंयुक्तः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुण्यं शतगुणाधिकं ॥ ४४ ॥ तस्मान्मंत्रेण शर्वाय स्नानं गंधफलादिकं ॥ भूम्यश्वरथवस्त्रं च हेमाद्यपि निवेदयेत् ॥ ४५ ॥
जप्यो नमः शिवायेति मंत्रः सर्वार्थसाधकः ॥ सर्वमंत्राधिकश्चायं ओंकाराद्यः षडक्षरः ॥ ४६ ॥ शिवेनांतर्वहि यस्माद्व्या-
प्तं सर्वं चराचरं ॥ जगदोमिति यद्ब्रूते तस्मादोमिति स स्मृतः ॥ ४७ ॥ अयमर्थेनतिसृभिः मात्राभिः परिगीयते ॥
ब्रह्मा हरिश्च रुद्रश्च मात्रास्तिस्त्रः प्रकीर्तिताः ॥ ४८ ॥ दक्षिणांगे भवद्ब्रह्मा हरिर्वामांगसंभवः ॥ हृदयान्निर्गतो रुद्रः
ब्रह्मविष्णुप्रबोधकः ॥ ४९ ॥ जगत्सृष्टिकरो ब्रह्मा विष्णुर्लोकविमोहनः ॥ अनुग्रहपरो नित्यं नीलरुद्रः शिवात्म
कः ॥ ५० ॥ त्रिभिरेतैर्जगद्व्याप्तं कारणैरात्ममूर्त्तिभिः ॥ तिस्त्रो मात्राः शिवस्यैताः सर्वलोकप्रपूजिताः ॥ ५१ ॥ ए-
ता एव त्रयो वेदाः त्रयो लोकास्त्रयो गुणाः ॥ त्रयोग्नयास्त्रिवर्गश्च यच्चान्यज्जगति स्थितं ॥ ५२ ॥ अर्धमास
३०। पो रुद्रः शिवः परमकारणं ॥ तस्मादेतत्समुत्पन्नं जगतः कारणत्रयं ॥ ५३ ॥ सर्वयज्ञात्परः शुद्धो नमस्कारो महाम-
खः ॥ नमस्कारात्मयज्ञेन तस्मात्संपूजयेच्छिवं ॥ ५४ ॥ अन्नानमशिवत्वं स्यात्सर्वदुःखालयं यतः ॥ स्वभावात्त-
द पात्रं हि तस्माद्रुद्रः परः शिवः ॥ ५५ ॥ नमः शिवाय शांताय कारणत्रयहेतवे ॥ निवेदयामि चात्मानं मुक्तयेव पर
मेश्वरं ॥ ५६ ॥ उक्त्वा नमः शिवायेति मुच्यते सर्वबंधनात् ॥ यस्मात्तस्मात्सदा मंत्रं ओंकाराद्यमनुस्मरेत् ॥ ५७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

121 सर्वदा सर्वकार्येषु क्षुतनिष्ठीवनादिषु ॥ धन्यो नमः शिवायेति गिरमुक्त्वा शिवं पदं ॥५८॥ यः सर्वविस्रबुध्यात्मा
प्राणांस्तेतु सकृत्स्मरेत् ॥ भक्त्या नमः शिवायेति स गच्छेत्परमां गतिं ॥५९॥ नाद्यो नापि नमस्कारः प्रयुक्तः शू-
लपाणये ॥ संसारस्थूणबंधानां उद्वेष्टनकरो भवेत् ॥६०॥ अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा ॥ यः स्म-
रेत्तं यतो रुद्रं स बाह्याभ्यंतरः शुचिः ॥६१॥ स्मरणादेव रुद्रस्य पापसंघातपंजरं ॥ शतधा भेदमाप्नोति गि-
रिर्वज्रहतो यथा ॥६२॥ सर्वेषां शिवभक्तानां अशेषार्थप्रसिद्धये ॥ मंत्रमाह शिवः साक्षादशेषार्थनिबंध-
नं ॥६३॥ सद्बीजं सर्वविद्यानां आद्यं ब्रह्मपरात्परं ॥ सर्वसाधनकं मंत्रं शिवमंत्रं षडक्षरं ॥६४॥ भाषामंत्रै-
व शूद्रस्य सर्वज्ञानाति शंभुना ॥ पश्चात्परापराणी हव्यकार्यं गादितानि तु ॥६५॥ तस्मादनेन मंत्रेण प्रकुर्वीत
शिवार्चनं ॥ तत्र देशे न दुर्भिक्षं न च मारी प्रवर्तते ॥ नाकालेम्रियते कश्चित्पूज्यते यत्र शंकरः ॥ दीक्षितः
सूत्रमंत्रज्ञो योऽर्चयेत्तु सदा शिवं ॥६७॥ स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ॥ ईश्वर उ० ॥ यः पूजयेच्छ-
शिकलामलमौलिलिंगं भस्माक्षधृक्प्रथितपर्वसु सर्वमेकं ॥ सर्वैश्च पातकवरैः स तु मुक्त ईशे संसारघो-
रविषसर्पमुखाभिलग्नः ॥६८॥ इति श्री शिवरहस्ये महार्हेवारव्ये एकादशांशे पर्वपूजाफलकथनं नाम षष्टि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चत्वारिंशोध्यायः ॥४२॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीमहादेवाय नमः ॥ श्रीईश्वरउवाच ॥ सर्ववेदेषु
यत्प्रोक्तं सर्वयज्ञेषु यत्फलं ॥ तत्फलं कोटिगुणितं लभते नात्र संशयः ॥१॥ यः शिवं पूजयेन्नित्यं अंत्यजोपि
जितेंद्रियः ॥ भावेन तु समायुक्तः स गच्छेत्परमां गतिं ॥२॥ सोपि वीतीसहस्रेभ्यो ब्रह्मचारी विशिष्यते ॥ ब्रह्म
चारीसहस्रेभ्यो वेदाध्यायी विशिष्यते ॥३॥ वेदाध्यायी सहस्रेभ्यो अग्निहोत्री विशिष्यते ॥ अग्निहोत्री
सहस्रेभ्यो यज्ञयाजी विशिष्यते ॥४॥ यज्ञयाजी सहस्रेभ्यो सर्वविद्यार्थ पारगः ॥ सर्वविद्यार्थ वित्केभ्यः शि-
व भक्तो विशिष्यते ॥ तस्माद्देवं शिवं भक्त्या पूजयेच्छांतमानसः ॥ शिवभक्तो जितक्रोधः शिवभक्ति
परायणः ॥ मैत्रीकारुणिको ऽजस्रं प्राप्नोति सततं शिवे ॥५॥ क्षणार्धेनापि यत्पुण्यं कुर्यान्मैत्रीषु भा-
302 वितः ॥ नतद्वर्षशतेनापि तपो यज्ञशतैरपि ॥७॥ सर्वप्राणिषु कारुण्यं दीनानाथेषु भावयेत् ॥ सुखमा
णिषु मैत्री स्यात् मुदिता पुण्यशालिषु ॥८॥ अपुण्यवत्सु चोपेक्षा सर्वेषां च वदच्छिवं ॥ इत्येवं पंचधा स्थि
तं भावयित्वा यजेच्छिवे ॥९॥ संपूज्य पशुभर्त्तारं महाष्टे नांतरात्मना ॥ ध्यानं कुर्याद्यथा दिष्टं सर्वपापनि
कृंतनं ॥१०॥ कृतांजलिपुटो भूत्वा स्तोत्रमेतज्जपेन्नरः ॥ स्तुताय स्तुतिरूपाय स्तूयमानाय सर्वदा ॥११॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२२ स्तुतिहेतुनिधानाय नमस्त्रिनयनाय ते ॥ दिव्याय दिव्यरूपाय सर्वदैवैकहेतवे ॥ १२॥ सूक्ष्माणामपि सूक्ष्माय नमः सू-
(दिव्यतमायच॥)
क्ष्मतमाय ते ॥ दिव्याय दिव्यरूपाय दिव्यरूपैकहेतवे ॥ १३॥ दिव्यानामपि दिव्याय नमो, पराय परमेशाय परमा-
र्थैकहेतवे ॥ परापरविमुक्ताय नमः परतराय ते ॥ पूज्याय पूज्यपूज्याय सर्वपूज्यैकहेतवे ॥ १५॥ पूज्यानाम-
पि पूज्याय नमः पूज्यतमाय ते ॥ नित्याय नित्यनित्याय सर्वनित्यैकहेतवे ॥ १६॥ नित्यानामपि नित्याय न-
मो नित्यतमाय ते ॥ दीप्ताय दीप्तदीप्ताय सर्वदीप्तैकहेतवे ॥ १७॥ दीप्तानामपि दीप्ताय नमो दीप्ततमाय ते ॥
साराय साररूपाय सर्वसारैकहेतवे ॥ १८॥ साराणामपि साराय नमः सारतराय ते ॥ शांताय शांतरूपाय स-
र्वशांत्यैकहेतवे ॥ १९॥ शांतानामपि शांताय नमः शांततमाय ते ॥ शुद्धाय शुद्धरूपाय सर्वशुद्धैकहेतवे ॥ २०॥
शुद्धानामपि शुद्धाय नमः शुद्धतमाय ते ॥ कालाय कालरूपाय सर्वकालैकहेतवे ॥ २१॥ कालानामपि काला-
य नमः कालतमाय ते ॥ सर्वमंत्रशरीराय सर्वमंत्रैकहेतवे ॥ २२॥ मंत्राणामपि मंत्राय नमो मंत्रतमाय ते ॥
व्योमप्रमाणभासाय अघोराय नमो नमः ॥ २३॥ व्योमप्रमाण वामाय वामेशाय नमो नमः ॥ व्योमवामा-
य ईशाय ईशानाय नमो नमः ॥ २४॥ व्यो, (मप्रमाण) योगाय पुरुषाय नः (मोनमः॥) व्यो, (मप्रमाण) सद्याय सद्योजाताय ते नमः ॥ २५॥ व्योमप्रमाण=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्याय विद्येशाय नमो नमः ॥ व्योमप्रमाण कालाय कालेशाय नमो नमः ॥ २६ ॥ व्योम प्रमाण धर्माय धर्मेशाय नमो नमः ॥ व्योमप्रमाण
भोगाय भोगेशाय नमो नमः ॥ २७ ॥ व्योम प्रमाण मोक्षाय मोक्षेशाय नमो नमः ॥ व्योमप्रमाण विश्वाय विश्वेश्वर नमोस्तु
ते ॥ २८ ॥ एकदेह द्विदेहाय बहुदेहाय ते नमः ॥ देहासंख्येयरूपाय विश्वेशाय नमो नमः ॥ २९ ॥ एककाल द्विका
कालाय बहुकालाय ते नमः ॥ कालसंख्येयरूपाय त्रिनेत्राय नमो नमः ॥ ३० ॥ एकवक्त्र द्विवक्त्राय बहुवक्त्राय ते
नमः ॥ वक्त्रासंख्येययुक्ताय वरेशाय नमो नमः ॥ ३१ ॥ एकनेत्र द्विनेत्राय बहुनेत्राय ते नमः ॥ नेत्रासंख्येययुक्ताय
त्र्यंबकाय नमो नमः ॥ दंष्ट्रासंख्येययुक्ताय त्र्यंबकाय नमो नमः ॥ ३२ ॥ एककंठ द्विकंठाय बहुकंठाय ते नमः ॥ एकनास
३०३ द्विनासाय बहुनासाय ते नमः ॥ ३३ ॥ नामासंख्येययुक्ताय नित्यं शर्वाय ते नमः ॥ एकजिह्व द्विजिह्वाय बहुजिह्वा
यते नमः ॥ ३४ ॥ जिह्वासंख्येययुक्ताय नीलकंठाय ते नमः ॥ एकहस्त द्विहस्ताय बहुहस्ताय ते नमः ॥ ३५ ॥
हस्तासंख्येययुक्ताय शंकराय नमो नमः ॥ एकशस्त्र द्विशस्त्राय बहुशस्त्राय ते नमः ॥ ३६ ॥ शस्त्रासंख्येय-
युक्ताय ईशानाय नमो नमः ॥ एकपाद द्विपादाय बहुपादाय ते नमः ॥ पादासंख्येययुक्ताय महादेवाय ते नमः ॥ अव्यक्ताय-
य नमस्तुभ्यं शाश्वताय नमो नमः ॥ ३७ ॥ महेश्वर नमस्तुभ्यं महायोगिन्नमोस्तु ते ॥ महोत्तम नमस्तेस्तु महारूप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमोऽस्तु ते॥३९॥ सदाशिव नमस्तेऽस्तु सदाशुभ नमोऽस्तु ते॥ सदोज्वल नमस्तेऽस्तु महादेव नमोऽस्तु ते॥४०॥ नम-
स्ते भगवन्छांत नमस्ते भगवान्ध्रुव॥ नमस्ते भगवान्दीप्त नमस्ते भगवान्हर॥४१॥ अजिताय नमस्तुभ्यं-
भस्मांगाय नमोऽस्तु ते॥ अनंताय नमस्तुभ्यं सर्वगाय नमोऽस्तु ते॥४२॥ स्तवेनानेन दिव्येन यः स्तौति परमे
श्वरं॥ स विधूयाशु पापानि शिवलोके महीयते॥४३॥ भोगार्थी लभते भोगान् राज्यार्थी राज्यमाप्नुयात्॥
कन्यार्थी लभते कन्यां योगार्थी योगमाप्नुयात्॥४४॥ मुच्यते व्याधितो व्याधेर्दुःखी दुःखात्प्रमुच्यते॥
बंधनान्मुच्यते बंधी यशोर्थी च यशो लभेत्॥४५॥ योऽन्यांश्चिंतयते कामांस्तांस्तान्प्राप्नोति मानवः॥
शिवस्य पदमाप्नोति नित्यं पठति यो नरः॥४६॥ तस्यार्चनादपि तथा श्रवणादपि मानवः॥ इत्थं स्तुवीत भ-
गवंतमुमासहायं स्कंदं विहाय सततं उरुगायमीशं॥ तस्यायमीश्वरपदं प्रददाति देवपापौघतापमपहा-
य गतिं लभेत॥४७॥ अध्यायं यस्तु पठते शृणोति शिवभक्तिमान्॥ सोऽपि शैवं पदं लब्ध्वा प्रयाति परमां ग-
तिं॥४८॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे शिवस्तुतिर्नाम त्रिचत्वारिंशोऽध्यायः॥४३॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीमहादेवाय नमः॥ ॥ श्री ईश्वर उवाच॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥पृथिव्यां यानितीर्थानि पुण्यान्यायतनानि च॥तीर्यंते तानि लिंगे
तु तस्माल्लिंगं प्रपूजयेत्॥१॥ तस्मात्तत्सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥पूजयेच्च महापुण्यं लिंगं सर्वार्थसिद्धिदं॥२॥शते
१- नस्थापितं देवं सहस्रेण तु चालयेत्॥दुस्थितं सुस्थितं वापि शिवलिंगं न चालयेत्॥३॥घृताभिषेकं यः कुर्याद्दहोरात्रं शि
वस्यं तु॥पौषमासे समुद्युक्तै र्नियतं श्लक्ष्णधारया॥गीतनृत्योपहारेण शंखवादित्रनिःस्वनैः॥कुर्याज्जागरणं तत्र प्र
दीपादिसमाकुलं॥५॥समस्तपापनिर्मुक्तः समस्तगुणसंयुतः॥समस्तकामसंपूर्णः समस्तकुलसंयुतः॥६॥चलद्भिः सु
महायानै रसंख्येयैरनूपमैः॥युक्तः शिवपुरे नित्यं मोदते शिववत्सुखी॥७॥ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च॥घृता
भिषेकं यः कुर्यान्महापुण्यमवाप्नुयात्॥८॥घृताभिषेकं यः पश्येदा समाप्ते रुपोष्य तु॥विधूय सर्वपापानि शिवलोके
३०५ महीयते॥९॥एकः पूजयते भक्त्या, भक्त्या चान्यः प्रपश्यति॥तुल्यमेव फलं ताभ्यां भक्तिरेवात्र कारणं॥१०॥यः कुर्यात्प
र्वकालेषु महापूजाप्रवर्तनं॥शिवस्य रथयात्रां वा नगरांतपरिभ्रमात्॥११॥महाचित्रध्वजैश्छत्रैः किंकिणीरवकान्वितैः॥
वितानध्वजमालाभिर्घंटाचामरदर्पणैः॥१२॥शंखभेर्यादिनिर्घोषैर्गीतवादित्रसंकुलैः॥लेख्यदारुमयैर्यंत्रैः मातृव्य
क्षगणादिभिः॥१३॥उरगायनपात्रैश्च बह्वाश्चर्यैरनेकशः॥श्रीडोलाचक्रयंत्रैश्च रथमंदिरशोभितैः॥१४॥दध्यन्नपान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ काद्येश्च महासत्रसमाहितैः ॥ महाजनसमाकीर्णं यथाविभवविस्तरं ॥ १५ ॥ सर्वदानानि पुण्यानि सर्वयज्ञफलानि च ॥ अ महा० ९
१२४ त्युग्रतपसा पूर्णं सर्वतीर्थफलानि च ॥ लब्ध्वा नरवरः श्रीमान् शिवयात्राप्रवर्तनात् ॥ शिवलोके महाभोगैः शिववन्मोदते चि अ० ४
रं ॥ १७ ॥ तस्यां ते देवराजत्वं स्थिरकालमवाप्नुयात् ॥ जंबूद्वीपास्यः सर्वान् तस्यां च महीपतिः ॥ १८ ॥ त्रिलिंगवेदीपर्यंतं यो
दद्याद्घृतकंबलं ॥ घृतधाराफलं तस्य माघे पूर्णे तु पर्वणि ॥ १९ ॥ जागरं गीतनृत्याद्यैः सकृत्कृत्वा तु पर्वणि ॥ मन्वंतरशतं
साग्रं शिवलोके महीयते ॥ २० ॥ चित्राभिरामनाट्याढ्यं शिवस्यायतनाग्रतः ॥ संम्यक्प्रेक्षणकं दत्वा रुद्रलोकमवाप्नुया
त् ॥ २१ ॥ सुरूपः सुभगः श्रीमान् परिभ्रष्टोऽत्र जायते ॥ सप्तद्वीपसमुद्राया क्षितेरधिपतिर्भवेत् ॥ २२ ॥ रूपं पिष्टमयं कृत्वा
त्रिनेत्रं रत्नभूषितं ॥ शुक्लोपवीतसंयुक्तमेकपादं विभूषितं ॥ २३ ॥ दंतेषु मौक्तिकं तस्य प्रवालं च तथोष्ठयोः ॥ दद्याद्वक्रं
चनेत्राभ्यां वैडूर्यं चापि मस्तके ॥ २४ ॥ हेमरूप्यं चक्षुस्ताभ्यां ताम्रं पादं च कल्पयेत् ॥ अंडजैर्विविधैर्वस्त्रैः विचित्रैः परिवेष्ट
येत् ॥ २५ ॥ सुगंधैश्चित्रवर्णैश्च पुष्पैश्चापि विभूषयेत् ॥ विविधैर्भक्ष्यभोज्यैश्च बलिं तत्रोपकल्पयेत् ॥ २६ ॥ भोजयेच्छिव
भक्तांश्च विप्रान्छक्त्या च तर्पयेत् ॥ प्रियकामान् गवो नित्यं विप्रेन्द्रैस्तु शिवालये ॥ तैरेव सार्धं विप्रेंद्रैस्तद्रूपं तु शिवालये ॥ २७ ॥
नीत्वा समर्पयेद्धीमांछिवलिंगसमीपतः ॥ सर्वयज्ञफलं प्राप्य सर्वदानफलानि च ॥ २८ ॥ सुरूपो रूपदानेन शिवलोके महीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंक्ति २ — अण्डजैः क्रिमिजै र्वस्त्रै र्विचित्रैः परिवेष्टयेत्॥ सुगन्धैश्चित्रवर्णैश्च पुष्पैश्चापि विभूषयेत् ॥३१॥

भोजनं घृतसंकीर्णं मधुना परिशोभितं ॥२९॥ दद्यात्कृष्णतिलानां तु प्रस्थमेकं तु मागधं॥ द्विगुणं तंडुलानां तु पृथक् प्रस्थं प्र
कल्पयेत्॥३०॥ लिंगं संवेष्ट्य वस्त्राभ्यां बलिमेतं निवेदयेत्॥ अर्चयित्वा विमानेन पौर्णमास्यां विशेषतः॥३२॥ युगकोटिसह
स्राणि शिवलोके महीयते॥ पुण्यक्षयादिहागत्य समृद्धे जायते कुले॥३३॥ मेधावी सुभगः श्रीमान् वेदवेदांगपारगः॥ ताम्र
पात्रे पयःपूर्णं कृत्वा चोतस्थकांचनं॥३४॥ प्रच्छाद्योपरियत्नेन गंधपुष्पार्चितं महत्॥ शिवभक्तं द्विजं सम्यक् भोजयित्वा
सदक्षिणं॥३५॥ प्राच्यां समुद्गते सोमे प्रतीच्यां च रवौ गते॥ पौर्णमास्यां सवे शारव्यां नीत्वा पात्रं शिवाग्रतः॥३६॥ प्रीयतां मे
महादेवः सोममूर्तिर्जगत्पतिः॥ इत्युक्त्वा वचनं ध्यायेद्देवदेवमुमापतिं॥३७॥ तस्मै विप्राय तत्पात्रं अर्पयेद्भक्तितः शनैः॥ एतत्सो
305 मव्रतं नाम कृत्वा रुद्रांतिकं व्रजेत्॥३८॥ रुद्रलोकात्परिभ्रष्टो भवेज्जातिस्मरो नरः॥ पूर्वाभ्यासेन तेनैव पुनः शिवपदं व्रजेत्॥३९॥
पौर्णिमायाममावास्यां शिवं संपूज्य यत्नतः॥ उपवीतं शिवे दद्याच्छिवभक्तांश्च पूजयेत्॥४०॥ पुनरेव तु कार्त्तिक्यां पूज्य शंभुं
क्षमापयेत्॥ यतीनां दक्षिणां दद्यात् सूत्रवस्त्रादिपूर्वकां॥४१॥ यः कुर्यात्सकृदप्येवं चातुर्मास्ये पवित्रकं॥ कल्पकोटिशतं
दिव्यं रुद्रलोके महीयते॥४२॥ पुण्यक्षयात्परिभ्रष्टश्चतुर्वेदी च जायते॥ इच्छया वा भवेद्राजा गुणरूपसमन्वितः॥४३॥ भूमि
दानस्य यत्पुण्यं कन्यादानस्य यत्फलं॥ मुखवाद्येन यत्पुण्यं उभयं लभते नरः॥४४॥ तदेव पुण्यं गीतस्य नृत्तस्य च विशेषतः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११
९२५

तदेवजायतेशब्दः हस्ततालध्वनेस्तथा॥४५॥योगांपयस्विनींदद्यात्तरुणींवृषसंयुतां॥शिवायतेनदत्तंस्याज्जगत्सर्वंच महा०ध० अ०४

राचरं॥४६॥वृषंचपरिपूर्णांगंउदारंचशशिप्रभं॥गोपतिंधूर्वहंवापिशिवायविनिवेदयेत्॥४७॥यावंतिदेहेरोमाणितत्प्र

सूतिकुलेषुच॥तावद्युगसहस्राणिरुद्रलोकेमहीयते॥४८॥योधर्मवाहंपरमेश्वरमीशितारंसंपूजयेद्यदिहभूमिगतःसुभ

क्त्या॥तस्यापुरुत्तमसुसौधकलत्रपुत्रमित्रातिरात्रकरणंलभतेशिवेन्द्र॥४९॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येए

कादशांशेशिवधर्मकथनंनामचतुश्चत्वारिंशोध्यायः॥४४॥श्रीकाशिविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥

श्रीईश्वरउवाच॥ ॥शिवाग्निकार्यमुद्दिश्यसुरूपांचपयस्विनीं॥कुलीनांकपिलांदत्वादत्तंभवतिगोशतं॥१॥गिरिकांता

रदुर्गेषुसदामातेवरक्षति॥यत्नेनकपिलांयत्नाच्छिवायविनिवेदयेत्॥शिवस्थानानिकार्यार्थंउत्पन्नाकपिलायथा॥त

स्मात्तत्रैवसायोज्याकपिलाभुभमिच्छता॥३॥कपिलायाःपिबेच्छूद्रःशिवसंस्कारवर्जितः॥सप्रयातिमहाघोरंनरकंनात्रसंशयः॥

॥४॥हुतशेषंपिबेद्विप्रःस्वर्गीस्यादन्यथापशुः॥संस्कारेणविमुक्तश्चेत्संस्कारेदुर्लभःशिवः॥५॥गामालभ्यनमस्कृत्ययःकु

र्यात्तांप्रदक्षिणां॥प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा॥६॥गवांहुंकारशब्देनदर्शनस्पर्शनेनच॥पापंप्रणश्यतेयत्नात्त

स्मात्स्पर्शंचगोःस्पृशेत्॥७॥कृतस्तेषांहिपापानियेषांगृहमलंकृतं॥सततंबालवत्साभिःगोभिःश्रीभिःशिवस्वयं॥८॥यानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तीर्थानिमेदिन्यामासमुद्रात्सरांसिच॥ गवांशृंगोदकस्नानात्कलांनार्हंतिषोडशीं॥९॥ नलंघयेद्गवामस्मिं मूत्रंगंधंनवर्जयेत्॥
यावज्जिघ्रतितद्गंधंतावत्पुण्यैःसपूर्यते॥१०॥ गवांकंडूयनंधूपंगोप्रदानसमंभवेत्॥ तुल्यंचगोप्रदानेनत्थेयरोगादिपालनं॥११॥
तृणोदकादिसंयुक्तांयःप्रदद्याद्गवांमहीं॥ सगोमेधफलंपुण्यंलभतेनात्रसंशयः॥१२॥ बहुनात्रकिमुक्तेन गावःपाल्याःप्रय
त्नतः॥ गावोदेयाःसदारक्ष्याःस्पृश्याद्दृश्याश्चसर्वदा॥१३॥ यस्ताडयतिगांपादात्सर्वलोकैकमातरं॥ आक्रोशयतियोमो
हादाकृष्टंताडितंजगत्॥१४॥ ताडयेद्यदिगांमोहाद्योगांक्रोशन्नराधमः॥ नरकाग्नौसपच्येतगोनिश्वासप्रपीडितः॥१५॥
सपलाशेनदंडेनताडयेत्तांनिवारयेत्॥ गच्छगच्छेतितांब्रूयान्माभातामितिवारयेत्॥१६॥ वृषोत्सर्गंतुयःकुर्यात्पक्षयो
३०८ रुभयोरपि॥ द्वादश्यांपौर्णमास्यांवाचतुर्दश्यष्टमीषुच॥१७॥ तस्यगावोवृषोविष्णुःशिवोमासर्वदेवताः॥ शांतिंकुर्वंतु
सुप्रीताःस्वर्गमायुःश्रियंबलं॥१८॥ दाशयंतिचसदानित्यंकल्याणंभद्रमेवच॥ योनरोवर्ततेगोषुताडनाक्रोधवर्जितः॥१९॥
महतींश्रियमाप्नोतिरुद्रलोकंसगच्छति॥ गोब्राह्मणार्थमुद्युक्तःप्राणैर्यदिवियुज्यते॥२०॥ प्राप्नोतिपरमंस्थानंयत्रदेवोमहे
श्वरः॥ ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं॥ एकत्रमंत्रास्तिष्ठंतिहविरन्यत्रतिष्ठति॥ नचमंत्रैर्विनायज्ञोहविषाचप्र
वर्तते॥२२॥ तस्माद्विप्राश्चगावश्चपुण्यात्पुण्यतरावुभौ॥ गोभिर्यज्ञाःप्रवर्तंतेगोषुदेवाःप्रतिष्ठिताः॥२३॥ गोभिर्वेदाःसमुत्की

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ णीः स

१२६ र्पास्वर्षिसंघाःपदक्रमाः॥शृंगमूलेगवांनित्यंब्रह्माविष्णुश्चसंस्थितो॥२४॥शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच॥शिरो ब्रह्मा०५ अ०८

मध्येमहादेवःमुखेसर्वपतिस्थितः॥२५॥सरस्वतीचहुंकारेयमयक्षौचगंडयोः॥संध्याद्वयंतथैवोष्ठौग्रीवामिंद्रःसमाश्रयेत्॥

ललाटाग्रेस्थितादेवीनासावंशेचषण्मुखः॥कंबलाश्वतरौनागौनासापुटसमाश्रितौ॥२७॥कर्णयोरश्विनौदेवौचक्षुषोःशशिभा

स्करौ॥दंतेषुवायवःसर्वेजिह्वायांवरुणःस्थितः॥२८॥यक्षाणिचककुद्देशेसाध्याश्चोरसिसंस्थिताः॥चतुष्पादास्तथाग्निश्च

धर्मोजंघाव्यवस्थितः॥२९॥खुरमध्येषुगंधर्वाःखुराग्रेषुचपन्नगाः॥खुराणांपश्चिमांगेषुगणाश्चाप्सरसंस्थिताः॥३०॥साक्षा

त्गंगाचगोमूत्रंगोमयेयमुनास्थिता॥ऋषयश्चसदासर्वेरोमकूपेषुसंस्थिताः॥३१उदरेपृथिवीदेवीसशैलवनकानना॥चत्वा

६ रःसागराःपूर्णागवांगोचपयोधराः॥३२॥जठरेगार्हपत्योग्निर्हृदयेदक्षिणाग्निकः॥मुखेचाहवनीयाग्निस्तथाचांगेपतिव्रताः॥३३॥

धी

अस्थिशुक्लेऽस्थिसंघेषुह्यश्वमेधातिथिक्रतुः॥यच्चतेकथितंपूर्वंयच्चगोषुप्रतिष्ठितं॥गोषुदत्तंहुतंभुक्तंगोषुसर्वंचराचरं॥तस्मा

द्गावोनहिंस्याःस्युःपालनीयाश्चसर्वदा॥३५॥गावःस्तुत्याचवंद्याश्च गावोमांपांतुनित्यशः॥ब्राह्मणोब्रह्मशब्देनस्तूयतेप्रणा

वेनयः॥३६॥सशिवःशाश्वतोदेवोगोषुमारींव्यपोहतु॥लंबोदरेणदेवेनगजवक्त्रेणयोर्चितः॥३७॥श्रीमतारुचिरांगेणघंटाकर्णेन

ऐश्वरः॥नित्यंप्रणम्यतेभक्त्याहृष्टेनाद्येनचेतसा॥३८॥सशिवःशाश्वतोदेवोगोषुमारींव्यपोहतु॥नित्यंरुद्रबलोपेतोरुद्रशक्तिसम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्वितः॥३९॥ घंटाकर्णगणोद्देशः शिवज्ञानविधायकः॥ शिवतेजोनुभावेन गोषु मारीं व्यपोहतु॥४०॥ शिवाय देवदेवाय महादेवा
ययोगिने॥ रुद्राय स्थाणवे नित्यं हरायोग्रायते नमः॥४१॥ परमेशाय सिद्धाय सर्वसिद्धिप्रदायिने॥ त्र्यंबकाय महेशाय अतिशां
तायते नमः॥४२॥ अभिमंत्र्य सदा तोयं एतैर्मंत्रैर्यथाक्रमं॥ प्रोक्षयेत्तु गवां देहं ततः शांतिर्भविष्यति॥४३॥ य इमां पठते गोषु
रोगार्तासु विशेषतः॥ गोसावित्रीं महापुण्यां गवां शांतिर्भविष्यति॥४४॥ यः समुत्थाय सततं गोसावित्रीमिमां पठेत्॥ गवां चोत्स
६ र्गकालेषु प्रस्थाने वा समागमे॥४५॥ आयुष्मान्बलवाञ्छ्रीमान् गोमानर्थपतिर्भवेत्॥ देहांते शिवसारूप्यं लभते नात्र संशयः
॥४६॥ ॥श्रीईश्वर उवाच॥ ॥यो लंकृत्य शिवे गां वै सवत्सां च निवेदयेत्॥ सोश्वमेधस्य यज्ञस्य फलमाप्नोति पुष्कलं॥४७॥
३०७ प्रभूततोयेषु बृहत्तृणेषु सपुंगवा नित्य सरो मवत्साः॥ चरंतु गावः सुखिता वनेषु क्षीरं प्रयच्छंतु सुखं ह्यदंतु॥४८॥ ॥इतिश्री
शिवरहस्ये एकादशांशे गोसावित्री कथनं नाम पंचचत्वारिंशोध्यायः॥४५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीमहादेवाय नमः॥ ॥श्रीईश्वर उवाच॥ ॥सुविनीतां स्त्रियं दासीं भृत्यं वा च निवेदयेत्॥ नरमेधस्य यज्ञस्य फलं प्रा
प्नोति पुष्कलं॥१॥ निवेदयति यो नागं भक्त्या भद्रमलंकृतं॥ शिवाय पर्वदिवसे तस्य पुण्यफलं शृणु॥२॥ समं तैरावतप्रख्यैः गजै
र्युक्तैः सुशोभनैः॥ प्रक्रीडते महायानैः शतसंख्यैरनेकशः॥३॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥ रुद्रलोकं गतश्चां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०११ १२८

तेभवेदिंद्रः सुराधिपः॥४॥चतुर्युगसहस्रांते सगां प्राप्यनराधिपः॥ भवेदिंद्रसमः श्रीमान्रूपवीर्यश्रुतान्वितः॥५॥यःशिवायजलोपे महा०र० अ०४६
तांसर्वसस्यप्ररोहिणीं॥महींमहिपतिर्दद्यात् तस्य पुण्य फलंशृणु॥६॥यावद्गंगा भवेद्भूमिमर्यमाणा समंततः॥तावत्कल्पसहस्राणिरुद्र
लोके महीयते॥७॥एवंसर्वत्रविज्ञेयं फलंदंडप्रमाणतः॥ग्रामखेटपुरक्षेत्रविषयादिनिवेदने॥८॥सर्वसस्यजलोपेतंसर्वबाधाविवर्जि
तं॥ग्रामंशिवाय योदद्यात् तस्य पुण्य फलंशृणु॥९॥सर्वयज्ञेषुयत्पुण्यं सर्वतीर्थेषुयत्फलं॥सर्वदानेषुयत्पुण्यं ग्रामदानेन तद्भवे
त्॥१०॥सूर्यकोटिप्रतीकाशैः दिव्यस्त्रीकोटिसंयुतैः॥संयुतैः कोटिशोयानैः सर्वकामसमन्वितैः॥११॥सोऽनेनग्रामदानेनत्रिसप्तकु
लसंयुतः॥यथेष्टमैश्वरेलोके क्रीडतेकालमक्षयं॥१२॥पुण्यंनगरदानस्य ग्रामदानाच्छताधिकं॥देशदानेनचानन्त्यंनशक्यंतत्प्र
कीर्तितुं॥१३॥रत्नदानंतुगोभ्वाश्च सर्वभूमौप्रजायते॥तस्माद्भूमिप्रदानेन नरोभवतिसर्वदा॥१४॥योन्यदत्तांस्वदत्तांवाहरेद्भूमिं नराधि
पः॥संपच्यतेऽक्षयं कालं नरकेषु क्रमेणसः॥१५॥सर्वंवाभूमिहरणे हृतमेव नसंशयः॥भूमिहर्तावसे त्तस्मान्नरके कालमक्षयं॥१६॥
देवस्वानिहरंतीह नरानरकनिर्भयाः॥ब्रह्मस्वानिच्चयेमोहात् पच्यंतेनरकेषुते॥१७॥देवब्रह्मस्वपुष्पाणि वाहनानिमहीपतेः॥युद्धका
लेविशीर्यंते सैकताःसेतवोयथा॥१८॥भूमिप्रदोवसेत्स्वर्गेयावत्कालस्यसंख्यया॥ तस्माच्छतगुणंकालं तद्धर्ता नरके वसेत्॥१९॥
विंशत्यष्टौत्रयः कोट्यो नरकाणांसुदारुणाः॥क्रमेणतासुपच्यंतेदेवब्रह्मस्वहारिणः॥२०॥कल्पांतेचसमुत्तीर्णावृककीटादियो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निषु॥ भ्रमंतिचिरकालंतु क्षुत्पिपासादिपीडिताः॥२१॥ केनचिच्छिवभक्तेनशिवार्चायतनादिषु॥ उपयुक्ताभवंतीह याव
त्तावच्छेपादपाः॥२२॥ ततोनिर्धूतपापाश्च तेनराः शिवतेजसा॥ दिवंप्रयांतिसंत्यज्य शरीरं यातनात्मकं॥२३॥ देवब्रह्म
परद्रोहं तस्मात्संत्यज्य,शंकरं॥ ये पूजयंतिभूदेवास्ते यांतिपरमंपदं॥२४॥ यइदंपठतेध्यायं शृणुयाद्वासमाहितः॥ सविधू
या शुपापानि शिवलोके महीयते॥२५॥ अतःपरमिदंगुह्यं वक्ष्यमि मुनिसत्तम॥ पुण्यातिशयसंयुक्तं सर्वदेवैरनुष्ठितं॥२६॥
ब्रह्मणाविष्णुनादेव्यास्कंदेंदु भ्यांयमेनच॥ वरुणादित्यसोमाग्नि मरुद्धनदनारदैः॥२७॥ धर्मश्रीभुक नक्षत्र विलोहितश
नैश्चरैः॥ विश्वामित्रवसिष्ठात्रिबृहस्पतिबुधादिभिः॥ श्वेतागस्त्यदधीचाद्यैः सर्वैश्च मुनिसत्तमैः॥ भृंगिमात्रमहाकाल
३०८ चंडेश्वरगणाधिपैः॥२९॥ शेषवासुकिकर्कोटगुलिकानंततक्षकैः॥ पद्मशंखमहाशंखैरन्यैश्चापिमहोरगैः॥३०॥ अनु
ष्ठितं शिवप्रीतिजनकं सर्वदामुने॥ शिवेगतिर्यथाप्राप्ता सर्वगत्यतिशायिनी॥३१॥ मयाचेशप्रसादेनतथाशृणुविधिंपरं॥
शीतचंदनतोयेन स्नाप्य लिंगंविलिप्य च॥३२॥ श्वेतैः विकसितैः पद्मैः संपूज्यप्रणिपत्य च॥ तत्रपद्मासनेसौम्ये निश्छिद्रे पु
ष्पितेशिले॥३३॥ मध्येकेशवजालस्य स्थाप्यलिंगं कनीयसं॥ अंगुष्ठप्रतिमं लिंगे सर्वगंधमयंशुभं॥३४॥ स्थाप्य दक्षिणा
मूर्तौतु बिल्वपत्रैः समर्चयेत्॥ अगरुं दक्षिणेपार्श्वे पश्चिमेतु मनःशिलां॥३५॥ उत्तरे चंदनंदद्यात्सगरुं चापिगुग्गुलं॥ वासं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिचाथसूक्ष्माणिविकोशानिनवानिच॥३६॥पायसंघृतसंमिश्रंघृतदीपांश्चदापयेत्॥सर्वंनिवेद्यमंत्रेण ततोगच्छेत्प्रद
क्षिणं॥३७॥प्रणम्यभक्त्यादेवेशंस्तुत्वाचांतेक्षमापयेत्॥सर्वोपहारसंयुक्तं ततोलिंगंनिवेदयेत्॥३८॥शिवायशिवमंत्रेण द
क्षिणामूर्तिमाश्रितः॥अनेनविधिनादेवाःसर्वे देवत्वमागताः॥३९॥देवीदेवत्वमापन्नास्कंदःस्कंदत्वमागतः॥ब्रह्माब्रह्मत्वमा
पन्नोहरिर्विष्णुत्वमागतः॥४०॥इंद्रश्चदेवराजत्वंगणाश्चगणतांगताः॥एवंयोऽर्च्यतेलिंगंपद्मगंधमयंशुभं॥४१॥सर्व
पापविनिर्मुक्तःशिवलोकेमहीयते॥एतद्गुह्यतमंगुह्यंशिवलिंगंमहाव्रतं॥४२॥भक्तस्यतेमयाख्यातंनदेयंयस्यकस्यचित्॥
शिवभक्तेसदादेयंशिवेनकथितंपुरा॥४३॥चिरेणग्रथितंमाल्यंशिवस्योपजयेत्तुयः॥गोसहस्रफलंतस्यभवतीतिनसंशयः॥
रहस्याध्यायमेतत्तुपठतेशृणुतेचयः॥अचिराल्लभतेहर्षिंशिवलोकंचविंदति॥४५॥यःपूजयेत्शशिकलाशकलोत्तमां
गंलिंगार्चनेनसततंकिल गयाचः॥पापानुबंगमतिभंगमतंगकुंभविद्रावणेकसुधियःप्रभवंतिरुद्राः॥४६॥इतिश्रीशिव
रहस्येमहादेवाख्येएकादशांशेषट्चत्वारिंशोध्यायः॥४६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
श्रीईश्वरउवाच॥ ॥अल्पवीर्यैस्तथामर्त्यैरल्पसत्वैर्नृभिःशिवे॥संवत्सरसहस्रैश्चसदामांपूजयन्नुमे॥१॥नपश्यंतिसुराः
सर्वेनरायेवानरोपमाः॥कथंमांभक्तिरहितानिर्भाग्याःपूजयंत्यपि॥२॥तथापिश्रद्धयाहृदयःपूज्योहंसर्वभावतः॥प्रसंगा



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चैवसंपूज्य भक्तिहीनैरपिद्विजैः ॥३॥ भावानुरूपफलदो भगवानितिकीर्तितः ॥ उच्छिष्टः पूजयन् यातिपैशाचं चद्विजाधमः ॥४॥
संक्रुद्धो रक्षसांस्थान मालस्याद्रौद्यकंशिवे ॥ अभक्ष भक्षः संपूज्य यक्ष्मप्राप्नोतिमानवः ॥५॥ गानशीलश्चगांधर्वं नृत्यशीलस्त
थाप्सराः ॥ ब्राह्मंहिप्रणावेनैवचैष्यावं चाभिनंदकः ॥६॥ श्रद्धया सकृद्देवापि समभ्यर्च्य महेश्वरं ॥ गायत्र्या चसमभ्यर्च्य सोमस्थानम
वाप्नुयात् ॥७॥ पंचाक्षरेणाभिपूज्य रुद्रलोके वसेन्नरः ॥ कल्पमेकं दिव्यदेहः शिवरूपेणसंगतः ॥८॥ पंचभिर्ब्रह्मभिः पूज्यशिवं शि
वगणो भवेत् ॥ संशोध्यचशुभैर्लिंगं मपीठं शुभोदकैः ॥९॥ अद्भिः पीठे तथापूते लिंगेचावाह्य शंकरं ॥ दृष्ट्वादेवं तदालिंगे सपु
ष्पंमस्तकेक्षिपेत् ॥१०॥ कल्पितेचासने तत्र निर्माल्यमपनोद्यच ॥ पाद्यमाचमनं चार्घ्यं दत्वारुद्राय शंभवे ॥११॥ स्नापयेद्दुं
धतोयेन पाटलीमिश्रितेनच ॥ क्षीरेणचगवांनित्यंघृतेनचसुगंधिना ॥१२॥ दध्नाचमधुनाचैवकीरहीनेनशांकरि ॥ ऐक्षव्या
३०१ सितयाचापिस्नापयेद्देवमीश्वरं ॥१३॥ नारिकेलोदकैः स्नाप्ययश्चाम्रकसुफानलैः ॥१४॥ जंबीरसारैर्गंधोदैः कुशपुष्पहिरण्य
जैः ॥ अखंडनीरधाराभिः स्नापयेत्परमेश्वरं ॥१५॥ रुद्रेणाचमकेनैव चित्यापौरुषसूक्तकैः ॥ कद्रुद्रैः पावमानैश्च वामदेवादिसाम
भिः ॥१६॥ रथंतरैस्तथारौद्रैः शिवेथर्वशिरवादिभिः ॥ स्नापयेद्देवदेवेशं तर्पयेदष्टनामभिः ॥१७॥ वाससामृज्यपीठेतु स्थाप्यलिंगंम
हेश्वरं ॥ बिल्वपत्रैरखंडैश्च दूर्वापामार्गदर्भकैः ॥ भस्मनाचंदनाद्यैश्च लेपयेत्साक्षतादिभिः ॥१८॥ रोचनाद्यैस्तु संपूज्य चंद्रैश्चैवमहे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वरं ॥ बिल्वपत्रैररवंडैश्च दूर्वापामार्गदर्भकैः ॥१९॥ निलोत्पलैस्तथापद्मैः नंद्यावर्तशिरीषकैः ॥ मल्लिका चंपकै र्जाजीबकुलार्क
शमीसुमैः ॥२०॥ करवीरैश्च कुटजैः पाटलोद्भवैः ॥ कनकैर्बृहतीपुष्पैः पुष्पैरारग्वधोद्भवैः ॥२१॥ पूजयेन्नाममिर्दैविनिश्चने
त्यादिभिः शिवे ॥ दत्वा पंचविधं धूपं तगरागरुकेसरं ॥२२॥ देवदुसंभवं बेल्वं गुग्गुलं सघृतं शिवे ॥ दीपान् प्रज्वाल्य घृतजान् पायसं
चनिवेदयेत् ॥२३॥ दधिभक्षं च मध्वाज्य परिप्लुतमुमापते ॥ शुद्धान्नं चैव मुद्गान्नं माषान्नं विनिवेदयेत् ॥२४॥ माषापूपं गुडापू
पं गोधूमापूपमेव च ॥ सघृताद्यं चोष्मपाकजन्याशष्कुलिकास्तथा ॥ खर्जिकालडुकाश्चैव मोदकाः फेणिकाः शिवे ॥ दीपान्प्रज्वा
ल्य घृतजान् पायसं चनिवेदयेत् ॥ मंडका भक्ष भोज्यं च निवेद्यं स्यात्सदाशिवे ॥ शाकसूपादि दध्यान्नं गुडान्नं विनिवेदयेत् ॥ क्र
मेणैव फलेनेष्टं पानकं मजिकां तथा ॥२९॥ तांबूलमष्ट गंधाढ्यं सकल्कं विनिवेदयेत् ॥ निराजयेत्ततो दीपैः शतसाहस्रवर्तिकैः ॥३०॥ वृ
षकुंभगजाकारं नागमानुषरूपकं ॥ नाक्षत्रं दीपकं दद्यात्सद्योजातादि पंचकं ॥३१॥ दीपपात्रेषु देयं स्यात्ततः कर्पूरखंडजं ॥
रक्षावंधं ततः कुर्याद्भस्मनात्रिः क्रमेणातु ॥३२॥ ऋग्सामयजुराथर्व मंत्रैस्तुत्वा महेश्वरं ॥ पौराणैर्वा तथैवार्षैस्तुवीत परमेश्व
रं ॥३३॥ ईशानं पुरुषं चैव मघोरं वाममेव च ॥ सद्योजातं जपेत्पश्चात्पंचभिः पूजयेच्छिवं ॥३४॥ छत्रं च चामरे दिव्ये व्यजनादर्श
कं ध्वजं ॥ वीणावेणुमृदंगादीन् शंखदुंदुभिकाहलं ॥३५॥ चार्मातंत्रीमयं श्रेष्ठं आलिंग्या च मुखोद्भवं ॥ वाद्यं चश्रेष्ठमित्याहुः शिवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्चा सुमहेश्वरि ॥३६॥ अलाभे सर्ववाद्यानां घंटाघोषः प्रशस्यते ॥ रत्नस्वर्णोद्भवं पात्रं राजतं ताम्रजं तथा ॥३७॥ कांस्यपैतल
संभूतं दारवं चाश्मसंभवं ॥ शौक्तिकं पत्रसंभूतं मृण्मयं वा अलाभतः ॥३८॥ कल्पयेच्छिवपूजायां फलं स्यादुत्तरोत्तरं ॥ पंचा
मृतं चान्यगवां कापिलं स्यात्ततोधिकं ॥३९॥ नारिकेलात्तथैवान्याच्छृतं तत्र प्रशस्यते ॥ रंभासुवृत्तपीतांच्छः प्रशस्तास्त्वभिषे
चने ॥४०॥ इक्षुभ्यः पौंड्रकं चेक्षु प्रशस्तं स्नपने शिवे ॥ गुर्गाँ वल्मीकसंभूतान्मधु पार्वत मुत्तमं ॥४१॥ कृष्णां निषिद्धं देवेशि पैत्
के विनियोजयेत् ॥ तटाका कूपमुत्कृष्टं, ततः कुल्योद्भवं शिवे ॥४२॥ ततो नदीभवं पुण्यं सागराभिमुखासु च ॥ शंखोदकं त
थोत्कृष्टं सर्वपात्रजलैरपि ॥४३॥ सर्वतैलैरपि शिवे चोत्कृष्टं तिलजं स्मृतं ॥ प्रहरं तिष्ठते जाजी दिवारात्रौ च मल्लिका ॥४४॥
310 पद्मं नीलोत्पलं चैव मुकुलं वा दिनत्रयं ॥ न पर्युषितदोषोस्ति बिल्वपत्रे शिवप्रिये ॥४५॥ न पर्युषितदोषोस्ति हे मरत्नादिक
ल्पिते ॥ अलाभे बिल्वपत्राणां निर्माल्यैः क्षालितैर्यजेत् ॥४६॥ पुष्पाणामप्यलाभे तु तत्पत्राणि निवेदयेत् ॥ कुड्मलैर्नार्चये
दीशं यस्य कस्य सुमस्य च ॥४७॥ विना पद्मोत्पलं देवि सायं मंदारकैर्यजेत् ॥ मल्लीभिर्जातिकाभिश्च प्रातश्चंपकनंदिकैः ॥
॥४८॥ मध्याह्ने कर्णिकारैश्च करवीरैश्च पाटलैः ॥ पुन्नागैः पारिजातैश्च पुष्पैरन्यैर्यथाबलं ॥ कनकं केतकीपुष्पं निशि कादंब
कैर्यजेत् ॥ सर्वदा बिल्वपत्रं मे प्रियं शैलेंद्रकन्यके ॥५०॥ बिल्वपत्रे च कमले कमलासु प्रतिष्ठिता ॥ निलोत्पले बिका साक्षाद्
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ त्पके षण्मुखः स्थितः ॥५१॥ पुंडरीके महादेवः गणेशः शतपत्रके ॥ कर्णिकारस्थितो वेधा मल्लिका सुदरीस्थितः ॥५२॥ कर्णिकारस्थितो
१२० नंदी दुर्गा पाटलकेषु च ॥ श्वेतार्के चैव चंडीशः पुष्पेषु गणप स्थितः ॥५३॥ यमो नीलेषु पुष्पेषु रक्तेऽपर्णा प्रतिष्ठिता ॥ शुभ्रपुष्पार्चने मु
क्तिः भुक्तिरक्तसमर्चने ॥५४॥ पीतं वश्यकरं देवि नीलं मारणकं भवेत् ॥ अनेन विधिना देवः प्रसीदति महेश्वरः ॥५५॥ कृष्णागरूद्भवं धूपं सर्वपाप
निकृंतनं ॥ सांम्राणिके गुग्गुलुजं धूपं वश्यकरं भवेत् ॥५६॥ सर्वरोगहरं चैव सघृतं धूपमुत्तमं ॥ मारणोच्चाटने नैव धूपदीपेपि सत्तमे ॥५७॥
कौसुंभतैलं वश्यं स्याच्छिवदीपप्रदानतः ॥ सार्षपं रोगनाशाय मधूकं राजवश्यकं ॥५८॥ नारिकेलोद्भवं तैलं स्त्रीवशीकरणं शिवे ॥ तिलतैलं
ज्ञानदायी शिवाग्रे दीपदायके ॥५९॥ ऐरंडे बुद्धिमांद्यं स्याच्छिवाग्रे दीपदानतः ॥ गव्यमाज्यं मुक्तिदायि माहिषं पुष्टिकृद्भवेत् ॥६०॥ एवं धू
पादिदीपेषु पुष्पेषु फलमंबिके ॥ यथालाभं प्रकुर्वीत भावयुक्तो न दुष्यति ॥६१॥ वृक्षपुष्पां गपत्राद्यैर्वल्लर्यैश्च महेश्वरि ॥ उपयुक्ताः शि
वार्चायां गावो या लोकमातरः ॥६२॥ गतिं प्रयांति परमां किं पुनर्मानवाः शिवे ॥ द्विजाः क्षत्रा विशः शूद्राः स्त्रियो वापि च संकराः ॥ ६३॥ शं
करार्चासु निरताः प्रयांति परमं पदं ॥ पूजयेद्यः शिवं रुद्रं शर्वं भवमजं सकृत् ॥६४॥ स याति शिवसायुज्यं त्रिसप्तकुलसंयुतः ॥ पूजितं वा म
हादेवं पूज्यमानमथापि वा ॥६५॥ दृष्ट्वा प्रयाति वै मर्त्यो रुद्रलोकं न संशयः ॥ अर्चितं प्रातरीक्षन्वै लिंगे देवमुमासखं ॥६६॥ नेश
पापाद्विमुच्येत मध्याह्ने हयमेधभाक् ॥ सायं जन्मायुतोद्भूतं दृष्ट्वा तत्पापनाशकृत् ॥६७॥ निशीथे तु महादेवमभिवीक्ष्य विमुक्तिभाक् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दृष्ट्वाश्रुत्वापिमोदेद्यासयातिगणतांमम॥६९॥सकृत्प्रसंगतोलिंगमलंगांगह्वरस्यहि॥दृष्ट्वानत्वाभिगच्छेतप्रादक्षिण्येन
शंकरीं॥बहिरेवस्थितोनत्वागच्छेन्मार्गमतंद्रितः॥एकप्रदक्षिणालिंगेचंडेशादर्शनंतथा॥७०॥अदीपदर्शनंचैवशिवस्या
र्धनमःक्रिया॥ब्राह्मणानांपरीवादःहंतिपुण्यंपुराकृतं॥७१॥ ॥ईश्वरउवाच॥ ॥इत्येतत्तेसमासेनफलाफलविनिर्ण
यं॥पुण्यंचदर्शनंशंभोःदीपधूपनिवेदने॥७२॥कथितंप्रथितंदेविमथितंशांभवंवरं॥नानायोनिषुसंचरन्नुविवशाद्विप्र
त्वमेत्यादराद्धर्मित्वेखिलवेदजालकलनाद्वाराग्निहोत्रेरतः॥अग्निष्टोममखादिभिःक्रतुवरैरिष्ट्येष्टिविश्रांतिमेवानप्रस्थ
गतोविरज्यविषयेत्यक्तेषणोमस्करी॥ब्रह्मात्मैक्यरतिर्विमुक्तिपदभाक्ईशार्चकोमुच्यते॥७३॥ ॥इतिश्रीशिवरहस्ये
३११ महादेवाख्येएकादशांशेसप्तचत्वारिंशोध्यायः॥४७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
श्रीसदाशिवउवाच॥ ॥अतःसंक्षेपतोवक्ष्येशिवभक्तानुकंपया॥अद्यशाखोपशाखार्थंशिवधर्मसमन्वितं॥१॥क्वचिद्वद्व
न्यदापश्येच्छिवलिंगमपूजितं॥ग्रामेवानगरेवापिविपिनेपर्वतेपथि॥२॥नदीतीरेशिवक्षेत्रेशून्यलिंगालयेस्थितं॥तदासंपू
ज्यनत्वावायोगच्छेत्सगणोपमः॥स्नाननैवेद्यवस्त्राद्यमाददीतप्रियाणिच॥३॥दत्तंयच्छिवमुद्दिश्यसर्वदानात्परंहितत्॥दृ
ष्ट्वाशिवालयंदूरात्प्रणमन्पापहृन्नरः॥४॥सर्वपापैःप्रमुच्येतनात्रकार्याविचारणा॥चतुष्पथंनरीशोलंशिवभक्तंशिवंतथा॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ हस्तियानासनाश्वेभ्यः शिवयोगियतिं तथा॥ अवतीर्यनमस्कुर्याद्दृष्ट्वालिंगंदृढव्रतः॥६॥ त्वरयाभक्तिमान्गच्छन्भावयुक्तोयदिप्रि महा० ए०
१२१ ये॥ तत्रस्थोऽपिनमस्कृत्वाशिवलोकेमहीयते॥७॥ सोष्णीकः कंचुकीवापिप्रविशेद्यःशिवालयं॥ तत्पापेनप्रमुच्येतत्वरायुक्तोविभूतिधृक्
॥८॥ मृगाजमांसंलशुनंकलंजंगृंजनंतथा॥ आरनालंचसौवीरमभक्ष्यंतद्विवर्जयेत्॥९॥ शिवार्चकः सर्ववर्णोमधुमांसंविवर्जयेत्॥ सर्वदानो
ग्रतपसामश्वमेधायुतस्यच॥१०॥ फलमाप्नोत्ययत्नेनमत्स्यमांसविवर्जनात्॥ सर्वदोषाश्रयंमद्यमतिदूरेविवर्जयेत्॥ ११॥ क्वमद्यंक्वशिवेभ
क्तिःक्वमांसंक्वशिवार्चनं॥ मांसमद्यप्रसक्तानांदूरेतिष्ठतिशंकरः॥१२॥ सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं॥ तत्फलंलभतेसर्वंयोम
द्यंपरिवर्जयेत्॥१३॥ अभक्ष्यमपिभक्ष्यंस्याद्दोषधार्थैन्नभिःशिवे॥ अंतरेणसुरामांसंइतिसर्वश्रुतीरितं॥१४॥ गर्भादिसर्वसंस्कारश्मशा
नाद्यैश्वभोजनं॥ सर्वश्राद्धानिनित्यात्माशिवभक्तोविवर्जयेत्॥१५॥ रजस्वलादिसंस्पृष्टिमंत्यजंश्वानसूकरं॥ नगोब्राह्मणभस्मादिलिं
गच्छायांपदास्पृशेत्॥१६॥ नलंघयेतनिर्माल्यंशिवस्यपरमात्मनः॥ धारयेच्छिवनिर्माल्यंभक्त्यालोभान्नधारयेत्॥१७॥ भक्षणान्न
रकंगच्छेत्तद्विलंघ्यचमूढधीः॥ नतस्यस्नाननैवेद्यंप्रतिगृह्णातिशंकरः॥१८॥ तत्रनैवेद्यनिर्माल्यंभुक्त्वानैवप्रपूजयेत्॥ यत्रनैवेद्यनिर्मा
ल्यमलभुक्पूजयेच्छिवं॥१९॥ तत्स्पृष्टिमित्याद्देवोपिगच्छत्यत्यंतदूरतः॥ असंस्पृश्योभवेत्सोपियोनिर्माल्यमलंस्पृशेत्॥२०॥ तस्मान्न
संस्पृशेल्लिंगंनरोनिर्माल्यदूषितः॥ निर्माल्यंनिर्मलेनैव मोक्तव्यंस्याच्छिवस्यहि॥ स्वेच्छलिंगेचयद्दत्तं गंधपुष्पफलादिकं॥ पायसापूप

भक्ष्यादि भक्षयेच्छिवभक्तिमान्॥२२॥ स्वायंभुवे बाणलिंगे रत्नलिंगेषु पार्थिवे॥ विनाभिषेकपूजादि नैवेद्यं भोज्यमेव
हि॥२३॥ धातुजेषु च लिंगेषु नैव दोषो निवेदने॥ मलोदरैर्नैव भोज्यमशैवैः दूषितात्मभिः॥२४॥ स्त्रीशूद्रयतिभिः पूज्ये मानुष
स्थापिते स्थिरे॥ नैवेद्यं नैव गृह्णीयात्प्राणैः कंठगतैरपि॥२५॥ चंडेशाधिकृतिर्यत्र तत्र निर्माल्यदूषणं॥ चंडेश्वरस्याभिमतं नि
र्माल्यं भक्षितं नृभिः॥२६॥ तान्सवंशं लोहेन निर्दहिष्यति चंडिकः॥ सर्वत्राधिकृतः सोपि महात्मा शिवभक्तिमान्॥२७॥ तस्यैव
जीर्णनैवेद्यं मेध्यान निहताशुभः॥ न चंडेश्वरतुल्योस्ति भक्तोन्यो भुवनत्रये॥ शिवनैवेद्यभुक्त्यर्थं सहि पात्रं शिवे सदा॥ नान्येषां
ग्रहणे देवि अधिकारोस्ति सर्वदा॥२८॥ न भोज्यं शिवनिर्माल्यं मभुक्त्वा नां शिवे सदा॥ न विशेषतया ग्राह्यं भक्ष्यभोज्यां बुशांकरं॥३०॥
312 यतो मलोदरैर्देवि न भोज्यं स्यान्निवेदितं॥ अवैदिको अशैवो हि भुक्त्वा नरकमृच्छति॥३१॥ मूर्तयोष्टौ शिवस्यैताः तासु निंदां वि
वर्जयेत्॥ भूमिरापोऽनलो वायुः खं बिल्वं दीक्षितो द्विजः॥३२॥ गुरौ च शिवभक्तेषु तपसा धूतपाप्मसु॥ अष्टम्यादिषु सर्वेषु भू
तादिषु च पर्वणि॥३३॥ सोमवारेषु सर्वेषु नक्तभुक् पर्ववर्जितं॥ एकादश्यां च कृष्णायां शिवमर्च्याथ नक्तभुक्॥३४॥ कुर्या
द्विशेषतः पूजां शुक्लायामुपवासकृत्॥ द्वादश्यां कुत्सितर्क्षे च दुर्वारेषु कदाचन॥३५॥ श्मश्रुकर्मांगनाभ्यंगं प्रयाणं च विवर्जये
त्॥ स्त्रीद्यूतमत्स्यमांसाद्यं सर्वपर्वसु वर्जयेत्॥३६॥ त्रिकालं वा द्विकालं वा स्नानं नैत्यकमाचरेत्॥ रुद्रसूक्तैर्मार्जनानि कुर्वन्कुर्वैबि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ धानतः॥३७॥शौचं च मृज्जलैः कुर्याद्ब्रुधलेपक्षयावधि॥अस्नातो योऽश्नुते देवि पापमश्नाति केवलं॥३८॥पंचाक्षरं च गायत्रीं रुद्रं महा०र०
१३२ च शतशाखगं॥अजपन् क्रिमिभुक् स स्यात् अजुह्वन् शोणितं पिबेत्॥३९॥अनर्च्यन् लिंगमस्नातः परेतो रेतपो भवेत्॥अभोजयन् अ०४८
वाप्यतिथिं विष्ठापूर्णमुखो भवेत्॥४०॥तस्मात् स्नात्वैव भुंजीत अशक्तो भस्म भर्जनः॥ प्रातःस्नात्वांभसा पूर्वं भस्मस्नानं समाच
रेत्॥४१॥संध्यामुपास्य विधिवद्धुताने जुहुयाज्जपेत्॥ पंचाक्षरं च गायत्रीं श्रीरुद्रं प्रणवं तथा॥४२॥लिंगे चर्येन्महादेवं त्रिसंध्यं
बिल्वपल्लवैः॥देवर्षीन् पितृमुख्यांश्च संतर्प्याधीत वेदकः॥४३॥कंदमूलफलान्नैश्च वर्तयेदतिथिप्रिये॥त्रिसंध्यामाचरेद्ध
स्तु शिवार्चाचारमुत्तमं॥४४॥संध्ययोर्भोजनं देवि मन्नैवेद्यादिशेषतः॥ननक्तं शोषयेद्देहं स्वीयं वाप्यतिथेरपि॥४५॥एवमाच
रते धन्यः शिवभक्तः शिवार्चकः॥पापकंचुकमुत्सृज्य जीर्णां त्वचमिवोरगः॥४६॥स्ववंशपितृभिः सार्धं शिवलोके महीयते॥
कुर्याद्व्रतं चतुर्मासं महापूजाप्रवर्तनं॥४७॥आषाढे श्रावणे देवि कार्तिके मार्गशीर्षके॥एकभुक्तेन नक्तेन मुक्तिकामी शिवार्चकः
॥४८॥भोजयेच्छिवभक्तांश्च शक्त्या दानं च दापयेत्॥आषाढे फलपूजास्याद्यस्य कस्य शताष्टकं॥४९॥श्रावणे पारिजातैश्च पूज
येल्लक्षसंख्यया॥कार्तिके दीपमालाभिर्द्योतयेच्छिवमंदिरं॥५०॥सेमंतिभिर्मार्गशीर्षे कुषः संपूजयेच्छिवं॥वसेच्छिवपुरे रम्ये चा
तुर्मास्यार्चको नरः॥५१॥त्रिसप्तकुलसंयुक्तः सर्वभोगसमृद्धिभाक्॥एवं पर्वोत्सवे श्राद्धे मासेषु नियताशनः॥५२॥भोजयेच्छिवने

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेद्यैः शिवं संपूज्य वाग्यतः॥ पितरः सर्वदेवाश्च शिवमाश्रित्य संस्थिताः॥५३॥ एवं सर्वोत्सवे श्राद्धे मासेषु नियताशनः॥ प्रीते शिवे
तु ते सर्वे सुप्रीतास्युर्न संशयः॥५४॥ वृक्षस्य मूलसेकेन शाखाः पुष्यंति वै यथा॥ शिवे शिवार्चनप्रीते तुष्यत्यस्य वपुर्जगत्॥५५॥
नानिष्टमाचरेत्किंचित्सर्वदेहेषु सर्वदा॥ मनोवाक्कायजैर्दोषैर्नियतात्मा ऽपि पापिषु॥५६॥ यदि कुर्यात् प्रमादेन सोऽष्टमूर्तेरनि
ष्टकृत्॥ किं पुनः पुण्यदेहेषु शिवात्मसु महेश्वरि॥५७॥ ज्ञानवैराग्यसंपन्नं भस्मनिष्ठं जितेंद्रियं॥ वश्यात्मानं यतात्मानं शांतं
दांतं तपस्विनं॥५८॥ भोजयेच्छांभवं देवि वेदवेदांतपारगं॥ पंक्तिपावनमूर्धन्यं श्राद्धेषु शिवयोगिनं॥५९॥ यदीश्वरादितत्त्वा
३१३ नां परिज्ञाता रमीश्वरि॥ नातिष्ठेद्दृष्टिसंप्राप्तं न चेष्टमभिनंदति॥६०॥ भावे साधर्म्ये वैधर्म्ये मेतत्ज्ञानस्य लक्षणं॥ वर्णेष्वप्य
धिको विप्रो द्विज वेदविदुत्तमः॥६१॥ वेदविद्भ्योऽर्थवित् श्रेष्ठस्तस्माद्याजी विशिष्यते॥ ततोऽपि सत्रयाजी स्यात् ब्रह्मचारिभ्योऽप्यधिको गृही॥६२॥
वनी गृहिभ्योऽप्यधिकः संन्यासी च ततोऽधिकः॥ ततो वेदांतविच्छ्रेष्ठः रुद्रजापी ततोऽधिकः॥६३॥ सर्वेषामेव वर्णानां त्रैवर्णा पुरुषान
राः॥ पुरुषेभ्यो द्विजश्रेष्ठस्ततो वै ग्रंथपारगः॥६४॥ ग्रंथज्ञाद्वेदविद्वांसस्तेभ्यस्तत्त्वार्थचिंतकः॥ तत्त्वविद्भ्यो योगविज्ञो विशिष्ट इति
मे मतिः॥६५॥ वेदांतविद्भ्यः कोटिभ्यो विशिष्टाः शिवयोगिनः॥ योगज्ञा योगनिष्ठाश्च पितरो योगसंभवाः॥६६॥ भुंक्ते प्रीणांति ते
तस्मात् विशिष्टाः शिपिविष्टकाः॥ सर्वयज्ञतपोदानैः कृतैः सांगैश्च यत्फलं॥६७॥ शांभवो वेदविद्विप्रो भस्मनिष्ठोऽत्र भुज्यते॥

शिवरह० ११ १२२ नतेनकिंगृहस्थेनप्राप्तंक्रतुशतैरपि॥६८॥ त्रैविद्यावेदिनःश्रेष्ठादशशताध्यायिनोपिच॥ ततोपियाजुषाश्रेष्ठास्ततोवाजसने मह० ९० अ० ५८
यिनः॥६९॥साम्नांपरस्वराभिज्ञाछंदोगाश्चततोंबिके॥ततोथर्वविदःश्रेष्ठाः स्ततोमंत्रविदःस्मृताः॥७०॥रुद्रजाप्यनिरताःशतरु
द्रंचजापकाः॥भस्मनिष्ठारुद्रजाप्यनिरताःपापवर्जिताः॥७१॥त्रिमधुस्त्रिसुपर्णश्चवामदेवाश्चसामगाः॥ज्येष्ठार्चनरतोराजातथा
वेजेष्ठसामगः॥षडंगवित्ततोदेवितत्तोप्युपनिषत्परः॥बृहज्जाबालनिरतःपुराणेषुचनिष्ठितः॥७३॥इतिहासविदश्रेष्ठाः ततोधर्म
विदुत्तमः॥तथाथर्वशिरोवेत्ताशिरवाध्यायीततोपिहि॥७४॥कैवल्योपनिषद्ध्यानध्यायीमेऽप्यविशिष्यते॥ कालाग्निरुद्रजापीस्यात्
ततोदेविविशिष्यते॥७५॥ततःशिवरहस्यज्ञःशांभवःश्रेष्ठउच्यते॥ वश्येंद्रियःप्रसन्नात्मायोनद्वेष्टिनकांक्षते॥७६ ॥युक्तोयोगेनयो
गेनसज्ञानीश्रेष्ठउच्यते॥शिवधर्मोद्भवंज्ञानंज्ञानाद्वैराग्यसंभवः॥७८॥ ज्ञानवैराग्ययुक्तस्यशिवयोगःप्रवर्तते॥शिवयोगाच्चसर्वज्ञः
परिपूर्णस्थिरोभवेत्॥७९॥स्वात्मन्येवास्थितःसर्वःशिववत्सर्वगोभवेत्॥स्वात्मारामस्त्वसंशश्चसब्रह्मैवनसंशयः॥८०॥तादृशंभोजयि
त्वातुजगद्भोज्यफलंलभेत्॥योवादोषविनिर्मुक्तांगांचदद्यात्पयस्विनीं॥८१॥घंटाभरणवस्त्राढ्यांसवत्सांचदृढांगकां॥दद्याद्गोदान
मुत्कृष्टंशांभवेषुयतात्मसु॥८२॥मध्यमोत्तमवस्त्राणियोदद्यात्तुनवानिच॥शिवभक्तेषुवस्त्राणियावत्तत्तंतुसंख्यया॥८३॥ताव
द्वर्षशतंदेविस्वर्गलोकेमहीयते॥ब्रह्मचर्यसमोपेतःशांतःशीलपरायणः॥८४॥अहोरात्रंनभुंजीतउपवासस्यलक्षणं॥अहस्सुचो



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(व्रताद्ये)

पोष्येवा, सायंयामेच भोजयेत्॥८५॥ तन्नक्तमितिचप्रोक्तं, छायानक्तंदिनांतिमे॥ अयाचितं केनचिद्वादत्तंयद्भुज्यतेहितत्
॥८६॥ यदोपदस्येद्देहादिआपोमूलंघृतंपयः॥ सक्तून्प्राश्यन्नदुष्येतवचनाद्ब्राह्मणस्यहि॥८७॥ चत्वारिंशत्समायुक्तंपिंडा
नांयोश्नुतेदिवि॥ अघान्मासंहविःक्षारवर्जितं सोश्नुतेव्रतं॥८८॥ चान्द्रायणंतद्विज्ञेयं ह्रासवृध्यातुपक्षयोः॥ शिशुचांद्राय
णंदेवि पक्षयोःशुक्लकृष्णयोः॥ कुर्वन्कृच्छ्रंशिवंपूज्यलभतेफलमुत्तमं॥८९॥ ॥ईश्वरउवाच॥ ॥एवंकुर्वन्द्वि
वाचारं वसेदेवंगृहाश्रमे॥ वर्णीवनीगृहस्थोवा यतिश्चैवविशेषतः॥९०॥ शिवलोकेमहीयेतयावद्ब्रह्मसदाशिवे॥९१॥
योवाममाचारपरायणःशिवेवसेत्गृहीवाविपिनाश्रमीवा॥ यतिश्चवर्णीविधवास्त्रियोवा शूद्राश्चवर्णाश्चतथैवसं
३।५ कराः॥९२॥ शमान्विताःशीलगुणोपपन्नाः प्रसन्नवाक्कायमनोभिरेवं॥ शिवार्चनासूद्यताचित्तवृत्तयः विमुक्तायेहिप्रयतं
तिसर्वे॥९३॥ चतुर्दशीसोमदिनेष्टमीषु पर्वस्वपीष्टाःशिपिविष्टपूजकाः॥ शिष्टाविशिष्टाश्च तएवलोके गणेंद्रमुख्या
स्तइहैवलोके॥ येभस्मनिष्ठाःशिपिविष्टसंश्रयाः योगैकनिष्ठाःअपिमेसदेष्टाः॥ अष्टाकृतेरर्चनतःप्रतुष्टाः कष्टाद्विहीं
नानहिदुष्टभावाः॥९४॥ ॥इतिश्रीशिवरहस्ये एकादशांशे महादेवाख्ये शिवगौरीसंवादे शिवधर्माचारोनाम
ष्टाचत्वारिंशोध्यायः॥४८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर६०११ श्रीईश्वर उवाच॥ ॥देवैश्च मुनिभिश्चैव सेवितानि विमुक्तये॥ क्षेत्रतीर्थानि पुण्यानि चित्तशुध्यर्थमादरात्॥१॥प्रकाश्यं महा०२
१२४ ते मया तानि शृणु पद्मसमानने॥ रुद्रावतारस्थानानि शिवक्षेत्राणि निर्दिशेत्॥२॥ मृतानां तत्र रुद्रत्वं शिवक्षेत्रेषु देहिनां॥आ अ०४९
धायाग्निं शिवक्षेत्रे संपूज्य परमेश्वरं॥३॥ आधायाग्निं शिवक्षेत्रे संपूज्य परमेश्वरं॥ स्वदेहं पिंडवद्वन्हौ जुहुयात्पंचाक्षरेण तु॥४॥शि
वक्षेत्रे महादेवि शिवसायुज्यमाप्नुयात्॥ छित्वा पदद्वयं वापि शिवक्षेत्रे वसेत्तु यः॥५॥ स याति शिवतां देवि नात्र कार्या विचारणा॥
क्षेत्राणां दर्शनं पुण्यं प्रवेशः तच्छताधिकः॥६॥ तस्माच्छतगुणं लिंगदर्शनं च प्रदक्षिणा॥ तस्माच्छतगुणा पूजा जलस्नानं ततः
परं॥७॥क्षीरस्नानं ततो देवि शताधिकमनुत्तमे॥ दध्ना सहस्रमाख्यातं मधुना तच्छताधिकं॥८॥ घृतस्नानेन चानंत्यमुपवासे
न सत्तमे॥ तस्मात्कोटिगुणं देवि देहांते शिवसन्निधौ॥९॥ शिवक्षेत्रे समीपस्थं नदीवापीतटाककं॥ कूपं वापि प्रशस्येत शिवती
र्थमिति स्मृतं॥१०॥ स्नात्वा तेषु नरो भक्त्या नरकं नैव विंदति॥ शांभवान्भोजयेत्तत्र यथायोगं यथाबलं॥११॥ श्रद्धया श्राद्धदा
नेन पितॄन् तारयते हि सः॥ भस्मत्रिपुंड्ररुद्राक्षान्धृत्वैव निवसेच्छिवे॥१२॥ रुद्रपंचाक्षरपरो रुद्रलिंगार्चनस्ततः॥ नियतो
नियमोपेतः शांतो दांतः स्थिरासनः॥१३॥ उमाकांतपदध्यायी नितांतं मुक्त एव सः॥ वस्त्रापदं रुद्रकोटिरविमुक्तं महालयं॥१४॥
गोकर्णं भद्रकर्णौ च स्वर्णाक्षः त्र्यक्षदीप्तिमत्॥ स्थाण्वीश्वरं च विख्यातं त्रिषु लोकेषु विश्रुतं॥१५॥ स्थानाष्टकमिदं देवि अष्ट



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूर्त्तिप्रियंपरं ॥ वस्त्रापदादिस्थाएवंतशिवसायुज्यदायकं ॥१६॥ छगंडुलोद्दिरंडश्च कामोढमंडलेश्वरं ॥ कालंजरं शंकुपर्णं स्थूलेश
श्चस्थलेश्वरः ॥१७॥ पवित्राष्टकमित्येतच्छैव क्षेत्रं महाघभित् ॥ मृताः प्रयांतितत्रैव शिवस्य परमं पदं ॥१८॥ पिंडारकं कुरुक्षेत्रंत
थाकनखलंशिवे ॥ विमलेशाट्टहासंच महाकालमहेश्वरं ॥१९॥ भीमेश्वराख्य तत्पण्यमेतत्गुह्याष्टकं शिवे ॥ मृताः प्रयांति
गणतां पापाः पुण्या अपिस्थिरं ॥२०॥ श्रीपर्वतो हरिश्चंद्रः केदारो मंत्रकेश्वरः ॥ ॐकारो भैरवेशश्च मध्यमेशः सितेश्वरः ॥२१॥
एतद्गुह्याष्टकक्षेत्रं शिवसायुज्यदायकं ॥ संतर्प्य च पितॄन्श्राद्धे प्रीणयेद्देवि शंभवान् ॥२२॥ अमरेशं प्रभासंच नैमिषं पुष्करंत
था ॥ आषाढं चंडिमुंडीचहरभूमि भवांतकः ॥२३॥ एतच्छैवाष्टकं क्षेत्रं शिवसायुज्यदायकं ॥ नकुलीशप्रवाजश्च कंजंत्र्यंब
केश्वरं ॥२४॥ नागेश्वरं वैद्यनाथं सोमेशं घस्त्रणीश्वरं ॥ क्षेत्राष्टकमिदं देवि ममप्रियकरंसदा ॥२५॥ अत्र यांतिमृताः सर्वे रु
७।ऽ द्रस्य परमं पदं ॥ पंचाष्टकमिदं ज्ञेयं शिवक्षेत्रं सुलक्षणं ॥२६॥ यत्रैव भावसंसक्ता भावा यांत्य पुनर्भवं ॥ स्नानं दानं तथाश्राद्धं ये कुर्यु
श्चात्र भावतः ॥२७॥ शिवायसथकूपाद्यं तदक्षय्या फलं व्रजेत् ॥ इत्युक्त्वा सर्वतोदृष्टिं प्रसार्य परमेश्वरः ॥ २८॥ भारतेसर्ववर्षेषु शिव
क्षेत्राणि सर्वतः ॥ शिवायतनमुख्यानि दिवि भूमौ गिरिष्वपि ॥२९॥ कैलासस्थो महादेवस्तद्देव्यै दर्शयच्छिवः ॥ गंगाद्वारं च केदारं गंगासाग
रसंगमं ॥३०॥ अविमुक्तमयोध्यांच प्रयागसरितेतथा ॥ चित्रकूटं त्रिकूटंच पुण्यकूटं चपर्वतं ॥३१॥ गुंडीप्रभंच परमं दिव्यं वैश्रवणेश्वरं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९१ १२५

प्रभासं च प्रकाशं च प्रकाशेश्वरकेश्वरं ॥३२॥ मध्यमेश्वरमित्युक्तं वेदेशं क्षामकेश्वरं ॥ आकाशलिंगं परमं तीर्थं चाप्यचलेश्वरं ॥३३॥ महा० रु० अ० ४८
पूर्वद्वारं हरिश्चंद्रः त्रिपुरांतकरं हरं ॥ अमरेश्वरं च वरदं देवैः पूर्वं प्रतिष्ठितं ॥३४॥ गोप्रक्षेश्वरमीशानं तथा चंद्रेश्वरं शुभं ॥ कर्मेश्वरं च वि
घसंसृष्ट्यर्थं ब्रह्मणा ततं ॥३५॥ श्रीमद्दधिवरं चैव कारटकं वारणाद्वयं ॥ अजेन निर्मितं दिव्यं पुण्यं त्विलिविलेश्वरं ॥३६॥ तत्र वै
पादुका मेघ पुण्ये त्विलिबिलेश्वरे ॥ ततः शृंगाप्रकाशाढ गोरटं प्राणिकेश्वरं ॥३७॥ देव्यावर्तेश्वरं पुण्यं तद्देव्या सुप्रतिष्ठितं ॥ मल्लि
कार्जुनसंज्ञं च मामावासनगोत्तमं ॥३८॥ राजेश्वरं च पर्यायं भद्रेश्वरमथाव्ययं ॥ गतीश्वरं च वैशारवं कपोतेश्वरमव्ययं ॥३९॥
कोटिरुद्रेश्वरक्षेत्रं रुद्रकोटिप्रतिष्ठितं ॥ विष्णुनात्र तपस्तप्तं पूर्वं युगमनुत्तमं ॥४०॥ विष्णु वीरं त्रिकूटाख्यं कोटिभद्राख्य
मुत्तमं ॥ सर्वेश्वरं भारभूतं मलंगट्टमथापिवा ॥४१॥ मध्यांगेशाकदंबेशौ स्कंदेनैव प्रतिष्ठितं ॥ गोमंडलेश्वरं चैव गंधर्वैः पूजि
तं परं ॥४२॥ विद्याधरेश्वरं चैव पार्वतीशं त्वयार्चितं ॥ सुरेश्वरं च त्रिदशैः पूजितं क्षेत्रमुत्तमं ॥४३॥ आवर्द्दनीश्वरं चैतन्नागैः सं
पूजितं मुदा ॥ यक्षेश्वरं यक्षगणैः किंपुरुषैः पुरुषेश्वरं ॥४४॥ वृषेश्वरं च धर्मेण पूजितं सर्वकामदं ॥ बृहद्रथेश्वरं देवं राज्ञा तेनार्चितं
तदा ॥४५॥ गदाधरेश्वरं देवं गंधद्वारेश्वरं परं ॥ वेणुदारीश्वरं चैव पापहारीश्वरं तथा ॥४६॥ रुद्रेश्वरं प्रतिष्ठानं वामदेवेश्वरं त
था ॥ गणगीतेश्वरं पुण्यं तुंगेशं नार्मदेश्वरं ॥४७॥ यमप्रमथनेशं च भगाक्षिहरशंकरं ॥ कूर्परेशं मयूरेशं पुण्यं पंचनदाभिधं ॥४८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुशावर्तं त्रिणावर्तं गंगावर्तं गयेश्वरं ॥ मंदरेशं सुंदरेशं वामभागेश्वरं शिवं ॥ ४९ ॥ कृत्तिवासेश्वरं पुण्यं गजो यत्र निपातितः ॥ न्र
सिंहहरणं पुण्यं शारभेशं महाद्भुतं ॥ ५० ॥ वामनांग प्रमथनं मन्मथान्तकरं परं ॥ हिरण्यगर्भ नांदीशं मायापुर्यां प्रतिष्ठितं ॥ ५१ ॥
विरजेशं विशोकेशं भग प्रमथनेश्वरं ॥ अचलेश्वर संज्ञं च अचलैः परिपूजितं ॥ ५२ ॥ चंडेश्वरं च भेरुडं गंडकीतीर संस्थितं ॥ व्याघ्रे
श्वरं बाहुदायास्तीरे क्षेत्रं सनातनं ॥ ५३ ॥ भीमाशंकर संज्ञं च देवदारुवनेश्वरं ॥ हस्तीशं पात्रकीशं च भंगहारीश्वरं तथा ॥ ५४ ॥ तुं
गेश्वरं च तुंगायाः लिंगं तुंगं प्रतिष्ठितं ॥ चर्मण्वत्याः परे पारे क्षेत्रं युंजिष्ठकेश्वरं ॥ ५५ ॥ सरस्वतीशं तन्नद्यास्तीरे क्षेत्रं शिवालयं ॥
यामुनेशं च यमुनामनुतिष्ठति तत्प्रिये ॥ ५६ ॥ गंगेश्वरं च गंगायाः प्रभवे सुप्रतिष्ठितं ॥ यमुनागंगयोः संधौ संधीशं पुण्यदा य
कं ॥ ५७ ॥ माधवीश मनंतेशं नीरातीरे प्रतिष्ठितं ॥ भीमेशं भीमरथ्याश्च तटे कुंजह्रेश्वरं ॥ ५८ ॥ वृंदावने च वृंदेशं मथुरायां म
३१६ थेश्वरं ॥ विपाशायां विपाशेशं नैमिशे नैमिशेश्वरं ॥ ५९ ॥ शोणातीरे शोणकेशं नार्मदं नर्मदेश्वरं ॥ यत्र बाणः समाराध्य लेभे भुज
सहस्रकं ॥ ६० ॥ ओंकारेशं च तत्तीरे पर्णादेशे प्रतिष्ठितं ॥ शरय्व्यां च शरय्वेशं गोमत्यां गोमतीश्वरं ॥ ६१ ॥ वेण्यां वेणीश्वरं पुण्यं नि
षधेशं नगास्थितं ॥ अश्वक्रीतीर गंदे विविद्धरेश्वर संस्थितं ॥ ६२ ॥ द्वारवत्यां द्वारकेशं कृष्णेनार्चितमीश्वरं ॥ अवंतीशमवंत्यां
तु शतद्रुत्यां शतेश्वरं ॥ ६३ ॥ परादनेश्वरं पुण्यं कालकंजेश्वरं परं ॥ हरिभद्रेश्वरं पुण्ये संगातीरे प्रतिष्ठितं ॥ ६४ ॥ असीतीरे म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ११ हादेवं वरणावरुणेश्वरं ॥ बदर्यां बदरीशं च पुष्करे पुष्करेश्वरं ॥६५॥ वायुसंपूजितं क्षेत्रं वायवीशं सुपुण्यदं ॥ अनंगमथनं पुण्यं महा० ९:
१३६ यत्रानंगो निपातितः ॥६६॥ कर्दमीतीरजं क्षेत्रं कर्दमीशं सुपुण्यदं ॥ यतीश्वरं प्रभासं च कालकालेश्वरं परं ॥६७॥ मतंगेशं मतं अ० ४९
स्त्रे गायास्तीरे लिंगं प्रतिष्ठितं ॥ गोत्प्रेतीर्थे च गोप्रेक्षं त्र्यक्षं मोक्षप्रदायकं ॥६८॥ सागरेशं तथोत्स्वार्चे भद्रकर्णेश्वरं शिवं ॥ मलयेशं
कुंजभेशं हनहेतीश्वरं तथा ॥६९॥ मांडिकर्णीश्वरं चैव कामदं वैद्यनाथकं ॥ कृष्णेश्वरं च कृष्णायाः तीरे क्षेत्रं मनोहरं ॥७०॥
पंपेश्वरं च पंपायाः तीरे देवि शिवालयं ॥ निदानेशं दारवल्यास्तीरे क्षेत्रं सनातनं ॥७१॥ भृगुतुंगे तुतुंगेशं पापहारीश्वरं तथा ॥ व
ज्रावर्तेश्वरं चैव फाणिकायाः तटे शुभे ॥७२॥ बलप्रमथनेशं च कालमूलेश्वरं तथा ॥ व्योमकेशं हरीशं च तंगणेषु प्रतिष्ठितं ॥७३॥
क्षिप्रेश्वरं च क्षिप्रायास्तटे क्षिप्रप्रसादकृत् ॥ कालव्यालेश्वरं चैव तक्षकेन प्रतिष्ठितं ॥७४॥ त्रिजटेश्वरसंज्ञं च त्रिजटानिम्नगायतः ॥
मेरुधन्वीश्वरं क्षेत्रं मेरौ वसुधरेश्वरं ॥७५॥ धुतीश्वरं धुतावर्ते कोंकणे च प्रतिष्ठितं ॥ भार्गवीश्वरं च रामेण पूजितं क्षत्रियांतकृत् ॥७६॥
कोलापुरे कोलकेशं त्वया देवि प्रतिष्ठितं ॥ अंधकेनार्चितं लिंगं अंधकेश्वरसंज्ञितं ॥७७॥ मकुटेशं च कंकोल कोलहारीश्वरं
शिवं ॥ यमेश्वरं च सांबेशं अरण्येशं व्रतेश्वरं ॥७८॥ तारणातीरगं क्षेत्रं तारणेशाभिधं शिवं ॥ कमलेशं दिगीशं च भासेशं प्रकटेश्वरं ॥७९॥ हा
लाहालेश्वरं पुण्यं यत्र जातो गरादनः ॥ विनायकेश्वरश्चैव पर्णादेशं थसेश्वरः ॥८०॥ शूलावर्तेश्वरो देवि नाभंगेशो धनेश्वरः ॥ अर्धनारीश्वर



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्चैवत्वयायत्राहमास्थित ः॥८१॥ विदुरथेश्वरश्चैव शिवेदशरथेश्वरः॥ कन्याकुब्जेश्वरश्चैव कन्याकुब्जेप्रतिष्ठितं॥८२॥
अरुंधतीश्वरश्चैव सिनीवालीश्वरस्तथा॥ अखंडेशो अदात्भेशो रावणेशः सुरेश्वरः॥८३॥ त्रिकंटुकेश्वरोदेविधिष्ठिताप
रतंगणे॥ सौराष्ट्रे सोमनाथेशो राष्ट्रवर्धनपूजितः॥८४॥ गोसवेश्वरोदेवि गोतमेशोरतीश्वरः॥ यंत्रहारीश्वरोदेवि आन
र्तेच प्रतिष्ठितः॥८५॥ उमेश्वरः सोमचंडः खंडपर्शुः हरेश्वरः॥ मुशलेशोगलेशश्च कोशलेषु प्रतिष्ठिताः॥८६॥ आवन्त्येशो
दनन्येशो वधीशो वैधृतीश्वरः॥ धिष्ठिताः सर्वदेवैश्च पूजितोत्तरकोशले॥८७॥ भर्गेशो थविद भैशः कनकेशः प्रभादनः॥ वि
दर्भेधिष्ठिता ह्येते क्षेत्रवर्याणि शूलिनः॥८८॥ कणादेशः कहोलेशः प्रतार्येशो महेश्वरः॥ मालवेषुस्थिता ह्येते साल्वेष्वे
तेप्रतिष्ठिताः॥८९॥ कवाटहरणेशश्च दानवेशो रमेश्वरः॥ वसान्त्येशः कार्त्तिकेशो विजंघेशो गरेश्वरः॥९०॥ रोगहारीश्वर
३१७ श्चैव पुंड्रेष्वेते प्रतिष्ठिताः॥ काश्यां विश्वेश्वरश्चैव अविमुक्तेश्वरस्तथा॥९१॥ त्रिलोचनेशो वीरेशो कपर्दीशो महेश्वरः॥ म
णिकर्णीश्वरश्चैव ज्ञानेशः संगमेश्वरः॥९२॥ मध्यमेशश्च सोमेशः केदारो भंगलेश्वरः॥ नागेश्वरो णिमांडव्यः सुरभांडेश्वरः
शिवे॥९३॥ कंदर्पेशमतंगेशो रामेशो लक्ष्मणेश्वरः॥ व्यासेश्वरो विरूपाक्षः कर्दमेश्वर एव च॥९४॥ जनार्दनेशो ब्रह्मेशो वीर
हर्षेश्वरस्तथा॥ त्वयान्नपूर्णयादेवि सेवितो गणपैस्तथा॥९५॥ अविमुक्तेनिवत्स्यामि पारयन्नजनतारुजं॥ सोवीरे बिल्वकेशश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११
१३७

वृषध्वेशः शिलेश्वरः ॥९६॥ तंगणेषु ययातीशः फणाशश्चेति संस्थिताः ॥ सैंधवेषु महादेशा वारणेशः कुशेश्वरः ॥९७॥ सिंहलेष्वपि महा०ए० अ०४९
नाकीशः कारुण्येशः स्थितः शिवे ॥ आरट्टकरहट्टेशः खान्येवेखानसेश्वरः ॥९८॥ वैदंवे बिंदुकेशश्च प्रसन्नेशः पसन्नके ॥ कुणिकुं
भेप्रमाथीशः सारणेसरणेश्वरः ॥९९॥ अंगेषु फणिभद्रेशो रोमहारीश्वरस्तथा ॥ वंगेषु वागुरीशोथ वनेशोथनतीश्वरः ॥१००॥ कलिं
गेषु विरूपाक्षः गणगीतेश्वरस्तथा ॥ काश्मीरे रस्मिकेशश्च तुरंगेश प्रसादनः ॥१॥ वर्धनेषु महावीरो गंधर्वेशः शतेश्वरः ॥ पौरणे
षुमतीशानः फणिकंठेश्वरः शिवः ॥२॥ उदये चोदयेशोथ पारियात्रे महेश्वरः ॥ अस्ताचले तथास्तेशो भगमालीश्वरस्तथा ॥३॥ शि
लानघास्तरे देवि वैद्युतेशः प्रतिष्ठितः ॥ कोटीश्वरो महाकालः सुनंदे च स्थितो शिवे ॥४॥ मरुद्देशे विडंगेशः भुकेशो रजनीश्व
रः ॥ बल्वजे मणिचित्रेशः पौंड्रे पुंड्रेश्वरः स्थितः ॥५॥ सार्वके सुंदरेशानः प्रतर्दन नगार्द्दनौ ॥ उदुंबरे बरेशानः कहोलो होलकेश्वरः ॥६॥
कोशलेकमलेशश्च तस्करेशो धुनीश्वराः ॥ कारंडे तांडवेशश्च विसर्गेशश्च संस्थितः ॥७॥ गरुडेशः पन्नगेशः कालकेषु प्रतिष्ठितः ॥
पारिजातेश्वरश्चैव गंधभद्रेश्वरस्तथा ॥८॥ उत्तरापथगा देवि प्रमोदेशो भगीश्वरः ॥ फुल्लेशा करुणेशोच चित्रखंडे व्यवस्थितो ॥९॥ दा
रवे दारकेशश्च प्रमाथीशो रगेश्वरौ ॥ कराडे पालकीशश्च तरंगेशा व्यवस्थिताः ॥११०॥ महाराष्ट्रे मध्यमेशः सिंधुरीशो गणेश्वरः ॥ मरेश्वरो
नमित्रेशः गुर्जरे गुंजकेश्वरः ॥११॥ वर्धनीशः स्वर्धुनीशो पारशोकेषु शंकरः ॥ लुंबरेशः करंभेशो दलितेषु पनीश्वरः ॥१२॥ मार्गदेशेरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिकेशोवेणुदारीश्वरस्तथा॥मौशले तुहलीशानः काद्रवेशोधनाधिपः॥१३॥बलेषुधान्यकेशानो सुपार्येशः प्रसन्नकः॥गोनर्दने न
र्दकेशानो चीनेहीनन्नेश्वरः॥१४॥जांगले मंगलेशानः तुंडीरे कांडकेश्वरः॥कुणेषु कलिकेशश्चसुकुणेषु जटेश्वरः॥१५॥मीनाशनेषु
मीनेशः मैत्रे मित्रायणीश्वरः॥वल्कलेषु प्रतानेशो कांदेषु प्रकटेश्वरः॥१६॥तुहुंडेषु तुहुंडेशो हौंडीशः पारदेश्वरः मांसादनेषु दाने
शो गंडेषु पुरुकेश्वरः॥१७॥लंगडेषु फणींद्रेशो विस्तार्येषु प्रकाशकृत्॥मध्वादनेषु माध्वीशो गौडेषु श्रुतकेश्वरः॥१८॥ चारुदे
ष्णेषु शोक्लीशः कुटंकेषु लतेश्वरः॥पावनेषु फनस्येशो राधवेशो द्रुमेश्वरः॥१९॥स्वकल्केषु सपत्नीशः नगचारिषु नागधृक्॥फ
णाफणीश्वरः कोले अंकोलेषु जिनेश्वरः॥१२०॥मनस्येषु पुरंध्रीशः पौंड्रेषु प्रस्थितेश्वरः॥मिथिलेषु कनस्येशागोप्रक्षेप्यशोनिरींद्रियः
११६ ॥२१॥ बाभ्रेषु भौतिकेशश्च कंठेषु मणिकंठकः॥ताम्येषु काणवेशश्च करंधेषु महेश्वरः॥२२॥ तरंगेषु महाभद्रो ददरेषु कृतीश्वरः॥ वै
राटेषु कठोरेशो विस्तंडेषु कुथेश्वरः॥२३॥परियात्रे पारिकेशो वितस्तीशः कुरुस्थले॥भारते पुरुभद्रेशः पुंकुतेश्वरस्तथा॥२४॥गाणेषु च गणेशा
नः कुमारीशः कुमारके॥शातशृंगे मेरुशानः पर्जन्येशः पिलिप्यते॥२५॥कालंजरे रुद्रकेशः जातुकर्णेश्वरः शिवे॥ वर्धने पारिभद्रेशो विंध्येसा
ध्येश्वरस्तथा॥२६॥विराधेशः कोंकणेशः लमालेषु महेश्वरः॥गर्गरीषु पवीशानो उद्दामे च प्रसेनजित्॥२७॥कांडेषु पांडलीशानो वध्रेषु ब
भ्रकेश्वरः॥करंभेषु सुधन्वीशो गोपतिश्च महेश्वरः॥२८॥दर्दरीशो वामनेशो सिंजने कुजनेश्वरः॥शौनकं भेषु कुंभीशो मथनेशो मृतेश्वरः॥२९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंथावृतेश्वरश्चैत्रे माणिकेशः प्रसोमकः ॥ सोमचूडेश्वरः सैंहे सिंहकेशश्च शंकरः ॥ ३०॥ कालेश्वरः तारकेशो मालवेषु महेश्वरः ॥ वीणापाणीश्व
रोनीले सौम्ये सोमेश्वरो महान् ॥ ३१॥ हेमकूटे चकूटेशः त्रिकूटे कर्कटेश्वरः ॥ सह्ये सह्येश्वरो देवि हिमवत्यंकुरेश्वरः ॥ ३२॥ केदारश्चैव भीमेशो गर्गरीशोथ
चंदने ॥ हरशैले हरीशश्च कर्पटे कार्पटीश्वरः ॥ सत्येश्वरो वैनलेशः गारुडे पर्वतोत्तमे ॥ प्रजापतीशो वेदीशः त्रिधामे शोरतीश्वरः ॥ ३४॥ गौरीगर्भेश्वरश्चैव ब्रह्म
गर्भेश्वरस्तथा ॥ रत्नादौ रत्नगर्भेशो विंध्ये शो वैद्यपर्वते ॥ ३५॥ कंदर्पेशश्च सर्पेशो गोवर्धनगिरौ स्थितौ ॥ प्रातार्येशः ताम्रकेशः शिखंडीशो गतावुभौ ॥ ३६॥
प्रभामंडलकेशश्च विधामेशश्वरेश्वरः ॥ तोयकेशः शिवगिरौ हीरकेशः शिखंडिके ॥ करंजपर्वतगताः तांम्रभूमौ पिलिप्पिलः ॥ ३८॥ डंडरीशः तुंडरीशो
गह्वरे पर्वते स्थितः ॥ ३९॥ स्वर्णवेत्रधरश्चैव शक्तिशो मेरुमौलिगः ॥ देवेश्वरो देवकूटे वृषभेशो वृषाचले ॥ १४०॥ ककुद्मतीश्वरश्चैव ककुद्मेति स्थितः शि
वः ॥ कपालेशः पीलगिरौ चित्रघंटे नगेश्वरः ॥ ४१॥ वध्राणसेश्वरश्चैव दंडपाणीश्वरस्तथा ॥ भाडेगिरौ भद्रवेशः मंदरे सुंदरेश्वरः ॥ कलशेश कुलालेशौ केला
से दक्षिणे स्थितौ ॥ मनस्वीशगणेशानौ हरिद्वर्णनगस्थितौ ॥ ४३॥ वासंतिकेशो वंदेशो गतीशो अरुणेश्वरः ॥ तेनेशो वातभंडेशः कुमुदे कुमुदेश्वरः ॥ ४४॥
वातेशो धनदेशानो वीतिहोत्रेश्वरस्तथा ॥ वानूलेशः पन्नगेशः करंभीककुटेश्वरः ॥ ४६॥ बकेश्वरः सारसेशः शाकेशो गंधपर्वते ॥ सुनाभे पर्वतवरे सु
नाभेशः नथेश्वरः ॥ कर्मारिपर्वतवरे कर्मारीशः स्थितः शिवे ॥ क्रौंचे क्रौंचेश्वरो देवि हारिते हारिकेशकः ॥ वन्हिशैले च वन्हीशो मलये मलयेश्वरः ॥ वेतसे
वेतसेशानः वृषभे वृषभेश्वरः ॥ कपालमोचनः कांते रोहिते रोहितेश्वरः ॥ १५०॥ कंधरे कंधरेशानः विद्युते वैद्युतेश्वरः ॥ विभांडे भांडवीशानः कर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मर्देसनातनः॥५१॥तुङ्गिडे कोंडकेशश्च चंद्रेशश्चंद्रपर्वते॥विनंदिनेसुनंदीशः कणवाद्रौ कणेश्वरः॥५२॥स्तेतेप्रधान्यतः शैलाविगाढ
येमहार्णवे॥तन्मोलिलिंगान्येतानिदृष्टान्यघहराणिमे॥५३॥नदीनदसमुद्रे बुद्धीपेबुद्धीपकेश्वरः॥तवपीठान्यनंतानिपंचाशत्तेषुमुख्य
तः॥५४॥तन्नामानिवदाम्यद्य शृणुष्वकमलानने॥मणिद्वीपंचकैलासमविमुक्तेचमंगला॥५५॥सनातनेसिनीवालीभद्रे भद्रवटे
श्वरी॥कालंजरेजरादेवीजज्वालेजालकेश्वरी॥५६॥ओंकारेकामदादेवि पर्जन्यागोमतीतटे॥विपाशापाशमथिनीमायापुर्यांचमेन
का॥५७॥कलावतीकालशैलेमरुद्धामरुधामनि॥ज्वालामुखीप्रभासेत्वंकान्यकुब्जेचकंन्यका॥५८॥कोकामुखेदेविकात्वंसहज
न्याघ्रतादने॥पार्वतीरमणेशैलेतुंगायांतुंगकाशिवे॥५९॥पणादनेवेगवतीरुद्रकोटेमहेश्वरी॥गोढकेगोमतीदेवि वनेशेरमणी
३१७ मणिः॥तालजंघेखंडकेशीदुर्दरेत्वमरावती॥प्रसादिनीप्रसन्नास्येगारुडेगारुडेश्वरी॥६१॥अनंतेनंतशक्तिस्त्वंसिंहलेसिंहवाहिनी॥
चंदलेचंदलादेवीवदर्यांकांतिदायिनी॥६२॥विरजेवीतशोकात्वंकलिंदेकालिकाशिवा॥महेशीत्वमरावत्यांनंदिनीगोनकेस्मृ
ता॥६३॥तेजोवतीकरंभाख्ये कंकोलेलकुलीश्वरी॥दुर्गादुर्गाकरक्षेत्रेभूर्पारेश्रुद्रकास्मृता॥६४॥संमोदिनीअग्निशैले कामठेत्वभ्र
सन्निभा॥हेलावतीकुरुक्षेत्रेसिद्धिदायुष्यकेशिवे॥६५॥वैद्यनाथेवेगवतीकमलेकमलावती॥नैमिषेनिमिषादेवीकुणिभद्रेचकुं
जिका॥६६॥गंधर्वीगंधशैलेत्वंवरास्यात्वंहराचले॥तद्धौलेकालशमिनीरुद्राणीस्थानपीठके॥६७॥आनर्तेत्वमिलादेवीक्षमाया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ त्वक्षमावती ॥ नैमिषे निमिषा देवी कुणि भद्रे च कुंजिका ॥ ६८ ॥ विंध्ये त्वं कौशिकी देवी बंधने बंधमोचनी ॥ वटारण्ये सया देवी सोमेंद्रे सोम महा० ९०
१३९ मस्तका ॥ ६९ ॥ विजया विजयापूर्यां प्रतिष्ठाने च कन्यका ॥ वेगा त्वं वैनतेशैले बृहती धातुशैलके ॥ १७० ॥ तुंगाचले तुंगकुचा विमनस्का विरा अ० ४९
जके ॥ हालाहले हलस्या त्वं कंदर्पे दर्पनाशिनी ॥ ७१ ॥ कुणि कुंभे महादेवि भद्रदा कनकाचले ॥ कुरंगलोचना रंगे शांतांगे शांतिदायिनी ॥ ७२ ॥
मेघमाला मेघगिरौ लौं वरबिंदुरूपिणी ॥ कुड्यांपि चंडिका देवी मौसले मुसलेश्वरी ॥ ७३ ॥ तुलजा तुलजापुर्यां महादेवे च शांभवी ॥ भै
रवी भैरवे पीठे त्रिकोणे त्वं त्रिकोणगा ॥ ७४ ॥ ललिता ललितापुर्यां श्रीशैले भ्रमरांबिका ॥ राजेश्वरी राजपीठे कौथुमी कुथमेश्वरे ॥ ७५ ॥ वा
मना त्वं वेगिकायां महेंद्रे चंद्रपूजिता ॥ गतिदा तारणे प्रोक्ता शरणे शरणांबिका ॥ कोसले सालमथना हिमशैले च चंडिका ॥ नग्निका
कोटिकायां तु करंजे करमर्द्दिनी ॥ ७७ ॥ गर्भेश्वरे त्वं गर्भेशी कुनंदे नंदिमोदिनी ॥ वायव्ये त्वं भगाक्षी च विशालाक्षी कहलके ॥ ७८ ॥
दध्यादने भीमका त्वं वनवासी च वन्यका ॥ गोनर्दे पर्णिका देवी कांतिपुर्यां च कांतका ॥ ७९ ॥ समासीना मेरुमौलौ कदंबे बिंबरूपिणी ॥ मंदरे
सुंदरी त्वं च चित्रशैले विभूतिका ॥ १८० ॥ क्रौंचारण्ये स्कंदमाता गणमाता गणेश्वरे ॥ लोकिने लोकमाता त्वं कोलापुर्यां च कोलिनी ॥ ८१ ॥
पद्मगर्भे च पद्मा त्वं विरागा मास्यके शिवा ॥ कूर्मग्रीवा हयशिरे भेरुंडे भंडनाशिनी ॥ ८२ ॥ उपांग पांगिका देवी हस्तिशैले च हस्तिका ॥ गोक
र्णे शितिकंठा त्वं कांच्यां त्वं कामकोटिका ॥ ८३ ॥ हालास्ये श्यामला देवि विशाला गंधमादने ॥ मलये त्वं भगवती विनाशे कलिकास्मृता ॥ ८४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महेंद्रेचारुचंद्रांकाकनकेकमलेश्वरी॥ एतानिदिव्यपीठानि तत्र सिद्धिप्रदानिच॥८५॥ चेरचोलेषु पांड्येषु लिंगानि श्रृणु
मेंबिके॥ सह्यजाताम्रपर्णीचिपंपावेगवतीतटे॥ आम्रासंगे मत्स्यवत्याः तटे परमपावने॥ सह्यमौलौ सह्यकेशः सिंहे च शितिकं
ठकः॥८७॥ त्रिणज्योतीश्वरश्चैव शिवेमरतकाचलः॥ रत्नाद्रिशिखरेशानः मातृभूतेश्वरस्तथा॥८८॥ पंपातटे तथा कांचीर
काम्रेशोमहेश्वरः॥ श्रीमद्दक्षिणकैलासे कालहस्तीश्वरस्तथा॥८९॥ चेरेषु च श्रीगिरिराट् श्रीशैलेशश्च तत्र हि॥ शिखरेशः
पनस्येशो घंटाकर्णेश्वरस्तथा॥९०॥ तत्तीर्थेशो महादेवि स्मरणान्मुक्तिदायकः॥ त्र्यंबकश्च महाशैलः यस्माद्गोदावरीनदी
॥९१॥ शेषाचले कुमारेशः अरुणाद्रिनगेश्वरः॥ वृद्धाचलेशो गोभद्रो गोपर्वतशिरोगतः॥९२॥ शिवे मार्गसहायेशः श्रीमदभ्रस
भेश्वरः॥ मूलस्थानेश्वरस्तत्र दर्शनादेव मुक्तिदः॥९३॥ चेरेषु प्रथिताह्येते शिवक्षेत्राण्यपि क्रमात्॥ चोलेषु दिव्यलिंगानामनु
३२० नुक्रममिहोच्यते॥९४॥ शिवे पंचापगेशाख्यः वटेशो थद्भुतीश्वरः॥ घृतेश्वरः पुष्पकेशः तंजेशो वेददिकेश्वरः॥९५॥ श्रीप्रयाणे
श्वरो देवी ऐरावतगजार्जितः॥ श्रीरिपीशः सुंदरेशो कुंभेशश्चार्जुनेश्वरः॥९६॥ तेजनीशः साक्षिनाथो बिल्वारण्येश्वरस्तथा॥
दुर्गेश्वरः भीमकेशो वैद्येशो ब्रह्मकेश्वरः॥९७॥ घंटेश्वरश्च चेतेशो छायावनमहेश्वरः॥ श्रीवांछीशः त्रिकोटीशो मंगलेशोग्नि
केश्वरः॥९८॥ कमलालये वल्मिकेशः आनंदेशश्च पार्वतः॥ हाटकेशश्च सिद्धेशो तत्र देव्यचलेश्वरः॥९९॥ तथा वेदवनेशश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११
१४०

सेतौ रामेश्वरः शिवः॥ चोलेषु प्रथिताश्चैते तथान्यदपि शंकरि ॥२००॥ सर्वलिंगालयश्चोलः सह्यजातीरसंगतः॥ तौंडीरे च श्रुचीं

मह०१०
अ०४५

ड्रेशः पापनाशस्तथांबिके॥१॥ अर्जुने श्व(ज्ञः)स्थाणवीशो हस्तिशैलेश्वरस्तथा॥ तथा वेगवतीतीरे पांड्ये हालास्यशंकरः॥२॥ तथा वे

शालिवाटीशः शिवे चांम्रातकेश्वरः॥ शिवे दक्षिणगोकर्णो मत्स्येशो भरतेश्वरः॥३॥ शिवे वातपुरेशश्च तथा रत्नसभेश्वरः॥ तथा चि

त्रसभेशश्च उग्रेशश्चाम्रतेश्वरः॥४॥ एतत्प्राधान्यतः प्रोक्तं ताम्रपर्ण्यास्तटे शिवे॥ एतेषु क्षेत्रवर्येषु स्थितो भस्मविभूषणः॥५॥

देहांते शिवसायुज्यं भवत्येव महेश्वरि ॥ नरवः पशवः कीटाः मृता यांत्यपुनर्भवः॥६॥ वसन् पठेदिदं स्तोत्रं तेषु क्षेत्रेषु शैलजे॥ ॥

श्रीईश्वर उवाच॥ ॥ कंजाक्षकंजासनजातशिक्षं वाहीकृतोक्षमनलाक्षविषाघभक्षं॥ सिंधुक्षितां तकभगाक्षहरं सुरक्ष दी

क्षापहं भजत भिक्षितमोनिपक्षं॥७॥ यक्षप्रियं त्वसमहकृक्षतकुक्षिवाह कुक्षिस्थकक्षमिवधुक्षिततक्षकांगं॥ ऋक्षेशमौलि

बलिनंदन चंदनादि स्रक्कुचंदनार्पितपदं क्षपजामि मीडे ॥८॥ विश्वंभराभरणभूषण मारकालसंशोषण प्रमथनाथ सनाथया

स्मान् ॥ सर्गस्थितिप्रलयकारणतारणाद्य शंभो पदाब्जयुगलं शरणं प्रयामि॥९॥ विश्वोदयस्थितिविनाशन हेतुभूत भूतादि

कार्यकरणाधिपकारणेश॥ श्रीव्योमकेश हरिकेश महेश शंभो कोशावकाश परमेश नमो नमस्ते ॥२१०॥ अंबाकदंबसुमसन्नि

भचारुबिंबां बिंबोपमाधरवरां सुबृहन्नितंबां॥ लोलिंबराजितकुचां प्रणताद्य सर्वे हेरंबमुख्यजननीं नतसत्कदंबां॥११॥ देशे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वेतेषु शैलप्रवरनदनदीसंघमेसिंधुसंधौ॥ जातानत्युत्तमानिप्रथितवहुफलान्येवदातुंस्थितानि॥१२॥आलोकानांसु
राणांनरमुनिसुकृतापारपुर्याकुराणि॥ पद्भ्याघप्रथिते क्षणेनमनसा लोकनेनाघधन्येजन्यानांफलमेतदेवगिरिजे म
न्योन्यचान्योजनः॥यत्रत्रिनेत्रपदपंकजमित्रभावो भस्मात्रगात्रसुचरित्रपतत्रवाहः॥क्षेत्रेषुवासमभिरोचयतेसतत्र
श्रीपद्मपूजनपरः सुकलत्रमदक्षिपात्रः॥२१४॥ ॥इतिश्रीशिवरहस्ये महादेवाख्ये एकादशांशे शिवगौरीसंवादे स
र्वक्षेत्रप्रभावकथनंनाम एकोनपंचाशतोध्यायः॥४९॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥
श्रीशिवउवाच॥ ॥सर्वेषामेववर्णानांशिवाश्रमनिषेविणां॥शिवधर्मामयेवोक्ता धर्मकामार्थमुक्तये॥१॥ब्राह्मणः
३२/ क्षत्रियोवैश्यः स्त्रीशूद्रोवाशिवाश्रमी॥ब्रह्मचारीगृहस्थोवा वनस्थोवाथभिक्षुकः॥२॥स्वाश्रमात्पीरतः कुर्यात् पुष्पाराम
मंसुशोभनं॥आग्नेयामग्निकार्यार्थं मैशान्यामीश्वरालयं॥३॥सुदेशासंभवेकुर्याद्यत्रस्यात्संभवोभुवः॥गृहस्यदक्षि
णेकुर्यादतिथ्याभ्यागतालयं॥नैरृत्यांचविहारार्थं वारुण्यामुदकश्रियं॥वायव्यांधान्यसदनं कौवेर्यां भांडकुंडकं॥५॥
त्रिसंध्यमर्चयेदेव मग्निकार्यंच भक्तितः॥द्विकालमेककालंवा पूजयेल्लिंगमेश्वरं॥६॥असंपूज्यशिवंमोहान्नभुंजीया
त्कदाचन॥अन्यानिशिवकर्माणि यथाजोषंसमाचरेत्॥शिवलिंगार्चनंश्रेष्ठं तेभ्यःसारमनुत्तमं॥एषएवपरोधर्म एतदे

शिवर०हृ०५१ वपरंतपः॥८॥एष एव महायज्ञा स्तद्दानं परं मतं॥प्राणा॥त्ययेधन त्यागे मरणे गदपीडिते॥९॥अनुकम्पामयैवोक्ताः शिवा महा०९०
१४१ श्रमनिषेविणां॥स्नानाशक्तस्तदादेविभस्मस्नानं समंत्रकं॥१०॥कुर्यात्त्रिपुंड्ररुद्राक्षधारणं वा यथाबलं॥प्रदक्षिणाद्यशक्तोपि अ०५०
चिंतयेच्छिवमव्ययं॥११॥पुत्रेणापूजयेल्लिंगं ततो भोजनमाचरेत्॥कार्याणि पातसंरोधे राष्ट्रविक्षोभणादिषु॥१२॥मनसापू
जयेद्देवं वाचकैर्वा जपादिभिः॥शिवाश्रमाश्रितैरेवं श्रमिभिश्च तदांबिके॥१३॥अयोगी पूजयेल्लिंगे योगी सर्वत्र भावयेत्॥म
नसा वा महादेवं ध्यायेत्सांबं त्रिलोचनं॥१४॥शिवार्थं पुष्पाद्हिंसायां नभवेत्स तु हिंसकः॥यज्ञार्थं पशुहिंसा च न तद्दोषाय कल्प
ते॥१५॥यद्यल्पमपि वान्यार्थे हिंसते स तु हिंसकः॥शिवार्चनपरो नित्यं सर्वहिंसाविवर्जितः॥१६॥सर्वत्र मैथुनाद्धीनो शिवयोगी वसे
त्सदा॥देवतातिथिभैक्ष्यार्थं पचेन्नैवात्मकारणात्॥१७॥आत्मार्थं यः पचेन्मोहान्नरकार्थं स जीवति॥देवार्थं पचनं येषां संतानार्थे
र्थे च मैथुनं॥१८॥धर्मार्थं धनधान्यादि, नरकार्थं विपर्यये॥वित्ततृतीयभागेन कुर्वीतैवं शिवार्चनं॥१९॥कुर्वीत धर्मेष्वेतच्च व्ययं जीवित
मध्रुवं॥न्यायेनोपार्जयेद्वित्तं मद्भक्त्या सर्वसौख्यकः॥२०॥दुःखेनान्येषु यद्वित्तं संपादितमघाय तत्॥यः शिवब्रह्मचारी स्यान्नैष्ठिको
वाजितेंद्रियः॥२१॥गिरिजाहोमकृन्नित्यं तद्रुद्रस्य परिचारकः॥त्रिसंध्यं पूजयेल्लिंगं बिल्वपत्रैः सुमाक्षतैः॥२२॥भैक्ष्यं निवेद्य देवाय सोऽश्नी
याद्भक्तिपूर्वकं॥निवृत्तः सर्वसंगेभ्यो जपेद्रुद्रमनन्यधीः॥सशिव ब्रह्मचारी स्यात् गृहस्थो यः शिवार्चकः॥आधायाग्नीन्यजेद्यज्ञैर्यज्ञे



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रं परमेश्वरं ॥२४॥ पंचयज्ञपरो नित्यं पंचास्यध्यानतत्परः ॥ अग्निरित्यादिभिर्मंत्रैर्भस्मोद्धूलितविग्रहः ॥२५॥ त्रियायुषत्रिपुंड्रांकः
रुद्राक्षपरिमंडितः ॥ त्रिसंध्यमर्चयेल्लिंगं रुद्रपंचाक्षराद्रतः ॥२६॥ स्वाध्यायशीलः सततं संविभाग्यतिथिप्रियः ॥ एवं शिवगृहस्थो
यः शिवलोकं व्रजेत्स हि ॥२७॥ सांगान्वेदान्यथान्यायमधीत्य विधिपूर्वकं ॥ इष्ट्वा यज्ञैर्यथान्यायमग्निष्टोमादिभिः क्रमात् ॥२८॥
ततो विश्वजितं तैर्वा अग्निष्टुत्वाप्तिमेन वा ॥ पुत्रानुत्पाद्य सत्वृत्तान्सदारः साग्निको द्विजः ॥२९॥ वानप्रस्थाश्रमं गत्वा त्रिकालं स्ना
नभस्मधृक् ॥ त्रिपुंड्रमंडिततनुः वन्यैश्च कुसुमैः फलैः ॥३०॥ पूजयित्वा महादेवं त्रिकालं कंदमूलधृक् ॥ चांद्रायणादिभिर्देहं शो
षयन्ब्रह्मचर्यवान् ॥३१॥ ब्रह्मविद्यामधीयानः सदात्यक्तैषणो यतिः ॥ आत्मन्यग्नीन्समारोप्य ज्ञानज्ञेयात्मविद्युतिः ॥३२॥
322 भवेत्स गुरुमासीनं समेत्याप्यभितो व्रजेत् ॥ तेनाज्ञातोऽनुतिष्ठेत धर्ममेनं शुचिः व्रतः ॥३३॥ गुरौ शिवे विनाभावं न कुर्यान्मोहतोपि
वा ॥ कुर्यात्स्नानं त्रिषवणं यतिस्त्यक्तैषणाः शिवं ॥३४॥ पूजयेद्बिल्वपत्रैर्बिल्वैः श्रीरुद्रं प्रणवं जपेत् ॥ त्रिपुंड्रभस्मरुद्राक्षकलितोर्द्ध
दंडधृक् सदा ॥३५॥ काषायवसनो मौनी सदोपनिषदर्थवित् ॥ भैक्ष्यं निवेद्य देवाय भुंजीयाद्ग्रासकाष्टकं ॥३६॥ एवं वसन्वै नियतः
शिवलोकं यतिर्व्रजेत् ॥ शिवक्षेत्रे वसेन्नित्यमविमुक्तेपि वा मम ॥३७॥ तत्र मे तारकं प्राप्य प्रणवं मुच्यते यतिः ॥ अत्याश्रमी भवेद्वा
पि सर्वसंगविवर्जितः ॥३८॥ आपादमस्तकं नित्यं भस्मनोद्धूलितविग्रहं ॥ रुद्राक्षकंठाभरणः शिरस्येव जटाधरः ॥३९॥ त्रिपुंड्रफालः स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ १५२

ततं श्रीरुद्रजपतत्परः ॥ सर्वत्रैव महादेवमात्मानं परीचिंतयेत् ॥४०॥ आत्मारामोऽभितिष्ठेत पुण्यपापविवर्जितः ॥ लिंगं शिवाश्रम महा०ए० अ०५०
स्थानं भस्मना च त्रिपुंड्रकं ॥४१॥ हस्ते मूर्ध्न्युपवीते च रुद्राक्षं धारयेत्ततः ॥ अन्यवर्णाश्रमिभिरेवमेव यथाबलं ॥४२॥ राज्ञोऽपि
पालनं नित्यं धर्मयुद्धं च सन्मुखं ॥ मखादिकरणं चैव शिवक्षेत्रादिपालनं ॥४३॥ भस्मत्रिपुंड्ररुद्राक्षधारणं च शिवार्चनं ॥ त्रिकालं
विभवेनैव रुद्रपंचाक्षरीजपः ॥४४॥ दंड्यानां दंडनं चैव वर्णाद्याश्रमपालनं ॥ ऊर्ध्वपुंड्रधराणां तु देशान्निस्सारणं शिवे ॥४५॥
एवं कुर्वन् शिवाचारं नृपः शिवतनुर्भवेत् ॥ वैश्योऽपि कृषिगोरक्षावाणिज्येज्यादिभिर्युतः ॥४६॥ भस्मत्रिपुंड्ररुद्राक्षलिंगार्च
नपरः सदा ॥ धर्मबुध्याभिजीवेत अकुर्वन्लोकपीडनं ॥४७॥ एवं वैश्यः सदाचारो शिवलोके वसेच्छिवे ॥ शूद्रोऽपि सर्ववर्णानां
शुश्रूषो भस्मभूषणः ॥४८॥ विरक्तश्च शिवागारे वसेत्काषायवस्त्रधृक् ॥ शिवकैंकर्ययुक्तात्मा शिवद्रव्याण्यसंस्पृशन् ॥४९॥
भैक्ष्यवृत्याभिजीवेत लिंगमभ्यर्चयन् शिवे ॥ विरक्ता स्त्री यदि शिवे सर्ववर्णेष्वपि क्रमात् ॥५०॥ काषायवसनोपेता जटिला भ
स्मभूषिता ॥ त्रिपुंड्ररुद्राक्षधरा शिवलिंगार्चने परा ॥५१॥ भैक्ष्येणैवाभिवर्तेत यावद्देहांतमीश्वरि ॥ शिवक्षेत्रे शिवागारे संमार्जन
परायणा ॥५२॥ उपलेपनकर्त्री वा मालाकार्यथवा शिवे ॥ दीपोद्बोधकरी वापि पापैर्मुक्ता शिवं व्रजेत् ॥५३॥ संकीर्णा अंत्यजाः सर्वे
शिवालयविलोकनैः ॥ रथानाकर्षणाद्देवि विमुक्ता भस्मभूषिताः ॥५४॥ रुद्रभक्तैः सदा वर्या रुद्रसंख्याजपशुभाः ॥ भस्मधार्यं प्रयत्ने

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नत्रिपुंड्रोद्धूलनात्मना॥५५॥विधूयसर्वपापानिशिवलोकेमहीयते॥जलस्नानादसंख्यातमाग्नेयस्नानजंफलं॥५६॥वारु
णंमलनाशायभस्मनाऽज्ञाननाशकं॥महापातकयुक्तोवायुक्तोवासर्वपातकैः॥५७॥भस्मस्नानविशुद्धात्माशिवलोकंस
सो० गच्छति॥सोपियांगतिमाप्नोतिनतांयज्ञशतैरपि॥५८॥गंधलेपविहीनोपिभावदुष्टोनशुद्ध्यति॥भावशुध्याभवेत्पूतो
योवाकोवापिमानवः॥५९॥स्नानंवारुणमाग्नेयंदिव्यंवायव्यमानसं॥पंचस्नानानिसर्वेषांविहितानिविशुद्धये॥६०॥वारु
णंचजलेस्नानमाग्नेयंभस्मनाभवेत्॥वृष्ट्यासातपयादिव्यंवायव्यंरजसागवां॥६१॥मानसंध्यानमंत्रादिविहितंशंभु
नाशिवे॥उदकुंभसहस्रेणमृदांनगशतेनच॥भावदुष्टोनशुद्ध्येतशतहायनमप्लुत॥भावपूतंचरेच्छौचंवस्त्रपूतंजलं
३२३ पिबेत्॥६२॥दृष्टिपूतंन्यसेत्पादंसत्यपूतंवचोवदेत्॥जटाकपालपाणिःस्याद्भस्मांगोवीतरागवान्॥६४॥यदेवसर्वधर्मा
णांफलंतत्स्याच्छिवाश्रमे॥शिवाजयोजटीमुंडीभिक्षाशीविगतःस्पृहः॥६५॥मौनीभूतानुकंपीस्याद्यतिःशांतमनाश्चरेत्॥
माधूकरंचरन्भैक्ष्यंएकान्नंपरिवर्जयेत्॥६६॥उपवासात्परंभैक्षंभैक्ष्यान्नंमयाचितात्॥यतिस्तुनियतंभैक्ष्यंशिवक्षे
त्रेवसेत्सदा॥६७॥यःसर्वसंगनिर्मुक्तःभक्तःशिवपरायणः॥योगनिष्ठोप्ययोगोवाशिवक्षेत्रेवसेत्सदा॥६८॥योगीयांगतिमा
प्नोतिदेहांतेतांगतिंव्रजेत्॥वसेदायतनेनित्यंसगणःशिवधर्मवित्॥६९॥पुष्पारामैककर्मात्माबिल्वारोपणकृन्नरः॥एकंवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०११ ९४२ बिल्वजतरुं स्थापयित्वा शिवाश्रमे ॥७०॥ यावंतितत्रकुसुमबीजमूलफलानि च ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥७१॥ त्रिः महा०९.
स्नानपूजासंयुक्तः कौपीनाच्छादनीतथा ॥ वसेदामरणांक्षेत्रे शिवलिंगसमीपतः ॥७२॥ देहिनां तत्र पंचत्वं शिवसायुज्यदायकं ॥ अ०५०
शिवध्यानरताः शांताः शिवलिंगार्चनप्रियाः ॥७३॥ ऋजवो मृदवः स्वस्था अनुकूलाः प्रियंवदाः ॥ शिवाभिमानसंपन्नाः तेशैवाः शि
वसंमताः ॥७४॥ भस्मनिष्ठाः सदा तुष्टा नित्यं स्वागतवादिनः ॥ मैत्रायणाश्च भूतेषु शैवास्त्यक्तैषणाः शिवे ॥७५॥ चापलानि न
कुर्वंति शिवादरवशंगताः ॥ शिवभक्तिः सदा शांतिरहिंसा समदर्शिता ॥७६॥ संतोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टकं ॥ यथासंभव
पूजाभिः सदाशिवकथारतिः ॥७७॥ कर्मणा मनसा वाचा लाभालाभेषु साम्यता ॥ शौचमार्जवसंपत्तिर्भक्तिर्वैसाविभागिता ॥७८॥
दयादाक्षिण्यसंपत्तिः निंदामात्सर्यवर्जनं ॥ हुंकारं तर्जनं चैव वर्जयेच्च शिवाश्रमी ॥७९॥ मद्भक्तेषु सदा प्रीतिरन्यपूजानुमोदनं ॥ स्व
यमभ्यर्चनं लिंगे पत्रपुष्पफलादिभिः ॥८०॥ ममानुस्मरणं नित्यं नामभिश्च सदांबिके ॥ कथाशुश्रूयमाणा सुस्वरनेत्राश्रुपात
नं ॥८१॥ एवं भक्तिः सदा कार्या शिवभक्तेष्वपि क्रमात् ॥ स्वदेहान्निर्विशेषेण शिवभक्तांश्च पालयेत् ॥८२॥ भयदारिद्र्यरोगेभ्यस्ते
षु कुर्यात्प्रियाणि हि ॥ तेषां कुटुंबं संरक्षेत्स्वकुटुंबं यथा तथा ॥८३॥ शिवस्य परिपूर्णस्य किन्नाम कुरुते नरैः ॥ शिवभक्तार्चनेनैव प्र
सादः शांभवो भवेत् ॥८४॥ यो वा को वास्तु मनुजो भस्मरुद्राक्षदेहवान् ॥ धृतशंकरचिह्नांकः पूज्यो ब्राह्मणजन्मभिः ॥८५॥ शांभवो



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्राह्मणो यः स्याद्भोजनैस्तं प्रसादयेत्॥ इतरान्प्रश्नकथनैः स्थानदानैश्च तोषयेत्॥८६॥ भोजनाच्छादनैर्देवि तस्येष्टं यदकुत्सितं॥
तत्कुर्यादविचारेण शिवप्रीत्यै च शांभवे॥८७॥ यतिं वा शांभवं शांतं भस्मपुंड्रादिमंडितं॥ स्वागतासनपाद्यार्घ्यमधुपर्कनिवेदनैः॥
॥८८॥ पूजयित्वा यथान्यायं कुर्यादप्यभिवादनं॥ भोजनाच्छादनेनापि रम्यावसथवासनैः॥८९॥ मठोपकरणादीनि दद्यात्प्रीत्य
र्थमीशितुः॥ प्राप्ताय शिवभक्ताय श्रांताय क्षुधिताय च॥९०॥ तुष्टिं करोति यो नित्यं धनधान्यैश्च वाससा॥ गृहोपकरणैर्देवि शां
भवं वासयेत्तु यः॥९१॥ गोमहिष्यादिसंभारैः वासयेद्यः शिवे रतं॥ वर्षकोटिसहस्राणि वासः कैलास सद्मनि॥९२॥ शिव
भक्ताय विप्राय पुराणज्ञाय सादरं॥ दत्त्वा शैवपुराणानि यावदक्षरसंख्यया॥९३॥ तावद्वर्षसहस्राणि शिवलोके महीयते॥
३०७ दीनं भीतं तथैवार्तं श्रांतं चोरैः प्रपीडितं॥९४॥ आश्वासयति भक्तं मे शक्तो भक्तो थमे प्रियः॥ दारिद्र्यार्णवनिर्मग्नं भक्तं सीदत्
कुटुंबकं॥९५॥ समुद्धरेन्नृपो ज्ञात्वा स्वराज्ये वासयेच्च तं॥ स नृपः स्वपितॄन्मग्नान् रज्जुः कूपाद्घटं यथा॥९६॥ नरकाच्चोद्धरत्ये
व शिवभक्तजनार्चनात्॥ देयं त्रिपुंड्रफालेभ्यो तद्दानं सात्त्विकं विदुः॥९७॥ नाभ्यसूयेत तान्छैवान् त्रिपुंड्रांकान्द्विजोत्तमान्॥
७० यद्यसूयेच्च नरके पतेत्पूर्वपितामहैः॥९८॥ त्रिपुंड्रधारिणे दत्तं दानं भवति चाक्षयं॥ दातृप्रगृहीतॄणां नैव दोषोस्ति दानजः॥९९॥
स्वशक्त्यैव च भक्तेभ्यो दद्यात्किंचिदकुत्सयन्॥ कारुण्यात्सर्वभूतानां देयमन्नं स्वशक्तितः॥१००॥ अभावे तृणभूम्यंभः पत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०११ मूलफलानिच॥दत्वाधनीनिर्धनोवाप्रियंवाव्याहरेत्सदा॥१॥नेदृक्स्वर्गसोपानममलंयत्प्रियंवचः॥प्रत्युत्थानाभिग महा०१:
१४४ मनमनुव्रज्यप्रियंवचः॥२॥पूर्वाभिभाषीभक्तेषुभवेन्मत्प्रीतयेशिवे॥गमनेचास्यवक्तव्यंपंथानःसंतुतेशिवाः॥३॥शिवं अ०५०
भवतुतेनित्यमशेषार्थप्रकाशकं॥आशीर्वादमिमंकुर्यात्सर्ववर्णेषुसर्वदा॥४॥नमस्काराभिवादेषुस्वस्तिमंगलवादिने॥
शिवंभवतुयुष्माकंप्रब्रूयात्सर्वदाशिवे॥५॥सुद्विजोऽप्यात्मजोज्ञेयःसएवकिलजारजः॥शिवयोगीशिवज्ञानीशिवधर्मर
तश्चयः॥६॥इत्येतत्त्रिविधंज्ञेयंपात्रंदानायसर्वदा॥शिवमुद्दिश्यदातव्यमनपेक्ष्यगुणागुणं॥७॥यतस्त्रिनेत्रःपात्रं
स्यात्सर्वपात्रवरंशिवे॥दत्तमीश्वरभक्तेषुदत्तंतद्वर्धतेऽनिशं॥८॥द्विजानांवेदविदुषांकोटिभोज्येतुयत्फलं॥यतयेवीतरागायभि
क्षादानेनतत्फलं॥९॥संभोज्यैकंशांभवंवाशिवक्षेत्रेविशेषतः॥दशकोटिद्विजानांतुभोजनेतत्फलंभवेत्॥१०॥साज्यापूपघृ
तक्षीरसूपशाखादिपायसैः॥ग्रासंवाशांभवेविप्रेदत्तंतेभ्योविशिष्यते॥११॥बिल्वमूलेशांभवायक्षीरान्नंभोजयेन्नरः॥
शिवभक्तोयदाभुंक्तेसाक्षान्भुंक्तेसदाशिवः॥१२॥शिवभक्तान्द्विजश्रेष्ठान्यःश्राद्धादिषुभोजयेत्॥आपांक्तेयानथाऽन्यान्वै
तारयंत्येवतेद्विजाः॥१३॥पितॄणामक्षयातृप्तिःभवेद्वर्षसहस्रकं॥तस्माच्छ्राद्धेश्रद्धयैवभोज्याःशांभवसत्तमाः॥१४॥शिवमुद्दि
श्यभोक्तव्याःशिवभक्ताहिपर्वणि॥असंयतःसंयतोवासर्वावस्थांगतोऽपिवा॥१५॥योवाकोवाशिवेभक्तःशिववत्पूज्यएवसः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मान्मा: न्यश्च पूज्यश्च रक्षणीयश्च सर्वदा ॥१६॥ संपर्कादथवा लोभात् यो वा लिंगं प्रपूजयेत्॥ नाममात्रप्रपन्नोपि
लिंगं कंठेऽपि वा शिवे ॥१७॥ स मुनिः स महायोगी स तपस्वी जितेंद्रियः॥ नास्याचारं परीक्षेत न कुलं न व्रतं तथा ॥१८॥ वि
द्वानविद्वानथवा मलिनो वृद्धकः कृशः॥ न शिवाश्रमिणो मौंजी न दंडो न कमंडलुः॥१९॥ न शिखा न जटा शाखा उ
पवीतमथापि वा ॥ बाह्याभ्यंतरचिन्हैस्तं जानीयात्पूजयेत्तथा ॥१२०॥ भस्मत्रिपुंड्रुद्राक्षपरिमंडितविग्रहं॥ पूजये
त्सर्वभावेन मनसा वचसा शिवे ॥२१॥ सर्वदेवादिभक्तेभ्यो मम भक्तो विशिष्यते ॥ मद्भक्तायसदादत्तं मयि दत्तं ह्रितं ध्रु
वं ॥२२॥ रुद्रास्त एव जगति रुद्राक्षवरकंकणाः॥ ये रुद्राध्यायपारज्ञास्तत्तन्मामार्थवेदिनः॥२३॥ त एव रुद्रा जगति भुवः
३२९ पावनपावनाः॥ येपंचाक्षरपारीणाः पंचास्यध्यानमानसाः॥२४॥ पंचपातकनिर्मुक्तास्ते रुद्रा नात्र संशयः॥ ये प्रदोष
महापूजा प्रवर्तनपरायणाः॥२५॥ बिल्वपत्रादिभिर्देवि पंचामृतनिषेचनैः॥ त एव रुद्रा विज्ञेया नात्र कार्या विचारणा
॥२६॥ ये सोमवारे नक्तेन भक्ता वर्तंति नित्यशः॥ त एव रुद्रा विज्ञेयाः॥२७॥ ये चतुर्द्दशि पूजासु नियमान्नक्तभोजनाः॥
त एव रुद्रा विज्ञेयाः॥२८॥ ये वा कालाष्टमीष्वेवं शिवपूजापरायणाः॥ त एव रुद्रा विज्ञेयाः॥२९॥ ये पर्वपूजानिरताः शि
वलिंगे शिवात्मके॥ त्रिकालमप्रमादेन पूजयंति दृढव्रताः॥१३०॥ शिवभक्तेषु नियतं दानाच्छादनभोजनैः॥ पूजयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ ९६५ तिनराये वै ते वै रुद्रा न संशयः॥३१॥ अशेष पाप निर्मुक्तः शिवलोके महीयते॥ शिवक्षेत्रेषु नियतं ये वसंति द्विजातयः॥३२॥ महा० ए० अ० ५०
ते वै रुद्रा इति प्रोक्ताः सदा शर्वार्चने रताः॥ आस्वेद मतियत्नेन ये प्रणाम कराः शिवे॥३३॥ त एव रुद्रा विज्ञेयाः नात्र कार्या वि
चारणा॥ प्रदक्षिणा परा ये वै नमस्कारं पदे पदे॥ त एव रुद्रा विज्ञेयाः नात्र कार्या विचारणा॥३४॥ लिंगाग्रे नर्त्तन पराः त्रिकालं
सावधानतः॥ त एव रुद्रा विज्ञेया नात्र कार्या विचारणा॥३५॥ शिवस्तव परा ए वै त्रिकालं सावधानतः॥ त एव रुद्रा वि०॥३६॥
सदा शिव कथासक्ताः सर्वदा नियमा द्विजाः॥ त एव रुद्रा वि०॥३७॥ ये मन्नाम जपासक्ताः सर्वदा सावधानतः॥ त एव रुद्रा वि
ज्ञेया नात्र कार्या विचारणा॥३८॥ निवसंति सदा ये वै अविमुक्ते महेश्वरि॥ नियता नियमोपेतास्ते रुद्रा नात्र संशयः॥३९॥
यः सर्वसाक्षिणं सांबं महादेवं सनातनं॥ सर्वोत्कृष्टतया वेद स रुद्रो नात्र संशयः॥१४०॥ पराशक्तिं महादेविं सर्वमंत्रमयीं
शिवां॥ सर्वोत्कृष्टतया वेद ब्रह्माविष्णोर्विमुक्तिदां॥४१॥ स एव गणपः श्रेष्ठः स एव हि द्विजसत्तमः॥ यो वा ब्रह्मादि तुल्यं
मां वेद चाब्राह्मणो हि सः॥४२॥ यो मां विष्ण्वादिभिस्तुल्यं वेद चाब्राह्मणो हि सः॥ सोमोऽहं सर्वजनिता ब्रह्मविष्णुहरात्मनां
॥४३॥ यमशक्रानिलानां च वन्हेश्च जनिता शिवे॥ योन्य तुल्यतया वेद सोंत्यजो हि द्विजोपि सन्॥४४॥ यो मां विश्वाधिकं
रुद्रं महादेवं सनातनं॥ योन्य तुल्यतया वेद सोंत्यजो हि द्विजोपि सन्॥४५॥ मन्ने वेद्यसुधास्वाद रहिताः पाप योनयः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भासुराचारनिरता भूसुरा अपि रासभाः॥४६॥ नद्दृतिनिंदयोऽन्योन्यं ते गार्दभखोपमाः॥ वितर्क कुशलास्ते वै दोषज्ञा ये कृतघ्न जाः॥४७॥ शिवपादांबुजद्वंद्वं पूज्यं बिल्वविवर्जिताः॥ निर्गंधा घ्राणहीनास्ते तेताः र्पकनरोपमाः॥४८॥ वानराकृतयः सर्वे पामरा जारजा इति॥ शिवधर्मोज्झिताये वै जारजास्ते नराधमे॥४९॥ मूलमृडार्चनाहीनाः हीनजातास्तएव हि॥ शिवज्ञानविहीनानां वृथा जन्म न संशयः॥१५०॥ सर्वेषामपि तीर्थानां ज्ञानतीर्थं परं स्मृतं॥ ज्ञानतीर्थात्परं तीर्थं यत्पुण्यं क्षांतिवारि
326 णा॥५१॥ ज्ञानयोगः स्तपो जप्यं यज्ञदानादिसत्क्रियाः॥ क्रोधिनस्तु वृथा यस्मात्तस्मात्क्रोधं विवर्जयेत्॥५२॥ मर्मास्थिप्राणहृदयं निर्दहेदप्रियं वचः॥ अवाच्यमप्रियं यस्माच्छिवभक्तैर्विशेषतः॥५३॥ क्षमा दानं दमः सत्यं हिंसा पैशुन्यवर्जनं॥ निर्मलक्षांतिशलिलैर्लोकमाल्हाधशीतलैः॥५४॥ इह सौख्यमवाप्नोति परत्र च शुभां गतिं॥ सर्वशास्त्रेश्च वेदैश्च सर्वयज्ञैश्च यत्फलं॥५५॥ यो न हिंस्यति भूतानि तस्य पुण्यं ततोधिकं॥ त्रैलोक्यमपि यो दद्याद्दरिविलं रत्नपूरितं॥५६॥ चरेत्तपांसि कृच्छ्राणि न तत्तुल्यमहिंसया॥ यथाकालोपपन्नेन कृतन्यायागतेन च॥५७॥ उत्पन्नार्थेन यस्तोषः संतोषः स उदाहृतः॥ तेन सर्वमुखेनेष्टं तेन सर्वमनुष्ठितं॥५८॥ येन तृष्णा परं त्यक्तं संतोषी स्वस्तिमान्वसेत्॥ परपीडादिनिर्मुक्ताः दंभालस्य विवर्जिताः॥५९॥ ये शिवं शरणं प्राप्ता न ते दुःखस्य भाजनं॥ ये वाके वा सदा देवं स्मरंति परमार्थतः॥१६०॥ ते सर्वे दुःखनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ मुक्तादुर्गाण्यपितरंतिते॥ अन्येतुपशवः सर्वे शिवधर्मविवर्जिताः॥६१॥ सत्यंसत्यं महादेवि न मुक्तेः पात्रमुत्तमं॥ ब महा०२० 
१४६ ह्मायासकराधर्माः सर्वे शर्वार्चनोज्झिताः॥६२॥ तेवैमलाशिनः सर्वे भवंतिनरकोज्झिताः॥ इतिपंचप्रकारोयंशिवधर्मः अ०५०
प्रकीर्तितः॥६३॥ आपातितोह्ययंयस्मात्शीघ्रमेवप्रणश्यति॥ ॥ईश्वरउवाच॥ ॥अयमंशोविवेकेसाक्षात्सा
रासारउदाहृतः॥ मथित्वाशिवरत्नाब्धौतद्विहृदिगोप्यतां॥६४॥ नाभक्ताया प्रशांताय देयोयंशिवयोगिने॥ भ
क्तेष्वेवप्रदातव्योप्यपात्रंनरकंलभेत्॥६५॥ महादेवाख्ययाप्रोक्तोमुक्तयेसर्वदेहिनां॥ श्रवणादस्यपापानिनश्यं
तिविविधानिच॥६६॥ यान्यान्प्रार्थयतेकामान्मद्भक्तोलभतेचतत्॥ बहुनात्रकिमुक्तेन श्रवणान्मोक्षमाप्नु
यात्॥६७॥ तस्माद्भक्तैः सदाश्रव्यः शांभवादेव केवलं॥ सर्वःतरतुदुर्गाणिसर्वोभद्राणिपश्यतु॥६८॥ सर्वःसुगतिमा
प्नोति सर्वस्यापिभवेच्छिवं॥ ॥श्रीस्कंदउवाच॥ ॥प्रणमतवतदुःखंनास्तिवःपापभीतास्तरुणशशिललामंसो
ममाशुप्रयात॥ शरणमरुणपादंकारणंतारणंवः प्रथितभवभवाब्धेः दारणंपातकानां॥६९॥ अंशोमहेशकथितःशशि
धामचूड लिंगाभिषेकमहिमास्वतुलःकिलायं॥ ख्यातोमहादेवश्रुतिप्रसिद्धसिद्धांतिराद्धांतितवाक्यजालः॥१७०॥ न
त्वास्तुत्वामहेशं निगमसुगमवाक्पारसारंप्रहृष्टं श्रुत्वाकृत्वागुरुंतंश्रुतिशिखरमहावाक्यसारार्थविद्यं॥ भूत्वाभक्तिपरेण

२३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०११ चेतसपैरैर्ध्यात्वा शिवंपा(या)ततं॥त्यक्त्वामानुषमध्रुवंजनुरहोयात्येवशंभोःपदं॥ताराराथसहोदरापतिकृतापादा महा०९०
१४७ रविंदार्चनाद्वारातुष्टहरंतंरपुरहरं विश्वेश्वरं शंकरं॥भास्वद्भास्करकोटिसन्निभसहस्रारप्रदंविष्णवे दैत्योघप्रहरं अ०५०
हरंत्वघहरं चेतोभजस्वांतरं॥१७२॥ ॥इतिश्रीशिवरहस्ये एकादशांशे महादेवाख्ये भक्तिमहिमानामपंचाशत्तमोऽ
ध्यायः॥५०॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीमहादेवायनमः॥ ॥श्रीमङ्गलामूर्त्तयेनमः॥ ॥
श्रीविश्वेश्वर अन्नपूर्णा काशि कालभैरवार्पणमस्तु॥ ॥(श्रीविक्रमीयसम्वत१९८५शाक१८५०चैत्रकृष्णा ६
327 शनिवासरे श्रीसर्वेश्वरसन्निधौ शिवरहस्यएकादशांशसमाप्तम शुभंभूयात॥) ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्रीः॥

॥ इतिश्रीशिवरहस्य एकादशांश संपूर्णम् ॥ ६ ॥

॥ इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३२३

॥ अथ शिवरहस्य द्वादशांश प्रारंभः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्रीगणेशायनमः॥ ॥श्रीगौरीशंकरायनमः॥ ॥भवांतकसभापतिं यसुतेभवक्रं प्रभाविभासित
विभावरीरमणखंडशुंडोज्वलम्॥सदामदसुगंडधृग्विविधविघ्नषंडापहं भजाम्यभयहेतवेशिवकथासु
संपत्तये॥१॥ ॥श्रीसूतउवाच॥ ॥ततःसतारकारातिं पुरारातिप्रसादभाक्॥जैगीषव्यस्तदानत्वा
पुनः पप्रच्छषण्मुखम्॥२॥श्रुत्वाशिवकथासारमभिषेकमहोदयम्॥ ॥ऋषय ऊचुः॥ ॥
किं पृच्छत्तदासूतजैगीषव्योमहामुनिः॥षण्मुखंतारकारातिं पुरारातिकथानकम्॥३॥तन्नस्त्वंश्रद्दधा
नानांसमाधानेनचेतसा॥वक्तुमर्हसिशिष्येभ्योविशिष्यशिवसत्कथाः॥४॥ ॥सूतउवाच॥ ॥
शृणुध्वंसत्रिणःसर्वेप्यपर्णापतिवैभवम्॥स्कन्देनानन्दमनसा जैगीषव्यायपृच्छते॥५॥यदुक्तं तत्
३२१ कथासारं तद्वदामिमुनीश्वराः॥एकादशांशं श्रुत्वैवंमुनिर्नत्वाशिवासुतम्॥६॥सुब्रह्मण्यंपुनर्नत्वाग
णैर्मुनिगणैःसुरैः॥ब्रह्मविष्ण्वादिविबुधैः पृच्छतिस्मकथानकम्॥७॥ ॥जैगीषव्यउवाच॥ ॥
नमोनमस्तेसेनानेदीनावनशिरोमणे॥द्युमणिद्युतिसंकाशमुकुटोद्भासिमस्तक॥८॥द्वादशामत्नेनाजह
रहासैकषण्मुख॥भवभक्तान्कथासक्तान्व्यक्तं शंभोःकथारसैः॥९॥संप्लावयकथावर्षैः भक्तितर्षान्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्यश्रुसुहर्षितः ॥ मुनीन्सुरगणेन्द्रांश्च वीरान्द्रुमहामते ॥१०॥ जैगीषव्यवचः श्रुत्वा मोचामदसुधिक्कूरम् ॥ मारमारात्मजोविप्रमुवाच प्रणतंपु ईशाना॰ध्या॰

७ रः ॥११॥ हर्षप्रवृद्धमनसासुरसायनमुत्तमम् ॥ द्वादशांशमिदं दिव्यं स्कंदशोऽऽहहरात्मजः ॥१२॥ ईशानखंडयामेहशोक्तं श्रृण्वतांसौख्यदा अ॰१

यकम् ॥ प्राहतत्र मुदायुक्तः सुव्यक्तकलयागिरा ॥१३॥ त्रिनेत्रसुपवित्रार्थचरित्रं सत्रिणस्तदा ॥ ॥सुब्रह्मण्य उवाच ॥ ॥जैगी

षव्यमहाभव्यहव्यवाहसमप्रभ ॥१४॥ दिव्यं कथानकं शंभोः नाकिभिर्मुनिभिर्गणैः ॥१४॥ श्रृणवपर्णापतेस्तूर्णं पूर्णं कर्णरसायन

म् ॥ भवार्णवनिमग्नानां संतीर्णतरिमद्भुतम् ॥१५॥ पुराकैलाससदनेमस्तोतकेशहरः ॥ रत्नप्रासादसंबाधेसौधगोपुरमंडिते ॥१६॥

शिखंडितांडवयुते डंबराडंबरैर्युते ॥ उद्यद्भास्करसंकाशविद्रुमस्तंभमंडपे ॥१७॥ नानातरुगणापारफुल्लपुष्पविराजिते ॥ तत्पुष्प

सुन्दरतरपरागावृतमारुते ॥१८॥ नानापक्षिरुतापारनादितानतकंदरे ॥ चन्दनानन्दसुभगगंधमेदुरपूरिते ॥१९॥ पवितारवविसर्वस्व

शर्वरीनाथसमप्रभे ॥ शिखरेरविशहारेशोहरोगौर्यासिसदायया ॥२०॥ सुरद्रुदातरादेवो ददर्शयनत्द्वनस्थलीम् ॥ नानापुष्पतरुछन्नमभ्र

कान्तिनिवारिणीम् ॥२१॥ हरिणीगणसंयुक्तां पतत्पत्रवरैर्युताम् ॥ निमुताप्युतविस्तीर्णां संकीर्णां मृगपक्षिभिः ॥२२॥ भ्रमन्मातंग

सारंगांरत्नगंगातटोज्वलाम् ॥ तुंगशृंगमहालिंगसंगसौधोज्वलत्प्रभाम् ॥२३॥ भावितुंमनसासर्वैः अशक्यां तां वनस्थलीम् ॥

उत्फुल्लहल्लकाक्रांतां क्रौंचसारससेविताम् ॥२४॥ पतंगांशुसमुत्फुल्लरक्ताब्जवरशोभिताम् ॥ परागरागस्वच्छंदांतरप्रासाद

शोभिताम् ॥२५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्प्रासादैकमध्यस्थसिंहासनवराश्रितः॥ दिव्यांगरागसुभगो भर्गो देव्या समन्वितः॥ २६॥ चन्द्रापीडो मृडो गौर्यै दर्शयामास तद्
वनम्॥ स्वस्यास्य मा दर्शि तत्वं ददर्श शर्वोऽथ गौर्या प्रीतिविवर्धितं वनम्॥ २७॥ सर्वैकनाथ सा हि विश्वनाथ नित्यं यथा स्वात्मपथं
करोति॥ मत्तद्विरेफकलहं सकुलाभिरामं पुंस्कोकिलाकलितकाकलिरागयुक्तम्॥ २८॥ उत्पुच्छगुच्छसमरे श्वमेरे रूपे
तं प्रसोमुदेक्षच्छिवः शिवया समेतः॥ २९॥ शारदमुदिराभ फुल्लमल्लीसुमगंधोद्यतमेदुरं वनान्तम्॥ स दिनान्तेऽथ वसंतवास
रे शिखरे शैलवरे ददर्श शर्वः॥ ३०॥ भल्लालिंगितकुंदवल्लीकलिकामुत्फुल्लमल्लीगणम्॥ तज्जातामलदिव्यगंधसुमहावंधांधसर
मारुतम्॥ जिघ्रत्सां बशिवस्तदास्तु शिखरे कैलासभूभृद्वरे॥ तमालतिलकालकांतिलकिताच्छसत्केतकम्॥ प्रफुल्लवनराजिकं शि
वपदाब्जसंसेवकम्॥ ददर्श शिखरावृते हरितपीतरीतीयुतम्॥ प्रफुल्लनगसंयुतं गिरिमथेशदंबायुतः॥ कदंबजसुनिंबजैः सफल
३३७ बिंबवल्लीवृतैः॥ स दंबुजसरोवरे भृते अपार जंबुद्रुमैः॥ हृदं वरमुदं व्यधाद् वरदिशां वरः शंकरः॥ अहस्करनिशाकरप्रकटलोच
नोस्तां बया॥ सुनीपतरुसंवृतं प्रथिततापपापापहम्॥ अपापशरणं वनं तगरधूपसंमोदितम्॥ चिरंतनतपोवनं शिवविहारतः पा
वनम्॥ ददर्श किलकाननं सशिवया स्वकीयाननम्॥ प्रफुल्लनानाविधगुल्मशोभितम्॥ ततावितानारिमनोरमं वनम्॥ विरूढना
ग्यैः परितः प्रियंगुभिः॥ सपुष्पितं कंटकितं च केतकैः॥ ३७॥ तमालगुच्छैर्निचितं सुगंधिभिर्निकामपुष्पैर्बकुलैश्च सर्वशः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ अशोकपुन्नागवनैः सुपुष्पितैः द्विरेफमालाकुलपुष्पसंचयैः ॥३८॥ क्वचित्प्रफुल्लांबुजरेणुरूषितं विहंगमैश्चारुकलप्रणादितम् ॥ ईशा० द्वा०
२ विनादितं सारसहंसपंक्तिभिः प्रमत्तमत्यूहरुतैश्च बोधितम् ॥३९॥ क्वचिच्च चक्राह्वरुतैर्विनादितं क्वचिच्च कारंडवनादमंडितम् ॥ अ०१
क्वचिच्च मत्तालिकुलाकुलीकृतं मदाकुलाभिर्भ्रमरांगनादिभिः ॥४०॥ निषेवितं चारुसुगंधिपुष्पैः क्वचित्सुपुष्पैः सहकारवृक्षैः ॥ ल
तोपगूढैस्तिलकैस्तमालैः प्रगीतविद्याधरसिद्धचारणम् ॥४१॥ विवस्वत्प्रभापुंजगुंजाफलाढ्यं विराजत्सुधांशोः शशांशोभि
मध्यम् ॥ गिरावह्निवृंदप्रभानीलवस्त्रं वियत्स्याधवेशमेव विश्वं विभाति ॥४२॥ प्रवृत्तनृत्तानुगतोऽप्सरोगणं प्रहृष्टनानाविधपुष्टसंभृ
गम् ॥ प्रमत्तहारीतकुलोपपन्नं मृगेंद्रनादाकुलसत्वशंबरम् ॥४३॥ क्वचिच्च रुद्रोरुकदंबमृग्यविलूनशष्पांकुरबाष्पमंडितम् ॥ प्रफुल्ल
सच्छल्लुकनीलकोत्पलैः सत्पुंडरीकैः कमलैश्च शोभितम् ॥४४॥ विटपिनिचयनीलनीलकण्ठाभिराममदमुदितविहंगव्रातनादाभि
रामम् ॥ कुसुमिततरुशाखानीलमत्तद्विरेफं नवकिसलयशोभाशोभितप्रान्तशाखम् ॥४५॥ क्वचिच्च दंतिक्षतचारुवीरुधं रुंधंतमादित्य
पथोरुवेणुम् ॥ क्वचिल्लतालिंगितकल्पवृक्षं ऋक्षौघसंदारितमूलभागम् ॥४६॥ क्वचिद्विकासालसगामिनीभिर्निषेवितं रुद्रगणांगनाभिः ॥
पारावतध्वनिभिरूर्जितचारुशृंगमभ्रंकषैः सितासितायितपर्वताग्रैः ॥४७॥ संकीर्णपुष्पनिकरप्रविभक्तभासैः विभ्राजितैरभ्रसमै
श्च शृंगैः ॥ प्रान्तोद्भवागरुदवोद्भवधूमरेखालेखामुखाघ्राणमुखैकसन्मुखम् ॥४८॥ वृक्षाग्रसंगलितपुष्पविचित्रपंक्तिसंबद्धगु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल्मविहङ्गैर्गहनं ददर्श ॥ तुंगाग्रैर्नीलपुष्पैस्तबकभरनतप्रांशुशाखाशिखाभिः ॥ मालामांतांतलीनश्रुतिसुखजननैः कूजितं पक्षिसंघैः ॥ ५१ ॥
रात्रौ चन्द्रस्य भासा कुसुमिततिलकैरेकघातं प्रयांतम् ॥ छायासुप्तप्रबुद्धस्थितहरिणगणालुप्तदूर्वांकुराग्रम् ॥ हंसानां पक्षवातप्रचलितकमल
स्वच्छसंपूर्णतोऽयम् ॥ तत्तीरप्रथितोरुचारुकदलीपालिनृत्यं मयूरं मायूरैः पक्षचन्द्रैः क्वचिदवपतितैरर्चितक्ष्माप्रदेशे ॥ भासेविलीनप्रमुदित
विगलत्सान्द्रकस्तूरिकैणम् ॥ सारंगैरुपवनशोभितप्रदेशं प्रच्छन्नं कुसुमचयैः क्वचिद्विकीर्णम् ॥ ५२ ॥ हृष्टाभिः क्वचिदपि रुद्रकांगनाभिः
331 वीणाभिः सुमधुरगीतरम्यषण्डं संमृष्टं क्वचिदपि लिप्तकीर्णपुष्पैरावासैः परिवृतपादपैर्गणानाम् ॥ ५३ ॥ आमूलात्फलनिचितैः क्वचिद्वि
शालैस्तुंगैः पनसमहीरुहैरुपेतम् ॥ फुल्लातिमुक्तकलतागृहनीलवृद्धकेकारवाक्रमिततत्गिरिमूलसानुम् ॥ ५४ ॥ रम्यं प्रियंगुतरुमंजरिसक्त
भृंगं भृंगावलीकज्जलिताम्रकदंबपुष्पम् ॥ पुष्पोत्करानिलविधूतफणीन्द्रचक्रसत्पारसां विदधतं वनमत्युदारम् ॥ ५५ ॥ गुल्मांतरप्रसृ
तगीतमृगीसमूहनेत्रांतरागकृदथाश्रुतशीतवारि ॥ चंद्रांशुजालकलशैस्तिलकैर्मनोज्ञैः सिंदूरकुंकुमकुसुंभनिभैरशोकैः ॥ ५६ ॥ चामीकराभ
परिफुल्लसुकर्णिकारैः मंदारसुन्दरसुवृत्तसुचारुशाखि ॥ कीलालजातानिललोलमूलमृणालमौलिस्थसुपद्मजालम् ॥ ५७ ॥ वाताहतिप्रोद्धू
तपत्रचर्चरं विरावितालं सुतमालपिप्पलम् ॥ त्यक्तस्त्रीवेनेति चकेतवेन संकेतभाजोऽत्र वसंति केतकाः ॥ ५८ ॥ नागानुबन्धेन विरागमप्यहो शिवां
गमप्यातनुते परागैः ॥ सद्वारणं वारणसंघमत्रमंदारसंदारितमेघजालम् ॥ ५९ ॥ वटं स्वाभिर्जटिलप्रभं सदावृतं चकेदारणकोविदारम् ॥ कैलास

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ मौलिस्थितबिल्वसंघनत्वप्रमाणैः स्वकरैर्दिवाकरम्॥६०॥ स्ववसोदरं श्रांतिसमन्वितं वनेविश्राम यन्तीव विभाति तद्वनम्॥ तमाल शि० द्वा०
३ सालं कृतमालजालं सञ्चोलहिंतालरसालजं फलम्॥६१॥ अंकोलनारेलफलैर्विलोलं कृतालवालं बकुलं विभाति॥ पुन्नागनागसर अ०१
लार्जुनचंपकाढ्यं ससाटली पाटलगंधसुगंधिताशम्॥६२॥ सच्छिंशुपाबदरशाल्मलिकिंशुकाढ्यं श्लोकापहारिभिरशोकपरंप
राढ्यम्॥ कपित्थतिंतिणी वकै धवाश्वमारशेखरं सुलोध्रवधकाम्रकैः सुफुल्लदाडिमीफलम्॥६३॥ सुमातुलिंगरंगकं विभाति तद्वनं परं
सुराद्रनामलक्यपूगपूर्णनागजांबवं॥ कदल्ययूथिकावृतं समीक्ष्य चांबयावसन्॥६४॥ हस्तिप्रशस्ततरहस्तविशस्तशाखं बाता
नधूतसरघाविगलन्मधुभूतलाढ्यम्॥ गोलांगूलसुहृत्कृताप्रतिपतज्जंबूफलालीयुतम्॥६५॥ भ्राजद्भूमितलंदिरेफकुल
वद्वाराजतेतद्वनम्॥६५॥ हरिणं खर करकिरणैररुणंतत्प्रविभातिवै गिरींद्रे॥ सुदरिंद्रविषयाय थाफलातृणमात्वं न हि रोहतेहितत्र॥
राजीवराजद्वनराजिरिशं नीराजती वप्रविभाति तद्भिः॥ कोलैरुदंष्ट्राभिविशस्तमुस्ता धात्रेव संघृष्टशिलातलाभूः॥६६॥ ॥
॥स्कन्द उवाच॥ ॥सकलभुवनकर्त्ता लोकनाथस्तदानीं तुहिनशिखरिपुत्र्यासाधमिष्टैर्गणेन्द्रैः॥ विविधतरुविशालं मत्तहृ
ष्टान्यपुष्टमुपवनमतिरम्यं दर्शयामासदेव्यै॥६७॥ पुष्पैर्वन्यैः शुभकरकुसुमैर्गंधितैस्तान्द्रिरींद्र॥ देवीं दिव्यामुपवनगतां भूषयामास
शर्वः॥ साचाप्येवं तुहिनगिरिजा शंकरं देवदेवं वन्यैः पुष्पैः पशुवरपतिं भूषयामासहृष्टा॥ संपूज्यदेवं परिहृष्टमानसा संवीक्ष्यचो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यान वरं प्रदृष्टम्॥ महेश्वरं सा जगदादिकर्त्री उवाच देवं प्रणिपत्य देवी॥ ८०॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे उद्यान
वर्णनं नाम प्रथमोऽध्यायः॥ १॥ श्रीविश्वेश्वरार्पणमस्तु॥ श्री ईशानाय नमः॥ ॥ श्रीदेव्युवाच॥ ॥ देवदेव महादेव
करुणा करुणालय॥ विश्वविश्वाधिकाशास्य त्रिपुरांधक संहर॥ १॥ अलिंगस्यापि ते शंभो कथं लिंगे रुचिः परा॥ सर्वे लिंगा
र्चनेनैव मुक्ताः सन्तीति निश्चितम्॥ २॥ वद मे करुणामूर्ते ब्रह्मविष्ण्वीशपूजित॥ ॥ श्रीस्कन्द उवाच॥ ॥ इति संप्रार्थितो देव्या
३३२ महादेवो महेश्वरः॥ कैलासमौलिविपिने सर्वर्तुसमलं कृते॥ ३॥ तत्र प्रासादगात्युच्चैर लसिंहासनस्थितः॥ हर्षेण महता दे
वीं समालिंग्य वचोऽब्रवीत्॥ ४॥ ॥ श्री ईश्वर उवाच॥ ॥ शृणु त्वं चंचलापांगि लिंगसंपूजनोत्सवम्॥ यच्छ्रुत्वा सर्वपापे
भ्यो प्रमुक्तो भक्तिमान् भवेत्॥ ५॥ पुरा पद्मोद्भवे कल्पे देवा दैत्यप्रपीडिताः॥ तारकांतकरं मत्तः प्रार्थयन्ति सुतोद्भवम्॥ ६॥ त्व
याहं परया युक्तो मुदा कैलासपर्वते॥ दक्षपुत्र्या तदा देव्या त्वया नत्यक कल्पके॥ ७॥ तदा त्र दक्षो मतिमान् चाक्षुषस्यान्तरे मनोः॥ इया
ज हयमेधेन मां हित्वा स तदा सुरैः॥ ८॥ ब्रह्मा तस्य भवद्ब्रह्मा मदस्य त्वहरिः स्थितः॥ अध्वर्युर्भृगुरासीच्च होताऽऽसीत्तत्र मुद्गलः॥
तांडकश्चतथोद्गाता अभवन्मुनयोऽखिलाः॥ शतर्चनोऽस्याच्छावाक अग्नीध्रो जमदग्निजः॥ १०॥ नेष्टा पोता सुमंतुश्च जा
तूकर्णो गिरा मुनिः॥ प्रस्तोता प्रतिहर्ता भूज्जैमिनिश्चैव तुंबरः॥ ११॥ सुब्रह्मण्यो भवत्तत्र वसुमान्साम गो द्विजः॥ प्रतिप्रस्था

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ बभूवास्य संवर्त्तोऽथमहामुनिः ॥१२॥ उन्नेताभूत्तदा गार्ग्यः ध्रुवगोपो तमित्रजः ॥ संस्राव्यभिगेरोमैत्र वरुणो ब्राह्मणाच्छंसुः ॥१३॥ ग्रावस्त ईशा०द्वा०
४ द्भवत्तस्य एकताद्यामधुः कटः ॥ एवं तथान्ये मुनयः तस्यासन् ऋत्विजः शिवे ॥१४॥ इन्द्रो मित्रोऽथ वरुणः सूर्यः सोमोऽनिलोऽनलः ॥ अ०२
वसवो मरुतस्तत्र पितरो मरुतारिवलाः ॥१५॥ ऋभवोऽथाश्विनौ तत्र संगताः परमर्षयः ॥ यज्ञवाटे ततः सिद्धाः नागाः किंपुरुषाप्सराः ॥
विद्याधराश्चारणाये गरुडाः पन्नगाः शिवे ॥१६॥ पर्वताः सागरा नद्यः वेदाः सप्त पवाः स्थिताः ॥ छंदांसि किन्नरनरास्तस्यासन् प
रिचारकाः ॥१७॥ नानामखास्तस्मिन्भवो हयमेधो बभूव ह ॥ दक्षस्य दीक्षितस्यैवमामनाद्धत्यसंमितः ॥१८॥ विमानसंचरा देवा ययुस्त
त्र सरुद्रकाः ॥ भूम्यन्तरिक्षद्यौभागेरुद्रास्तत्र सहस्रशः ॥१९॥ गच्छंति यज्ञसदनं मदनान्तकरं विना ॥ तान्प्रयातान्सुरान्दृष्ट्वास
पत्नीकान्तदा मखे ॥२०॥ दिदृक्षया त्वं पितरमयासीः कौतुकान्विता ॥ मा गच्छेति निषिद्धा त्वं मया तद्यज्ञकर्मणि ॥२१॥ तन्ना
दृत्य मद्वाक्यं गतवत्यसि भामिनि ॥ विमानेन गणैर्युक्ता तदानीमविरोचिषा ॥२२॥ सरवीभिः संवृता देवी पितृयज्ञसदो मुदा ॥ नाना
मुनीजनाकीर्णं नानादेवगणान्वितम् ॥२३॥ सदस्यैर्वालखिल्याद्यैर्वैखानसगणैर्युतम् ॥ नृत्यद्भिरप्सरासंघैः गंधर्वैः कृतगा
यनम् ॥२४॥ नदत्सु देवतूर्यौघैर्वीणादुंदुभिनिस्वनैः ॥ भुंजद्भिर्ब्राह्मणैः पुष्कलं गोभिश्च्यावृतमभिहि ॥२५॥ प्रवर्ग्येषु प्रवृत्तेषु मां त्व
नोपसदायजन् ॥ तदा त्वया कृतप्रश्नो दक्षमाहूय तन्मखे ॥२६॥ शृण्वत्सु मुनिसंघेषु ब्रह्मणा विष्णुना तथा ॥ वेदेषु देव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संघेषु शृण्वत्सु परमेश्वरी ॥ २७ ॥ ॥ सत्युवाच ॥ ॥ कस्मान्नाह्वयसे देवं महादेवं महामखे ॥ मेधस्य पतिमीशानं राजानं चाध्व
रस्य तम् ॥ २८ ॥ तस्मादेष सदं भागं विश्वेशो दातुमर्हसि ॥ स्विष्टं करोति सर्वत्र सुर भोगे पृशंकरः ॥ २९ ॥ सएव भगवान्रुद्रः सर्वदेव
पतिः शिवः ॥ एक एव महारुद्रो वेदेषु प्रतिपाद्यते ॥ ३० ॥ सएव ० ॥ महर्षिश्च महादेवो विद्याधिपतिरीश्वरः ॥ ३१ ॥ पतित्वं ज्ञातरुद्रस्य
३३३ वेदेश्च प्रतिपाद्यते ॥ सएव ० ॥ ३२ ॥ सएव ० ॥ इन्द्रमित्रादिनामेषु एक एव महेश्वरः ॥ ३३ ॥ सएव ० ॥ ब्रह्मविष्ण्वादिजनकः सोम
सूर्यादि वह्निनाम् ॥ ३४ ॥ सएव ० ॥ एष विश्वं विश्वपतिः सहि विश्वाधिकः शिवः ॥ ३४ ॥ सएव भगवान्रुद्रः सर्वदेवपतिः
शिवः ॥ प्रणवात्मा प्रकाशात्मा महात्मा सर्वतोमुखः ॥ ३५ ॥ सएव ० ॥ येन प्रभासते सर्वं जगत्स्थावरमानुषम् ॥ ३६ ॥ यस्याज्ञया
जगत्सृष्टिं करोत्येष प्रजापतिः ॥ सएव ० ॥ ३७ ॥ यस्याज्ञया जगत्सर्वं हरिः पालयतेऽखिलम् ॥ सएव ० ॥ ३८ ॥ यस्याज्ञया जग
च्चान्ते रुद्रः संहरति स्वयम् ॥ ३९ ॥ सएव ० ॥ यद्भासा भासयत्येष भास्करो नाशयेत्तमः ॥ ४० ॥ सएव ० ॥ यद्भासे सदा सोमः पुष्णा
त्यौषधिमंडलम् ॥ ४१ ॥ सएव ० ॥ यद्भासा हव्यकव्यानि दहत्येषानलो महान् ॥ ४२ ॥ सएव ० ॥ यद्भासाच्च सदा वायुः पवते लोकमा
विशन् ॥ ४३ ॥ सएव ० ॥ यस्याज्ञया सुरान्पाति वज्रहस्तस्त्रिविष्टपम् ॥ ४५ ॥ वरुणः सागरान्सप्त यान्ति नद्यः समुद्रगाः ॥
सएव ० ॥ ४६ ॥ ग्रहार्क्षाणि विभान्त्येव चंद्रचूडस्य शासनात् ॥ सएव ० ॥ ४७ ॥ यंमोऽपि यद्भयान्नित्यं समवर्तित्वमास्थितः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ सएव०॥४८॥निरृतिः पाति पापेभ्यो प्रजाः सर्वा ह्यतन्द्रितः॥सएव०॥४९॥कुबेरोऽथ धनं पाति महादेवस्य शासना ईशा० द्वा०

५ त्॥सएव०॥५०॥वेदा यस्यास्य निश्वासाः प्रणवस्तत्तनुर्महान्॥सएव०॥५१॥छंदांसि यस्य लोमानि पुराणादीनि अ० २

सर्वशः॥सएव०॥५२॥भूमिर्यदाज्ञया धत्ते सागरान्द्वीपमंडलम्॥सएव०॥५३॥शेषोऽप्यशेषभूलोकं धत्ते विश्वे

श्वराज्ञया॥सएव०॥५४॥दिग्गजाः कूर्मनक्राद्याः तिष्ठन्ति शिवशासनात्॥सएव०॥५५॥पितरो मरुतः साध्या ऋ

षयो वसवो मनुः॥सएव०॥५६॥विश्वेदेवाश्विनौ चार्काः वसन्ति शिवशासनात्॥सएव०॥५७॥ अधीयन्ते तथा

वेदैः ऋषयोऽमी सहस्रशः॥सएव०॥५८॥प्रवर्त्तन्ते क्रियाः सर्वाः स्मरशासनशासनात्॥सएव॥५९॥लोकाल्लो

क्याल्लोकपाला यस्याशा धारिणः सदा॥सएव०॥६०॥योवैरुद्रेतिमंत्रेण शिवोऽथर्वशिरस्स्तुतः॥सएव०॥६१॥

सर्वेशो विमयो लोको यो वेदाद्वै प्रतिष्ठितः॥सएव०॥६२॥यं विनिद्रा जितश्वासाः सदा ध्यायन्ति योगिनः॥स

एव०॥६३॥एष भूतपतिः सेतुः विधारणा इति श्रुतः॥सएव०॥६४॥सएव परमानन्दः शिवोऽद्वैतश्च केवलः॥स

सएव०॥६५॥यत्स्वरूपपरिज्ञानं वेदैरपि न शक्यते॥सएव०॥६६॥सोऽमहांश्च महादेवः अणीयोऽणीयसामपि॥

सएव०॥६७॥न च स्त्री न पुमानेष महादेवो न पुंसकः॥सएव०॥६८॥यतो वाचो निवर्तते अप्राप्य मनसा सह॥स०॥६९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आनन्दं शांभवं विद्वान्नविभेति कुतश्चन ॥ स एव भगवान्रुद्रः सर्वदेवपतिः शिवः ॥ ७० ॥ सद्योजातो महादेवो
वामदेवो महेश्वरः ॥ स एव० ॥ ७१ ॥ अघोरो विश्वनाशात्मा तत्पुरुषः सर्वदृक् शिवः ॥ स एव० ॥ ७२ ॥ स ईशानः सो हि
विराट् स्वराट् सम्राट् प्रजापतिः ॥ स एव० ॥ ७३ ॥ स निर्गुणो विरूपाक्षः स आत्मा विश्वतोमुखः ॥ स एव० ॥ ७४ ॥
विश्वतश्चक्षुरीशानः स भवो विश्वबाहुकः ॥ स एव० ॥ ७५ ॥ निर्विकारो विकारो वा भासते सर्वदृक् ततः ॥ स एव० ॥ ७६ ॥
३३५ पुरुषो व्यापकोऽनंतो दृक् दृश्यातीत एव भवः ॥ स एव० ॥ ७७ ॥ स सोमे हेशो विश्वात्मा विश्वाधिकः उमापतिः ॥ स एव० ॥ ७८ ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलः ॥ स एव० ॥ ७९ ॥ ऊर्ध्वरेता विरूपाक्षो विश्वरूपो गुणातिगः ॥ स एव० ॥ ८० ॥ शिवोऽन
न्दघनः शान्तो विशेषेण विवर्जितः ॥ स एव० ॥ ८१ ॥ सर्वदृक् सर्वभूतात्मा सर्वेन्द्रियविवर्जितः ॥ स एव० ॥ ८२ ॥ अपाणि
पादो वरदो जवनोऽप्यगृहीतकः ॥ स एव० ॥ ८३ ॥ स पश्यतीदं विश्वात्मा चराचरमिदं जगत् ॥ स एव० ॥ ८४ ॥ न तं विन्दन्ति विद्वांसो
यतन्तोऽपि यतीश्वराः ॥ स एव० ॥ ८५ ॥ यो जाग्रत्स्वप्नतुर्याभिरवस्थाभिरतीतकः ॥ स एव० ॥ ८६ ॥ यो मायया मोहयति ज
गदाब्रह्मकीटकम् ॥ स एव० ॥ ८७ ॥ स मायी परमेशानः स परः शिव ईश्वरः ॥ स एव० ॥ ८८ ॥ सर्वान्तरः सर्वसाक्षी वि
त्तानेता स निर्गुणः ॥ स एव० ॥ ८९ ॥ स सुधन्वा स्त्रिपुरेवः विभुः शंकर ईश्वरः ॥ स एव० ॥ ९० ॥ सदाशिवः पशुपतिः यशो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 यन्नेश्वरश्चसः ॥सएव०॥ ९१॥ सोऽन्तरास र्वभूतानां सबाह्येऽपिचसंस्थितः॥ सएव०॥ ९२॥ योयज्ञैरीज्यतेसांबो यज्विभिर्वेदपारगः॥ 
६ भिर्वेदपारगः॥सएव०॥९३॥ यत्स्वरूपापरिज्ञानान्नमुक्तिंलभतेनरः॥सएव०॥ ९४॥ योबाह्यान्यन्तरेपूर्णःशिवशं 
कःशिवंकरः॥ सएव०॥ ९५॥ यतोब्रह्मेशविष्ण्वीन्द्राःसहभूतैःप्रजज्ञिरे॥सएव॥ ९६॥ सध्येयःपरमेशानोमुमुक्षुभिरह
र्निशम् ॥सएव०॥ ९७॥ देवाअपिमहादेवंसहसंतंचनोविदुः॥सएव०॥ ९८॥ सएवकर्त्ताजगतांभर्त्ताहर्त्तामहेश्वरः॥
सएव०॥ ९९॥ यदाचर्मवदाकाशंवेष्टयिष्यन्तिमानवाः॥सएव०॥ १००॥ तदाशिवमविज्ञायदुःखस्यान्तोभविष्यति॥
सएव०॥ १॥ यस्यलिंगार्चनेनैवमुक्तिर्भक्तैश्चलभ्यते॥सएव०॥ २॥ यद्भस्मधृग्भवोद्भूतंदुःखंसर्वंप्रहास्यति॥स
एव०॥ ३॥ यत्पुंड्रफालफलके विभ्रन्मुक्तिमवाप्नुयात्॥सएव०॥ ४॥ यन्नेत्राश्रुभवंबीजंबिभ्रन्नारभ्रदुःखभाक्॥स
एव०॥ ५॥ यस्यपंचाक्षरजपात्पंचपापंनकिंचन॥सएव०॥ ६॥ यस्यरुद्रजपादेवसर्वपापाद्विभेदनं॥सएव०॥ ७॥
यस्यक्षेत्रेषुवसतांमुक्तिरेकेनजन्मना॥सएव०॥ ८॥ योवेदादौस्वरःप्रोक्तोवेदान्तेषुप्रतिष्ठितः॥सएव०॥ ९॥ तस्य
प्रकृतिसंलीनाभवन्तोमोहमास्थिताः॥सएव०॥ ११०॥ यजध्वंसांबमीशानंलप्स्यध्वंमुक्तिमुत्तमाम्॥सत्यंसत्यंवचो
मेघसत्यमेकोमहेश्वरः॥ ११॥ अनित्याःपशवोयूयंब्रह्मविष्ण्वादयःसुराः॥ मारक्षेणविनश्यन्तुत्र्यक्षकोधाग्निवह्निना॥ १२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगाक्षिहारिणे भागं दातुमर्हथ सत्तमाः ॥ किमध्वरेऽत्र पशवः पूजनीयाः सुरावराः ॥१३॥ सोमेन सोमं यजते वेदसीमासु संस्तुत
म् ॥ स सीमा सर्ववेदानां वेदांतानां गतिः परा ॥१४॥ स एवोपनिषद्वेद्यो पुरुषः परमेश्वरः ॥ स काष्ठा शिपिविष्टो हि स हि निष्ठावता
मिह ॥१५॥ विशिष्टफल दो भूयाच्छ्रेष्ठानामेव केवलम् ॥ तस्योत्सृष्टं जगत्सर्वमष्टमूर्त्ति तनूगतम् ॥१६॥ स भूमिरापो ह्यनलो
वायुराकाशकोशगः ॥ रुद्रो विधाता दांतानां शांतानां सा गतिः परा ॥१७॥ क्षमापयध्वं वरदं यदतीतं मखं तव ॥ सहमानो महादेवो
भक्त्या सर्वं सहिष्यति ॥१८॥ अधिवक्ता स एवेशः भक्तेष्वत्यंत पापिषु ॥ तमेव शरणं यात महादेवं सनातनम् ॥१९॥ पतीनां
३३९ पतिरीशानः चेतनानां सचेतनः ॥ तमसामधिपो वेदैः सर्वदा प्रतिपाद्यते ॥१२०॥ स एवाद्य स उश्वो हि वेदनिश्वास ईश्व
रः ॥ सा गतिः सा परा काष्ठा सदा निष्ठावतां सुराः ॥२१॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ॥ ज्ञात्वा तं मृत्युमत्येति नान्या
पंथा हि विद्यते ॥२२॥ ईशावास्यो महादेवस्तेन वास्यमिदं जगत् ॥ किमत्र बहुनोक्तेन प्रयात शरणं शिवम् ॥२३॥ ॥
॥ सत्युवाच ॥ ॥ उमाकांतमेवं हृदन्तर्विभांतं सदा वेद वेदान्तवार्तासु दान्ताः ॥ कृतान्तान्तकं पूजयन्तः प्रशान्ताः वसन्त्ये
वसन्तः कियन्तो महान्तः ॥१२४॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे सती वाक्यं नाम द्वितीयोऽध्यायः ॥२॥
॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ स तास्सत्यवचः श्रुत्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ वेदवेदान्तसंभ्रमम् ॥ विष्णुब्रह्मादयोदेवा नोचुः किंचन तां प्रति ॥ १ ॥ मुनयो विस्मिताक्षास्ते सतीं पश्यन्ति तत्रहि ॥ शि० द्व०
८ चित्रार्पितेव तत्रत्या अभवन्मुनयः सुराः ॥ २ ॥ तदा सत्या वचः श्रुत्वा भाविकर्मप्रचोदितः ॥ दक्षोऽपि दीक्षितस्त अ०२-३
त्र प्राह सत्यं सतीं प्रति ॥ ३ ॥ ॥ दक्ष उवाच ॥ ॥ सती त्वं शृणु मद्वाक्यं श्रुतिस्मृत्यर्थमादरात् ॥ एष विष्णुस्स
दा पूज्यो मम संमतिर्वै मखे ॥ ४ ॥ यज्ञो वै विष्णुरित्याद्याः श्रुतयस्तं वदन्ति वै ॥ नात्र रुद्रेण मे कार्यं विरूपेण त्वया सह ॥
वेदा एव प्रमाणं मे मा कृथाः संशयं सति ॥ एतच्छ्रुत्वा तु तद्वचो निस्सारं मुनयः सुराः ॥ ६ ॥ न वदन्ति च पश्या
त्र प्रमाणं विष्णुरेष मे ॥ तत्र दक्षवचः श्रुत्वा सती क्रुद्धाब्रवीन्मुने ॥ ॥ सत्युवाच ॥ ॥ किं तवानेन वचसा भ
क्तिहीनाय कुत्सितम् ॥ यदि वेदाः प्रमाणं ते वेदाः सर्वे पुरःस्थिताः ॥ ८ ॥ वदन्तु त्वद्यथाजोषं सत्यमेव वचोऽधुना
एभिर्मुनिगणैः सार्धं सुरैर्दक्ष प्रजापते ॥ ९ ॥ यदि प्रमाणं ते वाक्यं ऋग्वेद वद सत्यतः ॥ दक्षः शृणोतु निखिलं मुनि
भिश्च सुरैः सह ॥ १० ॥ ॥ सूत उवाच ॥ ॥ इति सत्यावचः श्रुत्वा मौलिबद्धांजलिस्तदा ॥ ऋग्वेदः प्राह त
त्रस्थः शृण्वतां तत्र वै वचः ॥ ११ ॥ ॥ ऋग्वेद उवाच ॥ ॥ यः सोमो जनिता देवो मर्तानां च दिवस्तथा ॥
पृथिव्या जनिता सोमः सोमोऽग्नेर्जनिता तथा ॥ १२ ॥ सूर्यस्य जनिता सोम इन्द्रस्य जनिता शिवः ॥ विष्णोर्वै ज-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निता सोमः सर्वेषां जनिता हरः ॥ १३ ॥ आषाढः श्री महादेवः पिताऽसौ मरुतामपि ॥ विश्वस्य भेषजो रुद्रो सुध
न्वाऽसस्त्विषुपरः ॥ १४ ॥ नमोभिस्त्वां प्रपद्यामि रुद्रमध्वरनायकम् ॥ मा नस्तु कस्मिन्नागसि माद्य योरुतात्रि पुव
धीर्माशुर भूरिषु ॥ भूर्णि रेव विरूपाक्षः शिवो मी ढुष्ठ मोहरः ॥ शंभो त्वं प्रमतिस्त्वं मे मातासि च पितासि मे ॥ १६ ॥
तेन रायं सहस्राढ्यं भवेन्मम सदा मुदा ॥ तव सोमव्रते देवतन्वा च मनसा सह ॥ १७ ॥ भजन्तः शिव त्विङ्गार्चां प
श्येम शरदः शतम् ॥ तवैव शिव नैवेद्यं तदन्नयाम सदा मुदा ॥ १८ ॥ भस्म रुद्राक्ष सहिता जीवाम शरदः शतम् ॥ सदाशि
३३८
वकथां श्रुत्वा मोदाम शरदः शतम् ॥ १९ ॥ शिवस्य लिंगं दृष्ट्वैवं नन्दाम शरदः शतम् ॥ शिवभक्ताः सदा शान्ता भवाम श
रदः शतम् ॥ २० ॥ शिवस्यैव सदा वाचा चारु नाम मनामहे ॥ पितरं च महादेवं हृदये यं मातरं शिवम् ॥ २१ ॥ चारु चित्रं
त्लिङ्गरूपं भजध्वं परमेश्वरम् ॥ अंबयेन भजन्तः शंधिया पावनया सुराः ॥ २२ ॥ पुरीषजिह्वाः सर्वे भवन्ति निरपत्र
पाः ॥ ईशान हृदय भुवनस्य जन्म सदा · · · · · · २३ ॥ अयं गाथपतिः सांबो अयं मेध्यपतिः शिवः ॥ जल्ना
षा शिवभक्ता ये तेषां भेषज्यकृच्छिवः ॥ २४ ॥ सर्वशान्तं महादेवं उतामृतपतिं शिवम् ॥ भूरेमोक्षस्य दातारं भजेहं सत्पतिं शि
वम् ॥ २५ ॥ यदि प्रमाण वचनं श्रुतिसारं प्रोक्तमेव मे ॥ इन्द्रं मित्रं वरुणमग्निमाहुरेकं संतं बहुधा वदामि ॥ पश्यंति सूर

 यो
यः हे देवाः प्रियमेधासः समर्च्यन्तु महेश्वरम् ॥ त्रिपुरारिं महादेवं त्रिसत्यं प्रवदाम्यहम् ॥ २७ ॥ सर्वान्तरं महादेवं हृदि कृत्वा 
 वदामि वः ॥ यदि प्रमाणं वचनं मम सर्वे सभासदः ॥ २८ ॥ पूजयध्वं महादेवं नोचेन्मूर्धा पतिष्यति ॥ सत्यं सत्यं पुनः स 
त्यमुद्धृत्य भुजमुच्यते ॥ २९ ॥ ऋग्वेदवचनं श्रुत्वा सभ्यास्ते भयकंपिताः ॥ पुनः सतीवचः प्रोचे यजुर्वेदं पुरस्थितम् ॥ मौ
लिबद्धांजलिपुटमुत्थितं तत्र संसदि ॥ ३० ॥ ॥ सत्या उवाच ॥ ॥ वद सत्यं यजुर्वेद अत्र यन्मानसं तव ॥ तदा सत्या वचः
श्रुत्वा यजुर्वेदोऽब्रवीत्ततः ॥ ३१ ॥ ॥ यजुर्वेद उवाच ॥ ॥ यस्मात्परं नापरमस्ति शंभोर्ज्यायान्न चैव हि ॥ सहि वृक्ष इव
स्तब्धो तस्य शाखा सुरासुराः ॥ ३२ ॥ तेन पूर्णमिदं विश्वं सदेवासुरमानुषम् ॥ ईशावास्यमिदं सर्वं यत्किंच जगत्यां ज
गत् ॥ ३३ ॥ तेन त्यक्तेन भुंजीथाः मा गृधान्यं सुरान्तरम् ॥ यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ॥ ३४ ॥ तस्य प्र
कृतिलीनस्य यः परः स महेश्वरः ॥ विश्वाधिको महर्षिभ्यः महादेवो महेश्वरः ॥ ३५ ॥ हिरण्यगर्भं देवेशो जनयामास
पूर्वतः ॥ स मां देवो महादेवो नु ध्यायुक्तं करोतु नः ॥ ३६ ॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥ वामदेवाय ज्येष्ठाय नमः
श्रेष्ठाय शंभवे ॥ ३७ ॥ अघोराय च घोराय हराय घनकोनमः ॥ तत्पुरुषाय महिम्ने वै महादेवाय धीमहि ॥ ३८ ॥
ईशानः सर्वविद्यानां पतिर्भुवपतिः शिवः ॥ ब्रह्मणोऽधिपतिः शंभुः ओंकारार्थैकवाचकः ॥ ३९ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ॥ आनन्दं देवदेवस्य विद्वान्नोऽभयमाविशेत् ॥४०॥ नमस्ते रुद्ररूपाय मन्यवे च
नमो नमः ॥ इषवे प्रणमाम्यद्य तद्बाहुभ्यां नमो नमः ॥४१॥ मेरुमध्यस्थहस्ताय धन्वने तन्नमो नमः ॥ तच्छरव्याय च नमो तया
मां पातु शंकरः ॥४२॥ या तस्य सा तनुर्मा हि पायान्मां पापकाशनीम् ॥ तया मां स्तुतं तनुवा शंभुः गिरीशोऽवतु सर्वदा ॥४३॥ या
तद्धस्ते इषुर्घोरा यां बिभर्ति महेश्वरः ॥ शिवां तां गिरिशः कुर्यात् मा मा हिंसतु सर्वदा ॥४४॥ शिवेन वचसा देवं स्तौमि नित्यं
३७ सनातनम् ॥ अयक्ष्मतेन सत्येन मम वाक् संभविष्यति ॥४५॥ अध्यवोचन्महादेवो मयि तुष्टेन चेतसा ॥ प्रथमो देव ईशा
नः भ(वरु)क् भिषगुत्तमः ॥४६॥ मम शत्रून्निवार्याशु तान्दध्यातु च जंभयोः ॥ असौ सूर्योन्तरातिष्ठ ताम्रो अरुण ईश्वर ॥
बभ्रुः सुमंगलाः शर्वो सर्वरुद्रावृतः शिवः ॥ तमेवमीडे देवेशं सर्पन्तं परमेश्वरम् ॥४८॥ नीलग्रीवं महादेवं नीलं लोहितमीश्व
रम् ॥ गोपाः पश्यन्ति देवेशं भवनो मोहमास्थिताः ॥४९॥ उदहार्योऽपि पश्यन्ति हे देवा मोहमास्थिताः ॥ सूर्यान्तरस्थितं सांबं
विश्वजातं च पश्यति ॥५०॥ द्विलोचनाश्च भक्त्यैव तं पश्यंति महेश्वरम् ॥ अभक्तियुक्ता यूयं हि सहस्राक्षं न पश्यथ ॥५१॥
स एवमृडयेद्दीशो भक्तियुक्तं च मां शिवे ॥ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥५२॥ अतोस्य भक्तान्देवस्य साष्टांगं प्र
णमाम्यहम् ॥ प्राज्यं विज्यं धनुस्तेन करोतु मयि शंकरः ॥५३॥ शिवभक्तार्चनप्रीतो महादेवो महेश्वरः ॥ हस्ते धृतान्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंक्ति ८ — जगतां पतये तस्मै रुद्रायैवाततायिने ॥ क्षेत्राणां पतये तस्मै सूताय हन्तवे ॥ वनानां पतये तस्मै भवहेतवे नमो नमः ॥

शिवरह०७२ बाणगणान् पातयिष्यति मत्परः ॥ ५४ ॥ शतेषुधी सहस्राक्षः धनुर्ज्यं कुरोतु च ॥ सुमुखश्री महादेवो मम शर्म दधातु वै ॥ ५५ ॥ तौ ईशानां द्वा

९ क्ष्णाग्रणि शराणां मां शरणं पुरतस्थितम् ॥ दृष्ट्वास्व भक्तं शरधी पातयिष्यति ॥ ५६ ॥ मीढुष्टमस्य याहस्ते हेतिः संहरणोचिता ॥ अ० ३

कपर्दिना धनुर्यच्च विशल्या साभवेन्मयि ॥ ५७ ॥ बाणबाणासनैर्हीन बाहुभ्यां पालयेत्स माम् ॥ अनाततायदेवाय धृष्णवे च

नमो नमः ॥ ५८ ॥ नमो हिरण्यबाहवे सेनान्ये च नमो नमः ॥ दिशां च पतये तस्मै वृक्षाणां पतये नमः ॥ ५९ ॥ हरिकेशाय शा-

न्ताय पशूनां पतये नमः ॥ भवन्तः पशवो देवा भवतां पतिरीश्वरः ॥ ६० ॥ तन्मायापाशबद्धा हि भवन्तो मोहमास्थिताः ॥

अनेन हयमेधेन स दक्षाः पूजयन्तु वः ॥ ६१ ॥ सर्वथा भवपाशेभ्यो मुक्ता यूयं भविष्यथ ॥ सस्पिञ्जराय सौम्याय नमस्त

स्मै त्विषीमते ॥ ६२ ॥ पथीनां पतये तस्मै बभ्लुशाय नमो नमः ॥ विव्याधिने तथान्नानां तस्मै सुपतये नमः ॥ ६३ ॥ परिवेश

पशांताय नमसा उपवीतिने ॥ पुष्टानां पतये तस्मै भवहेत्यै नमो नमः ॥ ६४ ॥ नमस्स्थपतये तस्मै वृक्षाणां पतये नमः ॥ मंत्रि

णे वाणिजायाथ कक्षाणां पतये नमः ॥ ६५ ॥ नमो भुवन्तये तस्मै वारिवस्कृतकाय च ॥ ओषधीनां च पतये उच्चैर्घोषाय

क्रंदते ॥ ६६ ॥ पत्तीनां पतये तस्मै कृत्स्नवीताय धावते ॥ सत्वानां पतये तस्मै ककुभाय निषंगिणे ॥ ६७ ॥ स्तेनानां पतये

तस्मै नमस्तस्मै निचेरवे ॥ स्तायूनां पतये तुभ्यं नि चेरुपतये नमः ॥ ६८ ॥ नमः परिचाराया थ अरण्यपतये नमः ॥ सृका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमः ॥६९॥ असिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमः ॥ उष्णीषिणे गिरिचराय
कुलुंचपतये नमः ॥ ७०॥ निषंगिणे इषुधिमते तस्कराणां पतये नमः ॥ नमस्तेवं च तुभ्यं नमस्ते परिवंचते ॥७१॥ सहमा
नाय विश्वाय अव्याधपतये नमः ॥ इषुमद्भ्यो धन्वाविभ्यो अतन्वंभ्यो नमो नमः ॥७२॥ नमः प्रतिदधानेभ्यो आ
यच्छद्भ्यो नमो नमः ॥ विसृजद्भ्यो नमो नित्यं स्वपद्भ्यश्च नमो नमः ॥७३॥ जाग्रद्भ्यश्च नमोमेस्तु तिष्ठद्भ्यश्च नमो
नमः ॥ नमः सभाधिपतये सभाभ्यस्ते नमो नमः ॥७४॥ वेदाश्वेभ्यो नमस्तेस्तु अश्वाधिपतये नमः ॥ नम आव्या
334 धिनीभ्यस्ते विविध्यंत्ये नमो नमः ॥७५॥ उगणाभ्यो नमस्तेस्तु नमस्तेस्तु द गृहते ॥ गृत्सेभ्योऽथ नमस्तेस्तु नमो गृत्सा
धिपतेऽ ॥७६॥ विरूपेभ्यो नमस्तेस्तु विश्वरूपायते नमः ॥ महद्भ्यः क्षुल्लकेभ्यस्ते गणेभ्योऽथ नमो नमः ॥७७॥ भूर
थाय नमस्तेस्तु रथाधिपतये नमः ॥ सेनानां पतये तस्मै सेनानि गुरवे नमः ॥७८॥ विधिसारथये तुभ्यं संग्रहीत्रे नमो
नमः ॥ तक्षभ्यो रथकारेभ्यः कुलालेभ्यो नमो नमः ॥७९॥ कुमारेभ्यो नमस्तेस्तु पुंजिष्टेभ्यो नमो नमः ॥ निषादे
भ्यो नमस्तेस्तु इषुधन्वकृते नमः ॥८०॥ मृगयुभ्यः श्वनिभ्यश्च पशुनां च पतये नमः ॥ नमो भवाय रुद्राय शर्वाय प
शुपाय च ॥८१॥ नीलग्रीवाय च नमो शितिकण्ठाय ते नमः ॥ नमः कपर्दिने तुभ्यं व्युप्तकेशाय ते नमः ॥८२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 सहस्राक्षाय ते नित्यं नमस्ते शतधन्वने॥ नमस्ते गिरिशायाथ शिपिविष्टाय ते नमः॥ ८३॥ नमो मीढुष्टमायाथ इशानां द्वा०
 तथान्वेषुमते नमः॥ नमो ह्रस्वाय बृहते तथा वर्षीयसे नमः॥ ८४॥ सवृध्वने च वृद्धाय अग्र्याय प्रथमाय च॥ आ 
शुषेणाय च नमस्तथैवाशुरथाय च॥ ८५॥ नमः शूराय देवाय अभिवेद्याय ते नमः॥ वर्मिणे ते नमो नित्यं नमस्ते
स्तु वरूथिने॥ ८६॥ बिल्मिने ते नमो नित्यं दंशनां गाय ते नमः॥ श्रुताय श्रुतसेनाय दुंदुभ्याय नमो नमः॥ ८७॥ आह
नन्याय च नमो धृष्णवे प्रमृशाय च॥ दूताय प्रहिताय्याय नमस्तेस्तु निषंगिणे॥ ८८॥ वेरेषुधिमते तुभ्यं नमस्तीक्ष्णे
षवे हर॥ नम आयुधिने तुभ्यं स्वायुधाय नमो नमः॥ ८९॥ सुधन्वने नमस्तुभ्यं स्रुत्यपथ्याय ते नमः॥ नमः
काट्याय नीप्याय नमः सूद्याय ते नमः॥ ९०॥ सरस्याय च नद्याय वैशंताय नमो नमः॥ अवट्याय च कूप्या
य वर्ष्यास्वेष्याय ते नमः॥ ९१॥ मेघ्याय च सुमेघ्याय विद्युत्याय नमो नमः॥ नम ईध्रियतप्याय वात्यरेष्माय ते
नमः॥ ९२॥ वास्तव्याय नमस्तेस्तु वास्तुपाय नमो नमः॥ आशवे चाजिरायाथ शीघ्य शीभ्याय ते नमः॥ ~~९३~~॥
नम ऊर्व्याय खल्याय नमः श्लोक्याय ते नमः॥ अवसान्याय च नमो वन्यकक्ष्याय ते नमः॥ ९४॥ श्रव
प्रतिश्रवायाथ आशवे चाजिराय च॥ नमः शीघ्याय शीभ्याय ऊर्म्याय वस्व्याय ते नमः॥ ९५॥ स्रोतस्याच द्वीप्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यकनिष्ठज्येष्ठकायते॥पुर्वापरभवायायमध्यमायनमोनमः॥९६॥ अपगल्भ्याययबुध्न्यायसोभ्ययाम्याय
तेनमः॥प्रतिसर्यायियाम्यायक्षेम्यायचनमोनमः॥९७॥नमःसोमायरुद्रायताम्रायअरुणायच॥नमःशं
गायशान्तायपशूनांपतयेनमः॥९८॥नमः उग्रायभीमायनमोअग्रेवधायच॥नमोदूरेवधायाथहन्त्रेतु
भ्यंहनीयसे॥९९॥तारायप्रणवायाथशंभवेचमयोभुवे॥नमस्तेशंकरायाथनमोमयस्कारायच॥१००॥नमः
331 शिवायशांतायनमःशिवतरायच॥नमस्तीर्थ्यायकूल्यायपार्यावार्यायतेनमः॥१॥नमःप्रतरणायाथनमः
श्चोत्तरणायच॥आतार्यायचलाद्यायशष्प्यफेन्यायतेनमः॥२॥सिकत्यायप्रवाह्यायइरिण्यप्रपथ्यायच॥
नमःकिंशिलायाथक्षयणायकपर्दिने॥३॥नमोगोष्ठ्यायगृह्यायपुलस्त्यायनमोनमः॥नमस्तल्प्या
यगेह्यायनमःकाट्यायतेनमः॥४॥गह्वरेष्ठ्यायचनमोहृदय्यायनमोस्तुते॥निवेष्प्यायनमस्तुभ्यंपांसव्य
रजसेनमः॥५॥नमःशुष्क्यायदेवायहरित्यायनमोनमः॥नमोलोप्यायोलप्याय ऊर्व्यसूर्म्यायतेनमः॥६॥
पर्ण्यायपर्णशद्यायगुरमाणायतेनमः॥नमोअभिघ्नतेतुभ्यंनमआखिदतेनमः॥७॥नमःप्रखिदतेतुभ्यंकि
रिकेभ्योनमोनमः॥देवानांहृदयेभ्यस्तेविक्षीणेभ्योनमोनमः॥८॥विचिन्वत्केभ्योनमोमीवत्केभ्यएवच॥९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 पेकवचयुक्ताय अंग्वसस्पतये नमः ॥९॥ दरिद्रदारिणे तुभ्यं नमस्ते नीललोहित ॥ नमस्ते तवसे तुभ्यं क्षय- ईशाना०द्वा
 द्वीरायते नमः ॥११०॥ नमस्ता त्वं विधेम्यद्य शिवां तां तनुवं शिव ॥ घोरा शान्ता तनूतेद्य प्र पद्ये तनुवौ शिव ॥११॥ अ०३
घोरां तांघ तनुवीह्नि: सर्वयज्ञेषु पूज्यते ॥ नमस्कारेण तन्वन्नो प्रयामि शरणं हर ॥१२॥ रुद्रोवा रस षयत्ना निःय
जुर्भिः प्रवदाम्यहम् ॥ अहं मति पदे मन्त्रैः तद्रूपान् रुद्रसत्तमान् ॥१३॥ नमस्करोमि तद्रूत्तान् पृथिव्यप्सु सदो गणा
न् ॥ दिव्यंतरिक्षतीर्थस्थान् वातवर्षिशरानहम् ॥१४॥ अभक्तान्देवदेवस्य रुद्रजं भेदधाम्यहम् ॥ यो रुद्रो अग्नि
मध्यस्थो अप्सु ओषधिषु स्थितः ॥१५॥ यो रुद्रो विश्वमध्यस्थो तस्मै सर्वात्मने नमः ॥ हिरण्यबाहुर्देवे
शो हिरण्यतनु रीश्वरः ॥१६॥ अम्बिकायाः पतिः शंभुः उमायाः पतिरीश्वरः ॥ यज्ञेषु तद्धविः शेषं
बु शिवलिंगे पुरस्थितम् ॥१७॥ तद्रूपामतवादैव यन्निवेदितमीश्वरः ॥ स्तनंधयं महान्तं मे गावोश्वा पु
रुषा मम ॥१८॥ मावधीस्त्वं महादेव मां पाहि तनुदेव माम् ॥ कृतिं वसानो हस्ते त्वं विभ्रद्वाणं धनुर्वरम् ॥
॥१९॥ आगच्छ देवदेवेश शरणं मामव प्रभो ॥ नमस्ते हरसे इत्वरोचिषे शोचिषे नमः ॥१२०॥ यत्र त्वं व
सनीशानः नमो यत्र निषीदसि ॥ तस्या दृप्रधितं क्षं क्षेष्ठोऽयं च गवां पतिः ॥२१॥ नमसा तं प्रपन्नो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मिसर्वदाशिवमेवहि ॥ त्वमेव यजतक्षिप्रं हे देवा दक्षसंयुताः ॥२२॥ प्रसादयध्वं देवेशं हविषा मखसत्तमे ॥
यद्यसत्यं मयोक्तं चेन्मम मूर्धा पतिष्यति ॥२३॥ ये न शृण्वंति मे वाचं तेषां मूर्धा व्यसंपतेत् ॥ सत्यं सत्यं पुनः स
त्यमुद्धृत्य भुजमुच्यते ॥१२४॥ इत्युक्त्वा संस्थितस्तूष्णीं यजुर्वेदः सुराग्रतः ॥ ॥ सूत उवाच ॥ ॥ प्र
शंसामि सामिप्रभाधामसोमप्रशस्तैकमस्तं सदा शूलहस्तम् ॥ विशस्तांधकारमहस्तं सुहेमप्रतीकाशवा
३१० मार्धरामं भजेऽहम् ॥१२५॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे ऋग्वेदयजुर्वेदकृतरुद्र-
स्तुतिर्नाम त्रिंशोऽध्यायः ॥३॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥
॥ श्रीसत्युवाच ॥ ॥ शृण्वन्तु ब्रह्मविष्ण्वाद्याः मुनयो दक्षसंयुताः ॥ सामवेदो वदत्येष परमार्थतया वचः ॥१॥ ॥ श्रीस्कन्द उवाच
॥ तदा सत्या वचः श्रुत्वा सामवेदोऽब्रवीत्तदा ॥ मौलिबद्धांजलिपुटः उत्थाय सुरसन्निधौ ॥२॥ ॥ श्रीसामवेद उवाच ॥
अग्निरूपो महादेवो मामायातु सवीतये ॥ हव्यदातारमीशानं हव्यभोक्तारमीश्वरम् ॥३॥ गृणामि वचसा साम्नामनसैव
महेश्वरम् ॥ सवितुर्भासकं तेजो भर्गमेवमुपास्महे ॥४॥ सधियां सर्वजन्तूनां यो वः सम्यक्प्रचोदयात् ॥ भूर्भुवस्स्वः
तथा सत्यं स एव परमेश्वरः ॥५॥ तद्वो गायामि देवेशं पुरुषं परमेश्वरम् ॥ आविराजिमेवेशमध्वरस्य महेश्वरम् ॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ होतारं सत्ययजं देवं रोदस्योरीश्वरं परम्॥ अग्निमेवविरूपाक्षंमाण्त्वमीश्वरम्॥७॥ हिरण्यरूपंदेवेशं कृणुध्वमवसेसुराः॥ अ ईशा० द्वा०
.. १२ धीपतिर्मित्रपतिः शिवक्षेत्रपतिः सुराः॥ शिवोधनपतिः शंभुः सुवः पतिरपीश्वरः॥८॥ नमस्तस्मै महेशाय नमस्तस्मै कपर्दिने॥ अ०४
॥९॥ त्र्यम्बकाय नमस्तस्मै ऋत्व्येभ्यश्च नमो नमः॥ अन्नाय च नमो नित्यं अन्नाधिपतये नमः॥१०॥ एकाक्षायाक्षपन्नाय रुद्राय त्रिस
दन्विते॥ संवृते विवृते चैव प्रत्यश्राव्ये नमो नमः॥११॥ ऋत्व्येभ्यश्च विरिंचेभ्यः मृडाय च नमो नमः॥ मयि मन्युं क्षमस्वेश दोहं गायामि
शङ्कर॥१२॥ इडेभां तवं देवेश मां रक्षस्व महेश्वर॥ त्वामर्चयामि विश्वेशं परमात्मानमीश्वरम्॥१३॥ य इदं विश्वभूतं च त्वय्येवल
यमेष्यति॥ नमो नमस्ते देवाय नमस्तेस्तु सदा मम॥ चन्द्ररूपाय च नमो शुभ्ररूपाय ते नमः॥१४॥ मखाय च नमस्तुभ्यं ओजसे ते न
मो नमः॥ सहसे ते नमस्तुभ्यं ऋतवे ते नमो नमः॥१५॥ बृहते ते नमस्तुभ्यं सुराय च नमो नमः॥ ज्योतिषे ते नमस्तुभ्यं त्वां दधे हृद
ये सदा॥१६॥ एभिर्नामभिरेवेशं स्तोभैर्गायामि शङ्कर॥ ओह इत्वा महादेवं हवामि परमेश्वरम्॥१७॥ सते वाजं महादेव
करवामि समर्चनम्॥ ॐ वाक् तव भावेश सर्वभासकरा प्रभो॥१८॥ सोमोऽयं जनिता देवः पर्वते शंकरः स्वयम्॥ सोमो० देवो
मतीनां परमेश्वरः॥१९॥ सोमो० देवो दिवः शङ्कर ईश्वरः॥ सोमो० देवो पृथिव्याः परमेश्वरः॥२०॥ सोमो० अग्नेः साक्षा
न्महेश्वरः॥ सोमो० सूर्यस्य भव ईश्वरः॥२१॥ सोमोऽयं० इन्द्रस्य च सदाशिवः॥ सोमो० विष्णोश्चापि त्र्यंबकः॥२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एषांतरा महादेवो आदित्ये दृश्यते विभुः ॥ हिरण्यश्मश्रुरीशानो हिरण्मय सुकेशवान् ॥ २३ ॥ सर्व एव सुवर्णोऽयं शिवो ह्या
प्रणरवात्सुराः ॥ सीमाभूमा महानात्मा विश्वरूपो महेश्वरः ॥ २४ ॥ कं खं ब्रह्मेश्वरो ह्येष महादेवः प्रकाशते ॥ वैश्वानरात्मा
त्रिमधुः त्रिसुपर्णो ह्यतींद्रियः ॥ २५ ॥ अपावृतं ततो द्वारं सदा पश्यन्ति सूरयः ॥ विराट् स्वराट् तथा संम्राट् भगवान् रुद्र एव हि ॥
युञ्जे त्वत्पदयोर्वाचं गायत्र्याशत वर्त्तनम् ॥ माहेन्द्रात्मा वामदेवो ज्येष्ठो राज्ञां (जा) न हिं कृतः ॥ २७ ॥ वैरूप वैश्वरूपात्मा सर्वा
३५। त्मा परमेश्वरः ॥ महावैराज सुप्रीतो वैश्वामित्रस्तुतं शिवः ॥ २८ ॥ अष्टादंष्ट्र एव प्रीतो एक एव महेश्वरः ॥ यजध्वं श्रीमहा
देवं लभध्वं मुक्तिमुत्तमाम् ॥ २९ ॥ सत्यं मद्वचनं देवाः महादेवोऽस्य भागभुक् ॥ प्रयात शरणं देवाः स दक्षा यूयमीश्वरम् ॥
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा मौनमातिष्ठत्साम वेदस्तदा मुदा ॥ सहस्र
शाखो द्युतिमान् शिवप्रियकरः सदा ॥ ३१ ॥ ॥ सत्युवाच ॥ ॥ वद त्वमिहाथर्वण वेद सत्यं वदाधुना ॥ शृण्वतां
सर्व देवानां यत्ते हृद्गतमादरात् ॥ ३२ ॥ स सत्या वचनं श्रुत्वा वेदोऽथर्वोऽब्रवीत्तदा ॥ मौलिबद्धांजलिपुटो तदा तत्र मनी
षितम् ॥ ३३ ॥ ॥ अथर्वणवेद उवाच ॥ ॥ यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः ॥ यो वै० यश्च वि
ष्णुस्तस्मै वै नमो नमः ॥ ३४ ॥ यो वै रु० यश्च रुद्रस्तस्मै वै नमो नमः ॥ यो वै रु० या चोमा तस्मै वै नमो नमः ॥ ३५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिवरह०१२ योवै रुद्रः सभगवान्यश्चविनायकस्तस्मै वै नमोनमः ॥ योवै रुद्र० यश्चस्कन्दस्तस्मै वै नमोनमः॥ ३६ ॥ योवै ईशाना०द्रा०
१३ रुद्र० यश्चेन्द्रस्त० ॥ योवैरु० यश्चाग्निस्तस्मै० ॥ ३७ ॥ योवैरु० यश्चवायु० ॥ योवै० यश्चवरुणस्त० ॥ योवै० यश्च अ० ४
यम० ॥ ३८ ॥ योवै० यश्चनिर्ऋ० योवै० ॥ योवै० यश्च ईशान० योवै० ॥ ३९ ॥ योवै० यश्चकुवेर० ॥ ४० ॥ योवै० यश्चसूर्य० ॥ योवै०
यश्चसोमस्त० ॥ ४१ ॥ योवै० यानिचनक्षत्राणि० ॥ योवै० यश्चाष्टौग्रहा० ॥ ४२ ॥ योवै० येचऋषय० ॥ योवै० यश्चाष्टौव
सव० ॥ ४३ ॥ योवै० येचद्वादशादित्या० ॥ योवै० येचएकादशरुद्रा० ॥ ४४ ॥ योवै० याचपृथिवी० ॥ योवै० याश्चाप० ॥
॥ ४५ ॥ योवैरुद्रः सभगवान् यश्चतेजस्तस्मैवैनमोनमः ॥ योवै० यश्चवायु० ॥ ४६ ॥ योवै० यश्चाकाशं० ॥ योवै० या
चभूमी० ॥ ४७ ॥ योवै० यश्चभुवः० योवै० यश्चसुव० ॥ ४८ ॥ योवै० यश्चमह० ॥ योवै० यश्चजन० ॥ ४९ ॥ यो
वै० यश्चतप० ॥ योवै० यश्चसत्यं० ॥ ५० ॥ योवै० येचप्राणा० ॥ योवै० यश्चमन० ॥ ५१ ॥ योवै० यश्चसर्वेन्द्रिया
णि० ॥ ५२ ॥ योवै० यश्चकाल० ॥ योवै० यश्चमृत्युस्त० ॥ ५३ ॥ योवै० यश्चभूतं भविष्यत्तस्मै वै नमोनमः ॥ ओ
मादावन्तेच भूर्भुवः स्वस्त्रिरो कृतिः ॥ ५४ ॥ ब्रह्मैक त्वं त्रिधोर्ध्वं त्वं गतिः पुष्टिर्महेश्वरः ॥ विश्वं च विश्वातीतस्त्वं
हुतं महुतमेवच ॥ ५५ ॥ कृतं चाकृतमेतेच परमं च परायणम् ॥ नारायणादिजनको अर्यम्णो वरुणस्य हि ॥ ५६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनितात्वंतथावायो ः द्यौर्वा भूम्योर्महेस्वरः ॥ सर्वेशःसर्वसाक्षीचसर्वएव त्वमेवहि ॥ ५७ ॥ अग्राह्यः सर्वभूते
षुसर्वेन्द्रियगुणान्वितः ॥ अलिङ्गोस्यशरीरस्त्वंव्यापकश्च सनातनः ॥ ५८ ॥ वामनं त्वां महादेवं सर्वे देवा उपास
ते ॥ त्वत्तो जातं जगच्छंभो स्थितं त्वय्येव लीयते ॥ ५९ ॥ त्वत्तो नास्तिपृथक् किंचिन्न भिन्नं परमार्थतः ॥
३७२ नेहनानास्तिकिंचिद्धे त्वदधिष्ठितमेवहि ॥ ६० ॥ त्वामविज्ञापदुर्मेधाः कृतकृत्योऽभिमन्यते ॥ सर्वभूता
तिगश्चात्माकोशातीतोमहेश्वरः ॥ ६१ ॥ महाग्रासः स एवेशो ब्रह्मक्षत्रं तदोदनम् ॥ कालकालस्यदेवस्य मृत्यु
रेवोपसेचनम् ॥ ६२ ॥ ब्रह्मपुच्छं प्रतिष्ठाच शान्तिरक्षरमेवच ॥ हृदयं पुरुषो रुद्रोगतिस्त्रोमात्राः परस्तुसः ॥ ६३ ॥
ओंकारप्रणवो व्यापी अनन्तो व्यापको विभुः ॥ तारं सूक्ष्मं वैद्युतं चशुक्लं सर्वशरीरगः ॥ ६४ ॥ ईशानोभगवा
न्रुद्रोमहादेवः स एवहि ॥ परंब्रह्मपरंधाम परः पारः परायणः ॥ ६५ ॥ विशोको निर्गुणश्चायंमहात्माविश्वतो
मुखः ॥ सर्वान्तरः सर्वसाक्षी एषरुद्रो महेश्वरः ॥ ६६ ॥ स एव कर्त्ता जगतां नान्यो विष्णुर्वास्यः सुराः ॥ नचब्र
ह्मानचैवेन्द्रो नाग्निः सूर्योऽनिलः सुराः ॥ ६७ ॥ यस्य शक्तिर्विचित्रास्य जगतः कारणं हरः ॥ हिरण्यगर्भं पुर
तो जायमानं स पश्यति ॥ ६८ ॥ यस्माद्विष्णुः समुत्पन्नोरुद्रस्तस्माद्जायत ॥ सविश्वं विश्वजातं यत्स्थास्नु ग

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 च्छसुरोत्तमाः ॥ ६९ ॥ यतो ब्रह्मेशविष्ण्वीन्द्राः सह भूतैः प्राजज्ञिरे ॥ यदा चर्मवदाकाशं वेष्टयिष्यथ हे सुराः ॥ ७० ॥ 
 तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ यदा तमस्तं न दिवा नैव रात्रिर्महेश्वरः ॥ ७१ ॥ न सन्न चासत्स शिवः एक 
एव हि केवलः ॥ विश्वस्मादुत्तरो देवः स हि विश्वाधिकः शिवः ॥ ७२ ॥ तस्य स्वरूपमस्माभिर्वक्तुं द्रष्टुं न शक्यते ॥ भवन्तो
मायया तस्य मतिकल्पं सुरासुराः ॥ ७३ ॥ मुह्यन्ति तत्प्रसादेन विमुक्ताश्च भविष्यथ ॥ भजध्वं हयमेधेन हे सुरा वृषभ
ध्वजम् ॥ ७४ ॥ सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः ॥ ध्येयः पूज्यो नमस्यश्च ईज्यः स परमेश्वरः ॥ ७५ ॥ समा
सं मे वचोजालं सत्यं सत्यं न चान्यथा ॥ एक एव हि विश्वात्मा भगवान् रुद्र एव हि ॥ ७६ ॥ सर्वेषां पतिरीशानः यूयं हि
पशवः स्मृताः ॥ तन्मायापाशबद्धान्वो मोचयिष्यति वै सुराः ॥ ७७ ॥ तमेव शरणं यात क्षिप्रमद्यैव सत्तमाः ॥ प्रसादयध्वं
वरदं महादेवं सतीपतिम् ॥ ७८ ॥ एक एव महान् रुद्रः सर्वैः पूज्यो न संशयः ॥ अस्मिन्नर्थे सुरश्रेष्ठाः संतप्त पर
शुं दधे ॥ ७९ ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ इत्युक्त्वाथर्वणो वेदः
तूष्णीमास तदा मुदा ॥ तत्र देवैः सदक्षोऽपि निर्विण्णो मुनिभिः स्थितः ॥ ८० ॥ अच्युतो मुखोऽश्रुवदनो विष्णुमी
क्षन्मुहुर्मुहुः ॥ एवं ते वेदवाचा मुनिगणसुरता मूकभावं प्रपन्नाः ॥ सन्नादुःखाति भीरोरतुलनतिहितप्राज्यवाचा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ममीषाम्॥ तत्रैवामिषलोलुपा इव झषा पुषादयः संस्थिताः॥ नोचुः किंचन कंचनं प्रति सुराः तेवं चना मास्थि
ताः॥ ८१॥ ॥इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे सामवेदाथर्ववेदकृतस्तुतिर्नाम चतुर्थोऽध्यायः॥
॥४॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसूत उवाच॥ ॥चतुःसाक्षिकमेवेदं शृणुध्वं वचनं सुराः॥
यजध्वं हयमेधेन लभध्वं मुक्तिमुत्तमाम्॥ १॥ स्तुतमीशमथैकेन ऐक्येः शास्यत शङ्करम्॥ तं गायन्ति महादेवं सदाग
३५३ यत्रिणोऽखिलाः॥ २॥ अर्चितं विल्वपत्राद्यैर्लिङ्गे देवं सनातनं॥ सोमादिभिर्हविर्भिश्च सोमं यजत सत्वरम्॥ ३॥
ब्रह्मणस्पतिमीशानं सर्वाधीशं महेश्वरम्॥ त्रियम्बकं महादेवं सुगन्धिं पुष्टिवर्धनम्॥ ४॥ यजन्तु पुष्ट्यै भवतां तु
ष्टो भवति शङ्करः॥ नोचेद्रुष्टो भवेद्देवो भवस्तु सुरसत्तमाः॥ ५॥ शिपिविष्टेष्ट मनसः तुष्टा यूयं भविष्यथ॥ माया
हं प्रकृतिः साक्षात्तस्य देवस्य हे सुराः॥ ६॥ सर्वव्यापी परमेशानः शाश्वतो विश्वनायकः॥ मन्मायामोहिता यूयं न
जानथ महेश्वरम्॥ ७॥ अहं वः प्रीतिकृन्माता पिता शंकर ईश्वरः॥ आवां संपूजितौ यत्र जगत्पूजित
मेव वः॥ ८॥ यतो ब्रह्मेशविष्ण्विन्द्रा जज्ञिरे देवसत्तमाः॥ विष्णोर्जिष्णोस्तथा भूष्णोः प्रोक्तं यत्परमं पदम्॥
॥ ९॥ शिवप्रसादमात्रस्य साहाय्यं नैव कश्चन॥ शिवक्रोधाग्निदग्धस्य सहायो नात्र कश्चन॥ १०॥ यदि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 वेदाः प्रमाणं वो क्षिप्रं यजत शंकरम् ॥ मा वः कालात्ययो भूयात् हविषोऽत्र पिनाकिनः ॥११॥ यजस्विष्टकृतो देवं शि इशानं

 पिविष्टं महेश्वरम् ॥ दुरिष्टं यदि ते किंचित् स्विष्टं शिवकृपावशात् ॥१२॥ स्विष्टमप्यत्र तद्धीनं दुष्टं भवति दूषितम् ॥ त 

स्माद्विशिष्टं सर्वेषां शिपिविष्टं यजन्तु वः ॥१३॥ शिष्टास्तेन भवन्त्वत्र विशिष्टाः शिवसंमताः ॥ नो चेन्नष्टो भवेद्य

ज्ञः भ्रष्टोऽप्यत्र हि दीक्षितः ॥१४॥ तद्वीक्षणाग्निदग्धोऽथ दक्षः क्षिप्रं भविष्यति ॥ मुग्धा यूयं विदग्धाङ्गाः तत्काला

नलकीलिताः ॥१५॥ भविष्यथ सुरश्रेष्ठा मा चैवं विपदोऽत्र हि ॥ भक्त्यैव पूजितः सांबः सतां संसारनाशकृत् ॥१६॥

भक्त्याराध्य महादेवं विमुक्तो भवबन्धनात् ॥ अगस्त्यभृगुधौम्याद्या मार्कण्डेयदधीचिकाः ॥१७॥ सुरासुराश्च म

नवो मुनयोऽमी तपस्विनः ॥ भस्मरुद्राक्षसहिता न वदन्ति किमुत्तरम् ॥१८॥ शिवलिंगार्चनरताः शिष्टा यजन्ते महेश्वरम् ॥

भवभक्ता महात्मानः ते वदन्त्वत्र साम्प्रतम् ॥१९॥ यत्रास्थिताः सदा सभ्याः सभापतिपदार्चकाः ॥ न तत्रासभ्यवार्त्ता

का भविष्यति कदापि हि ॥२०॥ न वदन्ति च ये धर्मं विद्वांसोऽपि बहुश्रुताः ॥ सभासु च न ते सभ्या इभ्या अपि चरा

सभाः ॥२१॥ सर्वेऽप्यमुनयो यूयं दक्षमुन्मार्गवर्तिनम् ॥ याजयन्ति कथं मोहाद्द्रवन्तोऽथार्थलिप्सया ॥२२॥ अ

याज्ययाजकानां तु पापमंते महद्भवेत् ॥ वार्यतां वार्यतां दक्षो दीक्षितोऽप्ययमुत्पथः ॥२३॥ उन्मार्गवर्तिनं मूढं तार

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यन्ति कृपालवः ॥ अत्रास्य ऋत्विजो भूत्वा नूनं नैनः स्पृशत्विह ॥२४॥ समान सुखदुःखाश्च भवन्तस्तेन सत्तमाः ॥ अ
नेन माविनश्यन्तु वा यतामयमुद्धतः ॥२५॥ ॥श्री स्कंद उवाच ॥ ॥ इत्थं सत्या वचः श्रुत्वा मुनयो ऋत्विजोस्य
हि ॥ ऊचुस्ते म्लान वदनाः दक्षमेव प्रजापतिं ॥२६॥ ऋत्विज ऊचुः ॥ ॥ वेदानां वचनं दक्ष प्रमाणं चात्र सत्तम ॥
सर्वभागभुगीशानः प्रभुः प्रीणाति विश्वभुक् ॥२७॥ यजस्वोपसदा देवं महादेवं सहामरैः ॥ पुरा त्रिपुरनाशार्थं भा
३१५ गो दत्तो महेश्वरे ॥२८॥ तमेवोपसदा देवं यज दक्ष सुखी भव ॥ ॥सूत उवाच ॥ ॥ऋत्विक् वाचं तदा श्रुत्वा द
क्षो वैक्षत् क्रुधेव तान् ॥ निर्दहन्निव चक्षुभ्यां वाच मूचे द्विजांस्तदा ॥२९॥ ॥ दक्ष उवाच ॥ ॥नाहमोपसदाध्य
क्षं सदाभिक्षाशनेरतम् ॥ यजामि विष्णुमेवाहं स्विष्टकृद्भागिनं चतम् ॥३०॥ करोमि वेद वचनं समुल्लंघ्य क्रुधा
ग्निना ॥ विष्णुरेष सदा पूज्यः सदा गतिरयं मम ॥३१॥ हित्वेन मम रश्रेष्ठं न रुद्रो भागमर्हति ॥ इति तद्वचनं श्रुत्वा दधी
चिः क्रोधवह्निना ॥३२॥ ज्वलन्निव तदोत्तस्थौ यथा प्राज्याज्य तर्पितः ॥ ज्वलच्छिखाशिखो वह्निस्तदा मध्यस
भं मुनिः ॥३३॥ प्राह दक्षं पुरस्कृत्य सुराणामुपशृण्वताम् ॥ ॥ दधीचिरुवाच ॥ ॥ ब्रह्मणो मानसः पुत्र दक्ष
दक्षोऽसि दीक्षितः ॥ कस्मान्न हूयसे रुद्रं साक्षादध्वरनायकम् ॥३४॥ देवदेवं विरूपाक्षं यज्ञेशं परमेश्वरम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवाह०१२ कस्मान्न हूयसे रुद्रं साक्षादध्वरनायकम् ॥३५॥ विश्वतश्चक्षुषं देवं विश्वतोमुखमीश्वरम् ॥ कस्मान्न हूय० ॥३६॥ ईशा० द्वा०
१६ विश्वाधिकं महादेवं विष्णुब्रह्मादिनायकम् ॥ कस्मान्न हूय० ॥३७॥ विश्वजातेषु पशुषु स कथं पशुपो भवेत् ॥ अ० ९
कस्मान्न हूय० ॥३८॥ यन्मायामोहिताः सर्वे विष्णुब्रह्मादयः सुराः ॥ कस्मान्न हूय० ॥३९॥ भवानपि महादेवं किं
न जानासि शंकरम् ॥ कस्मान्न हूय० ॥४०॥ ब्रह्मणोऽपि शिरश्छिन्नं महेशेन पिनाकिना ॥ कस्मान्न० ॥४१॥
ब्रह्मणेऽस्मै ददौ वेदानीशो वेदान्तसंस्तुतः ॥ कस्मान्न० ॥४२॥ विष्णवेऽस्मै ददौ शंभुः चक्रं दैत्यविनाशकृत् ॥ क
स्मान्न० ॥४३॥ विष्णवेऽस्मै महालक्ष्मीं भार्यात्वेन ददौ हरः ॥ कस्मान्न० ॥४४॥ वैकुण्ठस्याधिपत्यं च नीलक
ण्ठो ददौ पुरा ॥ कस्मान्न० ॥४५॥ गर्वोद्रिक्तो यदा विष्णुः अभूत् लोकविनाशकृत् ॥ मत्स्यवाराहसिंहाद्यैर्देहै
र्लोकापकारकः ॥४६॥ स शिक्षितश्च बहुधा महादेवेन शूलिना ॥ तदा यं कोपदग्धस्य महादेवेन रक्षकः ॥
॥४७॥ कोवा यं विष्णुरेवाद्य रक्षकस्ते कथं भवेत् ॥ मृगेन्द्रनखराघातं जंबुकः किं सहिष्यति ॥४८॥ यज्ञेत्रेः
धिः कृतो विष्णुः सह लक्ष्म्याति कोपनैः ॥ शापास्त्रैर्दारितो विष्णुः अस्त्रैः शिवगणैरपि ॥४९॥ विष्णोः कपालं
निर्भिद्य पपौ रक्तं स भैरवः ॥ विष्वक्सेनो गणोऽप्येवं विष्णोः संपश्यतः पुरः ॥५०॥ इषीकाप्रोतलीक्षेव शूलप्रो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्तदाकरोत् ॥ इन्द्रस्यास्य भुजस्तंभो येनाकारि पिनाकिना ॥ ५१॥ स नक्रः ससुरैः पूर्वं गुरुणेशः प्रसादितः ॥ त
दामुमोचैव हसन्महेशो भक्तवत्सलः ॥ ५२॥ यमोऽयं निहतः पूर्वं शिव पादाग्र ताडितः ॥ मृकंडुतनयस्यास्य हिता
र्थं शूलपाणिना ॥ ५३॥ वायुरायासितः पूर्वं तृणाग्रचालनेऽप्यपि च ॥ महादेवस्य पुरतो नादहत्तृणमप्ययम् ॥ ५४॥ अ
ग्निः शिखावलीयोऽयं त्वद्धविर्भक्षणे रतः ॥ चन्द्रोऽयं तव शापेन यक्ष्मरोगार्दितः पुरा ॥ ५५॥ प्रसादितो महेशेन सु
धाधामैकमौलिना ॥ सूर्योऽयं नेत्रपात्रत्वमगच्छच्छंकरस्य हि ॥ ५६॥ कुबेरोऽप्ययमीशस्य प्रसादात्सख्यमाप्तवा
३५ न् ॥ वरुणो जलरोगार्त्तो महेशेन प्रसादितः ॥ ५७॥ वसवोऽपि महेशेन दयया संप्रसादिताः ॥ आदित्या मरुतः सर्वे श
केण सह भागिनः ॥ ५८॥ चकार परमेशोऽयं प्रसादेन महेश्वरः ॥ भिषजावश्विनौ देवौ सौम्यौ सोमप्रसादतः ॥
॥ ५९॥ एवं प्रसादिता देवा महेशेन दयालुना ॥ रुद्रसारूप्यमापुस्ते महेशस्य प्रसादतः ॥ ६०॥ तथान्ये मुनयः सिद्धाः महे
शेन प्रसादिताः ॥ तत्प्रसादाद् यकर्माणि कुर्वन्ति मुनयः सुराः ॥ ६१॥ तस्य लिंगं सदाकालं पूजयंति सुरासुराः ॥ पशु
भूतेषु पुंस्त्वासु कथं पशुपतिः शिवः ॥ ६२॥ गण्यते देवदेवोऽसौ महादेवः सनातनः ॥ विश्वाधिको महारुद्रः पूजनीय
स्तपेज्यया ॥ ६३॥ पूज्योऽयं देवदेवेशः सर्वेषां सर्वकर्मभिः ॥ तस्य प्रसादेन तव सफलोऽस्तु मनोरथः ॥ ६४॥ तत्प्रसादे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 न सर्वस्य भुक्तिमुक्तिर्हि सिध्यतः ॥ तस्मान्माविपदः सन्तु श्रुणु मद्वचनं मुदा ॥ ६५ ॥ रुद्रक्रोधाग्निदग्धस्य तवनान्यत् परा 
१८ यणम् ॥ न ब्रह्मापं नैव विष्णुः न चात्र सुरपुंगवाः ॥ ६६ ॥ प्रभविष्यन्ति साहाय्ये तव दक्ष मखेऽधुना ॥ अपूज्यपूज अ० ९
नाद्दक्ष पूज्यानां चाप्यपूजने ॥ ६७ ॥ नज्यायसीं गतिं विन्देदिज्यया याज्यएव हि ॥ भविष्यति मुनिश्रेष्ठैः इत्युवाच
दधीचकः ॥ ६८ ॥ ॥ सूत उवाच ॥ दधीचवचनं श्रुत्वा दक्षः क्रुद्धोऽभ्यभाषत ॥ संवीक्ष्य विष्णुब्रह्माणौ सुरानन्या
न्सतीं तथा ॥ ६९ ॥ ॥ दक्ष उवाच ॥ ॥ किं मे रुद्रेण कर्तव्यमभव्येन पिनाकिना ॥ इज्योऽयं विष्णुरेवात्र सुरास
र्वे ममाधुना ॥ ७० ॥ गच्छ वा त्वं यथा जोषं न सदस्योऽसि मे रिपुः ॥ तद्दक्षवचनं श्रुत्वा महर्षिः शांभवस्तदा ॥ ७१ ॥
सह शिष्यैस्तदोत्तस्थौ धून्वन्वासोऽब्रवीत्क्रुधा ॥ दधीचिमुनिरुवाच ॥ ॥ न यत्र पूज्यते रुद्रो भगवाञ्छंकरो
यदि ॥ तत्र यान्त्येव विपदः संपदो नैव संप्रति ॥ ७२ ॥ ध्वस्तो भविष्यति मखो महादेवस्य मन्युना ॥ सर्वैः सुरासुरैः सा
र्धं देवैश्च मुनिभिः सह ॥ ७३ ॥ विश्रुतश्रुतिवाक्यं च नैनं ते रोचतेऽधुना ॥ दण्डोऽत्र संपतेदीशाद्दहीशवरमन्युना
न विष्णुर्न विधाता च रक्षको हि तत त्राता हि ॥ पश्यामि सिंहस्य पुरो क्रोष्टुका क्रोशवद्वृथा ॥ ७५ ॥ इत्युक्त्वा नि
र्गतस्तस्माद्यज्ञवाटात्तदा मुनिः ॥ वेदाः सप्रणवास्तस्माच्छन्दांसि मुनयस्तथा ॥ ७६ ॥ शांभवा ये मुनिश्रेष्ठा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुर्वासा जमदग्निकाः ॥ शेपुर्दक्षं तदा तत्र दक्षं चाविनयोद्धतम् ॥ ७७ ॥ ॥ मुनय ऊचुः ॥ ॥ नैवायं ते भवेन्
मन्युः शिवमन्युप्रदूषितः ॥ गच्छामोऽस्माद्यज्ञवाटात्क्षिप्रं दक्षो विनश्यतु ॥ ७८ ॥ सहैव ब्रह्मविष्णुभ्यां सुरैरन्यैश्च भूसु
रैः ॥ इत्युक्त्वा निर्गतास्तत्र शांभवा ये मुनीश्वराः ॥ ७९ ॥ तत्र क्रुद्धा सती वाचमवोचत् क्रोधवीक्षणैः ॥ ॥ सत्युवाच ॥
यदा न दित्ससे भागं न लिप्सा ते सुरेश भवेत् ॥ सहैभिरसुराकारैः सुरैर्नाशमवाप्नुयात् ॥ ८० ॥ इत्युक्त्वा योगमास्थाय द
दाहात्मतनुं सती ॥ तदा हाहाकृतस्तत्र सुरास्ते विस्मिताभवन् ॥ ८१ ॥ विष्णुब्रह्मादयो दक्षा भयकंपितविग्रहाः ॥ ग्रहास्ते
विग्रहं चक्रुः ववुर्वाताः सशर्कराः ॥ ८२ ॥ ववृषुः शोणितं मेघाः जगर्जुः क्रूरविद्युतः ॥ अपतन् प्रालुठन् भूमिः चेलुर्न
द्यश्च सागराः ॥ ८३ ॥ एवमुद्भ्रान्तविभ्रान्ता अभवंस्तत्र संस्थिताः ॥ दक्षोऽत्र शरणं विष्णुं मयासीद्भयमोहितः ॥ ८४ ॥
सधूमाग्नय एवासन् सुरागंधाः समावृताः ॥ तदा भयसमाविष्टाः कष्टा आसन् सुरा द्विजाः ॥ ८५ ॥ दक्षोऽप्यजाक्षव
त्तत्र विष्णुमीक्षत्तदाभिया ॥ अपशकुनं शकुना परिभ्रमुः वमुरस्रं रुधिरं मुखेन शब्दैः ॥ अभवाय मखस्य दुःखमेवं प्र
बभौ विशिखोऽभवत्तदानलः ॥ ८६ ॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे सतीदेहत्यागो नाम पञ्चमोऽ
ध्यायः ॥ ५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ चारणानां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 चवदतां आश्चर्यन्नं नभस्थले ।। देहत्यागं तथासत्याः श्रुतिवाक्यं सविस्तरम् ।। १ ।। दक्षावमाननं चापि हृदा पश्यन् 
 महेश्वरः ।। महामन्युर्मन्युनैव ववृधे स्तनादुःखतः ।। २ ।। दक्षमन्युं तदा देवैः हन्तुं चक्रे मतिं हरः ।। जटाजूटात्समुत् 
पाट्य जटामेकां महेश्वरः ।। ३ ।। भूमौ संताडयामास क्रोधेनांधीकृतेक्षणः ।। तदा तत्र जटापाताद्बभूवातीव मन्यु
मान् ।। ४ ।। वीरभद्रोज्वलत्क्रोधो दंष्ट्राक्रूरास्ययुक् तदा ।। महागिरिप्रतीकाश वर्ष्मणा समपद्यत ।। ५ ।। वृत्त
दंष्ट्राकरालास्यो जिह्वयासृक्किणी लिहन् ।। व्यालीव वल्मीकगता जिह्वा चाह्वयती सुरान् ।। ६ ।। तच्छ्मश्रुज
टिलं वक्त्रं शूलहस्तं सभैरवम् ।। करिवृन्तोरुशुण्डाभ बाहुदण्डविराजितम् ।। ७ ।। मकुटेनार्कपर्णेन भास्वत्कु
ण्डलमण्डितम् ।। हारकेयूरवलयैर्भूषितं किङ्किणीगणैः ।। ८ ।। कचाकचित मध्यस्थं खड्गखेटधरं तदा ।। सदं
बुजच्छदारक्तव्यावृत्तनयनोमुहुः ।। ९ ।। त्रिपुण्ड्रविलसत्फालः करालकरवालधृक् ।। सप्रणम्य महादेवमुवा
चानतकन्धरः ।। १० ।। भैरवो दारुणाकारः मृगेन्द्रसमविक्रमः ।। अंजनाद्रिप्रतीकाशो भाविभासितदिङ्मु
खः ।। ११ ।। घनगम्भीरसंभेरीसमरवभरस्तदा ।। ।। भैरव उवाच ।। ।। देवदेव महादेव करुणावरुणा
लय ।। मरुत्पारणहाराद्यं कम्भ्यरानन्तविक्रम ।। १२ ।। मामा ज्ञापय देवेश किमत्र करवाणि ते ।। किंपिबा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्यन्धयः सह तरङ्गावलिघूर्णिताः ॥ १३ ॥ घूर्णितं किं गिरिव्रातं करोमि पदघाततः ॥ किं ब्रह्माण्डमहापिण्डं कोरा
म्यद्य चराचरैः ॥ १४ ॥ भूचक्रमाक्रमं चात्र चित्रं नेत्राग्निना दहन् ॥ किं वासुरासुरव्रातं पातयामि मृतं पुरः ॥ १५ ॥
शीघ्रमाज्ञापयेदानीं मा विलम्बितुमर्हसि ॥ तद्भैरवोरुरभसा वचसा परमेश्वरः ॥ १६ ॥ विप्रयोगेन वै ब्याद्रुः सहैने
व सुव्रताः ॥ तदा शीघ्रतरं स्वाङ्गात्ससर्ज सुरतर्जकान् ॥ १७ ॥ रौम्यान्नामगणश्रेष्ठान् सौम्यान् शिवभावनान् ॥ तु
रंगवरमातङ्गसारङ्गास्यान्मनोहरान् ॥ १८ ॥ काककोकबकाभास्यान्वृकभेकास्यकांस्तथा ॥ वानरसूनराभास्या
397 न् चामरास्यांस्तथा गणान् ॥ १९ ॥ शेषमाहिषवक्त्रांश्च खड्गगोमायुवक्त्रकान् ॥ वृषभास्यान् रासभास्यानिभा
स्यान् कोकिलास्यकान् ॥ २० ॥ एवं गणगणं तत्र दृष्ट्वेशः पुरतः स्थितम् ॥ कोटित्रयेण गणितं नानावेषैकभूषि
तम् ॥ २१ ॥ रूषितं भसितेनैव घोषमाणं मुहुर्मुहुः ॥ त्रिपुण्ड्रफालं रुद्राक्षफणीहारविराजितम् ॥ २२ ॥ असिकार्मुक
निस्त्रिंशखड्गखेटधरं तदा ॥ बाणबाणासनधरं करबाललसत्कटिम् ॥ २३ ॥ कुन्तशान्तारिमुत्कृष्टं प्रणतं पुरत
स्थितम् ॥ सास्त्राविलाक्षः त्र्यक्षस्तान् मुहुरीक्षन्नुवाच तान् ॥ २४ ॥ वीरभद्रं पुरस्कृत्य रुद्रकोटिसमन्वितम् ॥ ॥
॥ ईश्वर उवाच ॥ ॥ वीरभद्र सदाभद्र त्वमास्तु निजयोगणैः ॥ तूर्णं प्रयाहि दक्षस्य यज्ञवाटं सुरैर्वृतम् ॥ २५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 विष्णुब्रह्मादिविबुधैः क्षणाद्विध्वंसयाधुना ॥ तेन मे प्रीतिरतुला मा ते विघ्नोऽत्र संप्रति ॥२६॥ इत्युक्तोऽथ 
 महेशेन वीरभद्रो गणैः सह ॥२६॥ मत्तवारणसंकाशैः ययौ गणगणैर्वृतः ॥२७॥ नत्वा नो श्री महादेवं वीरभद्रो 
नदत् तदा ॥ गणा जगर्जुश्च तदा भ्रामयन्तोऽस्त्रमण्डलम् ॥२८॥ गणैर्वरकृताराव बधिरीकृतदिङ्मुखम् ॥ तन्मख
स्तैरवैस्सार्धं दुर्मुखं समपद्यत ॥२९॥ तदा वाता ववुर्लोके तत्र वै भयशंसिनः ॥ पर्वताश्च व्यशीर्यन्त चकंपे च व
सुन्धरा ॥ ३०॥ मारुतैश्चाप्य घूर्णित्व चिक्षुभे वरुणालयः ॥ अग्नयो नैव दीप्यंत न च भाति प्रभाकरः ॥३१॥ गृहा
श्च न प्रकाशन्ते पेतुर्नक्षत्रपंक्तयः ॥ उल्काकबन्धसहिता पपात मखसंसदि ॥ ३२॥ गणेश्वरैः समारूह्य रथं भद्रो
गिरिप्रभम् ॥ सहस्राश्वं पताकाढ्यं कुंभराजत्सताककम् ॥ ३३॥ गणा समन्वयुस्तत्र विविधायुधपाणयः ॥ गर्जंत
श्चाति हृष्यन्तो भिंदन्तो गां शरावरैः ॥३४॥ शूलमूलैर्गिरिव्रातं धनुष्कोट्यो तसृजंत्यपि ॥ हिमवच्छिखरे र
म्ये हेमशृंगे सुशोभने ॥ ३५॥ यत्र वाटस्तदा तस्य गंगाद्वारसमीपगः ॥ तद्दक्षकनखलं ख्यातं निखिलैरमरैर्वृत
म् ॥ ३६॥ ततः क्षणात्प्रविश्यैव यज्ञवाटं गणेश्वरैः ॥ रामजैः सहितो भद्रः कालाग्निरिव चापरः ॥ ३७ ॥ उवा
च भद्रो भगवान् यज्ञवाटाद्बहिः स्थितः ॥ सर्वामरैर्वृतं तत्र दक्षं विष्णुविधी तदा ॥३८॥ ॥वीरभद्र उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दक्षदक्षोसिनितरांसुरैःसहमुनीश्वरैः॥ एते च ब्रह्मविष्ण्वाद्या मोहितास्ते शिवमायया॥ ३९॥ वाक्याद्देवस्य
भागार्थं समायातस्त्वदन्तिकम्॥ सत्या वियोगदुःखेन भवस्यात्यन्तरोषतः॥ ४०॥ दग्धुं वै प्रेषितश्चा
हं भवान्न च मुनीश्वरैः॥ कृते साहाय्यकृद्विष्णुः निर्गच्छतु मयाऽरणे॥ ४१॥ शंखचक्रधरः शार्ङ्गी
दैत्यसंघादिदर्पहा॥ इत्युक्त्वा यज्ञशालां तां ददाह गणपुङ्गवः॥ ४२॥ फालनेत्रानलज्वाला जालमा
३१० लाभिरिवाहि॥ गणा नंदिनिसोत्साहं दारयन्ति सुरान् मुनीन्॥ ४३॥ त्रिशूलमूलनिर्भिन्नान्निर्विण्णा
न्वाष्पवाष्प्रभिः॥ सिंचंतः स्वानि चाङ्गानि द्विजा देवाः सवासवाः॥ ४४॥ धावन्ति कांदिशीकास्ते विस्र
स्तमुकुटांगदाः॥ स्खलत्पादा पतंतश्च मुक्तकेशैकवाससः॥ ४५॥ वसवश्चासुभिर्हीना निपेतुश्च
पदे पदे॥ मरुतोऽथ खवन्तस्ते गणबाणैर्विदारिताः॥ ४६॥ ससजिह्वश्चलत्जिह्वः शुष्कोष्ठः सृक्किणी
लिहत्॥ विश्वेदेवाश्च सहीनाः पेतुः प्रेताइवाक्षगाम्॥ ४७॥ कुबेरोऽथ विरूपोऽभूद्वरुणः शरणोज्झि
तः॥ वायुरायासयुक्तात्मा भास्करो निष्प्रभोऽभवत्॥ ४८॥ निर्ऋतिर्धृतिहीनोऽभूद्दास्यानित्यमानि
नः॥ सोमो भयामययुतः पितरः कातराभवन्॥ ४९॥ कृतान्तः सभयः कालः संक्रान्तः पूर्ववैरतः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ सुधन्वानो विधन्वानः अभवन्भयमोहिताः ॥५०॥ निर्वीर्याश्चाभवन्सर्वे गन्धर्वाश्चैव ये वर्जिताः ॥ तर्जिता गण ईशा०द्वा
२० रावेन तत्रैवाप्सरसां गणाः ॥५१॥ विस्रस्तकबरालंबि विगलत्करकंकणाः ॥ धावन्ति विदिशं तत्र सिद्धविद्या अ०६
धरादयः ॥५२॥ किंपुरुषा नागयक्षाश्च दक्षाक्रोशात्प्रदुद्रुवुः ॥ नागा नागाश्च भूनागाः नद्यो विद्याश्चरास्तदा
॥५३॥ हाहाकारकृतास्तत्र भ्रमन्ति परितो मुहुः ॥ धूमसीमासमूहेन शालान्तः संस्थिताः द्विजाः ॥५४॥ विद
ग्धाश्चैव मुग्धाश्च शालादाहेन मोहिताः ॥ वडवानलसंकाशो ज्वालामालानिले युतः ॥५५॥ शारवाशि
खाभिर्वह्निश्च लेलिहानमभुञ्जगत् ॥ धूमज्वालावृता लोका अभवन्नान्धमेदुराः ॥५६॥ मांसानि चैव भक्ष्या
नि अन्नमुच्चावचं बहु ॥ स्रसवन्ति च पानानि सोमाज्यहविषादयः ॥५७॥ वासांस्याभरणान्यत्र सदश्चाहोत्र
लच्छिरवः ॥ गणेश्वरास्य संक्रुद्धा यूपानुत्पाट्य चिक्षिपुः ॥५८॥ प्रस्तोता सह होत्रा च पोत्रा नेष्ट्रा गणे
श्वराः ॥ गंगास्रोतसि चैवाश्वं पशुभिः पातयँस्तदा ॥५९॥ भाण्डानि यज्ञपात्राणि छिन्दन्ति गणपा मु
दा ॥ भक्ष्याणि तत्रैव पानानि पिबंतो भक्षयन्ति च ॥६०॥ धावंति परितस्तत्र अनुपृष्ठं सुरान्मुनीन् ॥ बि
भिदुः शरवर्षेण हर्षेण महता गणाः ॥६१॥ कुंतशांतान्सुरास्तत्र चक्रुराक्रोशकारिणः ॥ हा हा हेति व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दन्त्यन्ये ताताँ वेति वदंति ते ॥ ६२ ॥ भ्रातर् इ तेति संभ्रान्ता धावन्ति मुनयः सुराः ॥ गात दण्डकमंडलवः खंडिता गणख
ड्गतः ॥ ६३ ॥ चूर्णिताश्चाश्मभिः केचित् घूर्णिताः प्रापतन् क्षितौ ॥ जटाश्चोत्पाट्य गणपाः मुनीनां पातयंस्यधः ॥ ६४ ॥
श्मश्रुभिश्च गणाश्चाष्टौ दन्तौ निष्कासयन्त्यपि ॥ मुनीनां ऋत्विजां तत्र सदस्यानां तदा गणाः ॥ ६५ ॥ हावयन्तं सो
मरसं भृगुं ताड्य कपोलयोः ॥ पातयन्ति मही पृष्ठे निष्ठोऽष्म कुर्वत ॥ ६६ ॥ आखंडलकरं तत्र कार्मुकाक्तैः पूषकृ
कैः ॥ तिलशः खंडयामास संपूर्याक्षिमपातयत् ॥ ६७ ॥ मुकुटेनापविद्धेन पतन्तू र्व्यां स वासवः ॥ लम्बमानो गजपदे
३११ कक्षासक्तपदो लुठन् ॥ ६८ ॥ निस्त्रिंशेन हतस्तत्र वरुणो यादसां पतिः ॥ लुलायेनैव निहतो गणबाणैर्यमस्तदा ॥ ६९ ॥
अर्यमानमर्यावाचा अभयं समयाचत ॥ शराग्रेणोत्किरन्नेत्रे तस्यैते गणपुंगवाः ॥ ७० ॥ वीरभद्रो महातेजाः शक्रं
मुष्ट्यैवताडयत् ॥ भगस्य नेत्रे चोत्पाट्य करजाग्रेण लीलया ॥ ७१ ॥ निहत्य मुष्टिना दंतान् पूष्णश्चाथ न्यपातयत् ॥
तदा चन्द्रमसं देवं पादाङ्गुष्ठेन लीलया ॥ ७२ ॥ शिरो यज्ञस्य तदा चिच्छेद करवालतः ॥ वह्नेर्हस्तद्वयं छित्वा जिह्वा
श्चोत्पाटयद्द्रुतम् ॥ ७३ ॥ निर्गतासून्व संश्चक्रे पादाग्रलिजघातत ॥ विश्वेदेवाश्विनौ तत्र मरुतः पितरस्तथा ॥
॥ ७४ ॥ तेन संताडिताः पादैः गदापात विघूर्णिताः ॥ यमं सदंडं स गणो पादाघातैरथाहनत् ॥ ७५ ॥ जघान तत्र चेशा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 नत्रिशूलेन महाबलम् ॥ पत्नीशालां ददाहास्य क्रोधांतीनां गवामिव ॥७६॥ दक्षपत्न्यास्तु कबरं करवालेन चाह 
२१ सरस्वतीं छिन्ननासामकरोदसिधारया ॥७७॥ क्षतजेनोक्षिता तत्र देवपत्न्यां गनागणम् ॥ विस्रस्तवासाभरणं 
गलद्धम्मिल्लमल्लिकम् ॥७८॥ सस्वेदाश्रुगलद्गन्धमंगरागविरूषितम् ॥ कुरर्य इव क्रोशन्त्यो धावन्ति सुरयोषितः ॥
॥७९॥ त्रयस्त्रिंशत्सुरानेवं ते गणाश्च गणेश्वराः ॥ जघान भगवान् रुद्रः खड्गपट्टिससायकैः ॥८०॥ गदापरिघनिस्त्रिं
शैर्निर्दयमद्य सद्गणैः ॥ एतस्मिन्नन्तरे तत्र वीरभद्रं वचोऽब्रवीत् ॥८१॥ याचमानश्च शरणं वृद्धभावात्पितामहः ॥ रथस्थम
पि सारथ्यं स्वयं कुर्वन्त्वाक्षसे ॥८२॥ ॥ ब्रह्मोवाच ॥ ॥ सारथिस्ते भवाम्यद्य वृद्धो नायोद्धुमुत्सहे ॥ सुराणां चरणे
मेऽद्य पश्य मे रश्मिलाघवम् ॥८३॥ पुरा त्रिपुरसंहारे शंभोः सारथ्यकर्मणि ॥ प्रसादेन नियुंजन्मां भगवान् गजाप
तिः ॥८४॥ स्थापयन्मां रथस्याग्रे विजयाय सुराहवे ॥ तं ब्रह्माणं गणश्रेष्ठः सारथ्ये समयोजयत् ॥८५॥ तस्य रश्मीन्
प्रजग्राह तदश्वांश्चोदयद्रणे ॥ गतप्रत्यागतैश्चित्रैः अपोवाहनयोजनैः ॥८६॥ संतुष्टमकरोद्देवाः वीरभद्रं
सुराजिषु ॥ पक्षपातेन दक्षस्य दक्षं कृत्वा च पृष्ठतः ॥८७॥ तद्दृष्ट्वा मुनिगणान् प्रद्रुतान् सुरसत्तमान् ॥ पुनर्यो
ज्य सहस्राक्षो रथे मातलिचोदिते ॥८८॥ वामदक्षिणभागस्य सहस्राक्षसुदक्षकौ ॥ निषंगकार्मुकधरो वर्ष

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्तौच शरान्सितान्॥८९॥ मध्ये स्वयं रथोपस्थं समास्थाय ययौ हरिः॥ देवानीकैश्च कोटीभिः संवृतो विविधा
युधैः॥९०॥ निषंगिभिः कवचिभिर्गदाबाणासिपाणिभिः॥ शरासारं प्रमुंचन्वै शार्ङ्गं धुन्वन्हरिर्ययौ॥९१॥
केचिद्गजाश्वैश्च रथैः सुरैर्बाणधनुर्धरैः॥ प्राध्माप्य शंखवान्भेरीश्च पटहा हतिनिस्वनैः॥९२॥ वीरभद्रः प्रया
हृति माधवं चोदयद्विधिम्॥ गणैर्नानाप्रहरणैः हतिशूलहलायुधैः॥९३॥ निषंगदंशनागैश्च धनुर्बाणा
सिसायकैः॥ कुंतैर्गदाभिर्मुसलैः पट्टिशैश्च परश्वधैः॥९४॥ मदधुरज्ञा भेरीश्च सवाद्य पटहानकान्॥
350 बृंहितास्फोटनरवैः पताकाधूननस्वनैः॥९५॥ निष्कोशितासिविद्योतशताकमिव भास्करम्॥ आहर प्रहरस्वे
तिगणैः सुरगणारवैः॥९६॥ धनुषाकर्षतां तत्र शराणां ज्यासु ध्वनिनाम्॥ कृतक्रेंकारचीत्कारैः हयहेषरथस्व
नैः॥९८॥ भ्रमच्चक्राक्षसंकूजगदामुसलपातनैः॥ युद्धमुद्धतमाक्रोशं तयोस्तत्रास सत्तम॥९९॥ एवं युयो
ध भद्रोऽपि हरिणा दानवारिणा॥ हरिः सुरगणैः सार्धं भद्रमेव ययौ तदा॥१००॥ तयोः समभवद्युद्धं सुघोरं रोमहर्ष
णं॥ शूराणामप्यभीरूणां दारुणं मरणोपमम्॥१॥ देवा गणैश्च युयुधुर्वस्वश्विमरुतोऽर्ककाः॥ विश्वेदेवा
श्च पितरः साध्या विद्याधरास्तथा॥२॥ यक्षा रक्षःपेकपक्षस्थाः कुबेरवरुणा यमाः॥ सुधन्वानोऽथ मरुतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२ धन्विनो सायकैस्तदा ॥ ३॥ विष्वक्सेनादिगणपाः स्वगणैः कोटिभिर्वृताः ॥ शंखचक्रगदाहस्ताः युयुधुः ई शा० ढु
२२ स्वायुधैस्तदा ॥ ४॥ गरुडोऽपि गणानत्र व्यदारयन्नखैः शितैः ॥ पक्षतुण्डप्रहारैश्च गणैः सुरगणास्तदा ॥ अ० ६
उद्यतायुधजालैश्च युयुधुर्वीरसायकैः ॥ विष्णुः सायकसाहस्रैः वीरभद्रं जघान ह ॥ ६॥ वीरभद्रोऽपि छिन्नद्
बाणान् विष्णोस्तत्पश्यतां तदा ॥ त्रिभिः शरैस्तदा विष्णुं जघान गणपुंगवः ॥ ७॥ धनुर्ज्यां कवचं तल्लछि
त्वा तत्रैव प्रातपत ॥ नवत्या वीरभद्रं च शौरेरानतपर्वभिः ॥ ८॥ संताड्य मर्मसु हरिः शंखं प्राध्मापयत्तदा ॥
तुड्डुड्डुंहेरंडमंडलो बाष्कलिर्बलिः ॥ ९॥ एते गणेंद्रा वस्वाद्यैर्मरुद्भिर्युयुधू रणे ॥ गदापरिघनिस्त्रिंशैः
शरैर्मर्मस्वताडयन् ॥ १०॥ गजा गजैर्हयैरश्वाः रथस्था रथिभिस्सह ॥ कशांकुशांगुष्ठसु पृष्टतोदनैः तोत्रैश्च
योक्त्रैस्सुखलीनचालनैः ॥ करीन्द्रसंघान् प्रसृतोरुसत्कटान् सुचामरासक्तविलोलकर्णान् ॥ ११॥ त्वंगत्तुर
गान्नरसादिचोदितान् उत्पुच्छसंघाहतिफेनलास्यान् ॥ खुराग्रनङ्क्षापसघृष्टरेणुप्रकीर्णतामापरणाव णि
निस्तदा ॥ १२॥ धावद्रथाङ्गोत्थितरेणुरूषितैः सुभूषणश्मश्रुभिरुद्धतासुराः ॥ गणाविकोशीकृतखड्गखैर
महारधारासु पतंति भृंगवत् ॥ १३॥ कोदंडमंडलसमुद्भवकांडबाणवैतंडशुण्डारदखंडसंसृता ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुरोरुमुण्डाञ्जकषंडमण्डिता तदा गणेन्द्रैः प्रबभौ रणावनिः ॥१४॥ मातंगबृंहितरवैर्हयहेषघोषैः शताङ्गचक्रावृत
नेमिनिस्वनैः ॥ चलत्पताकावलिधूननैः सुराः भांकारभेरीपटहाब्जनादैः ॥१५॥ तुरंगमातंगशताङ्गसंघैः गणासिवि
द्योतितशस्त्रजालैः ॥ समावृतं तत्तुमुलं विरेजिरे सुरोरुकोलाहलजातसंभ्रमम् ॥१६॥ लांगलमुसलैस्त्रिशूल
३९। हस्तैः सुरता साजरतामवाप जन्ये ॥ गर्जितैस्तत्रैव गणेन्द्रसंघाः पर्जन्यनादैर्न हि तर्जयन्सुरान् ॥१७॥ तन्नाद
तस्तत्र गजा हया वृषा उत्कर्षयन्तो मदमाशु सत्कटैः ॥ निमीलिताक्षाश्च पदान्त शुण्डाः प्रसुस्रुवुस्ते शकृदत्र मू
त्रम् ॥१८॥ सुरसामान्यकजन्यसंभ्रमे भ्रमतीव प्रमदा बभूव सेना ॥ कुन्तैः शंकुतानिव ते गणेन्द्राः निहन्तुमैच्छन्सुर
वाहिनीं ताम् ॥१९॥ अहीनमन्योः सुमहोरुमान्यो राज्ञा वशान्मन्युमहासृजन्गणाः ॥ ते शस्त्रलाघवकरैर्वरम
ण्डलासिसंभ्रामणैः प्रतिहतोद्धृतखेटपुष्टैः ॥१२०॥ अत्यन्तु एव विसृजन्ति शरावरोधं मेघा इवाद्रिशिखरे
शरवृष्टिसृष्टिम् ॥ अमोचमोघा इव शस्त्रवर्षैः ववर्षुस्तौ गणपाः सुरोत्तमाः ॥२१॥ संयुध्य चायोधनभूमि
मध्यगो पपुश्च पापानि च सासवानि ॥ तौ वाजिमायातुरुभौ हरिवीरभद्रौ रुद्रैः सुराः भटभटैः वरशस्त्रहस्तैः ॥२२॥
खड्गप्रभानिकरतैलशिलासुधौतकूजत्सुपुंखसुमुखाः प्रबभुश्च तैरखाः ॥ रक्षःसहस्राक्षरथं बुजाक्षसमन्वितस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ व्रज्ञोरस्तु तक्ष ॥२३॥ शतं सहस्त्रायुतकोटिसंख्यया सपक्षयुक्तैः सुपृषत्कसंघैः ॥ सवीरभद्रोऽपि पिनाकशङ्गाद्वा
२३ कनिसृतैः शरोरुसारैर् निचकर्त्त तान्स्वरान् ॥२४॥ दक्षं ललाटे त्रिभिराजघान हरिं च जंभारिमपिस्तनां अ०६
तरे ॥ चकर्ष चापं प्रववर्ष बाणान् हर्षोरुतर्षैकहृदा सभद्रः ॥२५॥ सुरोरुकुंभ्युद्यतकुंभमध्ये हयोरुसत्सादि
षुतद्वयेषु ॥ क्षिप्रं सम्प्रशरैः सुवत्सदन्तनाराचमाकर्णकृष्टं मुमोच ॥२६॥ तस्यार्धचन्द्रेण धनुः शरावरं चि
च्छेद भद्रोऽपि हिरण्यदंसनम् ॥ कचत्कवचमप्यथो निपत्य दाशुनाराचकैर्विदारितशिरोधरैः मुकुटकुंड
लालंकृतैः ॥ सुरेन्द्रगणदारुणैः सुरगणेषु साधारणैर्बभूव धरणीतदा भाणपातवत्स्वगैतः ॥ गोधांगुलि
त्रसुशिखतनुत्रमन्त्रैर्दिव्यातपत्रनिकरैर्विबभातिसा भूः ॥२८॥ तुरंगमातंगनरोत्तमांगैस्तत्तारविस्तारित
वस्त्रवर्षैः ॥ तेभिन्नमर्महृदयाश्च विवर्मिणोऽत्र वैवर्ण्यमापुरमरागण शस्त्रघातैः ॥२९॥ कर्माणि तत्र ससृजुः
शरसृष्टिवृष्टिं मुष्टीभिर्यष्टिभिरथ प्रहरन्ति जन्या ॥ पतंति धावन्ति पिबन्ति शोणितं मुखं स्रवं चाप्युतिमाचरं
ति ॥१३०॥ कूजन्ति हृष्यन्ति च नूतनव्रणैः पानीयमानीयत इत्युदारम् ॥ सा वाजयुक्ता शरराजिराजो कू
जत्पतत्री वरराज तत्र ॥३१॥ आग्नेयवायव्यसुरारव्यशस्त्रैः अस्त्रैर्ववर्ष तुरुभोऽरि वीरभद्रो ॥ तस्यातप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रध्वजवाजिरश्मि तत्सारथिं भद्रगणो न्यमाथ ॥ ३२॥ रथं तथाक्षं च स कूबरं रणे चकर्त बाणैः तिलशो गणे

श्वरः ॥ चक्रं च चन्द्राकृति शाक्रयुक्तं त्रिविक्रमो विक्रमते रणाजिरे ॥ ३३॥ वक्रं च तच्च क्रमभुन्निसृष्टं हरेः क

राद् भद्रगिरिप्रभांगके ॥ सस्मार वेदाश्वरथं च भूरथं महारथेशं किल वीरभद्रः ॥ ३४॥ स्त्रिष्णुं सुधन्वानमहो पिना

कि नं नैनास्य भग्नो न रथो न कार्मुकम् ॥ नदंसनं वानं च कर्त्तवैः सुरौद्राणपि प्रभावितरेष वीरः ॥ ३५॥ निषंगि

३९२ णोऽस्य स्मृतितोऽक्षयेषु धीर्बभूव तस्यैकृपावशाद्रणे ॥ सुपर्वणं सन्नतपर्वभिः शरैः अखर्वगर्वं प्रजहार भग्न

हृत ॥ ३६॥ कक्षोरुकुक्षिस्थित वह्निनासमोदघाट तत्राहि सुरोरुवाहिनी ॥ गणोत्तमास्ते च सुतैलधौ

तैः त्रिशूलपातैः परिघैर्गदाभिः ॥ ३७॥ निर्यक्समस्तिष्क सुशुष्कतोहितैर्व्यसुं वसूंस्तं प्रहता न्प्रच

क्रुः ॥ तं विश्वदेवाश्वरथेषु वाजीन् निजघ्निरे तत्र गदाभिपातैः ॥ ३८॥ वायूविनिघ्नी पितरायुधांतान् प्र

चकुरुच्चक्रसहस्रधारैः ॥ तरणिं वरुणं तथैव वह्निं यममप्यानमयन्छरोरुवर्षैः ॥ ३९॥ रथसारथिवाजि

योक्तृ यन्त्राण्युपजहुः धनुषो गणाज्याः ॥ निर्ऋतिं मरुतं सुरावयुक्तं मरुतोऽपि सुधन्वनोऽस्त धन्वः ॥

॥१४०॥ मथिताक्षाः प्रमथैश्च शस्त्रजालैः निरगच्छन्नसुभिर्विदाहमानाः ॥ गहनं विविशुः सुरास्तमाया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ स्वगणैरुक्षितवाहस्त्रवेषाः ॥ परिधावन्ति रणे रिपेते प्रपतंत्तुंद्रुतविद्रुता गणेंद्रैः ॥ भग्नाक्षचक्रध्व ईशा·द्वा
जकूबरैरथैर्हयोरुमातंगशवैर्विभाति भूः ॥४२॥ विनिष्कृतान्त्रोरुवसासृगश्रुदुर्गन्धबन्धानिलसं अ०६
२४ घमत्र ॥ ऊहुः कशाघातवशांकुशाग्रसंचोदनैरश्वगजारथांश्च ॥ ४३ ॥ योध्यान्सुसंनद्धमहोरुयु
द्धे मांसाद्यसृक्पूयवसादिपंके ॥ सुरेंद्रसंघाश्च गणेंद्रवृंदं विपाटनाराचशरैः विपाटयन् ॥ भल्लैः
सुफुल्लैरिव किंशुकाभैः देहेततक्षुक्षतजार्द्रगात्राः ॥ प्रासासिहस्तं मुसलैर्विशस्तं ध्वस्तं चकाराशु
गणेंद्रवाहिनीम् ॥ गदाभिभग्नोरुचलग्नमध्यं नगंप्रदुद्राव सुमान हर्षम् ॥ विशाल वक्षः सुकपाट
पाटनैः स्कंधे च बाह्वोर्गलकन्धमूले ॥ गणेश्वराश्चापवराशिपाणयो यज्ञोपवीताकृतिचिच्छि
दुः सुरान् ॥ हसंति केचित्प्ररुदंति केचिन्नृत्यंति तत्रैव कबन्धमुंडाः ॥ प्रासासिहस्ता विवृतांत्रबंधाः
संबंधमीयुः धरणीतलेषु ॥ पतत्समदद्कुंजरे वीरहयोरुदेहाननैः सुकंपितरसातलं स्खलदपार
योधैर्वृतम् ॥ ४४ ॥ सुगर्जितसुनिर्जरं गणकृतोरुसंतर्जनम् ॥ बभूव समरसाजिरं सुरगणौघरागा
रम् ॥ जन्येतदा तत्र सुशोणितापगाः प्रसुसुवुः छन्नकदंबफेनाः ॥ सचामराखंडितफेन बुद्बुदामरांन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रमस्तिष्कजकूर्ममीनाः ॥४९॥ मृद्वीपसुद्वीपिककेशशैवलानरांत्रमालाविलसत्तरंगाः ॥ तादु
स्तराका पुरुषैरकातरैः धीरेषु संहर्षकराः प्लवंति ॥१५०॥ समालिंग्य कान्तामिव क्ष्मातलं
तेगणेन्द्रासुरेंद्रास्त्रवद्रक्तगंधाः दिवि स्वर्गलिप्सार्थया प्रार्थयन्तः सुशस्त्रोरुगात्रैः कमूढा विगा
ढा धरण्याम् ॥५१॥ वेतालकंकालबलादिहर्षदा गृद्धेषु काकश्वगणे शिवासु ॥ भषति तत्रैव शुनां समू
३६३ हो गृध्रभ्रमैस्तत पिशुनालिवत्तदा ॥५२॥ भ्राम्यद्गृध्रगणोरुपक्षतहताः संवीजितास्ते शवाः ॥ कंकैश्च शंकु
प्रभवक्त्रतोत्कृत्तैः गजोरुदेहेषु वसंत्यधीराः ॥५३॥ गजाश्वरथपंक्तयो निहतसादिसंसारथिः प्रतोदवरहस्ततो मृत
निरस्तशस्त्रांकुशैः प्रकीर्णमणिभांडकैर्विवृतनेत्रजिह्वास्यकैः ॥५४॥ कुथांकुशपथा हीति प्रबलमांसपंकः स्खल ॥
गणोरुशरवर्षणैर्मृतिमवापुरेवं सुराः ॥ त्रिलक्षा विदशामवापुरेवं गणशस्त्रैर्निहताश्च कांदिशीकाः सभ
या अभयं प्रयाचमाना तृणवक्त्राः शरभारनुन्नखिन्नाः ॥५५॥ गंजोनलदववत्क्रुध्यानिल इवेह मेघावली
लिं दंदाह नद्देवो यथा जलनिधेस्तरंगावलिम् ॥ तथेह गणपुंगवः शरवरोरुधारादिभिः सुरासुरगणं व्यधा
द्गणनाथचूडाज्ञया ॥५६॥ रटत्करटिकूजनैः हयवरोरुपातस्वनैः ॥ बभूव धरणी तदा सकरुणारुणा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 शोणितैः॥प्रभग्नरथचक्रक प्रशिथिलाक्षनेमिस्वनैः रराजरणभूस्तदागणागणोरुबाणेर्हताः॥ ध्व 

 स्ताश्वससारथिसत्पताकासुच्छत्रहीनान्निपपातमाधवः॥स्वकांस्त्रियंतांभुवमालिलिंगनभ्युत्थितो 

दक्षयुतःसवासवः॥५८॥विहंगमंतंखगामंपुरस्थितंविष्णुःसमारुह्यचकारलाघवम्॥गोमायुमायैव

संमायपास्त्राण्यवासृजत्तत्रगणेंद्ररंहे॥५९॥विचोमुच्चैर्विहसविष्णुराहेव व्यधास्वकास्त्रैर्विनिवार्यतद्गणा

न॥प्राध्मापय चंद्र मरवंदीनवीर्योधैर्यैकधुर्यःसगणेशितुःपुरः॥१६०॥तदस्त्रवर्षैविनिवार्यगोवृषोव

र्षप्रकर्षंसहतेयथागणैः॥शरांधकारांभसुमेघमाला मयूरवमालीवनिरस्यदृश्यत॥६१॥पक्षींद्रपक्षाणि

शरैःप्रचिच्छिदेततुंडपादौप्रविखंड्यपच्छरैः॥विहंगमस्तत्क्षतजाभितप्तःपपातकूजन्सहविष्णुना

वनौ॥६२॥प्राध्माप्यशंखंसहवीरभद्रःप्रोवाचविष्णुंक्षतजावृतांगम्॥वसंतकालोत्थपलाशभाप्रभा

विभासिभासांगमघोरणस्थले॥६३॥ ॥वीरभद्रउवाच॥ ॥कतेद्यदैत्यप्रहरोरुचक्रंशंखंकतेकौ

स्तुभनैजयन्ती॥नदैत्यपक्षस्यविहारकालःसंहारकालोहितवाद्यसंप्रति॥६४॥नाहंहिरण्यकशिपु

र्नहिरण्यनेत्रो नविक्रमस्तेक्वतवाद्यसंप्रति॥नरावणोऽहंनचै[illegible]कंस दैत्या नभार्गवक्षत्रकुलांतकारी॥६५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिभीषिकांते किमुतान्नजन्ये इषीकलाला निवसं देहते ॥ तीक्ष्णाक्ष्णकोणेन तदैव मुद्रणन् वीक्षन्सहस्राक्ष म
धोऽत्र दक्षम् ॥ ६६ ॥ दीक्षान्वितं त्र्यक्ष पदे विरक्तं लीलैव संदह्य भगाक्षिसूदनः ॥ ॥ सूत उवाच ॥ ॥ इत्यु
क्तोत्थित एव खड्गकरधृक्करेण टाभिद्य तैर्हीरिं जानुभ्यामथ पादघातनिकरैः व्यालोलयत्तत्र हि ॥ दक्षं दीक्षि
तमप्यपास्त शिरसं चक्रे शवास्तं शिरो खड्गेनैव हरिं हरं तमसकृद्ब्रह्मा प्रसाद्यानमत् ॥ ६७ ॥ ॥ ब्रह्मोवाच ॥
३५१— क्षमस्व मन्युं च सहस्व विष्णोर्महापराधं रणवीरभद्र ॥ त्वं वीरभद्रोऽसि स्वभक्तवृंदं हतारिवलानां रणगोस्य भ
द्रः ॥ इंद्रोऽपि तत्राशु स वीरभद्रं प्रणम्य पादावुपगृह्य नात्यजत् ॥ उत्थाय पाहीति चेतनमोचितो दयावता
भ्रातत राशु लोचनः ॥ ६९ ॥ पापस्य दक्षस्य सहायकारणात्सुरासुरास्ते निहता त्वयाधुना ॥ विष्णोर्यशो
भक्षितमेव दैत्य हृत्पापस्य संगाद भवत्स्वनाम्नाः ॥ १६० ॥ अघोऽक्षजं रक्षकृपाकटाक्षैः क्षंतव्य
एवोस्त्यपराधवृंदम् ॥ लोकोपकारार्थमसौ त्वयाद्य संरक्षणीयो न हि नाशमाप्नुयात् ॥ ६१ ॥ ॥ ॥
॥ स्कन्द उवाच ॥ ॥ निष्कासितासिं स तु संजहार तत्केशपाशं विधिवाक्यतोषितः ॥ सारथ्यमोचि
त्य सुसाम वाक्यं जहर्ष तत्राशु स वीरभद्रः ॥ ६२ ॥ वव संत मासंत सुदुःखविन्नं गच्छेति तत्राह हरिं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ कुधागणे ः। अपानतो माधव एव नत्वा गणेऽसुरव्यं प्रययो स्वलोकम् ॥६३॥ खर्गं समुज्जीव्य यथागतं हरिः द इश०दा०
२६ क्षौ ऽत्र निर्विण्णमना बभूवता ॥ दक्षस्य पत्न्यो सुरवर्य पत्न्यो यत्नादुपालभ्यपतीन् रणां क्रणे ॥६४॥ अ०६
विमुक्त केश प्ररुदन्ति संघ शो वैवर्ण्य मालिन्य दशाश्रुलोचनाः। हा दक्षपक्ष सुरता विरता ध भोगे
लोक्षेव धृष्टानिखिला गणेश्वरैः ॥६५॥ कस्त्वं प्रसादयति चापधरोग्रबाहुं प्रयाम सर्वाः शरणं हि
नो गतिः ॥ इत्येवमुक्त्वा प्रणताः सुरांगनाः संसाध्य बाष्पाणि निगृह्य तामिति ॥६६॥ उवाच भद्रोऽत्र
वचस्तदानीं निदाश्रवायाफलमेत दीशितुः॥ अशां भव सद्दोयकृत भवति पापद्नांग कोमहेश्वर दयो
ज्झितोऽप्यखिल लोल फालानले ॥६७॥ विदाहयति तं परं सुरवरं द्विजं वांत्यजं विलोकितमिदं यथा
मखविभंग विघ्नं महत् ॥ ॥सूत उवाच ॥ अनीकिनी त्वासुरसत्तमानां पिनाकिनींगो स्थिर भक्ति
वर्जिता ॥ विनाशिनी सा प्रभो तदानीं सौदामिनी चाति चलेव कामिनी ॥६८॥ जगर्जु गणेंद्रा मुदातं
गणेंद्रं प्रकृष्टोरु घोषैः दिवंगां भिनंतः॥ क्षयद्वीर पादार्च को वीरभद्रो जयत्येव दक्षासुहृद्देवसंघ
म् ॥६९॥ संघुष्टिता घोक्षजरुद्रवीरो जयत्येवमीशार्चनासक्त चित्तः॥ महाभस्मरुद्राक्ष भाजां शरण्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नगण्योस्य साम्ये भवेत्कोऽपिवीरः॥ १८०॥ ववर्षुरब्दाः कुसुमोरुवर्षं ववुश्च वाताः सुखसार शीतलाः॥ वि
त्रस्तविश्वं प्रजगाम हर्षं जग्मुश्च शान्तिं किल सर्वलोकाः॥ ८१॥ हरप्रसादेन स वीरभद्रो रमावरं तं प्रद
दार सायकैः॥ दक्षोऽपि संश्लिक्षित एव देवैः जगाम रुद्रं सपिता महेन॥ १८२॥ ॥ इति श्री शिवरहस्ये
ईशानाख्ये द्वादशांशे वीरभद्र विष्णुयुद्धं नाम षष्टोऽध्यायः॥ ६॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु॥
384 श्री ईशानाय नमः॥ ॥श्री स्कंद उवाच॥ तत्र दक्षशिरश्छिन्नं निपपात धरातले॥ विवृत्त दंत नयनं
निर्जिह्वं स्तब्ध द्विज ॥१॥ प्रविवेश क्षणाद्देवतद्प्याहवनीयजम्॥ तत्प्रविध्वस्त कलशं भग्न यूपं सतोरणम्॥
॥२॥ व्यदीपित महाशालं तत्र यज्ञं च विद्रुतम्॥ पुरीष भस्म शकृता वृक्णांभाण्डादि राशिभिः॥ ३॥ वसांत्रमां
स बहुलं भ्रमद्गृध्रादि कूजितम्॥ क्रोंचीनामिव तत्रैव रुद्रनस्त्री गणसंकुलम्॥ ४॥ एवं बभौ यज्ञश
ला दक्षस्यैव दुरात्मनः॥ दक्षोपि बस्त शिरसा समुदीक्षन्मुहुर्मुहुः॥ ५॥ शान्तानग्नीन्समुत्पाद्य स्वऋत्वि
ग्भिः पुनरुद्यतः॥ प्रखिन्नमनसा दक्षो यज्ञपुच्छं प्रतिष्ठितम्॥ ६॥ प्रापश्चिमां दिशं कृत्वा जगाम
शरणं हरम्॥ समं जगाम गणपैः शांतसंस्थो शिवाग्रतः॥ ७॥ गणेन्द्रे वीरणेन्द्राभैः नमस्कृत्य महेश्वरम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्तुष्टाव वीरभद्रोऽसौ महादेवं वृषध्वजम् ॥ ८ ॥ ॥ वीरभद्र उवाच ॥ ॥ शंभो भवांबुनिधितारक ईश० द्वा०

२३ कर्णधार विश्वभाघरणकारण कालकाल ॥ श्री व्योमकेश गरलाश महेश शंभो पाहि ज्वमित्रनय अ० ६

नेणक लंक चूड ॥ ९ ॥ स्तुत्वा नत्वा महादेवं गणेंद्रो गणपैः सह ॥ शंभो पार्श्वगतो भूत्वा व्यतिष्ठत्सकृतां

जलिः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ वत्साद्य परिखिन्नोऽसि गणेशैः सुरजन्यकैः ॥ नेत्र त्रिनेत्र जपस्ते

यमत्कृपा वशतोऽभवत् ॥ ११ ॥ गणेशतामुपगत रमभिगणवरैस्सह ॥ हेतिशूलायुधधरैः भस्मफा

लवलोन्नतैः ॥ १२ ॥ वसमत्तट्टिपाकारैः काश्यां नित्यमहर्द्दितैः ॥ तत्र पापकृतामत्ते जीवतां विघ्न

राशिभिः ॥ १३ ॥ निघ्नन् गदायुधैः पापान् भस्मरुद्राक्षवर्जितान् ॥ विश्वेश दर्शनैर्हीनान् स्तोत्राचैन

विवर्जितान् ॥ १४ ॥ अन्नपूर्णा दर्शनार्चा विहीनान् ढुंढ्यपूजकान् ॥ तत्रत्य लिंगयात्रादि समर्चनवि

वर्जितान् ॥ १५ ॥ ज्ञानवापी स्नानहीनान् मणिकर्णर्च्चनोज्झितान् ॥ प्रदोषसोमवारार्चा विहीना

न् लिंगमौलिषु ॥ १६ ॥ कालाष्टमीव्रताश्रद्धान् ब्रह्मदूरस्पर्चनोज्झितान् ॥ निसांतगृहयात्रादिवि

हीनान् शिक्षयाधुना ॥ १७ ॥ रुद्रपंचाक्षरावृत्ति विहीनान्पातयाधुना ॥ आणभवान्यातनाभिस्सं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिक्षय यथारुचि ॥१८॥ इत्युक्तो वीरभद्रोऽसौ ययौ नत्वा महेश्वरम् ॥ अविमुक्तं समासाद्य गणपैस्तत्र शंकरः ॥१९॥
वीरभद्रेश्वरं लिंगं प्रतिष्ठाप्यावसत्तदा ॥ शिवाज्ञया तदा भद्रो भद्रदः शांभवेषु सः ॥२०॥ अभद्रदोऽप्यशैवेषु उवास
गणपैर्वृतः ॥ ब्रह्मापि सांत्वयामास महादेवं वचोक्तिभिः ॥२१॥ प्रणम्य देवदेवेशं वियुक्तं दक्षकन्यया ॥ तन्मन्यु
नादह्यमानं यज्ञे दक्षावमानिनम् ॥२२॥ ॥ ब्रह्मोवाच ॥ ॥ सदयं हृदयं तेऽद्य शंभो दयनीयोऽस्मि स्मराधुना
356 माम् ॥ इयता ममता वहं मनो मे ममतावत्प्रभवेत मुक्तये ॥२३॥ सहमानस्त्वमेवेशो महेशो भक्तवत्सलः ॥ संहरात्र
महामन्युं दक्षं च सुरसत्तमान् ॥२४॥ रक्ष जीवितदानेन लोकगुह्य धर्मीश्वर ॥ त्वयैव सृष्टा निखिला लोकाः स
चैराचराः ॥२५॥ विष्णुस्तव कृपया शंभो पालको भूत्सदाक्षमा ॥ अहं लोकसिसृक्षार्थं त्वया सृष्टोऽस्मि शंकर
॥२६॥ ममैव तनुजो मूढो दक्षोऽयं शिक्षितस्त्वया ॥ वीरभद्रेण गणपैः संक्षमापराधो यथा ॥२७॥ सुरा इंद्रादयः स
र्वे अनिलानलवह्नयः ॥ सूर्यचन्द्रेन्द्र वरुणा वसवोऽश्विसुधन्वनः ॥२८॥ मरुतः पितरः साध्या नागा विद्याध
रादयः ॥ किंपुरुषाः सुरसंघानि क्षितिपश्च नृपो यमः ॥२९॥ मुनयो मानवो दैत्या यक्षरक्षोगणा नराः ॥ नद्यश्च सा
गराः सप्तद्वीपाश्च वनराजयः ॥३०॥ गरुडाः पतगाः सर्पा लोकाः सर्वे चराचराः ॥ ग्रहा नक्षत्रा ध्रुवा नाये रुद्रा भूता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 पिशाचकाः॥ गुह्यकाश्च सगंधर्वाः नारदाद्या महर्षयः॥ दिग्गजाः शिंशुमाराद्याः कूर्मशेषादयोऽखिलाः॥ ३२॥ धर्मो ऽधर्म 

 स्तथा शास्त्रं वेदाश्च स्मृतयोऽपि च॥ पुराणजालं निखिलं वैष्णवं शांभवं तथा ३३॥ आगमाश्च त्वया प्रोक्ताः सर्वमेतत्त्वया कृतम्॥

त्वयैव पालितं शंभो त्वय्यंते त्वयमेष्यति॥ ३४॥ जगच्च भूमिदं शंभो भूतं भव्यं भवत्तथा॥ त्वद्दूया पात्रभूतं च विवृद्धं भवतु प्रभो॥ क

त्वत्कोपदग्धं माभूयाज्जगदेतच्चराचरम्॥ रक्ष देवान् सदक्षांश्च त्वत्कोपानलपीडितान्॥ ३६॥ महामन्यो मन्युमिमं

संहरात्र मखं प्रति॥ सती माया तव विभो मायि त्वं परमेश्वरः॥ ३७॥ कालः करोति निखिलं कालः संहरते प्रजाः॥ कालेन

वर्धते सर्वं काल कालतवाज्ञया॥ ३८॥ कालं कंचित्प्रतीक्षस्व सती मत्कृतिरीश्वरी॥ जाता हैमवतो शंभो त्वामाप्नोति पतिं

सती॥ ३९॥ भाव्यं वं भूतभाव्येश त्रिकालज्ञोऽसि शंकर॥ त्वत्पादपंकजं स्मृत्वा सर्वदुःखक्षयो भवेत्॥ ४०॥ दुःखं सती वियोगो

त्थं निवर्तय महेश्वर॥ त्वं वेत्थ योऽसि सोऽसि ज्ञाना स्यात्मानमात्मना॥ ४१॥ त्वमात्मा सर्वभूतानां अन्तः शास्ता सनात

नः॥ ब्रह्म त्वं निर्गुणः साक्षी चेतानेता परात्परः॥ ४२॥ ऋतं सत्यं परं धाम भूमसीमा विराट् स्वराट्॥ सम्राट् प्रजापतिर्धा

ता वेदवेद्यो महेश्वरः॥ ४३॥ प्रणवः प्राण ईशानस्त्वत्तो नान्योऽस्ति कश्चन॥ वेदवादरता मूढा नानाशास्त्रैर्बुवादिनः॥

एकत्वेन बहुत्वेन विवदंति परस्परम्॥ नानाकारेण भातं त्वां एकमेव सनातनम्॥ ४५॥ न वेद महिमां कश्चित्तव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वसुरेश्वर ।। इन्द्रमित्रादिवाक्यैश्च मोहितास्तव मायया ।। ४६ ।। तव माया मयैः पाशैः बद्धाः सर्वे सुरासुराः ।। अस्वतन्त्रा
महादेव नैषां भागोस्ति संप्रति ।। ४७ ।। प्रार्थितो ब्रह्मणा तत्र भगवान् परमेश्वरः ।। किं चिन्निमील्य चात्मानं प्रपश्यन्नाममा
यया ।। ४८ ।। हतानां तत्र देवानां प्रददौ पूर्ववत्तनुम् ।। इन्द्रस्य विष्णोर्दक्षस्य मंतुमज्ञानतः कृतम् ।। ४९ ।। संजहार तदाम
न्युं सुरान्प्रति महेश्वरः ।। पूष्णो दक्षमुनींद्राणां सेहे देवो पराध कम् ।। ५० ।। भ्रंशितांगानि देवानां सम युज्यंत तत्र
३५७ हि ।। गणानां तत्र देवस्य प्रसादेन महेशितुः ।। ५१ ।। विष्णुः समागतो लक्ष्म्या प्रणम्याथ महेश्वरम् ।। संस्थितो
वेधसा तत्र देवैर्दक्षः समागतः ।। ५२ ।। लब्धसंज्ञोऽभवद्दक्षो बभूवातीव विह्वलः ।। प्रणम्य रक्ष रक्षेति साश्रुनेत्रः सुबद्ध
रम् ।। ५३ ।। ।। दक्ष उवाच ।। ।। अव शिव सदयं पिनाकपाणे हृदयं मे तव पादपद्मसद्म ।। न विमुंचति मुंचती न शोकं न
शशांकोऽपि सदा मुदा हृदे मे ।। ५४ ।। अघते भवते नमस्क्रिया मे भवत देव शात प्रसादिने ।। हरते वृजिनाघ संघमेतत् हरते
देवक टाक्षकोणपाते ।। ५५ ।। स दक्ष परमस्तुत्या प्रीत्या युक्तो महेश्वरः ।। यज्ञस्य च शिर छिन्नं पुनः प्रावर्तितं यथा
था ।। ५५ ।। गाण पत्यं ददौ तस्मै दक्षायाक्लिष्टकर्मिणे ।। दक्षो न त्वा महादेवं यज्ञशेषं समाप्य तत् ।। ५६ ।। ऋत्वि
क्पत्न्यादि सहितो दक्षिणाभिः प्रतर्प्य तान् ।। अविमुक्तं ययौ दक्षो शिवनिंदाकृदंहसः ।। ५७ ।। प्रमुच्येय मिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 स्वैरं तप उग्रं समास्थितः ॥ दक्षेश्वराभिधं लिंगं प्रतिष्ठाप्याचर्य[illegible]म् ॥ ५८॥ भस्मरुद्राक्षपुंड्रांको रुद्रपंचाक्षरादरः ॥ गंगा 
 भसाथ संसिच्य त्रिकालं बिल्वपल्लवैः ॥ स्तुवन्नेवं विरूपाक्षं द्वादशाब्दमुवास सः ॥ ५९॥ ॥दक्ष उवाच ॥ ॥ पशुपाशह 
तेनमो नमस्ते शरणं चरणांबुजं प्रपद्ये ॥ पशुपतये करवाणि गाणिमिष्ठां शरणं यामि शरण्यमिन्दुमौलिम् ॥ ६०॥ देवाः प्रणम्य
देवेशं प्रसाद्य परमेश्वरम् ॥ मौलिबद्धांजलिकरा स्तुष्टुवुः सर्व एव ते ॥ ६१॥ ॥देवा ऊचुः ॥ चण्डांशुनंदनभरोद्धृतबाहुदंड
संलग्नपाशवरयुक्तद्विजार्त्तिखंड ॥ वेतंडवक्त्र कलितेक्षणतुंडगंडसत्कुंडलीशवरकुंडलमंडितास्य ॥ ६२॥ विवशाः पशवो
वयं महेश भवतांतः किल कामपाशबद्धाः ॥ पशुपाशविमोचकोसि शंभो पशुपस्त्वं परिमोचयाशु नः ॥ ६३॥ तदेवस्त
व्यवाक्येन शिपिविष्टो महेश्वरः ॥ प्रहर्षमतुलं लेभे तानुवाचामरेश्वरान् ॥ ६४॥ ॥श्रीईश्वर उवाच ॥ ॥ क्षांतापराधा
स्सर्वेपि देवास्सन्तु गतव्यथाः ॥ भजन्तु स्वानि धिष्ण्यानि यूयं मोदत विष्टपे ॥ ६५॥ तत्र शंभुवचः श्रुत्वा नत्वा देवं महेश्वर
म् ॥ ययुस्ते शरणं देवं हर्षिताः स्वांगनायुताः ॥ ६६ ॥ दिव्यांगरागभोगाढ्या विमानैस्ते त्रिविष्टपम् ॥ इन्द्रो नत्वा महा
देवं पादांबुजयुगं तदा ॥ ६७ ॥ प्रपन्नः परया भक्त्या स्तौति देवं महेश्वरम् ॥ मौलिबद्धांजलिपुटो सानन्दजललोच
नः ॥ ६८॥ ॥इन्द्र उवाच ॥ ॥ शरणं किल यामि सोमसोमप्रथमा तं सकिरीटकोटिजूटम् ॥ करिटित्वक्पटशोभि

सत्कीर्ति तं भजे चेत त्रिनीजटं महेशम्॥ ६९॥ इतिस्तुत्वा महादेवमिन्द्रः स्वगुरुणा सह। देवराज्यं सुरैः प्राज्यं ययौ शासि
तुमोजसा॥ ७०॥ विष्णुरप्येति हृष्टात्मा अष्टमूर्तिं कृपाकरम्॥ नत्वा कृतार्थ यावाचा स्तौति देवमुमाधवम्॥ ७१॥ स्वा
पराधं तदा विष्णुः क्षमितुं परमेश्वरम्॥ मौलिबद्धांजलिपुटो लक्ष्म्या सगरुडेन च॥ ७२॥ ॥ विष्णुरुवाच॥ परिपा
हि विभो महेश शंभो ॥ स्मरवृंदोत्तम पुंगवारूढकेतो॥ भवभर्गान्धक सूदनांतकारे प्रमथाधीश सनाथया शु माम्॥ ७३॥
३५८ वसुधाधृग्वरहारचापपाणे ॥ वसुधास्यंदन संस्थचित्रशक्ते॥ वसुधाराधितपूज्यदेव शंभो वसुधाधृक्तनयाप्रिय
तेनमस्ते॥ ७४॥ क्षमस्वापराधं मदीयं महेश ॥ विभो मायया ते निबद्धोऽस्मि हीनः॥ अहं देव मुन्युं न मन्ये त्वदन्यं महादेव शं
भो प्रसीद प्रसीद॥ ७५॥ ॥ सूत उवाच॥ ॥ स विष्णुवचसा तुष्टो महादेवो महेश्वरः॥ उवाच माधवं तत्र ब्र
ह्माणं वीक्ष्य शंकरः॥ ७६॥ ईश्वर उवाच॥ ॥ अशांभवजनावनं सुरवराद्य दुःखावनं ॥ भवेत्किमु भवायते मयि
सुभक्तियुक्तो भव॥ वसेवर मया भवान् विधिरयं च लोके स्वके ॥ चिराय मम वाक्यतो वृजिनमद्य क्षांतं तव॥ ७७॥
॥ इति श्रीशिवरहस्ये द्वादशांशे ईशानाख्ये महादेवप्रसादनं नाम सप्तमोऽध्यायः॥ ७॥ श्रीकाशीविश्वेश्वरा
र्पणमस्तु॥ ॥ श्रीईशानाय नमः॥ ॥ श्रीस्कंद उवाच॥ ॥ तदा ब्रह्मादयो सर्वे वसवो दक्षो वासवः सुराः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहु०१२ नत्वा स्तुत्वा महादेवं ययुर्लोकान्सुरास्तदा ॥१॥ महादेवोऽपि विश्वात्मा ब्रह्मणा परिसंहितः ॥ जगाम गणवृंदैश्च नंदि ईशानाध्या०
३० ना विश्वनंदिना ॥२॥ गणानां गर्जनैश्चैव भेरीपटहगोमुखैः ॥ काहलैः शंखगोशृंगैर्नर्दद्भिर्गणवल्लभैः ॥ अ०८
नानाछत्रधरैरन्यैः चामरासक्तपाणिभिः ॥ गणेन्द्रैः केतुहस्तैश्च चन्द्रस्फटिकनिर्मलैः ॥४॥ भस्मभूषित
सर्वांगैः गणेंद्रैर्वारणोपमैः ॥ कोटिव्रयैः परिवृतो वृषारूढो महेश्वरः ॥५॥ सत्यावियोगदुःखेन तपस्तप्तुंमनो
दधे ॥ जगाम मंदरं तत्र नानाद्रुमविराजिते ॥६॥ चंपकाशोकपुन्नागबकुलैः समलंकृते ॥ सालतालतमाला
ढ्ये अंकोलकदलीयुते ॥७॥ कपित्थपूगहिंतालरसालफनसावृते ॥ पारिजातकसंपूर्णे नानापक्षिवि
राजिते ॥८॥ पुष्पगुच्छैकसुभगमिलद्भृंगकुलाकुले ॥ परभृत्सुन्दरगिरा पल्लवोल्लासिमारुते ॥९॥ नृत्यन्म
यूरकेकाभिः नंदन्नत्यूहशोभिते ॥ हंसकेंकारसरसी सारसैः समलंकृते ॥१०॥ फुल्लहल्लकपद्मालिनी लोत्पलसुको
मुदैः ॥ कदंबमंजरीलोलभ्रमत्पुष्परजोवृते ॥११॥ गलन्मधुश्रवांलोलशारवांदोलितमारुते ॥ भ्रमत्सारंगमातंगसं
घर्षितमहाद्रुमे ॥१२॥ उत्पुच्छचमरीसंघसरोघोड्डीनसंकुले ॥ कस्तूरिकामृगश्रान्त्यद्धवाहेकसुंदरे ॥१३॥ क
पोतगतहुंकारे गोलांगूलोत्थहुंकृतेः ॥ वानरोदरसंबद्धस्तनंधयकुतूहले ॥१४॥ नारवानीडेषु संलीनशिशुके

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कणादरे॥ सपक्षपक्षिविक्षेपैः पक्षिपोतकभासुरे॥ १५॥ खरोरुनखरोत्कीर्णतीक्ष्णवीक्षणवानरे॥ नैकधातुशतैः
चित्रैः विचित्रकुसुमोज्वले॥ १६॥ शाखाशतसहस्राढ्ये दवधूमविराजिते॥ कदंबकदली पुष्पनतांदोलनसुन्दरे॥
गिरिमस्तकसंस्रावि सरोवरविराजिते॥ पल्वलोदकतीरस्थगुल्मवल्लीगृहैर्युते॥ १८॥ प्रफुल्लमल्लीमहामल्लीगुच्छ
मल्लीसुशोभिते॥ वेणुसंघर्षणोत्पन्नहव्यवाहशिखावृते॥ १९॥ वेणुझींकारबहुले झिल्लीगणविनादिते॥ हल्ली
३५१ सल्लास्यकुर्वद्भिः सामिभिश्च परस्परम्॥ २०॥ मातंगबृंहितरवैः कोलघर्घरनिस्वनैः॥ घर्घरैस्ताडपत्राणां ना
लिकेलद्रुशोभितैः॥ २१॥ तद्भूततालसञ्जीनपक्वनारिकेलतालकैः॥ समावृता सा भूर्भाति मातंगमदपंकिला॥ २२॥ वि
मलस्वादपानीयानेकप्रस्रवणैर्युते॥ निरूढशष्पसंपूर्णभूभागसमलंकृते॥ २३॥ वनगोरससंतप्तशिलातलविरा
जिते॥ स्निग्धवर्णमहामूलसटावटविराजिते॥ २४॥ मंदरे तत्र गणपैः महादेवो वृषास्थितः॥ महादेवदेवस्य शंक स्य
रस्यामितात्मनः॥ २५॥ दीप्तमायतनं तत्र हैमं मणिविभूषितम्॥ हेमप्राकारसंयुक्तं मणितोरणमण्डितम्॥ २६॥
स्फाटिकैः सुविचित्रैश्च गोपुरैश्च समन्वितम्॥ सिंहासनैर्मणिमयैः शुभास्तरणसंयुतैः॥ २७॥ रम्यादर्शगृहैश्चि
त्रैः चित्ररंगविचित्रितैः॥ वृक्षपाषाणफलकैः चित्रितैः सौधभूषितैः॥ २८॥ वितानतानितैश्चित्रैः दिव्यास्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ रणिकावृते॥ पद्मरागैः पुष्परागैः नीलवैडूर्यनिर्मितैः॥२९॥ गोमेदवज्रमुक्ताच्छविद्रुमैश्च विराजितैः॥ मंडपैः पुष्प दृशानाध्या०
३१ मालाढ्यैः धूपदीपसमावृतैः॥ ३०॥ प्रमथैरावृतस्तत्र वेणुवीणाजनादिते॥ झल्लरीशंखपटहभेरीगोमुखडिं अ०८
डिभैः॥ ३१॥ ललितारससंगीतमुखरीकृतदिङ्मुखे॥ सिद्धदेवर्षिगंधर्वैः ब्रह्मेंद्राद्यमरैर्वृतैः॥ ३२॥ किंपुरुषै
स्तथानागैरप्सरोगणसेवितैः॥ गायद्गंधर्वकिन्नरैर्वीणातंत्री विनादितैः॥ ३३॥ मांदरेश्चारुशिखरैः उपेतं शंकरं
तदा॥ दृष्ट्वानहर्षमापाथमहादेवोमहेश्वरः॥ ३४॥ तदारुद्रगणैस्सार्धं निःश्वासमुहुर्मुहुः॥ रुधाहिराडिवास्व
स्थो स्थाणुःस्थाणुरिवस्थितः॥ ३५॥ तदासती वियोगार्तो बभूवातीवविह्वलः॥ दृष्ट्वा चन्द्रमसंरात्रौ फुल्लमल्ली
गणानिलम्॥ ३६॥ जिघ्रन्स्वांगमहासर्पपारणाव्यदधाद्धरः॥ विनिश्वसन्तदादेवो तपस्येवं मनोदधे॥ ३७॥
विधायस्वात्मनात्मानं भस्मभूषितविग्रहः॥ त्रिपुंड्रविलसत्फालोरुद्राक्षांगदकंकणः॥ ३८॥ जटिलाल
कसन्मौलिपिशंगितगिरिमभः॥ प्रभाविभासिसोमांगसुन्दरामलविग्रहः॥ ३९॥ सोमधाम कृतोत्तंसोमहा
देवोमहेश्वरः॥ उत्फुल्लपुंडरीकाभामुखमंडलभासुरः॥ ४०॥ फालानलानिलालोलनेत्रोचलसुपक्ष्म
कः॥ उद्यद्भानुप्रभाभासि वामलोचनसुन्दरः॥ ४१॥ पर्वपूर्णसुधाधाममंडलोत्तुंगदक्षदृक्॥ चांपेय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्तिको द्दाम नासा पुट विराजितः ॥ ४२॥ स्वच्छादर्श कपालाद्य प्रभाभासितदिक्ततिः ॥ नागकुंडलविभ्रा
जकर्ण वृत्तालि शोभितः ॥ ४३॥ शंखाभ कण्ठे गरलेकीलाललित कंधरः ॥ ४४॥ करी शुंडाभ वृत्तोरु बाहु
दंड विराजितः ॥ चतुर्दशोरुभवनस्थानायितमहोदरः ॥ ४५॥ वृत्तगंभीर सुभग नाभी कूपविराजितः ॥ त्रिव
ली ललितोदार मृगेंद्रसममस्तकटिः ॥ ४६॥ व्याघ्र चर्म परीधानः कृत्तिवासा महेश्वरः ॥ रंभावृतोरुसिद्धोरु कां
३८० डदंडपदद्वयः ॥ ४७॥ पादपद्मयुगालीढ व्याली मंजीर फूत्कृतिः ॥ नागहारो महादेवो त्यक्त्वा चायुध
मुत्तमम् ॥ ४८॥ मृगटंको परित्यज्य वटोरु विट पास्तृते ॥ भूतलेऽजिनसंस्तीर्णे व्याघ्राजिन विराजिते ॥ ४९॥
योगपट्टाभिरामेण पादावाबध्य चान्यतः ॥ भस्मांगराग शुभग देह कांति विराजितः ॥ ५०॥ नासाग्रन्यस्त
नयनो भगनेत्रनिपातनः ॥ उग्रोऽप्यव्यग्रमनसा दूंद्रियाण्यथ संहरत् ॥ ५१॥ विश्वतः परमेशानो रुद्रो
विश्वाधिकः प्रभुः ॥ आत्मानमात्मना ध्यायन्हं देव मनसातिगः ॥ ५२॥ तमसः परमं साक्षाद्ब्रह्म
तं निर्गुणं परम् ॥ चतुर्थं शिवमद्वैतं पूर्णात्पूर्णतरं शिवम् ॥ ५३॥ विश्वतश्चक्षुषं देवं विश्वतो मुखमीश्व
रम् ॥ सर्वेंद्रियगुणातीतं सर्वेंद्रियविवर्जितम् ॥ ५४॥ आकाशकोशं विश्वेशं चेतनानां च चेतनम् ॥ निरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ जने शिवं नित्यं व्याप्यव्यापकवर्जितम् ॥५५॥ भूतं भव्यं भविष्यं च यद्वा व्यमभयं परम् ॥ परात्परं साक्षिणं च वि ईशा० द्वा०
३२ श्वस्मादुत्तरोत्तरम् ॥५६॥ अमृतं परमं धाम सीमापुच्छ प्रतिष्ठितम् ॥ ऋतं सत्यं परं धाम बृहद्ब्रह्म सनातन अ०८
म् ॥५७॥ अणोरणं महांतं तमीशानं विश्वतोमुखम् ॥ पुरिशयं गुहासंस्थमवस्थातीतमीश्वरम् ॥५८॥ शाश्व
तं ध्रुवमक्षय्यं क्षराक्षरविलक्षणम् ॥ अपाणिपादजवनमचक्षुघ्राणमीश्वरम् ॥५९॥ अगंधघ्राणरसनं सर्वे
न्द्रियगुणातिगम् ॥ शाश्वतं शांतिगंभीरं वेद्यं भेदविवर्जितम् ॥६०॥ रसं परं हृतारं प्रणवं नादबोधितम् ॥ यो रं
गसांख्यदुरापं तं सर्वात्मानं गुणातिगम् ॥६१॥ वेदवेदान्तसंवेद्यं विश्वात्मानं सनातनम् ॥ भावाभावविवेकरहि
तं हृदयं शरणं शिवम् ॥६२॥ प्रत्यग्रूपमनौपम्यं सर्वदृक् सर्वहृद्गतम् ॥ वेदवेद्यं नतद्वेद्यमभेद्यं द्वैतवर्जि
तम् ॥६३॥ आनंदं व्यापकं बोधं सर्वचैतन्यबोधदम् ॥ बहुरूपमरूपं च चिद्घनं भानभानकम् ॥६४॥
शिवं तुरीयमद्वैतं सर्वांतर्यामिनं हरम् ॥ विश्वात्मानं विश्वरूपं वृत्तिवाक्रूपवर्जितम् ॥६५॥ सूक्ष्मं पद्म
प्रतीकाशं वाच्यवाचकवर्जितम् ॥ न दिव्यं नांतरिक्षं च वेदाश्रमविवर्जितम् ॥६६॥ आनंदरूपम
मृतं संदेकरसमद्वयम् ॥ अखंडैकरसं देवो स्वात्मानं स्वात्मनि स्थितम् ॥६७॥ निश्चलं स्थाणुवत्स्था

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरतिष्ठद्गणसेवितः॥ दश साहस्रशरदामेवं तेपे तपोहरः॥ ६८॥ ॥ कुमार उवाच॥ ॥ स्वात्मानमानंद
मखंडनोधं वेदांतसारं परमेश्वरं तदा॥ स्वात्मानमालोक्य सनातनं शिवं न वेद किंचात्र न किंचिदीश्वरः॥ ६९॥ ॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे महादेव तपश्चर्या नामाष्टमोऽध्यायः॥ ८॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्रीईशानाय नमः॥ ॥ मुनय ऊचुः॥ कथं हिमवतः पुत्री संजाता सा सती मु
36 । ने॥ उद्वाहोऽत्र कथं शंभोः पार्वत्याः शंकरस्य च॥ तन्नो वद विशेषेण जन्म देव्याः पिनाकिनः॥ उद्वाहमपि तच्छंभोः ता
रकारिसमुद्भवम्॥ २॥ विस्तरेण वदास्माकं यथा स्कन्दमुखाच्छ्रुतम्॥ जैगीषव्याय मुनये सुराणां गणपाग्रतः॥ ३॥ ॥॥
सूत उवाच॥ ॥ एवमेव पुरा पृष्टो सुब्रह्मण्यो हरात्मजः॥ जैगीषव्येन मुनिना गणैः सुरगणैः सह॥ ४॥ तमाह तारका
रातिः पार्वत्या जन्म सत्तमम्॥ तदा हिमवतो गर्भे तारकारेः स्वकोद्भवम्॥ ५॥ सेनापत्ये स्थितं स्वस्य गजाननसमु
द्भवम्॥ त्रिपुराणां च संमर्दं कथयामास विस्तरात्॥ ६॥ ॥ श्रीसुब्रह्मण्य उवाच॥ ॥ यदा सती तनुं त्यक्त्वा योगे
नैव स्वतेजसा॥ सुमुहूर्ते सुदिवसे मेनागर्भे समाविशत्॥ ७॥ विचित्रशक्तिः सा देवी माया पशुपतेस्तदा॥ ॥ तत्रै
व दशमे मासि शुभलग्ने ग्रहैर्युते॥ ८॥ उच्चस्थे पंचसु शिवा तदा हिमवतो गृहे॥ जज्ञे तत्र महादेवी तत्राभूदुत्सवो महान्॥ ९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ देवास्तत्रसमाजग्मुः विष्णुब्रह्मादयः सुराः ॥ मरुतोवसवःसाध्याःगंधर्वाश्चजगुः कलम् ॥१०॥ रेवदुंदुभयोनेदुः द्वि॒शाना०द्वा०
३३ पुष्पवृष्टिरभूच्चरवात् ॥ नृत्यंत्यप्सरसोहृष्टाः तदाहिमवतोगृहे ॥११॥ सोऽपिविश्राणयामासधनधान्यगवांगण अ०९
चैव म ॥ रत्नानिवासांसि मदंदेशांभवेषुसः ॥१२॥ मुनयःपूजितास्तेन नारदाद्यामहर्षयः ॥ विष्णुब्रह्मादिविबुधां तांध
पुष्पैःसमर्चयन् ॥१३॥ भक्ष्यैर्भोज्यैश्चवासोभिर्भूषणैर्मुदमादधत् ॥ जातकर्मादिकर्माणि चकारसगिरीश्वरः ॥
॥१४॥ ययुःसंतोष्यगिरिपंमुदाते विबुधर्षयः ॥ मेनयासहतां दृष्ट्वा पार्वतींसूतिकागृहे ॥१५॥ उत्तानशायिनींबा
लांनीलकुंचितमूर्धजाम् ॥ पद्मपत्रेक्षणांचारु बिंबोष्ठींपद्मवक्त्रकाम् ॥१६॥ कंबुकण्ठींमृणालाभां बाहुद्वयवि
राजिताम् ॥ रक्ताब्जाभसुहस्तांच नरवचन्द्रयुतांगुलिम् ॥१७॥ बालरंभाभवृत्तोरुकुक्षिजंघाघनावृताम् ॥ फुल्ल
पद्माभपादेन उत्तानेनविराजिताम् ॥१८॥ द्वितीयासोमसंकाशपादांबुजनखावलिम् ॥ व्यालोलनयनांबालांस
र्वभूषणभूषिताम् ॥१९॥ रत्नाग्रैवेयवलयैः मुक्ताहारविराजिताम् ॥२०॥ तिलकाक्तमुखेंदूत्यकर्णावलिकभू
षिताम् ॥ दिव्यव्याघ्रनखासक्तखचिता रत्नपंक्तिभिः ॥ २१॥ बालेन्दुसारमकुटां कंकणांगदभूषणाम् ॥ रु
षितां दिव्यगंधेन दिव्यपुष्पैःसुरार्चिताम् ॥२२॥ कांचिकचित्तमध्यां चक्षुद्रघंटालिसत्कटिम् ॥ पादनूपुरसंराव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जितक्रौंचवरस्वनाम्॥२३॥ दिव्यवासोभिराच्छन्नां लोलान्दोलनवीजिताम्॥ देवपत्न्यः समागत्य शचीस्वाहास्वधा
रमा॥२४॥ नीराजयंति तां देवीं दिव्यमंगलगायनैः॥ रक्षां रक्षाकरीं तस्या राक्षसेभ्यस्तदा मुदा॥२५॥ रात्रौ रात्रौप
ठंतिस्म समवेता महर्षयः॥ गायन्ति ललितं वल्गु मधुरं गायनं तदा॥२६॥ तद्गायनेन सा देवी विनिद्राति दिने दिने॥
॥ देवस्त्रिय ऊचुः॥ ॥ अयि जगदंब कदंबवनस्थित नीपविदीपित सौधयुता॥ अमृतवार्धितरंगित बातसुपोतक वीजि
तरत्नगण प्रभ लोलुक डोलवरासन तानवितान सुवस्त्रमणीगण पुष्प विराजित फुल्लसुहल्लक लोलसमावृत मंचवि
३६२ कर्षिण, कूजित घनरवराग विराग विराग मृगावलि धूत विधूत, सुचामरचंद्रक वीजन वीजित मारुतसोपघनावृत, चं
द्रसमप्रभ धूततराकृति देवगणांगन गीतमिदम्॥१॥ विश्रुत मणिगण भूषण कृतरव रिंखण झणझणरव घोष
णनिद्रित हर्षित घर्षित वर्षित तर्षित मेघसुचातक पोतक जातक भावुक कल्पनम्॥ शिल्पे जात सुसंभ्रम दिग्गज
गर्जन तोषस्तुतावित सर्वसुरावन पावन सुन्दरमंदिर निर्जर दारकृतस्तुति निद्रित पर्वत बालम बाल तनु प्रभ भावि
तनत जन पोषत विश्रुत गीतमिदम्॥२॥ एवं गीतेन तां बालां देव्यो निद्रापयन्त्यपि॥ लालयन्ति स्त्रियः काश्चित्
स्नापयन्ति मनोरमाः॥३॥ भूषयन्ति तदा बालां तिलकैर्वेणुमण्डनैः॥ पाययन्ति तथा स्तन्यं घिकृतामृतमुत्तमं॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२ दिने दिने महादेवीं तदानीं राजयन्त्यपि ॥ दुकूलवसनैश्चित्रैः वासयन्ति स्त्रियोऽखिलाः ५ ॥ एवं तत्र महादे ई श० द्वा
३४ वीं पूजयन्ति सुरांगनाः ॥ तदा सा ववृधे बाला कला चान्द्रमसी वसा ॥ ६ ॥ तां दृष्ट्वा पार्वतीं देवीं हिमवान्मेन अ० १
यासह ॥ नमस्कृत्वाथ तुष्टाव मौलिबद्धांजलिः शिवाम् ॥ ७ ॥ ॥ हिमवानुवाच ॥ ॥ प्रपद्ये शिवे दैववते
पादपद्मं हराद्याम विद्यां प्रदेह्यद्य विद्याम् ॥ न ते मद्य मांसादि मीमांस पूज्य प्रकारेति दूरं गिरिं मामवेहि ॥
॥ ३३ ॥ महाघौघनीहारघोरांधकारप्रशिक्षानुरूक्षप्रभाहस्करां त्वाम् ॥ विदित्वा च नत्वा च स्तुत्वा च वाचा समस्तेषु
नान्यो मदन्योऽतिधन्यः ॥ ३४ ॥ धराधीशकन्ये शिवे सामि सोम प्रशस्तैकमस्ते नमस्ते सुहस्ते ॥ त्वदन्यत्र लोकेन
लोके सशोकं सशूकोपमं यूकमश्नाति मन्तः ॥ ३५ ॥ कृपापांगसंगेन ते प्लावितांगं मदीयं भवेत्यापतापैकभंगम् ॥
अतो मां भजे तुंगसारंगरंगत्तुरंगादिसंगा सदापद्मसद्म ॥ ३६ ॥ न मे ह्यपि कान्तो रुपादप्रशान्न चन्द्रेन्द्र लोके बुवा का
किं दरिद्रम् ॥ अतः सान्द्रसौख्यैक निःसीम तन्द्रा सुनिद्रासु सुप्तौ (पूतौ) भजाम्यद्रिकन्याम् ॥ ३७ ॥ न मान्यो न धन्यो
न्यो भजे यस्त्वदन्यां कलंकी सशंकी भजेच्चाभजंस्त्वाम् ॥ खरः सूकरः संकरो वानरो वा नरः पामरः का
तरो नित्यदुःखी ॥ ३८ ॥ पराकादि कृच्छ्रादि कृत्स्याद्वराकः सराकाधिपस्याक्षिपद्मैकभृंगः ॥ सशांगः स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुंगः सगंगाप्लुतांगः प्रयागेषु यज्ञादि कृत्स्नानकृत्स्नः ॥ ३९ ॥ विशिष्टांशिवामष्टपद्यैः प्रतुष्टां करोतीशनि
ष्ठो वरिष्ठो वसिष्ठात् ॥ न कष्टं न नष्टं भवेत्तस्य किंचित्कदाचित्कुतश्चित्स्वदिष्टं लभेत ॥ ४० ॥ ॥ श्री
स्कंद उवाच ॥ ॥ एवमष्टपदैर्देवीं प्रतुष्टामकरोद्गिरिः ॥ मेनयासौ गिरिश्रेष्ठः सा देवी तमभाषत ॥
॥ ४१ ॥ ॥ देव्युवाच ॥ ॥ गिरे चिच्छक्तिरेवास्मि महादेवस्य वेधसः ॥ सुराणां कार्यमुद्दिश्य संजा
३६३ तास्मि तवोदरे ॥ ४२ ॥ न मत्तः पृथगस्तीशो प्रभा चन्द्रमसं विना ॥ तथा विनाभवाच्छक्ति रस्म्याहं पार
मेश्वरी ॥ ४३ ॥ मत्तो ब्रह्माभवद्विष्णुः सेन्द्रा देवा महर्षयः ॥ चराचरमिदं विश्वं ग्रसामि विसृजाम्यह
म् ॥ ४४ ॥ मय्येवांते लयं यान्ति वटधानेव तत्तरुः ॥ सर्वेश्वरी सर्वशक्ति रहमेका सनातनी ॥ ४५ ॥ आपः
पृथ्वी च खं वायुः तेजसां शक्तिरीश्वरी ॥ अप्स्वहं स्पन्दिनी शक्तिः पृथिव्यां गंध दायिनी ॥ ४६ ॥ वायो सं
चालिनी शक्तिः ज्योतिः शक्तिश्च तैजसी ॥ आकाशे व्यापिका शक्ति रस्म्यहं भुवनेश्वरी ॥ ४७ ॥ स्वा
हा स्वधा धृतिर्मेधा विद्याविद्या सरस्वती ॥ गुहा हित्वा गह्वरेशो निष्टा काशप्रतिष्ठिता ॥ ४८ ॥ अहमि
न्द्रियजालं यच्चोदयामि च विग्रहे ॥ सर्वेषां ब्रह्मकीटानां जगत्संसारवर्तिनाम् ॥ ४९ ॥ करोमि निमिषोन्मे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ पै॰ जगत्संहारणोदयौ ॥ केनापिकारणेनैव संजातास्मिगृहे तव ॥ ५० ॥ तस्मात्त्वंलोकमार्गेण महेशायप्रदेहिमाम् ॥ ब्र ईशानं०द्वा०
३५ ह्मणोऽनुमतेनैवदेशकालोचितेशुभे ॥ मुहूर्त्तेऋषिभिः सार्धं मां मायांमायिनं गिरे ॥ तेनाहंसुप्रसन्नास्मित्वयि अ०९
नित्यंसुमेनया ॥ ५२ ॥ धन्यस्त्वंमत्प्रसादेन भोगभाक्संभविष्यसि ॥ नान्यस्मैसत्यमेतन्मां शर्वेदातुं त्वमर्हसि ॥ ५३ ॥
इत्युक्त्वासाहैमवती पुनर्बालवदास्थिता ॥ तां लालयन्तिगिरयोगिरि पत्न्यः समागताः ॥ ५४ ॥ विंध्यमं
दर कैलासमैनाकाद्याःसदर्दुराः ॥ नीलश्च शतशृंगोथवराहोरैवतस्तथा ॥ ५५ ॥ मेरुः सह्योमहेन्द्रश्च तत्र
गोवर्धनोगिरिः ॥ गिरिराजंनमस्कृत्यतुष्टुवुर्गिरयस्तदा ॥ ५६ ॥ ॥ गिरय ऊचुः ॥ ॥ धन्यस्त्वंहिमशैले
शयस्य मायासनातनी ॥ पुत्रीभवभवायैवं दयाकन्या मनोरमा ॥ ५७ ॥ स एव सर्वाधिपतिः पतिर्वेऽस्याम
हेश्वरः ॥ त्वया वैराहरोवीरो लोकनीयः सुरोत्तमः ॥ ५८ ॥ समायी पुरुषो गौरी तस्यायंप्रकृतिःपरा ॥ तेनानन्या
महादेवी त्वयाधन्येन चेतसा ॥ ५९ ॥ देयादेवायविधिवत्तेनास्मत्कुलमुन्नतम् ॥ विख्यातगिरिवर्याणांभ
विष्यतिनसंशयः ॥ ६० ॥ इत्युक्त्वागिरिराजानं गिरयः सर्वएवते ॥ गिरिशायमहेशाय दातुंचक्रुर्मतिंने
गाः ॥ ६१ ॥ साप्यवर्धतकालेन किंचिद्यौवन मास्तवान् ॥ धूलिक्रीडास्वपिशिवंपूजयामासशंकरी ॥ ६२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पालिकाभिस्ततोऽलीभिः कन्तुकैर्हलिलास्यकैः ॥ वृक्षान्दोलैः कुमारीणां क्रीडाश्चक्रे महेश्वरि ॥६३॥
नागगन्धर्व कन्यास्ताः तत्र तत्पर्वतस्थिताः ॥ मुनि कन्यास्तथा चान्याः गिरि कन्यां सिषेविरे ॥६४॥
लास्योल्लासैस्तथा हासैः सापितुर्मुदमादधत् ॥ मेनापि कन्यां धन्यान्यां तां विलोक्याति हर्षिता ॥६५॥
तस्याः यौवन सौंदर्यं नान्यत्र स्थितमीक्ष्यसा ॥ सास्रा विलाक्षिता नित्यमपश्यद्दीनचेतसा ॥६६॥ कं पतिं
प्राप्स्यते देवी वरं नरसुरेषु वा ॥ तां वीक्ष्य विस्मितौ तत्र मेना च हिमभूधरः ॥६७॥ तां वर्णयामास तु
३६१ स्तो पार्वतीं कन्यकामिमाम् ॥ ॥हिमवानुवाच॥ ॥श्रेणीसैकतधोरणी वरमणी रत्नस्य नाणी
यसी ॥ वाणी फाणित गर्विणी कुचतटी क्षोणीभृदाक्षेपिणी ॥ पाणी पद्मतृणी कृतक्षमभृणी वेणी
कृपाणीवते ॥ वाणीभूत मणी बकस्यहारिणी धिक्कारिणी चाक्षिणी ॥६८॥ ॥ इति श्री शिवरह
स्ये ईशानाख्ये द्वादशांशे गौरी उत्पत्तिर्नाम नवमोऽध्यायः ॥९॥ ॥श्रीकाशी विश्वेश्वरार्पण
मस्तु ॥ ॥श्री ईशानाय नमः॥ ॥श्रीस्कन्द उवाच॥ ॥ इत्थं चिंतयतोः पित्रोः तोषितुं पर
मेश्वरम् ॥ पार्वती पर्वतसुता तपसीत्थं मनो दधे ॥१॥ कदाचित्पितुरंकस्था मेनया लालिता तदा ॥२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ मोहनम्रमुरवी बाला पितरं हिमभूधरम् ॥२॥ ॥ पार्वत्युवाच ॥ ताताहं तप्तमिच्छामि कुतस्तत्सुवराश्रमम् ॥ नाना ईशानांद्धा०
३६ मुनिजनाकीर्णं संकीर्णं मृगपक्षिभिः ॥३॥ स्वच्छांबुफलवृक्षाढ्यं यत्र मे स्यात् द्रुतिप्रदम् ॥ तत्राहं तप्तुमिच्छामि मा अ०१०
मनुज्ञातुमर्हसि ॥४॥ स पार्वती वचः श्रुत्वा पर्वतेन्द्रः समेनया ॥ उवाच बाष्पपूर्णाक्षस्तां कन्यां स्वांकसंस्थिताम् ॥
॥५॥ ॥ हिमवानुवाच ॥ ॥ आः किमुक्तं त्वया बाले तपः क्व तनु कृते ॥ शिरीषपुष्पमृदुला कथं विद्योतिता
तपे ॥६॥ सहते वर्षधाराणामासारं हिमसंभवम् ॥ सिंहशार्दूलशरभवृकभल्लुकनादतः ॥७॥ कथं न भीतिमा
प्नोषि भामिनी वनसंकटे ॥ कंटकैरावृततले मातंगरवसंकुले ॥८॥ सदा दुःखकरं बाले तपो मुनिनिषेवितम् ॥
संजाता ब्राह्मणकुले वर्णिनो वेदधारिणः ॥९॥ गुरवे दक्षिणां दत्वा गृहस्थाः यज्ञयाजिनः ॥ पुत्रानुत्पाद्य वन्या
स्ते भवन्ति किल बालिके ॥१०॥ ततः पितृते विरज्यैव सन्न्यासाश्रममाश्रिताः ॥ एकाकिनो निर्भये न संचरंति
वने सदा ॥११॥ अतस्त्वं भूषणैर्युक्ता रवेत्नं तीपालिकागणैः ॥ बालिकाभिः सदा बाले विदधंति मुदं मम ॥
॥१२॥ वसा वनसहामीदं वियोगं तव पार्वती ॥ इत्युक्त्वा भूधरेणांबा पुनस्तं समभाषत ॥१३॥ ॥ पार्वत्यु
वाच ॥ ॥ महादेवं महात्मानं तपसा तोष्य शंकरम् ॥ अत्रासु पतिमीशानं तप्स्यामि परमं तपः ॥१४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मा दुःखं कुरु मे तात पर्वतेन्द्र वियोगजम् ।। तवैव कुलमुत्कृष्टं भवेन यदि संगता ।।१५।। मा निर्बंधं कुरुष्वात्र का-
च रणेन तवोदरे ।। संजातास्मि मेनायां प्रकृत्यहमिहास्थिता ।।१६।। तस्याः सुवचसा तत्र मेनया सह भूधरः ।। सं-
मन्त्र्य स शुभे लग्ने देवीं स्नाप्य सुभूषणैः ।।१७।। वासोभिर्गंधपुष्पाद्यैः अलंकृत्य च पार्वतीम् ।। तद्वियोग-
सहो वाच मुवाचास्राविलेक्षणः ।।१८।। ।।हिमवानुवाच।। ।।हितं वदामि ते पुत्रि शृणु मत्तस्तपस्थिता ।।
ममैव मौलिं निवस केदारार्चनतत्परा ।।१९।। नानामुनिजनाकीर्णे नानाशाखिविराजिते ।। नानापक्षिरुतापार
365 मृगसंघनिषेविते ।।२०।। सरो नैरे कुबहुले प्रफुल्लकमलोत्पले ।। अत्र केदारनाथस्य पूजनान्मुक्तिभाक् नरः ।।
।।२१।। बहवोऽत्र समभ्यर्च्य सुराश्च मुनयः पुरा ।। लेभिरे वाञ्छितान्कामान्तपसा तोष्य शंकरम् ।। २२ ।।
इत्युक्त्वा तां समालिंग्य मेनया हिमभूधरः ।। पार्वतीयैर्गणैर्युक्तो नानावर्णैर्दुरासदैः ।।२३।। मेनया च स
मैनाको गिरिः कन्यायुतो ययौ ।। नानादुंदुभिनिर्घोषैः पटहानकगोमुखैः ।।२४।। पुष्पलाजारुवर्षेण
हर्षेण महता युतः ।। दिव्यां विमानमारुह्य पुष्पदामावलम्बिना ।।२५।। पताकाचामरछत्राजि दिव्यछ-
त्रेण भास्वता ।। नीराजयन्ति तां देवीं गिरिसंस्था वरांगनाः ।।२६।। तपस्यभिमुखीं यातां तां देवीं देवादिवि प्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ स्थिताः ॥ सुमैर्ववर्षतुस्तदा गंधर्वाप्सरसो जगुः ॥२७ ॥ ननृतुर्मुनयस्तत्र जेपुः शांतिं तदाखिलाः ॥ विमानादवरु ईशानाद्धा
३६ ह्याशु केदारं शिखरे स्वके ॥ २८ ॥ उत्फुल्लु सरुकाराद्ये तमालालिविराजिते ॥ तालसंघर्षिमरुताराविते फल अ०१०
सावने: ॥ २९ ॥ फुल्लु मन्दारविपिने कर्णिकारालि शोभिते ॥ कदम्बकेतकी गुच्छ संच्छन्नालि विराजि
ते ॥ ३० ॥ दाडिमी निबिडैर्वृक्षैः फलपुष्पावनामभिः ॥ चंपको द्दामगंधाढ्ये कृतमालविराजिते ॥ ३१ ॥
अशोक देवदारूणां तरुभिर्बिल्व संयुते ॥ अशोकैः शोकनाशाढ्यैः मातुलिंगैः फलानतैः ॥ ३२ ॥ करंजकक
भैश्चैव कपित्थ वदरैर्युते ॥ नारंगराजिते तत्र पक्षिसंघविराजिते ॥ ३३ ॥ नदन्नत्यूहकारंडचक्रवाको
पकूजिते ॥ भ्रमत्सारंग मातंग कुसुमव्रज षट्पदे ॥ ३४ ॥ मुनीनामाश्रययुतेश्रमहारिणि वारिणि ॥ उत्फु
ल्लुकरवीरालि कदलीदललालिते ॥ ३५ ॥ नारिकेलभरास्फालसंविदारितमारुते ॥ शिखंडितांडव
कृतकेलालिपि दिगन्तरे ॥ ३६ ॥ पुंस्कोकिलोरुविरुते हंस झंकारघोषिते ॥ समुत्फुल्लाब्जिनीं गाह्यप
रिधायदुकूलकम् ॥ ३७ ॥ गिरिणा समनुज्ञाता तपसे धृतनिश्चया ॥ धृत त्रिपुंड्र रुद्राक्ष कंकणांग
द वर्जिता ॥ ३८ ॥ सूक्ष्म पर्णैक वसना अपर्णा बहु शोभत ॥ कृतधम्मिल्लु जटिला सखीभिः सा मनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रमा ॥३९॥ विमुक्तमुक्तामालाढ्या सा देवी भूषयद्वनम् ॥ स्ववक्त्रजातसौंदर्यं पद्मेषु निदधे शिवा ॥४०॥
स्वनेत्रनीलिमानं सा ददौ नीलोत्पले शिवा ॥ स्वनासापुटसंशोभां ददौ चंपककुड्मले ॥४१॥ स्वाधरेऽपि च
यद्रागं तद्बिम्बेषु न्यधात्तदा ॥ रदनावलिसंशोभां कुंदेषु समकल्पयत् ॥४२॥ कपोलयोर्यत्सौंदर्यं मादर्शेषु
ददौ तदा ॥ कण्ठमण्डलशोभां च शंखेषु परितन्वती ॥४३॥ कर्णयोर्या तदा शोभा ... ष्कुलीषु ददौ शिवा ॥
३६ मातुलिंगे कुचोत्तुंगं ददौ सा परमेश्वरी ॥४४॥ नाभी जघनशोभां च कुंभिमस्ते ददौ तदा ॥ स्वोरुभारं च रंभा
यां सेवां बासमकल्पयत् ॥४५॥ अपदेयच्चरामण्यं कमठीषु ददौ शिवा ॥ कन्यां यत्तत्र सौंदर्यं सिंहेषु प्रददौ
शिवा ॥४६॥ नखानां च रुचिं देवी सा मिचन्द्रे ददौ तदा ॥ भूशय्या साभवद्बाला वर्षं पवनभोजना ॥४७॥
वर्षं पर्णफलाहारा निराहारा च हायनम् ॥ हेमन्ते जलमध्यस्था वसन्ते स्थण्डिलेशया ॥४८॥ ग्रीष्मे
पंचाग्निनिरता वर्षास्व भ्रावकाशगा ॥ रुद्रमावर्त्तयन्ती सा पंचाक्षरपरायणा ॥४९॥ तपस्यन्तीं तदा देवीं
मुदा तत्र महर्षयः ॥ समवेताः सदारास्ते विस्मयन्तश्च संस्थिताः ॥५०॥ शिकत्यं शिकतालिंगे पूजया
मास शांभवी ॥ तत्रत्य वृक्षाश्च मृगाः पाक्षिणो रक्षयन्ति ताम् ॥५१॥ करिणः पुष्करासारैस्तस्यां गं सम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ शीतयन् ॥ शिखंडिनः स्वपिच्छाग्रैः घर्मान्तां तामवीजयन् ॥५२॥ चमराः पुच्छगुच्छैस्तां धून्वन्तो दूंराव। इशा०द्धा०
३८ रकाः॥ कोकिलारावसल्लापैः स्तुवन्त इव संस्थिताः ॥५३॥ शाखिनः स्वस्वशाखाभिः छादयन्त्यात अ०१०
पार्दिताम् ॥ गिरिराडपि तां देवीं विलोक्या याति याति च ॥५४॥ सख्योऽभवन्तदा तस्या मुनिपत्न्यः कुमारिकाः॥
सुपुष्पोपचयन्तत्र कंदमूलफलादिभिः ॥५५॥ शीतपानीयदानेन ताः सेवन्ति महेश्वरीम्॥ केदारेश्वर
पूजायां निरताद्वादशाब्दकम् ॥५६॥ पंचामृताभिषेचनेन गन्धैः पुष्पैर्मनोहरैः॥ धूपैर्दीपैश्च नैवेद्यैः प्रणा
मप्रक्रमादिभिः ॥५७॥ पूजयामास सा देवी गिरिराजसुमौलिगा॥ तेन संप्रेषितेनैव संभारेण पराशिवा॥
॥५८॥ संपूजयन्स्तुवन्त्येवं स्तोत्रेण परमेश्वरम्॥ भाद्रशुक्लतृतीयायां शिकतायां महेश्वरम्॥५९॥ सम
र्चयन्ती रात्रौ सा बिल्वपत्रैर्महेश्वरम्॥ साकरोज्जागरं देवी केशेशस्तवेरता॥६०॥ विरता सर्वभोगेभ्यो
शर्वे संन्यस्तमानसा॥ ॥पार्वत्युवाच॥ ॥ प्रभाकरनिशाकरप्रथितलोचनं शंकरं वरंसितसुधाकरंगर
च धरं गंगाधरम्॥ भजामि शिवमव्ययं वरगुणोच्चरत्नाकरं यमांधकहरं हरं फणिगणेशहारं शिवम्॥६१॥
अरुणं चरणं महेशते ऽद्य शरणं मरणक्षणेऽपि यामि॥ करुणावरुणालयोऽसि शंभो प्रणमन्तीमभिवी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्ष्यदेवपाहि ॥६२॥ कुंभींद्रकुंभस्थितपादपद्मं कुंभित्वचोत्कृतिगलद्रुधिरांगवल्लम ॥ कुंभस्यसूनु
सुरकुंभभवादिपूज्यं कुंभीश्वरं प्रणत कुंभि समग्र कायम् ॥६३॥ केदारेश महेश शंकरविभो काकोदरा
कल्पक ॥ हेविश्वाधिकशंबरांकसुमहत्सच्छेखरांकप्रभो ॥ गिरिराजशिरोध्यैरेकवासवरदिग्वाससु
कृत्तिवासपाहि ॥६४॥ ॥सूतउवाच॥ ॥इत्थं सास्तुवदीश्वरेश्वरमुमाकेदारमेवादरात् ॥ आराद्धारित
३६७ पातकागिरिवरेधीरैकवीरास्थिता ॥ ता मारादृदृशुः सुरासुरगणां देवीं प्रणम्यामराः ॥ धातारं प्रययुश्च
तारकमहाशूरेणसंपीडिताः ॥६५॥ ॥इतिश्री शिवरहस्ये ईशानाख्ये द्वादशांशे देवी तपश्चर्यानाम
दशमोऽध्यायः ॥१०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीईशानायनमः ॥ ॥श्री॥
॥स्कंदउवाच ॥ ॥एतस्मिन्नेवकालेतु तारकोनामदानवः ॥ तारकात्मा महाशूरो बभूव दितिनंद
नः ॥१॥ तस्यपुत्रास्त्रयश्चैव तारकाक्षो महाबलः ॥ विद्युन्मालीचबलवान् कमलाक्षश्च वीर्य
वान् ॥२॥ तस्याभवत्सुतोवीरो तारो नाम महाबलः ॥ तपसा लब्धवीर्यश्च प्रसादाद्ब्रह्मणः प्र
भोः ॥३॥ सोऽपितारो महातेजास्त्रैलोक्यं सचराचरम् ॥ विजित्यसमरेपूर्वं विष्णुनाचनिषूदितः ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

।शिवरह०१२ तथासमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ दिव्यं वर्षसहस्रं तु दिवारात्रमविश्रमम् ॥५॥ सरथं विष्णुमादाय स ईशा० द्वा०
३९ सर्जे शतयोजनम् ॥ तारेण निर्जितश्चैव दुद्राव गरुडध्वजः ॥६॥ ताराच्छतगुणं तस्माल्लब्ध्वा शतगुणं बलम् ॥पि अ०११
तामहाज्जगत्सर्वमवापदितिनन्दनः ॥७॥ देवेशप्रमुखान् जित्वा देवान्दैत्येश्वरः ॥ वारयामास देवान्स
सर्वाँल्लोके शमायया ॥८॥ देवा^ता^श्च सहेन्द्रेण तारकाद्भयवेदिनः ॥ न शान्तिं लेभिरे शूराः शरणं वा भयार्दिताः ॥
॥९॥ तथामरपतिः श्रीमान् स निवार्यामरान्प्रभुः ॥ उवाचांगिरसं देवो देवानामपि सन्निधौ ॥१०॥ भग
वन्स्तारको नाम तारेयो दानवांबुदः ॥ तेनास्म निर्जिताः सर्वे वत्सा गोपतिना यथा ॥११॥ भयात्तस्मान्महा
भागबृहद्बुद्धे बृहस्पते ॥ अतिरुद्धा भ्रमन्त्येते शकुंता इव पंजरे ॥१२॥ अस्माकं यान्यमोघानि आयुधा
न्यंगिरां वर ॥ तानि मोघानि जायन्ते प्रभा^भावा^तदमरारिणः ॥१३॥ दश वर्षसहस्राणि द्विगुणानि बृहस्पते ॥
विष्णुना योधितो युद्धे विष्णुना प्रभविष्णुना ॥१४॥ कथमस्मद्विधास्तस्य स्थास्यन्ते समरेऽग्रतः ॥ एव
मुक्तस्तु शक्रेण जीवः सार्धं सुराधिपैः ॥१५॥ सहस्राक्षेण च विभुं संप्राप्याह कुशध्वजम् ॥ सोऽपि
तस्य मुखाच्छ्रुत्वा प्रणतिं प्रणतार्तिहा ॥१६॥ देवैरशेषैः सेन्द्रैस्तु जीवमाह पितामहः ॥ जाने चार्तिं सुरे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्द्राणां तथापिश्रुणुसाम्प्रतम्॥ १७॥ विनिंद्यदक्षं यादेवी सती रुद्रांगसंभवा॥ उमा हैमवती जज्ञे सर्वलोक
नमस्कृता॥ १८॥ तस्याश्चैव हि रूपेण यूयं देवाः सुरोत्तमाः॥ विभोर्युतत्वं रुद्रस्य तस्माद्देव्या महात्मनः॥१९॥
तयोर्वीर्येण संभूतः स्कन्दः शक्तिधरः प्रभुः॥ षडास्यो द्वादशभुजः सेनानीः पावकप्रभः॥२०॥ स्वाहे
यः कार्तिकेयश्च गांगेयः शरधानजः॥ ज्ञेयः शाखो विशाखश्च नैगमेषसुवीर्यवान्॥२१॥ सेनापतिः
३६४ कुमाराख्यः सर्वलोकनमस्कृतः॥ लीलयैव महादेवः सबलं तारकासुरम्॥२२॥ बालोऽपि विनिह
त्यैको देवान्संतारयिष्यति॥ एवमुक्तस्तदा तेन ब्रह्मणा पद्मयोनिना॥२३॥ बृहस्पतिस्तदा देवं देवैः
सेन्द्रैः प्रणम्य च॥ मेरोः शिखरमासाद्य स्मरं सस्मार सुव्रतः॥२४॥ स्मरणादेव जीवस्य स्मरोऽपि सह भा
र्यया॥ रत्या समं समागम्य नमस्कृत्वा कृतांजलिः॥२५॥ स शक्रमाह तं जीवं गत जीवं द्विजोत्तमाः॥ स्मृ
तोऽहं भवता जीव हन्तव्यो न बृहस्पते॥२६॥ देवैः सेन्द्रैरशेषैश्च स्मृत एव न चान्यथा॥ गत्वा तदाश्रमं शंभो
स्तया रत्या महाबलः॥२७॥ वसन्तेन सहायेन देवं योक्तुमना भवत्॥ ततः संप्रेक्ष्य मदनं स च देव
स्त्रियंबकः॥ २८॥ स तु नेत्रं तृतीयेन सार्धं मदनमैक्षत॥ ततोऽस्य नेत्रेयो वह्निः मदनं पार्श्वतः स्थितम्॥२९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ अदहत्तत्क्षणादेव विलपत्करुणं रतिः ॥ रत्याः प्रलापमाकर्ण्य देवदेवो वृषध्वजः ॥३०॥ घृणया परया प्राह ईशगंद्धा
४० कामपत्नीं निरीक्ष्य च ॥ अमूर्तोऽपि हि भुवने भद्रे कार्यं सर्वं पतिस्तव ॥३१॥ रतिकाले ध्रुवं बाले करिष्यति न संश अ०११
यः ॥ यदा विष्णुश्च भविता वसुदेवसुतः शुभे ॥३२॥ शापाद्भृगोर्महातेजाः सर्वलोकहिताय वै ॥ यदा तस्य
सुतो यस्यात्स पतिस्ते भविष्यति ॥३३॥ प्रणम्य च तदा रुद्रं कामपत्नी शुचिस्मिता ॥ जगाम मदनं लब्ध्वा वसन्ते
नवराननाः ॥३४॥ ॥ श्रीस्कंद उवाच ॥ ॥ सती कान्तचित्तं प्रलब्धुं वसन्तो मुदा तत्र चक्रे वनं तं सुकान्तम् ॥
गिरौ मंदरे मंदिराभे शिवस्य तदा मन्दिरा प्रायसायं तनेषु ॥३५॥ प्रभाकरकरस्फुरत्कमलकोशली नालयः ॥
परागरसरंजिताः परिपतन्ति पुष्पद्रुमात् ॥ पलाशसुमावलीमिव नुकास्य भागे तदा ॥ शुका अपि मुखा ॥ कु
तान् विकलयन्ति जम्बूमिव ॥३६॥ आताम्रपल्लवगलन्मधुसौरभोद्यन ॥ सन्कोरकैः सुमभरावृत
सच्छलादु ॥ तद्गन्धमेदुरदिनान्तविकासिमल्ली ॥ प्रोत्फुल्लहल्लकगते वने शीतवातैः ॥३७॥ कुरबकावि
कसत्परागगंधैः परिफुल्लार्जुनजंबुकेतकावलीभिः ॥ सुरपुन्नागकदंबमंजरीभिस्तगरारग्वध
घपुष्पगंधवातैः ॥३८॥ कुरंटकुटजावली विधृतपुष्पसत्कोरकैः ॥ शमीकुसुमपाटलीपटल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गंधवन्धानिलै: ॥ सुबिल्वकुसुमोत्कर मप्रभवगंध सन्मेदुरे ॥ विभाति किल मंदर: कुसुमशारविस्तृत् शो
स्वर: ॥ ३९ ॥ सुमंदरसरोवरमधिततीर मंदारजै: ॥ सितासितसुभोद्भवैर्विमल वातगंधोद्यतै: ॥ सुपर्णसु
मगुच्छकैर्वरसुकर्णिकारोद्भवै: ॥ कनककनकपुष्पवच्छिखरवरमत्र माभाति वै ॥ ४० ॥ धरणीभृत्परभृ
द्धिशाल रागै: ॥ वनन त्यूहरुतै: स्तुवन्निवेशम् ॥ वनखण्डेषु शिखंडि ताण्डवै: ॥ वर केकासरसीस्थ
369 सारसानाम् ॥ ४१ ॥ उत्फुल्लनील कुमुदोत्पल पुण्डरीक ॥ आरक्तहल्लक सुपंकज गंधभृंगम् ॥ तद्गंध
सुन्दररज: प्रविकीर्णपक्षा ॥ हंसालि चालन रवै: दिवमुत्पतन्ति ॥ ४२ ॥ क्रौंचाक्रान्तबकोरुपक्ष
चलनै: लीनाश्च मीनाश्चेत ॥ सारस्या: सरसीरुहेषु मधुपा: भ्राम्यन्ति भ्राम्यंत्सपि ॥ एवं सावन
राजिराजतपरं दृष्ट्वा प्रहृष्टो हर: ॥ रतिपति रतिश्लाघ्यवेन शंभुं हृदये शंगिरिशं बिभेद पुष्पै: ॥ ४३ ॥ सुर
साधारणतो वधीरणां कृतवानसुहृत्सुकर्मणोऽसौ ॥ कुसुमेषु शरावधूत धैर्यो गिरिवर्यो प्रविचाल्य
दृष्टि लौल्यम् ॥ ४४ ॥ कुसुमितवरगुल्मिविपक्षि गुल्मम् ॥ रमणीयं रमणी मनोहरो भूत ॥ कुसुमेषु
कुसुमावलीढ देहम् ॥ सुमवृक्षान्तरगुल्ममध्य दृष्ट्या ॥ ४५ ॥ परिवीक्ष्यानलाक्षि कोणलक्ष्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ भस्यं गरकण्ठः प्रकरोदनंगतारव्यम् ॥ भस्मीभूतमनंगसुंदरतनुं दृष्ट्वैव तत्पृष्ठगा साश्राक्षी रतिरेव शं ईशा०द्वा०
४१ करकृपापात्रं स्तुवन् चुक्रुशे ॥ ४६ ॥ ॥ रतिरुवाच ॥ ॥ हे वासुदेव नयनार्चित कामदेव ॥ भस्मां अ०११
गराग वरभूषित वामदेव ॥ श्रीवामदेव्य रवतोषित भूमिदेव ॥ पूज्य प्रसीद परमेश्वर देवदेव ॥ ४७ ॥
महादेव देवाधिदेव प्रसीद प्रसीद प्रभो कालकाल प्रपन्नाम् ॥ विषादेन सीदामि मोदामि शम्भवत्प्रसादे
न ते स्यात्कृपा मां यदावै ॥ ४८ ॥ विभो मारस वैस्वमप्यंतरंग सदा खर्वगर्वादिरूढं ...... ॥ मृडानीपते
गूढपादद्वयी षा विशेषांग कामांग नाश प्रसीद ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ रत्यास्तुत्वा च नत्वा
गिरिवरशिखरे सत्यवाचा विहल्य ॥ पातिव्रत्याऽनुभूत्या स किल पुरहरस्तामनंगेन योज्य ॥ काले
देव्याः कटाक्षैः तव पतिरमरो जायते इत्यशांताम् ॥ कान्तप्रदानद्गिरिशवरकृता पात्रभूतां रतिं ताम् ॥ ५०
देव्यास्ते प्रययुस्स भीतहृदयास्ते क्रांदिशीका भवन् ॥ क्रोधांधीकृत लोचनस्य पुरतः स्थातुं न शेकुस्त
दा ॥ इन्द्राग्न्यानिलवायवः स वरुणाः सोमार्यमाद्याः सुराः ॥ मरव्यातुं वरमन्मथांगदहनं देवेन तद्द
ह्मगे ॥ ५१ ॥ ॥ इति श्रीशिवरहस्ये ईशानारव्ये द्वादशांशे मन्मथदाहो नाम एकादशोऽध्यायः ॥ ११ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥श्री ईशानायनमः॥ ॥श्रीस्कंद उवाच॥ ॥ययुरिंद्राद
योदेवाः ब्रह्मलोकं सनातनम्॥सुवर्णसौधसंबाध प्राकार वरगोपुरम्॥१॥पुष्पकल्पकवृक्षाढ्यं
दोधूयितपताककम्॥रत्नागारमहाकुंभ संघभासुरमुत्कटम्॥२॥पुष्पगन्धादि बहुल धूपदीपविदी
पितम्॥तत्रसत्यसुरालोके आलोकन्तपितामहम्॥३॥ब्रह्मेश्वरालयं तत्र वज्रागारमनोरमे॥कन
370 त्कनककुंभाग्रेनानावृषवराश्रये॥४॥धूपिते दीपिते शंभो रालये·· कल्हारलये॥ वैखानसै र्वालखि
ल्यै मुनिभिः संवृतस्तदा॥५॥ गायत्र्या चैव सावित्र्या संवृतं पार्श्वयो र्द्वयोः॥ वेदान्तनिष्ठै र्यतिभिः
संवृतं भस्मभूषितैः॥६॥ पंचास्यध्याननिरतः चतुर्वक्त्रः प्रजापतिः॥ चतुष्करं कसुभगं भस्म
दिव्यत्रिपुण्ड्रकः॥७॥रुद्राक्षरत्नाभरणो पूजयन् शंकरं स्थितः॥ पत्रै र्बिल्वैर्महादेवं ब्रह्मेशं
सत्यलोकगम्॥८॥स्तुवंतमेवं देवेशं चतुर्वक्त्रः प्रजापतिः॥ ॥ब्रह्मोवाच॥शंभो त्वं कनका
द्रिचापशरधिः वाहीकृतोन्नायकः॥पाहीशक्षितिसुन्दरोत्तमरथो यं तास्मिञ्जिष्णुः शरः॥मौर्वी
ते फणिपुंगवस्तववरे चक्रेच कैंदूत्तमे॥ लक्ष्यंते त्रिपुरं सुराभटगणाः कस्ते नमस्ते समः॥९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ तादृशं तत्र ब्रह्माणं ददृशुस्त्रिदशास्तदा ॥ प्रणम्य तत्र ते देवाः ब्रह्माणं प्रोचुरत्र हि ॥ १०॥ ॥ ॥ इशा०द्वा०
४.२ ॥ सुरा ऊचुः ॥ ॥ नमस्ते भगवन्ब्रह्मन् इत्यादेवः प्रसादितः ॥ तां कृपापात्रभूतांश्च त्रिनेत्र अ०१२
श्चाकरोद्विधे ॥ ११॥ करवाम किमद्यात्र तारकेन निपीडिताः ॥ प्रयाताः शरणं सर्वे त्वामिवाद्य
पितामहम् ॥ १२॥ उपायं चिंत्यतामत्र हरोद्वाहे प्रजापते ॥ तदा देववचः श्रुत्वा विधिस्तत्र विचिं
य त्यतत् ॥ १३॥ उवाच सांत्वयन्देवान् तारकं प्रति संयुगम ॥ ॥ ब्रह्मोवाच ॥ ॥ माभैष्ट यूयं विबुधा
स्त्रिविष्टपनिवासिनः ॥ शिपिविष्टोस्य कोपेन स्मरन्स्मार्यं तनुर्भवेत् ॥ १४॥ भवितव्यं तथैवात्र किम
द्य करवाण्यहम ॥ हैमवत्या महेशस्य उद्वाहे मया ता मह ॥ १५॥ तयोर्यः संभवेत्सूनुः स नस्तारकनाश
कः ॥ तमेवं संप्रसाद्यैव सेनापत्ये नियुज्महे ॥ १६ ॥ स तारकं मृधे हत्वा भोग वः संपदास्यति ॥ इ
त्युक्त्वा त्रिदशैः सार्धं वैकुण्ठं प्रययौ विधिः ॥ १७॥ हंसमारुह्य रभसा शिवस्योद्वाहकर्मणे ॥ ना
नारत्नप्रभाभासि प्राकारवरगोपुरम् ॥ १८॥ राजत्कुंभपताकाग्रैः शोभमानं मनोरमम् ॥ वैष्णवैर्गा
णपैर्युक्तं शंखचक्रधरैर्वृतम् ॥ १९॥ तार्क्ष्येण विष्वक्सेनेन संस्थितं द्वारि वैष्णवैः ॥ तत्र वैकुण्ठभु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वने प्राकारवरगोपुरम् ॥ २० ॥ रत्नमंडपसंबाधं दिव्योत्तुंगवृषाश्रितम् ॥ इन्द्रनीलमणिज्योतिर्लिं
गं विष्ण्वीश्वराभिधम् ॥ २१ ॥ पूजयंतं महालक्ष्म्या सर्वदा वरिवस्यया ॥ बिल्वपत्रैः सकल्हारैः
कमलोत्पलमंडितैः ॥ २२ ॥ धूपदीपैश्च नैवेद्यैर्नीराजनमनोहरैः ॥ स्तुतिभिः संस्तुवंतं तं विष्णुं
कमललोचनम् ॥ २३ ॥ भस्मत्रिपुंड्रफालं तं फाललोचनपूजकम् ॥ धृतरुद्राक्षहाराढ्यं पीतकौ
शेयवाससम् ॥ २४ ॥ ददृशुस्ते तदा विष्णुं स्तुवंतं परमेश्वरम् ॥ ॥ विष्णुरुवाच ॥ ॥ गंगाचं
द्रकलाललाम भगवन् हेमांगबाणासनो ॥ भूमा त्वं श्रुतिसीमधाममहिमा रामाकृतार्धांगि
३७ कः ॥ सोमाग्नीहरिसायकः क्षितिरथो वाहीकृताम्नायकः ॥ सर्वेषां च पुमर्थदोऽसि भगवन् मां
पाहि सांब प्रभो ॥ २५ ॥ इत्थं स्तुवंतं ददृशुर्हरिं विधिमुखाः सुराः ॥ तान् दृष्ट्वा स तदा विष्णुः स
मुत्थाय विधिं तदा ॥ २६ ॥ स्वासने चोपसंवेश्य सुरान् हेमासनेषु च ॥ उपवेश्याहर्यां चक्रे गंध
पुष्पादिभिस्तदा ॥ २७ ॥ शिवनैवेद्यशेषेण विधिनाभोज्य सत्तमः ॥ उवाच देवस्तान्देवान् ब्रह्मे
न्द्रप्रमुखान् हरिः ॥ २८ ॥ ॥ हरिरुवाच ॥ ॥ कुतः समागताः सर्वे किं वः कार्यमुपस्थितम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 त्रिशूलपाणिस्मरणात्करवाणिवयोमुदम्॥२९॥तदाविष्णुवचःश्रुत्वाविबुधाःप्रवचन्वचः॥विधिनातेत इशा० दा.
४३ दाविष्णुंतारकासुरसंगरम्॥३०॥पराजयंचसर्वेषांविबुधानांचविष्णवे॥ ॥सुराऊचुः॥ ॥संगत्यसर्वे 
विबुधाःवयंस्मरयुताहरे॥३१॥गतायोक्तुंमहादेवेदेवींगिरिसुतांमुदा॥तपस्यभिरतंदेवमूर्ध्वरेतसमीश्वर
म्॥३२॥स्मरोऽपिदेवकार्यार्थमुद्युक्तोभस्मसात्कृतः॥तस्यांदेव्यांमहासेनंयदोत्पन्नंसुरोत्तमम्॥३३॥सेना
पत्येनियोज्यैवभवामविगतज्वराः॥यदत्रकार्यमुचितंतच्छीघ्रंसंविधीयताम्॥३४॥तदादेववचःश्रुत्वा
साश्रुनेत्रोऽब्रवीद्धरिः॥मन्मथंतंतदानष्टंज्ञात्वापुत्रंदृशेरितुः॥३५॥लक्ष्म्यादुःखमवाप्यायंहरिर्वैपुत्रकार
णात्॥उवाचचतदादेवान्किंकृतंस्वार्थलिप्सुभिः॥३६॥नियोज्योहिप्रसाद्यैवहैमवत्यामहेश्वरः॥सिंहस्यपु
रतोदेवानियुक्तोक्रोष्टुकोऽबलः॥तस्यात्रनखराघातंस्मरःकिंप्रसहिष्यति॥३७॥किंवाप्रसादितस्तेनपुन
रुज्जीवनेस्मरः॥३८॥रत्याप्रलापमाकर्ण्यसहमानेनकिंसुराः॥ ॥देवाऊचुः॥ ॥रत्याप्रसादितस्तत्रम
हादेवोऽब्रवीत्तदा॥हैमवत्यासमेष्यामिशीघ्रमेवनसंशयः॥३९॥मत्कटाक्षलवेनैवसमुज्जीवतितेपतिः॥
सर्वेषामप्यनंगोऽयंत्वयिसांगोऽस्तुमाशुच॥४०॥इत्युक्त्वाप्रेषयन्नत्रमहादेवस्तदाहरे॥सतच्छ्रुत्वादेववचो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हर्षंलेभेहरिस्तदा ॥ ४१॥ ब्रह्मणा चाथसंमन्त्र्यदेवोद्वाहाय तत्रवै ॥ तारकस्यविनाशार्थं देवानां चतथामुदे ॥ ४२॥
पुनःस्मरोज्जीवनार्थं मुद्वाहार्थं तथेशितुः ॥ नारदं चसमाहूयप्रेषयद्धिमभूधरम् ॥ ४३॥ ॥हरिरुवाच॥ ॥नार
दागच्छ भद्रन्तो याहित्वं हिम भूधरम् ॥ तपस्यन्तीं महादेवीं केदारे शाचीनेरताम् ॥ ४४॥ प्रदेहिदेव देवाय म
हादेवाय शंभवे ॥ तेनते कुलमुत्कृष्टं भवेद्गिरिवरेषु च ॥ ४५॥ प्रयामसर्वे देवेन तवैव शिखरं गिरि ॥ तदत्रसं
विधस्वाशु अमुनाविश्वकर्मणा ॥ ४६ ॥ विश्वकर्माणमाहूयविष्णुर्वचनमब्रवीत् ॥ ॥विष्णुरुवाच॥ ॥
372 विश्वकर्मन्हिमगिरिं नारदेनव्रजाधुना ॥ तत्रतच्छिखरेरम्ये हरस्योद्वाहसंभ्रमे ॥ ४७ ॥ सुराणां भूसुराणां
च प्रमथानां महात्मनाम् ॥ असंबाधं सुविस्तीर्णं नानारत्नैक भासुरम् ॥ ४८॥ मन्डपालिं कुरुष्वाद्यना
नाविभवविस्तरम् ॥ भक्ष्यभोज्यान्नसहितं फलमूलजलावृतम् ॥ ४९॥ सिंहासनंमहेशस्य स्वयंवर कृतास
नम् ॥ मणिभिः खचितं तत्र मुक्तमालापरिष्कृतम् ॥ ५०॥ सुगन्धपुष्पमालाढ्य मम्लानैश्चसुपंकजैः ॥ प
ताका कुंभसहितं वितानोत्तानितां बरम् ॥ ५१॥ मणिदीपैस्तथाधूपैः कूपास्तीर्णोपधानकैः ॥ कुरुत्वं देवदेव
स्य उद्वाहोचितमादरात् ॥ ५२॥ अनल्प शिल्पसहितं शिल्पिभिस्त्वं व्रजाधुना ॥ सविश्वकर्मावचनान्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ नारदेनययौ द्रुतम् ॥५३॥ नत्वा विष्णुविधीन्देवान् शिवार्पितहृदन्तरौ ॥ संगतौ गिरिराजानं तौ तेनाप्यर्चितौ ईश०द्वा०
४४ तदा ॥५४॥ प्रीतिमीयतुरुत्युक्तौ वाचं ताबूचतुः गिरिम् ॥ ॥नारदविश्वकर्मणावूचतुः॥ ॥ब्रह्म अ०१२
विष्ण्वादिभिर्देवैः आज्ञप्तौ त्वां समागतौ ॥ देवाय देया देवी सा त्वया भूधरसत्तम ॥५५॥ त्वं कृतार्थकु
रुक्षिप्रमात्मानं गिरिभिः सह ॥ धन्यो मान्योऽसि त्वं सर्वैः शर्वाय त्वं महेश्वरीम् ॥५६॥ त्रिनेत्रपात्रमुत्कृ
ष्टं कन्यां धन्यां प्रपादय ॥ यत्पादपंकजप्रीत्यै दानानि कुरुते मुदा ॥५७॥ षोडशै मुनिभिर्देवैराजभिश्च
नगोत्तम ॥ यत्पादपंकजप्रीत्यै कर्माणि कुरुते नरः ॥५८॥ तमेव शरणं याहि गिरि देव्याः प्रदानतः ॥ कार
णं तं निमित्तं च मायासा स पुमान्हरः ॥५९॥ ययोर्जातमिदं विश्वं त्रैलोक्यं सचराचरम् ॥ सुराणां वच
ने नैव मावाभ्यां प्रोक्तमेव ते ॥६०॥ त्वदीये शिखरे चारु चित्रमंडपगोपुरम् ॥ निर्मातुमहमिच्छामि दे
वोद्वाहाय मङ्गलम् ॥६१॥ समाज्ञापय शैलेश द्रुतं देववचो यथा ॥ विश्वकर्मनारदोक्त वचसा हर्षितो
नगः ॥६२॥ प्राह प्रांजलिरेवेत्थं तदा स गिरिराट् मुदा ॥ ॥शैलेश्वर उवाच ॥ ॥धन्योऽहं स
र्वैर्मान्योऽहं देवानां वचनं यथा ॥ ददामि कन्यां देवाय महादेवाय शंभवे ॥६३॥ कारणं लोकवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देऽत्र सैव देवी सनातनी ॥ माया सा पुरुषो देवो महादेवो महेश्वरः ॥६४॥ यदत्र संविधातव्यं देवोद्वाहन
कर्मणि ॥ विश्वकर्मिन् नमस्तेऽस्तु तत्कुरुष्व विचारितम् ॥६५॥ गच्छ नारद भद्रं ते देवेषु ब्रूहि माचिरम् ॥
देवदेवेन यां त्वद्य प्रसाद्य परमेश्वरम् ॥६६॥ समायान्तु सुराः सर्वे मुनयो देवपत्निभिः ॥ गणेशैश्च प्रम
हेशास्य यां त्वद्य सचराचरम् ॥६७॥ स नारदो गिरिवचनेन देवान् ॥ समाययौ वचनमुदारवाक्सः ॥
८७३ अथाब्रवीद्गिरिवर धन्यतरोरु वाचम् ॥ ददति कन्यां भवतश्च वाक्यतः ॥६९॥ मुदा महेशाय स
मेनया गिरिः ॥ मैनाकयुक्तः प्रविनीतचेतसा ॥ प्रसाद्य देवं तपसि स्थितां सुराः ॥ व्रजाम सर्वे विबु
धेश्च माचिरम् ॥७०॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे शिवोद्वाहसमारंभो नाम द्वाद
शोऽध्यायः ॥१२॥ ॥श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥श्री ईशानाय नमः॥ ॥श्री स्कंद
उवाच ॥ ॥तदा हिमवतो मौलौ शिवोद्वाहोचितं शुभम् ॥ प्रागुदक्प्रवणं तत्र शिखरं चारु भूतलम् ॥
तं ॥१॥ निर्मायि यद्दमयात्मा दशसाहस्रयोजनम् ॥ नाना शिल्पयुतं तत्र प्राकार वरमंटपम् ॥२॥ गोपुरा
ट्टालकोपेतं सौधपंक्तिविभूषितम् ॥ क्वचिद्रत्नप्रभाजालं क्वचिद्दिव्यद्रुमभूषितम् ॥३॥ क्वचित्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 मरकतच्छायं क्वचिद्गोमेदसुन्दरम् ॥ हीरावृतं मणिद्वारं गारुत्मत्कीलितांतरम् ॥४॥ क्वचिद्वैडूर्य ईशग०द्धा०
४५ खचितं मंटपादितले युतम् ॥ क्वचिन्नीलामलमणि भ्राजत्तलसुवेदितम् ॥५॥ क्वचित्पुष्पकरा अ०१३
गादि मणिमण्डपभूषितम् ॥ क्वचिन्मुक्तावितानाढ्यं सर्वर्तुकुसुमोज्ज्वलम् ॥६॥ पद्मराग
महारागयुतं च मणिवेदिकम् ॥ अखण्डवरमाणिक्यसरावलिविभूषितम् ॥७॥ क्वचिच्छंखवा
च्छधवलं प्रवाललालितं क्वचित् ॥ पट्टांबरवितानाढ्यं चलच्चामरभूषितम् ॥८॥ वरहेमम
हाचित्रचित्रितं निर्दिवाधिकम् ॥ इन्द्रगोपकसंकाशतलकुट्टिमभूषितम् ॥९॥ रम्यानन्तम
हाद्वारगवाक्षवलभीयुतम् ॥ पर्यंतमच्छदपटैः भूषितं मणिचित्रितम् ॥१०॥ इन्द्रचापनिभे
र्गेहैः निचितं मणिकान्तिभिः ॥ धूपधूमादिबहुलं गंधसिक्तांबुरूषितैः ॥११॥ कमलोत्पल
मालाढ्यं फुल्लहल्लकशोभितैः ॥ कदम्बकुन्दकुमुदमल्लिमालाविराजितम् ॥१२॥ आम्लान
केतकीपुष्पैः आलोलैर्भूषितांतरम् ॥ रम्यनीशीरमरुववितानाच्छादितां वरम् ॥१३॥ मातु
लिंगाम्रफनसकदलीनालिकेरकैः ॥ नारिंगपूगनिंबालिकेतकीफलकीलितैः ॥१४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मालिकालोलितात्यच्छपंक्तिभिः शोभितानाम् ॥ स्वर्णपट्टैस्तथालोलैः भूषितं मणिमण्डपे ॥ १५ ॥ स्व
च्छादर्शोरुफलकैः कीलितं मणिमौक्तिकैः ॥ मुक्तागुच्छसरालोलरत्नपंकजशोभितैः ॥ १६ ॥ सुवर्ण
कुंभविततेः शातकुंभांबरावृतैः ॥ मणिप्रदीपहस्ताब्जपुत्तलीगणसंकुले ॥ १७ ॥ मयूरवरमातंगसारंगा
कृतिशोभितैः ॥ शार्दूलचमरोद्दामपुच्छचामरकीलनैः ॥ १८ ॥ वीजितैः पुरुषाकारचलहस्तोरुवीज
नैः ॥ मयूरपिंछककृतैः व्यजनादर्शसत्करैः ॥ १९ ॥ पुरुषैर्हस्तकीलाभिः कीलितैर्भूषणैर्युतैः ॥
374 अकृत्रिममिवाभाति निर्मितं विश्वकर्मणा ॥ २० ॥ देवानां निलयैस्तत्र भूतानां निलयैरपि ॥ मुनीनामा
श्रमयुतं श्रमहारिसरोवरैः ॥ २१ ॥ तीरसंबंधसोपानैः फुल्लपद्मविराजितैः ॥ तत्तीरविस्तृतापारस्तंभमंट
पभासुरे ॥ २२ ॥ भूसुराणां च शरणैः स्वच्छोदैर्हल्लुकादिभिः ॥ हेममीनैः कच्छपैश्च युतैः सारसपंक्तिभिः ॥
हंसपक्ष्यादिचलनैर्व्याधूताब्जैर्मनोहरैः ॥ ब्रह्मविष्ण्वादिदेवानामिन्द्रादिमरुतामपि ॥ २४ ॥ निवासैः श्रीनि
वासैश्च तत्तल्लोकाधिकैः सदा ॥ भक्ष्यभोज्यान्नबहुलैः वासोऽलंकारसंयुतैः ॥ २५ ॥ निचितैर्मणिमाणि
क्यैः स्वच्छोदैश्च सरोवरैः ॥ देवांगनाविहारैश्च भ्रमग्रहवरैरपि ॥ २६ ॥ शीकरासारकुंभैश्च सभामध्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 विराजितैः ॥ रत्नमदीपयहेश्चित्रैः वितानालंबितैस्तदा ॥२७॥ धूपवृक्षैर्दीपवृक्षैः भूषितैर्मणिपंक्तिदीप्ताः
 भिः ॥ गणानां पुष्पनिलयैः असंबाधैर्विभूषितम् ॥२८॥ सहस्रयोजनोच्छेदे मंडपे विस्तृते त 
दा ॥ नवरत्नप्रभाजालैः भूषिते तप्तकांचनैः ॥२९॥ खचिते कुट्टिमतले सर्वचित्रविचित्रिते ॥
देवदानवगान्धर्वयक्षराक्षसमूर्त्तिभिः ॥३०॥ पंचविंशन्महेशस्य मूर्त्तिभिर्मणिचित्रितैः ॥ विचित्रि
तगवाक्षैश्च समुत्कीर्णैर्विवास्तृतैः ॥३१॥ विस्तृतैर्मणिसोपानवेदिकाभिरलंकृते ॥ मयूरहंस
सारंगवृकव्याघ्रमतंगजैः ॥३२॥ व्यालीपालीमयूराली सुरभावलिभूषितैः ॥ स्तंभैः कुंभैश्च भाभा
भिः धूपदीपैर्मणीन्द्रजैः ॥३३॥ उत्फुल्लरक्तकमलमालाभिः शोभितांतरम् ॥ वितानमच्छदपटमुक्ता
गुच्छालिलंबितम् ॥३४॥ देवसिंहासनैर्हैमैर्मणिमाणिक्यभूषितैः ॥ पराच्यास्तरणास्तीर्णैर्विस्तीर्णैः
पटकान्तिभिः ॥३५॥ तन्मध्ये वेदिका रम्या नानामणिविचित्रिता ॥ पताकाग्रमहाकुंभपुण्यसौ
धंमनोहरम् ॥३६॥ स्वच्छादर्शैतलच्छन्नं पुष्पमालापरीवृतम् ॥ दमनोशीरजाजीभिः पल्लवं
पकसंयुतैः ॥३७॥ मणिमालादिनिचितमापीठलंबिसुन्दरम् ॥ पताभिर्वितानैश्च शोभितं धूपितं तदा ॥३८॥
का
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फलपल्लवपात्रैश्च दूर्वालाजाक्षतैर्युतम् ॥ गंधचंदनपात्रैश्च पूर्णकुंभालितोरणैः ॥ ३९ ॥ पल्लवोर्ध्व
मुखैस्तत्र कदलीस्तंभभूषितैः ॥ स्तंभैरयुतसाहस्रैः मणितोरणभूषितैः ॥ ४० ॥ कुंभ्यः करंभ्यपा
त्रैश्च सौवर्णाः परिकल्पिताः ॥ भृंगारकनकाकूप्यो रौप्यैर्नैवनेवसहस्रशः ॥ ४१ ॥ भक्ष्यभोज्यान्न
गिरयः फलाद्रिवरकल्पनैः ॥ शाकसूपापूपयुतराशीनां युतैरपि ॥ ४२ ॥ खाद्यानां चैव मांसानां नि
३७९ राशयस्तत्र प्रदृश्यते ॥ घृतपायसनद्यश्च प्रवहन्ति मधुस्रवाः ॥ ४३ ॥ शर्करा राशयस्तत्र दृश्यन्ते तन्त्र
गोपमाः ॥ दधिक्षीरवहा नद्यो वहन्ति सरितो यथा ॥ ४४ ॥ मोदकावटकापूपघारिकापेणिमंडकाः ॥
गिरिरूपाः प्रदृश्यन्ते गंधानां गिरयस्तथा ॥ ४५ ॥ पुष्पतांबूलपूगानां गिरयः कल्प(ळक)संयुताः ॥ मुक्ताचू
र्णैर्गिरयः पटवाससुवालकाः ॥ ४६ ॥ कल्पिता मनसा तेन शंकरोद्वाहहेतवे ॥ नृत्यंत्यप्सरसस्त
त्र तालरागलयानुगम् ॥ ४७ ॥ गायंति रुद्रवीणाभिः गंधर्वाश्चारुमूर्त्तयः ॥ पुलोमजा विप्रचित्ति
मेनका सहजन्यका ॥ ४८ ॥ अलंबुषा मिश्रकेशी घृताची मेनकादयः ॥ नृत्यंति तत्र सदसि स्तुवंति
किलचारणाः ॥ ४९ ॥ शिवापदानविजयं गंधर्वी ललितं जगुः ॥ वेदा मूर्तास्तदा तत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 रुद्रान्जेपुर्द्विजैः सह ॥ ५० ॥ स्वाहाकारवषट्कारो स्तुवंतः परमेश्वरम् ॥ वसवो मरुतस्तत्र सूदा आसन्सदैव 
 तैः ॥ ५१ ॥ मरुतः परिवेष्टारो विवाहे शंकरस्य हि ॥ रुद्रा यं धकास्तत्र संचरंत्यर्चने रताः ॥ ५२ ॥ सर्वेषां 
द्वादशादित्याः फलतांबूलदायकाः ॥ पुष्पमालाकरा आसन्विश्वेदेवाः सहस्रशः ॥ ५३ ॥ मातरः पितर
स्तत्र नियुक्ताः परिवेषणे ॥ परवासकरा यास्तां भिषजौ तत्र संसदि ॥ ५४ ॥ पात्रप्रयोजका आसन्नृभ
वो स्वर्णभाजनैः ॥ गन्धाक्षतप्रदातारो सुधन्वानस्तदा मुदा ॥ ५५ ॥ प्रतिपात्रं प्रति सुरं भक्ष्यभोज्या
न्नराशिभिः ॥ पानीयफलदानेभ्यः पूजयंति गणेश्वराः ॥ ५६ ॥ नंद्याद्या वीरभद्राद्या विष्णु
ब्रह्मादयोऽपि च ॥ वस्त्राभरणदानेभ्यः गिरिणां पूजने तथा ॥ ५७ ॥ नियुक्ताः श्रीमहेशेन गीतवाद्योरुन
र्तने ॥ विद्याधराप्सरासिद्धाः साध्यमन्वन्तरागृहाः ॥ ५८ ॥ नक्षत्राणि तथा वायुः यमो निर्ऋतिरेव च ॥
वरुणो धनपो दिग्पा द्विजानामर्चने रताः ॥ ५९ ॥ भक्ष्यभोज्यं च पेयं च गंधपुष्पनिवेदने ॥ त्रिषष्टि
कोटिकन्यायो रुक्मपात्रेषु भुंजते ॥ ६० ॥ भैरवाननकोट्योऽप्य योगिन्यो दशकोटिकाः ॥ रु
द्रगणास्तथैकोनपंचाशत्कोटिसंख्यया ॥ ६१ ॥ चामुण्डाकोटिरेवैका दैत्यदानवकोटयः ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिंशत्रिकोटिदेवानां गंधर्वाप्सरकोटिकम् ॥६२॥ दानमानार्हणा भोज्यैः भुंजंतस्तत्र आसते ॥ श्रीमहेश म
हा गौर्यास्तदावैवाहिके विधौ ॥६३॥ शय्यागंधफलैः पुष्पैः भोगैः संपूज्य सर्वशः ॥ एवं निर्विश्य सकर्मा
सकल्दिविषदां श्रीमहेशाज्ञयासौ ॥ भक्ष्यैर्भोज्यैर्वरान्नैः श्रुतिसुखनिरतैः गानधाराविशेषैः ॥ कृत्वान त्वामुदा
तं हरीममरवरं प्राप्यवि ज्ञाप्य सर्वम् ॥ सोध्यालिं गिरिशेरवरत्र विहितं निर्माय मुक्तोऽभवत् ॥६४॥ ॥ इ
४७८ तिश्री शिवरहस्ये ईशानाख्ये द्वादशांशे गौरीशंकरविवाहमंटपनिर्माणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥
श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री ईशानाय नमः ॥ ॥ श्री स्कन्द उवाच ॥ ॥ अथ दृष्ट्वा गिरिव
रोऽप्यपश्यत्परमाद्भुतम् ॥ निर्मितं मंटपं दिव्यं स्वर्गादपि मनोहरम् ॥ १ ॥ देवो द्रवेत्वरायुक्तो मेनया हिम
भूधरः ॥ नाकि प्रभं तं मैनाकमुवाच पुरतः स्थितम् ॥ २ ॥ ॥ हिमवानुवाच ॥ ॥ गच्छ मैनाक भद्रं ते पर्वताना
नय द्रुतम् ॥ पत्नीभिः सहितान् सर्वान् गौर्युद्वाहे वदाद्यतान् ॥ ३ ॥ यत्तेषु रत्नमांसादि फलमूलमधुस्रवम् ॥ चंदना
गरुपुष्पाणि तैः समानय माचिरम् ॥ ४ ॥ गिरिराजाज्ञया तत्र मैनाकः स्वगणैर्युतः ॥ विमानेन ययौ तत्र गंधपुष्पवि
भूषितः ॥ ५ ॥ पर्वतान्समययौ तत्र ते षु प्रोच्याद्यमंगलम् ॥ तैश्च संपूजितोऽभ्यागात् विमाने रविसन्निभैः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ मेरुमन्दरकैलासाहेमकूटादिनीलका:॥शतशृंगो रैवतश्च निषधोगंधमादनः॥७॥कुमुदःपनसौरे श्चोत्रिकूटश्चि इशा० द्व०
४८ त्रकूटकः॥कलिंगोदुंदुभिःसह्योदर्दुरो विन्ध्यएवच ॥८॥पारियात्रश्च कुमुदो दारवान् वेगवान्स्तथा॥महेंद्रो मल अ०१४
यो गौरो उदयास्तमयाचलौ॥९॥बर्बरोधौंडकोदण्डः ककुभः पद्म एवच॥ शेषाचलश्च श्रीशैलो कंदबो बभ
रो महान्॥१०॥एते प्रधान्यतः शैलास्तथाषट्कोट्योपरे॥गिरिराजाज्ञयातत्र समागच्छन् सहस्रशः॥११॥
मैनाकेनार्कवर्णेन विमानेन सदारकाः॥ ऊह्यमानैःस्वपुरुषैः फलमूलकुलं बहु॥१२॥मधुमैरेयमुत्कृष्टं गंध
चन्दन दारुभिः॥ एणेयमत्स्यमांसानि शुष्कार्द्राणि च पर्वताः॥१३॥गजाश्च गोगणं तत्र सारंगाश्च शुनस्तथा॥
एलालवंगकर्पूरंसत्वच्छदभवं शुभम्॥१४॥तथामृगमदं चित्रं कस्तूरीचामराण्यपि॥मनःशिलाधातुरसंनि
शा कुंकुमरोचनाः॥ जातीपत्रफलंतत्र हेमरौप्यं समौक्तिकम्॥मणिवज्रप्रवालानां पुष्परागविदूरकैः॥१५॥गोमेदनी
ल माणिक्यवासोभारैः सहस्रशः॥ खदिरासारतैलानि हिंगुसर्जरसं बहु॥१६॥ तगरागरुभारैश्च देवदारुभैरस्तथा॥
पूगीफलैः नारिकेलैः कदलीफलमण्डलैः॥१७॥पनसानां च गिरिभिः शर्करागुडमुत्कटम्॥ ज्योतिष्मतीलतोद्भूतं
तैलं चविविधं घृतम्॥१८॥ नारंगमातुलिंगानि आम्रदाडिमपर्वतैः॥ केतकीतालफलकैः पुष्पाणिसुरभीणि च॥२०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपायनमुपाजग्मुः गिरिराजविलोकने ॥ गौर्युद्वाहं समाकर्ण्य गिरयो हर्षनिर्भराः ॥ २१ ॥ सदारतनयास्तत्र मैनाकेन ययुर्द्रुतम् ॥
विमानादवरुह्याशु गिरिराजं प्रणम्य ते ॥ २२ ॥ ऊचुः प्रांजलयः सर्वे गिरयो गिरिनायकम् ॥ ॥ पर्वता ऊचुः ॥ ॥ गिरि
राजन्नमस्तेऽस्तु मैनाकेन सहागताः ॥ अपर्णायाः समुद्वाहं श्रुत्वा पूर्णमनोरथाः ॥ २३ ॥ तूर्णं वयं समायाताः सदारतनया गिरे ॥
धन्या वयं सर्वमान्याः भविष्यामोऽद्य संगताः ॥ २४ ॥ संबन्धेन महेशस्य गिरिशस्य त्वया सह ॥ मैनाकेन सहायातास्त्व
दाज्ञाकारिणो वयम् ॥ २५ ॥ फलमूलं च विपुलं वासो रत्न भरादिकम् ॥ विलोकय गिरिश्रेष्ठ यदत्रानीतमद्य नः ॥
३७७ इति तत्पुरतोऽन्यस्य प्रणेमुर्धरणीधराः ॥ तेषां वचनमानेन हर्षादाह गिरीश्वरः ॥ २६ ॥ ॥ हिमवानुवाच ॥ ॥ धन्या
यूयं सदा मान्या वचनान्मे समागताः ॥ भवद्भिर्देवमीशानं समभ्यर्च्य सुरोत्तमान् ॥ २८ ॥ गणश्रेष्ठानपि नगाः वै
वाहिकसुमंगलम् ॥ भोक्तुमिच्छामि सुभगाः सदारतनयाद्य मे ॥ २९ ॥ मातंङ्गमेव विस्तंभं कुर्वन्तू द्वाहकर्मणि ॥
मेरो त्वमेभिः गिरिभिः सुरासुरसमर्चने ॥ ३० ॥ मातंद्रो भव निर्निद्रः संभारालोकनोद्यतः ॥ मन्दारागच्छ भद्रं ते त्वं
विंध्यात्र गृहे वस ॥ ३१ ॥ यदत्रानंतरं कार्यं कुरु क्षिप्रमतंद्रितः ॥ समायास्यति देवेशो गौर्युद्वाहाय चामरैः ॥
गणेन्द्रैः मुनिभिः सार्धं तत्पूजानिरतो भव ॥ फलमूलाशनैः पाद्यैः गंधपुष्पनिवेदनैः ॥ ३३ ॥ पारिपात्रस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 मागच्छ भक्ष्यभोज्येषु संवस॥ पर्वतैः सहकोष्ठे व सुराणां परिवेषकः ॥३४॥ भव मातंद्रितो भूत्वा नन्यूनं नाधि 
४९ कं भवेत् ॥ कुमुदागच्छ भद्रं ते तांबूलानां निवेदने ॥३५॥ सुरेषु गणवर्येषु मुनिष्वपि सदा मुदा॥ यावदिच्छं प्र अ०१४
देह्यात्रु अत्र मातंद्रितो भव ॥३६॥ नृत्तवाद्येषु पानीये अंजन त्वं विलोकगः॥ वस मातंद्रितो भूत्वा द्रा
व्यासनसमर्पणे॥३७॥ दर्दुरातंद्रितो भूत्वा वसेह प्रतिपालय ॥ भवत्सु न्यस्तभारोऽस्मि मे नाके न सुखं वसे॥
कुमुरो वस्त्रभूषांगराप्रदाने निरतो भवेत् ॥ पर्वतेन्द्रांगनाः सर्वा मेनया सह सादरम् ॥३९॥ वैवाहिकेऽत्र कन्या
याः मंगलाचरणे रताः॥ सुनासाभरणाः पुष्पैः गंधैश्चात्र विभूषिताः॥४०॥ भक्ष्यैर्भोज्यैः समर्चंतु शिवं सुरगणैः
द्विजैः॥ नैवाज्ञाप्रसरः कार्ये भवद्भिर्मे विचारितम् ॥४१॥ कर्तव्यं सावधानेन विस्रब्धेन चेतसा ॥ नाविनीतैः अ
सदा भाव्यं मा भव्यांगैः कदाचन ॥४२॥ मेना मेने स्वमात्मानं पर्वतेन्द्रं नगावृतम् ॥ तान्संविभज्य सा देवी वस्त्रा
लंकारभूषणैः॥४३॥ भक्ष्यभोज्यैश्च पानीयैः गंधपुष्पप्रदापनैः॥ स्वपुत्रनिर्विशेषान्सा गिरीन्संतोष्य सु
व्रता॥४४॥ पतिव्रता तदा मेना मंगलाचरणोद्यता ॥ परेद्यु गिरिराट् तत्र कृतकौतुकमंगलः॥४५॥ मैना
कमाह पुत्रं तं गिरीनानय मे नितिकम् ॥ स्नातान् दिव्यांबरधरान् गंधस्रक्भूषणैर्युतान् ॥४६॥ सदारतनयांस्तत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विमानंमेद्रुतंसुत॥ सुतोरणपताकाढ्यं रत्नपुष्पसरावृतम् ॥ ४७ ॥ वितानपट्टवस्त्रैश्च समलंकृतभासुरम्॥
राजत्कुंभपताकाढ्यं धूपितंमणिदीपितम् ॥ ४८ ॥ सगिरिःस पितुर्वाक्यं नत्वाजग्राहसादरम्॥ गिरीन्द्र वच
सा तत्र गिरिनाहतदामुदा ॥ ४९ ॥ मैनाकः स तदा वाक्यं सुविनीतेन चेतसा ॥ ॥ मैनाक उवाच ॥ ॥ गिरि
राजो गिरिश्रेष्ठान् द्रष्टुमिच्छति सत्वरम् ॥ स दारतनयाःसर्वे वस्त्राभूषणभूषिताः ॥ ५० ॥ गौरीं चिरं तपः
३७७ क्लिष्टां भवद्भिर्द्रष्टुमिच्छति ॥ इति मैनाक वचसा गिरयस्ते त्वरास्तदा ॥ ५१ ॥ गंधालंकारवासोभिः स
दारतनयास्तदा ॥ भूषिता गिरिराजानमाययुस्ते प्रणम्य च ॥ ५२ ॥ ऊचुः प्रांजलयः सर्वे किमत्र करवा
मते ॥ त्वदाज्ञयैव सर्वत्र विहितंसिद्धमेव ते ॥ ५३ ॥ सर्वसंपूर्णमेवाद्य त्वयिशासति भूधरे ॥ नन्यू
नं किंचिदेवात्र संविधानं विधत्स्व नः ॥ ५४ ॥ तदा गिरीणां वचनात् प्रहृष्टो वाचमब्रवीत् ॥ ॥ हिम
वानुवाच ॥ ॥ अपर्णा पर्णवसनां क्लिष्टां देवीं तपोरताम् ॥ समानयामि तां देवीं भवद्भिः कृतमंगला
म् ॥ ५५ ॥ तपोवनान्महेशस्य समुद्वाहोरुमंगले ॥ समारुहंतु भद्रं वो विमानं मे सदारकाः ॥ ५६ ॥ तदात
दाज्ञयासर्वे विमानमधिरुह्यते ॥ मेनापि नगनारीभिः कृतकौतुकमंगला ॥ ५७ ॥ पर्वतेन्द्रस्तमैनाको

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ययौ सनगसत्तमैः ॥ सुमनो वर्षनिकरैः गायनगंधर्वसत्तमैः ॥ ५८ ॥ नृत्यंत्यप्सरसांसंघैः भेरीपटहनिस्वनैः ॥ 
 नीराजनकरैस्तत्र ययौ देवीं विलोकितुम् ॥ ५९ ॥ गत्वा तपोवनं देव्याः गिरिभिः गिरिनायकः ॥ मेनया गिरिप 
त्नीभिः तां विलोक्य तपस्विनीम् ॥ ६० ॥ ऋषितां रसाद्य तत्र जटिलालकसंयुताम् ॥ तामुत्थाप्य स्वकोत्सं
गे संनिवेश्य गिरीश्वरः ॥ ६१ ॥ उवाच सांत्वयन् गौरीं पर्वतैर्मेनया सह ॥ ॥ हिमवानुवाच ॥ ॥ चिरं क्लि
ष्टासि तपसा सफलस्ते मनोरथः ॥ नारदेन सुरैः प्रोक्तं शर्वस्यागमनं मम ॥ ६२ ॥ तवोद्वाहे च सुभगे मंडपस्वात्मन
स्तनुम् ॥ इत्युक्त्वा पार्वती हृष्टा समाप्य नियमं वनात् ॥ ६३ ॥ तपोवनांगनाः सर्वाः संतोष्य वरवाससा ॥ नि
द्रागंधैः कुंकुमैश्च गंधपुष्पसदक्षिणाम् ॥ ६४ ॥ विभाजयन्मुनिगणं हिमशैलकृताश्रमम् ॥ गोभिर्हिर
ण्यवासोभिः अभिपूज्य च सा तदा ॥ ६५ ॥ उत्थाय नत्वा गिरिणा केदारं चाभिपूज्य च ॥ गंधमाल्यैर्बि
ल्वपत्रैः पंचामृतनिषेचनैः ॥ ६६ ॥ धूपैर्दीपावलीभिश्च खंडकर्पूरसोज्ज्वलैः ॥ नत्वा तुष्टाव हृष्टा सा
मेनया भूधरेण च ॥ ६७ ॥ हरहर मुरजित्प्रपूजितांघ्रे ॥ वरकाकोदरहारसोमचूड ॥ गरकण्ठानलचारु
नेत्र शंभो ॥ सदयं मामवलोकया सुदीनाम् ॥ ६८ ॥ स्तुत्वा नत्वा च सा देवी केदारानुज्ञया शिवा ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समभ्यर्च्य च तपसस्तत्र मेनयासहनिर्ययौ ॥ ६९॥ विचित्रमंडपे तत्र रत्नसिंहासनस्थिता ॥ पर्वतेन्द्रांगनादे
वी परितस्तत्र आसते ॥ ७०॥ विशोध्य ता जटा देव्याः कंकतैरुत्किरं स्तथ ॥ गंधतैलैस्तथाभ्यज्य मेन
ग यातां नगांगनाः ॥ ७१॥ हरिद्रा पटवासोदैः कवोष्णैरभिषिच्यताम् ॥ रजसा रूषितां देवीं चिरमभ्यज्य तां तदा ॥
तदंगजं मलं तत्र पिंडी चक्रुर्नगांगनाः ॥ अपर्णा पर्णवसनं तत्त्यजुर्गिरि पल्लयः ॥ ७३॥ खेलंती सा तदा देवी
स्वांगजात मलेन वै ॥ विधायमूर्तिं रुचिरां गजास्यां कर्ण मंडिताम् ॥ ७४॥ भूषणे मुकुटैनैव कटस्तुतम
८७१ धुव्रताम् ॥ संप्रोक्ष्योत्क्षी व्यतां मूर्तिं पश्यंतीनां च विस्मयम् ॥ ७५॥ उवाच गिरिजा तत्र दृष्ट्वा तत्र गजान
नम् ॥ पुत्रो मे भव देवेश विघ्नराजस्त्वमेव मे ॥ ७६॥ त्वामर्चयाम्यथादौ मे निर्विघ्नं मंगलं भवेत् ॥ भव त्वंस त
र्वकार्येषु पूज्यः सर्वसुरासुरैः ॥ ७७ ॥ एष मे वरदानेन कृतः पुत्रो गजाननः ॥ अनभ्य च्यात्र ये देवं न नमंस्यपि
ये सदा ॥ ७८॥ तेषां विघ्नमदो यं च भविष्यति न संशयः ॥ इत्युक्त्वा सा तदा स्नात्वा मेनया सह सादरम् ॥
गंधमाल्यांबरैश्चित्रैः भूषयित्वा तनस्तनुम् ॥ धम्मिल्लु मल्ली विलसत्केतकी वरकर्णिकाम् ॥ ८०॥ छत्रा
क कुमुदोत्फुल्ल सेमल्ली रत्नसन्ततिः ॥ रत्नै ग्रैवेय वलयै र्बाहुबन्धै र्मनोहरैः ॥ ८१॥ तिलकांकितसत्फाल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिंदूराकीर्णभालकाम् ॥ कांचीकंचितमध्यांचरणनूपुरघोषिताम् ॥ ८२ ॥ मुद्रिकांगुष्टवलयैः पादप ईशा० द्व०
शिवरह० १२ सिंदूराकीर्णभालकाम् ॥ कांचीकंचितमध्यांचरणनूपुरघोषिताम् ॥ ८२ ॥ मुद्रिकांगुष्टवलयैः पादप ईशा० द्व०
५१ द्मविभूषणैः ॥ अलक्तारक्तपादाब्जां मेनयाभूत्तदांबिका ॥ क्वणद्धीरकताटंकमण्डितां रत्ननासिकाम् ॥ नीरा अ० १४
ज्यवादीपैस्तां नगपत्न्यो महेश्वरीम् ॥ ८४ ॥ बुभुजुः भक्ष्यभोज्यैश्च केदारेशनिवेदितैः ॥ सदारतनयाः सर्वे प
र्वतेन्द्रेण पर्वताः ॥ ८५ ॥ धृतताम्बूलवक्त्राश्च गंधपुष्पविभूषितैः ॥ सुमुहूर्ते गिरिवराः विमानेनार्करोचिषा ॥
च मेनया च तदा देव्या पर्वतानां भामिनीः ॥ नदत्सु देवतूर्येषु पुण्योत्कीर्णतलेषु च ॥ ८६ ॥ नृत्यन्त्यप्सरसां संघैः
प्रययौ सा गिरिर्गृहम् ॥ भूधरेणगिरिव्रातैः मंडितं धूपितं मुदा ॥ ८८ ॥ रत्नतोरणसंबाधं रंगवल्लीतलं तदा ॥
कदलीवृक्षसंबाधं पूर्णकुंभविराजितम् ॥ ८९ ॥ नीराजयन्ति गिरिजां वरपर्वतेन्द्र ॥ पत्न्यस्तदा प्रमुदितास्स्वगृ
हेषु तत्र ॥ लाजैः किरन्ति सुमनोभिरतीव हृष्टा ॥ गायन्ति तत्र मधुरं महता मुदाताः ॥ ९० ॥ गिरिद्वारमागता
देवीसमेना ॥ गिरीन्द्रेण मेनाकयुक्तः गिरीन्द्रैः ॥ अवारुह्य मोदाद्दिशबालयं स्वं पितुस्तत्र भेरीरवाद्दा
मसांखवादिशब्दैः ॥ ९१ ॥ स्थिता लालिता भोगभाग्यैश्च पित्रा ॥ गिरीन्द्रेण मेना युता पर्वतेन्द्रैः ॥ तदा से
विता पर्वतेन्द्रांगनाभिः ॥ शिवा भक्ष्यभोज्यैश्च मुदा सा तु सेव्या ॥ ९२ ॥ ॥ इति श्री शिवरहस्ये ईशाना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रव्ये द्वादशांशे देवीसमागमनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥
॥ श्री ईशानायनमः ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ सुरा नारद वाक्येन संतुष्टा अभवंस्तदा ॥ मंडपानो चनि
र्माणं श्रुत्वा ते विश्वकर्मणः ॥ १ ॥ संमंत्र्य गुरुणा देवाः ब्रह्मविष्णुपुरोगमाः ॥ ययुस्ते मन्दरगिरिं नानाद्रुमलता
वृतम् ॥ २ ॥ अपश्यन्नाश्रमं शंभोः प्रशान्तमृगसंकुलम् ॥ सुपुष्पिततरुच्छायं गिरिनिर्झरभूषितम् ॥ ३ ॥ क्वचि
त्ताम्रं क्वचिन्नीलं क्वचित्पीतारुणप्रभम् ॥ उत्फुल्लहल्लकारक्तकमलैः पुण्डरीककैः ॥ ४ ॥ नीलोत्पलैर्विकसि
३८० तकुमुदालिविराजितैः ॥ नानापक्षिसमूहैश्च केकिकोकिलकूजितैः ॥ ५ ॥ सरोभिस्सागराकारैः पर्यंककद
लीवृतैः ॥ बिल्वोरुविपिनैश्चैव नक्तमालैर्द्रुमारविभिः ॥ ६ ॥ शिखण्डिनः कुण्डलीभिः सिंहा मृगगणैः सह ॥ व्या
घ्री स्तनं वनगवां वत्सा सूत्र पिबन्त्यपि ॥ ७ ॥ नकुला सर्पमौलिस्था गरुडा पन्नगैः सह ॥ उलूका वायसैस्तत्र क्री
डंति यथासुखम् ॥ ८ ॥ तत्र देवं च ददृशुः देवास्तत्र महेश्वरम् ॥ नंदिना वारिता आसन् गणैः शूलधरैः सुराः ॥ ९ ॥
सत्पुण्डरीकधवलामलकोशकाश ॥ संकाशशारदसुनीरदपारदाभम् ॥ विद्युत्पिशंगतटिनी जटकोटि
भास्वत् ॥ चंद्रांशुशेखरमहो प्रणताः स्तुवन्ति ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ विद्युत्पुंजपिशंगचंचलजटा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ जूटस्फुरत्स्वर्धुनी ।। खेलद्बालमरालविभ्रमकरश्रीचन्द्ररेखांकितम् । वामांकाहितजानिवांछितफ ई२॥०६।०
५२ लंप्राप्तुं परं देहिनाम् ।। तेजः किंचन पुंगितं सुरदृशो रथ्यर्णमासीदनु ।। ११ ।। श्रीमन्दक्षाध्वरघ्नध्वनिमुखरित अ०१५
दिग्भागिचंदार्भदीसं त्रस्तत्रैलोक्यमाचद्भुन निभमहिषारूढकालघ्न शंभो ।। भ्राजत्कोटीरशीर्षभ्रम
दमरधुनीलोलकल्लोलखेलच्चन्द्रोद्यांतामृतास्वादनमुदितमनः पाहि भो नस्व जस्त्रम् ।। १२ ।। कटंकित
चक्षुश्रवसे कलितानानतिःकरीन्द्रचर्मवसे ।। मस्तकधृतचन्द्रमसे कैलासक्षेत्रवासिने महसे ।। भजंतु कति
चिच्छ्रुतिं निगमशीर्षभीमाटवीम् ।। चरन्तु कतिचित्परे परिचरंतु कर्माटवीम् ।। १३ ।। वयं त्रिदशनिम्नगा
तरुणचन्द्रलेखालसत् ।। जटामकुटमंडितं प्रणतिभिः प्रमोदामहे ।। यजंतां दैत्यारिं कति चन रमंतां क्रतु
शतैः ।। परे कर्मस्वन्ये सकलमनुतीर्थेषु कति चित् ।। १४ ।। वयं शुद्धस्निग्धस्फटिकसममीशं त्रिनयनम् ।।
मनं स्मरन्तः पापानि प्रति दिनं तानि धुनुमः ।। मरुन्मौलिज्योतिर्मयमकुटभीराजितलसत् ।। पदांभोजद्वन्द्वं रजत
गिरिसौधे मणिमये ।। १५ ।। समासीनं कल्पद्रुमरुचिरमूले गिरिजया ।। सहोपास्यं देवं भवजलधिसंतारण
पटुम् ।। पुण्यप्रख्यातदिव्योत्सव भवपरमानन्दसंपूर्णमूर्त्तिः ।। सर्वैर्देवैः समेतैः दिवि भुवि मनुजैः श्रीम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हादेवमूर्त्तिः॥१६॥ चित्रं संगीयमानो मणिगणविलसत्पुष्पके यो विमाने॥ भाति श्रीशैलकन्या तटभुवि सगणः
पातु नः सोयमीशः॥ विपक्षदक्षकर्तुका ध्वराग्नि भीमकोपज॥ त्रिशूलपाणि वीरभद्र संगणागमे सति॥
॥१७॥ श्रियः पतिः क वाक्पतिः शचीपतिः क्वैरव्यपतिः॥ ब्रह्मव्य गाडतो हतोपि तन्मखः॥ यत्पादाघातगाढ
त्रुटितमहदुरो निर्गलद्रक्तधारा॥ संलिप्ता पाद शीर्षा दिनकर तनयः शीर्णशैलायितो भूत्॥१८॥ मार्कंडे
यं स्वभक्तं निरवधि करुणः यो ऽशाब्दायुर्बंधः॥ संचक्रेऽनेककल्पासुषमवतु स नो ईश्वरोऽनन्तशक्तिः॥
३४। पादौ शीर्षं च यस्य द्रुहिण मधुभिदौ द्रष्टुकामौ प्रविष्टौ पातालं व्योमवेगान्निरवधि सततं मार्गमाणौ
भृशार्तौ॥१९॥ लज्जाविष्टाव भूतां श्रुतिगणवचसामप्यगम्यो महेशः॥ सोऽयं सच्चित्सुखात्मा सुरम
नसि सदा सन्निधत्तां गिरीशः॥ अंतर्यामिं त्वमीश त्वयि वसति यदि क्षिप्रमेवास्मदीयम्॥ चित्तं त्वत्पा
दपद्मे निरुपमसुखदे वज्रलेपायितं स्यात्॥२०॥ लोकेशत्वाभिमानप्रतिहतधिषणा ब्रह्मशक्रा
दयो यत्॥ ध्यानस्मृत्यादि वंद्या त्रिजगति बहवः कुर्वते चक्रकृत्यम्॥ यद्भूस्पन्दप्रयुक्तास्त्रिदशपति
रमाधीश वाणीशमुख्या॥ स्वस्वस्याताधिकारं दृढतरमनिशं कुर्वते देवसंघाः॥ यद्द्वारस्थायिनंदी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१२ श्वरनिकटगाता बद्धहस्ताविनीता॥ कां क्षन्तेयदाज्ञां निवसतु हृदये सर्वगः सोऽयमीशः॥ भाण्डं कांडप्रचण्डं ईशा०द्वा०
९३ वरयुवतिलसत्तुण्डमुण्डं करण्डम्॥ वेतण्डं चात्तशुण्डं रुचिनिधि शशभृत्खण्डमूर्जं शिखण्डम्॥२२॥को अ०१९
दण्डं दण्डखण्डं सुरयुवतिकृतं ताण्डवादिप्रकाण्डम्॥ हित्वा श्रीदेवचन्द्रं द्रुतममरवराद्दृष्टुमायांति
हित्वाम्॥ कं भासं भासि डिंभाकृतिगतिमतुलं भारि वंद्य -------- ॥रं भारं भाति डंभांद्विषि युवतिसुवा
गुंभसं भावितं यत्॥२३॥ सिंभः शत्रुभदंभोधर भृशमधने कल्पझंझानिले कम्॥ तेजः श्रीशंभुसंज्ञं
निवसतु हृदये सर्वदा सौख्यदं तत्॥ कान्तं दान्तं प्रशान्तं सकलदिविषदस्तोषयन्तं ज्वलन्तम्॥ क
न्तं सन्तं महान्तं मुनिहृदि सततं संवसन्तं विभांतम्॥ २४॥ शांता हंता महान्तः श्रुतिशिरसि सदा स्वान्तसंक्रां
तचित्ताः॥ ये ध्यायन्ति क्षणार्धं गिरिशमनुपमाः तेऽप्यस्वानतिर्नः॥ वेदान्तप्रतिपाद्यवस्तु विजयप्रो
द्यत्मलाभप्रभुत्॥ पारावारनिमग्नचित्तसनकश्रेष्ठाथ योगीश्वराः॥ २५॥ जानन्ति प्रभवं न यस्य
निगमा वक्तुं न दक्षाश्च यत्॥ शैवं तत्सवितुर्वरेण्यमतुलं ज्योतिः परं धीमहि॥ धूतं यद्विभवेन रवं
सुमनसां वृंदैर्यदाप्तो ह्यते॥ मायेवातुलशीवधिं श्रुतिशिरोभीमा दवीमध्यगाम्॥ धन्यामूलीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कयापि याति सुखदं यन्मार्गपन्ते सदा॥ ओं वंतत्सवितुर्वरेण्यमतुलं ज्योतिः परं धीमहि॥२६॥ शुक्ला
शुक्लसमस्तधर्मकरणं चित्तंयदीयेक्षणा॥ भेदध्यानकलां सहस्रशतिकां नाहं त्यहो सर्वदा॥ ज्यो
तीं विप्रवराण्यतीन्द्रियदृशां यन्नोदयं यांति रवे॥ ओंवं तत्सवि० ॥२७॥ प्रभूत् त्वत्तो लोकस्त्रिपुरहरशं
भो कथमहो॥ त्वदीयो ऽहं दूतो वसति तदिशोऽहं यदि वेद॥ भवेयुस्त्वदूता न हसित विधीन्द्रादिपत
यः॥ अतस्त्रायस्वेमं नलिनरुगपांगेन कृपया॥ २८॥ प्रजो त्पत्तिं यस्य द्रुहिणसुरनाथप्रभृतयः॥ त्व
382 नारब्धामोक्ष्यक्षुभितहृदया निर्जरगणाः॥ प्रसाद्यस्तोत्रैर्यत्सकलसुरसेनापतिमगुः॥ वरेण्यं तद्भर्गः
सवितुरिति धीमैरनुपमम्॥२९॥ सर्वेषां गिरसैरपि प्रतिहितं कृत्यादिकं यत्स्मृति॥ ध्वस्तं स्यात् प्रतिपाद्य
वस्तु गिरिशः सच्चित्सुखात्मा शिवः॥ यस्यास्तां रविमंडलान्तरगतां ज्योतिर्मयीं चिन्मयीं गायत्रीं
हृदि भावयामि सततं तत्त्वैकधीसिद्धये॥३०॥ यस्य श्रीमुख सर्वदेववनिता नृत्यन्ति गायन्ति तत॥ भ
क्तिरस्तु महाप्रदोषसमये मार्दंगिकाः केचन॥ प्रोढाः केचन वेणुतालकृतिनः प्रीतिं सुराः कुर्वते॥
ओंवं तत् सवि० ॥३१॥ यो पाराद्भवसागरात्सकृदपि ध्यानस्वनामस्मृति॥ प्रीतस्तारयतीप्रभुःकरुण

 यापर्णाशनानामपि॥ध्यानागम्यतनुः श्रुतिमवचसां दूरीकृतात्माऽपरः॥ तं शं भुं रविमण्डलान्तरगतं ज्योदिशां ज्यो

 तिर्मयं धीमहि॥३२॥ प्राप्तं नित्ययुवत्वमायुरचितं देवैः मृकण्डैः परम्॥ पुत्रेणामिततेजसा धनदतासर्वा 

तिशायिन्यहो॥ यक्षेसेन यदीयभक्तिकलनादध्यात्मविद्यर्षिभिः॥ तं शैवं०॥३३॥ धातुसृष्टिपरंपराचतुरता

सर्वज्ञता चेच्छुता॥ मोक्तं व्याकरणं समस्तमुनिषु रव्यातेषु विरव्यातितम्॥ कृत्स्नं पाणिनिना पुरा तिगहनं

यद्भक्तितः सूत्रतः॥ तद्व्यारव्यातमहेश्वरेणसपरां वाचं प्रदिनुयाच्छिवः॥३४॥ वेदाशेषपुराणभा

रतचिरं प्ररव्यातसर्वामराः॥ ब्रह्मर्षित्रिदशर्षिसर्वमनुजप्रोद्गीयमानं सदा॥ यस्मात्त्वय्यकृतेश्वरत्व

मतुलं नित्यं विजेजीयते॥ तं शैवं०॥३५॥ माघ्वं ते बहुधान्यरत्नकनकस्त्रीरत्नसद्मोत्तम॥ क्रीडाचा

मरशारदेन्दुरुचिरच्छत्रेभघोटादयः॥ वैरिं चंपदमैंदिरेशममरेशत्वं च यस्येच्छया॥ शैवं तत्सवि०॥३६॥

शैवानामनिशं प्रमाथिनि महापाप्मव्रजानां सदा॥ का चिंता नरकानुभातिविषये मा भैष्ट भो भो जनाः॥ तन्ना

म्नाहि निपातकानि भुवने सत्यं हि सत्यं वदाम्यत्रै नारिवल धर्मशास्त्रनिगमाः सन्ति प्रमाणान्यहो॥३७॥

शंभो विक्रममप्रमेयमनुते तज्ज्ञानतां माधव प्रेष्ठानन्दमसुरद्विजां पुरवधे कैकर्य मातन्वताम्॥ मत्वानादरमंतरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गर्जनितं तस्मिन्क्षणेगोधिदृक् दग्धंतत्पुरमीदृशाय भवेतनित्यं नमः कुर्महे ॥ ३८॥ यद्ग्रीवो द्भासि घंटा ध्वनिपरी
नयन प्रौढमौलि प्रहार ॥ प्रोद्दण्डैक प्रहारैर्घनघनरव तत्पन्नमूर्च्छाब्धि कारिम् ॥ आरूढस्तं महेशो वृषभग
तनया स्कन्द पार्श्व द्वयाद्यो ॥ नश्चित्ते सन्निधत्तां नतनिहितदयः काम मुख्यारि हारी ॥ ३९॥ उद्दण्डारिप्रशां
त्यै पुर हर निटिलेचित्रभानुस्वरूपम् ॥ धत्तेनेत्र पुरा तमां प्रदहमदहितं कर्म जालं वनं त्वम् ॥ संप्रत्युद्दण्डकाम
३१३ प्रमुखवरिपुगणो बाधतेनस्त्व जस्राम् ॥ तंनिः शेषंदहत्वं सुविमलहृदयास्त्वां भजामो ह्यजस्रम् ॥ ४०॥ योऽयं
व्योम्नि स्वभानु प्रचित विलसन् मण्डलस्त्वप्रकाशो ॥ ज्योतिष्ठन्तं स्थितं तत्परमशिवरुचि स्तोमसर्वप्रकाशः॥
शार्वापत्यस्तवेन प्रमुदितहृदयस्तारकारिप्रपीडाम् ॥ निर्वृत्याक्ष्णा कटाक्षैः सुरवयतुसुरतां देव सेने शदानात् ॥
॥ ४१॥ ॥सूतउवाच ॥ शाची पतिरपां पतिः पितृपतिः स्वधायाः पतिः ॥ नमामरवि लभारती पतिर धाक्षसद्मा
पतिः ॥ दिशां च पतिभिः सदा अनिलसोम सूर्यैर्विभुम् ॥ तदाहुर्विनयानताः पुरहरं पतीनां पतिम् ॥ ४२॥
देवा ऊचुः ॥ ॥ सुरतान्विरता तवाब्ज पादे हर संहारय तारकोरु दुःखम् ॥ कुरु पाणि ग्रहणं च मङ्गलायाः सुर
सेना पति कारणाय तेक्षणेन ॥ ४३॥ संतारयाद्य सुरतां शिवतारकाद्दि दुःखाम्बुधेस्त्वमसि देव सुकर्णधारः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 सेनापतिर्भवतु नः सुकुमाररूपो पर्जन्यघोरनिनदं वरतारजन्ये ॥ ४४ ॥ ॥ श्रीस्कन्द उवाच ॥ ॥ तदा स देव ईशा० द्वा०
 प्रवरोरुवाचं श्रुत्वा मुदाह भगवान् सुरसत्तमांस्तान् ॥ सेनापतिर्भवतु वः सुकुमाररूपो शूरादितारकहरो स्तु मुदाद्य 
यामि ॥ ४५ ॥ ॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे देवस्तवो नाम पञ्चदशोऽध्यायः ॥ १५ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्री ईशानाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ प्रीतश्च भगवाञ्छर्वः
सुराणां संस्तवात्तदा ॥ तपसा च महादेव्याः तदा स वृषभध्वजः ॥ १ ॥ हिताय च सुराणां च क्रीडार्थं भगवान्
भवः ॥ तदा हैमवती देवी विवाहसुमना ह्यभूत् ॥ २ ॥ जगाम विधिः पूर्वं मरीच्याद्यैर्महर्षिभिः ॥ हिं च
माचलं महादेवी फलपुष्पविभूषणैः ॥ ३ ॥ विरजो वरसंयुक्तः नानावाद्यकृतारवैः ॥ नृत्यद्भिरप्सरस्सं
घैः स्वयं तत्र प्रजापतिः ॥ ४ ॥ समागमं च ब्रह्माणं श्रुत्वा नारदवाक्यतः ॥ प्रत्युद्ययो गिरिश्रेष्ठो गिरी
शैः सार्घ्यहस्तकः ॥ ५ ॥ प्रणम्य पद्मजातं तं ऋषीन् सर्वान् गिरीश्वरः ॥ उवाच विनयोदारमेन
पाहिमभूधरः ॥ ६ ॥ ॥ हिमवानुवाच ॥ ॥ धन्यो स्मि गिरिवर्येषु स्वयं ब्रह्मा मुनीश्वरैः ॥
देव्यालोकनहर्षाय समायातोऽत्र मे गृहम् ॥ ७ ॥ मुहूर्तोऽयं शुभोदर्कः देवीं द्रष्टुमिहार्हसि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गिरिराज वचः श्रुत्वा ब्रह्मा माह तदा गिरिम् ॥८॥ अनुग्रहेण स तदा मरीच्याद्यैर्मुनीश्वरैः ॥ ॥ब्रह्मोवाच॥
गिरिश्रेष्ठ भवान्कन्यां महेशं दातुमिच्छसि ॥९॥ त्वत्तो धन्यतरः को वा तेन ते कुलमुन्नतम् ॥ देवीं द्रष्टुमिहे
च्छामि पूजयामि सुभूषणैः ॥१०॥ दर्शयाद्य गिरिश्रेष्ठ मेनयाऽऽनीयतां शिवाम्॥ इत्थं संबोध्य सोवाक्यात्
त्वरायुक्तोऽऽनयच्छिवाम् ॥११॥ मेनया भूषणैर्युक्तां विरजांबरसंयुताम्॥ गंधपुष्पैर्भूषितां तां तत्रानी
तां च संसदि ॥१२॥ अथ शैलसुता देवी शिबिकां समलंकृताम् ॥ रत्नोपधानशय्याढ्यां मुक्तागुच्छवि
९८५ भूषिताम्॥ मेनया सह चारुह्य ययौ तत्रैव संसदि ॥ कालिंदी गिरिपुत्र्यास्तु संध्यापूर्णेन्दुमंडलम्॥
॥१४॥ सितातपत्रं रत्नालि मुक्तागुच्छान्वितं दधौ ॥ चामरौ वीजितुं देव्याः पार्श्वयो रत्नदण्डके ॥१५॥
अप्सरोगणनृत्तैश्च भेरीमर्द्दलशंखजैः॥ गंधर्वगानैर्बंदीनां जयशब्दैस्तदा ययौ ॥१६॥ सिंदूरारक्त
गण्डेन गणपेन पुरःसरम्॥ गिरिमात्र शरीरेण समायाता तदाम्बिका ॥१७॥ कोयमायाति गणपो गजान
नवराकृतिः॥ ब्रह्मादि विबुधैस्तत्र पश्यद्भिर्विस्मयात्तदा ॥१८॥ उत्थाय प्रणमद्भला मरीच्याद्यैर्मह
र्षिभिः॥ स्वर्णपुष्पैर्विकीर्यांबा पादयोः स तदाविधिः ॥१९॥ अवरुह्य महादेवी मेनया संस्थिता तदा॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिवरह०१२ सिंहासने रत्नसंस्था मणि विद्रुमभूषिते ॥२०॥ पुरः संस्थाप्य विघ्नेशं सर्वाभरण भूषितम् ॥ पञ्चपन्नगसरसां नृत्तवी ईशा० द्वा०

५६ जितामरचामरैः ॥२१॥ तदोत्थाय मुदा ब्रह्मा देव्याः पादाब्जयोर्युगम् ॥ प्रक्षाल्य पाणिना मूर्ध्नि तज्जलं सविधि अ०१६

दधे ॥२२॥ गंधपुष्पैश्च वासोभिः भूषणैरर्घतो विधिः ॥ फलजालपुरोऽन्यस्य मुनिभिस्तां शिवां तदा ॥२३॥

ब्रह्माणमाह सा देवी तदा वीक्ष्य गजाननम् ॥ मुकुटांगदकेयूर भूषणैर्भूषितं पुरः ॥२४॥ ॥ देव्युवाच ॥ ॥ ब्रह्म

न्महर्षिभिः पूज्यः सर्वैरेष गजाननः ॥ ममैव वरदानेन मत्पुत्रोऽयं मदंशजः ॥ २५॥ सर्वेषां विघ्ननाशाय विघ्ने

शः पूज्यतामयम् ॥ तदेवं देव्या वचसा संप्रणम्य गजाननम् ॥२६ ॥ महर्षिभिस्समभ्यर्च्य गंध पुष्पाक्षतासु

मैः ॥ फलैश्च भक्ष्य भोज्यैश्च वासोभिः भूषणैर्वरैः ॥२७॥ स्तुत्वा प्रणम्य विघ्नेशमेवमाह प्रजापतिः ॥ ॥

॥ब्रह्मोवाच ॥ पाशांकुशाक्ककर शोभित देवि सूनुं विघ्नाद्रि नाशक वरोदर नाग बन्धम् ॥ शुण्डाधृतोरु

वरमोदक विघ्नसंघ सन्मोदकं प्रणततं गणनाथमद्य ॥२८॥ जगत्त्रयेषु सर्वत्र त्वं हि विश्व गणेश्वरः ॥

संपूज्यः सर्वकार्येषु निर्विघ्नार्थं गजानन ॥२९॥ त्वामादौ सर्वकार्येषु पूजयन्ति सुरासुराः ॥ अनभ्यर्च्य यतो

विघ्नं भवत्येव पदे पदे ॥ ३०॥ इत्थं प्रसाद्य गणपं करेणैव प्रजापतिः ॥ गजाननाज्ञया देवीं पूजयामास वै विधिः ॥३१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गंधैः पुष्पैश्च तांबूलैः तदांबां तुष्टुवे विधिः ॥ ॥ब्रह्मोवाच॥ ॥धृतापाये कोवे भिषगधिप जाये ममभु
दे महो चक्राये माये भवविपदुपाये गिरिसुते ॥ जगद्रक्षादीक्षासकरुणकटाक्षात्वमचिरात्कदा साक्षाद्रक्षा
रसवदपरोक्षाय भवसि ॥३३॥ यज्ञस्करमतस्करं स्वरुचिधिक्कृताहस्करं सदिन्द्रमणि सुन्दरं रुचिरमेदि
रं........ ॥ चिरंतनपदं धनं धनदयादि धनं बंधनं शिवायनमिदं धनं त्वदपरं धनं दंधनम् ॥३४॥ इत्थं
भिः स्तुत्वा तदा देवीं मुनिसंस्थितो विधिः ॥ गिरिराट् गिरिभिः सार्धं गंधपुष्पफलैर्विधिम् ॥३५॥ तांबूलैः
३८९ पूजयामास तत्र ये संगता मुदा ॥ ब्रह्माणं प्राह विनयात् तत्रैवं गिरिराट् तदा ॥३६॥ गिरिभिर्मेनया चैव मेना
केन विधिं तदा ॥ ॥हिमवानुवाच॥ ॥ पराशक्तिरियं साक्षात् साजाता कारणान्मम ॥ अविनाभावरूपे
यं शिवानन्या महेश्वरी ॥३७॥ विचित्रशक्तिः सा देवी सर्वेषां जननी शिवा ॥ त्वयानियुक्त एवात्र लोक
पावनहेतवे ॥३८॥ लोकधर्मसमाश्रित्य त्रिः सत्यं प्रवदाम्यहम् ॥ ददामि शंभवे देवीं मायेऽयं मायिने शि
वा ॥३९॥ गिरिणामानुमत्येन सुतपत्नीमतेन च ॥ त्रिसत्यं मां महादेवः समायातु सुरैः सह ॥४०॥ पावितुमलु
लं ब्रह्मन् श्वः प्रभाते महेश्वरः ॥ स एव भगवानीशो गणानामधिपः शिवः ॥४१॥ सर्वात्मा सर्वगो देवः परमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 त्मा सनातनः ॥ विश्वाधिको महादेवः गौर्यापतिरुमापतिः ॥ ४२ ॥ दत्वा गौरीं महेशाय कृतकृत्यो भवाम्य 
 हम् ॥ मेनाके नगिरिभ्राते मेनया कृतमंगलः ॥ ४३ ॥ प्रतीक्ष्येऽहमुदा व्यक्षं गौतमेन सहादरात् ॥ अस्मि 
न्पाणि ग्रहे देव्याः सविधस्वविधेर्द्विजैः ॥ ४४ ॥ मां प्रसादय देवेश निवृत्तो निवसाम्यहम् ॥ विधिर्गिरि
वचः श्रुत्वा प्रभाते कृतनैत्यकः ४५ ॥ पूजितो गिरिराजेन तत्रोवास मुनीश्वरैः ॥ पुरोहितं गौतमं तमनुमा
न्य प्रजापतिः ॥ ४६ ॥ चक्रे मुनीश्वरैस्सार्धं गिरिणा चानुमोदितः ॥ वेदीं तां समलंकृत्य रत्नसोपान
मंडिताम् ॥ ४७ ॥ पुष्पमंडपसंयुक्तां वितानाच्छादितां वराम् ॥ उत्फुल्लकमलोदारमालिकासम
लंकृताम् ॥ ४८ ॥ दिव्यमाणिक्यखचितां तोरणैनच मंडिताम् ॥ पुंडरीकोत्पलभ्राजत्केतकावलि
शोभिताम् ॥ ४९ ॥ दिव्यसिंहासनोपेतां स्वास्तृतां चित्रबर्हणैः ॥ धूपितां तगरामोदैः दीपवृक्षैर
लंकृताम् ॥ ५० ॥ भृंगारुकुंभकलशैः पल्लवोर्ध्वमुखैर्धृताम् ॥ ५१ ॥ धूपपात्रैर्दीपपात्रैः पात्रै
रंकुरशोभितैः ॥ ५१ ॥ पाद्यार्घ्याचमनैस्तत्र गंधपुष्पसुगंधिभिः ॥ ५२ ॥ पंचामृतैः पंचपात्रैः म
धुपर्क विराजितैः ॥ ५२ ॥ हेमरूप्यसमुद्भूतैः रत्नपात्रैस्तथाविधैः ॥ फलपात्रैः पूर्णपात्रैः पुष्पपा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्राक्षतायुतैः ॥ ५३॥ दिव्यचन्दनपात्रैश्च तांबूलेषु गुडंहविः ॥ लाजाश्च यवगोधूमाः प्रणीताप्रोक्ष

णीतथा ॥ ५४ ॥ प्राज्याज्यपात्रैर्विपुलैः इध्मबर्हिर्युतैस्तदा ॥ नीराजनाक्षतापात्रैः नारिकेलाम्रफ

लैः ॥ ५५ ॥ रंभाफलैश्च तत्काल कर्पूरागरुचन्दनैः ॥ गणाधिपं चतत्रस्थं चकार परमासने ॥ ५६॥

भूषणै र्भासुरं ब्रह्मा गंधपुष्पविराजितम् ॥ सेवितं प्रमथैस्तस्य चलच्चामरवीजनैः ॥ सत्वार्चिषं

386 प्रतिष्ठाप्य स्वधयाचारु विग्रहम् ॥ भूषितं भूषणै रग्रे प्रदक्षिणशिखस्थितम् ॥ ५८ ॥ मुनिभिर्बा

लखिल्यैश्च वैखानसकुलैस्तदा ॥ वसिष्ठो गौतमो गार्ग्यो धौम्यो दक्षस्तथांगिराः ॥ ५९ ॥ भृ

गुश्चैवांगिराश्चैव पुलस्त्यः पुलहोऽत्रिकः ॥ विश्वामित्रो भरद्वाजो अगस्त्यो बभ्रुरेव च ॥ ६० ॥

शांतिं प्रति स्मरं तत्र कारयामास वै विधिः ॥ तान्प्रतोष्यान्नपानाद्यैः गोहिरण्यां बरादिभिः ॥ ६१ ॥

संपूज्य गणनाथं तं स्वस्तिं वाच्य द्विजैः सह ॥ आकांक्षन् त्र्यक्ष पादाब्जं वीक्षितुं भगवानजः ॥

॥ ६२ ॥ नारदं प्रेषयामास शिवागमनकारणात् ॥ ससंभ्रमेण महता गिरिभिर्मुनिभिर्विधिः ॥

॥ ६३ ॥ कमलालिरिव प्रतीक्षमितं विधिरास्ते द्विजपुंगवै र्महेशम् ॥ गिरिभिः सुरसत्तमैस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ दानीं परि बद्धांजलिरीशपाद सक्तः॥ ६४॥ ॥ इति श्री शिवरहस्ये ईशानाख्येद्वादशांशे ईश०द्वा०
५८ विधिसंविधानं नाम षोडशोऽध्यायः॥ १६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ छ ॥ ॥ अ०१६
॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानायनमः॥ ॥श्रीस्कंदउवाच॥ ॥नारदोदेवदेवेशंप्रणम्यप्रार्थयत्तदा॥विष्णवादिभिर्देवगणैर्नंदिभृंगीश्वरादिभिः
॥१॥समावृतंस्थितंतत्रमंदरेचारुकंदरे॥ ॥नारदउवाच॥ ॥तवाज्ञयाविधिःपूर्वंसंगतोगिरिशेनहि॥२॥संभृत्यसर्वसंभा
रंमुनिंद्रैस्त्वांप्रतीक्षते॥गिरिशोपिसमेनाकोमेनयाद्वारितिष्ठति॥३॥अनुग्राह्योयमधुनामुहूर्तस्त्वरयाप्रभो॥तन्नारदवचःश्रु
त्वातपसोत्थायशंकरः॥४॥यथेष्टमितिलोकेशःप्राहदेवोमहेश्वरः॥ ॥शिवउवाच॥ ॥नंदिन्मद्गणपायेत्रसमायांतु
मदंतिकं॥विष्णो सन्नह्यतांसेनांसुराणामस्त्रशोभितां॥५॥नंदीविष्णुःप्रणम्येशंशक्रमाज्ञापयन्तदा॥ ॥हरिरुवाच॥
सन्नह्यतांमहासेनासुराणांसपताकिनी॥माविलंबोभवत्वत्रनिर्गच्छतिमहेश्वरः॥७॥गिरिशस्यालयंदेव्याःकर्तुंपाणि
387 ग्रहंविभुः॥देवानांपत्नयोयाश्चमातरोभूषणान्विताः॥८॥मंडयित्वास्वकांगानिवासोभूषणगंधकैः॥पुष्पैर्दिव्यांग
रागैश्च नीराजनकरास्त्रियः॥९॥समागच्छंतुदेवस्यपाणिग्रहणमंगले॥इंद्रोप्याज्ञापयामासआनेतुंमातलिंप्रति॥
॥१०॥समातलिस्त्वरायुक्तोदेवसेनाःसमानयत्॥शक्रस्यगणपायेवैवज्रोद्यतकराःशुभाः॥मुकुटोज्वलमस्तास्तेयु
वानोमृष्टकुंडलाः॥रक्तचंदनलिप्तांगाःकोट्येकातत्रचागताः॥१२॥पताकवैजयंतीभिःपटहानकनिस्वनैः॥तथाय
मगणास्तत्रकृष्णांगाविकृतायुधाः॥१३॥करालदंष्ट्रोरुशिरवाःमुसलायुधपाणयः॥समागतायमेनेवपाशहस्तायु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ११ तत्रयं॥१४॥वारुणा गणपास्तत्र हरिता बाहुशालिनः॥पाशखड्गकराः सर्वे नियुतं वरुणेन हि॥१५॥यक्षाधिपेन सहिता यक्षाः शिक्षा दृग्रा० छा०
विशारदाः॥प्रयुतं खड्गखेटाभिः समायाता महोद्धताः॥१६॥वायुना वायुगणपास्तोमरास्तकपाणयः॥समागतास्ते बलिनो युवानो अ० १७
४९ नियुतं तदा॥१७॥अग्निना चाग्निगणपा रक्तवर्णा गदाधराः॥समायाता युतं तत्र गंधस्रक्वरभूषिताः॥१८॥निर्ऋते गणपा येत्र प्रा
सासिवरपाणयः॥देवेन तेन चायाता अयुतं भूषणान्विताः॥१९॥ईशानो गणपैस्तत्र समायातः सहस्रशः॥निषंगिभिः कवचि
भिः हेतितोमरपाणिभिः॥२०॥इषुमद्भिः चापधृग्भिः दिविभूम्यंतरीक्षगैः॥अथायाताश्च मरुतः सहस्राण्यत्र षोडश॥२१॥
वसवो बलिनस्तत्र त्रिंशत्सहस्रमूर्जिताः॥आदित्या द्वादशास्तत्र सहस्रेण पृथक्पृथक्॥२२॥सुधन्वानः सहस्रेण धनुर्बाणधराऽगताः॥
अश्विनौ द्विसहस्रेण बलेन शरपाणिना॥२३॥नागाः किंपुरुषाः सिद्धाः गंधर्वा वाद्यवादकाः॥पिशाचा गरुडा यक्षा राक्षसा दैत्यना
यकाः॥२४॥नागाप्सरा वयोरूपलावण्यगीतपेशलाः॥पितरो यातुधानाश्च डाकिन्यो योगिनीगणाः॥२५॥किंनरा भैरवास्त
त्र चामुंडा शाकिनीगणाः॥गावोथ मातरस्तत्र समायातास्सुपेशलाः॥२६॥सर्वाभरणभूषाढ्याः स्रग्गंधाश्च सुवाससः॥धृतनाना
विधास्त्राश्च नानावाद्यकृतादराः॥२७॥अथादितिर्दितिर्लक्ष्मीः दनुर्वाणीश्च कालिका॥पुलोमा विपुला चैव सिंहिका सुरसा तथा
॥२८॥सिद्धिः ऋद्धिः क्रिया दुर्गा स्वधा स्वाहा दनुः कुहूः॥राकास्पृहा सिनीवाली स्वसा बुद्धिर्मतिः शची॥२९॥अरुंधती च सावित्री

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गायत्रीरोहिणीमुखाः ॥ गार्गी मैत्रायणी चैव अनसूया पतिव्रता ॥ ३० ॥ लोपामुद्रा तथा गार्गी: संनतिः सुनितिः क्षुधा ॥ रंभामलंबुसा
चैव मेनका सहजन्यका ॥ ३१ ॥ विप्रचित्तिर्मिश्रकेशी ऊर्वशी मेनका तथा ॥ विश्वाचीच घृताचीच मित्रविंदा अलंबुसा ॥ ३२ ॥ एता
श्चाप्सरस श्रेष्ठाः अप्सरा कोट्यो नव ॥ हावभावमनोज्ञेन तौर्यत्रिक युता ययुः ॥ ३३ ॥ सागरा गिरयो मेघाः नद्यः संवत्सरा ग्रहाः ॥
सोमेन सहते सर्वे समायाता स्त्रिकोटिकं ॥ ३४ ॥ मनोहरेण वेषेण नक्षत्राणि ऋषयो मनू: ॥ वेदा मंत्रास्तथा यज्ञाः छंदांसि प्रणवस्त
था ॥ ३५ ॥ मंत्रग्रामं तथा सर्वं पुराणानिच शास्त्रकं ॥ स्वरूपवेषाभरणाः तत्र जग्मुश्च संघशः ॥ ३६ ॥ उद्वाहः शंकरस्येति देवदेवाज्ञ
३८० याता तदा ॥ भासयंतो भूषणैश्च शस्त्राणां वाद्यनिस्वनैः ॥ ३७ ॥ त्रिकोटि कोटि तुरगाः रुक्मभांडपरिच्छदाः ॥ जविनो बलसंपन्नाः
संस्थिताः सुरसादिनः ॥ खुरघृष्टां महींचक्रुः हेषाभूषैक सन्मुखाः ॥ तोमरांकुशबाणाग्रपताकावलिभूषिताः ॥ ३९ ॥ गजा
मह्मामात्रयुताः दंतवेष्टशराग्रकाः ॥ उद्यत्कुंभा कर्णतालवलंबिता लोलचामराः ॥ त्रिंशत्कोटिययुस्तत्र मेघा इव भुवंगताः
रथाः पंचाशतं कोट्यो सुतुरंगास्सुचक्रकाः ॥ ४१ ॥ सुपताकाः सावरोधाः सदश्वा यंत्रचोदिताः ॥ रथनेमिस्वनैस्तत्र गजाश्वख
र बृंहितैः ॥ ४२ ॥ धूयमानपताकाग्रैः शंखदुंदुभिनिस्वनैः ॥ बधिरीकृत दिक्चक्राः पंक्तिशः संस्थिताः सुरैः ॥ ४३ ॥ प्रणंतं श्री
महेशानं तत्र तत्र स्वकाः स्वकाः ॥ गणेंद्रा वारणेंद्रा भानंदिकेशाज्ञया गताः ॥ ४४ ॥ उद्वाहः शंकरस्येति तत्राजग्मुः पृथक् पृथ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ पंक्ति२ – नन्दिकेशोऽथ द्वाभ्यां भैरवोऽष्टाभिरेव च ॥ भृंगी द्विकोटिभिस्तत्र रिटिः कोट्या समाययौ ॥ ४७ ॥

शिवरह०११ कृ॥सूर्याभश्शंखवर्णाश्च रक्तनीलारुणप्रभाः॥४६॥सुपीता हरितास्तत्र युवानो बलशालिनः॥ कोट्योथ संख्या तेषां तु तत्र नामा ई०शा०६
६० निमे शृणु॥४७॥सोमनंदी च अयुतं महानंदी नियुत्वतः॥दशभिः केसराक्षश्च विष्णुतोष्टाभिरेव च॥४८॥नवकोट्या वीरभद्रो का अ०१७
लाग्निर्दशभिस्तदा॥ बाणत्रयेण विबभौ चंडीशो पंचभिर्वृतः॥पंचभिस्तु कपालीशः वह्निश्चात्रपि चंडिलः॥कुंभकश्च कुहुंड
श्च द्वे द्वे कोट्यौ समीयतुः॥५०॥विघ्नं भो कोटि गणपैः भेरुंडश्चात्र कोटितः॥पिप्पलः संन्नथश्चैव प्रयुतं नियुतं तथा॥५१॥आवे
शन सहस्रेण नवत्या धुंधुलो गणः॥सप्ताशीतिसहस्रेण महाकालस्तु कोटिकः॥५२॥अभितो दशसाहस्रैः मुमुखः पंचसाहस्रं॥
पिंगलः त्रिंशत्साहस्रैः कुमुदो द्वसहस्रकैः॥५३॥पूर्णभद्रो युते नागास्तु भद्रः सप्तभिर्ययौ॥ विलोमा दशसाहस्रैः पिशालोथ
षड्भिर्ययौ॥५४॥कुंभांडः षड्सहस्रेण रणभद्रोथ विंशतः॥प्रयुधानो विधानश्च अष्टाशीतिसहस्रकैः॥५५॥एते गणेश्वरा
स्तत्र समायाताः पृथक्पृथक्॥एते चान्येप्यसंख्यातास्तत्राजग्मुर्धृतायुधाः॥५६॥सर्वे भस्मावदानाश्च जटामुकुटधारिणः॥
नीलकंठास्त्रिनेत्राश्च हारकेयूरपन्नगाः॥निषंगिणो दसन्नांगा शरकार्मुकपाणयः॥समागतान् तान् गणपान् निवेद्य सुर
सत्तमान्॥५८॥नंदिकेशः पुरास्थो हरिणाजिष्णुना तथा॥ तानागतानथ ज्ञात्वा महादेवो वृषं तदा॥५९॥चक्रे तुरंगमा
कारं श्वेताभ्रशिखरोपमं॥रत्नकल्याण संयुक्तं सुखलीनास्यफेनिलं॥६०॥स्वयं च मुकुटोद्दाम शोभी चंद्रार्कभासुरः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रत्नमुक्तालल्लहारो रत्नग्रैवेयकांगदः॥६१॥त्रिलोचनारविंदाक्षः त्नसद्दिव्यांबरो बभौ॥सुमनोवर्षनिकरैः अभिवृष्टो महेश्वरः॥
॥६२॥दुंदुभीनांनिनादैश्च वेदबंदिकृतस्तवैः॥जयेतिगणदेवानां स्तवैर्नीराजनैस्त्रियां॥६३॥नंदिनो हस्तमालंब्य तंडुसंधृ
तछत्रकः॥वीरभद्रेणभद्रेणपार्श्वचामरवीजितः॥६४॥रत्नपादुकपादाब्जो निर्ययौ सगणैः सुरैः॥हरिणा चाथ वक्रेण प्रोत्सारि
तसुरासुराः॥६५॥आलोकनेन सर्वेषां प्रणामालिं प्रगृह्य च॥नदत्सु गजभेरीषु शंखवाद्यातासु दिक्ष्वपि॥६६॥वर्षत्सु कुसुमासा
रं नृत्यंतीष्वप्सरस्सु च॥नारदो तुंबुरुश्चैव गीतैर्गायंश्च तत्र वै॥६७॥तुंगं तुरंगमधिरुह्य पिनाकपाणिरश्वाधिपः सुरवरैर्गण
३४१ वृंदसंघैः॥पादातिभिर्हरिमुखामरसिद्धसाध्यैः संपूजितो गिरिवरस्य गृहं जगाम॥६८॥तुंगतुरंगमुखलीनविचालनेन नृत्य
त्पदाहतिमुखोद्धृतपादयुग्मं॥मायूरवीजनसुवीजितचामरौघैः छत्रावृतास्य मगजापतिमीक्ष्य हृष्टाः॥६९॥हिमाचलगृहं य
यो सुरवरैर्गणौघैर्हरः नदत्सु गजपृष्ठगासु जितकाब्धिभेरीरवैः॥सुवर्षितसुरांगना कुसुमसारसार्द्राक्षतैः॥सुरोरुसुपताकिनी
चलदपारवंचाग्रकैः॥७०॥नदत्सु गजबृंहितैः हयवरोरु हेषास्वनैः रथांगपरिवर्तनैः श्रुतिवरास्य सारस्तवैः॥द्योतंतितत्र
गणाः किल कामरूपाः शूलासिबाणवरहस्त धृतोर्ध्वचापाः॥देहप्रभाविजिततप्तसुजातरूपाः यूपा इवोग्रनिकरा अपि
भूपरूपाः॥कूपा इवाक्षनललक्ष्य जगद्विधूपाः ईशानपूजननिरस्तसमस्तपापाः॥७२॥धृतबाणगणा गणेश्वरा भगणेशा

.CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ न विलासिसत्कपर्दी ॥ फणिभस्मविभूषणाययुवै उगणांते शरणं हृदासदाप्रपन्नाः ॥ ७२ ॥ ॥ इति श्री शिवरहस्ये ईशाना ईशा०द्वा०
६१ ख्ये द्वादशांशे शिवोद्वाहसमारंभसकलसमागमसमेतगमनन्नामसप्तदशोऽध्यायः ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ अ०१८
श्रीईशानायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ वृषाश्वादवरुह्याथनंदिनादत्तसत्करः ॥ रत्नभ्राजितपादाब्जयुगलालं
बिपादकः ॥ १ ॥ गिरिराजसुविस्तीर्णद्वारि रोधसुरासुराः ॥ हरिश्चक्रकरस्फूर्जद्दैत्रप्रोत्सारितामराः ॥ रत्नपात्रकरद्योति
नीराज्यार्तिसुमौक्तिकः ॥ अक्षतोत्कीर्णमकुटो ताराइवनभच्युताः ॥ ३ ॥ नगांगनाकरात्कीर्णसुमलाजहिरण्यजैः ॥ वि
किरंत्येवगिरयः प्रणाममुखराशिवं ॥ ४ ॥ तदाविवेशभगवान्गिरिराजगृहं महत् ॥ विवाहमंडपं चित्रं ब्रह्मणामुनिभिर्यु
तं ॥ ५ ॥ सब्रह्माद्याश्च मुनयः प्रणेमुर्भक्तिनिर्भराः ॥ पुरस्थितंगणेशानं प्रणतंपादयोःशिवः ॥ ६ ॥ उत्थाप्यालिंग्य चाघ्राय
कुंभास्योद्भूतकुंभितन् ॥ ब्रह्मणाज्ञापितोदेवःगौर्यापुत्रःप्रपूज्यतां ॥ ७ ॥ इत्थंगणेशंदेवेशःसुरैर्द्विजगणैर्गणैः ॥ संपूज्यगंधपु
ष्पैश्चफलैर्वासोविभूषणैः ॥ ८ ॥ उवाचवरदोदेवोमहादेवस्तदामुदा ॥ मांवानारायणंवापि ब्रह्माणंवापिपुत्रक ॥ त्वामन
भ्यर्च्यकार्येषु विघ्नस्तेषां भविष्यति ॥ ९ ॥ त्वांगंधपुष्पधूपाद्यैःपरिपूज्यादिमंसुराः ॥ लभंतिवांछितान्कामान्त्रिसत्यं
प्रवदाम्यहं ॥ १० ॥ ब्रह्मविष्णवादयोदेवागणैर्द्विजवरैःसह ॥ गौर्यापुत्रंचमत्प्रीत्यैःगणपःपूज्यतांस्तवैः ॥ ११ ॥ शिवाब्जांशिर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सागत्य ब्रह्मविष्ण्वाद्यागणाः॥संपूज्यफलपुष्पाद्यैः भक्ष्यभोज्यैस्तुवन् तदा॥१२॥ ॥देवाऊचुः॥ ॥पाशांकु
शकराऽसक्तमोदकंविघ्ननोदकं॥बोधकंसर्वशास्त्राणांभजामोविघ्ननाशकं॥१३॥वेतंडजंडंशशिखंडचूडंदानोदगंडं
नतवेदखंडं॥स्वभक्तविघ्नार्तिहरप्रचंडंनमाम्यखंडंसुबृहत्त्रिचंडं॥१४॥नाकिनायकनताब्जपादुकंविघ्ननाशक
विनायकंभजे॥विष्णुसायकसुभक्तिदायकंप्रणमंत्वद्य सुरागणनायकं॥१५॥हृदंतर्विभातंधियंचोदयंतं उमा
कांतमोदप्रदंसत्सुतंतं॥प्रशांतंसुदंतंहसंतंनदंतंमुदातंभजाम्येकदंतंगणेशं॥१६॥सुरावनंसुपावनंरणावनी
३१० हुताशनं सतोहृदेकवासिनंभजामतंगजाननं॥सनातनंनिरंजनंफलादिसारभोजनं॥स्वभक्तविघ्ननाशनंभजाम
तंगजाननं॥१७॥चराचरादिकारणंस्वभक्तपापहारिणं॥भवांबुधेःसुतारणंप्रशांतकामपूरणं।।१८॥गजाननंप्रसादनं
पठंतिये मनीषिणः॥नतेषुदुःखिताननंभवेन्महाघभेदनं॥इतिसंस्तुत्यसंपूज्यगणेशंसुरसत्तमाः॥१९॥समायान्तोथ
गिरिराट् मेनयासहतत्रवै॥वेदिंप्रवेशयामास महादेवंसुरैस्तदा॥२०॥रत्नसिंहासनेदिव्येसंस्थाप्यपरमेश्वरं॥पादौ
प्रक्षाल्यदेवस्यरत्नभृंगारुजैर्जलैः॥२१॥मेनाकरांतनिर्यातैःसंप्रोक्ष्याथस्वमोलिषु॥ब्रह्मविष्ण्वादिविबुधाःकृतार्थागि
रिणासह॥२२॥तत्राह विष्णुर्देवैश्च ब्रह्माणंतंविलोकयन्॥भवान्नहंसमुत्पन्नोदेवस्यभुजयोःपुरा॥२३॥ललाटतट

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२ नोरुद्रः सुरा मुनिगणैः सह ॥ यस्य मूर्तिरियं शैली गिरिराजाख्यया स्थिता ॥ २४ ॥ एषा हैमवती गौरी माया सा परमेष्ठिनः ॥ दूमा० द्वि०
६२ संजाता लोकसिद्ध्यर्थमुद्वाहार्थमिहागता ॥ २५ ॥ भवो सौ जगतां धाता पिता तव ममापि च ॥ माता देवी सदास्माकं ययो रुद्वा अ० १८
हमंगलं ॥ २६ ॥ पश्यामो धन्यनेत्राभ्यां विमुक्तभवबंधनाः ॥ अस्यैव मूर्तिभिर्व्याप्तं जगत्सर्वं चराचरं ॥ २७ ॥ क्षित्यग्निरिंदु
दुसूर्यात्मा पवनो दीक्षितात्मकः ॥ महादेवो महानात्मा स्वतंत्रः सर्वहृद्गतः ॥ २८ ॥ तदा स गिरिराट् तत्र मेनया पूजयद्धरं ॥
मधुपर्केण विधिना पुष्पैर्गंधैर्मनोहरैः ॥ २९ ॥ धूपैर्दीपैश्च नैवेद्यैः वासोलंकारभूषणैः ॥ गामर्घ्यं शंभवे दत्वा तामनुज्ञा
प्य शंकरः ॥ ३० ॥ संस्थितः सुरसंघैश्च गणैर्वीजितचामरैः ॥ नदत्सु देवतूर्येषु गायत्सु सुमनोहरं ॥ ३१ ॥ हेमपुष्पैः किरत्स्वी
शे नृत्यदप्सरसः सु च ॥ सदस्येषु सुरेंद्रेषु गणेषु च महोत्सवे ॥ ३२ ॥ गर्गादिते तदा लग्ने गिरिराट् मेनया तदा गिरिजां समलंकृ
त्य विमलांबरभूषणैः ॥ ३३ ॥ समानीय महादेवीं तदा प्रत्यङ्मुखावस्थितां ॥ वीजितां चामरैस्तत्र सखीभिः संवृतां शिवां ॥ मध्ये
पटधरा वास्तां तद शक्रहरी मुदा ॥ सुराः सांद्राक्षता हस्तास्तस्थुः प्रांजलयो गणाः ॥ ३५ ॥ स्तिमिते वाद्यघोषे च जेपुस्तत्र महर्ष
यः ॥ ~~प्रत्येकं मंगलं ह्यद्य पद्यं शंभोर्महोत्सवे~~ वसिष्ठो वामदेवश्च गोतमोत्रिर्भृगुस्तथा ॥ ३६ ॥ जमदग्निः कश्यपश्च भरद्वाजो
महर्षयः ॥ प्रत्येकं मंगलं ह्यद्य पद्यं शंभोर्महोत्सवे ॥ ३७ ॥ ॥ वसिष्ठोवाच ॥ मौर्वी मूर्ध्नि रथः शरास्तन शिरः संचारि चक्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्ष्यं चक्रांतर्निहितः सुरस्तदुदरे सूतः तदास्ये हयाः॥ तेषामेव शिरःस्य देषु वसतिः स्वस्येतियस्य श्रुतं देवश्चिन्त्रपरिच्छदः स
भगवान्कुर्यात्सदा मंगलं॥१॥ ॥वामदेव उवाच॥ ॥योऽदेवश्रुतिशेखरेषु विदितो यं भासकं जानते येन भ्राम्यति
लोकजालमखिलं यस्मै नमः कुर्वते॥ यस्मान्नापरमस्ति किंचिदपि वै यस्यां गमे तज्जगत् यस्मिँस्तिष्ठति सर्वमेव भुव
नं कुर्यात्स नो मंगलं॥२॥ ॥गौतम उवाच॥ ॥विश्वात्मा भगवान् चराचरतनुः विश्वाधिको यं शिवो वेदांतप्रथितो
रुवैभवपदो निश्वासवेदो हरः॥ यो गौरीरमणो त्रनिर्जरवरो विश्वप्रकाशात्मको विध्वस्ताखिलभक्तपातककुलः कुर्यात्स मे
३३१ मंगलं॥३॥ ॥अत्रिरुवाच॥ ॥यं वेदा नहि जानते पुरहरं शंभुं भवानीपतिं विश्वात्मानमनंतविष्णुविधिभिः सं
सेव्यपादांबुजं॥ तं सर्वादिगुरुं मनोऽग्य्रवपुषं गौरीविवाहोत्सुकं॥ तत्पादांबुज लोकनान् मम चिरं भूयात्सदा मंगलं॥४॥
भृगुरुवाच॥ ॥यद्भीत्या पवतेऽनिलोऽपि सहसा विश्वोदयस्थो रविः॥ अग्निश्चोर्ध्वशिखो भवत्यनुदिनं शक्रः सुरान्पाति
वै॥ मृत्युर्धावति यद्भयेन सुतरां मृत्युंजयस्याज्ञया॥ तं सांबं हृदये भजंति मुनयस्तेषां सदा मंगलं॥५॥ ॥जमदग्निरुवाच॥
यो विष्णोर्जनितासुरासुरगुरुः वेदांतवेद्यो हरः॥ यत्पादांबुजपूजनेन सुरताः धन्याः कृतार्थाश्च भवन्॥ धन्योयं गिरिराजरा
जतिलकः कन्यासुपात्रार्पणात्॥ नान्यं जानथ शंकरात्सुरवराः कुर्यात्स वो मंगलं॥६॥ ॥ कश्यप उवाच॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सेवार्थागतविघ्नराट् गुहलसद्वाहेक्षणाभ्युत्पतत्प्रत्यायातभुजंगफूत्कृतिकनत्कालाग्निकीलोत्करैः॥ निष्पंदेंदुसुधो 
पजीवितकरिव्याघ्रादिनादाभटी॥ भीतोक्षावनतत्परो गिरिसुताकांतेक्षणान्मंगलं॥७॥ ॥भरद्वाजउवाच॥ ॥कारु 
ण्यामृतसारपूरितलसन्नेत्रांतसंवीक्षण॥ त्रैलोक्यावनदीक्षितं जयवटीराजत्करांभोरुहं॥ सांबं निर्जरदीर्घिकाप्रविलसत्सं
फुल्लपद्मावली॥ धूलीधूसरकर्बुरोज्वलजटोरेरवं भजे मंगलं॥८॥ ॥एवं मुनिप्रवचनोरुसुमंगलेन सन्मंगलामौलिवरेत
दाक्षताः॥ मुदोत्किरत्सापि शशांकमौलौ मुदोत्किरद्दक्षगणा इवाक्षताः॥९॥ भेरीमृदंगपणवानकवाद्यघोषैः वेदप्रकर्ष
वर्तुघोषजिताब्धिघोषैः॥ योषामुखं सममिवीक्ष्य मुदोरुहर्षस्त्र्यक्षोक्षताक्षहृदयोरिवलमंगलांतां॥१०॥ छाया
रवीविधृतपार्श्वगवेदिकुंभसंस्थापनप्रमुदिता गिरिवर्यसंघाः॥ तत्राभिवीक्ष्य रतिमेव सुदुःखनम्रामंबां मुदेक्ष
तशिवः स्मरसंप्रदाने॥११॥ साशर्ववक्रकमठोदरभृंगसंघकारुण्यपांगकलनैर्मदनं समैहदे॥ कृत्वासुरासुरसदप्रति
वेश्यरत्या तच्चारुमौलिनिलयं पदमासदुस्तौ॥१२॥ अजोपि लाजैर्वरवन्हिमौलौ जुहाव मंत्रैर्मुनिवर्यजुष्टः॥ स्वचारु
वक्त्रैः शशिखंडभूषणं विलोक्य नेत्रैर्मुदमाप विस्मितः॥१३॥ ददौ स भृंगारुकरैकधारया समेनया भूधरनायकः करे॥
रहस्यतत्पाणितले भवान्याः पाणिं दधन्याम महोबभूव॥१४॥ सुरानदीचुर्मुनयो गिरींद्रं धन्योसि मान्यो हरपात्रदाता॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिगृहीतापि महेश्वरः स्वयं धन्या किलैषा जगतां जनित्री ॥१५॥ पाणिग्रहे पर्वतराजपुत्र्याः पादांबुजं पाणिसरोरुहाभ्यां॥
अश्मानमारोपयतः स्मरारेर्मंदस्मितं मंगलमातनोतु ॥१६॥ प्रदक्षिणावर्त्तशिखं वह्निं वन्हिं बिभ्यंतमेव क्रमणेन तौ शिवौ॥
परीत्य शेषं विधिना समाप्य मुदा तदास्थतु रेव हर्षितौ ॥१७॥ निराज्य गौरीसहितं महेश्वरं मेना तदा सा प्रणनाम ह
र्षा॥ गिरीश्वरश्चापि गिरींद्र संजये त्यहो महोत्सवो भूद्भुवि भूसुरासुराः॥१८॥ तांबूलविश्राणन गंधपुष्पैः सुरासु
रान्भूधरनायकांश्च॥ चकार पूजाभिरतीव हृष्टान् तुष्टान्करो ज्जिष्णुरथो शिवाज्ञया॥१९॥ गावो हिरण्यं कनकांब
312 रं वसु द्विजेषु सर्वर्षिषु शंकराज्ञया॥ विश्राणको वैश्रवणो मुदाभूत् तदा शिवायाः सुविवाहमंगले॥२०॥ रुद्रं हरिद्रां ग
मुमा चकार सान्यस्त तं द्रापि सुचंद्रशेखरं॥ तदा द्विपत्नीगणगीतमंद्रैः सुचंदनोद्भ्रपट वासरूपिते॥२१॥ हरोपि देव्या
विजह्वार हर्षितः चकार पुष्पैः सहकार पूजां॥ कुजेक्षप्रपश्यत्यगजा महेश्वरं गायत्समुत्फुल्लशिताब्जवक्त्रं॥२२॥
॥५९॥ इति श्रीशिवरहस्ये द्वादशांशे ईशानाख्ये गौरीशंकरविवाहे अष्टादशोध्यायः॥१८॥ ॥श्रीकाशीविश्वे
श्वरार्पणमस्तु॥ ॥श्रीईशानाय नमः॥ ॥श्रीस्कंद उवाच॥ ॥ तेशं करं प्रणम्यैव गौरींच सुरसत्तमाः॥ वि
ष्णुब्रह्मादयो देवाः गणेशा मुनिसत्तमाः॥१॥ ययुः स्वावसथं तत्र हिमशैले मनोरमे॥ गिरिराजाभ्यनुज्ञाता आह्वारं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४ पंक्तिः — भूषणैश्चैव वासोभि गन्धपुष्पै र्विराजितान् ॥

शिवरह०१२ सुरसत्तमाः॥२॥देवभोग्यानावसथान् निर्मितान्विश्वकर्मणा॥ भक्ष्यभोज्यान्नबहुलान्वनवाटीविराजितान्॥ ३॥ शय्यासन दू०शा०द्वा०
६८ विहारैश्चसरोवरकुलैस्तथा॥४॥नंदिकेशादिगणपाः ऊषुस्तत्रशिवाज्ञया॥मुनयोप्याश्रमेष्वेवनियतेष्वावसन्द्विजाः॥५॥ अ०१९
कृतनित्यक्रियास्तत्रशिवलिंगसमर्चकाः॥गणाःसुरगृहे तत्रवसंतित्रिदिवाधिके॥६॥विरूपं कष्टमिवतेअवटमूर्तिकृपाव
शात्॥ नस्मरंतिवसंत्यत्रशिपिविष्टपदार्चकाः॥७॥नृत्यैर्गेयैर्भक्ष्यभोज्यैः सदारास्सुखिनोवसन्॥गिरींद्रोगिरिभिःसा
र्धंमैनाकेनचमेनया॥८॥नरत्सुदेवतूर्येषु नृत्यंतीष्वप्सरस्सुच॥गौतमेनाभ्यगात्सर्वान् विमानेनार्करोचिषा॥९॥नंदि
केशादिगणपान् विष्णुब्रह्मादयःसुरान्॥मुनीन्सशिष्यान्तत्रैवउद्वाहार्थंसमागतान्॥१०॥गंधर्वसिद्धसाध्याश्चनागाः
किंपुरुषाप्सराः॥विद्याधरान्सागरांश्चनद्यृक्षाणिग्रहांस्तथा॥११॥निमंत्र्यतसर्वांस्तान्साक्षात्तंगिरिसत्तमः॥तत्पत्न्यो
पिनिमंत्र्याथमेनासाहृष्टमानसा॥१२॥पूजितोगंधपुष्पाद्यैःगौतमेनगिरीश्वरः॥तांबूलदानैगिरिभिः वस्त्रालंकारभूषणैः॥
॥१३॥देवपत्नीभिरपिसामेनागिर्यंगनागणैः॥गंधपुष्पैश्चवासोभिःपूजितानिर्ययौतदा॥ गिरिणाचविमानेनपूजाभिस्त
त्रतत्रहि॥एवंप्रतिसुरं तत्रनिमंत्र्यगणपान्मुनीन्॥१५॥शिवाज्ञयागिरिवरःगृहेभोजयितुंसुरान्॥तत्रास्तंगतआदित्येल
क्षस्तंभोरुमंडपे॥१६॥चित्रितेगंधपुष्पाद्यैःधूपितेसिक्तभूतले॥कदलीदलविस्तीर्णपात्रोपरि सुरोत्करैः॥पात्रैःपात्रीशताकी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्पंचमसैर्वर्ध्वनीगणैः ॥ रंगवल्लीविरचितैः प्रत्यंतैः प्रोक्षितैस्तदा ॥ १८ ॥ निष्पन्नशातकुंभोरुदीपस्तंभैरलंकृतैः ॥ भक्ष्यैर्यवजगोधू
मपायसापूपमंडकैः ॥ १९ ॥ फेणिकावटकैश्चैव पर्पटैर्घृतपाचितैः ॥ शोकहारिमहाशाकैः सोपदंशविराजितैः ॥ २० ॥ लड्डुकैर्मो
दकैश्चैव दधिक्षीराज्यशर्करा ॥ मांसमुद्गावचं तत्र मत्स्यमेणोयमाजकं ॥ २१ ॥ निष्पन्नं घृतसंतप्तं लवंगैलासुपाचितं ॥ प्राज्या
ज्यं गंधसुभगं वरपात्रेष्वलंकृतं ॥ वसंतमल्लिकलिकासमान्नं गंधभासुरं ॥ सगिरिर्गिरिपत्नीभिः परिवेषयदंजसा ॥ २३ ॥ मांसो
दनैस्तथा चित्रै दधिक्षीरान्वितै स्तदा ॥ मध्ये वेद्यां महादेवपात्रं गौर्याश्च भासुरं ॥ २४ ॥ रत्नमुक्ताविचित्रेण रंगवल्ल्या विराजितं ॥
७१३ रत्नदीपमहास्तंभैः पर्यंतेष्वप्यलंकृतं ॥ २५ ॥ त्रिपदीमौलिभागस्थरत्नपात्रद्वयेतदा ॥ देवस्य देव्या रुचिरं भक्षभोज्यविराजि
तं ॥ २६ ॥ सिंहासनद्वयं तत्र रत्नपर्यंतभासुरं ॥ निधाय गिरिराट् तत्र सुरानाहूय तान्गणान् ॥ २७ ॥ मुनिनन्यान्गणांस्तत्र प्रति
पात्रं निवेशयत् ॥ हेमार्चिषु सुपीठेषु संनिवेश्यानुपूर्वशः ॥ २८ ॥ सुस्नातान् तान्सुवसनान्नाचांतान्गंधपुष्पितान् ॥ भृंगारुक
लशोपेतान् आस्थितान् पंक्तिशस्सुरान् ॥ २९ ॥ वामदक्षिणपार्श्वेऽथ महेशस्य हरिं विधिं ॥ न्यवेशयद् गिरिश्रेष्ठो मुनिपंक्तौ मुनी
श्वरान् ॥ शक्रादीनां सुराणां च पंक्तौ ते सुरसत्तमाः ॥ नंदिकेशादिगणपाः स्वगणैः पंक्तिसंस्थिताः ॥ ३१ ॥ गिरयोऽपि स्वपंक्तिस्थाः मे
ढीकृत्य हिमाचलो मैनाकमनु ते सर्वे संस्थिता विष्टरेष्वथ ॥ ३२ ॥ देवांगनागणानां च पत्नयो मुनिपत्नयः ॥ प्रावृतां तर्गृहे तत्र मे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नयागिरिपत्निभिः॥३३॥रंगवल्यादिरचितदीपस्तंभैरलंकृते॥पात्रेषु भक्ष्यभोज्यान्नपूर्णेष्वथसुवाससः॥३४॥सर्वांगभूष
णोपेताःनिशाकुंकुमभूषिताः॥सल्लापालापकुशलाःअन्योन्यंचक्रिरेकथाः॥३५॥हेमपीठेषुलक्ष्म्याद्याःशचीवाण्यादयोंगनाः॥
अरुंधतीमुखास्तत्रसुयशाद्यागणांगनाः॥३६॥मेनयापूजितास्तत्रसंस्थिताःकलशैर्युताः॥देवानुपाविश्यगिरिःमहेशंप्रांजलि
स्तदा॥३७॥उवाचगौर्यासहितंरत्नमंचस्थमीश्वरं॥ ॥गिरीश्वरउवाच॥ ॥देवास्समागताःसर्वेतवैवाज्ञाकरागणाः॥मुन
यःसहपत्नीभिःसुराणांगणपांगनाः॥मेनयासंस्थिताःसर्वाःपूजिताश्चयथाविधि॥३९॥पंक्तिशःसंस्थिताःसर्वेप्रतिपात्रेषु
शंकरं॥त्वांप्रतीक्षंतिविश्वेशंगौर्याभोक्तुंसुजग्धिनः॥४०॥त्वत्प्रसादान्नभोज्यातोमुक्तास्तेसुरसत्तमाः॥हत्तमोनाशकंशंभोतवनैवेद्य
मुत्तमं॥४१॥इत्युक्तोगिरिवर्येणमहादेवोंबयासह॥सुस्नातोवाससायुक्तोभूषणैर्मंडितांगकः॥४२॥मकुटोद्भासिचंद्रांशुधवलीकृतदिङ्मुखैः॥
त्रिपुंड्रगंधरेखांकोगंधपुष्पैरलंकृतः॥४३॥गणेश्वरैःपादुकाढ्यपादाभ्यांपरिवीजितः॥चामरैःसतदागौर्यासर्वाभरणभूषया॥४४॥सययौसुर
पंक्तिंतांप्रणामसुखरोत्थितां॥आलोक्यसोमधामांशुसुधादृष्ट्यासुरान्गणान्॥४५॥मुनीन्गिरीन्सविश्वेशोदेव्यावेद्यांवरासने॥निषसादमहादे
वःसीदतेतितदाब्रवीत्॥४६॥शिवाज्ञयाततःसर्वेयथापूर्वंव्यवस्थिताः॥ब्रह्मविष्णवादयोदेवाःगणाःमुनिगणास्तथा॥४७॥रत्नभृंगारुकलशेवर्ध
नाशीतलैर्जलैः॥देव्याकरांबुजस्पर्शैःसंप्रोक्ष्यपरिषिच्यच॥४८॥गौर्यासबुभुजेशंभुःगणेशैःपरिवीजितः॥देव्याःसखीगणैस्तत्रवीजितासामहेश्वरी
॥४९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवनैवेद्यशेषं तद्धि कृतामृतमुत्तमं ॥ बुभुजे सा तदा गौरी वरान्नं परया मुदा ॥५०॥ अनुज्ञाताः सुरास्तत्र मुनयो गिरयो गणाः ॥ बुभुजुः शिवनैवेद्यं
गिरिराजेन पूजिताः ॥५१॥ मेनापि देवपत्नीभिः बुभुजे पूजयन् स्त्रियः ॥ न कश्चिद्व्याजहारेश सन्निधौ पंक्तिसंस्थितः ॥५२॥ परिवेषकरास्तत्र संचरंति
सदा स्त्रियः ॥ हेमभांडैः रत्नपात्रीकरा दर्वीकरास्तथा ॥५३॥ भक्ष्यभोज्यकरास्तत्र सोष्यान्नक्वथिता[ता]ःकराः ॥ पानकापूपभक्ष्याज्यकरा[गाः]क्षीरकरास्तथा ॥५४॥
रसवंतीश्च पानानी मधुमांसकरास्त्रियः ॥ कदलीफानसाम्रादिकरास्तत्र वरस्त्रियः ॥५५॥ सुपंचपायसापूपपात्रीकरधरास्त्रियः ॥ शर्करापात्रसुकरा द
धिमंडकरास्त्रियः ॥ मांसमुच्चावचं तेह्यं चोष्याभूष्यत्करास्त्रियः ॥ सुशीतपाटलोशीरगंधपुष्पांबुदायिनः ॥५७॥ परिवेषकरा सूदा युवानो मृष्टकुंडलाः ॥ रणन्नू
394 पुरपादाब्जाः करकंकणनिस्वनैः ॥५८॥ संचरंति स्त्रियः पंक्तौ संघशास्तदिं[ड्रि]दुज्ज्वलाः ॥ प्रतिपात्रं समुद्वीक्ष्य यद्भोज्यं यस्य यत्प्रियं ॥५९॥ मनसाचिंतना दूर्ध्वं त
त्या त्रेतत्क्षिपंत्यपि ॥ न चावज्ञायते कश्चित्स्त्रीभिर्वा सूदसत्तमैः ॥६०॥ गृह्यतामन्नभोज्यादि यद्यस्याभिमतं स्थितं ॥ इति सूदा वदंत्येव प्रतिपात्रं सहस्रशः ॥६१॥
त्रिंशच्चि कोटिदेवानां मुनीनां कोटयो नव ॥ गणानां पंचकोट्यश्चाथ स्त्रीणां कोटित्रयं तथा ॥६२॥ गिरीणां षष्टिसाहस्रं रुक्मपात्रीषु भुंजते ॥ तदा मुदा गिरिश्रेष्ठो वा
चमूचे विनीतवत् ॥६३॥ गिरिरुवाच ॥ यद्वैष्णावे तथा ब्राह्मे यच्छाक्ते चामरालये ॥ तदस्तु भोज्यं सर्वेषां प्रीतिवत्तरमस्तु मे ॥६४॥ मयि प्रीत्याद्य सर्वे वै शिवनैवेद्यमी
दृशं ॥ अवज्ञया वालस्येन दत्तं च क्षंतुमर्हथ ॥६५॥ ॥श्रीस्कंद उवाच ॥ इति तत्र गिरेर्वाक्यं श्रुत्वा ते सुरसत्तमाः ॥ ऊचुः सर्वे मुनिश्रेष्ठा गणाः सुरगणैः सह ॥ अहो धन्या वयं स
र्वे धिक्कृतामृतमुत्तमं ॥६६॥ महेशपंक्तौ नैवेद्यं शिवस्य परमात्मनः ॥ भुक्तवंतो मुक्तियुक्ताः भक्तिश्चान्नकमस्तु ते ॥६७॥ धरणीधुग्वरोसि त्वं ब्रवीषि मधुरं वचः ॥ न ब्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षेनचवैकुंठेनशाकैर्भोज्यमीदृशं॥६८॥इतिसंतर्पिताः सर्वेशिवेनसुरसत्तमाः॥ तदानींनारदोवाक्यमवादीत्परिहर्षितः॥६९॥ नारदउवाच॥ शंभोभर्गमहेश्वरेश्व
रमहादेवेशविश्वाधिक॥ विश्वाशास्य दयानिधेश्रुतिशतैरुद्घोषितोन्नप्रदः॥ तेनैवाद्यसुतर्पिताःसुरताधन्यैर्मुनीन्द्रैर्गणैर्नान्यत्रप्रविशामहेशरूपयानित्यंप्र
मोदामहे॥७०॥ नित्यंमंगलमस्तुतेप्रतिपदंस्यान्मंगलायाःपतिः॥ इत्युक्तंचमुनेः तदामुनिगणाःश्रुत्वावचोहर्षिताः॥ देवास्तेगणपाःशिवेनशिवयाऽऽत्तस्थु
रीशाज्ञया॥७१॥ संप्रक्षाल्यपदद्वयंचवदनंहस्तौतदाशर्करा पारापूरनिमग्नचेतससुरास्तेभूसुरास्तेगणाः॥ दिव्यांतांविविभुः सभांद्युतियुतांवस्त्रैस्तथाभूषणै
र्बद्धोष्णीषकिरीटकुंडलधरास्तस्थुस्तदान्तेसदं॥७२॥ नातंवाधमवस्थिताश्चसुमुखालेखामहेशोन्मुखाः॥ मान्यास्तेगणपुंगवाश्चमुनयःसिंहासनस्थं
शिवं॥७३॥ गौरींचापितदंकसुंदरमहापर्यंकसंस्थांसुरा नेमुस्तत्रशशांकदीधितिधरंसंवीजितंचामरं॥ शंभुस्तत्रहिमाचलेनगिरिभिःसंपूजितस्सामरो गंधस्र
ग्वरपुष्पशेखरकरास्तांबूलरागास्यकाः॥७४॥ वीक्ष्यंतित्रिदशामहेशवदनंनृत्येषुसक्तादराः तत्रातोद्यसुनर्तितास्वरवरंसाहस्रमत्यद्भुतं॥ तालोत्थाहति
तंत्रियंत्रितनटन्मृत्ताभेरीशोभिते रंगभ्राजितरम्यवेणुनिनदैःसंमर्दलानांस्वनैः॥७५॥ भ्राजद्दुकूलपरिष्कृतामरसभाधिक्कारिणीतत्सभा राजत्येवसभा
पतेःप्रमुखतोधूपालिदीपप्रभा॥ मेनाचापिसुरान्वितासुरमहाभामायुतापूजिता॥ ताम्बूलामलगंधपुष्पविलसद्धम्मिल्लमालायुता॥७६॥ रंभाद्यप्सरसांन
टज्झणाझणारावैकनत्यादरा वासोभिःसुनिशासुकुंकुमवरैःसंपूजितास्ताःस्त्रियः॥ सूतउवाच॥ एवंवर्षमहर्निशंसगिरिशःसंपूज्यसर्वामरान्विप्रानत
द्गणपान्सदारतनयान्भाद्यनुवासादरात्॥ शंभुंतांजगदंबिकांगिरिवरैर्युक्तःसमुक्तोऽभवत्॥ व्यक्तंभक्तिविभावितात्महृदयोनान्यद्विजानात्ययं॥७८॥
इतिश्रीशिवरहस्येद्वादशांशेईशानाख्येसुरभोजनवर्णनंनामएकोनविंशोऽध्यायः॥१९॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्रीईशानायनमः॥ ॥ श्रीस्कंद उवाच ॥ ॥ एवं स्थितं तदा वीक्ष्य त्र्यक्षं गिरिजया सह ॥ भूधरेणार्चितं देवैः सुरका-
र्यार्थमुद्यतः ॥१॥ वासुदेवो गिरिश्रेष्ठं रहसि स्वैरमब्रवीत् ॥ विष्णुरुवाच ॥ धन्यो मान्योसि गोत्रेषु कृपापात्रं महेशि-
तुः ॥२॥ तव भाग्यस्य नांतोस्ति यतस्त्वं शंकरार्चकः ॥ किंतु मे सांप्रतं वाक्यं सुराणां हितमाचर ॥ इयं गौरी तव सुता-
जाता माया महेश्वरी ॥३॥ यस्यामुत्पद्यतेऽस्माकं कुमारः सैन्यपालकः ॥ न मया च सह शक्रेण सुरैश्चासुरसूदनैः ॥
न जेतुं शक्यते दैत्यो तारकः शूरसंयुतः ॥ सकोट्यक्षौहिणीयुक्तो षट्कोटितुरगावृतः ॥४॥ पंचकोटिगजैर्युक्तः
३१८ नवकोटिरथावृतः ॥ ब्रह्मदत्तवरो दैत्यो सन्नद्धकवचायुधः ॥ नान्येन समरे जेतुं शक्तिहस्तं विना गिरे ॥ शि-
वो विहरतु स्वैरं कैलासे वा सुमंदरे ॥७॥ क्षिप्रं देव्या महादेवः तदेतन्नः परं हितं ॥ कर्त्तुमर्हसि साहाय्ये तम-
नुज्ञातुमर्हसि ॥८॥ न त्वं वियोगं देव्याय: सहसे खेदजं गिरे ॥ चिरं कन्यापि तु गृहे धन्य वस्तु मिहार्हति ॥९॥ शि-
वेन प्रेषयास्माकं हितार्थं भूधरोत्तमं ॥ तदा विष्णुवचः श्रुत्वा महेशानं ययौ गिरिः ॥१०॥ लोकप्रामाण्यहेत्वर्थं कन्यादा-
नं प्रदर्शितं ॥ ग्रहप्रवेशनीयां गं चक्रे कर्मविधानवित् ॥ मुकुटैर्भरणैश्चित्रैः गंधपुष्पैर्गिरीश्वरः ॥ प्रणम्य पूजया-
मास गौरीशंकरमेव च ॥ सा साक्षान्मेनया कन्यां ददौ हस्ते हरस्य तु ॥ नृत्यंत्यप्सरसां संघाः जगुर्गंधर्वनायकाः ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६७ ववृषुः कुसुमाकारं मेघास्ते घोषवत्तरं ॥ गिरिराजेन देवेशो सुरैर्द्विजगणैर्गणैः ॥ स्वच्छछत्राचृतमुखा पार्श्वयोर्वीज्य अ. २०
चामराः ॥ गौर्या तदा मेनया च विष्णुब्रह्मगिरिव्रजैः ॥१५॥ स्तुवतां देवसंघानां संस्तवं परमेशितुः ॥ नंदिनो हस्त
मालंब्य सर्वोलंबो पिशंकरः ॥१६॥ हेरंबेण मुदायुक्तः सुरसेनाभैरर्गणैः ॥ धृतनानाविधभ्राजदायुधैः सुरस
त्तमैः ॥ गणेंद्रैर्वीरगेंद्राभैः शरधृग्बाणपाणिभिः ॥ चंद्रांशुधामकोटीरप्रभावो जितदिङ्मुखः ॥ १७॥ हव्यवा
हस्फुलिंगोर्ध्वनयनोद्यप्रभायुतः ॥ प्रभाकरकरभ्राजल्लयनध्वस्तदिक्तमः ॥ १९॥ वृषं महागजं चक्रे चतुर्दं
तं सुपांडुरं ॥ ककुत्तस्याभवत्कुंभो सास्ना कर्णौ विरेजतुः ॥ २०॥ घंटांकुशकुथास्तीर्णं रत्नचित्रपरिष्कृतं ॥ रत्न
भ्राजितकक्षाग्रमुक्तागुच्छविराजितं ॥२१॥ रत्नवेष्टनदंताग्रसितधाराविराजितं ॥ पादरक्षैर्गणैर्दैश्च वीरभ
द्रादितंडुभिः ॥ २२॥ हरिब्रह्मादिहस्ताञ्जसमालंबिविषाणकौ ॥ वामदक्षिणभागस्थौ गजवर्यस्य तौ हरी ॥
२३॥ विराजिते विधिः पश्चात्सुरासुरगणैः सह ॥ नीराजितो गिरिस्त्रीभिः रत्नमुक्ताक्षतादिभिः ॥२४॥
नरत्सुगज भेरीषु पणवानकगोमुखैः ॥ शंखमृदंगपटहाकाहतानां च निस्वनैः ॥ २५॥ नंदिनो सारितसुरो
महादेवो वृषध्वजः ॥ पुरोयायिभिरत्युग्रैः खड्गहेतिधरैर्गणैः ॥ २६॥ नृत्यत्सुरंभामुख्यासु समारुह्य वृषं तदा ॥ गजा=

कृतिं महादेवो रत्नमंडपपृष्ठगं ॥ २७ ॥ भ्राजद्वितानकुंभाग्रं पताकावलिभूषितं ॥ रत्नपंकजमालाढ्यं गौर्या
साकं महेश्वरः ॥ २८ ॥ केदारेशालयं तत्र प्रादक्षिण्यमुपाययौ ॥ स्तुवंति देवा मुनयो वेदास्तत्र महेश्वरं ॥ २९ ॥
वेदा ऊचुः ॥ भजामयामिनीधवप्रियोत्तमांगसंगतः ॥ स्फुरत्कपर्दगांगजोल्लसत्परागरंजितं ॥ प्रफुल्लह
ल्लकावलीसुपंचकालिमालिका ॥ मलीकसत्कपोलकां भजा महेद्यकालिकां ॥ ३० ॥ विहारभूमि धूर्जटं
हरं हरं तमेन सां गिरिं परं गरं भजामसोमशेखरं ॥ नगप्रियोरुदारिकां स्वभक्तपापहारिकां सुमेन
जाकुमारिकां भजा महेकुमारिकां ॥ ३१ ॥ विश्रम्य विश्रम्य तदा मुदा हरो सुरैर्गणेन्द्रैश्च सुपंक्तिशः स्थितैः ॥
396
रंभादिसंरंभकृतोरुनृत्तं विलोक्य विश्राणयदं बरे तदा ॥ ३२ ॥ तांबूलपुष्पैर्वरचंदनैश्च सर्वान्त्रपूज्या
प मुदा गिरीन्सुरान् ॥ गणेश्वरान्वीजितचामरौघः तदा ययौ वाद्यरवैर्महेशः ॥ ३३ ॥ पश्चान्महेश्वरगजस्य-
सुमेनया युतालक्ष्म्यादयस्ताः सुरवीरपत्न्यः ॥ गणेश्वराणां गिरिवर्यकाणां प्रोत्फुल्लपुष्पांवरभूषणाढ्याः ॥
नीराज्य हस्ताक्षतजातमौक्तिकैः समुत्किरंत्यो शशिधाममौलौ ॥ गौर्यां प्रपथ्या स्तृतवस्त्रमार्गे ययुर्मुदा सं
चरमाणविद्युतः ॥ ३४ ॥ सपारिबर्हं प्रददौ भवान्यां गिरीश्वरोयं प्रमुदोपिताधनं ॥ सुवर्णमुक्तामणिप=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६८ द्मरागसुपुष्पशृंगवरहीरकंचं ॥३८॥ प्रवालवैडूर्यसमणींद्रनीलगोमेदसन्मारकताच्छगर्भं ॥ तुलामला
लक्षसुसंख्यया गिरिः ॥ विभूषणान्यप्यतिरत्नसौभगं ॥३९॥ दिव्यांबराणां भरलक्षसंख्यं निशा-
दिसकुंकुमरोचनाद्यं ॥दासीगणानां च सहस्रशोभिः सयौवनोन्माद भरं विभूषितं ॥४०॥ गजाश्वगो
वृंदमहोक्षवत्सं शतांगसंघं सुपताकलाश्वं ॥ सहस्रशस्तत्र ददौ गिरींद्रः कन्याधनं मानधनो गिरीशे ॥४१॥
मुदा तदोचुर्मुनयः सुरेश्वरा गणेश्वरास्तत्र गिरीश्वरं तं ॥ धन्योसि मान्योसि सदा महांस्त्वं हिमाचलो भ
क्तियुतोसि गौर्यां ॥४०॥ ददौ यतेकनककदंडविराजितैश्च सच्चामरैः प्रचलकुंडलसुंदरीभिः ॥ दिव्यां
गनास्तनविराजितभूषितांगाः कृत्वा तु चामरयुतांबरवस्त्रपूजां ॥ वर्षंति तत्र मुदिताः पुरुहूतदूता
मेघास्त्वमोघहृदया सुमनालिभिस्ते ॥ द्योतंति रत्नानि गृहाश्च कांचिरे ववुश्च वाताः शिखिनोपि ज
ज्वलुः ॥४२॥ प्रदक्षिणावर्त्तशिखाः सुखायमेखा महेशानपदाब्जसन्मुखाः ॥ ययुस्तदा मंदरकंदरो
रुसत्सौधसुंदरतरप्रकरं महेशः ॥४३॥ भ्राजत्पताकावलिशातकुंभगुंभैश्च शोभ्यदिवार्कबिंबैः ॥ सुरम्य
रत्नावलितोरणौघैः गणौरुहस्ताब्जजलाजवर्षैः ॥४४॥ अथारुह्य नागात्स गौर्या महेशो महासभां प्राप्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुरत्नचित्रितां ॥ निषाद्य सर्वान् नरेंद्रविप्रान् गिरींद्रसंघांश्च सदारयुक्तान् ॥ ४५ ॥ गजाननं पूज्य सप-
र्यया शिवो गौर्या गणेंद्रैः प्रतिपूज्य सर्वान् ॥ गंधाक्षताभिश्च सुवाससां भरैः पुष्पादितांबूलवरैः प्रहर्षि
तान् ॥ ४६ ॥ चकार नृत्यादि हरलोकनेन सर्वान् अशेषान् हर एव तत्र ॥ परे द्युरामंत्र्य गणैः सुरद्विजैः गिरी
न्द्रसंघैश्च वरांगनाभिः ॥ भक्ष्यैश्च भोज्यान्नवरैः सपंक्तौ सं भोजयामास तदा गिरींद्रान् ॥ एवं च मासाध्यु
षिताः सुखेन सुरा द्विजास्ते गिरयो गणाश्च ॥ ४८ ॥ प्रणम्य याताः स्वगृहेषु तर्पिताः हराज्ञया ते विविशुः स्व
३७ धाम ॥ मेना तदा भूधरनायकेन मैनाकयुक्ता प्रययौ हिमाचलं ॥ ४९ ॥ महेश्वरश्चापि गणेंद्रयुक्तो राजाननेनापि मुदा स्तगौर्या ॥ विराजितेसौ धवरे महर्द्धिभिः तत्कंदरे सुंदरपुष्पशाखिभिः ॥ ५० ॥ तदा प्रणम्य
प्रसभं महेशमुवाच भक्तो घटजो महेश्वरं ॥ कल्याणशैलधनुषं महिषीसमेतं कल्याणयुक्तवपुषं हृदये दधामि ॥ ५१ ॥
सदा मुदा मत्पुरदये वसेश वियोगभीतः प्रकरोमि किं ते ॥ श्रीस्कंद उवाच ॥ तदा महेशो घटजं ददत्त शाव सैव भूमौ वि
हरस्व कामं ॥ क्षेत्रेषु ते दर्शनमेतदेव भवेत्सदा याहि मया ज्ञया द्विज ॥ ५२ ॥ नत्वा महेशाब्जपदं भवानीं ययौ मुनीं
द्रो यसद क्षिणाशां ॥ विंध्यं प्रशाम्याप मुदा महेशं कल्याणवेषं सम पश्यदंजसा ॥ ५३ ॥ क्षेत्रेषु वेदारण्यककान=
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६९ नेहरं श्रीसुंदरे शैलवरे महेशं॥ नलावसत्तेपि सुरेंद्र संघाः कुमारजन्मप्रसमीक्ष्य संस्थिताः॥ ५७॥ येवापठंतीदमहेश
मंगलं सर्वार्थ सिद्धिंचलभंति मंगलं॥ ५८॥ इतिश्री शिव रहस्ये ईशानाख्ये द्वादशांशे मंदरागमनं नामविंशो
ध्यायः॥ २०॥ श्रीकाशी विश्वेश्वरार्पणमस्तु॥ श्रीईशानायनमः॥ श्रीस्कंद उवाच॥ तदामंदरशैले तु शैलेंद्र सुतया
शिवः॥ नंदि भृंगिमहाकालचंडिकेशादि भिर्गणैः॥ १॥ गजाननेनापि मुदासेवि तोवृषभेणच॥ उवाच मणिसौ
घेषु विहारशयनासनैः॥ २॥ भक्ष्यैर्भोज्यैर्महादेवं सेवंतौ परमेश्वरौ॥ रत्नव्यजन हस्ताग्रापर्यंकेतमवीजय-
त्॥ ३॥ मणिदंडाग्रधवल चामरैः सादुधावरुं॥ फलालि वरपात्रैश्च मधुमैरेयदानतः॥ ४॥ दिव्यांगरागगंधैश्च
पुष्पाभरण सेवनैः॥ प्रासाद तल संचारैः सुरम्यवनदर्शनैः॥ ५॥ हंससारसचक्राह्व कोकिलाशुकशारिका॥ शि
खंडिताण्डवं पश्यन्विजहारकृतून्बहून्॥ दोलांदोलनक्रीडाभिः रत्नमंचेषु तौ शिवौ॥ प्रमोदमापतुः स्वैरं शि-
वौ हल्लीस्वलास्यकैः॥ ७॥ कंतुकक्रीडनरतौ अक्षैर्दीव्यतुरीश्वरौ॥ मंदरापारशिखरे वृषेशमधिरुह्यतौ॥ ८॥ ग-
जाननेनगणपैः सेवितोनंदिना मुदा॥ विलोक्य शिखरण्यश्चा विजन्हातेमुदा शिवौ॥ ९॥ क्वचित्प्रफुल्लसालाग्रं-
क्वचित्तालरवाकुलं॥ क्वचिद्दाताम्रशाखाग्रसहकारवनावृतं॥ १०॥ क्वचित्प्रफुल्लवल्लीभिः मल्लीभिः पुष्पितं=

3

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वचित् ॥ क्वचिद्दाडिमरक्ताभफुल्लपुष्पविराजितं ॥११॥ तमालकुलनीलाच्छपुष्पगुच्छयुतं क्वचित् ॥ क्वचित्कदंबनि
बिडगुच्छगुच्छदलिकुंजं ॥१२॥ क्वचिदारग्वधालोलमारुताकीर्णगुच्छकं ॥ क्वचिन्मंदारपुन्नागशिरीषार्जुन
शोभितं ॥१३॥ देवदारुवनाक्रांतं कोविदारवनावृतं ॥ कपित्थशिंशुपालोध्रधवसर्जवनावृतं ॥१४॥ पलाशका
शगुच्छाग्रैः धून्वद्भिः कर्णिकारकैः ॥ शोभितं निबिडच्छायं कोकिलारावभूषितं ॥१५॥ भ्रमन्मातंगसारंग
विहंगविरुतं क्वचित् ॥ बिल्वामलक्यजंबूभिः संवृतं वेणुगुल्मकैः ॥१६॥ वनसूकरदंष्ट्राग्रविदारितशिला
३९८ तलं ॥ मातंगमदधाराभिः शिक्तभूतलसंयुतं ॥१७॥ उत्पुच्छचामरकुलैर्वीजितं गंधितं सदा ॥ कस्तूरिकामृ
गभ्राम्यद्दुंधकेतकमारुतं ॥१८॥ मयूरपक्षविक्षिप्तपतच्चंद्रकभूतलं ॥ गंधर्वकिन्नरानीकगायनासक्तसन्मृ
गं ॥१९॥ वल्मीकोर्ध्वफणाभ्राजद्वक्रपूरितमारुतं ॥ उत्फुल्लहल्लकैः पद्मैः उत्पलैः सारसीगणैः ॥२०॥ संवृतं
गौरिकाक्रांतं नानावर्णावृतं गिरिं ॥ चंद्रिकां शारदीं प्राप्य पुलिनेषु महेश्वरः ॥ कालिंदीगिरिनद्यास्तु तटे-
संशोभिमारुते ॥ सेव्यमानो गणैस्तत्र क्रीडते गिरिजायुतः ॥२२॥ देवमानेन तद्वर्षं निनाय परमेश्वरः ॥ दे-
वास्ते तारकारातिसेनाभिः परिपीडिताः ॥२३॥ विष्णुब्रह्मादिभिर्देवैः शक्रेण गुरुणा युताः ॥ केदारेशं पूजयंतः —

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७० संस्थिताः कालवीक्षकाः ॥ २४ ॥ महेश्वरं प्रार्थयं ति सेनापति समुद्भवे ॥ देवा ऊचुः ॥ जयजय देव महेश दयावन
लोलदृशा परिपाहि विभो ॥ तारकहाकसंगसुतोद्भवकारण शंकर पाहि सदा नः ॥ २५ ॥ जयजय पन्नगभूष
णसन्नगवाससदाशिवपालय नः ॥ तारकजन्मसुसंभ्रमखेदमपाकुरु कुरु करुणां ॥ २६ ॥ जयजय वि
भ्रविनोदनदक्षयमांधकसूदन पाहि दयारसचारुदृशा नः ॥ तारकसंगरवारकपातकहरवर सुरतामुक्ष
रनः ॥ २७ ॥ जयजय विश्वविधायकसायकहरिवर भद्रविधायक पापनिवारक पाहि सदा ॥ तारकजन्य
विषाब्धि विनाशक वाडवनेत्र विधायक पाहि सदा ॥ २८ ॥ जयजय देव महेश्वर शंकर कुरु कुरु करुणां शशि
मौले ॥ तारकसैन्यविदारणसारशरासनधारक मारसमं सुकुमारं ॥ २९ ॥ जयजय पाहि मुदा हृदयेन कुमारशरा
वसारकसंघं ॥ पापमपाकुरु कुरु करुणां शिवदेवसमूहविमोहविनाशे ॥ ३० ॥ इत्थं देवस्तुतिं श्रुत्वा क्रीडन्दे-
व्यास्तु शंकरः ॥ शतवर्षं हरस्तत्र मंदरे चारुकंदरे ॥ १ ॥ ऊर्ध्वरेता विरूपाक्षः तदाग्निं द्वारसंस्थितं ॥ प्रवेश्यता
मिति प्रोच्य नंदिनं गणसत्तमं ॥ २ ॥ ततः संप्रांजलिर्नन्दिः बिभ्यन्नागान्महेश्वरं ॥ विनयावनतस्तस्थौ दे-
४ व्या रूक्षैकवीक्षणैः ॥ ३ ॥ निर्दग्धोपि हरप्रीत्यातमपोचन्महेश्वरः ॥ श्री शिव उवाच ॥ देवानां कार्यसिध्यर्थं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मद्देतो रुक्मसंन्निभं ॥ वह्टपातयगेगायां वन्हे माभीतिमावह ॥१०॥ इत्थं शंभोर्वचः श्रुत्वा तदाग्निः प्रांजलिः
स्थितः ॥ अपातयन्महादेवो हिरण्याभं महेश्वरः ॥११॥ हिरण्यरेता भगवान् दशवर्षाणि तन्मुखे ॥ अग्निरप्यति
ततो भूत् श्रमेण महता युतः ॥१२॥ गंगाद्वारे शरवणे तदपातयदंजसा ॥ तदा गंगा शरवणं हैमं कुर्वन्नव स्थितं ॥१३॥ रेतो
महेश्वरस्येत्थं प्रवहं स्त्र दितस्ततः ॥ तत्रोत शैलास्सर्वे पि संदीप्तास्तत्प्रभावतः ॥१४॥ हिरण्याकारतामापुस्तदा
ब्रह्मादयः सुराः ॥ जहृषुर्मुनिभिः साकं ययुस्तत्रैव विष्णुना ॥१५॥ तदेकत्र कृतं देवैः रेतो माहेश्वरं तदा ॥ षडास्यो
399
द्वादशभुजः द्विपाद्द्वादशलोचनः ॥१६॥ संवृत्तपीनकौमारवपुरासीद्धिरण्मयः ॥ षट्कृत्तिकाः समागम्य स्वंस्त
न्यं पाययन्मुदा ॥१७॥ ववृषुः कुसुमासारं देवास्तूर्याण्यवादयन् ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥
१८॥ जेपुर्महर्षयो मंत्रान् रक्षोघ्नांस्तत्र संघशः ॥ विश्वकर्मा समागम्य कुमारोज्वलभूषणं ॥१९॥ धनाधिपति
दत्तेन रत्नजालेन तं तदा ॥ अभूषयत्तदंगेषु मुदा चारुसुभासुरं ॥२०॥ षड्वक्त्रमुकुटान्येव कुंडलानि तदा मुदा ॥
कनकांगदकेयूरग्रैवेयाण्यपितत्र हि ॥२१॥ कांचीसुरत्नखचितां मणिजालकितांतरां ॥ रणन्मंजीरपा
दाब्जं चक्रे तत्र सुभूषणैः ॥२२॥ विरजोवरभूषांगे रक्तगंधानुलेपितं ॥ देवपुष्पोरुमालाभिः परिभूषितं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७१ विग्रहं ॥२३॥ ददौ पितामहः शक्तिं अग्निश्चापं शरावरं ॥ विष्णुश्चक्रं दैत्यहंतृ ददुर्देवा मुदा तदा ॥१४॥ कुमारोयं अ·२१
च सेनानिरग्ने यो वर षण्मुखः ॥ ददुर्दानानि भूरीणि हिरण्यं गोधनानि च ॥२५॥ धनं धान्यं च विप्रेभ्यो जात
हर्षास्तदा सुराः ॥ तारकस्यापशकुनान्यासंस्तत्र सहस्रशः ॥२६॥ स्वालकबंधं पपातोर्व्यां विद्युत्तस्यापतद्गृहे ॥
सशर्करो ववौ वायुः कर्कशोंगारदारुणः ॥२७॥ शाम्येति चाग्नयस्तत्र गृहा वश्याश्च ते भवन् ॥ तदा स काव्य
स्य गिरा शांतिं चक्रे च तारकः ॥२८॥ श्रुत्वा कुमारजन्मैतद् हृदये न विदूयता ॥ मुसंनह्य तदा सेनाः प्रशास
सत्रि विष्टपं ॥२९॥ विष्णुब्रह्मादयो देवाः तुष्टुवुस्तं प्रणम्य च ॥ शताष्टनामभिस्तत्र त्रिपुरारितनूभवं ॥
३०॥ ५८॥ श्री षण्मुखनामाष्टोत्तरशत ॥ श्री ॥ षण्मुखः सुमुखस्त्वाताले खसेनापतिः प्रभुः ॥ शक्तिह-
स्तो दुराधर्षो वीतिहोत्रांगजो शिखी ॥ शिखिवाहो द्वादशाक्षः गौरीप्रियतनूभवः ॥ सेनापतिर्वीतशोको
महाबलपराक्रमः ॥२॥ स्कंदोनदितवृंदारो मारमारात्मजो बली ॥ क्रौंचाद्रिमथनो योगी सुब्रह्मण्यो म
२ खेडितः ॥३॥ गांगेयो वैद्युतो मोघो तारकांतकरो रविः ॥ महासेनो वेदवेद्यो प्रणवार्थप्रकाशकः ॥४॥ महा-
सेनो शरवणो भवोद्भवसुतोयमः ॥ विनायकानुजः श्रीमान् शूरसंहारकारकः ॥५॥ सेनानिर्दुर्द्दरो वीरो =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गर्भो विश्वपतिः कविः ॥ गुहो हरिहयः शास्ता शरासनकरः शरी ॥६॥ व्यापको नंत भक्तिश्च कुमारो उज्वलांग
कः ॥ वीरबाहुर्गणाध्यक्षः त्र्यक्षप्रीतो विशारदः ॥७॥ कांतः शांतो जितारातिः उमाकांतात्मजो परः ॥ वल्लीपति
र्जितारातिः कुक्कुटोत्तमकेतनः ॥८॥ शिवलिंगार्चनप्रीतो गंधपुष्पाद्यलंकृतः ॥ मकुटी चांगदी चक्री गदी शंखी
शिखी जटी ॥९॥ सनातनः परस्तारः तारकः तारकांतकृत् ॥ संवर्त्तो यौवनो घोरो बालो लीलाविनोदकृत् ॥१०॥ प्र
सन्नाक्षः पंकजाक्षो शंबरो शंबरप्रियः ॥ सुपल्लवशिखी धन्वी खड्गखेटकरः सुतः ॥११॥ विश्वप्रियोऽनंतशक्तिः
४०० सुराध्यक्षो दुरासदः ॥ प्रमोदो मेघदमनः शक्रपूज्यः शतक्रतुः ॥१२॥ कृत्तिकासूनुरमलः कृत्तिवासप्रियो विरा
ट् ॥ स्वाहाप्रियः कार्त्तिकेयो हरणो केशवत्तरः ॥ स्वर्णवर्णः पारिभद्रो ताम्रस्तारणतारकः ॥ सुपुष्करम-
हामालो लालितांगः सुरावनः ॥१४॥ यशस्करो मरपरो गीतनृत्तप्रियो र्त्तिहा ॥ वीरभद्रमहाशास्ता नंदी
सर्व्वैकतपुरः ॥ १५॥ निरंजनो निराधारः शंकरो मापतिर्व्वटुः ॥ ब्रह्मचारी गिरिचरो सर्परूपो दुरासदः ॥
१६॥ षष्ठीप्रीतः सत्कुमारः स्मरस्मेरास्यसुंदरः ॥ विज्ञानदः शिवज्ञानी शिवभक्तशिरोमणिः ॥१७॥ इत्येतैर्नाम
भिस्तुला नत्वा देवाः सवासवाः ॥ जहृषुस्तं कुमारं च शतपुष्करमालिकं ॥१८॥ विमानेनार्कवर्णेन निर्न्युर्दैवा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७२ महेश्वरं ॥ ननृतुस्सुदेवतुर्येषु नृत्यं त्वंप्सरसस्सुच ॥ १९ ॥ वर्षत्सु कुसुमासारं गंधर्वैः कृतगायनैः ॥ तेन दा मंदरगि
रिं संप्राप्य प्रमथाधिपं ॥ २० ॥ प्रणम्य दिविजास्तत्र मुदमापुर्महेश्वरः ॥ दृष्ट्वा कुमारं मारारिर्भं गौर्या वीक्ष्यान
नं हरः ॥ २१ ॥ प्रमुमोद महादेवः उत्थाप्यालिंग्य शंकरः ॥ स्वांकपर्यंक संस्थं तं चकार परमेश्वरः ॥ २२ ॥ त-
दा पंचमुखस्तत्र जिघ्रे गौर्याः षडाननं ॥ गौर्याः सहमहेशोपि तदा पंचदशाक्षिभिः ॥ २३ ॥ पश्यन्ननिमि-
षैर्नेत्रैः सूर्येंदुनलशोभितैः ॥ न तृप्तिमभ्यगीच्छेसा शीपि पिविष्टस्तनूभवं ॥ २४ ॥ गौरीसुतकुचास्कंदं पायय
न्तं स्वकं स्तनं ॥ गौरीकुचपयःपूरं अपिबत्स षडाननः ॥ २५ ॥ तदा विवृद्धिमापेदे चंद्रोदय स्वांबुधिः ॥ स षो
डशो नवर्षो भूत्यौवनोल्लासितांगकः ॥ २६ ॥ वक्त्रैर्यस्य मुखानि पंचभिरहो संलालयत्या दराच्छंभावेकमुपा
त्तशोकमगजासं पर्यजिघ्रं द्वतुं ॥ संभ्रांताधिमेध मान विलसत्वंर्ष्म क्लिया तुल्ययात्पिचोर्निस्तुलमावहंस्तपर
मानंदं मुदेस्यात्तगुहः ॥ २७ ॥ वत्सत्वं फलमाहरेति गदितो मात्राग्रपूज्योग्रजः पुत्र स्तेनहरिष्यतित्वमधुना किं कुप्य-
सेनेनमे ॥ मागाः कोपवशं पितुर्मम सदा भ्यं तास्थितं लांगतौ सोमा स्कंद इतीक्ष्णो त्रिभुवने सर्वो जनः पूजयेत् ॥ २८ ॥
६ गौर्या स्कंदेन संयुक्तं गजाननं निवेवितं ॥ रत्नसिंहासनासीनं तुष्टुवुः प्रणताः सुराः ॥ २९ ॥ देवा ऊचुः ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गौर्यास्कंदगजाननैः सहितं त्वां वीक्ष्य मोदामहे ॥ देवेशं नतरक्षकं शशिकलाभास्वत्किरीटोज्वलं ॥३०॥ त्वामद्राक्ष्म पचेलिमेनतपसा
देवा निमेषेक्षणाः ॥ तारार्त्तिप्रशमाय देव भगवन्सेनापतिं नः कुरु ॥३१॥ सूत उवाच ॥ इत्युक्तं सुरसायनं सुरवचः श्रुत्वैव हृष्टांतरः दे-
व्या भद्रतरे स्वकासनवरे संस्थाप्य तं षण्मुखं ॥ रत्नप्रोद्यतकुंभसंभवजलैः संस्नाप्य तं भूषणैः आभूष्यां वरगंधपुष्पनिकरैरभ्य-
र्च्य देवैर्हरः ॥३२॥ तत्पाणिग्रहणाय ब्रह्मतनुजां वल्लीं च सेनां तथा इंद्रस्यापि तनूभवामथ भवः संभूष्य गौर्या तदा ॥क-
ल्याणं समकारयत्सुरवरैः सेनाधिनाथं तदा मैनाकेन समभ्यगाद्गिरिवरो रत्नोरुभूषांबरैः ॥ दिवं तां गिरिकन्यका-
४०। मथ मुदा पौत्रं कुमारं तदा ॥३३॥ संवीक्ष्य प्रमुमोद हर्षनिकरैः साम्रा विलाक्ष्यो मुहुर्धन्योस्म्यथ महेशपादभजनान्ना-
न्यं प्रमन्यामहे ॥ मेनापि सेनापतिमीक्ष्य दृष्ट्वा पंचाननाज्जात महो षडाननं ॥ आभूष्य पट्टांबर रत्नभूषणैः शिवं
शिवां चापि महोरुहर्षा ॥३४॥ स्कंद उवाच ॥ श्रुत्वा मदीयजननं खलु वैनजन्ये पराभवं याति समान्यतां व्रजेत् ॥ अ-
जीजनत्येव महो सुपुत्र मपुत्रको वापि सुवंध्य हारः ॥३५॥ समागमं याति जिनैर्वियोगितैः ॥ गतिं स पुण्यां लभते
जनो सौ ॥३६॥ इति श्री शिवरहस्ये द्वादशांशे ईशानाख्ये कुमारसंभवो नाम एकविंशोध्यायः ॥२१॥ श्री काशी विश्वेश्वरा-
र्पणमस्तु ॥ श्रीईशानाय नमः ॥ श्रीस्कंद उवाच ॥ ततश्च प्रार्थितो देवैः गौर्या सुक्तो महेश्वरः ॥ तारसुरादि संहारे क्रिया=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७३ यममेवहि ॥१॥ मुहूर्ते सुशुभे लग्ने ब्रह्मविष्ण्वादिभिः सुरैः ॥ सुरानीकं समासज्ज्य सुपताकं सुयोधकं ॥२॥ धृतनानाप्रहरणं
सगणं रणसन्मुखं ॥ भेरीलक्षमहारावं शंखानेककृतस्वनं ॥३॥ पटहानेकगोशृंगैर्बधिरीकृतदिङ्मुखं ॥ रथानां
कोटयस्तत्र समाजग्मुरलंकृताः ॥४॥ सुपताकाः सुवरूथाश्च ससारथि हयावृताः ॥ रथनेमिस्वनैस्तत्र तच्चक्रपरिवर्त
नैः ॥५॥ दशकोटितुरंगाणां रुक्मभांडखलीनकैः ॥ मंडितानां सयोधानां कोदंडोच्चंडनिस्वनैः ॥६॥ गजानां समहामा
त्रयुक्तानां कोटिपंचकं ॥ गजारोहरथभ्राजत्पृष्ठभागैरलंकृतैः ॥७॥ कुथांकुशाग्रदंतोरुवेष्ठनासिविराजितैः ॥ कुंभाग्रा
वृत्तरुक्मोरुकवचालंकृतैर्गजैः ॥८॥ सुपताकिभिरत्युग्रवर्षन्मेघाभनिस्वनैः ॥ त्रिंशत्रिकोटिदेवानां विविधा-
युधपाणयः ॥९॥ सप्रासासिशरोच्चंडकोदंडवरबाहुभिः ॥ गदामुसलनिस्त्रिंशकुंतहेतिधरैः सुरैः ॥१०॥ खड्ग
खेटमहापृष्ठैः कचः कवचभूषितैः ॥ बद्धगोधांगुलित्राणैरायसोष्णीषिभिः सुरैः ॥११॥ संनद्धयोधैः कोटीनां
शतमायोधनोन्मुखैः ॥ हयहेषैर्बर्घितैश्च रथनेमिस्वनैरपि ॥१२॥ नदतां भीरु भेरीणां शंखानामारवैस्सह ॥
इंद्रो रैवतमारुह्य सन्नद्धकवचायुधः ॥१३॥ वज्रहस्तो मरुद्भिश्च समायातोऽमरैर्वृतः ॥ नक्रदंष्ट्रं समारुह्य नन
क्रं सवरुणो गणैः ॥१४॥ समाययौ पाशधरैः सहस्राण्येकविंशतिः ॥ यक्षाधिपो यक्षसंघैः जुंगनरवाहनः ॥१५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खड्गहस्तैर्दुराधर्षैरयुतैरायुयौ बली ॥ निर्ऋतिर्हेतिहस्तैश्च रक्षसामयुतैर्ययौ ॥१६॥ गदासिभिंडिपालोरुहस्तै
र्यस्तोरुघोषणैः ॥ अग्निर्मेषं वक्रशृंगं घनघोषं चश्मश्रुलं ॥१७॥ सजलोद्दाममेघाभमधिरुह्य ययौ गणैः ॥ धवि
त्रदात्रेहस्तैश्च नियुतै रक्तवर्णकैः ॥१८॥ यमो यमगणैस्तत्र नीलांजनसमप्रभैः ॥ कालदंष्ट्रविकटैः ऊर्ध्वके
शैर्ज्वलन्मुखैः ॥१९॥ पाशखड्गोरुहस्तैश्च षष्टिसाहस्त्रसंख्यया ॥ महामहिषमारुह्य रक्तनेत्रं विषाणिनं ॥२०॥
ऋभवः स्वगणैर्युक्तोऽययुः सोमो गणायुतैः ॥ वायुरागाद्गणानां च नियुतैः सायुधैर्वृतः ॥२१॥ विपाटपाटनाराच
402 धारिभिर्बाहुशालिभिः ॥ कुरंगं तं समारुह्य संनद्धे संगरे मरुत् ॥२२॥ ईशानोऽपि समारुह्य शाक्वरं ककुद्मि
नं ॥ रुद्रैः परिवृतो भ्यागात्कोटिसंख्यदुरासदैः ॥२३॥ अहिर्मन्युर्भिरव्युग्रैः नदद्भिः सागरारवैः ॥ निषंगिभिः क
वचिभिः शरकार्मुकपाणिभिः ॥२४॥ वसवस्स्वगणैस्तत्र समायाता युतायुतं ॥ निषंगहेतिपरशुधारिभिर्दै
त्यहारिभिः ॥२५॥ विश्वेदेवाः समायाताः तद्देवायुतमुत्कटाः ॥ रणशौंडाः कवचिनः समासासिकरास्तदा ॥२६॥
आदित्या द्वादशास्तत्र समायाता गणैस्तदा ॥ गदामुसलबाणासिधारिभिस्तेयुतायुतं ॥२७॥ अश्विनावश्वमारु-
ह्य समायातौ गणैर्वृतौ ॥ प्रत्येकमष्टसहस्रैः शरकार्मुकपाणिभिः ॥२८॥ पितरस्सिद्धसाध्याश्च सुपर्णागरु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

डास्तदा ॥ गंधर्वयक्षरक्षांसियातुधानाः सहस्रशः ॥ २९ ॥ नानायुधघोरासिसृक्कामुसललांगलैः ॥ खड्गहेतिगदाहस्तानि अ॰ २२
७४ र्ययुः समरे तदा ॥ ३० ॥ सुधन्वनो ऽयुतं तत्र स्यंदनेषु सुधन्विनः ॥ समायाता गणेस्तत्र सप्रासासिपरश्वधैः ॥ ३१ ॥ उष्णीषि
णो मुकुटिनः सहस्तत्राणभासुराः ॥ शिरस्त्राणाः कवचिनो धन्विनः सासिपाणयः ॥ ३२ ॥ अक्षौहिणीनां पंचाशत्कोट-
यो च समागताः ॥ पताकालंकृताः सर्वे छत्रिणो वीज्यचामराः ॥ ३३ ॥ अमराणामनीकानि र्याणि समुपास्थिताः ॥ पंक्तिशः-
सास्वनाथैश्च भेरनोद्धाम भेरिकाः ॥ ३४ ॥ तदा मां स महादेवः स्वयमावध्य दंसनं ॥ निषंगं पृष्ठतो बध्य शक्तिंसा
सिंच मत्करे ॥ ३५ ॥ ददौ परश्वधं देवः पिनाकी स्वं पिनाककं ॥ रथं सहस्राश्वयुतं चित्रध्वजपरिष्कृतं ॥ ३६ ॥ हे-
मकुंभवितानाग्रं सुसारथिशतावृतं ॥ शरावरसहस्रैश्च तूणीरैः पूर्णमीश्वरः ॥ ३७ ॥ समारोप्याथ गौर्या मां स्वास्ति
वाच्य मुनीश्वरैः ॥ मंगलं प्रददौ मह्यं देवानां पश्यतां तदा ॥ ३८ ॥ महेश्वरउवाच ॥ यन्मया त्रैपुरे युद्धे क्ष्मास्यंदनयुतेन
हि ॥ वेदाश्च विधियंता च बाणमुख्येन शौरिणा ॥ ३९ ॥ चंद्रसूर्यौ रुचक्रेण यदा प्राप्तं जयमंगलं ॥ तदस्तु समरे तात तवास्तु
विजयोदयः ॥ ४० ॥ अवहारे विहारे च शस्त्रास्त्रग्रामकर्षणे ॥ स्वपरेक्षण दृष्ट्या च संयाने चाप्य पोहने ॥ ४१ ॥ भवमा-
तं द्रितो नित्यमित्य शान्मां हरस्तदा ॥ तदाहं ब्रह्मविष्णुभ्यां शक्रेण च सहामरैः ॥ प्रणम्य गौरीमीशं च परिपूज्य ग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाननं ॥ विश्राण्यजयदाना निमहर्षिषु मुनीश्वर ॥४३॥ नदतां भीरुभेरीणां शंखानामानकैः सह ॥ स्तुवतां बंदिमुख्या
नांजपतांच महर्षिभिः ॥ ४४॥ वर्षतां सुमनासारं नृत्यतामप्सरस्सु च ॥ समारुह्याद्रिशिखरप्रभं रथवरं तदा ॥
४५॥ ब्रह्मणा हंसयानेन दक्षिणे मे विराजता ॥ प्रणामांजलिपद्मानि प्रगृह्याथ सुरव्रजां ॥४७॥ प्रगृह्य बंदिश-
ब्दैश्च देवसेनापते जय ॥ अवासृजं मदंगाच्च वीरबाहुमुखान्गणान् ॥ ४८॥ धृतनानाप्रहरणान् वारणेंद्रसम
403 प्रभान् ॥ नवलक्षं शक्तिहस्तान्पृष्ठगोपान्ममैव हि ॥४९॥ रथचक्रस्वनैस्तत्र गजानां बृंहितैस्तदा ॥ हेषघो
षामुखैरश्वैः चालितास्फोट निस्वनैः ॥५०॥ प्लुवतां धावतां तत्र वातधूतपताकिनां ॥ जायसावध संघृष्ट्यद्ध्वजो
दिवमस्पृशत् ॥ ५१॥ आभाति भास्करस्तत्र संध्यास्विव विलोहितः ॥ एतस्मि न्नंतरे तत्र नारदाच्छ्रुतवांस्तदा ॥
॥५२॥ युद्धसंनद्धमायांतं देवसेनापतिं गुहं ॥ तारकः स्वबलैर्युक्तः समाभ्यागान्मुखं मम ॥ सप्तकोटितुरं
गैश्च रुक्मभांडपरिच्छदैः ॥ सोद्यतायुधनिस्त्रिंशपाशहस्तोरुयोधकैः ॥ ५४॥ दंतिनांच त्रिकोट्या तु सन
८०३
द्धांगसुदंतिनां ॥ रथानां च सदृश्वानां कोटिभिः रथिभिर्ययौ ॥ सप्राससासिकोदंड खड्गशरान्वितां ॥ विंशको
टिसुपादातैः कवचोष्णीषधारिभिः ॥ ५६॥ निषंगकार्मुककरैः भल्लहस्तभयावहैः ॥ संताड्य भेरीपटहान्=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७५ पणवानक गोमुखान् ॥ ५७॥ सहस्राश्वरथं वेगात् तारकः स्वयमास्थितः ॥ सुपताकं सावरूथं सुसाराथि वरैर्वृतं ॥ ५८॥
शूरो गजं समारुह्य अंकुशोग्रकरो ययौ ॥ पादांगुष्ठेन तत्कर्णौ तु दन्तौ वेगवत्तरं ॥ ५९॥ सिंहास्योऽश्वं समारुह्य जवि
नं हेममालिनं ॥ खलीनचालनेनैव पततं युद्धसन्मुखं ॥ सुराणां दैत्यनाथानां युद्धमुन्मत्तमुत्थितं ॥ नदतां धाव
तां तत्र कूजतां धनुषां तदा ॥ ६१॥ शराणां वर्षतां तत्र निघ्नतामितरेतरं ॥ असिभिर्भिंडिपालैश्च मुसलैर्लांगलैस्त
दा ॥ ६२॥ मुंचतां शरवर्षाणि खड्गखेटप्रहारणैः ॥ शक्रो वित्रासयामास दैत्यान् तत्र शरोत्करैः ॥ ६३॥ हेममाली म-
हामाली विद्युन्माली हलाकुलौ ॥ वसुभिः पितृभिस्तत्र युयुधुस्ते रथास्थिताः ॥ ६४॥ भुसुंडीचक्रनाराचैः
भल्लैः प्रासैः परश्वधैः ॥ अन्योन्यमभिजघ्नुस्ते ततस्तु रुक्मौ शरैः ॥ ६५॥ विश्वेदेवास्तथादित्या हेमांगेन-
सुमन्युना ॥ युयुधुः शरधाराभिः वर्षद्भिरितरेतरं ॥ ६६॥ धनुर्ज्यासुरथाश्वेभसारपीषुचदंसने ॥ सुधन्वा
नो मनस्येन पनस्येन सुरारिणा ॥ ६७॥ युयुधुर्योधमुख्यैश्च तदैवायोधनैः शरैः ॥ सिद्धाः साध्याः सर्वदेवगणा
मिश्रा भवंस्तदा ॥ ६८॥ प्रासासि खड्गकुंतैश्च गदाभिर्लगुडैरपि ॥ कोलाहलमभूद्युद्धं संनद्धगजवाजिनां ॥
६ दा ॥ गृध्राणां च पदातीनां वर्षतां निघ्नतां शरैः ॥ वायुः सुसौधनं तत्र युयुधे बाणवर्षणं ॥ ७०॥ यमः क्रूरमुखं तत्र जन्ये=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पर्जन्यनिस्वनं ॥ निर्ऋतिर्दारुणेनैवयुयोध समरेऽमरैः ॥७१॥ यक्षाधिपः शोणिताक्षंयोधयामासखड्गधृक् ॥
यूपाक्षंवरुणस्तत्रयुयुधेतौपतत्रिभिः ॥७२॥ अग्निस्तदापतंगेनयुयुधेशरपाणिना ॥ ईशानोमंदरेणैनयुयुधेस्वगणैः
सुरैः ॥७३॥ विष्णुः शूरेणयुयुधेचक्रशार्ङ्गच्युतैः शरैः ॥ सिंहास्यंचचतुर्वक्त्रोयोधयामासस्तायकैः ॥७४॥ अहंतारक
मायांतं स्वगणैः परिवारितं ॥ प्रावृट्तोयदवृष्ट्यैव किरंतं मद्रथं शरैः ॥७५॥ तमच्छिन्नंतांशरकोटिवर्षहर्षेणयुध्येत्क
टतर्षितोहं ॥ रथंतदश्वांश्चपृषत्कसंघैः निषिक्तमंभोधरवृंदवर्षवत् ॥७६॥ सदश्वयुक्तंसुपताककूबरंससारथिंतार-
401 कमेवजन्यं ॥ पर्जन्यनादप्रतिमैः सुपुंखैः सुतैलधौतैः अहमच्छिनंतदा ॥७७॥ सतारकोप्येवमयोसहस्त्रधार
यंमदीयंनिचकर्त्तसारथीन् ॥ छत्रंध्वजंमेकवचंशरोत्करैः तमप्यहंमत्करबाणलाघवैः ॥७८॥ सशूरकर्मा-
पिहरिंरणाजिरेशरोरुधाराभिचकर्त्तदेहे ॥ गारुत्मतेपक्षयुगेसुपक्षकैः पलाशपुष्पाभसमांसभंगं ॥
७९॥ चकारबाणैस्तिलशश्चकर्त्तविवृत्तदंष्ट्राभृकुटीकृताक्षः ॥ सचापिविष्णुः स्वकरोरुचक्रधाराभिविस्ता
रितदैत्यमुंडैः ॥८०॥ पद्मोरुषंडामवतीरणस्य सकुंडलांसन्मुकुटांप्रचक्रे ॥ सच शक्रनाग्न्यानलसोमसू
र्याविश्वाश्विसाध्याश्चभवाःसुधन्विनः ॥८१॥ विधन्विनोव्यश्वरथान्प्रचक्रुस्तान्दैत्यसंघान्पृतनासु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७६ बाणैः ॥ सिंहोरुवक्त्रैश्च शरोत्तमैर्विधिः चकर्त्त तांश्चापि स दैत्यवर्यः ॥ ८२ ॥ हंसस्य पक्षोरुयुगेषु पक्षैः ललाटजालेषु कुटे
षु पद्मजं ॥ गजा महामात्रयुता पतंति विनादयंतोप्यसृगुक्षिता तदा ॥ ८३ ॥ अश्वाः स्खलंतो वपदे पदे हताः रथोरुसं
घाश्च सुसारथीयुताः ॥ तत्र त्रिशूलनिहता गणदैत्यवर्याः कूजंति धावंति गृध्राभिपातनैः ॥ ८४ ॥ नदंति गर्जंत्य
सुराः सुरा तदा तिष्ठंति विछिंभित हस्तगात्राः ॥ यज्ञोपवीताकृतिचिच्छिदुः सुरान दैत्या पितत्रैव गणा तदानीं ॥ ८५ ॥
शरोरुवर्षैः प्रसमीक्ष्य हर्षितान् पानीयतप्तान् विमुक्तमूर्धजान् ॥ सपाससहस्तान नृतुः कबंधा विच्छिन्नसंघाश्च
सुरासुरक्ष्माः ॥ ८६ ॥ योरुक्तोरुवक्त्रैश्च विवृत्तजिह्वा नेत्राक्षिभिः सासृगुरक्षिता श्वैः ॥ शुंडोरुकांडारदखंडविस्तृता
भूर्भाति दैत्यासुरसंगरे स्तृता ॥ ८७ ॥ दैत्या वारणकुंभेषु सुषुपुर्युधि मूर्छिताः ॥ रात्रौ रतिपरिश्रांताः कामिनीनां
कुचेष्विव ॥ ८८ ॥ नदंति भेर्यः पटहोर्ध्वशंखाः मृदंगयुक्ता हतिहिक्कतालाः ॥ नृत्यंति तत्रैव वराप्सरोपमाः
कबंधवर्याः रणरंगसंगताः ॥ प्रसुस्रुवुस्ताश्च सृगापगा तदा कूलमूला सुरमांसपंकिला ॥ सुकच्छपच्छ
त्रसुचामरोरुमीना सुमास्तिष्क वहो रुफेना ॥ ९० ॥ रथेभदिव्याश्वसुदैत्यदेहद्वीपा सुराणां गणमुंडपद्मा ॥
असृग्महासा ततटिनीव भौ तदा गंगा यथा शंकरजूटनिस्सृता ॥ ९१ ॥ स तारको मच्छर घातपीडितः पपात भूमौ =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरथोहताश्वः॥तदा मया पाश पतास्त्र धर्षितो वर्षं ति देवाः कुसुमोत्करं मयि॥१२॥ सशूर मार्जौ सहरिर्वि जित्य निहत्य दै
त्यान्यरिद धुरआन्॥ सुराः प्रहर्षा स्थि(?)ततर्ष वर्षैः तदा मुदा सं स्तवनैर्वचोभिः १३॥ विधिस्तदा सिंहमुखं निहत्य
विहत्य चाजौ शरजाल वर्षणैः॥ रणा वनौ मां परिषस्वजे मुदा कुमार सेनापतिरद्य नस्त्वं॥१४॥ अवोच दित्थं सहरिः
सशक्रः सुरास्तदा भूसुर वर्य संघाः॥ मुदा जयस्वेति वचस्त ऊचुः शांता ह्यासन् मुदिताश्च लोकाः॥१५॥ श्रीस्कंद
उवाच॥ नाचित्रमेतच्च त्रिनेत्र मित्र पादांबुजस्यातुल भक्ति वैभवात्॥ जन्येषु धन्यं किल जैत्र भावं सामा
405 न्यमन्यं नहि रोचते मे॥१६॥ इति श्री शिव रहस्ये इशानाख्ये द्वादशांशे तारकासुरसंहारनाम द्वाविंशो ध्यायः॥
२२॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ श्री ईशानाय नमः॥ सूत उवाच॥ सुराः शक्रादयस्तत्र ब्रह्म विष्णवादिभिः
सह॥ ऋषिभिः साध्य गंधर्वैः अप्सरोभिस्तदा मुदा॥१॥ तारके नाश मायाते सगणे तत्र संगताः॥ प्रहृष्टास्तुष्टुवुस्तत्र
त्रिविष्टप निवासिनः॥२॥ प्रणम्य स्कंदमव्यग्राः शक्तिहस्तं तदादरात्॥ नंदनोत्थ सुमैर्दिव्यैश्चंदनैर्वर गंधिभिः॥
३॥ रत्नाभरणजालैश्च केयूर मकुटांगदैः॥ सुवर्ण मुक्ताजालैश्च विकिरंति सुरासुराः॥४॥ पद्मार्घ्यैः समभ्य
र्च्य मुदा देवाः सर्वाः सर्वाः प्रणम्य नाम भिः स्कंदं संपूज्य सुरसत्तमाः॥५॥ देवा ऊचुः॥ सुब्रह्मण्याय महते ब्रह्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७७ ण्यपतये नमः ॥ उमासुताय दिव्याय अग्निवर्णाय ते नमः ॥ कार्त्तिकेयाय वन्याय ताराकांतकराय ते ॥ वल्लीसेनासमेता-
य सर्वदेवस्तुताय च ॥ ७ ॥ कुमाराय हरायाथ वीरबाहुनताय च ॥ अंबिकातनयायैव प्रसन्नास्याय ते नमः ॥ षाण्मु-
डाननाय ते धाम्ने वेदसीम्ने नमो नमः ॥ शिवप्रियाय शांताय गुहाय मदनाय च ॥ ९ ॥ प्रणवार्थीयसाराय जग-
तां पालकाय च ॥ सेनान्ये नमस्तुभ्यं शक्तिहस्ताय ते हरे ॥ १० ॥ गोप्त्रे धात्रे विधात्रे च स्वर्गस्थितिलयैकहेत-
वे ॥ हिरण्यकवचायाथ शरकार्मुकधारिणे ॥ ११ ॥ महापशुपतास्त्राग्निदग्धदैत्याय ते नमः ॥ गंगागर्भाय म-
हते कृत्तिकासूनवे नमः ॥ १२ ॥ उमागर्भाय कांताय ताराय तरणाय च ॥ कनकांगदकेयूरमकुटालंकृताय च ॥
१३ ॥ षोडशस्वरवक्त्राय पात्रायाक्षररूपिणे ॥ विनायकानुजायाथ सुरसैन्यान्विते नमः ॥ कंदर्पकोटिला-
वण्यदेहाय परमात्मने ॥ पाक्षिपक्षधरायाथ हेमवर्णाय ते नमः ॥ १५ ॥ गंधर्वगणगीताय त्र्यंबराय स्तुताय च ॥
विशालवक्षसे पात्रे सर्ववेदस्तुताय च ॥ १६ ॥ मखखंडिताय नित्याय सत्यायप्रियताय च ॥ षष्ठीप्रियाय बाल्या-
य रभसाय गणाय च ॥ १७ ॥ नतप्रियाय मान्याय सर्वयज्ञस्तुताय च ॥ ओजसे तेजसे चैव वरेण्याय गदाभृते ॥
॥ गिरिवासाय तुष्टाय पुष्टाय बलशालिने ॥ केकिवाहाय दांताय नमः कुक्कुटकेतवे ॥ १९ ॥ शरकांडभवायाथ महते=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णीयसे नमः ॥ सनातनाय व्योमाय शिवज्ञानप्रदायिने ॥ २० ॥ शतपुष्करमालाय शक्रपालाय ते नमः ॥ त्वयै-
व पालिता लोकास्त्वया सृष्टाश्चराचराः ॥ २१ ॥ तारकार्तिविनाशैव देवाश्च मे ~~मानेनयांतं ॥ कयस्सा आमा~~
~~ई नेस्तुतं भजं त्वमो मारसुतं भजामो स्तानिद्रं ॥~~ सुपालिताः ॥ त्वं यज्ञस्त्वं स्वधा स्वाहा त्वया वर्णाश्रमाः खिलाः ॥ २२ ॥
पालिता मुनयो यज्ञैः यज्ञं त्वद्य सुखेन हि ॥ ग्रहा नित्य प्रमोदंति ऋक्षैः ऋषिगणैश्च खे ॥ शक्रस्त्रिविष्टपपतिः अद्या भूत्
406 त्वत्कृपावशात् ॥ अग्निर्वहति हव्यानि कव्यानि पितृणां मुदे ॥ २४ ॥ लोका निर्गलं सौख्यं भजंति तव विक्रमैः ॥ त्रिवि
क्रमोयं वैकुंठं पाति सर्वं चराचरं ॥ २५ ॥ ब्रह्मा पितनयैर्देव सृष्टिं वितनुते खिलां ॥ समुद्राश्च तथा नद्यो नोद्वेलं स्यंदतां
शुभाः ॥ २६ ॥ वायुः सौम्येन वपुषा वाति नित्यं सुखेन हि सोमो ऋक्षैः भ्राजते खे तवाद्य विजयोदये ॥ २७ ॥ अर्कोयं भाति
किरणैः तव विक्रमतोषितः ॥ यथा पूर्वं स्थिता लोकास्त्वयात्र निहते षुते ॥ २८ ॥ सगणे सुरता हृष्टा जातहर्षा भवावने ॥
सेनापतिस्त्वं देवानां भुजंगेनाय तुष्टुवुः ॥ २९ ॥ देवा ऊचुः ॥ मुखे वारणेंद्रं नखे चार्धचंद्रं मुखे पूर्णचंद्रं दयासारसांद्रं ॥ कृ
तस्तुत्सुपेंद्रं पदाब्जानतेंद्रं भजामो स्तुतं द्रं महावक्रतुंडं ॥ ३० ॥ कथंकारमंतः करोम्यं गतं गंस भृंगारमोंकारपाथोजभृंगं ॥
शिवोत्संगसंगं शिवस्यांतरंगं किरातांगणोल्लासिवल्ली भुजंगं ॥ करे शक्तिमंतं शैलजन्मवंतं हरे तानवंतं उदारं वदंतं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७८ सदारं वसंतं सदोंकारमंतर्भजामो गुहं तं ॥ ३२॥ शरच्चंद्रषड्क स्फुरद्वक्त्रबिंबं प्रबालं प्रबालप्रभामंडलस्थं । रुचाधूतमित्रं अ॰२३
कृपाशीतनेत्रं भजामः सदा देवसेनाकलत्रं ॥ ३३॥ प्रफुल्लाब्जबिंबैर्वल्लीकुदुंबैरबालांबिकांबैरवेद्यैः शडिंभैः ॥ उमांगा
भवां गौरशैवांतरं गौरलंदेव संघैरलंदेवसंघैः ॥ ३४॥ विधे स्वागतं किं हरे मंगलं किं सखे दानुषंगं कुतो दृश्यते तं ॥ क्वचे
रिं समानीय तां मे शतांगं क्रुधेवं वदंतं भजामो गुहं तं ॥ ३५॥ क्व शूरः क्व वा तारकः सिंहवक्त्रो क्व वै पट्टहासप्रभिन्नां
ड भित्तिं ॥ हठान्नील कंठेंद्रकंठाधिरूढं भजामो मुदा रक्षितारं कुमारं ॥ ३६॥ भवद्दूर्भदासार्भकान्दीनबंधोतवप्रेम
युक्तान् हिनः क्षिप्र मंहः ॥ नचेत्ते प्रकीर्त्तिः अतः स्वामिनं त्वां भजामोद्य भक्ताः भजामोद्य भक्ताः ॥ ३७॥ द्विषट्बाहुदंडं
द्विषट्चारुगंडं द्विषट्कर्णषंडं त्रिषण्णेत्रतुंडं ॥ हृते क्रौंचगोत्रं धृतब्रह्मसूत्रं भवप्रीतिपात्रं भजामः सुगात्रं ॥ ३८॥
प्रसीद प्रसीद प्रभो तारकारे प्रसीद प्रसीद भवामो निरीहाः ॥ प्रपन्ना विपन्नाः पुरा ताः शखिन्नाः भवामोद्य भिन्नाः त्वया दुःखनु
न्नाः ॥ ३९॥ किमर्थं सुरार्थं कृता नानुकंपा निलिंपा पुरा तारदुःखाभिकंपाः ॥ भवत्पादमोदप्रभावादिसौधेवसामो
विश्रामः प्रमादोरुसिंधुं ॥ ४०॥ उरोन्यस्तहारं शिरोन्यस्तहीरं दयासिंधुपूरं शिवज्ञानसारं ॥ पुराभूततारं भवां
12 भोधिपारं सुराज्ञातिसौरं भजामः कुमारं ॥ गुरूणां गुरुं देवसेनासमेतं परेषां परं के कियाने नयांतं ॥ कटाक्षाभु=

नतेक्षुद्रभद्रं

मार्द्रं समोंकारमुद्रं भजामोऽस्तनिद्रं ॥४२॥ शतांगं विहंगं कृताराति भंगं सुधीचित्तरंगं महापापभंगं ॥ कुजप्रेमभाजं भु
जे सर्पराजं सभाजाधिपं त्वा भजामो नताजं ॥४३॥ नमस्ते नमस्ते शिवप्रेममूर्त्ते नमस्ते नमस्ते त्रयीगीतकीर्त्ते ॥ नम-
स्ते नमस्ते हृतत्रे दशार्त्ते नमस्ते नमस्ते सुराभीष्टमूर्त्ते ॥ सुराणां पुरस्ताद् यदि त्वत्पदाब्जं समस्तापदस्ता निरस्ता
भवेयुः ॥ करस्था विमुक्तिर्हृदिस्था सुभक्तिः शिरस्था दृशा क्तिः भवेत्सत्यमेतत् ॥४५॥ क्वचिद् भूतसंगं क्वचित्-
407 प्रेतसंगं क्वचिद्व्याधिसंगं क्वचिद्यातुसंगं ॥ क्वचित्क्षुद्रपुंस्त्वानुपुंखप्रसंगं समुच्चाटयंतं भजामो गुहं तं ॥
४६॥ भवानेव पाता भवानेव नेता भवानेव दाता भवान्दुःखहर्त्ता ॥ इति त्वत्कटाक्षप्रतीक्षा वसामः सहस्राक्षपद्मा-
क्ष युक्तो त्वदीक्षाः ॥ ४७॥ नमन्यामहे त्वत्पदाब्जात्सुधन्यं भजामस्त्वदन्यं न चान्यं वदान्यं ॥ त्वया पालनीया भव-
न्मोचनीयाः समस्तं सुराणां तवास्ते वहस्ते ॥ ४८॥ त्वमेवास्य कर्त्ता त्वमेवास्य धर्त्ता त्वमेवास्य भर्त्ता त्वदन्यं
न यामः ॥ भवांभोधिमग्ना दयांभोनिधे नः समुद्धर्तुमर्हस्यतो प्यर्हणीयः ॥४९॥ बलारे किरीटे स्वबलत्र स्त-
शंभुः हरिश्छात्र वैधात्र कोटीरमत्र ॥ इति प्रौढवंद्युक्तमार्तुर्निवेशं विशंतं गुहं त्वां भजामोनुयामः ॥५०॥ भव
त्पादतोन्यं न हि प्रार्थयामो भवद्भक्तितोन्यत्क्वचिन्नार्थयामः ॥ त्वया रक्षणीया यथवाशिक्षणीया पालयोपेक्षणी=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

७९ यान त्रवै मोक्षणीयाः ॥ ५१ ॥ पिता त्वं गुरुस्त्वं च माते ति नित्यं क्षुधार्ता भवार्त्तिं प्रपन्ना स्म हीना तिदीनाः ॥ कटाक्षावलोकेष्युपेक्षा
यदि स्याद्गतिः का सुराणां विभो भूसुराणां ॥ ५२ ॥ भवत्पादपंकेरुहध्यान भक्तिं प्रयच्छ प्रयच्छ नतुच्छा वयं ते ॥
प्रसूतेव मातेव सेवाद्यकामान् सुराणां वराणां भवे भूसुराणां ॥ ५३ ॥ भुजंगं पठन् षण्मुखस्याद्य युक्तः सुयुक्तः स-
मुक्तः सवै भक्तियुक्तः ॥ सुपुत्रैः कलत्रैश्च मित्रैश्च युक्तो लभेत श्रियं चायुरारोग्य भाग्यैर्वरश्च ॥ ५४ ॥ वयं दीनदी
नाः भवान्दानशूरः महानेष कालः स्त्वयं दान देशः ॥ भवे भक्तिमेकां भवां भोधिनौकां दिश स्त्वं दिश स्त्वं त्वदन्यं न-
यामः ॥ ५५ ॥ भुजंगस्य देवः शतावर्त्तनेन प्रसन्नो भवाद्यैं वदुःखेन खिन्नान् ॥ नतान्खिन्नवक्त्रान्कुरुष्वार्त्तिनु
न्नान् सुरान्पापभिन्नान्कुरुष्व त्वमेव ॥ सूत उवाच ॥ इत्थं सुरेंद्रस्तुतिमाकलय्य प्रयौ रथेनाशु गणैः सुरौघैः ॥
प्रणम्य तु मीशान पदांबुजं मुदा गुहस्तदा तारकनाशतोषितः ॥ ५७ ॥ गजाननेनाशु समागतस्तदा षडाननो यप्रय
यौ सुरायनं ॥ उमाननं वीक्ष्य मुदा रसायनं जहर्ष हर्षेण स दैत्यनाशनः ॥ वसंतं हृदंतः शिवं लोकयंतं हसंतं प्रप-
श्यंति देवाः प्रशांताः ॥ उमाकांतमेकं नितांतं भजंतं कृतांतांतकं वेद वेदांत भांतं ॥ ५९ ॥ हराजानिलाग्नींदुह-
र्यर्क शम्का विराजंति भासा समस्तानि रस्ता ॥ नमस्ते च मस्ते न हस्तैश्च शांति प्रभोर अपादं विशुद्धानमंति ॥ ६० ॥
13

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाते सुरास्तेप्रणम्यामरेशं समाचख्युरेतस्य तारस्य युद्धं ॥ भवत्पाद भक्त्या कुमारेण शक्त्या हतस्तारकोयं समस्तो निरस्तः ॥६१॥ ऐश्वर्य्यस्य पदं महोक्षवरगे वीक्ष्यास्मितार्क्षं मुदा भस्मी भूतगरं भगाक्षि हरणं दक्षाद्दिदीक्षापहं ॥
वीक्षाशिक्षितमन्मथांधकपुरं स्कंदो मुदा तं हरं ॥ प्राणंसीद्भवतंसितेंदु मनलालंकार फालाक्षकं ॥६२॥ दक्षध्वंक्षमखैक्यदक्ष सुरता संधुक्षिता धोक्षजौ देवान्नागणपान्मुनीश्वरवरान् आराद्देशन्मुदा ॥ विघ्नेशं नततारकारिमसकृत्पादे
पतंतं हरो बाहुभ्यामथ गाढवत्तरहृदा तौ चालिलिंगे मुतौ ॥६३॥ ईश्वर उवाच ॥ गिरिजेवर तारकासुरप्रतप्ताः सुर
१०० जाताः किलपारिजातपुष्पैः ॥ परिपूज्य चिरं विरज्य भोगैः विरजास्ते प्रभ भुर्मुदा शिवे मां ॥६४॥ कमलैरमलैर्महेश लिंगं परिपूज्यातुलभक्तिभावस्तुतेः ॥ अनिलानलशक्रलोकवासो न तुला वास्य समं ददाति पुण्यं ॥६५॥
हरिरपांन सदा सुरास्तदानीं मुमुदुस्तेइ र भक्ति शक्तियुक्ताः ॥ भवभक्तामुनयोपि दृष्ट्वा तुष्टादुरदृष्यानि विनाश्य मोदमापुः ॥६६॥ सुरा ऊचुः ॥ तव शिव सद याव लोक भाग्यैः प्रथितास्ते सुरसत्तवः तनुत्रैः ॥ हरशक्तिधरेण बाणवर्षैः
प्रमथैदैरुरगेंद्र मन्युभिस्तैः ॥६७॥ सूत उवाच ॥ सस्मार स्मारहं तूर्णं नंदन वरो वीरः कुमारो मरारामो द्भूतसुनंदनीतम सुमैः अभ्यर्च्य यच्छंकरं ॥ नाम्नामष्टसहस्रतोष्टतनुवं रुद्राय पद्मै स्तुवन् देवीं वेदपरस्तवेन तज्जय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८० पदैर्हृष्टो मुदातं शिवं॥ ८८॥ इतिश्रीशिवरहस्येईशानाख्येद्वादशांशे स्कंदभुजंगनामकथने शिवसमागमो ना-
मत्रयोविंशोध्यायः॥२३॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीईशानायनमः॥ श्रीस्कंदउवाच॥ ओंकारःकुं-
ठनिलयोओंकारार्थप्रकाशकृत॥ ओंकारजपसुप्रीतो ओंकारस्वरमात्रकः॥१॥ओंकारार्थो ओमित्यर्थो
नानामंत्रस्वरूपवान्॥ नादरूपोनादिनाथो नामरूपगुणातिगः॥ २॥ नागाजिनोत्तरासंगो नामप्रीतोन
ताखिलः॥ मायातीतोमाधवीयोमार्गमाणो महेश्वरः॥ मांसादनोमातृमेयोमानमेयादिवर्जितः॥ शिवःशिव
तरोशीतोशीतांशुकृतभूषणः॥ ४॥ शिवेतरहरः शीभ्योशिशिरर्तुप्रवर्त्तकः॥ वामदेवोवासिवातो
वायुमोदीवसाननः॥ ५॥ वातचक्रप्रदोवाग्मीवाय्वाहारांगदोवसुः॥ यामिनीशकलामौलिः यातयातप्रियो
यमी॥ ६॥ यमप्रमथनोयछायजमानोयतीश्वरः॥ सिंधूनिषंगः सिंहेंद्रोसिनीवालीस्तुतिप्रियः॥७॥
सिंधुःसिंहासनासीनोसिंधुरांगलगोवरः॥धनाधीशोधसांनाथो धर्मीधर्मविचारकः॥८॥ धौम्योधाता
धराधीशोधूर्जटिर्धूमकेतनः॥ नमिताशेषदेवादिर्नरनारायणार्चितः॥ नतिप्रीतोनमस्कार्यो नगधृक्न
18 गवासभूः॥ मयस्करोमंत्ररूपोमस्करीमस्तकांबुधृक्॥१०॥ मन्मथांतकरोमन्युःम[मनस्वी]ननातिगः॥कपा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लपाणिः कालात्मा किष्कुः कीर्त्तिप्रदायकः ॥ कुसुमार्चनसुप्रीतः कूजनः केकयेश्वरः ॥ कैलासमौलिनिलयो को
पात्मा कौलमार्गवित् ॥ १२ ॥ कंजाक्षपूज्यः कस्तूरीगंधवासैकमेदुरः ॥ खंडपर्शुः खाडवाशो खिल्योखीरप्रिय खसः ॥
१३ ॥ खूडंपः खेटधृक् खैरः खोतंकृत्खो धुमीश्वरः ॥ खंडिताराति निलयो खर्जूरवनमध्यगः ॥ १४ ॥ गयासुरहरो गार्ग्यो
गिरीशो गतिवर्धनः ॥ गुरुर्गजास्यो गेयो गौरीभर्त्ता च गौरिकः ॥ १५ ॥ गोवर्धनो गंधवहो गंता गर्वप्रणाशकृत् ॥
घस्मरो घासदो घीशो घिसको रघुपूजितः ॥ १६ ॥ घूसकः घोरको घैरो घो टावाहो घघोरकृत ॥ घंटाध्वनिप्रियो-
409 घस्रो घनगर्वो घनाघनः ॥ १७ ॥ चंद्रचूडश्चारुरूपो चित्रकर्मा चितिप्रियः ॥ चीनाजिनी चंचुचूडो चैत्रा च्चौत्राण-
संस्थितः ॥ १८ ॥ चेता चेतोथ चंडांशुः चमसी द्वंद्ववासकृत ॥ छत्रधृक् छादसः छीनः छुनोऽच्छीनकृच्छिखी ॥ १९ ॥ छे
त्ता छैत्रकरो च्छौरो छंदप्रीतो छंदप्रियः ॥ जयदो जागतो जिष्णुः जीविता दो जुषस्वकः ॥ २० ॥ जूतिकृज्जेत्र संजेता
जोगुवान् जोरथो जटी ॥ जंजपूको जयपरः जंगमाजंगमात्मकः ॥ २१ ॥ जंझावाद्यरतो जिझो झझिं झांझ झारव
प्रियः ॥ झंकारकृत् झांकारी झोझं झोऽज झौं धनाग्रनः ॥ २२ ॥ यमो यामिप्रियो यंता यतो यानो यमी यजुः ॥ यशस्करो
यत्रपरो यतमानो यशोधनः ॥ २३ ॥ टंकाप्रियः टंकणकोटकारो टणकः टहः ॥ कां द्यो कर प्रियः कटयो कर टिलंवसो =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८१ जटी ॥२४॥ नीलकंठाकुसुरास्त्रः कठोरो कुंठिताघकृत् ॥ वैकुंठपूज्यपीठस्थो पाठपैठीन सप्रियः ॥२५॥ डंभिको डमरू-
प्रीतो डामरीतंत्रपूरकः ॥ डाडिमीफलसुप्रीतो डंभो डंभप्रियो ऽहुः ॥२६॥ ढंक्कानादो मूढहीनो ढंढा तेजो वि-
वर्जनः ॥ ढंढो गूढो महाबाढो गूढपाद्दुरभूषणः ॥२७॥ णकारवाच्यः तृणकृत् पाणिपादो दरः फणी ॥ वीडापा-
णिः शूलपाणिः कणपादः कणंभक्षणः ॥२८॥ तस्करस्ताथ्वस्त तिर्यक् तीर्थो तुर्यारवप्रियः ॥ तेजस्वी तेजसीयांतां तोषणा
तौल्बलार्चितः ॥ तंतुस्तमालनीलांगी तारकस्ताम्रपाणयः ॥ थकारो मन्मथारातिः प्रमथेशकृपावृतः ॥३०॥ कंभागोथकथामी
तो कोथुमीगीतसुप्रियः ॥ दमनो दंतनिलयो दीने शो दीनपालनः ॥३१॥ दुर्दीतो दूतहरणो देशकालोपदेववित् ॥ दोषघ्नो दोगीति
घ्नोथदंडपाणिर्दयापरः ॥३२॥ धनदेशो धान्यदो दारः धुंधुमूकी धुरंधरः ॥ धेनुप्रियो धर्यधनो धर्मा धर्मविशारदः ॥३३॥ नम्यो नादि
र्नीतिरतो नुहूतो नेत्रबालकः ॥ नतार्त्तिशमनो नेतानंतो नामविवर्जितः ॥३४॥ पद्मनेत्रप्रपूज्यांघ्रि पार्वतीशः प्रसादकृत् ॥ पी
यूषपः पीतवासाः पीनांगः पानपीरविः ॥३५॥ पोषणः पैतृकोपोषीपन्नगाभरणः परः ॥ फणीश्वरधरः फालनयनः फल्गुके
श्वरः ॥३६॥ फूत्कारकृद्युतिशिरः फणीतोफणिताकृतिः ॥ बर्बरो बावबो बिंदुः बिल्मिनिः बुधबनः ॥३७॥ जंबुप्री-
तो बरगती बंदवासनसंस्थितः ॥ बोधरो बोध्धहृद्धंधो बलप्रमथनो बली ॥३८॥ भयहृद्भानुदृक् भिल्लो भीतिदो भू-

१५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिभूषणः॥ भैरीनाद्यप्रियोदेवो भैरवो भोग भाक् भवः॥ ३९॥ भौज्य पूज्यो भंड खंडो भीमो भोग विवर्जितः॥मनोन्मनो
माणवकः मितिकृन्मीनलोचनः॥ ४०॥ मुनिप्रियो मूकपालो मेनकाजनकोमनुः॥ मैनाकवरदो मोचाफलप्रीतोम
रुत्वकः॥४१॥ मौनीपूज्यो मंथरकः मस्करीमय शिल्पदः॥यशोधन्योयायजूको यज्ञकृत यज्ञ नाशनः॥४२॥यांत्रि
कोयंत्रमध्यस्थो यशोदातनयार्चितः॥ रमणो रावणप्रीतोरीतिदोरुग्विनाशकृत् ।। रितस्वीरैभ्यवरदो रोद्नोरौ
तिनाशनः॥रंधनोरसपोरामोरतिदोरगणास्थितः ॥४३॥ललाटनयनोलीनः लिंगस्थोलुतिपूजितः॥लुला
410 पवाहहरणो लेशोलब्धोलौल्यविवर्जितः॥४५॥ वसुदोवामदेवश्च विश्वनाथो विशालदृक्॥वीतिहोत्रमहा
वेशोवेनोवैश्वानरोवटुः॥ वौषट्कृद्धामेश्योवामनो गविधारकः॥ षडःषाज्यःषडाधारो पाषंडःप्राणखंडकः॥४७॥
उच्चैर्घोषोघोरवेषो भीषणो बहुभाषणः॥शंगः शांतः शिवः शीतः शुनको शूनकृच्छटः॥४८॥ शेषीविशेषणो
शास्ताशतात्माशौनकार्चितः ॥सनातनश्च सावित्रः सिंधुः सीधुः सुनीथकः॥४९॥ सूतःसेतुःसौ तिकरो सैकतोस-
न्नतिःसमः॥ क्षपापतिकलाधारीक्षत्रकर्माक्षितीरथः॥५०॥ क्षुद्रकर्मविनाशात्माक्षुत्तृष्णादिविवर्जितः॥
हाहाहूहुमुखास्तुत्योहानिवृद्धिविवर्जितः॥५१॥ हस्तिकृत्तिप्रियो हर्त्ता हारिकेशो हरो हनुः॥ हप्यांगावीनहृद्यो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हरिदश्वोत्तरास्थितः ॥ ५२॥ हंसकाख्य महानाग हंसकाराजिपद्द्वयः ॥ भुजंगभोगभूताद्यो भूतिभूषितविग्रहः ॥ ५३॥ न्यं
८२ कुहस्तः शेबरां कः ज्योतंसोमहेश्वरः ॥ अर्णवांतस्थितोयोगी भोगीराजविवर्जितः ॥ कपालधृक् कालकालः कला
तीतोक्षरः परः ॥ पर्णशय्यो महावैद्यः आढ्यो भैद्यो विशारदः ॥ ५५॥ हिरण्यदंसनोहार्यो मुंजिकेशोहरद्युतिः ॥ हव्यवा
वाहाबको नित्यो स्तुत्योवालाप्रवर्त्तकः ॥ ५६॥ गया स्तुतो गुणी गोप्ता निर्गुणास्त्रिगुणातिगः ॥ विष्णुशोणितपः शो
णाशीणाक्षः शोणतीरगः ॥ ५७॥ शतावर्तः शाश्वतात्मा शमनांतकरः शटः ॥ उगणो भगणाधीशो प्रभः सुमुखई
श्वरः ॥ ५८॥ सद्योजातोवामदेवोईशानोघोरपूरुषः ॥ पंचब्रह्ममयः पंचमुखः पंचार्णमध्यगः ॥ पंचाक्षरीमध्यातः
पंचकोशविवर्जितः ॥ पादपः पवनः पाशः पशुपाशविवर्जितः ॥ ६०॥ पथ्यो पंकजपूज्यांघ्रि प्रघसः पंकजेक्षणः ॥
विश्वो विश्वाधिकोनेता विश्वाक्षो विश्वतोमुखः ॥ ६१॥ विष्णुपूज्यो विशांश्रेष्ठो विनायकवरप्रदः ॥ गंगाधरोंवि
काभर्त्ता हर्त्ता कर्त्ता जनेश्वरः ॥ ६२॥ मेघवाहः प्रसन्नात्मा कंकालकवषोमधुः ॥ वीतिहोत्र महानेत्रसत्रपात्रोदिगंव-
रः ॥ ६३॥ महाश्मशान निलयो ईशानो घाराशनः ॥ महाग्रासो महाभीमः विधुत्यः शुक्ल ईश्वरः ॥ ६४॥ कंदर्पदर्प
१६ हादर्प कपर्दी नीललोहितः ॥ पिनाकपाणिः कालात्मा गोपतिर्वृषवाहनः ॥ ६५॥ सुरमंदारमालाढ्यः कंधरो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽनंत विक्रमः॥ क्षयद्वीरो मारहरः हरः शीतांशुशेखरः॥६६॥ शतांगवरदो होता यजमानो यज्ञस्करः॥ मयस्करः

शंकरश्च शिपिविष्टः प्रतिष्ठितः॥ प्रजापतिः पशुपतिः यतीनां पतिरग्निभूः॥ सामगानप्रियः शुद्धः शाश्व

तात्मा स्थिरप्रभुः॥६८॥ विभुर्विभासकोऽनंतो रुद्रो उग्रो महेश्वरः॥ जागर्त्त को जांगले शो जंगमाजंगमात्मकः॥६९॥

जातुकर्णप्रियो जेष्ठः कनिष्ठः श्रेष्ठ उत्तमः॥ प्रतिष्ठा परमं धाम परमात्मा कृतं मूर्त्त॥७०॥ यंत्रात्मा मंत्ररूपात्मा

तंत्ररूपं सदाशिवः॥ निगमागमसंवेद्यः सुराध्यक्षः प्रपितामहः॥७१॥ सुरासुरगणाध्यक्षः त्र्यक्षो दक्षमखांतकः॥

१॥ महोक्षवरदो भैक्षो भगाक्षहरणोक्षतः॥७२॥ अनल्पकल्प शिपुरादिः सशीलः कौलपूजितः॥ स्तव्यो नव्यो भव्य

रूपः हव्यकव्यभुगव्ययः॥७३॥ महाबलो महोत्साहो महादेवो महांगधृक॥ शतावर्त्तः शांतमनाः सहमानः स्तुति-

प्रियः॥७४॥ सनातनो वामदेवो मनस्वी मानवर्जितः॥ गतिर्दान तपो वाग्मीऽउच्चैर्घोषो महाहनुः॥७५॥ त्रिपुंड्र

फालो भस्मांगो पुंडरीकलगंधरः॥ गायत्रीमध्यनिलयो मित्ररूपो जगत्प्रभुः॥७६॥ प्रसेनजित्कक्षवासो नर

सिंहनिपातनः॥ कालदंष्ट्रधरो भूतो भूतनाथो रतिस्तुतः॥७७॥ कूर्मास्रेडितपादाब्जः मृडवाससिंजरोमृडः॥

गूढपार्ष्द्रहाराढो आद्यो मौढ्यविनाशकः॥७८॥ दंडी कुंडी तंडुपूज्यो मुंडी पाषंडवर्जितः॥ अलिंगो लिंगनिलयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्फुलिंगसदृशोक्षणः ॥ ७९ । विल्वपूज्यो विल्मिनिश्च विलेशयफणाधरः ॥ बाणलिंगार्चनप्रीतो वडवानलसंभवः ॥ ८० ॥ ब-
८३ बलारातिभुजस्तंभो भुवंतिर्विप्र पूजितः ॥ अंधकांतकरो भर्गो गोवृषांको उमाधवः ॥ ८१ ॥ धनंजयास्त्रः कंजाक्षः पूज्यपादयुग
द्वयः ॥ वीतरागः संदुसुकोवं कुशं कुशिराहयः ॥ ८२ ॥ हयग्रीवार्चितो वासीवसामांसादनप्रियः ॥ त्रिमधुस्त्रिसुपर्णात्माप
र्णशय्योमरेश्वरः ॥ ८३ ॥ रथंतररवप्रीतो वामदेव्यादिसामगः ॥ राजराजकलामौलिः वैराजध्वनितोषितः ॥ ८४ ॥
शतरुद्रांतरगतः नमः शेषी विशेषवित् ॥ अंजनास्त्रः स्वंजनात्मा रंजनो जिनभूत्स्वगः ॥ ८५ ॥ वायुरायुप्रदो मध्यो
गव्हरेष्ठो वरावसः ॥ शर्वः सर्वगतस्थाणुः स्थविष्ठोणुप्रसन्नवाक् ॥ ८६ ॥ शब्दस्पर्शरसोरूपो गंधः संधिविभाव
सुः ॥ सर्वेंद्रियगुणातीतो सर्वेंद्रियविवर्जितः ॥ ८७ ॥ सर्वेषां प्रभुरीशानो सर्वेषां शरणं सुहृत् ॥ सीमा भूमा महानात्मा
प्रविष्ठा पुरुषः परः ॥ ८८ ॥ पुच्छब्रह्म ऋतं सत्यं हरो वै कृष्णपिंगलः ॥ उर्ध्वरेता विरूपाक्षो क्षितीशः कांतिवर्धनः ॥ ८९ ॥
सविशेषो निर्विशेषः शेषाहिकटको ज्वलः ॥ रसआनंदआतार्यः शष्प्यः फे (न्यः) सिकृत्यकः ॥ ९० ॥ प्रवाह्यो गेह्यवा-
ह्यश्च प्रसाधः प्रमथाधिपः ॥ ज्ञानदो धनदो धीरः दुंदुभ्यो भीतिनाशकृत् ॥ ९१ ॥ मयस्करो मस्करी भ्यो तस्करो
भास्करैक्षणः ॥ यशस्करो कुलुंचेशो भिषजामधिपो युवा ॥ ९२ ॥ वर्णी वन्यो गृहस्थश्च सन्यासी न्यासमध्यगः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भीमः सोमः प्रशांतात्मा धाम धूम सवर्ण भृत् ॥९३॥ कामदः काममथनः कृपनः कनकांबरः ॥ समो निःसीममहिमा-
वनेशः क्षेत्रनायकः ॥९४॥ कैलासशैलनिलयो विलयो लयवर्जितः ॥ रक्षाकरो राक्षसघ्नो लास्यप्रीतो रतिप्रदः ॥
॥९५॥ प्रदोषतांडवपरः सर्वदोषहरो हरः ॥ आखंडलमुखस्तुल्यो मेरुकोदंड धृग्वरः ॥९६॥ वेदघोटः पाटिताशोअ
हिज्यो ब्रह्मसारथिः ॥ सूर्यचंद्रमहाचक्रो हरिवाणो वरावृतः ॥९७॥ क्ष्मारथः त्रिपुराराति: कण्वपूज्यो विसारकः ॥
शूली हली लांगली च मुसली कुशली बली ॥ गदी शंखी वशी चक्री कवची चांधसांपतिः ॥ निषंगसागरः शंभुः
412 शांतः संगविवर्जितः ॥९९॥ धीरो ह्यात्त उदात्तश्च स्वरितप्रचयः स्वरः ॥ प्रणवः प्राणदः शोणः कणादः फणितः
घृणी ॥१००॥ मौनी मानी जिताराति: रीतिर्धातुमयो महान् ॥ अणोरणीयान्सुभगः महतोपि महत्तरः ॥१॥ स्व
राट् सम्राट् विराट् धाता विधाता सर्वतोमुखः ॥ मेधाधिपो गाधिपूज्यो आधिव्याधिविनाशनः ॥ गाथाधिपो
व्याधिनीशी कलधौतप्रभो बलः ॥ वेदगर्भो नीलकंठः कुंडिताघः कृपाकरः ॥३॥ जगदंबापतिः सांबः त्र्यंबको रवि
विंबगः ॥ सुधासागरमध्यस्थः मार्गदीपनिकेतनः ॥४॥ कदंबवनमध्यस्थः नीपवापीप्रपीतरः ॥ पापतापहरो
गोप्ता शंबरारिर्निषूदनः ॥५॥ त्रियंबकोवरनयोजटाजूटविभूषितः ॥ कात्ययोनीप्यश्च सूक्ष्मश्च सरस्यो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्य
मेध्यवैद्युतः ॥ ६ ॥ ईध्रिआत प्य आतार्य अलाद्यः शष्प्रिवं धुरः ॥ रेष्म्योरस्यश्च वैशांतो नाद्यः कूप्योवट्योद्भवः ॥ ७ ॥ आ-
८४ हनन्यश्च दुंदुभ्यो सिकत्यः फेन्यवन्यकः ॥ प्रवाह्य श्च सिकत्यश्च प्रपथ्यो गेह्य एव च ॥ ८ ॥ इरिण्यः तल्प्यआ
ताम्रः भवो रुद्रोपितामहः ॥ संसारवैद्यो विश्वात्मा जगच्चक्रप्रवर्त्तकः ॥ ९ ॥ मरुतिता स्त्विषुः पाता गरिष्ठो
गव्हरस्तरुः ॥ हिरण्यबाहुराशास्योसेनानी गिरिशो मृडः ॥ १० ॥ सुधन्वा बिल्वपत्रार्च्यो गोनर्दो पवृषाक
पिः ॥ उरुगायः कल्कवर्ज्यो ज्योतिर्हितिर्विभावसुः ॥ ११ ॥ मुतिपिः कौशिको धूर्त्तो धत्तूरकुसुमप्रियः ॥ कनका
गद् केयूर हारकाकोदरप्रियः ॥ १२ ॥ उमाधवो माधवार्च्यो भस्मरुद्राक्षभूषणः ॥ गंगातुंगजटामौलिर्नर्मदा
शर्मदायकः ॥ १३ ॥ तमालमालः सुगलः करवालल सत्करः ॥ अट्टहासो विकटो दंष्ट्राकुटिलवक्त्रकः ॥
रक्तवृत्तेक्षणः शुभ्रः श्वभ्रो हतो कविर्बर्हिः ॥ फुल्लनीलोत्पलस्रग्वी शम्पाकार्च्यो विरोधहा ॥ १५ ॥ आर्यः सु
र्यः प्रभुः शास्ता सुहस्तो हस्तचर्मधृक् ॥ क्षेत्रेशो जननीवात्मा अमोघो अद्रियापतिः ॥ श्राणचीर धरो घो
१२ रो वर्वरो भैरवः सरवः ॥ उष्णीषी वसनच्छन्नः रूपानत्पादुवः शिवः ॥ वृक्षपल्लवसन्मौलिः शुनांपतिरपांपतिः ॥
जंघन्यो बुध्नियच्छंदो अरुणो भगणेंद्रधृक् ॥ १६ ॥ कुमारजनको वेत्ता परिवीतो पवीतधृक् ॥ वभ्रुः सुशिप्राः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मीढ्वांश्च आषाढो द्रापि उत्तमः ॥१९॥ एकाक्षो नैकपात्सु भुः अधिपो मित्रपः शिवः ॥ क्षत्रपः स्वपतिर्देवो धनपः
शत्रुनाशकृत् ॥२०॥ अन्नेषुश्चैव वातेषु तीर्थेषु प्रमथापतिः ॥ आयुर्दो धनदो धीरो रसः शिवतरो भृगुः ॥
२१॥ एवं नामसहस्रेण तुष्ट्वा वाञ्छाकृतिं हरं ॥ स्कंदो नंदितमंदारो वृंदारकगणानतः ॥ २२॥ शृण्वन् पठन्
शिवं चार्चयेत् बिल्वैः पर्वणि सर्वथा ॥ ज्योक् जीवति सवंशेन सर्वसंपत्समश्नुते ॥ २३॥ आम्नायसर्वार्थ
सहस्रनाम्नां भूम्नां च सीम्ना तु महिम्न नाम्नां ॥ लेशोप्यशेषं सविशेषशब्दवित् किं वास्य शेषो सुमु
413 खेन वक्ति ॥२४॥ नाम्नां सहस्रं प्रजपन्न घघ्नं ब्रध्नप्रभो जायत एव सत्यं ॥ अहो न केनापि अहीनपुण्या
नहीनवंश्योऽलभतेऽस्य किं गुणं ॥२५॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे शिवसहस्रनामकथ
नेनाम चतुर्विंशोध्यायः ॥२४॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ श्री स्कंद उवाच ॥
चिदंबरेश्वर शिवमुदंबुजरविलिषे ॥ यस्य जैमिनिरुच्युक्तः स्तस्यै वाचे नमो नमः ॥१॥ प्रत्यूह शांत्यै हेरंबः प्रत्यूहपतिरी-
श्वरः ॥ विस्मापयन् सपि तरावस्माकमस्तु केवलः ॥२॥ वंदे श्री शिवपादाब्जमद्वंद्वानंदसाधनं ॥ चेतः सेप्रसा
दाय एतदालंबने परं ॥३॥ पुस्तमुक्तालसद्धस्ताचास्तुमे भारती मुखे ॥ नियोजती या रेवी धियो विश्वाविरा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८५ जती ॥४॥ हृद्यैः ष्टोत्तरशतपद्यैरंब शिवे तव ॥ प्रव्हा वेदस्तुतौ भूया ज्जिव्हा मे मधुमत्तमां ॥५॥ काव्यालंकारसर्वस्व मधुरी लहरी मुच ॥
वाचा परम कल्याणी मुखं हि मम शोभय ॥ ६ ॥ मादृशं वैखरी वाचलादृशीं स्तोतुमं विंके ॥ यतो विभेति ललिता ततो नो अभयं
कृधि ॥७॥ मदीय कर्मसु शिवे त्वदीयदयया मुहुः ॥ अवधूत रुषः संतु अवधूता अराः तयः ॥ रवींदु दक्ष वामोच्चत्ताटंकरुचिराननां ॥
महा विश्वेश्वरीं वंदे ग्रहनक्षत्र मालिनीं ॥ ९ ॥ खंड्यार्क रश्मैर्वांबदय यालोकया शुभां ॥ चंडिके तन जीवा मो मंडूकाउदका दिवा ॥
गंगाद्या अभिषेकार्थं तुंगाताः सन्निधत्त भोः ॥ पापी पशांत्यै मे माता रापो हिष्ठा मयो भुवः ॥११॥ हृदय स्थेयसी नित्यं सदये मम-
कालिके ॥ भूयो वितरमे श्रेयः आयुषा सह वर्चसा ॥१२॥ काल्यै त्वद्भक्ति विमुखाः कालिसंतिपतोधमाः ॥ अप्रमत्तास्म
तं देशं माप्रगाम पथो वयं ॥ असंमजससंसारात् समंजनमंब मां ॥ वत्सला भवती त्रातुं वत्सं गौरिव धावतु ॥१४॥ अ
र्थिभ्यो भीतिवरदो मुद्रे भद्रे दयाश्रिते ॥ लक्ष्मीस्त्वं भज तां पन्थ्यां(दृश्यां) लक्ष्मीमनपगामिनीं ॥१५॥ यो स्मान्द्वेष्टि वयं-
यं च द्विष्मो दुष्यतियश्चनः ॥ दुर्गे शूलेन तानेतान् मम शत्रून्विनाशय ॥१६॥ धीरैक सुलभा देवी घोर संसारमोच-
नी ॥ अहोरात्रं च नः पायाद् घोरा पाप काशिनी ॥ ब्रह्मानन्द समुल्लासलीलां दोलित लोचनीं ॥ महासौभाग्यजन-
१९ नीं महालक्ष्मीमुपास्महे ॥१८॥ उग्र पत्नि समग्रान् हि दुर्ग्रहानाग्रहादिकान् ॥ अनुग्रहाद्विपुन्धि क्षि सर्वग्रहनि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वारिणी ॥ १९ ॥ अर्त्तिं निवार्य भद्राणि पूर्त्तिं स्फूर्त्तिं च पार्वति ॥ मूर्त्तिं महस्य रुचिरां कीर्तिं मूर्ध्नि दं दा तु मे ॥ २० ॥
अंधकारि समिंधान सं ध्यानव्न साक्षिणि ॥ वर्च स्वंतं धराध्यक्षं आयुष्मं तं करो तु मां ॥ २१ ॥ भर्गा तिदयि ते
दुर्गे निसर्गस्थं जगत्वयि ॥ आयुस्त्वत्कृपया नित्यं मयि श्रीः श्रयतां यशः ॥ २२ ॥ सदेशं मममन्वं स्ते कं दे शं यत्र
यामिवा ॥ मंदे तवाश्रयं देवि विंदेयं पुरुषानहं ॥ वेदान्छास्त्राणि यत्राश्रमो दान्त्वत्पद भक्तिकान् ॥ प्रियं कीर्तिं
धृतिं दार्ढ्यं श्रियं वासय मे कुले ॥ २४ ॥ माता कथं विरुध्यांस्त्वं सह से सर्व मंगला । सर्वाण्यलक्ष्मि मापत्तिं सर्वान्निर्णु
दमे ग्रहात् ॥ राजराजेश्वरी मातर्धत्से त्वं धनदाययां ॥ दायाद्य सुतसामान्यात् ता मिहोपह्वये श्रियं ॥ २६ ॥ मदीय हृ
१।५ दयाब्ज स्थं त्वदीय महसा शिवे ॥ तमो वक्रोधलोभादिमलक्ष्मीनाशयाम्यहम् ॥ २७ ॥ पवित्रमंत्रैः सुश्लोकैः
विचित्र रचनैः शिवां ॥ वाचस्पति रिवस्तुत्वा वाचस्पत्यमयी महि ॥ २८ ॥ पुत्रदे पौत्रदे मातः नप्तृदे गोजवा
जिदे ॥ जनदायै नमस्तुभ्यं धनदायै महाधने ॥ २९ ॥ तेजसे यशसे मातारा जसे महसे धने ॥ चर्चितैर्गंधपुष्पा
द्यैः अर्चितस्त्वाहवामहे ॥ ३० ॥ संचिदागामि दुःखेभ्यः स्मरणात्त्वमपालयः ॥ प्रारब्धाच्च महादेवि पुनर्नः पाहि
विश्वतः ॥ ३१ ॥ पौंडरीकांतयज्ञेभ्यः चंडिके प्रीतये तव ॥ शतानि दशरिक्थानां आसहस्राणि दद्महे ॥ ३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८६ जपात्पवित्रकैर्मंत्रैः शिवायै पायसं घृतं ॥ बिल्वपत्रसरोजानां सहस्राणि च दद्महे ॥३३॥ पंडितास्तैस्त्वं धीरा पौं
डरीकांत कर्मभिः ॥ उपासितुं महाविद्यां सस्वाय आनिषीदत ॥३४॥ विपक्षपक्षो यस्यारिरक्ष ग्रहमहर्क्षजं ॥
भयं संसिक्ष कामाक्षि रक्ष स्व मां पदे पदे ॥३५॥ प्रचंड चंड मुंडाद्रि खंडनो दंडवज्रके ॥ ये मे धना पहर्तारस्तां
स्तिद धा मिजं भयोः ॥ प्रारब्धमनिवार्यं चेदीदृशे वरदा भये ॥ किमर्थं तव देव्यैते ततो मे श्रियमाहू ॥३७॥ ब्रह्म
चक्रलसद्रूपा ब्रह्मविद्याधिदेवता ॥ डिंडनीयात्र यो चूडैः षोडशी शर्म यच्छतु ॥३८॥ महादारिद्र्य ग्रामनीं या
भूत्वा पविमोचिनी माम् ॥ शिवानुमस्तां कालाग्नौ शिवा रुद्रस्य भेषजी ॥३९॥ संध्यादि सर्वकर्माणि वं ध्यायन्म
मचेष्टितम् ॥ अयि तोषाय ते भूयात्त्वयि सर्वं प्रतिष्ठितम् ॥४०॥ अन्नपूर्णे त्वया पूर्णेन्नं नाम परिकुर्वतः ॥ सं
निधत्स्वं ममोदारे अन्नपाने च सर्वदा ॥४१॥ यदि देवि कटाक्षस्या हृदि शक्रादयः सुराः ॥ मुहुर्हृति भिः सोमा
द्यैः अहवो जीवनप्रदा ॥४२॥ यत्सांनिध्यं देवि सिद्धिं स्यादसाध्यं साधयाशुभे ॥ इंद्र इन्नमहिम्ना त्वां प्रसं-
संति प्रशस्तिभिः ॥४३॥ नानं द्यंति किं देवि सकृद्दृष्टां गिरोमम ॥ नंदयं त्यो मुहुः श्रोतॄन् वृष्टयः पृथिवीमिव ॥
२० ४४॥ न स्मरेत्तव पापश्चेत् स्मरेच्चेन स पापकृत् ॥ सावधानं शिवे पुत्त्रयोरु भयं शृणु वचनः ॥४५॥ हुताहुतान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चायासि कुतः किमुचितं तव ॥ किमाक्रोशमपेक्षं ते सूनोर्वत्सस्य मातरः ॥ ४६ ॥ उत्तरं वद सत्यं मे का त्वं कोहं कुतो नतिः ॥
किय[illegible]त्कार्यं विपृच्छामि वाच मच्छापदीमिमां ॥ ४७ ॥ भक्तिरक्तीन चेद्दत्सी भुक्तिमुक्तिनदीं सासि ॥ अधर्मेणात्व-
मेतत्ते त्वं हि वेत्थ यथातथं ॥ ४८ ॥ आक्षेपं नः समाधेहि तिष्ठती पुरतो मम ॥ निश्चित्यव्यतिरेकं ते भूरिनाम मना-
महे ॥ ४९ ॥ तुभ्यं देवी यज्ञस्कामाः भक्तस्यै तन्निदर्शनं ॥ जिष्णोरपि सखा योऽद्य विष्णोः कर्माणि पश्यत ॥ ५० ॥
कर्णीभ्यां स्वर्णपूर्णाभ्यां कर्णिकाकीर्णसन्मुखीम् ॥ अपर्णा वर्णये तूर्णं सुवर्णा हेममालिनीम् ॥ तुंगस्तनी-
म् शर्वसर्वमंगलां ईश्वरप्रियाम् ॥ मंगलायतनां नौमि पिंगलां पद्ममालिनीम् ॥ ५२ ॥ नंदनोत्थसुपुष्पाणि
4/5 चंदनान्यर्चितुं शिवाम् ॥ स्वयं संपाद्य पुरतः श्रियं देवीमुपह्वये ॥ दयार्द्रहृदये मातः क्रियाशालि नमस्तु मे ॥
त्वं मां भजस्व पद्माक्षि येन सौख्यं लभाम्यहं ॥ ५४ ॥ रक्ष मां मंबललिते यक्षराजसमर्चिते ॥ पूजया हि विरा-
जेते प्रजया च धनेन च ॥ ५५ ॥ परितः कांतिधीश्रीभिः गरिमाणं यपुः शिवे ॥ उमे तव दयादृष्ट्या सोम इंद्रो बृ-
हस्पतिः ॥ ५६ ॥ त्वच्चारुचरणं स्मृत्वा सच्चिदानंदरूपिणी ॥ अच्युतो वा धनप्राप्ती अच्युतां बहुलां श्रियं ॥ ५७ ॥
हनुमत्परशुरामाद्यैः मनुभृद्भिर्महात्मभिः ॥ अर्चितासि महादेवी दीर्घायुत्वाय वर्चसे ॥ ५८ ॥ गुणाढ्य पाकसर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८७ सशस्यालंकारिणीतिभिः ॥ शोभतां सुसुधाणी शोभयंती मुखं मम ॥ ५९ ॥ दुष्टचित्तं न छवित्तं कष्टवृत्तमिमं जनम् ॥ पातुं जन
निते चित्तं पथा वारिव धावतु ॥ ६० ॥ उत्तिष्ठ देवि किं शेषे वरदाभयशोभिते ॥ पाहि दुर्गे तिदुष्टेभ्यो भयं विंदति मामिह ॥ ६१ ॥
दुग्धे घृतं तिले तैलं मुग्धे घंटाध्वनिर्यथा ॥ मुदा त्वां सर्वगां देवीं सदा पश्यंति सूरयः ॥ ६२ ॥ प्रपंचसृष्टेस्त्वं पूर्वं ब्रह्माणी स-
हितां विके ॥ अजीजनस्त्वं धातारं शाश्वतं शिवमच्युतं ॥ ६३ ॥ स्थली कमलसंकाश पादलक्ष्म तवेश्वरी ॥ माहिषे मस्त
के भाति विद्युल्लेखेव भास्वरा ॥ ६४ ॥ मूढो यामि मितिमामं स्यास्त्वतो हंतास मागता ॥ त्वया विना न किंचिच्च दृश्यते
श्रूयतेऽपि वा ॥ ६५ ॥ वंदे विंध्याचलकुचां विंध्याचलनिवासिनीम् ॥ संध्यासु पूजयति चेद्धाता गर्भं दधातु ते ॥ कुरु-
विंदमणीद्ध भमरविंद्वलसन्मुखं ॥ अहो तादृक् तव शिवे महोनीरायजाभर ॥ ६७ ॥ अखंडवेदवाक्यार्थैः अखंडैक
रसं शिवे ॥ अभयामद्रूपां चत्वां सुभगामहमाश्रयं ॥ ६८ ॥ चतुःसाधनसंपन्नचतुरानुभवात्वियं ॥ परं ब्रह्मैव मेव-
श्रीन हयस्याजपरंचन ॥ ६९ ॥ भवत्पादांबुजद्वंद्वं द्वभवन्माध्वीकषट्पदी ॥ रुद्रभाग्याच्छचीपत्नीरिंद्रपत्नी
मही यते ॥ ७० ॥ पापाधिक्याद्भजस्त्वां वसा [illegible] पाया मयवानपि ॥ ग्रीवाति गभ्व सनवान् जीवाति शरदः शतं ॥ ७१ ॥
२१ साष्टोत्तरशतावृत्तमीष्टोदयमहामनुम् ॥ विष्णुवज्जपतो गौरी भूष्णुरात्माफलग्रहि ॥ ७२ ॥ जपाकुसुमसंका-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शांकृपावालमहालताम्॥ आर्यासेवें विनीतार्यां सूर्याभां श्रियमीश्वरीम्॥ ७३॥ तांबूलकवलैर्दिव्यैः तांबूलितमुखां
बुजा॥ शिवादालिंगितायासाशिवानः शंतमाभव॥ ७४॥ तयाप्रपद्येत्वां मातः तथा नद्यः समुद्रगाः॥ यथाघृते घृतं
यातियथामासाश्चहर्जरं॥ ७५॥ यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते॥ मातस्त्वयिदयामूर्त्तौ तत्र माममृतं कृ-
धि॥ ७६॥ जपतस्तव विद्यां चयंजंतस्त्वांहवामच॥ शर्वाणि दयया धीराः सर्वे साकं सरा तयः॥ ७७॥ आनंदरूपम
मृतं परब्रह्मैव सा शिवे॥ नैवस्त्री न पुमानेषनैवचायंनपुंसकः॥ ७८॥ जीर्णोप्ययं त्वद्दयया पूर्णया तूर्णमिद्रि-
यैः॥ आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन॥ ७९॥ सद्गुरोर्लब्धया ब्रह्मरूपया कश्चिदात्मवित्॥ हृद्यया
४/6 कृपया ते बविद्यया मृतमश्नुते॥ ८०॥ सर्वगात्वमहं क्षुल्यः कीदृशस्ते मम स्तवः॥ यतो वाचो निवर्तंते अप्राप्य
मनसासह॥ ८१॥ ज्ञानंदेव तु कैवल्यं इत्यादिश्रुतिकोटिभिः॥ जीवन्मुक्तः स्त्ततो मातः मामाब्रह्मनिराकरोत्॥
८२॥ साक्षात्कृतायमेनायां सत्यानंदचिदात्मनि॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ ८३॥ वर्णाश्रमो
चितमतिः वेदारण्येष्वयंजनः॥ त्वत्प्रसादादुमे धीरश्चरन्वै मधु विंदति॥ ८४॥ भूष्णुभ्यां कृष्णजिष्णुभ्यां
पूज्ये पूष्णासि पार्वति॥ त्वत्कृपाबलतो विष्णुरिदं विष्णुर्विचक्रमे॥ ८५॥ शारदाभमुसीपातु शारदापारदामला॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८८ त्वत्प्रसादादभून्मातः सुमूलांकासरस्वती ॥ ८६ ॥ नानाचराचरकरी नानामहात्म्यतस्तव ॥ प्रसादाद्दैवतेवं देव्र-
ह्मब्रह्मा भवत्स्वयं ॥ ८७ ॥ पद्माक्षी पद्मगां वंदे पद्माक्ष्यादिभिरीडिताम् ॥ त्वत्प्रसादात्पद्महस्तां हास्तिनादप्र
बोधिनीम् ॥ घ्राणापुष्करनाणानां जिह्वापुष्करधन्विके ॥ जीवन्मौर्वीमहादेवि पराचीनामुखाकृधि ॥ ८९ ॥
गौरीकल्याणवैभोगंउरीच कुक्षाक्षियोपि हि ॥ कल्याणकर्मसु शिवे सा काष्ठा सा परा गतिः ॥ ९० ॥ श्रीराम-
नारसिंहादिवीराच्या भजतां विक्रमाम् ॥ अपुत्राः पुत्रदां देवीं वीरवंतो भविष्यथ ॥ ९१ ॥ जृंभितोग्रकिणैरंगैर्न
तीनां वितनोमि ते ॥ सहस्रादि महास्वेदैः सहस्राणि सहस्रशः ॥ ९२ ॥ तत्तत्कालेष्व हत्यायै जारोपि खलु
यज्वभिः ॥ ईज्यतेत्व प्रसादात्तैः विश्वस्मादिन्द्र उत्तरः ॥ ९३ ॥ कन्याप्यर्चेति भाग्यादिलाभाय शुभकर्मसु ॥
त्वत्प्रसादाद्विशुद्धां गी इंद्राणीमासनारिषु ॥ ९४ ॥ एकद्वित्रिचतुष्पंचषट्सप्ताष्टादिरूपकं ॥ त्वत्प्र
सादान्महातंतं अग्निमीळे पुरोहितं ॥ ९५ ॥ स्तुवे विघ्नेशनंदीशचंडीशवृषभृंगिकान् ॥ प्रमथेंद्रान्कुमारेण
कुमारी अधिमातरि ॥ ९६ ॥ सालोक्य सामीप्य सारूप्यतादि सायुज्य मुक्तेः स्फुट शक्तिमीडे ॥ सौरोदितेषु श्रु
२२ तिलक्षणेषु वैरोचनीम् कर्मफलेषु जुष्टाम् ॥ ९७ ॥ लीलामहिष्ठां मधुजिल्कनिष्ठां ध्याय द्विसिष्ठादयया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गरिष्ठा ॥ वेदांत निष्ठा च तु शंभु काष्ठा विश्वस्य भर्त्री जगतः प्रतिष्ठा ॥ ९८ ॥ गंगां भगीरथायासं संगां तुंगां लदा-
श्रयात् ॥ क्रमेण गौरीं पश्य मः श्रमेण महाता पथि ॥ ९९ ॥ दिक्पालग्रह मात्राद्य भैरवा भयकृन्मुखाः ॥ यतो देवि भव
प्रीत्यै अतो देवा भवंतु नः ॥ १०० ॥ सुगंध चर्चितां कुंद मंदार कुसुमोज्वलां ॥ स्तुवे दुकूलवसनां सुवर्णरजत स्रजां ॥
॥ १ ॥ गांगेयानि च रत्नानि गांगेयानि सृजानि ते ॥ शत साहस्र दशकान् शत निष्कान् दश स्रजः ॥ २ ॥ अस्मद्वि
पित्सा भवरुक् चिकित्सासु पूर्णलिप्सास्तु शिवासु वच्छा ॥ श्रीकंठ लिप्सा सरभीष्ट दिप्सा शालांतरे गौरि
417 वनष्ट वत्सा ॥ ३ ॥ नमो मखेभ्यो मघवन्मुखेभ्यो भुग्नखाग्रदृग्भ्यो दृगनद्गुयेभ्यः ॥ दयाच्युतेभ्यः श्रुतिशास्त्र
दृग्भ्यो नमो युवभ्यो नम आसिनेभ्यः ॥ ४ ॥ महामाये सृजसि हिरण्य गर्भ प्रभृत्येतद्भुवनमिवो नाभिः ॥
स्वतस्तं तन्भगवति देवि पश्चात् अजीर्णात्वं जरयासि सर्वमेतत् ॥ ५ ॥ शिवं सुरेभ्यः कृपयावलेद्य शिवं मुनि
भ्यः शिवमर्भकेभ्यः ॥ शिवं द्विजेभ्यः शिवमेव गोभ्यः शिवं प्रजायै शिवमस्तु मह्यं ॥ ६ ॥ षिद्वां तवेद्यैः परितो
घोषयित्वा शक्त्या कारा प्रतिजाने महेशि ॥ सर्वत्रैवं रमसे अस्मिन् प्रपंचे पूर्णा पश्चाद्युत पूर्णा पुरस्तात् ॥ ७ ॥
नमामि शंभुं नत कल्पपादपं रमापति स्तुत सर्वदांबुजद्वयम् ॥ कुमार विघ्नेश कुतूहलास्पदं उमासहायं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८९ परमेश्वरं प्रभुम् ॥ ९॥ वर्णार्थ नियमादस्याहर्षी सजपतो भवेत् ॥ वेधां गना प्रयच्छंति मेधां देवी सरस्वती ॥ १०॥ चौर
वृश्चिक दुःस्वप्न चोरसर्पादि शांतये ॥ गोत्रात्मजा स्तुतिं पुण्यां रात्रौ रात्रौ सदा पठेत् ॥ ११॥ स्तुत्या पूजयतां भ
क्त्या मर्त्यां श्रेयः परं परं ॥ सर्वेण साय दात्यं वा सर्व मायुरूपा सतां ॥ ११ ॥ सहस्त्र कृत्वः पुत्रार्थी सद्भ्व स्वप्र
जपेद्यदि ॥ वशगस्तस्य तनयो दश मे मासि जायते ॥ १२॥ शांत्या मुमुक्षया यार्थवं यजुऋक्सामशालिनाम् ॥
पाहि मुक्तिं शिवे देहि साहि श्री रमृतां सताम् ॥ विश्रुतं श्रुति पदैः कमनीयं भव्यमिदं भगवत्याः ॥ दिव्य चि
त्रपद मेव नव्य यस्तस्य नायुषि भवेत्पठ सत्यम् ॥ ११४॥ ॥ इति श्री शिव रहस्ये ईशानाख्ये द्वादशांशे श्री
देवी वेद पाद स्तवो नाम पंच विंशोध्यायः ॥ २५॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ ॥
श्री स्कंद उवाच ॥ स्तौमि देवं सदाभक्त्या सांबं रुद्रार्थ पद्यकैः ॥ कृतांजलिरहं वंदे भक्त्या युक्तस्तथा द्विज ॥ १॥
तं मत्तः सस्तवं पुण्यं श्रुणु सर्वार्थ दायकं ॥ सहैभिः श्रूयतां विप्र जैगीषव्य महामते ॥ २॥ येन स्तवेन स्तुवतां
देवो मुक्तिं प्रयच्छति ॥ रुद्रमंत्रार्थबोधाढ्यं भक्ति सार्द्रप्रवर्धनम् ॥ ३॥ नमस्तेति ॥ पूर्णानंद चिदात्मको
23 प्यपहृतः स्वविद्यया हृद्ययातल्लीलादिविलास मोहितमना विस्मृत्य रूपं निजं ॥ जीवत्वं समुपैति नित्यमन=
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पायिन्यात याप्रेरितोयः शश्वन्नृवदश्ववच्चगजवद्गोवच्चनानाविधान् ॥४॥ येषानाकलयन्विधायबहुधा
कर्माणितत्साधनान्यत्यंतोन्नतनीचमार्गगमनः श्रांतः पुरेष्वाधसन् ॥ कामिन्याकमनीययातिकमनः स्वा
विद्ययासंसरन् पुण्यापुण्यवशाच्चिरेणपरमां विद्यांप्रियामाप च ॥५॥ श्रीरुद्रायनमस्समस्तजगदु-
त्पत्तिस्थितिध्वंसिने क्रीडेच्छा समुपात्तदिव्यवपुषे धातुर्विधात्रे हरेः ॥ रक्षित्रे नितरांहरस्यच परा
हंताकृते स्वात्मनो भर्त्रे भक्तजनस्यवांछितसमस्ताभीष्टदात्रे सदा ॥६॥ एकः सन्नपिकार्यकारणवि
410 दाकारैस्त्रिभिर्योऽष्टधात्रेधाकेवलमेकधाचनिखिलं विश्वंचरंचाचरम् ॥ स्वांतस्थेन विभर्त्तितस्य
कुरुते जन्मादिसद्भासय ॥ त्वंतव्याप्यबहिश्चदेव भवते सांबाय तुभ्यंनमः ॥७॥ दुर्विज्ञेयतरश्चतुर्मु-
खमुखानामप्यायनेकाकृतिः ॥ सर्वेशः स्वयमेवमादृचरितैर्यः सर्वतः सर्वदा ॥ सर्वंविश्वमवन् त्रिविस्फु
तयासर्वात्मनादृश्यते व्यक्ताव्यक्ततरायते भवनमस्तस्मैचविश्वात्मने ॥८॥८॥ उग्रंत्वांनमसाभसायजगतां ते नि
ग्रहानुग्रहव्यग्रास्योग्रतमास्तथा शिवतमाघोरा अघोरास्तनूः ॥ देवंस्तौमिनमस्करोम्यभयमप्यद्यैवयाचे वि-
भीत्वत्तः कः शरणार्थिनां शरणदः श्रीरुद्र शंभो प्रभो ॥९॥ वागादिस्वयमेवबोधयतियः सर्वं चवाग्रूपया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९० कृत्वा साधुजनं च वेदयति यः श्रुत्या च धर्मादिकं ॥ भक्तानां किल योगिनां नयति यो मंत्रेण तारात्मना ॥
यो सौ द्रावयति स्वयं द्रवति वा नादांत एव प्रभुः ॥१०॥ कल्पांते भुवनानि रोदयति यः सर्वान् रुजन्तस्य–
तान्नित्यं द्रावयति स्वयं द्रवति वा रोरूयमाणो भरान् ॥ शब्दब्रह्ममयीं करोति च रुत्तिं यः सर्ववेदांतिका
न् ॥ धात्रे यश्च रुतिं ददाति भगवन्रुद्र प्रभो तस्य ते ॥ ११ ॥ मन्युः क्रोध इति प्रपंचहरणे शक्तिः प्रसि
द्धास्ति या ॥ तस्यैवेदं नमो स्तु तां प्रशमयन् त्रायस्व नः सन्नतान् ॥ सोमः शाल्यमनीकमग्निरभव
द्विष्णुः स्वयं तेजनं पर्णान्यप्यति रास यस्य निगमाख्यास्तस्य तस्मै नमः ॥१२॥ तेदेवस्य महेषवे पि च फणींद्र
ज्यं सुमेरुर्यत्मकं यक्षन्व प्रणवात्मकं त्रिपदया सज्यं यदन्यद् धनुः ॥ तस्मै चास्तु नमस्तवापि च धनुर्बाणोद्यताभ्यां नमो
॥ बाहुभ्यामथवाखिलेभ्य इह ते बाहुभ्य एतं नमः ॥१३॥ इति प्रथमानुवाकः ॥ भक्तानां सुगमं महाघहरणं लोका
धिपत्यप्रदं राज्ञां चानमतां प्रसादसुमुखं श्रीकश्यपाराधितं ॥ योद्धाकारमुमासहायमचिरादाकर्णकृष्टेश
रं चापे भास्वति संदधानमनिशं रुद्रं युवानं भजे ॥ या त इषुः शिवतमेति ॥ भक्तानां सुखदायिनी भवतिज्याख्या–
तात वेषुस्तया यच्चातीव शिवंकरं तव धनुस्तेनापि यास्ते महा ॥ चक्राद्यायुधसंततिस्तव सदा दिव्येषुधिर्वा तया =

२५

चास्मान्देवदयावशेनसुखयश्रीरुद्र शंभो प्रभो ॥१५॥ अत्रिंयाचितमन्नदं प्रणमतां दुर्भिक्षदोषापहं शंभुं स्वंदन
मध्यसंस्थमुमयासार्धंज्वलंतं श्रिया ॥ शूराकारमतीवसास्मितमुखं संस्तूयमानं सुरैरिष्वासेषुकरं प्रसन्न
हृदयं भक्त्याध्दं भावये ॥१६॥ याते रुद्र शिवा तनूरघोरा० ॥ योसौ शंतनुते दयामयतनुः प्राणिभ्य एवं गिरौ कैलासे
गिरिशाभनाजलधरैः पर्जन्यरूपेण च ॥ वैखर्यामपि वाचि वाच्यविधया ओंकारमय्यां गिरि ध्येयत्वेन
च संस्थितः स्वयमखंडानंदवारांनिधिः ॥ १७ ॥ यासाक्रूरतमा समस्तजगतां दुःखार्तिविध्वंसिनी याते रु
41 द्र शिवा तनूरिहतया चानंदचिद्रूपया ॥ स्मर्तॄणामधिकं सदासुखतया युक्तस्त्वमस्मान्मुहुः पश्यानुग्र
हवीक्षणैरभिमुखं श्रीरुद्र शंभो प्रभो ॥१८॥ एकं गोधनवर्धनं प्रणमतां श्रीकश्यपाराधितं शंभुं स्मेरमु-
खांबुजं त्रिनयनं बालेंदुगंगाधरं ॥ श्रीशैलेंद्रसुतासहायममलं भस्मोरगालंकृतं सर्वेषां जगतामधीश
मनिशं ध्यायेत्पशूनां पतिम् ॥ यामिषुं गिरिशंते ॥ देवानां शरणार्थिनां प्रणमतां संप्रार्थनानंतरं हंतव्यान्
त्रिपुरासुरान्प्रति पुरे क्षेप्यां गृहीतामिषुम् ॥ हस्ते यां गिरिशंत सम्यगपि यां हर्तुं विभर्षि स्वयं हस्ते न त्रि
पुराख्यतूलदहनक्रीडां विहाय क्षणात् ॥ २० ॥ देवत्रायक नित्यमध्वर गिरामभ्रस्य चैवं गिरेः कैलासस्य च=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८१ नाथ तां कुरु भवद्भक्तान् प्रतिक्षिप्तमदां ॥ हं तव्याभिमुखेन किंच कृपयात्राय स्व पापेभ्यश्च मां मा हिंसीः पुरुषाग्र
गण्यमनिशं त्वत्पादसंसेवनात् ॥ सर्वान् गोमहिषाश्वदासकुलमप्येवं विधेह्यादरान्नीरोगं निरुपद्रवं
च सततं श्रीरुद्रसांबमभो ॥ २१ ॥ शिवेन ॥ श्रीकैलासनिवाससर्वनिगमाधीशप्रभो सर्वतः सर्वान्तः सु
तदारबांधवधनक्षेत्रादिकं स्यात्तथा ॥ नीरोगं सुमनस्कमेव च तथा त्वां सर्वदुःखापहं सर्वैश्वर्यविव
र्धनं प्रणमतां सर्वाधिकं सर्वदा ॥ २२ ॥ सर्वैश्वर्यगुणाकरं शिव भवं कल्याणलीलामृतं स्तोत्राकारत
या शिवेन वचसा नित्यं स्तुमः सन्निधौ ॥ लोकानामपमृत्युदोषहरणं दैवोपघातापहं ॥ रुद्रं गौतमनाम
केन मुनिना गोमायुनाचार्चितं ॥ २३ ॥ हासाक्रष्ट पुरत्रयं गिरिधनुष्पाणिरथाधिष्ठितं संग्रामोचितदिव्यवे
षमनिशं ध्यायेत्सुरारिं प्रभुम् ॥ कार्योपाधिवशेन सन्न पिन राकारोपि जीवात्मको यस्यांशः स्वयमीदृशं व
पुरभेदेन गृह्णा स्वयमः ॥ २४ ॥ अध्ययवौ ॥ जन्मव्याधिजरादिदुःखदमहासंसारकष्टज्वरतुष्टानां वित
रन्सुदुर्ल्लभमपि तद्भक्तिमात्रौषधम् ॥ भीतानामभयार्थिनामभयदे त्वग्रेसरोयं भिषक् सर्वेषां भिषजां
किलेति निगमायं संस्तुवं त्यादरात् ॥ २५ ॥ दुर्ज्ञेयोपि परात्परोपि जगतां त्राणाय मोहायवा देवैश्चैकतमो हमेव=

इतियः प्रादुर्भवन्क्रीडति॥क्रीडायांसुखरूप एव विजिगीषायां जयात्मा स्वयं॥भक्त्यालाव्यवहारके भवतिच
ज्योत्यात्मकोद्योतने॥२६॥नित्यं स्तुत्यमयस्तु तावपि गतौ गंतव्यरूपोथ वावाच्यात्मा बहुधा विभातिहि बहुष्वर्थेषु
चैकोपियः॥देवानामपियः स्वयं मुखमभूद्ब्रह्मादिकानां प्रभुर्दिव्यज्ञानवतां प्रधान पुरुषः सर्वस्य लोकस्य
यः॥२७॥स्रष्टा स्वं सृष्टमाखिलं विष्णुर्जगत्पालयेत्वं सर्वाणिजगंति संहरहरे ह्यैश्वर्ययोगान्मुहुः॥स्वातं
त्र्याधिकत्वाभिरेव मम नाम्नापंचैवं विधान्यः स्वाभाविकशक्तिमान तितरामर्हः समर्थः प्रभुः॥२८॥
९२० अस्मद्धिंसन तत्परान रिगणान्जातीन्तथा राक्षसान् सर्वानाशु विनाशयन्मम पुरः प्रत्यक्षमाविर्भव-
न्॥देवः सोममधिब्रवीत्तु कृपया माभैष्ट पुष्मानहं भीतिभ्यस्त्वितिपालयाम्यथ भवान्पालेन मस्मा
न्प्रभुः॥२९॥शंभुंदुःसह गर्भरोग हरणं रक्षाकरं सर्वथा रक्षो भूत भयापहं प्रणमतां दीर्घायुरर्थप्रदम्॥
कण्वाराधित मिंदुमौलिमनिशं व्यालोपवीतोज्वलं प्रोद्यत्पावकवर्चसं त्रिनयनं कालारिमीशं भजे॥
॥३०॥असौयस्ताम्रोऽरुणः॥ यः पूर्वाचलहेमरत्नशिखरमस्योपलापत्यका॥कांतिव्याप्तिवशाद्रसात
लं तमः संपर्कतोवान्वहम्॥ उद्यत्कुंकुमपंकताम्रउदितः सिंदूरपुणरुणस्तत्पस्वर्णसुकांतिरूर्ध्वमथ सं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८१ सर्पन्क्रमाद्दृश्यते ॥३१॥ असौयोव ॥ कल्याणैकनिधिः सतां स्वयमसावादित्यरूपः शिवो येतुल्याकृतिहेतिभूतिवि-
भवारुद्रेण रुद्राः परे ॥ देवस्यानुचराः समस्तजगतां कर्मानुरूपं फलं दातुं दिक्षु सहस्रशः क्षितिमिमामध्यास
तेचाभितः ॥३२॥ कृत्यस्याकरणादकृत्यकरणादालस्यतः कामतस्तस्मात्पापमजस्रमर्जितमभूदस्माभिरेते
स्ततः ॥ तेषां तस्य महेश्वरस्य च विभोर्यो स्मान्विहारादरः क्रोधश्चास्ति तमीदृशस्तुतिनमस्कारैरपाकुर्महे ॥
३३॥ श्वेतस्यामलकंधरः स्फुरदुरुज्वालाग्निवर्णः शिवस्तेजोमंडलमध्यवर्ति विलसन्मार्तंडमध्यंव
सन् ॥ सायं किंचिदुदंचितां कुरुतमः सामर्थ्यलीनेवचाक्रांते ध्वांतमपांचयच्च परितः पंकमदेशांत
रे ॥ ३४॥ भूयिष्टंग्रसनक्षणघृणिगणाक्रांताभ ... नीलानिलम् ॥ विभ्राणोस्तमयन्विलोहिततनिभः प्रा
तस्तपेरोक्ष्यन् ॥ यो सौ तिर्यगधश्च सर्पति जगद्यात्रां सदा निर्वहन्नुर्ध्वे यो पितपः क्रियाभिरखिलैर्वेदैः श्रु
तो मेधया ॥ ३५॥ एनं तं भगवंतमस्तमचिरायांतं वनांताद्गवां ग्राम प्राप्तिनिमित्तमेकमनसः पश्यंति
२८ गोपा अपि ॥ अस्तं यास्यति भानुरंधतमसं दृष्टिं पिधास्यत्यहो स्वापश्चोदिहकुलायंतिहिमृगानोध-
र्षेपिष्यंत्यपि ॥ ३६॥ अंभः कुंभनिभंकरा निजगृहे नेष्यामहत्याकुलाः स्वेदांभःकणसिक्तकंकुसमा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्ष्म्यश्चलच्चचुचकाः ॥३७॥ भ्रूस्य दूषणजालमाकुलकचं व्योलोलहारं जवाद्धावंत्यः परिचारिकाश्च जनि
तानंगैरपांगैर्मुहुः ॥३७॥ संध्यारव्योद्धरणाग्निहोत्रसमयेका यत्तचित्ता द्विजाश्चावासाभिमुखानि
पक्षिपशवः कीटानि भूतान्यपि ॥ सोयं नः सुखयत्वहो निशमुपस्थानादिकालार्थिभिर्दृष्टोस्मा-
भिरसौ सदाप्रशमयन्नेनः कृपांभोनिधिः ॥ ३८॥ यं ध्यायन्ति हवेदपारगकुलेजातिस्मरोजाय
ते रुद्रं तं वरदं सुवृष्टिफलदं श्रीकृष्णपाराधितम् ॥ भास्वन्मंडलगं हिरण्मयतनुं चंडप्रभामंड
४२। लंसांबं स्मेरमुखांबुजं मुनिगणैरासेव्यमानं भजे ॥३९॥ नमो ऽस्तु नो ॥ नीलासुज्वलकंधरा
य सह साक्षात्मने वृष्टिभिः पर्जन्यात्मतया भुवं चपरितः सेक्तत्या योनिषु ॥ गर्भाणां पुरुषात्मना
च विविधैर्बीजै र्विधात्रे नमो रुद्राया स्तु नमस्करोम्यथ भयाये चास्य ते भ्यो नमः ॥ ४०॥ संताने
कफलार्थिनां प्रणमतां संतानरूपं प्रभुं स्वात्मानं हृदि भावयंतमनिशं शंभुं कृपांभोनिधिम् ॥ कांतं शा
रदचंद्रकांतिनितरां शांतं शिवं शीतलं सांबं दिव्यवपुर्दधानममलं सिंहासनस्थं भजे ॥ ४१॥ प्रमुंच
धः ॥ सांब भस्त्रिपुरेषु दुःसहतरो यः पूर्व मासीध्रुवं स्यादद्यापि स एव सेवकजनेष्वस्मासु दीनेष्वपि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८३ विद्यैश्वर्ययशः श्रियांच भगवन्ते ज्ञानवैराग्ययोर्दाक्षिण्यैकतनोर्दयामयतनोः पात्येष्व युक्तो हिसः॥
४२॥ तस्मान्ज्यामिहतांप्रमुच्य धनुषः कोट्योर्द्वयोर्या चिरंवध्नायाश्च तवेषवः कातले तिष्ठंति ताःप्रा
णिनो ॥ संहर्त्री रुप संहरन्नभिमुखीकुर्वं तुनास्मान्ययातूणीरेषु तिरोहितान्कुरुतथा देवेश तुभ्यं न
मः॥४३॥ अवतत्यधः॥ देवानेकशतेषु धिव्रज सहस्राक्षत्व मेवं धनुः कृत्वा विज्यामिदं मुखानि विशि
खानांचैव शीर्णानि ते॥ निःशेषं नितरांविधाय कृपयास्माकं प्रसादार्थिनो सद्यः शांतमनाः शिवोभ
व सहस्वाद्यापराधान्बहून्॥ ४४॥ विज्यं धनु०॥ सुप्रीतस्य कपर्दिनो स्विहपिनाकाख्यं धनुः सज्य
मप्यद्यास्मत्कुशलाय विज्यमिषुधिश्चाप्यं पुरारेः पुरा ॥ बाणैः पूर्णतरो पिवीतविशिखो भूयात्तदीया
श्चयादेवस्यैनवरेषवोप्यपहता [illegible]स्ताः संतुलीनाः क्रमात्॥ ४५॥ तीक्ष्णारोपि महाऽसिरद्य भज
तां भक्तेषु मंदारतां कोशः खड्ग सहायवानपि विनाभूतो स्तुते नाधुना॥ एवं शांतमनाः प्रशांत विविधा
नेकायुधाः संततं भक्तान्नःशरणागतान्करुणया पायादपायाच्छिवः॥४६॥ युद्धेवैरिभयापहं प्रणम
२१ तांश्रीरुद्रमाराधितं देवनारदनामकेन मुनिना नानायुधालंकृतं॥ उद्यद्भास्करकोटिदीधितितनुं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीप्तोत्तमांगीज्वलत्कांतिं भीषणभोगिभूषणमहं ध्यायामि भक्तिह्रदे ॥४७॥ याते हेति• ॥ हे मीढुष्टम रुद्र
हेतिरधुना हस्ते तवास्ति धनुर्नाम्नी या प्रणताति दुःखभय रोगैकापहं त्यातया ॥ अस्मान्पुत्रकलत्रमि
त्र सहितान्सर्वान्प्रसन्नान्सदा सर्वस्मा द्दुरिताच्च रक्ष भगवन्दीनान्दयांभोनिधे ॥४८॥ नमस्त आ॥
स्वामिन्रुद्र नमोस्तु देव धनुषे चानाततज्यायते चोद्युक्ताय शूराय चोद्यत गदा चक्रादि संघाय च ॥ दुष्टा
न्धर्षयते दृढाय विविधायैवं विधायायुधस्तोमाया द्य नमोस्तु ते द्य भगवन् याभ्यां रिपून्विध्यसि ॥४९॥
422 बाहूभ्यां विभिमो वयं तव धनुर्बाणो द्वृद्यताभ्यां ततः सत्स्वन्येषु महाभुजेष्वपि मुहुस्ताभ्यामुभाभ्यां
नमः ॥ यद्वा दक्षिण बाम बाहुनिवहाभ्यां ते नमः कृत्स्न शस्त्र स्मै चोत्तम सायकाय धनुषे तस्मै नमः
कुर्महे ॥५०॥ परि ते धन्वन• ॥ स्वामिन्नद्य वयं पुनः पुनरिदं चाशास्य माशास्महे यः पार्श्वेऽस्ति तवे
षुधिस्त इषवो यास्ताश्च दूरे पुनः ॥ व्यूहे वैरिजनस्य पातयतया हिंसापि ते धन्वनस्त त्रैवास्त्वि
ह पुत्रपौत्र सहितान्पुष्णातु नः सर्वतः ॥ तुभ्यं देव सदा नमोस्तु भगवन्विश्वेश्वराय स्फुरद्दुन्हय
केंदुदृशे पुरत्रयभिदे कालाग्निरुद्राय च ॥ क्ष्वेलं शुभ्यामलंके धराय महतां देवाय सर्वेश्वरायेशानाय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९४ सदाशिवाय महते देवाय शम्भवे नमः॥ ५२॥ स्वात्मानं हृदि भावयंतम निशं रुद्रं मुहुर्ध्यायतां युक्षे सर्व रिपुप्रणाशन
मोरिस्यानैक विध्वंसनम्॥ नम्राशेष सुरेंद्र मौलि विलसत् पादांबुजं कारणं सर्वेषां जगतां पिनाकिन महं ध्या
यामि सांबप्रभुम्॥ चंद्रोत्तंसम चिंत्यमक्षर मजं संसार दुःखापहं मध्ये शुभ्रसुधांशुवार्धि शयनं तं सस्मितं चिं
तये॥ चारुस्मेर मुखं सुमौक्तिकनिभं मध्येसुधामंडलस्यासीनं जगदेक रक्षणपरं ध्यायामि सांबं सदा॥
॥५४॥ श्रीरुद्रादिपदार्थबोधन शिवध्यानानुसंधान विज्ञानानंद विधानपावनतमः स्वांतेन कांतेन च॥
विश्वेश स्मरणा[illegible]दरेण वशिनाज्ञेयोर्थ एष क्रमाच्छांतेनैव विभूति भूषण महालिंगार्चकेनल
या॥ ५५॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे श्री स्कंद कृत रुद्रार्थ निरूपणे प्रथमानुवाके षट्
विंशोध्यायः॥ २०॥ श्री काशी विश्वेश्वरार्पण मस्तु॥ श्री ईशानायनमः॥ श्रीस्कंद उवाच॥ स्वामी-
त्वं स्वमिदं जगत्तदधुना शक्तोपि सन्मन्युना संहर्तुं कृपया विभूति विभवैर्व्याप्योग्रशांतात्मभिः॥ कु
र्वन्निग्रह मप्यनुग्रह मवस्येतच्छिवत्वं प्रभो तस्मै ते स्तु नमो हिरण्य पतये तुभ्यं हिरण्यात्मने॥ १॥
22 अंगे यस्य हिरण्य भूषण गणोद्दीप्तं हिरण्य प्रभं बाहू हृद्यतमौ हितौ चरमणौ यौ भक्तिभाजां सताम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुण्यापुण्यविमिश्रकर्मफलभोक्तॄणांसुराणां नृणां रक्षोयक्षपिशाच किन्नरफणीन्द्राणांपितृणाम
पि ॥२॥संघा तान्विविधान्विधायबहुधा सेनाः स्वकीयाः स्वयं स्वामित्वेनच संस्थितोनयतितांबर्ह्री
र्गतीर्यः सदा ॥ यश्चैंद्रादिदिगीश्वरात्मकतया सर्वा दिशः पालयन्नादित्यात्मतयोदयास्तमयसं
चारैर्दिशः कल्पयन् ॥३॥ प्रसन्नः सदुपास्य मूर्त्तिरिह्यस्तेजोनिधिर्दृश्यते तस्मै ते स्तु नमोन-
मः क्षितितले रुद्राः स्वदंशाः परे॥ नमोवृक्षेभ्यो-॥ ये वृक्षाकृतयो वसंति विविधा वृक्षेषु वासं स्थिता ये ब्र-
ह्मादि पिपीलिकांतनिखिलप्राण्यात्मकाश्चेतनाः॥ ब्रह्मांडाख्य महाक्षिताव तितरांरूढाश्च कालासिना
१२३ भोगांते निजकर्मणो नियतिनावा वृश्च्यमाना मुहुः॥ ये रुद्रा हरिता भ्रकेश निवहास्ते भ्योपियो सौ पशुः
ब्रह्मादीनपिपाति तैश्चरमते तेषां प्रधानः पतिः॥५॥ तस्मै विश्वभुजे नमो नम इदं प्रत्य ग्र घासांकुरश्रेणी
पिंजरमूर्त्तये ति विमलज्योतिर्मयो गायते॥ चिद्रूपाय चिदात्मने स्वयमभिव्यक्ताय येलौकिका मार्गीये-
पि च वैदिका बहुविधा धूमार्चिराद्या अपि ॥६॥ तादृक् मार्गविदश्च ये क्रतुषु येत्वां द्रष्टृभावं गता ये तेषां प
तये नमो नम इदं बभ्रु लिषे सर्वदा ॥ रश्मित्रे वृषभस्य दिव्य वृषभारूढाय पापात्मानां क्षुत्तृष्णा प्रचयामये=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९५ श्चविविधैराविध्यतेयानि च॥ ७॥ रक्षांस्यध्वरभक्षकाणि सततं तेषां च हंत्रे मुहुः सोमायौषधिसंभवैरवि
फलैः संजीवयित्रे नृणाम्॥ अन्नानां पतये नमो नम इदं ते नित्य पूले सदा नीलात्युज्वलमूर्धजाय किल सद्यज्ञोपवी
तायते॥ ८॥ तुष्टानां च सतां च मादिसगुणैर्नोर्पा यवाचोधिपः कायस्येंद्रियसंचयस्य च धनक्षेत्रादिकानां
तथा॥ ग्रामाणां धनधान्ययोरपि पशुव्यूहस्य सत्संततेर्धर्मस्येति च पुष्टयोदश विधाया स्युर्दशानामपि॥
९॥ नमो भवस्य॥ एतासां पतये नमो नम इदं संसारवृक्षच्छिदे हे यैः संसृजिजन्यदुःसहमहाहिंसास्वरूपा
य च॥ लोकानां पतये तिदुःसहमहासंसारखिन्नान्जनान्कृत्वा तान परक्षते करुणया श्री पंचवक्रात्मने॥
१०॥ नमो रुद्राया॰॥ देवेशाय नमो नमो भगवते रुद्राय सज्यं धनुः शश्वद्बाणपते सम स्तम वते ते नैव वि
श्वं सदा॥ हृद्देशे निवसन्नवन्नपुरिदं क्षेत्रं स्वया मायया यंत्रीयंत्रसमास्थितानिव सदा जीवान्मुहुर्भ्रा
मयन्॥ ११॥ क्षेत्रज्ञः स्वयमेव पश्यति शृणोत्याजीवति व्याहरत्यालेह्यं सकलं च वेत्ति सुखदं यत्साधनं के
वलम्॥ आविर्भूय भुवि स्वयं वसति यः क्षेत्रेषु लिंगात्मना क्षेत्राणि स्वयमेव रक्षति सदा यः क्षेत्रपाला
२९ त्मना॥ १२॥ क्षेत्राणां पतये महेश भवते तस्मै नमस्ते नमः॥ नमः सूता॰॥ सूताया स्यमहारथस्य जगदाधार=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्य सूतात्मना कल्पादौ च महामुनीन्प्रति पुराणप्रवक्त्रे ध्वरे सोमायाभिषुतस्य केवलमहंकारे निरूढाय च ॥१३॥ भूतं भाविच वर्त्तमानमहमित्याकारिका या परा हंता तत्र भवाय केवलमहं तव्याप्तसत्यात्मने ॥ सर्वेषां वनदेवतात्मकतया गोपुत्रैर्वनानां नमस्तुभ्यं देव नमोस्तु लोहितनिभायाशेषवागात्मने ॥१४॥ शब्दानां प्रथमप्रवर्त्तकतया लोके हिताया भितः स्थित्वा पालयते निषादपतये खड्गिकधृक् बाहवे ॥ वृक्षाणां पतये नमो नमइदं रूपास्यापते वेद्याया योपनिषद्रहस्यवचनैर्लीनाय चिद्रूपिणे ॥१५॥ साक्षित्वेन च कर्मणामपि परिक्षेत्रे वणिग्वान्नृणां वाण्या वाच्यतया पुनः पुनरभिव्यक्ताय च स्वामिने ॥ कक्षाणां गिरिगुल्मगह्वरनदी
421 कुंडात्मकानां सदा गोपुत्रैषु च सर्वतो निवसते नानाविधप्राणिनाम् ॥१६॥ अध्यक्षाय वनस्य धर्मगहनत्रात्रे नमस्ते नवा यस्मिन्विश्वमिदं स्थितं भवति यस्तास्मिंस्थितः सर्वतः यः शक्त्या भुवमातनोति निजया कर्त्ता धनस्यापि यस्त्राता चार्जयतां धनस्य कृतिनां दक्षो तमानां धनम् ॥ यस्त्राता वरिवस्कृतां करुणया येनैव विष्ण्वात्मना यारीशात्मतया च वारिणि सदावासः कृतो येन च ॥ भूम्यात्मा स्वयमोषधीः प्रजनयन् ग्राम्यास्तथारण्यकास्ताः सोमात्मतया च पाति सततं तस्मै नमस्ते नमः ॥१७॥ नम उच्चैर्घोषाय ॥ उच्चैर्घोषवते =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९६ महार्णव महामेघादिरूपायते शंभो पाहि शिवेति भक्तनिवहैरुद्घुष्यमाणाय च ॥ यश्चाक्रंदयते रणोद्य अ.२७
मसमाह्वाने भटानां मुहुर्यः शक्तोपि जगंति जेतुमखिलान्येकः स्वयं लीलया ॥१९॥ पत्तीनां च पत्तिः पदा
ति शतकोटीनां च नेता भवत्तस्मै देव नमो नमोस्तु भवते कल्पांतकाले जगत् ॥ नमः कृत्स्नायतया धावते ॥
कृत्स्नं वीतमभूच्च येन हरता कृत्स्ने च भूते सदा चासौ नोपि च संनिधाव पि सदा कल्पांतरात्रौ तथा ॥
॥२०॥ यो सौ केवल एक एव हि शिवः कृत्स्नात्मकः शिष्यते भक्तं शोधयातिप्रसीदति पुनस्तस्मै च शी
घ्रं सदा ॥ वत्सं गौरिव चानुधावति परित्रातुं स्वभक्तं जनं नेत्रे ब्रह्मविदामनेकविधसत्वानां च तस्मै नमः ॥
२१॥ मेधा राज्य वशीत्वमावर वधू शत्रुक्षयाद्यं फलं भक्तानां प्रदिशंतमीश मृषिणा मंडूकधाम्ना चिरम् ॥
ध्यातं रुद्रमहं भजे सुरतरोर्मूले निषण्णं सदा गौर्या मौक्तिकभूषणां गममलं बालेंदुगंगाधरम् ॥ ॥
श्रीस्कंद उवाच ॥ ॥ नमस्ते रुद्राद्यैः प्रतिपदनमोंतैर्मुनिगणैः ऋषे देव ध्यानप्रतिवचनवाक्यार्थम-
३० धुरैः ॥ निरुक्तै रुक्तोर्थः श्रुतिशिरसि बोधाय सुगमउपायस्तेज्यायानकथयदुमायै स भगवान् ॥ २३॥
गौरीनायक भाषितो यमगजा प्रीत्यैनुवाकद्वयस्यार्थस्तं विवृणोमि शंकरमुखाच्छ्रुतं यथा निर्गतम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्तिस्वस्तिभवौषधं हरिहरब्रह्मादिमृग्यं मुने भाष्यंत्वे तदपारशिष्यसहितः संश्राव्य मुक्तो भव ॥२४॥ ॥
इति श्री शिव रहस्ये ईशानाख्ये द्वादशांशे रुद्रार्थनिरूपणं नाम सप्तविंशोध्यायः ॥ श्री काशीविश्वे
श्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ श्री स्कंद उवाच ॥ नमः सहमा- ॥ हर्त्तुं भर्त्तुमकर्त्तुमाशु च जगत्कर्त्तुं कृ
कृत्या
तं चान्यथा कर्त्तुं दुर्घटमेव संघटयितुं शक्तस्त्वमेकः प्रभुः ॥ तस्मात्ते सततं नमोस्तु विजया शक्त्याभिभूतं जगत्स
र्वं स्वात्मनि कुर्वते च सहमानाया पराधान्सताम् ॥१॥ साधून्पालयितुं खलांश्च नितरामाविध्यते तेबलं याः सेना
९२८ अभितः परानभि~~कः परान भि~~मुखाः तांसां च नेत्रे नमः ॥ देवेशाय नमो महावृषककुद्भागा[redacted]धिरूढायते
प्रोद्यत्खड्ग महाप्रहारपटवे चौर्यायलीलात्मनाम् ॥ २॥ चौराणामपि भक्तवत्सल तया संरक्षकाया थवा तेषां श्रेष्ठ
तमाय सर्वहरणाद्दंते नमस्ते नमः ॥ उद्यत्खड्गवते जनेषु नितरां भक्तेषु सत्कायवा तूणीरोत्तमधारिणे प्रहरतां सा
क्षान्महारण्यके ॥ ३॥ नमो वंचते ॥ व्याधानां पतये नमो नम इदं ते वंचनां कुर्वते यः कुर्वन्नपि विप्रलंभमभितो व्या
हन्यते नापरैः ॥ तस्मै ते परितः सदा विचरते हर्त्तुं परेषां धनं नित्यं कृत्रिमसाधुवेषमयतां नानाविधच्छद्मनां ॥४॥
स्तायूनां पतये नमः ॥ स्तायूनां पतये नमो नम इदं संहारशीलाय ते दार्ढ्यार्थं नितरां वनेषु सततं त्रातुं जनाना=
(नमो निचेरवे)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८७ श्रितान्॥ सुव्यक्तं परितः सदैव चरते स्वामिन्नरण्ये निशं दस्यूनां वसतां नमोऽस्तु पतये तेभ्योऽपि नित्यं नमः॥५॥
नमस्तका.॥ ये रुद्राः सदृशास्त्वया धृत महावज्राद्यनेकायुधास्तेषां वानुचरा वरा युधधरास्तो माबितारो पथा॥
मर्त्यापेषाय हिंसकाश्च धनधान्यादीन्यलं मुष्णतां व्याधानां पतये नमोऽस्तु भवते तेभ्योऽपि नित्यं नमः॥६॥
नमो सिम.॥ उत्कोशाशिधरेभ्य आशु नगरे नक्तं चरद्भ्यः सदा चौर्यायैव हंति ये निशि धनं हत्वैव तेषा
मपि॥ नम उष्णीषिणे.॥ नाप्या या स्तु नमो नमो द्यतम होष्णीषाय तुभ्यं नमो व्याधैः संचरते हरं ति पृथिवीं
ये वा प्रक्रंता बलात्॥७॥ क्षुद्रारण्य गिरिप्रदेश पतयः क्षुद्रक्रियाभिर्धनाहर्त्तारः कुलुंच काश्च पतयस्तेषां
नमस्ते नमः॥ नम इषुम.॥ हस्ते नैकतमेन संप्रति दधानेभ्यो महेषुं धनुः॥ सव्येनान्यतमेन वा पापिक
रेणात्तं वहद्भ्यो नमः॥८॥ अस्यद्भ्यश्च नमो धकुर्वत इमे युद्धाय सज्यान्यलं सज्ये दिव्य धनुष्यमोघशरसंधा
नं मुहुर्वेगतः॥ कुर्वद्भ्यश्च नमो नमः शरवरान् संधाय चापे समुत्कर्षद्भ्यो विसृजद्भ्य एव च नमो भूयो
३। नमः सायकान्॥९॥ ज्यामुक्तानभितः परानभिमुखान्संप्राप्य द्भ्यः शरांस्तैः शत्रून्प्रहरद्भ्य एव परितः श
श्वन्नमो वो नमः॥ नमः स्वपद्भ्यो.॥ आसीनेभ्य इतस्ततो भुवि शयानेभ्यो गुहाभ्यंतरच्छाया सेन च वो नमो-

तव क्वचिद् धावद्भ्य

नम इदं तेषु स्वपद्भ्यः सुखम् ॥ जागृद्भ्यश्च नमो नमः क्वचिदधितिष्ठद्भ्यश्च नमो नमः समुपविष्टेभ्यः क्व-
चित्संघशः ॥ स्वामिभ्यः सदसां नमो नम इदं चाश्वगृहेभ्योथवा येषां श्वस्तन वित्तमात्रमपि नैवास्तिते-
भ्योपि च ॥११॥ अश्वाध्यक्षत मेभ्य उज्ज्वल महास्त्रिभ्यो नमः श्रीमती देवस्यानुचराः किरातवपुषः श्री
रुद्रसंघाः परे ॥ लीलासंभृत विग्रहा भगवतस्तस्यांश भूताः सदा ये चान्ये बहवः श्चरंति परितस्तेभ्योपि
नित्यं नमः ॥१२॥ स्वात्मानं हृदि भावयंतमनिशं रुद्रं रिपुघ्नं सतां राजामात्यसमस्त राष्ट्रपुरहृत्स्वश्वादि
१२८ रोषापहम् ॥ वर्होत्तंसधरं किरातवपुषं देवं युवानं श्वभिर्भूतैश्चावृतमग्रतो मुनिजनैर्ध्येयं सदा चिं-
तये ॥१३॥ यो त्रानुवाकत्रयमेतदद्भुतं योर्थं तथा ध्यानमिदं हृदा मुदा ॥ संधायमंत्रांश्च शिवस्य भाव
तः पठेच्च मुक्तिं समवाप्य मुक्तधीः ॥१४॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे स्कंदजैगीषव्यसंवादे त्रि
तीयानुवाकः समाप्तः ॥ ३॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ नम आव्याधिनी ॥ सर्वाभ्यश्च नमोस्तु या भग
वतः सेनाः समंतात्खलाना विध्यंति जगद्धिताय विविधं या स्ताउ यं त्सुध्यतान् ॥ या उत्कृष्टगणैश्च पत्तिनिव
हैः पूर्णाश्च या हिंसिनीर्व्यापारान् परिगूहयंति कुशलप्रज्ञा विशेषाश्च ये ॥ १५॥ तेषां ये पतयश्च ये त्वनिय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९८ तांवृत्तिं मुहुः संश्रिता नानाजातिसमुद्भवा बहुविधक्षुद्रक्रियाजीविनाम् ॥ संसूता अपतानवंत्यपिच
येये भूतरक्षोगणा रुद्राः पारिषदास्तथाधिपतयस्तेषांचयेयेपरे ॥१६॥ नग्ना मुंडितमस्तकातिविकृ-
ताकाराश्चये स्वेच्छया सिंहव्याघ्रगजाश्वसौरिभवृषाद्याकारभाजाश्चये ॥ नानाकारगणप्रभावविभवै
र्नित्यंमहांतश्चयेक्षुद्रास्तान् •गुणप्रभावविभवायेवारपाधिष्ठिताः ॥१७॥ येयुद्धेषुरथान्वितेषुचरणै
र्धावंति शत्रून्मुहुर्येचंद्रार्कमहीमुखाःसुरगणाःप्राप्तारथत्वं विभोः ॥ येरक्षंति रथान्बहून्स्वयमपाह
ह्येवशक्त्या स्वया येरुद्राः परीतः शिवस्य पुरतः सेनात्वमे त्यासते ॥ येतासामपिनायकाःसुरवरायेसू
तरूपाःसुरायेगृ हंति रथेषुरश्मिनिवहान्सूताज्ञया किंकराः ॥ येस्युर्वर्धकिजानिजा अपिचयेद
क्षारथानांकृतौयेजाताश्चकुलालजातिषुतथायेलोहकाराश्चये ॥१९॥ नानापक्षिसमूहबंधनविधौद
क्षाश्चयेवैजनामत्स्यादिप्रतिघातका अपिचयेकुर्वंति तीक्ष्णानिषून् ॥ येवाधन्वकृतश्चयेवनमृगव्या
32 धाःसदा येनराने तारश्चपशूनांचवृत्तिनिरता येवापशुनामाकृतिम् ॥२०॥ विभ्राणा अथयेपशूनांचपतयः
शंभोरथांशांशकाः ॥ सर्वेमर्त्यजगद्गताः कुमनुजादिश्वेश्वरांशाश्चते ॥ येभूमौदिविचंद्रसूर्यधरणीब्रह्मा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्नि विष्णवाद्यो ये रुद्राश्च जगं ति पांति परितः पूर्णाः शिवस्यांशकाः ॥२१॥ येसं तिप्र मदादि रूप चरिताः सर्वे
भ्य एवाधुना ते भ्यः संप्रति पूरुषं स्तु तिन तिं कृत्वा नमस्कुर्महे ॥ शं भुं दुः सहदुष्ट कष्ट विविध व्याधिज्वरा
पस्मार प्रक्षी णारमजं शिवं स्मर हरं दुर्वा सना म्नार्चितम् ॥ २२॥ भस्मो द्धूलित विग्रहं त्रिनयनं भास्वज्ज
टा मंडलं स्वासीनं वृष भे गणैः परिवृतं सांबं सदा भावये ॥ श्री रुद्रं यजुषां च मध्य ममहा कांडे चतुर्थे स्थि
427 तं संसारा मय भेषजं प्रज पतां विश्वेश भक्तिप्रदम् ॥ २३॥ तस्मिन्नर्थयुतो वि भाषति हृदा मंत्रानुवाकोमुदा
चातुर्थः सकलात्मतां भगवतीवक्तुंप्रवृत्तो मुने ॥ इति चतुर्थानुवाकः समाप्तः ॥ इतिश्री शिवरहस्ये ईशानाख्ये
द्वादशांशे स्कंदजैगीषव्यसंवादे अष्टाविंशोध्यायः ॥२८॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ श्री ईशानायन-
मः॥ श्रीस्कंद उवाच ॥ नमो भवाय ॥ विश्वं यः सततं वि भर्तिम मधिष्ठायैव मूर्त्यष्टकं यस्त्वा भि स्ता भिस्त
नुभिः शिवा भिरनु गृह्णातीव तस्मै नमः ॥ यः सर्वत्र सुपूर्ण एव भव ति स्वस्मिन्विलीनं जगद्भूयो-
भावय ति स्थितं भवति तद्यस्मिंश्च यो भाव्यते ॥१॥ योंगीन्द्रै र्भगवान पां स्वय म धिष्ठाता च योसौ रुजां नि-
संद्रावयिता सतां स्वय मधिष्ठाता च सूर्यस्य यः ॥ तस्मै नित्य मिदं नमोस्तु युग पत्कल्पांतकाले जगत्सृष्टेर्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८८ शुविहिं सते स्वयमधिष्ठात्रे तपाग्ने रपि॥ ३॥ आज्ञादंडधरः प्रसारितमहामायोरुपाशः पशून्ब्रह्मादीनवतीह भूत निवहाधिष्ठातृरूपश्च्यय:॥ तस्मै सर्वसुराधिकाय जगतामीशाय तुभ्यं नमो नीलग्रीवकलेवराय शितिकंठाय तुभ्यं नमः॥ नमः कपर्दिने॰ ॥ योगीशाय कपर्दिने खिल महायोगेषु दीक्षाभृते तुभ्यं व्युप्तशिरोरुहाय यजमानाकाराय तुभ्यं नमः॥ नमः सहस्रा॰॥ देवेशाय सहस्रलोचन भृते शक्रात्मने ते शतान्यत्यंतोत्तमधन्वबाण विविधानेकायुधानां युधि॥ ४॥ नमो गिरि॰ ॥ बिभ्राणाय नमो गिरीश्वरकृतावासाय दिग्वाससे रश्मिव्रातधृत्तार्कमंडल समाविष्टाय सूर्यात्मने॥ सर्वप्राणिहृदंबुजेषु वसते तुभ्यं नमो रेतसः सेक्त्रे दिव्यहिरण्मयस्य च हरे गर्भे विधात्रे विधेः॥ ५॥ शूराय त्तमहेषवे नम इदं स्वल्पप्रमाणाय च स्वेच्छासंकुचितांगकाय च नमस्तस्मै बृहद्रूपिणे॥ नानाकारवयस्तपोभिरभिवृद्धाय तस्मै नमो वृद्धायाधिकदीर्घकालवयसां स्तोत्रैः प्रवृद्धाय च॥ ६॥ सम्यग्वर्धयते स्वभक्तनिवहान्देवाय तस्मै नमो विश्वाग्र्याय तथा प्रधान पुरुषायेदं नमोस्त्वाशवे॥ नमः शीघ्रि॥ शीघ्रानेक गतिप्रभेदकुशलायेदं नमः शीघ्रगास्वाविर्भावयते च तासु विविधाकार प्रवाहासु च॥ ७॥ नम ऊर्म्या॰॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्यं संन्निहिताय ते नमइदं स्थात्रे महोर्मिष्वपांनिष्कंपाविगतस्वनाः पुनरव्याचीनस्वनाश्च्यापि या:॥
आपस्तासु च सर्वदा निवसते तस्मै नमः स्रोतसां मध्ये सन्निहिताय किंच वसते द्वीपेषु पुण्येषु च॥५॥
नमो ज्येष्ठाय॥ तुभ्यं देव नमः पितामहहरींद्रेभ्यः प्रशस्ताय च ज्येष्ठायाति मनोज्ञ नित्यतरुणाकारा
य नित्यं नमः॥ विश्वस्मादपि पूर्वमेव वसते स्थात्रे च तस्मात्परं जन्मांतादि विवर्जिताय च नमो मध्येम-
४२८ सिद्धाय च॥६॥ लीलाशैशव धारिणे नमइदं तुभ्यं जघन्याय च स्थित्यंतादिमतामशेषजगतां मूला
य तुभ्यं नमः॥ गांधर्वनगरे तथैव नगरेष्वन्येषु च स्थात्रे धीशतया प्रतीपसरणे दक्षाय तुभ्यं नमः॥ ॥
नमो याम्याय॥ प्राणिप्राणसमूहसंयमनमप्यंते स्वयं कुर्वते नित्यं संवसते यमस्य च पुरे कालांतकाद्या
त्मना॥ विश्वक्षेमविधायिने नमइदं सौरात्मना चोर्वरास्वाविर्भूय समस्तसस्यनिवहस्यावर्धयित्रे स
दा॥११॥ धान्याद्यात्मतया खलेषु वसते तुभ्यं नमः सर्वदा श्लोके वाच्यतया स्थिताय सततं देवैः सह क्रीडते॥
कल्पांतेप्यविनाशिने श्रुतिशिरोवेद्याय तुभ्यं नमः स्वारण्याय च कक्षजाय च नमः शुश्रूषमाणाय च॥१२॥
वर्णध्वन्युभयात्मना श्रुतिपुराणादौ प्रसिद्धाय च प्रत्युक्तिप्रतिशब्दरूपिण इदं तुभ्यं नमः शीघ्रगाम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०० नम आशुषेणाय॥ सेनां पालयतेऽतिशीघ्रगरथायेदं नमः सूद्यते भूरश्रेष्ठतमाय दुष्टनिवहसंभिंदते ते नमः॥ अ॰२९
नमो विल्मिने च कवचिने च वर्मि॰॥ वर्मश्रेष्ठभृते विशिष्टविलसद्देहाय तुभ्यं नमो दिव्योपाय नमस्स्त
भाजनशिरस्त्राणादिकं बिभ्रते॥ आगुल्फं स्फलतलं विकंचुकभृते नित्यं नमोस्तु श्रुतिरन्याताय श्रुति
विश्रुतायुधभृते विरव्यातसेनाय च॥१४॥ ध्यानं॥ शंभुं शत्रुभयापहं जयमहासाम्राज्यसत्पुत्रदं गौ-
रीपाणिसरोरुहार्पितमहाहेमाद्रिबाणासनम्॥ बाणालंकृतपाणिमेण विलसद्धालें दुंगगाधरं
शांतं सुंदररूपिणं वृषवरारूढं भजे सर्वदा॥१५॥ रुद्रार्पविश्रुतपदार्थसुबोधसारवाक्यार्पवै भव
मिदं प्रकटानुवादम्॥ पंचास्यशांतश्रुतिविश्रुतपंचवाकवेदानुवाक मिदमेव महार्थसारम्॥१६॥-
नमो दुंदुंभ्या॰॥ देवीशाय नमोस्तु दुंदुभिमहानिध्वानरूपाय च प्रौढालुन्नतवैभवाय वसते देवैश्च
सार्धं सदा॥ भेरीवादनदंडरूपिण इदं तुभ्यं नमः सर्वदा धृष्टाधर्षयते विमर्शकुशलायाशेष विद्यासु
च॥१७॥ नित्यं भक्तजने प्रकृष्टकरुणाशीलाय तस्मै नमो दैत्यं कर्म च कुर्वते सुमनसां त्राणाय च ह्यात्मने॥
38 भक्तेभ्यः कृपयाप्रकृष्टधनदायेदं नमो विभ्रते खड्गं चेषुधिमुत्तमं स्मरदं तीक्ष्णेषु हस्ताय च॥१८॥ तीक्ष्णानेक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरायुधायच नमः सौम्योत्तमस्वो चित्तामोघानेकमहायुधायशु भसत्कोदंडहस्तायच ॥ नमश्रुत्या· ॥ तुभ्यंदेव नमोस्त्व
नेकविविधक्षुद्रार्थ संचारिणे प्रख्याताय चराचरमहालिंगेषु पूज्यायच ॥ १९ ॥ नीप्याय· ॥ निर्मग्नां भसि भूतले
सदुदके देशेशुचौकर्दमे विख्यातेषु सरस्सु विश्रुत नदीश्रेष्ठासु नादेपि च ॥ वैशंताय· ॥ देवाद्यर्थ निवेशितेंवुनि
वहे कूपेषु गर्त्तेषु च सद्वर्षांभसि भूतले सदुदके विद्युत्सुतमां भसि ॥ २० ॥ वीध्र्याय· ॥ दीप्ताभ्रे स्फुरदातपेषु च
महावाते च रिष्यन्महाभूतव्रातयुगांतदुःसह शिलावर्षी प्रसंवर्त्तके ॥ ग्रीष्मे वात समुत्थपांसु निवहेवात्या
429 सुवान्यत्र वाया: संत्यस्य तदात्मनाजग दिदं व्याप्यास्थिता यानिशम् ॥ २१ ॥ वास्तुपाय· ॥ यः सर्वाणि सदै
वपाति परितो वस्तूनि वास्तोष्य ति [?]त स्मै चास्तु नमोस्तु सर्व भुवनव्यापाय सर्वात्मने ॥ ऋषिर्दैवते ॥ रुद्रं-
भीमकनामकेन मुनिनाश्रीहेमकोशेन च ध्यातं वरूप सुरूप वृष्टि सुत सत्सं पत्ति मेधायुषाम् ॥ २२ ॥ विद्या
रोग्य सुधेनु साम्राज्य मोक्ष श्रियां दातारं द्विपचर्मलं वितजयसर्पादि चिन्हं भजे ॥ रुद्रार्थसार वरमंत्र पदा
र्थसारपुण्यानुवाक विशदः खलु षष्ठ सप्तः ॥ २३ ॥ विश्वाधिकप्रणतिबोधक सर्वभाव पुक्तोहि भक्तनर-
मुक्ति गशक्तिदायी ॥ २४ ॥ इतिश्री शिवरहस्ये ईशानाख्ये स्कंदजैगीषव्यसंवादे स्कंदप्रोक्त रुद्रभाष्ये एकोनत्रिं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०१ ॐोध्यायः ॥२९॥ श्रीकाशी विश्वेश्वरार्पणमस्तु ॥ श्रीईशानायनमः ॥ श्रीस्कंद उवाच ॥ लोकानुग्रहकाम्यया अ·२९
खिलसतां धेयाः शिवाः सर्व याधत्तेयः शिवशं भुशंकर मुखानेकाभिधानास्तनूः ॥ तस्मैदेव नमोस्तु यःकरु
णयाप्रादुर्भवन्लग्रतो भक्तान्पाति सहोमयाप्र तिदिनं देवान्पितृन्मानवान् ॥ १ ॥ अन्यानप्यमृतेन तर्पय-
तियः सोमात्मनायज्वनः सर्वान भ्युदयेन योजयतियः सोमादिपाशात्मना ॥ रुद्रायेत्या· ॥ यश्चद्रावयतिस्व
यं प्रणमतां नित्यं रुजं योगिनां तस्मैदेव नमोस्तु नित्यमुदये काश्मीर ताम्रायच ॥ २ ॥ अरुणाय· ॥ सिंदूरा
रुण कांतयेतदनु ते सूर्यात्मनेदं जगत् धुत्पाद्योत्त पते-चशंगमयते प्रापय्य भक्तंजनम् ॥ ॥ पशुपतये· ॥ ॥
सर्वान्पालयते पशून्वि धिमुखान् चोरारितापव्यथा रोगेभ्यः कृपयाच तेनमइदंते दुष्प्रधर्षायच ॥ ३ ॥ दुःखाद्ये·
पवमानमूर्त्तयइदंये भ्यः समस्तंजगज्जन्मव्याधिजराविपत्तिमरणादिभ्यो विभेतीदृशाः ॥ यस्माद्बिभ्यति
तेपितेभगवतेतस्मैवियन्मूर्त्तयेतुभ्यंदेव नमोयदा खलजनाः साधून् जिघांसंतिये ॥ ४ ॥ आविर्भूयतद
ग्रतःप्रथमतस्तेषां निर्हंत्रेचये दूरेत्वामपहाय सर्वजगदाराध्यंकुमार्गे स्थिताः ॥ नमोहंत्रेच ॥ तेषामेवदुरा
३५ त्मनां शिवतरे कालेप्रहर्त्रे नमोहंत्रेहे तिवतेनयेन महताहंतव्यमाशुक्षणात् ॥ ५ ॥ तद्रूपाय पशूनक्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ताविश्वमहासंहारकालेबलस्यात्यंतातिशयेनहंत्यपिहरिब्रह्मेंद्रमुख्यामरान् ॥ अत्तायश्च चराचरस्यजगत
स्तस्मैनमोस्तुप्रभोरुद्राः पांतिजगंतियेचपरितोवृक्षादिरूपाः परे ॥६॥ हरिकेशे ॥ येरुद्राहरितामकेशनिव
हास्तेभ्योपिनित्यंनमः ॥ संसारार्णवमाशुतारयतियस्तारात्मकः सर्वपा ॥ ब्रह्मब्रह्मविदांचिरादुपदिशन्
तस्मैनमस्तेस्तु यद्दुःखापायमयंसुखंयदिचतद्भोग्यंपरत्रेहच ॥७॥ नमः शंभवे ॥ साक्षित्वेनतयोःशमि
त्यपि [illegible] मयश्चेतीयहविख्यातयो ॥ र्द्रष्टुंनित्यंसुखात्मनेनमइदंश्रीशंकराख्यायच ॥ सर्वस्मैजग
४७० तेकरोतिकृपयायः शंमयश्चानिशं तस्मैतेस्तुनमः शिवायचगुणातीतायशुद्धायच ॥८॥ इच्छाश
क्त्यवियुक्तचिद्घनशरीरायाव्ययायात्मनेपूर्णानंदतत्परायपूर्णसुखदायाजस्रपूर्वीयच ॥ क्षेपकः ॥
शतेदिशतिचश्रेयः प्रजानामसौशांतिंयातिसमस्तमंगलगुणग्रामैकसीमायते ॥९॥ इच्छाश
क्तिमुपैतिनिर्मलतरश्चास्तेप्रकृत्येतिचव्याचष्टेशिवनामयस्यविभवंतस्मैपरस्मैनमः ॥ शिवतराय ॥
लोकानामविपर्ययेणकुरुतेत्यंतंशिवंयःसदातस्मैचास्तुनमः प्रयागबदरीकेदारकाश्यादिषु ॥
॥१०॥ तीर्थ्याय ॥ तीर्थायोहिमरुद्वृधादिसारितांकूलंचगोदावरीकृष्णांसिंधुसरस्वतीमुखसरित्सारं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०२ तद्वीक्तरम् ॥ नित्यं सन्निहिताय तेषु जगतां त्राणाय तुभ्यं नमः प्राप्यैवोत्तमयोनिजन्मगुणमुत्कर्षं क्र अ॰ ३०
मात्प्राणिनाम् ॥ नमः प्रतरणाय ॥ मग्नानां भवसागरे करुणया चोन्मज्जयित्रे भवादूर्ध्वं चोध्धरते न-
मः क्रमवशात्संसारं भवांभोनिधेः ॥ प्राप्तान्कर्मवशेन जंतुनिवहान्नावर्त्तमानान्पुनः कर्त्तुं प्रेरयते धिय
स्तदनु तां मध्ये भवाब्धेश्चिरम् ॥ ११ ॥ नमः शष्प्याय ॥ सर्वान्भ्रामयते नमोस्तु भवते पुण्येषु दर्भादि
षु क्षुद्रप्राणिकुलेषु बालतृणवत्स्वल्पप्रमाणेषु च ॥ फेनेकेनवदल्पकालमथवा जीवत्सु जंतु-
ष्वहो प्येवं तत्सिकतासु तद्वद्दधिकक्षुद्रेषु नारेपि च ॥ नानापुण्यनदीप्रवाहनिवहे तत्तुल्यभूति-
ष्वपि श्रेष्ठप्राणिषु चेरिणेषु च तथा नित्यक्रियामानिषु ॥ प्रख्याते पथि च प्रकृष्टतरसन्मार्गानुव
र्त्तिष्वपि क्षुद्रानेकशिलातिकर्कशतरे देशे कुशीले जने ॥ १३ ॥ क्षयणाय ॥ वस्तव्ये विजनेजनेष्वपि त-
थायोग्येषु चैतेषु यः सर्वत्रैव मनुग्रहाय जगतामास्ते विभुः सर्वतः ॥ तस्मै तेस्तु नमः कपर्दिनइदं सत्कुंडलायांकिनिशं भक्ता
नां पुरतः स्थिताय च नमो गोष्ठगृहाभ्यंतरे ॥ १४ ॥ नमस्तल्प्याय ॥ तल्पेन [illegible]ल्पतरा तिरत्न विविधप्रासादम-
३६ ध्येतथा काटे पर्वतगह्वरेह्व स्वरेनीहारवातिष्यपि ॥ रजस्याय ॥ तत्पांसौ विषमेरजस्यपि तथा शुष्के पिचार्द्रे=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पि च देशे लुप्ततृणादिके च परितः पूर्णे तृणाद्यैः स्थले ॥ नम उर्व्याय ॥ उर्व्यां मध्यविलाकृतिप्रतिकृतौ पर्णे
षु पर्णव्रजे शूरे प्रस्ति शिवो य मेषमभितः सच्चित्सुखांशैः स्वयम् ॥ भूतं भावि च वर्त्तमानमनुगृह्य त्येषु ह्या
वुध्यास तां भक्त्या श्री व यतां स एव सुलभ स्त स्तै नमस्कुर्महे ॥ १६ ॥ अभिघ्नते ॥ हंत व्यानभिहंतुमायुधवरैरुद्यम्य संधा
वते दुष्टा न स्तैरभिनिघ्नते नम इदं कांश्चित्समापीडनैः ॥ प्रखिदते ॥ कांश्चिच्चापि खलान्बलस्य महतः स्वस्व-
प्रकर्षेण चालयंतं भेदयते समस्तजगतां क्षेमाय योगाय च ॥ १७ ॥ क्षयिदेवता ॥ स्वात्मानं हृदि भावयंतमनिशं रु
द्रं स्वसारूप्यदं साम्राज्यादि रिपुक्षयादि निखिलाभीष्टप्रदं ध्यायताम् ॥ सप्तद्वीपमहाधिपत्यदमनंतोद्य
४३। द्दिनेशद्युतिं भूतेशं भुजगेंद्र भूषिततनुं कंठे कलंकं भजे ॥ १८ ॥ नमो वः कि ॥ इष्टतुष्टफलप्रदाः क्रतुभुजो ना
नाधिकारास्त्रयस्त्रिंशन्मानमितैर्गणैस्त्रिगुणितैः स्वांशैर्गणेशान्वितैः ॥ प्रत्येकं परिचारिताः स्वसदृशैर
न्ये श्रवायोस्तथा सूर्यस्योग्र विभूतयः क्रमयुता एकादशैकादश ॥ १९ ॥ संघीभूय वसंति येऽधिपतयो-भू
म्यंतरीक्षद्युषु त्रिष्वन्यैः सह षड्भिरेवममरैः सर्वैः सह प्राणिषु ॥ त्रीणि त्रीणि शतानि चोपरि नवत्रिंशच्च
देवा भवंत्यंशा जीवघने स्य पंकजभुवो वन्हेः स्फुलिंगा इव ॥ २० ॥ ते देवाः कथमीश्वराः कथमपि ध्यानेनयो=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गेनवारुद्रान्वः परमेश्वरान्भगवतोजानंस चिंतानपि ॥ जानीमः कथमल्पकाश्वयमथापि स्वेच्छयेदं जगत्कुर्व
भ्यः कृतमेतदेव नितरां विस्तार्य भ्यः सदा ॥ २१ ॥ देवानां हृदयेषु योगजधियातेषां वसद्भ्यो यथा सज्जंभ
क्तिवशेन शंतमहृदा रुद्रान्नमस्कुर्महे ॥ नमो विक्षीणकेभ्यः ॥ प्रारब्धाखिलकर्मबंधविनिवृत्त्यर्थं च पा
पालनामाधिव्याधिजरादितस्करमहासर्पादिनक्रादिभिः ॥ २२ ॥ क्षिण्वद्भ्यो विविधं नमस्तनुभृतां
कर्मानुरूपं फलं दातुं दुष्कृतिनास्ति मे सुकृतिनश्चेमे किलेत्यन्वहम् ॥ लोकानुग्रहकाम्यया पि च विचि
न्वद्भ्यो नमोवो यदा मर्यादं च सुनिश्चितं च नियमेना युःक्षये प्राणिनाम् ॥ २३ ॥ हंतृभ्यश्च नमः कृपं
चिदपि संपर्युः क्वचित्पापिनः पापिनो नि हि शासितुं तनुभृतः सर्वान् समंतात्सदा ॥ नीरंध्रं मविजृं
भितं जगदिदं व्याप्य स्थितेभ्यो नमः श्रीरुद्रानुचराश्च गुह्यमपरे ये संति तेभ्यो नमः ॥ २४ ॥ ॥
देवताध्यानविनि॰ ॥ स्कंद उवाच ॥ कन्यापुत्रसुवर्णराज्यनृपवश्यादि दृश्यास्त्रियः शत्रोर्नाशधनायुरु
त्तमशयः पौत्राश्वगोजादिकं साम्राज्यं प्रदिशंतमात्मनि भजंतं तं सहस्राक्षिपञ्चश्रोत्रघ्राणशिरो
३ भिरावृतममुं श्रीश्वरं चिंतये ॥ २५ ॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे स्कंदजैगीषव्यसंवादे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्कंदप्रोक्ते रुद्रभाष्ये त्रिंशोध्यायः ॥३०॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीउमेशानायनमः ॥ श्रीस्कंद-
उवाच ॥ व्यक्ताव्यक्ततया चराचरमयं विश्वं सदा तन्न हि व्याप्ता विश्वभवाभवस्थितिकृतो विश्वात्मका
विश्वपाः ॥ विश्वस्मादधिकाश्च विश्वपतयस्तन्निग्रहानुग्रहव्यग्रास्तु ग्रसुमोत विग्रहकृतो रुद्रा
स्त्वदंशाश्च ये ॥ तद्रूपेण वयं नतिस्तुतिशतैस्त्वां प्रीणयंतोधुना सुप्रीतं वरदं कृपालुमभयं संप्रार्थ-
यामः शिवम् ॥ १ ॥ द्वापे अंध ॥ बिभ्राणः कवचं विभाति भगवान् यः पापिनो दुर्गतिः प्रत्येदं खलु दुः
432 खदुःसहमसंसारदारिद्र्ययोः सोसौ पापहतान् समस्तभुवनध्वंसात्मिकायागतेः शश्वत्कारयिता
च यो खिलजगन्नाथोन्नदोपि स्वयम् ॥ २ ॥ दरिद्र अ ॥ निस्वश्चागतिरेक एव निखिलालक्ष्म्यस्व
रूपः सदैवास्ते तस्य दरिद्रवज्जगदिदं यन्नामरूपात्मकम् ॥ सर्वं स्थूलशरीरमेव यदिदं यस्य
स्व हृद्यंशतो यः संभूय च नीललोहित इति ख्यातः शिरः पंचमम् ॥ ३ ॥ उद्धृत्तस्य बिभेद धातुरग
जा विष्णोश्च वामं वपुर्यो दृत्वा सविलास लोहिततनुर्निर्दोषरूपश्च यः ॥ कंठे नीलमतीव लोहि
त निभं चान्यत्र गात्रे शिवं धत्ते यः सततं दयामयतनो सत्वं प्रसन्नोधुना ॥ ४ ॥ एषां पशूनाम् ॥

१०४ एतान्पुत्रकलत्रमित्रपरिवारादीनि मा॰ गोमहिष्यश्वादीन्निहनः पशूंश्चनमतान् भीतानक्रुधामा कृ अ॰ ३१
थाः ॥ दुःखादैश्च कदापिमागमयतादात्तिंप्रसादात्तव स्वामिन्किंचिदपिज्वरादिकमिमान्मा
बाधतां क्वापिच ॥ ५ ॥ मंत्रदेवता ॥ प्रध्यातंपुलहेन रुद्रमनिशं भूताभिचारादिकं द्रोहारिष्ट भ-
यापयन् धनमहासिद्धिप्रदं ध्यायताम् ॥ आगुल्फं शितकंचुकं डमरुकोद्युक्तं लसत्कुंडलं ध्या
येत्कुंडलिपुत्ररूपं सुतिलकंसन्तूपुरं भैरवम् ॥ ६ ॥ यातेरुद्रशिवा ॥ गन्तुं तुंगतुरंगसंवृत महामातंगमध्यस्फु
रद्धावल्गौरथायुतावृतलसज्जांबूनदस्यंदनम् ॥ अध्यास्य ह्यवतिक्षितिं रपिवरैर्माणिक्यसिंहासने ब्रह्मा ज्ञा
दिनिजाश्रितैर्जनवरः संपूज्यया मानवः ॥ ७ ॥ इंद्रब्रह्मपदे च संपत्फलं साक्षाच्च मोक्षश्रियं सालोक्यादिच
तुर्विधां च भजतां तद्भाग्यसाम्यं फलम् ॥ यातेतत्पुरुषस्य रुद्र शिवदा पूर्वातनूर्योगिनां सर्वंयच्छतियाचदक्षिण
तनुः संसाररुग्भेषजी ॥ ८ ॥ प्रक्षीणाखिलकर्मभिन्नहृदयग्रंथिप्रनष्टाखिलाज्ञानं छिन्नसमस्तसंशय
मपास्तद्वैतमस्तारिकम् ॥ ज्ञानं प्रत्यगभिन्नचिन्मयपरब्रह्मैकलक्ष्यं परं सर्वान्बोधयतः सदामुनिजनान्
चिन्मुद्रया भद्रया ॥ ९ ॥ रुद्रस्यादिगुरोः सतां शिवमयीयास्यात्तनूरूर्ध्वगातस्य ज्ञानघनात्मिकातवगुणातीता =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवाख्यासदा॥ नित्यात्यंतिकवंधमुक्तिफलदाचेशानमूर्तेः सदाताभिस्तेतिस्तभिस्तनुभिरभितस्त्वासज्ज
नैकार्थिनः॥१०॥यावन्मानुषभोगलाभनिलानंदेनदीर्घायुषंत्वामाराधयितुंशिवेसुखयनःशंभोदयांभोनि
धे॥ इमा॰ रुद्रा॰॥ ज्ञानैश्वर्ययशोदयादिसगुणैः सर्वैरनंतैर्बलैः संवृद्धः कृपयासकृत्क्षणमतामप्येकभ-
क्त्यासताम्॥ ११॥ यः संवर्धयितायएवनिखिलब्रह्मांडविध्वंसनाविर्भावोद्वहनैकधृष्णुपरमंधत्तेब
लंकेवलम्॥ कपर्दिने॰॥ योसौदिव्यकपर्दभृद्यमभितस्तेवीरभद्रादयोवीराश्चाधिवसंतियस्यमहतावीर्ये
४१३ णधीरोद्धुताः॥१२॥क्षीयंतेनिखिलाःखलाभगवतेरुद्रायतत्तेप्रियांनित्यंतांविभृमोवयंमतिमियंया
मानसार्चीमयी॥सर्वोत्कृष्टफलार्थिभिर्मुनिजनैःसर्वेश्वरः सर्वथाध्यातव्यःशिवएवकिंचवहुधायष्ट
व्यएवानिशम्॥स्तोतव्यः परिकीर्तनीयइतियाविच्छेदनीयामतिस्तांलब्ध्वाशिवमेवसर्वमितरत्संत्य-
ज्यसर्वात्मना॥ विश्वंपुष्टंग्रा॰॥ ध्यायंतःसततंभजामइहनःशंशंकरस्यप्रभोतस्यैतत्कृपयायथास्वपरि
४०० वाराणांचकिंचाधुना॥१३॥ ग्रामेस्मिन्निवसत्यशेषमपियद्यत्प्राणिजातंचतत्तुष्टं[पुष्ट] मनातुरंचसुखितं
० भूयात्तयोपास्महे॥ मृडानोरु॰॥स्वामिन्रुद्रनमस्क्रियाभिरनिशस्तोत्रैर्हविर्भिःक्षपद्वीरंत्वांवयमादरा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वरिच्चेमास्मासु कुर्वन्कृपाम् ॥ १५ ॥ दारापत्यधनादिभिस्तु सुखितान स्मान्कुरुष्वापि च ब्रह्मानंदमयं
१०५ च यत्तदपि नः श्रेयः कृपां भो निधे ॥ यद्वा प्रार्थनया नयानयभिदा शंभो यमारे धुना भक्तिः सर्वफ
लप्रदा भवतु नः सर्वात्मना सात्विकी ॥ संसारज्वरदुःसहार्तिहरण स्वामिन्त्वदनुग्रहः पूर्णो नः किम-
० साध्यमस्ति भजतां तस्मात्त्वम स्मत्पिता ॥ १६ ॥ यच्छंच योश्च ॥ सृष्टत्वेन नियोजितः स भगवान्-
लोकेश्वरः स्वस्य यत्प्रागागतदुःखहेतुशमनं वांछन्त्वदाज्ञाक्रमम् ॥ नातिक्रामति तत्तथैव च वयं त्वत्पस्या-
मेहयन्मनुः स्मर्ता सौ यत्कृपया समस्तजगतां क्लेशप्रहाणक्रमम् ॥ कार्त्स्न्येनोपदिदेश सर्वभुवनं स्रष्टा-
विधिर्मानयन्नादत्ते च वयं च दुर्लभमपि प्राप्स्याम हेत्तपा ॥ ऋषिध्याना. ॥ देवं गोधनवर्धनं प्रणमतां
हृत्स्यश्वरत्नाकरं मांडव्येन महर्षिणार्चितमुमाकांतं प्रसन्नाननम् ॥ चंद्रोद्भासितशेखरं मुनिजनैः संस्तू
यमानं प्रभुं ध्यायेद्दुद्रुमभीष्टदं प्रणमतां सिंहासनाधिष्ठितम् ॥ १७ ॥ मानो महांत. ॥ स्वामिन्रुद्र मदी
यं ग्राममखिलं वृद्धं युवानं शिशुं गर्भस्थं पितरं च मातरमिहास्वाकं रुषा मा वधीः ॥ मा हिंसीश्च प्रियास्त
३९ नू बहुविधा व्याध्यादिवातातपैः शस्त्रास्त्राग्निमहाहिवृश्चिकअरिव्याघोग्रसिंहादिभिः ॥ १९ ॥ ध्याना. ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वाभीष्टफलप्रदं प्रणमतां देवं दयाशेवधिं देवेशं हृदि देवरात मुनिना ध्यातं गणेशावृतम्॥ तं नंदीश्वरवंदि
तं सुविमलं बालेंदुचूडामणिं बालादित्यसमानकांतिमनिशं श्रीरुद्रमेवं भजे॥२०॥ मानस्तो०॥ स्वामिन्रु
द्र वपा हविश्चरुपुरोडाशाज्ययागैर्मुहुः प्रीतिं ते नमसाच संप्रति वयं संपादयंतोधिकाम्॥ देवं त्वां करुणा
निधिं परिचरेमास्मासु कुर्वन्कृपां भक्तानामपराधिनामपि वयः पुत्रेषु पौत्रेषु वा॥२१॥ मानो गोषु०॥
१४५ गोष्वश्वादिषु चास्मदायुषि रुषा हिंसां विभो मा कृथाः किं चास्मत्कुलवर्धनानि हरणे दाने च धर्मे धने॥
बालं स्तन्यपरं स्तवीर सगणान् मानीवधीः किंतु तान्॥ वर्धिष्णूंश्चिरजीवनश्च कुरुतान्नः पार्थनीयं वि
भो॥२२॥ स्वात्मानं हृदि भावयन्तमनिशं रुद्रश्चिरायुर्महामार्गश्रेमसुवृष्टिपुत्रकनकश्रीकन्यकादिप्र-
दम्॥ त्वामेकादशधा विभक्तवपुषं तेजोनिधिं शूलिनं चंद्रालंकृतमौलिमिंदुधवलं शांताकृतिं भावये॥
आरात्ते गोघ्न॥ अश्रांतं पुरुषांश्च गांश्च नितरां ते विघ्नतः सर्वदा भीतिर्हिंसनगोचरातिभयदं रूपं च दू
रे स्तु तत॥ विश्वत्राणपरायणस्य जगतां मास्मासु भूयात्तया चंडी शाद्यवने स्ति सास्तु मयि सा प्रीतिः
सदास्मास्विह॥२४॥ सुम्नमस्मे॥ भक्तानां शिवदं सदाशिव शिवं रूपं च यत्तच्छिवायास्माकं पुरतः परि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्फुरतु ते किं चाधुनास्मान्विभो ॥ भृत्यान्रक्षसपक्षपातमधिकं दाक्षिण्यपूर्णं वचः क्षेमं योगमहं वहामि भ अ॰ ३१
१०६ वतामित्यादरा द्ब्रूहि नः ॥ २५ ॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे स्कंदजैगीषव्यसंवादे स्कंदप्रोक्त
रुद्रभाष्ये एकत्रिंशोऽध्यायः ॥ ३१ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ श्री स्कंद उवाच ॥ ॥
अध्याचनः ॥ श्री रुद्रार्पं च शर्म यच्छ भगवन्नामुष्मिकं चैहिकं कस्तादृक्सुखवर्धनः प्रणमतां देव लब्ध
प्रभो ॥ ऋषिः ॥ आयुः श्री सुखवर्धनं मुनिवरेणाराधितं चात्रिणा देवं तं सहिरण्यसन्निभलसन्मूर्तिं प्रसन्नाननम् ॥
बिभ्राणं ज्वलनं ज्वलं तममलं कुर्वाणमग्रे स्वयं देव्यास्तांडव मादरात्सुरगणैरासेव्यमानं भजे ॥ १ ॥ स्तुहि श्रुतमं ॥
अस्मानेव सदावितुं करुणया स्थित्वा रथे भूमये योऽरेव त्रिपुरान्पुरा समवधीद्यो गींद्रहत्कंजे ॥ मार्तंडस्य च मं
त्रिभुवनव्याप्तप्रभामंडले
डले नित्यं व्योम्नि परेत भूमिषु च यः प्रादुर्भवं स्तिष्ठति ॥ २ ॥ यः सर्वः श्रुतिषु श्रुतेषु निखिल श्रुत्यंत सारेषु चात्यं
तं विश्रुत दिव्यकीर्त्तिगुणचारित्रो सुवायः सदा ॥ मृगान्नभीम ॥ सिंहव्याघ्रमुखातिघोरमृगवद्भीमाकृतिर्दुर्हृ
दां यो वध्यानखिलानजस्रमुपसंहर्तुं खलानुद्यतः ॥ यश्चान्यान भिभूतशक्तिरसकृच्चोग्राकृतिर्मृत्युवद्वि
भ्रध्वंति खलांश्च यस्तमनिशं देवं महेशं स्तुहि ॥ इत्यात्मानमहं प्रसाद विमुखस्त्वां प्रेरयामि स्वयं भक्त्यास्तो=

८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिच भक्तिभीतिहरणं हेरुद्र तुष्टो भव ॥ स्तोतव्योपि सुरेश्वरैर्हरि विरंचाद्यैः प्रपन्नः किलापन्नोयं जन इत्यनन्य
शरणं मामप्यतीवाल्पकम् ॥ स्तोतारं सुखय प्रसाद सुमुखः किंचास्तु किंचित्परं भूत प्रेत पिशाच राक्षस मुखा
घोरा भवत्सैनिकाः ॥५॥ अस्मत्तोन्यमधिक्षिपंतु सततं रक्षंतु नः सर्वदा सर्वस्माद्दुरिताद्भयाच्च भर्ग नि
त्यं प्रसादात्तव ॥ परिणोरुद्रस्य ॥ दुर्ज्ञेया विधयो विभिन्नमतिभिर्नीताश्च भिन्नार्थतां उच्छन्न विभिन्न-
विस्मृत महाशाखासहस्रा युताः ॥६॥ वेदास्त्वद्विहितास्तथा बहुविधास्तत्तव्य काल क्रिया मंत्राः स्वल्पतरं
च जीवितमतीवाल्पा च शक्तिर्मतिः ॥ दुर्विज्ञेयतरं सुदुष्करमतः कर्माखिलं तद्भवद्कृपा नः सफलं भवे-
485 दिति यथा संभवम् ॥७॥ यज्ञात्माखिलयज्ञभुक्त्वमिति हि त्वां देव यक्ष्यामहे यज्ञैरेव वपा हविश्चरुपुरोडाशा-
ज्यवंतो वयम् ॥ दंभाहंकृतिदर्पपूर्णहृदयादन्यांज्ञं ते परान्ये तेषामघमिच्छतस्तव मुहुर्हंतु प्रदीप्ता कृतेः ॥ अस्मान्प
० रिवृण ॥ उग्रा निग्रहरूपिणी स्थिरतरा या दुर्मतिर्मा कृपास्तामस्मासु कदाप्यतो मतिरियं हेतिश्च रुद्र
स्यते ॥ भक्तान्दूरत एनदेवदेव परितः सावर्जयत्वद्य नः सर्वान्किं त्ववमुंच चापमधुना ज्यावधम त्कृते ॥
मीढुस्तोकाये ॥ सृष्ट्वा विश्वमिदं महेश्वर तदेवानुप्रविश्य प्रजाश्च्या विच्छिन्नतया समस्तजगति स्त्वष्टुं=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रियांयोनिषु ॥वीर्यं सिंचसियप्रजापतिरतो मीढ्वा पितात्वं हिनस्त्वं पुत्रानिहपौत्रकांश्चमुखय श्री-
रुद्रशं भोप्रभो ॥१०॥ देवताध्या०॥ वं शीङ्करक शक्ति भक्तिसगुणाश्री कीर्त्तिमत्पुत्रदं ध्यायंत भगवंतमंतर-
निशं स्वात्मानमेव स्वयम् ॥ नानाप्रस्फुरदायुधं नत महापापौघदुःखापहं देवेशं गज-चर्म संवृततनुं श्रीकृ
त्तिवासं भजे ॥११॥ मीढुष्टम०॥ नाथो यः प्रकृतेः परश्च पुरुषः सर्वांतरात्माजपा लौहित्यं स्फटिकादिके-
ष्विव पयः पुं भाव संभावितः॥ पुं भावः पुरुषेषु भाति जगति स्वांशप्रधाने षुयः स्त्रीष्वेव प्रकृतिप्रधानत
नुषु स्वंवीर्य मासिंचसि ॥१२॥ योत्वंतं शिवदस्समस्तजगतां स्वत्वंप्रसादार्पिनामस्माकंच शिवोभ
वाद्यसुमनाः हानिर्न तेतावता ॥ धन्याः स्यामव यंच किंच परमेवृक्षे क्व चिद्दूरतो निक्षिप्यायुधजालमे-
तदखिलं पापात्मनां भीषणम् ॥१३॥ ध्याना दि०॥ सौम्यं वाहुविभूषणं करतले विभ्रत्पिनाकं धनुः शांतं कोतमु
पेत्य तापसवपुः कृत्तिंवसानः शुभम् ॥ वैयाघ्रं वन मध्यतः करुणया भ्यागच्छ पाहिस्वकान्रक्षन्नः पुरतश्चरा
चर हितं श्रीरुद्र शंभोप्रभो ॥१४॥ विकिरिद्र०॥ अर्थप्राण विपत्ति संशय भयक्लेशारि-चोरव्यथाभीतिघ्नं
हृदि भावयंत मनिशं शंभुं स्वरूपं स्वयम् ॥ अभ्यायांतमतीव सुंदर तनुं सन्मंगलैकालयं सानंदं चपिना=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किनं वनचराकारं युवानं भजे ॥१५॥ लौहित्येन विवर्जितं गिरिजया यस्यांगमर्धं सदा यं वेदांतगिरो वदं-
ति सततोऽसंगो ह्ययं पूरुषः ॥ कालुष्येण विवर्जितः शिव इति ख्यातश्च यः पूजितः सद्भिः सद्विविधा भ-
यार्तिभयहृत्संसारघोरापदाम् ॥१६॥ यस्त्वं खंडयितासि कांडनिवहान् चंडान्न कीर्यभितः दंड्यान्दंडयासि
स्वयं च हरसि स्वैर्भीषणैरायुधैः ॥ ज्ञानैश्वर्ययशःसुवीर्यकरुणावैराग्यभाग्यामितः ॥ श्रीभिः पूर्णधृता-
युधस्तु भगवान् तस्मै नमस्तेऽधुना ॥१७॥ सहस्राणि सहस्रशो य- ॥ यास्तेसं तु सहस्रमाशुगतयस्ता हेत-
१३८ यःपाणिनां शास्तः केचिदधिक्षिपलघवतां मध्ये स्मदन्यं तया ॥ भक्ता एव वयं भवाम भवतः सर्वात्म-
ना सागसः पाह्यस्मान् निदमेव ते सुमनसो नित्यं समाशास्महे ॥१८॥ तियक्कजं तु महाजलूकजनतावस्था-
दिसिद्धिप्रदं देवं सर्वजयप्रदं च भजतां शंभुं पुलस्त्यार्चितम् ॥ सस्कंदं जगदंबया युततनुं देवादिहृद्दैस्तु
तं सांबं कुस विवाहमंगलविधिं स्मेराननं भावये ॥१९॥ असंख्याता सहस्राणि ॥ प्रत्येकं च सहस्रधा
बहुसहस्राणां सहस्राणि याः संत्यलुत्तम हे तपस्त वशिवासंख्येयबाहुष्विह ॥ ताः संक्षेपण तत्समुद्भव
महाहिंसाविधानादिकेष्वीशानो भगवन्ननु सृजस्यवासि तच्चित्रं किमत्र प्रभो ॥२०॥ पुण्यापुण्यकृतः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०८ परस्परमसंभिन्नानलक्ष्मंक्षणात् लक्षीकृत्य तु पूर्णपापवशतस्तन्निग्रहानुग्रहे ॥ हर्तुं भर्तुमशेषलोकमपि यस्त्वं भा
विकामीश तां धत्सेतः करुणावशाच्छरणगान् त्रातुं सदास्मान्प्रति ॥ २१ ॥ हेतीनां तु मुखानि चानभिमुखान्यस्मा
कमस्मद्द्विषां नित्यं चाभिमुखानि देव कुरु नः सौख्यप्रदानि प्रभो ॥ दैवोपद्रवराजपीडनमहाकांतारजोरुव्य
याभीतिघ्नं हृदि नारदेन मुनिना ध्यातं सदा सर्वदम् ॥ २२ ॥ रुद्रं सर्वमनोज्ञभूषणधरं सर्वायुधालंकृतं सर्वा
घौघहरं च सर्वजगतामीशं (महेशं) भजे ॥ कल्पादौ विधिनार्पितेन कृपया रुद्रेण ये निर्मितास्तत्तुल्याकृतयस्तदी
यकृतयस्तद्दृतयस्तद्विमः ॥ २३ ॥ लोकानु(ग्रहनि)ग्रहैकनिपुणाः कर्मानुरूपं फलं यच्छंतो निवसंति ये च परि
तः सूर्यानिलाग्न्यंशकाः ॥ विश्वेदेवगणाः प्रसिद्धमुगणास्तेजो मरुत्पार्थिवाकारा ये च महेश्वरस्य बहुधा
नित्यं विभक्ताः कृतेः ॥ २४ ॥ भक्तानुग्रहतत्परस्य बहवः सानुग्रहा विग्रहा ये भक्ता शिवभावनामधिगता रुद्राः सरु
पा हिते ॥ वैय्याघ्राजिनभोगिभूषणभृतो बालेंदुगंगाजटाजूटालंकृतमस्तकास्त्रिनयनाः सांबाः सनंदीश्व
राः ॥ २५ ॥ ये देवानुचराश्च देवसदृशा देवा गणाधीश्वराः सर्वे मीभजतां शिवात्मकतया संसाररुक्द्रावकाः ॥ म
लोके तु सहस्रशो बहुसहस्राणां सहस्राणि ये रुद्रा भ्यापिवसंत्यधीश्वरतया भूम्यंतरीक्षे दिवि ॥ २६ ॥

४२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ये सर्वत्र भवा भवेन सदृशा अस्मिन्महत्यर्णवे वृष्टिं नः परिपूर्णमेघनिवहैः पूर्णांतरिक्षेपि च ।ये हालाहलनी
लकंठवपुषः शर्वाः क्षमायामधः पातालं प्रचरं तिर्यपि च दिवं रुद्रासदोपाश्रिताः ॥२७॥ तानेवं श्रुतिभिः स
दैवनातिभिश्चाराधयंतो वयं तेषामद्य सहस्रयोजनमिते दूरे स्थितानामपि ॥ अर्वाक् तत्परतः पुरश्च
परितः सज्यानिधन्वान्यलं विज्यान्यातनुमः सुखाय सततं क्षेमाय योगाय च ॥२८॥ राज्ञां शत्रुविनाशनं प्रण
मतां घोराभिचारक्रियासंभूताघनिवारणं च मुनिना दूर्वाससाराधितम् ॥ विभ्राणं त्रिशिखं भ्रदी भववपुषं
४३७ रुद्रं ज्वलन्मूर्धजं भोगींद्राभरणं भजे भयहरं दंष्ट्राकरालाननम् ॥२९॥ अथ मनुवाक् चतुष्टयस्य रुद्रप्रिययो
गस्य उपासनाविशेषः ॥ अथ चाष्टतनोस्तथाष्टहृच्छोनवमो यं दशमः शमान्वितानाम् ॥ श्रीस्कंद उवाच ॥
अकर्तुं कर्तुं वा भुवनमखिलं ये किल भवन्त्यलं ते पादांते पुरहर बलं ते सुरवराः ॥ कुटीरं कोटीरं त्वमह
ह कुलीराय कृतवान् विश्वस्येष्टे तव पुनरधीष्टे हि करुणाम् ॥३१॥ श्रीकांता धात्री त्रिदशतिलकाः श्रीम-
तीमर्थयंते यां ते दृष्टिं स्पृहयति जनस्यैव तस्यै किलास्यै ॥ अव्यावृत्ता गतिरिप भये नाथ तेषाममीषाम-
प्यंतः स्वे समुचितमुमाकांत मंतुं नमंतुम् ॥३२॥ इति श्री शिवरहस्ये ईशानाख्ये द्वादशांशे स्कंदजैगीष

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यसंवादे स्कंदप्रोक्त शतरुद्रीयभाषे द्वात्रिंशोध्यायः ॥३२॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीईशानाय नमः ॥ अ॰ ३२-३३
७०९ श्रीस्कंद उवाच ॥ ये वृक्षेष्विह कामकर्मवशतः वावृश्यमानेष्वि मां क्ष्मामावृत्य चराचरात्मकतया तिष्ठं
ति जीवेषु ये ॥ अंतर्व्याप्य जगंति ये खिलजगत् पीडाकराणां सदा हर्त्तारोऽसितकंधरा बहुविधा ये नि-
त्य निष्कल्मषाः ॥१॥ भूतानां पृथिवीजलाग्निमरुदाकाशात्मनां ये धिपाः स्थित्वा तेषु जगंति पांति परित
स्तत्कार्यभूतैः फलैः ॥ नानाभूतगणाधिपाश्च विविधज्वालाज्वलन्मूर्त्तयो ये नावीतशिखा ये वा कपर्दी
ज्वलाः ॥२॥ ये अन्नेषु चतुर्विधेषु च तदा पिबेषु वान्ना दनव्यापारा हविचित्ररूपचषकामे त्वादिके सं
स्थिताः ॥ पापिष्ठान्फलतोर्पतश्च विविधं पापानुरूपं जनान्नूनाधिक्य विचित्रधातुगतिभिः विध्यंति
च व्याधिभिः ॥३॥ तेषामद्य सहस्रयोजनमिते दूरे स्थितानां वयं विज्याऽन्यास्तनु मो धनूंषि सततं क्षेमा
य पीगाय च ॥ राज्ञां शत्रुनृपावमारणमहासिद्धिप्रदं तादृशं भक्तानामखिलाघसंघहरणं श्रीदेवलार
धितम् ॥४॥ रुद्रं भीषणभोगिभूषणधरं दंष्ट्राकरालाननं बिभ्राणं त्रिशिखं मदोद्धतवपुः षं ध्याये ज्वल-
४३ न्मूर्धजम् ॥ ये मी लोकौकनैदिकादिविधया नानाविधानां पथां सर्वेषामपि रक्षकास्तनु विधः कर्मानुरूपे
णये ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्त्तृत्वादिमतिप्रसक्तविविधव्यापारशून्यस्थिरध्यानापास्तसमस्तकल्मषमनःसाक्षात्कृतब्रह्मणाम्॥
ईशन्यस्तसमस्तदुर्भरमहासंसारभारात्मनां अन्नं दातुमचंचलं करुणया हस्ते दधानाः सदा॥६॥
येयुध्वायुवभिःखलैरतिबलैः संपीड्यमानान्सतः संरक्षंति हरंति कर्मवशतः चायुः परेषामपि॥येती
र्थानिचरंति तीर्थफलदास्तीर्थद्विषः संततं हंतुं बाणकृपाणकार्मुकसृकावंतो निषंगोद्यताः॥७॥तेषाम
ध्यसहस्रयोजनमिते दूरे स्थितानां वयं विज्यान्यातनुमो धनूंषि सततं क्षेमाययोगाय च॥ विद्युद्वुल्ल
१७७ भवर्यवंशकरसत्सुत्रप्रदं ध्यायतां सौम्यत्वेन समस्ततीर्थफलदं श्रीदेवनालांघितम्॥८॥ रुद्रं भीषणभोगि
भूषणधरं दंष्ट्राकरालाननं विभ्राणं त्रिशिखिं प्रदीप्तविशिखं ध्यायेज्ज्वलन्मूर्धजम्॥ एतावद्भिरि
होदितैर्दशमहामंत्रैः प्रकाशीकृताः चैतावद्भिरियं तया परिमिता भूम्यंतरीक्षादिभिः॥९॥ येत्रैलोक्यमती
त्य सर्वभुवनं व्याप्ताश्च सर्वात्मका भूपांश्च वसंति ये दशदिशो रुद्राः समाक्रम्य च॥तेषामेव सहस्रयो
जनमिते दूरे स्थितानां वयं विज्यान्यातनुमो धनूंषि सततं क्षेमाययोगाय च॥१०॥ विद्यापुत्रवरांगनाप्ति
सुमहामांतं गतुंगाश्वदं दिव्यं स्यंदनदिव्यसस्यसुमहीभोगादिहेमार्थदम्॥ रुद्रं भस्मविभूषणं फणि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गणा भूषोज्ज्वलाकं धं चंद्रोद्भासि शिखं प्रदीप्तवपुषं ध्याये त्रिशूलिकरम्॥ ११॥ श्रीरुद्रेभ्य इदं नमः–
११० प्रथमतो वाचैव वाक् भूयते कर्मण्यप्यप मेव संततिच पृथक् भूम्यंतरिक्षादिषु॥ दत्वान्नं बहुदक्षिणादि
पुरतस्तान् कार्यशौर्यादिभिः पापिष्ठान्नृ दवं धनाद्विज नितक्लेशाकुलान्कुर्वताम्॥१२॥ अल्पाल्पैरधिका
धिकैर्मुहुरकालोत्थैर्मरुद्दूषणैर्येवापीडयतां जगंत्यधिकृतामन्नं च वाताः स्तथा॥ वर्षंतीषु समूहवत्त्रि
तय मध्ये तज्जगती ज्जीवनं हिंसासाधन मासु दुष्कृत कृतांक्षेमायपनित्यं सताम्॥१३॥ तेभ्यो वः पुरतो वयं
लिहदश प्राचीः प्रतीचीर्दक्षावाचीवीर्यदशांजलेरप दशोदीचीर्दशो र्ध्वांजलैः॥ आरोग्याय शिवाय कायिकनम
स्कारात्मिकासर्वतः कृत्वा चिंतितसिद्धये प्यमनसा ते भ्यो नमस्कुर्महे॥१४॥ ते रुद्राः सुखयं तनुः प्रणमत–
स्ते मी भजंतो वयं निष्पापाः स्तुतिपूर्वकैर्नतिशतैर्युष्मत्कृपा भाजनाः॥ तस्मादस्मदरिं तु पापपुरुषं हंतुंस–
यतनाचिराद्यं द्विष्मः परिपीडयन्ननुदिनं दारिद्र्यरोगादिभिः॥१५॥ यो स्मान्द्वेष्टितमेव दंतनिवहे काला–
त्मनां वो दधाम्यत्यंतसुखिता न्हितान्कुरुत नः पूर्णान्सदारक्षतु॥ कालज्ञानदमन्नदं प्रणमतां जाति–
स्मरत्वप्रदं सर्वाभीष्टदमात्मनात्मनि निजात्मानं भजंतं सदा॥१६॥ रुद्रं देवमनंतरुद्रवपुषं विश्वे=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वरं विश्वतश्चक्षुश्रोत्रकरांघ्रिमूर्जितमहाकालात्मकं चिंतये ॥ स्कंद उवाच ॥ कस्त्वांव्यस्तसमस्तरूप-
मिह सुस्तोतुं समस्तात्मकं सामर्थ्येपि समस्ततां न भजते ह्यन्यस्य का वा कथा ॥ जल्पंतं किमपि स्तनं-
धयमिव प्रीत्या पिता तावकं भक्तं मामवमेव मे वहि पिता माता च दातात्तया ॥ ७ ॥ अमोमोदीदीशः कृत-
सुकृतवारा शिरभसा कृतस्तुत्यानत्याप्यकृतकनमोंतैः पदवैः तया देव्या दिव्यं पदकमलमालोक-
१३१ नधियं सुतं स्कंदं नंदन्नकथयद्दहोनच्छतमसम् ॥ श्रीईश्वर उवाच ॥ त्वं रुद्रार्थवचो मिहग्रतपसास्तो
तार्थपारीणवान् ओंकारप्रवणप्रवीणमननः ज्ञातास्वयं पावनः ॥ नेदृक्संस्तवमर्थवत्धृदि सदा रु-
द्रार्थधृक्कोपि वा ध्यानेनाधिगतं मयैव कृपया ते तु मसूः पार्वती ॥ यस्यास्तन्यरसामृतं सपिवतो विज्ञा-
नवारांनिधेः भक्त्या रव्यानिललोलचंचलशिवज्ञानोर्मयो जृंभिताः ॥ तेषां सीकरसारसारसुम-
नःसौरभ्यभावं गणा देवा भूसुरसत्तमाश्च नियतं प्राप्ताः शिवज्ञानजम् ॥ २० ॥ धन्यस्त्वं जगदेकपावनक-
रीं विश्राणयन्मेकयां जैगीषव्यमुखेषु शंभवमुनिष्वेवं प्रसन्नात्मना ॥ संसारामयभेषजं मम-
महारुद्रस्तवं केवलं मब्धीलै भवता समीरितमिदं भूयात्तव श्रेयसे ॥ २१ ॥ एवं ध्यानजपानुबोधनपद=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१११ व्याख्यानविस्तावनः पूजासंयमनप्रवीणमननोयोवा भवेदात्मनः ॥ कामानाशुल भेत भूतिविलस
द्गात्रस्त्रिपुंड्रोल्लसद्रुद्राक्षामलहारकंठवलयो भूयास्त्रिनेत्रप्रियः ॥२२॥ निष्कामोयदिरुद्रजा
प्यपरमो मुक्तिंलभेत्सत्तधीः ॥ ध्यानाकारविशेषमंत्रपदविन्कामंयसहस्रोत्तरम् ॥ जप्त्वा होम
दशांशतर्पणविधिं कृत्वाच शैवार्चनं भूत्वाकृच्छ्रपराकपावितनुस्तांस्तांलभेत्कामनाम् ॥२३॥
जप्यः पाश्चिमलिंगवक्त्रमभितोध्यायन्नुदक्वक्त्रवान् बालेंदुद्युतिकोटिसन्निभमुमाकांतं सदा
शांतधीः ॥ पापौघंप्रशमय्य भस्मवरधृक्मुक्तो विमुक्तंगतस्तत्रैवारमणंवसन्नपिनरोमुक्तिंलभे
तां पराम् ॥२४॥ यस्त्वेकवारं शतरुद्रजापी पापैर्महद्भिः प्रविमुक्त एव ॥ द्विवारमे[illegible]त [illegible]यदि
वात्र संपठन्गणोत्तमः सं भविता चिराय ॥ त्रिवाररुद्रं प्रजपन्नघघ्नं मय्येवलीनः स भवेद्धिपू
रुषः ॥२५॥ भक्तो विमुक्तंसमवाप्य मोदते यांते भवेद्राजतगोत्रवासी ॥ नक्तं दिवं वा प्रजपन्हि भक्तो मुक्तः
सशक्तः सविमुक्तपापः ॥२६॥ सक्तोपि संसारवरोरुपाशैः व्यक्तं समुक्तो मम संप्रसादात् ॥ श्रीरुद्र
मंत्रान्प्रविहाय मूढः पंचाक्षरीमध्यगतान्विमुक्त्यै ॥ यतेतयः संसृतिपाशबद्धो ल्यक्त्वैवगांसोहि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खरींदुहेद्यया॥२७॥ धृत्वोर्ध्वपुंड्रमज पेन्लिदं यीरुद्रं तया पावन मस्य मुक्तिः॥ नलभ्यते तेन समन्युर
ग्धो मम्मैव किंस्या सिक्त तासु तैलम्॥ यो भासुरं भूसुरजन्मवान्स्यात्ते नैव भस्माक्षधेरेणजाप्यः॥
नचौर्यलोभे ननचान्यमानसाजप्यः किलायं श्रुतिरत्नकोशः॥ श्रीस्कंदउवाच॥ इत्युक्तं शिववच
नं निशम्य विप्रास्तुष्टोहं शिपिष्ठ मष्ठमूर्त्तिम्॥ जुष्ठस्तत्पद कमलेहृदीष्ठ भृंगसंवेश्यप्रणतिम
नाःप्रतुष्ठवं हि॥३०॥ देवंतंजय पदपूर्वनव्य भव्यस्तव्येनप्रमथपतिंच दिव्यवाग्भिः॥ गव्येन लुतनव
440 सर्पिषायथे द्धोहव्येनप्रकटशिखोयहव्यवाहः॥३१॥ इतिश्री शिवरहस्ये इशानाख्येद्वादशांशे स्कंद
जैगीषव्यसंवादे स्कंदकृतशत रुद्रीय भाष्येत्रयस्त्रिंशोध्यायः॥३३॥ श्री काशी विश्वेश्वरार्पणमस्तु॥
श्रीईशानायनमः॥ श्रीस्कंदायनमः॥ जैगीषव्य उवाच॥ सुब्रह्मण्यवदास्माकंजयस्तोत्रंत्वयाकृतम्॥
विश्वाधिकस्यदेवस्य महादेवस्यवेधसः॥१॥ श्रवणेनधृतास्सर्वेगणामुनि गणाः सुराः॥ येनस्तवे
नस्तुवतां सुप्रीतः स्यान्महेश्वरः॥२॥ सूतउवाच॥ जैगीषव्यवचः श्रुत्वा नत्वा स्कंदो महेश्वरम्॥ कृ
तांजलिपुटो भूत्वा जयस्तोत्रमुदीरयत्॥३॥ श्रीसुब्रह्मण्यउवाच॥ जयकैलासनिलयजयशैलात्मजापते॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११२ जयमंदाकिनीभूषजयवृंदारकार्चित ॥४॥जयकामांगदहनजयवामांगशैलज ॥जयसोमकलामौलेजयभूम अ·३५/३४
ध्यलोचन ॥५॥जयरुद्रमहादेवजयभद्रवरासन ॥जयनागेंद्रकेयूरजययोगींद्रसेवित ॥६॥जयगंगाधरे-
शानजयभोगापवर्गद ॥जयरागादिदोषघ्नजयरामाननप्रिय ॥७॥जयविश्वप्रकाशात्मन्जयविश्ववि
धायक ॥जयविश्वाधिपस्वामिन्जयविश्वाधिकप्रभो ॥८॥जयदिव्यपटीरांगजयहव्यप्रियाव्यय ॥जय
शंभोवृषारूढजयकुंभोद्भवस्तुत ॥जयशक्तित्रयाराध्यजयमुक्तिसुखप्रद ॥जयभक्तपराधीनजयमुक्तजनेडि
त ॥१०॥जयप्रणतमंदारजयप्रणवविग्रह ॥जयबद्धजटाजूटजयशुभ्रवराकृते ॥११॥जयपुष्करपत्राक्षजयपुष्क
रमूर्धज ॥जयदुष्कर्मनिर्मूलजयनिष्कल्मषव्रत ॥जयवित्तेशवरदजयमत्तेंद्रसूदन ॥जयकोट्यर्कसंकाश
जयनाट्यविशारद ॥१३॥जयकल्पितविध्वंडजयकल्पांतभैरव ॥जयतेजोमयाकारजयवाजीकृतागम ॥१४॥
जयक्षोणीरथारूढजयवाणीपशारथे ॥जयपर्वतकोदंडजयमौर्वीकृतोरग ॥१५॥जयपावककृष्णास्त्रजय
केशववर्धन ॥जयत्रिपुंड्रनिटिलजयत्रिपुरशासन ॥१६॥जयपंचाक्षरीरूपजयपंचाननोज्वल ॥जय
पंचत्वरहितजयपंचदशांबक ॥जयपार्श्वस्थितस्कंदजयशाश्वतवैभव ॥जयवेदशिरोवेद्यजयनाद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रायण ॥१८॥जय श्रीदक्षिणामूर्ते जय श्रीदमहेश्वर॥जयापस्मारन्यस्तांघ्रे जय विस्मय विक्रम ॥जय
वीरासनासीन जय घोर निवारण ॥जय पुस्तकहस्ताब्ज जय ध्वस्तजलंधर ॥२०॥जय निस्तूललावण्य जय वास्तु
पुपूजित ॥जय रुद्राक्षमालाढ्य जय मुद्रोज्वलत्कर ॥२१॥जय क्षुद्रजनध्वंसिन् जय रुद्रगणार्चित ॥जय शौरी-
कृतस्तोत्र जय दूरीकृतामय ॥२२॥जय केशववंद्यांघ्रे जय देशिकपुंगव ॥जय मायादिरहित जय ध्येयावनीसुर ॥
२३॥जय वर्जितसर्वाशजनाभजित दिङ्मुख ॥२४॥जय निंदितकांताश जय नंदितसज्जन ॥जय वंदितदेवौघ
१४। जय नंदिमुखस्तुत ॥२५॥जय बोधितविज्ञान जय मोदिततापस ॥जय भेदितसंसार जय सत्वादिगुणात्मक
॥२६॥जयांतकवधे भीम जयांधकविनाशन ॥जय वाचामनोगम्य जय वाचस्पतेडित ॥२७॥जय सद्भ
स्मलिप्तांग जय सद्भक्तवत्सल ॥जय दारिद्र्यमूलघ्न जय दारितदुर्जन ॥जय धर्मादिफलद जय निर्मेय
सौख्यद ॥जय चंडीश्वरद जय चंडपराक्रम ॥२९॥जय भृंगीमनोवास जय संगीतपंडित ॥जय वर्णित
चारित्र जय कर्णारिपूजित ॥३०॥जय सांबकृपासिंधो जय जांबूनदांबर ॥जय कंसघ्नदुर्दर्श जय हंसस्य
दुर्लभ ॥३१॥जय भीमांग शूरसामांगपारग (भजय) ॥जय कैरातशारीर जय वैराग्यसिद्धिद ॥३२॥जय दावान=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अ॰ ३४

११३ लाकर जयदेवारिमर्द्दन ॥ जयकालीकृतोल्लास जयकेलीविलासग ॥ ३३ ॥ जयदक्षमखच्छेद जयनक्षत्र
हारक ॥ जयपुष्परदध्वंसिन् जय भेषजसत्तम ॥ ३४ ॥ जयकाशमुमाकार जयनागभगांबक ॥ जयशुद्धांत
रंगस्य जयमध्यांतवर्जित ॥ ३५ ॥ जयप्रमथयूथेश जयश्रमविनाशन ॥ जयप्रधानपुरुष जयवेधास्य(ने)नाग
क ॥ जयमौनव्रतपर जयदीनजनावन ॥ ३६ ॥ जयदेवर्षिसंस्तव्य जयदेवशिखामणे ॥ जयनारदगाडज जय-
नीरदशेखर ॥ ३७ ॥ जयदारुवनांतस्थ जयचारुकलेवर ॥ जयभिक्षाटनरत जयमक्षाधिपार्चित ॥ ३८ ॥
जयवीतरिपुस्तोम जयभूतपते मृड ॥ जयसर्वोत्तमस्थान जयसर्वोपकारक ॥ जयश्रीकंठ भगवन् जयवैकुंठ
चक्रद ॥ जयहृत्पद्ममध्यस्थ जयसत्पदसंस्थित ॥ ४० ॥ जयमंदरशैलस्थ जयसुंदरसांबिक ॥ जयमेरुशिरो
वास जयहारीकृतोरग ॥ ४१ ॥ जयरामकृताघघ्न जयहेमसभापते ॥ जयस्थाणो पशुपते जयवीणालसत्कर ॥
४२ ॥ जयव्याघ्राजिनधर जयव्याघ्रांघ्रिसेवित ॥ जयसप्तर्षिविनुत जयदीप्तशिरोरुह ॥ ४३ ॥ जयविप्रवराकार
जयक्षिप्रवरप्रद ॥ जयकर्मादिदूरस्थ जयधर्मभृतांवर ॥ ४४ ॥ जयसद्गुणसंदोह जयनिर्गुणवल्लभ ॥
जयनामांगरहित जयभामांगदायक ॥ ४५ ॥ जयक्षपकराजांड जयध्येयमहामते ॥ जयजन्मजराहीनजय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सन्मनसिस्थित ॥४६॥जयत्रिंलिंगहीनांगजयश्रीलिंगपूजित ॥जयटंकगदाहस्तजयशंकरधूर्जटे ॥४७॥
जयलिंगशरीरघ्नजयसंगरकोविद ॥जयतापत्रयच्छेदजयरूपत्रयात्मक ॥४८॥जयदातृत्वनिपुणजयमा
तृवदाकृतेजयमंदारसंभूषजयवंदारुनंदित ॥४९॥जयवाणीकृतस्तोत्रजयमाणिक्यकुंडल ॥जयपद्मार्चि
तपदजयपद्मारुणप्रभ ॥५०॥जयहं साद्यसुखदजयसंसारतारक॥जयकल्याणपुरुषजयकल्याणसंतत॥
५१॥जयकंदलितानंदजयकुंदरदद्युते ॥जयमंदस्मितमुखजयचंदनशीतल ॥५२॥जयविज्ञानवाराशेजय-
442 प्रज्ञानकल्पक ॥जयत्रिकालकालात्मन्जयत्रैकालबुद्धिद॥५३॥जयसर्वभवेशानजयसर्वज्ञकामद॥
जयभर्गमहाबाहोजयदुर्गतिनाशन॥५४॥जयब्रह्मण्यगिरिशजयसंहारकारण॥जयगोक्षीरवर्णा
गजयसाक्षीजगत्त्रय॥५५॥जयनित्यादिकलितजयभृत्यामरद्रुम ॥जयरोगाद्रिदंभोलेजयभागीकृता
च्युत ॥५६॥जयाग्रेसरविध्वंसिन्जयाग्रहविनाशक॥जयशांतासुरध्वंसिन्जयकांतारमध्यग॥५७॥
जयदंडासुरहरजयमुंडासुरांतक ॥जयेल्विकासुरहरजयदृष्टिफलप्रद॥५८॥जयक्षेमकरशिवजयहेमां
गदोज्वल॥जयदेवविराड्रूपजयकैवल्यवल्लभ ॥५९॥जयदेहात्ममोहघ्नजयमोहनविग्रह ॥जयक्षरा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षरातीतजयघोरार्त्तिखंडन ॥६०॥ जय रत्नगृहावासजय रत्नमयासन ॥जयदौर्भाग्यतूलाग्नेजय
११४ गर्भस्थिताखिल ॥जय संचितदोषघ्नजयकांचनदेहक ॥जयविद्रुमतुल्यांघ्रेजयकद्रुसुतार्चित ॥जयचंडप्रचं
डेशजयदंडधनुर्धर ॥जयक्रूराभिचारघ्नजयदारासुतान्वित ॥६३॥जयजीमूतसुखदजय भूमूलमंदिर ॥
जयखंडितपाषंडजयचंडगणान्वित ॥६४॥ जयप्रशांतमहिमन्जयकोशांतरस्थित ॥जय सर्वमनुध्येयजमस
र्ववशीकृत ॥६५॥ जयपूर्णदयादृष्टेजय मार्कंडरक्षक ॥जयोपमन्युसुप्रीतजयसत्पद्मभास्कर॥६६॥जयपालननि
र्माणजयसर्वविधानवित ॥जयस्वतेजसाभासजयलोकैकपालक ॥६७॥जयाग्नींदुजलादित्यजयखानिलभूमय ॥
जयनिःसीमपरमजयदेवपरात्पर ॥६८॥जय प्रकृतिमुख्यादेजय त्रिगुणकल्पक ॥जय निर्व्याजलोकघ्नजयाविद्यावि-
धारण ॥६९॥ जयव्याससनंदेड्याचिंत्यगुणोदय ॥जयशौर्यम धैर्यजयधर्मैककारण ॥७०॥ जयराजससत्वाढ्य हा
जयरुद्रतमोगुण॥ जयब्रह्मादिकीटांतजयव्याप्तहृदंतर ॥७१॥जय भूजलवातूलजय तेजःखवारिक ॥जयभाषापति-
श्रीशजयवर्णितवैभव ॥ ७२॥ जय मलयसंजातजयकालाग्निरुद्रक ॥जयसंकल्पनामात्रजय निर्मितलोकप॥७३॥
जयश्रीशविधींद्राद्यजय सर्वनियोजक॥ जयहीनसमाधिक्यजयवार्धक्यवर्जित ॥७४॥जयनीलोत्पलश्यामजय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्णविराजित ॥ जय कर्पूरधवल जय चारुशुभाकृते ॥ १५ ॥ जय धक्कांकुशाभोग जय चक्रल सत्पद ॥ जय सौवर्णवसन जय रा
जल्कटीतट ॥ १६ ॥ जय पीनोरुजघन जय रंजित विश्वप ॥ जय मुक्ताफलाहार जय वज्रांगदोज्ज्वल ॥ जय दीर्घचतुर्बाहो जय
कंकणमंडित ॥ जयाभीतिवरोपेत जय बाहुद्वयान्वित ॥ १७ ॥ जय स्थैल्यमहानील जय भूषितमंगल ॥ जय सुंदर सस्मेर
जय वक्त्र विराजित ॥ १९ ॥ जय कुंडल विभ्राजन् जय कुंडलिकुंडल ॥ जय चांपेयनासाग्र जय बिंबाधरोज्ज्वल ॥ २० ॥ जय पा
वकचंद्रार्क जय लोचनभूषित ॥ जय कौकनदोद्भास जय कोटीरसोभित ॥ जयापरमितानंद जय सुंदरविग्रह ॥ जय-
११४३ स्कंदगणाधीश जय भद्रादिसेवित ॥ २२ ॥ जयानेक महाचित्र जय शक्तिगणावृत ॥ जय निस्तुल विज्ञान जयानंदम-
होदधे ॥ २३ ॥ जयाविद्यांधकारार्क जय श्रीमन्महेश्वर ॥ जय कूटस्थपरम जय शूली पुधावृत ॥ २४ ॥ जयाप्रतर्क्य
विभव जय संततमंगल ॥ जय नित्य महाभाग जय लिंगार्चनप्रिय ॥ २५ ॥ जय ज्वरादिरोगघ्न जय श्रीरुद्रमध्यग ॥ ज-
यमार्तंडमध्यस्थ जय पावकमध्यग ॥ २६ ॥ जय चंद्रांतनिलय जय बिंदुकलात्मक ॥ जय श्रीचक्रसंस्थान जय भूचक्रपीठ-
भूः ॥ २७ ॥ जय नादकलातीत जय वादविभेदन ॥ जय तत्पुरुषमंत्रार्थ जय घोरास्त्रनायक ॥ २८ ॥ जयेशान विरूपाक्ष
जय वामादिसंपक ॥ जय शुक्रकृतस्तोत्र जय निर्मत्सरार्चित ॥ २९ ॥ जय कल्पद्रुमस्थान जय खट्वांगराजित ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुर्द्धान्ध

११५ जयानसानननिर्मुक्तजय बिल्वार्चन प्रिय ॥९०॥ जयाब्धमूर्त्ते सर्वात्मन्जयाचारविवर्धन ॥ जयापचारशमनजयापह्नोध
व प्रिय ॥ जयोपचारसंदोहजय पाशविमोचन ॥ जयतस्करमूर्धन्यजयमस्करीरूपग ॥ ९२ ॥ जयकंकालरूपात्मन्
जयशंकातिदूरग ॥ जयशापास्त्रदमनजय मार्त्तंड भैरव ॥ ९३ ॥ जय पंचास्तनासीनजयवंचकदुर्लभ ॥ जयदुर्भगसंहार
जयसद्भावभावन ॥ ९४ ॥ जय सर्वगसर्वेशजय सर्वशुभास्पद ॥ जय विष्ण्वादिजनकजयप्रमथनायक ॥ ९५ ॥ जयसोमा
ग्नि विशिखजय सर्वमरुत्सख ॥ जयकर्पूर दिव्यांग जय सर्वीतुरंगग ॥ ९६ ॥ जयपालितभूतौघजयदूरीकृताघक ॥
जयसर्जितवैरिंचजयवंचितक ॥ ९७ ॥ जयमानसनीरिच्छुजयस्वच्छक ॥ जय विश्रुतकालांतजय संस्तुतपद्मज ॥ ९८ ॥
झंझा जय झंझानिलाकारजय झंझरकंकण ॥ जयवैश्यैकनिलयजयदानैकसद्दय ॥ ९९ ॥ जय गंगाजटाजूटजयसं
ध्यामहानट ॥ जयवर्णितवैकुंठजय मानितकर्मठ ॥ जयचंद्रमहाचूडजय भर्गविभोमृड ॥ १०० ॥ जय हृतैकजारु
ढजय विश्वार्तिहन्द्दृढ ॥ जयदुःखादिहरणजय भोगिविभूषण ॥ १ ॥ जय बिल्वार्चनप्रीतजय भक्तसुखान्वित ॥
जयमन्नाथजयदारितमन्मथ ॥ २ ॥ जय मेध्यसुपाथोदजय भक्तेषु कामद ॥ जयतर्पितसन्मेघजयदुर्जनसंन्व
य ॥ ३ ॥ जयदेहार्धकामीनजय भक्तानुरंजन ॥ जयदेवादिजनपजयप्रीतधनाधिप ॥ ४ ॥ जनरंजितवैरिंचजयके=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श द्विरेफ भ ॥ जयार्जित सुरवादं भज बिंबित दिकूबल ॥ जय पद्मा भपादाब्जजय कोट्यर्क संन्नि भ ॥ जयना शित
दुष्काम जय पूजित संस्तुत ॥ ८ ॥ जय कांतारनिलय जय सर्वजगन्मय ॥ जय नागेंद्र सद्धारजयदीप्य कलेवर ॥ ९ ॥
जय नीलाल कालोल जय दीनैकवत्सल ॥ जय विख्यात विभव जय सुप्रीत संस्तुत ॥ १० ॥ जय सर्वज्ञ सर्वेश जय
गौर्यंकपालिन ॥ जय रत्न महाभूषजय धारितदुर्विष ॥ ९ ॥ जयांबरीदिग्वासजय प्रख्यात साहस ॥ जयवारिदसद्धा
हजय स्वीकृत विग्रह ॥ ११ ॥ जय कंठ महाश्वेतल जय श्रीकृष्ण पिंगल ॥ जय सर्व सुराध्यक्ष जय विश्वाक्षक क्षग ॥ ११ ॥
४४४ श्री स्कंद उवाच ॥ इत्येवं मदनारातेः स्तोत्रं यस्तु पठे न्नरः ॥ विमुच्यते जन्मबंधैः प्राप्यते भोग उत्तमः ॥ १२ ॥ जय-
स्तोत्रमिदं पुण्यं पूजांते कीर्तनीयकम् ॥ शिवस्य संनिधौ जप्त्वा शिवलोकं स गच्छति ॥ १३ ॥ जयजय विश्व विधान
दक्ष शिक्षजयजय कारणे षुत्र्यक्ष ॥ जयजय सर्व सुरानुराग सिंधो जयजय भक्तिजनावनैकबंधो ॥ १४ ॥ जय-
जय पुण्य पवित्र चारुकीर्ते जयजय भक्त कदंब दारितार्ते ॥ जयजय निगमांतघोषितार्घ्य जयजय संसृति रुग्विनाशवैद्य ॥
१५ ॥ जयजय सर्व सुरोरु सर्वनाथ जयजय पर्वतेंद्रजासनाथ ॥ जयजय चारु शशांक शोभिमौले जयजय पापगिरींद्र भे-
ददंभोले ॥ १६ ॥ जयजय कालकलाविनाशशील जयजय कुंडलकुंडलीशमाल ॥ जयजय भस्म विभूषणांग संग जयजय=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भक्तहृद्ब्जपापभंग ॥१७॥ जयजय कृत्तिवसान विश्वभान जयजय सर्वजनैकदान ॥ जयजय हेमसमान देहधाम जयजय दि- अ० ३४
ग्विनाशि चारुकाम ॥१८॥ जयजय देहवरार्धशोभि कांत जयजय भक्तजनैक भूषितांत ॥ जयजय देववरेंउग्रहासिजाड्य
जयजय भक्तहृदब्जनाशमौढ्य ॥ जयजय पंकजमित्र चारुनेत्र जयजय पर्वतनापजाकलत्र ॥ जयजय भस्मविभू-
षबालपोष जयजय कंठविचित्रशेष ॥२०॥ जयजय गांगतरंगशोभिजूट जयजय विश्रुतवेदजालघोट ॥ कारुण्यामृतसा
रपूरितलसन्नेत्रांत संपूरित त्रैलोक्यावनदीक्षिताजपवटीराजत्कराभोरुहम् ॥ २१ ॥ सांबं निर्जरदीर्घिकाप्रवि लस
संफुल्लपद्मावलीधूलीधूसुरकर्बुरोज्वलजटारेखं भजे शंकरम् ॥ त्वय्यासज्जमनस्त्वदेकशरणः वर्त्ते पुनस्त्वां विना
स्वामिन्पर्वतसार्वभौम तनुभूजाने न जाने परम् ॥ सत्वं चेदिह न प्रसीदसि ततः कं प्रार्थयेयं प्रभो जातं विश्वमिदं च शर्व
निभृताद्वैतैकदुर्भिक्षभाक् ॥ ततश्चेतश्चेतो भ्रमति निमिषं नो परमते किमुद्दामं चेदप्ययाति नवशक्तिन्नुकरवै ॥२३॥
व्यसेराक्रम्येदं यदि गिरिजयातन्मम भवेत्प्रसादप्रासाद स्तव च भविताय सुरचिरः ॥ वंदे सिंदूरवर्णं सुरसरितजय
चारुचंद्रावतंसं फालाग्न्यन्नेत्रमीशं स्मितसुखकमलं दिव्यभूषांगरागम् ॥ वातो रुन्यस्तपाणिं तरुणकुवलयं संद
धत्याऽम्मायाः वृत्तोत्तुंगस्तनाग्रे प्रणिहितकरतलं वेदटंकेष्टहस्तम् ॥२४॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे
जयस्तुतिनाम चतुस्त्रिंशोध्यायः ॥३४॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्री ईशानाय नमः ॥ ॥ श्री ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानायनमः॥ ॥श्रीस्कंद उवाच॥ ॥माम हृ शंकरस्तत्र रहस्यं शैवमद्भुतं॥ द्वादशांशसमायुक्तं मिदमेवमहार्थदं॥ १॥ शिवज्ञा
नमहासारं धर्मकामार्थमोक्षदं॥ शिवभक्तिकरं पुंसां कथारत्नमहोदधिः॥ २॥ श्राव्यं नव्यमिदं भव्यं गौर्यै दिव्यं शिवोदितं॥ मया
तदंक संस्थेन श्रुतमेतन्महोदयं॥ ३॥ पुण्यं शिवरहस्याख्यमितिहासमहोदयं॥ शृण्वतां पठतां वापि सर्वपापप्रणाशनं॥ ४॥
शिवप्रसादकरणं स्वर्ग्यं पुण्यं महाघभित्॥ आयुरारोग्यदं पुंसां शांभवानां महात्मनां॥ ५॥ भक्तिभाग्यप्रदं शंभोः सर्वरोग
विनाशनं॥ मामाहशंकरोस्यैव फलं श्रवणसंभवं॥ ६॥ अपात्रं पात्रमपि च श्रवणे धारणे विभुः॥ कालवाचकपूजायाः म
११४ हिमापरमोदयं॥ ७॥ मत्तः शृणु शिवोक्तं त्वं रहस्यमिदमद्भुतं॥ गौर्यै प्रोक्तं शिवेनेव मया तच्छ्रुतमादरात्॥ सहैभिर्गणमु
ख्यैश्च शृणु त्वं भूसुरैः सुरैः॥ ८॥ ॥श्रीईश्वर उवाच॥ ॥निगमागमसारमेतदाद्यं सुगमं भक्तिमतां सुगम्यपद्यं॥ वरवि
द्याप्रदमेतदाघहृद्यं शिवशास्त्रं किल पापभेदशस्त्रं॥ ९॥ शब्देरब्दशतेपि कर्कशमहातर्कैश्च मीमांसका यासैर्घासस मैः प्र
बोधइव वो वेदांतदांताश्च ये॥ श्राव्ये काव्यशतेपि नव्ययमुमे पापस्य किंमुक्तिदं व्यर्थानर्थकथासु बोधरशिका येते नराः पा
मराः॥ १०॥ श्रुत्वेदं निगमांतसारसुमधु प्राप्यं किमन्यत्फलं श्रीविश्वेश्वरपादपद्मभजनैर्मुक्तिः परा शांभवैः॥ लभ्यादेव
शिवैकसक्त मतिभिः पापौघसंहारिभिः नान्यं श्राव्यमुशंतिकोकिलगिरं श्रुत्वैव काकस्वरं॥ ११॥ बतहृतविधिनाघ वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चिंतास्तेसुरतिर्यङ्नररासभाभुवो भराः॥ परिहाय रहस्य शैव सारं परिखिद्यंति मुधान्य शास्त्रलोकाः॥१२॥ लास्यालस्यादिहा 
स्येर्नयतिदिनमुमेस्वस्य नान्यत्फलं सो मन्येदन्य सुदार भोगभरितश्चाभक्ष्य भक्षेरतः॥ दुष्पालापदुरन्नभक्षणरतः कामेनयो
षेक्षणैः क्षीणायुः किलकालकोलसुमहा घोषेणसंदारितः॥१३॥ यज्ञाभिज्ञाः किल ज्ञासततपरिचिताक्षादिशीक्षासुदीक्षाः
निद्रातंद्रादरिद्रक्षुभितहृतधियो द्रव्यसंख्यासुसौख्याः॥ दुष्पूरोदरपूरणोदनसदा तद्रोदनेनास्त धीः किंवास्यक्षणवीक्ष
णाय यततेनाकौ वराकः परं॥१४॥ लास्यालस्यादिहास्यप्रियसुरतरता योषितां भावभूषघोषामाणाभदेहासुरनरमुन
योस्वस्य वीक्षासुलीक्षाः॥ कोवावरं शिवरहस्य विवेकसारं तत्त्वत्यचित्रसुपवित्रतरार्थबद्धं॥१५॥ अब्देश्च कोटिभिरपिप्रम
थाधिनाथ भक्तस्य शुद्धमनसः प्रसरत्यवश्यं॥ विदग्धोपि मुग्धो भवेदेवदग्धो नदुग्धांबुधेः पानकृतश्वानजन्मा॥१६॥ क
निष्ठोपिशिष्टाद्विशिष्टश्च भक्तः समुक्तः ·····किलास्यार्थ वेत्ता॥ वर्णोपवर्णावदस्य धारणाविधौ स्वस्थाग्रहस्थानवे अन्योपार्जि
तकुक्षिपूरणरतो वन्धोपिसन्न्यास्यापि॥ किंवास्यार्थविचित्रशब्दसंगती साहित्यरीतिः शिवे ज्ञातुं वीक्षितुमप्यभक्तिहृदयाधू
र्णातितूर्णंबुधाः॥१७॥ द्विजाप्यजाभाः किमु बाहुजाता जिताक्रुधासर्वपराहताः सदा॥ वेश्यासुवश्या किलवैश्यवर्गा निसर्गतः
शूद्रगणाद्दरिद्राः॥१८॥ संकीर्णजाता किल नावभक्ताः ········ किमन्नेभसमो मनाशानकिटिः॥ किंवाद्विजो प्यंत्यजो भूयात्त



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दृदुमे पुराणानिचयं शास्त्राणि काव्यं जपं ॥१९॥ हास्यं यास्य तिकोशलास्यमिव तत्संन्मर्तकीनां पुरः चान्य च्छि
वरहस्य शांभवकथा कोऽप्यं शतो नो समं ॥ गिरिजाजानिकथासुधासुविधैः परिघूंतिदुत्तरोरुवाग्भिः ॥ द्वि
जजाता अपितेहिजारजाताः विरजा नैव भवंति घोररूपाः ॥ २०॥ दुःखेसास्त्राविलक्षाभ्वसन नरशनाशेव
धर्मोज्झिताये तेभस्त्रातुल्यदेहारातिपतिसरजा पारधाराभितप्ताः ॥ उस्त्रावद्धिधिवर्जिता नरखराः स्वस्त्रा दु
ह्निचारताः ॥ नध्यापीश्वरचिंतका नरकगा स्तेवंचकाः केवलं ॥२१॥ रत्नसर मौत्तिवत्करटिकुंभजां दो
146 त्तवद्बुधार्थरहिताः परेपारिपठंति शंभोः कथां ॥ कथाब्धिलहरीरसं शिवरहस्यरत्नाकरं विडालकस मा
नराः परिलिहंति किंत्वप्नये ॥२२॥ येमत्कथासु विमुखाः तइहैवलोके लेखापिदुर्मुखनराः खरशेफजा
ताः ॥ तेसन्मुखा मम भवंति कथासुधीराः येमन्मुखाब्जपरिनिःसृतपानपीनाः ॥२३॥ येशांकराशिवरहस्य
मधुप्रकृष्टं पीपियखर् वदनपंकजजातमिष्टं ॥ तुष्टाभवंति गिरिजेतइह प्रकृष्टा अन्येतुदुष्टमतयः प्र
भवंतिकष्टाः ॥२४॥ येनिंदंतिपदार्थबोधरहिताः दुस्तर्कशब्देरताः रेतःपानरताः परेतभवने तेवानरा भा
नराः ॥ विद्वांसोपि बहुश्रुता अपि वेते दुष्टविष्टाशनाः ॥ कष्टायप्रभवंतिदुष्टजनुषः तेमानुषापापिनः ॥२५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ येवावरं शिवरहस्यमिदं प्रकृष्टं नित्यं तिहासस्यमतयोयतयोपिमंदाः॥ तेकष्टानिसमाप्नुवंतिनियतंदुष्टा द्वशाद्य०
११८ श्चविष्याशनाः तिष्ठंत्येवपरेतसंसारिचिरं दुष्टास्तत्नःकुष्ठिनः॥२६॥ शिष्टास्तस्वजगतित्रिजगन्नुति अ०३५
ष्टानिष्टावतोघसुहृदेनतथाष्टमूर्त्तेः॥ संपूजयंत्यनिशमेवरहस्यमेतत्तस्मै च्यपुस्तकवरंपरिपूजयंति॥
॥२७॥ योवारहस्यमिदमेवशिवैकसारं हाराय पर्वणि ददातिशिवस्यभक्तः॥ मुक्तिं परां व्रजतिचारुशशांक
मौलिं लिंगालयंव्रजतिरुद्रगणोगिरिशः॥२८॥ भस्मत्रिपुंड्राक्षधरैर्नरैर्वरैः हारैशिवाचाररतैरकातरैः॥
श्राव्यंचभव्यंत्विदमेवनित्यशोममेतिहासंत्वघहृव्यवाहं॥२९॥ निवृत्तवृत्तेरिदमेवदिव्यं श्राव्यंयशस्य
गिरिजेसुभव्यं॥ शांतैश्चवेदांतरतैश्चदांतैः नित्यंशिवाकांतपदाब्जस्वांतैः॥३०॥ चक्षुःश्रोत्रविकासिग
द्गदगलैः आनंदधाराश्रुभिः सिंचंतोगमकैर्नवेनसुहृदाउत्फुल्लरोमांचकाः॥ येभक्ताः शिवभक्तिसारस
रसाः तेसर्वदाशर्वहृत्कुपारावारविकारसागरभवंशीघ्रंतरंतिध्रुवं॥३१॥ ॥श्रीस्कंदउवाच॥ ॥
सदाशिवोदारवचोमहेशी श्रुत्वाभितुष्टावतदागिरिशं॥ मुदान्वदा नित्यशिवंशिवासारहस्यसारश्रवणेन
हर्षिता॥३२॥ ॥श्रीगौर्युवाच॥ ॥शंगंसंगहरं कुरंगविलसद्धाहुतुरंगागमं गंगातुंगतरंगसंगतजय

चंद्रोत्तमांगं भजे ॥ नेत्रीभूतपतंगरंगितमहाकालस्फुलिंगोल्लसज्ज्वालालीढमनुन्मथांगजमहाभस्मांगरा
गं शिवं ॥ देवीतिहोत्र कृतनेत्रकलत्रगात्रसत्रातिरात्रपरितोषितदृष्टिपात्रात ॥ पुत्रानिवाद्यपरि पा
हिमुनीन्नगापोशान त्राप्यमुत्र भगवन् दययात्रिनेत्र ॥ ३४ ॥ सर्वामराध भवरोगहराद्य वैद्य आ विद्यतेप
शुपते शिवपर्णसद्य ॥ वेदांतवेद्य निगमागम गद्यपद्य संवेद्य मामवहृशाद्यविद्ये च्छवमेद्य ॥ ३५ ॥ ॥
श्रीस्कंद उवाच ॥ ॥ इति देव्या स्तुतो देवो विश्वेशो धमहेश्वरः ॥ मया स्तुतो नमस्कृत्य तदा विघ्नाधि
पेन च ॥ ३६ ॥ ॥ कुमार उवाच ॥ ॥ विधिस्तेयंता भून्नयन हुतभुक् गोधिफलक निधिर्वेदा तानां
११७ त्वमसि सकलाधिं जरयसि ॥ भवोरुव्याधीनां हरहर महाब्धिस्त्वशरधिः महातापोच्छेदे शिव तव महासं
निधिचरः ॥ ३७ ॥ ॥ श्रीगजानन उवाच ॥ ॥ हरिं हरं तं नमुमासुकांतं वेदांतभांतं शशिकांतकांतं ॥ तं ते
षु विश्रांति दसंतकांतकं स्मरस्मरांतं हृदये नितांतं ॥ ३८ ॥ पापं जहामि न सहामि भवोरुदुःखं त्वामेव यामि
हरसामिललामसोमं ॥ सीमानमेव भगवन् श्रुतिधाम भूमव्योमानमेव शरणं तरणाय यामि ॥ ३९ ॥ ॥
सूत उवाच ॥ ॥ त्रिनेत्रपूजासु विहीनमानसा घर्माशुतप्ता इव मीनसंघाः ॥ निर्वेदविप्रा इव ते परत्र निर्वे

शिवरह० ५१ दभाजोत्र भवंति सत्यं॥४०॥ परिवृढहृदंतरे चिरतरं मृडः क्रीडते विगूढतमसः परोप्यति सुगाढहृत्तापहः॥ वि ई० शां० द्वा०
११९ मूढमति दूरगः श्रुतिशिखासु गूढप्रभः सगूढवरपाद्वरः सकललोक मीढ्वा हरः॥ गौरीयल्लकलिंग पूजन अ० ३५
रताः सायंतने निद्रितैः मल्लीमुल्लिमतल्लिकादिनिवहैः उत्फुल्लहल्लोत्पलैः॥ गंधाधीकृत कुंदवृंद कु
टजैः मंदारसच्चंपकैः बिल्वामोदसुमैः दलैश्च सुमहालिंगं विमुक्तास्सदा॥४२॥ ॥ इति श्रीशिवरहस्ये
ईशानाख्ये द्वादशांशे शिवगौरीसंवादे इतिहासफलश्रवणं फलकथनं नाम पंचत्रिंशोध्यायः॥३५॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानायनमः॥ ॥स्कंदउवाच॥ ॥अनुक्रमणिकाध्यायसंज्ञानांकथनंद्विज॥ तत्रतत्रमहेशस्यकथाख्या
नमनुत्तमं॥ माहेशांशः प्रथमतः नामतश्चात्रविश्रुतः॥ जैगीषव्यप्रसादार्थं महादेवस्य चागमः॥ गणानांदेवसंघा
नांभ्रमसंवादकीर्तनं॥ कैलासवर्णनं चैवद्वारगोपुरवर्णनं॥ ३॥ कैलासेश्वरपूजा चलिंगाध्यायानुकीर्तनं॥ कैला
सस्यतपश्चर्यागाणपत्यंप्रसादतः॥ ४॥ तन्मौलौवसतिः शृंभोः जिज्ञासामरसत्तमे॥ ज्ञानार्थकथनं चैव आत्मलिंग
स्यपूजनं॥ ५॥ प्रथमेंशेकथाख्यानमुक्तंदेव्यैशिवेनहि॥ अष्टौश्लोकसहस्राणिशिवेनोक्तोयमद्भुतः॥ ६॥ द्वितीयः
४४७ शोभवोनाम्नाकथितः श्रीशिवेनहि॥ देव्यास्तपः प्रसादंच मणिद्वीपोपवर्णनं॥ ७॥ चिंतामणिगृहस्या ग्रं वर्णनंश्रीपुरस्य
च॥ तस्मात्कैलासगमनं कामकामेश्वरात्मकं॥ ८॥ विग्रहंदेवदेवस्य हिमाचलसमागमः॥ हिमाचलालोकनंचकैलास
मग स्यशिवस्यतु॥ ९॥ देव्याश्चप्रेषणंतत्रमनोन्मन्याः समुद्भवः॥ दूर्वाससोमहिम्नस्य कथनंतत्प्रसादनं॥ १०॥ द्वितीयांशे
प्रकथितं महादेवेनतत्त्वहि॥ श्लोकानांत्रिसहस्रेणगोर्यैतत्रमहामुने॥ ११॥ तृतीयोहरसंज्ञोत्र त्रिनेत्रेणैवचाकथि॥
केदारदर्शनंतत्र व्यासस्यापिद्विजैः सह॥ १२॥ गायत्र्यास्तपसः सिद्धिः देव्यानयनकीर्तनं॥ गणानांप्रेषणं चैव रुद्रस्तव
नकीर्तनं॥ १३॥ वेदपादस्तवश्चापि चमकप्रार्थनातथा॥ तीर्थेशावंदनस्यापि माहात्म्यं मानसार्चनं॥ १४॥ श्रीशैलकीर्तनं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९१ चैवजनकस्य मुनेस्तथा॥ संवादो वैरत्ननिधेः पद्मावत्याश्चकीर्तितं॥१५॥ यमलोकस्य वृत्तांतं नर्मदागंगयोर्वरं॥ भस्म दृशा०दी
रुद्राक्षमाहात्म्यं व्रतस्य परिकीर्तितं॥१६॥ राज्ञो यमस्य पुत्रैश्च शिवार्चनकथानकं॥ शिवकुंठिचरित्रं च भागद्वयमि अ०३६
९२० दं द्विजाः॥१७॥ त्रयस्त्रिंशत्सहस्रेण श्लोकेनांशः प्रकीर्तितः॥ चतुर्थः शिवसंज्ञोत्र कथितोस्ति शिवेन हि॥ नंदीभृंग्यु
पमन्यूनां गाणपत्यस्तुतिक्रमः॥१८॥ चतुःसहस्रतः प्रोक्तः अंशो गौर्यै पिनाकिना॥ पंचमो भर्गसंज्ञो हि लिंगद्वादश
वर्णनं॥१९॥ वामदेवस्तुतिश्चैव नामसाहस्रकीर्तनं॥ गंगाद्वारप्रभासस्य पुष्करस्य प्रभावकृत्॥२०॥ षट्सहस्रेण क
थितो देव्यै देवेन शंभुना॥ शंकराख्यो शकः षष्ठः व्याससूत्रादिकीर्तनं॥२१॥ श्रुतिसिद्धांतराद्धांतो ज्ञानयोगप्रका
शनं॥ निदाघऋभुसंवादं अविमुक्तानुवर्णनं॥२२॥ पंचसाहस्रतः प्रोक्तः शिवायै श्रीशिवेन हि॥ उग्रो नाम्ना सप्तमांशो
कथितः काशिकाशकृत्॥२३॥ सहस्रनामकथनं वैष्णवं तु महिम्नकं॥ पुष्पदंतमहिम्नश्च नाम्नामष्टोत्तरं शतं॥२४॥
श्रीमद्दक्षिणकैलासे शोणवृद्धाचलप्रभा॥ श्रीमद्भस्मसभायाश्च कांचीकुंभेश्वरस्य च॥२५॥ मध्यार्जुनप्रभावस्य की
र्तनं तत्र विस्तरात्॥ चतुर्दशसहस्रेण श्लोकानां तत्र शंकरः॥२६॥ भीमाख्यश्चाष्टमांशोत्र कथितः शंकरेण हि॥ कद्रूसुप
र्णसंवादः कद्र्वयपद्मयप्रसारनं॥२७॥ अमृताहरणं तत्र नागभूषत्वमीक्षितुः॥ पातालिंगमहिमा बिल्वोत्पत्तिः प्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कीर्तिता ॥२८॥ चतुःसहस्रतः श्लोकैः प्रोक्तो देवेन तत्र हि ॥ सदाशिवाख्यो नवमः कलिधर्मप्रबोधकः ॥२९॥ भूतभव्यादि
भक्तानां सुचरित्र कथाश्रयः ॥ सहस्रसप्तश्लोकेन सोंशः प्रोक्तः शिवेन हि ॥३०॥ ईश्वराख्योत्र दशमः भस्मरुद्राक्षधारणात् ॥
रुद्रपंचाक्षरस्यापि शिवलिंगमहोदयः ॥३१॥ शिवधर्मप्रकृष्टं सार्थे शिवभक्तार्चने फलं ॥ अष्टौ श्लोकसहस्रेण कथितो
स्ति पिनाकिना ॥३२॥ एकादशो महादेवः प्रोक्तोयं नामतो मुने ॥ अभिषेचनिकानां तु कालं पुष्पेषु वै फलं ॥३३॥ मासि मा
स्यर्चनस्यापि सोमवाराष्टमीषु च ॥ प्रदोषे च चतुर्दश्यां पूजनेन फलं द्विज ॥ षट्पंचांश मध्ये शिवक्षेत्रानुकीर्तनं ॥
११९ ॥३४॥ षट्सहस्रेण कथितः श्लोकेनात्र शिवेन हि ॥ ईशाख्यो द्वादशांशोयं सत्यर्थं दक्षनाशनं ॥ उद्वाहश्च तथा शंभोः स्कं
दोत्पत्त्यसुरार्दनं ॥३५॥ स्कंदस्य च शिवस्यैवं नामसाहस्रकीर्तनं ॥ रुद्रस्तुतिर्वेदपाद जयस्तुत्युपवर्णनं ॥३६॥ अवि
मण मुक्तप्रवेशं च जैगीषव्यस्य सत्तमाः ॥ अनुक्रमेण नु कथनं श्रवणो महिमास्य हि ॥३७॥ तथा पंचसहस्रेण श्लोकेना
यं शिवोदितः ॥ शिवस्यैवं रहस्यार्थ रत्नाकरमिदं मुने ॥३८॥ प्रथमः षष्टिकाध्यायो द्वितीयस्त्रिंशता वृतः ॥ त्रिती
यः त्रिंशतं मानं द्विधाभूतोयमुत्तमः ॥३९॥ चतुर्थः पंचविंशश्च चत्वारिंशश्च पंचमः ॥ षष्ठः पंचाशता प्रोक्तः सप्तमः पं
चविंशतिः ॥४०॥ शिवस्थानानुकथनो सप्तांशद्विंशतस्तथा ॥ अष्टमः त्रिंशदध्यायः षट्षष्टिनवमो द्विज ॥४१॥ दश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२ मंत्रिशतं प्रोक्तं मुने एकादशोपि हि ॥ पंचाशद्वादशांशोद्धि शतीपरिकीर्तितः ॥४२॥ एवमध्यायसाहस्र रहस्यमिदमुत्तमं ॥ ई० शा० खं०
श्रीस्कंद उवाच ॥ ॥ शमायनतपोधनाः शिवपदाब्जबोधायनाः सनंदनसनातना भृगुवसिष्ठ बोधायनाः ॥ शिवा अ० ३६
१२१ र्चकजनावनाः शिवकथाश्रवात्पावना भवंतु मम हृज्जनाः भवपदाब्जसंसेवनाः ॥४३॥ भव्यादिव्य वरहव्य वाहवास्त
व्यमव्ययतपः परमस्त्वं ॥ जैगिषव्य तव काव्यमव्यथं हृद्गतं सुगतमेव धनाढ्यं ॥४४॥ सदा महेशानकथाविधान
निधानलाभाय यतेत सत्तमाः ॥ तदैव सर्वाघमहौघहृत्तमो निवार्य चार्याः प्रभवंति चोत्तमाः ॥४५॥ वंध्यं न कुर्याद्दिव
सं तु विंध्यहृत्सुध्यालपादाब्जकथाभिवृध्या ॥ विज्ञेय एवं बुद्ध्या प्रसमीक्ष्य सिध्यै रध्यायमस्य शृणुयात्पठेद्वा ॥४६॥
तुरंगमातंगशतांगधात्री पवित्रपात्रे प्रददाति गां वसु ॥ सत्रांतिरावैर्यजते सदैव दानधीयते तीर्थजलाप्लुतः सः ॥४७॥ त
तोधिकं पुण्यमवाप्य मोदते किं नाकपृष्ठे सुकृतामथो कं ॥ सदाशिवस्यास्य रहस्यसंश्रवात्कैलासमौलौ निवसन्गणो
भवेत् ॥४८॥ येवा पुराणानिचयं शिवधर्मसारं शास्त्रोपमे न कुधिया खल शब्दतर्कैः ॥ शर्वोक्त शैवसुरहस्यमिदं शिवाये
निघ्नंति विघ्ननिकरैर्द्विजजांत्यजास्ते ॥४९॥ न कर्कशाकुशर्कराप्रतिभतर्कहृद्ध्वांतभित् भवेत्तमुतार्कवत् शिवरहस्य
रत्नांशुमान् ॥ न पाणिनिपणाधिकैः फणितशब्दमब्दैः शतैः विचारकारिहांभहृद्भवति हासमिमांसकः ॥५०॥ सांख्यव्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ख्य

ख्याः न सौख्यप्रदमदमहिमा सौख्यहेतौ न जीवे योगो रोगैकभोगो भवति जनिमतां रागदोनो विरागः ॥५१॥ संजायेत भवे

षु भाग्यजनुषां वैराग्यभाग्योदयस्त्वारोग्यं किल शंकरांघ्रिभजना च्छैवैः परं लभ्यते ॥ कायं सायमुमासहायचरणां

भोजार्चनाज्जायते सोपायं न उपायसाध्यगदयुक् कोयं न जानात्यमुं ॥५२॥ हायं पापमवश्यमव्ययमजं शांतं तुरी

यं शिवं ध्यात्वा हृत्कमले वसेव नियतं कैलासवासादरः ॥ केदारगोकर्णकुरुप्रभाससन्नैमिषं च बदरीमरकंटकं च ॥५३॥

श्रीशैलत्र्यंबकरुद्रकोटिसंवासिनां स्यादविमुक्तवासः ॥ श्रीकंठरत्नाद्रिसुजंबुकेशजप्येशमध्यार्जुनकुंभघोणे ॥५४॥

450 श्वेतेवने ब्रह्मवने च कांच्यां श्रीकालहस्तौ अरुणाचले वा ॥ वृद्धाचले वाभ्रसभासु गोनगे श्रुतीवने सेतुवने सुपुण्ये ॥ ५५॥

हालास्यके वेणुवने च ताम्रा कवेरजा गंगासु नर्मदावरे ॥ गोदावरीकृष्णाभवा च यमुना तुंगासु संभेदवरे च मज्जनः ॥ ५६॥

सोमा वथा त्राप्यविमुक्तवासयोग्यः शिवप्रीत तनुर्भवेत ॥ तत्राविमुक्तेपि वसन्न थेश्वरूपावशाद्वास महोत्सभेत ॥ ५७॥

कैलासवासोप्यविमुक्तवासिभिः प्राप्येत शंभोः किल भक्तियोगे ॥ येशंकरास्यकमलान्निगमागमांत पुष्पोत्थसुंदरमरंदर

सेर्थवादं ॥५८॥ ते मन्वते खलु नराः खरसूकरादियोनीषु जारजभवाभवदुःखभाजः ॥ शिवरहस्यमिदं शिववक्त्रपद्मा

दिसृतं पठते भुवि भक्तितः ॥५९॥ नावधमेषु न भवेद्भववीक्षणेन भावेषु घोरभवजं विभवं भजेन्न ॥ यस्तूर्ध्वपुंड्रमलिके वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 दधन्नलीक नालीक जासन शत निरयेप चेत्तः॥६०॥ योविष्णुसाम्यकधियाहृदये भवेद्योविश्वाधिकेस्वगणायोनि 
 पुसंभवेत्तः॥ भस्मत्रिपुंड्ररहितः शिवलिंगमात्र संपूज नोज्झितमतिः श्रृणुवन्रहस्यं॥६१॥ शैवंविनिंदतिन नंदतिबु 
द्धिपूर्वं बौद्धेषुजायतिचिरं निरयागतोपि॥ योर्थाशया शिवरहस्यमिदंत्वशैवे संश्राव्य भव्यपदवींनसजातुविंदेत्॥६२॥
लालामुखेचनिरये क्रिमिभुक्सतिष्ठेद्दिव्यासुतिष्ठतिसुनिष्ठुर कशाग्रविकीर्णदेहः॥ तस्मादिदं शिवरहस्यमिदंमहर्थं
श्राव्यं शिवार्चकजनैः द्विजशाभवान्स्यात्॥६३॥ भस्माक्षधारिभिरहर्निशमेतदेव पाठ्यंनशाठ्यमतिभिर्यतिभिश्वनि
त्यं॥ गोभूहिरण्य कनकांबररौप्यकूप्यधान्यैर्धनैर्गजतुरंगशतांगसंघैः॥६४॥ संपूजयेद्गुरुवरैर्वरशांभवंहियोस्यार्थपार
गवरंसशिवंव्रजेच्च॥ प्रत्यंशंपरिपूज्यशांभववरंअस्यैवसंवाचकं भ्रावान्भोज्यसुभोज्यषड्रसवरैःस्रक्चंदनाधर्हपोः॥६५॥
तांबूलैर्वरगोसुदक्षिणाधनैः योवासहस्रंशतं एकंद्वादशवासुशांभववरान्विश्वेशसंतुष्टये॥ तस्मिन्प्रसादसुमुखः प्रभवेन्म
हेशो विघ्नेशषण्मुखसमं प्रविभावयेत्तं॥६६॥ नित्यर्धिधान्यधनभूमिगवाश्व संघमातंगपुत्रसुकलत्रयुतंकरोति॥ प्रा
ज्यंराज्यमुमापतिः प्रदिशति प्रासादमत्युज्वलं योगंभोगमपिप्रसादसुमुखो भक्तेषु भक्तिंतदा॥६७॥ मुक्तिंभुक्तिममुत्र
पुत्रसहितं पारुष्यहीनंवचः आयुष्यं प्रददाति पुण्यमपरंजोघुण्यतेतद्यशः॥ येवैलिखंति सुमुखा मखजातपुण्यं ते वैल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भतिच भवतिमेहं दूतैरवाः ॥६८॥ तेसन्मुखाशिवरहस्य रहस्यसारं तेषपमुखोपमधियोनहिदुःखभाजः॥ योस्याक्षरश्रवण
कृत्क्षरयत्यघोघं सश्लोकएवसभवेत्किलश्लोकपाठी ॥६९॥ अध्यायमात्रपठनाच्छ्रवणाद्विमुक्तः योस्यर्थवित्प्रतिपदं सभ
वेद्विमुक्तः ॥ भिन्नायेहृदयेनदुःखनिकरैः सन्माजराद्यैर्गदै रन्नानां पतिमीश्वरं चजगतां शीघ्रं प्रसन्नंकुरु ॥७०॥ कैलासा
चलवासमोदसुमनः स्वार्थायकाशीं व्रजे देवं भूसुरसत्तमे श्रवणपैर्युक्तो विमुक्तिं व्रजा यल्ला भान्नपरं चलाभमधिकंह
हृसमन्यन्मुने उल्लासायमनस्वसंनिभकथासाम्यंनचोल्लस्यति ॥७१॥ सदामुदाहृदाभिधाकदाचिदीश्वराज्जगत्त्रया
४१ मिसोमशेखरं भजामिक्षामिदुःखजं ॥ मुनेसुपारदातिवं चलं मनोहिवारिदादपीह कश्मला न्निवार्यसर्वतः शिवं भजामन्यखं
डुमेवतं ॥७२॥ नयामिशिवपूर्व जोर्दिवसमीशतोन्यंसुरं नयामिशरणांतरं प्रविजहामि पापंसदा ॥ भजामिशिवमन्वहं प्र
तियजामियत्नैरहं प्रयामिमनसाहरं प्रतिहरामि चित्तंमुदा ॥७३॥ ॥श्रीस्कंदउवाच॥ ॥भवभवदीयकथासुधाब्धिवी
चीपरीरम्भज्जनतापिसौख्यभाक्स्यात् इति ॥ कलिमुरताविचारतांता वनिताभोगरसापिनाकपृष्ठे विरतानिरताधुनाथ
यांप्रभवतते पदाब्जे ॥७४॥ ॥इतिश्रीशिवरहस्ये ईशानाख्येद्वादशांशे श्रवणादिफलकथने स्कंदजैगीषव्यसंवादे
षट्त्रिंशोध्यायः ॥३६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥सूतउवाच॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 जैगीषव्यस्तदास्तुत्वाषण्मुखात्सुरसायनं॥द्वादशांशसमायुक्तं यद्धोर्यैः शंकरोदितं॥१॥शैवंशिवरहस्याख्यंइतिहासंवरंमुदा॥शिवानंदकथा 
सारंतारकंपापवारकं॥२॥पुण्यंस्वस्त्ययनंपुंसांश्रवणात्सर्वकामदं॥भव्यंदिव्यंयशस्यंचपुण्यमारोग्यवर्धनं॥३॥सनातनमिदंधर्म्यंशिवध 
र्मकथाश्रयं॥पशुपाशविमुक्त्यर्थंसर्वेषांशंकरोदितं॥४॥गोप्यैःस्वहृदयंगोप्यंनाभक्तेप्रतिपादयेत्॥आयुरारोग्यदंह्येतत्इतिहासंशिवोदि
तं॥५॥भस्मधारिभिरेवैतत्श्राव्यंभव्यंतुशांभवैः॥त्रिपुंड्रधारिभिर्नित्यंतथारुद्राक्षधारिभिः॥६॥पंचाक्षरजपासक्तैःरुद्रावृत्तिपरैर्द्विजैः॥
शिवलिंगार्चनपरैःशांतैर्भक्तैःशिवार्थिभिः॥७॥गृहस्थैर्वर्णिभिश्चैववनस्थैर्यतिभिस्तथा॥भस्मरुद्राक्षधृग्भिश्चनियतैःशिवयोगिभिः॥
॥८॥निवृत्ततर्षैःयतिभिःशिवस्योत्कर्षवादिभिः॥वेदवेदांतसारज्ञैःशांभवैर्भस्मधारिभिः॥९॥नियमाच्छांभववराच्छ्रोतव्यंचान्यवर्णकैः॥
क्षत्रियैर्वैश्यशूद्रैश्चश्राव्यंशैवंरहस्यकं॥१०॥भस्मधृग्भिस्तुनियतंशिवबुद्ध्याप्रपूज्यतां॥शांभवंवाचकंकुर्याद्भस्मरुद्राक्षधारिणं॥११॥नोर्ध्व
पुंड्रधरंकुर्याद्वाचकंचास्यसत्तमाः॥तस्माच्छ्रुत्वानरायांतिनरकंस्वपितामहैः॥१२॥शिवज्ञानंनजायेततस्माच्छ्रुत्वापिशांकराः॥किमंधादंधो
नयतेकूपमध्येस्थितौनघाः॥१३॥यथाशिवसमोदेवोनभूतोनभविष्यति॥तथाशिवरहस्यस्यतुल्यमन्यंनविद्यते॥१४॥विभूषणंभस्मनोऽन्यन्ना
स्तिनश्रूयतेश्रुतौ॥तथाशिवरहस्यस्यतुल्यमन्यंनविद्यते॥१५॥यथात्रिपुंड्रात्परंपावनंनैवाविद्यते॥तथाशिवरहस्यस्य०॥१६॥यथापंचाक्षरजपा
न्नास्तिपातकशोधनं॥तथाशिव०॥१७॥यथारुद्रजपादन्यंनास्तिप्रीतिकरंविभोः॥तथाशिव०॥१८॥यथालिंगार्चनाच्छ्रेष्ठंनास्तिवेदांतसंस्तुतं॥त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थाशिवरहस्यस्य०॥१९॥यथोत्तमं शिवक्षेत्रमविमुक्तं श्रुतीरितं॥तथाशिवरहस्यस्य०॥२०॥प्रदोषकालः काले
षु यथासर्वार्चने वरः॥तथाशिवरहस्यस्य०॥२१॥व्रतानांतु यथाश्रेष्ठं शिवरात्रिः शिवार्चने॥तथाशिव
रहस्यस्य०॥२२॥वारव्रते यथाश्रेष्ठं सोमवारार्चनं द्विजाः॥तथाशिवरहस्यस्य०॥२३॥तिथ्यर्चने यथाश्रे
ष्ठा शंभोः कालाष्टमी वरा॥तथाशिवरहस्यस्य०॥२४॥पर्वार्चने यथाश्रेष्ठा शंभोः नित्यं चतुर्दशी॥तथाशि
वरहस्यस्य०॥२५॥त्रिनेत्रप्रीतिकृन्नित्यं यथारुद्राक्षमीश्वरे॥तथाशिवरहस्यस्य०॥२६॥पत्रेषु च यथामु
482 ख्यं बिल्वपत्रं शिवार्चने॥तथाशिवरहस्यस्य तुल्यमन्यं न विद्यते॥२७॥श्रुत्वैतद्भक्तिमाप्नोति शंभोर्नित्य
विमुक्तये॥तथा भस्मनि रुद्राक्षे शिवलिंगार्चने द्विजाः॥२८॥पंचाक्षरे रुद्रजपे सोमवारार्चने तथा॥कालाष्ट
म्यां चतुर्दश्यां बिल्वपत्रार्चने तथा॥२९॥शिवक्षेत्रनिवासेषु अविमुक्ते विशेषतः॥शिवनाम्नि सदा भूयाद्भ
क्तिरस्य श्रवाद्द्विजाः॥३०॥तथा भक्त्या विमुच्यंते ससुरासुरमानवाः॥भक्तिप्रदमिदं पुण्यं इतिहासोत्तमं वरं॥
॥३१॥दिव्यं शिवरहस्याख्यं द्वादशांशविमंडितं॥यस्य तुल्यं नहि श्रेष्ठं पुराणं भारतं तथा॥काव्यं रामायणं वा
पि संसारवरदुःखहं॥एतानि भक्तिदान्यानि शंभोः शांभवसत्तमाः॥भक्तिदं केवलं ह्येतत् शंभुनोक्तमिदं शुभं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ पुण्यंशिवरहस्याख्यं भक्तिसार महोदयं॥३४॥ भक्तैरेवसदाश्राव्यंअभक्तैर्नकदाचन॥सत्यंसत्यमिदंसत्यं ई०श्रा०हा
१२५ एवंगौर्यैवदत्तदा॥३५॥सावधानेनयुष्मासुभक्तेषुप्रतिपादितं॥यत्ते भसदृशो मल्लाशीविर्किटिर्भवेत् अ०३७
॥३६॥तथाशिवरहस्यस्य साम्यमन्यंनविद्यते॥मृगेंद्रसंकाशोजंबुकः किंभविष्यति॥३७॥तथाशिव०॥
पद्मरागसमंरत्नंकाचखंडोभवेत्किमु॥तथाशिवरहस्यस्य०॥३८॥यथाचंदनसंकाशः पारिभद्रोऽभवि
ष्यति॥तथाशिवरहस्यस्यसाम्यमन्यंनविद्यते॥३९॥उद्यद्द्युमणिसंकाशो खद्योतोद्योततेकिमु॥तथा
शिवरहस्यस्य०॥४०॥किंरासभोऽश्वसंकाशो भवेद्द्वेषप्रदोषभाक्॥तथाशिवरहस्यस्य०॥४१॥कनकाचलसं
काशःपांसुपिंडोऽभविष्यति॥तथाशिवरहस्यस्य०॥४२॥कोकिलाकाकलीलापंकुर्यद्ध्वांक्षोतिरूक्षवाक्॥तथा
शिवरह०॥४३॥श्रुत्वायंषण्मुखाद्विप्राजैगीषव्यःसुरैर्गणैः॥नत्वातुष्टावतंस्कंदंअष्टमूर्तितनूभवं॥४४॥
विनयावनतोभूत्वा ब्रह्मविद्यावादिभिर्गणैः॥जैगीषव्यो महायोगी हव्यवाहप्रभोमुनिः॥४५॥ ॥जैगीष
व्यउवाच॥ ॥सिंदूरारुणा सिंधुरेंद्रवदनं सांद्रांबुदानोन्नतं जातानंदसुखं हितांतरबलंदत्तस्थकुंडमहः॥मोत्यां
दोलनकर्णताल तालसुशिवध्यानोन्मिषोन्मेषणैः अंतर्बाह्यगतंशिवंस्वकहृदापश्यंतमीक्षेसदा॥४६॥शिवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाहशिखावखलेखसुमुखः श्रीषण्मुखस्त्वं सखा भ्राता बंधुरस्त्वया घपितृमानशंभुः पिता चासि मे॥ ज्ञानांभो
धिसुधाकरस्त्वमधुना विज्ञानदस्त्वंगुरुः त्वत्यादार्क करोरुदारितहृदाकाशांधकारः परं ॥४७॥ भारं मे भवसागरं सु
खकरं तर्तुं पुनर्गोष्पदं॥ संक्रंदनानंदनचंदनाद्रु गात्रत्रिनेत्रवरपुत्र नमो नमस्ते॥ क्रौंचाद्रिसूदन सनातन वंद्य
पादद्वंद्वारविंदयुगपरिपाहि मुनीन्द्रदृशाते॥ अपितामह देवशक्रबंधो गिरिमातामहदारिदैत्यसिंधो॥४९॥ प्रणा
वार्थपदादिबोधहेतुं विधये त्वं प्रददासि हे नमस्ते॥ शरवणभव चरणं न्ये येषां न हि तेषां तरणं भवोरुसागरस्य॥५०॥
मरणप्रभवं भवे भवेतु मंदं सुब्रह्मण्यदयारसालसानां॥ सुब्रह्मण्यो ब्राह्मणानां हि देवो अब्रह्मण्यं हंति पाति द्विजा
न्नः॥५१॥ त्राता देवानां विजयस्य प्रदाता गांगेयस्त्वं नंदितात्मासि भक्तैः॥ भवता भवतापहारिणा भवसिंधुग
453 ताः समुद्धृताः॥५२॥ सुरतो विरता दुःखमार्गे मरता प्रापकथा ऽमृतो ऽथवर्षैः॥ सर्पांगहारचरणं प्रपन्नाः तेषु प्र
सर्पक गणाद्भवयाजिसालां॥५३॥ सर्पंति पुण्यान्यघसंचयानि भीतान्यपासर्पंति तत्र चित्रं॥ यत्त्रिनेत्रपदपं
कजमित्रभावाः पत्रैश्च बिल्वतरुजैः सततं पवित्रैः॥५४॥ चित्रं किमत्र यजतां जगतां महेशः पात्रं करोति करुणा
रसदृष्ट्यमुत्र॥ न ब्राह्मवैकुंठविकुंठकामे नोत्कंठभावेन चनीनकंठं॥५५॥ अपायदेर्किं विबुधाधिसत्पदे मुदे विनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६

शिवरह० १२ देपिनचित्तशक्तिः॥यथाशांगलिंगार्चनेष्वं ˜तसंगं मनोनैवपापौघसंगाद्विभेति॥५६॥नतुंगानगंगांभसास्नानपानैः पु ई शा० द्वा०
१२५ नीते यथाभावसंघौघभंगः॥मरिष्यंतिसर्वे प्रणश्यंतिभोगैः नरिष्यंतपूर्वाः सघुण्यघशाये॥५७॥परित्यज्यपृथ्वींध अ० ३८
नंबंधुवर्गं क्रयातागतं तैश्च साकं नवासः॥सहायमन्यंनविहाययास्यतां मुमासहायो वतिभक्तवर्यान्॥५८॥अ
पायकायप्रविनाशकालेऽपायमन्यं निवसामकाशी॥ ॥सुराऊचुः॥ ॥श्रीमारमार सुकुमार कराग्रशक्ते श
क्तिप्रियात्मजसुरासुरजैत्रशक्ते॥भूरादि तारकहरामर वृंदसेनाधीशाभुनाशय सदा भवदुःखजालं॥५९॥मूषावैरि
वहप्रियात्मजहर हारांगआहार कसंस्थागेऽद्रकपोत्रहस्त सुमहाशक्ते नमस्ते सदा॥भूरापारसुदैत्यतारकमहादर्पघ्न
कंदर्पतः साहस्राधिक कांतिसुंदर महामारारिहृत्पंकज॥ द्वारा कारकुमारधीरसुरतासेनापते पाहि नः॥मो चामदा
चामनचारुवाच पंचाननोयत्कथयत्षडाननं॥६१॥सनातनंपुण्यरहस्यमेतद्रसायनं नः श्रवणो भवायनमः॥
गणाऊचुः॥ ॥कुंजरमुखानुकूलः पंचमुखस्यैवस्व यंकिशोरोपि॥श्रिततारकोपिसनतं तारकवैरी विजेज
तांदेवः॥६२॥षोढामुखः सुराणां वोढानीकस्य पातु मृडपुत्रः॥ढोढादनुजकुलेभ्यो लेढावल्लीभुमाधर
सुधायाः॥६३॥ ॥मुनयऊचुः॥ ॥स्वर्नारीजनवृंदवंदितविलसन्मल्लीसुमप्रोद्गलन्माध्वीपूरतरंगमेदु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रपदद्वंद्वारविंदप्रभो॥६४॥स्वामिन्प्रोन्नतशैलवासनमतां कष्टापदां वारक॥शंभोस्त्वं खलु शक्तिमानिति गिरं जल्पं
ति लोके जनाः॥६५॥शंगां गसंगात्किल पापभंगः तवाभिधं गोपि सुमंगलायनः॥ गणाभिधं गोपि कुतः सुराणां मुनीश्व
राणां वनशैलवासिनां॥६६॥जैगीषव्यतपःप्रसादनवशाद्विश्वेश संदर्शनं ईशान्नावशतस्त्वदंबुजमुखसुस्पंदिभं
गावयं॥जाता भक्तिरसार्द्रसारहृदयाः किंनोत्र संप्रार्थ्यमप्यास्ते शिवशैलवासमधुनावासाय काश्यां नमः॥६७॥ तत्रा
लिंगनवंदनेन गणपास्ते वै सुरा भूसुराः॥जैगीषव्ययुता कुमारसुकुमाराभंपदाक्रांतदा॥ नेमुर्हृष्टहृदा विभासित प
४५४ थाया तार्कबिंबोपमाः काशीते शिवशैलवासरसिका दृष्टुं च विश्वेश्वरं॥६८॥ ॥सूत उवाच॥भवाज्ञया भावुकद
र्शनेन भवांगसंगो मम भूत्सुहृद्वरः॥ तेनैव वः शैवरहस्यसंश्रवा मुक्तास्थ यूयं पुनरस्तु दर्शनं॥६९॥इति तान नुशा
स्य शंभुसूनु न्ननाम विघ्नेश्वरमीश्वरं शिवं॥मुदा तदा तत्र विमुज्य वंगिरो गणोऽत्रेतो मोदमवाप हर्षितः॥७०॥इति
प्रयाता मुनयश्च ते सुरा गणा मुनींद्रेण प्रणम्य संमुखं॥निदाघकालानलतापितो यथा तथा च काशीं विविशुश्च
मुक्तये॥७१॥काशीं नाशितपापराशि शिवदृक्कारुण्यवारांनिधिं तां वाताशिवराः सुरा गणवराः दृष्ट्वा प्रहृष्टा त
राः॥वासायैव मुदं दधुः सुमनसो नत्वा च विश्वेश्वरं॥७२॥उत्तुंगलिंगं विलसद्दहिफणासंगसोमांतमांगं नेत्रीभूतं ममं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ व्या
गैरहितनैगांगभस्मप्रभाव्याकीर्णांगमतंगकृत्तिवसनं फालस्फुलिंगं शिवं ॥ तटिनीजटिलालकं महेशं निटिलाक्षं वर
मूलचारुगेहं करटित्वकृपरमेव काश्यमीशं प्रभजंतिस्तुतिभिः सुरगणाः ॥ ७३ ॥ तत्रत्योत्तमलिंगमंडलमिदं भूमंडलेपाव
नं दृष्ट्वापूज्य सुबिल्वपंकजसुमैः तत्रान्नपूर्णामपि ॥ ढुंढिं भैरवदंडपाणि मपितैः संपूज्य हृष्टास्तदा देवास्ते मुनयो गणाः
शरवणाज्जाताश्रया संस्थिताः ॥ ७४ ॥ जैगीषव्यो वियोगप्रबलगतिमतां प्राप्य गेहं गुहायाः कैलासाचलवासनिश्चय
मतिः तपस्यत्ययं शंभुहृत् ॥ दृष्ट्वा तस्य गुहां नगभंजगुहां यात्येव तन्मानवो लिंगं तत्परिपूजितं च मनुजाः पश्यंतु का
श्यां चिरं ॥ ७५ ॥ देवाश्चापि गणेश्वरा मुनिवराः सम्यक्प्रतिष्ठाप्यते लिंगान्यत्र स्वनामकानि कृपया विश्वेश्वरस्याज्ञया ॥
तच्छ्वा ते विपुलं तपः सुविपुलं नैकेन जन्मार्जितं कैलासाचलवासदुर्घटमिदं मन्वंत ते संयमुः ॥ ७६ ॥ कैलासमौलिंप्रय
युर्गणा स्तदा सुरा ययुर्लोकमवापुराश्रमं ॥ तदा द्विजास्ते गणपा वरं हरं नत्वा च गौरीं च जगुः तदागमं ॥ संवादमेषां च तदा
मुदाहरः श्रुत्वा गणैः कीर्तितमेव सत्यं ॥ ७७ ॥ कुमारवक्त्रान्मुदितश्च शंकरो स्वाज्ञावशात्तत्र गताविमुक्तं ॥ ततः पुनः काल
वशेन तं मुनेर्जैगीषवतां तर्हृदयेन शंकरः ॥ ध्यानेन चात्मस्थमुदारसत्वं मुनिं विमुक्तं त्वथ कर्तुमीहते ॥ ७८ ॥ ॥ इति
श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे मुनिसमागमो नाम सप्तविंशोध्यायः ॥ २७ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीईशानायनमः॥ ॥सूतउवाच॥ ॥तुष्टुवुःसुरसंघास्ते स्कंदं सेनापतिं तदा॥ नामभिस्तत्रमुदिताः सहस्राष्ट शतैर्मुदा॥१॥
स्तुत्वाचस्तोत्रवर्येण देवास्तत्र षडाननं॥ कवचेन तदा देवाः स्तोत्रवर्येण सत्तमाः॥२॥ ॥देवाऊचुः॥ ॥श्री॥ स्कंदनामसहस्र
स्य ऋषिश्च परमेश्वरः॥ अनुष्टुप्छंद एवास्य सुब्रह्मण्याधिदेवता॥३॥ सौं बीजं शक्तिरेवास्य शक्तिः परतरा स्मृता॥ ग्लौं कील
कं सर्वकामसिद्ध्यर्थे जपईरितः॥४॥ गांगेयं वह्निगर्भं शरवणजनितं शक्तिहस्तं कुमारं ब्रह्मण्यं स्कंददेवं गुहमचलभिदं मंत्रतेजः
स्वरूपं॥ सेनानीं तारकघ्नं गणगणसहितं कार्तिकेयं षडास्यं सुब्रह्मण्यं मयूरध्वजरथसहितं कार्तिकेयं नमामि॥५॥ ॥
ॐ सुब्रह्मण्यः सुरेशानः सुरारिकुलनाशनः॥ ब्रह्मण्यो ब्रह्मविद्ब्रह्म ब्रह्मविद्यो गुरुर्गुरुः॥१॥ ईशानगुरुरव्यक्तो व्यक्तरूपः स
155 नातनः॥ प्रधानपुरुषः कर्ता कर्म कार्यं च कारणं॥२॥ श्रीकुमारोअधिष्ठानं भोक्ता भोगश्च केवलः॥ अनादिनिधनः साक्षी
नियंता नियमो नमः॥३॥ वाक्यतिर्वाक्प्रदो वाग्मी वाच्यो वक्ता च वाचकः॥ पितामहगुरुर्लोकगुरुस्तत्वार्थबोधकः॥४॥ प्रण
वार्थोपदेष्टा च अजो ब्रह्मा सनातनः॥ वेदांतवेद्यो वेदात्मा वेदादिर्वेदबोधकः॥ वेदांतो वेदगुह्यश्च वेदशास्त्रप्रवर्तकः॥ स
र्वविद्यात्मकः शांतः चतुःषष्टिकलागुरुः॥६॥ मंत्रार्थो मंत्रमूर्तिश्च मंत्रतंत्रप्रवर्तकः॥ मंत्री मंत्रो मंत्रबीजो महामंत्रो
पदेशकः॥७॥ महोत्साहो महाशक्तिः महाशक्तिधरः प्रभुः॥ जगत्स्रष्टा जगत्पाता जगन्मूर्तिर्जगन्मयः॥८॥ जगदादि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शेवर६०१२
१२७

रनादिश्च जगद्बीजो जगद्गुरुः ॥ ज्योतिर्मयः प्रशांतात्मा सच्चिदानंदविग्रहः ॥९॥ सुखमूर्तिः सुखकरः सुखी सुखकराकृतिः ॥ ज्ञा ईशा॰ द्वा॰
ता ज्ञानं ज्ञेयरूपो ज्ञप्ता ज्ञानफलं बुधः ॥१०॥ विष्णुर्जिष्णुर्ग्रसिष्णुश्च प्रभविष्णुः सहिष्णुजः ॥ तितिष्णु भूष्णुरजिरः वर्धिष्णु अ॰१८
श्शांतविग्रहः ॥११॥ ऋजुः सगुह्यः सुलभो दुर्लभो लोभवर्जितः ॥ भिन्नो विज्ञानयज्ञात्मा शिवज्ञानप्रदो गुहः ॥१२॥ हृदयादिर
हंकारो भूतादिर्भूतभावितः ॥ भूतं भव्यं भवद्भूतो भूतभव्यभवत्प्रभुः ॥१३॥ देवसेनापतिर्नेता कुमारो देवनायकः ॥ तारकारि
र्महावीरः शूरपद्मशिरोहरः ॥१४॥ अनेककोटिब्रह्मांडपरिपूर्णो सुरांतकः ॥ सुरानंदकरः श्रीमान सुरारातिभयंकरः ॥१५॥ अ
सुरांतःपुरआक्रांतवरभेरीनिनादकः ॥ सुखं दीजनानंदकरशिंजागुणध्वनिः ॥१६॥ स्फुरदट्टहाससंक्षुब्धतारकासुरमानसः ॥
महाक्रोधो महोत्साहो महाबलपराक्रमः ॥१७॥ महाबुद्धिर्महाऋद्धिः महामायो महाभुजः ॥ रणभीमः शत्रुहरो धीरोदात्तो गु
णोत्तरः ॥१८॥ महाधनुर्महाबाणो महादेवप्रियात्मजः ॥ महाभुजो महापादो महातंद्रो महाद्युतिः ॥१९॥ महार्धिमहलीयां
गे मयूरवरवाहनः ॥ मयूरबर्हातपत्रो मयूरनटनप्रियः ॥२०॥ महानुभावो मेयश्रीरमेयात्मा महाप्रभुः ॥ सुगुणो दुर्गणाद्वेषी
निर्गुणो निर्मलामलः ॥२१॥ चंचलो विमलः कांतो कमलासनपूजितः ॥ कालः कमलपत्राक्षः कलिकल्मषनाशनः ॥२२॥
महारणो महायोधा महाबुद्धिप्रदोदयः ॥ महारथो महाभोगो भक्ताभीष्टफलप्रदः ॥२३॥ भक्तप्रियः प्रियप्रेमो प्रेयान्प्रीति



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धरः सखा॥ गौरीकरसरोजाग्रलालनीयमुखांबुजः॥२४॥ कृत्तिकास्तन्यपानैकव्यग्रषड्वदनांबुजः॥ चंद्रचूडांगभूभाग
विहारणविशारदः॥२५॥ चंद्रपीडकरांभोजपरिमृष्टभुजावलिः॥ ईशाननयनानंदकंदोलावण्यसेवधिः॥२६॥ लंबोदर
सहक्रीडालंपटः शरसंभवः॥ अमरीनयनालीकचकोरीपूर्णचंद्रमाः॥२७॥ सर्वांगसुंदरः श्रीशः श्रीकरः श्रीप्रदः शिवः॥ व
ल्लीसेनापतिर्वीरो वक्ता वाचस्पतिर्वरः॥२८॥ चंद्रचूडशिखीपिंछशेखरो मुकुटोज्वलः॥ गुडाकेशः सुवृत्तोरुशिरो मंदारशे
खरः॥ बिंबाधरः कुंदधरो जपाशोणाग्रतालुकः॥ षड्जमध्यम[redacted]गांधारतंत्रीसुमधुरस्वरः॥३०॥ मेघगंभीरनिर्घोषः
456 प्रियवाक् प्रीतनिर्जरः॥ स्मितवक्त्रोत्पलाभाक्षः चारुगंभीरवीक्षणः॥३१॥ कर्णांतदीर्घनयनः कर्णभूषणभूषितः॥ सुकुं
डलः चारुगंडः कंबुग्रीवो महाहनुः॥ पीनांगो गूढजत्रुश्च पीनवृत्तभुजावलिः॥३२॥ रक्तांगो रत्नकेयूरकंकणो रत्नभूषितः
ज्याकीर्णकलसक्षामप्रकोष्ठवलयोज्वलः॥३३॥ रेखांकुशध्वजछत्रपाणिपद्मो महायुधः॥ सुरलोकाभयोध्वांतबाला
र्करुण आंतरः॥३४॥ अंगुलीयकरत्नांशुद्विगुणोद्यन्नखांकुरः॥ पीनवक्षा महाहारो नवरत्नविभूषितः॥३५॥ हिरण्यगर्भो
हेमांगो हिरण्यकवचो हरः॥ हिरण्मयशिरस्त्राणो हिरण्याक्षो हिरण्यदः॥३६॥ हिरण्यनाभिस्त्रिवलीललितोदरसुंदरः॥
सुवर्णसूत्रविलसद्विशंकटकटीतटः॥३७॥ पीतांबरधरो मुक्तो मेखलीवृतमध्यमः॥ पीवरालोमवृत्तोद्यत्सुजानुः सुप्रगु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्य १२
१२८

ल्मकः॥३८॥शंखचक्राङ्कुशध्वजरेखापदांबुजः॥नवरत्नोज्वलद्भास कटिकांगुलिभूषणः॥३९॥सुरेंद्रमुकुटप्रोद्यन्
मणिरंजितपादुकः॥पूज्यांघ्रिश्चारुनखरो सुरालिनतपादुकः॥४०॥पार्वतीपाणिकमलपरिमृष्टपदांबुजः॥मत्तमातंगगमनो
मनोमान्यगुणाकरः॥४१॥क्रौंचदारणवक्षोजकिरूक्षणविभागकृत्॥सुगमोदुर्गमोदुर्गोदुरारोहोऽरिदुःसहः॥४२॥सुभगःसुमुखः
सूर्यःसूर्यमंडलमध्यगः॥सृष्टिंकृदोपसंहृष्टःसृष्टिसंरक्षिताखिलः॥४३॥जगत्स्रष्टाजगद्भर्ताजगत्संहारकारकः॥स्थावरोजंग
मोजेताविजयोविजयप्रदः॥४४॥जयशीलोजिताशातिःजातमानोजितासुरः॥जितकामोजितक्रोधोजितमोहमदोयुवा॥४५॥
कामदःकामभृत्कामीकामिकादिकृतागमः॥जातकल्पःकलिध्वंसीकल्हारकुसुमप्रियः॥४६॥रामोरमयितारम्योरमणीज
नवल्लभः॥रसज्ञोरसमूर्तिश्चरसोनवरसात्मकः॥४७॥रतात्मारसिकात्माचरासक्रीडापरोरतिः॥कोटिसूर्यप्रतीकाशःसोमसूर्याग्नि
लोचनः॥४८॥कलाभिज्ञःकलारूपःकलावित्सकलप्रभुः॥बिंदुनादकलामूर्तिःकालातीतःक्षराक्षरः॥४९॥मात्रास्वराकृतिश्चैकोए
कमात्रोद्विमात्रकः॥त्रिमात्रश्चचतुर्मात्रावृत्तसंध्यादिमात्रकः॥५०॥व्यंजनात्माविद्युक्तात्मायुक्तोमुक्तिप्रदोगुरुः॥विसर्ज
नीयोनुस्वारःसर्ववर्णतनुर्महत्॥५१॥अकारात्माउकारात्मामकारात्मात्रिवर्गवः॥ॐकारश्चवषट्कारःस्वाहाकारःस्वधाकृ
तिः॥५२॥अहुतिर्भवनोहव्यहोताध्वर्युर्महाहविः॥ब्रह्मोद्गाता(दृगा / ग्ता)सदस्यार्थबर्हिरिध्मःसमिच्चरुः॥५३॥गव्यःपशुःपुरोडा

ईशा०ध्या०
अ०२८

२

शृग्श्चामिक्षावाजिवाजिनः॥पवनःपावनःपूतःपवमानःपराकृतिः॥५४॥पवित्रःपरिधिःपूर्णपात्रःपूतिरथेंधनः॥विशो
धनःपशुपतिःपशुपाशविमोचनः॥५५॥पाकयज्ञोमहायज्ञोयज्ञोयज्ञपतिर्यजुः॥यज्ञांगोयज्ञगम्यश्चयज्वायज्ञ
फलप्रदः॥५६॥यज्ञांगभूर्यज्ञभूमिःयज्ञश्रीर्यज्ञवाहनः॥यज्ञश्चयज्ञविध्वंसीयज्ञेशोयज्ञरक्षकः॥५७॥सहस्रबाहु
र्विश्वात्मासहस्राक्षःसहस्रपात्॥सहस्रवदनोनित्यःसहस्रात्माविराट्स्वराट्॥५८॥सहस्रशीर्षोविश्वश्चतेजःप्राशो
ध्यथात्मवान्॥अणुर्बृहत्कृशस्थूलःदीर्घोह्रस्वोलघुर्गुरुः॥५९॥सूक्ष्मःसूक्ष्मतरोनंतःविश्वरूपोनिरंजनः॥अमृतेशो
157 ऽमृताहारोऽमृतदाताऽमृतांगवान्॥६०॥अह्नोरूपस्त्रियामाचसंध्यारूपोदिनात्मकः॥मुहूर्तोघटिकारूपःयमरूपोयमात्मकः॥
॥६१॥पूर्वान्हरूपोमध्यान्हरूपःसायान्हरूपकः॥अपराह्णोतिनिपुणःसवनात्माप्रजागरः॥६२॥वंद्योवेदयितावेद्योवेदवि
द्याविदांवरः॥विनयःसत्यसंधश्चविद्वान्विद्वज्जनप्रियः॥६३॥विश्वगोप्ताविश्वभोक्ताविश्वकृद्विश्वभेषजः॥विश्वं
भरोविश्वपतिःविश्वेशोविश्वतोमुखः॥६४॥विश्वसाक्षिर्विश्वहंतावीरोविश्वंभराधिपः॥वीरबाहुर्वीरहंतावीराग्र्योवीर
सैनिकः॥६५॥वीरवादप्रियःशूरःशूरसेनःसुराधिपः॥शूरपद्मासुरद्वेषीतारकासुरभंजनः॥६६॥ताराधिपस्तारहारःशू
रहंतासुरार्चितः॥शरवान्शरसंभूतिःशक्तिःशरवणोद्भवः॥६७॥शांभवःशांकरःशंभुःसाधुःसाधुजनप्रियः॥सारंगः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्कंदप॰ ९२ ११९

सागरः सर्वः शूर्वः सर्वप्रियसहस्राः॥६८॥गंगाधरोतिगंभीरः गंभीरहृदयोनघः॥अमोघघोषोविक्रम्यो शक्तिभृच्छक्रपू ई शा॰ हा
जितः॥६९॥चक्रपाणिश्चक्रपतिः चक्रवालांतभूपतिः॥सार्वभौमः सुरपतिः सर्वलोकाभिरक्षितः॥७०॥चिद्रूपः सत्यसंकल्पः अ॰ ३८
सत्यः सत्यवतांवरः॥सत्यप्रियः सत्यगतिः सत्यलोकजनप्रियः॥७१॥भूतोभव्योभूतनाथोभूतभव्यभवत्प्रभुः॥भूतादि
भूतमध्यस्थोभूतविप्लवकारकः॥७२॥भूतप्रतिष्ठाकर्ताच्योभूताधिष्ठानकोव्ययः॥बीजोनादिर्गुणनिधिः तेजोराशिर
कल्मषः॥७३॥कल्मषघ्नःकलिध्वंसीकलौवरदविग्रहः॥कल्याणमूर्तिःकामात्मा कामक्रोधविवर्जितः॥७४॥गोप्ता गोप
यितागुप्तिः गुणातीतोगुणाश्रयः॥सत्वमूर्ति रजोमूर्तिः तमोमूर्त्तिस्त्रिरात्मकः॥७५॥देवसेनापतिर्भौमा महिमा महिमाक
रः॥प्रकाररूपः पापघ्नः पवनः पावनोनलः॥७६॥कैलासनिलयः कांतः कनकाचलसंनिभः॥विद्रुमो वेदभूतिश्च आकृतिः
कृतिरक्षकः॥७७॥उपेंद्र इंद्र वन्द्यांघ्रिः उरुजंघ उरुक्रमः॥विक्रांतोविजयक्रांतोविजयीविनयप्रियः॥७८॥अविनी
तजनध्वंसी सर्वापदुणवर्जितः॥शेषाचलैकनिलयः वल्लीवांछितविभ्रमः॥७९॥शांभवः शंभुतनयः शंकरांकविभूष
णः॥स्वयंभूः स्ववशः स्वस्थः पुष्करः पुरभिद्भवः॥८०॥मनुर्मानवगोप्ता पः स्वविष्टः स्थविरोयुवा॥बालः शिशुर्नित्ययुवानि
त्यकौमारवान्महान्॥८१॥अग्राह्यरूपोग्राह्यश्च सुग्राह्यः सुंदराकृतिः॥प्रमर्दनोप्रभूतश्रीर्लोहिताक्षोरिमर्दनः॥८२॥त्रिधामा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिककुप्भव्यः त्रिलोकनिलयोलयः ॥ शर्मदः शर्मवान् शर्मी शरण्यः शरणालयः ॥ ८३ ॥ स्थाणुः स्थिरतरस्थेयः स्थिरश्रीः स्थि
रविक्रमः ॥ स्थिरप्रतिज्ञः स्थिरश्रीः विश्वरेताः प्रजोद्भवः ॥ ८४ ॥ अव्ययः प्रत्ययः प्रष्ठो सर्वज्ञः सर्वदर्शनः ॥ सर्ववागीश्वरस्सि
द्धः शिवयोगः शिवप्रियः ॥ ८५ ॥ मनस्वीमानदोमान्योजैगीषव्यगुरुर्बुधः ॥ स्वमात्मासमदर्शीचिसंमतः समदर्शनः ॥ ८६ ॥
भस्मत्रिपुंड्रधृक्फालः रुद्राक्षकरकंकणः ॥ शिवलिंगार्चनप्रीतः षडक्षरजपादरः ॥ ८७ ॥ शुचिः शुचिमनाः शुद्धः शुचिकीर्तिः
शुचिश्रवाः ॥ रौद्रकर्मामहाकर्मारुद्रांशो रुद्रसंभवः ॥ ८८ ॥ अनेकमूर्धाविश्वात्मानेकबाहुररिंदमः ॥ वीरबाहुर्गणाध्यक्षो वि
459 ष्वक्सेनोविनोदनः ॥ ८९ ॥ सर्वगः सर्वदः सर्वः सर्ववेदांतगोचरः ॥ कविः पुराणशास्ता च सुब्रह्मण्यालयोऽद्रिः ॥ ९० ॥ भ्रा
जिष्णुर्विष्णुविनुतः कृष्णकेशः किशोरगः ॥ भोजनं भाजनं भोक्ता विश्वभोक्ताविशांपतिः ॥ ९१ ॥ विश्वयोनिर्विशालाक्षो
विरागोवीरसेवितः ॥ पुण्यपुरुयशाः पूज्यः पुरुकीर्तिः पुनर्वसुः ॥ ९२ ॥ सुरेंद्रः सर्वलोकेंद्रः मृगेंद्रोपेंद्रवंदितः ॥ विश्ववेद्योवि
श्वपतिः विश्वभृद्विश्वभेषजः ॥ ९३ ॥ मधुर्मधुरसंगीतो माधवः शुचिरुष्णलः ॥ शुक्लः शुभ्रगणः शुक्रः शोकहर्ता शुचिस्मितः
॥ ९४ ॥ महेष्वासोविगुप्तिश्वमहीभर्तामहीपतिः ॥ मरीचिर्दमनोमायीमातंगगतिरद्भुतः ॥ ९५ ॥ हंसः सुपर्णः सुमनाः भुजंगेशो
भुजावलिः ॥ पद्मनाभः पशुपतिः पारग्यः परपारगः ॥ ९६ ॥ पंडितः परवीरघ्नः स्कंदः सेनापतिर्महान् ॥ अमर्षणोदुष्टशास्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५ पंक्ति१० - भास्करो भास्वरतरो भानुः पाशविमोचनः ॥

दुर्धर्षोयुद्धदुर्धर्षणः ॥ विश्वात्मासुविधेयात्मा विश्वप्रख्यातविक्रमः ॥ सन्मार्गदर्शको मार्गः रक्षको मार्गरक्षकः ॥९८॥ अनिरु सू०श्लो०१० / श्लोक ११२

द्धोनिरुद्धः श्रीः आदित्यो दैत्यमर्दनः ॥ अनिमेषो निमेषेड्यो त्रिजगद्ग्रामणीगुणी ॥९९॥ संवृत्तात्मानिवृत्तात्मा सर्वात्मा आत्म अ०३८ / ११०

विक्रमः ॥ अर्चिष्मानच्युतप्रीतः पाशभृत्पावकोमरुत् ॥१००॥ सोमसौम्यः सोमनुतः सोमयुक्सोमभूषणः ॥ सर्वसामप्रियः सा

मः सर्वयज्ञसंस्तुतोगुहः ॥१॥ उपशांतिरुमासूनुः उत्फुल्लमुखपंकजः ॥ अमृत्युरसुराराति: मूर्तामूर्त्युपयोजितः ॥२॥ मंदारकुसुमा

पीडोमदनांतकवल्लभः ॥ माल्यवान्मदनाकारो मालतीकुसुमप्रियः ॥३॥ सुप्रसादः सुराध्यक्षः सुमुखः सुमहायशाः ॥ वृषपर्वा

विरूपाक्षो वृषसेनो वृषोदरः ॥४॥ मुक्तोमुक्तगतिर्मोक्ता मुकुंदो मुद्गरमुनिः ॥ श्रुतवान्श्रुतिशास्त्रात्मा श्रुतिगम्यश्श्रुतिस्तु

तः ॥५॥ वर्धमानोवनरतिः वानप्रस्थनिषेवितः ॥ वाग्विदो वावदूकात्मा वासुदेववरप्रदः ॥६॥ महेश्वरोमयूरस्थोशक्तिहस्तः

त्रिशूलधृक् ॥ ओजस्तेजश्चतेजस्वीप्रतापः सुप्रतापवान् ॥७॥ ऋद्धिः समृद्धिः संसिद्धिः सुसिद्धिः सिद्धसेवितः ॥ अमृतांशुश्चा

मृतपो अमृतश्चामृतप्रदः ॥८॥ चंद्रमाश्चंद्रवदनः चंद्रदृक्चंद्रशीतलः ॥ मतिमान्नीतिमान्नीतिः कीर्तिमान्कीर्तिवर्धनः ॥९॥

औषधश्चौषधीनाथोप्रदीपोभवमोचनः ॥ ११०॥ चतुर्युगव्यवस्थाता युगधर्मप्रवर्तकः ॥ अयुजोमिथुनो योगो योगज्ञोयोग

पारगः ॥११॥ महाशनोमहादाता महाघोरपराक्रमः ॥ युगांतकृद्युगावर्तो दृश्यादृश्यस्वरूपवान् ॥१२॥ सहस्रजित्सहस्रात्मासह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वायुधमंडित ः॥अनंतशूरसंहर्तासुप्रतिष्ठसुशांकरः॥१३॥अक्रोधक्रोधहंताच शत्रुक्रोधविवर्धनः॥विश्वमूर्तिर्विश्वबाहुः
विश्वदृक्विश्वतोमुखः॥१४॥विश्वपोविश्वनेताचद्यावाभूम्योर्विवर्धनः॥अपांनिधिरकर्ताचअम्भादोविनयोज्वलः॥१५॥अं
भोजमानुरु ज्जीवः प्राणदः प्राणवर्धनः॥स्कंदः स्कंदधरोधुर्यो धैर्योधर्मविवर्धनः॥१६॥जिताराति र्धनाध्यक्षो वैद्यनाथोऽनसूय
कः॥देवदेवो बृहद्भानुः स्वर्भानुः पद्मवल्लभः॥अकुलः कुलनेताचकुलदृष्टाकुलेश्वरः॥कुलाचलसुतासूनुः॥असुहृद्धासुरार्द
नः॥१८॥निधिर्निधिपतिः पद्मशंखोनिधिपतिः पतिः॥शतानंदः शतावर्तः शतायुश्चशतामुधः॥१९॥पद्मासनः पद्मनेत्रः पद्मां
४५१ घ्रिः पद्मसंस्थितः॥करणात्माचकार्यात्माकामात्माकामवर्धनः॥१२०॥त्रिशरीरः शरीरीचशरीरारोग्यवर्धनः॥जाग्रत्प्रपंचाधिपतिः
विश्वलोकेश्वरेश्वरः॥सुषुप्तिस्थोभीमसेनोमहासेनस्तुरीयकः॥२१॥स्वापनः स्वप्ननिलयो विश्वमूर्तिर्विरोचनः॥वीरायुधो वीरवेषो
वीरायुधकरोज्वलः॥२२॥सर्वलक्षणसंपन्नोलक्ष्मीवान्सर्वलक्षणः॥समयज्ञोयज्ञसेनो समाधिः सामवल्लभः॥२३॥अमलो मा
ल्यसुप्रीतोवल्लभोवल्लभोबलः॥अहेतुर्हेतुमान्हेतुः हेतिधृक्हर्त्तराश्रयः॥२४॥विक्षरो रोहितो रक्तो विरक्तो विजनप्रियः॥मही
धरोमातरिश्वा मंगल्यो मकरालयः॥२५॥मध्यः शतादिरक्षोभ्योरक्षोदारणविक्रमः॥गुहो गुहाशयो गोप्ता गुहेशो गुणवर्धनः॥
॥२६॥निरुद्योगोमहोद्योगोनिरीहोनिर्णयोमधुः॥महावेगोमहाक्रोधोमहाप्राणोमहेश्वरः॥२७॥अमृतास्यमृताहारोमितभा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री वर द्द० १२ व्योमितार्थवित्॥ अक्षोभ्यक्षोभकृत्क्षेमोक्षेमवान्क्षामनाशनः॥ रुद्रो रुद्रप्रियो मत्तो मत्तकेकिवहोपरः॥ धर्मो धर्मविदांश्रेष्ठो ईशा० द्वि० अ० ३८
१२१ वैकुंठे वासवप्रियः॥ २९॥ परधीरपराक्रांतो परितुष्टः परासुहृत्॥ रंजनोरणगो रुष्टोरमणो रात्रिवर्धनः॥ १३०॥ विरजो विक्रमो वि
द्वान् वीरभद्रप्रियः क्रतुः॥ विनायकानुजो धाता नंदीप्रियसखो वटुः॥ ३१॥ सर्वशक्तिमतां श्रेष्ठः सर्वदैत्यभयंकरः॥ शत्रुघ्नः
सर्वलोकेशः शत्रुभिः श्लाघ्यपौरुषः॥ ३२॥ शिशिरो वर्षको ग्रीष्मो वसंतो माधवो मधुः॥ वसंतकेलिनिरतो वनकेलिविशारदः॥
॥ ३३॥ पुष्पधूलीपरिचितो नवपल्लवशेखरः॥ जलकेलीपरिवृतो जह्नुकन्योपलालितः॥ ३४॥ गांगेयो गीतकुशलः गंगापा
रविहारणः॥ गंगाधरो गणपतिः गणायुधसमावृतः॥ विश्रमो विक्रमो धूर्तो विश्वभुक् विश्वदक्षिणः॥ विश्वगो विश्रुतपरो विश्व
रक्षणतत्परः॥ ३६॥ विनतानंदकारी च पार्वतीप्राणनंदनः॥ विशाखः षण्मुखः शास्ता कार्तिकेयो वरप्रदः॥ ३७॥ एवं सहस्रनामैर्
वसंपूज्य सुरसत्तमाः॥ पुनः शताष्टनामैर्वै तुष्टुवुर्मुनयस्तदा॥ ३८॥ १४३॥ ॥ मुनय ऊचुः॥ ॥ द्विषड्भुजं षण्मुखमंबिका
सुतं कुमारमादित्यसमानतेजसं॥ वन्देमयूरासनमग्निसंभवं सेनान्नमीशं सकलेष्टभीष्टदं॥ १॥ स्कंदो गुहः षण्मुखश्च फा
लनेत्रसुतः प्रभुः॥ पिंगलः कृत्तिकासूनुः शिखिवाहो द्विषड्भुजः॥ २॥ द्विषण्णेत्रः कुमारश्च पिशिताशनभंजनः॥ तारकासुरसं
हर्ता रक्षोबलनिषूदनः॥ ३॥ मत्तः प्रमत्त उन्मत्तः सुरसैन्यस्य रक्षकः॥ देवसेनापतिः प्राज्ञः कृपालुर्भक्तवत्सलः॥ ४॥ उमासुतो



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महासेनः कुमारः क्रौंचदारणः ॥ सेनानिरग्निजन्मा च विशाखः शंकरात्मजः ॥५॥ शिवस्वामी गणस्वामी सर्वस्वामी सनातनः ॥
अनंतशक्तिरक्षोभ्यो पार्वतीप्रियनंदनः ॥६॥ गंगासुतः शरोद्भूतः आहुतः पावकात्मजः ॥ जृंभः प्रजृंभ उज्जृंभः कमलासनस
न्नुतः ॥७॥ एकवर्णो द्विवर्णश्च त्रिवर्णः सुमनोहरः ॥ चतुर्वर्णः पंचवर्णः प्रजापतिरहःपतिः ॥८॥ अग्निगर्भः शमीगर्भः विश्व
रेताः सुरारिहा ॥ हरिद्वर्णः शुभकरः पटुमान्वटुवेषधृक् ॥९॥ पूषा गभस्तिर्गहनश्चंद्रवर्णः कलाधरः ॥ मायाधरो महामायो कै
लासवसथः शिखी ॥१०॥ विश्वयोनिरमेयात्मा तेजोनिधिरनामयः ॥ परमेष्ठी परंब्रह्म वेदगर्भो विराड्वपुः ॥११॥ पुलिंदकन्या
460 भर्ता च महासारस्वतप्रदः ॥ आश्रिताखिलदाता च चोरघ्नो रोगनाशनः ॥१२॥ अनंतशक्तिरानंदः शिखंडी कृतकेतनः ॥ डं
भः परमडंभश्च महाडंभो वृषाकपिः ॥१३॥ कारणोपात्तदेहश्च कारणातीतविग्रहः ॥ अहिरूपोऽमृतवपुः प्राणायामपरा
यणः ॥१४॥ विरुद्धहंता वीरघ्नो रक्तश्यामलोचनः ॥ बहुवर्णो गणपतिः स्वभक्ताभीष्टदायकः ॥१५॥ सर्वेश्वरो लोकगुरुः
असुरानीकनाशनः ॥ सुब्रह्मण्यो गुहः स्कंदो ब्रह्मण्यो ब्राह्मणप्रियः ॥१६॥ एवमष्टोत्तरशतनामभिः स्तोति यो नरः ॥ त
स्याभीष्टानि सर्वाणि प्रयच्छति गुहो मुहुः ॥१७॥१६०॥ ॥गणेश्वरा ऊचुः॥ ॥कनककुंडलमंडितषण्मुखं सुवनरा
जिविराजितलोचनं ॥ निशितशस्त्रशरासनधारिणं शरवणोद्भवमीशसुतं नुमः ॥६१॥ सिंदूरारुणमिंदुकांतिवदनं केयूर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ हारादिभिः दिव्येराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदं॥ अंभोजाभयशक्तिकुक्कुटधरं दिव्यांगरागोज्वलं सुब्रह्मण्यमुपा ईशा० द्वा०
१३२ स्महे प्रणमतां सर्वार्थसिद्धिप्रदं॥१६२॥ ॥कवच॥ ॥शिखां रक्षेत्कुमारस्तु कार्तिकेयः शिरोवतु॥ ललाटं पार्वतीसूनुः वि अ०३८
शाखोवतु भ्रूयुगं॥१॥ नेत्रे व्यात्क्रौंचभेदी व्यात् नासिकां शिखिवाहनः॥ कर्णद्वयं शक्तिधरः कर्णमूले षडाननः॥२॥ गंडयुग्मं
महासेनः कपोलौ तारकांतकः॥ ओष्ठद्वयं च सेनानी रसनां शिखिकेतनः॥३॥ तालू कलाधरः पातु द्वंद्वादेवशिखामणिः॥ गांगे
यश्चुबुकं पातु मुखं पातु शिखोद्भवः॥४॥ हनुं हरसुतः पातु पातु कंठं सदाग्निभूः॥ ग्रीवां गौरीसुतः पातु कक्षौ कारुण्यवारिधिः॥५॥
स्कंदौ ममावतां स्कंदो बाहुलेयो भुजौ मम॥ बाहू भवोद्भवः पातु करौ षाण्मातुरोवतु॥६॥ अंगुलीः पिंगलः पातु हृदयं मधुमित्रजित्॥
नाभिं ममोदरं चैव सुब्रह्मण्यः सदावतु॥७॥ मध्यं जगद्विभुः पातु नाभिं द्वादशलोचनः॥ कटिं द्विषड्भुजः पातु गुह्यं पातु गुहः सदा॥८॥
जघनं जाह्नवीसूनुः पृष्ठभागं कुमारधृक्॥ ऊरू पायादुमापुत्रो जानुयुग्मं जगत्स्थितः॥९॥ जंघे पातु जगत्पूज्यः पातु गुल्फौ महाबलः॥
पादौ पातु परंज्योतिः सर्वांगं कुक्कुटध्वजः॥१०॥ ऊर्ध्वं पातु महोदारः अधस्तात्पातु शंकरिः॥ पार्श्वतः पातु पापघ्नः सर्वतः पातु शक्तिधृ
क्॥११॥ प्राह्णेवतु परं ब्रह्म मध्याह्नेवतु तारजित्॥ अपराह्णे गुहः पातु रात्रौ दैत्यांतकोवतु॥१२॥ त्रिसंध्यायां सुधीः पातु सर्वदा पा
तु बर्हिगः॥ बहिस्थं षण्मुखः पातु अंतस्थं कृत्तिकासुतः॥१३॥ व्रजंतं सुरसैन्येशः अटंतं पातु पाशधृक्॥ शयानं पातु मां शूरो मार्गे मां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पातुभूलभृत॥१४॥वनेरणेगिरिच्चरःसदारक्षतुमांबटुः॥सुब्रह्मण्यस्यकवचं धर्मकामार्थमोक्षदं॥१५॥मंत्राणांपरमंमंत्रंरहस्यंरक्ष
कंसदा॥पठन्श्रृण्वन्पुनःसर्वपापरोगैर्मुक्तो भविष्यति॥पुत्रप्रदमपुत्राणां षष्ठ्यां भक्त्यास्तवश्रवात्॥१६॥वक्त्रैर्षड्भिःशरदिंदुःप्रभाभिः॥
उद्यत्फुल्लैर्नीरजाक्षैर्युतोव्यात्॥बर्हिध्वजश्चंद्रकचित्रबर्हिबर्हींद्रवाहःकृतचूडबर्हिः॥१७॥ताभिःप्रसन्नरुचिभिःप्रसुवर्ण
चित्रःपायादस्मान्कार्तिकेयःकुमारः॥बर्हींद्रपक्षक्षपितारिपक्षं सेनानिमीडेखिलपातकघ्नं॥१८॥कारुण्यपूर्णनयनं
कमलायताक्षं कस्तूरिकातिलकशोभितफालदेशं॥भक्तार्तिभंजनविशोभितबाहुदंडं डिंभंमुदाहिशिवयोःप्रभजंतुसर्वे
॥१९॥देवायुद्धेयागेविप्राःध्यायंध्यायंयंसिध्यंतिस्कंदंवंदेसुब्रह्मण्योंसुब्रह्मण्यों॥ ॥श्रीमच्चंद्रकलाधरात्मजमजंश्रृंगा
४८। रशोभाकृतिं गौरीपीनघनस्तनामितपयःसारज्ञमाज्ञासनं॥बालेशप्रकराभिमानजलदोदंचत्प्रचंडानिलं सुब्रह्मण्यमग
ण्यपुण्यचरितं वंदेपरंदेशिकं॥२१॥कारावासनिवासखिन्नविधिहृत्कंजातभानुःपुनः तद्वक्त्राब्जचतुष्टयस्तुतमहाक
ल्याणशीलंविभुं॥क्रौंचारिं पितृपादवंदितपदं षण्मातुरंभ्रातरं॥ ॥सुब्रह्मण्यमगण्यपुण्यचरितं वंदेपरंदेशिकं॥२२॥ओंका
रार्थसमर्थवाचकवचोभूषाविशेषान्वितं॥यारोचिष्णुषडाननंशिखिकुलाधीशाश्वतुंगध्वजं॥स्कंदंसुंदरकुंददंतमनघंशं
भोर्गुरुंशाश्वतं॥सुब्रह्मण्य०॥२३॥ब्रह्मांडैकसहस्रकाव्यभरणप्राचुर्यधैर्यस्फुरत्कोपाटोपदुरापपापघटिताहंकारभूरांतकं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ सेनान्यं सुरमान्यमुन्नतभुजं चिंताब्धिकुंभोद्भवं॥ सुब्रह्मण्य०॥२४॥ शर्वाणिप्रणवोपदेशचतुरं श्रीकंठकंठीरवं॥ श्रोतारंज ईशा० द्वा
९५३ ननीभुजांकविलसत्सिंहासनस्थं गुहं॥ भूयस्तच्छ्रवणाकुलोग्रजनितं स्वर्णाद्रिराजाकृतिं॥ सुब्रह्मण्य०॥२५॥ मार्तंडायत अ०१८
भासमानमणिभल्लावण्यतारुण्यजित्कारुण्यैकशरण्यपंचकमणिप्रोद्यत्फणाशालिनं॥ दिव्यांगं भवभंगसंगतकृपातुं
गोत्तरंगालयं॥ सुब्रह्म०॥२६॥ सेवातत्परमानवार्पितबृहत्कूष्मांडपादावनि॥ तूलस्थूलमरीचिसर्षपसमग्रोपायनं माथिनं॥ ना
नावाद्यमृदंगशंखपटलीघोषांकपूजान्वितं॥ सुब्रह्म०॥२७॥ पुत्रस्नेहविमोहवर्धितशिवावक्षोजकुंभस्रवत्क्षीरापूरकुमारपूर्व
विलसद्वारातटीवासिनं॥ विष्णुब्रह्मसुरासुरार्चितमणिस्वर्णोज्ज्वलत्पादकं॥ सुब्रह्म०॥२८॥ देवं शक्तिधरं कुमारमतुलं दिव्यावता
रंवदं॥ भावातीतमतीतसंस्तृतिमनःपद्माग्रसद्मप्रियं॥ भक्त्यायेप्रणमंतिते गतभयाकारुण्यकल्याणगा॥ भुक्त्वाभोगसुखं
त्वदीयकृपया मुक्ताभवंति ध्रुवं॥२९॥ वृंदारवृंदा मुनिवर्यसंघा गणेश्वराः स्कंदसहस्रनामभिः॥ तथाष्टनाम्नांशतकेनतत्र
देवं मुदातं कवचेनतुष्टुवुः॥३०॥ स्कंदो मुदाताननुगृह्यदेवान्मुनीन्गणेशान्भगणेशचूडः॥ स्वभक्तवर्यानकरोत्सुरोत्त
मैर्न कुमारवर्योथसमर्चितोयः॥३१॥ स्कंदं मुदास्तोत्रवरैः सुभक्तितोयस्तोष्यतिप्रीतमनाःसुभक्तितः॥ तस्मिन्प्रहृष्टो विदधा
तिकामानकामयुक्तेपिविमुक्तदोभवेत्॥३२॥१७५॥ इति श्रीशिवरहस्ये ईशानाख्ये द्वादशांशे स्कंदसहस्रनामाष्टोत्तरशतनामकवचस्तोत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथनंनामअष्टत्रिंशोध्यायः॥३८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीईशानायनमः॥ ॥मुनयऊचुः॥ ॥
व्रजामकिलकाशिकामद्यकुलादिसंनाशिकांविश्रामममपिकर्णिकांद्विजभजामतांकालिकां॥पश्येमविश्वेश्वरमेवतत्रय
जेमबिल्वेश्वसमर्चयामः॥१॥स्नास्यामगंगांभसिपापमुक्त्यैव्रजेममुक्तिंपरमामथांते॥मुनयोविनयोज्वलास्तदानीतिनयैःस्वैः
स्वकलत्रशिष्यसंघैः॥२॥मथितागतयस्वभग्नदुःखाःशिवमानर्च्यययुस्तदाविमुक्तं॥सूतेनतेनमुनयोपिचभस्मभूषायोगा
दिरक्तहृदयास्सदयास्तदानीं॥३॥काषायमात्रवसनाययुरीशकाशींवासायचारुतपसेधृतनिश्चयास्ते॥इतिहोचुरचुंबिता
462 क्षरोरुवाचंकृतकृत्याःप्रसमापितोरुसत्राः॥४॥स्तुतिर्नित्याप्रतिपूज्यसूतमिष्टं शिपिविष्टोरुकथामृतावृतंतदा॥ ॥
ऋषयऊचुः॥ ॥किंसत्रैरखिलैर्व्रतादिकरणैर्दानैश्चदीनावनैः॥किंवापावनतीर्थगाहनमहाधर्मैरलंनःफलं॥प्राप्ये
नंश्रुतिराशिशेखरलसत्कैलासधामंकदामोदायैवसदास्तुशंकरकृपापीयूषकंकेवलं॥५॥किंतत्प्रीतिकरंमहेंद्रसदनंयत्रै
वतप्स्यामहेप्यादेहांतविभूतिधारणायुतापुंड्राक्षमालाधराः॥दिव्यश्रीशिवलिंगपूजनरताबिल्वेश्वनीरैःपरंनिश्रेयायसदा
विमुक्तसदनेवासोस्तुनःश्रेयसे॥६॥ ॥सूतउवाच॥ ॥नमतामधिपायमेनमोस्तुनमितंमेस्तुगिरींद्रजाघ्रपादे॥सुनतिर्मेस्तु
सदैवविघ्नराजेनमनंमेस्तुहृदेवषण्मुखाय॥७॥सूयंमायादिमोहप्रशमितदुरिताभस्मरुद्राक्षभाजाःशांतादांताभवंतःसुकृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ७१२ तत्कृतवराःसंत्रियोमित्रपात्राः॥शांतालिंगसमर्चनार्जितयशा तुंगां गसंगाश्रमे भूयात्पातकभंगमेवनियतं शंभोःस्फुलिंगेक्षणा ई०शा०खं०
१३४ त्॥८॥ ॥ऋषयऊचुः॥ ॥धन्योमान्योस्तिकोन्यस्त्वसदृशगुणंनान्यमीक्षामहेद्य वैद्यंवेद्यपदार्थबोधनतरंसंसाररुक्नाना अ०३९
शकं॥त्वामेवात्मगुणप्रधानमधुनाशंभोःकथासादरं संसारांबुधितारकंहरकृपापन्नंसदानोनमः॥९॥कोवापरंशिवरहस्यमधु
प्रकृष्टं तिष्ठावतांद्यसुहृदाशिपिविष्टमिष्टं॥वेत्तुंचधर्तुमथवा किमुवक्तुमेवं शिष्टोवरिष्टमहिमा भगवान्स्त्वमेव॥१०॥नंदीश
विघ्नेशसमोसिषण्मुखप्रभावतुल्यप्रतिमस्त्वमेव॥त्वंनोगुरुःशिवकथासुरसामृतस्य दाताहिदीनवदनानभवामभावाः॥११॥
सत्वंपवित्रमधुनासततंत्रिनेत्रचारित्रपात्रमधुवत्प्रपिबामश्रोत्रैः॥चित्रंविचित्रपदयंत्रिततंत्रमंत्रसारार्थसिंधुसुरहस्यम
मुत्रपुत्र्यं॥१२॥तत्रत्रिनेत्रसुपवित्रकटाक्षमात्रसंत्रस्तपातकभरास्तपसाचयामः॥देहांतरएवहिभवेदविमुक्तवासपुण्यैः
पचेलिमफलैर्धवलाद्रिवासः॥१३॥तत्रैवशंकरगणाःप्रभवामसामिसोमप्रकामशिरसेसितभस्मभूषाः॥योवार्धमात्रकमनी
यसारिजटालसोनालकाशिवपदांबुजसेवकाश्च॥१४॥किंनोब्रह्मपदेषुवैष्णवयशःस्फीतेपदेवापदं प्राप्येनाप्यमहोम
हेंद्रसदनेदिक्पालकानांपदे॥तत्रत्यातुलशंकराचलमहाकैलासवासाधिकं नाप्नोत्येवफलंमुमुक्षुषुपरंवांछापिनिश्रेय
सी॥१५॥कैलासमौलितरवःपशवोल्पकीटा नित्याशिवस्यकृपयाखलुसर्वदापि॥लोक्यापुनर्दिविषदःप्रतिकल्पनाशाब्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्येंद्रविष्णुमरुतोवसवोर्करुद्राः॥१६॥कैलासवासायशिवप्रसादतः काशींनिवासायलभेमपुण्यैः॥यज्ञैस्तथा ज्ञानविनष्टमान
सावुजामशीघ्रंकिलमुक्तिसिद्ध्यै॥१७॥कैवल्यवल्लीमिवतांपुरींतदा मुदापुरारेर्विविशुःप्रहृष्टाः॥भिल्लाहृतेशंकरकार्मु
कप्रभां तेबालरवित्व्याःशिथिलाघसंघाः॥१८॥ददृशुरादर्शतलस्थितेवतां गंगांद्विजास्तुंगतरंगभंगां॥उत्तुंगलिंगावलिसौध
कुंभां अंभोधरांकप्रतिभांचकांतां॥१९॥कैलासशैलमणिमौलिगदिव्यमा(साव्या)लीवतुंगावलिसौधकेलीं॥सस्नुःसमस्ताघहरेप्र
शस्तां दिव्यांचतांश्रीमणिकर्णिकांद्विजाः॥२०॥संतर्प्यदेवर्षिपितॄन्तदामुदा गंगातटे तेकृतभस्मभूषणाः॥पुंड्राक्षमालामुन
योमहेशं समर्चयंस्तेकिलबिल्वपत्रैः॥२१॥गृहस्थाः वनस्थास्तु(त)थान्ये चधन्याः द्विजाःशांतसंन्यासिनोप्येकदंडाः॥जटालानि
463 ध्यानेक्षणासक्तचित्ताः विरक्तास्तथाब्रह्मचर्येषुरक्ताः॥२२॥तथाऽनग्नयःसाग्नयोभग्नमानाः श्रुतेश्रद्धयाश्राद्धदानैःपितॄ
न्स्ते॥तथाहव्यकव्यैःसमभ्यर्च्यलेखान्मुदातु गृहे चक्रमुःप्रक्रमैस्ते॥२३॥विश्वेशभैरवषडाननढुंढिराज मातान्नपूर्णाः
प्रणमंचहृष्टाः॥श्रीदंडपाणिंचतथाप्रणम्य संपूज्यपूजादिभिरैः स्तुतीभिः॥२४॥अलाबुदारुवेणुभृंगधातुकुंभसंगतैः प्र
हृष्टगांगजांभसानमोंतरुद्रसूक्ततः॥प्रहृष्टपंचपापहृत्सुपंचवर्णमंत्रतः प्रसिंच्यलिंगमैश्वरं सुबिल्वपल्लवैःसुमैः॥२५॥
नदैवधूपदीपतो निवेद्यचांबुभिः फलैर्वरान्नभक्ष्यभोज्यकैःप्रसाद्यचप्रतुष्टुवुः॥ ॥ऋषयऊचुः॥ ॥विश्वेश्वरोय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ावरह०१२ मदनांतकोयं पुरांतकोयहिभवांतकोयं॥सुरासुरौघानतपादपद्मः समाहितो नोस्तु मुदा हृदेति॥२६॥एषबृहच्छ्रुतिर ईशा०ह्या०
१३५ तुलबलाद्विश्रुतंतेपदांनिर्वहिप्रमथाधिनाथ भगवन् श्रीविश्वनाथप्रभो॥कोशातीतमनंतमव्ययमजंकाश्यांप्रकाशंपरं अ०३९
वेदावेद्यपदंविशोकमजरं पश्येमलिंगं हिते॥२७॥मोचामदाचामनवेदवाचोनिवृत्तिभावा मनसासहैवते॥भजामलिंगास्थि
तमप्यलिंगं उमासहायं तमसः परं त्वां॥२८॥देव्यन्नपूर्णोकृपयासपूर्णो तूर्णं हृदा काशगतेत्वपूर्णो॥किंवर्णयाम त्त्ववसुप्रभावं
भवार्णवैतः पतितान्समुद्धरः॥२९॥शिवेविशालाक्षिपदांबुजंते प्रदेहिभिक्षांनिखिलेषुसाक्षिणी॥नेःश्रेयसींनःश्रमक
ष्टनाशिनीं भवामभुक्तांश्च कृताक्षतस्तव॥३०॥श्रीढुंढिराज शरणागतकाशिवास विघ्नोघपातकततिं परिनिघ्नयाभु॥
गंधांबुपुष्पवरमोदकतः प्रपूज्यनंदामहे तवपदांबुज भृंगभावाः॥३१॥श्रीभैरवारव भर श्रवणांतयुग्मा तिग्मेकपातकभरेः
अभिपूरिताये॥कालाष्टमीषु परिपूज्य तवांघ्रिपादं विप्रावसेमनियतं पशुपाशमुक्त्यै॥३२॥श्रीदंडपाणि चरणस्मरणानु
रक्तान्मुक्तान्करोतिनियतानथशंभुभक्तान्॥तस्मात्तवार्चनविधौ खलुजागरूकाः विप्रावसेम नियता हृदयेर्विशोकाः॥३३॥
नाकर्णयेस्त्वत्कथामपि कर्णिके ते निर्णीयतेयमगतीषुसुदुःखवार्ता॥त्वत्तीर्थमज्जनवतां नहिजन्मपुंसो मुक्तिं ददातिपर
मांशिवभक्तिमिष्टां॥३४॥योज्ञानवापीमविगाह्यतोपि ननंदतेपापमपाकरोति॥पापीयसींव गतिंप्रयाति वातापिभक्ष

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिमो भवेत्सः ॥ ३५ ॥ एवं स्तुत्वा च नत्वा प्रतिदिनमथ ते विप्रवर्याः समूता देवांतर्गृहमेव तत्स्वशरणं चक्रुर्मुदा तत्र वै ॥ त
न्मुक्तिप्रदमंटपे च नियतं स्थित्वैव चक्रुः कथाः ॥ काशीवासनिवासहृष्टमनसः शिष्टाः सदाचारतः ॥ ३६ ॥ प्रविश्य केचिद्वि
श्वेशवर्यस्तुतिनतिनियताश्च भवंति मुक्ताः ॥ सिद्धास्तारेशनिष्ठाः भवभयहरणोद्युक्तचित्ताविरागाः ॥ केदारार्चनतत्पराः
यतिवराः श्रीव्योमकेशार्चकाः ॥ केचित्ते शिवभक्तिसारसरसा तत्राविमुक्तेश्वरं ॥ ओंकारेश्वरमत्र ते सुनियता श्रीकृत्तिवा
सेश्वरं ॥ श्रीमत्त्रिलोचनपरा नियतं प्रदोषे संन्यस्तदोषनिकराः पशुपेशनिष्ठाः ॥ ३९ ॥ मुक्ते वसंति नियता फलमूलपर्णवातां
बुपारणापराश्च तथा बुरेवं ॥ केचिद्दुढजपादरासितमहाभस्मत्रिपुंड्रादरा रुद्राक्षोरुसरा महेश्वरमहालिंगानि गंगोभसा ॥ ४० ॥ सं
464 पूज्यामलबिल्वपल्लवसुमैः संपूज्य तस्थुस्तदा ॥ केचित्स्थाणुवदास्थिता यतिवरा श्रीतारसंजापिनः ॥ काश्यां प्रतिष्ठा यदि
ते विशिष्टाः अन्यत्र दिष्टांतगता पितेपुनः ॥ नो याम्यलोकं प्रविशंति सौम्याः ते मुक्तिमंटपमवाप्य मखादिधर्मैः ॥ ४१ ॥ सं
सिद्धिभुद्धमनसः शिपिविष्टनिष्ठाः ते पुश्च जेपुः प्रणवं च रुद्रं ॥ पंचाक्षरं पावनमेव ते द्विजाः ऊचुस्तथा प्रांजलयोथ सूतं ॥ का
शीरहस्यागमतत्त्वसारं वासाय धर्मेण शिवार्चनोद्यता ॥ उद्यंतमादित्यमुपासितुं गताः ॥ ४२ ॥ ॥ इति श्रीशिवरहस्ये ईशाना
ख्ये द्वादशांशे अविमुक्तवाराणसीतीर्थक्षेत्रगमनं नाम एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२
१२६

श्रीईशानायनमः॥ ॥ऋषयऊचुः॥ ॥श्रीविश्वनाथवरसंनिधिगाःसमग्राःसर्वौघपापनिकरैरपिविप्रमुक्ताः॥मुक्ताऽवि
मुक्तसदनेमदनांतकार्चापूजाव्रताद्यसुहृदावदवासधर्मान्॥१॥ ॥सूतउवाच॥ ॥क्षेत्रेष्वन्यत्रशंभोर्यमशमनियमै
र्भस्मरुद्राक्षभाग्भिर्लिंगार्चासुसमुद्यतैःशिवकथासारादरैःशांभवैः॥तत्क्षेत्रनिवाससंभवफलैःसंप्राप्यतेयंद्विजाः काशी
नाशितपापशैलनिकराविश्वेश्वरस्याज्ञया॥२॥हेविश्वनाथ ममनाथसनाथयाद्य हेमन्मथांतकविभोपरिपाहिशंभो॥
आनंदकाननिवासपिनाकपाणे वाणीशवंद्यमहिमन्भगवन्नमस्ते॥३॥अन्नाधिपत्रिदशवंद्यशिवाद्यवेद्यवेदांतगेय
गरलाशनकालकाल॥गंगाधरत्रिपुरसूदनलोकनाथव्यालोरुमालभगवन्सततंनमस्ते॥४॥हेसंगमेश रमणेश्वरशैवभू
षपाहीशमामकधियापरिपाहिदीनान्॥क्षयद्वारकाकोदरानद्धहार स्फुरत्स्फारकर्पूरगौरप्रसीद॥विभोधीरविश्वेशभूते
शशंभो महाघोरवैश्वानराक्षप्रसीद॥श्रीसंगमेशतवलिंगसमर्चनेनशांगाभिसंगतनवोप्यखिलाघभंगाः॥६॥गंगांभसा
प्लुतशरीरसमस्तसंगानागाभवेमहिपुनःतवपादसंगाः॥श्रीमंस्त्रिलोचनसनातनदेहहीन पंचाननावनहुताशननेत्रशं
भो॥७॥वासीकृतानंदवनप्रसीद सीदद्विजातिनिवहस्मशानशंभो॥सिद्धेशविद्येशकुरुप्रसिद्धिं सिद्धाभिनंद्यमहिमन्न
रभुद्धदेह॥८॥विप्रानथप्राप्तसुरवान्कुरुष्व क्षिप्रंत्वमद्येवदयावतादृशा॥केदारेश्वरहारभास्वन्महा काकोदराकल्पका

९०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नत्वा कल्पभवत्यथोजजमहामंडादिषंडांगकः॥ नेत्राहस्कर तस्करांतकहर स्वामिन्प्रसीदाधुनः॥ सोमोत्तंसकिरीटको
टिविलसद्दिग्वासहासारुण॥९॥ भासाभासितकोकहृत्कमलसंवासैककृत्तिंवसा॥ कासांत्वां नियमेन वीक्षणवतां माया भ
वेत्साहृसे॥ मासेनैव समासमेष्यति विभो हासाय दुःखं हि नः॥१०॥ शंभो विभो पशुपतीश्वर कालकाल हे व्यालमालगर
लाशन हस्तशूल॥ दक्षैकपक्षसुरपक्षमहोक्षवाहत्र्यक्षाधुना रक्षकराक्षकोऽस्या॥११॥ संसारांबुधितारकांतकहर स्वा
मिन्मृडानीपते मारापारशरादिभिन्नहृदयान्संवीक्ष्य विश्वाधिक॥ सत्वं तारकनामकेश्वर विभो पाहि प्रपन्नान्मुनीन्त्र
465 स्मानुद्धरधीर वीर भगवन्संहारयाद्यं हि नः॥१२॥ हे मध्यमेश करुणाकर शूलपाणे पाहीश फाणितसुमध्यवचोंतरंग॥
मध्येमविद्धेवतवोरुनामयन्मुक्तिसिद्ध्यै तव सुप्रसादतः॥१३॥ तदानमुक्तं त्वविमुक्तमेतद्भक्तेषु मुक्तिं प्रथनाय यत्त्वया॥
देवाविमुक्तेश्वर मुक्तिभाग्यं वैराग्यमप्यत्र ददस्व नः सदा॥ हे स्वर्णवर्ण भगवन्परिपूर्ण शंभो चक्षुःश्रवोत्कीर्णसुकर्ण शं
भो॥ हे अन्नपूर्णापतये नमस्ते तत्रैश्वमेव नियतं प्रवदंति शैवाः॥१५॥ हे वीरेश महेश शशांकरविभो पाहीश विश्वाधिक
शश्वन्नश्वर विश्वपालक विभो पाहि प्रसीदाधुना॥ हे वृद्धकालक रुणावरुणालयाद्य पाहि प्रसीद परमेश्वर कालका
लौ॥ हे कृत्तिवास जनवास महेश्वराद्य हे श्रीनिवास नयनार्चितपादपद्म॥ हे संगमेश दुरितौघविभंगकेश श्रीतारकेश श

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(महेश)

श्रीवरद० १२ क्षिमौलिकलानलाम ॥१७॥ हेसिद्धेशपाहिदययाविद्धीशदीनंहिमां ॥ श्रीमत्त्रिलोचनजनावनपाहिशंभो कुंभोद्भवादिमु दृ शा० डी०

१२७ निबंध्य पदाब्जयुग्म ॥१८॥ हेमध्यमेशपरिपाहिसुमेध्यशंभो केदारनायकविभोपरिपाहिशंभो ॥ पुण्याविमुक्तेश्वरभक्त अ०४०

मुक्तिं शक्तिंप्रदेहितवलिंगसमर्चनाय ॥१९॥ पाहीतिये प्रणतिपूर्वकमादरेण तत्राविमुक्तसदने प्रवदंतिशैवाः ॥ ज्ञानेश

विज्ञानदकालकाल यज्ञेशपाहिदययापरिपाहिशंभो ॥२०॥ ओंकारेश महेशशाश्वतविभो पाहींप्रसीदाधुना ॥ हेशं

भो मणिकर्णिकेश भगवन् रामेशलक्ष्मीश्वर दक्षेशानदयानिधान भगवन्कृभार भूतेश्वर ॥२१॥ व्यासेशानगराशनेश

महते वंदेशपाह्यद्य मां ब्रह्मेशानजगद्विधान महिमन् पाहिप्रसीदाधुना ॥ हेढुंढिराज शरणागतविघ्ननाश वक्रतुंड भगवन्

नववक्रतुंड ॥ पाहीत्वादयया ॥२२॥ हेमंगलागौरिममाद्यमंगलं दिशाधुनापापमपाकुरुष्व ॥ हेसंकटानि मम नाशय काशि

विघ्नं निर्वाणयाद्य गणानादलयाश्रुदेवी ॥२३॥ हेसंकटे भगवतीशि हराघजाल पाहीतितत्रनियमेन वदंतिशैवाः ॥ अ

क्षय्यभक्ष्यनिकरैः प्रददेहिभिक्षां काशीनिवासजनुषा वरपात्रिहस्ते ॥२४॥ दर्वीकरेण सुरसायनमुक्तिसारमाहारमेव

हिदरस्व किमन्नसारैः ॥ वंदेविशालाक्षिमहोक्षवाह प्रियांगने पाहिदयाकटाक्षैः ॥ पा० ॥२५॥ हे भैरवामरवर प्रवरोरु

घोष काशीनिवासजनताघ हर प्रसीद ॥ माषापूपभरैरपार विभवैः पुष्पोत्करैस्त्वां गुडैः संपूज्याप्यसीताष्टमीषुनियतं

११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्विघ्नतःपाहिनः॥२६॥ हे षोडश प्रवरविघ्नपपादपद्मं संपूज्यमोदकनिवेद्यसुलड्डुकाद्यैः॥ पुष्पैश्च सिंदूरसगंडमंड
नैःकाश्यां चनिर्विघ्नवसा भवंति॥२७॥ ये पंचगंगातटसीम्नि कार्तिके वैशाखमासे मणिकर्णिमज्जनाः॥ तेसज्जनाःका
शिनिवासशीला आरोग्यवैराग्यसुभाग्ययुक्ताः॥२८॥ ये चंद्रकूपपरिमज्जनधूतपापाः तापत्रयोपशमनेक्षणमोच
नेच॥ ये वृद्धकालोदककूपपानपुण्येपिशाचहरवारिमघापहारि॥२९॥ येसन्निपशुपतीश्वरकुंडवारिपापप्रचंडहर
णंशरणंप्रपन्नाः॥ काश्यां स्नानोरपाना यमनियमधनाःपावनाःसावधानाः विप्रा युक्तानियुक्ता हरभजनरताःस्नान
४०६ पानैर्विशुद्धाः॥ द्वादश्यामिंदुवारे प्रपिबतिजननतादुःखतांतांकृतोता दन्यत्रापिमत्तानयोतिदुरितंहल्लिंगमिष्टं भ
वेत्॥३१॥ घंटाकर्णसरोवरोदकपराःसर्वाघक्षारादरा जैगीषव्यगुहाविलोकनरतास्तेवैमहापापघ्नाः॥ पुण्यांतर्गृहया
त्रिनेत्रनियतं मुक्ताश्चभक्ताहिते॥३२॥ उमाधवार्चा निरतंचमाधवं प्रसाद्यवासाय वसंति साधवः॥ पंचक्रोशपराभ
वंतिनिरता पक्षेपिमासेपिवा काश्यांतर्गृहतत्पराघविलयोनश्येच्च तत्प्रक्रमेः॥३३॥ नाक्रामेततनूषुपातकभरं नो
वागदःसंक्रमे नैवाक्रोशपराभवंति गणपास्तस्यात्रसंवासिनः॥३४॥ एवंयेनिवसंति संततमुमाकांतार्चकाःशांकराभ
स्माक्षामलपुंड्रफालजटिला कार्पण्यसोल्योझ्झिताः॥ ३५॥ पुण्येयषुप्रतिपर्वशर्वसुमहायात्रारतास्तेपरं मुक्ताएवभवंति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरह०१२
१३८

ई शा० द्वा०
अ०४०

तत्रसदनेविश्वेश्वरालोकिनः ॥मध्याष्टमीप्रथितसोमसमानधामसीमालनामपरिपूजनकृत्सधन्यः ॥येसोमवास
रपराः निशिनक्तभुक्तशक्त्याश्चभक्तिपरमात्रभवंतिमुक्ताः ॥३५॥ येवासदोषाःप्रथितेप्रदोषेलिंगोत्तमांगद्दगनंगप
तंगभर्गं ॥श्रीमत्त्रिलोचनमहोत्तमलिंगमत्रसंपूज्यपातकभरैःप्रभवंतिमुक्ताः ॥३६॥ भूतासुभूतपतिमेवयजेतचात्र
भस्मत्रिपुंड्राक्षधरोनरोवै ॥योवात्रिनेत्रकृपयावरपंचवर्णरुद्रादितारजपकृत्सभवेद्विमुक्तः ॥३५॥ योन्नानिशां
भववरेयतिषुप्रददातिपुराय लिंगप्रतिष्ठात्रमुदाकरोति ॥दानानिचैवात्रददातिपात्रे तस्याघसंघमखिलंकिलरो
तिनित्यं ॥३८॥ एवंनिवासरसिकास्यहरांतकाले तारंसपंचार्णमहोददाति ॥तेनैवनिस्तीर्णभवाभवंतिभावाप्रभाव
तश्मेशशिखंडमौलेः ॥३९॥ गंगाधराश्शशिधरावरसर्पहाराक्षाराविहारमरमारजताघगाराः ॥४०॥ येयेकेनासमोतोनि
वसनहृदयायांत्यक्षोतेघ्रकाशी वासायात्रपवित्रशीलनिरतादुःखाघसंघोज्झिताः ॥विश्वेशस्यकृपाभरैकसुदृशा
मूर्खास्तथापंडिता स्तनैवान्तिमदेहमंडनमिदं त्विंदोःपरंभूषणं ॥४१॥ त्र्यक्षप्रसादोन्नतपापभक्षं संवीक्ष्ययेसाक्षि
विनायकंच ॥येवानदाश्यां निवसंत्यधर्मतो नशर्मतेषांभवतेकदापि ॥४२॥ तेभैरवाक्षानलरूक्षवीक्षणो निर्दग्ध
पापाःप्रभवंतिसद्यः ॥येदुष्टाविमुक्तेचपरान्नभोजनात दुर्ध्याननायेगरलाशनैर्मृताः ॥हुताशनं दीपयतां गृहेषुदु

१२

र्धूत दुर्द्दैवनरोदनेरताः ॥ ते भैरवाक्षानलरूक्षवीक्षणैः निर्दग्धपापाः प्रभवंतिसद्यः ॥४४॥ यत्रानंद वनेद्विजा
तिहननैः पानैश्चसंनिंदनैः शैवासूयादिमायामयवर परधनहृद्धेरताश्चान्यदारे ॥ ते भैरवाक्षानलरूक्षवीक्ष
णैः निर्दग्धपापाः प्रभवंतिसद्यः ॥४५॥ ये काश्यां वसतां कुधाहितमहो कुर्वंति नैराश्यतः ॥ दंड्यान् याचक
पाचकान्प्रति रुषा संत्नोहसंत्यन्त्रहं ॥ ते भैरवाक्षानलरूक्षवीक्षणैः ० ॥४६॥ महाश्मशाने त्र वसंत्यसाधवो
ह्युमाधवाचविमुखाहिदुर्मुखाः ॥ ते भैरवाक्षानलरूक्षवीक्षणैः निर्दग्धपापाः प्रभवंतिसद्यः ॥४७॥ मूकां
467 धपंगुबधिरानधरीकरोति दीनान्विहीनांश्च धनैर्द्विषंतिये ॥ ते भैरवाक्षानलरूक्षवीक्षणैः ० ॥४८॥ ये
विश्वनाथनुतिदर्शनतोविहीना वीरेश यज्ञेशविनिंदनेरताः ॥ ते भैरवाक्षानलरूक्षवीक्षणैः ० ॥ ४९ ॥
येचान्नपूर्णानतिदर्शनोज्झिता मातापितॄणां गुरुणांविनिंदकाः ॥ ते भैरवाक्षानलरूक्षवीक्षणैः ० ॥ ५० ॥
येऽत्रांतर्गृह विभ्रमे भ्रमजुषः शंभोर्धनाहारिणः स्तेनाये निरपत्रपापणतुलाविक्रेतारो येगवां ॥ ते भैरवाक्षा० ॥५१॥
मांसानां पशुहिंसिनां रसभवं तैलंतिलं तंडुलान् गोधूमानघमाश्चये परहृतो भक्ष्यांस्तथाशर्कराः ॥ ते भैरवाक्षा
नलरूक्षवीक्षणैः ० ॥५२॥ येत्रैव गंगांभसि नैव मज्जनास्ते दुर्जनाये मणिकर्णिनिंदकाः ॥ येत्रैव साक्षाद्धरकुंढिनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ जनाः पादार्चनाहीन नराश्च पामराः ॥ ते भैरवाक्षानलरूक्षवीक्षणे० ॥५३॥ येऽत्रैव सत्रैर्न यजत्परानिनो ये मानिनो दृश्शा०खं०
१३९ भिक्षुषु भैक्ष्यवर्जित्ताः ॥ ते भैरवाक्षानलरूक्षवीक्षणे० ॥५४॥ येऽत्रैव नित्यं निवसंत्य दंड पानीयशालाप्रति अ०४०
रोधकागवां ॥ ते भैरवाक्षानलरूक्षवीक्षणेः० ॥५५॥ ये दंड पाणि पद पंकज दर्शनेन हीनाश्च केदारसमर्चनो
ज्झिताः ॥ ते भैरवाक्षा० ॥५६॥ येऽत्र प्रदोषेषु सदोषमानसा त्रिलोचनार्च्याभयवर्जिताये ॥ ते भैरवाक्षान
लरूक्षवीक्षणेः० ॥५७॥ ये केचिदन्नादिवसेऽन्नभोजनाः कालाष्टमी भैरवपूजनोज्झिताः ॥ ते भैरवाक्षा० ॥५८॥
चतुर्दश्यां काश्यां शिवनतिविमुखा नक्तशून्यान्न भुक्ता न मुक्ताः प्रभवंति पापजन्तुषो ये मानुषाः पापिनः ॥
ये पर्वण्ययतिर्दोषभाषणपराये सर्वयात्रोज्झिताःते सर्वेपि महोरु भैरव महादंष्ट्राग्रतश्चर्विताः ॥५९॥ ये च त्रिपुंड्र
रहिता विधृतोर्ध्वपुंड्राः रुद्राक्षहारवलयोज्झितसर्वगात्राः ॥ अन्यार्थ रुद्रजपिनो पिच यंत्रमंत्र विभ्रामतः स्थि
तिपरापरभैरवाशाः ॥६०॥ पंचाक्षरं वेदगणं च शूद्रे ददाति यो त्रैवतिलस्य होमकृत् ॥ अर्थार्थमेवात्र च संत्य सा
धवो उमाधवो तुंग सुलिंग भगकाः ॥६१॥ प्रासाद प्रकरं महेशसदनं विप्रस्य वा भंगकृत् यो त्रैवार्तकृत घृतस्कर
वरो हारेषु निंदाकरः ॥ पुण्यघ्नो गरदः सुरासव रतः स्त्री बाल गोवधः सर्वे ते प्रभवंति भैरवकशाघातोग्रमात्रा नराः ॥६२॥

९२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येवापांथविरोधका श्रमग्रहा धर्मैर्विहीनानरा घोरास्तेयमकिंकरैरपिसदा संताडिता त्रक्षणैः ॥ कः सोढावर
भैरवार्भट कुश्रा घातादिभीताः परं निष्पापाश्च भवंतिरुद्रगणपा नानिष्कृतांगाः परे ॥६३॥ किंवात्रैवरस्य
मंतरगृहे शंभोर्नमूत्रं सकृत् निष्ठीवेन्नच किंचिदीन्चन भवेत् पारुष्यमारुष्यहृत् ॥ नव्याहरेत्परुजं वरका
शिसंस्थो भूतेषु चाद्रोहकृदेवसं वसेत् परं ॥६४॥ कुर्याच्चेन्मलमूत्रमंतरगृहे लिंगोत्तमां गेपतेत् तत्केनापि
निवार्यपातकवरं नानिष्कृतं तद्भवेत् ॥ तस्माद्यथांतर्गृहमध्यसंस्थो नैवगृहस्थो नयतिर्वसेन्नरः ॥६५॥ ॥
468 सूतउवाच ॥ ॥ ईशाख्ययाशशिधरेणमुदाशिवायै प्रोक्तांशमेषमथितांग्निशिवोपमानः ॥ पापौघतूलद
हनोगहनार्थपद्यः सद्योविमुक्तिकृदंशकृतिजन्मदायी ॥६६॥ तेसत्रिणस्त्रिनयनार्चनजातपुण्यैः सत्पुवि
णोत्रवसिनो नियताग्निहोत्रिणः ॥ वन्याश्च संन्यासिवराक्षसूत्रा तेवर्णिनोपिविविभुः शिवमेव चांते ॥६७॥ शिवः
पादारविन्दश्रियाश्रियं श्रीपतिंविधिं ॥ उत्पादयतियोनित्यं तस्मैनित्यंनमोनमः ॥६८॥ अस्तुस्वस्तिसमस्त
वस्तुषुचिरं भाग्यंभवेन्निस्तुलं निस्तोकंप्रभवंतु कर्मगतयो व्यत्यस्तमार्गानवै ॥ आस्तांवास्तवमेवलोक
मखिलं नास्तांहिसंगच्छतात् शस्तंहस्तगतंभवेत निखिलं कस्तंभजेन्मोहरं ॥६९॥ हस्तन्यस्तसमस्तलोक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१२ सुमहद्धिध्वस्तमस्तं विधेः वस्तुन्वस्तमखक्रियादिविधुरं संन्यस्तदक्षासुहृत् ॥ वस्तंत्वत्करीर शास्त्रमच्युतशरं ईशा०द्वा०
१४० कस्तोतुमीहेन्नरो विक्रस्ताखिललोकजालमगजाकांतं भजे केवलं ॥७०॥ यावत्पूर्वादिशो वक्षितिरियमखि अ०४०
लासागरा लोकपाला चंद्रेंद्रानलवायवे विधिहरीशानादयः पर्वताः ॥ नद्यः सद्योघहृद्यः यमनियमपरा विप्र
जातासुविद्या विद्योतंतां गृहस्था शिवसुहृदशकृपापात्रमात्रापवित्राः ॥ सर्वः शर्वप्रसादाद्भुविविहितयशोखर्वगर्वैक
भक्त्या अर्च्योद्यन्मुखसन्मखादिकरणैः रक्षंतु गां क्षत्रियाः ॥ विप्राः सच्छादिशालायमनियमहिता वश्यवैश्याभवंतु
शूद्राविप्राविदुःखाः प्रदिशममलाः सर्वस्वं सुशीलाः ॥७२॥ अनर्गलं मंगलमस्तु नित्यं यन्मंगलायाः पतिसुप्रसा
दतः ॥ स्वस्ति प्रजाभ्योऽद्विपदां चतुष्पदां सदा विपद्वारणमस्तु मह्यं ॥७३॥ ॥ इति श्रीशिवरहस्ये द्वादशांशे ईशानाख्ये
सूतमुनिसंवादो नाम चत्वारिंशोऽध्यायः ॥४०॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीईशानायनमः ॥ ॥ श्रीअ
न्नपूर्णायैनमः ॥ ॥ श्रीकालभैरवायनमः ॥ ॥ श्रीगौरीशंकराभ्यांनमः ॥ ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीशिवरह० १२
९४१

श्रीविक्रमीये षण्णवत्यधिकैकोनविंशतिशततमे १९९६ संवत्सरे श्रीशालीवाहनीय एकषष्ट्यधिकाष्टाद दृशा०श्री
शशततमे १८६१ शके वैशाखकृष्णात्रयोदश्यामिन्दुवासरे नन्दननाम्नि वत्सरे श्रीकाशीविश्वनाथधाम्नि
श्रीवाराणसी क्षेत्रे मुमुक्षुभवन श्री १०८ सर्वेश्वरमठ श्री १०८ घनश्याममठप्रभुभिः श्री १०८ परमहंसपरि
व्राजकाचार्य्य दण्डि स्वामि घनश्यामानन्द तीर्थैः लेखयित्वाष्टादशांशैः सम्पूर्णः श्रीशिवरहस्य नामायं
महाग्रन्थः श्रीसर्वेश्वरसन्निधौ पूर्वोक्तमठे स्थापितः शुभदो भूयात् ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

469

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिश्री शिवरहस्य द्वादशांश समाप्तम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिश्रीशिवरहस्येनवमांशेसदाशिवाख्ये

समाप्तम्

470

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदाशिवाख्ये नवमांशे पंचषष्टितमोध्यायः॥६५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥इतिश्रीशिवरहस्ये सदा
शिवाख्योनवमांशः समाप्तः॥ ॥श्रीसदाशिवायनमः॥ ॥श्रीभैरवायनमः॥ ॥श्रीशिवायनमः॥श्रीशिवायनमः॥॥







CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ मद्भक्तमान्यं चरितं कलौ युगे विस्तारयेद्वै शतमन्युहर्षदं ॥४४॥ तत्सूत्रतयोक्तमेतं मद्भक्तमाहात्म्यमिदं तवेशि ॥ भक्तिप्रभावं कलि सदाशि० न० अ० ६५
१४३ कालमर्त्येष्वपीदमेतन्नहि जातिवर्णाः ॥४५॥ संसाराब्धौ विषमविषयागाधबोधैकगर्ते ॥ जन्मावृत्त्यैव मर्त्यामरणभयमहावा
त्ययाभुष्कपर्णो ॥४६॥ व्यावृत्तेव प्रभवति शिवे मानवो भारतेस्मिन् ॥ कामक्रोधाभिलोभो मदमुदितमहानक्रवक्त्रांतराले ॥ स
न्नाभिन्नाब्धिनौका हृतविषयपरा भक्तिभावोस्ति तामे ॥ नवग्रहावग्रहविग्रहोस्ति तापंतति जन्यं भयमाद्रिकेन्ये ॥४७॥ मामु
ग्रमीशे शरणं प्रपन्ना नैवेंद्रियग्रामपराभवंति ॥ ॥श्रीस्कंद उवाच ॥ ॥सदाशिवाख्यः शशिशेखरोदितो देव्यै मुनेश्रो नवमो
१७१ यमेवा ॥ श्रुत्वा सदाशिवमयो भवतीह विप्र स्वर्भानुमुक्त इव शीतगुकांतितुल्यः ॥४८॥ भक्तानामथ भक्तिभावजनुषां भक्तिप्र
भावप्रथा लोकानां कलिकालनिर्णयविधिः श्रीकालकालार्चनं ॥ अस्मिन्नेव शिवेन पर्वतमहापुत्र्यै सविच्छेमम विस्तारेणा सदा
शिवाश्रयकथा प्रोक्ता श्रुता मुक्तिदा ॥४९॥ श्रोतव्यो इदमेव मंगलमहाशैवं रहस्यं मुनेंऽशद्वादशमंडितं श्रुतिमहावाक्यार्थसा
रोत्तरं ॥ पुण्यं वर्ण्यपदैकपूर्णमगजाकांतांघ्रिभक्तिप्रदं तूर्णं स्वस्त्ययनाय कर्णसुरसामोदाय भूयाद्धितेः ॥५०॥ ॥सूत उ
वाच ॥ ॥ इत्थं स्कंदमुनंदितोरुवचसा वृत्तारवृंदैर्गणैः ॥ सानंदाश्रुविलोचनोथ समुनिः श्रुत्वाभिनंदन्शिरः ॥ ५१ ॥ बह्वानंद
रसोत्तरोरुसुहृदा रुद्धोपदं शांभवं ॥ धन्योस्मीति वदन्मुदा गिरिभवा जातं प्रणम्याह्वरेः ॥५२॥ ॥ इति श्री शिवरहस्ये

९३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यः ॥३१॥ आर्तिमप्यभिविजित्य भवाप्तां वर्तितैव शिवधाम सीमगः ॥ ॥ईश्वर उवाच॥ ॥भक्ताः सर्वे शिवं ध्यात्वा कृतार्था एवं भवं
ति हि ॥ शिवभक्तान् समुद्दीक्ष शिवमेवानुचिंतकान् ॥३२॥ नीचा अपि शिवे भक्ताः भवंत्येव हि शैलजे ॥ कर्मणा मनसा वाचा सर्वे
भावेन शंकरं ॥३३॥ ये प्रपन्ना महादेवं ते भवंति गणेश्वरं ॥ चरणांकरुणां भोधे मम ये शरणं गताः ॥ नैवाप्तजनना स्ते मी परिछेद्याः
कथं परैः ॥ लोकाना लोकयंतोपि निलयाय लयं मम ॥ निःसीम महिमानस्ते वर्णनीयाः कथं परैः ॥ स्मरंति च स्मराराते: सदा पद
सरोरुहं ॥३६॥ मत्स्तुतौ गद्गदतर हर्षबाष्प परिप्लुताः ॥ नेत्रांबुनिर्झरासेकः पुलकांकुरभूषणाः ॥३७॥ नादांतरूपे हृदयांबुजस्थे
शिवे परं ज्योति विचिंत्यरूपे ॥ विन्यस्य चित्तानविरतान्यकामाः कामारिधामैकगता भवंति ॥ विन्यस्य नाचित्तमुमासहायेयो
भक्तमाहात्म्यमिदं महार्थं ॥३९॥ दधाति चित्ते सततं नरो यः परात्परं शैवपदं प्रपद्येत् ॥ त्रिषष्टि भक्ता शिपि विष्टनिष्ठाः क
निष्ठवर्णा अपि तेपि शिष्टाः ॥४०॥ दृष्ट्वा शिवस्याश्रपदे कृभक्ति जुष्टा निकष्टानपि नाशयंति ॥ तिष्ठेपि घुष्याच्छिवभक्तिस
क्ति मनुष्य पुष्य प्रथितप्रभावः ॥४१॥ विशिष्य पुष्पार्पणतोपि भावात् समर्थ्यशिष्या कृतयो ममांबिके ॥ चंडालः श्वपचोस्तु वागि
रिसुते विप्रोपि वा वेदवित् ॥४२॥ मद्भक्त्या भुवनेव नेपि निवसन् भूयाच्छिवे पावनः ॥ तस्मै तां वितरामि मुक्तिपदवीं नाचारजा
तिस्पृहां नो शीलं न कुलं तदीयमगजे पश्यामि भक्त्याहृतः ॥४३॥ यो वीतमन्युः सनकादिमान्यो बालोपमन्युर्मम शैलकन्ये॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ प्रतस्थोमुदितं पुरात्॥१६॥अनागतेचिरं तस्मिन्कालेदुर्भिक्षभक्षिते॥तेक्षुधाभक्षिताश्चासन्वीरशार्दूलबांधवाः॥१७॥स्थितेषुशालिकू सदाशि०न अ०६५
१४२ रेषुक्षुधयाकिंम्रियामहे॥इतिनिश्चित्यतेसर्वेविभिद्येतद्धयंदधुः॥१८॥वीरःसवीरशार्दूलोविजित्यविमतान्रणे॥प्रत्यायोबान्धवा
न्स्वान्मोदमानमनास्तदा॥१९॥तेषांज्ञात्वाशिवद्रोहमजानन्निवविस्मितः॥अद्यवोद्रविणंदद्यांयूयंमायातबांधवाः॥२०॥इत्यनैषीत्स
तान्बंधून्स्येनाद्यपुरवासिनः॥दातुंद्रव्याणिवोद्युक्तोबांधवान्स्वगृहागतान्॥२१॥युष्माभिःशिवपूजार्थंशालिकूरव्ययःकृतः॥अ
तःकृतशिवद्रोहान्कोशादाकृष्यचायुधान्॥२२॥पितृभ्रातृपितृव्यादीन्बांधवानछिनद्रुषा॥सदेवभावनाबंधोबंधुछेदंनकेवलं॥२३॥सं
972 सारबंधछेदश्चशिवाचारंचकारसः॥स्तनंधयंकाचिदस्यकुलालंका कूरतांगतं॥२४॥संरक्षतांमितिसुतंविधवातत्करेददौ॥अयंचगिरिशा
न्नार्हःपुष्टंमातुःस्तनंधयः॥२५॥इतितंवीरशार्दूलोखड्गेनाखंडयद्द्विधा॥तत्कर्मदृष्ट्वातरुणेंदुमौलिःप्रादुर्बभूवास्यपुरःपुरारिः॥२६॥
दृष्ट्वाभितुष्टावशिवंप्रहृष्टोनिष्टावतासेवसुचेतसाद्वरं॥२७॥हरहरदुरितानिदीनबंधोकुरुममबंधविमोचनंभवोद्भवाद्य॥परिहरसं
सृतिभारमुग्रखेदंगुरुगरलाशनदेवदेवपाहि॥२८॥इतितंभक्तितुष्टोप्रभुरवदद्हो भक्ततुष्टोस्मिभक्त्या॥तवसुखसुरविनो
देजीविताःसंतुसर्वे॥२९॥भोगांश्चभुक्त्वाचिरमेहिमेपदंसंसेव्यमानंगणवृंदवर्यैः॥सतेननीत्वागिरिशार्पितेनकालंचतंकां
चनरथंकरेण॥३०॥विरंकनाथस्यसपर्ययारतोसभक्तवर्यःपदमिंदुमौले॥कीर्तिमित्रचरितेकृतचेताःकीर्तिदायिनिसुकर्मणो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीस्कंद उवाच॥ ॥रणवीरोभवन्नाम्ना शिवद्विजकुलोद्भवः॥ कोप्यासीत्कीर्तिमित्राख्यो कल्याणगुणभूषणः॥१॥ पूर्वजन्म
कृतैः पुण्यैः भक्तिमान्परमेश्वरे॥ शिवतत्त्वैकधीः सोपि त्यक्तसंसारवासनः॥२॥ निद्रातंद्रादिमुद्रां तां विद्राव्य द्रापि सेवकः॥
स्नानार्थं देवदेवेश कुंभोदकमुदावहत्॥३॥ एवं संपूज्य याऽमास कुंभाधारघटस्रवैः॥ घटं सोढुं असक्तो सो क्षुधाक्षीणवपुर्बलः॥
॥४॥ भवानीपतिपादाब्जे पपात प्रापतद्वटः॥ देवेशमायया मुह्यन्निविष्टोभूत्सनिद्रया॥५॥ प्रसन्नस्तत्क्षणे स्वप्ने प्राहैनं पा
र्वतीपतिः॥ यावद्दुर्भिक्षकालांतं तावद्धेमविशंकटं॥६॥ ददामि पीठतो तुभ्यं क्रीत्वान्नेव धान्यकं॥ तेनैव त्वं बली भूत्वा उदकुंभं द
दस्व मे॥७॥ प्रबुद्ध उत्थितो दृष्ट्वा पीठटंकं हिरण्मयं॥ कीर्तिमित्रः क्षुधार्तोपि प्राप्तभूतिरभूत्तदा॥८॥ सदाशिवार्चनरतः कुंभधाराग्र
तः सदा॥ प्रकाशयामि प्रथितं वीरशार्दूलवैभवं॥९॥ प्रकाशे चोलदेशेस्मिन्नाम्ना नामपुरं परं॥ तत्र भूद्रकुलोत्पन्नः वीरशार्दूलसंज्ञ
भूत्॥१०॥ स चोलेंद्र महीपालतंत्रपाल सुशीलवान्॥ पराजित्य परान्युद्धे राज्ञः संपदमावहन्॥११॥ भवानीरमणे भक्तिं भावनाप
रिपूरितां॥ त्यक्तदेवांतरो देवं भजन्भुजगभूषणं॥१२॥ पुरारिं भोगपूजाभिः बह्वीभिः परिवर्तते॥ शर्वालयेषु सर्वेषु शिवधर्मान्प्यका
रयत्॥१३॥ स वीरो वीरशार्दूलो नृपेणाजौ नियोजितः॥ जित्वारिपून्प्रतिष्ठाप्य शिवलिंगान्यनेकशः॥१४॥ बालेंदुमौलेः पूजार्थं शा
लिकूटाः सहस्रशः॥ संपादिता मयैतेषु माधूर्यं कुरुत व्ययं॥१५॥ यः करोति व्ययं तेषु सदा दंड्यः स निर्दयं॥ इत्युक्त्वा वीरशार्दूलः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ धामानि चक्रे हेममयानि सः ॥ महापर्वानियुक्तानि महोत्सवयुतानि सः ॥ ३६ ॥ शिवभक्तो भवद्भक्त भोजनार्थे कृतादरः ॥ क्षुत्क्षामपीडि सदाशि० अ० ६४
१ तेकाले धान्याद्यादशावर्जिते ॥ ३७ ॥ अयमत्यंतदौर्गत्या गत्यंतरमदृष्टवान् ॥ शिवभक्तेषु भक्तार्थं धैर्यधीमुदिताशयः ॥ ३८ ॥
रात्रौ राज्ञो धान्यकूटं भित्वा धान्यमचूचुरत् ॥ एवं संवत्सरं तत्र भक्तभोजनमाचरन् ॥ ३९ ॥ दृष्टो गृहीतः तत्पालैर्दूतं राज्ञेन्यवेद
यन् ॥ ताडितः पीडितोत्यंतं कशाभिः शोकदायिभिः ॥ ४० ॥ किं त्वया धकृतं मूढ गूढचौर्यमिदं कृतं ॥ चिकीर्षितं नवद मांनि
र्व्यलीकेन चेतसा ॥ ४१ ॥ इत्युक्तः सन् नृपेणैवं तदा प्राह मुदा द्विजः ॥ क्षुत्क्षामान् तान्क्षमेक्षामे भोक्तुं भक्तान् शिवस्य हि ॥ ४२ ॥
मया महेश्वरप्रीत्यै गत्यभावादिदं कृतं ॥ नृपस्तस्य निशम्योक्तिं मुक्त्वा तं मुदितोब्रवीत् ॥ ४३ ॥ मदीयं विभवं सर्वं भक्तसात्कु
४७३ रुष्वैद्विज ॥ इत्युक्तमात्रे नृपतौ कोशवृद्धिर्बभूव ह ॥ ४४ ॥ शिवाज्ञया तदा राज्ञः दत्तभक्तधनस्य हि ॥ एवं स देवेश्वरकिंकरेभ्यो
विश्राणय सर्वं विभवं वरेण्यः ॥ ४५ ॥ विचिंत्य शंभुं भुवि भुक्तभोगः पदं स लेभे परमेश्वरस्य ॥ नासीरभजनद्युतिप्रथितोध
रण्यां पराक्रमाख्यापितसर्वरत्नः ॥ ४६ ॥ सप्रीणयन् गिरिशधामसु भक्तवृंदं कैलासशैलनिलयं सुलयं प्रपेदे ॥ सपादसिं
ह परनागसिंहो भोगाननेकाननुभूय भूमौ ॥ ४७ ॥ अत्रैव तांते परिपूर्णकामः कैलासमूले शिवपादजाले ॥ ४८ ॥ ॥ इति
श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे चतुःषष्टितमोध्यायः ॥ ६४ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनमः ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यजागृत॥ससांजनपरद्बाष्पबिंदुनाकीर्णभूषणा॥२०॥पुष्पांकुरितवल्लीव पपातपतितालिनी॥नत्वा वल्कीकनाथंतं निर्गतोन्नृपति
स्ततः॥२१॥क्रौंचीमिवैनांक्रोशंतीं दृष्ट्वासोतीवरुष्टवान्॥मयिजाग्रतिवध्येनकेनमौढ्यमिदंकृतं॥२२॥इतीरयन्नसदुःसाध्य एधतक्रोध
वन्हिना॥त्रासोकुलस्तदासोपीभक्तस्तत्पार्श्वतःस्थितः॥२३॥रणमित्रोयथावृत्तंनृपायासैन्यवेदयत्॥सतदाज्ञाततत्वार्थोदंडेगुरु
परायतीं॥२४॥पुष्पघातःकरोप्यस्याःछेद्यएवेतिनिर्गतः॥भक्त्यातयापार्थिवस्यप्रसन्नःपरमेश्वरः॥२५॥आविर्भूतंवृषारूढंपु
रोवल्मिकनायकं॥दृष्ट्वाहृष्टःप्रणम्येशंपार्थिवःप्रांजलिस्थितः॥२६॥जगादजगतांनाथोभक्त्याप्रीतोस्मितेनृप॥ईदृशंः कर्मकः
कुर्यात्त्वमिवेहमहीतले॥२७॥अज्ञाताह्यपराधस्यमहान्दंडस्त्वयाकृतः॥राजन्प्रीताहितेपत्नीसंपूर्णावयवाभवेत्॥२८प्राज्यंराज्यं
प्रशाधित्वंसमेधितमनामया॥पुरस्कृतःपुत्रपौत्रैःभुंक्ष्वाभोगान्भुवःस्थले॥२९॥अंतेयास्यसिमल्लोकमुल्लसद्भक्तिभावतः॥भू
पोविवेशभूतेशोनिजमेवनिवेशनं॥३०॥गिराहरहरेत्युच्चैरुद्घुष्टहर्षजास्तदा॥ववर्षुःपुष्पवर्षाणिहर्षवंतःसुराअपि॥३१॥भूपालः
स्वपुरंप्राप्यस्थापयित्वाशिवालयं॥स्थेयसींशिवमुद्रांच सर्वामुर्वीं शशासस॥३२॥तत्रसंकर्षिरित्यासीत्पार्थिवोभानुवंश
जः॥राजाप्रजारंजकोसौनिर्जित्यनिखिलान्नृपान्॥३३॥धराधुरममात्येषुनिक्षिप्यनिभृतोभवत्॥सराजाशिवपादाब्जदास्य
कैंकर्यमोदभूः॥३४॥सभेशस्यसभांचक्रेकांचनीमीरचक्रजित्॥शिवभक्तपदाब्जार्च्यांकृत्वानत्वावसन्नृपः॥३५॥सोमावतंस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ चंद्रशेखरं॥३॥अंगकारकलापैपैः संपाद्यसततसाधनं॥ओदनैः षड्रसोपेतैः मोदमानः सशं भवान्॥४॥विभूतिं ब्रसिकांकंथांकौपीनंच सदाशि०न
१५० कमंडलुं॥अभिवांछितमन्नंच भक्तेभ्यः प्रददौमुदा॥५॥दुर्बलानांक्षितीशानां प्राप्ययुद्धसहायतां॥कामारिपादभक्त्यैव जित्वारींस्त अ०६४
ननूतुषत्॥६॥कृत्वाराजकुमाराणां असिशिक्ष्यासु पाटवं॥संपाद्यसंपदस्ताभिः ईशपूजामरीरचत्॥७॥नामन्यतशिवादन्यद्वरिष्ठमि
तिमन्यत॥नागमात्परमंशास्त्रं नपंचाक्षरतोमनोः॥भस्मत्रिपुंड्रफालस्ययस्यरुद्राक्षधारणं॥अंत्यजानपिईशानभक्तान्तान्धिरमा
नमत्॥९॥अध्यक्षगोचरानंतशिवज्ञानप्रदायकान्॥मोदमानः शिवंभेजेभजनेनशिवापतिं॥१०॥आसीत्पल्लवभूपालवंशांभोनिधि
चंद्रमाः॥पादसिंह इतिख्यातः सिंहसंहननोनृपः॥११॥चतुरंतजयाकांक्षीचतुरंगबलान्वितः॥यथापद्मविकेशानामग्रणीरुत्तरांदि
१५५ शं॥१२॥विनिर्जित्यभवन्भूपानुत्तराशाधुरंधरान्॥अर्थानुपचितोतिस्मसदाशंकरकिंकरः॥१३॥सतैरर्थैर्महादेवधामान्येत्यचका
रसः॥कलयन्विदधेवापीकूपगोपुरमंडपान्॥१४॥सह्यजातीरयोश्चक्रेधामश्रीचंद्रमौलिनः॥कालहस्तिपुरींप्राप्यपुंडरीकपुरंय
यौ॥१५॥कांचीशोणाद्रिवृद्धाद्रिगोपर्वतमुखेषुसः॥प्रणम्येंदुकलामौलिमयासीत्क्रमतालयं॥१६॥वल्मीकनाथमानस्यतत्रो
वासप्रियासखः॥मालागेहांतिकेतस्यमाहिषीपतितंसुमं॥१७॥अजिघ्रदेकंकुसुमंस्त्रैणेनाज्ञानहेतुकं॥तापसोरणमित्रस्तांविलोक्या
तीवकोपनः॥१८॥बलादाकृष्यतन्नासांकौचिच्छेदशस्त्रतः॥रक्तैरक्षितवक्षोजच्छिन्ननासाग्रनिस्सुतैः॥१९॥यथाकुंकुमपंकैः साराजपत्नी



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भीषणं॥ बृंहितैर्गजवृंदानां हयानां अपि हेषितैः॥२८॥ यंत्रस्पंदननिस्वानैः शरासनगुणस्वनैः॥ धिःकृतांभोनिधिरवं बधिरीकृत
दिङ्मुखं॥२९॥ शस्त्रक्षतेषु बहुषु गजवाजिपदादिषु॥ छत्रफेनतरंगोर्मि मातंगोत्तुंगभूत्तटं॥३०॥ प्रवाहं प्राचुरीं तत्र रुधिरे रुधिरापगाः॥
रणरंगानुरंगेन पिशाचानन्तुतस्तदा॥३१॥ शोणितांगा समुत्तीर्णाः शूरा धैर्यधुरारणे॥ इत्थं युद्धे जयस्पर्धाबद्धचित्ताः समुद्धताः॥ पांड्ये
न खंडिताः सर्वे बलेन प्रबलेन ते॥ गिरिशकृपया पांड्यो जित्वा नत्वाभ्यगाच्छिवं॥३३॥ तत्सुतोपि सदा वाग्मी वागीशमृशितांघ्रिके॥
आस्वादितानंदरसः चिरं राज्यं शशास सः॥ यः काष्ठभारक्रयणे नदीपानुद्बोधयत्केशकपालदाहैः॥ भूणोति यः तस्य समेधिताशयो
गणोत्तमाधीशपदं सयाति॥३५॥ त्रैलोक्यनाथं गिरिजासनाथं कैलासनाथं कवितासनाथः॥ चित्ते दधानप्रणिधानभावः देवं शिवे
गणनाथमूर्तिं॥३६॥ श्रीभस्ममुद्रां प्रविसार्य दिक्षु क्षुरप्रसंशानितवैरिवर्गैः॥ विधूतपापो विजितारिवर्गो व्रजत्यसौ तद्वृषवाहधाम॥३७॥
कालारिपादे कलितांतरात्मा कालांतरेणामलधीः स वाग्मी॥ हालाहलाहार सदा निवासं कैलासशैलं निलयं चकार॥३८॥ ॥इति
श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे त्रिषष्टितमोऽध्यायः॥६३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवाय नमः॥ ॥
श्रीस्कंद उवाच॥ ॥कावेरीवारिकलिते चोलभूपालपालिते॥ देशे प्रकाशविभवमस्ति दीर्घपुरं परं॥१॥ दीर्घदर्शी दीर्घपुरे तत्र शूद्र
कुलोद्भवः॥ नासीर भंजनाख्यो भूत्कोपि शंकरकिंकरः॥२॥ स बाल्य एव श्रीकंठ भक्तो भूत्कंठमानसः॥ अनिशं पूजयामास पूजया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ वेतिसः॥सायंदेवालयंप्राप्य शिखामुद्दीपयत्स्वकां॥१३॥तेनप्रकाशयन्छंभोर्धामदिव्यंसभूत्सुरः॥तत्साहसंसमुद्वीक्ष्यतंत्र्यक्षःस्वपदंन सदाशि०नं
१३९ यत्॥१४॥आत्मविद्देदविद्धंशे ग्रामेकरपुराह्वये॥काशिनाथइतिख्यातःकश्चिदासीत्कवीश्वरः॥१५॥त्वंगदुंगातरंगोद्य भंगनिःसंगपा अ०६३
टवैः॥सारस्वतैःसभूपालान्वशीचक्रेचतुर्विधैः॥सचेरचोलपांड्यानां सभासुसदसस्पतिं॥अस्तुवन्मोदमनयन्तैर्दत्तैःद्रव्यसंचयैः॥१७॥
प्रसरत्कवितासारसमार्जितधनोच्चयः॥प्रबंधबंधेनसममामबंधच्छिवाश्रयान्॥१८॥काशिनाथउवाच॥ ॥उच्चंडतांडवनिमग्न
भवोद्धृतेभ्रंशुंडोरुकांडविधुताजसृष्टिपिंडं॥ब्रह्मांडभांडसकलाकलितोरुमुंडप्रोत्तुंगषंडमगजापतिमानतोस्मि॥१९॥वेतंडगंडकलि
तेक्षणकुंडलीशश्रीकुंडलारुणमणिच्छविदीप्तगंडं॥कोदंडितोत्तमनगोधृतकांडबाणचंडांशुसूनविनिवारकमानतोस्मि॥२०॥ताप
१७८ स्यदीर्घमारस्यचरितंविरतिप्रदं॥क्रीडयाभूषितोयस्यमलयाख्योमहीधरः॥२१॥वीर्यसत्वंभाद्भूतभुजोभुजानिर्जितनाशकः॥कां
तासिंहासनार्थायधृपात्कंकणघातजं॥२२॥किणांबभारकोटीरकलितंकुलिशायुधः॥ज्ञानसंबंधबोधेन सबोधायाभवद्बुधः॥२३॥
प्रबोधायन्मनःपद्मंजैनस्वांतमलीमसं॥दक्षिणयोदक्षिणामाशांचंपानाथानुकंपया॥२४॥सराजायोजयामासशिवधर्मेसमंत
तः॥कालेतस्मिन्नृपाश्चान्येओत्तराश्चबलोत्तराः॥२५॥रुरुधुर्वीरुधवतींमधुरांधीरवत्तराः॥निशम्यरोधंनृपतिरन्योन्यजन्य
संप्लवे॥२६॥अभूदभूतपूर्वंतदखर्वबलगर्वयोः॥युद्धंतिरोहितार्त्यंतदैत्यादित्यरणोपमं॥२७॥शंखकाहलभेरीणांभैरवाराव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येदेवर्योगिदुर्लभो॥३६॥राजन्श्रीरित्रंपरमंपवित्रंभुक्तेर्गृहोपायमनुक्तमुक्तेः॥भक्तिंनिधत्तेहृदिशंभुपादे सूक्तिंवहेतश्रुतिमौलि
मार्गे॥३७॥इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेपूर्वित्रिषष्टितमोध्यायः॥६३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीसदाशिवायनमः॥ ॥श्रीस्कंदउवाच॥ ॥अस्तिस्वेतनदीतीरेदक्षिणेवीक्षणास्पदं॥मदनांतकरस्येवसदनंवदनंश्रियः॥१॥
अभिरामारामयुक्तंविरामंदुर्धियांमतां॥शिवभक्तोद्विजःकश्चिच्छिवपादाब्जसक्तधीः॥२॥नक्तंभक्ताशनोनित्यंरुद्रसूक्त्याशिवं
स्तुवन्॥अवर्तिष्टचिरंकालंशिपिविष्टेष्टमानसः॥३॥सत्सुसंप्रीणनार्थेषुविश्राणितधनःसदा॥आत्मावनंधनंमेनेशिवपादांबु
जार्चनं॥४॥स्वसंपदांफलंमेनेदीपारोपणमित्यसौ॥कौसुंभकमधूकादिविपिनेसोकरोत्सदा॥५॥तद्बीजकर्षितैःतैलैःदेवदीपान
चीकरत्॥एवंतस्यस्थितवतोवृध्याधनमनीनशत्॥क्षत्वोपवीतंकृत्वापिदेवदीपान्व्यधाद्द्विजः॥तद्भक्तिख्यापनार्थायशिवो
ऽस्यार्थमपाहरत्॥७॥शिवदीपारोपणार्थंमहायत्नपरोभवत्॥ततःसतुद्विजोनित्यंव्याघ्रेश्वरशिवालये॥८॥विक्रीयवेश्मक्षेत्रा
दिशिवेदीपमदीपयत्॥बांधवान्याचितुंभीतःक्षीणाशेषधनोपिसः॥९॥गत्वावनंस्वयंस्थित्वाकाष्ठभारवहोद्विजः॥वीथ्यामानी
यविक्रीयतेद्रव्यक्रीतसर्पिषा॥१०॥दीपानुद्दीपयन्शंभोःवेश्मान्युमादिविनिर्मितं॥प्रकाशयत्सविशदंनिशिपादविमुक्तये॥११॥
कदाचित्तैःकैश्चिदक्रीतेकाष्ठभारेद्विजस्तदा॥दीपाराधनविघ्नोभूदितिनिघ्नन्स्वकंशिरः॥१२॥रुरोददुःखितोविप्रोहाहाहाहाशि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ रामांतेतत्रभूद्दकुलोद्भवः॥२१॥शक्तिनाथइतिख्यातो भक्तिमान भवद्भवे॥ ब्रह्माविष्ण्वादिष्प्राप्ये [आप्राप्यं] मंजुसिंजान नूपुरं॥२२॥अरुणांश्रीमहेशस्यचरणांश महाशि०न० अ०६२
रणांययो॥अनन्यसिद्धसद्भृत्तिजन्मभूच्छिवकर्मकृत्॥२३॥निंदकानां महेशस्य सोच्छिनद्रसनांरुषा॥निषादशक्तिहृकूहस्ते [ध्रुव] निंदकान्वेषणेरतः
१३८ ॥२४॥भक्तिगर्वेण न्यंकुर्वन्ताहृशशिवकर्मकृत्॥तोषयामाससशिवं सारिवद्दुकनाथरं [मरुचन्द्र]॥२५॥काउवः पल्लिनाथोभूदन्यभक्तोभवच्छिवे॥
क्षुद्रायेभिल्लभूपाल पल्ल्नःवादविपल्लवः॥२६॥कश्चिदेते वार्यग्रह्या आर्यपादाइतिश्रुताः॥ कीर्तिधर्मप्रतापेन सत्यवाक्सम
द्दीपतिः॥२७॥कलिन्निराकरोद्वैरं शत्रूंयुद्धे धनानिच॥अश्रांतशिवसिद्धांत राद्धांतितमनाःसदा॥२८॥कुर्वीमिपालनयत्सर्वांप्रा
ज्यसांराज्यदीक्षितः॥राज्ञितस्मिन्महाप्राज्ञेरक्षतिक्षितिमंडले॥२९॥नात्यजन्मनुजःकश्चिन्मार्गमनुनयोचितं॥स्वातंत्रेराज्य
९७६ तंत्रेपितत्राशिवमगायत॥३०॥कुमारंचकुलांकूरं प्राज्येराज्येभिषिंच्यसः॥शिवकैंकर्यनिष्णातो धुर्योधैर्यभृदग्रणीः॥३१॥
सिषेवेशिवधामानि यानि संतिमहीतले॥तेषुधामसुसर्वेषु कुर्वन्कैंकर्यमीशानुः॥३२॥प्राकारगोपुरादीनिमंडपादीन्यनेकशः॥पुं
डरीकपुरीशस्यसेवांकुर्वन्ययौदिवं॥३३॥आविर्भवन्आदिपुराधिनाथःआहूयपुंगवमद्रिजासरवः॥जायासमेतंकलिङ्नि
तिमेतंनिजंकूदंनिष्कलमानिनाय॥३४॥कलिनीतिकथामिमांभुभांशिवदीपापर्पाजातवैभवं॥हृदयेनिदधातियःसदात
दयंयातिपरात्परंपदं॥३५॥श्रीवीरभक्तःशिवशासनेनत्रासोज्झितस्ताहृशकर्मकर्ता॥सशक्तिरत्यंतमहेशभक्तोमुक्तिंप्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मतश्चक्रपाठिका॥ तत्रचारुचरित्रोभूत्तैलिकान्वयसंभवः॥ कामारिकिंकरः कश्चित्कलिनीतिरितिश्रुतः॥ यशोधनोधनेना
पिशोधनः सर्वपाप्मनां॥७॥ साधुरावीथिराशीशोभूतेशे भक्तिमानसः॥ मंदिरांतर्बहिः शंभोर्दीपानारोपयन्सदा॥८॥ शिव
धर्मपरस्तत्रसोवात्सीद्दिनयान्वतः॥ भक्तिंपरीक्षितुंतस्य तैलिकाधिपतेस्थिरां॥९॥ शनैःशनैधनंसर्वं शमयामासशंक
रः॥ असंख्यायां क्रमेणैवक्षीणायामपिसंपदि॥ अत्यादरोनतत्याज्यः शंभोर्दीपानुलापनं॥ क्रयविक्रयतल्लाभतैलेनेवत्रि
शूलिनः॥११॥ दीपानारोपयन्छत्तं सतैलिककुलाधिपः॥ नित्यमत्यंतदौर्गत्यो विक्रीय भूमिचक्रकं॥१२॥ मनोनियम्यद
म्यावपृथक्कीत्वा शिवोत्सवं॥ उपमन्नेण तैलेनदीपानारोपयत्प्रभोः॥१३॥ सर्वगृहादिविक्रीयदीपदापनकृत्तदा॥ कलिनी
तिस्ततोजायामासीद्विक्रेतुमुत्सुकः॥१४॥ विक्रीयतेमेजायेयंधनेनक्रियतामिति॥ अनेघुघोषयामास वीथ्यांवीथ्यांतदा
मुदा॥१५॥ बुध्वाबुध्वाशिवाज्ञातांवध्वाहृदिसखिन्नधीः॥ नक्रीणातिसतांकश्चिदाप्रदोषंशिवाज्ञया॥१६॥ सचदेवालयं
प्राप्यविषण्णात्माव्यचिंतयत्॥ कालेशिवालयेदीपानद्यानर्पयतेममः॥१७॥ किंप्राणैर्गलमुत्कृत्य तद्रक्तैस्तैलपूरणं॥ करिष्या
मीतिसंकल्प्यकंठेखड्गंनिवेशयत्॥१८॥ तावद्देवोस्यजग्राह करंबालधरं करं॥ माभक्तसाहसंकार्षीरित्यवोचद्दयानिधिः॥ श्रीमतः
शक्तिनाथस्यचरितंकथयामिवः॥ कावेरीवारिपूरोघहृष्टमत्स्यसमाकुले॥२०॥ देशप्रकाशमेवास्ति विंचपुरनामकं॥ क्षेत्राराममभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० विलसद्भुस्मांगरागारुणा॥२१॥तत्स्तुत्यातोषितः शंभुस्तमाह्वविनयान्वितं॥शिवभक्तेषुतेप्रीत्यासुप्रीतास्तुतवप्रिया॥वि सदाशि० न
१३६ प्रियंनैवतेकिंचिन्मत्प्रियस्त्वंनसंशयः॥ ॥सूतउवाच ॥आशांविहायपरितेसमितेनुपाशादाशांबिहायसबुधोपिवि अ०६१।६
हायबद्धं॥स्मरारिपादस्मरणैकभूतेः तस्यातिभक्तस्यपुरःपुरारिः॥२३॥आविर्बभूवाद्रिसुतासहायोवृषाधिरूढः सुरवर्यसंघैः॥
हृष्टःप्रहृष्टः सतमष्टमूर्तिं प्रणम्यसंप्रांजलिरेवतस्थौ॥२४॥एवंभवानीपतिरात्मभक्तंनिनायलोकंनिरपायसौख्यं॥भ
क्तिप्रसन्नः परमेश्वरोसौ प्रदायपाणिंपुनरस्यपत्न्याः॥२५॥वैश्योत्तमंतंशिवभक्तवश्यंपत्न्यासमेतंस्वपदंनिनिन्ये॥क
४७७ लिकामजितः स्थिरात्मनः कलितंपश्यचरित्रमद्भुतं॥२६॥कलिकालजकश्मलापहं कलयन्कालजिदंघ्रिभाक्भवेत्॥ ॥
इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेएकषष्टितमोध्यायः॥६१॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशि
वायनमः॥ ॥श्रीस्कंदउवाच॥ ॥कलिनीतेकथ्यतेद्य जगद्व्याप्तिप्रथांकथा॥तौंडीरमंडलेभातिमहीमंडलमंडने॥१॥
अधिकापुरनामास्तिपुरंस्वःपुरसंन्निभं॥विबुधाधिपसौधाभं सुधाधवलितंसदा॥२॥शिवप्राकारसंबद्धपुरवीथीसमेधि
तं॥प्राकारप्रकरायत्र सूर्यमार्गनिरुद्धकाः॥समुच्छ्रायाःसमीक्ष्यंतेशरच्चंद्रांशवोपमाः॥यत्सालाग्रथितांभोधेः मोदनादान
दीपतेः॥४॥मुरवादिरवाश्चैवनव्यज्यंतेपरस्परं॥तत्ररत्नमुखाद्रव्यवाणिज्यप्राप्तसंपदा॥५॥चक्रिणःश्रूयथैवीथीना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आरामैरभिरामांत मस्तिस्वस्तिदमास्पदं ॥ पैणाकदा पुरं नाम्ना पुण्यं पुण्यजनास्पदं ॥१८॥ कलिकं पा ह्वयः कश्चिद्देश्यो भूतत्र वश्य
धीः ॥ भवानीपतिपादाब्जमधुपायितमानसः ॥१९॥ प्रलंबहस्तप्रासादनाथपादांबुजार्चकात् ॥ अर्चयन्छिवभक्तांश्च स्वच्छमान
सदर्पणाः ॥२०॥ प्रलंबहस्तप्रासादनाथस्योत्सवदर्शने ॥ नान्यत्समेनेनिःसंगमंगलैश्वर्यनिश्चलः ॥२१॥ अन्नैः षड्रससंपन्नैः व्यं
जनैश्चित्तरंजनैः ॥ आत्याहृतमना भक्तान्भोजयद्भक्तराशिभिः ॥२२॥ कदाचिद्बहवो भक्ता भोक्तुं तद्गृहमागताः ॥ सतान्भोजयितुं
तेषां पादप्रक्षालनं व्यधात् ॥ पतिव्रता तस्य पत्नी नाम्ना नीतिमती जलं ॥ करकात्तकरे पांबु दध्रे प्रक्षालनाय सा ॥२४॥ प्रक्षालनना
यतत्पाद मस्पृशद्वैश्य सत्तमः ॥ भक्त वेषं समास्थाय शिवोभ्यागाद्यदृच्छया ॥२५॥ तत्पादपद्ममालंब्य पादप्रक्षालनाय सः ॥ पादमा
कर्षयन्नाकृसतदा भस्मभूषितः ॥२६॥ अकृत्वा शिवलिंगार्चामागतोस्मि त्वदंतिकं ॥ त्यक्काय शिवलिंगार्चायो भुंक्ते नारकी भवेत्
॥२७॥ इत्युक्तोथ वणिग्बली पत्नीं वीक्ष्याथ कोपनः ॥ पत्न्याः पाणिं कृपाणेन चिच्छेदाथा विचिंतयन् ॥२८॥ स्वयमादाय करकं प्र
क्षाल्यास्य पदद्वयं ॥ परिवेष्य स्वयं भक्तान्हृष्टोभूद्वैश्यसत्तमः ॥ तद्भक्तिं शिवभक्तेषु मनः सक्तिमतिस्थिरां ॥ दृष्ट्वा देवः प्रस
न्नात्मा प्रादुरासप्रियासखः ॥२९॥ तं दृष्ट्वा देवदेवेशं तुष्टाव सविशांपतिः ॥ ओं नमो भोत्रिजगत्कारण्यकरूपातारूप्यवारांनिधे ॥
पार्वतीशप्रमथाधिनाथ गरधृक् विश्वेश विश्वाधिक ॥ विश्वाशास्य विभो विभूषणमहाकाकोदराकंधर सोमानद्धकिरीट कोटि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ ९पः ॥१॥ भवानीपतिपादाब्ज भक्तिहृत्पद्मसंश्रयात् ॥ मेने विभूतिं श्रीभूतिं संपत्स्वपि सतीषु यः ॥२॥ जेतारिपूणां यो वीरः प्रजाश्चपरिपा सदाशि॰
१३६ लयन् ॥ शरणं चरणं शंभोः मेने सोनुक्षणं विभोः ॥३॥ सोमावतंसधामानि सर्वाणि स महीपतिः ॥ महोत्सव महापूजा महिमानिचकार च अ॰६०
॥४॥ आर्द्रायां चंद्रचूडस्य नृत्यं तत्र विलोकयन् ॥ मालाप्रदीपं नैवेद्यं भूरिभोगसमर्चनं ॥५॥ आर्द्रोत्सवेषु सर्वेषु शिवभक्तानभो
जयत् ॥ संपूज्य गंधपुष्पाद्यैः निष्कमेकमदापयत् ॥६॥ कालेस्मिन्कामभूतांकुः कश्चिद्भस्मांगभासुरः ॥ सनरवक्षाति रागच्छ
न्निंद्यमानो जनैर्वृतः ॥७॥ दुःशीलोऽपि सरिन्मौलिपादभक्तः सभस्मधृक् ॥ अनिंद्य इत्य सो राजा द्विगुणं तमपूजयत् ॥८॥ अ
१७७ तिभक्त इति प्राज्ञोह्यभवत्सह्यजातटे ॥ अतिमुक्तोहेमरत्नमणिकुट्टिमपट्टणं ॥९॥ तत्र त्रिगुणबद्धीप संपद्दर्शनदर्पणो ॥ अस्ति कैव
र्तपाठांतः स्थानं दाननिवेशनं ॥१०॥ तत्रातिभक्त इत्यासीच्छिवभक्तपदार्चकः ॥ धीवरो धीवरो भवपादाब्जसक्तधीः ॥ जलाहृतैः
पीनजालैः संपन्नद्रव्यसंचयैः ॥ ईशोयं सर्वदेशानं शर्वभक्तान्समर्चयत् ॥१२॥ जलाहृते मीनजाले योदृष्टः प्रथमं झषः ॥ अथ शं
भोरिति जह्नौ सो धभक्त इति स्मृतः ॥१३॥ एकं च मीनमेकस्मिन्वासरे स व्यपोहति ॥ संपादितं स्वजालेन रक्तपद्मसमप्रभं ॥ तंमीनं
मेरुकूपाभं नाभूदाकष्टुमीश्वरः ॥ ततः सर्वेपि कैवर्ताः तमाकृष्य कथंचन ॥१५॥ अयन्नमीन इत्यूचुः तंदृष्ट्वा मीनमद्भुतं ॥ विस्मि
तालापयुक्तेषु दाशाधीशेषु नाद्भुतं ॥१६॥ एष शंभोर्हितं दृष्ट्वा तत्याद्राभमिव जह्नौ ॥ कथ्यते कलिकंपस्य वर्तनं पुण्यकीर्तनं ॥१७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मं दुर्गं निहत्य निखिलं बलं ॥ धनमादाय निःसीमं सामं तैर्यदुपार्जितं ॥ २८ ॥ पेरवांचप्रमुथनं अमात्या समुपेत्य ते ॥ प्रणम्य कीर्तिचो
लायनृपालायन्यवेदयन् ॥ वीराश्वरिपुवीराणां निकृत्तानि निजायुधैः ॥ कोटीरखचितोत्कर्षाणि शीर्षाण्यस्मा अदर्शयन् ॥ ३० ॥ तेष्वे
वमशरीरिखं दृष्ट्वा बद्धजटाधरं ॥ विषाद वेपथुमेरैः भूपालोव्याकुलोभवत् ॥ शिवं शीर्षजटाजूटं स्वन्ये दृष्ट्वा विलप्यसः ॥ घराजयंप
रेषांचनिशम्य परिदेवनं ॥ ३२ ॥ दृष्टोमयान्यथादृष्टो वैरिणा विधिनाधुना ॥ मयाश्रीभूतिमाहात्म्ये पृथिव्यं परिपालितं ॥ अविचा
रापचारोयं भक्तस्यहिकृतोमया ॥ मन्येनिन्येसकुखेन कालं भूतलभृदर्चया ॥ ३४ ॥ तद्धि संचिन्त्य सोमात्यानाहृदेहविरक्तधीः ॥ शंभो
स्थापयितुंदास्यमादास्येभक्तिमीदृशीं ॥ ३५ ॥ गोगंगा गोत्रभित्तुल्य गात्रं पुत्रं ममाग्रवे ॥ आत्मजं वैगुणैः पुज्यं प्राज्येराज्येभियोज्य
तां ॥ ३६ ॥ इत्यादिश्य नृपोमात्यानाज्याक्तं प्राज्यपावकं ॥ प्रविवेश महादेवं ध्यात्वा पंचाक्षरं जपन् ॥ ३७ ॥ प्रविष्टमात्रे भूपाले शिखिः
शांतशिखोभवत् ॥ ववर्षु कुसुमासारं विबुधावसुधाधिपं ॥ ३८ ॥ पुरारिः पुंगवारूढः प्रादुर्भूतः महोमया ॥ नृपं तं स्वपदं निन्ये भक्ते
नजटिनासह ॥ ३९ ॥ आर्ति पापभयाद्धारि भूपवतां कीर्ति चोलचरीतं शृणोति यः ॥ भक्तिमेत्य सुखधाम संश्रये कार्तिके यजनकस्य
तत्पदं ॥ ४० ॥ ॥ इतिश्रीशिवरहस्ये सदाशिवाख्ये नवमांशे अष्टितमोध्यायः ॥ ६० ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥
श्रीसदाशिवायनमः ॥ ॥ श्रीस्कंदउवाच ॥ ॥ उग्रस्थानं सदा चास्ति सह्यजातीरगोचरं ॥ नरसिंह इति ख्यातः तत्र भूक्षत्रियाधि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ पद्मारिणं॥गजंहस्तिपकैः सार्धं हत्वा वीरोड्डदं स्थितं॥१३॥समभ्यर्च्य मुदाप्रासादुच्चनधान्यं तदा हृदा॥कदाचिन्मंदपे स्थित्वारा सदाशिन
जभिः सपराजितैः॥१४॥हयमातंगरत्नानि वस्त्राणि च समपकृयति॥ ॥राजोवाच॥ ॥भूमौ सिंधुपरीतायां यो ददाति करं अ०६०
१३५ न मे॥स नृपोस्ति किमित्यामानमात्यानन्वयुंक्त सः॥गिरिदुर्गाश्रयः कश्चिदधिकाख्यो करप्रदः॥नृपो महानित्यमात्यैः ई
रितः प्राह तान्नृपः॥१६॥दुःसाध्यमस्ति किं दुर्गं प्रबलं वा बलस्य मे॥युष्माभिर्गिरिमारुह्य तस्मा सुंक्रियतामिति॥१७॥कृते
कमत्यास्ते मात्या ज्ञातिमत्या गमन्गिरिं॥राज्ञाचा ज्ञापितास्ते वै संज्ञाप्याजग्मुरेवहि॥१८॥चूर्णीकर्तुं रिपोर्दुर्गं मार्गं जघ्नुः
१७१ स्वसैनिकैः॥आसेदुरधिकाख्यस्य गिरिदुर्गं दुरासदं॥१९॥कार्ति चोलस्य शैलाग्रमारोहंतीममुं चमुं॥प्रत्युद्ययुः पार्वतीयाः जावि
ताः सर्व सेनया॥२०॥कीर्तिचोलमहीपाल सेना प्रत्युज्जगाम सा॥अधिकाख्यस्य नगरे सेनासा सागरोपमा॥२१॥चतुरंगे तरंगे ते
सेने सिंधुनिभे उभे॥आयोधनं विविधतुः विविधे रायुधैर्धिया॥२२॥पत्तिः पदातिनायुक्तो रथिनो रथिनां वरैः॥तुरंगिणा तुरंगस्थो
गजसंस्थो गजेन हि॥२३॥उत्पतन्निपतंतीक्ष्णबाणपाषाणपेषणो॥युद्धं बद्धजनस्पर्धं सेनयोरनयोरभूत्॥२४॥बहुत्वात्प्रबलत्वा
च्च कीर्तिचोलमहीभुजः॥साथ पाषाणविक्षेपा सेनेयं विजयं ययौ॥२५॥अनया कीर्तिचोलस्य सेनया युद्धमानया॥अभूदधिकभू
पस्य निहतं निखिलं बलं॥असुभिस्त्यक्तवसुभिः सह भीत्या ससाध्वसः॥गहनं गहनं प्राप सोधिक स्तु भयाधिकः॥२७॥निर्भित्य निःस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूक्त्या सर्वेंदुभक्त्या विमुक्तियुक्ताश्रितशंभुभक्त्या ॥ पवित्रगात्रः श्रृणुयात्रिनेत्र सुप्रेमचारित्र महो सुपुण्यभाक् ॥ ३१ ॥ ॥ इतिश्री
शिवरहस्ये सदाशिवाख्ये नवमांशे एकोनषष्ठितमोऽध्यायः ॥ ५९ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवायनमः ॥
श्रीस्कंद उवाच ॥ ॥ अथाहं कीर्तिचोलस्य कीर्तयिष्यामि वैभवं ॥ कुलाचलशिखारूढो वीरशार्दूललक्षणः ॥ १ ॥ औदार्यवीर्यगां
भीर्यचातुर्यगुणभूषणः ॥ अभवन्भुवि भूपालः शिवैकैंकर्यतत्परः ॥ २ ॥ अपालयन्चोलमूलं कावेरीवारिवर्धितं ॥ श्रीनिवासं तदादे
शं निर्दे(शी)कृत्य पार्थिवः ॥ ३ ॥ हृष्टपुष्टजनैः कीर्णं त्रिविष्टपमिवापरं ॥ गोप्तासीत्तत्र गोत्रायाः कीर्तिमित्रो भवन्नृपः ॥ ४ ॥ निर्मलः श्रो
लभूपाल कुलोदधिकलानिधिः ॥ पूर्णकर्मविदायेन जननादैन्यहारिणा ॥ ५ ॥ अक्रियंतोत्सवास्तत्र श्रीसदाशिवधामसु ॥ नित्योदया
दस्तमयसमयं सव्ययं करोत् ॥ ६ ॥ प्रतापकीर्तिनिकरैः न्यक्कृतार्कनिशाकरैः ॥ सर्वमुर्वीपतिः गर्वं निर्वापयदसौ रिपोः ॥ ७ ॥
प्रातपेनप्रतीपेन चक्रे भूचक्रमात्मसात् ॥ देवैर्निरूपितमिदं शैवसिद्धांतदर्शनं ॥ ८ ॥ कृत्यमित्यवगत्यासौ नित्यं तद्दर्शनोहृ
दा ॥ सोमावर्तं सधामानि कुर्वन् सर्वाणि सर्वदा ॥ ९ ॥ महापूज्योत्सवयुतान्यशादीशो विशां पतिः ॥ जित्वा सर्वा दिशो जिष्णुः
वर्धिष्णुर्विष्णुविक्रमः ॥ तद्दत्तबहुवित्तानि जगृहे हरपूजने ॥ हरधामान्यसौ नत्वा गत्वा स्तुत्वा च भक्तितः ॥ ११ ॥ जित्वाहृ
त्वा धनैः भित्वा गां चहुत्वा तदानले ॥ विवेश विलसत्कोश निजं प्राज्यं पुरं ययौ ॥ १२ ॥ कालेस्मिन्छिवकामाख्यकर पुष्पा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० मुखान्यं नरं वेत्यात्तनिश्चयः ॥ एवमेव शिवान्नान्यमस्त्नाविंत्सयतस्ततः ॥ २० ॥ असत्यदास्यसहितः अतिदास्यइतिश्रुतः ॥ सुधा सदाशि०न
१३४ धामरवंडोज्वलच्चारुमौले ललच्चारुकाकोदरापारहार ॥ स्फुरत्सारकर्पूरधाराशरीर स्मरापारगर्वापहार प्रसीद ॥ २१ ॥ सुगंगातरंगौघ अ०५९
रिंखज्जटाजूटनीडप्रफुल्लांबुजारक्तनिर्यत्प्रभाकोटिकूयनलाकारफाल त्रिपुंड्रांकमध्योज्वलन्नीलकंठ ॥ अगाधीशकन्यासना
थ प्रसीद प्रभो मारमारांतक भोगभोगांधकादग्धरक्तत्रिशूलं ॥ २२ ॥ विशालाक्षपक्षांगसंस्थानहर्ष प्रकर्षानुतर्षानरत्नोत्तरिक्पाल
वृंदोज्वलच्चारुमौलिविलोलऋपादाध्वराध्यक्षपाहि ॥ शिवानंगभंगोत्थभस्मांगसंगकृतार्थागरागांगलिंगोत्तमांग ॥ २३ ॥ भुजंगां
४८० गभूषानलाक्षोरुभासाविशेषांगसंग प्रसीद प्रभो ॥ विश्वविश्वाधिकाशास्यगोध्यक्ष्यमुक्षाध्वरध्वांतभूतासुराध्यक्षशिक्षाविनोद
॥ २४ ॥ विभोपाहिपाहीकृतान्नायसाक्षी त्वमेत तवाङ्आदिपादे समर्प्याहि हार ॥ भवामि प्रभोमुक्तिकांताकराक्रांतमार्गेसमायां
हि मोदं ॥ २५ ॥ तस्य सारस्वतस्तोत्रतरंगितमनाः शिवः ॥ ददौ तस्मै दृढांभक्तिमैश्वर्यमतिमानुषं ॥ २६ ॥ चारुवर्णपरिष्कारदुहिते
वसलक्षणा ॥ श्रीमतीतस्यकविताजज्ञेशिवपतिव्रता ॥ २७ ॥ सारस्वतोरुशब्दार्थमाधुरीचातुरीजुषा ॥ संबोध्यसकविर्देवं सततं तत्पदं
ययौ ॥ २८ ॥ एवंसदेवेशहृदैकभक्त्या निर्जित्यशत्रून्परिपाल्यपृथ्वीं ॥ समर्च्यसर्वान्सुरभूसुरांश्च परात्परं शैवपदं प्रपद्ये ॥ २९ ॥
कृतात्मनस्तस्य जितांतकस्य चरित्रमेतत्परमं पवित्रं ॥ यः श्रोत्रपात्रे निदधातिमित्र नेत्राब्जपादे लभते सभक्तिं ॥ ३० ॥ सवित्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विध्वस्तेषु समस्तेषु विद्रुतेषु नृपेषु सः ॥ प्राज्यपूज्यगुणो राज्यं विभज्य प्रशशास सः ॥५॥ सच कारद्विजार्चां स शिवद्रोहकृ
तां च तत्र ॥ कृतांतक इति ख्यातः स नाम्ना भवदुग्रराट् ॥६॥ नृपैररिभिराधूतो गर्वितैर्द्रौपादामवान् ॥ निर्जित्य दुर्जयान्नेतान्
समशीर्षस्रजं दधौ ॥ मकुटेन विना राजा विराजित पराक्रमः ॥७॥ अपालयत्कृपाभूतं ससंसागरांबरां ॥ स राजा मणिकोटीर
धारणाय कृतोद्यमः ॥ प्रख्यातान् प्रार्थयामास श्रीतिल्लपुरभूसुरान् ॥ वयं चोलमहीपानां मणिकोटिरदायिनः ॥९॥ नेतरे
षामिति प्रोच्य तेययुः केरलक्षितिं ॥ शिवार्चनाय तत्रैकः तस्थौ तिल्लपुरे द्विजः ॥१०॥ चिरं तिल्लपुरावासात्केरलेन्यवसन्
सुखं ॥ श्रीतिल्लपुरविप्रेषु तथाभूतेषु तेषु सः ॥११॥ राजा ससंशयं भेजे सभानाथं कृतांतकः ॥ महेश मकुटं देहि भवत्पादयुगं
मम ॥१२॥ इति प्रार्थनया सार्धं निद्रां निशि विवेश सः ॥ दर्शयित्वा निजं रूपं तस्मै स्वप्ने सभानटः ॥ अधान्निजपदद्वंद्वं तन्मूर्ध्नि
मकुटोपमं ॥ प्रबुद्ध उत्थितः प्रातः नटनाथपदांबुजं ॥१४॥ दधानो मूर्ध्नि कोटीरं महाराजधुरं दधौ ॥ साक्षात्र्यक्षप्रसादेन वीक्षितो
विश्वरक्षिता ॥ चक्रे रत्नमयं सर्वं श्रीमहेश्वरमंदिरं ॥ शिवधामानि चान्यानि महोत्सवयुतानि च ॥१६॥ पूजयामास सततदाधन
दोपमसंपदा ॥ धीरः केरलदेशस्थान्नाह्वयन् भूसुरान्नृपः ॥ यथापूर्वं तिल्लवने स्थापयामास तान्द्विजान् ॥ असत्यदास्य इति वै
तत्राभूत्कविशेखरः ॥१८॥ नवं सारस्वतरसं यो मेने जन्मनः फलं ॥ स भक्तिरसया सूक्त्या विना विषमलोचनं ॥ स्तोष्याम्यहं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 हृदर्थं किंचिदालंब्य तद्गृहमगमत्स्वयं॥३८॥ तं नत्वाह गणश्रेष्ठ किं करोमि प्रशाधि मां॥ इत्युक्तो भूसुरः प्राह भासुराचारचेष्टितं 
॥३९॥ विचारो मे हृदि चिरं प्ररूढो गूढमप्यहं॥ वदामि ते शृणुष्वेतदेकलिंगार्चकस्त्वहं॥४०॥ मोक्षे गृहे तेऽसि द्धान्नं संपूज्य प्रमथा 
१३३ धिपं॥ लिंगं संस्थापयाम्यद्य स्नातुं गच्छेः सरिद्वराम्॥४१॥ इत्युक्त्वा निर्गतो विप्रो तथेति प्रतिगृह्य सः॥ लिंगं संस्थापयामास स्व
गृहे गृहणीकरे॥४२॥ एतस्मिन्नंतरे विप्रे स्नात्वा तत्र समागते॥ अदर्शनं गते लिंगे स विप्रः स च भासुरः॥४३॥ अन्विष्य सुचि
रं तत्र प्राणान्त्यक्तुं सवै द्विजः॥ प्रयत्नमकरोत्तेन सदारोऽपि स भूसुरः॥४४॥ प्राणांस्त्यक्तुमथोद्युक्ता सा स्त्रियोऽपि विधिचोदिताः॥
४७। तदा महेशवाक्येन हर्षिता भक्तिशोधने॥४५॥ चोलस्य चापि गणनामक भूसुरस्य भक्तिं दृढां प्रमथपो थ दृशावि लो
क्य॥ कैलासशैलमनयत्प्रशमं भवाब्धेस्तारणं शरणमीशजनेषु शार्वः॥४६॥ ॥इति श्री शिवरहस्ये सदाशिवा
ख्ये नवमांशे अष्टपंचाशोऽध्यायः॥५८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवाय नमः॥ ॥
श्रीस्कंद उवाच॥ ॥ततः कृताभितांतस्य कृतकीर्तेः कृतात्मनः॥ कृतांतकस्य चरितं दुरितापहमुच्यते॥१॥ यः शूरधीरवी
राणां विजिताविजितेंद्रियः॥ स भक्तो भवदीशाने कलिंदापुरनायकः॥ महेश्वराय जिह्वायां प्रह्वायां परिवर्तयन्॥ नित्यभ
क्तपदार्चातो नान्यच्चक्रे परायणं॥३॥ वीरः स गौरीरमण करुणाकवचोरणे॥ व्यद्रावयन् नृपान्वेगान् नागानिव खगाधि
पः॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नन्तु ण्ड्य

नत्वास्तुत्वामहादेवं वल्मीकेशं प्रहृष्टधीः ॥२३॥ सुंदरेशं समालिंग्य तत्रोषित्वाचिरं नृपः ॥ सौम्येन गच्छता नंतुं पाण्डुदेशे शिवाल
यान् ॥२४॥ चोलो ययौ हालवक्रं शिवशासनलग्नधीः ॥ हालास्यलास्यं नृत्येशं दृष्ट्वा हृष्टो नृपोभवत् ॥२५॥ प्रयातं पथि भूतेश
श्रीधामानि प्रणेमतुः ॥ वहंतीं सह्यजां तीर्त्वा तत्तीरस्थशिवालयं ॥२६॥ दृष्ट्वा नत्वाभितुष्टाव सुंदरेशानसादरं ॥ पंचापगातयाधी
शं नमेतु श्चोलसुंदरौ ॥२७॥ ततो महोदयपुरं संप्राप्य प्रीतमानसौ ॥ कुर्वंतौ विविधां क्रीडां तस्मिन्न्यवसतां चिरं ॥२८॥ ततः
सः चोलः सौम्याय गच्छते कमलालयं ॥ ददौ धनानि चित्राणि वस्त्राण्याभरणानि च ॥२९॥ गच्छंतं सुंदरं दूरादन्वगाच्चोलनृपतिः ॥
चोलः शिवरतस्तत्र उवास शिवधामसु ॥३०॥ गुणिनो गणनाथस्य गण्यते पुण्यवैभवं ॥ चंपायां गणनाथाख्य विप्राणामग्रणीरभूत् ॥ एका
तपत्रेणाचिरं सर्वामूर्वीं शशास हि ॥ इतिहासं शंभवस्य कथ्यतेऽन्यसुखोदयं ॥ द्रोणीपुरीश श्रीकर्मकरणैकपरायणः ॥ शिवोद्यानारोप
णेच रक्षणेऽनुक्षणे रतः ॥३२॥ पुष्पोपचयने माला ग्रथने सन्य भोजयत् ॥ श्रीमज्जनांबुनयनं मार्जनालेपनादिषु ॥३३॥ प्रदीपारोपणे
कांश्चिच्छीघ्रं पुस्तकलेखने ॥ तद्वाचने च कांश्चित् नियोज्य प्राज्यजीवनैः ॥३४॥ शिवभक्तिकृतः सर्वान्शानुच्चैर्भाषयन्सदा ॥ इत्येव
माद्दतोनित्यं शिवकैंकर्यकृत्सदा ॥३५॥ प्रीणयन् ज्ञानसंबंधपदद्वंद्वप्रपन्नधीः ॥ वर्णाश्रमकुलाचारनिरतो भस्मभूषणः ॥३६॥
प्रहर्षिभक्तिश्रद्धाभ्यां शिवभक्तार्चने रतः ॥ तस्य भक्तिपरीक्षार्थं व्यक्षो विप्राकृतिर्बभौ ॥३७॥ भस्मत्रिपुंड्ररुद्राक्ष भूषितो भासुरस्तथा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ र्वस्वसंपदं॥अमात्यैर्वीरितोभूमिमंडलंचसमर्पयत्॥७॥सगायनोविलोक्यैवमंत्रीनाहकिमेतया॥शंभोर्नामाख्यसुधया ना सदाशि० न
१३२ हं वसुधया सुखी॥संपदां समुदायेन भूत्याप त्रं प्रसाध्यतां॥ममोपयुक्तमेतावदधिकेन धनेन किं॥इत्युक्त्वा स्वोचितं द्रव्यं मनीषीम अ०५८
धुरां प्रति॥सकदाचिन्नृपः शंभुं पूजां तेनूपुरध्वनिं॥१०॥अशृणवं तांडवे शस्य यथापूर्वमचिंतयत्॥अद्य किं कृतमीशस्य मयात्यंत
निषण्णधीः॥११॥उरस्थलं तदा छेत्तुं कृपाणमग्रहीत्करे॥मध्ये वक्षसि तं खड्गं निदधानं महीपतिं॥१२॥राजन्मा साहसं कार्षीर्द्दृष्टि तुल्यो
सिहेन्नृप॥व्याललंबिसुंदरेशस्य श्रीगानं शृणवता चिरं॥१३॥इति वाक् शांभवी व्योम्नी समुदस्थान्नृपं प्रति॥इत्थं स भापते र्वाणीं निशम्य
४८२ नृपतिस्तदा॥१४॥अहो देवदया भक्ते ब्रौतिविस्मयमाययो॥अहं हेमसभां गत्वा नत्वा तत्र नटेश्वरं॥१५॥द्रक्षामि बलवद्भक्तवृक्षेश्वरप
दांबुजं॥श्रावयामास मंजीरनादं स्वत्याग संमतं॥१६॥नृपो नूपुरनिक्वाणं शृणवन् तत्र महेशितुः॥अपर्यंतमहानंदघनां भोधौम
मज्जसः॥१७॥अहर्निशं महेशस्य महागोदो महीपतिः॥आसेवत पदद्वंद्वं सेवितं सर्वदेवतैः॥१८॥नटेश सेवां कुर्वाणो भक्तिरक्तः स पा
र्थिवः॥तत्रानैषी न्निमिषवद्वसन्दिवसान्बहून्॥१९॥तदा नृपं समाहूय प्रोवाचेत्थं सभापतिः॥ ॥श्रीशिव उवाच॥ ॥सौम्ये
श्रीगानमाकर्ण्य मया नृप विलंबितं॥२०॥इति हेमसभानाथवाक्यं श्रुत्वा स भूपतिः॥अथ जंबूपुराधीश दर्शनोत्सुकमानसः॥२१॥श्री
तिल्वनगरात्तस्मात्सेनया सह निर्ययौ॥तत्र श्रीकंठमुख्यानि स्थानानीशस्य सेवितुं॥ भक्तियुक्तः प्रणम्यासावाययौ कमलालयं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वजीवकृतज्ञत्वंइंगितज्ञंचमेविभो॥समस्तभाषाज्ञातृत्वसम्यग्वितरणायसः॥३३॥तादृशीश्रीरितिप्रोचेतथास्त्वितिनभोगिरा॥तदा
कृपयैवविभोराज्ञांशिरसासमुद्वहन्॥३४॥अमात्यैःसहमत्तेभवाहःप्रापमहोदयं॥वीथ्यांमहोदयस्याथपूषाकलितविग्रहं॥३५॥रजकं
वीक्ष्यतंमत्वाभस्मोद्धूलितविग्रहं॥प्रणमत्सतदाराजारजकंसोपिभीतिदः॥३६॥प्राहराजानमव्यग्रोरजकोहंनतापसः॥तंप्राहराजारज
कंत्वंभस्मोद्धूलितोह्यसि॥३७॥इत्युक्तस्तेनराज्ञावैमंत्रिणोमुमुहुर्भृशं॥सोपिभद्रासनारूढोराज्यंतंपर्यपालयत्॥३८॥
तस्मिन्महागोदशतिप्रतीतेसिंहासनस्थेवरकेरलेषु॥सर्वप्रजानामभवन्प्रमोदःसस्यैरवंध्याधरणीतदासीत्॥३९॥ ॥
इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेसप्तपंचाशोध्यायः॥५७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदा
शिवायनमः॥ ॥श्रीस्कंदउवाच॥ ॥वज्रसिंहासनेरूढेमहागोदेमहाभुजि॥तत्कीर्तिललनापापोब्रह्मांडैःकतुका
द्भुतं॥१॥तस्मिन्कालेदरिद्रःसन्भद्राख्यःकोपिगायकः॥मधुरायांमहादेवमगासीदर्थवांछया॥२॥स्वप्नेतंह्यातुरंचक्रेशः
समुद्बोध्यदयानिधिः॥दत्वापत्रमिदंचोलहस्तेदेहीत्यचूचुदत्॥३॥सोपिकेरलमभ्येत्यकोटिकोलापुराभिदं॥महोदयपुरं
गत्वाराज्ञेपत्रंसमर्पयत्॥४॥राजातत्पत्रमादायशिरस्याधायशांभवं॥नृत्यन्गायन्शिवंयस्मान्नत्वाक्षितितलेपत
त्॥५॥रोमांचकंचुकोत्कीर्णप्रमोदाश्रुदृगंचलः॥इतिकर्तव्यतामूढोजहर्षचननर्तच॥६॥तस्मैगायनपत्रायंददौस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 चेयन्शिवमेकांते सदातोर्यत्रिकार्पणैः॥सदाशंकरनामानि गायन्नास्ते शिवालये। महागोदो महीपालो मंत्रिभिर्यंत्रितः 
121 सदा॥१७॥अथार्णवोघ्यत्परिघे शैलावहपरीवृते॥लक्ष्मीविलासकलिते महोदयपुरे वसन्॥१८॥आज्ञाचक्रे मृदुश्रीक्षमावानिति विश्रुतः॥ 
पालयित्वाचिरं पृथ्वीं तपः कर्तुं वनं ययौ॥१९॥क्षमां त्यक्त्वा क्षमायुक्तो क्षमावति वनं गते॥कस्माद्राज्यार्हद्रूत्येतन्मंत्रिणोपि व्यचिंतय
न्॥२०॥इति निश्चित्य तेजग्मुः तत्रासौ यत्र तिष्ठति॥भक्त्येयवनिरं तं शंभोः ध्यायन्नेव शिवं स्थितः॥२१॥महागोदं प्रणम्येव स्वकार्यं समुदीर
यन्॥त्वयि शासति राजेन्द्र सर्वे शं भवसत्तमाः॥२२॥क्षमापतिः क्षमायुक्तः क्षपानाथदृगर्चकः॥नृपान्वयोद्भवः प्राच्यां राज्यं शासितु
मर्हति॥२३॥मंत्रिणां तन्महागोदो वचः श्रुत्वा व्यचिंतयत्॥विघ्नः स्याच्छिवदासस्य प्राज्यराजस्य पालनं॥शिवस्याभिमतं राजन् तव रा
483 जस्य पालनं॥एवं निश्चित्य देवस्य परतोहं भवन्मतं॥२५॥करोमि किंन्न वेत्येवं पश्चान्निश्चित्य कथ्यते॥इत्युक्त्वा मंत्रिणस्तेन तथा
स्त्वित्येव तेब्रुवन्॥२६॥सोपि तद्वचनं श्रुत्वा गत्वा नत्वा महेश्वरं॥पुरस्ताच्चंद्रचूडस्य विज्ञप्तिमकरोदिमां॥२७॥स्वामिन्मया पालनीयं किं
राज्यपरिपालनं॥प्राज्यराज्येमनो यस्य त्वत्पादं दूरगं भवेत्॥२८॥तवेदमपि मे वास्ते कैंकर्यं अवबुद्धयथा॥नहि द्रोहो महेशस्य महापूजा
करो भवेत्॥२९॥यदि राज्यसमृद्धिः स्याद्धनधान्ययुतो मुने॥ममधाम सुसर्वाणि वप्रप्राकारगोपुरं॥३०॥मंटपं तीरबंधांश्च शिवतीर्थे
षु कारय॥महोत्सवविधिं चापि महापूजाप्रवर्तनं॥३१॥इत्याकर्ण्य गिरं गोदः प्राहेश यदि ते मतं॥तर्हि मे दीयतां स्वामिन्प्राहेश यदि मे मतं
॥३२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीसदाशिवायनमः॥ ॥श्रीस्कंदउवाच॥ ॥भपामिभक्तिभरितं चरितं चोलभूपतेः॥प्रविश्य प्राणिनामंतः दुष्टानां शासिता
स्वयं॥१॥केरलो नाम विषयः चोलभूपालपालितः॥अपरं विपदा नास्ति सर्वासां संपदां पदं॥२॥अस्ति प्रकाशदेशोस्मिन्नवकाशांतरं श्रियः॥
महोदयपुरं नाम धाम चोलमहीपतेः॥३॥श्रीवांछमिति नाम्नास्ति यत्रांतर्धाम शांभवं॥प्रियं महोत्सवाढ्यस्य प्रपन्नजनभद्रदं॥४॥वेदघोषै
र्वाद्यघोषैरारामभ्रमरारवैः॥गजवाजिरवैर्यत्र पयोधिरभिभूयते॥५॥वर्णानुष्ठानधर्मैयं श्रुत्याश्रमपथाजनैः॥तिष्ठत्यनुष्ठानपरैः निष्ठा
वद्भिः कृपालुभिः॥६॥शिवयोगियतींद्राणां मठैर्वेदांतघोषितैः॥भस्मरुद्राक्षसंपन्नैः शिवलिंगार्चनप्रियैः॥७॥पुष्पारामाभिरामांते पुरेत
स्मिन्महोदये॥महागोदइति ख्यातः कोप्यासीच्चोलभूपतिः॥८॥सप्रबुद्धभावः संत्यक्तलोकरीतिरविप्रियः॥शिवपादाब्जभावेन विभा
सितजगत्त्रयः॥९॥श्रीवांछीपुरनाथस्य कैंकर्यनिरतोभवत्॥प्राकारगोपुरोत्तुंगमंडपादि विधाय सः॥१०॥बिल्वप्रियाल
सरलकरवीरवनानि च॥मंदारकर्णिकाराद्यसहकाराण्यकारयत्॥११॥पुष्पारामाप्यथोक्तं तु चकार मतिमान्नृपः॥र
थं च वहनादीनी कुर्वंतश्चोत्सवं विभोः॥१२॥शंभोर्भक्त्यार्चनैरेव निनाय दिवसान्बहून्॥प्रातः प्रातः समुत्थाय शिवं संचि
त्यवैहृदि॥१३॥स्नात्वा तीर्थे महेशस्य पावनेन च भस्मना॥कुसुमैर्कोमलैर्मालां चंद्रमौलेरकल्पयत्॥१४॥श्रीमज्जनांबु संमार्ज
मानीय चक्रे संमार्जनक्रियाः॥गोमये र्भक्तिभरित उपलिप्य शिवालयं॥१५॥दीपानारोपयन्भक्त्या विद्योतयति शंकरः॥श्री

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२० भासुरं शूलोद्यन्मृगटंकयुक्पदनता मंदारवृंदैर्युतं ॥ नत्वास्तुत्वैवमीशानं सुपुत्रेण मुदान्वि अ.५६
तौ ॥ आनन्दभरितापारमानसौ तौ बभूवतुः ॥ ४२ ॥ ॥ दभ्रभक्त उवाच ॥ शंभो पाहि म
हेश सोमशकलालंकारमौले हर ॥ स्वामिन्देवदयानिधे करुणया मांपाहि सर्वेश्वर ॥
त्वं विश्वाधिकवेदवेद्य भगवन् कारुण्यवारांनिधे ॥ धन्योस्मीश भवत्पदांबुजरसास्वा
दैकसन्मानसः ॥ ४३ ॥ तदा महेशोऽप्यथ दभ्रभक्त ॥ स्तुत्या विलोक्याथ मुदा दयालुः ॥
सोवाच धन्योऽसि ममैकमान्यो ॥ भवाधुना त्वं ससुतः सदारः ॥ ४४ ॥ ॥ सूत उवाच ॥ ॥
४८४ नगेश्वरश्चारुशशांकमौलिं समेहि मां राजतपर्वताग्रं ॥ कैलासशैलं सनिनाय द-
भ्र भक्तं सदारं ससुतं महेशः ॥ ४५ ॥ श्री दभ्रभक्तस्य चरित्रमेतत् ॥ शृणोति यः सा
हसिकोत्तमस्य ॥ न केवलं भुक्तिरमुष्य हस्त ॥ स्थिता परानंदमयी च मुक्तिः ॥ ॥
॥ ४६ ॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे षट्पंचाशोध्यायः ॥ ॥ ५६ ॥ ॥
२२ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काकपक्षधरं तत्र विशालाक्षं च धूलितं ॥ रत्नग्रैवेय कटक कुंडलादि विभूषितं ॥३१॥ क-
टिमेखलिका राजत् किंकिणी पादनूपुरं ॥ तातां बेति च भाषंतं ददृशी तेउ भावपि ॥
विस्मयोत्फुल्ल नेत्राब्जै विलोक्येतामुभावपि ॥ ह्यानंदाब्धौ निमज्यंतौ परामृश्य नि-
जैः करैः ॥ ३३॥ आदाय तनयं, भिक्षोः पारणा संभवत्विति ॥ पुत्र लब्ध्वाऽपितौ मोदं प्रापतुः भि-
क्षु पारणे ॥ ३४॥ भैरवाहार गेहं तं द्रुतमाजग्मतु र्मुदा ॥ तौतु गृहं प्रविश्यांतः अपश्यंतौ
सबालकौ ॥ ३५॥ भैरवं, खेद संवीतौ चिंतया मासतुश्चिरं ॥ किमावाभ्यां पुरा कारि शिव
पूजा व्यतिक्रमः ॥ ३६॥ किंशां भवद्रोह परौ भस्म रुद्राक्ष वर्जितौ ॥ किं शिवालय विच्छेदं
शिवारामो झिर्तिं पुरा ॥ ३७॥ अभंजि शिव भक्ता वाक्रमा वित्याकुलौ चितौ ॥ इतस्ततो वि
चिन्वंतौ पश्यंतौ तौ दिशोदश ॥ ३८॥ आलोकमाना वाकाशं वृषभं ताव पश्यतां ॥ तदारुढौ गुहो
पेतौ विलोक्यादिमदं पती ॥ ३९॥ सोमं सोमललामगंगासुजटाचूडं मृडं शंकरं ॥ सोमा
र्कानललोचनं गरगलं वैय्याघ्र चर्मांबरं ॥ ४०॥ मंदस्मेर मुखांबुजं सुमहाबाहु प्रभा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

९२२ चतुः॥ पारणा भैरवस्यास्तु निर्विघ्ने नेति तौ तदा॥ यथा तथा यमेवैष भैरवो भक्तिदुर्घटं॥ २१॥ किंवच्चि भैरव
स्याज्ञां करवै किं भणामिति॥ स भैरवः पुनः प्राह दभ्रभक्तं तदा मुदा॥ २२॥ भैरव उवाच॥
न कदाचिद पुत्रस्य पुंसो भोज्मि गृहे मया॥ आहूयतां बहिर्गत्वा भोक्तुं सह मया र्भकः॥
॥ २३॥ इत्युक्तो भैरवस्योक्तिं विलोक्य गृहिणीमुखं॥ चिंतयन्नंतरीशानं चित्रार्पित इवाभ-
वत्॥ २४॥ पुनः पुनः क्रुधा प्राह भैरवो भीषणाकृतिः॥ भैरव उवाच॥ ॥ किं विलंबेन भ-
क्ताद्य क्षुधा कुक्षौ प्रवर्धते॥ आहूयतां द्रुतं बालो नयनानंद चंद्रमाः॥ २५॥ हंत बालं विसृज्यैव भो-
४३९ क्तुं तेयतते मनः॥ एषाऽपि निर्घृणा पुत्रे तव भक्त कुटुंबिनि॥ २६॥ न चिंतयति सा बालं भोज-
ने सारता भवत्॥ युवयोरिव मे चेतो नैव वात्सल्य वर्जितं॥ शीघ्रमाहूयतां गत्वा सह भोक्तुं
स्तनंधयः॥ इति सूक्तिमतिं वाचो युक्तिमाकर्ण्य भैरवीं॥ २८॥ दभ्रभक्तः समं वध्वा निर्ग-
2/ त्य बहिरंकणे॥ आहूयतां बहिर्गत्वा साश्रुधाराललोचनौ॥ २९॥ दंपती उवाच॥ ॥आग
च्छागच्छ शीलाल भोक्तुमाहूयतेऽतिथिः॥ आगच्छंतं सुदद्दर्शाते बालमक्षरवेदितः॥ ३०॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तैरंगैःसमाहितैः ॥ कृतवत्यसि किं सम्यक् उपदंशं शुभं मम ॥ ८ ॥ अंगेषूत्तममित्युक्तमुत्तमांगमिति श्रुतं ॥ तदानये
तितेनोक्ता गृहिणी व्याकुला भवत् ॥ ९ ॥ गृहिणी उवाच ॥ निषिद्धं तच्छिरो मांसं निक्षिप्तं बहिरंकणे ॥ सर्वसंपन्न
मेवेहमांसं बालस्य मेधुना ॥ १० ॥ तद्बालस्य शिरो गृह्य मुसलोलूखले ● लेनहि ॥ खंडयित्वा थमस्तिष्कं पक्वा
पात्रे ददौ विभोः ॥ ११ ॥ आनंदं पर्यया मास मांसं भैरवभोजने ॥ भुंक्ष्वेत्यभिहितो देवो दभ्रभक्तमुवाच सः ॥ १२ ॥
॥ भैरव उवाच ॥ गृहिणारहितं भोज्यं मन्येऽस्माकं विगर्हितं ॥ त्यक्त्वातिथिं गृहो भुक्त्वा नरकं याति सान्वयः ॥ १३ ॥
गृह्य पिस्वातिथे भुक्तौ विघसाशी भवेद्यदि ॥ ब्रह्मणो लोकमाप्नोति इत्थं श्रुत्यनुशासनं ॥ १४ ॥ एकोन भोक्ष्ये त्वं
त्यक्त्वा तस्मात्पंक्त्या वुपाविश ॥ भैरवे वादिनि तथा दभ्रभक्तस्तदा स्थितः ॥ १५ ॥ पात्रेन्यतेन सतदा पुत्रमांसं प-
रिष्कृतं ॥ स्थितं दृष्ट्वा पुनः प्राह भैरवो भीषणाकृतिः ॥ १६ ॥ भैरव उवाच ॥ निंद्यं च कथ्यते लोके अपुत्रान्नमसंस्कृ
तं ॥ तस्मादन्नं न भोक्ष्येहं पुत्रहीनस्य ते गृहे ॥ १७ ॥ इतीतद्भैरमाकर्ण्य भीतिसाध्वसलोचनः ॥ कथमाह्यर्षवि-
घ्नोस्य संजातो दैवकारितः ॥ १८ ॥ इतस्ततोऽभिवीक्ष्यैव संक्लिष्टो भिक्षुभाषितैः ॥ तदा तौ दंपती भिक्षोराज्ञया
दुर्विलंघया ॥ दीर्घमुष्णं च निश्वस्य तौ विलोक्य परस्परं ॥ कच्चतु स्तावसं भ्रांतौ दंपती हर्षितांतरौ ॥ २० ॥ दंपत्यु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२८ सुसंकृतं ॥ ७४ ॥ तस्यां गमाज्यधाराभिर्निष्पं दिक्र मथातनोत् ॥ अपाक्षी चतुरा तस्य शिलालस्य शिरो बहिः ॥ ७५ ॥ गृहिणीप्रा- अ॰ ५५
ह भर्त्तारं शिघ्र माहूयतां हविः ॥ भैरवाभि मृतं पक्कं मासं तव सुतस्य हि ॥ ७६ ॥ तच्छ्रुत्वा द भ्र भक्तो पि प्रणम्या हूय भैरवं ॥
॥ दभ्र ॥ संपन्नमन्नं स्व मतं स्थितो सि क्षुधित श्चिरं । वेला सेय मतिक्रांता भुंक्ष्वाशीघ्रं दया निधे ॥ ८० ॥ त्वं संप्राप्तो सि मद्ग्र
म्यात्स्वामि न्नागच्छता मिति ॥ प्रक्ष्याल्य पाणी पद पंकजे तदा स भैरवस्याथ मुदा भ्र भक्तः ॥ प्रणम्य भक्तिप्रणवः स्वगेहं
प्रवेशयामास च भैरवं तं ॥ ८१ ॥ इति श्री शिव रहस्ये सदा शिवाख्ये नन मांशे पंच पंचाशो ध्यायः ॥ ५५ ॥ श्री काशीविश्वेश्व
१९६ रार्पण मस्तु ॥ श्री सदा शिवाय नमः ॥ श्री स्कंद उवाच ॥ गृहं गोमयलेपादिस्त्रग्विधानादि शोभितं ॥ रंगवल्ली विता नाद्यैः
पूर्ण कुंभाम्रपल्लवैः ॥ १ ॥ कदली स्तंभ संबद्ध गृह स्तंभैरलं कृतैः ॥ प्रविष्टे भैरवे हृष्टा गृहिणी सातमानयत् ॥ २ ॥ निधाय
खट्वामास्तीर्णां विस्तीर्णासो त्तरच्छदां ॥ पुष्पासनं पूर्णमना देवेशाय ददिश सा ॥ ३ ॥ तस्मिन्नासन आसीने तत्पादक्षालनाय सा ॥ द-
धौ करकमीशस्य पादौ प्रक्षालयत्पतिः ॥ ४ ॥ तत्पादक्षालनजलप्रोक्षितात्म शिरास्तदा ॥ सुगंध धूप दीपाद्यैः स्रग्भिरानर्च्य
भैरवं ॥ प्रक्षाल्य कांचनं पात्रं विनता विमलैर्जलैः ॥ सान्न्यस्य कांचने पात्रे तत्र शाल्योदनं न्यधात् ॥ तानि तानि व्यंजना-
२६ नि तत्रांते षु निधाय सा ॥ नतां स्मितमुखीं वीक्ष्य व्याजहार स भैरवः ॥ ७ ॥ श्री भैरव उवाच ॥ मदुक्तं पशुमाल भ्यते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षणः॥ भोजने यदि मेलब्धो तदा भोक्तास्मि ते गृहे॥६३॥ माता पितृभ्यां हर्षेण विश्वास्यो नितरां सुतः॥ इत्थं तेनेरितो भक्तः पुल
कांकुर भूषणः॥६४॥ तथा करिष्ये इत्युक्त्वा निर्जगामाथ गेहिनौ॥ अथ भक्तः सतां प्राह भद्रे देहि महाधनं॥६५॥ तं तादृशं
नर पश्चुं क्रेतुं याति परो मिति॥ विचिंत्य सा विहस्येह स्वा रामे व्यंजने स्थिते॥६६॥ किमापणेषु गच्छंति कथं नामोपप-
द्यते॥ विक्रीयापि सुतं किं वा पितरौ खंडयिष्यतः॥६७॥ अथवा धनलोभेन सुतं चेत् खंडयिष्यतः॥ कथं प्रमुदितात्मा
नौ स्यातां तत्पितरौ भुवि॥६८॥ इदं चाघटनं मन्ये यत्कुलांकुर विक्रयः॥ तस्माच्छीलालनाम्नायं प्रियं पुत्रं समानयं॥ तमे
वावां विश्वस्याथ हर्षाभैरवपारणं॥ साफल्यं पुत्रवत्तायाः सह सा प्राप्यतामिति॥७०॥ आदायाक्षरशालातो बालं बा-
लं शशिप्रभं॥ नीलालकं भूषणाढ्यं सद्दोहरिणीदृशे॥७१॥ अनंगमिव लब्धांगं जयंतमिव भूगतं॥ सापि हर्षात्स्नुत
कुचा तमादाय महानसे॥ तैलेनाभ्यज्य गंधाद्यैः स्नापयित्वांबुभिः सुतं॥ भोजयित्वा तूलिकायां शय्यालु मतनीछनैः॥
॥७३॥ तं निनिद्रितं विलोक्याथ दभ्रभक्तेन सा तदा॥ उद्धृत्तं क्रकचं दध्रे भर्त्ता सा हर्षितांतरा॥७४॥ अंके निक्षिप्य जननी
पाणिपादे व्यदारयत्॥ चखंड कंठमेतस्य च कर्त्त चरणौ तदा॥७५॥ त्वभेत्सीत्करं मर्छे सीत्सर्वाण्यंगान्यनुक्रमात्॥ विश्व
स्यांगानितन्मंडनं निरस्य बहिराहृतः॥७६॥ गृहीत्वा शोणितं पात्रे पक्तुं पत्नी करे ददौ॥ अपाक्षीत्सापि जीरैलामरीच्यादि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२८ सती ॥ ५० ॥ गृहिण्युवाच ॥ अध्यास्ते धातकीमूले शिवभक्तो महामुनिः ॥ इत्युक्तस्त्वरया युक्तो प्राप्य तं प्रणतस्थितः ॥ भक्त्या
नम्रतमालोक्य सस्मितेन मुखेन सः ॥ हर्षनिर्भरया वाचा तमुवाच यो भ्रभक्तकं ॥ ५२ ॥ भैरव उवाच ॥ महान्त्वं दभ्रभक्तस्तु
विश्रुतो मच्छ्रुतौ पुरा ॥ दर्शिता कृत्रिमा भक्तिः वाचा ते द्याति हर्षितः ॥ ५३ ॥ गमिष्यामि यथाजोषं दृष्ट्वा त्वत्र विशेषतः ॥ इ-
त्युक्तवंतं प्राप्य प्रणम्य पदमीशितुः ॥ ५४ ॥ देवदेवदयाक्लिष्टे दभ्रभक्तोप्यभाषत ॥ दभ्रभक्त उवाच ॥ न कश्चिद्द्यद्दृष्टो
त्र भक्तो भोक्तुं ममालये ॥ मद्भागधेयाद्भगवान्नागतो भोक्तुमर्हसि ॥ ५५ ॥ तेन धन्योस्मि लोकेषु मान्योस्मि नितरां विभो ॥
१८७ ॥ भैरव उवाच ॥ अस्मद्यथेप्सिताहारो त्वया दातुं न शक्यते ॥ त्वयालोकनतो हृष्टो गच्छ भक्त यथासुखं ॥ ५६ ॥ इत्यु
क्तो पप्रणम्याशौ प्राह भीतेन चेतसा ॥ भक्त उवाच ॥ आहारस्य क्रमं ब्रूहि सोहं ते कर्तुमुत्सहे ॥ भवानी पति भक्तेषु संप्रा
प्तेषु महात्मसु ॥ ५८ ॥ अप्राप्यं च भवेत्प्राप्यं न किमप्यत्र दुष्करं ॥ इति तां गिरमाकर्ण्य भक्तं प्रत्याह भैरवः ॥ ५९ ॥ श्री भैर-
व उवाच ॥ ओदनं भुंजते स्माभिः नरमांसोदनं सदा ॥ अतस्त्वया न शक्येत नरमांसोपपादनं ॥ ६० ॥ इति तं भैरववचो भी
षणं शुश्रुवे तदा ॥ भक्त उवाच ॥ संपादइष्ये तितरामाहारं तेदृशं विभो ॥ तेनेरितो यवै प्राह भोज्यो नरपशुर्यदि ॥ ६१ ॥
सपंचवर्षदेशीयः सर्वेष्वंगेष्वनिंदितः ॥ त्वत्पुत्रो लक्षणोपेतो यदि भोज्ये भवेन्मम ॥ ६२ ॥ बालस्ते पंचवर्षीयः एकपुत्रः सुल

२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

x पंक्ति ५ दभ्र भक्तस्य वै गृहं ॥ इति गी स्तस्य शुश्राव तदा तद् गृहिणी हिता ॥ ४२ ॥ समाहिता द्वारदेशमागात् प्रांजलिराब्रवीत् ॥

पादुकाविलसत्पादं मत्तमातंगगामिनां॥ यामिनीरमणोत्तुंगशेखरास्फुरितांगकं ॥ स्फाटिके कुंडले विभ्रदस्थिहारलसद्गलं ॥ ३७ ॥
कंचुकी कंचुकं विभ्रत्कपालकलिताशयं ॥ दक्षिणिक्षित हस्तस्थडमरुद्दामघोषवान् ॥ ३८ ॥ मंजुशिंजितमंजीरपरिशोभि
पदांबुजः ॥ दिव्योपनिषदस्तस्य पादनूपुरतां ययु ॥ ३९ ॥ तद्ध्वनिः पादलग्नानां तासां स्तुतिरिवाबभौ ॥ एवं तदभ्रभक्त
स्य द्वारमागात्स भैरवः ॥ ४० ॥ कुर्वन्स भैरवं नादं दभ्रभक्तः क्व तिष्ठति ॥ इत्यपृच्छत्तदा घोररावनादितदिङ्मुखः ॥ ४१ ॥
भैरव उवाच ॥ अविमुक्तादहं प्राप्तो सती उवाच ॥ धन्यां त्वदागमनतो मान्यां मन्ये जगत्त्रये ॥ भक्तान्विमृगयन्नन्वेष्टुं ग-
तवान्गृहवानिहि ॥ ४३ ॥ घटिकामात्रमास्वेदं विष्टरं त्वं प्रतीक्ष्यवै ॥ अदृष्टपूर्वं त्वां दृष्ट्वा प्रहृष्टश्च भविष्यति ॥ ४४ ॥ अदभ्र
हर्षवर्षेन मद्भर्त्ता दभ्रभक्तकः ॥ इत्युक्तस्तां हरः प्राह गिरा संहर्षयन्निव ॥ ४५ ॥ भैरव उवाच ॥ प्रवेष्टुं न भवेद्युक्तं गृहिणारहि
तं गृहं ॥ इत्युक्त्वा स तदा धात्रीवृक्षमूलमुपागतः ॥ ४६ ॥ दभ्रभक्तोपि भवनं प्राप्य प्राह चगेहिनीं ॥ श्रमेण महतान्विष्टो
भोक्तुं भक्तान्महेशितुः ॥ ४७ ॥ किं करोमि न मो ह्येहं दुरदृष्टं ममेदृशं ॥ भर्त्तारं व्यथयादीनं एवं प्राहाथ गेहिनी ॥ ४८ ॥
॥ गृहिणी ॥ अदृष्टपूर्वो भक्तोत्र धात्रीमूलमुपागतः ॥ अयं याति गृही चेति याचितोभ्यर्णमागतः ॥ ४९ ॥ इतीरितो दभ्रभक्तः
कृतार्थोस्मीति हर्षितः ॥ भक्त उवाच ॥ त्वया हं गृहवानस्मि स कुत्रास्ते वदस्व मां ॥ सा तदा प्राह भर्त्तारं हृष्टं हृष्टतरा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२६ भक्तान् पूजयन् ॥ अदभ्रविनयोदग्रो दभ्रनाथार्चने रतः ॥ २१॥ इत्यसौ तेन नामासीद् दभ्रभक्त इति श्रुतः ॥ शिवभक्त्यां बोध
इव तस्य पत्न्यां महात्मनः ॥ २२॥ श्रीलाल इति नाम्नासीत्तनयो विनयान्वितः ॥ सुते मूर्त इवानंदे जाते तं बांधवान्मुदा ॥ २३॥
तैलैन्मूर्तमिव स्नेहैः विधुं भाभिः व्यधूनयत् ॥ विप्रेभ्यो दत्तवित्तेन दभ्रभक्तेन धीमता ॥ २४॥ जातस्यास्य कुमारस्य जा-
तकर्मादिकं कृतं ॥ निरवद्यैरवयवैः कांत्याक्रांतदिगंतरैः ॥ २५॥ आनंदेन समं पित्रोः ववृधे स कुमारकः ॥ आपादमौलिपर्य-
तं स्वस्ववर्णाल्पभूषितः ॥ २६॥ चचार चरणन्यस्तस्वस्तिकाब्जपदक्रमैः ॥ बाले काले वृत्तचौलः सवयोभिर्द्विजार्भकैः ॥ २७॥
-४ वेद्यामक्षरशिक्षायै तत्कृता यान्यथासिता ॥ स जन्मांतरसंस्काराद्यस्य कस्योपदेशतः ॥ २८॥ जग्राह वाङ्मयं सर्वं संस्मरन्निव वित्तं ॥
१०० शास्त्रशास्त्रेषु निष्णातो विशिष्टः स भवन्हितौ ॥ तं दृष्ट्वा हर्षतर्षेण जहृषे केवलं पिता ॥ तदा तद्भक्तिजिज्ञासुरीश्वरः स्तद्दृग्गतः ॥
॥ ३०॥ बभार भैरवं वेषं भीरूणां भयवर्धनं ॥ तदा तस्य जटाजूटो बभ्रुभिश्चालकाश्च यैः ॥ ३१॥ रेजुस्तन्यस्तपुष्पाणि तिमिरे
तारका इव ॥ तृतीयं नयनं तस्य फालपुंड्रांतरे स्थितं ॥ ३२॥ संध्यारुणे तदंगे तद्व्योम्नीव तिमिरं घनं ॥ कालकंठं व्यालमालं
दीप्तशूलवरायुधं ॥ ३३॥ संध्यारक्तारुणे नेत्रे विवृत्तापांगके तदा ॥ विवृत्तदंष्ट्राघोणं च ज्वलज्ज्वालायुताननं ॥ ३४॥ सितभस्मां-
२४ गरागं च सर्वांगधृतपुंड्रकं ॥ चतुर्भुजं भुजंगोरुकंकणं किंकिणीकटिं ॥ ३५॥ वराटिकालसन्माला मेदुरोदुदरावलिं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूपतिः॥ ।चतुरंगबलोपेतश्चतुरः समरेषु सः ॥७॥ दिक्भागांश्चतुरो जित्वा चोल भूपमपालयत् ॥ततः सवातापिपुरीं सुरदु
रासदां ॥८॥ निरुद्ध निजसैन्यस्तां दभ्रां जित्वा भटो भटैः ॥ सगृहीत्वाथ जीवंतं भूपतिं तं पुरेश्वरं ॥ तुरंगतुंगमातंग
शतांगादीन्यनेकशः ॥तस्य राज्ञः कोशगतं दासीदासधनादिकं ॥१०॥ सचोल भूमिपालाय समस्तानि समर्पयत् ॥
अभ्यनंदुच्च राजैनं जयिनं धनदायिनं ॥११॥ अनेन हि कृतं कर्म दुष्करं विक्रमादिति ॥ राजन्स्वसैन्यबाहुल्या
द्विजयन्नन्वसौ रिपून् ॥१२॥ महेश भक्तिमाहात्म्यादिति ज्ञात्वा तदाब्रुवन् ॥ माहात्म्यं त्रिणस्तस्य शिव भक्तिस
मुद्भवं ॥१३॥ श्रुत्वा चोलमहीपालो भूतिभावेन तं ब्रुवन् ॥ अजानं तव माहात्म्यं दारुणे रणकर्मणि ॥१४॥ न्ययोज
यं हस्त्वा स्तेन अपराधं क्षमस्व मे ॥ इति प्रणम्य भूपालो दत्वा ग्रामान् धनानि च ॥१५॥ सुखेन भुक्त्वा स्वग्राम
मुवासासाय मर्चयन् ॥ देवदेवमुमाकांतं कृतांतभयवर्जितः ॥१६॥ स्वसंपद्रक्षणार्थाय त्र्यक्षमीक्षन्स भक्ति
तः ॥अद्वित्युदीर्यतं राजा ग्रामं संस्थाप्य निजं ॥१७॥ प्रसाद्य पार्थिवं रम्यैर्वचोभिरनुगैः सह ॥स्वावासमरुणारण्यं स प्रा
प्यान्यवसन्सुखी ॥१८॥ छायेव तस्य भार्यासीन्मूर्तेर्बार्याचने रता ॥ शिव भक्तान्भोजयित्वा पश्चाद्भुंक्ते स्वतं द्रितः ॥
स कृत्वा सं विदं नित्यं अविवादमनास्तदा ॥ अन्नैर्व्यंजन संपन्नैः षड्साद्यैश्चतुर्विधैः ॥२०॥ मधुरैः प्रश्रितैर्वाक्यैः शिव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२५ क्षणः ॥ आगतायम भुङ्क्ष्वेति तद्भक्तिप्रीतिमाश्रयः ॥२९॥ ददृशे दयया युक्तः त्र्यंबको अंबिकावरे ॥ विलोकशाक्यो वृषवाह
नं तं प्रणम्य भक्त्या प्रवणो न नाम ॥३०॥ देवो दयासिंधुरथ्यानपायं विरायजैनं निजमास्यदं तत् ॥ भो रितं शिव भक्तिभावने
श्चरितं शाक्यपतेः शृणोति यः ॥३१॥ दुरितैरभितः समदृश्चरितं लोकमुपैति शाश्वतं ॥ षड्र्मिजेता विजिताखिलेंद्रियः-
प्रसाद्य भक्तप्रवरान्सुसंपदा ॥३३॥ वरेण्य सौम्येशक यक्षवैभवात्स सौमयाजी शिवलोकमभ्यगात् ॥ प्रख्यातमेत-
द्भुवि सोमयाजी मारस्य नान्यैर्महनीयकीर्त्तेः ॥ चरित्रमौदार्यगुणोपपन्नं शृणोति यः शैवपदं स याति ॥३३॥ इति श्रीशि
वरहस्ये सदाशिवाख्ये नवमांशे चतुःपंचाशोध्यायः ॥५४॥ श्रीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनमः ॥ श्रीस्कं
४०७ द उवाच ॥ अनंतकीर्त्तेः श्रीभक्तदभ्रस्य प्रोच्यते कथां ॥ चोलभूमौ भूरिभूम्नि कावेरीतीरगोचरे ॥१॥ अरुणारण्यनामा
स्ति तद्ग्रामे दुशिवामणेः ॥ तत्र केचिन्महाभक्ता अरुणारण्यधामनि ॥२॥ संति शंभुस्मृतिकृतः शिवदास्यैकसंपदः ॥
श्रीभस्मालंकृतीनां च प्राणिरक्षणकारिणीं ॥३॥ तेषां कुले कश्चिदासीत्परंज्योतिरिति श्रुतः ॥ आयुर्वेदायुधाद्यासु विद्या
सु सकलास्वपि ॥४॥ गजवाजिसमारोहेष्वपि कौशलमाप सः ॥ परमेश्वरपादाब्जं परं तत्वमिति स्मरन् ॥५॥ शिवभ-
२३ क्तिरसस्रोतो निम्नभूमिरभूच्च सः ॥ समर्थः सर्वकार्येषु मंत्रतंत्रादिषु स्वयं ॥६॥ महाप्रधानमेवैनमकरोच्चोल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नैतानि तत्व मित्येष शैवतत्वमगाहत ॥ कर्म कर्त्ता फलं दातेत्येषा नीतिश्चतुर्विधा ॥ १५ ॥ नान्यत्र शैवो सिद्धांते ह्युपास्योतः
शिवो महान् ॥ इति ज्ञात्वा स्थितः शैवे तत्वे शुद्ध मनाश्च सः ॥ १६ ॥ वेषेण येन केनापि स्थितो कस्यांच नानिशं ॥ स्मरारि स्मृ
तिरेवेदं परतत्व मितिस्मरन् ॥ १७ ॥ अमुंचत्तं निजं वेषं शिवांघ्र्यर्पितधीरभूत् ॥ अदृश्यताग्रे यज्ज्योतिरूपं ब्रह्मांबुजा-
क्षयोः ॥ १८ ॥ दैवतं मेतदेवेति शिवलिंगार्चको भवत् ॥ वीक्ष्यैवानुदिनं लिंगं मोक्ष्ये मिति निश्चितः ॥ १९ ॥ दर्शनं शिवलिं
गस्य कृत्वान्वहम भुंक्त सः ॥ अस्मनावृत मालोक्य शिवलिंगं सजातुचित् ॥ २० ॥ शिलां तस्मिन्न चिक्षेप भक्तिहर्ष प्रकर्षतः ॥
शिशोः प्रहारेण पिता यथा प्रीतिं प्रपद्यते ॥ २१ ॥ शिलाघातात्ततस्तस्य स्त शिवः प्रीतिमवाप सः ॥ अपरेद्युरपि प्राप्ते पाषाणक्षे
पणे क्षणे ॥ २२ ॥ पाषाणक्षेपणे वुद्धिं तदा (स्ता) मेशं भुनेत्यसौ ॥ इदमेव परं देव समर्चनमिति स्मरन् ॥ २३ ॥ पाषाणक्षेपणं च-
क्रे शिवलिंगे मुदान्वहं ॥ सर्ववेषाः शिवस्येति शाक्यवेषानया (धा) सदा ॥ २४ ॥ शिलाया (घा) तार्चनं शंभोः स चक्रे प्रतिवासरं ॥ हृद्यं
तं चयमीशस्य ग्राव्या (ण्णा) शाक्यकृता हितः ॥ २५ ॥ मूर्ध्नि नेत्रार्पको यातो पानपदार्पणं च तत् ॥ एतद्द्वयं जनो लोके नवेत्ति कुसमा
र्पणं ॥ २६ ॥ स विस्मृत्य शिलाक्षेपक दाचिद्भोक्तुमुद्ययौ ॥ स विस्मृतो हा शिलाक्षेप इति स्मृत्वा धृतोदनः ॥ २७ ॥ स भक्तिप्रेरि-
तो देवसमीपमगमद्द्रुतं ॥ आदाय कं चिद्दृश्यमानं भावयद्भक्तितः शिवं ॥ २८ ॥ साक्षाल्लुक्ष्यं समीक्ष्यैनं चिक्षेप स्तिमितः=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्गुनैः पणबंधनैः ॥ ४४ ॥ क्रीत्वान्नादि स्वयं शंभो भक्तैर्भुंजन्स्वयं स्थितः ॥ तोषयन् जातसंतोषः निनाय दिवसान्बहून् ॥ ४५ ॥ न...अ.५४
द्यूतवाद विदित्येष ख्यातो मूर्खक इत्यपि ॥ ततो द्यूतविदः सर्वे वंचयित्वाऽशृतं तदा ॥ ४६ ॥ तस्मिन्दिने जितं यच्च वसु तच्चाहर
न्बलात् ॥ ग्राम मालात्ल यं नीत्वा तं बध्वा चिक्षिपुर्गृहे ॥ ४७ ॥ स रात्रौ भक्तपूजादि निरासायासहृत्तदा ॥ निद्रावशं
न चैषोत्सः तद्गृहं शंकरः स्थितः ॥ भिक्षां देहीति होवाच तं भक्तं क्षुधितो भृशं ॥ तं तदा स्वागतेनाह न भिक्षास्ति ममांति
के ॥ ४९ ॥ किंचित्वदीयं रुधिरं पातु मिच्छामि दीयतां ॥ इत्युक्तः क्षुरिकाहस्तो कंठमुत्कर्त्तयन् स्थितः ॥ ५० ॥ तदा तद्धस्तमा
लंब्य संस्थितो वृषवाहनः ॥ धन्योऽसीति बभाणेशः सारूप्यमददात्प्रभुः ॥ ५१ ॥ तीर्थं सकृत्वा चिरमीश्वरात्तन्नेत्रां
११० बुजो भूत्स तदा हि दंडी ॥ भुक्त्वा च भोगान्भुवि पूर्णकामान्पदं प्रपेदे परमेश्वरस्य ॥ ५२ ॥ कमलालयधाम्नि दंडि
नाम्नः शिवभक्तस्य त्रिनेत्रदत्तमहिम्नः ॥ मनसा वच सैव कर्मणा वा चरितं वा पठते स धन्य एव ॥ ५३ ॥ स मूर्खभक्तो
द्यतद्यूतवृत्ते श्री कुंभघोणे कलिताद्यकोणे ॥ भिक्षाटणध्वस्तसमस्तपापः पदं प्रपेदे ससुरैर्दुरापं ॥ ५४ ॥ ॥
इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे त्रिपंचाशोऽध्यायः ॥ ५३ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशि
वाय नमः ॥ श्रीस्कंद उवाच ॥ नत्वा श्री मूर्खकद्यूतजाता र्थार्चितशंकरं ॥ श्रीसोमयाजिमारस्य कथयामि कथां शुभां ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 

१२५ आरामे रामकभ्रांते ग्रामे समावृते ॥ कश्चिदासीत्सोमयाजीमाराख्यो यज्वनः कुले ॥ २॥ स्त्री भृत्यां स्तोषयं नित्यं अन्नैः संप-
न्नषड्रसैः ॥ द्रव्यत्यागयुतैर्यातैरसैः शिवमतोषयत् ॥ ३॥ सश्रौतैः कर्मभिश्शंभुं स्तुल्यलोकाभिनंदितैः ॥ तोषयंनि
व भक्तो यंश्रेया नित्यभ्यनंदतः ॥ ४॥ यैः कैश्चिदपि वा वृत्तैः युक्तास्ते तु शिवार्चकाः ॥ तर्पैवास्मत्कुलाधीशाङ्गतितान भ्य
नंदत ॥ ५॥ सत्स्वप्यनेकमंत्रेषु मंत्रशुद्धिप्रदायिषु ॥ जपन्पंचाक्षरं मंत्रं एकः सगतिमान भूत् ॥ वल्मीकनाथ निलयं
कमलालयमागतः ॥ समुंदेशं न्यस्तात्मा सोमयाजी मुदं ययौ ॥ इंदुमौलिपदद्वंद्वं जगद्वंद्यः प्रणम्य सः ॥ प्रत्यहं प्री
णयं भक्तानुवासकमलालये ॥ ८॥ शिवभक्तार्चनासिद्धमनः शुद्धेर्महात्मनः ॥ सोमे सोमरसेनसोमशाकलालं
कारमौलिं हृदा ॥ ध्यायन्सुंदरनाथकोक्तविधिना जुह्वा द्विजोसौ हविः ॥ तद्भक्तिप्रथनाय कुत्सिततनुं कृत्वा भ्य
गाच्छंकरः ॥ दार्ढ्यार्थविप्रविनिंदितो पि बहुधामन्वं सुधान्वानम प्यासुत्कृष्टदयारसार्द्रसुदृशा दृष्ट्वाभ्यगाच्छं-
करं ॥ श्रीसोमयाजीमारस्य प्रणम्य पदयोर्युगं ॥ पत्युः पद समयीगोमुः भृत्यो र्यःशाक्यरूपभाक् ॥ तस्य श्रीशाक्य
नाथस्य चरितं प्रवदामि वः ॥ पुरे श्री संगमंगाख्ये कश्चित्ताद्ज वंशजः ॥ १४॥ दयालुः सर्वभूतेषु विफलार्थ विशेषवित् ॥ सविद्या
२२ रविधिर्नाम्ना बहुदेशान्परिभ्रमत् ॥ १३॥ प्राप्य कांचीपुरं शाख्यं धर्मं ज्ञातुमगाहत ॥ सशाक्यं तत्र मालोड्यसमया नितरानपि ॥ १५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२३ डिभक्तपदेतदा ॥ प्राहुस्तदाहृताः सर्वे नृपं तं दंडिभक्तकं ॥३०॥ जैना ऊचुः ॥ पाहि नो क्षिविहीनांश्च हीनांगान् विकलान्तया ॥ जैनान्स अ. ५३
रित्तटे स्तीरे निस्तारयदसौ नृपः ॥ ३१॥ अंधास्ते चाहृताः सर्वे हता स्वेनैव पाप्मना ॥ वेत्रप्रहारखिन्नाश्च दुद्रुवुः कमला
लयात् ॥ ३२॥ अंधत्वदृष्टा मार्गास्ते केचिद्गर्तेष्वपातयन् ॥ स्खलंतो गुल्मरुद्धाश्च भ्राम्यताश्च पदे पदे ॥ ३३॥ स्थाणुपाषा
णनिर्भिण्णमूर्धानोन्यपतन्क्षितौ ॥ अदृष्टदुष्टास्ते सर्वे तस्मात्स्थानाद्विनिर्ययुः ॥३४॥ आमूलादुधृतैः सर्वैर्जिनालयशिला
भरैः ॥ कारयामास नृपतिः तदा कृतटबंधनं ॥३५॥ ललाटनेत्रकरुणालब्धनेत्रस्य दंडिनः ॥ पादौ प्रहर्षयुक्तोथ प्रणना-
म स भूपतिः ॥३६॥ मूर्खकाख्यस्य भक्तस्य चरित्रं कथये शुभं ॥ तुंडीरमंडले रम्ये ख्याते महीमंडलमंडने ॥३७॥ शाक्यारण्य
१९१ पुरं नाम धामास्ते कुसुमापतेः ॥ तस्मिन्क्षीरसरित्तीरे संति भक्ता महेशितुः ॥३८॥ भस्मरुद्राक्षसंपन्नाः चातुर्वर्ण्येषु
संघशः ॥ तेषां कुलोद्भवः कश्चिद्भक्तार्चक इति श्रुतः ॥ स भस्मफालो नियतं भवभक्तार्चने रतः ॥ अन्नैः षड्रससंपन्नैः
व्यंजनैश्चित्ररंजनैः ॥ ४०॥ भक्तानतोषयन्नित्यं विशेषेणांबिकापतेः ॥ यद्यत्तेषां वस्तु हृद्यं तत्सर्वमददात्सदा ॥४१॥ कालं
स निन्ये नियतमेवं भक्तजनार्चनैः ॥ क्षेत्राराम गृहादीनि क्रमाद्विक्रीय तैर्धनैः ॥ ४२॥ स बाल्याभ्यासविद्यातो द्यूतेन धनमा-
२१ र्जयन् ॥ तदा निर्गत्य दौर्गत्यात्कुंभघोणमुपागमत् ॥ ४३॥ तस्मिन्स्थाने स्थितो नित्यं द्यूतचैत्यमुपेत्य सः ॥ ये द्यूतवैदिनो जित्वा=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रातः सच्चो दुद्दो नेत्राभ्यां लोकयं दिशं ॥ प्रत्यायर्यौ सरस्तीरं तं दृष्ट्वा विस्मयुर्जनाः ॥१८॥ जना ऊचुः ॥ अहो कृतेदमा
श्चर्यं अंधो वीक्षासमन्वितः ॥ जनाश्च तदधिक्षेपकारिणो नीक्षयोज्झिताः ॥१९॥ राजा चौरेजनेतं कृत्वा विरुजस्कस्य चे
ष्टितं ॥ दंडिभक्तेन तत्कर्म सहसारुरुधुर्हताः ॥२०॥ राज्ञे विज्ञापयामास स्वस्याज्ञां प्राह दायिनीम् ॥ ईश्वर उवाच ॥
दुःखितो यं दंडिभक्तो तद्दुःखं खंडयाधुना ॥ आखंडलाधिकां भुक्ष्व श्रियमुर्वीपते धुना ॥२१॥ इति स्वप्ने शिवेनो
क्तो राजा विस्मयमागतः ॥ प्रबुद्धः पार्थिवः प्राह सरः प्राप्याथ दंडिने ॥२२॥ राजोवाच ॥ किं वा ते चरितं दंडिन्नं
डनं त्वं भुवो ह्यसि ॥ विस्मापकं चरित्रं ते नेत्रदानं शिवेन हि ॥२३॥ इत्युक्तो सौ नृपेणाह स्ववृत्तं तदद्भुते ॥
॥ दंडी उवाच ॥ राजन्जैनाशठारुध्वा तटाकखननं मम ॥ करात्खनित्रमाच्छिद्य च्छित्वा मृद्वाहरज्जुकां ॥२४॥ ममा
ध्यस्य न धीरस्तीत्यक्षिपन्परुषाक्षरं ॥ शिवाज्ञालब्धदृश्या च्चेत् किं कुर्युर्वै ति चाब्रुवन् ॥२५॥ ते चाब्रुवंस्त्वमी
शानकृपालब्धेक्षणोसि चेत् ॥ स्थानादस्माद्भिरेतस्माद्प्रस्थानं क्रियते धुना ॥२६॥ उक्तं मया यथावृत्तं मम स्यादीप्सितं नृप ॥ राज
न्कुरु तथेत्युक्तो नृपेणातिष्ठदंतिके ॥२७॥ अथाहूयाहताना राजा पुज्जाभिर्यत्पुरोदितं ॥ क्रियते तत्क्षि मिसेत्तत्पेति प्राहु
जाऽपतन्भू
रुत्तरं ॥२८॥ त्रिनेत्रकृपयामेचसिंधुरन्नम काश्यते ॥ तथेति तेदंडिभक्तं नृपं प्राहुश्च ते हताः ॥२९॥ हते क्षणाः पतद्भूमौ दं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२२ भस्मरुद्राक्षभूषणः॥ अन्यहस्तावलंबोथ चक्रे शंभोः प्रदक्षिणां ॥४॥ प्रणामान्यथ चाकार्षीद्दिमर्षी दिवि वर्जितः॥ सकदाचि अ० ५२
दृढभक्तो ज्ञानदृक् शिवनामतः॥५॥ देवस्य पश्चिमे भागे धाम्नः प्राप्यजलाशयं ॥ सविशालावकाशं तत्कर्तुं च खननोद्यतः॥६॥
वननाख्यानसे बिल्ववेणुपात्रैः समृत्खनैः॥ निबद्धरज्जुमाम्रलाभिः दंडः कृत्वागतागतं ॥७॥ मृदं खनित्वा तद्द्वारैः वहन्सेतुमचीकरत्॥ श्रांतः खनं नपीशानं ध्यात्वा पंचाक्षरीं जपन् ॥८॥ भक्त्या प्रतिदिनं दंडी विशालमखनत्सरः॥ विरामोत्सेधजनना
त्वननात्प्राणिहिंसनात् ॥९॥ इतीरितः सतानाह हे जना मूढबुद्धयः॥ शिवधर्मैव धर्माणां सारं न ज्ञायते जनैः॥१०॥ इती
रितास्ते तं प्राहुः न शृणोप्यस्मदीरितं ॥ दृष्टीन केवलं नष्टे किं वा ते श्रवणे अपि ॥११॥ इतीरितः सतानाह पश्यंतोप्यदृशो
हिते ॥ ये ज्ञानवधिरास्ते च न शृण्वंति स्वकं हितं ॥१२॥ न किंचिदुवि संवीक्ष्ये त्र्यक्षपादांबुजं विना ॥ सर्वतश्चक्षुषं
वीक्ष्ये वीक्षया किं फलं मम ॥१३॥ इत्युक्तास्ते जनाः प्राहुः किमंधेनेति तेतदा ॥ त्वमस्मदीक्षया पश्य इति तत्करतो ज-
नाः॥ खनित्रमुक्षिप्य तां च रज्जुं चिच्छिपुरायतीं ॥ दंडी स दुःखितः शंभुं रक्षेत्युच्चैर्जगाद सः॥ अविश्रांतं मृत्खननाद्वि
श्रांतः श्रांतिमागतः॥ निशि सुष्वाप भूमौ स स्मरन्स्मरहरं तदा ॥१६॥ देवो दया निधिः स्वप्ने प्राह तं भक्तवत्सलः॥ ॥
॥ ईश्वर उवाच ॥ दुःखं त्यज सुखा लोके विलोके ते भविष्यत ॥ जनाश्चांधा भविष्यंति त्वद्धिक्षेपकारिणः ॥१७॥ तथा

प्रपयितुं प्रोक्तं मूलागम स्वकं ॥ तिरश्चकारमत्कायं प्रायेण परमेश्वरं ॥ २८॥ एवं विचिंत्य स्वान्बंधूननुनीय स्वमास्पदं ॥ यापइत्वा
चबुंधेशं सो गाढो वटतीर्थकं ॥ २९॥ परं तत्वं शिवं नत्वा मूलदेवः शिवालये ॥ पश्चाद्भागे श्वत्थ मूलमध्यास्स्वस्थमानसः ॥
॥३०॥ शिवयोगासनारूढः शिववेदांत संहितं ॥ हृदयांबुरुहस्थं तं महांतं मनसा स्मरन् ॥ ३१॥ मांसदेहाभिसंबंध विषं विद्रा
व्यदारुणं ॥ संसार साग रांतस्थ जनोत्तरण कारणं ॥ ३२॥ अपश्यं नर्यमूद्रे यं संज्ञानादि चतुष्टयं ॥ प्रतिवत्सरमेकैकवृत्ते
नानु भवात्मना ॥ ३३॥ श्रीमंत्र मालिकां कृत्वा वरदां भव देवतां ॥ वराहदंष्ट्रालंकारमेकमेवेत्य पक्षमात् ॥ ३४॥ त्रिस
हस्रं च वृत्तानां गीत्वा त्रिभुवनं स्थितः ॥ त्रिसहस्रं च वर्षाणां अनैषीद्गुवितत्ववित् ॥ ३५॥ स मूलदेवो वपुषा मुनैर्वंदेवा
धिदेवस्य दया विशेषैः ॥ विराज मानो स्तता द्विराजे पदं प्रपेदे तदवियोगं ॥ ३६॥ जगत्पवित्रं जगदेक चित्रं यन्मूलदेवस्य च-
रित्र मेतत् ॥ पठंति शृण्वंति च भक्तियुक्ता प्रयांति शैवं परमं पदं ते ॥ ३७॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे द्विपंचा
शोध्यायः ॥५२॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री सदाशिवायनमः ॥ श्री स्कंद उवाच ॥ उद्दंड दंड भक्तस्य चरितं कथयामिते ॥
दंड भक्त इति ख्यातः कोप्यासीत्कमलालये ॥ १॥ सोऽंधोपि शिव भक्तानां दास्यान्मेने दृशोः फलं ॥ कमलालयदेवेशं नत्वा स्तुत्वा
च नित्यसः ॥ शिव भक्तिं स्थिरां चक्रे मनुं पंचाक्षरं जपन् ॥ कर्मणा मनसा वाचा शिव धर्म परायणः ॥ ३॥ शिव भक्तार्चकोनित्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्यन् गो

121 क्न्सह्यजातटे ॥ अपशानोकुलं दीनं परिभ्राम्यन्नितस्ततः ॥१३॥ गोकुलव्याकुलत्वस्य हेतुदर्शनलालसः ॥ कावेरकन्यातीरे
च चचार स मुनीश्वरः ॥ शास्त्रग्रामजगोकुलं परासु मूलसंज्ञकं ॥ ध्यात्वा धात्वा तदंगं च क्रोशद्भिर्गोकुलैर्वृतं ॥१५॥ दयालुः
समुनिर्दृष्ट्वा गोकुलं च तदाकुलं ॥ उज्जीव्य गोपालमिमं विनेष्ये गोकुलव्यथां ॥१६॥ इति निश्चित्य सहसान्यस्य कापि निजां
तनुं ॥ प्राणैः स्वैः गोपदेहान्तः प्राविशत् पवनाध्वना ॥१७॥ मूलदेवः समुत्तस्थौ तत्प्राणावेशनक्षणे ॥ गावस्ता स्तमुत्थितं दृष्ट्वाः घ्रा
त्वा लिलिहिरे च ताः ॥१८॥ ततस्तन्मूलदेवस्तद्गोकुलं तृणशालिषु ॥ स्थानेषु चारयन्पीतं कुक्षी पीतोदकं व्यधात् ॥१९॥ दिवां
123 ते गोकुले तस्मिन्प्रविष्टे स्वान्गृहान्सतु ॥ मूलदेवो निजावासमपश्यंस्ति मितास्थितः ॥२०॥ मूलदेवस्य गृहिणी मद्भर्ताकिं-
विलंबितं ॥ इति व्याकुलचित्ता सा तत्रागाद्यत्र संस्थितः ॥ विलंवितेन नमितासंदेहस्पर्शनोत्सुकां ॥ माप्राक्षीस्तेन संबंधो मया
स्तीत्यभिधाय सः ॥२२॥ नवं मठं विवेशान्यं सा च शोकभयाकुला ॥ वृत्तांतं तादृशं भर्तुः ग्रामणीभ्यो न्यवेदयत् ॥२३॥ ग्रामिणस्ते
च बहुधा भेदने पि स्थिराशयं ॥ विषमेभ्यो विरक्तं तं स्पृष्टं दृष्ट्वा वचो ब्रुवन् ॥२४॥ उन्मादभूतावेशादिरेतस्मिन्नास्ति विक्र-
या ॥ भावना भूयसी प्रायः शिवयोगस्य निर्मला ॥२५॥ इत्युक्त्वा ते ग्रामजना मूलदेवस्य गेहिनीं ॥ शोकाक्रांतां समाश्वास्य बांध
वेषु न्यवेशयत् ॥२६॥ मूलदेवो पि स प्रातः तदनु व्रज्य गोकुलं ॥ न्यस्तं देहं निजं तत्र नापश्यं च व्यचिंतयत् ॥२७॥ भाषयामे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति विख्यातो महादेवस्य वासभूः ॥ तस्मिन्संति महात्मानः शिवसामीप्यवर्त्तिनः ॥ २ ॥ भस्मरुद्राक्षसंपन्नाः शिवलिंगार्चनोद्यताः ॥
तस्मिन्कैलासशैलेश शिकरधवले लिंगसंघैव मौलौ यानोद्यन्मणिगोपुरोत्तमलसत्कुंभप्रभाभिस्तते ॥ नानासालरसा
लताललितकुचः श्रीवृक्षसंघावृते श्रीखंडद्रुमदेवदारुतगरामोदैकदिङ्मंडले ॥ ३ ॥ मंदारसुंदरवनप्रभवाभिरामसोमप्रभो-
त्तमसुमप्रबलोरुगंधे ॥ बद्धद्विरेफपदचंक्रमणप्रकांते ॥ ४ ॥ सरस्तीरप्रांतद्रुमगलितपुष्पव्रजरजो मरंदासारोक्षे भुविक
रटिक सुस्नाविसलिले ॥ समीरणरणद्रव प्रबलवेणुझंकारकृत्सु पक्षिविरुतावृत्ते परमकोकिलालापिते ॥ ५ ॥ मातंगवृंदस्च
मरः स्मरराभिराम खड्गोद्यतोरुसुविषाणविघट्टभूमौ ॥ वेतंडबृंहितरवोद्यतपक्षकांडप्रोद्यच्छिखंडिनटने मुदिरभ्रमेण ॥
॥ ६ ॥ गणगणवरघोणपूर्यमाणे श्वरनिःसाणरवेण पूर्णकाये ॥ हयवैरिगणरारणं नगेंद्रे सुरसंघृष्टमहीतलोत्थरेणो ॥ ७ ॥
तस्मिन्नाणवरश्रेष्ठो मूलदेव इति श्रुतः ॥ सतु शार्वोत्तयाशंभोः स्थानान्यन्वीक्षितुंक्रमात् ॥ ८ ॥ उरगेंद्र महाहारं दृष्ट्वा स-
निरगाद्गिरेः ॥ सतु संतीर्य गंगासुगंगादिनदीषु च ॥ ९ ॥ श्रीशैलकालहस्तिन्या ग्रोधारण्यनाम सु ॥ स्थानेषु गत्वा देवेशं
मासः काचीपुरीं मुनिः ॥ १० ॥ एकाम्रनाथमानम्य तत्रोषित्वा चिरं मुनिः ॥ नत्वालिकापुरेशं च पुंडरीकपुरं ययौ ॥ ११ ॥
नत्वा नटेशं दृष्ट्वांगो दृष्ट्वा स्यानंदतांडवं ॥ ततो निर्गत्य धामानि मान्यान्यन्यानि चानमत् ॥ १२ ॥ नत्वा गोवद्रुतीर्थेशं संग=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१२० सापतिं सद्यः कृता ग्रहमल्लं कृतं ॥ आगतं सौम्यमानर्च्य निर्व्यथै वोपचारतः ॥२२॥ कलिकामोदररुजं शमनायाहमागतः ॥ इति
वादिनमाहुस्तं तस्याः पार्श्वगताजनाः ॥२३॥ शांताचदैवतश्चार्त्तिस्त्वदागमनवै भवात् ॥ स्तौल्यस्थित्वाद्यशेते हि सुखेनांतर्गृ
हांतरे ॥२४॥ इत्युक्तः सपुनः प्राह द्रष्टुमिच्छामितं त्विति ॥ अदर्शयंश्च ते तस्मै मृतंतं निर्गतांतकं ॥२५॥ तं दृष्ट्वाहं तहं तेति
स्सौम्यो व्यथितमानसः ॥ प्राणान्स्वयं परित्यक्तुं गृहीतदसिधेनुकं ॥२६॥ दयया देवदेवस्य कलिकामस्समुत्थितः ॥ हा हतोस्मी
त्यति स्नेहाद गृहीतत्करायुधं ॥२७॥ अन्योन्यमतिमान्यौ तौ नेमतुः स्निग्धमानसौ ॥ तत्कर्म विस्मिता देवा ववृषुः पुष्पमेत
११४ योः ॥ तौ स्निग्धसुहृदौ भूत्वा कंजपुरशंकरं ॥ प्रणेमतुः सतं सौम्यः श्रीगानैः शंकरं जगौ ॥२८॥ कालिकामयुतः सौम्यः समे
त्य कमलालयं ॥ देवं पुष्पालयावासं नत्वा तत्रावसच्चिरं ॥३०॥ तत्रोषित्वा चिरं कालं सुंदरेशेन मानितः ॥ कलिकामो निजं धा-
मजगाम तदनुज्ञया ॥३१॥ दास्ये नचिरमीशानं संतोष्याव्यभिचारिणा ॥ सुरथाकलिकामोऽसौ शैवं धाम जगाम तत् ॥३२॥
प्रथितस्य पवित्रकीर्त्तनेः कलिकामस्य चरित्रमुत्तमं ॥ पठति स्थिरधीः शृणोति यः ॥ परमाप्नोति पदं महेशितुः ॥३३ ॥ ॥
इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे एकपंचाशोध्यायः ॥ ५१ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवा
१८ यनमः ॥ श्रीस्कंद उवाच ॥ श्रीमूलदेवनाथस्य भक्तस्य प्रथितां कथां ॥ अस्ति सर्वेश्वरैश्वर्यरक्षकाध्यक्षतां गतः ॥१॥ कैलासः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्नाप्योयाता यातं बतव्य थां ॥ ८ ॥ स्तुत्यः सुरैः शिवो दृष्टो भृत्य प्रीत्यर्थ मेत्य सौ ॥ आदी र्घ दर्शितो मूर्खो हा महेशं

समादिशत् ॥ ९ ॥ तं द्रक्ष्यामि कदा निंद्यं किं वा दृष्टेन तेन मे ॥ इत्युक्त्वा कलिकामो भूत् सरोष कलुषाशयः ॥ १० ॥

कलिकामो दितं क्रौर्यं सौम्यः श्रुत्वा पशूलिने ॥ व्यपोह्यो मे पराधोंय मिति प्रह्वो व्यजिज्ञपत् ॥ ११ ॥ शिवो घट

यितुं भावं सौम्येश कलिकामयोः ॥ कलिकामे क्षिपच्छूलं स चाभूते न पीडितः ॥ १२ ॥ कलिकामः शूलपाणिं अस्तो

षीच्छूल पीडितः ॥ तं भक्तं तस्तु ति प्रीतः स्व प्ने प्राह च शंकरः ॥ १३ ॥ वर्यं मद्भक्त वर्याणां त्वै तां शूल वेदनां ॥ सौम्यं

विनाशमयितुं नापरः प्रभा क्षुयादिति ॥ १४ ॥ अथाह कलिकामस्तं सप्त जन्माद्यनुक्रमात् ॥ वयं त्व किंकरा नाथ त्व

दृते सोऽस्म दर्त्तिहा ॥ १५ ॥ सौम्याच्छूलशम नाद्दूरं तद्दैह नाम म ॥ तस्य त्व प्रिय भृत्य स्य त्व याश्चा पूर्यतामिति ॥ १६ ॥

तदा शिवस्तिरो भूतः सौम्य मेत्याब्रवी द्वचः ॥ कलिकामस्य शूलार्त्तिं शमय त्व चिरा दिति ॥ १७ ॥ शूलं शमयितुं सौम्य आयातीति

निशम्य सः ॥ कलिकामो भृशं शूल व्य सना दपि विव्य थे ॥ स तच्छूलं शमयितुं निवासान्निर्ययौ निजात् ॥ स च सौम्या

गतिं श्रुत्वा कलिकामो व्य चिंतयत् ॥ १९ ॥ सयावद् निरी क्ष्यो मे शूलं शमयति स्वयं ॥ दारयाम्युदरं तावदिति कुक्षिं व्य-

दारयत् ॥ २० ॥ गतशो कलिकामस्य भार्यानु मरणोद्यता ॥ निशम्य सौम्यागमनं क्षणं तस्या करोदना ॥ २१ ॥ प्रक्षाद्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११९ सोऽज ध्याननिर्धूतपाशः ॥ अभजतयजमानोयज्ञदानैरलभ्यां मुदमपदमघानां ईश भूयाद्व्ययं सः ॥ ७९ ॥ यल्लेशस्य अ॰ ५०
विभूतयः त्रिजगतीनिर्माणेलाक्षालयः व्यापारः क्रियते तदिंद्र पदवीसंप्रापणेनैपुणं ॥ ८० ॥ यल्लीलायितमुन्नता
मृतपदावाप्तिस्तिरश्चामपि स्तोतुं कः करुणामिमां प्रभवतिश्रीचंद्रचूडामणेः ॥ नमितिनंतिकथामिमां पठेदपिवा-
यः श्रुणुयात्समानवः ॥ भुवि भोगमवाप्य निस्तुलं नियतं धामतदेतिशांभवं ॥ ८१ ॥ इतिश्री शिवरहस्ये सदा शिवा
ख्ये नवमांशे पंचाशोध्यायः ॥ ५० ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्री सदा शिवायनमः ॥ श्रीस्कंद उवाच ॥ ॥
११८ ज्ञानसंबंधनाथस्य चरणंशरणं सतां ॥ कलिकालजितोवक्ष्ये कलिकामस्यवैभवं ॥ १ ॥ प्रकाशो चोलदेशोऽस्ति
कावेरीतीरगोचरं ॥ चिरंसुरुचिरप्रख्यंश्री महामंगलाव्हयं ॥ २ ॥ आयतावीथयोयस्य सौधाउत्सेधशालिनः ॥
गिरि प्रकार प्राकारा आरामानंदनोपमाः ॥ ३ ॥ कलिकामाव्हयस्तस्मिंद्वगोपकुलोद्भवः ॥ प्रभवद्विभवोदार-
तत्पुरेभूदसत्तमः ॥ ४ ॥ सेनापतिश्चोलपते रुमापतिलसन्मतिः ॥ वाङ्मनःकर्मभिः सर्वैः शर्व भक्तैकपूजकः ॥ ५ ॥ श्रीकं
ज पुरेश श्रीकर्ममेव विधाय सः ॥ शिवभक्तांघ्रियुगलं अमंस्त निधिमात्मनः ॥ ६ ॥ सौम्येशेन महेशो भूप्रेषितोयोषि
तं प्रति ॥ इति श्रुत्वाप्रचुक्रोध कलिकामः समाकुलः ॥ ७ ॥ दूत्ये नियुज्य केनापि मानिनीं प्रतिकामिनी ॥ वीथ्यांनिशीथे

२)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सीद परमेश्वर ॥ २५॥ प्रसीद सच्चिदानंद प्रसीद करुणानिधे ॥ नमस्ते सर्वजगतां नाथ कारणशंकर ॥ २६॥ पालकाय
नमस्तुभ्यं हसंत्रे च नमो नमः ॥ सत्वं रजस्तमश्चेति त्रिभिर्मायागुणैर्वृतः ॥ २७॥ त्रिधास्थितं त्वमखिलं सृजस्य
वसि हिंसि च ॥ कार्याद्यैर्नवभिर्लिंगैस्तथैवाष्टतनुं विभुं ॥ २८॥ सर्वज्ञं सर्वकर्त्तारं आहुस्त्वां मानवे दिनः ॥ जीवादि
भिन्नमेकेत्वां जीवं केचित्प्रचक्षते ॥ २९॥ भिन्नाभिन्न परे केपि भेदविवर्जितं ॥ चिन्मयाख्यापिनं नित्यशांतमेकं सदा
शिवं ॥ ३०॥ सर्वानुग्रहकं शंभुं त्वां वदंति त्वदागमाः ॥ निगमाश्च वदंति त्वां महेशं पुरुषोत्तमं ॥ ३१॥ सर्वज्ञं सुगताः
सिद्धाः परमेष्ठिं नमर्हताः ॥ हाहं तकारवो प्याह विश्वकर्मेति शंकरं ॥ ३२॥ बांलोकषापि काश्यापिलोक सिद्धेश्वरं विदुः ॥
त्वत्कृपामृत निष्यंदिनयनांत विलोकितैः ॥ ३३॥ भूयते मुक्तितरुणी पाणिगृहवरैर्नरैः ॥ दृष्टुमिष्टेशिरोथस्यनवे
धाश्चरणं हरिः ॥ ३४॥ तस्य ते महिमानं कः क्षमो वर्णइतुं विभो ॥ अस्तातिशय साम्यस्त्वं विश्वाधिक इति श्रुतौ ॥ गीयसे
त्वां विदित्वैव मुक्तिर्नान्येन हेतुना ॥ अपराधसहस्राणि भाजनं मामनुक्षणं ॥ ३६॥ कृपया केवलं नाथ कृतार्थमकृधा
स्वयं ॥ इति स्तुत्वा जगन्नाथं नमनंतीव चक्रमैः ॥ ३७॥ तदा प्रभृति तत्रैव चकार वसतीं पुरे ॥ ततः कदाचिद्वागीशः कम-
लालयमागतः ॥ ३८॥ तस्य नाम्नां कितैः सूक्तै रस्तावीज्जगतां पतिं ॥ तदनु तदनुभावं भावयन्भाविता सौ भवचरण-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 

११८ जनंदेतेनतत्रैषसोपालंभमिदंवचः ॥१३॥ विप्र मूढप्रदीपैः किंतद्देवस्य यतो ह्ययहं ॥ सोमसूर्याग्निनयनस्वयंचैतत्तथा
त्मकः ॥ तन्मूर्तेर्वन्हिजलयोर्नास्तीत्येत्यतिको तदा ॥ अतोजलैर्भवां दीपंप्रभूतं परिणामय ॥१४॥ इतिश्रुत्वावच
स्तस्य द्विजोव्यथितमानसः ॥ वल्मीकपतिमभ्येत्यववंदे शिरसा विभुं ॥१५॥ तत्रवाचाशरीरिण्या कुरुदीपान्जलै-
रिति ॥ उक्तः प्रमुदितश्चक्रे तयैवेतान्सहस्रशः ॥१६॥ तेन विस्मायिताशेषजनता विहितस्तवः ॥ पुनःपुनरुपाग-
म्य पूजया मासशंकरं ॥१७॥ सतत्रोत्तरफल्गुन्यां जातु याशेत्सवो द्विजः ॥ मणिलस्यलमां यातंत्यागाधीश्वरमी-
श्वरं ॥१८॥ कमलालयवास्तव्यं समस्तजनसुस्थिरं ॥ अनुव्रज्य पुनः सायं प्रियया निजमंदिरं ॥१९॥ शयानः सव
१३८ हिर्विधांपूजा भोजनकर्मणे ॥ बोधयंतीं निजांपत्नीं प्रबुधो गिरमभ्यधात् ॥२०॥ अदृश्यैर्बहुभिः स्पृष्टस्त्रय
वोत्सवेविभोः ॥ स्नास्याम्याहारवानीतितां प्रेष्य स्व पुनःपुनः ॥ कमलालयजान्सर्वान्जानीहि सर्वशंकरान् ॥
॥२१॥ इतिवाचं विभोश्रुत्वाबुबुधे धृतविस्मयः ॥ तंपत्न्यै स्वप्रवृत्तांतं निवेद्य समगाद्द्विजः ॥२२॥ कमलालयमभ्ये
त्यददर्शनिखिलाञ्जनान् परश्वधमृगाभीतिवरहस्तान् त्रिलोचनान् ॥२३॥ चंद्रखण्डधरानुद्यत्तपनायुततेजसः ॥
१६ स विस्मयस्तान्निखिलान्नभिवंद्यततोहरं ॥२४॥ प्रणिप्रत्यांजलिधरः प्राह भक्त्यानुकंपिनं ॥ प्रसीदपार्वतीनाथप्र=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येनील लग्नस्य चरित्रमेतच्छृण्वंतिवा सर्वजगत्पवित्रं ॥ तेमुक्तिलक्ष्मीमनुभूय भूमौ महेश्वरस्यांघ्रियुगं प्रयांति ॥ ८७ ॥ ॥

इतिश्रीशिवरहस्ये सदाशिवाख्येनवमांशे एकोनपंचाशोध्यायः ॥ ४९ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशि-

वायनमः ॥ श्रीस्कंद उवाच ॥ प्रणम्य नीललग्नस्य शिवसायुज्यमेयुषः ॥ बहुधा चरणौ पीड्यन्नमिनं तिकथांशुभां

॥ १ ॥ यदाज्ञां सर्वभूपालवहतो निजमूर्ध्निभिः ॥ नीराजयंति कोटीररत्नदीपैः पदांबुजं ॥ २ ॥ नटन्मृडपदांगुष्ठन

खाग्रकृतरं ध्रतः ॥ यत्प्रातपानस्वाला॰ जालरुत्सर्पिभिर्मुहुः ॥ ३ ॥ ब्रह्मांडमुखनिक्षिप्तनवपल्लवसंहतेः ॥ सु

वर्णपूर्णकुंभस्य विभ्रमं वहतिस्फुटं ॥ मनुमांधातृनहुषनलसममुखान्नृपान् ॥ अन्येशेरयते चित्रैर्धरितैर्वि

क्रमोर्जितैः ॥ तादृशैः सूर्यवंशानाकूटस्यै र्बाहुजोत्तमैः ॥ रक्षिते चोलभूपालकवेरतनयातटे ॥ ६ ॥ हेमलाभपुरेक

श्चिन्नमिन्नद्याख्यया श्रुतः ॥ यस्त्रेता म्नोरवौ लिंगे चितेचानर्घ्यशंकरं ॥ ७ ॥ शिवैकतानास्ततंशिवभक्ताभि

पूजकः ॥ जितारिवर्गसुमनायश्चचार त्रयीपथी ॥ ८ ॥ सतत्र निवसन्विप्रं साक्षादग्निरिवापरः ॥ सर्ववेदार्थविज्ञान

तदनुष्ठाननिर्मलः ॥ ९ ॥ शिवमेवपरं देवं प्रापयः शरणं विभुं ॥ त्रिविधैः करणैरेनमाराधगतस्पृहः ॥ १० ॥ कमला

लयमभ्येत्य कदाचिज्जगदीश्वरं ॥ प्रणम्य निशिदेवस्य दीपारोपणमुद्दिशन् ॥ ११ ॥ घृतंयाचितुमेकस्य जिनस्य सदनं गतः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 सदा० नं० ८ अ० ८

११८ विजानीषेत त्वं मद्भक्तिसंश्रयं ॥ दर्या(ध्या)नम पिनात्सल्यमधिकं स्वस्तनं धयात् ॥ ३४ ॥ यत्ल्लिलेहम मांगं सातत्वस्यकनकोज्व-
लं ॥ तव निर्भित्सिनात् भीता यं नलीदवती सती ॥ तदेतद्गुणसंक्लृप्तमत्युज्जृंभिमहाव्यथं ॥ इति स्वप्नात्प्रबुध्यैष भयवि-
व्हलमानसः ॥ भयहर्त्तेश्वरं नत्वा पत्नीं तामप्यसांत्वयत् ॥ विज्ञानामोदसंबद्धमागतं स्वंनिकेतनं ॥ ३५ ॥ प्रत्युद्गम्य
सपर्याभिरार्याभिरार्यतं पर्यतोषयत् ॥ सभार्यं नीलकंठाख्यं गायंतं च समागतं ॥ ३६ ॥ संपूज्य वासयामास नितरां सुखि
तं निशि ॥ प्रातर्विज्ञानसंबंधो भयपंक्तीश्वरस्तवं ॥ ३७ ॥ विदधे नीलकंठस्य शंभोनीमपदांकितं ॥ ज्ञानसंबंध० ॥ ज्यासू
११९ त्रीकृतभोगकर्षणभरस्कायत्फणिग्रामणीनिश्वासानिलमुक्तदूरगरलज्वालावलीलीलया ॥ निर्दग्धत्रितयेपुरां परिपत
त् भूरिजटावासनाव्यापारैकफलो बभूव तरलो यद्बाणजन्मानलः ॥ ३८ ॥ मौलीभूषणकुंडली धनुरहो धाम स्वकीयं श-
रोलक्ष्मीशो गरुडासनोंऽबुजभवो यंता सरोजप्रियः ॥ चक्रे चेनेंदुंचक्रे नयनवरपरः श्वासजाला तुरंगाः शेषान्य-
ष्टतनूभवानि शिवतेत्वद्धामधेयं जगत् ॥ ३९ ॥ स्तुत्वा विज्ञानसंबंधे प्रयाते निजवेश्मनि ॥ उवास सुचिरं ध्या
यन्नुमालंकृतविग्रहं ॥ ४० ॥ ततो विज्ञानसंबधविवाहोत्सवदर्शिभिः ॥ सह सर्वैश्च सायुज्यमगमत्सह सा द्विजः ॥ ४१ ॥
१५ संप्राप्य सायुज्यमशेषकर्त्तुर्विधूय दूरे खिल पंचपाशान् ॥ आनंदसाम्राज्यपदाधिरूढः संप्राप्य साम्यं परमं शिवेन ॥ ४२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समुन्नतनसंभास्वत्यन्नगाधिपकुंडलं ॥ मंदस्मितरुचिज्योत्स्नास्नपिताधरपल्लवं ॥१८॥ गौरीवदनलावण्यादर्श
गंडतलद्वयं ॥ लाक्षामुद्रितसर्वस्त्रद्रविणं गृधिविभ्रमं ॥ बिभ्रतं भूतकाकोलकालिमानमहागलं ॥ सुमेरूपीवरस्कंध
बंधुबंधुरकंधरं ॥२०॥ भुजंगेंद्रबृहद्भोगपरिणाहमहाभुजं ॥ अशेषभुवनत्राणप्रतिभाव्यकरैः करैः ॥२१॥ परश्वधमृ-
गाभीतिवरोद्भासिभिरंचितं ॥ गौरीघनकुचाभोगदृढविस्तारवक्षसं ॥२२॥ नाभिक्षीरार्णवावर्त्तसन्नभंप्रतिबिभ्रतं ॥
मत्तैरावृतहस्तोरुसुवृत्तयुगभासुरं ॥२३॥ सारंगधरभूतेज्यनिषादितसजंघिकं ॥ अशेषलोकतमसामवसानं पदे
पदे ॥ सुरकोटीररत्नांशुपुंजकिंजल्कचारुणी ॥ सुमनःसुमनोध्यानसुघनःस्तवकोच्चयं ॥ दयितं सहजामोदैअ-
धिवासितदिक्तट ॥ किरीटहारकेयूरपारिबर्हविराजितं ॥२६॥ महार्णमणिमंजीरसमंजितपदांबुजं ॥ आसे
चनकलावण्यमशेषदिविषड्जं ॥२७॥ पुंडरीकाजिनवसं पुंडरीकनिभद्युतिं ॥ पुरस्ताद्दग्यजुःसामाथर्ववेदैः स-
विग्रहैः ॥२८॥ आगमैश्चांजलिकैस्तूयमानुस्ववैभवं ॥ यक्षकिंनरगंधर्वसिद्धविद्याधरैरपि ॥२९॥ चतुर्विधमहा
वाद्यविद्युन्निभसमारवैः ॥ सोमधामसमक्षत्रबालव्यजनदर्पणैः ॥३०॥ विभ्रद्भिर्गणपश्रेष्ठैः शारदाभ्रोपमैः समैः ॥
भवपाशनिबद्धानां पशूनां पाशमोचनं ॥३१॥ स्वप्ने दृष्ट्वा स्तदा शंभुरवदत्तं दयानिधिः ॥ ईश्वर उवाच ॥ त्वं मूर्खन=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११६ ज्ञानयोगकृपाचार्यपादेषु कृतसंस्तवः॥ दीक्षितो दीक्षयत्यन्यान्द्वयया शरणागतान्॥४॥ त्रिपदार्थविवेकांभः
प्रक्षालितमलत्रयः॥ वाजपेयादिभिर्यज्ञैराराधित महेश्वरः॥५॥ कदाचित्त्र्यक्षनक्षत्रे भार्यया सह स द्विजः॥
भयपंक्तिप्रपतिंशं भु माराध्य पुरतस्थितः॥६॥ जपन्पंचाक्षरं मंत्रं शिवैकाहितलोचनः॥ पत्नी च सांजलिस्त
स्य शिषेवे तं महेश्वरं॥७॥ तदा पत्नी महेशस्य लूता कांचनमूर्धनि॥ साब भ्राम शिवस्यांगे तंतुजालविधायि
नी॥ शिवे निपतितां लूतां सा दृष्ट्वा सहसाकुला॥ तां वि मृज्ये तलीलेह जिह्वया सृति लीलया॥९॥ लिहंतीं जि-
११७ ह्वया तां वै वीक्ष्यमाणो मृगीदृशं कुचोपलीनलग्नो सौढ्य भानेन चेतसा॥१०॥ तादृशीं स द्विजः पत्नीं संपा-
पे शिवदूषणं॥ कथं कृतं त्वयेत्युक्त्वा सह सापि दधे दृशौ॥११॥ स शिवद्रोहिणीं मत्वा त्यक्त्वा तां स्वगृहं ययौ॥
सापि तत्रैव देवेशं ध्यायंतीन्यवसन्निशि॥१२॥ नीललग्नः स्वके गेहे विहाय गृहिणीं स्वयं॥ अस्वाप्सीदंतरीशानमनुसंधा-
यनिर्भरः॥ ततः स्वप्ने महादेवमद्राक्षीत्करुणानिधिं॥ भुजंगपुंगवोन्नद्धं तटित्संभारसंनिभं॥१४॥ गंगातरंगसंघैश्च व्यक्त
टात्कारं महाध्वनिं॥ बिभ्राणमुन्नतैकाग्रशशिखंडजटाधरं॥१५॥ अंकुरितजगन्मूलकंदोयमिति भावितं॥ ज्वलल्ल
१४ लाटनेत्राग्निद्रवच्चंद्रसुधारसैः॥१६॥ श्वसत्प्रद्युम्नतनुःकोटिकरोति घटितसृजं॥ दयामृतपरीवाहमनोहरदृगंचलं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवेत्यादरान्मे हृदि सन्निधत्स्व भगवन्नामैव रूपं दृशे ॥ ४९ ॥ मनाग् महेश्वारु देवस्य नाम पापौघभित्केवलशब्दमा-
त्रात् ॥ त्वन्नाम सन्मंत्रित भस्म संगादुज्जीवतामेष सुतो द्विजस्य ॥ ५० ॥ इत्युक्त्वा तं स भस्मांकं कृत्वा फालं गलं
तथा ॥ हृदि सर्वांगपादांतं संस्पृश्य शवबालकं ॥ ५१ ॥ शिवनामानुषंगांकभस्मनोज्जीवयत्सुतं ॥ ससुप्त इव चोत्तस्थौ
तदा भस्मप्रभावतः ॥ ५२ ॥ नाम्नां महात्म्यतः शंभोः तं दृष्ट्वा जात विस्मयाः ॥ जना नृपश्च तत्रत्याः सपुत्रस्तत्पिता व
शी ॥ ५३ ॥ वाचामधीशपदयोः पातयित्वा सुतं तदा ॥ ववृषुः कुसुमासारं देवा दिवि मुदं व्यधुः ॥ ५४ ॥ तेन वाक्पतिना
विप्रः पुत्रेण बुभुजे वशी ॥ संस्तुतस्तेन विप्रेण ययौ नंतुं सभापतिं ॥ वामालालितवामांगसभानटपदं ययौ ॥
यच्छृण्वतां वांछितकामधेनुः शृणोति तद्वृत्तिचरित्रमेतत् ॥ ५६ ॥ छित्वाखिलान्संसृतिपाशबंधान् प्रया
ति शैवं परमं पदं सः ॥ इति श्री शिवरहस्ये सदाशिवारण्ये नवमांशे अष्टचत्वारिंशोऽध्यायः ॥ श्रीकाशीवि
श्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवाय नमः ॥ श्री स्कंद उवाच ॥ अस्त्यशेषमहीकांता लंकारे चोलमंडले ॥ शास्त्र
मंगल नाम श्री नगरं सह्यजातटे ॥ १ ॥ तत्रास्ति नीललग्नाख्यः कश्चिद्भूसुरशेखरः ॥ शिवपादांबुजध्यान
विनिर्धूतान्यबंधनः ॥ २ ॥ अधीतवेदवेदांगतदुपांगप्रविस्तरः ॥ अष्टाविंशतिकोटीनामागमानां च देशिकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११५ क्ष्विलं सुतं ॥३८॥ विषार्त्तीदंष्ट्रजानीतां वीतशोणितविग्रहं ॥ मृते विनीततनये धैर्यमालंब्य दंपती ॥३९॥ वाक्यते भोजने अ॰ ४८
युक्तौ सोत्साहौ तौ बभूवतुः ॥ अविकारौ तदा भोक्तुं समाह्वयत शांभवं ॥४०॥ सोपि चोत्थाय धौतांघ्रि भोजनासनमेत्य-
सः ॥ धृत्वा भस्म स्वयं ताभ्यां धारितुं भस्म तद्ददौ ॥४१॥ प्रिय पुत्राय वा भस्म ददतं सर्वभाग्यदं ॥ इति तेने रितावेतौ सोत्र
नास्तीत्यवोचतां ॥४२॥ तच्छ्रुत्वाऽविक्रियां ताभ्यां ज्ञात्वा ध्याने न तस्थितिं ॥ यथार्थं वदतं युष्मत्प्रियं कर्त्तास्मि सांप्रतं ॥
॥४३॥ इत्युक्ते तद्वचं श्रुत्वा उद्विग्नौ प्राहतुस्तदा ॥ दंपती उवाच ॥ यथार्थकथने चाद्य भुक्ति विघ्नो भवेत्तव ॥ न चेन्म
हेश्वर क्वोलं घनं दोषकारणं ॥ ४४॥ किं कुर्वो गिरिशो वेत्तीत्यंतश्चिंताभरां तरौ ॥ दंपती उवाच ॥ तनयो वां वने
४९९ दंदशूकदष्टो दृष्टवशाद्दिवं ॥ किं वामे तनये नाद्य विलंबं तव नो सहे ॥४५॥ भोजने भाजनं सिद्धं व्यञ्जने नाद्य वीज-
ने ॥ इति तत्प्रीतितो प्रोक्तं सदयो मदवर्जितः ॥ ४६॥ कर्मैव हि कृतं केनेत्युतस्थौ भक्तवत्सलः ॥ संजीवयितुमाकांक्षन्सश
वं विप्रनंदनं ॥४७॥ एवं ध्यात्वाज गौ वाग्मी सो भूत्सुप्त इवोत्थितः ॥ वागीश उवाच ॥ किं कालकूटगरला दपि घोरमेतच्छंभो
गरं गरगलस्य तवानुमेयं ॥ बालोऽप्ययं भुजगवक्ररदो रुदष्टो दृष्ट्वा तवैष लभतां खलु जीवितं हि ॥४८॥ पापघ्नं सकला
13 स्यगं कलिविभो ज्ञानप्रभावे समं शब्द प्रोच्चरणेन शीघ्रमगजाकांत मभाबोधकं ॥ संसारार्णवतारणे सुखतरीं शंभो-

जोल्लेशः पतिष्यति ॥ यत्र तिष्ठतियोगीन्द्रः शंभवः शिवभावनः ॥ २५ ॥ तत्रैव शंभोः क्षेत्राणामुत्तमं पापतापहं ॥ यस्मिं
गृहेशाग लिंगं शंभवो वाधितिष्ठति ॥ २६ ॥ तत्र तिष्ठति गौरीशः शिपिविष्टोति हर्षितः ॥ धन्यस्त्वं पूत पादाब्जरेणो
रेणुतरोप्यणुः ॥ २७ ॥ नाणीयसामेतप सामनसापि विचिंतितः ॥ सतं प्रवेश्यासने च उपवेश्य तदा द्विजः ॥ २८ ॥ प्रक्षाल्य विधि
वत्पादौ पावनैर्जीवनैस्तदा ॥ तत्पादोदकमाचम्य मूर्ध्नि संप्रोक्ष्य चागृहत् ॥ २९ ॥ गंधाक्षताद्यैः संपूज्य भोजनायन्यमंत्रयत् ॥
अत्रैव भोज्यं भोज्यासि भाज्याज्याद्यन्नमुत्तमं ॥ ३० ॥ इत्यभ्यर्थनया तस्य तद्भूतैः भक्तिपूतया ॥ वशीकृतात्मा वागीशः तत्तथे
त्यभ्यमन्यत ॥ ३१ ॥ ततोंतर्गृहमासाद्य स्वप्रियां प्राह भूसुरः ॥ द्विज उवाच ॥ अस्मद्भाग्यवशात्प्राप्तोशंभवः शंभुभा
वनः ॥ भुवने च सदा मान्यो नान्यस्तुल्यो स्य कश्चन ॥ देवेशदययायातो वागीशो मे गृहं यतः ॥ पाकादिषु क्रियाशक्तिं-
कुरुष्वेति तदा वदत् ॥ पक्वाचान्नादिकं भक्ष्यं स्वसुतं साभ्यभाषत ॥ मातोवाच ॥ उद्यानमेत्यानयत्वं विशालं कद-
लीदलं ॥ भोक्तुं सक्तून्यथाद्रातु मत्तु मन्नादिकं बहिः ॥ इति मात्रा नियुक्तः सन्पित्रा सोद्यानमेत्य सः ॥ ३५ ॥ करं प्रसारया
मास कदलीदलकृंतने ॥ तं महानद्भात्सर्पो दर्पोच्छ्रित फणस्तदा ॥ ३६ ॥ बिलेशय महाभोगविष्टितं स्वशयं तदा ॥ विधू
य सविषार्त्तोपि रभसा कदलीदलं ॥ ३७ ॥ समानीय ददौ मात्रे धरिञ्यां मूर्छितोऽपतत् ॥ विषविह्वलमालोक्य पितरौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११४ च्च भक्तितः ॥१२॥ अन्योन्यप्रणयोक्त्या तौ पूर्वपुण्यबलोक्तिभिः ॥ द्विजउवाच ॥ पच्चे त्लिमतपोलब्धमलभ्यं तवतद्दर्शाम् ॥ अ॰६२
कुतः समागतं देशाद्ब्रूहि शांकर सत्तम ॥१३॥ इत्युक्तस्तेन विप्रेण प्रहृष्टं प्राह स वाक्पतिः ॥ वाक्पतिरुवाच ॥ त्वंच प्रपाक
रो नित्यमूषरे क्षारसंयुते ॥ स्वयं श्रमार्त्तः कस्येदं नाम संलिख्यते वद ॥१५॥ इति ब्रुवाणं वागीशं त द्यूतिभूतिभूषि-
तः ॥ कृतांजलिपुटो भूत्वा प्राह संहर्षिताननः ॥१६॥ विप्रउवाच ॥ अहं नसा धुत्वत्प्रोक्तं यच्छ्रुत्वा व्याकुलो स्म्यहं ॥ दृढं
मृडाब्जपादोत्थमरंदानंदमेदुरः ॥ १७ ॥ जैनानाजौ विनिर्जित्य कृत्वा भस्म प्रकाशनं ॥ तस्य वाणीपतेस्तत्त्वप्रभाव
स्यैव वाक्पतेः ॥१८॥ अखि अलिखाम्यहमेवाद्य नामलेखेषु विस्मयं ॥ भक्तस्य वा महेशस्य नाम्नो नास्ति सदांतरं ॥
५० ॥१९॥ क्वाहं महेशः किंवाद्य शंभुभक्तपदाश्रयः ॥ भक्तभृत्योस्म्यहं शंभोः नास्ति मेन्यच्च्युतापतः ॥२०॥ इत्थं तद्द्यूतिव
चसा तुष्ट एवाह वाक्पतिः ॥ वागीशउवाच ॥ धन्यस्त्वं सर्वमान्योसि भासुरो भूसुरो यतः ॥ त्वत्प्रेमभावं भावेषु द्र
ष्टुमुत्कंठितं मनः ॥ २१ ॥ समागतो गजाजानिं प्रणम्य शिवधामसु ॥ वाक्पतिश्चाहमेवास्मि इत्युक्तोपि च भूसुरः ॥
॥२२॥ जहृषे नितरां दृष्ट्वा प्राणंसीत्स्वसुतान्वितः ॥ प्राह प्रेमभराभ्रांतमविश्रांतासुलोचनः ॥ २३ ॥ द्विजउवाच ॥
धन्योस्मि नितरां तात मातात्वंशांभवोत्तमः ॥ यन्मे गृहं समायातस्तृप्तामेप्रपितामहाः ॥ २४ ॥ यत्र शांभवपादाब्र-
७२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तैर्भुक्तिमानंद भृतां समेत्य प्रयांति शुभ्रोः पदमंत्यकाले ॥ ३९ ॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे पूर्व भागे पूतवती
चरितंनाम सप्तचत्वारिंशोध्यायः ॥ ४७ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनमः ॥ श्री स्कंद उवाच ॥ तद्भूतिनाम्नो
भक्तस्य भूति भूषस्य सत्तम ॥ चरित्रं ते पवित्रं चरित्रिनेत्र प्रेम पात्रिणः ॥ १ ॥ वक्ष्यामि पापनाशाय पावनाय च भूतये ॥ शशां
कपुरवासासीच्चोले कश्चिद् द्विजाग्रणी ॥ २ ॥ तद्भूतिरिति विख्यातः सदाशंकर किंकरः ॥ स श्रुत्वा वाक्पतेर्वृत्तं तस्य नाम्ना
किंतात्प्रपाः ॥ ३ ॥ अनातीतत्प्रपा धर्मं स द्विजो वाक्पतेस्तदा ॥ कदाचिद्वाकुपतिस्तत्र शिवधामानिपर्यटन् ॥ ४ ॥ तत्प्रपां
वीक्ष्य हृष्टात्मा मन्नाम्ना केन कारिता ॥ इत्यप्राक्षीत् समीपस्थांते चवाक्पतिमब्रुवन् ॥ ५ ॥ परिचरा ऊचुः ॥ आरताप
समूर्धन्यगणप श्रूयतामिदं ॥ तद्भूतिनाम्ना विप्रेण शशांकपुरवासिना ॥ वागीश प्रेम भक्तेन नामेदं लिखितं विभो ॥ वापीकूप
तटाकानि क्षेत्राराम गृहाणि च ॥ प्रपेयं धर्मशालाश्च सर्व वागीश नामतः ॥ इति श्रुत्वा वचस्तेषां तान पृच्छत्स वाक्पतिः ॥ ८ ॥
॥ वाक्पतिरुवाच ॥ क्ववर्त्तते स तद्भूतिरित्यथाहुश्च ते पुनः ॥ वेलामतीत्य मात्रां स स्थित्वा यातो निजालयं ॥ ९ ॥ ततो वाग्मी
सतिग्मांशुकिरणैस्तापितोययौ ॥ स भूतिमद्गृहं प्राप तद्भूतेर्गृहमासदत् ॥ १० ॥ शिव भक्तं च तं प्राप्तं दृष्ट्वाचाप्तमं द्विजः ॥
निकेतनात्स निर्गत्य प्रणम्य विनयान्वितः ॥ ११ ॥ न नाम वाचां नाथो सौ मन्मथारातिभावतः ॥ भूसुरं भासुराचारं तं प्राणंसी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मं गिरिं ॥ तां ददर्श चलापांगा शिववामांगदेवता ॥ शिरसा रोहति गिरिं काचिदस्थिमयाकृतिः ॥ ५५ ॥ वीक्ष्य तामिति साश्चर्यं हरो
गौरी मुदाहरत् ॥ इमामु मेश मायां तीं मद्भक्तां विद्धि मद्गिरा ॥ ५६ ॥ परं रूपमिदं प्राप्तां भक्तिवैभवसंभृतं ॥ शिरसा स्वयमायाति
मामभेत्यांबिकापतिं ॥ उक्ता शिवेन साभेत्य प्राणंसीतमुमा स्वं ॥ अंब किं करवाण्यद्य तयेत्युक्ता गजेनसा ॥ ५८ ॥ ता
वद्गतं तवदृष्टुमिच्छामि नयनामृतं ॥ किंच जाये यमाहूय उतजाये यतत्त्वदा ॥ ५९ ॥ भुजिष्यते भविष्यामि द्गुल्यवादीदनिंदिता ॥
तस्या भक्तिपराबाह सौरभीमेदुरं वचः ॥ ६० ॥ आकर्ण्य सस्मितं प्राह तथास्त्विति महानटः ॥ गच्छ भद्रे वटारण्यं नृत्यं मे द्रक्ष्य
सि स्फुटं ॥ ६१ ॥ मत्पार्श्वे च वसेत्युक्त्वा सा तेन प्रापत द्रुतं ॥ दर्शयामास तद्रक्षं सच्चिदानंदविग्रहं ॥ ६२ ॥ चंचज्जटापत
50/ च्चंद्र झलज्झल सुरध्वनि ॥ उष्णीषयन् भुजादंड भ्राम्यन्ब्रह्मांडमंडलः ॥ ६३ ॥ नटः समरुकोल्लासिकरस्यामरपावकः ॥
किंचित्कुंचितसव्यांघ्रिनाट्योल्लासमदर्शयत् ॥ ६४ ॥ सा तत्र देवदेवस्य पश्यंती तांडवं मुहुः ॥ वसत्यद्यापि तत्पार्श्वे परमा-
नंदमंथरा ॥ ६५ ॥ अहो सर्वस्य जगतः स्वयं जनयिता पिवा ॥ अंबेत्यादि भवस्तस्य महिमा केन वर्ण्यते ॥ ६६ ॥ तदाप्रभृति
देवस्य तत्राधिवसतो वने ॥ अंबा तातेश्व इत्याख्या विख्याता धरणीतले ॥ सा शैलकन्ये वसदैवशंभो रानंदनृत्तं प्रविलोक
यंती ॥ प्रमोदभूम प्रथमानचेता च कास्ति मुक्ते रधिदेवतेव ॥ ६८ ॥ ये पूतनत्याश्चरितं पठंति शृण्वंति वा शं भव मूर्त्ति मुक्तेः ॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्वा वचोब्रवीत् ॥ ८०॥ कल्याणि तव कारुण्याद्वयं वर्त्तामहे सुखं ॥ त्वन्नामधरणी ह्येषा कन्यके तिन नामतां ॥ ८१॥ दृष्ट्वापु-
नीत वत्येषा लज्जया भून्नतानना ॥ नमसि त्वं कथं पत्नीं कस्ते भाव परिप्लवः ॥ ८२॥ इतितद्बंधुभिः पृष्टः सतानाहव
णिग्वरः ॥ नमानुषी देवतेयमितुद्वाह्य परां वधूं ॥ ८३॥ तस्यां प्रसूये माकन्यां एतन्नाम्नाव्हयं च तां ॥ अतोहमेतां
प्रणतो धन्यायुष्यां तराप्यसौ ॥ तच्छ्रुत्वा बंधुषु स्तब्ध प्राह संस्मृत्य सा शिवं ॥ स्वामि निश्चय एषोस्य पत्युरर्थे मया
स्थितां ॥ व्यपोह्य मांसभारं मे पिशाचं कुरुतामिति ॥ देवेशोपि दयां तस्यामकरोद्भुक्तवत्सलः ॥ ८६॥ समांसभारं
सहसा सर्वगात्रेषु चाधुनोत् ॥ विधूताशेषमांसत्वाद स्थिशेषवपुश्च सा ॥ ८७॥ सा नत्वेवममर्त्येश्च रूपं पैशाच
मास्थिता ॥ पुष्पाणि ववृषुर्देवाने दुर्दुंभयो दिवि ॥ ८८॥ ननृतुश्चाप्सरसः संघाजगुर्विद्याधरादयः ॥ तां त्यक्त्वा बांधवाः
सर्वे भीतायातायथागतं ॥ ८९॥ देवतां दिवि मे कैकं जगौ न्वानीयुता च सा ॥ बंधवो पि द्रुवं ते ते पिशाचीति विचिंत्य तां ॥
॥ ९०॥ भूतनाथः सभूतार्थे मद्रूपं वेत्ति किं नरैः ॥ इति कैलासशैले शं द्रष्टुं तत्र रिताशया ॥ ९१॥ सा चो दिचीं दिशं प्राप्य
लंघिताद्रिवना पगा ॥ क्षुत्पिपासाश्रमैर्हीना वहंती स्वां ततः शिवां ॥ ९२॥ कैलासात्यकां प्राप्य दिनैर्बहुभिरेव सा ॥
शंकराचरितः शैलः पद्भ्यां स्पृष्टुं नयुज्यते ॥ ९३॥ इतिमूर्ध्नांतमारुह्य दसापाङ्गुरवबैभवा ॥ आरोहंतीं वरारोहां दूरारोहमि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११२ द्यतस्यै मुखमवेक्षत ॥ २६॥ सा द्वितीय फलाकांक्षा तस्य ज्ञात्वा कुल्ला भवत् ॥ अपारयंतीतदत्तं वक्तुमेत्य महान सं ॥ २७॥ कंप अ.६७
मानाकरस्थं सा किंचित्फलमवेक्षत ॥ अहो तव गिरीशो भूत् आश्रयो जगतां पतिः ॥ २८॥ पुनरीदृक् फलं देहीत्याह तां स
हसन्निव ॥ ध्याय त्यागिरिशं तस्याः फलं सद्यः करे स्थितं ॥ २९॥ विलोक्या सदृशं भीतो विस्मितश्च व्यचिंतयत् ॥ मह
तीं देवता मेनां अजानन्नहमल्प धीः ॥ ३०॥ अवजाने स्म जाये ति किमत्र करवै विधिं ॥ त्यागेनशक्तितेलोके गृही पातक
मा(प्नु)यां ॥ ३१॥ अतो द्वीपांतरं व्रज्यामपदिश्यत्यजाम्यहं ॥ इति निश्चित्य सोत्यक्त्वा नारीं तरणौ वणिक् ॥ पुण्या
नि तत्र विक्रीय क्रीत्वा तत्र भवानिच ॥ तरणी रावतीर्याथ पांड्येषु नगरे विशः ॥ ३३॥ सुतामुद्वाह्य निवसत् कन्यां कां
५०२ तीमजीजनत् ॥ स पूतवत्य व ज्ञान भवमानो व्यपोहितुं ॥ ३४॥ स्वसुतां पूतवत्याख्यां कृत्वा तत्र वसत्सुखी ॥ इतस्त-
तः प्रचारिभ्यः पथिकेभ्यस्तथा विधां ॥ तदा तस्या शृणोद्वार्त्तां धनदत्तसुहृज्जनः ॥ सम्यग्विज्ञाय तद्वार्त्तां धनदत्ता-
य बांधवाः ॥ ३६॥ प्राहुर्यत्र पतिस्तत्र च त्वत्सुतां प्रेष्यतामिति ॥ धनदत्त सखीयुक्तां स्वसुतां बंधुपालितां ॥ ३७॥ आरोप्यर-
त्नशिबिकां महत्स्वस्थापयत्पुरं ॥ तन्महात्पुरमासाद्य धनदत्तस्य बांधवाः ॥ ३८॥ अस्मै परमदत्ताय तत्प्रियां प्राहरागतां ॥
श्रुत्वा तामागतीं भीतो गृहिणीतनयायुतः ॥ ३९॥ पार्श्वं सुनीतवत्याःसः प्राप्य तां प्रणनामच ॥ पत्नीं कन्यां च तत्पादे पात-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यक्ता
किंचिदुन्मीलरोमालिव्यक्तपयोधरां ॥ नागारव्यनगरीशस्य विशो निधिपतेः सुतः ॥ परां परमदत्तस्तामुपयेमे सुम
ध्यमां ॥ धनदत्तोपवास्तस्यात्स्नुनायसुता पतिं ॥१३॥ स्वपुरे वासयामास प्रदाय बहुलं धनं ॥ तेन पूतवती साकं मोरेणैवरतिः
सदा ॥१४॥ अभुंक्त बहुलान्भोगान् संपत्सौभाद्देवता ॥ वसन्परमदत्तोत्र भार्ययायः समानया ॥१५॥ शिवैकतानस्त
द्दृक्ता निष्ट[illegible]दानैरतूतुषत् ॥ सापि शंकरकैंकर्यांतद्गतो सुखमानसा ॥१६॥ सततं पूजयामास माहेश्वरधुरंधरा-
न् ॥ पत्या समं महादेवमर्चयंती पतिव्रता ॥१७॥ स्नात्वा स्नात्वा च तीर्थेषु शंभुभक्तिमपूषयत् ॥ तदा परमदत्ता-
य कश्चिन्मीतिमुपावहत् ॥१८॥ सुवृत्तसहकारस्य फलद्वंद्वमुपावहत् ॥ सुधारसमत्कारी कल्पद्रुफलसोदरं ॥१९॥ तद्वं
द्वफलमादाय भार्यायै समर्पयत् ॥ पत्यादत्ते सुगुप्ते थद्गुतिवत्या फलद्वये ॥२०॥ आगत्य क्षुधितः कोपि शिवयोगी तदाल-
यं ॥ विलोक्य सा गृहं प्राप्तं शिवभक्तं क्षुधाकुलं ॥२१॥ प्रणम्य सलिलैस्तस्य पादौ प्रक्षाल्य मुदा ॥ बुभुक्षंतं मुनिं वीक्ष्य का-
लक्षेपासहं सती ॥२२॥ धनावत्तितदुःखेन सममन्नमदान्मुदा ॥ शिवावेशितचित्तासा यथेष्ठं व्यंजनैः सह ॥२३॥ सक्षी
रमन्नं दत्वास्मै तयोरेकं फलं ददौ ॥ याते तपोधने तृप्ते सा पक्कान्नं चतुर्विधं ॥२४॥ ददती विधिना पत्ये शिष्टं तच्च फ
लं ददौ ॥ आस्वादयत्तदा दृष्ट्वा सुधाकरसहोदरं ॥२५॥ माध्वी[illegible]ज्ञरीपरीपाकं वर्त्मकारिण्य चेलितं ॥ सततस्तु स्वरमास्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१११ श्रेयः स्कंदशां भवं धर्मं भस्मवराक्ष धारण विधिं यो निश्रियेकायादरात्॥ सोंते धाम ययौ गिरीश्वर भवाजानेर्जनुर्नाशितुं श्रेयां अ·४६
स्याश्च्युतुं महेशकृपया नैश्रेयसीं तां श्रियं॥७॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे ज्ञानसंबंध-चरितं नाम षट्च-
त्वारिंशोध्यायः॥४६॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ श्री सदाशिवायनमः॥ श्री स्कंद उवाच॥ ॥मिथिला द्विजमा-
नस्य वक्ष्ये पूतवतीं कथां॥शार्ङ्गरिवन नामास्ति पुरी भूचक्र भूषणं॥१॥ यया चोत्तम हीकांतावदने तिकलायितं॥सदा धनदकोटी-
भिरुपासित महोच्चया॥ वित्तायाते ययासार्धं सार्धवास्योकसा रया॥ यद्गोपुरे निजशिरोलसच्चंद्रार्कमंडलैः॥३॥ विडंब्यते
मुहुः शंभोस्तनुरर्धेंदुशेखरा॥ यत्र सौधानवसुधा धवला भूरिभूतयः॥४॥ भजंति शिवसारूप्यं बिलसत्पूर्व मंगला॥
503 धनवंतं सुसंपूर्णं जनता हसति स्फुटम्॥५॥ अष्टाभिरेव बसुभिः सहितामम रावतीम्॥ विध्यातवज्जटा सिंधु मृषिता
सितमूर्त्तिभिः॥६॥ भूयसे यत्र निखिलैर्जनै र्भवन पावनैः॥ तत्रासीन्नगरे कश्चिद्धनदत्ताभिधो वणिक्॥७॥
धत्तेलं कापतिर्यस्य संपदे स्पृहयालुतां॥ तस्मात्पूतवती नामजज्ञे काचनकन्यका॥८॥ कलाचंद्रमसी कांता कलानां भोनिधे
रिव॥ यालावण्य पयोधि श्रीर्जगल्लोचन चंद्रिका॥९॥ कमला सनहस्ताब्ज कला कौशल पुंजिका॥ विवृत्तमेतां का
लेन विद्यामिव सुमेधसः॥ प्राप्तं शैशवतारुण्य दशायोर्मध्य वर्त्तनीं॥ वक्रिमोल्लासिवाग्रे स्वां भावोर्मिलदृगचलां॥११॥

पुरेश्वरं ॥ बालक उवाच ॥ ॐ भुः सांद्रपयः पयोधिमतुलं पातुं ददौ यः पुरा संतुष्टः शिपिविष्ट एव नितरां वैय्याघ्रपाद्या-
यतु ॥ तेनैवार्पित मद्विजाकुचगिरि स्रोतों बुधाराप्ययो स्नानानंद सुधा समुद्रलहरी संहारि पापव्रजं ॥ २७॥ एवं वदन्
तदा बालोऽज हर्षं चननर्त्त च ॥ प्रसून वृष्टिमातेनुः भ्रमद्भ्रमरिकां सुराः ॥२८॥ दिवि दुंदुभयो नेदुः ननृतुश्चाप्सरोगणाः॥
तस्मिन्तापि सुखांबोधौ ममज्ज नितरां तदा ॥ २९॥ नभो निबिडिता मर्त्य किरीटगलितान्मणीन् ॥ पूर्णपेषपिनाष्टीवजन तात
त्र संगता ॥ ३०॥ दिवि देवै रसं रव्यातैः क्षितौ बहुविधैर्नरैः ॥ समूह्य बालं स्कंधे नययौ द्रोणी पुरेश्वरं ॥३१॥ शंखदुंदुभि
निर्घोषवीणाध्वननमंजुले ॥ अवरुह्य ततो बालः पितुरं सत्ततों स्तः ॥ ३२॥ प्रणम्य सतदा लोक्य गोपुरद्वारमाययौ
॥ प्रमुदं चितरो मांचकंचुकाश्रुमुखो ययौ ॥ ३३॥ नत्वा साष्टांगमीशानं श्री मद्रोणी पुरेश्वरं ॥ प्रदक्षिणीकृत्य तदाशि-
अस्तौषीदथ देवेशं मन्मथारातिमीश्वरं ॥
वधाम द्विजार्भकः ॥ ३४॥ बाल उवाच ॥ ॐ भो भगवंतकाव्ययवि भो पाहयं बुजातेक्षणालोक्या मौलिसु मूलफाल विल-
सन्नेत्र प्रभा भासित ॥ आलोलद्युति सोम सुंदरजटाजूटात्तगंगो त्तम व्यालानद्ध शरीर कांतगल जित्क्षीरं जितांगप्रभो ॥ इ-
त्थं संस्तुत्य देवं पुनरपि सुतदा शंभुधामा निनंतुं यातो सौ द्विजशांभवै धृतमहाभस्म त्रिपुंड्रांकितः ॥ पांड्यस्यानुमते
जिगाय सतदा जैनान् जितारिः सदा सिधांतो सितवेदवादजनितैर्वाक्यैश्च्यतर्कान्वितैः ॥ ३६॥ स्थाप्य स्नानमहोरर्धिं शिवजनैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ईश्वरउवाच ॥ स्तन्यं हेरंब षड्वक्त्र पीतशेषं गिरींद्रजे ॥ शिशवेस्मैस्तनं हे देहि वात्सल्यात्त्वं सुवत्सले ॥ इत्युक्ता शंभुना गौरी सदा० न० ९
११० कांचने चषके पयः ॥ पयोधराभ्यां निसृत्य बालायास्मै ददौ शिवा ॥१४॥ आदाय चषकं बालः पाणिभ्यां मुदिताशयः ॥ पपौ अ० ४६
पयः शिवज्ञानचतुर्वेदसमुद्भवं ॥१५॥ विमृज्य लोचने देव्या दत्तमास्वाद्य तत्पयः ॥ उन्मील्य संविदुल्लासं संसस्मार स्मरशा-
सनं ॥१६॥ प्रबाधलहरीं प्राप्य पशुपाशविमुक्तये ॥ तत्सत्यं तत्त्वतो बुध्वा प्राध्यापीत्सकलाः कलाः ॥१७॥ अशेषजगतां मातुरास्वा-
द्यस्तनमक्रमः ॥ ख्यातोंऽबिकासुत इति ज्ञानसंबंध इत्यपि ॥ सोपि विप्रो ददर्शैवमग्रोंऽभसि महेश्वरं ॥ त्र्यक्ष्य मुखाधिरूढं
SOq च वीक्ष्य देव्या समन्वितं ॥१८॥ जजाप शतरुद्रीं च स्तुवन्नभ्युत्थितो भवत् ॥ वृहंतं चषकं हैमं करेद्राक्षीन्निजार्भकं ॥२०॥
तारामित्रपयःसिंधुःतरंगीतहृदंबुजं ॥ लेलिह्यमानं भक्त्यैव वीक्ष्यमाणं नभोंतरं ॥२१॥ आनंदाश्रुपरीवाहसेकसीतालितांग-
कं ॥ कदंबमुकुलोल्लासिपुलकोद्दाम भूषणं ॥२२॥ नृत्यंतं किंचिदाकुंच्य चरणांबुरुहाचलं ॥ वीक्ष्य वीक्ष्य निजं बालं
विस्मेर हृदयोऽभवत् ॥२३॥ चिक्रीडमानं तं बालमुवाच स तदा पिता ॥ पितोवाच ॥ त्वयि बालक केनेदं तुभ्यं दत्तं पयोऽधुना ॥
कस्योच्छिष्टमिदं हंत चषकं त्वत्करस्थितं ॥ शुध्यिं ते पावनैर्मंत्रैः करिष्येहं द्रुतं वद ॥ एतदुच्छिष्टदाता पि कुत्र वा वर्त्तते धुना ॥
दर्शयेति तदा पित्रा स चोक्तो बालकस्तदा ॥ गोपुराग्रं तदद्राक्षीत्स्वेनांगुष्ठेन वर्त्मना ॥२६॥ तदास्तौषीत्कुमारो पिदेवं द्रोणी-
८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

या मास मधुरैर्गीतगुम्फनैः ॥ बालोपि भस्म विधृतामल रुद्रनेत्र स्रग्भि र्विकीर्य कुसुमानि च पांसु लिंगे ॥ नैवेद्य मिष्ट मदद्दाञ्छ्रिपि
विष्ठ लिंगं संपूजयन् शिव शिवेति स बाल वर्गैः ॥ ४० ॥ इति श्री शिव रहस्ये सदाशिवाख्ये नव मांशे ध्यान संबंधोत्पत्तौ पंचचत्वा
रिंशो ध्यायः ॥ ४५ ॥ श्रीकाशी विश्वेश्वरार्पण मस्तु ॥ श्रीसदाशिवाय नमः ॥ श्री स्कंद उवाच ॥ एवं तस्मिन् शिशु क्रीडा परिपा
टी वितन्वति ॥ पित्रोर्न केवलं चैष त्रैलोक्य सुख भाग भूत् ॥ १ ॥ तदा कदाचिदुत्थाय मुहूर्ते ब्रह्म संज्ञिते ॥ शिवतीर्थाभासि
स्नातुं तस्मिं ता प्रस्थितो द्विजः ॥ २ ॥ तेनान्वितो यथौ बालस्सर स्तट मुदार धीः ॥ पादाभ्यां पल्लवाभां भ्यां सिकतासु पदं दधन्
॥ ३ ॥ स्थापयित्वा शिशुं शंभु तीर्थ तीरे स भूसुरः ॥ कृती चित समाचारः स्नातुं तीर्थ मगाहत ॥ ४ ॥ बाल कोपि तमालोक्य
धूली क्रीडा परायणः ॥ सरस्तटे पटन्य स्तपि तुरालोक्य सो बटुः ॥ ५ ॥ अदृष्ट्वा स्वं च पितर मघमर्षण कारिणं ॥ हरोदगो
पुरं शंभोः पश्यन् द्रोणीपुरे पितुः ॥ ६ ॥ तांतां वेत्ति च सोत्फुल्लं हस्त रक्त पाणिना ॥ कज्जलालेप लोलेन लोचनेनाश्रु कारिणा ॥ ७ ॥ पाहिमा-
मिति देवेशं सबत्ला द्बालको रुदत् ॥ तदा कारुण्य महादेवो महादेव्या तदागतः ॥ ८ ॥ दय मान मना द्रोणी नाथो सौमन्मथां तकः ॥ आरुह्य
वृष भं दिव्यं सुरह्य सम प्रभं ॥ १० ॥ गण योगींद्र गीर्वाणै र्वाणीश हरि सेवितः ॥ धारालबाष्य नयनं रुदंतं तं स्तनं धयं ॥ ११ ॥ देवोदर्श
दयासार स्रोतः शीतलया दृशा ॥ त्र्यक्षो वीक्ष्य दृशा बाल मबाल सम विक्रमं ॥ त्रैलोक्य जननीं प्राह दय मान मनास्तदा ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०१ रस्कृयां ॥ ६२॥ कुर्वतानंदभासूनां लीलाद्भुतमुदं चितं ॥ देवाश्च सुमुखाः सर्वे तदा मखमुखे ग्नयः ॥ ६३॥ प्रदक्षिणाकारत अ.४५
याजज्वलुः पवना ववुः ॥ ववर्षुः कुसुमासारं देवगंधर्वजाप्सराः ॥ ६४॥ जगुः कलं ताननृतुः मेनकानाकिनोगणाः ॥ अनाहतादुंदुभ
योनेदुर्जलदगौरवं ॥ ६५॥ अथ शय्यासमारूढो बभौ भगवतीसुतः ॥ उदयाद्रेरिवारूढः चंडभानुः प्रचंडभाः ॥ ६६॥ पुत्रजन्मामृ
तं श्रुत्वात त्पिता हर्षवर्षणैः ॥ तर्षितो बहुकालेन ब्राह्मणेभ्यो ददौ वसु ॥ ६७॥ महांतमुत्सवं कुर्वन् बंधुवर्गसमन्वितः ॥ अपूपु
ष्कुमारं स्वं पूषेव गगने स्थितं ॥ ६८॥ दिने दिने परां वृद्धिमवापालं तहर्षितः ॥ अयासीदतुलां पुष्टिमिंदं पित्रोरधायिशुः ॥ ६९॥ चिछि
मूर्धन्युन्नमिते तेन वेदै रुन्नमितं शिरः ॥ अंकणे किंकिणीरत्नहंससुकस्वनमंजुलः ॥ ७०॥ जानुचंक्रमणं चक्रे वा चाल
मणिकंकणः ॥ जननीकरमालंब्य पंच पाणिपदानि सः ॥ ७१॥ वक्षस्थहेमसूत्राढ्य पंडरीकनखांकितः ॥ भुवंगत इव स्कंदः कौतु-
कं पितुकुं पितुरातनोत् ॥ अव्यक्ताक्षरवाङ्माध्वी मुखरीकृतदिङ्मुखः ॥ अव्याजहसितोल्लासीत्तदंतकमुखश्रिया ॥ फाल
त्रिपुंड्ररचना रोचनाक्तसुरेखया ॥ विलोलकर्णपाशात रत्नरुद्राक्षकुंडलः ॥ ७४॥ भसितालक्तकासक्तपदारक्तितभूतलः ॥ व्या
लोलकुंतलानीलफालात्ततिलकामुखः ॥ ७५॥ पूर्णेंदुमध्यविलसन्यंकुशंकाविशोभना ॥ फाले न भाति बालो सौपर्यको त्ता-
नशाप्यपि ॥ ७६॥ सा जगौ लालने गीतिं नान्यां पंचाक्षरीमनोः ॥ अंके कनकपर्यंके मुक्ताशृंखलया चिते ॥ ७७॥ मातापलाल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अंगुष्ठाग्रेण तिष्ठत्सा घर्मे सा वर्मणावृता ॥ ४८ ॥ वर्षधाविषु धाराभिः वारिदोक्षा षु सा बभौ ॥ सौदामिनीव भूलोके कामिनीया
मिनीषु सा ॥ ४९ ॥ तिमिरस्तिमिते काले तस्यां गर्भभया दिशः ॥ भांति तत्कुंदसंदोहकोरकानिव तद्रदाः ॥ ५० ॥ तस्या हृणाधरबिं
बं तिरस्कारि चमत्कृतिः ॥ पाणिपादेन पद्मानि मुखेनेंदुकलामपि ॥ ५१ ॥ नेत्रेण नीलपद्मं साध मिल्लजितसद्मना ॥ कुचा
भ्यां जितमातंगकुंभाभ्यां चारुहासिनी ॥ ५२ ॥ प्रदर्शयत्यनायासान्निन्ये सा हैमिनो निशाः ॥ निहारिहारिपद्मश्री
रप्यस्या मुखपंकजं ॥ ५३ ॥ मनोहारि सदैवास्या हरहृत्पद्मसद्मगं ॥ तपस्वत्यां तदा स्वप्ने ददौ कोपिजटाधरः ॥ ५४ ॥
भस्म तन्मुखगात्रेषु तेन सा दौहृदं दधौ ॥ उदेष्यच्चंडमार्त्तंडपुरुहूतदिशेव सा ॥ तथापि मध्ये नैतस्य महतासमहू
यता ॥ फाले विरंचितां रक्षां रेखां कुक्षिजुषं शिशोः ॥ ५६ ॥ साभक्षयत् ध्रुवं मृत्स्नां भस्म नो धूलनेच्छया ॥ कुक्षिस्थ
स्य कुमारस्य विभूत्यैव वपुश्रियः ॥ ५७ ॥ पांड्यमानं वहत्या सौ त्सत्वधिष्ठातृदेवता ॥ सुधया परितो तस्याः कुचौ मेचकचू
चुकौ ॥ ५८ ॥ संवीक्ष्य तां प्रमोदेन प्रमदा मुदिताशयाः ॥ इंदुशेखरभावेन भासुरो भूसुरस्तदा ॥ ५९ ॥ यथाविभवमातं
नि क्रियां पुंसवनं क्रियां ॥ सीमंतोन्नयनेनासौ स्फुरितातिशयो बभौ ॥ ६० ॥ तदा मणिशलाकेव शाणोल्लीढा प्रभावती ॥
अथ वैजननेमासि गृहे षूच्चेषु पंचसु ॥ ६१ ॥ मुहूर्ते शोभने सूनं प्रसूता भावयं दिशः ॥ सूतिकाभासयामास मणिदीपति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०८ चिन्तास्तीत्यमन्यत ॥ विप्र उवाच ॥ भद्रे सम्यक्त्वया भाणि अर्चयावो महेश्वरं ॥ अभ्यर्च्य तनयं प्रौढं प्राप्स्याव इति सो अ.४५
ब्रवीत् ॥ ३५ ॥ सजायया समं प्रौढं दृढं मृडपदार्चने ॥ अमी मे स्त द्रोणिकेशं समर्चयितुमंजसा ॥ ३६ ॥ पावनेशं भु
सरसिमातर्विहितगाहनः ॥ अर्च्ययामास रक्ता धैर्य्यया विधि दिवाकरं ॥ आरणोत्थैर्मन्त्रवर्यैः स्तरुणारुणनायकं ॥
नमस्यन्छरणं यातः चरणांबुरुहं रवेः ॥ शिवं शिवायुतं भ्रुविप्रो भस्म रुद्राक्ष भूषणः ॥ रुद्रपंचाक्षरावृत्या बिल्वप-
त्रैरपूजयत् ॥ ३९ ॥ प्रदक्षिणप्रणामादिस्तुत्या धूप निवेदनैः ॥ शिवागमोक्त विधिना द्रव्यैः सौभाग्यदायिभिः ॥
॥ ४० ॥ प्रकल्पितोपचारैंश्च कंदमूलफलादिभिः ॥ तदा भगवती सापि स्वात्मनाथे नमोदिता ॥ ४१ ॥ मनोयुंक्तत
पः कर्तुं कर्तुं संसारवारिधिं ॥ भरितानंदहृत्पद्मा शात स्वांता महेश्वरे ॥ ४२ ॥ यथा कुमारजनने पार्वती पर्वताग्रगा ॥
शर्वमाराधयामास तथेयं पुत्रवांछया ॥ ४३ ॥ स्नात्वा तदा सा धंमिल्लमंदार प्रसवोचितं ॥ जटाभरत्वं तपसे गमया
मास सुव्रता ॥ ४४ ॥ हंसकूलदुकूलं सा हित्वा वल्कलधारिणी ॥ अपि प्रसूनापचयेनिःसहांगुलिपल्लवा ॥ ४५ ॥ पवि-
त्रं सा कुशाग्राणां पवित्रत्वेन बिभ्रति ॥ चंदनासारगात्रं सा परिधूयांगरागकं ॥ ४६ ॥ भस्मधूसरितांगं सा चक्रे सिंदू-
रलांछिते ॥ फाले त्रिपुंड्रस्चनां माला रुद्राक्षकल्पिताः ॥ ४७ ॥ अनल्परत्नाभरणा स्वीचक्रे तरुणी तदा ॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१८

कलाधरः

मालिषु ॥ द्रोणीरामो पयः शंभुः भक्तान्कल्पांतिमे हरः ॥ तस्यामासी द्विजाधीशः द्विजराजधराकृः ॥ आम्नायागम

षट्शास्त्र पारदृश्वाशिवक्रतः ॥ २३ ॥ शिवांघ्रि चित्तसद्वृत्त षट्कर्माचरणोद्यतः ॥ विवर्त्त इव धर्मस्य सर्वस्येव समुद्भूतः ॥

शांतेरिव परीपाको दांतेरिव परिग्रहः ॥ उल्लास इव बोधस्य मोक्षस्येव महापथः ॥ २४ ॥ परो रज्जो भिश्च्यरितैः प-

वित्रितजगत्त्रयः ॥ तपस्तुष्टां विकाजानेः प्रसाद इव मूर्त्तिमान् ॥ २५ ॥ विनयाभरणा काचित्करुणैवाशरीरिणी ॥

आसीद्भगवती नाम्ना तस्य धर्मकुटुंबिनी ॥ २६ ॥ धर्मानुष्ठाननिष्ठा साव सिष्ठग्रहणी समा ॥ प्रतिष्ठा तिथि सत्का

रे गरिष्ठा शाद्यवर्जिता ॥ २७ ॥ महता सापि कालेन तनयं विनयान्वितं ॥ अप्राप्य सा तदा खेदान्नत श्रियं ताम गाहता ॥

तदा भगवती सापि सुतम प्राप्य दुर्मना ॥ किमयं तस्त्रियं तयं तीरवादोत्तं शिवप्रतं ॥ २९ ॥ व्यरीरचत्सोमवारं निशि

तत्र शिवार्चनं ॥ साप्राह शिव धर्मी स्वं ब्राह्मणं ब्राह्मणी तदा ॥ आर्यपुत्रवतां नास्ति लोके लोके ह्यनंदनं ॥ नम

किं जन्मना वापि चिरस्थित्यायुषापि किं ॥ ३१ ॥ पुत्रवता हि लोकानां सफलं संसृतेः फलं ॥ मंगेहो धर्मशालस्य

महत्वस्य स्यचैभवं ॥ ३२ ॥ धर्मपत्न्य न पत्यापि भुवो भारायकेवलं ॥ येन केन प्रकारेण सांबमाराध्यशंकरं ॥

तनयं प्राप्नुहि प्रोदं शिलादइव नंदिनं ॥ इति तस्या वचः श्रुत्वा शिवपादरतो द्विजः ॥ ३४ ॥ शंभो राराधनात्लभ्यं किं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०८ हस्तैरातन्वते सौधैः पयोद पट हारवं॥ सदृश श्रींद्र शाला सु राम चन्द्रो पलां भसा॥७॥ कोत्ती सारःसु पूर्णेषु चंद्रा पीडयते करैः॥
यत्सौध चंद्रकांतांबु प्रवाहै र्विपिनीमहीं॥८॥ आकृष्य पूरितां बोधिः धत्ते रत्नकराभिधां॥ पताक घटनाद्यस्यांप-
तितै रुडुभिर्यतः॥९॥ आगृह्यते रतिर्यस्य छिन्नमुक्ता वधूजनैः॥ सुमनः सुमना मोद भ्रमद्भृङ्गदरा जयः॥१०॥ आनंद
वारिधेः पूरलक्रीडा वितन्वते॥ यत्र क्रीडा कुरुंगीभिः केलिपर्वत मूर्धनि॥ हरिन्मणि प्रभादूर्वाश्चरंति बि-
मलाशयाः॥ कवेराटोप कूपानां पटीयसि विपावने॥१२॥ भाविताध्वर धूमाभ्यांय स्यां तेजस्तमो जुषि॥ अर्धनारी
श्वरः सक्तैः नक्तं वादिभिधा मुदा॥१३॥ प्रलयोत्कलयां भोधि शुक्ता मुक्तालिवेष्टिता॥ याशेष मूर्त्तिभिः शंभो आल-
यो द्रासि शोभनैः॥१४॥ नालिकेरावलीरंभाक्रमुकाराम मध्यगा॥ असंवर्त्ते प्रिया भाति वेलितेव पयोधिना॥
केदारे यत्र माकंद रक्तांबुजदले मधु॥ मुंचतोज्वलनारातिं भूसुराणां वितन्वते॥१६॥ वधैर्मुखं हितैर्यत्र सारसे-
स्ताय सेतपः॥ कुशेशयत्व मेतेषां कथंकारं न चोद्भवेत्॥ कस्तूरी गंध कर्पूरैः कुंकुमा क्षोदराशिभिः॥ स्फारैरवकरै
र्यस्यां भरित्री मणिमेदुरैः॥१८॥ चंचत्केलीदराधारगलितैर्मणिमेदुरैः॥ क्षिप्तै रर्ककायत्र मेरुभ्रांतिं वितन्वते॥१९॥
५ पुष्पवंतौ यदारामे चरंतौ विटपांतरे॥ वितन्वते जपामल्लीगुच्छ सच्छाङ्कतौ तदा॥२०॥ उल्लोलल्लचांतलोकेषु सप्तकल्लोल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार्यपाय नेत्र पात्रे त्रिनेत्रं नाम नामभंशवदुन्नस्य हर्षात् ॥ हार्यं हार्यं दुःखजातं समग्रं त्वत्पादाब्जालोकने नैव शंभो ॥ ५१ ॥
यामि कैलासमूलं ते भार्यया हं महेश्वर ॥ कनीनिका विहीनस्य नेत्रस्ये वात्र मे स्थितिः ॥ ५२ ॥ तवानु यायी तिष्ठामि शंभो
भो रक्ष कृपां कुरु ॥ इत्युक्तं शूरवचनं श्रुत्वा तच्चंद्रभूषणः ॥ ५३ ॥ दत्वा योगं समायाहि इत्युवाच द्विजं प्रति ॥ इत्येवं द्विजशूरो
पि समाधिमगमत्तदा ॥ ५४ ॥ नाडीं सुषुम्नां मरुदाभिपूर्य द्रुतं सुधा चांद्रमसीं विधाय ॥ हित्वा सतत्व्रह्म कपाल रंध्रं कै
लासनाथस्य पदं प्रपेदे ॥ मिथिला द्विज शूर वृत्त मेतत्प्रपठितं भक्ति परायणं परा र्घ्यं ॥ दृढ भक्ति युतो मृडब्ज पादे नहि गा-
ढं तमआविशेत्स धन्यः ॥ ५६ ॥ इति श्री शिव रहस्ये सदाशिवाख्ये नवमांशे चतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ श्री काशीवि
श्वेश्वरार्पणं ॥ श्री सदाशिवाय नमः ॥ श्री स्कंद उवाच ॥ श्री मतो बोध संबध नाथस्य कथये कथां ॥ अस्ति ब्रह्मपुरी नाम
पुरारातेः प्रसाद कृत् ॥ १ ॥ कावेरी शुक्ति मुक्ताभिः प्राकारत्रय कल्पिता ॥ परिघा वलयो यत्र पाताला काशलंघने ॥ २ ॥ विघ्नं
पथि वितन्वंति प्राकाराः सोम सूर्ययोः ॥ यत्र प्राकार वीथीषु दिवापि घनवाहनाः ॥ ३ ॥ विद्युद्भ्रांतिं वितन्वंत्यः संचरंत्य भि
सारिकाः ॥ यस्यां हीरन्मणी वेदीकांति शैवाल मोचकाः ॥ ४ ॥ रत्नाकर प्रभा पूरं वहंते विधि कापगाः ॥ यत्राध्वर ह
विर्धूमैरकाले प्युत्थिता घनाः ॥ ५ ॥ मुंचंति पयसो धारां यत्र सोम रसोत्तराः ॥ यत्र क्रीडा मयूराणां लास्यं बाला दिदृक्षवः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतांजलिपुटस्तस्थौ स्तुवन्जयजयेति च ॥ विप्रसंघैः पितॄणं स्वकीयं विस्मयं गतः ॥ ७९ ॥ गंधालंकारवासोभिः भूषितं यानमा अ० ६८
१०६ स्थितं ॥ तं तदा पितरः प्राहुर्भक्तिशूरं शिवार्चनं ॥ ८० ॥ पितर ऊचुः ॥ अस्माकं परमा तृप्तिः भवतो भाग्यगौरवात् ॥ संजाता शंभुभ-
क्तेन भक्त शिक्षयेन सर्वदा ॥ ८१ ॥ देशपात्रक्षेत्रद्रव्यैस्तृप्तिर्नः शतवार्षिकी ॥ भवभुक्तान्नशेषेण अनंता तृप्तिरेव नः ॥ ८२ ॥ यतस्त्वं-
शिवभक्तानां श्रेष्ठो मान्यो विशेषतः ॥ त्वया यद्दत्तमस्माकं शिवभक्तमुखे हुतं ॥ अनंत्याय (आनन्त्या) भवेदन्नं किंपुनः शिवचक्रगं ॥
यो भस्मरुद्राक्षयुतां गकं सदा श्राद्धं ददन् भोजनकृत्सदैव ॥ अस्माकमेवेष्टतमा हि तृप्तिः स्यात्तर्पणे नान्यदतो विशिष्टं ॥
यो भस्मरुद्राक्षविहीनफाले तेना फलं श्राद्धमहो सुदत्तं ॥ स्याद्देशकालौ चित्तपात्रदत्तं भवेत्सदा निष्फलकं सदैव ॥
मातामहा धन्या वयं शैव पिता पितामहा बांधवा ये च सर्वे ॥ ८५ ॥ पुनासि नः पुत्र भूतो महेश भक्तो सि मान्यो सि विशिष्ट एव ॥
पुन्नाम्नो नरकात्सुतारक इति ज्ञेयः (ज्ञेयः सर्वे) शांभवो भूयात्तत्तपस्य या फलमिदं ज्ञेयं पितुर्वै सुत ॥ ८६ ॥ नो त्रातयते सि पुन्नकु
हरे भस्माक्ष भक्त्युज्झितः पुत्रः कुत्सित एव भक्तिविधुरो तस्मात् पुत्रो वरः ॥ इत्युक्त्वा ते प्रणम्येशं पितरस्तस्य सुव्रत ॥
आशीर्भिरभिनंद्यैनं शतंजीवेति ते ययुः ॥ ८७ ॥ शूरं ते भूसुरा दृष्ट्वा क्षयद्वीरपदार्चकं ॥ ऊचुः संहृष्टमनसो धन्यो सीति
८ मुहुर्मुहुः ॥ दृष्ट्वैव स्वपितॄन्सर्वान् महादेवं दृशा तदा ॥ तुष्टाव शिपिविष्टं तं शूरो मूर्ध्निकृतांजलिः ॥ ९० ॥ शूर उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्य गृहमास्थाय पार्वणे समुपस्थिते ॥ स्नात्वा द्विजास्तथा श्रांता उपविष्टा वराशने ॥ २४ ॥ एवं स्थिते तदा शूरो धैर्यशूरश्च भक्ति
मान् ॥ भस्मफालं तदा दृष्ट्वा भक्तमभ्युज्जहार च ॥ २५ ॥ चंडालाय ददौ पूर्वं पैतृकार्थं कृतं हविः ॥ तं दृष्ट्वा चुक्रुधुर्विप्रा धिक्
त्वामिति विनिर्ययुः ॥ २६ ॥ विनिंदितो बंधुभिश्च स्तब्धस्तस्थौ महष्टधीः ॥ अष्टमूर्तिममुंदिष्ट (दृष्ट्वा) भक्तिहृष्टतनूरुहः ॥ २७ ॥
चंडालोऽप्यथ तद्दत्तं बुभुजे परमं हविः ॥ दृष्ट्वोऽथ निर्जगामैव मौलिमांदोलयन्तदा ॥ निक्षिप्योच्छिष्टपात्रं तदंकणे कणिकंक-
णः ॥ विनिर्गते च चंडाले तत्पत्नी कोपविह्वला ॥ २८ ॥ पात्रमुच्चालयामास शूद्रा तद्दुक्तमेव सा ॥ शूद्रा तत्पात्रमध्येन
दंडेनोत्कीर्य पातितं ॥ ३० ॥ ग्रामाद्बहिस्तन्निक्षिप्तं स्नात्वा शुद्धिं समागता ॥ पुनरन्यत्तथा पात्रं स्थितमेव तदंकणे ॥ ३१ ॥ एवं
पुनः पुनर्नीत्वात्यक्त्वा (कृत्वा) श्रांतिं परां गता ॥ शूरोऽपि भार्यां सांत्वाथ पुनः पाकमथारभत् ॥ ३२ ॥ पूर्वं निमंत्रितान्विप्रान्सांत्वयन्श्रा
द्धभोजने ॥ तं चुक्रुधुः पुनस्तेऽपि धिक्त्वा (कृत्वा) चंडालभोजकं ॥ ३३ ॥ बहिष्कार्योऽसि विप्रैस्त्वं ग्रामादस्मात्सरा व्रज ॥ इत्युक्त्वा क्रोधदु-
खितो विप्रः श्राद्धघातं समीक्ष्य च ॥ ३४ ॥ शिवं हृदि तदा ध्यायन्नुवास सायमेव हि ॥ तद्भुक्तिं विप्रसंघानां प्रदर्शयितुमागतः ॥
वृषारूढो महादेव्या चं च चंद्रविभूषणः ॥ नदत्सु देवतूर्येषु नृत्यं तीव्र प्सरः सु च ॥ तमाह विप्रमाहूय पश्यते पैतृकं गणं ॥
संतृप्तं नितरामन्नैर्विमाने नार्करोचिषा ॥ ३७ ॥ गच्छ त्वं शक्रसदनं पश्येत्याह महेश्वरः ॥ तदानीं स च शूरोऽसौ देवदेवं प्रणम्य च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०५ स्ता राजानं पांड्य भूपतिं ॥ नैजपक्षस्थितं साध्वी मंत्रिणा मंत्रितेन सा ॥ ९ ॥ तदा तेन प्रबुद्धः सो पांड्य भूपोपि सत्तमः ॥ उन्मत्तजैन
न्नाहूय स्वगात्रस्थं तदा ज्वरं ॥ १० ॥ नाशकुर्वस्तत्र वरितं रोगज्वरनिवारणे ॥ वागीशमाहूय तदा शिवभक्तं तदा सदा ॥ ११ ॥ तेन
ज्वरं नृपश्यांगे नाशयामास सा तदा ॥ जैनान्शूलस्थितान् चक्रे शूलपाणिपराङ्मुखान् ॥ १२ ॥ भस्मरुद्राक्षसंपन्नं पांड्यभूप-
तिमातनोत् ॥ मिथिलायां द्विजः कश्चिच्छूरशर्मेतिनामतः ॥ पूगपुन्नागपनसनारिकेलाम्रशोभिता ॥ श्रीभूतिधरतेजोभिर्दीप्त
वीथिषु भूतिषु ॥ १४ ॥ गृहस्त(स्थ)धर्मनिरतै राश्रिता श्रीभिरावृता ॥ प्रकाशे मिथिलादेशे प्रथिता मिथिला पुरी ॥ १५ ॥ मिथिला
509 द्विजशूरो भूतत्रात्मजः शिवांघ्रिभाक् ॥ नीलीमसंपन्नमुग्धेंदुमौलिशंकरकिंकरः ॥ १६ ॥ मिथिलाद्विजशूरोयं भक्तानां भा-
वितात्मनां ॥ अनुक्रमपिकैंकर्यं भक्तानां सततातनोत् ॥ १७ ॥ स्वयं प्रह्वो भवं नित्यं भक्तानामर्चने रतः ॥ यथेष्टं षड्रसैर्युक्तं
भक्तं भक्तान भोजयत् ॥ १८ ॥ भूयः संतर्प्य तान् भोज्यैः प्राज्यैराज्यादिभिस्तदा ॥ भृंगांगकबरीगौरीनाथांघ्रिनलिनाशयः ॥ १९ ॥ शि-
वदास्यमसीमां तस्वी चक्रे विधिना सुधीः ॥ वक्तुं भक्ते शमाहात्म्यं भूतेशकरुणानिधेः ॥ २० ॥ सो भूत्सुंदरनाथस्य पदस्मृतिपराय-
णः ॥ सौम्यः सोमार्धचूडस्य पादपंकजसेविनां ॥ २१ ॥ पार्वतीशस्य पादाब्जभक्तिं मुक्तिममन्स्त सः ॥ एवं स्थितस्य तस्यैवं भ-
वो भावं परीक्षितुं ॥ २२ ॥ गाधिनेचो गाधिपुरमाजगामातिकुत्सितः ॥ नीचवेषेण कलशं धारयन्मद्यसंभवं ॥ २३ ॥ तन्म



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुज्ञाया मते तिष्ठं गिरिजापति पूजकः ॥ ६०॥ स्तुवेशं स्तुतिभिर्नित्यं जगाम किल कालतः ॥ कलधौतमहाशैलं शिवप्रेम्णा स्वयं तदा ॥६१॥ साचापि गिरिजापाद पद्ममूलं जगाम च ॥ एवं भस्म प्रभावो हि तव रागद हृच्छुल हस्तानुकूल ज्वालाक्षातुलपाद पद्म विलसद्वृत्त्यैव भुक्त्वा सुखं ॥ मुक्तिं चापि जगाम शंभु कृपया शूद्रो रुजाप्यर्दितो वाचां चापि पतिर्बभूव सततया युक्तो ह्यशं गं विशत् ॥६२॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे भस्म महिमा नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥
॥ श्री काशी विश्वेश्वरार्पमस्तु ॥ श्री सदाशिवाय नमः ॥ श्री स्कंद उवाच ॥ कुलपक्षस्य चरितं सर्व पाप प्रणाशनं ॥ भाग्यजन्म पदे देशे पांड्य भूपाल पालिते ॥१॥ सौर भोत्तर कुंड्याख्यं क्रमुका क्रमितं पुरं ॥ तत्रासीत् कुलपक्षाख्यो निर्मलः शूल भृत्परः ॥ २॥ हर भक्तार्चको नित्यं हरिताघोऽखिलात्मनां ॥ शंभु दास्यं तत्र भुत्वा पांड्यस्यैषाकरोत्तदा ॥ ३॥ जातश्च त्रिषु वर्णेषु निर्योवायो महेश्वरे ॥ भक्तिं बिभर्ति तत्पादे धत्ते मूर्ध्नि सदैव सः ॥४॥ यो वा कोवा पितद्भक्तो आयाति परमार्थवित् ॥ सतं नत्वा सोपचारैरन्नादिभिरतोषयत् ॥५॥ सतं नत्वा सोपचारैरन्नादिभिरतोषयत् ॥
भस्म रुद्राक्ष संपन्नं दृष्ट्वैवं प्रणमेच्च सः ॥ पंचाक्षरी मनुर्व्यक्तं तत्प्रसादं प्रणनाम सः ॥ एवं शिवार्चको नित्यं कुलपक्ष सुधार्मिकः ॥७॥ परौघजेता पांड्यस्य मंत्रिणामग्रणी भवेत् ॥ तेनैव बोधिता साध्वी महिला याच भूपतेः ॥ ८॥ शैवांघ्रिपूजन-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०४ विश्राप्तिमगद्देवो पितस्याः श्रुत्वा दिने दिने ॥ यदा तदुदरे शूलं कालाग्न्युज्वलदीपितं ॥ ४७॥ व्यवर्धयत्तदा सह्यं शूलं तदुदरे शि-
वः ॥ विह्वलस्तेन शूलेन धर्महीनजनालये ॥ ४८॥ न्यपतत्तद्गुरोशालैः कुत्सितैस्तैश्चिकित्सितैः ॥ मंत्रसिद्धाश्च ता विद्याना
लं शूलं व्यपोहितुं ॥ व्यजृंभतेव सहसा शूले हालाहलोपमः ॥ आपादचूलमामृज्य पिंछाग्रैः पिंछधारिणः ॥ ५०॥ मंत्रसिद्धा
न्स्वसिद्धांतान्संजेपुर्जैनदेशिकाः ॥ तथापि वर्धमानो सौ धर्मसेन ममोह यत् ॥ ५१॥ धात्रेयीं कांचिदा भाष्य प्रेषयत् भ-
गिनीं प्रति ॥ सा धात्रीतां च दृष्ट्वार्ती भ्रातुः शूलकृतां वदत् ॥ ५२॥ सा समागत्य ददृशे भ्रातरं शूलविह्वलं ॥ उवाच जैनान्संवीक्ष्य
S/0 भ्रातरं शूलविह्वलं ॥ ५३॥ कुमारी उवाच ॥ सर्वरोगहरं चैतद्भस्मेदं शिवशासनं ॥ अनेन संस्पृशामीदं अस्याधोदरमंजसा
॥ ५४॥ पंचाक्षरेण संजप्य शूलहस्तं हृदि स्मरन् ॥ रोद्धुमिछाम्यहं शूलं धर्मे युष्मक्रिया भवेत् ॥ ५५॥ इत्थं जैना तदा वाक्यं श्रुत्वा
जेपुस्तदंके ॥ न शांतो भूत्तदा शूलः शूलहस्तं हृदि स्मरन् ॥ ५६॥ पस्पर्श भस्मना सापि पंचाक्षरमतं द्रिता ॥ तदा तदुदरे पार्श्वे
तस्यार्धे शांतिमानभूत् ॥ ५७॥ जैना भस्मक्रियां दृष्ट्वा तदा वननकंधराः ॥ सोपयाच तद्भस्म पंचाक्षरविमंत्रितं ॥ ५७॥ ॥
भ्राता उवाच ॥ भवामि भस्मफालोऽहं जैनान्त्यक्त्वा सुखी भवे ॥ शंपि शिवस्य पादाब्जं नैतत्सं देहकारणं ॥ ५८॥ इत्यार्त्ते
नतदा पृष्ट्वा भस्मना शान्तिमानभीत् ॥ सोपि भस्मत्रिपुंड्रांको रुद्राक्षस्रग्भिरुज्वलः ॥ ५९॥ बभूव शिवधर्मज्ञः त्यक्त्वा जैन- १०४
मतं तदा ॥

2

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृहल्ली ॥ तावन्नृपतिनादिष्टः कलिवैरी रणेद्विषः ॥ जेतुं स निर्ययौ धीरश्चतुरंगबलान्वितः ॥ मत्येत्य द्विषतेयुद्धे युध्यमानेषु तैर्मुहुः ॥
पराजित्य रणे योद्धा नायुधैः स समागमत् ॥ ३३ ॥ तस्यास्ति कुलवत्याश्च जनकः कालमेयिवान् ॥ मोदनी चान्वयात्तत्र पतिलोकपरा-
यणा ॥ ३४ ॥ तयोः सा पुत्रकेणौर्ध्व देहं चक्रे विधानतः ॥ रिपुं कलिरिपुश्चोभौ सन्नद्धौ निहतौ युधि ॥ ३५ ॥ तदा कमलिनी श्रु-
त्वा निहतं कलिवैरिणं ॥ सा भ्रातृसंलिता साध्वी वैधव्यं चान्वभूत्तदा ॥ देहे स्यास्थिरतां ज्ञात्वा तद्भ्राता धर्मवान भूत् ॥ अर्च-
यित्वा महेशानं अर्थिनोभ्यर्च्य यद्धनैः ॥ ३७ ॥ प्रावर्त्तयदमोघश्रीरन्नशालामठं नपि ॥ कृतारामतडागाश्च शिवगोपुरवंधनैः ॥
॥ ३८ ॥ चातुर्वर्ण्यं तथा भक्तांन्नन्नदानैरतोषयत् ॥ तमो रिपुः स्वच्छचित्तो पश्यन्संसारिकीं रुजं ॥ ३९ ॥ अहिंसानिष्ठहृदयः श्रौत-
द्विट्चार्हतोभवत् ॥ हित्वा बंधुं ततः सापि तदा तिलकवत्यपि ॥ ४० ॥ सहैव जातीरनिलयं वीरस्थानेश्वरं गता ॥ मठं तत्र विधा
यैव नीलकंठपदार्चका ॥ ४१ ॥ प्रागेवार्कोदयात्तां सून्मार्जन्या परिधूयसा ॥ धेनोश्चिरप्रसूताया गोमयेनोपलिप्य गां ॥ स्वहस्त
लूनैः कुसुमैः ग्रथित्वा चन स्रजः ॥ स्वयमभ्यर्च्य संलिंगे ददौ वीरेश्वराय सा ॥ ४३ ॥ एवं सा शैवकैंकर्यनिष्ठशिष्ठतमा सति ॥
निनाय वासरान्मासान्हायनान्नयनाश्रुभिः ॥ ४४ ॥ श्रुत्वानुजं जैनमार्गस्थितं दुःखाकुला भवत् ॥ तद्दुःखतप्ता सा नित्यं विरूपाक्षं
व्यजिज्ञपत् ॥ ४५ ॥ कुमार्युवाच ॥ विरूपेश शंभो मयि यदि ते करुणा शिव ॥ ममानुजो बलाद्देवस्थाप्यः शैवपथि स्थिरः ॥ ४६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०२ श्रमाश्रये ॥१६॥ यत्र भुग्नकलग्नेन यौवने न समन्विते ॥ विपदामपदेशं भु भक्तिसिद्धैकवर्त्मनि ॥१७॥ चतुर्थे जातिधौरेय भक्तधु
र्यो भवत्तदा ॥ हलहल्लो हलो द्रूंच सं यदामानिता तिथिः ॥१८॥ कीर्त्तिमान्कीर्त्तिमान्नाम बंधुमित्रप्रियो भवत् ॥ यौवनालंकृतां
गस्य तस्य कीर्त्तिमतो भवत् ॥१९॥ गृहीणी मोदिनी नाम कौमुदीव कलावतः ॥ वारिधेर्वेल्लयेवासीत्सरला विरला तदा ॥२०॥
सत्यां कीर्त्तिमतस्तस्यां कन्या सीत्कमलावती ॥ शुभोदयासाव भूवकमले वामलाशया ॥२१॥ माता पित्रो र्मुखांबुजस्य विकासि
रविसुप्रभा ॥ यथा मेनाहिमवतोरुमेवै नाम पोषयत् ॥२२॥ विद्याहृद्यतमेवाभूत्प्रिय शिष्ये गुरूदित ॥ तमोनिवारको नाम्ना
S११ मोदिन्यां कोप्य भूत्सुतः ॥ कीर्त्तिमान्सह मोदिन्यालब्ध भव्यतनूजया ॥ अमन्यतान्वयं स्वस्य स्पृहणीयमिवोन्नतं ॥२४॥
शुभांग लक्षणः सोयं जातकर्मादि सत्कृतः ॥ पितुर्दृत्तस्यसवो धाय सुतो विद्यासमग्रहीत् ॥२५॥ क्रमात्कला विरुद्धो भूत्कला
धर इवोद्यतः ॥ गुरूणां विस्मयं कुर्वन् पुष्पवृष्टिमिवे दुवत् ॥२६॥ कन्यां तिलकवत्याख्यां दातुं द्वादशहायनां ॥ प्रवरायानु
रूपाय वराया चितयत्पिता ॥२७॥ शुद्धः कलिरिपुर्नाम्ना मंत्रिवर्यो महीपतेः ॥ पूर्वसंबंधशोभी च शिवपादाश्रयिराशयः ॥
॥२८॥ आत्मीयान्कीर्त्तिमान्पुत्रीं वरितुं प्राहिणोद्द्विजान् ॥ कीर्त्तिमंतिं चते प्राप्य बव्रिरे कन्यकां च तां ॥२९॥ संभाव्य कीर्तिमान्प्रीत्याबांध १०२
१ वान्कलिवैरिणः ॥ तस्मै स्वतनयामेनां दास्यामीत्य वदच्च तान् ॥ कन्यापितृमतं श्रुत्वा प्रययागत सुहृन्मुखान् ॥ कलिशत्रुः स हृष्टो भूत्तद्दर्शनकु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्रीस्कंद उवाच॥ कथयामि कथां पुण्यां वागीशस्य महात्मनः॥ कश्चिद्दत्यग्रबालेति विषयस्तिलको भुवः॥१॥ विलासभवनं लक्ष्म्या महीमं-
डलमंडनं॥ यस्मिंजनपदे सर्वे हारा एव विहारिणः॥२॥ भस्मसंपन्नफालास्ते महारुद्राक्षवक्षसः॥ यस्मिन्कुटुंबिनां सौधे चरंतोंदौ विधुं
तुदाः॥३॥ संदिग्धेग्र सितु मायो मध्ये सुभ्रु मुखावली॥ वेणीपुष्पसमुत्क्षिप्तैः नानापुष्पमणिव्रजैः॥४॥ विभूषा हालिकस्त्रीणां
यस्मिन्कृषिकलाजुषां॥ यत्र कुल्या सुकादंबमाध्वी पुंड्रेषु पर्वसु॥५॥ मुक्तासीता सुकल्हारसरस्सु कमुखा बहिः॥ यंत्रेक्षुकांडखंडो
द्यद्रससारेण भूमयः॥६॥ नदीमातृकतां यांतिर ससस्यादिसेतवः॥ यत्र कांतागलोल्लासिक्रमुकाक्रमितं फलं॥७॥ गृहीत्वालिकुच
द्वंद्वं कुचवल्कठिणं जहुः॥ महिष्यो यत्र वापीषु घनपंक्तिर्वर्णवे॥८॥ निमज्ज्यंत्यो ज्झपोल्लोढैः दुग्धैरुल्कलयंतिताः॥ यत्रारामतरु
स्तोमसीमासंस्थौ विराजतः॥९॥ पुष्पवंतौ महीशाखी भुजाग्रा लिंगताविव॥ सौरभीजुषि केदारे मेरुवद्व्रीहिराशयः॥१०॥ यत्र
होलिकसौधेषु मिलंति शिखिनों बुदैः॥ यत्र सुंदरवागीशावतीर्णौ शिवाज्ञया॥११॥ जगद्धितायहंतास्य माहात्म्यं के न वर्ण्यते॥
तस्मिन्सत्यग्रपालाति विषये विश्रुताशये॥१२॥ नाना पुरेषु तेष्वेकमासुरारव्यं महत्पुरं॥ यदीयपरिघां चक्रे पंकजारव्यां गजासति॥१३॥
कर्त्तुमभ्युद्यता नीववप्रयुद्धं वधूसुखैः॥ यद्विशेषफणीरत्नविशेषैः पाटलोत्पलैः॥१४॥ पौरतेपरिघां चक्रे दिवो बिंबमिवेक्ष्यते॥
नरः स्त्रियः सुरस्त्रीभिर्यत्र सौधेषु सर्वदा॥१५॥ दिव्यभौमपदार्थानां क्रियंते क्रयविक्रयौ॥ आमूराख्ये पुरे तस्मिन्चातुर्वर्णी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 तदा समपाकरोत॥ परीक्षितुं समुद्युक्तो देव्या भावं तपस्थितः॥ ९९॥ स गिरीवोदेव भक्तस्य भावं वेदितुमागतः सदान-
१०२ कृशमलिन कंथां कस्कंधः सवृद्धतापसः॥ ९०॥ तंतदा शिशिरे काले प्रपेदे रसवलस्पदः॥ सदृष्ट्वा भस्म दिग्धांगं तं प्रणम्य कृतांजलिः॥ ९९॥ कुशलो त्स्या प्रसाद्येनं रजकः अ० ४२
स: प्राह हर्षितः॥ ॥रजक उवाच॥ ॥नाथ कार्य्यं तव कथं कंथा चेयं मलीमसा देहि मां विमलां कुर्यामित्युक्तस्तं स चाब्रवीत्॥ १००॥ ॥भिक्षुरुवाच॥ ॥नान्या मेऽस्ति कुतः कं-
थाऽयथाहं त्वां समागतः॥ न ददामि त्वमद्यैव धौतां कृत्वा ददासि चेत्॥ १॥ यदि दास्यसि सद्यो मे तदा नोऽस्या ततुव्ययः॥ इति कंथां विभुस्तस्मै तथेति ब्रुवते ददौ॥ २॥ रजको
विमलं कर्तुं तदा कंथां समुद्यतः॥ अन्यैर्मलैस्तां संयोज्य पक्वा कुंभ्यां सपाकतः॥ ३॥ धोतुं पाषाणमौलौ तां याबन्निक्षिपते तदा॥ तावच्छिवाज्ञया मोघमेघा श्चक्रुव वृष्टिं-
रं॥ ४॥ वृष्टिर्न विरमत्येषा सीता मारोरुवातका॥ सीतार्तोऽथ कथं भिक्षुर्हा हा हंतान्हतोऽस्म्यहम्॥ ५॥ व्यतीता प्रोक्त वेलापि धौत कंथा न शुष्यते॥ अन्यानि मम वा
सांसि न गृह्णात्येव भिक्षुकः॥ ६॥ वस्त्राघातमहाग्रावि शिरः स्वं घातयाम्यहम्॥ इति भक्त शिरो ग्रावि यावता घातयत्यसौ॥ ७॥ तावद्दृढं धरो ग्रीवां तस्य हस्तेन शी-
लयन्॥ अपालयत्फालनेत्रो रजकं भावान् भवः॥ वृषारूढस्तदा देव्या ववंदे सोऽपि भक्तितः॥ तं धीरोऽसि त्वपि वदन् गलागं मम सांप्रतं॥ कैलासं रजक श्रेष्ठ व्रज पत्न्या सु-
तैः सह॥ सुखी भवेति देवेशो जगामै काम्रमूलगः॥ १०॥ सूत उवाच॥ जन्माहितं देवदयाविशेषैः विचारभृत्यो पि विधूय बंधं॥ स चैकदंताद्यभिपूज्यमानः स्वकाम्रधामेश्वर
धाम भेजे॥ विचारभक्तस्य विशिष्ट भक्तेर्विचारयुक्तैरभिवंद्यमानम्॥ विशिष्टमेतच्चरितं पवित्रं पठंति ये यांति परं पदं ते॥ १२॥ ॥ ९॥ ॥इति श्रीशिवर-
हस्ये सप्तशिवाख्ये नवमांशे द्विचत्वारिंशोऽध्यायः॥ ४२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवायनमः॥ ॥छ॥ ॥ १०२

S/2

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्यप्राकाररक्षकः ॥ ८५ ॥ त्रिशूलपाणिरंभोदनिभो मुखरनूपुरः ॥ निशीथे रक्षति चरन् भैरवो

भैरवारकः ॥ ८६ ॥ यत्र पश्यंति भूतानि प्रविष्टस्तं पुनः पुरे ॥ न पश्यामि यथा धामन तद्यत्रापि द्दश्यो

शिलाकाञ्चनतत्रास्ति मुक्तिदानेकवर्त्मनि ॥ यत्किंचित्पतितं यस्यां वस्तु तत्कनकायते ॥ ८८ ॥ तत्र

पाषाणिदेव्यास्तु सत्य संति महीतले ॥ देवोनुकंपमेकाम्रमूलेतिष्ठत्य माचितः ॥ ८९ ॥ कदाचित्तत्र का

लाख्यो चोलेंद्रस्तत्र आगतः ॥ शिवकैंकर्यनिष्णातो निधिमसु कांचनाचलम् ॥ ९० ॥ कांचीमालो

क्यहृष्टात्मा कांचिंतामणिसद्युतिम् ॥ तां पुरीं प्राप्य कामाक्षीकामुके भक्तिमानभूत् ॥ ९१ ॥ यत्र

विष्णुर्महादेवं समाराध्यावसत्सदा ॥ तां योजनप्रमाणेन द्दिशासु च चतसृष्वपि ॥ ९२ ॥ अकरोत्प्रा

ग्राकारं हर्म्यमाकारगोपुरम् ॥ नानावर्णजैनैः पूर्णं कृत्वाश्चर्यकरीं पुरीम् ॥ ९३ ॥ ततो देवाज्ञया

मेरोः निदध्ये निजलांछितम् ॥ तत्र कांचीपुरे काश्चिद्द्विजकान्वयशेखरः ॥ ९४ ॥ शिवतद्भक्तपादा

ब्जसेवनस्थिरमानसः ॥ विचारभृत्यनासाभूद्भूतवस्त्राण्यनेकधा ॥ ९५ ॥ निर्व्याजकः सदास्त्री

भिर्नितरेषां कदाचन ॥ सभक्तानां यदादेशवाससांक्षालकः सदा ॥ ९६ ॥ स्वेदमालिन्यजातस्यस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ कल्हार त्रयमप्येवमेवते ॥ ७४ ॥ इत्याश्चर्यकरीतत्र जागर्तिस्विन्नापिका ॥ दुर्विनिमिदं तीर्थं सदान०
१०१ तीर्थं देवाभिरक्षितम् ॥ ७५ ॥ यत्रास्तेकामकोष्ठस्य दक्षिणे कचैश्वरः ॥ महीनिदर्शनं तीर्थं अ० ४२
मस्ति लोके क निश्रुतम् ॥ ७६ ॥ कांचीदामपितां भोधिः भूचक्राकारयोगतः ॥ रक्षंत्यासर्वधर्मा०
णिदिव्याश्रीमंदिरेशुभे ॥ ७७ ॥ कामकोष्ठे सदाहृष्टे प्रादक्षिण्यार्कचंद्रको ॥ शिवच्छाया विप
र्यासा दिशः प्राच्यादिषु क्रमात् ॥ ७८ ॥ निर्णेतुं न हि शक्यंते सर्वैरद्यापि मानवैः ॥ कामाक्षीरक्षते
S/3 तत्र धार्मिकं पासरित्तटे ॥ ७९ ॥ कामिकाचीं तरुच्छायासंध्ययोरविकारिणी ॥ यत्र कृत्वात
पो देवैः कृतकृत्यैर्महर्षिभिः ॥ ८० ॥ समर्चितान्यनेकानि शिवधामानि सत्तम ॥ शरासनमनाल
क्ष्यसान्निध्ये तत्र तिष्ठति ॥ ८१ ॥ संदृश्यते ये मनुजैः तेषामायुर्विवर्धते ॥ पुण्यश्रावककमांगल्पती
र्थान्यन्यानि संति च ॥ ८२ ॥ एकनालांम्रपयात्र कापि रक्तसुपद्मिनी ॥ आश्चर्यकारिणी फुल्लह
ल्लकारुणगंधिला ॥ ८३ ॥ मज्जातामयहंत्री स्यात् पुण्यदात्री ससौरभा ॥ बिलं तत्र प्रविशतां
स्वर्गमार्गगतिप्रदम् ॥ ८४ ॥ तत्र पालयति द्वारं पंचहस्तो गजाननः ॥ षडाननः शक्तिधरो वा १०१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्षत्सु देव पुष्पेषु नेदुर्दुंदुभिकोटयः ॥ ५५ ॥ कंपानदीननामिनामंबिकामनुकंपिनीम् ॥ मृदुलस्वच्छसौभाग्यवरं वेषसदा शिवः ॥ ५६ ॥ शिव उवाच ॥ ॥ वरं देवि वृणीष्वेति प्राह देवीं तदाब्रवीत् ॥ प्रांज
लिः पादयोः शंभोः प्रणता शांभवी तदा ॥ ५७ ॥ ५८ ॥ देवी उवाच ॥ ॥ निरुद्धसारे दोषेन न समाप्तं ल
दर्चनम् ॥ वर्त्तयिष्यामि तद्रूपा मत्प्रियः स त्वं प्रसीद मे ॥ ५९ ॥ अस्यां निःसीमसंपत्यां कांचीपुर्यां दिवा
निशम् ॥ करिष्याम्यखिलान्धर्मान्भवत्पादलसन्मना ॥ ६० ॥ क्रियावन्तोऽत्र सर्वे स्युः फलैर्धर्मैश्च
संयुता ॥ इति लोकेशमातेशं ययाचे शैलनंदिनी ॥ ६१ ॥ भोगींद्रभूषणो देवो तस्यै स्वार्धांगमादधत् ॥
भुवनत्रयबीजार्थसिद्ध्यर्थं धर्मसंततेः ॥ शान्तिप्रस्थ इदं देव्ये ददुः सर्वेऽपि शांकराः ॥ निर्दोषास्युः सु
कर्मणा इति भूयो वरं ददौ ॥ ७१ ॥ ॥ सूत उवाच ॥ लब्ध्वा वरान्सा गिरिशान्नगेंद्रजा त्रिलोकसं
रक्षणकारणाय ॥ श्रीकामकोष्ठैविभवैकधाम्नि द्वात्रिंशतं पालयति स्म धर्मान् ॥ संत्यन्यान्य
द्भुतान्येव देव्याश्री सदने शुभे ॥ ७२ ॥ आनर्णैश्च नम्लानैः फुल्लहल्लकमंडितैः ॥ शारदा दोस्था
पितोऽयं चकास्ति शारदां शतम् ॥ ७३ ॥ व्यनक्ति द्विविधं चापि लोकानां भाविलक्षणम् ॥ प्रत्युद्यमेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ अमनायसंकुलताना लोकत्रैकविभवेकरनेनमस्यामः॥ एकाम्रमूलनिलयादि नवीति होमसो मां नकोसदानं- १००

दखिल पूर्वसुरांतकर्तुः॥मन्ये शिवान्यदिह देवत मादिमध्य जगतो नाशंकराच्छंकरान्॥ ४५॥ सूत उवाच॥ ॥ ॥ अ०४२

जगन्माता पतिस्तु त्वा काले कालांतकांतकाम॥ नायके चूतमूलस्थे गाढप्रेमजधिये॥४६॥पा

न्योरिदं फलमिति शिवमानर्चतान्वहम्॥ दुल्यर्चितो बहुभिर्म्या कृपांकर्तुं तदेश्वरः॥४७॥सम्प्राणवामि

वो कूलामोघौ कंपान शंभरेः॥ दृष्ट्वा स्वपतिना हृष्टा तदो चंकाम लोचना॥ ४८॥ अनेनात्यहितं

5/4 शंभोः स्यादिति व्यथिता भवत्॥ कराभ्यां लिंगमालिंग्य तरिनीतर विप्लवे॥४९॥ ब्रुवंतीनाथना

थेति मन्मथांतकमीश्वरी॥ कूलंकंपा तरंगिण्या मूले चूतमहीरुहे॥ ५०॥ दुकूलसंवृतांगी सामूस

लिंगं परिष्वजे॥ कामाक्षी तत्र कामारिं चकार कुचमुद्रितम्॥५१॥ शिवा कुचाभ्यामाश्लिष्टो गा

ढं दृढतरो मृडः॥ कंपा शंपा पार्श्ववेगेन क्वणत्कंकणहस्तया॥५२॥ स्थाणुर्मृदुलतां प्राप्य शिवःस्मेरमु

खश्रिया॥ करींद्रचर्मवसनकर्कशांगोपि कामजित्॥ ५३॥ प्रादुरासीच्छिवाश्लिष्टः शिपिविष्टो १००

ऽष्टमूर्तिमान्॥ दिव्यां देवस्पां दृष्ट्वा परिरंभणसंभवाम्॥ ५४॥ अंतर्हिताशयासर्वा जहृषुर्जीवकोटयः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शांताशया प्रणम्येनं बिंबोष्ठी लंबकुंतला ॥ इत्थं मनो दधौ तस्या भक्तभर्तुः समर्चने ॥ ३५ ॥ सा शि
वागमसारज्ञा शिवाभ्यर्चन कारणात् ॥ पुरस्कृतापत्रपुष्पपाणिभिश्चेटिकाजनैः ॥ ३६ ॥ पादाभ्यांप
स्नवाभ्यां प्राप्याद्यानं स्वयं शिवा ॥ पुष्पाणि पूजार्हाणि तानिहद्यान्यपाचिनोत् ॥ ३७ ॥ अभिषिच्य
शुभैस्तोयैः कृपासरिदुपाहृतैः ॥ सुगंधिभिश्चंदनाद्यै रुपलिप्य च चंदनैः ॥ ३८ ॥ अलंकृत्याहृतैः
पुष्पै धूपदीपादिभिस्तदा ॥ हृद्यैर्नैवेद्यजालैश्च फलतांबूलकैस्तथा ॥ ३९ ॥ नीराजनारार्त्तिकैश्च क
पूरोज्वलदीपकैः ॥ प्रदक्षिणप्रक्रमणैः स्तुत्यादेवमतोषयत् ॥ ४० ॥ ॥ पार्वत्युवाच ॥ ॥ शंभो
रसालवरमूलगृहस्तशूलव्यालांगमालजितकालत्वलामसोप ॥ गंगारसालरयचुंबिजयालवाल
श्रीकंठमूलभजतामघमारिशील ॥ ४१ ॥ एकाम्रमूलनिलयं भुजगाधिराजराजत्किरीटवलयं सद
यं सदैव ॥ अत्यंतमेव भजमानजनालिरंगे नृत्यंतमाशु गिरिशं परिशीलयामि ॥ ४२ ॥ एकाम्रमूलनिल
यं भजतामनेकजन्मार्जिताघविनिवारणकारणं तत् ॥ तेजः श्रयामि शिवमद्य शिवेतराणां निर्णोदनैकनि
रतं वरितं जगत्याम् ॥ ४३ ॥ एकाम्रमूलनिलयाय दयालयाय पापसंसारघोरवरुणालयतारणाय ॥ तापत्रयाप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 त्याह शंकरः॥ स्मेराननं तदा रम्या देवी प्राह तदर्चनम्॥२४॥ ॥देव्युवाच॥ ॥कर्तुं कामयते सदा न
९१ चेतसत्वदुक्तागमवर्त्मना॥ देवि दक्षिणदिग्भागे कांच्यां धर्मैक धामनि॥२५॥ ॥ईश्वर उवाच॥ अ०४२
एकाम्रधामनिलयं मामर्चय महेश्वरि॥ इत्यादिशन्महादेवो महेशानीं रमानिधिः॥२६॥ दध्यौ मनः त
थासंवित्सा च शंभोस्तथात्मनः॥ तत्तथा चतुराशीतिलक्ष जीवात्मनः प्रभो॥२७॥ मुखेन कथितं तत्र
वेदमार्गे विवृण्वती॥ आत्मनापकमानम्य सा जलिः साथ निर्ययौ॥२८॥ पर्वतेंद्रश्च तां प्राप्य तस्यै पौर
जनं ददौ॥ कांचीं सा च ययौ देवसिद्धविद्याधरस्तुताम्॥२९॥ पद्मनाभ मणीं तत्र प्रणम्यैना
मुवाच ह॥ ॥हरिरुवाच॥ ॥देवि भूतलमेतन्मे भवत्या भवनं शुभम्॥ भवत्विति तदा तस्य वा
क्यं चैवान्वमन्यत॥३०॥ सर्वस्य प्राणिजातस्य देवी तत्र विभूतये॥ चंद्रशेखरमानर्च्य कृपा नाथ
मनासती॥३१॥ सिद्धः सन्नपि सर्वत्र स्वैर क्रीडः परः शिवः॥ तस्यैवात्मानमद्वंद्वं जगन्मूर्त्तिरदर्शयि
त॥३२॥ कांक्षंती मनसा द्रष्टुं कामाक्षी त्वपि सा शिवा॥ पंचाक्षरलसद्वाणी प्रवृत्तात्मा तपस्य भू
त॥३३॥ स हो तत किं तदा त्मेश श्चूतमूले तयेक्षितः॥ तपः फलं सा दृष्ट्वैवं जहौ शृंगार भावनम्॥३४॥ ९१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न यद्दिवारि सुरभिस्तनस्नुतपयोपमा ॥ ११ ॥ यत्र क्षीरापगा पार्श्वे वहंती वकुषी वलात् ॥ यत्रो द्यानव
ने वाह्याश्चंदनामोदिवायवः ॥ १२ ॥ रंभा चंपक जंबीर हिंताल ल्याम्राजुनैरपि ॥ वेदशास्त्र महावादैः व
र्धितैः वह्निधूमकैः ॥ १३ ॥ आविर्भवद्दार्विकायाग्रामासंग्रामवर्जिताः ॥ यत्र द्विजा लभन्नाभूत्वा देनि
नल्याहव्यपुरे ॥ १४ ॥ तपसि स्थितवत्यस्मिं दैत्यसंरक्षणादुमा ॥ वह्निरूपं शिवं शांतं क्रौर्यं चक्रे दयानिधिः ॥ १५
शौरिलाभाह्वये शंभो र्यत्र धाम चसंमतम् ॥ यन्नमुक्तामयाकारा श्रीपाशपुरशंकरः ॥ १६ ॥ जगत्प्रसूते यस्या
सौ जननी वे प्युवल्लरी ॥ यत्राधिपुरमेकांतमुमाकांतस्य संमतम् ॥ १७ ॥ मयूरपुर वाल्मीकिपुरमल्लपुरा
णि च ॥ तुंडीरमंडले तस्मिन्वर्णनाशक्यवैभवे ॥ १८ ॥ अस्ति सर्वयुगो त्कृष्टा पुरी कांचीति विश्रुता ॥ सस्या
वृतक्षेत्रयुता सर्व लोकाभिनंदिता ॥ १९ ॥ प्रत्यक्षं यत्र दाश्चर्यप्रभावाय प्रकाशते ॥ आत्मीयं नायकं यत्र दया
सारंकुचाश्रयैः ॥ २० ॥ उपचारैः समानर्च नैर्सौ भुतिसमीरितैः ॥ रक्षराक्षसत्रस्तां धरित्रीं धर्मगोपनैः ॥
यथामति पुरस्यास्य माहात्म्यमपि वर्ण्यते ॥ त्वं गंगाजटाजूटं कैलासनिलयं पुरा ॥ २२ ॥ नत्वा नाथमुमाध
र्मनश्रृण्वोल्लोकनायिका ॥ सर्वधर्मा श्रियं तस्मान्नस्य लिंगसमर्चनम् ॥ २३ ॥ तामर्चनो भुरवीं किं ते पूजये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ श्रीकाशीविश्वेश्वसदा० न०
९८ र्पणमस्तु ॥ ॥ श्रीसदाशिवायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ उक्तं विचारभक्तस्य कथ्यते अ० ४२
ऽद्यमया कथा ॥ जननी व्यस्तशस्तां श्रीवस्तुमस्याद्यविस्मृतिः ॥ १ ॥ पापानां खंडनं यत्र मंडनं च भुवो द्वि
जः ॥ डिंडिरानिभमृत्सारमस्ति तोंडीरमंडलम् ॥ २ ॥ जननी जीवनानामंसर्वेषां सर्वमंगलाम् ॥ परिरब्धुं
शिवा यत्र चकार सुमहत्तपः ॥ ३ ॥ तादृग्गेव्यात तपस्थानं भवितुं यत्तपो व्यधात् ॥ यत्र सर्वेऽपि मद्यस्था
S/6 मध्याचाराः प्रतिष्ठिताः ॥ ४ ॥ यत्रैव कृतिनः सर्वे सुकृतां राशयो द्विजाः ॥ भवंति गृहिणो यत्र संदेव गु
हिणोपमाः ५ ॥ दशनानाविधोद्दाम धाम प्राकार संवृताः ॥ कालिको ज्वलकंठश्रीश्रीकंठोत्कंठ
पाशिवा ॥ ६ ॥ द्वात्रिंशद्धर्मगो प्रीतिगाथा यत्र च विश्रुता ॥ यत्र श्रीकालहस्त्यद्रिशृंगारपुरयोषिताम् ॥ ७ ॥
केशभृंगा व्याधवधूकच लग्नानपाति च ॥ वृषारण्ये च पूजार्थं सुराश्चाप्सरसोऽपि च ॥ ८ ॥ शबराश्च
शबर्यश्च यत्र जाता यशस्विनः ॥ श्रीकंठशैलशृंगाग्रसरसीष्वमरीगणः ॥ ९ ॥ विहरंति शबर्यो यत्सा च
नाडीरभून्नतिः ॥ गंगा गंगाधरस्यैव मज्जनार्थं महीतलम् ॥ १० ॥ तमुद्भिद्योऽद्यता यत्र नगरे कुलिशाह्वये ॥ ९८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्याशाचो त्वत्कृतज्वाल्यते नलः ॥ प्रवेष्टुमहस्यचिराद्देहमुन्मुच्य पायजम् ॥ ४५ ॥ पुरेस्मिन्भक्तवर्या
द्य त्वचंग्रीणीमिवाग्रः ॥ इतितैः ससमादिष्टो हर्षोत्कर्षाश्रुलोचनः ॥ ४६ ॥ कृतार्थोस्मीतिता नुक्त्वा प्रविष्टो
ग्निमहेश्वरम् ॥ विचिंतयंश्च मनसा सनृत्तेशपदांबुजः ॥ ४७ ॥ प्रविष्टमात्रो वह्नौ स उत्पपातोपवीतवान् ॥
द्विजवर्यं वपुर्धृत्वा भस्मरुद्राक्षभूषणः ॥ ४८ ॥ पुष्पाणि ववृषुर्देवा नेदुर्दुंदुभयोदिवि ॥ तिल्लद्विजावैने
मुस्तेद्विजं तं हर्षनिर्भराः ॥ ४९ ॥ सद्विजोऽपिद्विजैः सार्धं पुरमागात्सभापतिम् ॥ दृष्ट्वा संतुष्टहृदयो ननर्तानंद
निर्भरः ॥ ५० ॥ यं हीशान दयानिधान भगवन् हेमोत्तमांगोल्लसन्नाट्या डंबरनिर्जिताखिलजगत्लुट्यन्महो
डुच्छ्रहम् ॥ त्वां दृष्ट्वा मुनयः सुरासुरनराः प्रापुः विमुक्तिं पराम् ॥ नोजन्मादिक विभ्रमं भवतु मे त्वत्पादपद्मं
प्रभो मच्चित्तभ्रमरः पिपासति हृदा त्वत्पादपंकेरुहम् ॥ इत्युक्त्वा सतिरोधत्त तस्मिन्हेमसभांतरे ॥ भक्ते
ष्वानंदमग्नेषु साश्चर्येषु द्विजेषु च ॥ ५२ ॥ स्तुवत्सु सुरवृंदेषु हर्षश्रोतो प्लुतेषु च ॥ स तदा माप्य सायु
ज्यमिज्याद्येरपिदूरगम् ॥ ५३ ॥ आकाशो भासतः शंभोः ज्ञातकुंभसभापतेः ॥ श्वोगंतु नाम्न श्चरितं विचि
त्रं त्रिनेत्रभक्तिप्रदमुक्तिसारम् ॥ शृणोतियः संततमादरेण स भानटेशस्य पदं समाति ॥ ५४ ॥ ॥ इति ॥ ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १ द्विसमयानां स्वभावहम् ॥ ३३ ॥ मल्लीमल्लीसुमल्लीभिः वेष्टितं तिल्लभूरुहैः ॥ अन्यैःशाखिसमूहैश्च मृसदा·न·
९७ ॥ पक्षिगणो ज्वलम् ॥ ३४ ॥ अत्यंतदक्षशफरिवापीशतविराजितम् ॥ श्रीतिल्लनगरोपांतं प्रापशंकरकिं अ·४१
करः ॥ ३५ ॥ तत्रैव नत्वा चोत्थाय स्थित्वोपांतं ददर्श सः ॥ त्रेताग्निधूमपटली वेदघोषान्मठे यतीन् ॥ ३६ ॥
पुरस्य तस्य माहात्म्यं स्वकुलं च समीक्ष्य सः ॥ भीतः प्रविष्टुं सहसा सहसादिविदूरतः ॥ ३७ ॥ पुराद्बहिःस्थितो नित्यं
पुरं चक्रे प्रदक्षिणम् ॥ स्थितिं श्रुत्वाहिताग्नीनां त्रिसहस्रद्विजन्मनाम् ॥ ३८ ॥ प्रवेष्टुं न मया शक्यमिति स्ववर्त्ति
517 तसो बहिः ॥ कृतावासःस्मरन्देवं गोपुरं तद्विलोकयन् ॥ ३९ ॥ इति तत्र दिवानक्तं पुरं चक्रे प्रदक्षिणम् ॥ कुर्व
न् खिन्नमनाः शिक्ष्यधिग्जन्मेति विचिंतयन् ॥ ४० ॥ नृत्येशदर्शनोत्कंठे कुंठितात्मजनुस्तदा ॥ तं
दुःखितं महादेवो भवो भक्तार्त्तिनाशनः ॥ ४१ ॥ स्वप्ने प्राहान्त्यजं गत्वा त्यज त्वं वै कलेवरम् ॥ लोकोपचायिते येन जन्म
नात्ते तनुं त्यज ॥ ४२ ॥ त्वं मे भक्तोऽसि नृत्तं मे द्रष्टुं विलोकय माचिरम् ॥ स हेमगोष्ठीनिष्ठं स्वं नृत्तं तस्मै प्रदर्श
यन् ॥ ४३ ॥ द्विजानथागतस्वप्ने हरः प्राह दयाघनः ॥ ॥ शिव उवाच ॥ ॥ कश्चित्प्रवेक्ष्यत्यनलं त
द्रक्तं तोयपश्यतः ॥ श्रुत्वा शिवाज्ञां ते प्रातः दृष्ट्वांत्यजमथ द्विजाः ॥ ४४ ॥ ॥ द्विजा ऊचुः ॥ रे रे शिवा ९७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवकैंकर्यधूर्वहः ॥ श्रीकांजवनेशस्य द्वारि देवालयस्य सः ॥ २१ ॥ गत्वा स्तुत्वा शिवं नत्वा प्रार्थयामास भक्ति
मान् ॥ ॥ चण्डाल उवाच ॥ ॥ शिवाभिधानरहितं वंदनं तव मास्त्विति ॥ तस्यानंदतवो नृत्तं वीक्षितुं
शंकर स्वयम् ॥ २२ ॥ उमापतिः पुरस्थं तं नंदिकेशं तदाब्रवीत् ॥ ॥ शिव उवाच ॥ ॥ पार्श्वे त्वया धे-
नुसुतस्थीयतामित्य शादरः ॥ तथा स्थिते द्विजे तस्मिन् देवेशमनुदर्शनम् ॥ २३ ॥ नत्वा स हृष्टस्तं भेरीमुख चर्माणि
कं ददौ ॥ मर्द्दलानां स ततमपि ध्वनिं पुष्कलमातनोत् ॥ २४ ॥ पुरो गतस्थलं दृष्ट्वा तटाकमखनत्तदा ॥ प्रदक्षि
मा णप्रणामैर्देवं नृत्तैरतोषयत् ॥ २५ ॥ स्वकैः प्रत्युद्गतो वर्गैर्निजं प्रापनिकेतनम् ॥ इति प्रत्यालयं शंभोश्चर्म वाद्यान्यथा
तनोत् ॥ २६ ॥ दर्शनोल्लासिहृदयः शिवं तिल्लपुरेश्वरम् ॥ विधेवेशेनांत्यजनोऽपि द्रष्टुं संनिदधे मनः ॥ २७ ॥
रात्रावनायातगतो स्वांगतास्मित्यचिंतयत् ॥ प्रभाते कार्यमाणां कुर्वन् रुद्धो हि बंधुभिः ॥ २८ ॥ एष प्रयाणविघ्नो
हि शिवस्याज्ञेति चिंतयत् ॥ मातृत्र भक्तिसंदेहो नंदी मुदितमानसः ॥ ३० ॥ ततः स तिल्लनाथस्य प्रणामोल्लासिमा
नसः ॥ अविचार्य निजापत्यदारान् बंधून् यथांत्यजः ॥ ३१ ॥ निरगात्कंजनगरा न्मनोमारुतरंहसा ॥ आदूरत
शिवातुंगगोपुराणि ददर्श सः ॥ ३२ ॥ सत्यज्ञायां ततस्ताश्चाचिताभस्मविभूषितः ॥ त्र्यक्षस्य पुरमद्राक्षी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केदारं तोच्च सेतुषु॥ क्वाचित्प्रकाशते श्रेणी निःश्रेणी स्वर्गमार्गिणाम्॥७॥ द्विजानां प्राज्यवेदानां तद्दंते निष्कुटाबहिः॥ सदा.न.
९६ श्वकुक्कुटैर्विचरितं अंत्यजानां गृहावलिः॥८॥ तृणाचितैर्जीर्णगृहैरत्नानुतिलकातैः॥ सूकरप्रांतचरितैः कु अ० ४१
क्कुरैः सारमेयकैः॥९॥ दृश्याद्दृश्य मनुष्येपि सारमेयरवाकुले॥ सासृक्पंकेष्वं कणेषु विक्रयक्रयकृत्तिषु॥१०॥
उपरिभ्रांतगृध्रेषु समृद्धोकगंधिषु॥ निरुद्वासमाने निद्राणे चर्मणास्तृतभूतले॥११॥ भवंति बोधिता पत्रशिवा
कुक्कुटकूजितैः॥ मधुपीत्वांत्यजा मत्ता गायंतो यत्र निर्भयम्॥१२॥ क्वचित्छायासु हेरंड वृक्षाणां चर्मणास्तृते॥
वन्यधान्यावहननैः नयंति किलबालकाः॥१३॥ शुष्कमद्रूयावृततले मक्षिकायूथभूषिते॥ पक्वणे निक्वणं नाद शृंगवेणु
कृतस्वनैः॥१४॥ पललारुणितानम्र बालकैर्हस्तभूषितैः॥ ग्रामकर्मकरः कश्चित्तत्रानंदाख्योंत्यजः॥१५॥ जातमा
त्रसमुत्पन्नो भवपादाब्जभावनः॥ नंदोन्यकर्मकर्त्तापि त्यक्त्वा बाह्यान्मनोरथान्॥१६॥ शिवमेव परं मेने तत्तदास्याव
शिताशयः॥ कृतस्थितिर्वेतनेश्च प्रवर्त्तीतत दांत्यजः॥१७॥ अंत्यजोपि द्विजप्राप्यां भक्तिं लेभे महेश्वरे॥ भक्तिमेव परं
मेने भवस्य भवनुत्तये॥१८॥ दुंदुभीनां मर्द्दलानां चर्मयन्मुरुबंधनम्॥ रथ्याकर्षणरज्जूनां चर्मणामपि दायकः॥
शंभो तदालयद्वारि पुलकांकितगात्रकः॥ भक्त्यासं प्रणमन् गायन भस्मफालोमुदं ययौ॥२०॥ स कदाचिद्द्विजो [illegible] ९६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अणोणीया-ज्यायान्श्रुति गदित वाक्यार्थकलनैः ॥ नमः शेषो देवः श्रुति गतपंचाक्षर मनोः ॥ ४५ ॥ तस्य तादृक्त
पोनिष्ठां श्रीरुद्र जप वासनाम् ॥ अंगीकृत्या थ तद्भावं आनीनाया थ तं सदा ॥ ४६ ॥ तथा संसार कुहरा पथा संदर्शि
तोद्विजः ॥ शिवेनोनरितः शैवीं सुरप्राप्यां पुरीं ययौ ॥ ४७ ॥ रुद्रसूक्त जपेनैव सदा पशुपति द्विजः ॥ पशुपाशै विमुक्तो
भूच्छिवप्रेमास्पदोऽभवत् ॥ ४८ ॥ श्रोतुं जनस्य शुभदं प्रथितस्य रुद्र पूर्वस्य यः पशुपतेश्चरितं श्रुणोति ॥ लोकैक
नायक महेश कृपानिधेः सनाकोकि नाम पि दुरासदमेति लोकम् ॥ ४९ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये
नवमांशे स्कंद पशुपति चरिते चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ इति काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय
नमः ॥ श्रीस्कंद उवाच ॥ ॥ श्रोगंतुनाम्नो भक्तस्य वैभवं ते वदाम्यहं ॥ ऊर्ध्वांघ्रि संज्ञिके देशे लोकाभीष्टुतकी
र्तिमत् ॥ १ ॥ ग्राम द्विजन्मनां श्लाघ्यमत्ह्मानंदपुरं महत् ॥ अदयाने शुभे भाति पंगोलवाहिनी तटे ॥ २ ॥ पल्लवां पातयन्
म्लानान्यत्रशिं चाति भूरुहाः ॥ मधु वर्षैस्तरुस्था वारि वर्षैश्च वारिदाः ॥ ३ ॥ द्विरदा वारिदाकाराः यत्प्रांते पवनेष्वपि ॥ धा
वत्कोरेणु पादोत्थैरेणुभिर्मदनमूर्ध्वैः ॥ भुवो यत्र विराजंते पंकिलाभाविताः सदा ॥ केदारस्मत्स्यसन्नद्धं मोलयो विन
यानताः ॥ प्रसादेन महेशस्य प्रासाद तल चारिणः ॥ एधंते यत्र नियतं सदेव गृहमेधिनः ॥ ६ ॥ पुरस्य तस्यास्य बहिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ इंदुमौलिपदकिंकरामृतं स्कंदनाथ चरितं शुभावहम् ॥ ३२ ॥ चिंतयन्ति परिकीर्तयंति ये संततं शिवपदे वसंति ते सद्य० न०
९५ स्कंद उवाच ॥ ॥ वक्ष्येहं पशुपतेः व्रतं पशुपतिप्रियम् ॥ कावेरीनीरपूरेण वर्धितक्षेत्रशालिषु ॥ ३३ ॥ चोलेषु अ० ५०
द्विजधामास्ति पुरं श्रीमुखसंज्ञकम् ॥ तस्मिन् ग्रामे पशुपतिरिति कश्चिद्द्विजोऽभवत् ॥ ३४ ॥ सच्चरित्रपरिष्कार चतु
र्वेदिकुलोद्भवः ॥ सदाशाकरवाहस्य वामांगे वहतः शिवाम् ॥ ३५ ॥ प्रमथेशस्य पादाब्ज चंचरीको बभूव सः ॥ रुद्रसूक्ते
नतं रुद्रमधीते नमसोयसा ॥ ३६ ॥ सकला श्रुतिसारेण संतुष्टावति भक्तिमान् ॥ भस्मरुद्राक्षसंपन्नो दीप्तफालत्रिपुंड्रकः ॥
S/3 व्रजंतिष्ठंछयानोऽपि दिवानक्तमनन्यधीः ॥ कर्मांतरालेषु सदा रुद्रसूक्त जपादरः ॥ ३८ ॥ स कदाचित्स्मरः प्राप्य मृगपक्षि
समाकुलम् ॥ उत्फुल्लाब्जमरंदोऽघ्र्यभृंगसंबंधगंधिलम् ॥ ३९ ॥ कंठदघ्नजले तिष्ठन् पश्यन्भानुस्थितं हरम् ॥ मौलि-
न्यस्तांजलिः प्रेम्णा प्रस्फुरत्पुलकांकुरः ॥ ४० ॥ स्वच्छगंगातरंगौघाघेंदुशेखर भक्तिमान् ॥ द्राविताघसमूहेन रुद्रसू-
क्तेन तुष्टुवे ॥ ४१ ॥ भूसुरः श्रुतिसारेण रुद्रसूक्तेन शंकरः ॥ ॥ पशुपतिरुवाच ॥ ॥ नमस्ते रुद्र त्वां श्रुतिशिरगमन्यो
दमिषुमन् ॥ नमस्ते बाहुभ्यां तव शिव शरेषूद्यतकराः ॥ शरव्या हेतुभ्यां तव वरदसंक्षुब्धधनुषे ॥ तवाशास्यां ह्याततनुरपि
मनस्तोऽघपदयोः ॥ ४३ ॥ हिरण्यो देवस्त्वं नखमुखशिखान्ते नयनयोः ॥ तनुं संपश्यन्वै भव शिव नमः सोमवपुषे ॥ ४४ ॥ ९५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमः शिवाय शाश्वताय काम कालमृत्यवे ॥ नमः शिवाय नारसिंह हस्ति कृत्ति वाससे ॥ १९ ॥ नमः शिवाय विष्णु
नेत्र पंकजार्चितांघ्रिये ॥ नमः शिवाय सोमसूर्य वह्नि दीप्ततेजसे ॥ २० ॥ नमः शिवाय वेद वाग गोचराय वाङ्मयाय
ते ॥ नमः शिवाय सत्य कृत्य साक्षिणे महात्मने ॥ २१ ॥ नमः शिवाय शंकराय शक्ति बीज हेतवे ॥ नमः शिवाय चंद्रशे
खराय ते कपर्दिने ॥ २२ ॥ नमः शिवाय भूति भूषणाय भूति हेतवे ॥ नमः शिवाय नित्य शुद्ध बुद्ध तेजसे ॥ २३ ॥
नमः शिवाय भक्त बंधमोचकाय शंभवे ॥ नमः शिवाय बिंदु नाद वाच्य वाचकात्मने ॥ २४ ॥ नमः शिवाय निस्स
सांद्र सौख्य सीमभूम तेजसे ॥ नमः शिवाय दिव्य बोध रूपिणे परात्मने ॥ २५ ॥ नमः शिवाय सत्य वाग गोचराय बंधवे ॥
नमः शिवाय भक्त लोक वांछित प्रदायिने ॥ २६ ॥ नमः शिवाय विष्णवे ध साम्य दृश्य मूल मौलये ॥ नमः शिवाय भक्ति
मुक्ति दायिने ॥ २७ ॥ नमः शिवाय शक्ति हस्त शस्त्र तारका सुरारि मुख्य सूनवे ॥ नमः शिवाय पर्वतेंद्र जार्ध देह भागिने ॥ २८ ॥
नमः शिवाय सिंधुरेंद्र मुख्य वक्त्र सूनवे सदा नमः ॥ नमः शिवाय ते सदा शिवाय शंभवे ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ एवं देवं
स्तुवन्भक्त्या पंचाक्षरमयं प्रभुं ॥ शिवाग्रतस्त्वमिदं भक्त्या देवस्य यः पठेत् ॥ ३० ॥ मया तु त्वत्पद मिति भक्ते न प्रार्थितः सदा ॥
हृद्यः सदा शंभु समर्चनेन स्कंदः सपंचाक्षर मंत्र सिद्धः ॥ ३१ ॥ तत्राप पद्मासन महेश धाम संबद्ध नाथः सविवाह वेषः ॥

शिवरह० १ स्फुरत्क्षेत्रे स तौ तस्मिन्कृतस्थितेः ॥ वृषवाहस्य देवस्य पादाद्रस्य प(तपो)तो निधेः ॥ ८ ॥ तं पुष्पैस्तु जटा सदा न-
९४ जूटयोग्यैः स्कंदं सदार्चयत् ॥ पुष्पाणि गंगेंदुलस(न्ने)त्कपर्दोचितानि सः ॥ ९ ॥ पृथक्पृथक्समा अ० ३९
हृत्य न्यस्य पुष्पकरंडके ॥ स प्राप मालाग्रथन भवनं भुवनेशितुः ॥ १० ॥ फलके पुरतः शुद्धे आ
सीनो नियतः क्वचित् ॥ स पुष्पाण्यपि विभज्याथ मालाः कर्तुं प्रचक्रमे ॥ ११ ॥ स वृत्तकेसरदलोद्दं
डनद्धनिकुंठिताः ॥ लंबिनीश्च यथाशिल्पं सृजो बध्वा द्विजोत्तमः ॥ १२ ॥ स ताभिः स्रग्भिरामे
८२० श मौलिसंगतहर्षभूः ॥ भक्त्यानर्च्य शिवं जिह्वान्यस्तपंचाक्षरीमनुः ॥ १३ ॥ हेमपात्रं द्विजास्तन्यमा
स्वादितवतः प्रभोः ॥ ॥ ज्ञानसंबन्धनाम्नाऽथ भक्त्या भूद्विजः सखा ॥ १४ ॥ विरंचिमाधवादृष्ट
मौलिमूलार्चने रतः ॥ नमः शिवायेति जपन्नवर्तत शिवाश्रमे ॥ १५ ॥ स्तोत्रेण स्तोत्रविन्मुख्य=
श्रीपंचाक्षरलक्ष्मणा ॥ शिवमानर्च हृष्टात्मा तुष्टावाभीष्टदायिनम् ॥ १६ ॥ ॥ श्रीस्कंद उवाच ॥
नमः शिवाय निर्गुणाय निष्कलाय त्रिशूलिने ॥ नमः शिवाय वाक्यातीतगोचराय शंभवे ॥ १७ ॥
नमः शिवाय निष्क्रियाय निर्मलाय योगिने ॥ नमः शिवाय सिद्धिमुक्तिहेतवे चिदात्मने ॥ १८ ॥ ९४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शासस्तुधिरां महीम् ॥ पादानैतैः पर नृपैः परिसेव्यमनोरथः ॥६२॥ स्सास्तु लोक दुरितो नृज कं जनकात्मजः ॥ का
मारि दास्य परिपूर्ण कृपाब्धि पत्नः कालेजगाम शिव धाम समूर्तिनाथः ॥६३॥ मूर्तिनाथ चरितं स्मरंति ये कीर्त्त
यंति शिवभक्ति पूर्तपः ॥ मूर्ति लेशरहिता वसंति ते कार्त्तिकेय जनकांतिके सदा ॥६४॥ ॥ ॥ ९ ॥ ॥
इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे मूर्तिनाथचरितं नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ स्कंदनाथस्य-
चरितं निबोध मुनिसत्तम ॥ ज्योतिस्फुरद्भलमौलि चोलेषु प्रथितोऽभवत् ॥ १ ॥ विषये सह्य जाकुल्यासं भक्तस
स्यसंपदि ॥ शरण्य ग्राम इत्यस्ति सलोच्छ्राय समन्वितः ॥ २ ॥ पुष्पोद्यान स्फुरत्पार्श्वो दीर्घ शीर्षि कया वृतः ॥
यत्र संचित विमल प्रभ भस्म प्रबोधये ॥ ३ ॥ न परं तिमिरं नैशं धवलं भ्रम वानपि ॥ भृंगाक्रांतं पुष्पमुखं म
धुपत्रन केवलम् ॥ ४ ॥ मुंचंति पंच मोक्षितं केकी शुकमुखो द्गतम् ॥ पत्राक्कामकरन्दाश्च भृंगगाने न केव
लम् ॥ ५ ॥ तस्मानाकर्णनोन्मुक्त मृगरोमंथमंथितम् ॥ तस्मिन्छ्री शरण ग्रामे स्कंदाख्यो भूद्विजोत्तमः ॥ ६ ॥
फणि भूषपदे भक्तः प्रबोधांभोधि चंद्रमाः ॥ सोजयत्र निद्राण कुलीरो द्बोधकादिभिः ॥ ७ ॥ मीनोद्गूढैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ लाजैर्नर्व्यसौधगतासदा ॥ ४८ ॥ द्वीपं द्वादशतोर्यैनं मंत्रिणो मान्यदर्शनम् ॥ तेनेतेविवशुः सार्धं मकुरार्पणमंडितम् ॥ सदा० न०
९३ तत्र सिंहासने दिव्ये रत्नमालापरिष्कृते ॥ अरोभिरेभि आरूढं तमानतानीति मत्तरम् ॥ ५० ॥ कुंडेषु मंडितां तेषु सम्यक् प्र अ० ३१
ज्वलितेनले ॥ जुहुवुर्मंगलं हव्यं मंत्रपूतं महीसुराः ॥ ५१ ॥ नदत्सु भद्रवाद्येषु सोऽभिषिक्तो विधानतः ॥ आलो-
क्य सचिवान्पौरान्मूर्तिनाथो वचोऽब्रवीत् ॥ ५२ ॥ हित्वाहि पर्वतं शैवं शासनं पाल्यतामिति ॥ तेस्वामिन्पत्वयादि
ष्टं तत्कार्यमिति चाब्रवीत् ॥ ५३ ॥ गोप्तास्यां लोकतंत्रस्य यद्यहं दासभूषणम् ॥ कोटिरं शिवमुद्रांक जटाकोटिर
S2/ मेव मे ॥ ५४ ॥ इत्युक्त्वा मंत्रिणस्तेन प्रणम्येनं त्वया प्रभो ॥ सम्यगादिष्टमेवापं क्रमइत्यनुमेनिरे ॥ ५५ ॥ सभद्रवाद्यो
मूर्तीशो जयमुकुटमंडितः ॥ नेतुं श्रीतालचक्रेशं गजारूढः स निर्ययौ ॥ ५६ ॥ वीथिनाविधिना चापश्यदिष्टपंचं
द्रशेखरम् ॥ नत्वा शिवं मूर्तिनाथः शुभवीथ्यां ययौ पुनः ॥ ५७ ॥ प्राप्य राजगृहद्वारं युक्तं कल्याणलक्षणैः ॥
गलन्मदझरीगंडाद्गजादवततार सः ॥ ५८ ॥ भास्वानिवोदयं प्रास्वमहार्हमणिमंडपम् ॥ स सिंहासनमध्यस्थो रामा
चामरवीजितः ॥ ५९ ॥ भुजे नवलयं भूमेर्वज्रकायेदधौ च सः ॥ जगुः सर्वे चतुर्दीतं सिद्धिश्री भस्मफालकः ॥ ६० ॥
जगतो मूर्तिनाथोऽयं भूमिनाथ इति स्मृतः ॥ सरामाभोगविमुखो विहितेंद्रियनिग्रहः ॥ ६१ ॥ शासनं वर्धयंश्चैवं शै ९३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तौ कांभवेदिति ॥३७॥ बद्धनेत्रं चकरटीं मुक्त्वा यस्कंधगो भवेत् ॥ सर्वे महेशादत्तेन पाल्यतामवनी
तलम् ॥३८॥ गजेन स्कंधरोप्यो यो स भूपः पृथिवीपतिः ॥ इति निश्चयसिद्धार्था मंत्रिणस्ते मिथोऽभ
वन् ॥३९॥ सीताभ्रचयसंकाशं भद्राकारं महागजम् ॥ समानीय कुथास्तीर्णपथातेनाप्यवासृजन् ॥
॥४०॥ ऊचुस्ते मंत्रिणस्तस्य मंत्रिणामिंगुरेशितुः ॥ ॥मंत्रिण उवाच ॥ भद्रानय भुवो भद्रं गोसहा
रं गुणवत्तरम् ॥ इति तन्नेत्रमाबध्य इभं गिरिनिभं शुभम् ॥४१॥ सद्वीपः क्षोमभक्षाक्षः क्षरगंडाचरन्
पुरीम् ॥ सिंचन्पुष्करजासारं मदगंधितदिक्पथः ॥४२॥ विशृंखलः शृंखलाभिः घोषयन्नोदसीत=
दा ॥ प्राप्य हालास्यनाथस्य गोपुरं घोतितां बरम् ॥४३॥ मूर्त्तिनाथोऽपि देवस्य निशि प्रोक्तां स्मरन् गिरम् ॥
रक्षितास्यां क्षितेरस्य त्र्यक्षाज्ञां मगरीयसी ॥४४॥ शिवालये स्थिरं तत्र स्थाणुमूर्त्तिमिवास्थितम् ॥
प्रसर्पविश्वपगजे द्रोऽपि भुवो भाग्येन भूयसा ॥४५॥ प्रापकक्षामपि स्पृष्ट्वा क्षितिस्थस्कंधमानपत् ॥
उदयस्थं रविप्रख्यमूर्तिमंतमिवानलं ॥४६॥ गजस्कंधस्थितं नेमुः पौरा हृष्टाश्च मंत्रिणः ॥ शृं
गदुंदुभिशंखाश्च पटहाश्चापि दध्वनुः ॥ पेरशुभ्रुविरेशा व्यावाचो मांगल्यसंयुताः ॥ ववृषुः सुमनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ मध्यभागतः ॥ सम्यक् संक्षुधमानेतं घोरालनृशिरेकरे ॥ २६ ॥ इत्यालोराज्ञपा शंभो वागासीद् शरीरिणि सदान

१२ वाण्युवाच ॥ ॥ हेमूर्तिनाथमामेवं नीयतां सहसाभदी ॥ मदाज्ञया त्वमेवास्य पांड्यदेशस्य भूप अ॰३१

तिः ॥ २७ ॥ भूत्वा जैनान्निराकृत्य प्रतिष्ठाप्य त्रयीकृतम् ॥ शैवसिद्धान्तमुद्दीप्य मत्पूजा क्रियतां त्वया ॥ २८ ॥

अधुनैव दुरात्मासौ पंचकायपतिप्रियैः ॥ निरुद्धं सन्समं जैनैर्नियान विशतादिति ॥ २९ ॥ श्रुत्वा शरीरि

णीं वाणीं विस्मयहृदयसति ॥ तस्मिन्नारुरुधे शत्रुर्बलेन मधुरापुरीम् ॥ ३० ॥ मतिरोधासहिष्णुस्तन्नृपं

S22 ज्यधारणी पतिः ॥ सैन्यैर्निर्यंतृणो घोरो निजां निरगमत्पुरात् ॥ ३१ ॥ शिवभक्तद्विषां पुंसां स्थितिर्विघ्नादि

वेतिसः ॥ तत्प्रदर्शी पितुः प्राप संकुलं समराजिरम् ॥ ३२ ॥ वंचकस्य महीयस्य शत्रुरुद्धस्य तस्य सः ॥ निर्दि

ष्टात स्य कालस्य पूर्णात्स्थितिरभून्निशी ॥ ३३ ॥ निरयन्पातता दृष्ट्वा न्क्रिवभक्तिजनापसः ॥ इति शेपुर्ज

नाभूपं पांसुवर्षेणशांकराः ॥ ३४ ॥ नरके पतिते तस्मिन्नब्धो कार्त्ते तसुहृज्जणे ॥ साक्षादृक्षी पतत दातद्

तिवृत्तिरिव तामसी ॥ ३५ ॥ अह्नापाह्ना मीधिपतो पूर्वाद्रि भूषयद्यथा ॥ कृतोर्ध्वदैहिक्रारा शुः स

चिवाः समचिंतयन् ॥ ३६ ॥ भूनाथेन विना लोकः कायो जीवात्मना यथा ॥ क्षीयते ह्यस्य राजस्य रक्षि १२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गापयोरुहाम् ॥ यत्पदातिपदाक्रांतं क्ष्मामूलं महीश्वरः ॥१४॥ उद्धोढुमक्षमः क्रीडाक्रमेटत्यस्य
मूर्च्छितः ॥ मधुरां सहतां कुर्वन्न गृहीदांघ्र भूपतिः ॥१५॥ चतुरंगमहीपालचूडाचुंबितपादुकः ॥ सोमं
तजन्मसंभूतपापपिंजरिताशयः ॥१६॥ सेनाशास्त्रप्रकृष्टोभूत् पालयन्पांड्यमंडलम् ॥ पंचास्ति
काषट्द्रव्यसत्यसत्वनवार्थवित् ॥१७॥ रत्नतंत्रपरामर्शी जैनतंत्ररतोऽभवत् ॥ स पंचपरमेष्ठिश्री
चरणांभोरुहार्चकः ॥१८॥ सप्तभंगीं प्रयुंजानो वंचयामास वैदिकान् ॥ भेदाभेदकथाप्राससर्वसं
करविभ्रमः ॥१९॥ खलीचकारपाषंडो वेदमार्गं स वंचकः ॥ ह्रीशंकरपूजाया मंतरायपरं २०॥
आविष्कुर्वन्नयो बाह्यानर्चयामास दुर्मतीन् ॥ हालास्यपूजामालोक्य मूर्तिनाथप्रवर्तिताम् ॥२१॥
निजाज्ञालंघनं पश्यन्ता विहंतुं प्रचक्रमे ॥ पचेदविक्रये नास्मत् पदहणे क्रियतामिति ॥२२॥ प्रति
वीथिं समुद्घुष्य जैत्रघंटामताडयत् ॥ स्वं दुर्मेधसा तेन पाल्यमाने निजाध्वनि ॥२३॥ मूर्तिनाथो न कुत्रा
पि लब्धवांश्चंदनं विभोः ॥ पर्यटन्परितः क्रेतुं पाटीरं पण्यवीथिकाम् ॥२४॥ शांतो भूत्वा विभावर्यां
प्रवीक्ष्य पक्षिरिशालयम् ॥ चंदनालाभखेदेन तत्र शाणोपलेकरम् ॥२५॥ पेषयामास संक्षुण्णत्वगस्थि

प्राविंशद् गि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰९ द्रर्षक्रमोक्ततः ॥१॥ बहुश्रुतजनावासोयः प्रत्यक्षसुरालयः ॥ यत्रवेणुवह्निन्देषु ताम्रपर्णीयुतार्णवे ॥२॥ सदा.न.
९१ श्रीमुखेषु च मुग्धेषु मौक्तिकानि चकासति ॥ मरानीलं चंदनाद्रि बंधुभृंगानुसंततम् ॥ ३ ॥ सूतेपः सुखदं अ॰ ३९
तच्च द्राविडवाङ्मयामृतम् ॥ तत्रास्ति मधुरा नाम पुरी पांड्यपरिश्रिया ॥४॥ यस्यां परिहरंत श्रीलावण्यं ह
रिणीदृशः ॥ यत्र सौधे चरंतीनां सुभ्रुवां तटितामपि ॥ ५ ॥ तारत्म्येनैव भूयेत भेदपादपरीयसा ॥ यत्ससत
फलकस्तस्तु कवींद्रनिडसूक्तयः ॥ ६ ॥ लीलायुतो ललद्दाणो कबरीगंधबंधवः ॥ तत्र कश्चिद्द
823 णिगंशे मुक्तामणिरभून्महान ॥ ७ ॥ मूर्त्तिनाथाभिधो यस्य ब्रह्मसौ च सुधाशयः ॥ श्रीमूर्त्तिकुलधौरेय
शंभुपादांबुजं परम् ॥ ८ ॥ दृढमालंब्य चित्तेन श्रीकेंकर्येन मुदातनीत् ॥ यः श्रीहालास्यदेवस्य पूजार्थे
दिव्यसौरभम् ॥ ९ ॥ द्वीपांतरात्समानीतमर्पयामास चंदनम् ॥ यं वंदिशति पाठीरं भास्वत्परिमलो
र्मिलम् ॥ १० ॥ शफराक्षिसनाथस्य मूर्त्तिनाथो महेशितुः ॥ कश्चिदा ग्रममहीनाथः कंडूलप्सुजनैर्मोडितः ॥
सेवितुं सहसेनाभिरयासीन्मधुरां प्रति ॥ तत्सेनारजसां सप्तसमुद्राः शोषिताः पुनः ॥ १२ ॥ गंधद्विरदगं
डांतर्गलद्दानेन पूरिताः ॥ तथापि विघटद्धोटी चंचत्खुरपदीरजः ॥ १३ ॥ पंकेरुहत्वमानीतं नभोगं ९१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवस्य श्रवणांकितमागमत् ॥ देव्या सहृदयोऽन्नासि कैलासस्थोपशृण्वते ॥ ६२ ॥ इंकुनंदिजया चूलो
वियतीव तरंभुवम् ॥ तद्वेणुनादे कंचित्तेरेणे मीलितवीक्षणेः ॥ ६३ ॥ सेविता गायतस्तस्य पंचाक्षरम
नोहरम् ॥ गोनाथस्य पुरस्तस्थौ स्तुवंतो नटनायकः ॥ ६४ ॥ देवो दयारसैः सिंचन् सांजलिं भक्तमागत
म् ॥ ॥ ईश्वर उवाच ॥ ॥ गोनाथ वेणुनादेन तव पंचाक्षरश्रवात् ॥ आगतोऽस्म्यद्य कैलासाद
गकन्यासुतोऽस्म्यहम् ॥ ६५ ॥ गोभिः सहेह मिगोपैस्त्वं समायाहि मदंतिकम् ॥ सदा श्रोतुमिमं वेणुं मम
प्राप्नोतीति वेदिरां ॥ ६६ ॥ गोनाथः प्रांजलिस्तस्थौ गोभिः सह शिवाग्रतः ॥ देवेषु देवं विकिरत्सुपु
ष्पाण्याधीत वेदेषु पठत्सु वेदम् ॥ ६७ ॥ गोनाथ वेणुक्वणितं स शृण्वन् विश्वाधिको हेमसभां विवे
श ॥ वेणुनाथ विवशीकृतेश्वरं गोपतेश्चरितमेतदद्भुतम् ॥ ६८ ॥ यः शृणोति पठति स्मरत्यसौ
शांभवं पदमुपैति शाश्वतम् ॥ ६९ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे षट्त्रिंशो
ध्यायः ॥ ३८ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ ॥
श्रीस्कंद उवाच ॥ ॥ सुकीर्तिमूर्तिनाथस्य वृत्तेन कथयामि वः ॥ यः श्रीमान्पांड्यदेशोऽस्ति तत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१स्य गायन्पंचाक्षरं मनुम ॥ वेणुनादाद्धृतं चित्रं गवां गणमतंद्रितम ॥ ५० ॥ स्तब्धकर्णे धृतंपुच्छं ऊर्ध्व सदा.न.
१० णवक्रसुतश्रवम ॥ वत्सानप्युज्जिह्वत्पयस्तास्तमेवानुपरिस्रुता ॥ ५१ ॥ ससप्तस्वरतत्कालरागैः पं= अ०३८
चाक्षरं मनुम ॥ गायन्निगापगोनाथः सर्वान्वैणविकान्भुवि ॥ ५२ ॥ महद्भिर्मध्यमैः कांतैर्मधुर्यप
हि रिबृंहितेः ॥ वर्णभेदैः मनोहारिरागतालक्रमान्वितम ॥ ५३ ॥ व्यक्तं मानादिविन्यासगतिवैचित्र्यसंभृतम ॥
विष्वग्विस्तारयामास रागमानं गतिक्रमम ॥ ५४ ॥ पारब्धं तत्र रोमंथं प्रस्मरंति स्म धेनवः ॥ छायावृक्षे
524 षु दिग्वासा वधूतेषु पयोधिषु ॥ ५५ ॥ संवसंतीषु मध्याह्ने मध्ये वत्सावृतासु च ॥ वत्सा मातुस्तनं हित्वा
क्षरत्क्षीरं मुखास्थितम ॥ ५६ ॥ मृगाः तृणानि विजहुः तांडवानि शिखंडिनः ॥ निरुद्धं तद्गानविवशं चित्रा
र्पितमिवाभवत ॥ ५७ ॥ पातालमाः पार्वतीया नाकिनश्च नभश्चराः ॥ तद्गानश्रवणात्सर्वे विवशा वि
स्मयं ययुः ॥ ५८ ॥ एकात्मभावात्तद्वेणुनिनादेन हृताशयाः ॥ सहजं वृषमुत्सृज्य गावो गोपं समन्वयुः ॥
मंदवायुर्द्रुतस्तब्धा नद्यस्तिमितरंहसः ॥ निस्तांगाः समुद्राश्च तद्वेणुनिनदश्रवात ॥ ६० ॥ एकरूप=
न्द्रियग्रामवृत्तिवैचित्र्यमीक्षत ॥ आगम्य स्वात्मजस्नेहविवशा गोपकन्यकाः ॥ ६१ ॥ तद्वेणुनादो १०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यु षि
यितुं गोपान् गोष्ठे गृष्टी पृथक् पृथक् ॥ निमुज्य देवापादानं वेणुनागातमुद्यतः ॥ ३८ ॥ वेणौ सुखिर शास्त्रो
क्तरंध्राण्यष्ट विधायसः ॥ आदिरंध्रमुखेन्यस्य रंध्रेष्वन्येषु चांगुलीः ॥ ३९ ॥ व्यापारयन्यथास्थानं
तानसप्तस्वरान्वितम् ॥ देवेशं मनसा ध्यायं जगौ पंचाक्षरं मनुम् ॥ ४० ॥ भावानेशावशां विश्वं कृत्वास्था
वरजंगमम् ॥ तोषयामास देवेशं वेणुनादामृतेन सः ॥ ४१ ॥ सकदाचिद्दृत्सरज्जुः वल्लिनी केशरज्जुभिः ॥
नव्यदेतस्य कुसुममेकपार्श्व समुन्नतम् ॥ ४२ ॥ चुलिकाबंधनेरम्ये निवेशान्हान शृंगकम् ॥ कंदलं कु
सुमं कर्णे वहन्फाले त्रिपुंडकम् ॥ ४३ ॥ वक्षोल्लसत्कुंदमाला भृंगगीत महाभुजः ॥ वल्कलोपरि संवीतव्या
लं विक्षोमपल्लवः ॥ ४४ ॥ वेणुयष्टिलसत्पाणि सपादुक पदद्वयम् ॥ गोपैः गोभिः सवत्साभिः गोनाथो
निर्ययौ बहिः ॥ ४५ ॥ इंद्रगोपध्वराचं च विद्युद्दामपयोधरः ॥ भृंगमल्लका कुंदहासावनं वर्षाववधूरगात् ॥
गोष्ठे तत्र रंचं नीषु गोपैः संभृतयष्टिषु ॥ पार्श्वे चरन्स गोनाथः कृतमालवनं ययौ ॥ ४६ ॥ तत्र दृष्ट्वा
जटादीर्घलंब पुष्पावलिं सुधीः ॥ आरबवधं शिवं मत्वा तस्थौ तल्लग्नमानसः ॥ ४८ ॥ बिल्वैर्नल्व
प्रमाणैस्सोत्तत्फाले श्च्यपचालिमैः ॥ कुर्वन्सोदरपूर्तिं स गोपः क्षौद्राप्लुतेषु च ॥ ४९ ॥ गोनाथो भूतनाथ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० प्रसीद पार्वतीनाथ भक्तवत्सल पाहिमाम् ॥ २७ ॥ इति स्थितो दृश्यवपुर्वृषे स्थितस्त्वयास्य तांदार सदा. न.
८९ सखेन मत्पदम् ॥ इति ब्रुवंस्तामिभतां दिवौकसां परं पदं स्वं परमेश्वरो ययौ ॥ २८ ॥ यः शंकुलाखंडि अ. ३८
तकंठकांड श्रीकंठकारुण्यपदं बभूव ॥ तदादिनाम्ना जगदीशभक्तास्तं शंकुलादाय इति ब्रुवंति ॥ २९ ॥
यः शंकराराधनभक्तियुक्तां श्रीशंकुलादाय कथां शृणोति ॥ संसारबंधध्वंसविधूयसर्वं साक्षात्पदं शा-
श्वतमेति शंभोः ॥ ३० ॥ ॥ श्रीस्कंद उवाच ॥ ॥ चोलेषु शुभकावेरीश्रोतोवर्धितशालिषु ॥ श्रीवि
५२८ लासपदो देशो दृशोरानंददायकः ॥ ३१ ॥ हंसाः स्वपंतिपद्मातः कोकिलाश्चूतपल्लवे ॥ हालुकीकुमु
लेभृंगा यत्र मीनाश्च शैवले ॥ ३२ ॥ सह्याम्बुरवोक्षिताः सारखारंभादलोद्धृताः ॥ पूगाम्रारूढसच्छायना
गवल्लीविराजिते ॥ ३३ ॥ तस्मिन्देशे मंगलाख्ये ग्रामे नियतमंगले ॥ गोनाथ इत्यभूत्कश्चिद्गोपालकु
लपालकः ॥ ३४ ॥ भवे भक्तिं स्थिरां बिभ्रत् भूतिलेपनभूषणः ॥ व्यामावयत्स गोनाथः गावः शतसहस्र
शः ॥ ३५ ॥ संचार्य शाड्वलवने पाययित्वा नदीपयः ॥ रक्षन्दुष्टमृगेभ्यश्च गवां कुलमपालयत् ॥ ३६ ॥ गाः
सवत्साः पयोहीनाः गर्भवत्यश्च दोहिनीः ॥ यूथपोतवृषैर्युक्ताः वृद्धाश्च तरुणास्तथा ॥ ३७ ॥ ताः स पाल ८९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सकृदाचिन्महेशार्थमखंडितमहाव्रतः॥ शाकिनीनवचूताभ्यां शालितंडुलमावहत्॥१६॥ म
हाभिषेकहेतोस्तत्गृहिणीपूजनान्वितम्॥ वहंतीशानकेःपश्चाद्ययो चारित्रदेवता॥१७॥ चं
डभानुकराघट्टजातस्फोटविलेपथि॥ चचालततदारंध्रे तत्सर्वंन्यपतत्करात्॥१८॥ शालि
तंडुलमालोक्य शाकिनीचूतसंयुतम्॥ रंध्रेनिपतितं खेदादंतस्तापमवापसः॥१९॥ भार्याकि
रं समालंव्य प्रस्खलन्स बिलान्तरे॥ पूजाद्रव्यसमुधर्तुं न शशाक करादपि॥२०॥ इतः परं कि
मेतेनपूजार्थगमनेनमे॥ व्रतहानिर्वरं कार्यं त्यक्तुमिलमिवप्रमः॥२१॥ इतिनिश्चितकर्त्तव्यः कु
ठशंकुलयाहरत्॥ दलयंसस्मृतेमूर्लभिबरेजेतिकौतुकी॥२२॥ तदाबिलांतरेशंभुःपाणिमेकं
प्रदर्शयन्॥ ~~अंतरेवबिलेचूतंदर्शयन्नाविबभूवसः॥२३॥~~ भा चकर्षदर्शनेश्चूतं विलंठितरवोद्भटम्॥२४॥
अन्तरेव बिले चूतं दर्शयन्नाविर्बभूव सः॥
भक्तप्रीत्यामहापूजास्वीकृतेतिप्रदर्शयन्॥ अं॥२४॥ वृषभारूढमद्रींद्रकन्ययासहशंकरम्॥
सभार्योवीक्ष्य वीक्ष्यांतभावयन्प्रांजलिःस्थितः॥२५॥ स्वामिन् जयजयेशानेत्येवंसस्तोतुमुद्यतः॥
भोगध्यान्मेवीक्ष्यभोजंतुभ्वन्त्स्थंभुक्तवानसि॥२६॥ शंभो वांरक्षवा मां क वामभागविनोदय॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१ मृणालीति य स्रुशो यस्य मराली लेढि वेधसः ॥ ४॥ भूमिन्यासायुतः शंभुं शिवभक्त्यैव मूर्तयः ॥ सर्वे सदा० न०
८८ थाराधयामास तथैव हर किंकरान् ॥ ५॥ हलबाहुल्यसातत्य सर्वकृषिधनागमः ॥ महाभिषेक अ० ३८
पूजाभिस्तोषयामास धूर्जटिम् ॥ ६॥ सरक्तशालिनी चूतशलाटुसहितं स तदा ॥ शंभोर्निवेद-
यामास नवीनं शालितंडुलम् ॥ ७॥ संकल्प्य स दिशं शंभोर्नियमेन दिने दिने ॥ शाकिनी चूत
शाल्यंन परां प्रीतिमुवास हः ॥ ८॥ एवं गतेष्वनेकेषु वत्सरेषु महेश्वरः ॥ तस्य संशोधयन् भक्तिं-
वितताम दरिद्रताम् ॥ ९॥ पूजां पूर्वाद्विशेषेण तथापि कल्पयन्विभोः ॥ वृत्यर्थं कृषिमानासीत्
५२८ रेषामवसत्सुखी ॥ १०॥ न किंचिदात्मने कुर्वन भृतिप्राप्तेषु शालिषु ॥ शिवायैव दिशन सर्वं निना
यदिवसान् बहून् ॥ ११॥ प्राप्यते कृषितस्तेन भृतिस्तेन शिवाशया ॥ केवलं शालपत्तेषु न्यवेदि
षत शं शंभवे ॥ १२॥ स कीयनिष्कुटे शाकान् स संपाद्य गृहे तदा ॥ प्रददौ सोपि तैरेव क्रमादात्म स्थि
तिं व्यधात् धा ॥ १३॥ क्रमेण निष्कुटे शाक प्रभेदक्षीणतां गते ॥ केवलं वारित दत्तं पीत्वा देहं दधा
सः ॥ १४॥ एवं केवलमंभोभिर्देहयात्रां प्रवर्तयन् ॥ शाकिनी वांकरायादाच्छालिं चूतशलाटुभिः ॥ ८८
॥ १५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थोऽपि प्रावर्षन्कुसुमं सुराः ॥ ४१ ॥ चक्रुरप्सरसो नृत्यं नेदुर्दुंदुभयो दिवि ॥ भक्तिनिर्भरजानंदभरितं भूरि
तेजसम् ॥ ४२ ॥ अनिर्वंद्य निजं धाम नयनो रुस्तिरादधो ॥ मानकं जनदीशोऽपि कृत्वा वैवाहिकं
विधिम् ॥ ४३ ॥ बंधुभिः स्वसुतायाश्च पौरै रोहितवैभवः ॥ विधायातं सकैलासमयासीद्भक्तिभा
वितः ॥ ४४ ॥ यएन नाथकलिंकामलिकां तदात्रीं मित्रीकृताखिलजगः प्रणनाम शंभुम् ॥ कौ
तुकेन कृतकंतुकलीलां त्र्यक्षजातमहिमां मृगलोलाम् ॥ ४५ ॥ श्रीमानकं जतदिनीशचरित्रमेत
दत्यद्भुतं पठति यो भुवि यः शृणोति ॥ एतौ महेशपदभक्तिविधूतमायौ कैलासधाम विशतः स्वकलेवरां
ते ॥ ४६ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ श्रीकाशी
विश्वेश्वरार्पणमस्तु ॥ ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ कावेरी शुक्तिनि
मुक्तमुक्तासेकतमंडितम् ॥ कणमंगलनामास्ति नगरं चोलमंडले ॥ १ ॥ चरित्वा सर्वतो यत्र शं
खेष्वग्राधिरोहिषु ॥ पांचजन्यकरो विष्णुर्गोपुरेण विडंब्यते ॥ २ ॥ पत्रसौधविटंकेषु चषके चंद्रमं
डले ॥ चकोरमिथुनं माध्वीसवीटीं कुरुते निशि ॥ ३ ॥ तत्र दापाभिधः कश्चिच्चतुर्थान्वशेखरः ॥ य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १२८ सद्गतिः ॥ ३१ ॥ एकप्रकोष्ठव्यानद्धस्फाटिकाक्षासमुज्वलः ॥ मानकंजनदीशेन कौतुकोल्लासिचेतसा ॥ सद० न०
८७ ॥ ३२ ॥ सर्वंदितो बभूवान्तर्भवने भिक्षुशेखरः ॥ इत्याहतं नतं भिक्षुर्मंगलं किं भवद्गृहे ॥ ३३ ॥ इत्युक्तोऽसौ वि अ० ३७
नीतः सन्नाह प्रांजलिरेवहि ॥ ॥ मानकंज उवाच ॥ ॥ स्वामिन्मत्तनयोद्वाहो भविष्यत्यद्य मे गृहे ॥ अ
स्ति कल्याणमित्यक्का कल्याण चलकार्मुकम् ॥ ३४ ॥ प्रणिपत्य स्वयं पुत्र्या तन्नतिकारयत्तदा ॥ प्रणि
पत्याशिषं तामेनामुद्वाहालंकृतोज्वलाम् ॥ ३५ ॥ आलोक्य चिकुरं तस्यां कपोलमुकुरं तदा ॥ भिक्षुर्बबंध
527 स्वां दृष्टिं भिक्षुमाराधयेत्तदा ॥ ३६ ॥ मुहुरालोक्य तन्वंग्या धंमिल्लं धृतवल्लकम् ॥ कृतांजलिपुटे चक्रे तस्मि
न्नक्षि सतापसः ॥ ३७ ॥ तद्दृष्टिपंक्तिं वीक्ष्यैव भिक्षुं प्रांजलिरब्रवीत् ॥ ॥ कंजनदी उवाच ॥ ॥ स्वा
मिन् किंकरवाणीति वाण्यामेणीदृशेक्षणम् ॥ तद्दाक्षिण्यं च स्वपदे क्षणमक्षीणपद्धतिः ॥ ३८ ॥ उवाच
भिक्षुस्तं तत्र तस्मिन्वै वाहिके गणे ॥ ॥ भिक्षुरुवाच ॥ ॥ कर्तुं पंचवटीमेतच्चिकुरादीयतामिति ॥
मानकंजनदीनाथस्तथास्त्विति मुदं व्यधात ॥ ३९ ॥ छित्वा क्षुरिकया तस्याः केशान्स्मै समर्पयन् ॥ आ
मूलतूनतत्केशान्गृहीत्या लुरि विश्वरः ॥ ४० ॥ अंतर्धायो मयासार्धमविरासी द्रुमोपरि ॥ प्राणांसी कंजन ८७

विलासकालिकावल्ली मतल्लीसेककारिणी ॥२०॥ आनंगशृंगारसर्वस्वमिवांकुरितांकु
चौ ॥ तद्दृश्यंतशिरोगुंफे क्रियमाणंहिनागजम् ॥२१॥ अस्वंद्रतां भ्रुवौतस्याः कटाक्ष्याभागम
स्पृशत् ॥ गंडबिंबितताटंककुलात्तालस्तनद्वयी ॥२२॥ नटंत्यातन्मुखेलक्ष्म्यारतिकामनटोद्धृ
ता ॥ लावण्यरससंपूर्णा तारुण्यकुलदेवता ॥२३॥ साविवाहोचितां प्राप्यदशां प्रीतिंपितुर्व्यधात् ॥
रमाभिमुखिनीमेनांसंचारमणिदीपिकाम् ॥२४॥ उद्वोढुमाभिजात्यादेरुचितस्तामयाचयत् ॥
वृद्धैःसंचिन्त्यसंमन्त्र्य कुलक्रमगलद्रुती ॥२५॥ उद्वाहमनुमेनस्या मानकंजनदीश्वरः ॥ उक्तापांस
मेताद्रूतेरेननाथोवरःसुधीः ॥२६॥ अंतरानंदमाधत्तामुहूर्ते द्विजकल्पिते ॥ मानकंजनदीशो
ऽपि वधूनाहूयसर्वतः ॥२७॥ नगरेलंकृतेस्त्रीभिरकुरार्पणमादधे ॥ आहूयनिखिलान्बंधू
न् चतुरंगबलान्वितः ॥२८॥ मानकंजपुराधीशमाधासीरेननायकः ॥ एतस्मिन्नन्तरेशंभु
मानकंजनदीशितुः ॥२९॥ भवनं प्रापवेषेण महाव्रतिकयोगिनः ॥ जराचंचन्मणीनागकृत
कुंडलमंडितः ॥३०॥ रुद्राक्षभूतिधवलो योगपट्टोपवीतवान् ॥ कौपीनपादुकोल्लासिमदक्षि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरं१द्रिकां रतिसोदरीम्॥ चतुर्मुखकरांभोजसृष्टिकौशलसंपदाम्॥९॥ आसीज्जन्मोत्सवे तस्याभू सदा. न.

भृत्येन्द्रा ८६ यान्मंगलसंभ्रमम्॥ देवो शंकरभक्तेभ्यो यथेप्सितमसौ धनम्॥१०॥ विप्रेंद्रा पुण्यसंघोषैर्मंगलस्नेह अ०३७

हधारया॥ भक्तानां समुदं कुर्वन् सच्चकार महोत्सवम्॥११॥ स तदा घोषयामास भागधेयस्य कंद

लीम्॥ मूर्तामिवेंदिरां साथ मंदिरे सुंदरा भवत्॥१२॥ सा क्रमेणांगणे चक्रे जानुभ्यां परिरिखण

म्॥ सिंजानहंसकामंजुवाचालमणिकंकणा॥१३॥ धूलिपालिभिरालीनां निकुरंबकरंबिता॥ के

528 लीं वितन्वती वीथ्यां चूलीपेक्षितभल्लुका॥१४॥ मणिपांचालिकाद्वन्द्वकृतोद्वाहोत्सवा क्रमात्

अक्षिबंधनलीलाभिरातानमुदं पितुः॥१५॥ वैडूर्यपीठांतरे न्यस्तां पद्मरागशिखावलम्॥ हरि

न्मणिघुतभ्राजिक्षिप्तमौक्तिकतंडुलान्॥१६॥ सखीहस्तसमालंबविहितभ्रमविभ्रमा॥ डो

लांकुतुकलीलाभिरेमे चित्रकथोक्तिभिः॥१७॥ माणिक्यमेखलाबद्धनानाचित्रदुकूलका॥

पुष्पापचित्तमातानी दारामेषु सखीयुता॥१८॥ पूरितेमधुना पद्मे निजाकारं विलोक्य सा॥ मम

श्रीराविरासीति मोग्ध्येनानतिमातनोत्॥१९॥ शारिकाशुककेकीभिः क्रीडाहरिणपोषिणी॥॥ ८६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवदीयसन्मुखः॥ ५६॥ चोलेश्वरो पीशकृपा भरेण प्राज्यं सराज्यं प्रशशास भूमौ ॥ देहांति मे भु-
क्तिवधाम किंकरः सदेव केंकर्यरतः स नंदी करः॥ ५७॥ ॥ इति श्री शिवरहस्ये सदाशिवाख्ये न-
वमांशे षट्त्रिंशोऽध्यायः॥ ३६॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥ श्री सदाशिवाय नमः॥ ॥
श्रीस्कंद उवाच॥ ॥ आस्पदं संपदामस्ति श्रीमत्कंचनदीपुरम्॥ सगंगमौलिसान्निध्यं सांग
वेदविदाश्रितम्॥ १॥ हल्लीजीववधूलूनशेषकल्हारसौरभम्॥ आघ्रातुमिव नम्राग्रा यत्र नाके
नशालयः॥ २॥ यत्र शूद्रकुलोद्भूता गृहस्थाश्रमधर्मिणः॥ नारीनृत्तानकस्थाने वीथ्यां च मुख
रातराः॥ ३॥ मानेकंजनदीचाख्यं तस्मिन्कंजनदीपुरे॥ कोऽपि शूद्रकुलोत्पत्तिरासीच्चोलचमूप
तिः॥ ४॥ चिंतना वंदनाभ्यर्च्यवर्तनाभावनानिसः॥ नियतं नीलकंठस्य निदधे पादपद्मयोः
५॥ बालेंदुमौलौ विन्यस्य दास्ये कलयतां धृतिम्॥ शुश्रुषालग्नधीश्चासी द्भक्तानां भक्तिनिर्भरः॥
॥ ६॥ निजसंपदमीशानभक्तानामेव भावयन्॥ प्रागेवाभ्यर्थनायास वांछां पूर्णमातनोत॥ ७॥ त
तोऽनपत्यतारखेदात्सो भजत्परमेश्वरम्॥ तदीपदयया पुत्रीं प्रसूता स्वकुटुंबिनी॥ ८॥ चतुर्थवंशवासाशेष्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ वैश्य उवाच॥ ॥पाहीशं दुकलानललाम भगवन् श्रीकंठ कंठीरवोद्दृप्तचर्मधराव्ययेश भग सदा.न.
८५ वन् मां पाहि सर्वेश्वर॥ ब्रह्माद्यच्युतवंद्यपाद सुमहानागांग गौरीमुख उत्फुल्लाब्जविकासनार्क भ अ०३६
गवन् त्र्यक्षाधुना पाहि माम्॥४८॥ भक्तिरूपेण पाशेन स्वं कर्षति शंकरं॥ कंठकर्तृनिजं दुःखं न सस्मा
रस्मरद्रुहि॥ भक्तिमाधत्त वैश्योऽसौ ऋजुजीतो महेश्वरः॥ ववृषुः कुसुमं देवाः तत्र वैश्यनृपोपरि॥
ततो नृपः कलानाथपादयोः प्रणनाम सः॥५०॥ वनस्थलीव तत्सेना वर्षेणोल्लासिताभवत्॥ त्रि
१४ पुरं दग्धुकामस्य स्थितस्य पृथिवीरथे॥५१॥ मौर्वीं नीतिवतः शंभोः नागं कार्मुकमद्रिराट्॥ स्थितं स्था
णुमिवाशक्यस्थाणुं वै भक्तिनिर्भरः॥५२॥ ब्रह्मणा मृग्यमौलिं तमृजुं चक्रे नृपाग्रतः॥ भक्ताद्दृते के
न शक्यो महेशो भक्तिभावतः॥५३॥ नृपः पुरमगाद्भक्तः सवैश्योऽपि स्थितस्तदा॥ तत्र तालवनाधी
शं गुग्गुलुद्दाम धूपतः॥५४॥ धूपपन्नामहादेवं तत्रोवास महृष्टधीः॥ प्रविश्य वेश्म स्वं प्राज्यमा
ज्यान्नैर्भक्तपूजकः॥५५॥ स देहांते शिवं प्राप भार्यापुत्रसमन्वितः॥ ॥सूत उवाच॥ ॥कला=
धिनाथः स चेट्टशासंनिधौ स्थित्वा प्रयातो रजताद्रिमौलिम्॥ सगुग्गुलुद्दाम सुधूपसौरभैः सुधूपइला ८५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाद्राक्षं गृहं मम ॥ धनधान्यादिसंपूर्णं तूर्णं शंभोःप्रसादतः ॥ ३६ ॥ इत्युक्त्वा सा तदा वेश्या वेश्ये
नभूत्सुविस्मिता ॥ अन्नैः षड्रससंपूर्णैः भोजयामास बांधवान् ॥ ३७ ॥ ब्राह्मणान् शिवभक्तांश्च
भोजयामास हर्षितः ॥ लब्ध्वा श्रियं कृपो श्वैवैर्विभोर्भिक्षाटनस्य सः ॥ ३८ ॥ अन्नैराराधयन्भक्तान्
न्बहं रसशालिभिः ॥ तच्चकुलोदंतमधुना चोलेंद्रो विस्मितोऽभवत् ॥ ३९ ॥ तं वेश्यं पूजयामास धू
पदं शांकरालये ॥ सोऽपि गुग्गुलुधूपेन अधिकं सोऽप्यधूपयत् ॥ ४० ॥ तेन भक्तेन चोलेंद्रो श्रीता
लविपिनं ययौ ॥ तत्र तालवनाधीशो नीलग्रीवोऽपि शंकरः ॥ ४१ ॥ वक्रित ग्रीवमालोक्य समी
कर्तुं नृपोऽभवत् ॥ पत्तिभिः वाजिभिः पाशैर्गजशुंडावलीधृतैः ॥ ४२ ॥ पाशैरुद्बध्य देवेशं चकर्ष
ति बलेन सः ॥ सतदन्नमयाशक्तः भक्तेन स नृपो ययौ ॥ ४३ ॥ स्वयं दर्शयितुं देवमृजूनिरगमद्गृहात् ॥ मार्गे
महेश्वरं नत्वा तेषु तेषु च धामसु ॥ ४४ ॥ प्राप्य ज्वद्विजावासं श्रीतालविपिनं ययौ ॥ दृष्ट्वा नृपस्य तत्कर्म
तद्बलं च कृतश्रमम् ॥ ४५ ॥ कथं नृपः कृतार्थः स्यादिति भक्तो व्यचिंतयत् ॥ सार्धं नृपबलेनैव यतिष्ये
स्वयमित्यसौ ॥ ४६ ॥ देवोत्तमांगसंबद्धं कंठरज्जुं श्च कर्षितम् ॥ करवालं गले बिभ्रद्वैश्यः कर्षन्नृपाग्रतः ॥ ४७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ९ हर्षाश्रुपूर्णनयनासुतैः सह मुदा तदा ॥ २५ ॥ इत्युपर्भोज्यादि कं पक्तुं प्रवृत्ता भूत्पतिव्रता ॥ तमंतश्च सदा.न.
८४ शिनागारे सुतं भार्या प्रियातदा ॥ २६ ॥ दत्वागुग्गुलुधूपं च नत्वाहृष्टं भयाकुलम ॥ देवदेवोऽपि दय अ०३६
या स्वप्ने प्राह कलाधिपम् ॥ २७ ॥ ॥ महेश्वर उवाच ॥ ॥ कलानाथ क्षुधार्तोऽसि निजं गत्वा
निकेतनम् ॥ अन्नं क्षीरादिसंपन्नं भवता भुंजतामिति ॥ २८ ॥ तच्छ्रुत्वाथ प्रबुद्धोऽसौ नत्वेशं निर्गतो गृ
हम् ॥ स्वर्णरत्नादिसंपूर्णं वीक्ष्य वभूव विस्मये ॥ २९ ॥ तमागतं कलानाथं भार्या प्रत्युज्जगाम तम् ॥
पुत्राश्च हर्षितास्तत्र पितरं प्रययुर्मुदा ॥ ३० ॥ प्रणम्य तं कालनाथमारात्तिक्येन सेवितुम् ॥ तद्दूरप्रां
S३० तसदनामदनार्त्ति स्येतिते ॥ ३१ ॥ प्राह स्वभार्यया सार्धं पुत्रैः सोऽपि प्रहर्षितः ॥ उवाच भार्यां हृष्टां तां
कलानाथोति हृष्टधीः ॥ ३२ ॥ ॥ कलानाथ उवाच ॥ ॥ अत्र चित्रं कथं सुभ्रु निःसीमा श्री
रियं वद ॥ गोमहिष्यादिसंपूर्णं धनधान्यांबरादिभिः ॥ ३३ ॥ प्रासादकक्ष्याविततं प्रसादः कस्य
वामम ॥ इति तद्वचनं श्रुत्वा पत्युर्भार्या तमब्रवीत ॥ ३४ ॥ ॥ भार्योवाच ॥ ॥ स्वप्ने मामा
हविप्रेंद्रो तवाद्य सदनं शुभम् ॥ श्रियासंपूरितं भद्रे गृहाण वसुपूरितम् ॥ ३५ ॥ इत्युक्त्वा निजगामैव ८४

इतिनृपं कलानाथः स्वर्णं दास्यामि गुग्गुले ॥ दिशे त्याह विप्रं वैश्यः प्राह किं मे ददे भवान् ॥१४॥ मांगल्य
सूत्रं स्वर्णाढ्यं ददामीति कलाधिपः ॥ तद्दत्वा गुग्गुलुभारं दत्वा प्रीतमना ययौ ॥१५॥ प्राप्य वीरेश्वरस्था
नं तत्रासौ गुग्गुलोच्चयम् ॥ स्वगोत्र भक्त नाथस्य अन्यको शगृहे स्थितः ॥१६॥ भार्या सुत भयाद्देशे
कलानाथधराचिकः ॥ तद्भार्या तत्सुताश्चैव विचिन्वंति च तं तदा ॥१७॥ विपणापणवीथीषु क्का
स्ति चाद्य कलाधरः ॥ वैश्य पुत्राश्च तानाहुः निर्गतोऽद्यैव गुग्गुलम् ॥१८॥ गृहीत्वा याति वैश्यातो नगृ
हीता यवास्तदा ॥ इत्युक्त वैश्यपुत्रैः सा पुत्रैः सह शुचाकुला ॥१९॥ तमन्वधावत्त्वरिता शून्यं त्यक्त्वा
सुतैर्गृहम् ॥ इत्थं स्थिते महेशेन प्रेरितो धनपः स्वयम् ॥२०॥ तद्गृहं पूरयामास धनधान्यांबरादिभिः ॥ सा
प्यान्विष्य शुचा पुत्रैः गृहं प्राप्य क्षुधातुरा ॥२१॥ सुप्तां गणेत दास्वप्ने वृद्धविप्रस्वरूपधृक् ॥ भस्म
रुद्राक्षसंपन्नो तामुवाच महेश्वरः ॥२२॥ ॥ महेश्वर उवाच ॥ ॥ मा पीडयाद्य भक्तं मे
कलानाथं मदर्चकम् ॥ गुग्गुलुद्दाम धूपेन पूरितं तेन मे गृहम् ॥२३॥ तव संपदियं सर्वा पश्ये त्याह सुलो
चनाम् ॥ इत्युक्त्वासा तदोत्थाय समंतादीक्ष्य मंदिरम् ॥२४॥ स्वर्णरत्नादिभिः पूर्णं नलाशिवकृपेति सा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिव०९ भोदार कावेरी भूरि वारिषु ॥ चोलेष्वस्ति घ० ग्रामो भूसुरेंद्र निवास भू: ॥२॥ यत्र गांगा शशिब्रह्मक सदान-
८२ पालांक जटाधरः ॥ भक्तं पातु हरः कोधात् पदा कालं पुरावधीत ॥ यत्र क्षेत्रेषु शालिश्री शंखमुक्ता अ० ३५६
तटेषु च ॥ पार्श्वे तु पनसशालाश्च कल्हारोपाश्च मेतुषु ॥४॥ गीतानि शालिकास्त्रीणां धान्यरक्षो
घभूमिषु ॥ ऋग्यजुः शास्त्र मुखरसाम घोषारु भूषिते ॥५॥ तस्मिन्द्रो वर्षित ग्रामे कलानाथ इति
द्विजः ॥ आसीत्सरिलकि येदं धिसदार्चनपरायणः ॥६॥ मृकंडुसूनो बालस्य गाढमाश्लिष्य तो भ
S31 यात ॥ भक्तसंरक्षणे मृत्युं जघान प्रपदेन यः ॥७॥ तं गंगा वीचि वाचाल किरीटं सकलाधिपः ॥ आ
नर्च सौरभ जुषा नित्यं गुग्गुल धूपतः ॥ चा देवेश दयया रिक्तो जातोऽपि सकलाधिपः ॥ गुग्गुलु च व धू
पेन न तत्याज शिवार्चनम् ॥९॥ गोगृह क्षेत्र दासादि विक्रीय विभवं विभो: ॥ कुर्वन गुग्गुलु धूपा-
र्चीं सुत दारा शुचं व्यधात ॥१०॥ उपोषितेषु पुत्रादि ष्वतिरेके दिने द्वये ॥ यावन क्रीतुं ददौ भर्वे पत्नी
मांगल्यसूत्रकम् ॥११॥ सत दृही त्वा विपणिं गच्छन् गुग्गुलपूर्णया ॥ नावा समागतं वैश्यं दृष्ट्वा हृष्टत
रोऽभवत ॥१२॥ गंगाधरस्य पूजार्थं सुगन्धि वर गुग्गुलुः ॥ लभ्यं वा नास्म परो लाभो किं व्रीहि रूपके ८३
नमे ॥१३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्के स चो मृत्य करेणास्फालय दृजम ॥ मयाकृतेयं स दृढ्विरित्यन्नृत्यंसदर्पितः ॥ ६४ ॥ तदैवानंद चेष्टाभिः
सचोन्मत्त इवाभवत् ॥ निज भक्तेक्षणन्यासा त्र्यक्षोऽप्यक्षियुतोभवत् ॥ विप्रायतत्प्रेम पुनरित्थं दर्शयि
तुं शिवः ॥ ६५ ॥ वामेपिनेत्रक्षतजं निभृतरेषव्यभाषयत् ॥ स दृष्ट्वापुनरन्याक्षिक्षरद्रक्तमवीक्ष्यसः ॥ ६६ ॥
दर्शितस्यान्यघातपादंशापनार्थं शरोद्धृतम ॥ निजाक्ष्युत्कृत्यतस्याक्ष्णा व्यधाद्यावोऽतिहर्षितः ॥ ६७ ॥
तदंतरे महादेवः प्रादुर्भूतः सहोमया ॥ तस्मै दुमक्षमस्यक्षः तस्मै दत्वाक्षिणी हरः ॥ वीक्ष्याभूद्विस्मितोविप्रः
पुष्पाणिववृषुः सुराः ॥ दृष्ट्वादेवंदृशाः शरेणनिजहृत्कपोटकधीरं करं संरुध्यात्म करेणकिंकरवरंतं शंकरः
प्राहहि ॥ कैलासेवसवासवादिविनुतोमात्राचपित्रा स्वयं मद्भक्तैर्गणपैः विहृत्य सुचिरं मत्प्रेमभाक्त्वं भव ॥
नेत्रार्पकस्यदमुदारकीर्तेश्श्वीत्रमेतद्धि पवित्रमिष्टम ॥ पठंति ये भक्तिपरायणास्ते प्रयान्तिसमीप्यपदं
हरस्य ॥ ७० ॥ ॥ इति श्रीशिवरहस्ये नवमांशे सदाशिवाख्ये भिल्लनेत्रार्पणं नाम पंचत्रिंशोऽध्यायः ॥
३५ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥
कालनाथोऽभवद्देवोयासदावनुपघ्नेनयुवा ॥ बिल्वारण्येवसत्पुण्ये दंडकारण्यमध्यमे ॥ १ ॥ कह्लारसोर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संसेव्य पुष्पाण्युत्कीर्य पललं पुरतोन्यधात् ॥५१॥ देवो दर्शयितुं भक्तिं द्विजायास्मै घनस्य नाम ॥ स्रुतासृक्द सदा न.
८२ क्षं नेत्रोऽभूत दृष्ट्वाभूच्च विस्मितः ॥५२॥ शीर्णवक्त्राब्जहृदयो विह्वलांगो बभूव ह ॥ वेगादुत्तुत्य गत्वासौ ममा अ०३५
र्जक्षतजं तदा ॥५३॥ तद्दृष्ट्वा नारसावं ना ज्ञासीत्कृत्यमाकुलः ॥ निपतन्नुत्पतंस्तत्र दीर्घमुष्णं च निस्वसन् ॥
॥५४॥ केनेदं हि कृतं देव निर्गते मयि हिंस्रकैः ॥ मारोदीरक्षितं दग्धां अघहृद्घतमं मम ॥५५॥ इति सज्यं धनुः कृ
त्वा दिक्षु व्यापारितेक्षणः ॥ शैलमौलौ मृगान्कांश्चिद् दृष्ट्वा पुनरागतः ॥५६॥ स देवपादमाश्लिष्य प्ररुरोद पु
नः पुनः ॥ मयि तिष्ठति देवेश साहाय्ये तेऽत्र वै वने ॥५७॥ यदि पश्यामि तं हन्मि शरेणैकेन लीलया ॥ अस्य
४३२ दमनुरूपं किं प्रमाणेऽप्योदवीपसः ॥५८॥ केनायमसकृन्नेत्रं समभूयान्महेश्वर ॥ परीक्षितुमिदं तस्मा
दानयिष्याम्यौषधं वनात् ॥५९॥ इत्युक्त्वा निर्गतः शैले विचचार वनाद्वनम् ॥ औषधं तत्तदानीय
निर्मथ्य स्वकरेण सः ॥६०॥ तद्दक्षिणे सेचयत्कामं तद्रक्तं न शशाक सः ॥ रोद्धुं निर्विण्णहृदयो भिल्लो भक्त
करस्तदा ॥६१॥ पुनः प्रवृत्ते सोऽप्यन्यमुपायं समचिंतयत् ॥ मांसेन वर्धते मांसं अतोऽहमिषुणाक्षि मे ॥६२॥
उत्कृत्यास्य विभोर्नेत्रे न्यस्यामीति सहृष्टधीः ॥ उत्कृत्य नेत्रं तन्नेत्रे निर्यद्रक्तं समर्पयत ॥६३॥ सांसि ८२

वने भूरस्य (च) भक्तानां प्रथगस्य महात्मनः ॥ सोपानत्प्रपदं न्यस्तं इदुवत्तं दधाम्यहम् ५० ॥ अंतर्हदप्रेमरस

भरितं तन्मुखं वुजम् ॥ जह्नू कर्णपथो दीर्घ गंगां भः पावनं मम ॥ ४१ ॥ स्वयं पतदिव प्रेम पुष्पजालं तदुत

कृतम् ॥ तन्मूर्ध्नी कुसुमं हद्यं ब्रह्मा दृष्टेन मौलिना ॥ ४२ ॥ गृह्णामित प्रीतियुक्तो वसाम्या स्वाद्यतत्कृ

तम् ॥ गाढांगार प्रतप्तं तन्मधुनिष्यंदितं द्विज ॥ ४३ ॥ मुखाब्जानिःसृजरस रसनालेढितं मम ॥ पतलं

तेनयच्छत्तं सफलेन विशेषतः ॥ ४४ ॥ भवेन्न सदृशं तस्य हव्यं शिखिमुखेहुतम् ॥ स्वभावमुक्तातस्योक्तिः

स्मितफुल्ला ननस्यसा ॥ ४५ ॥ रोचते मे मुनिमुखे वदवाचां द्विजाधिका ॥ द्रष्टासि त्वं तस्य भक्तिं मोहं

संत्यज्य मा शुच ॥ ४६ ॥ देवो त्या स द्विजो रात्रौ परेद्यि प्राप्य पूर्ववत् ॥ देवं संपूज्य तं गूढः क्वा प्यतिष्ठत्कु

तूहली ॥ ४७ ॥ दिनमध्ये तदा प्राप चित्रमेघाभिधो वनः ॥ प्राक् द्विजन्मागमात्कालं मृगापार्थयपो वनम् ॥

४८ ॥ सपूर्ववत्स्वादुमांसं विभज्य नुष्यंतथोदकम् ॥ भिल्लानल्पप्रमाणो यमायययो सप्रशंकरम् ॥ ४९ ॥

आरुह्य तं गिरिवरं गिरिशं प्रत्यभाषत ॥ ॥ ध्यान उवाच ॥ ॥ विलंबितोस्मि किं शंभो क्षुधार्त्तोसि

न संशयः ॥ भुङ्क्ष्वेदं त्वत्कृते मांसमुत्कृष्टं यानीतमंजसा ॥ ५० ॥ मृगांगेभ्यो महादेवसुस्नाद्दुमुखोदकम् ॥ हीति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ भंतं हस्त्यद्रौ हन्ति वह्यितम् ॥ उवाच प्रणतं पुत्रं नागः साम्ना विलोक्षणः ॥ २९ ॥ ॥ नाग उवाच ॥ ॥ सदा न

८१ पुत्रमासाहसं कार्षीर्गिरावस्मिन्मृगान्प्रति ॥ कोऽयं देवः कोऽत्र वासो तवानुचित एव हि ॥ ३० ॥ ममाया अ० ३५

हि पुरं मेघभिल्लभल्लेन पालितं ॥ त्वया हीनोऽस्मि वार्धक्ये धैर्यं धर्तुं न हि क्षमे ॥ ३१ ॥ इत्थं पितुर्वचः

श्रुत्वा घनघोषो घनोऽब्रवीत् ॥ ॥ घन उवाच ॥ ॥ देवो दृष्टो गिरावस्मिन्नसहायेन संस्थितः ॥

असहायः क्षुधार्तोऽयं तत्सहायेह्यसंभृतः ॥ ३२ ॥ मृगेभ्योऽप्यथ हिंस्रेभ्यो तं रक्षामि वने स्थितः ॥ पुरं मे

S33 नेतकार्यं माता बंधुरयं पिता ॥ ३३ ॥ कदाचिद्भ्रमितो गेहं व्रजमात्रं च भोः पितः ॥ इति तेनाशु पुत्रेण सां-

त्वितो गृहमागतः ॥ ३४ ॥ उवास स घनस्तत्र देवदेवदयारसैः ॥ मुक्तजन्ममलां गोभूत्क्वासं केन कण्ठ्य

ते ॥ ३५ ॥ देवं घनेर्चयत्येवं द्विजोऽप्यर्चयदन्वहम् ॥ न चेक्षे पापकर्तारं वारयेद् इति चाब्रवीत् ॥ ३६ ॥

देवः सरिज्जयानूः स्वप्ने प्राहतमर्चकम् ॥ ॥ शिव उवाच ॥ ॥ व्याधं तो वै हितं साधुकर्मविक्ष्या

मितक्रतम् ॥ ३७ ॥ स भक्तिसारहस्यो ग्रासक्त कोऽप्यसौ ॥ तत्कर्म मत्प्रियं तस्यास्थितिर्वै विभाव ८१

ताम् ॥ ३८ ॥ प्राप्तस्याद्रिमितं स्थानं मद्भक्तिप्रेमवारिधेः ॥ मन्मूर्ध्नि पूर्वरि चूतपुष्पास्तारणकारिणा ॥ ३९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दारुणीं व्यायतमांसं कृत्वा भल्लाग्रतो घन: ॥१६॥ नैवेद्यार्थं महेशस्य तद्रसस्य परीक्षणम् ॥ हव्यमग्निमुखे
न्यस्तं त्रिदशानां यथा तथा ॥१७॥ कालहस्तिपते ह्येतं मांसं स्यात्तन्मुखार्पितम् ॥ यत्स्वादु मांसं तत्पत्रपुटे हृद्यं
न्यस्य मधुप्लुतम् ॥१८॥ मुखेनापूर्य नद्यंबोस्नानाभिलाषो धनस्तथा ॥ दवभस्मसमुद्धाह्य पुष्पाण्याहृत्य गंधि
लान् ॥१९॥ धनु: शरकरो भिल्लो निधायालंबि पृष्ठभू: ॥ पल्लवैरुच्छ्रितसन्मौलि: उपानद्दृढपादक: ॥२०॥
पूर्ववद्धृततोपादिरारुरुक्षुर्गिरिं घन: ॥ व्याघनाथो जगन्नाथमत्य विप्रेणयत्कृतम् ॥२१॥ पुष्पादि सर्वमु
त्सार्य मुत्सार्येशम पूजयत् ॥ तन्मांसं न्यस्य देवाग्रे प्राह हर्षितरो घन: ॥२२॥ मुखांबुभि: लिंगमौलिमाप्लु
त्याक्षिप्य तत्सुमम् ॥ पूर्वमांसादिदं स्वादु मयांग सुपरीक्षितम् ॥२३॥ क्रोडैणन्यंकुगवयखड्गकायसमुद्भ
वम् ॥ मिश्रितं मधुसारेण नवाभिष्यं चारुरूणा ॥२४॥ मधुरं मधुरं भुंक्ष्व मम नाथ मयार्पितं ॥ एवं निवेद्य
नैवेद्यं तस्थौ स्थाणोरथाग्रत: ॥२५॥ एवं दिनास मृगयु: रात्रौ वै जाग्रदन्वहम् ॥ हिंस्त्रेभ्यो रक्षितुं देवं प्रातर्या
ति गिरेर्वनम् ॥२६॥ घन: श्री कालहस्त्यद्रौ वेदं वेद म सेवत: ॥ द्विजो वद्धिजोप्यनुदिनं विमना भिल्लपूजया ॥२७॥
यथाशास्त्रं समभ्यर्च्य शंभुं निनाय दिवसान्बहून् ॥ चापकोशेरितो नागो भार्यया तत्र चागत: ॥२८॥ दृष्ट्वा घनं घना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ क्षांतं त्वयैतदित्यार्तो निपत्योर्व्यां स्थितो दस्युः ॥ सहमानं श्रुत्वोप्रोक्तः महाकारुणिको हरः ॥ ५ ॥ इदं ज्ञेन सदा न.
८० क्षमाकार्या त्वयक्ष साक्षाच्छिव द्रुहि ॥ इमं विभुं पर्वताग्रे स्थितं ज्योतिर्मयाकृतिम् ॥ ६ ॥ अपूजयन् अ० ३५
विलंबेन किं तिष्ठामीति चिंतयन् ॥ पललं पत्रमस्थीनि पादुका पद्ममप्यसौ ॥ ७ ॥ संमार्ज्य न्यासमु
त्सार्य स्नात्वा नद्यां समागमत् ॥ संप्रोक्षण विधिं कृत्वा दोषशांत्यै विधानतः ॥ ८ ॥ पूजयित्वोपचा
रैस्तं देवदेवं ननाम सः ॥ स्तुत्वा विज्ञाप्य देवेशं प्राप्यते शिवपूजके ॥ ९ ॥ ततो धनो व्याधनाथो पच्य
कृतं ददाम्यहम् ॥ धनुर्धरोयतस्तत्र गत्वा शैलैक पार्श्वतः ॥ १० ॥ स्थित्वा निलिङ्कृत्य समहाध्व
तरसंधिषु ॥ चरतो धावतो हत्वा वराहेण वृकान्घनः ॥ ११ ॥ पदान्यन्विष्य गवयान्खड्गखड्गेन सोऽव
धीत् ॥ वनमध्ये निविक्षेप क्वापि मेध्यान्मृगान्हतान् ॥ १२ ॥ विच्छिद्य वह्निमथनदारु क्षुरिकया
घनः ॥ उत्सार्य सरघाप्रांतं छित्वा शाखं मधूकरम् ॥ १३ ॥ कदलीपत्रपुटकं कृत्वा निष्पीड्य तत्
न्मधु ॥ शुष्ककाष्ठचयैर्वह्निं प्रज्वाल्य स दनस्तृणैः ॥ १४ ॥ निर्मथ्य च विशस्यैव वाराहेणैर्वृकान्
घनः ॥ उत्कृत्य मांसं स्थानेभ्यो मृदुपक्वं प्रताप्य तत् ॥ १५ ॥ विदार्य तां क्षुरप्रेण मांसपत्रपुटे न्यधात् ॥ ८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाग्रदं जनशैला भो न जहौ पार्श्वमीशितुः ॥ घनस्वाल तमो घोरे जंतूयं ततमो भरे ॥ १२ ॥ अशक्यंद
र्शनिं देवो तस्थौ पश्यन्निवस्वयम् ॥ क्वाप्यद्रौ वेणु मुक्तौघ क्वाचिन्नागमणिव्रजः ॥ १३ ॥ तौ पुष्पवंतौ
विवर्तौ देवं सेतुमागतौ ॥ ज्वलितौ षधिदीपैश्च गुहारत्नोप तांशुभिः ॥ १४ ॥ मुनींद्रद्युतिभिस्तत्र
शैलेरात्रिमसिद्धयति ॥ निशांतं वदिनां रावं निशम्य पठतां घनः ॥ १५ ॥ अस्वत्यवीरस्वात्मेशभोज्या
हरणधीरभूत् ॥ स यूथमावासजुषां मृगाणां पृथक् निहंतुं मृगयोरभिज्ञः ॥ १६ ॥ गिरिग्रामानम्यगृहीत
चापो प्रभातशेषेतमसिप्रतस्थे ॥ ॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे चतुस्त्रिंशोऽध्यायः ॥
३४ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥
उदिते तपने विप्रः पूर्ववद्देवपूजकः ॥ पूजाद्रव्याणि संभृत्य शिवमर्चितुमागतः ॥ १ ॥ तपः शमो दमोपेतः भस्म
रुद्राक्षभूषणः ॥ शिवागमविधानज्ञः स्वात्मेशमचलस्थितम् ॥ २ ॥ निरंजनं नीलकंठमवाप्याग्रे स्थितो
द्विजः ॥ ददर्श मांसान्यस्थीनि विकीर्णानि ततस्ततः ॥ ३ ॥ दूरं ततो पसृज्यासो हा केनानुचितं कृतम् ॥ नि
षादे निर्भयैरेतत्कृतमंहो हि नापरैः ॥ ४ ॥ एवं सद्गुरु चिंतो भूत्वा देवमाहाति खिन्नधीः ॥ शिवार्चक उवाच ॥

शिवरह०९ नवेत्तिस्वांक्षुधांमांसमावाभ्यां नददात्ययम् ॥ मांसानि विभ्रन्नरस्यानि वाराहाणि घनस्तदा ॥ ८० ॥ सदा०न०
७९ देवाविष्टघनस्याद्य नजानीवः प्रति क्रियाम् ॥ देवार्चनकरं वक्ति नागे नात्र वध धृतः ॥ ८१ ॥ एवंवि अ०३४
चिन्त्यदीनौ तौ गाधं पुरमगच्छताम् ॥ घनोप्यज्ञाततद्योनो मांसंनिक्षिप्य पात्रतः ॥ ८२ ॥ जलंदेवाभिषे-
कार्थमास्ये संपूर्य सो चिरात् ॥ बिभ्रन् पूजार्ह पुष्पाणि गृहीत्वा सशरं धनुः ॥ ८३ ॥ हस्तेनैकेन चान्येन
वहन् पललभाजनम् ॥ क्षुधार्त्तो वर्त्तते देव इयंतं कालमित्यसौ ॥ ८४ ॥ महादयालुस्त्वीरतः स्खलन्नारुह्य
तं गिरिम् ॥ सोपानहृत्पदेनेश मूर्ध्नि पुष्पाण्यपोह्यसः ॥ ८५ ॥ मूर्त्तैरिवप्रेमरसैरभिषिच्यमुखांबुभिः ॥
533 देवं कराहृतैः पुष्पैरभ्यर्च्य प्राणमद्घनः ॥ ८६ ॥ निदध्ये च पुरः शंभो मांसं पत्रान्तरार्पितं ॥ स्निग्धदारु-
शिखाप्रोतं प्रदत्तं पललं पृथक् ॥ ८७ ॥ दंतनिष्पीडितं जिह्वा ज्ञातपूर्वं रसोदयम् ॥ मयार्पितमिदं शंभो ज्यमं
गीकुरु जगत्प्रभो ॥ ८८ ॥ इत्युक्त्वा तपि(यित्वे) दुष्प्रे शंमासंदध्या त्पुनर्विभो ॥ इतिस्थितवतस्तस्य पुरा भक्तिं नि
रीक्ष्यतम् ॥ ८९ ॥ दृष्ट्वा समानीन करः प्राणमत्पाश्चिमा जले ॥ प्रवृत्ता यां त्रियामां यां तमोरुद्धासु दिक्षु
च ॥ ९० ॥ हिंस्रासंत्यत्र ते नूनमनार्ये कु पुरीश्वरे ॥ इति चिंताकुलो भूत्वा घनः शूरधनुर्धरः ॥ ९१ ॥ ॥ ७९

तिष्ठामि कथं वेत्स्यकुलाशयः ॥ अश्रुधाराल नयनो भूत्वा गंतुमुदीर्णधीः ॥ ६९ ॥ चापमादाय हस्तेन
नत्वेशं कोशसंयुतः ॥ स घनो निर्गतो यत्नाद्गिरिशृंगादवातरत् ॥ ७० ॥ तीर्त्वा सुवर्णमुखरीं गत्वा दूरत
रं वनम् ॥ नत्वा चोपोषितं प्राह मथितान्निं निरीक्ष्य सः ॥ ७१ ॥ सर्वैरंगैर्वराहोऽपि निष्ठत्यो छिंद्यनत्वच
म् ॥ इति ब्रुवाणं तं कोशो भाववित्प्रत्यभाषत ॥ ७२ ॥ ॥ कोश उवाच ॥ ॥ अयं तत्र गिरेः शृंगे देव
मालिंग्य कंचन ॥ बिलाभिरक्तगोधेव न्निरगान्न विमृज्यतम् ॥ ७३ ॥ तस्मै देवाय मांसानि दातुमत्रा
प्युपाययौ ॥ अस्मत्कुलेशं तं त्यक्त्वा तस्मिन्नासक्तधीरभूत् ॥ ७४ ॥ तच्छ्रुत्वा प्राह चापोऽपि घन किं न त्वया
श्रुतम् ॥ ॥ चाप उवाच ॥ ॥ इयं का नाम ते भ्रांतिः किं जहास्यस्मदीशताम् ॥ इतीरितो घनश्चापमुख
मैक्षत केवलम् ॥ ७५ ॥ विदध्वांगानि बाणेन दग्ध्वरोमस्य भेत्त्रिणः ॥ मांसं तद्दारुसंप्रोतं मतप्तो ज्वल
तोनले ॥ ७६ ॥ वह्निस्निग्धं यथा पाकं स्वादु चास्तीति वेदितुम् ॥ तस्मिन्हुतेन यत्स्वादु मृदु सुस्निग्धमेदुरम् ॥
७७ ॥ तं श्लक्ष्णपर्णपात्रांते निचिक्षेप पृथक्पृथक् ॥ चापकोशौ च तत्कर्म दृष्ट्वा तौ प्रोचतुर्मिथः ॥ ७८ ॥
भिल्लौ ऊचतुः ॥ ॥ अहो मोहो घनस्यायमुपर्युपरि वर्धते ॥ मांसं प्राप्तं खं वक्त्रेण निदध्याति परीक्ष्य च ॥ ७९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षि॰वर॰९ रागतः सोऽयं भृत्यस्नेहो महानहो ॥५८॥ इत्युक्त्वात्मबहुप्रेमः तदंशोप्रेमभागभूत् ॥ ॥ सता॰न॰
०८ घनउवाच ॥ ॥ नाहं वारण मागभल्लकं भुवनेवने ॥५९॥ एवंत्वमसहायोऽस्मि हतोस्मीति शु अ॰३८
शोचह ॥ हर्षाज्ञातस्त्रस्ता चापो देवमंबुदत्तादिभिः ॥६०॥ कं पूजयेदिति प्राह घनः प्राह निषादकौ ॥
तावत्त्रूतां नि षादेशघनं भक्ति घनाघनम् ॥६१॥ ॥ निषादावूचतुः ॥ ॥ मृगयार्थं पुरासार्धं व
तित्रावागतो हि वाम् ॥ कश्चित्तदानीं दृष्ट्वोऽत्र द्विजः क्षिवपदार्चकः ॥६२॥ सदेवमर्चयन्नूते
नाद्यप्यार्चितोह्ययम् ॥ तच्छ्रुत्वा भूल्लुनो हृष्टः कालहस्ती शलगृधीः ॥६३॥ ॥ घनउवाच ॥
तोषयिष्याम्यहं देवं द्रव्येः क्षौद्ररसादिभिः ॥ इति ध्यात्वा, शिवं हित्वा घनो गंतुं न चक्षमे ॥६४॥ नाप्य
स्य पार्श्वगः कोऽपि, मांसं नोऽस्मै ददाति च ॥ क्षुधार्तोऽयमिमं हातुं न शक्नोमि करोमि किम् ॥६५॥ किला
म मांसमादाय प्रासस्यामिति चिंतयन् ॥ सगच्छन् पुनरागच्छन् हृष्यन् जिघ्रन् मुहुर्मुहुः ॥६६॥ गच्छ
न भूयोप्यति स्नेहात् पश्यंस्तं परिवृत्य च ॥ गोवत्सला वत्समिव देवं हातुं न चक्षमे ॥६७॥ न वं मांसमहं
नाथ न पेयमिति चिंतयन् ॥ कोबंधुस्ते स्थितो येकः कथं वा त्वां जहाम्यहम् ॥६८॥ क्षुधार्तस्त्वमपि ०८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

या
कालागरुमणिद्योतितरंगां पुण्यदर्शनाम् ॥ दाद्रालवृक्षषंडेस्यास्तटेस्थित्वा धनुर्धरः ॥ ४८ ॥
चापाद्यमक्षतां वह्निं दृष्ट्वैनमचलं पुनः ॥ आगमिष्यामि इत्युक्त्वा घनः कोशसमन्वितः ॥ ४९ ॥
अवातीरन्नदीतीरं द्रुमपुष्परसोत्तरम् ॥ वीतश्रमो निर्मलात्मा शैलं श्रीकालहस्तिनम् ॥ ५० ॥ दृष्ट्
वा सह षिसघनः तां तीर्त्वा ततटाध्वना ॥ गिरेरुपत्यकां प्राप्य मध्याह्ने तस्य मूर्धनि ॥ ५१ ॥ शुश्रा
व निःस्वनं धीरं चतुर्वाद्यसमन्वितम् ॥ शब्दः कोयमिति प्राह स किरातस्तमब्रवीत् ॥ ५२ ॥
किरात उवाच ॥ ॥ स्मरघाणामेषच्चोद्योमहाम धुजुषामिति ॥ तपोभिः ~~प्राक्~~ प्राक्जन्म
कृतैः परां भक्तिं शिवे वहन् ॥ ५३ ॥ अस्ति न्यंतद्भुतानीव भावयन् हर्षनिर्भरः ॥ श्रीकालहस्ति
शैलेंद्रशृंगं सोपानपंक्तिभिः ॥ ५४ ॥ आरुरोह किरातभ्यां ददर्श सर्वेश्वरं विभुम् ॥ प्राग्देवद
र्शनादेव सहसा मविबंधनः ॥ ५५ ॥ अभूत्तेजोलसन्मूर्तिर्घनोऽकृत्रिमभक्तिमान् ॥ श्रीका
लहस्ति शृंगो घज्जगद्बीजोद्यतांकुरम् ॥ ५६ ॥ दृष्ट्वानंदां बुधौ मग्नः हर्षादालिंग्य शंकरम् ॥ सन
त्वाविवसो हर्षाच्चं चद्रोमांचकुंचकः ॥ ५७ ॥ सार्द्रानंदांबुनयनः किं कुर्यामिति मूढधीः ॥ कांत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ वंचयंस्तान् वनं ययौ ॥ स वराहो महादर्पो गुंजानलसमेक्षण: ॥ ३७ ॥ गिर्यंतगर्त्तं वृक्षाग्रा सदा.न.
७७ दंतिभिरेवारव: ॥ तं गुल्मांतस्थितं ज्ञात्वा यावन्नासक्तिभावत: ॥ ३८ ॥ अशक्यबाणोत्कोल अ.३४
नो घनक्षुरिकयावधात् ॥ चापखिन्नउवासन्नं कोलनाथं द्विधा कृतम् ॥ ३९ ॥ अहो पश्यं
ति तद्युक्तं कोशात् तं घनमानयत् ॥ प्राहतु: तौ घनं स्वामिन् खिन्नाश्च क्षुधिता वयम् ॥ ४० ॥
कोलमांसं पता प्यगता वासाद्याहत्यचोदकम् ॥ पीत्वा तृषा तत: सर्वे व्रजामो मृगया वनम् ॥ ४१ ॥
९३७ तच्छ्रुत्वा तत्र पानीयमस्तीत्याह च तौ घन: ॥ तवाहतु र्महानग्रे गिरिरस्ति तदंतिके ॥ ४२ ॥ सुवर्ण
मुखरीत्यस्ति सरित्तुंगतरंगिणी ॥ इत्युक्तो ऽसौ तत्र याम: कोल आनीयतामयम् ॥ ४३ ॥ इत्युक्त्वा
योजनं गत्वा ददर्श शालपं गिरिम् ॥ अत्र श्रीकालहस्त्यद्रौ शिवो देवो विराजिते ॥ ४४ ॥ दृष्ट
व्य इति केनोक्त: प्रीत: प्राह घनस्तदा ॥ दृष्ट्वाद्रिमेनं को भार: कोपि याती वमे मन: ॥ ४५ ॥
अयथा पूर्वमाप्नोति द्रष्टव्यांतर कौतुक: ॥ स द्वस्तत्र कुत्रासौ इति ताभ्यां त्वरान्वित: ॥ ४६ ॥ ७६
गत्वा ददर्श सरितं सुवर्णमुखरीं घन: ॥ तदां तवेणुनिर्मुक्तमुक्तापुलिनशोभिनीम् ॥ ४७ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समूहं कोलसंभवम्॥ २५॥ निवेदिते यथावृत्तं घनस्त्वाविशद्वनम्॥ २६॥ मृगान्नेषु शबरान्कु
धा बाणानवाकिरन्॥ कृतांघ्रिशृंगमूर्धानः पेतुरुर्व्यां मृगव्रजाः॥ २७॥ सिंहव्याघ्रवराहैणभ
ल्लकाः शरभादयः॥ पश्चार्धभागमंगेषु फलाग्रेषु घनुश्च्युतैः॥ २८॥ घनो घनाघन इव श
रासारमवासृजत्॥ भालन्यस्ता गृहस्तस्तामासां बद्धाह्स्णा इव॥ २९॥ अंजनाद्रिनिभे भा
नो समूहा नारदो घृताः॥ किराताः केचिदिच्छंतो मोचनं तानमूमुचत्॥ ३०॥ उत्पतन्निषुणा वि
द्धो कश्चिद्दूत्वा त्पतन्मृगः॥ अदृश्यत तदाराहु गृहीतेंदुसमप्रभुः॥ ३१॥ भिल्लभल्लाननज्वा
लाभीतभल्लकराजिषु॥ मातंगवृकसारंगमहिषाश्च ययुर्वनम्॥ ३२॥ प्राप्ता बहुपयःपातुं घना
इव पर्यानिधिम्॥ जालाच्युताश्च श्वगणा रुरुधुश्च मृगान्बहून्॥ ३३॥ विधून्वन्त इषूंश्चा
पान् इंद्रियौघा इवात्मनः॥ कश्चित्तत्रापतन्पोत्री प्रदुद्राव घनारवः॥ ३४॥ तमन्वधावद्धा
वंतं शरचापधरो घनः॥ तं घनं च महासत्वो द्वौ किरातावनुद्रुतौ॥ ३५॥ तेनाप्यविज्ञातगती
निष्क्रांति द्वंद्व विक्रमौ॥ घनश्चापकरो तौ च शुनो मुक्त्वा शरांस्तथा॥ ३६॥ वराहं नृपसोऽपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० ९ श्चर्मवसनावीरव्याघ्रंतमन्वयुः ॥१४॥ पटहैः पर्यंतस्तैर्ध्वनिभिः दिग्वधूमुखम् ॥ शुभा सदा० न०
७६ न्यग्रनिमित्तानिदृष्ट्वातेमुदितोघनः ॥१५॥ वृतोव्याधैः श्वभिश्चैवसपर्येयोमृगयावनम् ॥ अ० ३४
गृहीतशृंखलापाशा धावद्भिः शबरार्भकैः ॥१६॥ लंबारुणललज्जिह्वा ययुः श्वानासमंततः ॥
केचिद्ययुः पुरोरोधिगुल्मादिच्छेदकारिणः ॥१७॥ ययुरन्येमृगान्रोद्धुं वागुराभारवाहकाः ॥ के
,यि चित्किरातासन्नद्धाश्चर्मवर्मविधारिणः ॥१८॥ आलोकइषवोव्याघ्रानिषुहस्तातमन्वयुः ॥
५३७ पुरोरवस्तुशृंगेषुतूर्यढक्कारवैःसमम् ॥१९॥ व्यापतःश्रेणिसंचारा ययुः सर्वेवनेचराः ॥ नि
षादवाहिनीसांद्रद्रुमइयामेवनांतरे ॥२०॥ यथोनीलांबुधिवहत्कलिंदतनयोपमा ॥ पुलिं
दवाहीनीभीमामृगाणामंतकोपमा ॥२१॥ अथदक्षिणदिग्भागेस्थितस्यास्यगिरेस्तटे ॥ हि
रण्यः संचरंतीतिसंसत्सुपदवेदिषु ॥२२॥ घनेनवेष्टितंतत्र वनस्यजघनंमहत् ॥ तन्वीयत्नसुवि
न्यासवागुरामंत्रसाधनैः ॥२३॥ विपिनावनिसंचारविचारनिरतास्तदा ॥ वनेचरास्समधाव
न्नितमुद्दिश्यमहीधरम् ॥२४॥ प्रसार्यवागुरासर्वानिरुध्याथवनेचरैः ॥ व्याघ्रैभशरभैणीनां ७६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाण कुंदादि माल्यभृत् ॥ मूलांतपिंछा मूलौघ गुंजाराम गुणोज्वलः ॥३॥ गजदंतकतारं कौ वरा
रानतकंधरः ॥ वराहदंष्ट्र भद्रं ते मणि स्रग्भिरलंकृतः ॥४॥ महाशार्दूललांगूलहस्ततालनिरा
जितः ॥ ज्याघातसहिष्णोर्ध्वांकुकरात मणि कंकणः ॥५॥ सुतैलधौतसंबद्धक्षुरिकाविलसत्क
टिः ॥ व्याघ्रैकवीरकूटकश्लक्ष्णोपानपदद्वयः ॥६॥ चापं प्रदक्षिणीकृत्य प्रणम्यादाय पा
णिना ॥ ज्यामारोप्य परामृश्य टंकारेणाप्य घोषयत् ॥७॥ बद्ध्वेषुधिं शरैः पूर्णं चापमाय म्य पा
णिना ॥ बिभ्रदन्येन च शरमंगुलीरंध्रचारिणम् ॥८॥ ग्रहांकणे डिंडिमानि प्रावाद्यन्मृगधा
रणे ॥ तस्थौ सुहृत्तरुण पुंगव प्रतिमो धनः ॥९॥ तावद्देवार्चनकी मधुमांसफलादिकम् ॥
निवेद्य वनदेवीभ्यः तं प्राप्य मृगयोन्मुखम् ॥१०॥ सुरामांसादिकं तस्मै दत्त्वा देवप्रसादजम् ॥उ
वाच तमसंभ्रांता कुमारं जरती तदा ॥११॥ पितुः पिता महस्यापि नास्ति त्वद्वैभवं मृसुत ॥ दयाता
दृग्देवतानां दृष्टा यादृक् त्वयि प्रभो ॥१२॥ तां ददाजरतीं नत्वा दत्वा स पितरौ धनम् ॥ संतो
ष्य बांधवान्सर्वान्निर्ययौ मृगयां धनः ॥१३॥ प्रसक्त पादुकपदाः बाण कार्मुक पाणयः ॥ शबरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ शुनां गणानि मानपश्य वृकव्याघ्रमृगादनान् चर्मपदत्रयमाबध्य आगुल्फं कटके ब्रज ॥६८॥ सदा०न
७५ बद्धगोधांगुलित्राणे गलान् मस्येजुपातयाः ॥ मृगान् वराहान् विध्याशु शरासौरैः करच्युतैः ॥६९॥ अ०३३
एभिः किरातवर्यैस्त्वमारखेटक धृतायुधः ॥ इत्युक्त्वा छुरिकां कमितधृस्तेदत्तवान् पितानृ ॥७०॥
तंनत्वा पितुराज्ञोति ते उभे चाग्रहीत् शुनः ॥ ॥नागउवाच॥ ॥ त्वमत्तोऽप्यधिरक्ष भिल्लान् सा
धुकुलोचितान् ॥ मृगयार्थ समं भिल्लैरनुगच्छेत्यथापिताः ॥७२॥ वनेदत्तीय यो तत्र पुत्रेणाथ कि
५३७ रातकैः ॥ सध्याभ्यगात्तदा निलयं बुभुजे पललाशनम् ॥७३॥ निवेदितं देवताभ्यो शुनां चपललं ददौ
आशां गुरोस्तां प्रतिगृह्य मूर्ध्ना प्रणम्य तं सिंहसमानवीर्यः ॥७४॥ कृताभिषेकः सघनः किरातैर्नि
जं गृहं प्राप्य निशां निनाय ॥ ॥ इति श्री शिवरहस्ये नवमांशे त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥छ॥
श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥श्री सदाशिवाय नमः ॥ ॥श्रीस्कंद उवाच ॥ ॥ ततः प्रा
तः समुत्थाय सवयोभिः सबंधनः ॥ मृगयावेषमादातुं धनुश्शालामुपागमत् ॥१॥ केशांत पल्लवस्नि
ग्धान्नुत्तरंगितकुंजितान् ॥ व्यायतो ग्रथितां श्च्यके ग्रथितैः पिंछपल्लवैः ॥२॥ सौरभ्यभ्रान्तभृंगौघ ७५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिनूकिंमदाह्वानकारणम् ॥ ५८ ॥ इत्युक्तः प्राहतंनाथो जरामूर्त्तिमिवस्थिताम् ॥ ॥ नागनाथ
उवाच ॥ ॥ निधास्यामि निषादानामधिपत्येसुतंघनम् ॥ मत्तोऽपिमृगयासिद्धिस्यादेवंवि
जेयदरीन् ॥ ५९ ॥ गच्छतोरवेटकेनित्यमस्यदुष्टमृगाद्भयम् ॥ यथानस्यात्तथाभद्रमुखवंध्यन
माचर ॥ ६० ॥ मधुमांसादिबलिभिः तर्पयारण्यदेवताः ॥ इत्युक्तासानिमित्तानिशुभानिजरतीतदा
॥ ६१ ॥ त्वत्तोऽप्याधिकस्त्वायंभवेदित्यवदीद्द्विसा ॥ मधुमांसफलादीनि कुक्कुटाजाविकंबहू
॥ ६२ ॥ हत्वाविशस्यमांसानिपक्वातंडुलपायसैः ॥ वन्यपुष्पफलस्रग्भिरक्तवासोभिराव्रज
त् ॥ ६३ ॥ आदायैतैर्वनंप्राप अर्चितुंवनदेवताः ॥ ततःस्वपुत्रमाहूयविनीतंविनतंघनम् ॥
॥ ६४ ॥ अभिमुख्येनवैव्याघ्रचर्माणिस्थाप्यचाब्रवीत् ॥ ॥ नागनाथ उवाच ॥ ॥
पुत्रमेनास्तिमृगयाकोशलंवृद्धभावतः ॥ त्वंमत्तोऽप्याधिकोभूत्वाकिराताधिपतिर्भव ॥ ६५ ॥
पाशान्चर्ममयान्धृत्वाचापंवैसशरावरम् ॥ आखेटकेखेटचरःखड्गंखड्गेषुविन्यसन् ॥ ६६ ॥
व्याघ्रतुल्यानिमांपाहिनखदंष्ट्रायुधोन्नतान् ॥ ललजिह्वोरुकर्णाक्षान्पृष्ठलग्नोरुकुक्षिकान् ॥
॥ ६७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 मृगयोद्योगी चरंश्चैत्नान्वनानिच ॥ ४७॥ मांहर्योर्द्विषतांबह्वीरानीयाभ्यर्चयन्भवे ॥ वार्धकं स्वतनौ दृष्ट्वा सदा न
 शबरेशः सुतंतदा ॥ ४८॥ प्रवेष्टुं तद्वनं घोरमाखेटखेटधारिणम् ॥ शनैर्विरतमाहुस्ते शबराः शबरेश्वरम् ॥ ४९ ॥ 
शबरा ऊचुः ॥ ॥ व्याघ्रसिंहवराहैर्मेःशरभाद्यैर्मृगांडजैः ॥ उद्रिक्ते वनमाक्रांतं तत्प्रवेष्टुं न शक्यते ॥ ५० ॥
इत्युक्तः प्राह तान्नागो वृद्धत्वान्नालमस्म्यहम् ॥ आखेटकाधिपत्ये युष्माभिः स्नाप्यतां धनुः ॥ ५१ ॥ इत्युक्ता
स्ते पुनः प्राहुः गांभीर्यौदार्यवीर्यवान् ॥ सर्वाधिपत्ये सद्धनुः त्वयैवस्थाप्यतामिति ॥ ५२॥ आद्योऽस्य मृग
यारंभः तस्मात्पूज्याहि देवताः ॥ मंत्राण्यभ्यस्यतां त्वत्तो व्याघ्रभमुखबंधने ॥ ५३॥ तदादेवा वनेकरी
540 माहूयंति वनेचराः ॥ ॥ शबरा ऊचुः ॥ भद्रे चागम्यतामस्य स्वस्तये देवपूजने ॥ इत्युक्त्वा साभ्यगा
तत्र आगोमूर्त्तिरिवापरा ॥ ५४॥ नद्धप्रोच्चतकेशी साकोलदंष्ट्रोरुकुंडला ॥ करालधवलोदंच दंताव
लिविराजिता ॥ ५५॥ वैय्याघ्रचर्मवसना कुक्षिमुक्षिपयोधरा ॥ पिंडीसक्तकरोदंच निंबपल्लवधा
रिणी ॥ ५६॥ प्रसादं धीरका दत्वा ददौ नागाय तस्थुषी ॥ आशीर्भिर्वर्धयित्वा तं जरठा नागमब्रवीत् ॥
॥ ५७॥ ॥ जरती उवाच ॥ ॥ जीवामि मधुमांसादिलब्धा देवार्चनोचितम् ॥ तत्प्रसादोऽस्तु तत्स्वा 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रासमुद्भवाज्याश्च मधुमूलफलानि च ॥ ३५ ॥ खेटकांश्च तथा पाशान् आखेटकवलानि च ॥ शुनश्चोपाय

नं तस्य लशुनं पिशुनायिते ॥ ३६ ॥ समाजग्मुश्च ते तस्य भिल्लास्ते भल्लपाणयः ॥ प्रियंगुचूर्णपूर्णं तु सकपि

त्थं मधुप्लुतम् ॥ ३७ ॥ विशालैः कदलीपत्रैरावध्यैव विनिर्ययुः ॥ व्याधाधिपं प्रणम्यैनं कुमारमभिनं द्य

च ॥ ३८ ॥ सर्वे ते शबरा भुक्त्वा शांबरं पललं तदा ॥ तृणाय मेनिरे तृप्ताः सुरानपि सुधाशनान् ॥ ३९ ॥ परिवा

र्यो चार्यधूर्तं चापं क्ष्वेलितनिस्वनैः ॥ शृंगकाहलशंखैश्च भेरीणां भीषणारवैः ॥ ४० ॥ वराहगजसिं

हानां मृगाणां त्रासदायकैः ॥ अपूरितदिगंतास्ते वेदीं चक्रुः प्रदक्षिणाम् ॥ ४१ ॥ पार्वतीयाः सर्वे ते द्रे

मृगेंद्रसमविक्रमाः ॥ करतालोत्तरं नृत्तं नार्यो बालश्च चक्रिरे ॥ ४२ ॥ देवतां वंशविपशान दतुस्तत्र

कन्यकाः ॥ गतेषु तेष्व हस्वेव स्वस्त्यं मंदिने यौवने ॥ ४३ ॥ न दत्तमुतूर्येष्वा चार्यो तं बाले ग्राहयद्धनुः ॥

अद्रिस्त्वेते तं दृष्ट्वैव विद्रुवंति मृगां उजाः ॥ ४४ ॥ गुरुप्रशाधितो धीमांश्चापविद्यामशिक्षत ॥ लक्ष्ये

ष्वलक्ष्यहृदयो सव्यासव्येव भूव ह ॥ ४५ ॥ अन्येष्वप्यायुधेष्वेवं प्रागल्भ्यं प्राप्तवान् परम् ॥ विशे

षेण समुल्लासी तेसों दर्यं प्रापसो तदा ॥ ४६ ॥ नीलो नीलांबुदाकारो मातापित्रोर्मुदं व्यधात् ॥ स नागो

शिवरह०९ दन्तोत्थमौक्तिकैः ॥२२॥ सुविद्युन्मेघमध्यस्था यथा भाति तथा बभौ ॥ उत्संगेषु शुभे बालः शृंगे नीलगिरेरिव ॥ सदा.न.
७३ ॥२३॥ स तदा बंधुभिः सार्धं हिंस्रान् व्याघ्रानमूमुचत् ॥ विशसंश्च तदान्यं कूपललाशोमित्सवः ॥२४॥ च अ०३३
क्रीतं वक्रितमतिः नीलं नाम्ना तदा मुदा ॥ व्याघ्रसिंह नरैवस्तस्य भूषणैर्दंतिनां रदैः ॥२५॥ आकल्पं ततरा सर्वे बा
न्धवाः भोजनोत्सवाः ॥ गुंजामणिमयं हारं स्वकंठादवमुच्य सः ॥२६॥ तत्कंठे कलकंठीनां गानैराधत्तवान् शिशोः ॥
तत्रोत्सवे व्याघ्रपतिः प्रसाद्य कुलदेवताः ॥२७॥ भिल्लानुल्लासयामास मल्लान्पेभोजनादिभिः ॥ सबालो ववृधे
तत्र प्रावृट्कालघनो यथा ॥२८॥ जानुभ्यां संचरं धात्र्या धरित्र्यां संचरन्तदा ॥ ललाटे कालदंष्ट्राभ जंगदंतो
54। रुभूषणम् ॥२९॥ शूलालिखंडितप्रोतकाकपक्षधरांकितः ॥ दंतीदंतत्रिकटको मंजुगुंजामणीसरः ॥३०॥
पांथाहरणलब्धैश्च लुब्धको भूषणैः शिशुम् ॥ स कुमारः किरातानां कुमारैः स्ववयःसमैः ॥३१॥ चिक्रीड क्रोडबा
लैश्च श्वभिः कुक्कुटमर्कटैः ॥ बाल्यकेलीविशेषेण धूलीपालीषु बालकः ॥३२॥ दृष्ट्वा कुमारं माराभं घ
नृत्पीवराकृतिः ॥ उत्घोषयतस्तपटहैः कुमारो गृह्यते धनुः ॥३३॥ श्रुत्वेदं तं व्याधसूनोः धनुर्ग्रहणमंग
लम् ॥ व्याधा समाययुर्हृष्टा पुष्टांगा विवृताननाः ॥२४॥ चापानि मधुमल्लानि शरान्पक्षविभूषितान् ॥ शि ७३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नागइत्यभूत्॥ वेणुमुक्तामयहारं पधियासन्नमंडले॥१०॥ समीक्ष्य लज्ययेनासीद्दलयंनागदंतजम्॥ जन्मांत
रेऽपितस्यापितपो व्याधकुलोद्भवः॥११॥ क्रूरा विक्रमदर्पाभ्यां सिंहवद्धन्विनांनृणाम्॥ व्याधेनकुलसंभू
तानाम्नादंत्तेतिकन्यका॥१२॥ मृगादनस्य व्याघ्रीव तस्यासीद्गृहमेधिनी॥ शार्दूलनखसुभ्रांत गुंजांगाविधुक
स्त्रजा॥१३॥ बर्हिवर्हावलीनद्धतमालचोलिका॥ सप्तच्छदाछछदनैः छादिता छांदसोतदा॥१४॥ अ
नपत्येलुच्यमाना लोकैः सादुःखिताभवत्॥ विषण्णां तां प्रियां वीक्ष्य देवं नित्यमसेवत॥१५॥ मयूरकुक्कुटोन्म
त्तनीपमालांकतोरणा॥ घंटाबध्वा सहस्रोभिः देवं भेजी स्वनंमनः॥१६॥ दंतापिदत्वामांनुसानि सर्वेषां
भोजनायहि॥ स्नात्वानिर्झरतोयेषु निर्जरादधिकाभवत्॥१७॥ तत्रसापि चिरं देवं कार्त्तिकेयमतोषय
न्॥ बर्हिवोहस्य भिन्नाद्रेः पुत्रस्यपुरवैरिणः॥१८॥ विषादस्य निषादेक पचोलिमतपः फलम्॥ श्रीदे
व्याश्च प्रसादेन निषादकुलभूषणम्॥१९॥ दधौगुणान्वितं गर्भं सानेषीदेविषादहृत्॥ शुभर्क्षे सूति
कागेहे ऋक्षराजद्युतिंसुतम्॥२०॥ असूततनयंकांता चंद्रलेखे वबारिधेः॥ व्याधोपिविव्यधे द्रुख
मृगं हर्षशरैस्तदा॥२१॥ देवा सुमानि ववृषुः दिवि भेर्योऽपि दध्वनुः॥ सबाल कों बुदश्यामो कीरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ नाथस्य चरित्रमेतत् ॥ भक्त्या पठेद्यः शृणुयाच्च नित्यं शंभोः पदं शाश्वतमाप्नुयात्सः ॥ ३१ ॥ ॥ छ ॥ सदा० न०

७२ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे एकादशनाथचरिते द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ श्रीकाशी अ० ३ स्क

विश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ भिल्लेन भिल्लह

स्तेन कालहस्तीश्वरार्चनात् ॥ प्राप्तं परं पदं पुण्यं तत्ते वक्ष्यामि सादरम् ॥ १ ॥ तत्र श्रीपर्वते वासी भिल्लो न

ल्व प्रमाणवान् ॥ अस्ति गोधापुरं तत्र खर्वटं वटभूषितम् ॥ २ ॥ वेणुसंभूतमुक्तौघमिलन्निर्झरवेष्टितम् ॥ श्वा

श्वासंकलितान्नौघकपित्थालंबिवागुरा ॥ ३ ॥ चत्वारप्रांतविस्तार शिलागुप्त्यत्प्रियंगवात् ॥ हत्या कृष्णमृगव्या

Sf 2 घ्रसिंहदंतिकिशोरकाः ॥ ४ ॥ वर्धिता व्याधशिशुभी रुल्लसंति यदंकुणे ॥ यत्र व्याधकुमारीभिश्चामरी हरिणी

मृगाः ॥ ५ ॥ कौतुकेनोपलाल्यंते शिखिनः शारिकाः शुकाः ॥ यत्र प्रीतिकरं तोयद्दिरदा हरिगर्जितैः ॥ ६ ॥ प्रादु

र्भवन्ति छिंदंति भिंदंति गिरिमुद्भवाः ॥ वेणुडिंडमशृंगाणामुच्चलंति स्वना सदा ॥ ७ ॥ यत्रोच्चगिरिशृंगाणां

निर्जराणामथार्भदीः ॥ आहतानां हयद्धूपाधेन्नै चिकीनां न केवलम् ॥ ८ ॥ यत्र कांचननागानां कुलं ७२

मुदिरवस्थितम् ॥ तत्रोज्झितक्षमा प्रेम नयनां मांसभोजिनाम् ॥ ९ ॥ अधर्मिणां पुलिंदानामधिपो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उभयोः किं वृथैवान्यैः हन्यमानैर्जनैरिति ॥ २७ ॥ एनादिनाथस्तच्छ्रुत्वा तथास्त्वित्यपरे हनी ॥ खड्गेव
टघरःप्राप स्वैरजातो रणक्षितिम् ॥ २८ ॥ श्री भस्मफालमेनादिर्नेहंतीति विचिंतयन् ॥ श्री भस्म भाग्य दूरे
ऽपि भस्मफाले दधौ तदा ॥ २९ ॥ मालिन्यं मनसा बिभ्रन् खड्गखेटधरो रिपुः ॥ वीरस्थानमगात्पुण्यं यत्र एना
दिरास्थितः ॥ ३० ॥ लघुकोऽयमिति स्मृत्वा वीरसिंहस्थितो रिपुः ॥ खेटच्छन्नालिकः प्राप रंध्रान्वेषी तदं
तिकम् ॥ ३१ ॥ महोक्षवन्निरुध्यैवं केसरी वीरपोलनन् ॥ एनादिपार्श्वगे खेटे तस्यापश्यत्त्रिपुंड्रकम् ॥
॥ ३२ ॥ हंत हंत रिपोः काले भस्मापूर्वं निरीक्ष्यसः ॥ शिवभक्तो न वध्योऽयं यथाकामं करोतु मे ॥ ३३ ॥ निरा
युधवधात्पापं मास्त्वस्येति धृतायुधः ॥ अजिघांसुस्तन्त्रिपुं तस्थौ भक्तप्रभाववित् ॥ ३४ ॥ यथास्थितस्य
भक्तस्य भावं जानन्नथाप्यरिः ॥ चक्रे सपातकी हंतुं निजं पूर्वफलं मतम् ॥ ३५ ॥ अथैतच्छिव भक्तं तं रक्षि
तुं तं च शंकरः ॥ भस्मफालं च तं वीरं रक्षितुं स्वयमाययौ ॥ ३६ ॥ उभयोर्युध्यतोर्मध्ये हस्ताभ्यां वारयन् स्थितः ॥
गंगातुंगजटाजूटः श्रीकंठः प्रत्यदृश्यत ॥ ३७ ॥ खड्गेन शत्रोर्भवपाशबंधनादुन्मोच्य सामीप्यपदं च तस्मै ॥
दत्वा शिवो हेमसभां विवेश ताभ्यां स्तुतो वेदभक्तिभावतः ॥ ३८ ॥ लोकादिनाथस्य पदाजभक्तरेनादि

शिवरह०९ सत्कारः ॥१४॥ अनुज्ञाता नृपेणापि पौरैः शीरितवैभवाः ॥ धन्विनो धन्विनो जघ्नुः खड्गिनः खड्गिनो मिथः ॥ सदा.न.
७१ ॥१५॥ सम्राक्तयः शक्तिभृतो तथान्ये च समाययुः ॥ प्रदीप्त शक्त्रूपस्तत्र वीर हस्त प्रसारितः ॥१६॥ परस्परस्फु अ०३२
रज्जिह्वा फणिराज इवाबभुः ॥ शरकृत्तशिरः पाद पार्श्व जानूरु बाहवः ॥१७॥ उद्दांतासृक् क्षतास्तत्र पेतुर्वीरा
रणाजिरे ॥ नौकासं प्लवने यावत्तावत्ससुर्वरापगाः ॥१८॥ पिशाचवेतालगणास्तत्तीरे तांडवं व्यधुः ॥ भक्षयंतः
पलालानां पिंडानि विकटाननाः ॥१९॥ द्वौ खड्गिकौ मिथो युक्तौ तयोर्येनासिका कृतः ॥ अनुरुः संपतं तस्मै
चिक्षेपासिमुभौ हतौ ॥२०॥ आखंडक्षिप्तकुंताग्रे पीतौ विगत जीवितौ ॥ शौर्यं मिथो मानयन्त्याद्वौ विमानावि
५९३ वस्थितौ ॥२१॥ हतवीरारुणाश्वपूर्ववेलाका ध्वांक्षमंडलाः ॥ लोहकारानलगुहांगारधूमनिभा बहु ॥२२॥
एनादिवीरशार्दूलो वमद्वह्निकृपाणकः ॥ चिच्छेद हतशेषाणां पादपार्श्वशिरोभुजानू ॥२३॥ शूरमेनादिना
थं तं भूतनाथपदार्चकम् ॥ सवीरः सोऽत्यगात्तत्र हतशेषबलान्वितम् ॥२४॥ धूताशिरोचिः छिन्नांगा याव
दंत विशत्यरिः ॥ एनादितावदात्मानमुन्मोच्यारि पलायनम् ॥२५॥ अरिशूराजितः कुशाच्छयानो नि ७१
शि भूतले ॥ जाग्रन्विचिंतयन् शत्रुं कुहनाय निहन्म्यहम् ॥२६॥ सदूतं प्राहिणोत्तस्मै प्रभाते युद्धमस्तु नौ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्ण्यतेऽधुना ॥ निचोलभूते पृथ्व्यास्तु चोले धर्मस्यमूलके ॥ २ ॥ देशोऽस्ति शिवरग्रामे नाम्नाऽशरवरव्रत ॥ त
स्मिन्नेनादिनाथस्य आसीत्पक्षिकुलोद्भवः ॥ ३ ॥ नृपशस्त्रकुलाचार्यः शिवभक्तांघ्रिसक्तधीः ॥ समहे
शार्चकोनित्यं द्रव्यैः शस्त्रकुलोद्भवैः ॥ ४ ॥ महेश्वरस्य भक्तांश्च तोषयन्धान्नदानतः ॥ अतिशूर इति ख्या
तिरभूद्धर्मे स्थितस्य च ॥ ५ ॥ अवमन्यतसोऽप्यन्यान् खड्गविद्यासुगर्वितान् ॥ कुलक्रमसमुत्पन्नान्वृत्तिरस्या
युधस्यमे ॥ ६ ॥ एनादिनाथमाश्चर्यं नसेहे पौरुषेण सः ॥ सूर्योदये सवर्ण्येंदु समस्वजनसंवृतः ॥ ७ ॥ एनादिना
थेनसमं सयोद्धुं धियमातनोत् ॥ तद्दृष्ट्वा द्वारमासाद्य शार्दूलस्येव जंबुकः ॥ ८ ॥ विद्या हि वीर भो ज्येति सोऽति
शूरस्तमाह्वयत् ॥ साहसांको बद्धचेलः सवीरः खड्गखेटभृत् ॥ ९ ॥ केनाहूतोऽहमस्मीति हर्षेक्षद्वनिर्ययौ ॥
पार्श्वे स्थितेषु शिष्येषु वृत्तावेवाग्रबंधुभिः ॥ १० ॥ एनादिनाथं वीरं तं शार्दूलं व्याहरद्रिपुः ॥ ॥ वीर उवाच ॥
ग्रामाद्बहिर्व्युह्यबलमावयोर्युध्यमानयोः ॥ ११ ॥ विजेतुं शस्त्रविद्यायां वृत्तिः सेयानयोरिति ॥ एनादिना
थनचीति शस्त्रैः शिष्यैः पीरवृतः ॥ १२ ॥ इति तद्वचनं श्रुत्वा शस्त्राचार्यो विनिर्ययौ ॥ तदाहवारणक्षोणीं
ययौ तदुभयोर्बलम् ॥ १३ ॥ वीरो विख्यात विरुदा कटका दिलसत्पदः ॥ सेनयोरंतरे चेतः खड्गे रोचिल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ गिरिसंनिभम् ॥ सुकुथास्तरणस्तीर्णं मन्मथारातिपूजकः ॥ ५३ ॥ कक्ष्याविस्तीर्णकक्ष्यन्ते साक्षात्त्र्यक्ष सदा॰ न॰
७० प्रसादजम् ॥ इत्युक्तो वीरभक्तेन संप्रीतेनारुरोह सः ॥ ५४ ॥ भक्तेनातिगभीरेण घोरहृषेण कृतं बहु ॥ विभ्र अ॰ ३१ |
वं चैव सृष्टासे स्ववधार्थं महीपतेः ॥ ५५ ॥ भक्तमाहात्म्यमेतद्वै को वा वेत्ति महीतले ॥ अंतरेण शिवं
नित्यं स्वभक्ताभीष्टदायिनम् ॥ ५६ ॥ स वीरभक्तः शिवकामभक्तेः ज्ञातुं न शक्यः शिवभक्तिभूम्नः ॥ इति
ब्रुवंस्तं नृपतिं प्रशंसन् भूतेशकैंकर्यपरो बभूव ॥ ५७ ॥ इतितो शिवकामवीरभक्तौ शिवभक्तार्तिहरौ चि
59a रं विहृत्य ॥ रजताचलसीम्नि धाम्नि शंभोर्गणनाथप्रथमा विभावभूताम् ॥ ५८ ॥ चमूभटेष्वब्धिसमाखे
षु प्रवृत्तवंदिप्रवरस्तवेषु ॥ सुखी सचोलः स्वगृहं विवेश नटेश पादांकिततुंगमौलिः ॥ ५९ ॥ माहेश्वराप
त्तिविमोचकस्य श्रीवीरभक्तस्य चरित्रमेतत् ॥ पठन्ति वाचा मनसा स्मरन्ति ये ते लभन्ति पदमिंदुमौलेः
॥ ६० ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ श्रीकाशीवि
श्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ श्रीवीरभवभ ७०
क्तस्य प्रथितं कथितं मया ॥ चरितं विहृताशेषदुःखं सुखदं सताम् ॥ १ ॥ भक्तस्येनादिनाथस्य माहात्म्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हिमामपराधिनम्॥ इति कोशात्कृपाणं स्वमाकृष्यास्य ददौ करे॥ ४३॥ अस्य भक्तिरहो भक्ते व्य
तिरिक्तेति चिंतयन्॥ सद्यो जिघांसुरात्मानं वीरभक्तोसिमाददे॥ ४४॥ गृहीतासिः पुरस्तस्य स्थित्वा
नत्वाच तत्पदे॥ ०॥ राजोवाच॥ खड्गेनानेन हत्वा मां जहि मामपराधिनम्॥ मया कृतं त्वयानागे
कृतमागोनिवारणम्॥ ४५॥ अथमाभ्यर्यकृन्मेघभक्तोऽप्यंतर्भियंदधत्॥ हतेनिपंतृभिः नागे.
मां जहागो महत्कृतम्॥ ४६॥ इति ब्रुवन्नयं राजा कथं वध्योसिनामुना॥ निरुद्धहस्तो भक्तोऽपि रा
ज्ञि साहस तत्परे॥ ४७॥ तदाशिवाज्ञया व्योम्नि प्राह वागशरीरिणी॥ ॥ वाण्युवाच॥ ॥ भ
क्तिं दर्शयितुं भूमौ पुष्पाणि व्याकिरद्गजः॥ ४८॥ कृत्यं चैतत्कलानाथरेखा मौलिदया कृ
तम्॥ इति तावत्समुत्तस्थौ यंतृभिः सहकुंजरः॥ ४९॥ खड्गमुक्तोनमद्भक्तो भूपो भक्तं तमानमत्॥
पुष्पाणि ववृषुर्देवा भूयो मूर्धनि भक्तयोः॥ ५०॥ भक्तचोलेंद्रयोर्दिव्यां वाचं तां श्लाघ्यमानिनः
हृष्टोऽभूच्छिवकामोऽपि पुष्पसंपूर्णपेटकः॥ ५१॥ ततः सुप्तोत्थितमिव क्षणद्वंद्वा कृतारवम्॥
जयद्विपं पुरस्कृत्य प्राप्तुराधोरणानृपं॥ ५२॥ ॥ आधोरण उवाच॥ ॥ इममारूह्य राजेंद्र गजेंद्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰१ येन निहतो गजः ॥ इति पृष्टो नृपेणाहुर्हतशेषा विषादिनः ॥ ३४ ॥ ॥ यंतार ऊचुः ॥ ॥ वीरेषु सदा न

६१ कः पुरस्थातुं समर्थास्तव दंतिनः ॥ क्रुधानानेन भक्तेन नागः परशुना हतः ॥ ३५ ॥ तच्छ्रुत्वा धूर्जटेर्भ अ॰३१

क्ता नहि निघ्नंत्यनागसम् ॥ इति सेनां निवार्यैनां स तुरंगादवातरत् ॥ मत्तेनानेन भक्तेन मत्तेभो निहतो मम

॥ ३५ ॥ तं पृच्छामि समागम्य इति चिंताकुलो नृपः ॥ भक्तेषु किं करिष्यामि शंकर किं करापदि ॥ ३६ ॥ न

चेत्तत्र यथावृत्तं श्रुतं तत्तत्र तिष्ठतु ॥ ॥ श्रीस्कंद उवाच ॥ ॥ प्रणम्य तं वीरभक्तं शिवकामं शुचा

कुलम् ॥ ३७ ॥ स्वमूर्धभेदादधिकं पुष्पनाशशुचाकुलम् ॥ उवाच प्रांजलिर्भक्तं चोलेंद्रो इन्द्रस

5/5 न्निभः ॥ ३८ ॥ ॥ राजोवाच ॥ ॥ मंत्रिभिः सह नागेन कोऽपराधः कृतो मुने ॥ करुणां कुरु भ

क्तेति स भक्तस्तमुवाच ह ॥ ३९ ॥ ॥ वीरभक्त उवाच ॥ ॥ शिवकामः शिवार्हाणि पुष्पाण्या

हृत्य चागतः ॥ तान्याच्छिद्याकिरद्दंती दंते मूर्ध्न्ययं हतः ॥ ४० ॥ अन्वारयंतो यंतारः एवमाग

स्कृतं गजम् ॥ इमे हता इति प्रोक्तस्त्रस्तप्रह्वोऽब्रवीन्नृपः ॥ ४१ ॥ ॥ नृप उवाच ॥ ॥ वेतंडस्खं

डितो मेद्य हतास्तेनैव चागसा ॥ परश्वधेन भद्रेण मां निहंतुं न युज्यते ॥ ४२ ॥ मदीयेनैव खड्गेन ज ६१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुंडादंडे पतत्यसौ ॥ मेरुकोदंडहस्तोध्व तांडवं हृदि भावयन् ॥ २४ ॥ द्वौ तत्स्कंधगतौ पार्श्वे
चरात्रीन्सायुधान्वधीत ॥ यंत्रिभिः पंचभिः सार्धं हतः साम्राज्यकुंजरः ॥ २५ ॥ राज्ञे निवेद
यंत्यन्येद्वास्था यंत्रसमीरितम् ॥ श्रुत्वातेषां वचो द्वास्थाः प्रविश्यांतर्भयाकुलाः ॥ २६ ॥ ब
द्धांजलि पुरा राज्ञे यथावृत्तं न्यवेदयन् ॥ ॥ राजोवाच ॥ ॥ राजाजितारिरपि मे किम
घेतदुपागतम् ॥ अकार्यनीतिः केनेति कृता पालान समादिशत ॥ २७ ॥ राज्ञा तेन समा
दिष्टा सेना तं नृपमन्वगात् ॥ चतुरंगबलोपेता धृतनानाविधायुधा ॥ २८ ॥ गंभीरभेरीनि
स्वाणशंखकाहलनिस्वनैः ॥ हेषितैर्हयमुख्यानां गजानां बृंहितैरपि ॥ २९ ॥ भटानां सिंह
नादैश्च रथनेमिस्वनैरपि ॥ अधःकृताब्धिरवया सेनयानुगतस्तथा ॥ ३० ॥ तुंगतुरंगमारू
ढो जवेन पवनोपमम् ॥ वीथीमवापसंभ्रांतो नृपो घोरे निरंतरम् ॥ ३१ ॥ नृपो मत्तद्विपं तत्र
ददर्श निहतं भुवि ॥ यंत्रिभिः पंचभिः सार्धं पादैः स्वैरिव पर्वतम् ॥ ३२ ॥ न कश्चिदन्यादृषतो
नृपोभक्तं च वेक्षत ॥ परश्वधधरं वीरं श्वसंतमिव पन्नगम् ॥ ३३ ॥ अपं भक्तो न हंता स्यात् केना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ मदांबुकृतपंकिलाम्॥१३॥ तंयांतमक्षमः प्राप्तो वृद्धः प्र स्खलितः पतन्॥ भुवमास्फाल्यहस्ता सदा.न.
६८ भ्यां क्रोशन्शिवशिवेति च॥१४॥ शिवदां कुर मां पाहि गजराज त्वगंबर॥ चंद्रगंगानद्धजटा, अ०३१
भूषणं कुसुमोच्चयम्॥१५॥ ॥शिवकाम उवाच॥ ॥ अवाकिर दहो नागः वीरभक्तोगतः
क्वनु॥ तच्छ्रुत्वा वीरभक्तोऽयमागतः प्रज्वलन्रुषा॥१६॥ प्रथमः शिवभक्तानां परिपंथिभ
यंकरः॥ तं शिवद्रोहिणं हत्वा भोक्ष्यामीति तदा जगौ॥१७॥ मा भैषीः शिवकामेति गजेनृप
जेन्यवद्ययौ॥ पश्यन्विकीर्णपुष्पाणि रथ्यां तेन पथा ययौ॥१८॥ दृष्ट्वा नागेन निर्भिण्ण
548 मस्तकं धावमानकम्॥ शिवकामस्तदाद्राक्षीत्पाहि वीरेति वादिनम्॥१९॥ साचीषं परशुंवि
भ्रन्ननुद्रुत्य तमैक्षत॥ पुरायमीशः कृत्तित्वक् नागरूपोतरुः किल॥२०॥ सुरैर्निरुध्यमानोऽपि
खंडशो हन्मि तं गजं॥ इति पादेन तन्नागं परभागे जघान सः॥२१॥ क्रोधोद्धूतः धोरणः सन्
निवृत्तोऽभूत्स च द्विपः॥ हस्तलग्नं नरं चापि निर्गतं सः क्रुधाधिकः॥२२॥ उत्प्लुत्य वीरो गतभीः
नागस्याभिस्थितो दृढम्॥ छित्वा परश्वधेनास्य हस्तमग्रे न्यपातयत्॥२३॥ वेतंडखंडितो ह्यं ६८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाजनम् ॥ २ ॥ यद्वीथीस्थानि रत्नानि भांति रंजितदीपवत् ॥ तत्रास्ति हेमप्राकारं भक्तैः सेव्यं
सुरैः स्तुतम् ॥ ३ ॥ हरधामेति विख्यातं श्रीमच्छंकरमंदिरम् ॥ तस्मिन् श्रीवीरभद्राख्यः
शिवद्विजकुलोद्भवः ॥ ४ ॥ अभूच्छिवोल्लसद्भक्तिः शिवशासनवर्धनः ॥ भस्मरुद्राक्षकलि
त त्रिपुंड्रावलिदीप्तिमान् ॥ ५ ॥ यदा श्रीशिवभक्तानां केनचाप्यापदं भवेत् ॥ ससिंहवत्तदा
खड्गवेतंडान् चण्ड कोपनः ६ ॥ कदापि शिवकामाख्यो हरधामेषु सेविता ॥ मालार्पकः शिवभ-
क्तः पुष्पाहृतिपरो भवेत् ॥ ७ ॥ प्रातस्नात्वा मुखं बध्वा सहसानंदसंगतः ॥ पुष्पाण्याहृत्य वे
लेयं शिवं सेवितुमागतः ॥ ८ ॥ महानवम्यां सवाहो चोलेंद्रजयकुंजरः ॥ मदधाराकटक्षुद्यद्दं
धाविततदिगंतरे ॥ ९ ॥ निमज्यनद्यामायातः प्रसक्तपटहध्वनिः ॥ घंटाबृंहितफूत्कारपुष्क
रासारसेचनैः ॥ १० ॥ विधूतघोरणायासो विचचार सवीथिषु ॥ रंगाद्ग्रे प्रयातस्य शिवका
मस्य सद्विपः ॥ ११ ॥ पुष्पपेटकमध्यस्थपुष्पाण्युर्व्यामवाकिरत् ॥ यत्नेननीयमानोऽपि यंत्र
मुख्यैर्भयाकुलैः ॥ १२ ॥ कुद्धोरुविततां शुंडां कृत्वावेतंडराट् तदा ॥ दंताभ्यामुल्लिखन्भूमिं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰१ तुलां प्रदक्षिणी कर्तुमारुरुक्षुः जगाद सः ॥ ॥ वैश्य उवाच ॥ शिव भक्तांघ्रि दास्यं नो त्वं धितं सदा न-
६७ चेतसमाश्रियम् ॥ इति कांत पुरेशानमुमा कांतं प्रणम्य सः ॥ ६० ॥ आरुरोह तुलां तस्मिन्नुक्त्वापं अ॰३०
चाक्षरं मनुम् ॥ तद्दास्यं तच्च कौपीनं तुलातुल्यमिथोऽभवत् ॥ ६१ ॥ भक्तिनिर्मलभावं तं स्तुत्वा मुमुर्ज
नास्त दा ॥ पुष्पाणि ववृषुर्देवा सवर्णा चतिरोदधे ॥ ६२ ॥ पुष्पवर्षे तिरोभूते स च कांत पुरेश्वरः ॥ स
मास्थाय निजं रूपं प्रादुरासीन्नभस्थले ॥ ६३ ॥ भक्तस्तुलामधिगतः सुतदारयुक्तस्तुष्टाव तं शिव
शिवेति तदा प्रहृष्टः ॥ देवोऽपि मानवदुदार तुलास्थितेन तेन प्रियासुतसुतेन समं तिरोभूत् ॥ ६३ ॥
S47 अमरनीतिचरित्रमिदं शुभं दुरितजातविनाशनकीर्तनं ॥ पठति भक्तियुतः स शृणोति यः स शिव
लोकमनामयमाप्नुयात् ॥ ६४ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्येन वमांशे त्रिंशोऽध्या
यः ॥ ३० ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवायनमः ॥ ॥ श्री
स्कंद उवाच ॥ ॥ श्रीवीरभक्तनाथस्य चरित्रं कथयामि ते ॥ व्याघ्रमृदितहमाद्रेरनपायः ६७
स भूभुजः ॥ १ ॥ असिभिन्नाद्रिनिर्धूतकावेरीदुर्गमाध्वनः ॥ पुरं गभिपुरं नाम संपदामस्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रहसो वणिक् ॥ भूयः स वर्णिनं प्राह कौपीनं मुषितं हितत् ॥ ४९ ॥ एतदाषाढविधृतं तन्मानसदृ-
शं भवेत् ॥ कौपीनं तुलया धृत्वा कौपीनं देहि मे परम् ॥ ५० ॥ इत्युक्तो वटुना वैश्यः प्रातिमानान्य
तुलाम् ॥ स्थाल्यां कौपीनमेकस्यां नीलकण्ठो न्यधात् ॥ ५१ ॥ सर्वाणि तस्य गेहस्थानि तस्मिन्
विन्यस्य वैश्यराट् ॥ कौपीनं जातस्यैवेषतस्य नालमभूत्तदा ॥ ५२ ॥ न्यस्य स्थाल्यामिदं चासीदु
न्नतानुपुनर्नता ॥ कौपीनमस्य मा यीयमिति पट्टांबराणि सः ॥ ५३ ॥ स्वर्णादीनप्यहं न्यस्येत्या-
दिशोत्थानमार्च्छितम् ॥ तं प्राह वणिजं वर्णी धनेश वचनेन किम् ॥ ५४ ॥ मिद्धे ह्यत्र धनादीनि
मत्कौपीनतुलास्विति ॥ स्वस्थाल्यां निदधे स्वर्णलोहरत्नादिकं तदा ॥ ५५ ॥ उदस्थात्सर्व
मादाय सर्वोऽभूद्विस्मितो जनः ॥ नेदमूल्यकृतस्यैष कौपीनस्य वणिक् धनम् ॥ ५६ ॥ ना
लमित्यद्भुतं नैव जगच्च नहि तत्समम् ॥ केवल्यशेषः स प्राह वणिक्किंचिद्धनं न मे ॥ ५७ ॥
अतः पुत्रकलत्राभ्यामारोहामि तुलामिमाम् ॥ अकृत्रिमप्रेमरसं देवो वैश्य तुलां बलात् ॥ ५८ ॥
पाशांहि त्वा पदं नेतुस्वं तथेत्यवमन्यत ॥ नत्वा तमर्थं सोऽज्ञासो वणिक् दारसमन्वितः ॥ ५९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१ कौपीनं रम्यं निर्गत्य चाब्रवीत् ॥ वैश्य उवाच ॥ न्यस्तं गृहे ते कौपीनं न दृष्टमिदमद्भुतं ॥ गृहाण चाद्भुतं चान्य
६६ तन्न पश्यामि पौर्विकं ॥ ३८ ॥ शिव एव विजानाति के न वा तत्स्थितं बटो ॥ इदं नवीनं कौपीनं धारयस्व सितोज्व
लं ॥ अपराधं क्षमस्वेति प्रणाम तं बटुं तदा ॥ इत्थं तेनेरितं वाक्यं श्रुत्वा वर्णी तदा ब्रवीत् ॥ ४० ॥ वर्णी उ-
वाच ॥ मैवं वद वणिक् श्रेष्ठ कालो भूयो न्हि वर्त्तते ॥ तदेव देहि कौपीनं दत्तं मे गुरुणा पुरा ॥ ४१ ॥ नीतिः
साध्वी देव नीतेत्वय्याद्यैव मयार्पितं ॥ महाकौपीनमादाय गृहाणान्यं नु तत्समं ॥ ४२ ॥ इति वक्ति भवान्
रम्यं कौपीनाहरणाय किं ॥ कौपीन हर्त्ते ति मृषामथांपाप्नोति भूतले ॥ ४३ ॥ अयतन मे तद्वणिज्य
मितिवैश्य यदुच्यते ॥ द्विजे कुद्धो परिभ्रांतमानसः शुष्यदाननः ॥ ४४ ॥ वैश्य उवाच ॥ इदं मया न विदितं मया सं
तलघीयसा ॥ अपराधं क्षम स्वेति प्रणामद्व्यथितो वणिक् ॥ अन्यत्करो मि कैं कर्यं कौपीनं किं करो
मि ते ॥ गावो महिष्यो रत्नानि धनानि विविधानि मे ॥ ४६ ॥ ददामि वासो भारांश्च प्रणमामि परं
च ते ॥ अनर्ह्दृष्यन् बाहेक्रुध्यन् किं रत्नैर्मे धनादिभिः ॥ ४७ ॥ कौपीनं देहि तत्सान्यं जहीत्या ६६
ह विशेवटुः ॥ कौपीने नास्ति मे चौर्यं अनेकान्यंशुकानि मे ॥ ४८ ॥ ददामि धनजातानि वर्णिनं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूयो वर्णिनमभ्येत्य त्वं मठेऽस्मिन् द्विजोत्तम ॥२६॥ प्रसीद भो तु मित्येनं ययाचे सांजलिं द्विजम् ॥ ॥ वर्णी उवाच ॥ ॥ धार्मिकस्त्वं मठे भोक्ष्ये स्नातुं यामि के वरजाम् ॥ स्याद्वर्षं पथि चेदत्र यावत् कौपीनमार्द्रताम् ॥२८॥ अतस्त्वन्न्यस्य चैमं भूयोप्यर्पयेति वणिक्करे ॥ आषाढात् तत्तदादाना द्दास त्सपरतः परः ॥२९॥ कौपीनस्यास्य माहात्म्यं मया वक्तुं न शक्यते ॥ इदं संरक्ष्य गतय महयं देहीत्यशाद्वटुः ॥३०॥ वणि क्कौपीनमादाय न्यस्य रक्षां करोद्गृहे ॥ स्नातुं यातस्य च वटोराग तिं प्रत्यपालयत् ॥३१॥ कौपीनं यापइत्वा तन्मायया वटुरायर्यौ ॥ किंकाबेर्य्या जलैरार्द्रं स्वर्नद्यां वाघनो द्वैः ॥३२॥ भक्तः संपन्नवानम्रश्चंद्रमौलिपरस्य धीः ॥ आर्द्रमूर्त्तिं तमायांतं प्रवहः मत्वु यौ वटुं ॥३३॥ भृत्य प्रेमजलैः स्नातुं कामः कौपीनतस्करः ॥ भक्तस्याग्रे स्थितः प्राह कौपीनं गतमार्द्रतां ॥३४॥ आषाढवेष्टितं चैतदार्द्रं परिहृतं मया ॥ परित्यक्तं त्वयि न्यस्तं मानयेत्याह वर्णिराट् ॥३५॥ स गृहं प्राप्य कौपीनमदृष्ट्वा दुःखितो मुहुः ॥ ॥ वैश्य उवाच ॥ ॥ क्व यातं केन नीतं कौपीनं मायया मम ॥ अदृष्ट्वा मुहुरन्विष्य स वैश्यः साध्वसाकुलः ॥३६॥ वटोमाया वीनः कूट पाशे लग्नः करोतिकिं ॥ पत्नी बंधु सुत प्राप्त महती विपदित्यसौ ॥३७॥ अन्यदादाय =

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० १ शिवमेव सदाध्यायन् भक्तेभ्यो मुक्तिदायकः ॥ १५ ॥ कौपीनकंथां शुकदः संपदां फलमन्वभूत ॥ श्रीकांता सदा० न०
६५ रण्यपुरे न्यक्षंनत्वा तत्माद से विनो ॥ १६ ॥ भुक्तयेव भक्तवर्गाणां मठं तत्र न्यधात्सवै ॥ सतत्र कल्पितमठे अ० ३०
देवयात्रोत्सवे बहून् ॥ १७ ॥ अंद्येः प्रीणयन् भक्तानुवासालोकयन्द्विवम् ॥ जातु कांतपुराधीशः तं
भक्तं चंद्रशेखरः ॥ १८ ॥ पातुं कौपीनमाहात्म्याद्दिव्यं जावर्णी बभूव सः ॥ अलक्षितजटाबद्धसत्रि
पुंड्रशिखांचितः ॥ १९ ॥ सपवित्रो यज्ञसूत्री ययौ कृष्णाजिनोज्वलः ॥ कौपीनोज्वलमाबद्धखं-
डवासकटीतटम् ॥ २० ॥ निर्मले भक्तहृदये निक्षेप्तुं पादयोर्युगम् ॥ न्यस्तन्यासोचितं क्षोण्यां यां
S४१ तंमाधारचक्रमम ॥ २१ ॥ निर्वार्णिनं तं जना वीक्ष्य सर्वे हृदि मुदान्विताः ॥ तस्य हस्तकुशग्रंथि कौ
पीनांचितदंडभृत ॥ २२ ॥ स पापमरनीतिं तं महिम्नानंदयन् जनान् ॥ अदृष्टपूर्वं तं दृष्ट्वा सवणि
क् ब्रह्मचारिणम् ॥ २३ ॥ लब्धं तपः फलमिति प्राणमन् प्रशशंस च ॥ स वर्णी त्वाह तं दृष्ट्वा प्रीणइ
त्वान्नदानतः ॥ २४ ॥ ॥ वर्णी उवाच ॥ ॥ कौपीनकंथा वस्त्राणि ददासी त्वहमागतः ॥ तच्छ्रु
त्वा सवणिक् प्राथमठं पाकविदो द्विजान् ॥ २५ ॥ आदरेणान्नपानादि कुर्वंत्वस्येति चादिशत् ॥ ६५


CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वोन्मिश्च शालिकेदारमंडिते ॥ २ ॥ केदारवृत्तिकामुक्तपुंड्रेक्षुमुक्तमौक्तिके ॥ बद्धकल्पातदीसेतु
पद्धतीबद्धभूरुहा ॥ ३ ॥ चिक्रोडदंतनिर्भिण्णनारिकेलपयोभरैः ॥ उद्यन्नागलतारूढक्रमुकदलो
दलवीजिते ॥ ४ ॥ फनसाम्रवनोद्दामफलगन्धेनबंधुरे ॥ द्विजाग्रहारपंक्तिभिः तटद्वयविरा
जिते ॥ ५ ॥ आसह्याद्दुद्भूतायाश्च कावेर्यास्तीरयोर्द्वयोः ॥ शिवागारवरोद्दामकुंभस्थगितदिक्तटे ॥ ६ ॥ यत्र-
यत्रशिवक्षेत्रेवस्तुंसंसेवितुंहरं ॥ विष्णुधामशतैर्युक्तेयतिवृंदमहेर्युते ॥ ७ ॥ सह्यजासह्यपापानिनाशयं
तीस्वपावनैः ॥ चलत्तरंगसंसर्गपूतवातेश्चपापिनां ॥ ८ ॥ देवीशतमुखीतत्रप्लावयंतीचसागरं ॥ तरंगितंशिवा
गारंशंखदुंदुभिनिस्वनैः ॥ निचोलभूतेपृथ्व्यांतु पालितेचोलमंडले ॥ चोलैश्चपालितेतत्रशिवैकैंकर्यतत्परैः ॥
॥ १० ॥ शांभवैर्भस्मरुद्राक्षधारिभिः परिसेविते ॥ मृत्स्नैकृतमहारत्नबाणस्फाटिकसंभवैः ॥ ११ ॥ शि-
वलिंगार्चकैः शैवैर्बिल्वार्चनपरायणैः ॥ संवृतंविविधैः शंभोरथोत्सवविराजिते ॥ १२ ॥ पुराणसारे
दिव्यास्तिकावेरीमुखसंभवा ॥ तन्नीरेशंभुपरमित्यस्तिभुवनभूषणं ॥ १३ ॥ रत्नैर्दीप्तस्यंदनौघवीथी
संपरमास्पदं ॥ तस्मिन्नमरनीत्याख्यो वैश्योवंशसमुद्भवः ॥ १४ ॥ कश्चिदासीत्सुवर्णादिनवरत्ननिधीश्वरः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ शंभोशंकरकिंकराः शिवपरा रुद्राक्षभस्मादरा लिंगार्चासुपरायणाः श्रुतिशिरःसारार्थमोदादराः ॥ व्याहा सदा०न०
६४ रंत्यपि सदैव ते हर हरेति शिवेति शब्दादराः भक्तास्ते मुहुरप्यपारविभवास्ते शंकराः शांकराः ॥ ५२ ॥ महानु- अ०२९
भावास्तैः व्येनं महादेवस्य किंकराः ॥ आकर्ण्य तत्स्तुतिं प्राचुर्भक्तानां प्रथमं तदा ॥ ५३ ॥ ततो देवाश्च पं
गत्वा सुंदरो भक्तिवेष्टितः ॥ शिवभक्तान्तरंगसन् शिवतिष्ठभियोऽस्थितः ॥ ५४ ॥ एवं व्यवस्थांस्वयंघ-
रण्यां माहेश्वराणां महिमात्मनां सः ॥ तत्सौम्यनाथोदिति शंभुभक्तप्रबंधहेतुर्विचचारकामम् ॥ ॥
वीरोरुद्रः शंकरकिंकराणामग्रेसरः साहसभक्तिधुर्यः ॥ अवाप्य काले भगवत्प्रसादात् गणाग्रणी
४४० रूपमहीधरेऽभूत् ॥ ५६ ॥ वीरोरुद्रस्याद्भुतभक्तिवीर्यं शृणोति यः साहसचण्डभक्तेः ॥ प्राप्नोति स
श्रीकलधौतशैले भवान् प्रसादेन गणाधिपत्यम् ॥ ५७ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये
नवमांशे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवा
यनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ वक्ष्याम्यमरनेत्याख्यवणिजः शोभनां कथाम् ॥ कावेरीत
हरिमुक्तशंखमौक्तिकदंतुरे ॥ १ ॥ कल्हारकैरवोल्लासिफुल्लपद्मविराजिते ॥ कोककेकार ६४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृपणानां विशेषतः ॥ ४१ ॥ प्रनम्राणां कलयते प्रायेणाखिलसंपदाम् ॥ शंकरांघ्रिसमासक्तः किं

करोग्रे संरो भुवि ॥ ४२ ॥ गम्फिलखचितं कुंभाग्रमाणिक्यरुचिरप्रभोः ॥ कुंकुमक्षोदनिकरै रंकि

यत वक्षसम् ॥ ४३ ॥ शिखाग्रविगलत्पुष्पमुखाद्यविशिखवांतरम् ॥ क्वणत्किंकिणिकानादक

णत्किंकिणि भूषणम् ॥ ४४ ॥ कस्तूरीतिलकामोदविस्तारितदिगंतरम् ॥ गंडप्रलोलरुद्राक्षमंड

लं चारुकुंडलम् ॥ ४५ ॥ आजानसिद्धगांभीर्य आजानुविलसद्भुजम् ॥ अवमर्त्यमहाभक्तानुपमि

त्यात्मनो भुवम् ॥ ४६ ॥ मंदमंदसमायांतं सुंदरं लोकसुंदरम् ॥ हंतुमेनं मनश्चक्रे हंत हंत हराप्रि

यम् ॥ ४७ ॥ गर्भगेहं भियाशंभो गर्भमातुरिवाविशत् ॥ कवाटं दृढमाबध्य ललाटनयनालये ॥

॥ ४८ ॥ भक्तबाह्यं तमालक्ष्य युधवीरस्तमब्रवीत् ॥ ॥ वीरोद्भट उवाच ॥ अवनीते यदि प्रीति

स्तवयूनि शिवद्विजे ॥ भवना ह्यम महादेव भवना ह्यो महानपि ॥ ४९ ॥ वीरोद्भटस्य विकटां धीरोक्तिं

कलयञ्छिवः ॥ शरणागतमोहेमं करुणावरुणालयः ॥ ५० ॥ ॥ ईश्वर उवाच ॥ ॥ तुहिवी

रोद्भटमुखान् जहि भीतिं च सुंदर ॥ इति गर्भगिरा स्तोषीन्मातिमत्तमशेखरः ॥ ५१ ॥ ॥ सुंदर उवाच ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ॥ श्रीस्कंद उवाच ॥ ॥ चरितं चेदिराजस्य प्रथमं प्रथितं मया ॥ वीरेंद्रस्य भक्तस्य माहात्म्यमिति 
 वर्ण्यते ॥ ३० ॥ शिवपादौ समभ्यर्च्य लब्धो येन परश्वधः ॥ स रामः क्षत्रियान् हत्वा विप्रसाद्दत्तवान्धराम् ॥ 
॥ ३१ ॥ सर्वार्थयाचमानाय तस्मै रामाय सागरः ॥ केरलं स्वाब्धि विजयं विषयं संपदां ददौ ॥ ३२ ॥ मौक्तिकैः
शंखनिर्मुक्तैर्वेणुपंड्विक्षुसंभवैः ॥ सदालंक्रियते तत्र वारुणीनां तदद्भुतम् ॥ ३३ ॥ अरुणाद्रिरिति ग्रामः
शोभते शंभुगोचरः ॥ मंत्रशुद्धैर्युतो विप्रैः शापानुग्रहणक्षमैः ॥ ३४ ॥ ग्रामे तस्मिन् महिते तरुवंशशिखामणिः ॥ अभूद्दारभटो नाम शिवभक्तो दृढव्रतः ॥ ३५ ॥ छिन्नसंसारबंधेषु शिवांघ्रिदृढभक्तिषु ॥
 शिवभक्तेषु नियतं शिवमेव विभावयन् ॥ ३६ ॥ स गत्वा शिवधामानि नत्वा तेषु तदीश्वरान् ॥ उल्लंघ्य केरलान् देशांश्च चार सकलां महीम् ॥ ३७ ॥ शिवभक्तसमाचारस्थापनव्रतदीक्षितः ॥ कल्याणः
प्रापकल्याणं कमलालयमास्थितः ॥ ३८ ॥ यस्मिन्निवसतः शंभोश्चक्रे चंद्रदिवाकरौ ॥ रथ्याव
दरथो भूमिर्यंता विधाः शरो हरिः ॥ ३९ ॥ वासुकिर्ज्याधनुर्मेरुः दिविलक्ष्यं पुरत्रयम् ॥ तपस्तप्त्वा पुरा यत्र कमला हरिवल्लभा ॥ ४० ॥ परमेश प्रसादेन प्राभूदखिलसंपदाम् ॥ कृपाकटाक्षविक्षेपैः



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्यतां निवार्य्येनं दत्तः प्रस्थापयद्वनम् ॥ कृपाणपाणिस्तं दत्तः प्रापयत्पावनं वनम् ॥१९॥ तपसैवप्र
यागृहः ततः शक्तिपुरं पुनः ॥ पथि दत्तेन नीतस्य चकवस्य तपस्विनः ॥ २०॥ अक्षतत्वं कथं नस्या
दित्यभूद्व्याकुलो नृपः ॥ दत्तान्समागतांसर्वे तद्वृत्तांतं महीपतिः ॥ २१॥ श्रोतुमिच्छन्निजं प्राणं धारयामा
सचात्मनि ॥ स शठः तापसः कश्चिदक्षतो विजनं वनम् ॥ २२॥ मयानीत इति प्राप्य दत्ताशं सन्महीपतेः ॥ ॥
त्वया सौम्य कृतं यत्तत्केनवा वर्ण्यतामिदम् ॥ २३॥ इति दत्तं द्वारपालं प्रशशंस मुहुर्मुहुः ॥ आहूयपुत्रा
मात्यादीन्निजं भावं न्यवेदयत् ॥ २४॥ विधिनाच कृतं तेद्य यथाज्ञा केन लंघ्यते ॥ शिवभक्तिप्रकाश्ये
षा भक्तिर्भाग्यनशाद्भवेत् ॥ २५॥ नोपक्षणीया सर्वेषु कालेष्वभिमतप्रदा ॥ इत्यादौ शं नमस्कृत्य शिव
भक्तं दयानिधिः ॥ २६॥ आनंदतांडवे शांघ्रिमंतः स्वान्तमचिन्तयत् ॥ तांडवेशस्तदा तुष्टः तस्य भूत
गणे वृतः ॥ २७॥ वृषारूढस्तिल्लवननाथः शीतांशुभूषणः ॥ देवं च यावत्सनतो नृपाग्रणीः निजांघ्रि
चंप्रेमपरं परायाः ॥ समुत्तिनाथाकृतिरेषनैजं परं प्रपेदे निजधाम शंभोः ॥ २८॥ भक्तांघ्रिनाथप्रतिप्र
न्नमत्यं सत्याथ नाथ (था) हृदय चोदितस्य ॥ परस्य शंभोः पदमेति विप्रो चरित्रमेतत्सुपठेच्छृणोति ॥ २९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ मंदस्तपस्विताम् ॥ उद्धृत्य पुस्तकं हस्ते क्रूरस्यास्ति जटास्तरः ॥ ८ ॥ प्रशास्ति तापसस्वास्थ्यमाव सदा० न०
६२ स्थ्यं प्राप्त भूपतेः ॥ अवारितद्वारतया तदा वारि न केनचित ॥ ९ ॥ अवापकक्ष्यां श्रो ल्लघ्य प्रवासक अ० २८० १
तपस्विवत ॥ तत्र दत्ताभिधः कश्चित्तरुणो वारितापसम् ॥ १० ॥ शेते नरपतिर्नैयं वेला गंतुं त्वं तरम् ॥
दिदृक्षुः सन्निधे देशे क्षितिभृत्वायदीक्षितः ॥ ११ ॥ विवक्षुरभवद्भिक्षुर्दत्तवाचमलक्षयन् ॥ मृगेक्षणाक्षि
तिभृता भिक्षुमालक्ष्य वल्लभम् ॥ १२ ॥ अबोधयत्प्रबुध्यः सन् तमुपाचरदंजसा ॥ ॥ नृप उवाच ॥ ॥
कुलं शुद्धं गृहं पूतं प्रसन्नं मम मानसम् ॥ १३ ॥ तवागमनमाहात्म्यात किं करः किं करोम्यहम् ॥ १३ ॥ ध
नं च संपदं सर्वं जीवितं च ददामि ते ॥ इति ब्रुवाणे संतुष्य परीक्षितुमिवास्य गाम् ॥ १४ ॥ कोशान्निष्क
SS2 ष्य राजानमसिंमुच्य जघान सः ॥ सत्यनाथः क्षतः क्षिप्रं पपात क्षितिभृत्क्षितौ ॥ १५ ॥ ततः कवाटरंध्रे
ण दृष्ट्वा तच्चेष्टितं गताः ॥ कुटिलभ्रूकुटीबंधं विकटासिपटोद्यतम् ॥ १६ ॥ दत्तमालोक्य संनद्धः
सक्रमूर्च्छो नृपोवदत ॥ ॥ राजोवाच ॥ ॥ मैनं बिभ्रीमवधीषु परेणापि यथातथा ॥ १७ ॥ शा
पेन्मां चोत्सृजेदेनं त्वं दत्से त्यादिशन्नृपः ॥ ज्ञात्वा तत्कर्म तं हंतुमागतान्व्रजशासने ॥ १८ ॥ उद्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तपदं नत्वाधिवृंदारको दुग्धन्मौलिनिघृष्टपादकमलं त्वो क्यंबिल्वानंदकः ॥ त्वेभेसौशि
वयोर पारमानंदास्पदं कुंदभं जित्वारिरजताद्रिशृंगममलं ब्रह्माद्यगम्यं तदा ॥ ४३ ॥ ॥
॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे कृषीबलचरिते ऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥
श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥
सत्यार्थनाथनाम्नोऽस्य भक्तस्य कथये कथाम् ॥ अस्ति चेदिपतिः कश्चिच्चिंतामणिरिवार्थि
नाम् ॥ १ ॥ मराठनाथसत्यार्थमित्यन्वर्थपदाभिधः ॥ स गोपालपुरे गोत्रमंडलाखंडलप्रजा
म् ॥ २ ॥ शुगोप भगवद्भक्तान् भवं स्वहृदि भावयन् ॥ सतामर्थं स भक्तार्थं सत्यार्थः समुपार्ज
यत् ॥ ३ ॥ तन्नूमयितदर्प्पीर्दंतनं धरणिशेखरः ॥ कदाचिदर्के एवोद्यत्करालकरबालकः ॥ ४ ॥
जिगाय जगतीपालो वैरिणः शरणां कथो ॥ अथ तुरंगमातंगपदातिरथपत्तिभिः ॥ ५ ॥ उपायन
मिवानीयात् भुवो भारमिवागतः ॥ कृपणपरिभूतस्य कृपणां वृत्तिमूसिदत्त ॥ ६ ॥ पलायित बलं
हित्वा परिक्षिन्प्राणमात्मनः ॥ निजमंदिरमाधूय गिरिं मंदरमासदत् ॥ ७ ॥ बलमंदिमनो दंतसहि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१ अन्नं संपन्नमिति सा प्रीणयेत्याह चातिथिम् ॥ स प्रीतचेतस्तं बोधुमशक्यं निजबोधतः ॥ ३४ ॥ सदा.न.
६१ शनैः शनैर्बोधयितुमुद्यतः प्राप योक्तिभिः ॥ ॥ कृषीबल उवाच ॥ ॥ उत्तिष्ठ नाथ मद्दुःख अ.२८
मोचनार्थं त्वमागतः ॥ पूजां गृहाण वेत्तैव मत्येतीत्यब्रवीच्च सः ॥ ३५ ॥ भास्वत्तेजदिशश्चैव घोर
तपं घां दिशश्चसः ॥ विस्मितोऽभूत्तदा लोक्य दंपती विस्मयाऽऽकुलौ ॥ ३६ ॥ ब्रह्मादिभिर्मृग्यमाणः
तत्र ज्योतिर्मयः शिवः ॥ उमासखो वृषारूढो विस्मितौ प्राह दंपतीम् ॥ ३७ ॥ ॥ ईश्वर उवाच ॥ ॥ म
द्भक्त मम पूजां त्वमेवं कृत्वा स्थिरो भव ॥ मुख्यत्वं शिवभक्तानां प्राप्स्यानसि त्वा शाश्वतम् ॥ ३८ ॥ एतया स
८८३ हपत्न्या त्वं मम कैलासपर्वते ॥ धनेशादधिकं भुंक्ष्व शिवदत्तां श्रियं स्थिराम् ॥ ३९ ॥ ततः शिवशि
वेत्युच्चैर्ब्रुवन् जय जयेति च ॥ प्रहृष्टात्मा स भक्तस्तं तुष्टुवेऽभिप्रणम्य च ॥ ४० ॥ कृषीबल उवाच ॥ ॥
भो भर्ग शाश्वत विभो त्रिजगच्छरण्य पार्वतीकेंदुधामवदनामलचारुमूर्ते ॥ विश्वेश शाश्वित विभो शशि
खंडचूड मामद्य पाहि सुदृशा करुणावरुणालयाद्य ॥ ४१ ॥ ॥ स्कंद उवाच ॥ ॥ इति संस्तुव
ते तस्मै देवः पत्नीयुताय च ॥ दत्वा कैलाससमलं तत्रैवांतर्दधे हरः ॥ ४२ ॥ सानंदं सनकादिवंदि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदन्नं परिकल्प्याथ क्षुधार्त्तिसमयाति थेः ॥ विनोपयमिदं नान्यदिति तत्प्रेरितः प्रियः ॥ २३ ॥
कृषीबल उवाच ॥ ॥ मम्मादिसंपत्सुलभाभवती त्वनुगम्यताम् ॥ स वर्षधाराभिहतः कर्म क्षेत्र
मभ्यगात् ॥ २४ ॥ काले नीलघनच्छन्ने तमोवृत्त दिगंतरे ॥ पद्धामन्विष्यपदवीं तिमिरांधीकृतक्ष
णः ॥ २५ ॥ मध्ये मध्ये स्फुरद्विद्युत्प्रभा दर्शितपद्धतिः ॥ विदारितश्रुतिपथो गंभीरांभोदगर्जितैः ॥ २६ ॥
पयः पीठकसंछन्नमस्तकसुसपक्षिणम् ॥ प्राप्य केदारमुत्सार्य सलिलं बीजसंचयम् ॥ २७ ॥ आ
दाय पीठकानर्षीन् स वनत्वं प्रसादवान् ॥ द्वारस्थे वै स तदादाय प्रविश्य भवनं प्रिया ॥ २८ ॥ प्रक्षा
ल्य पंककाष्ठानि न संती त्याह तं पतिम् ॥ भित्त्वा संगेह पटलं भित्वा दारुण्यथाययौ ॥ २९ ॥ आदाय
स्मात्तदा चुल्यां दीपयामास पावकम् ॥ सयवांकुरुजातं ततः स्त भाण्डे निधाय च ॥ ३० ॥ विशोष्य मुसला
घातं चक्रे सा शुभ्रतंडुलम् ॥ पक्वान्यं पतिमित्याह व्यंजनं नास्ति किंचन ॥ ३१ ॥ ततः सोऽपि क्षुधा
र्तोऽपं भक्तं दृष्ट्वाकुलोऽभवत् ॥ निर्गत्य निष्कुटं प्राप्य भक्तः पूर्णफलान्यपि ॥ ३२ ॥ सस्वपाशान्
निवोन्मुच्य शाकान्यादाय चागमत् ॥ ३३ ॥ नानाविधानि तान्येव व्यंजनानि व्यधात्तसा ॥ ३३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० चिकतयाशंभोः भक्त भक्त प्रदानतः ॥ ११ ॥ विन्यस्य भारं नृत्येशेन दुर्गीति मजीगणत् ॥ नृणाय मः सदा न
६० न्यदौर्गत्यं शैवाराधनतत्परे ॥ १२ ॥ प्रकाशयितुमेतस्मिन्नन्नदान व्रतं हरः ॥ हरि ब्रह्मापरिच्छेद्यो अ० २८
विधाय वृषभस्वयम् ॥ १३ ॥ स्वीचक्रे भूमिकां कांचित्तपस्वि जनमुद्रिकाम् ॥ कुहूनातमसाचं
चत्तटिति जरि तांबरे ॥ १४ ॥ दंभोलि जृंभितेंद्रचस्वनस्फूर्जद् दिगंतरे ॥ निशीथसमये मेघविगलद्वारि
संमुंकुले ॥ १५ ॥ सुप्त भक्ताखिलजने भस्म दिग्धत्रिपुंड्रवान् ॥ प्राप्य भक्तस्य तद्गेहं क्षुधार्त इव भा
वपन् ॥ १६ ॥ ॥ शंभुरुवाच ॥ ॥ "गृहेश शंभु भक्तोऽहं क्षुधार्त्तोस्मी" त्युवाच तम् ॥ तच्छ्रुत्वा रः
559 मुत्थाय गृही त्वाच निरगाद्गृहात् ॥ १७ ॥ वर्षधारानिलाक्रांत कंपमानांगमेव तम् ॥ नीत्वा गृहं ततः शीत
र्त्तिं शमयित्वा नलार्चिषा ॥ १८ ॥ भक्तः प्राह निजां भार्यामुपोष्यप्यहमोदनैः ॥ शिवभक्तान्प्रीणया
मीत्येवं संविन्मया कृता ॥ १९ ॥ तत्कथं परितृप्तस्यां रात्रौ वर्षः समागतः ॥ इत्युक्ता सा तथा भक्तं शि
वा कल्पा ब्रवीत्पतिम् ॥ २० ॥ गृहे किंचिन्न पश्यामि नैवलेपं हि पाचने ॥ प्रातिपुः प्रातिवेश्मस्था ननु वेलं
करोमि किम् ॥ २१ ॥ दिनाद्यावध्यके दारमुप्तं बीजसमुच्चयम् ॥ समूह्याद्राय गच्छावो नान्यत्कर्तव्यमस्ति
वे ॥ २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्रीसदाशिवायनमः॥ श्रीस्कंद उवाच॥ ॥इलानंदाख्यभ
क्तस्य चरितं कथयामिते॥ चिदंबरसभानृत्तं देवश्री चंद्रशेखरः॥१॥ शिवभक्तजनस्तोत्रभू
मध्यारिहरंतरः॥ चतुर्थजातितांदक्ष पंचात्लिम तपःफलम्॥२॥ कनिष्टकुटिवास्तव्य शांतिदा
न्ति विभूषणः॥ भस्मरुद्राक्षपूतांगो अनंगारिपदार्चकः॥३॥ यः सदा शंभुभक्तानां संतोषंक
लयन् स्थितः॥ असंख्यैश्च हलैः कुर्वन् सांत्येन कृषिक्रियाम्॥४॥ अनन्यजनसामान्यांसं
पदं प्राप्य सर्वदा॥ क्षुधितेभ्योदिशन्नन्नमनिवारितमंजसा॥५॥ प्राणिनस्तोषयामास सर्वभू
तदयापरः॥ विशिष्य भगवद्भक्तान् भस्मोद्धूलितविग्रहान्॥६॥ रुद्राक्षमालाभरणानभ्युपेत्यः
प्रणम्यच॥ विधाय कुशलप्रश्नं नीत्वा च भवनांतरम्॥७॥ पादौ प्रक्षाल्य विधिवद्भोजयाम्
स वांछितम्॥ एवं प्रतिदिनं शंभोः किंकरेषु विधाय च॥८॥ हर्षोत्कर्षप्रकर्षेण तस्मिन्धन
दसंपदि॥ संपदीवदरिद्रत्वे तस्य निष्काम चंचलां॥९॥ देवोदर्शयितुं तस्यावितता नदरिद्रताम्॥
असंकुचितचेतस्कोसंकोचेऽपिससंपदः॥१०॥ विक्रीय प्राक्तनद्रव्यं भूषणादीनि चांततः॥पूर्वी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वभावारिर्भक्तमुख्य: शिवे द्रविणदानतः॥ शुद्धात्मा "दुष्करान् हन्तुं बहिस्स्थास्यामि" याब्रवीत्

शिवरह०९ तिदेवेन प्रेरितोऽपि मुहुर्मुहुः॥ ॥ द्विज उवाच॥ हता: किं पुरा यांति याहि वैश्येत्युवाच तं:॥ व्याहरन्नेव हस्ता सदा न· अ०२७

५९ ज भृंग दास्रासि नाभ्रमन्॥ ४८॥ आजगाम स्फुरद्घोषो वितन्वन्मंडलभ्रमीः॥ ततस्तिरोहिते मयाविप्रे पश्य

न्मृगीहराम्॥ ४९॥ एकाकिनीं दृशौ दिक्षु विदिक्षु च विचालयन्॥ ददर्श गगने देव्या समं वृषभवाहनम्॥।

कैलासशिखरारूढ चंद्रबिंबश्रियं हरम्॥ करुणालहरीरेखा तरंगितदृगंचलम्॥ ५१॥ सुमनः परिषदुष्टसुम

नोवर्षमौलिनम्॥ अनंसीदथ चास्तौषीत्स वैश्यो वैश्यवाक् हरम्॥ ५२॥ गंगा चंद्रकलासदुल्लसज्झरीसा

रस्फुरन्मौलिनम्॥ कंठं ते शितिकंठनुं दितगरं श्रीनीलकंठाधुना॥ वह्नींदुर्कभवाक्षकोणजकृपापांगोल्ल

ss सन्तेमुखम्॥ पादाब्जसुरमौलिजालमणियुक्कांतं भजे शंकरम्॥ ५३॥ मच्चित्तभ्रमरे मयाशिवनवपादाब्ज मासी

दतो॥ स्तुत्वेत्थं संप्रणम्यासौ भार्यया शशिशेखरम्॥ ५४॥ अजागरिप्रयो धेनुः सुखभूमन्यरस्ततः॥ सं

तुष्टः प्रययौ शंभुस्तं स्वभावरिपुं ततः॥ स कैलासनिजं धाम सकुटुंबेनिनापसः॥ ५५॥ देवेषु पुष्पनिक

रस्तुवत्सु तितावाहीति संप्रवदत्सु च पुष्पकस्थैः॥ तस्मिन्पदे शंभुपदं तदीयं हास्त्राहता श्चापुरमर्त्य

लोकम्॥ ५६॥ ॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे वैश्यप्रसादो नाम सप्तविंशोऽध्यायः॥ २७

९०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तः॥ चरन्मंडलमार्गेण कृदंतान्निशितायुधान्॥३६॥ मतानेनमकानेकः सन्ननिघ्नन्दिक्षुविजृंभि
तान्॥ व्याघ्रवद्द्विजहाराजौ मृगानिरिपुव्रजे॥३७॥ केचित्कृत्तपदापेतुः केचिच्छिन्नबाहवः॥
केचिन्निकृत्तशिरसः केचित्खंडितमध्यमः॥३८॥ दलितोदरनिष्क्रांतांतेसांद्रंनिसृतासृजः॥ अन्येनि
र्भिन्नसर्वांगानिपेतुरवनीतले॥३९॥ स्वभावाहतानांतु पतितानां रणाजिरे॥ तेषामुपरिवीराणांनिपे
तु गृध्रसंचयाः॥४०॥ येयेयुद्धायसन्नद्धाः तेतेतेनहतास्तदा॥ येयेसमरवित्रस्ताः अमरैर्हसितास्त
दा॥४१॥ दुद्रुवुर्दुर्दुराकाराः दिक्षुत्रस्तामृगाइव॥ हतेषुतेषुवीरेषुविद्रुतेष्वपरेषुच॥४२॥ सचे
कवीरः संप्राह तत्र तंद्विजतापसम्॥ भगवन्याहिमाभैषीरनुगच्छामितेपदम्॥४३॥ इतिसोनु
गतोवध्वा तं यातंमुनिमन्वगात्॥ ब्रह्मच्युताज्ञानमूर्त्तेरनुयातोविशांमुना॥४४॥ सविप्रतापसःशं
भुः धाम च्छायावनं ययौ॥ तत्राविश्यप्रियायुक्तःश्चंद्रमौलिर्द्विजाकृतिः॥४५॥ ~~स्वभावीरभक्त~~
~~मुख्यः ब्रूवेद्रविणदानतः॥ मुद्धात्मादुष्करान्हंतुं बहिस्थास्यामि चाब्रवीत्॥४६~~॥~~द्विजउवाच~~॥
"क्षेममस्तिपरंमेत्वं निवर्त्तस्व" त्यशाधितम्॥ सतं प्रणम्यस्तुत्वाच अपश्यन्प्रययावितिः॥४६॥ "समायाहि"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ यातिकश्चित्क्वांचित्पतिव्रताम्॥ श्यामवर्णेमहाज्ञोते तामनुद्धृय वीयतः॥२८॥ लोकस्थितिःस्थापनी ससा०न०
५८ याइतिमारुतरंहसः॥ कण्ठेतरवाचस्तेनिन्दंस्तंसमन्वयुः॥२९॥ कृपासितिष्ठतिष्ठेति दुद्रुवुस्तंवतांच अ०२७
ते॥स्वभावायाहितासौवै वेश्यास्ते विधृतायुधाः॥३०॥ पतिव्रतामिमांहित्वा त्वंयाहीत्यब्रुवन्द्विजम्॥
साब्रवीत्सुमुखंवीक्ष्य तापसं भीरुवत्स्थितम्॥३१॥ साब्रवीद्विस्मितासाध्वी इंगितज्ञास्वभर्तरि॥मा
भैषीर्नाथतानेतान् स्वभावारिर्जयेदिति॥३२॥ तच्छ्रुत्वावणिगित्याह धीमतामीशमास्तुभीः॥ह
निष्यामि चैतेनाथपश्यतःस्वांश्च बांधवान्॥३३॥ ॥वैश्य उवाच॥ ॥नास्थीयतांमम
५५८ पुरीगम्यतांजीवितेप्सुभिः॥नोचेन्मत्खड्गकृत्तांगाः सहसालुठतक्षितौ॥३४॥ तच्छ्रुत्वाहुश्चतेमूढाः
स्वकलंकंनप्रेक्ष्यसे॥ द्विजायदत्वापत्नींस्वां किंदर्शयसिपौरुषं॥ वयंसहविनश्यामोनैनांदातुंसहा
महे॥ इत्युक्तश्चस्वभावारिः तानभाषतरोषतः॥ ॥वणिगुवाच॥ ॥विभिद्यांगानिवोविप्रंनया
मिनांसुखाध्वना॥ इति प्राहस्वभावारिर्धीरोदात्तःस्वबान्धवान्॥३४॥ दुर्वृत्तेनामुना किन्नइतितेप
रिहृत्यतम्॥ प्रियासहायंतंविप्रं रुरुधुःचिक्रुधुस्तथा॥३५॥ स्वभावारिस्ततोबंधुन्मुनिं तंशिवभावि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वान्महासीमिति प्राह तदा द्विजः ॥ तच्छ्रुत्वा वचनं वैश्यो विरुद्धमपि लोकतः ॥ १६ ॥ तदानीं प्रथमप्रीति रप्यति
प्रीतिमानभूत् ॥ ॥ वणिगुवाच ॥ ॥ यदस्तु मे प्रियं वस्तु तदस्तु तव वांछिते ॥ १७ ॥ वैश्यपत्यपि तदा वैश्यं प्रा
ह भार्या तदा द्विजे ॥ विप्रेणानेन गच्छ त्वं दासी त्व वदच्च ताम् ॥ १८ ॥ तच्छ्रुत्वाऽशनिसंकाशं वाक्यं सा व्या
कुलाभवत् ॥ पुनः स्वस्थमना प्राह प्राणेशं पतिदेवता ॥ १९ ॥ इत्थमेव त्वदाज्ञा चेज्जीवितेनेशस्त्वमेव मे ॥ य
त्त्वयोक्तं मया कार्यं न स्वतन्त्रास्मि भर्त्तरि ॥ २० ॥ इतीरयंती सा नाथं स्तुवन्ती मन्मथांतकम् ॥ तयोरकृत्रिमं
भावं ज्ञात्वा देवोऽति विस्मितः ॥ २१ ॥ मंदस्मितो ह्यसहं कं विलासोल्लासिभूषणम् ॥ प्राप्य प्रणम्य सा विप्रं
तस्थौ स्तब्धाननानना ॥ २२ ॥ त्यक्त्वा प्रिया किमस्त्यन्यत्कार्यं नाथेति वादिनी ॥ अतीत्यमानयत्तेन भयं
विद्यते ततः ॥ २३ ॥ इत्युक्तस्तां वणिक्प्राह मया विप्र विचिंतितम् ॥ त्वयोदितं मया कार्यमिति प्राप्य गृहां
तरम् ॥ २४ ॥ बद्धचेलो दयत्खड्गफलकश्च विनिर्ययौ ॥ सत न्निरोधनका हं तु मकोरादृढमानसम् ॥ २५ ॥
प्रणम्य तं प्रयहीति प्रयातं द्विजमन्वगात् ॥ तस्मिन्क्षणे श्रुतोदन्ताः तस्य तस्याश्च बांधवाः ॥ २६ ॥ निर्ययुर्नि
जधामभ्यो सर्वे क्रोधाद्धृतायुधाः ॥ विनाशं तं स्वभावादिं केनानीतिरियं कृता ॥ २७ ॥ तामादाय कथं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ शांभवपदार्चकः ॥ शिवभक्तपदार्चातोसंपदाप्यनदोपमः ॥ ४ ॥ तस्मिन् ददातिभक्तेभ्यो वस्तुतस्तदभीप्सितम् ॥ तस्य सदा०न०
५७ भक्तस्य दातृत्वं जिज्ञासुरभवच्छिवः ॥ ५ ॥ स्थिरायां गोचरोभक्तस्त्र्यंबकेशस्त्रयीभया ॥ देवेशः सूक्ष्मगम्योऽपिस अर्द्ध६
भादर्शितां उवः ॥ ६ ॥ गोयीच गंगया ज्ञातः कितवो धूर्तवेषवान् ॥ वणिजः स्वगृहं प्रापसतदा भस्मपांडुरः ॥ ७ ॥
तिर्यक्त्रिपुंड्ररुद्राक्षमालाभरणभूषितः ॥ वणिक्पतिर्भक्तवेषं तं मूर्त्तमिव मन्मथम् ॥ ८ ॥ दृष्ट्वा तद्दर्शनानंदो नना
मशिवतत्ववित् ॥ पचेलिमैः पूर्वपुण्यैः भूषितोऽस्मीतिहृष्टधीः ॥ ९ ॥ उचितैरुपचारैस्तु उरूजात उपाचरत् ॥ ॥
वणिगुवाच ॥ ॥ मामेवं वपुरातोसि किं मे भाग्यं महोदयम् ॥ त्वं किं करोस्मि भगवन् किमागमनकारणं ॥
९८७ इति ब्रुवाणं वणिजं प्रांजलिं प्राह स प्रभुः ॥ मंदस्मितशशिज्योत्स्नालोकनेन मनोहरम् ॥ ११ ॥ ॥ विप्र उवाच ॥
धनेन भक्तसंघानां वांछितं यद्ददासि तत् ॥ इति श्रुत्वा तवोदन्तमागतोस्मि त्वदन्तिकम् ॥ १२ ॥ तदा सचित्त
ददामीत्युचिवान् सतदा द्विजः ॥ प्रांजलिः प्राह तं वैश्यः प्रेमान्तः संभ्रमकाशयन् ॥ १३ ॥ ॥ वणिगुवाच ॥ ॥
यद्वस्तु नवरत्नानि धनं मे भक्तिसात्कृतम् ॥ मामेषो वांछितं ते यद्ददामि भगवन्निति ॥ १४ ॥ ॥ विप्र उवाच ॥ ॥
धनादि पुन मे वांछा शिवेच्छाया प्रियोस्म्यहम् ॥ त्वत्प्रिया वांछया प्राप्तं विद्धि सिद्धं वणिग्वर ॥ १५ ॥ तां ददातु भ

8

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रेराधसि॥ व्यालोकि वृषभारूढो मृडस्तत्र सहोमया॥ ४४॥ दंपती तौ सरस्तोये निमज्जंतौ युवाकृती॥ देवप्रसूनवृष्ट्याक्तौ निमग्नांगौ बभूवतुः॥ ४५॥ तुष्टुवाते तदा शंभुं कुलालौ तौ च दंपती॥ कुलाल उवाच॥ ॥ नमोस्तु ते देव दयानिधे हर प्रपन्नपाला व्ययसोममौले॥ व्यालोल व्यालमल हस्त शूलमां पाहि सर्वेश्वर कालकाल॥ ४६॥ शिवस्तुतस्तिल्लवनाक्षिजें द्रैः जाया पती तौ प्रणतौ स्तुवन्तौ॥ संप्राप्य भोगानिहया तमंते मदीयधामेति तदा तिरोभूत॥ ४७॥ स नीलकंठस्तरुणी समेतो भोगान् भुजंझे तरुणेंदुमौलेः॥ निधाय पूजां व्रतवैभवेन क्रमाद्ययासीद्रजताद्रिशृंगम्॥ ४८॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे नीलकंठचरिते षड्विंशोऽध्यायः॥ २६॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्रीसदाशिवाय नमः॥ ॥ श्रीस्कंद उवाच॥ ॥ स्वभावरिपुसंज्ञस्य कथयामि कथां शुभाम्॥ मेरुमुद्रित शार्दूल लालिनेन जगज्जिताम्॥ १॥ नृपेण भंगचोलेंद्रनाम्ना कान्वयजन्मना॥ कावेरी वारि भारिते पालिते चोलमंडले॥ २॥ कुबेरपुष्पपुरीव स्ति देवपुरी सम ॥ तस्यामासीद्वैश्यवर्यः स्वभावरिपुसंज्ञकः॥ ३॥ प्रथमः शिवभक्तानां श्री

शिवर०९ द्विजउवाच॥ ॥अहं यास्यामि ते रात्रौ कौरव्या वो महात्मभिः॥ इत्युक्त्वा स हतेन्त्रेत्रो याहि तिष्ठेव सदा०न०
५६ नं द्विजान्॥३४॥ मद्दत्ता पात्रिका नेया दानेन महिलया सह॥ न निमज्जयती वेशौ व्याहरं द्विजसंनिधौ॥३५॥ अ०रुद्र
ब्रूहीति तैर्द्विजैरुक्तो स कुलालवरोऽब्रवीत्॥ ॥कुलाल उवाच॥ ॥एतद्दत्तं मया गुरुं पात्रं नैव
प्रदृश्यते॥ तदाकर्ण्य द्विजः प्राह यद्येवं भार्यया सह॥३६॥ निमज्य त्वं जले तेन यथोक्तं नीतिरीदृ-
शी॥ तदाकर्ण्य कुलालाग्र्यो यद्येवं क्रियते मया॥३७॥ प्रतिवाद्यनुमत्येति भणित्वा भवनं ययौ॥भ
550 वनं प्राप्य गेहिन्या देहिन्येवनवक्षिपा॥३८॥ सहागत्य सभामेवं कारवाचमेवाचतम्॥ उभयोरंतरे का
ममावाभ्यां दंडमज्जने॥३९॥ पाणिभ्यां दंडमालभ्य निमज्जत इतीरयन्॥ तथा निमंतुमुद्योगमतानी
द्वापिका जले॥४०॥ तं तथाविधमालोक्य द्विजा एवमवादिषुः॥ ॥द्विजा ऊचुः॥ ॥नैवं नि
मज्जनं कार्य्यं प्रत्यर्थैनानुमन्यते॥ करेण करमालंब्य तया सह निमज्जताम्॥४१॥ इत्युक्तो नीलकंठ
सो व्याघ्रपादेशसन्निधौ॥ प्रकाश्य संविधं पूपं निममज्ज तयैव सः॥४२॥ उन्मज्य नूस तपा साधि द
दृशे सह तै द्विजैः॥ तरुणाकृतिरुत्थाय वार्धकं तरुणी वसा॥४३॥ नादृश्यत तदान्याज ब्राह्मणस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतप्रणामं तं प्राह कोपप्रस्फुरिताधरः ॥ ॥ शिवयोग्युवाच ॥ ॥ चोरं कियो त्वं किन्नाम मत्पा
त्रं तद्दस्व मे ॥ अपि रत्नस्वर्णमयमन्यन्नादातुमुत्सहे ॥ २४ ॥ इत्युक्तः सोऽब्रवीद्भूयः प्रमादो मे महान् भूत् ॥
किं तेऽत्र पात्रं स्थाप्यन्यद्दास्यामीत्यवदन्स्थितः ॥ २५ ॥ न्यायवस्तु तिगुह्यं त्वं भक्तिमुद्भाव्य नुद्धवत् ॥ किं
चिन्न लज्जसे वाचानया ह्यद्य पदात्पदम् ॥ २६ ॥ लोकः पश्यतु रुध्वा त्वा मनादाय च पात्रिकाम् ॥ नयामी
त्युद्धृतालापं कुलालः प्राह तं द्विजम् ॥ २७ ॥ पात्रं नवं चितं भग्नं चोरितं नास्त्यल्पकं मयि ॥ किं वात्र कु
र्यामीत्युक्तो देवस्तं पुनरब्रवीत् ॥ २८ ॥ ॥ शिवयोग्युवाच ॥ ॥ यद्येवं तनयं हस्ते गृहीत्वा दीर्घिकां
भसि ॥ निमज्ज त्वं विशुद्धात्मा पुनर्याहि गृहान्निति ॥ २९ ॥ तच्छ्रुत्वा नीलकंठोऽपि तमाह कपटद्विज
म् ॥ किं कर्तव्यं सुतो नैव मम मास्तीति भयाकुलः ॥ ३० ॥ यद्येवं महिलां हस्ते गृहीत्वा वापिकाजले ॥ निम-
ज्जोन्मज्य गच्छेति व्याजविप्रो बभाषतम् ॥ ३१ ॥ इत्युक्तः शंकरेणासौ शंकरेणानया सह ॥ निमज्जनं ममा
युक्तमहमेकः पुरस्तव ॥ ३२ ॥ दीर्घिकां सकलां मत्वा द्रागुन्मनिमज्जताम् ॥ इत्यवादीत्कुलालाग्र्योऽभा
वना ब्राह्मणस्तदा ॥ ३३ ॥ यद्येवं चोरितं नैव दत्से सिस्त्री करं करे ॥ कवे चासि न वा मंतुं याहीति त्वं द्विजान् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिव र०९ हमे पात्रमिदमादायरक्ष्यताम ॥१२॥ अस्त्यस्यनसमंपात्रं पुनात्यंतरतर्पितम् ॥ रलाघादपिरक्ष्यंस्याद्धु सदा.न. ५५
योमेरक्ष्यतामिति ॥ १३॥ ततः श्रीनीलकंठस्तु पात्रमादायतत्क्षणात् ॥ गृहेतन्न्यस्यतद्रक्षां कृत्वा अ०२६
भूतेस्तमानसः ॥ १४॥ तं यांतमनुसृत्यासौ निवृत्तो भूत्तदाज्ञया ॥ देवदेवोऽपि दिव्यां तां प्राविशत्कांचनीं
सभाम् ॥ १५॥ गतेकाले शिवः पात्रंयापयित्वास्वमायया ॥ भृत्यायपुनरादिसुत्तमागात्पूर्ववेषवान् ॥ १६॥
तमागतंप्रणम्यासौ कुलालकुलसंभवः ॥ आगतं तवमद्भाग्यादित्यास्तांतन्मुखेक्षणः ॥ १७॥ ॥ ॥
॥ शिव उवाच ॥ ॥ पात्रं पुरात्वयिन्यस्तं सद्यस्मात्प्रदायमे ॥ तिष्ठित्युवाचतं शर्वः सर्वदानाधिपः शिवः ॥ ५३९
॥ १८॥ तच्छ्रुत्वानीलकंठोऽपि प्रविश्यांतर्गृहं क्वचित् ॥ मुहुरन्विष्यतत्पात्रमदृष्ट्वादुःखमाश्रितः ॥ १९॥
अंतस्थोऽसि ननिर्यासि कोविलंब इतीरितः ॥ सतदा निर्गतो मंदं वचः प्राह विषादवान् ॥ २०॥ ॥ सूत उवा
च ॥ ॥ जयजूयेरुशोभांकमस्तकं भूतिभूषितम् ॥ रुद्राक्षस्त्रगिभिराकीर्णं त्रिपुंड्रावलिभूषितम् ॥
॥ २१॥ सकुलालः कुलालेशं प्रणम्यविनयान्नतः ॥ प्रांजलिर्विनयेनाह नीलकंठस्तदा शिवम् ॥ २२॥ ॥
कुलाल उवाच ॥ ॥ तन्नपश्यामि ते पात्रं ददाम्यन्यच्चतन्निभम् ॥ मन्नापकोऽपराधोमेभवताक्षम्यतामिति ॥
॥ २३॥

५६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिनायनमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ तयासनीलकंठो
ऽसौनीलकंठपदाश्रयः ॥ तदापरिमलो ऽन्नासैः सार्धं वारस्त्रियारतिम् ॥ १ ॥ अन्वभुंक्तेति चेदि ... नीलकंठा
प्यर्यश्रुतः ॥ तदाचंद्रमुखीरात्रौ वारस्त्रीकृतसंगतिम् ॥ २ ॥ पतिं दृष्ट्वा तु तल्पेन स्पर्शे स्नेहेनखंडिता ॥ भवतः
श्रीनीलकंठः प्रमाणं चेदिमास्पृश ॥ ३ ॥ इत्याहसारुषानाथं तमालिंगनलालसम् ॥ इत्युक्तः श्रीनीलकंठो
रुषाविष्ट उवाचताम् ॥ ४ ॥ ॥ नीलकंठ उवाच ॥ ॥ मनसा त्वां स्त्रियश्चान्यान स्पृश्याम्यद्य चेत
सा ॥ विनायोन्यांगसंस्पर्शमिनंगोद्वेगवर्जिताम् ॥ ५ ॥ सापि चक्रे व्रतं भर्तुः इष्टं तन्वी वितन्वती ॥ गार्हस्थ्यधर्म
साचक्रे परेरज्ञातसंगरा ॥ ६ ॥ तावेवं दंपतीतादृगसिधाराव्रतस्थितौ ॥ निन्यतुः किलतारुण्यं शिवकारुण्य
भाजनौ ॥ ७ ॥ प्रवृद्धशिवभक्तौ तौ वृद्धौ शिथिलविग्रहौ ॥ चक्रतुः शिवकैंकर्यं तथापि तरुणाविव ॥ ८ ॥ तत
स्तयोर्मतं ज्ञातुं शिवस्तापसवेषभृत् ॥ दीर्घपिंगजटाधारी कौपीनैकं उवस्त्रधृक् ॥ ९ ॥ यज्ञसूत्राल्लसद्भस्मभ
स्मांग श्रीत्रिपुंड्रकः ॥ स्मेराननः पात्रपाणिः नीलकंठालयं ययौ ॥ १० ॥ श्रीनीलकंठः तं दृष्ट्वा हृष्टांगः शिव
योगिनम् ॥ शिवयोगी महानेष इत्यपूजयदादृतः ॥ ११ ॥ नाथ किंकरवाणीति भक्त्यातं नेरितः शिवः ॥ तमेनमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ ९ सेवित्वा तां डवेशान व्याघ्रपादेश्वरं तथा ॥ प्रत्यागतनन् पयःपूर कंठदघ्नेन वर्त्मना ॥ ३७ ॥ आसारवातसदा॰न॰
५४ पातेन वेपमानकलेवरः ॥ झल्लझल्लितकेशाग्रः प्रार्थसार्द्रतरांबरः ॥ ३८ ॥ स नीलकंठकस्याश्रि दृश्यापाया अ॰२५
वेदिकां ययौ ॥ नीलकंठपदोच्चारान्नीलकंठमुपागतम् ॥ ३९ ॥ बुध्वा सो द्दीपिकाहस्ता झटित्यागत्य तावतः ॥
तं कथंचिदुपच्छंदं सा नीत्वा भवनांतरम् ॥ ४० ॥ संमृज्यां गंदुकूलेन हसन्तीमपि पत्ततः ॥ झटित्यंबरमास्त्रीयित
त्र तूलपर्टी पुनः ॥ ४१ ॥ प्रसार्य हेमपर्यंके मणिशृंखलकांचिते ॥ स्नापयित्वा मरुद्दृष्टिनाथमुद्धूपसाऽऽमा-
त् ॥ ४२ ॥ चंदनागरुकस्तूरीमिलन्मृगमदादिभिः ॥ विलिप्यांगं कृताहारं तिल्लेशाय पतिस्मृतम् ॥ ४३ ॥ ततो
560 महेश्वरप्रीत्यातरं तु वांछतिस्म सः ॥ दुर्वीरत्वाद्धृतीशस्य तस्यां दाक्षिण्यतोऽपि सः ॥ ४४ ॥ तरुणस्तद्धृतिंप्रा
प्तुमनुमेनेति कौतुकी ॥ तस्याविध्यानुसारेण कंचित्कालं मनोभुवः ॥ ४५ ॥ साम्राज्यमनुभूयासौ निजा
लयमुपाविशत् ॥ तत्रालोक्य निजां कांतां शंबराराति शंबरीम् ॥ ४६ ॥ पुनरुद्दीपितानंगस्तांस्तुमुपचक्र
मे ॥ साम्राज्यमात्रेषु परिरचचीमद्धादलेशाचलतोरतं कान् ॥ संप्रीणयं चाटुपरं पराभिस्तदीयशय्यां
शनकैः प्रपेदे ॥ ४७ ॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे पंचविंशोऽध्यायः ॥ २५ ॥ ॥ ६ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अजरापालचंद्रेण अपाल्लां तस्य चक्षुषः ॥ अवामानामभागेन वपुषा शंभुमूर्तयः ॥२५॥ ॥श्रीस्कंद उ-
वाच ॥ ॥ अथ तिल्लवनावासी त्रिसहस्रमहीसुरान् ॥ नत्वा श्रीनीलकंठस्य कथां वक्ष्यामि पावनीम् ॥
॥२६॥ निर्माल्यपुष्पनिर्मुक्तमाध्वीतुंदिलषट्पदः ॥ आसीत्तिल्लवने कश्चित्कुलालकुलशेखरः ॥२७॥
भक्ताग्रगण्य श्रीकंठ पूजामृत्पात्रिकाकरः ॥ माहेश्वरजनाभीष्ट भिक्षापात्रप्रदायकः ॥२८॥ सदा शंभु
पदासक्तमानसः शिवकर्मसु ॥ निष्णातधीनिराचार कैंकर्यांछादनोद्भवः ॥ २९ ॥ वीक्ष्य वीक्ष्या विभोः
क्ष्वेलं नीलकंठसमाकुलः ॥ नीलकंठपदोच्चारी नीलकंठ इतीरितः ॥३०॥ स जन्मनः प्रभृत्येव त्यक्त्वा
न्यद्देवतांतरम् ॥३०॥ सेवमानो महादेवं वयः कौमारमत्यगात् ॥३१॥ पंचबाणभुजाटोप परिपाटी पटीयसा ॥
प्रसीयसा महोल्लासैः पस्पृशे वयसा तत: ॥३२॥ तस्यासीद्वल्लना नूनं केलि कल्पनशिल्पिना ॥ शृंगाररस
सर्वस्व वेधसावयतां चिता ॥ ३३॥ पाति वृत्या दरूंधत्या महात्म्यमनुरूंधती ॥ कंदर्प वैजयंती सा तस्य सा
रसमावहत् ॥३४॥ स व्याघ्रपादलिंगस्य कुर्वाणो दर्शनं क्रती ॥ भिदंबरपतेर्नाट्यं वीक्ष्यमाणोतिकौतु
की ॥ ३५॥ स कदाचन शर्वर्यामंधकारातिदंतुरे ॥ धारालीं मेघघोषासु तथा दिक्षु विदिक्षु च ॥ ३६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर० तेश्वेतछत्रस्थगितदिक्तटाः ॥ त्रिसहस्रद्वादशाहपौंडरीकविधायिनः ॥ १३ ॥ यैरध्वरे समाहूतपुरहूतचिरंशा सदा·न·
५२ ची ॥ श्वासैरुषमयांचक्रे मरुद्यानमारुतान् ॥ १४ ॥ ते सत्रिणः सदा शंभोरर्चकाः कर्मकर्मठाः ॥ तीव्रशक्तिनिपातेन शि अ०२५
वानुग्रहगोचराः ॥ १५ ॥ समयेन विशेषणदीक्षाभेदेन संस्कृताः ॥ निर्वाणदीक्षानिष्णाताः कृतत्वयोभिषेचनाः ॥ १६ ॥
क्रियातत्वविदध्वयोप्रवर्तनपरायणाः ॥ त्रिप्रमाणपरिप्राप्त त्रिपदार्थनिवेचनाः ॥ १७ ॥ सशिष्यज्ञानषट्त्रिंशत्तत
बुद्धाध्वभूतयाः ॥ दीक्षाछिन्नमलापोटादीक्षयंतो नतानपि ॥ १८ ॥ नित्यानित्यविवेकाढ्यसर्वत्रविगतस्पृहाः ॥
शांतिदांति महादीक्षा उपरत्या समाधिनाः ॥ १९ ॥ विश्वासेन समायुक्ता मुमुक्षोल्लासिमानसाः ॥ अधीतब्रह्ममीमां
58| सा शिवध्यानैकतत्पराः ॥ २० ॥ चिदंबरनटेशानपूजोत्सवविधायिनः ॥ पशुपतः सर्वदा शंभोः परमानंदतांडवम् ॥ २१ ॥
सदा प्राप्तसमस्तार्थी द्विजाः स्वात्मनि संस्थिताः ॥ ते वर्णनीया कथमसमदाद्यैः मनुष्यकोटैर्महितानुभावैः ॥ २२ ॥
पेशौम्यभक्तिस्तुतिसाध्यकेनंदेवेश्वरस्यैमुखेन संस्तुताः ॥ २२ ॥ रुद्राक्षमालाभरणाविभूत्या शश्वत्समुद्धूलित
सर्वगात्राः ॥ वर्ण्याकथं ते शतरुद्रमंत्रपरायणैकप्रवणा महांतः ॥ २३ ॥ क्रियासुचर्यासुपचेलिमप्रभ्रमाः
प्रबोध्यमार्गे पटवोतियोगिनः ॥ कृताः त्रिसाहस्रमखाः सभापतेः जयन्तिभक्ताः त्रिसहस्रभूसुराः ॥ २४ ॥ ॥ ॥ स

3

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सतः ॥ शृणुत्वं श्रवणानंदं शिवभक्तमहोत्सवम् ॥१॥ अस्ति चोलमहीकान्तां कपूरतिलकायितम् ॥ पुंडरीकपुरं
नाम पुरं पुरभिदो महत् ॥२॥ हृत्पुंडरीककमलं विरजं पुरुषस्य यत् ॥ दहरोपासनादक्षं येयं तेजः करं वितम् ॥३॥ मल्लि
वल्लीमतल्लीभिर्वेल्लिताऽपांतकानने ॥ यस्मिन्नातनुतं नाट्यं क्रीडानटशिखामणिः ॥४॥ दर्शं दर्शं तदा शंभोः प
रमानन्दताण्डवम् ॥ आसाते यत्र शृण्वंतौ व्याघ्रपादपतंजली ॥५॥ श्रीमद्धेमसभामध्ये नृत्यंतं चंद्रशेखरम् ॥ वे
दपादान्वितैस्तोत्रैः यत्र तुष्टाव जैमिनिः ॥६॥ यत्रास्ते जगदाधारनटस्य सविधं हरः ॥ श्रीमूलस्थानलिंगात्मा भ
वपाशविमोचकः ॥७॥ त्रिकूटस्य गिरेः शृंगे क्वचिद्धेमसभा क्वचित् ॥ तत्र ब्रह्मा तपः क्वापि श्रीमूलस्थाननायकः
॥८॥ यत्र वा कुलिदेवेंद्र चंद्रैर्बद्धुं पुरादृतम् ॥ अशून्यशयनं-वक्रे रक्षितः शेषशायिना ॥९॥ शिवगंगातटे यत्र
शिवकामादिसुंदरी ॥ त्रैलोक्यरक्षां कुरुते करुणोर्मितरंगिते ॥१०॥ कृपापांगेन तद्दृष्ट्वा अनंगो जीवचारुणा
संतति ल्लवेन तत्र समु ल्लसित-चूलिकाः हिरण्यवर्णा नीता भूसुरा भासुरा पुरा ॥ समधीत चतुर्वेदाः षडंगाऽ
ध्यायनोत्सुकाः ॥ अब्दाब्द ज्ञानकुशलमो चापे शलवाक्कुलाः ॥ पुराण ज्ञानभूतार्थी धर्मशास्त्रप्रवर्तकाः
प्रातः स्नानकृतोद्वाहा विधिनाहितवह्नयः ॥ पाकयज्ञहविर्यज्ञसोमसंस्थाधुरंधराः ॥१२॥ वाजिपेययाजि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर-९ न्यूनतादोषरहितामध्यानविलसत्सुखा:॥ व्रजतां चरणं ज्ञानं मया दत्तंस्तुतिक्षमम्॥८५॥ परंप सदा-न.
५२ रात्वं भक्तानां शुद्धाभिस्तुहि सूक्तिभि:॥ इत्युक्त: सुंदरस्तेन पुन: प्राह महेश्वरम्॥८६॥ आरभ्यस्तो अ-२४
मि किं नामप्रकारेण तु केन वा॥ को हमिलुदितो देव: प्राहैनं पंचभिर्मुखै:॥८७॥ श्रीमत्तिल्लिपु
रीभूष्णु द्विज किंकर किंकर:॥ अस्मीत्यारभ्य नि:सीममाहात्म्यंस्तुतिमत्परान्॥८८॥ इत्याज्ञां दे
व देवस्य सुंदर: शिरसा वहन्॥ तद्भक्तान् दूरतो दृष्ट्वा प्रणनाम प्रहृष्टधी:॥८९॥ त्वद्भृत्य भृत्यभृत्य
४६२ त्योस्मीत्यस्तावीत्तान् पृथक् पृथक्॥ अस्मत्संघातरंगस्य इत्याहस्तोस्तु शाश्वते॥९०॥ इति स्तुतौ स्तु
त एव सुंदर: पुरपुरारे: कमलालयाह्वये॥ ~~कमल्य~~
प्रणम्य गायन्ननिशं स भक्तिमान्निवासत्सा गणिका सखा सुखी॥ नैवाविमुक्तं समवाप्य चान्ते त्र्यं:
भो पदाब्जे सविलीन एव॥९१॥ तया सहायं गणिका सखा सुखी स सुंदरं नैव निजं कलेवरम्॥९२॥
इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे चतुर्विंशोऽध्याय:॥२४॥ श्रीकाशीविश्वेश्वरार्पणम
मस्तु॥ ॥श्रीसदाशिवाय नम:॥ ॥श्रीस्कंद उवाच॥ ॥पुनरन्यच्चरित्रं ते कथयिष्ये सम।

जयेतिपुरतःशश्वत्पूजाद्विरुतकाहलः ॥७३॥ कांत्यानेत्रोत्सवंकुर्वन्सुंदरीणांससुंदरः ॥ परितः
सवितो विप्रः शंभोःश्रीगोपुरं ययौ ॥७४॥ तं नत्वामाविशद्भक्तः प्राप्यदेवश्रीयस्थितान ॥ नत्वानन्य
समान् भक्तान्क्वदेषां किंकरोस्म्यहम् ॥७५॥ स्याद्भृत्यभृत्यइत्येत्य द्वारंगर्भगृहस्यसः ॥ सुरार्चितं
समभ्यर्च्य शंभोरभ्यंतरंययौ ॥७६॥ पूर्वदृष्ट्वाइतिदृष्ट्वा सात्मेशं चंद्रशेखरम् ॥ सानंद बाष्परोमां
चः प्राणंसीत्पादयोः प्रभोः ७७॥ नत्वा च निहितात्मा चसौ भ्योस्तुवतत्पदे ॥ यद्देवतावृतं तस्मै
पादाब्जाय नमोऽस्तुते ॥ ७८॥ यत्तांडवोत्सवं तेन महाहेमसभांतरे ॥ तस्मै कालस्यसंहर्त्रे पादप
द्मायते नमः ॥७९॥ देव्यासंवाह्यमानं यत्पुण्यं च हृदि योगिनां ॥ अंतर्ज्योतिर्ज्योतिषां च पादप
द्मायते नमः ॥८०॥ यद्वीक्षितमाधीन हं सेनापि च पवित्रिणा ॥ नमस्ते पाद पद्माय श्रुतिमातंग
शीर्षिग ॥८१॥ नाथपादापराधानां पामे मोहत्तमोपह ॥ नमस्ते पाद पद्माय नावे संसारवारिधेः
॥८२॥ इतितं नस्तुतः प्रीतस्तस्य ज्ञात्वा मनोगतम् ॥ तद्दातुकामः सौम्येशं प्राह तं पार्वतीपतिः ॥८३॥
ददाम्यभिमतं ते मद्भृत्यानां ब्रज भृत्यताम् ॥ ते ध्यात्वा सद्दशात्मानो लब्ध्वामामपि निर्मनाः ॥८४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 यामासुर्मौहूर्तिकवरोदितम् ॥६१॥ तस्याः सागरिकायाश्च सुंदरेशस्य तस्य च ॥ विवाहं कारयामासुः सदा न-
 विभवेन महीयसा ॥६२॥ कृतोद्वाहो यथाकामं सुंदरेशस्तया सह ॥ रत्यकामइवानेकान् विषयानल- 
भूत्तदा ॥६३॥ शिवंस्तुवंसदाचिंताधृततत्पादपंकजः ॥ सौम्यः सागरिकोपेतो विजहार विलासवा
न् ॥६४॥ कदाचिद्देवदेवेशं सर्वदेवनमस्कृतम् ॥ नमः कर्तुमनश्चक्रे स भक्तैः सह सुंदरः ॥६५॥ परि
धाय नवं वासो माननीयः सुरैरपि ॥ चर्चितः कुंकुमरसैः अतः कल्हारचूलिकः ॥६६॥ करे वहन्हेम
वेत्रं फालोत्कीर्णत्रिपुंड्रकम् ॥ चंचत्कांचनताटंको वक्षश्श्लक्ष्णगुणत्रयः ॥६७॥ आप्तैः परिवृतो
भक्तैः कमलालयशंकरम् ॥ सर्वतोमुखमाहात्म्ये निरीयाय निकेतनात् ॥६८॥ गौरीं बलवद्दासो भू
सुराणां पुरःसरः ॥ इति सागरिकानाथं प्रशासन्प्रणतंजनः ॥६९॥ वीथ्यां स्थित्वा मुहुः शृण्वन् जनको
लाहलं परम् ॥ कपिकुक्कुटमेषादिरणकर्म विलोकयन् ॥७०॥ वृतः कादाचितांबूलछत्रचामर-
चादिभिः ॥ हयमुख्येन चायात स्वर्णपर्यंकचारुणा ॥७१॥ कविराजकलानाथाः शिवश्रीपादशे
खरः ॥ आदिदशिकशैवानां शैवागमधुरंधरः ॥७२॥ श्रीमज्जंबुपराकल्पकमलालयशंकर॥

पिस्मरार्त्तापर्यतप्यत ॥४९॥ हिमांबुचंदनरसैः प्रेरितैस्तु सखीजनैः ॥ तस्या स्मराग्निज्वालायाः प्राज्यै
राज्यायितं तदा ॥५०॥ तस्यां हिमांबुसिक्तानि कुसुमानि सखीजनः ॥ अवाकिरं चान्वभूवन्मनोभववि
षाशुगाः ॥५१॥ उत्थाय सा मयूरीव श्लथत्केशकलापिनि ॥ मुखं नमय्य बिंबोष्टं वचो निर्लक्षिमब्रवी-
त् ॥५२॥ किमिदं मम त्रीतांशुः सख्यः कल्पानलायते ॥ मंदानिलांकुरस्तस्य सहायो भवति स्वयम् ॥
॥५३॥ नवेत्ति मामेव विधां चन्द्रशेखरकिंकरः ॥ किं करोमि दयां नाथे न करोति दयानिधिः ॥५४॥ इति ब्रु
वाणा तांत्य क्त्वा शयनान्मुहुरुत्थिता ॥ पतंती निश्वसंती च का मार्त्ते सो दुमस्समा ॥५५॥ त्रियामा सा
तयोरेवं सा भवद्विरहार्त्तयोः ॥ तस्याः सागरिकायाश्च सुंदरास्य तस्य च ॥५६॥ तयोस्तु चरमे यामे
क्षणसंजात निद्रयोः ॥ स्वप्ने प्राह शिवोऽ प्यस्तु विवाहो युवयोरिति ॥५७॥ सेयं सागरिका कन्या
मद्भक्ता यम हात्मने ॥ सुंदरे शाय देयेति स्वप्ने पौराञ्जागाद ॥५८॥ तरुणेंदुधर स्वप्न करुणा रव्यात रणो
दयात ॥ विरामतयोरा षद्विरह प्रभवं तमः ॥५९॥ पूर्वं निद्रां तमो व्यपेशा विनाशं लोक नारः ॥ तं द्रष्टु
मिव निर्विघ्नमुदियाय दिवाकरः ॥६०॥ ततः प्रभाते पौरास्तो शात्वा स्वप्नं शिवोदितम् ॥ मूहूर्तं कल्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ त्रः प्रियां सागरिकामिव ॥ गंतुमैच्छत्तदारागी भानुः पश्चिमदिग्वधूम् ॥ ३७ ॥ गते त्वानइवालोके भास्करस्य नभोऽसदा न.
५० भवत् ॥ सागरं च तमोयुक्तं सुंदरस्य मनो यथा ॥ ३८ ॥ स्त्रियं निरीक्ष्य विकृतः शिवभक्तोऽप्यसाविति ॥ हा अ०२४
स श्रीरिव वृपामिन्यां चंद्रिकां ददृशे तदा ॥ ३९ ॥ मत्तुच्चित्तनिर्गतं ज्ञात्वा देवं प्रायोमनोभवः ॥ बाधते मां शशां
कोऽपि तन्मौलिस्थोऽन्नलायते ॥ ४० ॥ वासंतिकं पुष्परजः किममुमूरचूर्णवत् ॥ मन्मथं ज्वलयत्युच्चैः अनः
लं मलयानिलः ॥ ४१ ॥ एवं स्मरातुरः सोऽभूत् सुंदरः शोऽपि मंदधीः ॥ मृग्धा सागरिकायास्तु स्मरार्त्तिः केन वर्ण्य
ते ॥ ४२ ॥ सा च सुंदरसौंदर्यदर्शनोत्थस्मरांकुरा ॥ अविष्टेव गृहं प्राप मंदमंदपदक्रमा ॥ ४३ ॥ सखीजनेना
SB9— पि समं सल्लापमपि तन्वती ॥ सौधोत्सेधं समारोहत् व्यामोहविवशाशया ॥ ४४ ॥ तारमुक्तायुक्तज्योत्स्नास्व
च्छांबरवितानके ॥ तन्वी पुष्पमये तल्पे निषसाद निवृत्तवत् ॥ ४५ ॥ ततोंतिकस्थितां कांचिच्चेटिकामब्रवीदि
चः ॥ नितरां तयि निश्वासा ग्लपिताधरपल्लवा ॥ ४६ ॥ निषेवितुं नीलकंठं मया यान्त्या निरीक्षितः ॥ कुमा
रः कोटिमाराभः किं त्वया विदितः पुरा ॥ ४७ ॥ तयैव मुक्ता साप्राह स नाम्ना सुंदरः किल ॥ शंकरस्य स
खा तेन बलिवत् किंकरीकृतः ॥ ४८ ॥ इत्युक्त्वा सा च तं स्मृत्वा गुणप्रेम्णाति विह्वला ॥ कृतसीतोपचारा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रवा शंभोः रसातिशयवानभूत् ॥२४॥ सा च सागरिका दृष्ट्वा कांतं सुंदरनायकम् ॥ तस्मिं द्य्यपि महापूरम
ग्न दृष्टिरभूत्तदा ॥२५॥ कोऽयं कुमारो मार: किं सौंदर्यामृतसागरः ॥ किमु विद्याधरः शंभुकरुणारस वर्धि
तः ॥२६॥ कोऽयं हंत ममाप्येवं मानसाकर्षणोन्मुखः ॥ इति चिंताकुला तत्र श्रीवल्मीकपतिं ययौ ॥२७॥ तां
यांतीं सुंदरं दृष्ट्वा प्राह रथ्याचरांजनान् ॥ कान्वियं कांतिसीमा भूरिति प्राहुरिमे जनाः ॥२८॥ सेयं सागरिका
ख्येऽयमिति संचिंत्य सुंदरः ॥ वल्मीकरंध्रे देवेशं वंदितुं शिवमाययौ ॥२९॥ सा च सागरिका देवं नत्वा व-
ल्मीकनायकम् ॥ कृत्वा प्रदक्षिणं भूयो द्वारेणैकेन निर्ययौ ॥३०॥ गत्वा सोऽपि हरं स्तुत्वा प्रिया सागरिका
स्तु मा इति संचित्य देवेशमभ्यवंदत सुंदरः ॥३१॥ तथापि वंद्यस्तु त्वा च कमलालयशंकराम् ॥ निर्ययौ म-
न्मथा विभ्रान्ता तां सागरिकां शुभाम् ॥३२॥ मत्प्राणराजहंसी सा क्व याता मनसः प्रिया ॥ इति तां सस्मि
तमुखीं कांतां मृगयते स्मरः ॥३३॥ मृगीवोन्मीलनयनेन स्मित्वा वक्तुमिवोन्मुखी ॥ पुनः केन पथा याता
पुण्यनाथस्य मे दया ॥३४॥ तेजोमयमवाप्यैवं मोहयित्वा स्थिरं मनः ॥ पुनः केन पथा याता पुण्यनाथस्य मे दया ॥
॥३५॥ इति काममपारीणः सोऽदुं सुंदरनायकः ॥ तामन्वेष्टुं तदोत्सुक्याद्देवाश्रयमुपागमत् ॥३६॥ तस्मिन्क्षणे सुन्दरे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०९ तासुच बालिका ॥ अगायदात्मस्वामिन्या गोष्ठीगीतिस्तवावलीम् ॥१३॥ गायंत्या मधुरं तस्यां वीसदा न.
४९ णाभूत्परिवादिनी ॥ शुकानां कोकिलानां च शरणावरुणालया ॥१४॥ वाचिवक्रे चिनातस्याः चं अ०२४
चलत्वदशाभवत् ॥ तालाकारः समुन्मेषः कांतिसार उरस्यभूत् ॥१५॥ स कदा वंदितुं नाथं वल्मी
कानिलयं शिवम् ॥ समुत्सुका सागरिका स्वनिवेशाद्विनिर्ययौ ॥१६॥ सम रूपवयोभिः सा सखि
भिर्निर्गता बभौ ॥ आज्ञा शक्तिच मूयुक्ता देहबंधेव मान्मथी ॥१७॥ यदा सा गौरिका प्राप देवश्री मंदिरां
तिकम् ॥ तदा सुंदरनाथोऽपि तं देवं वंदितुं ययौ ॥१८॥ तस्मिन्नेव समुद्देशे तरुणीनां शिखामणिः ॥
565 सुजातहसितज्योत्स्नां चारुसंध्यारुणाधराम् ॥१९॥ भ्रूवल्लीविभ्रमाकृष्टवीरकंदर्पकार्मुका
म् ॥ विषमायुधमौर्वीत्रास्त्रवीरायतविलोचनाम् ॥२०॥ अचकंभविनिर्धूतिमरकुंजरमस्तकाम् ॥
प्रागजन्मभाग्ययोगेन तां ददर्श तलोदरीम् ॥२१॥ मनोभवेंद्रजालास्त्रमायामयूरपिंछिकाम् ॥ तां दृष्ट्
वा तनुरूपांगीं तस्याभूत्तरलं मनः ॥२२॥ किं चाल्पभ्रूहस्पेपं प्रसूननवशारिका ॥ किं कामस्य म
हासंपत्पुण्यपण्यस्य किं फलम् ॥२३॥ किमद्भुतं किमात्मेशः शिवकारुण्यसारिणीम् ॥ नवेत्तीतिस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रवणेन पूतोऽस्मि ते ॥१॥ ॥स्कंद उवाच॥ ॥श्रुणु ते विप्रवर्याद्य वक्ष्यामि च विशेषतः ॥ क
मलिन्यास्तथोत्पत्तिं कमलालयमध्यमे ॥२॥ ततः पूर्वं पुरे तस्मिन्नाम्ना शृंगारनायिका ॥ विद्य
ते चंद्रगणिका सौंदर्य्यामृतसीमभूः ॥३॥ दिव्य वल्मीकरंध्रेशं सा सुता जननोत्सुका ॥ अर्चय-
च्छिव भक्तांश्च द्रव्यैस्तत्तन्मनोरमैः ॥४॥ कन्याश्च पूजयामास हरिद्र वसनादिभिः ॥ गौरीं च पद्द
वसनमालाकुंकुमभूषणैः ॥५॥ असकृत्पूजनात्तुष्टो ज्ञात तद्भाविनो शिवो ॥ वरं ददतुरेतस्यै दुहिता
तेभवत्विति ॥ ६॥ तदा कैलासनाथस्य देव्याः श्री परिचारिका ॥ नाम्ना कमलिनी या सा तस्याः कुक्षि
मवातरत् ॥७॥ तस्याश्च कारदुहितुर्नाम शृंगारनायिका ॥ कान्ति शृंगारवेलायास्तदा सा गौरिकेति च
॥ ८॥ मातुर्मूर्तिमिवानंदमेकलक्ष्यं प्रियादृशा ॥ पुपोष सा मा गौरिका सौंदर्यनिलयं वपुः ॥ ९॥ किमि
यं तरुणी मुग्धा किमियं तरुणं मधु ॥ प्रतिपच्चंद्रलेखा किमियमानंदकंदली ॥१०॥ कारणेनावती
र्णा किं कमला कमलालये ॥ इति वारविलासिन्यस्तां वीक्ष्य जगदुर्मिथः ॥ ११॥ पांसुपद्मादि कृतकपु
त्रिका कंतुकादिभिः ॥ निनाय सा तदा बाल्यं मूर्तेवा नामनोभुवः ॥१२॥ बाल्योचितासु लीलासु तासु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शि०र० १ रुद्राक्षयुक्तां गंहरं संगिहृदंतरम्॥ उवाचदेवीमातेनोक्यप्रहृष्टश्चाभ्युवाचतम्॥३०॥ महेश्वर उवाच॥ ॥ सदा०न०
४८ सुंदरागच्छभद्रं ते भक्त्या सुदर एव हि॥ मद्धस्यै त्वं नियुक्तोहि भक्तोसि त्वं ममाधुना॥३१॥ वस त्वं कमला अ०२३
वासे विमले मुक्तिदायिनि॥ देवतीर्थे निशं स्नाहि भस्मरुद्राक्षभूषणः॥३२॥ नस त्वं नियतं भक्त्या क्षेत्रेस्मि
न्सर्वकामदे॥ पश्य मां सततं भक्त्या नित्यं मुक्तो भविष्यसि॥३३॥ अविमुक्ते शरीरस्य न्मदंगे लयमेष्य
सि॥ या सा पूर्वं कमलिनी तरुणी मीलिते क्षणा॥३४॥ संजाता सा मदादेशात् वश्यवेश्याकुलांकुरा॥ तस्याः पा
णिग्रहं तेद्य कारयाम्यधुना गण॥३५॥ कल्याणकल्पितं तां च संपश्यामि दिने दिने॥ ममादेशं कुरु
५० ष्वेति तमुवाच महेश्वरः॥३६॥ ॥सूत उवाच॥ ॥इत्थं तु गाधिपस्य प्रियवचनमहो सुन्दरः सां
बांकोदग्धन्मौलिपदांबुजं सुरसद्दृष्ट्या विलोक्यादरात्॥ तस्मिन्वै कमलाविलासमदने देवं हि पश्यन्
सदा भक्त्या निर्भरमानसेन सुमहत्कालं स निन्ये द्विजः॥३७॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये
नवमांशे महेश्वरप्रसादो नाम त्रयोविंशोऽध्यायः॥२३॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥
श्रीसदाशिवायनमः॥ ॥ तस्योद्वाहः कथमभूत् सुंदरस्य गणाग्रणेः॥ तन्मे विस्तरतो ब्रूहि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तामहेश्वराः ॥ सप्त ते षामादिनोऽत्र स्थापितः कमलालये ॥ २२ ॥ नत्वा देवदेवेशं सोमं सोमार्धशेखरम् ॥ फु
ल्लकल्हारमालांकं शशांकद्युतिदेहकम् ॥ २३ ॥ प्राणंसीद्भक्तिपरमा तथास्तवीन्महेश्वरम् ॥ ॥ ॥
॥ सुंदर उवाच ॥ ॥ गंगातुंगतरंगसुमहामौलिं कुरंगांकधृक् मातंगत्वगलंकृतांगभुजगाभोगांगसंगप्रभो ॥
उत्संगस्थितदिव्यभस्मसुमिलद्दंधांगरागोल्लसत्त्यागाधीश मुदागजामुखकृपापांगं भजे शंकरम् ॥ २४ ॥ मातंगा
नंगभंगं मुररिपुहृदयानंदसंदोहकंदं कुंदेंदुद्युतिरंजितांगमसकृत्पश्यामि त्यागाधिपम् ॥ मद्धागधेयमगजा
र्धकृतांगसंगं सारंगरंजितकरं वरलिंगसंगम् ॥ मागस्करं तरं गरनीलकंठं त्यागाधिपं हृदि भजामि महा
घनाशम् ॥ २५ ॥ उत्फुल्लहल्लकलसत्कमनीयमालं ज्वालानलाक्षकरधारिततेजशूलम् ॥ उल्लासिताज्ज
हृदये तव पद्मपादमुल्लासतां हि भगवन् हर त्यागराज ॥ २६ ॥ रत्नप्रभापरिलसत्कुमुदोरुमालाजालोत्तमांग
कुसुमात्तसुगंधगंधम् ॥ उच्चच्छशांकधवलं गिरिजार्धगात्रं पश्ये त्रिनेत्रमधुना सुपवित्रगात्रम् ॥ २७ ॥
॥ स्कंद उवाच ॥ ॥ इत्थं त्यागाधिपं स्तुत्वा अगजानायकं तदा ॥ सानंदाश्रुलसद्दृक्को हृष्यद्रोमांचकं
चुकः ॥ २८ ॥ क्षितिं विष्टाम्न तस्तस्थौ निष्ठायुक्तेन चेतसा ॥ तस्मै प्रसन्नो भगवानिंदुचूडः स सुंदरम् ॥ २९ ॥ भस्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०१ राजूटाहिमौलिमणिभ्राजिद्गंगतरंगसंभवलसद्दक्त्रोरुसद्धत्त्वकं ॥ तत्रत्योरुसमीरलोलितमहा सद०न०
४७ गंधानुवंधोद्यत ॥ दिग्वक्त्राणि परागितानि हि विभो पापाभिहंतॄणि ते ॥ त्वं शंभुः कात्मलोकिः श्रुति अ०२३
गदितयत्राविल्मिनिर्विल्वपूज्यो वल्मीकोरुसुमध्यसंस्थितमहालिंगं त्व दद्राक्षिषम् ॥१४॥ भव
भूतपते भवोद्भवविभवं भावुकमेव ते नुभावम् ॥ भवसंतरणाय संभवे हरभर्गामल भीमभव्य पाहि ॥१५॥
भर्गानंगविलोपिलोचन विभो गंगावतंसोज्वल ज्वालाक्षातलजालकीलितपुरं संमीलितं ते
क्षणात् ॥ चूर्णीतो त्रिदशोरु घोरपटलो भूर्णिद्दशोतेविभो संपूर्णे पुनरेधते हरविभो पर्णायितेपा
५६७ हि माम् ॥ १६ ॥ इति संस्तुत्य देवेशं सोमस्कंदं महेश्वरम् ॥ रत्नसिंहासीनं वल्मीकेशस्य दक्षिणे ॥
॥१७॥ रत्नप्रभासुविलसत्पर्वेन्दुविजिताननम् ॥ सोमसूर्याग्निनयनं गंगाचंद्रकलाधरम् ॥ १८॥ व
रदाभयहस्तं च नागपाद विराजितम् ॥ त्यागराजमहादेवमगजाकान्तमीश्वरम् ॥ १९॥ मृगटंकधरं
सौम्यं विकटंसां बमीश्वरम् ॥ इन्द्राय विष्णुना दत्तं सोमस्कंद महेश्वरः ॥ २० ॥ इन्द्रेणापि पुरा
दत्तो मुचुकुंदाय भूभुजे ॥ मुराध्यक्षोरु माहात्म्ये तदाजेदिति जार्दने ॥ २१ ॥ तेनजित्रस्थेनैव समानी



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नतं पादाब्जोत्थमरंदसुंदरमहानंदांबुधीचिस्थितः ॥ मच्चित्ताख्यमिलिंदएवनितरां पातुं त्वाद्यादरा ॥
न्निंदन्नर्थचतुष्टयं कलयते पुण्येंदिरायाः पुरे ॥ ५ ॥ इति संस्तुत्य हृष्टात्मा सिद्ध्यष्टकगतिप्रदम् ॥ सिद्धेशं
सम्यगाराध्य प्रतुष्टाव स सुंदरः ॥ ६ ॥ ॥ सुंदर उवाच ॥ ॥ सिद्धेश सिद्धनिगमोत्तममौलिवाचां मो
चासदक्षवचसां त्वयि विद्धि भावम् ॥ मुग्धेंदु सिद्धसुललाम निजाक्षमोमं मामद्य पाहि भवसिद्धि
करो महेश ॥ ७ ॥ इति संस्तुत्य सिद्धेशमचलेशं ययौ तदा ॥ विनयावनतो भूत्वा प्रस्तावादिंदुभू
षणम् ॥ ८ ॥ ॥ सुंदर उवाच ॥ ॥ अचलाधिपराजकन्याकुचलोलांछितवक्षसा विशा
ल ॥ इभसंभवचर्मचेलकालानलदग्धस्मर पाहि माम् ॥ ९ ॥ अचलाधीशजाजानेनमाम्यपा
दांबुजं ते ॥ नत्वा साव चलाधीशं दृष्ट्वा तं हाटकेश्वरम् ॥ १० ॥ अभितुष्टाव हृष्टात्मा राजराजकला
धरं ॥ सुंदर उवाच अलिकट काइतपाद देवमौलिकोटिविलसद्गंगाजलोत्तरू पाहि ॥ नटनेननिमग्नभूतल
कटिचेलत्वकुंत हाटकेश पाहि ॥ ११ ॥ एवं स्तुत्वा हाटकेशं सुन्दरः प्रययौ ततः ॥ वल्मीकेशं ततो
नत्वा स्तुत्वैवं भक्तिभावतः ॥ १२ ॥ ॥ सुन्दर उवाच ॥ ॥ वल्मीकपीठकृतारूढमौलिसुज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर.१ भक्तिभावं त्वच्छासनं कलयतो मम किं हि भोगैः ॥४५॥ इत्युक्तं हरिवचनं निशम्य शंभुः तस्मै तामचिरात्तदा सदा.न.
४६ ददर्श मूर्त्तिं स्वां त्रिनयनो मिंदुचूडयुक्तां मंभोजसंस्थितोरुचारुबिंबाम् ॥ संप्रोचिवान् स्मररिपुः प्रणतं मुरारिं अ.२२
देव्याः कटाक्षवशतः तव जन्म भूयात् ॥४६॥ मारस्य ते तनुभवः कमला वशास्यात् नियाहि लोकमधुना
तव लोकगुप्त्यै ॥ असव्यपाणिस्थितलिंगमेशं मृदर्चयेन्मृद्गाति स पापजालम् ॥ पोगल्लवाद्यैर्विरचय्य भक्त्या
मल्लोकमेवाशु वसेत्स धन्यः ॥४८॥ निरगाद्गुरगौरिकेतनः शिववाक्यामृतसारवर्षतर्षः ॥ समवाप्य नि
जां प्रियां तदानीं स्मरमुद्दोध्यत दद्रिजाकटाक्षैः ॥४९॥ ॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमां
५६० शे द्वाविंशोऽध्यायः ॥२२॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ ॥
॥ श्रीस्कंद उवाच ॥ ॥ ततः स सुंदरः प्राप्य कमलालयमुत्तमम् ॥ देवर्षी स्थापितोत्तुंगलिंगसंगविरा
जितम् ॥१॥ आनंदेशादिसिद्धेशमचलेशं स सुंदरः ॥२॥ हाटकेशं चतुष्टावश्री वल्मीकमहेश्वरम् ॥
स्नात्वा देवेशसरसि भस्मरुद्राक्षभूषणः ॥३॥ संप्रणम्य महादेवं सुंदरः शशिशेखरम् ॥ क्रमेण पंच
लिंगानि तुष्टावाथ स सुंदरः ॥४॥ ॥ सुंदर उवाच ॥ ॥ आनंदेशसुनंदितत्रिभुवनमंदारवृंदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नघ्य कोदंड काय सततं हरशंकराय ॥ इति तत्कमलास्तुत्या वल्मीकेश प्रहृष्टधीः ॥ माभैष्टेति श्रियं
चोक्त्वा कालात्तस्यात्सुतोदयः ॥३५॥ देव्याः प्रसादादचिरात्पुत्रः संजीवनां श्रिये ॥ इति शंभोर्वचः
श्रुत्वा हर्षोन्मीलदिगंतरा ॥३६॥ स्मरस्यादुर्भवस्तात्र पद्मादेव्याः कटाक्षतः ॥ उवास तत्र नियतं चिंतयं
ती स्मरोद्भवम् ॥३७॥ चिंतयंती महादेवं मदनांतकरं शिवम् ॥ तदा प्रभृति तत्क्षेत्रं कमलालयसंज्ञि
तम् ॥३८॥ प्रथितं सर्वलोकेषु मन्मथाशंकरस्य च ॥ त्यक्त्वा विष्णुश्च वैकुंठं तदा श्रीविरहातुरः ॥
श्रीवांछस्थानमगमच्छिद्र पंचांछन्नलदा हरिः ॥ भस्मरुद्राक्षधृक् नित्यं त्रिपुंड्रोज्वलफालकः ॥४०॥
तपसोपेनिराहारः शतवर्षाण्यनन्यधीः ॥ तपो घोरतरं तेपे मुनीनां विस्मयावहम् ॥४१॥ त्रिका
लमर्चयन्नच्छंभुं बिल्वपत्रैश्च कोमलैः ॥ पंचामृतैः पंचगव्यैः गन्धचन्दनवारिभिः ॥४२॥ धूपैर्दी
पैश्च नैवेद्यैरुपचारैरनेकशः ॥ स्तुवन्नेवं महादेवं चिंतयन्नब्धिकन्यकाम् ॥४३॥ विरहार्तश्श्रियो
देव्या काश्यं चाहरहर्ययौ ॥ वांछितार्थप्रदं देवं श्रीवांछेशं विचिंतयन् ॥४४॥ ॥ विष्णुरुवाच ॥ ॥
वांछीश तुच्छफलदेषु न मे स्पृहास्यात् तुच्छं त्वमेव शशिमौलि गिरां सदेव ॥ इच्छाभवेत्तव पदे मम

शिवर॰ १ कालेनमहातत्र ॥ त्वत्कटाक्षांकुरोद्भूतः पुनरुज्जीवतांस्मरः ॥ २३॥ इत्युक्त्वा विष्णुहृदये उवाससतदाह सदा॰न॰
४५ रः ॥ ततःकालेमहतासुषावकमलास्मरम् ॥ २४॥ मदनंसर्वदमनंसुरसाहाय्यकारिणम् ॥ कुसुमेषुसमुत्पन्नंदृष्ट्वा अ॰२२
वाविष्णुःप्रहृष्टधीः ॥ २५॥ अतिष्ठदुत्सुकःपुत्रंवीक्ष्यत्र्यक्षप्रसादजं ॥ ततःकालेनमहतासुरकार्यार्थमुद्य
तः ॥ शिवफालानलज्वालावलीढोमदनस्तदा ॥ २६ ॥ शंभुनादमितेतत्रमदनेसर्वभेदने ॥ २७॥ चिंताकु
लासावैकुंठतनीलकण्ठंसमाश्रयन् ॥ कमलाविष्णुनासार्धंक्रोधाद्वचनमब्रवीत् ॥ २८॥ ॥ ॥
॥ कमलोवाच ॥ ॥ तवैवानयतोविष्णोमदनोनंगतांगतः ॥ नाहंवसामिवैकुंठे पुत्रक्लेशाग्निदीपिता ॥ २९॥
S69 दुरवलोपमर्दयत्स्थानंसंगच्छामिकपर्दिनः ॥ इत्युक्त्वा साथकमलाकमलालयमेत्यच ॥ ३०॥ विमलंसा
तपस्तेपेशूलहस्तार्चनेनच ॥ वल्मीकेशंसमाराध्य देवमेवमतोषयत् ॥ ३१॥ ॥ कमलोवाच ॥ ॥ श्री
विलिनेकवचिने वरसोमधामसामिप्रकामसिरसेममदुःखहंत्रे ॥ पात्रेसमस्तसुरतावनदीक्षिताय वल्मीकम
ध्यनिलयायनमःशिवाय ॥ ३२॥ गौरीविलासमुखपंकजभानुनेत्र प्रोद्यत्प्रभाधवलितायमहेश्वराय ॥
उद्यत्सुधांशुचयवार्धितरंगरिंखद्गंगातरंगकलितेंदुजयालकाय ॥ ३३॥ उद्दंडचंडकरधारितमेरुमहोरु
1·

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धारास्पदम्॥ ध्यायं ध्यायमुपास्महे तव महापापौघभित्केवलं मुक्त्या किं मम सांप्रतं तव विभो भक्ति हियाचे स
दा॥ १२॥ इति विष्णुवचः श्रुत्वा सोमस्कन्दो महेश्वरः॥ विष्णुमाह तदा देवः वृणु कामं तवेप्सितम्॥ १३॥ श्रुत्वा
शंभोश्च वचनं तदा विष्णुः सुहृष्टधीः॥ ययाचे देव मे ज्ञानं भक्तिस्त्वत्पदपंकजे॥ १४॥ जेतारं सर्वलोकेषु पुत्र
मेकमयाचत॥ सुन्दरं सुन्दराणां च कुसुमेषु हरीश्वरात्॥ १५॥ विष्णुहृत्कामममतुलं पूरयामास शंकरः॥ प्रहृ
ष्टस्त्व्यक्षमौक्षिष्टदक्ष शिवं सुरारिह॥ १६॥ तदंतरे महादेवि कोपसंरक्तलोचना॥ विष्णुं जिष्णुं तदा वी
क्ष्यातियगीक्षत सकुप्यम्॥ १७॥ ॥देव्युवाच॥ ॥मामनादृत्य देवेशं हरस्ताविक्ष्य दर्पितः॥ तस्मात
ते शिवदत्तोऽपि सुतो नाशमुपेष्यति॥ १८॥ शिवफालानलज्वाली कील तूलायितो हरे॥ देवीनागवज्रमुत्सृ
ष्टं श्रुत्वा चिंताकुलो हरिः॥ १९॥ प्रणम्याहस्म साष्टांगं गिरिजामश्रुलोचनः॥ ॥हरिरुवाच॥ ॥क
थं शापास्त्रपात्रं मां कृतवत्यसि शैलजे॥ क्षंतव्योऽयं ममागोऽथ अगकन्ये सुदारुणः॥ २०॥ इति विष्णुवचः
श्रुत्वा शंकरस्तामभाषत॥ ॥ईश्वर उवाच॥ ॥हरिः कंदर्पजनने नैव दर्पास्त चोत्तमाम्॥ २१॥ ममा
र्धांगितां त्वां च मन्यमानस्तवैभ्यताम्॥ नास्य मंतुश्च मन्तव्यो तं तु भूते सुते स्य वै॥ २२॥ मत्फालानलदग्धोऽपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ जैगीषव्य शृणुष्वाद्य कमला त्वयि विस्तारम्॥ पुरा कमलया तत्र तपस्तप्तं शिवाश्रये॥ ३॥ बहुवर्षगणं तात व सदा.न.
४४ ल्मीके शुचिनेनसा॥ निनाय वासरान् तस्मिन् सूच्यग्रसंस्थिता सती॥ ४॥ ॥मुनिरुवाच॥ ॥ कस्मात्कम अ०२२
लया तप्तं कामतश्चैव दाधुना॥ कमलायाः प्रसादेन सर्वेऽपि विमलो भवेत्॥ ५॥ तादृश्यपि कथं स्थाने तपस्तप्त
वती पुरा॥ ॥स्कन्द उवाच॥ ॥ अपुत्रस्तप्यमानो वै हरिर्वीथ्यां पुरा स्थितः॥ नागपर्यङ्कशयने शिप्रे
कमलया सह॥ ६॥ ध्यायन्नास्ते महादेवं सांबं चन्द्रकलाधरम्॥ मृगटंकधरं सौम्यं लोचनत्रयभूषितम्॥ ७॥
नीलकंठं विरूपाक्षं रत्नसिंहासने स्थितम्॥ फुल्लकल्हारमालाकं दिव्यपीतांबरावृतम्॥ ८॥ अनर्घ्यरत्ना
५७० कल्पेन शोभमानं महत्तरम्॥ स्वहृद्युत्फुल्लपद्मस्थमेवं ध्यायत शंकरम्॥ ९॥ बहुवर्षगणं विप्र स्वप्नेन्नेव हरिस्त
दा॥ मानसैरुपचारैश्च पूजयन् सांबमीश्वरम्॥ १०॥ तुष्टाव वाग्भिर्हृष्टाभिः शिपिविष्टं महेश्वरम्॥ ॥ ॥
॥विष्णुरुवाच॥ ॥ सोमस्कन्द विभो त्वदीयविमलं रूपं सुधांशुस्फुरज्जूटाहिस्फुरमौलिकांचितमणिस्फा
रांगरागोज्ज्वलम्॥ त्र्यक्षं सौम्यसुधांशुकान्तिविलसत्तिर्यक्त्रिपुण्ड्रांकितं वीक्षे साक्षादिविदूरगं तव विभो नक्तं
कटाक्षोदयम्॥ ११॥ त्वत्पादाब्जमरन्दसुन्द[illegible]हावीचीस्फुरन्मौलयो नृन्दार द्युतिवृन्दवन्दितमहानंदांबु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विकीर्यैं वार्यो ऽपि भवति विनिवार्यो हि स भवेत् सुराणां वैवर्यो प्रभवति सविस्तीर्णतरवाक् ॥ ४९॥ त्वा
मंभोरुह संभवोत्तममहावाणीगणैः संस्तुतम् ॥ कः स्तोष्यत्यचिराच्चिरं चिरगिरां प्राप्योन सर्वात्मना ॥
को वा पूजयिता भवेत्कुसुमतो यन्मौलिमूलं हरिः ॥ ब्रह्मा वाप्यनुमीतिमान् तव विभो कस्ते स दृक्षो गुणः ॥५०॥
कामं मे शिव कामसुन्दरी भृङ्गां सं पूरय पथां विके मद्भावं विनिवेदया शु गिरिजे श्रीसोम के शायतु ॥ त्वं माता
जगतां जनित्रि स पिता विश्वेश्वरो मे ऽधुना तस्मात्ते पद भक्ति भावमतुलं त्वं देहि सर्वेश्वरि ॥ ५१॥ इत्युक्त्वा
प्रणनाम तौ भुपद्योः सानन्दबाष्पैः तदा मग्नः शंभुमलौ लनास्य विलसज्ज्ञो ऽकेऽनुलोको त्तरम् ॥ स्थित्वा
चाथ्र सभां तरे च स तदा वर्षेस्तुवन् शंकरं यातो ऽसौ कमलालिलासमदनं नेतुं महेशं गणः ॥ ५२॥ इति श्री
शिवरहस्ये सदाशिवाख्ये नवमांशे सभादर्शनं नाम एकविंशोऽध्यायः ॥ २१॥ ॥ श्री काशीविश्वे
श्वरार्पणमस्तु ॥ ॥ श्रीसदाशिवाय नमः ॥ ॥ मुनिरुवाच ॥ ॥ कमलालयसंज्ञास्य शिवक्षेत्रस्य शं
कर ॥ कथमासीद्वदस्वाद्य समुत्कंठीति मे मनः ॥ १॥ नीलकंठचरित्रेषु केकी वद्घनगर्जनात् ॥ इति तद्वच
नं श्रुत्वा स्कन्दः सूदिततारकः ॥ २॥ उवाच मोचमधुरवाचा चन्दनसीतया ॥ ॥ श्रीस्कन्द उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 कांचीकचत्कोटितटांचितमौलिकानाम्॥४२॥ रंभानिभोरुकमठीभपृष्ठनम्रलाक्षारुणांघ्रियुगलांमणि सदा.न.
४२ नूपुरांताम्॥ मत्वाहृदंबुरुहमोदविकासितांकौ तुष्टावसुन्दरगिरासचसुन्दरोहि॥४३॥ ॥सुन्दर उवाच॥॥ अ.२१
शंभो बालेन्दुचूडद्युतिविजितदिशांसोमसीमानुरागम्॥ फुल्लोत्फुल्लरवामुखवांतंमागकुमुद्वांसोमावि भूमानि
ते॥४४॥ सामसोमगुणाभिराम नितरां श्रीवामदेव प्रभो कामांगोत्थितभस्मरंजिततनो मां पाहि सांबप्रभो॥
कालव्यालमुखानलोत्थजमहाज्वालादिदग्धांजगत् तत्सोमत्वरलोचनेननितरां पुष्यंततिष्ठ्यऽपि च॥४५॥
पुष्पांते पदपद्मसंयुतमहामंजीरसिंघ्नोदूरीकर्तुमिमंमहाचजनितंसंतापवृंदंहर मन्दारवृन्दमुकुटीतट
पादपद्मनिर्यन्मरंदरसलग्नमधुव्रतोऽयम्॥ नान्यच्छंदेच्छतिसुरान्तरसंविलग्नंभुग्नंसदाभजतितेपदपद्म
मग्नः॥४६॥ संसारसर्पोद्धृतसर्पदंष्ट्रादुष्टा अपिप्रथमेनाथतवेहभावात्॥ शिष्टास्तएव जगतोऽपि विशि
निष्ठाःकष्टासुतेतनुभृतांस्वतएवहृष्टाः॥४७॥ वरं रंकोपीशत्रिभुवनवनेवापिचनरो वरोचोरोवापीप्रभोमे
पतिनृत्तंचकलयन्॥ भवेच्छंकातंकाविरहितहृदेवोशुराभवेच्छशांकाक्रान्तं ते वरसदस्युमाका
न्तासततम्॥४८॥ सुमंबिल्वंवापिप्रथितयशसासैवसुलभं लभेन्मोक्षंशंभो तव पदयुगे भक्तिभजनात्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न तु भीतिं हरन्ती कानाममभयप्रदानकुशलं चान्येन चालं विना ॥ ३५ ॥ पादेनोरुनिकुंचितेन मधुना संसिंच
तासिंजितालोलालंबितपादकंकणफणीफूत्कारलोलस्रजा ॥ ब्राह्मीतुंगकरंकषंडसुमहारत्नारुमालं
शुकभ्राजद्धक्षसमुल्लसद्द्युतिभृता पर्वेंदुपूर्णश्रिया ॥ ३६ ॥ सोमानलार्कमुकटाक्षरसालनालोकेशलोकत्रय
लोकमखिलं शरदिन्दुकन्दम् ॥ कान्तापि तां गसुभुजंगमहोरुहारं मातंगकृत्तिवसनं हसयांतरंगे ॥ ३७ ॥
तत्पार्श्वगामचलराजसुतां नतांतपादांबुजांतरदृगं चलतां दिदृक्षे ॥ उत्फुल्लपद्मवदनोत्थितनीलनीरजा
तेक्षणांचितकपोलतलायताक्षी ॥ ३८ ॥ कर्णान्तरोद्यतसुरत्नजकान्तिकान्ततारंकयुग्मविनिवारितेंदु
बिंबाम् ॥ बिंबाधरां चिकुरवेणिगरत्नपद्मशुक्तोपमोरुनसलंबितमौक्तिकां ताम् ॥ ३९ ॥ ग्रैवेयका
वलिभवोत्तमनंवुकण्ठश्रीनीलकंठहृदयांबुजकेलिभृंगी ॥ पाणिप्रभाविजिततामरसोरुनालबाहुद्व
यीविधृतकंकणनिस्वनां ताम् ॥ ४० ॥ हीरान्तरस्फालफलकामलिकान्तलसत्सुरेखासिंदूरमिंदुवदना
रदशोभिकुन्दाम् ॥ कौसुंभचेलगकृतां चलशातकुंभशान्तोत्तरीयविनिबद्धमदेभकुंभाम् ॥ ४१ ॥ तांम्रा
जिवल्लिकुचवर्णकुपाननानां बंधप्रभान्विवलितोदरमध्यभागाम् ॥ रत्नोरुहेमरवचितोत्तमचाकचक्यत्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०१ भस्मरुद्राक्षधृग्योगी वृद्धाद्रीशं प्रणम्य च ॥२८॥ साष्टांगं चाभितुष्टाव भक्तिनिर्भरमानसः ॥ ॥सुन्दर उवा सदा.न.
४२ च॥ ॥विद्युत्पिंगजटोत्तमांगसुमहामातंगचर्माम्बर गंगातुंगतरंगसंगतमहालिंगांगसंस्थप्रभो॥ उत्संगस्थि अ०२१
तकामिनीविलसिताद्यर्धांगकौरंगसल्लक्ष्मात्वं कृतमौलिमोक्षणभवत्सातंगनंगांगते ॥२९॥ पादाब्जं द्रागपांग
तोऽद्य कलये मोक्षश्रियासंगतं ॥ इति संस्तुत्य तं देवं तस्मात्स्थानादपक्रमे ॥ गोपर्वते ततः पुण्यं प्राप्य तु-
ष्टाव शंकरम् ॥३०॥ भस्मरुद्राक्षपूतांगो गोपर्वतनिवासिनम् ॥ ॥सुन्दर उवाच॥ ॥त्वमंघ्रिप्राणांप
तिरिन्दुमौले गिरिशा इत्येव श्रुतेर्गिरीडितः ॥ क्वातेस्तुतिर्वाङ्मनसामगोचरा मनेतु भाव्यापदवीमथाणु ॥३१॥ इति
SZ-2 तत्रापि संस्तुत्य देवदेवं प्रणम्य च ॥ पुण्डरीकपुरं प्राप्य हृदयं वै तदा भुवः ॥३२॥ प्रहृष्टहृत्पुंडरीको पुंडरीकाक्षपूजि
तम् ॥ अभ्रंलिहैः गोपुरैश्च श्रीमदभ्रसभां तदा ॥३३॥ स्नात्वा स शिवगंगायां भस्मरुद्राक्षभूषणः ॥ प्राणंसीद
वतंसितेन्दुमनलालंकारफालाक्षधृक् हस्तोतेजितपांचुमध्वनिभृता सद्दामरेणांविकाम् ॥ पश्यन् हेमसभा
विभासिचरणांभोजं हरिब्रह्मादिपक्षाक्ष्यगतिप्रदानकुशलं विन्यस्य नृत्तं सदा ॥३४॥ कुर्वन्तं चललोललल
नितजटासाम्राज्यवृत्ता (विश्रा) सितानक्षत्रौरुपतत्सुवर्षणझणत्कोरासुसत्कंकणम् ॥ सव्यासव्यकरद्वयारुणलताभ्रा


CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मौलिबद्धांजलिस्तदा ॥ २० ॥ ॥ सुन्दर उवाच ॥ ॥ देवि त्वं गिरिराजसागरकुलोत्तुंगोदचन्द्रोज्ज्वले ॥ नीलेन्दी
वरलोचनोरुयुगलेनीलालकालंकृते ॥ पर्वेन्दुद्युतिकान्तिराजितमुखे बिंबाधरे कुन्दजभ्राजत्कोरकदन्तपंक्ति
मधुरेकामाक्षितुभ्यं नमः ॥ २१ ॥ हे मत्तभ्रमरालराजगमने मत्तेभकुंभाभजित्कान्तोत्तुंगकुचद्वयी परियुतेव्या-
लाभवेणीस्फुरत् ॥ रत्नभ्राजितपद्मपुष्पविलसन्नासालसन्मौक्तिके ॥ मंजीरद्वयपादपद्मजरणत्पद्माभपाद
द्वये ॥ कांचीकांचितसत्कटीतटयुते हस्तोल्लसत्कंकणे कौसुंभद्युतिचेलचंचलांगलतिके कामाक्षितुभ्यं नमः ॥
॥ २२ ॥ एवं संस्तुत्य हृष्टात्मा निर्जगामारुणाचलम् ॥ शिवतीर्थे ततः स्नात्वा भस्मरुद्राक्षभूषणः ॥ २३ ॥ नत्वा शोणा-
चलाधीशं तरुणेन्दुशिखामणिं ॥ अरुणाधिपनेत्रत्वं शरणं स ययौ गणः ॥ २४ ॥ अस्तावीत्सतदा देवं देव्या
मौलिकृतांजलिः ॥ सुन्दर उवाच ॥ ॥ भगणाधिपचूडमौलिकुंभोद्भुगणं त्वां गणवृन्दवन्दितांघ्रिम् ॥ अरु
णाद्रिपाम्बुनापदं ते शरणं यामि शरच्चन्द्रमिन्दुमौले ॥ २५ ॥ वरुणालयपारणानतं ते पदपद्मं मरणेऽपि
ये स्मरन्ति ॥ तरणं च भवेद्भवांबुधेः करुणाशालि कटाक्षवीक्षणं ते ॥ २६ ॥ इत्युक्त्वा निर्जगामाशु निर्ज
रैः सेवितं पुरम् ॥ वृद्धाचलं तदा पुण्यं सुन्दरः शिवमन्दिरम् ॥ २७ ॥ स्नात्वा स मणिमुक्तायामणिमाद्यष्टसिद्धये ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर॰ ९ कैलासं देवदुर्लभम् ॥ स तत्र गत्वा संस्नाय सुवर्णमुखरीजले ॥ १० ॥ स्नात्वा भस्मांगविभवो भूतिदिव्यत्रिपु सदा॰न॰
४१ ण्ड्रकः ॥ रुद्राक्षमालाभरणः शिवालयमथागमत् ॥ ११ ॥ नत्वा तुष्टाव देवेशं कालहस्तीश्वरं शिवम् ॥ पश्यन्सा अ॰२१न
नन्दरोमांचकंचुकालंकृतांगकः ॥ १२ ॥ ॥ सुन्दर उवाच ॥ ॥ हे कामनाशन हिरण्मयदंसनांग हे व्योम
केश गरलाशन कालकाल ॥ केशास्वतान्पय विभो मुदिराभकण्ठ तद्वत्प्रभा मम हृदि प्रसरत्ववश्यम् ॥ १३ ॥ ए
वं स्तुवन्स नियतां मासमात्रमनन्यधीः ॥ तस्मात्स्थानादपक्रम्य कांचीमभ्यागतो गणः ॥ १४ ॥ कंपां पाप
523 हरां पातामालुलोके गणेश्वरः ॥ तस्यां स्नात्वा भस्मदिग्धो दिव्यभाल त्रिपुंड्रकः ॥ १५ ॥ कामाक्षी तपसा
कंपा तटे देवमतोषयत् ॥ यत्र विष्णुतपोयापितपतेहरदर्शनम् ॥ १६ ॥ कंपितानि भवन्त्येव पापानि सकलान्
न्यपि ॥ कंपास्नानेन चैकेन नाविनश्यत्यघं कुतः ॥ पुतच्युतो तमात्तोलपल्लवालं विभूतले ॥ मूले रसा
लवृक्षस्य शूलहस्तं निरीक्ष्य सः ॥ १८ ॥ साष्टांगलग्नभूपृष्ठः तुष्टाव प्रकृतिं हरम् ॥ सुन्दर उवाच ॥ ॥
शंभो रसालवरमूलग कालकाल हालाहलोत्तमगलामलहस्तशूल ॥ कालानलज्वलितकामसुदेहमूल
व्यालोरुमाल परिपाहि जगत्सुमूल ॥ १९ ॥ कामाक्षीमपि तुष्टाव सुन्दरो नन्दमेदुरः ॥ साष्टांगप्रणतो भूमौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोऽपि स तदा श्रीसुन्दरो नल्पधीः ॥ धामान्येव जगाम शंभुकृपया संसेवितुं भक्तितः ॥५८॥ ॥इति श्रीशिव
रहस्ये सदाशिवाख्ये नवमांशे सुंदरचरिते विंशोऽध्यायः ॥२०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥
॥श्रीसदाशिवाय नमः॥ ॥मुनिरुवाच॥ ॥कानि धामानि देवस्य स जगामाम्बिकापतेः॥ स सुन्दरो ग
णः श्रेष्ठः तन्मे वद सुविस्तरम् ॥१॥ गणेशानुज सर्वज्ञ कमलिन्यां महोत्सवः ॥ उद्वाहो वा कथमभूद्वृषवा
हप्रसादतः ॥२॥ सुन्दरस्य महादेवप्रसादेन विनोदकृत् ॥ इति तद्वचनं श्रुत्वा उवाच क्रौंचसूदनः ॥३॥ जैगी
षव्यं समालोक्य मुनीन्द्रान्गणपान्सुरान्॥ ॥श्रीस्कन्द उवाच॥ ॥शृणु त्वं सुन्दरस्यास्य कथां वि
स्तरमादरात्॥ पुरारिणा समादिष्टः सुन्दरः शशिशेखरम्॥४॥ नतु मुदा ययौ विप्रः भक्तिनिर्भरमानसः॥ श्री
मद्दक्षिणकैलासं विलासस्थानमीश्वरम्॥५॥ यत्र हस्ती पुरा शंभुं शुण्डादण्डार्जितैः शुभैः॥ बिल्वपत्रैः सम
भ्यर्च्य पुष्करासारसेचनैः॥६॥ दन्ति जन्म विमृज्यैव दन्तित्वङ्कृटिचेलकः॥ त्रिनेत्रो नीलकण्ठश्च बभूव
गणपोत्तमः॥७॥ तां कालहस्तिनगरीं प्राप सुन्दरशेखरः॥ कालो पिणिराड् यत्र स्वमौलिमणिभिः पुरा॥८॥
समभ्यर्च्याम्बिकानाथं बभूव फणिभूषणः॥ ऊर्णनाभिः पुरा कृत्वा सुखतंतुवितानकम्॥९॥ प्रपेदे परमं स्थानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ॥ महादेव उवाच ॥ ॥ द्विजगोवधदारुणाशयेन योऽधोऽप्यबुधो वा विबुधाधिपं महेशम् ॥ सकृदागव सदा ॥न.
४० ध पुष्पतोऽभ्यर्च्य लिंगे मधुना सिच्यधुनोति पापजालम् ॥ ५० ॥ कमनाम्रताम्रनवपल्लवनम्रशाखासंलग्नमौलि अ० २०
मनलाकं शशि त्रिनेत्रम् ॥ साम्राणि धूपमगजे प्रसमीक्ष्य दत्वा साम्राज्यमेव कलिजोऽपि मर्त्यः ॥ ५१ ॥ अपा
पान् योद्दरान् त्यजल्लि च कुसुमारानपि नरो तथागारे वह्निं क्षिपति सुजनानाक्षिपति च ॥ स पापानां नाशं क
लि यति यदि स्वैरमगजे चिरं वृद्धाद्रीशं भजतु भवनाशाय सुलभम् ॥ ५२ ॥ तरुणेन्दुकलाकलापमीशं शरणं
ये प्रतिसादितारुणाचलेशम् ॥ भवदावोत्तमवारुणालयं ते परिमृद्नन्ति च गोष्पदप्रमाणम् ॥ ५३ ॥ हालास्य
574 लास्यसुमुखं मम पादपद्मं आलास्यजातमपहाय यदेक्षितास्यात् ॥ कालास्यमेव न हि पश्यति कालकालं
आवश्यकं खलु नरेषु ददमेव ॥ ५४ ॥ यत्पुण्डरीकाक्षसुपूजितांघ्रिर्हृत्पुण्डरीकेसकलेषु संस्थम् ॥ मां पुण्ड
रीकाजिनवासमीक्ष्य तत्पुण्डरीकं पुरमाव्रजेत्वम् ॥ ५५ ॥ कमलाविलाससदनं कमलैर्मम पदपूजको हि विष्णुः ॥
कमलापमेहि सुन्दरसं समलानां न हि तत्र वास दृष्टः ॥ ५६ ॥ श्रीस्कन्द उवाच ॥ ॥ इत्थं तं सुन्दरेशं प्र
णतिपरवशं चोपदिश्याष्टमूर्तिः ॥ दिव्यं धाम स्वकीयं गणगणसहितो वीतिरो चन्तेदव्या ॥ पौरैरीरिता वैभ



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्नास्तु तं त्वां भजति भवहरं भूतये स्वस्तये च ॥ वाह्याम्नायस्तदभिरे तेन्ते पदयुगं पश्ये च कश्चिद्दृढा तंत्वां
दक्षसुदक्ष भक्षरहितं वीक्षेत कः प्रेक्षकम् ॥ ३९॥ अति चल कमलाविलासि जालैर्महिलाभिश्चरमानिमू
ढबालाः ॥ जरबाले यद्वाति भार खिन्ना भवतां ताः कुसुमेषुबाणनुन्नाः ॥ ४०॥ ॥ श्री स्कन्द उवाच ॥ ॥
स देवः स्तुतिमाकर्ण्य अपर्णापतिरीश्वरः ॥ तदाकंदलितानन्दमवादीत्सुन्दरं हरः ॥ ४१॥ मार्ध्वि(यि)झरी परीपाक
चमत्कारजितागिरा ॥ ॥ हर उवाच ॥ यद्वादि मया सौम्य तदिदानीमनु...ष्ठितम् ॥ अद्यनाद्भवान्दास्यं पत्रे
ण पठता सता ॥ ४२॥ तद्ब्रूहि किं विवाहेन प्राज्यराज्येन किं तव ॥ स्मर स्मर हरन्नाम स्तोत्रं त्वं सुन्दराधुना ॥ ४३॥
सा चापि तकमलिनो कमलालयमध्यगा ॥ कमले वाविरासीत्सा कमलं सरसीष्विव ॥ ४४॥ तत्रागच्छ
विवाहं ते कारयाम्यहमेव हि ॥ इति शंभुर्वचः श्रुत्वा हर्षयुक्तः स सुन्दरः ॥ ४५॥ मन्नाम पदमाबध्यस्तु हो
त्यादीक्षदीश्वरः ॥ इत्यादिष्टस्तदा तेन श्रीकण्ठेन दयालुना ॥ ४६॥ व्यधिरचदने कानि गानान्येवस सुन्दरः ॥ वे
दान्तागमतत्त्वार्थनामधारारसैः शुभैः ॥ ४७॥ कुर्वाणे सुन्दरे शंभोः श्रवणामृत पारणाम् ॥ पपात चामरैः सृष्टा
वृष्टिपुष्पमयी दिवः ॥ ४८॥ नयनामृत तिष्ठाभ्रे सुरवामदृशां गणः ॥ पुनस्तमाह देवेशो सुन्दरं विनयानतम् ॥ ४९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह.० दिन्दुकलाधरः॥ रत्नलिङ्गभुजगद्वन्द्वैरा बद्धमुकुटीतटः॥२७॥ पतङ्गानलसोमाद्यत्पारावारीणलोचनः॥ गौ सदा.न.
३९ रीमणिमयादर्शकपोलतललम्बिना॥२८॥ माण्डितं कुण्डलीशान कुण्डलेन फणीभृता॥ दन्तमुक्तानि बद्धोष्ठ अ.२०
प्रनालमणिपेटकम्॥२९॥ स्मितश्रीपुंजकिंजल्कमंजुलाननपंकजम्॥ कण्ठशंखविनिर्घस्फूर्जन्मंदिरोर्जित
वैभवम्॥३०॥ मृगटंकवराभीतिवृत्तहस्तचतुष्टयम्॥ वृषधारी चलद्धाररुद्राक्षस्थानवैभवम्॥३१॥ ककु
दास्फालतोदंच फणीकं कणशिंजितम्॥ सहरूढाद्रिजाश्लेषादंचद्रोमांच कंचुकम्॥३२॥ उत्तरीयायतोद्दं
डवेतण्डाजिनमण्डितम्॥ कटिसूत्रास्थितवालनद्धव्याघ्राजिनांबरम्॥३३॥ सुमेरुवरकोदण्डचण्डबाहुवि
SB राजितम्॥ हीरसोमानलोत्तेजितशरशोभिकरं हरम्॥३४॥ आखण्डलादिकोटीरकोटीमणिमरीचिभिः॥
आम्रेडितप्रभापूरस्फूर्जन्नीरजपादुकम्॥३५॥ सोमधामसमानोद्यत्कोटिकन्दर्पसन्निभम्॥ धृतकाठि ज
ण्यवन्मूर्त्तं सच्चिदानन्दसंपदम्॥३६॥ आकारं वीक्ष्य नेत्राभ्यां प्राणंसीत्सुन्दरस्तदा॥ नानर्त्ति देवं वीक्ष्येव
मत्तुवीदीदृशं शिवम्॥३७॥ सुन्दरः सततदा चिन्तासंसारे तामरीरमत्॥ व्यशीरच्चलसुप्तिं तां भक्तस्य भक्तिमपू
षुषत्॥३८॥ ॥सुन्दर उवाच॥ ॥ भूम्निदाम्नेव बद्धा इव मणिगणवल्लीकजालं त्वयीदं सीम्नेसा


CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टे मुहूर्ते कर्तुमुद्यतः ॥१४॥ विवाहं तस्य विधिवद्बान्धवैस्तत्पितामुदा ॥ एतस्मिन्नन्तरे तत्र वृद्धविप्राकृतिः शि
वः ॥१५॥ पत्रं तत्र समादाय प्रादर्शयदहो तदा ॥ तत्पित्रोश्चैव बन्धूनां दासस्यार्थं सुन्दरस्य हि ॥१६॥ शृणुध्वं बा
न्धवा येस्य सुन्दरोऽयं द्विजात्मजः ॥ मया परिगृहीतश्च पत्रं संदृश्यतामिदम् ॥१७॥ तद्द्विप्रवचसा तस्य बान्धवाः पित
रौ च तौ ॥ दृष्ट्वा तत्पत्रमतुलं तद्दास्यपरवाचकम् ॥१८॥ ह्रियानताननाः सर्वे पितरौ तौ च बान्धवाः ॥ विप्रमेनं सु
न्दराद्य अनुगच्छस्व सविदा ॥१९॥ शरण्यः शरणीयसे पत्रसंदर्शनेन हि ॥ इत्थं तद्बान्धववचो न भूषनं तेन सो
ययौ ॥२०॥ तं सुन्दरं गृहीत्वैवं जगाम स्वेप्सितां दिशम् ॥ ते बान्धवास्तत्पितरौ दुःखव्याकुलमानसाः ॥२१॥ पप्रुस्त त
स्वाश्रमाण्येव मानयन्तो गतिं विधेः ॥ तत्र वृद्धेन विप्रेण ययौ कंचिच्छिवालयम् ॥२२॥ तिरोऽभवत स वृद्धो
ऽपि तस्मिन् लिंगमनोहरे ॥ सुन्दरो विस्मयाविष्टस्तुष्टाव शशिशेखरं ॥२३॥ ॥सुन्दर उवाच॥ ॥व्योम त्वं व्यो
मकेशः श्रुति शिरवचसां सोमभूमात्वमेवा धामा सोमादिवामस्तव वरमहिमा सामशीमास्तुतस्त्वम् ॥२४॥ सं
सारो दाम पामा प्रसिथिलतनुभिः सेवनीयस्त्वमीशः ॥ मामेवं दास्यभावे नियतपरवशं भक्तिभाजं कुरुष्व ॥
इति सुन्दरवाक्येन देवस्तद्दर्शनं गतः ॥ आरुह्य वृषभं देवः सहदेव्याद्रिकन्यया ॥२६॥ जरागंगातरङ्गात्तचल वः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ हत॥२॥ स्कन्दानन्दितमन्दार त्वं संक्रंदनवन्दित॥ महेभिर्मुनिभिर्देवैः गणैरुत्कण्ठतेमनः॥३॥ वैकु सदा०न०
३८ ष्ठपूज्यपादाब्जश्रीकण्ठं चरितं सदा॥ श्रोतुमुत्कण्ठितं चेतो भक्तस्य चरितं सदा॥४॥ ॥सूत उवाच॥ ॥ अ०११-२
तच्छ्रुत्वा तं मुनिं प्राह क्रौंचारिश्चरितं महत॥ शृणुष्वेति तमाहूय ध्यायन् शिवपदाम्बुजम्॥५॥ उवाच चरितं
तस्य सुन्दरस्य गणाग्रणेः॥ ॥स्कन्द उवाच॥ ॥शृणुष्व जैगीषव्याद्य कलावपि तपोबलैः॥ भवन्ति शिव
पादाब्जध्याननिर्धूतकल्मषाः॥६॥ स सुन्दरः शिवादेशात्कमलिन्या भुवं गतः॥ कस्यचिच्छिवभक्तस्य
शिवक्षेत्रनिवासिनः॥७॥ जम्बूद्वीपे सह्यजायास्तीरे जन्माप सत्तमः॥ विप्रस्य देवदेवस्य प्रसादाद्गुणितस्मरः
376 ॥८॥ कुमार जन्मानन्देन निधिं प्राप्येव निर्धनः॥ स वार्धिरिव चन्द्रेण वृद्धिं प्राप स भूसुरः॥९॥ विप्रेषु शिव
भक्तेषु ददौ गां सधनादिकम्॥ कुमारो मारसंकाशः पूषवत्स पुपोष ह॥१०॥ तं दृष्ट्वा तत्पिता माता मोदाब्धि
विवशान्तरौ॥ अन्वभूतां च तद्बाल्यं तत्क्रीडां नेत्रमङ्गलाम्॥११॥ स काले चोपनीतश्च वेदान् जग्राह वै क्र
मात॥ मातंगराजगमनं यौवनोल्लासितांगकम्॥१२॥ दृष्ट्वा कुमारं विप्रेन्द्रो विवाहाय मतिं व्यधात॥ कन्यां
विप्रकुलोद्भूतां दृष्ट्वा रूपवयोचिताम्॥१३॥ बान्धवैस्तद्गृहं गत्वा संभारैर्भूषणादिभिः॥ ज्योतिर्विदा समाहि



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च महेश्वरि ॥ तथैवाम्रवने देवि वेदारण्ये तथैव च ॥४४॥ कमलालयसंज्ञे च वल्मीकेश्वर संज्ञितः ॥ श्रिया यत्र त
पस्तप्तं बहुवर्षगणाग्रणे ॥४५॥ तत्रैव वसमे वाशु कमलिन्याऽनया गण ॥ तत्राहं तव भक्तिं च परीक्ष्य सुचिरं गण ॥४६॥
कमलिन्या वि वाहं ते कारयामि समाहितः ॥ सेतुबन्धेऽहममलो हालास्येऽप्यहमास्थितः ॥४७॥ ताम्रपर्ण्यास्तटे पुण्ये
शिवक्षेत्रेषु संस्थितः ॥ अन्यानि पुण्यस्थानानि ममैव गणपोत्तम ॥४८॥ एषु स्थानेषु नियतं संवसन्गान धारया ॥ स्तु
त्वा मां नियतो गौर्या कमलिन्यानया सह ॥४९॥ भक्त्या मां त्वं समभ्यर्च्य कैलासं त्वं सदा मम ॥ समायाहि मुनिश्रेष्ठैः
शैवैः सर्वजनार्चितैः ॥५०॥ चोलद्रविड भूपालैः सेविते देश सत्तमे ॥ कमलालय संस्थितोऽस्मि नित्यं मुचकुंदाघभि स
सेव्यपादः ॥ हरिणा शतमन्युना च तत्र गणवृन्दे मुनिभिश्च सेवितोऽस्मि ॥५१॥ तत्र त्वं गणपाग्र्येण नयात्वं संसेव्यामरवृन्द
पूज्यपादम् ॥ परितुष्टः सततं वसैव भक्त्या मम भक्तेरनया विलासलोलः ॥५२॥ ॥ इति श्रीशिवरहस्ये सदा
शिवाख्ये नवमांशे सुन्दरायशिवस्थाननिर्देशो नाम एकोनविंशोऽध्यायः ॥१९॥ ॥ श्रीकाशीविश्वे
श्वरार्पणमस्तु ॥ ॥ जैगीषव्य उवाच ॥ ॥ भगणः सुन्दरं शंभोः कथं क्षोण्यामवातरत् ॥ सा वै कथं क
मलिनी संजाता भुवि कस्य वा ॥१॥ कुले वृद्धिमगमद् दुहिता वा कथं तयोः ॥ तद्वदेवानुपूर्वेण गणेन्द्र चरितं म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ऽयं पुण्यकृत्तमः ॥ ३० ॥ तस्मिन्समासरितां श्रेष्ठा कावेरी पुण्यनिम्नगा ॥ दिग्भ्यो दशभ्यो गणप दक्षिणादिक् विशि 
ष्यते ॥ घटोद्भवमुनिर्यत्र विन्ध्यहृत्संस्थितः पुरा ॥ ३१ ॥ व्याघ्रपादमुनिर्यत्र सन्निधत्ते महेश्वरः ॥ ३२ ॥ पुण्डरी 
कपुरं यत्र धाम तत्र कपर्दिनः ॥ त्वयाहं नित्यसान्निध्यात्सायं ताण्डवतत्परः ॥ ३३ ॥ सर्वैर्देवैश्च मुनिभिः गणवृन्दैः
सदानतः ॥ तत्रस्थितोऽहं देवेश गणेन्द्र शृणु तत्सदा ॥ ३३-४ ॥ श्रीमद्दक्षिणकैलासे विलासो मम सर्वदा ॥ यत्र दन्ता
वलः पूर्वं पूजयामास मां तदा ॥ ३५ ॥ विरंचिनारायणयोर्हंसक्रोडशरीरयोः ॥ अदृष्टमौलिपदयोः निसर्गगतगर्व
योः ॥ ३६ ॥ अरुणाचलरूपोऽहं तरुणेन्दुशिखामणिः ॥ अचलेन्द्रं सदा पश्य प्रदक्षिणपुरःसरम् ॥ ३७ ॥ अहं वि
S7Z रगिरिस्तत्र देव्या वृद्धांबया त्वया ॥ सन्निधास्याम्यहं तत्र तथागो पर्वते द्विज ॥ ३८ ॥ कंपातीरे गणश्रेष्ठ स्मराह्स्या
हं त्वया सह ॥ एकाम्रमूलयः सन्निधत्साम्यहं सदा ॥ ३९ ॥ सह्यापगायामूलेवे श्रीकण्ठेश्वरसंज्ञितः ॥ साक्षाद्रत्न
गिरीशोऽहं तृणज्योतीश्वरोऽप्यहम् ॥ ४० ॥ तथा मातृगिरौ पुण्ये सिन्धुरारण्यसंस्थितः ॥ धृतस्थाने तथा पुण्ये त
थाजप्येश्वरगण ॥ ४१ ॥ तथाहं सुन्दरगिरौ क्षीरिणीविपिनेऽपि च ॥ दक्षिणावर्तके स्थाने कुंभघोणेऽर्जुनेऽपि च ॥
ब्रह्मारण्ये बिल्ववने स्वेतारण्ये गणोत्तम ॥ छायावने श्रीवांछेतेजनी विपिनेऽपि च ॥ ४३ ॥ दुर्गेश्वरे मङ्गले च त्रिकोटे

४२१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईश्वर
श्रीस्कन्द उवाच ॥ ॥इत्थं देवि तयासख्या तवस्तुत्यास्तु तस्तदा॥ प्रसन्नोस्मि तयास्तुत्या तामवादिषमेव हि
॥२०॥ ॥ईश्वर उवाच ॥ ॥श्रुणु भद्रे विशालाक्षि भूमौ त्वं सुन्दरेण हि॥ विहृत्य मम कैलासमागच्छ द्रुतमे
व हि ॥२१॥ जातिस्मरा भव त्वं च मम भक्त्या विशेषतः॥ कमलालयमासाद्य लिंगालयमनुत्तमम्॥२२॥ गानवृ
त्यपरा साध्वी सुन्दरेणामुना सह॥ स्मरकेलिषु विश्रान्ता समायाहि समायाहि मदंतिकम्॥२३॥ इत्युक्त मांत्रे च
मया तदा कमलिनी गणौ॥ प्रणेमतुर्मत्पदाब्जं भक्तियुक्तौ दृढव्रत्तौ॥२४॥ प्रोचतुः परयाप्रीत्या मां चत्वां चापि
तौ तदा॥ ॥सुन्दर उवाच॥ ॥देवदेव महादेव शरणागतवत्सल॥ यत्र यत्र भवेज्जन्म तस्मिन्भक्तिः पदे त
व॥२५॥ भवतां भवपादाब्जे भवोद्भवसदाँवयोः॥ कस्मिन्क्षेत्रे महादेव तवसान्निध्यमुत्तमम्॥२६॥ पुण्ये
सह्यापगातीरे शिवक्षेत्रविराजिते॥ नानाशैवजनाधारे द्विजग्रामसमावृते॥२७॥ तत्त्वदाद्य महादेव त्वद्भ
क्त्या पृच्छतो मम॥ स्कन्द ॥श्री सुन्दर उवाच॥ ॥इति सुन्दरवाक्येन जातहर्षो महेश्वरः॥ उवाच सुन्द
रं वीक्ष्य तदा कमलिनीमपि॥२८॥ ॥ईश्वर उवाच॥ ॥भूलोमण्डलमेतद्धि सह्याब्धिपरिवेष्टितम्॥
वर्षेष्वपि च सर्वेषु भारतं पुण्यमुत्तमम्॥२९॥ द्वीपेषु च गणश्रेष्ठ जम्बुद्वीपाय मुत्तमः॥ देशेष्वपि च सर्वेषु चोत्तो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ कमलिन्यां नया सार्धं मा चैते च स्मृति पूर्वः ॥ भविष्यति च मानुष्ये तिष्ये मद्भक्तिगौरवात् ॥१३॥ इत्युक्तो मां प्रण-सदा०न०
३६ म्यासौ त्वां चापि गणपाग्रणीः ॥ मलिनी सा कमलिनी मदनेन हतान्तरा ॥१४॥ ह्रिया किंचिन्नतमांसा तुष्टाव श अ०११
शिशेखरम् ॥ ॥ कमलिन्युवाच ॥ ॥ चन्द्रभानुकृशानुलोचन सर्वपावन नाम भूवन विराम बुधजनसोम
स्तुत वरशाम मदनशमन गराशन को नु वेद महिमानमीश्वर ते म्बुजासन वारिजेक्षण कावपीह सुवञ्चितौ मौलि
मूल विलोकनेऽपि च कस्तवे मति मोहते त्वमवेश मानंगसंगशरार्दितां गामंगनार्धकृतार्धगात्र शिव त्रिनेत्र प
वित्र माम् ॥१५॥ उद्धृतोद्धृतदक्षपक्षसुरता मीक्षाभुजाध्यक्षता ध्वांक्षांगप्रभेदेत्यहतृमदभिक्तसंधुक्षिताघो
क्षजम् ॥ उक्षाधीश्वरकेतनं स्मरहरापांगेक्षणं त्वां भजे ॥ वृक्षाणामधिपं वलक्षभसितां पारागत्र्यक्षाक्षतम् ॥
॥१६॥ मखमुखविशाखिशाखाशेखरोद्धृतलेखा मुखविशिखमयूखा त्यक्तदुःखा रवुवाहाः ॥ शिखिवहमु
खनेत्रो तेजि पद्मोरुमाला विकसनमुखखोल्कं त्वां भजे खण्डपर्शुम् ॥१७॥ अज्ञेश विज्ञानद दक्षयज्ञ वि
नाश काज्ञान निवर्त्त केश ॥ त्वदाज्ञया यं विधिविष्णुसर्गः संवर्त्तते ज्ञापय मां विमुक्त्यै ॥१८॥ पवनानलदा
शुषात्म को शिखं गौतपनेन्द्र तनुभाक् त्वमेव शंभो ॥ तवमूर्तिभिराभिरेव लोकं शिव धत्से क नु तेऽस्ति वर्णना
न्वाः ॥१९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री सदाशिवाय नमः ॥ ॥ श्री देव्युवाच ॥ ॥ देव देव महादेव सृष्टिस्थित्यन्त पालक ॥ अनेङ्गनाङ्गना
याश्च कमलिन्या विशेषतः ॥ १ ॥ सुन्दरस्य महादेव किं वा चोक्तं गणाग्रेणः ॥ त्वयैव देव देवेश शशि शेख
र धूर्जटे ॥ २ ॥ अनुग्रहः कथं तस्य कृतो देव दयानिधे ॥ तन्मेवद विशेषेण त्वत्कृपा हर शंकर ॥ ३ ॥ ॥ श्रीस्क-
न्द उवाच ॥ ॥ इत्थं देव्या तदा पृष्टः शिपिविष्टो महेश्वरः ॥ तुष्टः कष्टहरस्तस्या वचसाप्यष्टमूर्त्तिमान् ॥ ४ ॥ उ
वाच देवी मालोक्य सहर्षं सत्रिलोचनः ॥ मुनिश्रेष्ठ सुरश्रेष्ठे गणश्रेष्ठैश्च त्वं शृणु ॥ ५ ॥ ॥ महेश्वर उवाच ॥ ॥
शृणुष्व गिरिजे तत्र सुन्दरेण स्तुतस्तदा ॥ तमब्रुवं महादेवि सुन्दरं लोकसुन्दरम् ॥ ६ ॥ ॥ श्री ईश्वर उवाच ॥ ॥ त्वं
सुन्दर गणश्रेष्ठ कमलिन्यानया सह ॥ सह्यजाया स्तटे पुण्ये शिवक्षेत्रतटद्वये ॥ ७ ॥ श्रीकंठरत्नगिरिराट्मा
तृभूतगिरी तथा ॥ तणज्योतीश्वर पुण्ये पुण्ये पञ्चनदे तथा ॥ शमीवने कुंभघोणे तथा मध्यार्जुने मुने ॥ ८ ॥
मयूरे तजनीनाथे श्वेतारण्ये द्रुतिस्थले ॥ ९ ॥ बिल्वारण्ये च श्री वाञ्छे तथा छायावने गण ॥ लिंगालये तथा पु
ण्ये विशिष्टे कमलालये ॥ १० ॥ वेदारण्ये सेतुबन्धे हालास्ये च विशेषतः ॥ श्रीमद्दक्षिण कैलासे पुण्ये चै
वारुणाचले ॥ ११ ॥ गोपर्वते च वृद्धाद्रौ पुण्डरीकपुरे तथा ॥ स्तुत्वा मां सम्यगाराध्य समाय्या ह्यनया गण ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ ३५ कलाविराजितमस्तकसर्वदेवललामसोम भवहरभीमलोचनलालितोल्लमहस्तभूतसलीलकीलितविश्वकवामनांगविभूषणीकृतवामदेवविशेषकशा सदाशि०न
श्वताव्ययशंकरेशनिशाधिपोत्तमशेखर ॥४१॥ षण्मुखस्तुतषड्जमध्यमगपापषंडविशोषण सर्वमुनिगणाहृत्पथोजविहारभृंग वरोत्तमसामजप्रिय अ०१८
कृत्तिधारणसामसंस्तुतदेव भवहरीशरभूतविषोल्बणीकृतसत्फणीगणशोभितहावभावविलासवैभवहारिताखिलविष्टपक्षत्रियांतकरामपूजित
दक्षयज्ञविनाशन ॥४२॥ लोकशिक्षकभिक्षिताखिलमौनिपक्षगव्यक्षजगदाध्यक्ष मामव पाहि मां ॥ पाहि मामखिलार्त्तिनाशनहर महेश्वर शंकर किंक
रस्तवसंकरोपि भवेद्धरः किल तेक्षणात् ॥४३॥ क्षम्यतामखिलार्त्तिनाशन मत्कृतो सहमानतां ते श्रुतावपि विश्रुता प्रणमामि ततो महेश्वर ॥ वीक्षणेन
महोक्षवाह बुधप्रियः खलु तेतरां ते तरो हि भवोद्भव ते पदांबुजपूजकस्त्वत्स्तुतौ परमूककोपि भवेद्गिरोथ बृहस्पतिः ॥४४॥ रक्ष मां शिव त्र्यक्ष रक्षक पक्षपा
तदृशा तव पाहि मामपराधिनं भवमूढ शाठ्यपरायणं ॥ यातवाप्यधिवत्कृता शिव महेश्वर पाहि मां वाङ्मनो विषयानते स्तुतिरीयं श्रुतिमौलिजैः ॥४५॥ भक्ति
50 तः शशिशेखरावमहेश्वरेश्वर पाहि मां ॥ ॥ईश्वर उवाच॥ ॥इत्थं संस्तुत्य मां देवि सुंदरो विनयानतः ॥ अवाङ्मुखो दीनमना व्यतिष्ठत कृतांजलिः ॥ गव्यैरनेग
579 मदभिप्रियलिंगमौलिं संसिच्य चंदनविलेपनबिल्वपत्रैः ॥४६॥ संपूज्य धूपवरदीपनिवेदनाद्यैर्नत्वा स्तुवंति नतिभिः किल शैववर्याः ॥ यो मातृकास्तवमिदं पठ
ति प्रदोषे नत्वा विभूतिकवचो मदजाक्षमालः ॥ भूत्वा विभूतिकवचो प्रसमीक्ष्य लिंगं स्तुत्वा महाघनिचयैः स विमुक्त एव ॥ भ्रातृव्यं विनिहत्य भव्यपदवीमव्याहतात्मा सुखी
काव्यो तेजि शरीर कांतिविलसत्तत्त्वं त्विदं व्याहरन् ॥४८॥ तव्यां वृद्धिमुपैति दिव्यसुमहायानैश्वरत्येव सो मंतव्यं मनुते व्यसो श्रुतिशिरोगं तेतिगंतागतिं ॥ ॥इति श्री शिव
रहस्ये सदाशिवाख्ये नवमांशे सुंदरस्य शापो नाम अष्टादशोध्यायः ॥१८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार्श्वषण्मुखदुःखभंजक सर्गसर्जक तर्जितासुरगर्जनोर्जित वर्जिताखिलपापतापनिवारकाव मखोन्मुखोत्सुकलेखवृन्दशिक्षक गांगतुंगजटोत्तमांग सुसंगबाल
कुरंगफणिधरलिंगसंगत भस्मधूसरितांग हस्तकारणपीतेक्षणाक्षतपापघस्मरतस्करोत्तम घनप्रभो त्तमकंधरेश्वर भूरथस्थित चंद्रखंडशिरोमणे ॥३६॥ गजचर्म
वर्म चराचरस्थित विष्णुचक्रविदायकं पंचवक्त्र चतुर्मुखस्तुत छंदसां गणदायकाखादितारिविनविश्वजन्मजगत्स्थितिप्रविनाशनीवनजंजपूक वरप्रदा
यक ॥३७॥ क्षणाक्षणद्रवनूपरोत्तम पादपंकजटंककाहरदेवतटिनीजूटजठीलोक कुंठितपापवृंदविकुंठ पूजितपाद मृड हरडमरुध्वनिनादित भुवनदं
वर कुंडलीश्वरकुंडलप्रिय चंडभानुसुतार्तिदायक मंडलीकृत पर्वताधिप बंडदंडित वीरपुरवर खंडनोद्धृत कांडगुरुतर मुंड षंड विराजितेश्वर खंडवासन
लोचन ॥३८॥ पुंडरीकत्वचाविभूषित वेतंडवर शुंड गुरुनिभरम्य भुजदंड धारितवरकोदंड पंडितोत्तम भंडजनहर कर्मकांडनिषूदन ॥ भक्तिदृढतर मुक्तिदा
यक गूढपादद्वयहार मूढजनता गाढहृत्तम भेदकार्क विभूषणोक्षपन्नगेश्वर सद्गलगोत्रोत्तम वासगुणगणानंदितानन नाम्यमान भवस्थिता वनता
म्रसंस्थित तस्कराधिप दीनसद्यस नाथनाथित मन्मथांतक दंदशूक फणामणिद्युतिरंजितांग दरिद्रनाशक देवदेव दयानिधे ॥३९॥ मामवाद्य धना
धिपप्रिय धेनुपुत्ररथप्रियाध्वर शिक्षक वननायकानवविनायकप्रियवाह पूजितांबुजपादानताखिलमुक्तिदायक पद्मपूजित पापभयहर पन्नग
प्रियपत्ररथवर पूज्यमान पदांबुज फणिताखिलवेदजाल फणीश्वरोत्तमकुंडलबंधमो वनवंधुरालक बिल्वपूजित बिल्वनेत्रवाणलिंगविहार शंकर ॥४०॥
भद्रदायक भस्मभूषित भक्तिदायक भीमभ्रम महेश्वरेश्वर मन्मथांतक विश्वसत्कृबरहस्त शस्तकमस्तक ॥ यक्षपक्षविवर्जितेक्षण यक्ष्मरोगविनाशक राजराज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ केचांतिके॥ उत्फुल्लारुणपद्मरागसदृशप्रोद्यन्मणींद्रप्रभां भास्वत्कोकिलकाकली रवयुते नाम्नाप्यसौ सुंदरः॥ दृष्ट्वा तां च कमेकतासु कुशलो पंचेषुबाणाहतः॥२६॥ सदाशिं० न
३४ मुखेंदुस्त्वं नयनांबुजां चलगलद्वेयौ वरो सौ युवा॥ तवालीपालीं गतिजितमरालीं च सततं शिवे व्यालीवेणीं मणिगणसदृक्षालकभरां॥ स्मरांभोधेः केलीं वनभुवि सु अ०१८
गांधर्वसरलीं विशेषाद्ध्यायंतीं स्मरसरणिकांतां स ददृशे॥ मत्तेभकुंभसदृशोरुकुचाग्रभागसंलग्नचूचुकभराधीरितोरुबिंबां॥२८॥ धंमिल्लभागकृतमल्लि
समूहगंधबंधद्विरेफचिकुरां मुकुरा भवक्त्रां॥ तस्याननेंदुपरिकल्पिकलंकशंकं राजत्सुधांशुमिवतां तिलकान्तफालां॥२९॥ आलोलमारशरकृत्तमहोरुवक्षा व्य
क्षार्चकोपिनशशाक तदाक्षजालं॥ सापि प्रमोदमदभारकटाक्षसौरी षड्विकासिमुखपंकजजातहर्षा॥३०॥ तं चापि सुंदरवरोत्तमयौवनोद्यत्सद्वृत्तगा
त्रमभिवीक्ष जगाम हर्षं॥ ताबुध्यतो ध्वतसुमन्मथबाणजालां विध्वंगकोमदनगेलिषु जातहर्षौ॥३१॥ किंचिद्विहृत्य वनमध्यनिकुंजसीम्नोसे वाभितग्न
हृदयो यतुस्तदानीं॥ तावागतावभिसमीक्ष्य ममांतिके तं त्वत्सान्निधानरशिकामथ तां च दृष्ट्वा॥३२॥ दृष्ट्वा स हर्षमधुना तमवोच मेवं तं सुंदरं मदनबा
S80 णगणाभितप्तं॥ ॥ईश्वर उवाच॥ ॥त्वं सुंदराशु भुवि भोगपरं परासु किंचिद्विहृत्य ममसद्म सुपश्यलिंगं॥ योषा तवैव भवतां कमले व विष्णो रेखास खीव
मलिनी सततं हि देव्याः॥३३॥ इत्थं मद्वचनांबुजाच्युतमहाविद्युत्प्रयातोपमं वाक्यं संश्रवणांबुजं चलभैरः संशुश्रुवे तादृशे॥ प्राणं सीद्धिनयेन पाहि मतिमान्
मागस्करः सुंदरः तुष्टाव ष्टतनुं प्रकृष्टहृदयो निष्ठावता चेतसा॥३४॥ ॥सुंदर उवाच॥ ॥नाकनाथविषयकस्तुतभेकभक्षकं हारतक्षककुक्षिसंस्थितलोकरक्षक॥
वीक्षणाक्षतमन्मथांतकपालकं मुनिसुतजीवदायकहस्तशस्त्रविरं चिमस्तकं पाहि मामरविलांतकांतकदेवदेवभवांबुधेः॥३५॥ सुरवतारका वसदुन्मुखप्रभ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णाकरघोषमहोरुहास॑वाद्यन्मृदंगवरदुंदुभिनादयुक्ते॥ कुंदेंदुसंनिभमहावरसागरोत्थ॑कंजोरुनादबदरीकृतदिङ्मुखाद्ये॥१५॥
मुग्धेवृषेन्द्रवरगर्जनतर्जितोरुमातंगसिंहहरिणीकरुणाक्षकूले॥ उत्पुच्छचामरगणोस्रमरीबृकादिदष्ट्रैः हयारिगणधावनमौलिजाले॥१६॥ वातादिघ
र्षणमहावरवेणुमौलिसंजातवन्हिशिखरारुणकांतिकांते॥ मंदगंधगंधवहबंधुरधूमतांतगं धैर्विसर्पितवरामरदेवदोरैः॥ कैलासशैलमणिगोपुरमौलिजा
लकुंभोद्यतामलमणिव्रजकांतिकांते॥ दोधूयमानसुपताकततिप्रभाभि॑ रादीपितेतिमिरहारिणिपर्वतेंद्रे॥१८॥ अदलितकदलीदलेरुभार॑सन्नारिकेल
सुरसालसुमौलिभारैः॥ आंदोलितेचसुसमीरणकारणेच॑संतारणेगिरिशिखासुसमीरकांते॥१९॥ मणिगणसुरवालुकाभिरामे॑गिरिमौलौगणवृंदतोप
युक्ते॥ गिरिगौरिमाधुरिमानुसानुभानु॑द्युतिविद्युत्प्रभभाविततनेच॥२०॥ फणिफणिमणिजालबालविद्यु॑त्प्रभयाभासितकाशितांतरेगिरेच॥ तरुणा
रुणप्रभाभिराम॑द्युतिविद्युत्प्रभशैलमौलिजाले॥२१॥ तत्सौधजालपरिकल्पितगवाक्षशिक्षा॑शिल्पेषुनाल्पमतिभिःपरिचिंतनीये॥ तस्मिन्कैलासमौले
परिमलकुसुमासारधारानुगंधद्वंद्वाभिधावप्रतिनागकुसुमामोदबद्धपादकांते॥२२॥ शांतेचांबुजवृंदबंभररवैर्युतेमिके मारुते॥ मत्पादांबुजपूजनोत्सवमतिक
श्चिद्गणोवृत्तमो॑तत्पुष्पापचयायसंप्रतिययौकैलासमौलौवनं॥ समुल्लासितयौवनोमदनकोटिकांतप्रभा॑विभासितदिगंतरोभसितभूषादिव्यांगकः॥२३॥
मदेभकरसाप्रभप्रबलहस्तदंडोज्वल॑त्त्रिपुंड्रतिलितालकोसुरवरारिसंमर्द्दनः॥ रुद्राक्षोत्तमहारकंठवलयोऽनंगांगभंगार्चकोलिंगेतुंगसरोजबिल्वकुसुमासारे
श्वसंपूजकः॥२४॥ तस्मिन्पुष्पवनेसमीरणगलत्पुष्पोच्चयोच्चद्रुमं॑क्षोद्रासारपरागरंजितमहीपीठेसुशीतेतदा॥ माकंदद्रुमपल्लवोत्सवलसद्भासंति

श्रमविधिः॥शिवस्यार्चालिंगे श्रुतिगदितभस्माक्षविधृतिः जपो रुद्रस्यार्थं शिवगदितपंचाक्षरमनोः॥६७॥विष्णुब्रह्मानलेंद्रा मुनिनृपदितिजा यस्य
लिंगार्चनाद्वै संप्राप्ताः पदवीं सदैव मुदितास्तेकर्म देवा जनाः॥ एतत्सत्यमहोत्रिसत्यमधुना वच्मीदमग्नौ शिलुः सान्निध्ये निवसामि शीतसुमहापक्षेवत
प्राप्स्यसे॥६८॥इत्युक्त्वाहरदत्तकस्त्रिजगतीनाथं प्रणम्यादरात् निस्तीर्णः सुमहान्यशोरु शयना दुर्जयिराजार्चितः॥शैवेन्द्रैर्हरभक्तिभावजनितैः सा
नंदबाष्पांबुभिः॥लोकैः साध्वितिनंदितो ममकृपापीयूषवारान्निधौ मग्नस्तान्द्विजवैष्णवाधमपशून्भस्माक्ष पूतान्करोत्॥६९॥विप्रः क
श्चन विप्रवध्यजमहादोषैर्युतो निंदितो विप्रैर्वैहरदत्तकेन सततदासं भोजितः पावितः॥ मन्नामैव शिवेति तं सकृद्दुमे मल्लिंगसान्निध्यगं विप्रा ग्रास
वरं प्रदाय वृषभं व्याघ्रत्वकं करोत्॥७०॥ एवं कलावपि भवंति ममैव शैवाः लोकायदर्शितमुमे मम भक्तिभावं॥ तेसामि सोमसुललामविदीप्तने
५९। त्राः कैलासमेत्य सुखिता निवसंति शैवाः॥७१॥शैवग्रंथानुबद्धधृतिजितजनेबृध्यततमोऽप्यभेद्यं निर्भिद्य श्रुतिगदित तात्पर्यवचनैः॥द्विजैः शैवैरंते
कलिकुपथकानुष्य जनितैः सदेहः कैलासं ममसहि शिवे यास्यति द्विजः॥७२॥कलौछंदोगोपि श्रुतिशिखर तात्पर्यवचनैः महाग्रंथो द्बुद्धैर्जयति
मतवादिद्विपकरीन्॥भिनत्त्येवं दीक्षां क्षपितसुखवृत्तिः शिवपदे शिवे दभ्रस्थाने भवति च ततोंते शिवगणः॥७३॥ ॥इतिश्री शिवरहस्ये सदाशि
वाख्ये नवमांशे हरदत्तचरिते सप्तदशोध्यायः॥१७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवाय नमः॥ ॥श्रीदेव्युवाच॥ ॥
केते भाव्याः शिवे भक्ता भव्या भव पदार्चकाः॥किं तेषां चरितं शंभो विस्तरेण वदस्व मे॥१॥ ॥श्रीस्कंद उवाच॥ ॥इति देव्या महादेवः पृष्ट

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ स्तुष्टो भुवाच तां ॥ कैलासे लास्य सदने मदनांतकरो हरः ॥२॥ ॥श्रीमहादेव उवाच ॥ ॥शृणुष्वैकमना भद्रे मद्भक्तचरितं मुदा ॥ कलावपि भवं सदाशि-
२२ त्येव मत्प्रसादाच्च शंकराः ॥३॥ शंकराः शंकरे भक्तिमनसाः कमलानने ॥ मत्स्तुत्यास्वत्त ये लोके ते भवंत्येव तारकाः ॥४॥ वराकाः पापसंघानां वरा अ० १०
काअपि शंकरि ॥ तदग्रे चरितं तेषां लोकानां विस्मयावहं ॥५॥ भविष्यंति कलौ देवि मद्भक्तचरितं सदा ॥ भक्तिं दर्शयितुं लोके मया सृष्टा महेश्वरि ॥६॥
त्रिषष्टि परिमाणास्ते भक्तिप्रामाण्यदर्शिनः ॥ तदग्रे मुनिमुख्यानां उपमन्युर्महाद्युतिः ॥७॥ भक्तिप्रभावं सर्वेषां भक्तानां वदति
स्वयं ॥ तदेतत्ते प्रवक्ष्यामि नाति संग्रहविस्तरं ॥८॥ वदामि ते मुदा देवि सदा लोके शुभूतये ॥ मद्भक्तस्य महादेवि सुंदरस्य कथाश्रयं
॥९॥ कैलासे मम देवेशि नानाश्चर्यसमन्विते ॥ उद्दाल साल कृतमाल तमाल ताल बालांबुजाल बरबिल्वसमूलमूले ॥ लिंगानुबंगव
रभूधरसंग सांग मातंग तुंग सुकुरंग किपाधिकांते ॥ जालावलीजटिलफालतलाभिराम निर्यत्कृशानु शरजाल विशालमार्गे ॥
लोलाक्ष कालकृत नील सशूलदग्ध कामांग भस्म सगिरीश्वर मौलिमूले ॥११॥ उद्यच्छशांककर संनिभ पर्वतेन्द्र श्रीमौलिलिंग
कुलधाम कलोत्तमांगे ॥ गंगातरंग भवनीरज फुल्लगंध बंधद्विरेफ वरसारसकोककांते ॥१२॥ उत्फुल्ल केतक कदंबज कर्णिकार ॥
माकूरपुष्प सहकार भवोरुवाते ॥ केकारवैः परभृताशुक शारिकानां सारंगबृंहितरवैः गिरिसानुजाले ॥ उद्घोषितांतर मुखांतर सार
भार निर्यत्प्रभाकरकरैः कलधौतशैले ॥ मुल्लीज मल्लि वर बल्लि समूहपाली शिल्लीगणोश्वर रणावृंदजाले ॥१४॥ निःसापाबा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वन्मितोपमः ॥ शिवोत्कर्षप्रमाणेन यदि प्रामाण्यदोहिनः ॥५५॥ भस्मरुद्राक्षसंपन्नाः शिवलिंगार्चकाः सदा ॥ भवामो नात्र संदेहः संत
न्मार्गोत्तमा वस ॥५६॥ ॥स्कंद उवाच॥ ॥इति वैष्णववाक्येन हरदत्तो तिहर्षतः ॥ निवेदयत्तदा राज्ञे चोलभूपं निरीक्षितुं ॥५७॥ शिव
लिंगाख्यचोलोपि तत्रागात्तेनया सह ॥ अग्नीश्वरं तथा नत्वा हरदत्तं च वै शिवे ॥५८॥ वैष्णवाँस्तान्समाहूय लि(ख्य)ख्यपत्रापि चैतयोः ॥
विस्तारमायसंतप्तं कृत्वाग्नीशस्य संनिधौ ॥५९॥ आहूय नृपतिं तत्र ब्रह्मक्षत्रविशांस्त्रियः ॥ वैष्णवाँस्तान्तथा शूद्रान्संकरान्हरदत्तकः ॥
॥६०॥ स्नात्वा कवेरजातोये भस्मरुद्राक्षभूषणः ॥ प्रदक्षिणं त्रयं कृत्वा नत्वा चाग्नीश्वरं शिवे ॥६१॥ उत्फुल्लपद्मशंकाशं तमारुह्य तदायसं ॥
ऊर्ध्वबाहुरथो वादि वेदसारवचो द्विजः ॥६२॥ पश्यत्सु जनसंघेषु वैष्णवेषु नृपेषु च ॥ ॥हरदत्त उवाच॥ ॥महादेवो देवः श्रुतिशिखरमौलि

S82

स्थवचनैः तथान्ये विष्ण्वाद्या विधिहरिहरेंद्रानलयमाः ॥ महादेवाज्जाताः शृणुत वरसोमेन जनिताः" अतो वेदैर्वेद्यो भवति शिव एकः शिवकरः ॥६३॥
मखानामेवायं प्रभुरखिलविश्वाधिक हरो" महर्षिर्वेदादौ स्वरजनिततारः परशिवः ॥ यतो ब्रह्मेंद्राद्या हरिरविरहो रुद्रनिवहाः" प्रसूता ध्येयोयं श्रुतिशिखर
वाक्यैः परशिवः ॥६४॥ ऋतं सत्यं देवः पुरुषपरमो भूतहृदयो" नमोंतानां शेषी श्रुतिवर महारुद्रवचसा ॥ खेरंतर्ध्येयो भवति स हि भर्गेण वचसा" द्विजैर्गा
यत्र्यां च प्रतिपदमुपास्यः परशिवः ॥६५॥ यतो वाचः शंभोर्भवति च निवृत्ताश्च मनसा" ह्रीमंतं दोयस्माद्भवति जनतास्वेव निपुणाः ॥ जगद्यस्माज्जातं प्रभव
ति महेशे न जनितं" अतस्तेतस्मिन्यद्भवति च विलीनं परशिवे ॥६६॥ द्विजानां जाबालश्रुतिशिखरवाक्यैश्च विहितो" महाव्रैविद्योक्तः श्रुतिगदितवर्णा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्याःस्वप्नेविवृत्तोरुवक्त्रेदीपोपमंमहत्॥४०॥मयैवप्रेरितंतेजःप्रविशत्तन्मरंदशांके॥सादधारतदागर्भंवर्धमानंदिनेदिने॥४१॥
ततःसुषावकालेन कुमारमिवपार्वती॥सोप्यवर्धतकालेनपित्रोरानंददायकः॥४२॥पांसुक्रीडास्वपिशिवंपांसव्यंसोप्यपूज
यत्॥भस्मरुद्राक्षधृङ्नित्यंसवयोभिश्चबालकैः॥४३॥तत्पिताप्राहरत्तंचनित्यंपुत्रंशिवार्चकं॥उपनीतःसकालेनवेदानृज
ग्राहशास्त्रवित्॥उग्रप्रसादादत्युग्रात्तस्याभूद्बुद्धिरुत्तमा॥सस्नातोसह्यजातोये कृतनित्यक्रियोवटुः॥४५॥भस्मनित्यं[दिव्य]त्रिपुंड्रं
कोरुद्राक्षस्रगलंकृतः॥श्रीमदग्नीश्वरंनत्वातथान्यान्स्थांभवानृयतीन्॥४६॥अग्रहीत्सर्वविद्यास्ताःविद्याधिपपदार्चकः॥तत्पि
ताप्राहरत्तंचनान्नतोयप्रदायकः॥४७॥तन्माताप्पुत्रवात्सल्याद्गृहप्रांतेचतंसदा॥समाहूयतथैकांतेददात्यन्नंदिनेदिने॥४८॥
भिक्षित्वासोपिविप्रेभ्योगृहीत्वान्नमभूभुजत्॥कालेननिधनंप्राप्तःतत्पितानरकंगतः॥तस्योचितक्रियापुत्रश्चकारद्विजपुंगवैः॥
मात्रावासीद्गृहेनित्यंशिवमभ्यर्च्यतत्तदा॥५०॥विवाहायमतिंचक्रेकन्यांकोप्यददाद्द्विजः॥तामुद्वाह्यमहासोमेराराध्याश्रमतत्प
रः॥५१॥देवंलिंगेर्चयन्नित्यंत्रिकालंभस्मभूषणः॥अग्नीश्वरंतथानत्वासप्तग्रामाणिसंचरन्॥५२॥तत्रतत्रमहेशानंनत्वायाति
सनित्यशः॥तस्यभक्तिंतथाज्ञात्वादह्यमानाहिवैष्णवाः॥५३॥ऊचुस्तंक्रोधताम्राक्षाःरक्षाइवद्विजाधमाः॥ ॥वैष्णवाऊ
चुः॥ ॥भोभोविप्रार्भकत्वंहिमहादेवपदार्चकः॥शिवोत्कर्षेत्वमस्माकंप्रमाणंकुरुमाचिरं॥५४॥नोचेत्त्वांतप्तचक्रांकोभवत्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 कणानिस्वानशोभुभ्यगणिकावृते ॥२३॥ नक्तदीपावलीजाले रुद्यल्लिंगालयैर्वृते ॥ महादेवमहोद्योग अभिषेचनकोद्यतैः ॥२४॥ पुरुषैश्चावयो 
 श्चैवनानासंभारपाणिभिः ॥ नारिकेलेक्षुसाराम्रफानसैर्लिकुचैरपि ॥२५॥ मोचापंचामृतक्षीरघृतक्षौद्रसुशर्कराः ॥ तिलतैलदधीभिश्च गंधपु 
ष्पाक्षतादिभिः ॥२६॥ बिल्वपंकजमंदारमल्लीसरविराजिते ॥ नैवेद्यशर्करापूपस्वाद्वन्नपायसैरपि ॥२७॥ धूपदीपावलीभास्वन्नीराजितशि
वालये ॥ तांबूलवीणावेणूथडुंदुभ्याघातपूरिते ॥२८॥ शिवालयेषुलिंगाग्रनृत्यद्धारांगनायुते ॥ विच्छिन्नसंधिकरण वरगोपुरमंडपान् ॥२९॥
सुधाधावलितोदारान् पाषाणैरिष्टकान्वितान् ॥ नदीसरोवरस्वच्छतीरबंधोरुमंडपैः ॥३०॥ छत्रचामरपंक्तीभिर्वाहनानांच कारणैः ॥
तद्भित्तिचित्रीकरणरुद्रक्रीडादिलेखनैः ॥३१॥ वृषोत्सवरथारूढशिवोत्सवनिरीक्षणैः ॥ कुर्वंतिचोलावनिपास्तेषोडश महेश्वरी ॥३२॥ एवं
 कैंकर्ययुक्तास्ते चोलास्तत्रैवशंकरि ॥ तस्मिन्देशेविप्रवरोहरदत्तोमदंशजः ॥३३॥ अशैवगणपंचास्यो भविष्यति महेश्वरि ॥ तत्रकंसपु
रेदेविअग्निशेभक्तिमान्द्विजः ॥ ३४॥ बभूवहरदत्ताख्यो मदंशोयंद्विजोत्तमः ॥ श्रीवांछावासिनः कन्यांभस्मरुद्राक्षधारिणः ॥३५॥ शैवस्य
तस्यसामातादत्ताशैवायसातदा ॥ तत्पिताकलिकालुष्यबलतोमोहमास्थितः ॥३६॥ तप्तचक्रांकितैःसार्धंतप्तचक्रांकितोभवत् ॥ मृदो
र्ध्वपुंड्रंसच्छिद्रं दधारकिलपापतः ॥३७॥ द्राविडानिभषन्पापो श्रुनामिवनिरंतरं ॥ एवंस्थितेथविप्रस्य महीलाकमलोपमा ॥३८॥ वीथीस्थ
विप्रपत्नीभिः ययौनित्यंशिवालयं ॥ स्नात्वामरुद्वृधातोये नत्वाचाग्नीश्वरंग्रहात् ॥३९॥ सखिभिःसा ययौगेहं भर्त्रासंताडितापिसा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दारामलक्यके: ॥ शोभिते सह्यजातीरे विनिंदित्तत्रिविष्टपे ॥ ७ ॥ कास्मीररससर्वस्वसारभूतोत्तमोत्तमं ॥ श्रीकंठादि महालिंग सेवितं ती
रयोर्द्वयो: ॥ ८ ॥ जंबुकेशं मातृभूतत्रिणरत्नेश्वरालये ॥ ऐरावते पुष्पवनेधृतेशं च शमीवनं ॥ ९ ॥ जप्येशं श्रीप्रयाणां च क्षीरिणी वि
पिनं शिवे ॥ श्रीसुंदरपुरं दिव्यं दक्षिणावर्त्तमेव च ॥ १० ॥ कुंभयोणं स्वामिशैलं दुर्गेशं धनुकेश्वरं ॥ मध्यार्जुनं तथा पुण्यं नागेशं गो
वरेश्वरं ॥ ११ ॥ कोटीशं मंगलेशं च तथाम्रं चद्युतीश्वरं ॥ तथैव केसनगरं श्रीवांछं तेजनीवनं ॥ १२ ॥ श्वेतारण्यं मयूरेशं श्रीकालहर
णं तथा ॥ छायावनं च कुद्दालं वेदारण्यं सरांबिके ॥ १३ ॥ कमलालयमीशानी लिंगालयमनुत्तमं ॥ अन्यानि दिव्यलिंगानि तस्मि
न्चोले महेश्वरी ॥ १४ ॥ निचोलभूतपृथ्व्यास्ते देशोयं भारतेंबिके ॥ तस्मिन्सह्योद्भवातीरे ग्रामसाहस्त्रशोभिते ॥ १५ ॥ द्विजाग्रहा
रसम्पन्ने नानासस्यविराजिते ॥ वेदवादरतैर्विप्रै: शास्त्राध्ययनकोविदै: ॥ १६ ॥ मखिभि: सुखसंवासै: सेविते जनसंयुते ॥ भस्म
रुद्राक्षलिंगार्चानिरते रूपसेविते ॥ १७ ॥ मठोपकरणैर्दिव्यैर्यत्यावसथकल्पितै: ॥ यतिभिर्नियतैश्शैवैयो शिव ज्युपसेविते ॥ १८ ॥ तत्त
च्छिवालयोद्भूतदिव्यतूर्यविनादिते ॥ नरनारीगणाकीर्णे ब्रह्मविट्शूद्रसंकरै: ॥ १९ ॥ विपणापणवीथीभि: शोभिते वणिजैरपि ॥ फ
लपुष्पावनमितवनराजीविराजिते ॥ २० ॥ राजीवहल्लककोल्लासिसरोवरविराजिते ॥ छायावृक्षाक्षतच्छायामंडपैश्चविराजिते ॥ २१ ॥ पा
नीयशालानिरतपानीयद्रुह्रुषितेजने ॥ दिव्यान्नसत्रसंघुष्टद्विजराजोपशोभिते ॥ २२ ॥ महेश्वररथोद्योगकर्षजनविराजिते कणात्कं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ प्रशीतस्य निवारणाय॥५२॥ ध्यात्वा शिवं तत्र निविश्य तस्थौ कैलासदेशा वृषभश्च देवाः॥ तमेत्य संस्तुत्य यदा पुरास्ते कालौ गमत्वं वृष सदाशि० न
३० भेधिरोह॥५३॥ इति प्रचीर्ण प्रभु आत्मनि त्वे विचिन्त्य शिष्यान्निजगाद मोदात्॥ यूयं चतुर्दिक्षु मठेषु लिंगे स्साकमवसान्त्वेत्युपादि अ०१६-१७
श्य हर्षात्॥५४॥ विवेश पृष्ठं वृषभस्य हस्तं संगृह्य वैरिंच पर्यागदत्तं॥ सर्वेश्वदेवै रभिनंद्यमानः स शंकरस्तं निजधामदेवः॥५५॥ विवेश
कैलास निवेशमच्छं सच्छंदवृंदारकवृंदपूर्णं॥ तदादितच्छंकरभाष्यमेतद्भोजनं मुक्तिपदं ददाति॥५६॥ एतत्तो विहितं देवि मुख्यं
मुक्तिपदावहम्॥ शांकरं चरितं लोके भविष्यति न संशयः॥५७॥ इति श्रुत्वा महेशानी तच्चरितं शंकरस्य च॥ पुलकांकुर संहृष्टा प्रणना
म महेश्वरं॥५८॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे शंकरप्रादुर्भवे षोडशोध्यायः॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
584 श्रीसदाशिवाय नमः॥ ॥श्रीशिव उवाच॥ ॥पुनः कलौ सहस्राब्दां चितयानंतरं शिवे॥ भूसुरो भासुराचारो भ
वोद्भवपदार्चकः॥१॥ भस्मरुद्राक्षसंपन्नः पंचाक्षरजपादरः॥ रुद्रसूक्तजपासक्तः त्यक्तान्यसुरपूजनः॥२॥ शिवलिं
गार्चनपरः शैवः शिवपदार्चकः॥ तस्यांगसंगताः शैवा भविष्यंति कलावपि॥३॥ मम भक्त्यंतरासंग पापसंघैकभं
गकः॥ चोलेध भविता देशे सह्यजातीरशोभनः॥४॥ लिंगसंघैकसुभगः शिवक्षेत्रवराश्रयः॥ तत्तीरे चंपकाशोकना
रिकेलोरुफासुनैसैः॥ लिकुचैर्वरमोचाम्रतमालद्रुमशोभिते॥ नानाशिवालयोत्तुंगगोपुराग्रविराजिते॥६॥ बिल्वमंदारपुन्नागकोवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परायणः शतरुद्रावर्तनैश्च तोयेण भसितेन च ॥ बिल्वपत्रैश्च कुसुमैः नैवेद्यैर्विविधैरपि ॥ त्रिवारं सावधानेन, गच्छ सर्वजयाय च ॥ त्वद
र्थे कैलासाचलवरसुपालीगतमहा समुद्यच्चंद्राभस्फटिकधवलं लिंगकुलकं ॥ समानीतं सोमो घृतविमलमोत्यर्चयपरं कलौ लिंगार्चा
यां भवति हि विमुक्तिः परतरा ॥४२॥ स शंकरो मंडणनाममस्करी मयस्करं तस्करवर्यभार्ये ॥ संगृह्य लिंगानि जगाम वेगवान्भूमौ सुबु
द्धा हलमिश्रजैनान् ॥४३॥ तद्योगभोगवरमुक्तिसुमोक्षयोगलिंगार्चनात्प्राप्तजयः स्वकाश्रमं ॥ तौ वैविजिग्य तरसाक्षतशास्त्रवादे मिश्रा
न्सका ''''मथसिद्धिमाप ॥४४॥ कांच्यां तपःसिद्धिमवाप्य दंडी चंडीशरूपो जगदाकलय्य ॥ ब्रह्मेक्यविद्यां रचयन्सभाष्यं शा
रीरकं नाम जगाद मोदात् ॥४६॥ व्यासेन संभाष्य समेत्य काशीं तम्मण्डनार्यं म परिखन्ड्य, वाणीम् ॥ जेतुं मशरीरान्तरमेत्य का
मं कलामजगम्[दृष्ट]मदावराम्यः ॥४७॥ पुनः स्वकं देहमवाप्य तूर्णम् पूर्णं निजं कामयथाकलय्य ॥ वाणीं सजित्वे वसुताम्मठे स्वे शृंगगेरि
कारव्ये प्रणिवेश्य तुष्टः ॥४८॥ कापालिकमक्रकचारमहोग्रम् कर्नाटदेशे निहितं विजित्य ॥ गोकर्णमासाद्य तमीड्यमीड्यं स्तु
त्वा महाराष्ट्रपदं प्रपेदे ॥४९॥ तत्रस्थितान् भास्करभट्टमुख्यान् तं नीलकंठं च तृणीकरिष्यन् ॥ काश्मीरमासाद्य स शारदाया
स्सर्वज्ञपीठं पदमारुरुक्षण्[न] ॥५०॥ तत्रस्थितान् सं प्रतिसर्वपंडितान् चार्वाकमुख्यान् विपुलान्विजित्य ॥ सद्दक्षिणद्वारस्थकपाट
भेदं कृत्वा सदे[वी]विनिशंक्यमानः ॥५१॥ [सम्यक्] द्रा निराकृत्य निविश्य पीठे ततो बदर्याश्रममापदण्डी ॥ नारायणं तत्र तपज्जतोघं[तपज्जलौघ] कुण्डम्

पंक्ति ३। त्वद्भासावै सोमसूर्यानलेंद्रा भीषे वोदेत्येष सूर्याश्चदेवः॥ त्वंवेदादौ स्वर एको महेशो वेदांतानां सार वाक्यार्थ वेद्यः॥३०॥

शिवरह०९ श्रीशंकरउवाच॥ ॥सत्यंसत्यंनेहनानास्ति किंचिदीशावास्यं ब्रह्म सत्यं जगद्धि॥ ब्रह्मैवेदं ब्रह्म पश्चात्पुरस्तादेकोरुद्रोनद्वितीयो वतस्थे सदाशिव० न०
२९ ॥२७॥ एकोदेवः सर्वभूतेषु गूढो नानाकारोभासि भानैस्त्वमात्मा॥ पूर्णापूर्णो नामरूपैर्विहीनो विश्वातीतो विश्वनाथो महेशः॥२८॥ भू अ०१६
तं भव्यं वर्तमानं त्वयीशो मा मान्यं वै देशकालादिहीनः॥ नोते मूर्त्ति र्वेदवेद्यस्त्वसंगः संगी वात्वं लिंगसंस्थोविभासि॥२९॥ वेद्यो भेदः स
र्वभूताद्यविद्यो भिद्येद्दृष्ट्या वेत वहत्तमोद्य॥ ओंकारार्थः पुरुषस्त्वंऽऽतंच सत्यज्ञानानंदभूमासि सोम॥३१॥ बद्धोमुक्तो नासि संगीष्व सं
गः॥ प्राणंप्राणो मनसांस्त्वंमनश्च॥ त्वत्तोवाचोमनसा संनिवृत्तास्तवानंदज्ञानिनोबुद्धभावाः॥३२॥ त्वत्तो जातं भूतजालं महेश त्वयाजीव
त्येवमेवंविचित्रं॥ त्वय्येवांते संविशत्येवविश्वं त्वांवैकोवास्तुवते स्तव्यमीशं॥ किंचिज्ज्ञात्वा सर्वभास्येवबुद्ध्या त्वामात्मानं वेद्मिदेवंम
४०८ हेशं॥३३॥ ॥श्रीईश्वरउवाच॥ ॥इतिशंकरवाक्येन विश्वेशाख्यादहं तदा॥ प्रादुर्बभूवंलिंगात्स्वादलिंगोपि महेश्वरि॥३४॥ त्रिपुं
ड्रविलसत्फालचंद्रार्धकृतशेखरः॥ नागाजिनोत्तरासंगो नीलकंठस्त्रिलोचनः॥३५॥ वरकाकोदरानद्ध राजद्धारस्त्वयां बया॥ तमब्रुवं
महादेवि प्रणतंयतिनांवरं॥३६॥ शिष्यैश्चतुर्भिश्च युतं भस्मरुद्राक्षभूषणं॥ ॥श्रीईश्वरउवाच॥ ॥मदंशाजस्त्वंजातोसि भुविवा
द्वैतसिद्धये॥ पापमिश्राश्रितैर्मार्गैर्निंदुबुद्धिबौद्धकैः॥३७॥ भिन्नेवेदैकसंसिद्धे अद्वैते द्वैतवाक्यतः॥ तद्भेदगिरिवज्रस्त्वं संजातोसिम
दंशतः॥३८॥ द्वात्रिंशत्परमायुस्ते शीघ्रं कैलासमावस॥ एतं त्वप्रतिगृह्णाण त्वं पंचलिंगं समुपूजय॥३९॥ भस्मरुद्राक्षसंपन्नः पंचाक्षर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रोचकाः॥प्रत्यक्षवादकुशलाः शून्यभूताः कलौशिवे॥११॥मिश्राः शास्त्रमहाशस्त्रैरद्वैतोच्छेदिनोंबिके॥ कर्मैवपरमंश्रेयो नैवेशःफलदायकः
॥१२॥इतियुक्तिपरामृष्ट वाक्यैरुद्बोधयंतिच॥तेनघोराःकुलाचाराः कर्मसाराभवस्तथा॥१३॥तेषामुद्धारणार्थाय सृजामीशोमदंशजः॥केरले
शलनग्रामेविप्रपत्न्यांमदंशतः॥१४॥भविष्यतिमहादेवि शंकराख्योद्विजोत्तमः॥उपनीतस्तदामात्रा वेदान्सांगान्ग्रहिष्यति॥१५॥अब्दाव
धिततश्शब्दे विहृत्यससुतर्कजां॥मतिमीमांसमानोसौ कृत्वाशास्त्रेषुनिश्चयं॥१६॥वादिमत्तद्विपवरान्छंकरोत्तमकेसरी॥भिन
त्येवमहाबुद्धान्सिद्धविद्यानपिद्रुतं॥१७॥जैनान्विजिग्येतरसातथान्यान्कुमतानुगान्॥तदामातरमामंत्र्यपरिव्राट्सभविष्य
ति॥१८॥परिव्राजकवेषेण मिश्रानाश्रमदूषकान्॥दंडहस्तस्तथाकुंडीकाषायवसनोमलः॥१९॥भस्मदिव्यत्रिपुंड्रांकोरुद्राक्षा
भरणोज्वलः॥तारुद्रार्थपाशिणो शिवलिंगार्चनप्रियः॥२०॥स्वशिष्यैस्तादृशैःघुष्यन्भाष्य वाक्यानिसोंबिके॥मद्दत्तविद्य
याभिक्षुर्विराजतिशशांकवत्॥२१॥सौद्वैतोच्छेदकान्पापान्बुद्ध्याद्याक्षिप्यतर्कतः॥स्वमतानुगतान्देविकरोत्येवनिरर्गलं॥२२॥
तथापिप्रत्ययस्तेषांनैवासीछ्रुतिदर्शनैः॥मिश्राःशास्त्रास्त्रकुशलाःतर्ककर्कशबुद्धयः॥तेषामुद्बोधनार्थायतिष्येभाष्यं
करिष्यति॥भाष्यघुष्यमहावाक्यैःतिष्यजातान्हनिष्यति॥२४॥व्यासोपदिष्टसूत्राणांद्वैतवाक्यात्मनांशिवे॥अद्वैतमेवसू
त्रार्थंप्रामाण्येनकरिष्यति॥२५॥अविमुक्तेसमासीनंव्यासंवाक्यैर्विजिग्यच॥शंकरंस्तोतिहृष्यात्माशंकराख्योथमस्करी॥२६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ भ वेकतरणं मह्यं वदे तत्प्रभो॥ त्वद्भावानुगता भवोद्भव भवांभोधेः श्रुतं तारकं भूमानंदघन प्रसीद भगवन् त्वद्भावयुक्तास्म्यहं॥३२॥ योषा सदाशि० नं
२८ प्रमोषरहितः सुकृती कृतीस भाषासुवाप शिवं स्तुवतेविशेषात्॥ संश्रोषितावनिचयास्तव भक्तिभावैरुद्घोषित त्रिभुवनाप्यविशेष अ० १६
जाताः॥३३॥ ॥इतिश्री शिवरहस्ये नवमांश्ये सदाशिवाख्ये शिवगौरीसंवादे विष्णुब्रह्मकृत शिवस्तुतिर्नाम पंचदशोध्याय॥१५॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवायनमः॥ ॥श्रीस्कंद उवाच॥ ॥तदागिरिजयापृष्टः त्रिकालज्ञस्त्रिलोचनः॥
भविष्यच्छिवभक्तानां भक्तिं संवीक्ष्य विस्मयन्॥१॥ मौलिमांदोलयन्देवो बभाषे वचनं मुने॥ शृणुत्वमेभिर्गणपैः मुनीशैश्च सुरैस्तथा॥२॥
प्रभावंशिवभक्तानां भविष्याणां कलावपि॥ ॥श्रीईश्वर उवाच॥ ॥शृणुदेवि भविष्याणां भक्तानां चरितं कलौ॥ वक्ष्यामि संग्रहेणैव श्रवणा
S86 द्भक्तिवर्धनं॥ गोपनीयं प्रयत्नेन नाख्येयं यस्यकस्यचित्॥ पापघ्नं पुण्यमायुष्यं श्रोतॄणां मंगलावहं॥४॥ पापकर्मैकनिरतान् विरता
न्सर्वकर्मसु॥ वर्णाश्रम परिभ्रष्टान्धर्म प्रवणान्जनान्॥५॥ कल्पाब्धौ मज्जमानांस्तान्दृष्ट्वानुक्रोशतोंबिके॥ मदंशजातं देवेशि कला
वपितपोधनं॥६॥ केरलेषु तदा विप्रं जनयामि महेश्वरि॥ तस्यैव चरितं तेद्य वक्ष्यामि शृणु शैलजे॥ कल्पादि मे महादेवि सहस्रद्वितयात्परं॥
सारस्वतास्तथा गौडा मिश्राः कर्णाजिनाद्विजाः॥८॥ आममीनाशना देवि आर्यावर्तानुवासिनः॥ औत्तरा विंध्यनिलया भविष्यंति मही
तले॥९॥ शब्दार्थज्ञान कुशलाः तर्ककर्कशबुद्धयः॥ जैनाबौद्धा बुद्धियुक्ता मीमांसानिरताः कलौ॥१०॥ वेदबोधद वाक्यानां मन्यथैव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तव॥ एवं ते कथितं युगोद्भवमहाधर्मं गुणं चागुणं॥ श्रुत्वा हृष्टतरा भवाशु गिरिजे कैलासमौलिप्रिये॥२५॥ सारं ते प्रवदाम्यहं पुनरपि त्वं तूर्णमा
कर्णय॥ निस्तीर्णा हि त एव भारभुवने मत्पादपूजादरा॥ कृतत्रेतातांता अनशनतपोभिश्चिरतरं॥ मखादौ दीक्षायामुपसदि हि शिवे द्वापरयुगे
॥२६॥ कलौ क्षीणे धर्मे प्रभवति क्षणार्धे क्षतधियां॥ शिवार्चायां पुण्यं मम भवति नाम्नैव विपुलं॥ नाम किं मम तारणे कलियुगे गंगेव
पापापहं॥ किं दानैर्मखजालवेदपठनैस्तीर्थाटनैर्नापि किं॥२७॥ मल्लिंगं यदि दृष्टिसंगतमुमे भाग्यानि सूते कलौ॥ तेनापारतपःक्रि
यादि चरणं सायं प्रदोषे भवेत्॥ मल्लिंगालयतुंगगोपुरमहाशृंगाग्रसंवीक्षणैः॥ तत्कुंभस्पृशि वातपोतकवरैः पुण्यैः कथाकर्षणैः॥२८॥
चंडालास्च पशुश्च पुल्कसनराः संकीर्णजात्युद्भवाः॥ तेवै शंकर स्थावरा अपि चरा मल्लोकवासाः कलौ॥ मदुत्सवविलोकिनां सुकृतपुंज
मेतत्कलौ॥ भवेत्तविभवाधिको प्रभवते च नीचो जनः॥२९॥ अनंतमहिमास्पदं भुवि कलौ हि लिंगार्चनं॥ करोत्यपि च पश्यति सममुमे त
यो वै फलं॥ कांतारे निवसंति शांतमनसा स्वांतहृदश्चास्थितं॥ नंकालांतकमंधकांतकमुमाकांतं समर्च्यादरात्॥३०॥ कोलप्रायमहान्वलोत्तरक
लौ तत्कीलजालानल॥ ज्वालादाह विवर्जिता जवयुतास्तिष्ठंति लोकोत्तराः॥ ॥श्रीस्कंद उवाच॥ ॥एवं सा शैलकन्या श्रुतिवरशि
खरोत्तंसमसद्वक्त्रधारां॥ संश्रुत्वा प्रमथाधिराज मगजा वाचं बुभूषे पुनः॥ भाव्यानां कलिकालजातजनुषां भक्तिप्रभाविस्तरां॥ श्रोतुं भव्य
चरित्रमद्भुततरं देव्येच देवोदितं॥३१॥ ॥देव्युवाच॥ ॥के भाव्या भव्यरूपास्त्वयि शिव भजनाद्भावपूताश्च भावास्तेषां किं चरितं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ दिदंजगन्मम वरोदरान्निसृतः॥१७॥ विष्णुर्जिष्णुर्भविष्णुर्मदुदरपिठरीपीठसंस्थोरुलोकान् संवीक्ष्यैवसुरासुरव्रजहरब्रह्मेंद्र नारायणान् ॥ सदाशि० नं०
२७ द्वीपाब्धिप्रवरान्नदीगिरिवनं किं वेत्युमेविस्मयन्नयीपठदिमं स्तवंश्रुतमघौघनाशायहि॥१८॥ प्राणंशीर्विधिरप्युमेहरिमथोदृष्ट्वोदरान्निसृतं॥ अ०९५
चास्तौषीन्मम पादपंकजलसद्भृंगां गसंगोपमः॥ प्रहृष्टैस्वैर्वदनच्युतोरुसुरसानंदोत्थसत्कंदली वाचामां सुरसायनोत्तरझरीपूरेणपश्यांबिके॥१९॥
पक्षाधीशाहरवं वलक्षभासिता नंगागमुक्षास्थितं पक्षींद्रप्रियवाहपूजितमुमावक्षोजशैलप्रियं॥ भिक्षापूर्णकपाल पाणिसुरना पक्षस्थितं त्वांभजे
त्र्यक्षं दक्षसुशिक्षकं पुरहरं चक्षुश्रवाकल्पकं॥२०॥ मातंगत्वमलं कृतांगमगजाकांतं कुरंगांकधृक् हारीभूतभुजंगराजविलसद्गंगाकपर्दोज्वलं॥ली
५०७ लांगीकृतलिंगसंगतमहा फालेपतंगस्फुरज्ज्वालालोलवरांग भंगसुमहाद्धिप्युत्तमांगं भजे॥२१॥ हरपुरहरघोरकाकोदरहारावभवोद्भवांतथार्त्तिप
रिहरकराघशंकर त्रिजगद्बंधविरामदेवपाहि॥ भवतवविभवावलोकभावाभवनाशाय किलप्रबुद्धभावाः॥ प्रभवाय विसृष्टिसंस्थितौ ममकिं चि
त्वयिभावमादधस्व॥२२॥ शंभोबालेंदुचूड द्युतिविजितदिशस्तोमसीमानुधाम प्रेमातेमहिमावलोक नविधौकाहं हरिर्वाहरः॥ विश्वाधीश्वरवेदजाल
सुमहानिश्वासविश्वासिनं तद्दातुं प्रभवेद्भवान् प्रभुरहो किंवच्मितत्तेग्रतः॥२३॥ ॥श्रीईश्वरउवाच॥ ॥ तद्ब्रह्मस्तुतितोषितोहमगजे तं चा
ब्रुवंलोकयन्तस्मैवाच मिमामवादिवमिमं तांवैश्टणुष्वांबिके॥ तेनैवाभुविनिर्गतोविधिहरीलोकं चसृष्टुं तदा पातुंमामभितः प्रणम्यससृजे
ब्रह्माहरिः पात्यपि॥२४॥ अगाधबोधवेदजालमेवते निसृष्ट ~~निसृष्ट~~ मष्टमूर्त्तिनामया॥ ततोविसृष्टिरश्रुते भवेक्षवायपूरिणी भवोद्भवार्चन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहर्निशा वर्षजातं युगाश्चत्वार एव हि ॥७॥ सर्वं चराचरं दृष्ट्वा विस्मयोत्फुल्ललोचनः ॥ हरिस्तुष्टाव मां देवि तदा मदुदरे स्थितः ॥८॥ प्रणम्य
प्रांजलिः प्राह धृतरुद्राक्षभूतियुक् ॥ सम्यगाकर्णया पर्णो मम विष्णुः कृतां स्तुतिं ॥९॥ तया स्तुत्या सुप्रसन्नः तमपानाद मोचयं ॥ अधरेंद्रियजा
तत्वाद धोक्षज इति स्मृतः ॥१०॥ ॥विष्णुरुवाच॥ ॥उग्रोनुग्रोसि शंभो पुरहर भगवन्नंधकारेक पद्दे नूभूतेशामरपाल शंकर महाग्रा
सोसि वेदैरितः ॥ मां पाहीश्वर सामि सोमाहक लालंकार मौले हर स्वामिन्देव दयानिधे करुणाया त्वं शर्व सर्वेश्वर ॥११॥ हे मन्मथांतक महे
श्वर देवदेव श्री वामदेव जितकाम उमासहाय ॥ व्योमादिभूम श्रुतिसीम सुखादिधाम सोमेस्तु वामहर सोमललाम पाहि ॥१२॥ भो भर्ग
त्रिजगच्छरण्य करुणा तारुण्य वारांनिधे हे क देवदानवसुराध्यक्षाद्य संसेवितं ॥ वीक्षासिक्षित मन्मथांतक महादक्षादि दीक्षापहृद्दक्षा
ध्यक्षभगाक्षिनाशक महादेवाघसंवीक्षय ॥१३॥ जटाजूटाभूषा तव सुरसरित्पूर मसकृत् महाघोटीधाटी श्रुतिवचनकोटी रक विभो ॥ वधू
टी शैलाजा तरुण शशिचूडाल भगवन्न नाथं मो शंभो सुखयतु सनाथा तव कृपा ॥१४॥ वेदाश्च सारथिवर चक्रे कुंदुष्मास्यंदनक्षितिधरा
त शरा शनेज्य सोमाग्निविष्णु शर कृंतपुरादि कस्त्वं, जेता रथे ध्वधिपतिः सुरसैन्यपालः ॥ पश्यन्पश्यामि शंभो तव वर करुणा पारपूरैक
राशीं वाराशी नमरासुरद्विजवरा लोकांश्च लोभ्यानपि ॥ मां निस्तारय विस्तरोरुजठरी कांतारतस्त्वं विभो विभ्यं तं करुणा रुणाद्धि यदि ते चित्ते
न हन्तो हर ॥१६॥ अरीरचदिमं स्तवं मुरहरो अनेनांबिके ह्यशीरमदथोत्थितो मम मुभक्तिपूरादरः ॥ भीभरदथांज सामम पदाब्ज पूजोत्सवे रबीभर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ २६ नःसृष्टिं स्वकीयां सृजन्॥ एवं रुद्रसमुद्भवा विधिभवा सृष्टिप्रतिष्ठा कथि॑ एवं कल्पपरं परासु तेहरिहरा ब्रह्मादयश्चांबिके॥२९॥ सदाशि० न० अ० १४
अन्योन्यं गुरवो भवंति जगतां संत्रा पासंस्थापरा॑ नाशा यांतिमकालकेपि सुमहारुद्रो भवेदंबिके॥ तद्ब्रह्मोद्भव भस्मसंगतमहा
वामांगतस्तं पुनः॑ मद्भूर्भस्थितविष्णुमेव सुमहारुद्रं च मत्कालतः॥३०॥ नानेवाश्रु विसृज्यवेदमखिलं दत्वैव तद्ब्रह्मणे॑ तत्कालोत्तमसंभवं च
सुमहारुद्रं करोम्यंबिके॥ स्वच्छंदं पुनरेवसर्वजगती संपूरणे केवलं॑ मत्कालानलकीलदग्धमवनीजालं सृजाम्यंबिके॥३१॥ ब्रह्माहरिर्हर
सुरास्त्रिजगत्प्रतिष्ठाः सृष्ट्यंतपालनविसर्गकरा भवंति॥ पूर्वं यथैव ममचित्तवशानुगास्ते एवं तवाद्य कथिता नियतिश्च गौरी॥३२॥ ॥
५९० इतिश्रीशिवरहस्ये सदाशिवाख्ये नवमांशे ब्रह्मरुद्रसृष्टौ चतुर्दशोध्यायः॥१४॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीशिवायनमः॥ ॥
श्रीदेव्युवाच॥ ॥ दामोदरस्तवोदार उदरोदरिसंस्थितः॥ अवात्सीत्स कियंतं वै कालं कालविनाशन॥१॥ तन्मह्यं कौतुकवतीं वाच
मामोचयाधुना॥ ॥श्रीस्कंद उवाच॥ ॥ इत्थं देव्या तदा पृष्टो महादेवोभ्युवाचतां॥२॥ ॥श्रीईश्वर उवाच॥ ॥ शृणु मे
कौतुकं देवि कमलामललोचने॥ विष्णुर्बभ्रामतत्रैव कल्पे मदुदरस्थितः॥३॥ सागरान्सरितः शैलान्द्वीपान्वनपुराणि च॥ देवादीन्स
सुरांश्चैव भूतभव्य मनुं तथा॥४॥ सशक्रभृगुकादिग्रहान् सोमसूर्यांश्चऋक्षकान्॥ गंधर्वाप्सरसः सिद्धसाध्यान्वस्वश्विनौ तथा॥५॥
स्वसमानान्तथा विष्णून्ब्रह्मरुद्रमुनींस्तथा॥ वेदाश्चत्वार एवैते वेदांगाः शास्त्रजालकं॥६॥ सर्वभूतं च भव्यं च कालाकल्पोतु यक्षकाः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यः सागराघोरा भूतानां वर्णधर्मकं ॥१८॥ आश्रमाणां च वर्णानां धर्माधर्मं च कृत्स्नशः ॥ देवासुरविसृष्टं च नृपाणां च परंपराः ॥१९॥ यान्येव
प्राक्तनयुगे तान्येवागामिकेपि च ॥ भवंति मन्नियोगेन धातुर्बुद्धिप्रदानता ॥२०॥ सोपि सृष्ट्यभिवृद्ध्यर्थं रुद्रं ध्यायति तत्र हि ॥ तन्मौ
लिपद्मं निर्भिद्य रुद्रः कालाग्निसंभवः ॥२१॥ नानार्ति (ननर्त) चाग्रतस्तस्य शूलहस्तो दिगंबरः ॥ तं दृष्ट्वा चाग्रतो रुद्रं नृत्यंतं शूलपाणिनं ॥२३॥
उत्थायाभिप्रस्तत्येवं प्रणम्याथ मदंशजं ॥ मन्वानस्तं चतुष्पाद्वसृष्टिविस्तारकारणे ॥२४॥ ॥ब्रह्मोवाच॥ ॥भो भो कालाग्निरु
द्र त्रिनयन जगतो हेतवे सेतवे त्वां विश्वेशाज्ञानियुक्तः सकलजगमहासृष्टिसाह्य (हा) [illegible] भारं ॥ योक्षे, युंक्ष्व, त्वयाहं सृज जनमपि त
तेते कराक्षाग्रजाग्रं भूमावेवाद्य भूतोद्यतकर भगवन्नेवमेवेति मन्ये ॥२५॥ इत्युक्तो वेधसायं मम नयनभवः कालरुद्रो रुषोषं क्रुत्वा कं
प्य च रोदसी ससृजे रुद्राननेकान्छिवे ॥ नानावेषमहोरुद्रेषणमहाबाणासिपाशोद्यता नुद्भूतान्बुदनिस्वनान्नोरिभवे दृष्ट्वै
व बिभ्यद्विधिः ॥२६॥ तन्नत्वा पुनराह साह समहो रुद्रास्त्वया यत्कृतं मा स्राक्षीः पुनरेव सुमहारुद्रांस्त्रिनेत्रप्रियान् ॥ येभिर्व्या
प्तमिदं चराचरजगज्जातं च, जन्मार्तिमत्वं चाप्यद्य सृजस्व जंतुनिवहं, मैवं विधाते प्रजाः ॥२७॥ इत्युक्तो वेधसायं वरमखिलमहा
रुद्रसंस्थासु तस्मात्सृज्यंते दिविरोदसि त्रिभुवने तान्वै नियुज्यादरात् ॥ नाहं मृत्युवशानुगान्सृजेहममखिलान्सर्गो न मे तादृशस्त्वं
कौतालककर्मणा जनिमृति प्रायां प्रजां वै सृज ॥२८॥ इत्युक्त्या निरगाच्च तत्र भवनात्स्थाणुस्ततो सौ भव तत्रैवातिसृजत्स चाप्यभव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०६ श्रीदेव्युवाच॥ ॥एकार्णवेकलेरंतेब्रह्मणः प्रलयेशिव॥दग्धब्रह्मांगसंभूत भस्मनात्वमलंकृतः॥१॥निर्गीर्णोबालरूपोसौ त्वयाविष्णुःसदाशिवः॥प्रति सदाशि०न
२५ सर्गप्रसूतानांब्रह्मविष्णुहरात्मनां॥२॥उद्भवंचमहादेववक्तुमर्हसिशंकर॥किमन्येब्रह्मविष्ण्वीशापौर्विकावातएवहि॥३॥वदमेसंशयंदेवकालकाल अ०१४
जगद्गुरो॥ ॥श्रीस्कंदउवाच॥ ॥इतिदेव्यामहादेवः पृष्टस्तामभ्युवाचह॥तत्तेहं संप्रवक्षामिशिवप्रोक्तंसनातनं॥४॥शृणुत्वंसावधानेनरहस्यंसर्व
-X पापभित्॥ ॥ईश्वरउवाच॥ ॥शृणुरहस्यंतेप्रवक्ष्यामिसमासतः॥गोपनीयंप्रयत्नेन नाख्येयंयस्यकस्यचित्॥५॥ब्रह्मणः प्रलयेसर्वेतत्सृष्टाः
सर्वएवहि॥तत्प्रजापतयोदेवा मानवोमुनिमानवाः॥६॥सुरासुरास्तथाशक्रा दिक्पालायक्षपूरुषाः॥किन्नरानागगंधर्वा तथैवाप्सरसांगणाः॥७॥सुप
र्णास्सागराद्वीपा नदीनद वनान्युमे॥गिरयोपुरराष्ट्राणि लोकाश्चैवचतुर्द्दश॥८॥सर्वेब्रह्मोदरेदेवितीर्णासंप्रतिशंकरि॥कृत्वापितामहःसर्वस्वोदरस्थंच
S8 9 राचरं॥९॥सपिधायेंद्रियग्रामंकल्पमेकंवसंस्तदा॥नदिवानतमोरात्रिः नैवभूतंकिमप्युमे॥१०॥स्वमूर्द्धियोगमास्थायममयोगंयुनक्त्यसौ॥युं
जंनात्मानमेवेशि मय्येवपरमात्मनि॥११॥तदंतिमेमहायोगसंजातानलसात्तनुं॥कृत्वादग्धोभवेद्ब्रह्मा तद्ब्राह्म्यंभस्ममुत्तमं॥१२॥अवगुण्ठ्याहमीशानिन्
स्वाम्यानंदनिर्भरः॥मद्रोमजालमूलेषु तद्ब्रह्मांगसमुद्भवं॥१३॥भस्मैवसंगतंयावत्तावत्तेविध्ययोंबिके॥भवंतिप्रतिकल्पादौ स्वोदरस्थैः चराचरैः॥१४॥प्र
तिकल्पंवेदजालं सरहस्यषडंगकं॥विध्ययेसाधकार्याहंस्रष्ट्यादौ परमेश्वरि॥१५॥यथापूर्वंनियोगाय तस्मादुपदिशाम्यहं॥मयोपदिष्टः सोप्येवंवि
नियुक्तचराचरं॥१६॥लोकांल्लोक्यांश्च सतदायथापूर्वं प्रजापतिः॥(ससर्ज) भूताभाव्याश्चऋषयश्चपुरंदराः॥१७॥प्रजाप्रजानांपतयोनदीनदपुरंवनं॥गिर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वदग्धशैलारूपा भस्माद्रिचयोर्मिमांस्तदा ॥२९॥ न पुरं न नरा मृगांडजा कलिकालांतिमकालतो भवानी ॥ वेलोद्धृत्तानुलोम
प्रतिवह विहितासंवहा घोरवाताः जाता विस्तीर्णपृथ्वी निहतगिरिचयं देधुवंते बलेन ॥ तेनैवोत्थितशब्दजालजमहाकल्लो
लोलाब्धयो आसत्यावधिवीचयो मरुतलांस्ते नाशयंतो द्रुतं ॥३०॥ तन्मध्यसंस्थवडवानलवाडवोत्थशाखा विधूत वि
धूमतति प्रदग्धाः ॥ ते सागराः रूपा महाद्रिचयो रु भस्मपंकान्विता भुवि भवंति सुरासुरेश्व ॥३१॥ कालेतास्मिंश्वरामिक्षुभित
महितलेशैनराष्ट्रादिहीने शूलप्रोतकपोल कंकणमहाशेषांगभस्मांगकः ॥ तद्धुद्धान्तिमकालमूलजमहाकल्लोलकोलाह
ले ॥ कालेनीलतमालसन्निभगात्रोनित्यं वसाम्यं विके ॥३२॥ नक्षत्रसोमनयमार्कदिशाधिपावा नो वांतरीक्षकमही
जगती प्रणष्टा ॥ न ब्रह्मा न हरिः सुरासुरगणा नो वा दिशो वा विदिक् नो भूतानि महाजडाजडजगच्छेषं न किंचिच्छिवे ॥
॥३३॥ तस्मिन्निस्तोपि लोके क्षुभितकलुषिते शूलमूले विमुक्तं प्रोतं कृत्यवसामि सोमसकलालंकारमौलिस्तदा ॥ तद्ब्रह्म
देहनोत्तमभस्मभूषं पूषाविशेषित महोरु शरीरकांत्या ॥ विष्णुं पूर्वं तमनिलाहनिबालतीला लोलं ग्रसामि भुवनेश्वरि त
त्वाधौ ॥ गायन्नुच्चैश्चसामान्यतुलितघनजैरुच्चघोषोस्मियावं ॥ ब्रह्माहं निवसंश्चनृत्यपरमस्कंधात्तशूलः शिवे ॥३५॥ ॥
इति श्रीशिवरहस्ये सदाशिवांशे नवमांशे प्रलयकथनं नाम त्रयोदशोध्यायः ॥१३॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवाय नमः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 कल्यांते कुलिशायुधेन हरिणा विद्राविता र्तिंगताः तुच्छान्मेच्छगणा निरुद्धसतुषच्छन्नाग्निसंछर्दिनः ॥ छागप्रायमुखाश्च देहनिक 
 रैश्छिन्नाः प्रजातास्तदा ॥ छिंधीत्यार्तरवेण देविकरवालेनाशुकृत्तेतदा ॥२३॥ उत्फुल्लारुणपंकजोपममहानीलीतमालप्रभाः कापो 
तारुणारक्तकाभ्रनिचयैर्व्याप्तं च खं तत्रहि ॥ तस्मिन्नस्तमिते प्रपंचमिहिकाज्योतिर्गणो धूम्रतोखद्योतप्रभपूर्णिमाद्भुतम
 हाकांत्यासोमकलोत्तमांगयुतया एकश्चराम्यंबिके ॥२४॥ वाताः शर्करकर्षणान्नदनदीनाथोर्मिसंवाहिनो वांत्येवाशुभशं
सिनः प्रतिकलेरंतेच कल्यांतिमे ॥ तत्पश्चाद्दरुणेन चोदितमहामेघप्रजानांशताः वर्षंत्युद्यतविद्युतो गिरिसमाः सूर्यास्त
पत्यंभसि ॥२५॥ दिग्दाहाः प्रभवंति संततमुमे कंपंतिमेभूगजाः भूमिं मौलिगतां च पापजमहाभारेण कंपायितां ॥ कुर्वंत्ये
वमहाब्धयो गिरिगणं वातावधूतोर्मिभिः मूर्द्धं तेवतदांबिके ममम हाकैलासवासं विना ॥२६॥ तन्मेघप्रभवातुलोद्यतमहा
५९० विद्युत्प्रभालाभटी घोरारावविदग्ध सर्वजगती नृत्यामि मोदाधिकः ॥ शुंडादंडीरुकांडोपमगिरिवरशिखराकालमेघोत्थ
धारापारावारानुघोरारुणातहणाजयाजालमौलौवहामि ॥२७॥ तद्दर्षोत्कर्षतर्षश्रुतिवरवचसा मेघ्यवर्ष्यास्मिविद्युद्वद
ति गदितों बे वेदधामोरुगीतः ॥ तत्राब्धिर्जानुदघ्नो भवतिसुमहदूर्मौघकल्लोलजालः ॥ अमोघमेघोत्थितवातजातभूकंप
पंकिलसमुद्रधारा धरोर्वी ॥२८॥ निर्दग्धदग्धवसुधारसशोषपूर्वा भूजाविशेषकतिशोषणकालमूले ॥ तरणिकरणजा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तेन्च महाप्रलय उच्यते ॥ विष्णोरेक मरुः प्रोक्तं तस्यांतेरौद्रकं दिनं ॥ ७ ॥ तस्यांते ईश्वरस्याहः तस्यांतेथ सदाशिवः ॥ सर्वेसृष्टि
स्थिति परा तिरोधानाअनुग्रहाः ॥ ८ ॥ मन्मूर्तय इमेदेवि मय्येवविलयंगताः ॥ तत्पूर्षाघोरसद्यादिवामदेवेशवक्त्रजाः ॥ ९ ॥ मूर्त
योमीब्रह्मविष्णुरुद्रेश्वरसदाशिवाः ॥ भविष्यंतिमहादेवि मन्मूर्तयइमेसदा ॥ १० ॥ कालातीतोहमीशानि अमूर्तोमूर्तिमांस्त्वया ॥
त्रिनेत्रोनीलकंठश्चत्वयांकैलासमौलिगः ॥ ११ ॥ विहरामिगणैःसार्धं असंगोलिंगसंस्थितः ॥ असंगः पुरुषश्चाहं सर्वभूतगुहाश्रयः ॥
सर्ववेदांतसारार्थ प्रतिपाद्योहमीश्वरि ॥ भूमानंदघनश्चाहं ऋतंसत्यं महेश्वरः ॥ ब्रह्मैकेवलमेवाहं सत्यचिद्घन एवहि ॥ नित्या
नंदोहममलःसर्वसाक्षीद्वैत एवहि ॥ १४ ॥ मत्तोनेहास्ति यत्किंचिदीशावास्यमिदंमया ॥ रसोहंपरमानंदः योगिध्येयोहमीश्वरि ॥ १५ ॥ मां
नजानंतिसर्वेपि सर्वभूतेषुसंस्थितं ॥ योगसांख्याविमुह्यंतिअन्येषांतत्रकाकथा ॥ १६ ॥ यतोवाचोनिवर्तंते अप्राप्यमनसासह ॥ स
र्वध्यानार्थमेवेह निरूपोरूपभागहं ॥ मद्रूपचिंतनान्मर्त्यः मुक्तिभाग्भवतेजनः ॥ मल्लिंगपूजनंदेवि निर्गुणंपरिकीर्तितं ॥ १८ ॥ स
र्वेषामेवदेवानां मूर्तौ पूजाप्रवर्तते ॥ सकलामेपरामूर्तिः नीलकंठास्त्रियंबका ॥ १९ ॥ उमासहायंविश्वेशलिंगंमेनिर्गुणंशिवे ॥ म
ज्ज्ञानसाधनंप्रोक्तं भस्मरुद्राक्षधारणं ॥ २० ॥ पंचाक्षरजपश्चैवरुद्रलिंगार्चनंतथा ॥ मत्क्षेत्रवासोनाम्नांमे अनुवृत्तिःसदैवहि ॥
॥ २१ ॥ अविमुक्तेचपरमेनिवासोभक्तपूजनं ॥ प्रदोषेसोमवारेचनिशिपूजाप्रवर्तनं ॥ २२ ॥ इत्येतत्कथितंदेवि प्रलयं श्रृणुवतःपरं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कोऽङ्क्षितं ॥ मत्पादार्चाविमुखहृदयो भाररूपो भुवो सौ तिष्ये पुष्ये पि मध्यार्जुन भुवि सरिदि स्नानहीनो तिदीनः ॥ २९ ॥ डिंभः कुंभी शूलिंगे
क्षपा नतिरहितो मोघितायुर्महाघो माघे माध्यां मघर्क्षे शिवसरसि मघास्नानहीनो तिदीनः ॥ तिष्ये पुष्ये नु घष्य द्वृजिनयुतजनाः स्वागतं
सह्यजायां स्नात्वा नत्वा महेशं सकलजनिजरा नाशपाशैकनाशं ॥ ३० ॥ संसारार्णव मध्यतोद्धृतजना नंदैक मोदप्रदं श्रीमध्यार्जुनवृक्ष
मूलविलसल्लिंगं गिरिशेमुक्तिदं ॥ कलौ माघे गंगायमुनवर संगाप्लुतजनाः प्रयागे वा योगैः गमयति गतिं ते षु स शिवः ॥ ३१ ॥ कलौ गंगासं
गाजनिम्नतिजुभंगोर्पिहि भवेत् महालिंगासंगान्नृषु परममुक्तिर्गिरि भवेत् ॥ भावानां भवतारणायगिरिजे मंत्रं च पंचाक्षरं तारेणोपरि
शामितत्वकमुमे सायुज्यमुक्तिप्रदं ॥ ३२ ॥ तस्मात्क्षेत्रवरं नमुक्तमगजे द्वारे षु मुक्ति प्रदं कैलासोपममेतदद्य गिरिजे पुण्याविमुक्तं मया ॥
59/ तन्नैमिशं सेव्यमुमे कृतेयुगे त्रेतासु तत्पुष्करमेव शस्तं ॥ तद्वापरस्थैः कुरुजांगलं महत् गंगे वसेव्या कलिजैर्विमुक्तये ॥ ३३ ॥ दुस्त
कैर्गा दुरुक्ति कर्कशधियस्ते शर्करादंतुरे भूमीशां भवसत्तमान्कलियुगे निघ्नंति विघ्नोद्यताः ॥ करानकरबालधृक् त्रिजगतीषु वि
भ्रन्वधं भुक्त्वं धर्ममयं दधाति भुवने कल्पोज्झितान्यामरान् ॥ ३४ ॥ भुक्त्वान्यान्नलनुते स पुल्कसवरान्दुःपप्लवान्छंबरान् ॥ हूणा
न्घोणानिमर्दितांश्च कुरुते कल्पांतिमेसो हरिः ॥ आज्यं राज्यभृतोपि दुर्लभतरं नद्यापि पक्वान्नधीः दग्धादुग्धकथा मनो न्नलभ
ते दध्यादिनध्यानतः ॥ तक्रं शाकपदं तथापि कलिजा जीवंति धीवंचिताः इत्थं केरलनाम कोस्ति गिरिजे देशो न देशांतिके ॥ खघो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ २२ तद्धुतिभिर्ध्वंसतिवसुधां रात्रौं वदन्त्रामकाः क्षुद्रादुष्टतुलुब्धतस्करवरातेमस्करीदूषकाः ॥३६॥ असह्यपापैर्यदिनिष्कृतीषु ॥ सदाशि० अ०
ससह्यजायांकिल तौलिभास्करे ॥ गोदांमुदास्नातिचकेसरीस्थे बृहस्पतौ पापगणैर्विमुक्तः ॥३७॥ योदक्षिणांभोनिधितीर
चापकोणे विगाह्यैवविमुक्तपापः ॥ कन्याब्धितीर्थे वरगांगसंगे गोकर्णजेसागरवारिताघः ॥३८॥ ॥स्कंदउवाच॥ ॥इत्थं
शंकर वाग्विलासमधुरोदारं वचः सांबिका श्रुत्वाहृष्टतनुरुहाश्रुजमहाभक्त्यानुलोकेहरं ॥ कैलासामलमौलिपालिसुमहा
रत्नोरुसौधस्थिता पारीरंकितवक्षसंत्रिजगतामध्यक्षमेवेश्वरं ॥ वीटीचारुकराबभाणहृदया नंदानुबद्धांबिका ॥३९॥ ॥
इतिश्रीशिवरहस्ये सदाशिवाख्ये नवमांशे द्वादशोध्यायः ॥१२॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनमः ॥
श्रीदेव्युवाच ॥ ॥देवदेवारविंदाक्षसंपूजितपदद्वय ॥ विश्वेशप्रमथाधीशमन्मथांतकशंकर ॥१॥ कल्पांते प्रलयं शंभो वि
स्तराद्वक्तुमर्हसि ॥ ब्राह्मोथप्रलयः शंभो कथंवाजगतः शिवे ॥२॥ कालस्यास्यगतिं शंभो तस्मिन्काले विशेषतः ॥ प्रणताहं त्वत्प
दाब्जे प्रणयाद्वक्तुमर्हसि ॥३॥ ॥कुमारउवाच॥ ॥इतिदेव्यातदापृष्टः शिपिविष्टोष्टमूर्तिमान् ॥ किंचित्ध्यात्वामहादे
वः प्रहृसन्वाक्यमब्रवीत् ॥४॥ ॥ईश्वरउवाच॥ ॥शृणुदेविप्रवक्ष्यामि महाप्रलयकारणं ॥ ब्रह्मणः परमंचायुः शतार्ध
मितिकथ्यते ॥५॥ कल्पसंख्यादिनं चैकं ब्रह्मणः कथ्यते शिवे ॥ चतुर्युगसहस्राणां परिवर्तोहिकल्पकः ॥६॥ ब्रह्मणो ह्यायुषो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मखमुखविहिताद्द्रोहिणोघोररूपाः नानाकारविकारकेशजटिलानिःसारभूतानराः ॥ दुर्दांतदुर्हिणोनताः(ते)हृतधियोदुःखाश्रु
धार्तिंगताः ॥ कान्तापारविलासकीलितकलावंतेप्रपश्यांबिके ॥२२॥ निर्मर्यादार्यहीनेसततकलुषितस्वान्तरायासवृद्ध्या बुद्ध्या
ऽभिध्याय(ध्या)सौख्यंकलिकुलिशहताः निर्दयं मर्दयंति ॥ रुद्राक्षामलभूतिदेहमसकृत्कद्रुद्रपूजापरं श्रीरुद्रार्थविचारकं जडधियः पंचास्य
रेसादरं ॥२३॥ प्रारब्धारब्धतल्पैरुपनतजनुभिः कर्मभिःभ्राम्यमाणा भ्रांताविश्रांतिहीनाः श्रमविविधवधैः दुःखसौख्यैकयुक्ताः ॥
नानादेहव्यवस्थात्रितयतनुभृतो भूभरास्तेव्यवस्थाः स्वस्थाइत्येवतेषां मतिरपिगिरिजे तेकलौवर्तयंति ॥२४॥ रासभविकसेरुशोफ
धाराः जनितास्तेकलिनार्योनिजाराः ॥ कुसुमेषुशरावधूतसाराः वरकाकोदरहारपाददूराः ॥२५॥ अंगावंगकलिंगतुंगजमहाराष्ट्रेषु
592 सौराष्ट्रके वंगांगादिविदर्भनार्मदमहाकालेतथाकोंकणे ॥ भृंगारादिषु चीनमालसुमहागंगाप्रयागादिषु म्लेच्छाएववसंतिसंततकुरु
क्षेत्रेतथापुष्करे ॥२६॥ आर्यावर्तानुवृत्तिः क्वचिदपिनभवेदार्यकाणांकलौवै कांचीकोसलचेरचोलजमहापांड्येद्विजानांस्थितिः ॥ स
ह्यादिप्रभवोरुतीरजमहालिंगोत्तमांगेक्षणां क्षीणाप्रायअसह्यभूतकुकलौस्थानंवरंवैसतां ॥२७॥ पर्णादाअपिसंविशंतिमुनयः श्री
ताम्रपर्णीतटे वर्णाद्याश्रमतत्पराः शिवमुमे पर्णापतिंसंश्रिताः ॥ वाताक्षुब्धाब्धिजातप्रबलदुरुमहावीचिवाचालिताशाः और्वस्तो
र्ध्वशिखाभितापितमहामेघोदयानोघनाः ॥२८॥ वर्षंतु(तु) धृतविद्युदार्भटं रवेः प्रातः प्रदग्धावनी कुर्वंतो(तो) मुदि सद्देव तिमिरंलोकेनुतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मद्यालयपरिभ्रमद्द्रविणदीपतैलापहाः॥ मदुत्सवविरोधिनो ममसुभक्तनिंदापराः॥ पतंतिशलभाइवानलसुदीप्ततैलेंबिके॥ कलौ कलुषबु
द्धयो नरकवासकोलाहलाः॥१५॥ काषायाश्रयिणोऽश्रमेषु निरताविप्रद्रुहावाकुशाठाः॥ लिंगांकाश्च कुचक्रतप्तवपुषोऽश्रौतद्विषस्ते कलौ॥
पापास्तेश्रमणाभवंतिबहवः श्रुत्युक्तमंत्राद्दराः तेदूरात्परिहारकाश्चनरकाघोरा हरद्रोहिणः॥१६॥ नित्यंयाचकपाचकान्ननिरताः सं
कोचवार्त्तोज्झिताः॥ निर्मुच्याखिलपुण्यपापजनितं चिंतारसान्नादराः॥ तिष्येपुण्यपरिश्रमन्मधुकरभ्रांतेवत्तेभिक्षवः॥ कक्षासक्तदु
रन्नपेटकधरावेदांतवार्तोज्झिताः॥१७॥ वर्णीस्वर्णानुरक्तोभवतियतिवरो, वन्यवासीचग्राम्यो॥ नोकश्चिन्मम पूजनोद्यतमतिः का
मादिमात्रादरः॥ अक्षेषूद्यतचित्तवृत्तिरसकृद्द्यूतेचपानेतथा॥ स्त्रैणानिर्घृणचेतसः कलिभवावर्ततितेसंघशः॥१८॥ स्वस्थोयः स
गृहस्थएव, गृहिणीपाकादरोयोबटुः॥ शिश्रूषुः सपटुः कुटीरकपटा व्यापारमात्रोत्सवाः॥ भूम्युत्कर्षसुकर्षणाश्रमपराभ्रांताश्रमोक्त
क्रियाः॥ क्रांता एव कलौ भवंति बहवो निर्द्रव्यभोगोत्सवाः॥१९॥ शंकेप्याक्रोशयुक्ताभुविकलिजनराः शुक्रवर्णाश्च तक्रं॥ विक्रेतारःक्रि
याणागुडलगुडकरा नक्रवृत्याक्रमंति॥ नैवानुक्रोशयुक्ताभरवरवहनाभूसुरारासभाभा॥ हालेयाबालवृत्या प्रतिकलिजनिताभ
क्तभुक्त्येकभावाः॥२०॥ उन्निद्रारुणपद्मसद्मजनिताऽनंदेनते निर्वृताः॥ भूपाद्व्योपघातैः द्विजसुर निबहं मर्दयंत्येवघोरं॥ नि
र्व्यादिशिते मृगाइवमहाव्याधोरुबाणाहताः॥ प्राणानप्यसमीक्ष्यहंतु कुधियो धावंत्यजासंघवत्॥२१॥ हाहा घोषानुभूषा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्तेवामहादेव कथंप्रलयकारणं॥४॥किमाहारानराश्चैव किमाचार विहारकाः॥भवंतिवैयुगांतेतेवराकाःशोकमानसाः॥५॥तन्मेवदमहादेव
विस्तरेणैवशंकर॥ ॥स्कंदउवाच॥ ॥इतिपृष्टोमहादेवो जगादजगतांपतिः॥विश्वाधिकःप्रसन्नास्यो महेशो भक्तवत्सलः॥६॥उवाचच
कलेरंतेप्रजानांवर्तनं मुने॥प्रलयेलक्षणंचैव कल्केःप्रादुर्भवंमुने॥७॥तत्तेहं संप्रवक्ष्यामियथादेव्यै महेश्वरः॥प्रोक्तवानद्भुततरंशृणुत्वं
सावधानतः॥सहैभिर्मुनिमुख्यैश्च गणैश्चसुरसत्तमैः॥शिवप्रोक्तंसमासेनकल्पांतेप्रलयंतथा॥८॥ ॥श्रीशिवउवाच॥लीलांलोकेनुलो
केकलिभवसुमहापाप्मनांशैलकन्ये॥मल्लिंगालयभेदकाःप्रतिकलौविप्रस्वहारादराः॥तद्वारान्कुसुमायुधोत्तमशरा मौरैश्चभिन्नांगकान्॥
तांतेषुप्रसभंरमंतिनरकेतानेवसंपातये॥१०॥प्रतिकलिनरनार्योजारजाघोररूपाः॥कामारातिपदाब्जभक्तिरहिताःसंतप्तचक्रांगकाः॥म
त्फालाभसितत्रिपुंड्ररहितारुद्राक्षमालोज्झिताः॥लिंगार्चासुपराङ्मुखाःकिलशिवे कल्पांतमेताःप्रजाः॥११॥कल्पांतरेकुनृपतिप्रभ
वोरुपीडा॥संक्षुब्धलोकमखिलंधनधान्यहीनं॥दाराकुमारमपहायगृहादिकंते॥भ्रांताभ्रमंतिसकलासुदिशासुगौरि॥१२॥क्षुद्राःक्षौर
द्रसालता ललिकुचाहाराहरडोक्षिणो॥तेकालानलतापतप्तहृदयाःपापैःक्षुधाव्याकुलाः॥कान्तास्योरुगताग तिप्रसिथिलव्यालोप
मानानने॥भेकाभोगइवाविशंतिनितरां कल्पांतमेताःप्रजाः॥१३॥मद्भस्मांगानुषंगस्थितिरतिविमुखालिंगसंगोज्झितांगा॥रुद्राक्षाध्वति
रीशानामकलनेसंकीर्तितास्याःप्रजाः॥मत्यंचाक्षररुद्रसूक्तकलनेमत्क्षेत्रवासारसा॥भूभाराःकलिकालदुर्जनजनावर्तेतिपापालयाः॥
॥१४॥

593

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोक्षेद्धं दुर्भेनजातुसंभवेत्कलिदुर्भेगोपि॥ दुर्गोपि संतरति मार्गमुमेविमुक्तेः स्वर्गस्य वाममकृपावशतो लभेत॥ २८॥

यदिचंद्रचूडचरणध्यानेक्षणं वामनः कृत्वा,मृत्युकृतांतथाकलिकृतामार्त्तिंन्नविंदेन्नरः॥ २३॥ कृतेत्रेतायांवैयदिखलुतथा सपरभवे स
हस्रंवासह्यातनुकर्षणमात्रात्फलगणं॥ शिवेलिंगार्चायां तदिहदिनकेवैकलियुगे क्षणंत्र्यक्षध्यानात्प्रभवति समुक्तेः प्रियतमः॥ २४॥ सि
कत्यं मांदेवं नदिभवसिकत्यासुचयजनं रजस्यंमल्लिंगेक्षणमपिच सक्षीणकुपथः॥ उमेधन्यो मान्यो भवतिकलिजन्येपितमसि अहो
मन्येमुक्तं सोहिपरममान्यः प्रियतमः॥ त्रियायुषमनुप्रभाभसितभूषपूतांगको विशोधितकलुषोच्चयो भवतिभाग्यपूर्णः कलौ॥ अशेषसुर
संसदंसखलुयातिपूषप्रभा विमानवरमास्थितः स्थिरचरादिपापापहः॥ २६॥ मृदुंतिमल्लिंगसमर्चनेन कलौनराणिक्षितिदुःष्कृतानि॥
तान्येवपुण्यानिभवंतिसद्यो भवोद्भवार्चाबलतोभवानि॥ २७॥ दर्भाग्रतोऽग्रजनिमोत्तमपूजकश्चेद् आशीविषोपमविषेविषयानु
धावच्चित्ते ष्वशेषहृदयोज्झितकालतिष्ये॥ भूषाविशेषकृतशेषमहोरुहार पूषाक्षमीषदपिचिंतयते सधन्यः॥ २९॥ इति श्रीशि
वरहस्ये सदाशिवाख्ये नवमांशे कलियुगवर्णनंनाम एकादशोध्यायः॥ ११॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्रीसदाशिवा
यनमः॥ ॥ साश्चर्यंसातदाश्रुत्वा गुणान्कलियुगस्यवै॥ प्रणम्यदेवीविनयात्कालकालंकृपाकरं॥ १॥ कैलासशिखरे सोधस्थं
प्रांजलिः प्राहशंकरं॥ ॥ देव्युवाच॥ ॥ देवदेवमहादेव जगत्स्थित्यंतपालक॥ स्वमूर्त्तिभिर्ब्रह्मविष्णुरुद्रेंद्रैः शशिशेखर॥ २॥
सोमधामकलामौले गंगाधरमहेश्वरः॥ पृच्छामित्वां महादेव किंचित्प्रश्नं मनोहरं॥ ३॥ वक्तुमर्हसि भूतेश पशुपाशविनाशक॥ कल्पा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ९ कन्यापतिनयनपदांबुजध्यानधारानुरक्तः॥ कलिमलकुलशैलाकारपापेषुसक्तो" प्यथयतिशिवभक्तः सत्यमेवेहमुक्तः ॥१५॥अलंकलियुगें सदाशि० न०
२० बिकेसकलतीर्थसंसेवनैरलंमखमुखाक्रियाः सकलदाननिष्ठापानैः॥अलंविविधभूसुराश्रमविचारसंवर्त्तनैरलंचसुखसत्क्रियाव्रतभवादि अ० ११
कार्येपिकिं ॥१६॥नालंकिंशशिशेखरांबुजपदध्यानैकमोदंमनः" मल्लिंगार्चनयापितोत्तमदिनोनोमेवनालंकिमु॥ कालांतकपूजनोल्ल
वमतिंद्धायंस्थशेद्धाकलिः"संसारांबुधितारकारणामुमेभक्तिःपरामेकलौ॥१७॥शिवेसुकृतसाधनंकलियुगेषुलिंगार्चनं"वदंतिनिगमाःस
दासुगममार्गसंदर्शनं॥अघौघबलतर्जनंकलिमलादिसंतर्जनं"भवेतसुखचोदनंअखिलदुःखसंदीपनं॥१८॥कलावपितपोबलैरमि
तपुण्यजालोदयै"र्भवंतिभुवितेनराहरमहेशपादादराः॥तएवखलुविस्तरंभवमहाब्धिजंदुस्तरं"तरंतिविषयोर्मिमाज्ज्ञनन्नाशदुःखं
594 महत॥१९॥सुराअपिमुनीश्वराःकृतयुगादिषुद्यताः"तपःपरमदुष्करंचिरफलंचकालेनतत॥अयंकलिरहोशिवेक्षणिकचित्तसंवेशनात"
पदांबुजयुगेममप्रसभमुक्तिलाभप्रदः॥२०॥कलावपिसुरानराजननाशमव्याहतं"विनिंद्यमभितोंबिके अभिवदंतिवांछंत्यपि॥क
दाखलुभवेद्दिनोजननमेवतिष्ठ्येसदा"सदाशिवपदार्चनेतदिहजन्मनःसत्फलं॥२१॥यःकश्चित्प्रभवेतवैकलियुगेमल्लिंगपूजादरो
भस्मोद्धूलितपुंड्रफालतिलकोरुद्राक्षकोटीरकः॥श्रीरुद्रप्रवणोऽपिदेविसुमहापंचाक्षरावृत्तिभाक"एवंयोनियतोवसेतसमुनिःत
स्यैवमुक्तिस्थिरा॥२२॥धीरःतिष्ठेकधुष्यकुपथजनिजरारोगनाशेकनश्यल्लोकःपुत्रकलत्रमित्रजठरीपुष्यतकिलैवंशिवे॥तत्रैवं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कलावपिभवेद्भक्तिः केषांचित्पुण्यगौरवैः ॥४॥ तेभावैःपूजयंत्येव भवोद्भवमतंद्रिताः ॥ तेतरंत्येवदेवेशि कलावपि भवार्णवं ॥५॥ देवा
श्चमुनयश्चैवमनुष्याःस्थावरावपि ॥ कृतत्रेतद्वापरेषुतपःक्लिष्टाःसदांबिके ॥६॥ क्षणासिद्धेकलौजन्मवांछंत्येवहिनाद्भुतं ॥ कलेर्गु
णान्प्रवक्ष्यामियदिस्यान्मयिभक्तिमान् ॥७॥ साभक्तिर्दुर्लभादेविब्रह्मादीनामपिध्रुवं ॥ प्रसादादेवसाभक्तिः ममसर्वयुगेष्वपि ॥८॥
विशेषतःकलियुगेभवित्रीक्वचिद्देवहि ॥ जन्महंत्रीपुण्यदात्रीप्रदात्रीसर्वकर्मणां ॥९॥ फलंमोक्षंचभुक्तिंचराज्यंपुत्रःस्त्रियो
धनं ॥ पशवोधान्यनिचयमायुरारोग्यमेवच ॥१०॥ कलेर्गुणान्प्रवक्ष्यामिशृणुत्वंसावधानतः ॥ सिष्टानिष्टकरेपिसन्प्रतिक
लेरेकोविशिष्टोगुणः ॥ कृत्याकृत्यगुणागुणेषुसुमहावृद्धिः भवित्रीकलौ ॥ नेवान्येषुयुगेषुतत्त्रिगुणितंध्यानार्चनावाजपो ॥ भूया
स्तत्यमिदं विशिष्टइतितं जानाम्यहंतीयुगं ॥११॥ एकंनंदामिनिंदाशतमपिकुधियांविप्रवृंदेषुमंद ॥ ज्ञानानंदमहोददातिमुक
तिः नाम्नैवमेसर्वदा ॥ किंवक्ष्याम्यगकन्यकेकलियुगेयोवाक्षणार्धंमुहुः ॥ मन्नामामृतपानपीनसुमनाःश्रीमुक्तिकांतापतिः ॥१२॥
कलिकलशगुणोयःसाधुरेवायमीशे ॥ क्षणमपिममपूजाध्याननाम्नैकनिष्ठः ॥ सहिकृतयुगत्रेताद्वापरेवासहस्राण्ययुतत
पसमृध्यातत्फलंनोलभेत ॥१३॥ क्वचित्कलिभवोनरोभुविभवेतभाग्योदयैः शिवार्चनपरायणःप्रथितभस्मसंधारणः ॥ स
एवशरणायवैकलिजनेषुसंतारणः ॥ शिवेसमुखकारणोबहुलपापसंहारणः ॥१४॥ सत्यंसत्यंभवानिक्षणमपिकरुणाएशिवाएसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 वर्जाः॥३७॥ कलिजाः कुलजातिवर्णधर्मे द्विजकर्मस्वपि नार्हते हि प्राय॥ अकुलानुकुला इवाकुला नहि कर्मण्य परा हि वर्णिनः॥३८॥ उन्म 
 त्ता भुवने वसंति कलिजा वित्तार्थिनः केवलं हृत्तापेन दिवानिशं स्मरशरव्याकृत्तचित्ता नराः॥ चिंताशोकशतैर्विदग्धमनसो विप्रा वमा 
नोद्यताः क्षिप्रं ते नरकार्णवे प्रपतिता भजंति दुर्बीजजाः॥३९॥ भूपाः कूपनिवासिनो यमगृहे संबद्धयूपा जवात्पापाः कंपितसर्वगात्र
हृदयाः किंपाकतुल्याः कलौ॥ शंपावेगसमानचारुकरुणाया संपाततापार्दितास्ते सर्वे निरपत्रपा मम महालिंगार्चनावर्जिताः॥४०॥ रुद्रा
लं कृतवेदजानमगजाकांतो रुनिश्वासकं विश्वासायन वै भवेत्कलियुगे दुस्तर्ककाव्येरताः॥ सर्गे चापि निसर्गतः प्रतिभरं सांगाख्योनिं
गताः गर्वे पीवसदेशि पापनिरतास्तेरासभा भूसुराः॥४१॥ मलाविलजलोदरीभरकुयोनिदुःसूकरी वियोनिभवजारजा भुवि भवंति
595 तिष्येजनाः॥ द्विजा अपि निजव्रतं खलु त्यजंति लिंगार्चनं व्रजंति नरकं शिवे न भजंते हि शंभुं जनाः॥४२॥ ॥इति श्रीशिवरहस्ये स
दाशिवाख्ये नवमांशे शिवगौरीसंवादे कलिवर्णनं नाम दशमोऽध्यायः॥१०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ श्रीसदाशिवायनमः॥
श्रीदेव्युवाच॥ ॥हाहा शंभो महादेव श्रुतो हि कलिविस्तरः॥ कृतत्रेताद्वापरेपि त्वयि भक्तिः सुदुर्लभा॥१॥ अजाप्रायप्रजानां वै कलिजानां महे
श्वर॥ द्विजानां बाहुजानां च स्त्रीशूद्राणां विशेषतः॥२॥ कलिजानां विशेषेण निस्तारं वित्तराद्वद॥ ॥श्रीस्कंद उवाच॥ ॥इत्थं देव्या तदा पृ
ष्टो स्मयमानः स्मरांतकः॥ प्राह देवीं तदा विप्र महाकैलाससौधगः॥३॥ ॥श्रीईश्वर उवाच॥ ॥मा भैषीर्देवि भद्रं ते भिषग्वर्योस्म्यहं शिवे॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिताः कलौ ॥ अशेवास्तान्हनिष्यंति मद्यपा इवकेवलं ॥ २५ ॥ वृषलीपतयः सर्वे नरा नार्यश्च संकराः ॥ शांकरकोपि न भवेत्सर्वदेवार्चकः कलौ ॥ २६ ॥
रुद्राक्षभस्मपुंड्रांकं दृष्ट्वाऽसूयापरा नराः ॥ ऊर्ध्वपुंड्रकराः सर्वे मृदा चंदनतोपि च ॥ २७ ॥ वैष्णवाश्च तथा शाक्ताः मद्यमांसाशनप्रियाः ॥ बहवस्ते भविष्यंति
शबराश्च कलौ नराः ॥ २८ ॥ कन्याशुक्लाभिवृद्ध्यै वजीवंत्येव कलौ नराः ॥ संवाहनकरा घोरा कीकटे कर्कटा इव ॥ २९ ॥ वसंति मधुमत्स्यादा द्विजा अपि
कलौ शिवे ॥ एवं वर्णाश्रयोपीमे संकराः शूद्रभूयसः ॥ ३० ॥ वायसा इव तिष्ठंति कार्पासक्रयिणो नराः ॥ दयादाक्षिण्यरहिताः शौचाचारविवर्जिताः ॥ ३१ ॥
सर्वे पशुसधर्माणो भविष्यंति शिवे कलौ ॥ किं पुनर्बहुनोक्तेन सर्वधर्मोज्झिताः कलौ ॥ ३२ ॥ नक्षत्रक्षात्रगोत्र गणकगर्द्दगुणा ज्ञानिनो वैश्य वेश्या व
श्याकर्षानुतर्षा गजहयखरगो पण्यपिण्याकभक्षाः ॥ हीनाहीनेषु दीक्षा क्षपितधनधियो दीक्षिता लुक्षचित्ता त्र्यक्षार्चाहीनचित्ताः कलिमलजनुषो
अद्विजास्ते द्विजा अपि ॥ ३३ ॥ सीदत्कुत्सीदमखवेदपदार्थबोधं बाधा घुधा पुधकुतर्कसुकर्कशास्त्रे ॥ नानामतान्यनुगतीप्रभवो रुगर्वाः स्वर्गापवर्गलादिकु
पथाः प्रभवंति तिष्ये ॥ ३४ ॥ स्वच्छंदाश्छंदवाक्यास्तथकथनधियश्छांदसाः छन्नपापाः दुस्थाः स्वच्छा इवेच्छा हृदुदरभरणाच्छिन्नपुण्ये कपण्याः ॥
पिण्याके प्यर्थयंतो भुवि कलिजनरा छन्नसच्छन्नदेहाः छायासन्ननिवासिनो द्विजगतौ छिद्रीति वादे रताः ॥ ३५ ॥ कृत्याकृत्यविवर्जिताः कलिनराः
सुधादिवर्त्तोज्झिता व्रात्याः सत्यविवर्जिताः प्रतिगृहे वात्या इव भ्रामकाः ॥ गर्हन्तः सततं धनव्रतपरं निर्गत्य गेहाद्बहिर्मत्या हीनाश्च भृत्याः भुवि
कलिजमला सक्तमनसोऽशिवे ते ॥ ३६ ॥ कलिमित्रानिरपत्रपा नरा ये असिपत्रेषु विदग्धसर्वगात्राः ॥ गतपुत्रकलत्रमित्रवैरैरभिभूताश्च त्रिनेत्रभाव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अपराधेप्यतिस्वल्पे,विप्राउंछोपजीविनः॥ मठाधिपतयस्सर्वे यतयो धनतत्पराः॥भ०॥८॥गांवाहयंतिदुष्टास्ते हलेषुनियतं कलौ॥ श्रु
यवत्सुवृषलेष्वेव वेदानुच्चैर्वदंतिच॥९॥शिष्याः सर्वेपिगुरवः गुरवः शिष्यतांगताः॥मातापित्रोरपोष्टारो भार्याबांधवहर्षदाः॥भ०॥११॥
बालवत्सां तथागां वै दुहंतिक्षीरवांछया॥श्राद्धे श्वशुरजामातृन्भोजयंतिशिवे धमाः॥१२॥अन्यधर्मान्नाशयंति स्वधर्मोरव्यापना
यहि॥समाजोत्सवके देवि देवानां पूजकानराः॥१३॥शूद्रा धर्मं वदिष्यंति श्रमणा एव शांकराः॥ग्रहस्थायाचका एव नान्नदाश्चा
तिथौ शिवे॥१४॥वर्णिनः कामसंसक्ताः स्त्रगंधाभरणप्रियाः॥वनस्था ग्रामनिरताः विरताः सर्वकर्मणि॥ शूद्राः तपस्विनः सर्वे नरव
लोमजटाधराः॥तीर्थान्यनुचरिष्यंति पाषंडास्तु कलौ शिवे॥१६॥पंचयज्ञोज्झिताः सर्वे पंचपापोपजीवनः॥भ०॥१७॥उन्मत्तावि
कटामुंडा विरूपाः पाणिवर्जिताः॥अंधाश्च बधिरास्तब्धाः कुब्जाः पंगव एव हि॥१८॥हीनांगा अतिरिक्तांगाः कृशाः स्थूलाः पिचं
डिलाः॥भ०॥१९॥स्त्रियो बह्व्यः कलियुगे पुरुषा न्यूनका बहु॥गावो द्विजाश्च नश्यंति शूद्रहर्षप्रदो युगः॥२०॥सरांसिचाप्रसन्ना
नि निष्फला वनराजयः॥निःसारोषधि धान्यानि द्रव्य कार्श्यं सदा कलौ॥दरिद्रा बहवो देवि दातारो विरला भुवि॥अन्नतो
यप्रदो यः स्यात्स महादानकृद्भवेत्॥२२॥तिलतैलक्रयपराः फलानां च रसस्य च॥ कंबल क्रयिणः सर्वे द्विजा वार्धुषिका अ
पि॥२३॥निरग्नयो थ विधुरा व्रात्याः पापपरायणाः॥दातारमव मन्यंते तथा धर्मपरायणं॥२४॥क्वचित्क्वचिद्भविष्यंति शैवाः परि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नृपान्दुष्पूरविष्टोदराः॥ योवारं निधिजा विना सन्नसिते रालस्य तस्त्यज्य वै कैलासाचलवासिनं कलियुगेनाराधयंतिक्षणं॥६०॥
विश्वस्ताश्वासहीनाः स्वजनपरिजने श्वानवद्घोषमाणा योषाभूषापहाराः सततमृषवचास्तिष्यजाता मनुष्याः॥ मातापित्रोर्गुरोर्वा
द्विजगविस्वजने पूषयोषादिहीना आयुः शेषं क्षपंतो विषविषयपरामेषवन्मोषवर्णाः॥६१॥ बालाबला सुबलवर्द्धनहारिणस्ते स्ते
नानरा भुवि भवंति कलिप्रतिष्ठाः॥ उद्वेजकाश्च नृषु गोषु च भूषु पापास्तेदस्यवो मुवसुहारिण एव पश्य॥६२॥ दुरोदरद्रीभराः पर
सुतल्पभोगादराः सुरासवगरादना भुवि भवंति नार्यो नराः॥ कलौ परमतस्कराः शिवमयस्कराः नर्चका अहस्कर विनिंदकाः परमदु
ष्कराः स्तेनराः॥६३॥ ॥इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे नवमोध्यायः॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
श्रीसदाशिवाय नमः॥ ॥श्रीईश्वर उवाच॥ ॥पुनः कलियुगे घोरे वातवर्षोपसर्गकाः॥ भवंति च प्रजानां हि आधिव्याधि
समुद्भवाः॥१॥ अकालमरणं देवि पुत्राणां पितुरग्रतः॥ उग्रा उग्रार्चकाः सर्वे ग्रामे वै नायकार्चकाः॥२॥ वराटिकाधराः शाक्ताः ढक्का
वाद्यैकजीवनाः॥ चक्रांकाश्च तथा पापाः सर्वे वै लिंगवक्षसः॥३॥ भविष्यंति कलौ देवि धर्मविक्रयिणो जनाः॥ दुष्टभक्ष्यप्रियाः
सर्वे पलांडुलशुनाशनाः॥४॥ शूलपाषंडवेतंडभंडैः सह वसंत्यपि॥ गणका गणिका वेश्या ज्योतिर्वैद्यान्नजीवनः॥५॥ भगोप
जीवनाः सर्वाः स्त्रियः कामपराहताः॥ भविष्यंति कलौ पापाः सततं निरपत्रपाः॥६॥ अतिदंडाश्च राजानो निर्दंडाश्च महत्स्वपि॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 कलिकलुषनराणां यस्ते तीक्ष्णा शक्त्या युक्त्या भुक्त्यानुसूक्त्या कलयति नियतं चांतकोऽत्र यमर्त्यान् ॥५३॥ मर्त्या अप्यतिसर्वशि 
ल्पकुशलाः कोशान्यमात्रादराः मारापारशराभिघातसुमहाधीरैकसाराः कलौ ॥ म्लेच्छाचारसुचंचुराः कलिनरास्ते वानराः केवलं ॥
नंदंत्येव सदैव हृष्टमनसा ते पामराश्चांबिके ॥५४॥ उद्बुद्धप्रतिभासभासिकहृदा कुर्वंति सर्वाः क्रियाः स्वल्पेनाढ्यमदा भवंति च
सदा सत्यात्रदानोज्झिताः ॥ यवनास्सवनेषु विप्रवृंदं व्यसनान्यसमीक्ष्य लुंठयंति ॥ पिशुनान्निशितान् शुनामिव दंतमीशे लशुना
शिनोग्रदंतैः ॥५५॥ कलौ कलुषिताशया भुवि भवंति बाला बला वितर्ककुशला यसानलविदग्धफालाशयाः ॥ पतंति नरके
खला मलजलाविले केवलं शिलासु बहुलाः समाः क्वथिततैलदुःखांगकाः ॥५६॥ दृढं मृडविनिंदया परिवृढोरुदंडाहताः वि
592 मूढमतयः कलौ परिविशंति गाढं तमः ॥ अनर्गलनिरर्गलार्गलगलादि पादांघ्रयो लुठंति कमठाद्ववाभटभटकठोरशस्त्राह
ताः ॥५७॥ मृत्काला भसित त्रिपुंड्ररहिता रुद्राक्षमालोज्झिताः कद्रुद्रार्चनरुद्रजाप्यरहिताः पंचाक्षरेणोज्झिताः ॥ कुर्वंत्येव क
लौ कलुषयाबुद्ध्यैव कर्माणि ते भ्राम्यंते वसदेव तेयमगृहे संतप्तचक्रोत्कृताः ॥५८॥ भ्रष्टास्ते दुरदृष्टतः प्रतिकलौ विष्ठा
नुलिप्तांगकाः शिष्टाचारविवर्जिता ष्टकरुणामूर्तेः पदार्चोज्झिताः ॥ ते वै संकरसूकरीखररवी योनीषु भूत्वा चिरं दुष्टाः कु
ष्ठशरीरिणः प्रतिगृहं हिंडंति कष्टोत्तराः ॥५९॥ आधिव्याधि उपाधिभिर्विधिवशाद्दाशासु हंता शयां सेवंति प्रसभं कुभांडक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पत्रपाः॥३६॥ब्राह्मणास्तान्धनपराः सेवंतिनिरपत्रपाः॥ भ०॥३७॥स्वैरिण्यश्चस्त्रियः सर्वाः विधवाश्चाप्यनेकशः॥ भ०॥३८॥ यतयोमंद
मतयो भविष्यंति सहस्रशः॥ भ०॥३९॥श्रवणाश्रम भूयिष्ठाकाषायालंकृतांशकाः॥ भ०॥४०॥ शूद्राधर्मप्रवक्तारो ब्राह्मणाश्चवघोरताः॥
भ०॥४१॥ त्यक्तवर्णाश्रमाचारानिःसारास्ताः प्रजाःकलौ॥ भ०॥४२॥ भंडवेतंडकुशलापाखंडागानतत्पराः॥ भ०॥४३॥ गणिकापरिहास्या
श्चगणकागुणवर्जिताः॥ भ०॥४४॥ कुतर्काभ्यासकुशलाः कव्यहव्याशिनोद्विजाः॥ भ०॥४५॥ यंत्रमंत्रपराः सर्वे रसवादविचक्षणाः॥
भ०॥४६॥ वैद्यविद्यासुनिपुणाः कुत्सिताश्चचिकित्सकाः॥ भ०॥४७॥ ज्योतिर्ज्ञानविदः सर्वेद्यूतविद्याविदोनराः॥ भ०॥४८॥ स्वैरिण्यः कि
लसंचरंतिविधवाबालाबलाः केवलंतिर्थोद्यानगिरिव्रजोत्सवमिषा यूनांमनोहारकाः॥ यूनश्चाप्यनुसंचरंतिहि मिथास्तत्संग
निष्ठाः कलौ वृद्धं शूलनिभं शुभाजनपदा केशैकशीलास्त्रियः॥४९॥ तीर्थान्यप्यतिपंकिलानिहिकलौ शैवालजालावतान् प
श्यक्षेत्रगणं चलिंगरहितं चोच्छिद्यम्लेच्छाधमाः॥ स्वस्यांतर्गतकौकसानितनुते कालस्यलीलागतेः क्षुद्राएवभवंति भोगभीता
विप्राः क्षुधार्त्तिंगताः॥५०॥ कलिजाः कुलजातिमानहीनां धनगर्वेणपरिभ्रमंतिनित्यं॥ तनुपोषणयोषितोरुसंगे निरताएवभ
वंतिकेवलाद्याः॥५१॥ योधर्मश्चावकश्चेत्कलिकलुषनरान्मर्मवक्तासएवंनर्मोक्त्यासुखिनो भवंतिकुनराग्राम्येकभोगस्पृ
हाः॥ वर्मशर्ममयंदधाति भुवनेचर्मावृताताः प्रजाः कर्माण्यप्रतिमानिदुष्कृतिपरापयातन्वतेकेवलं॥५२॥ नैवायुर्देशकालौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्जिताः ॥ भ० ॥ ९ ॥ दुष्टाः कष्टे कमलयः शिष्टवदुष्ट धर्मिणः ॥ भ० ॥ १० ॥ शिपिविष्टार्चनाहीनादुर्‌दृष्टेन शंकरि ॥ भवि० ॥ ११ ॥ जारा
चोरास्तथाघोरादुष्पूराग्वोदरंभराः ॥ भवि० ॥ १२ ॥ धर्मध्वजाद्विजाः सर्वे वृजिनेन विमोहिताः ॥ भवि० ॥ १३ ॥ पंचाक्षरविहीनाश्च रुद्राध्या
यजपोज्झिताः ॥ भवि० ॥ १४ ॥ मत्क्षेत्रवासरहिता अन्यक्षेत्रैकवासिनः ॥ भवि० ॥ १५ ॥ सोमवारे दिवास्वेच्छं भोजनाच्छादनेरताः ॥ भ० ॥ १६ ॥
प्रदोषपूजारहिताः सर्वदैवनिशामुखे ॥ भ० ॥ १७ ॥ कालाख्यां मिंदु चूड पूजाध्यानपराङ्मुखाः ॥ भ० ॥ १८ ॥ भूतासु भूतनाथार्चावि
हीनमनसो नराः ॥ भ० ॥ १९ ॥ मत्क्षेत्रमन्य क्षेत्रेण अविमुक्तं (स्वयं) वदंति च ॥ भ० ॥ २० ॥ मन्नाममन्यनाम्नैव सम्मं ते हि वदंति च ॥ भ० ॥ २१ ॥
गोघ्ना ब्रह्महणो घोराः परस्वादाः शिवद्रुहः ॥ भ० ॥ २२ ॥ परापवादकुशला अतिवृष्युपजीवनः ॥ भ० ॥ २३ ॥ राजानोऽर्थपराः सर्वे परान्नादा
590 द्विजाः सदा ॥ भ० ॥ २४ ॥ अरक्षितारो हर्तारः संग्रामविमुखाः सदा ॥ भ० ॥ २५ ॥ वैश्या वेश्यापराः सर्वे तुलाचौर्येणाजीविनः ॥ भ० ॥ २६ ॥
गोरसानां क्रयपराः द्विजास्तंडुलविक्रयाः ॥ भ० ॥ २७ ॥ अफलाश्च महीपालापताम्रभ्रांतिलालसाः ॥ २८ ॥ परदारपराः सर्वे स्वदाररतिव
र्जिताः ॥ भ० ॥ २९ ॥ ग्राम्याहारविहाराश्च जगत्संहारकारकाः ॥ भ० ॥ ३० ॥ वृक्षोच्छेदपराः सर्वे सरोवरविभेदकाः ॥ भ० ॥ ३१ ॥ नदीकूपैकभेत्ता
रः ते शिवालयभेदकाः ॥ भ० ॥ ३२ ॥ पापसंतापबहुला बह्वाशा बहुयाचकाः ॥ भ० ॥ ३३ ॥ दरिद्रा व्याधिता मूर्खा अप्रजाः सप्रजास्तथा ॥ भ० ॥ ३४ ॥
अल्पायुषा नराः सर्वे स्त्रियो बालाऽबला द्विजाः ॥ भ० ॥ ३५ ॥ वर्धंति शूद्रा भूयिष्ठं श्रियापरमया युताः ॥ भविष्यंति कलौ पापाः सततं निर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्येष्ठार्चनावर्जितः॥ दारिद्र्यार्णवमध्यगस्त्वनुदिनं द्रागपि प्रभावर्जितो दुर्व्याद्राविलमुद्रिताखिलतनुः भ्रांतो त्र संमुह्यति॥२८॥ कलिकुल
कुनाकलाकुलोघप्रभवाकीलितकालकोलमूले॥ मृगबालधरं जनो भजेत्किं जितकालं वरहस्तशूलजातं॥२९॥ पापानुतापमतिभा
क्सु करो नरः किं दुष्टोरुसूकरसमः स तु रासभोपि॥ भूभार एव कुनरः कलिकालजातो मारारिपादकमलोदरदूरभृंगः॥३०॥ संत
प्तचक्रकचोपमानसुमहाचक्रांकमुद्रान्वितो नक्राकारकुवक्रफालतिलको भूयाज्जनो वैकलौ॥ तेनाक्रांतजनेन दुर्जगदिदं श
क्रेपि वित्रासकं उक्रांत्युत्तरगर्जनोघमगतो तक्रांबुवक्रो शकं॥३१॥ ॥इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे कलिवर्णने
अष्टमोध्यायः॥८॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवाय नमः॥ ॥श्रीईश्वर उवाच॥ ॥
पुनः कलिभवं देवि गुणं ते कथयाम्यहं॥ नानादुराचाररताः अभक्ष्यान्नैकभक्षकाः॥१॥ सुरासवरताः पापाः भविष्यंति कलौ न
राः॥ भस्मत्रिपुंड्रहीनां गा रुद्राक्षाभरणोज्झिताः॥२॥ भविष्यंति कलौ पापाः सततं निरपत्रपाः॥ लिंगार्चाविमुखाः सर्वे सुमुखा
विष्णुपूजने॥३॥ शालग्रामशिलासाम्यं शिवपूजां प्रकुर्वते॥ ऊर्ध्वपुंड्रधराः सर्वे मृदा फालोदरे गले॥४॥ तप्तचक्रांकिताः केचि
द्व्रात्या व्रतविवर्जिताः॥ भविष्यंति०॥५॥ वैष्णवा विष्णुपाखंडाः शिवोत्कर्षासहिष्णवः॥ भविष्यंति०॥६॥ मदालयभ्रंशकराः
मन्निंदानिरताः सदा॥ भविष्यंति०॥७॥ वर्णाश्रमपरिभ्रष्टा विष्ठाक्रिमिसमाकुलाः॥ भवि०॥८॥ वेदाध्ययनहीनाश्च त्रेताग्निपरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ के॥ भविष्यंति महाभक्ता मयि सर्वासु जातिषु ॥१८॥ त्रिषष्टिप्रमिता पापास्ते प्रमाणा भक्तिहेतवे ॥ सुंदरो ज्ञानसंबंधस्तथा माणिक्यवाचकः ॥१९॥ सदाशि०न०
१५ तेषु मुख्यास्त्रयोपीमे तच्चरित्रं वदामि ते ॥ अगस्त्यो मम भक्तोस्ति तथान्ये ब्राह्मणर्षभाः ॥ भव भक्ता भविष्यंति कलावपि तपोबलात् ॥ सह्य अं०८
जातीरलिंगानां महिमानं शिवेद्भुतं ॥२१॥ वर्णयंत्येव ते देवि अगस्त्योक्तेन भाषया ॥ द्राविडे नैव देवेशि मयि तत्प्रीतिदायकं ॥२२॥ राजानः
किल दस्युवंशजनिताः पापास्तथा मांडलाविप्रद्रोहपरायणाः शिवमहालिंगालयोच्छेदकाः ॥ रुद्राक्षामलभस्मधारणमहालिंगार्चनावर्जि
ताल्लोके केवलतामसाः प्रतिकलौ जायंत एवांबिके ॥२३॥ मन्नैवेद्य विवर्जिताः प्रति कलौ सद्विद्यया वर्जिताः ॥ दुष्टाः शिष्टसमा इव महाक
ष्टेकनिष्ठाः शिवे ॥ संतुष्टाः शिवनिंदया हरमहाश्रीलिंगसाम्यर्च्चया ॥ तेच क्रोपलतप्तचक्रसुमहा फालोर्ध्वपुंड्रा जनाः ॥२४॥ कर्मंदिनोपिवि
५११ रता हरपादपद्मसंपूजका भसितफालतलत्रिपुंड्राः ॥ वेदांत शांति गुरुपूजनसक्तचित्ता मत्वा इव प्रतिगृहेषु च भिक्षितान्नाः ॥२५॥ उर्वीनि
वीर्यतां ता कलिमलजजलानिष्ठ निष्ठानयुक्ताः शिष्टाचारैकनिष्ठ क्षुभितनृपशतैः म्लेच्छतुच्छप्रतिष्ठा ॥ सत्येभिः सत्वताधीर्जितज
गुरफलं षंडपाखंडधर्मो नो कश्चित्स्म भवेत शंकरपदध्यानानुरक्तः कलौ ॥ दूणास्थूणकराश्च शोणितमुखाः भूपप्रभाभाविताः गी
र्वाणानपि जनेतृशक्तिनिबहैः पाषाणपाणीगणाः ॥ घोणाघर्घरसाम्यवाद्य जमहानिःसाणविश्राणिनो क्षोभायाब्धिषु संचरंति
हि कलौ नीलाजिनीभूषणाः ॥२७॥ नित्यानुष्ठानतुष्टो न भवति हि जनः तुष्टिपुष्ट्या वियुक्तः भ्रष्टः शिष्टविनिंदकः कलियुगे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मसजोगुणाः॥ नंदांताः क्षत्रियास्तस्मिन्विक्रमाद्याः ततः परं॥ शालिवाहनसंज्ञश्च कुलालेषु नृपो भवेत्॥ मुंजभोजौ भवेतां वै ततश्चो
लाश्च षोडश॥ भस्मरुद्राक्षसंपन्नाः शिवभक्ता महौजसः॥ शिवालयकराः सर्वे देशे राष्ट्रे च चोलके॥४॥ सह्यजातीरनिलया राजानो द्रवि
डाधिपाः॥ चेराः [चोला:] पंचशतं देवी राजानः पांड्यवंशजाः॥५॥ मलयध्वजसंभूता यत्र जाता त्वमेव हि॥ [(मदूरा)] हालास्यनिलया देवी मीनाक्षी सुं
दरेश्वरः॥ अहमेव महालिंगे निवसामि कलौ शिवे॥ भविष्यंति महीपालाश्चेरे चोले च पांड्यके॥७॥ शिवभक्ता नराः सर्वे तेषु शा
सत्सु शंकरि॥ सहस्रवत्सरे सर्वे शालिवाहनविक्रमौ॥८॥ ततश्चोलाः कलौ पांड्याः सहस्रद्वितयं शिवे॥ भविष्यंति महीपालाः ततः
शूद्राश्च संकराः॥९॥ आंध्राणां नृपषट्कं वै नृपाणां वै भविष्यति॥ आर्यावर्ते विमुक्ते च कुरुक्षेत्रे विशेषतः॥१०॥ म्लेच्छा भूमिभुजः स्वै
रं भविष्यंत्यल्पमेधसः॥ पंचाशतं वत्सराणां भूद्रमांडलिका नृपाः॥११॥ दस्युप्राया भविष्यंति धर्मोच्छेदकराः कलौ॥ म्लेच्छाचारप
राः सर्वे दरिद्राश्च द्विजातयः॥१२॥ भविष्यंत्यल्पमतयो यतिस्तत्र भविष्यति॥ शिवे मदंशसंभूतः शंकरः शांकरोत्तमः॥१३॥ चतुर्भिस्स
ह शिष्यैश्च कलाववतरिष्यति॥ तस्मै चोपनिषद्विद्यां मया दत्तां महेश्वरि॥१४॥ भूमौ पाखंडषंडानां खंडनं स करिष्यति॥ कलावपि म
हादेवि हरदत्ताभिधो द्विजः॥१५॥ अशैवदंडनार्थाय भविष्यति महीतले॥ दीक्षितोपि भवेत्कश्चिद् मदंशो भूसुरोंबिके॥१६॥
भासुराचारनिरतः शैवः छंदोगवंसजः॥ शैवशास्त्रं तथा भूमौ लुप्तं विस्तारयिष्यति॥१७॥ अन्येपि भक्ता देवेशि चेरदेचोले च पांड्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

को
तं मृतं ॥२८॥ लक्षकं शक्रसाहाय्यान्मोचितो नृपसूनुना ॥ द्वापरे धर्मनिपुणाः पुण्यपण्यैकजीवनाः ॥२९॥ अरण्ये षु विशेषेण तपसा शोषयंति च ॥ ऋषयः क्षुब्धिवाणिज्यमृषावादपराङ्मुखाः ॥ सुमुखाश्च तथा लेखा द्वापरे पारदर्शिनः ॥ सज्जमाना यथा जोषं यजमाना मखेष्वपि ॥३१॥ विषयेष्वपि काषायवसनाः कामवासनाः ॥ भवंति द्वापरजनाः द्विपाद्धर्मोऽत्र तत्र हि ॥३२॥ द्वापरे धर्मरूपात्मा महान्धर्मवृषोंऽबिके ॥ प्रभवत्येव सहसा कालचक्रप्रवर्तकः ॥३३॥ युगसंधिषु वर्षाणां सहस्रं तद्युगानुगं ॥ पौर्विकं संप्रवर्तेत तत्तद्युगभवं गुणं ॥३४॥ दशलक्षं कृते संख्या त्रेतायां पंचलक्षकं ॥ द्वापरस्तु त्रिलक्षं स्यात्कलिः प्रोक्तो द्विलक्षकः ॥३५॥ द्वापरो वैरूप्ययुगकः तस्मिन्नेवं प्रवर्तते ॥ एवं युगानां परिवर्तमानैः शतैश्च कल्पो भवितोंऽबिके सदा ॥ कल्पैः शतैस्तत्र विधेरथायुस्तस्यायुषोऽन्ते हरिणोऽहमानं ॥३६॥ एवं हरेस्तत्प्रतिमैश्च कल्पैः रुद्रस्य चैवायुरिति स्मरांबिके ॥ एवं मनूनामथ भूतभव्यमानं ऋषीणामथ शक्रसंख्या ॥३७॥ प्रोक्ता पुराणेषु विशेषतोंऽबिके तस्मात्त्वयाहं किल कालहीनः ॥ मदुन्मेषोन्मेषौ युगशतगतीनां प्रविलयो हरिब्रह्मेंद्राणां शतमखमनूनां दिविषदां ॥ ऋषीणां सप्तानां भवति परिमाणं कलिशिवे मता कालस्येयं गतिरपि जगन्नश्वरमिदं ॥३८॥ ॥इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे द्वापरधर्मकथनं नाम सप्तमोऽध्यायः ॥७॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥श्रीसदाशिवाय नमः ॥ श्रीईश्वर उवाच ॥ ॥कलेः स्वरूपं वक्षामि त्वं देवि श्रृणु हर्षदं ॥ यो धर्मरूपो वृषभः कैलासे त्वेकपाद्भवेत् ॥ तेन धर्मो ह्रसत्येव कलौ ता

सदाशि० नः अ० ७

६००

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयासक्तचेतसः॥ तेष्वहं तामसीं वृत्तिं ददामि प्रतिजन्मनि॥१३॥ यायजूका वदान्यास्ते दातारो द्वापरे नृपाः॥ वैश्याः कृष्युपभोक्तारः
गोवाणिज्यरसक्रियाः॥१४॥ आढ्यांमी दुष्टमार्चायां निरताः शूद्रजातयः॥ स्त्रियः सत्यस्तथा सर्वे शुश्रूषानिरताः सदा॥१५॥ काले
वर्षति पर्जन्य उर्वरा शर्वपूजया॥ र... युक्ता भवेतास्मिं युगे वै संयुगे रताः॥१६॥ वियोगरहिताः सर्वे योगयुक्ताः सदैव हि॥ यागैर्देवान्
यजंत्येव त्यजंति कलहं नराः॥१७॥ कुब्जाश्च नराः सर्वे जलजोपमदृष्टयः॥ विसृष्टयः प्रजायंते शिपिविष्टपदाश्रयात्॥१८॥ इ
ष्टापूर्तमहाधर्मस्त्वभिवृद्धो भविष्यति॥ तस्मिन्नृपाः शांतनवा यादवाः पृथिवीभुजः॥१९॥ पांडवा व्यासपोत्रास्ते अक्षैस्त्यक्त्य
भूमिकां॥ वने वन्येन जीवंति त्र्यक्षार्च महिमावशात्॥२०॥ पुनस्ते पृथिवीं प्राप्य धार्तराष्ट्रैश्च विग्रहं॥ उग्रप्रसादात्कृत्वैव ानिग्र
हं विर्यवन्नराः॥२१॥ बुभुजुः पृथिवीं ते वै यायजूकाः प्रियंवदाः॥ अश्वमेधेन देवेशं साक्षान्मेधपतिं शिवं॥२२॥ यजंति शिवलिं
गेपि वासुदेवेन चांबिके॥ उपमन्युप्रसादेन कृष्णो यदुकुलोद्भवः॥२३॥ लेभे स परमां सिद्धिं न लिंगार्चाबलेनपि॥ विजिग्ये बलि
जं बाणं दोःसहस्रैकजीवनं॥२४॥ तथान्यान्सुरकंसादीन् नरकं दैत्यनायकं॥ मथुरामास्थितो देवी द्वारवत्यामपि स्थितः॥२५॥
अश्वत्थामा द्रोणसुतो मम पूजाप्रभावतः॥ मया दत्तेन खड्गेन जिगाय रिपूं रणे तदा॥२६॥ लेभे स परमां सिद्धिं लोके द्यापि प्रदृ
श्यते॥ द्वापरांते पि चन्दपो पारीक्षिज्जनमेजयः॥२७॥ अश्वमेधेन देवेशमियाजाद्रि मखेन हि॥ पितरं तक्षको दृतविषेणोद्वीक्ष्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 यस्तत्रवर्धते ॥३०॥ त्रेतास्वग्नित्रितयजनितः श्रौतधर्मो मखेज्यावापीज्ये च प्रभवति जनो याययूकः सदैव ॥ श्रीरुद्रार्चा श्रुतिज 
 नयनहृत्यापसंतापहीनो लोकः शोकैर्विहीनो भवति युगवरे पश्य देवेश्वरि त्वं ॥३१॥ ॥ इति श्री शिवरहस्ये सदाशिवांशे नवमोंशे त्रेतायुग मुनिवाक्य 
वर्णन नाम षष्ठोऽध्यायः ॥६॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवायनमः॥ ॥श्रीईश्वर उवाच॥ ॥द्वापरोक्तानि
मान् धर्मान् शृणु त्वं नगकन्यके ॥ पाश्वा (द्विपादः) त्रिपादैः केनासवृषो धर्मः स्थितो भवेत् ॥१॥ राजसा गुणतः सर्वे भवंति युगसंभवाः ॥ जीवंति च
सहस्रं ते ते गुणेनैव पार्वति ॥२॥ तेऽर्चयंति विरूपाक्षं रुद्राक्षाभरणा नराः ॥ भस्मजन्यत्रिपुंड्रांका रुद्राध्यायार्थपारगाः ॥३॥ पंचाक्षरपराः
सर्वे शिवलिंगार्चनप्रियाः ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा नार्यश्च संकराः ॥४॥ शांकरा एव सर्वेऽपि द्वापरे तपसि स्थिताः ॥ वर्णाश्रमा
चाररता द्विजा सौम्याः प्रभावतः ॥५॥ गर्गः परासरो धौम्य उपमन्युर्दधीचकः ॥ कण्वश्च गौतमश्चैव दूर्वासा दत्त एव च ॥६॥ सर्वे शर्वार्च
का विप्रा भस्मरुद्राक्षभूषणाः ॥ तरुणेंदुकला मौलिलिंगार्चनपरायणाः ॥७॥ ग्रहस्था यतयश्चैव वर्णिनो वनजीवनाः ॥ स्वाश्रमाचा
रनिपुणाः पुण्याः सर्वेऽपि राजसाः ॥८॥ तत्र धर्मः प्रवर्त्तेत शंखोलिखितचोदितः ॥ राजानस्तत्र सुजनाः गयश्चैव उदावसुः ॥९॥ कुरुः पु
रुः शतायुश्च पुरजित् भरतस्तथा ॥ यादवो वसुदेवोऽथ रामोऽपि बलभद्रकः ॥१०॥ दुर्योधनादयः सर्वे धार्त्तराष्ट्रा महौजसः ॥ देवासुरस
मुद्भूताः द्वापरे विग्रहे रताः ॥११॥ अन्योन्यमुपहिंसंतो रजसा तमसेन च ॥ यथासंभवधर्मेण वर्तंति द्वापरे नृपाः ॥१२॥ सर्वराष्ट्रे सुखि----

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्यो ऽभ्याः सभ्याः सर्वे वहि ॥ शूद्राः शुश्रूषवः सर्वे सर्ववर्णेषु नित्यशः ॥ १५ ॥ स्त्रियः सतीव्रताः सर्वा वर्णिनः पर्णभोजनाः ॥ अपर्णापतिपादाब्जे
तूर्णं संपूर्णदृष्टयः ॥ १६ ॥ गृहस्थाः स्वस्वचित्तास्ते विश्वस्ता धर्मवृत्तयः ॥ वन्याः संन्यासिनोऽप्येवं तपसैव प्रवर्त्तिनः ॥ १७ ॥ रुद्राक्षभस्मा
भरणाः शरणाः शिवपूजने ॥ करुणाविष्टहृदया मरणेऽपि प्रतिक्षणं ॥ १८ ॥ अयुतं तेषु चायुर्हि तपो धर्मोऽपि वर्त्तते ॥ स्वाध्यायशर
णाः सर्वे शिवध्यानहताऽशुभाः ॥ १९ ॥ नद्यश्च स्यंदते नित्यं फलंति वनराजयः ॥ घटोध्न्यस्तास्तथैवाघ्न्याः सर्वे धर्मैकजीवनाः
॥ २० ॥ शिवैकदेवाः सर्वेऽपि शिवार्चनपरायणाः ॥ देवा हविर्भुजः सर्वे सर्वदा शर्वपूजकाः ॥ २१ ॥ त्रिनेत्रपूतपादाब्जध्यायिनः सत्र
जीविनः ॥ दैत्याः शर्वार्चनरताः सर्वदा समरोद्धताः ॥ २२ ॥ कृते हिरण्यकशिपुः हिरण्याक्षश्च वृत्रकः ॥ एते वै दैत्यराजानो मय्येव
प्रीरताः शिवे ॥ २३ ॥ गर्वनिर्वापणार्थाय सुराणां च पदे पदे ॥ त्रेतायुगे रावणश्च बलिः प्रह्लाद एव च ॥ २४ ॥ नमुचिश्च कुजंभश्च
नृपो दैत्यां राजाँस्तथा ॥ गर्वापहरणार्थाय सुराणामेव तेंबिके ॥ २५ ॥ मया सृष्टा विशिष्टास्ते ममपूजापरा हि ते ॥ राजसातामसोपेताः सुरेषु प्रभविष्णवः ॥ २६ ॥ यदा तैर्निर्जिता देवाः तदा मम सपर्यया ॥ तेषां गर्वापहाराय धर्मसंस्थापनाय च ॥ २७ ॥
मत्पदाब्जे तदा भक्तिं विष्णावेतां ददाम्यहं ॥ तया भक्त्या युतो विष्णुरवतारेषु मां यजेत् ॥ २८ ॥ लब्धचक्रस्तदा दैत्यान्निहंता दे
वसत्तमैः ॥ एवं त्रेतायुगमुखे कृतो धर्मो मयांबिके ॥ २९ ॥ सात्त्विको राजसामिश्रो मिश्रो धर्मः प्रवर्त्तते ॥ क्षेत्रं त्रेतायुगं प्रोक्तं क्षत्रि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०९ तमिदं शिवे सुकृतमेतदालोक्यतां ॥ कदाचिदपि हीयते तनु सुबुद्धि मे तद्गुतं तपस्विजनवल्लभः परमदुर्लभोयं युगः ॥ ३४ ॥ ॥ इतिश्रीशिवरहस्ये सदाशिव-न-
१२ सदाशिवाख्ये नवमांशे कृतयुगवर्णनं मुनिवाक्यं नाम पंचमोध्यायः ॥५॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवायनमः॥ ॥श्रीईश्वर उवाच॥ ॥ अ-६
त्रेतासु वृषभो मेध्य त्रिपादग्रे प्रतिष्ठितः ॥ कैलासे संवसद्देवी पादोनं ह्रसते ततः ॥१॥ इज्याप्रतिग्रहक्षात्रकृषिगोरक्षसेविनः ॥ ब्राह्मणाः क्षत्रिया
वैश्याः स्त्रियः शूद्राश्च संकराः ॥२॥ सात्विको रजसा मिश्रो गुणस्तेषु प्रजायते ॥ इज्ये ववर्धते लोको हिंसाये वांबिके तदा ॥३॥ प्रवर्त्स्यंति मुनयो श्रुत्यु
क्ताचारतत्पराः ॥ भृगुश्च जमदग्निश्च वसिष्ठश्च पराशरः ॥४॥ कात्यायनो जामदग्निर्विश्वामित्रादयो द्विजाः ॥ क्षत्रियाश्च द्विजाः सर्वे तत्र धर्म
प्रवर्तकाः ॥ वर्णाश्रमेषु कथिताः तत्र संवर्त्तकोदिताः ॥ तपः फलमयं तत्र इज्या स्वर्गार्थमेव हि ॥६॥ तत्रापि भस्मनिरताः त्रिपुंड्रांकाद्वि
६०२ जास्सदा ॥ रुद्राक्षधारिणः सर्वे रुद्रसूक्तजपादराः ॥७॥ पंचाक्षरपराः सर्वे रुद्रलिंगार्चनप्रियाः ॥ रुद्रक्षेत्रनिवासास्ते त्रेतायां भक्तितत्पराः ॥८॥
सोमसूर्यान्वये ये च राजानो भूरिदक्षिणाः ॥ ययातिर्नहुषोरंतिदेवोथ त्रणबिंदुकः ॥९॥ भगीरथो दिलीपश्च रामो दाशरथिस्तथा ॥ सोप्यग
स्त्यमनुप्राप्य भस्मरुद्राक्षधारिणं ॥१०॥ जपन्नामसहस्रं मे रावणं दारहारिणं ॥ विजिगायासुरान्रामो मेघनायजरीश्वरं ॥११॥ सेतौ मल्लिंगमा
राध्य पापान्मुक्तो बभूव ह ॥ दातारो रक्षितारस्ते भुवो मंडलमंडनाः ॥१२॥ भस्मरुद्राक्षसंपन्ना यायजूकाः शिवार्चकाः ॥ तेषु शासत्सु पृथिवीं
रसयुक्तौषधीष्वपि ॥१३॥ पर्जन्यः कालवर्षी स्यात्सर्वे धर्मैकजीवनाः ॥ वणिजः पण्यनिपुणाः पुण्येषु निरताः सदा ॥१४॥ विरताः पापकर्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिमंत्रतः॥भस्मनो धारणं गौरि तथा रुद्राक्षधारणं ॥२०॥ लिंगार्चनं रुद्रजपो पंचाक्षरजपस्तथा॥ शापोत्सर्गो न चक्रोधो हृष्टी णां वै कृते
युगे॥२१॥ मरीचिरंगिरा चात्रिः मित्रावरुण एव च॥ कश्यपोथ भरद्वाजः संवर्त्तश्च बृहस्पतिः॥२२॥ एते कृतयुगे देवि वेत्तारो धर्मनिश्च
यं॥ राजानः सोमसूर्ये च संभवाः पुण्यकीर्तयः॥ हरिश्चंद्रो मरुतश्च मांधाता सगरः पृथुः॥ अनरण्यो नृगो बभ्रुरयुतायुः शिबिस्तथा॥
॥२४॥ एषु शासत्सु पृथिवी फलसस्योरुमालिनी॥ कालवर्षी च पर्जन्यो नद्यः स्यंदंति नित्यशः॥२५॥ अश्वमेधपराः सर्वे दाक्षिण्याबल
वत्तराः॥ अक्षौहिणीनां पतयः क्षोणीशाः शिवभावनाः॥२६॥ भस्मरुद्राक्षसंपन्ना लिंगार्चानिरताः सदा॥ अनरण्ये महीपाले नारण्या
नीरभूच्च भूः॥२७॥ निर्दस्युराष्ट्रा राजानो याय जूकाः प्रियंवदाः॥ दातारो रक्षिता(हिता) रस्ते जेतारः समरे रिपून्॥२८॥ गोरक्षारसवाणि
ज्यवश्या वैश्याः कृते युगे॥ शूद्राः शिश्रूषवः सर्वे त्रिषु वर्गेषु नित्यशः॥२९॥ नरा नार्यो विशः शूद्राः सत्यनिष्ठाः कृते युगे॥ न स्वै
रिण्यो नान्तकाः सर्वे धर्मप्रभावनाः॥३०॥ मानवोहि कृते धर्मः श्रुतिप्रोक्तो विशिष्यते॥ वर्णाश्रमतथा सर्वे स्वे स्वे कर्मण्य
धिष्ठिताः॥३१॥ एवं कृतयुगे धर्मो पश्यदेवि प्रवर्तते॥ दयादाक्षिण्यसंयुक्तो ह्यक्षपादानुवर्तनात्॥३२॥ एतत्ते संग्रहेणैव
कृते धर्मप्रकीर्तितः॥ कृते सुकृतराशयो भुवि भवंति सर्वेष्वपि न चानृजुकुकापथो भवति कश्चिदेवेहमे॥ पदांबुजसमर्च
को भवति लोकमालोकय श्रुति प्रकटितो वृषो भवति तेषु चायुः परं॥३३॥ शतायुतभवं सदा भवपदांबुजाराधनात् सुनिश्चि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह६०९ ब्दमयी विश्वं पुनासि परमेश्वरि ॥ त्वं विष्णोः पद्मजा शक्तिः सर्वपालनकारिणी ॥४॥ त्वया समृद्धं यत्किंचित्तद्वृद्धिमधिगच्छति ॥ त्वमे महाशि० न०
११ व रुद्रे परमा शक्तिः संहारकारिणी ॥५॥ त्वं प्रभासि तथा भानौ दहने दहनात्मिका ॥ पवने चालनी शक्तिः त्वं कांतिः सोममंडले ॥६॥ इंद्रे अ० ५
प्रभुत्वशक्तिस्त्वं यमे दंडात्मिकाऽसि ॥ धनाधिपे निधिमयी नैरृते खड्गरूपिणी ॥ वरुणे पाशशक्तिस्त्वं त्वं सर्वमातृमंडले ॥ त्वयैव श
क्तिमानस्मि अस्मिन्भुवनमध्यमे ॥ अमूर्तोऽहं त्वया मूर्तिं गृहीत्वा क्रीडया स्वयं ॥ लोकमेनं महादेवी तस्मान्मे शक्तिमत्तरा ॥९॥ भुवि त्वं धा
रणी शक्तिर्नदीषु स्यंदरूपिणी ॥ एवं त्वन्मयमेवेदं जगच्छक्तिसमुद्भवं ॥१०॥ तस्मात्कालात्मिका शक्तिः कालरूपं वदामि ते ॥ शृणु त्वं
सावधानेन नाख्येयं यस्य कस्यचित् ॥११॥ रहस्यमद्भुततरं प्रोक्तपूर्वं मयांबिके ॥ मद्धर्मवाहवृषभपादास्ते युगमूर्तयः ॥१२॥ कृतत्रे
तद्वापराख्याः कलिकालयुगादयः ॥ पादसंधिखुरा ये तु ते सर्वे युगसंधयः ॥१३॥ युगेषु धर्मवृषभः पादान्संहरति स्वयं ॥ मदाज्ञावशतो
६०३ देवी कालचक्रप्रवर्तकः ॥१४॥ कृते चतुष्पाद्वृषभः कैलासेऽधिष्ठितः सदा ॥ वर्णाश्रमं गोद्रष्ट्यादि पूर्तधर्मो हृपादवान् ॥१५॥ पूर्वपा
दौ वृषस्यास्य कृतत्रेतेति विद्धि मे ॥ द्वापरश्च कलिश्चेति पश्चात्पादावुभावपि ॥१६॥ कृते चतुष्पदस्तिष्ठद्वृषभो मेऽग्रतः सदा ॥ कै
लासे तेन धर्मोऽपि सात्त्विकः संप्रजायते ॥१७॥ देवतीर्थद्विजनुब्येषु नृपेषु भुवि चांबिके ॥ तपस्विषु दमो दानं संविभागो यथारुचिः
॥१८॥ इज्याध्ययनसंपत्तिः क्रोधमात्सर्यवर्जनं ॥ ब्राह्मं कृतयुगं प्रोक्तं ब्राह्मण्यं तत्र वर्धते ॥१९॥ त्रिपुंड्रधारणं पुण्यमग्निरित्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ड्मलजंनिचोलमचला धीशांगजांगेहरः पश्यन्तद्वदनं मुदा पुरहरः सीमंतसीमंतिकां नेत्रैः स्वैरनिमेषकैः प्रतिदिनं स्वीचक्रईशो
हरः॥४४॥ तोषोन्मेषनिषेण सा त्रिभुवनाधीशं पुषंतं हृदा पुष्पाशेषविशेषशोषितगरं भूषाकृताहीश्वरं॥ कालाशेषजगत्क्रियादिवि
षमव्यापारसारादरं सा देवी विषयेषु सक्तहृदयं वाचा विशेषेणातु॥४५॥ ॥श्रीशिवाउवाच॥ ॥भो भर्ग सर्वजगत्सर्जक पापवर्गसंभ
र्जको ऽभवतर्जक भोगवर्ज॥ दुर्जीवजातजनुषां कलिचित्रकृत्यं शं भो त्रिनेत्र वद मे करुणा यदि स्यात्॥४६॥ ॥श्रीस्कंद उवाच॥ ॥
तद्देवीवचनेन चारुवदनांभोजो मुदा शंकरः॥ ध्यानोद्बुद्धसमस्तकालजगतां व्यापारमूचे हरः॥ पश्यंतद्वदनांबुजं गिरिवरे सोधोरुमंच
स्थितो मुंचत्स्वां करुणा झरी भरदृशा सद्धर्षवाचं तदा॥४७॥ ॥श्रीशिवउवाच॥ ॥धन्यां मन्यां मनोज्ञां त्रिभुवनजननीं शैलराजें
द्रकन्यां सीमंतिन्यां वरिष्ठां मम हृदयमहानंदवन्यां च जन्यां॥ मन्ये चित्ते पि नान्यां तव सदृशमहारूपसंपत्समृद्धां स्वर्धुन्यां वावि
शिष्टां भगवति भवतीं नान्यथैतद्भृणुत्वं ॥४८॥ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे मुनिवाक्यं नाम चतुर्थोध्यायः॥४॥ ॥
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसदाशिवायनमः॥ ॥श्रीगौर्यैनमः॥ ॥श्रीशिवउवाच॥ ॥शृणु पद्मामलोत्फु
ल्ललोचने पर्वतात्मजे॥ त्वया नाविदितं किंचित्कालशक्तिस्त्वमेव हि॥१॥ त्वमेव शक्तिः परमा कालचक्रप्रवर्तिका॥ त्वमेव परमा
सिद्धिः त्वं स्वाहा त्वं स्वधा शिवे ॥२॥ त्वमेव ब्रह्मणो देवी सर्गे शक्तिका स्मृता॥ गीयसे त्वं पुराणज्ञैः साक्षाद्देवी सरस्वती॥३॥ सर्वज्ञ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तौ ममुदातेशिवौ मुने ॥ ३१ ॥ हीरसारमहासौधे वीणापाण्यंबया सह ॥ तत्तंत्रीवक्क संबद्ध राग रक्तोंबयायुतः ॥ ३२ ॥ तपनो
१० द्दाम किरण संतप्तां गोंबया शिवः ॥ धारासार गृहे तुंगे विहरत्येव शंकरः ॥ ३३ ॥ अच्छादर्शतला च्छिद्र गृहेषु विहरत्यपि ॥
चंद्रचंदन संलिप्तौ शिवौ विहरतो वने ॥ ३४ ॥ कदाचिदास्थानगतो नंदिभृंग्यादिभिः सह ॥ महाकैलासलिंगानि प्रासादस्थानि
रीक्षते ॥ ३५ ॥ कैलासेश महालिंगे करोत्यर्चनमंबया ॥ क्वचित्सभासु संध्यायां नृत्यत्या नंदनिर्भरः ॥ ३६ ॥ षड्वक्त्रं गजवक्त्रं च निरीक्षति
मुहुर्मुहुः ॥ चिक्रीडतोस्तयोरेवं महाकैलासपर्वते ॥ ३७ ॥ कस्तस्य वर्णयेद्युक्त्या चित्रा लीला महेशितुः ॥ त्वया यदुक्तं तद्देवी पृच्छति स्म म
हेश्वरं ॥ ३८ ॥ हर्षवर्षयुतं शंभुं सुधासागरसौधके ॥ शंभुः सुधासागरमध्यगोंबां समभ्यवर्षत्करयंत्रसेचनैः ॥ साचालिसंघे स्वकराग्रसं
60५ स्थ धाराभिराच्छादयदीश्वरार्कं ॥ ३९ ॥ सितासितसुपाटलीपटलकुंदमंदारजस्रजोद्धतमरंदप भ्रमणशीतमंदानिले ॥ वसंतसमयोल्लसद्द्वि
जदिनांतसन्मल्लिकालतागृहनिकुंजभूप्रथितमंचतल्पेशिवः ॥ ४० ॥ मंचे सिंचति पुष्पसारसलिलैः देवोत्तसन्मल्लिकासुरभ्रमन्मधु
व्रतप्रकरमोद धारायुतः ॥ अनल्पकुसुमोच्चय प्रमथमानतल्पेंबिकारीरंसयति कोकिलामधुरकाकलीनांवैः ॥ परिमलून्मिलदलि
वृंदमल्लिसंफुल्लवल्ली चलदनिलकुलायोर्द्धुनपत्रांडजैश्च ॥ मधुरवरसुजाजी मल्ली धंमिल्लमल्लीकृतसुमशरवल्या लीलयामास
शंभुः ॥ ४२ ॥ फालेकुकस्तुरिकांतं तिलकमलकजस्फारसौंदर्यधारा नानागंधानुबंधद्युतिदंति कलसत्सांद्रसिंदूररेखां ॥ ४३ ॥ मल्लिकु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थितो तुंगलिंगसंगत भूतले ॥ १६॥ प्रबाल जालको द्दाम स्तंभमंडप सुंदरे ॥ नाना पक्षियुता पार रुतानंदित कंदरे ॥ १७॥ मृग मातंगशर
भसारंगमहिषावृते ॥ चमरी समरो दंड कोल कूलैश्च शोभिते ॥ मयूर शुकजाराव पुंस्कोकिल विनादिते ॥ सिंहर्क्षवृकशार्दूल
कगोसङ्ग शोभिते ॥ १९॥ गण वक्र महातूर्यदुंदुभ्याघात नादिते ॥ मृदंगशंख निनद विनादित दिगंतरे ॥ २०॥ वीणावेणुस्व
नाकीर्णमहाकैलास पर्वते ॥ परीघाकारसंलग्न पादमूलक सागरे ॥ २१॥ सुधासागरजोत्तुंगतरंगोत्थितशीकरैः ॥ वातपो
त समानीतैः पुष्परेणु समन्वितैः ॥ २२॥ तमालवन संलग्न शीतवात मनोहरे ॥ महानीपावनीजन्य तत्सुमोद्बुध मारुते ॥
शरत्कौमुद कीफुल्ल कुमुदामोद बंधुरे ॥ फुल्ल हल्लक सल्ला सिवातवातायनैर्युतेः ॥ २४॥ गलत्सौद् महाधाराआद्या
र्द्रद्रोण भूतले ॥ करिकुंभ महाधारा पंकिले पुष्परेणुभिः ॥ २५॥ कस्तूरि कामदोद्भूत गंधसंमोदिदिक्तटे ॥ विकाचकमलो
दार परागरक्त भूतले ॥ २६॥ केतकीधूलिकापालि पाटलामोदवायुभिः ॥ उद्ग्रकुरवो द्दाम पिप्पली गंध मेदुरे ॥ २७॥
महागोपुर मध्यस्थमणिसिंहासने शिवौ ॥ चिक्रीडतुस्तदा तस्मिन्महाकैलास पर्वते ॥ २८॥ कदाचिच्छीरफल
कमंच मध्य स्थितः शिवः ॥ देव्यास्ते सुमनोद्दाम भूषणो गिरिसानुषु ॥ २९॥ क्वचित्प्रासाद मध्यस्थो विहरत्यंब
या शिवः ॥ कदाचित्सरसीमध्यसौधे मंचोत्तरे शिवः ॥ ३०॥ क्वचित्सुधाफलोद्दाम वनेषु विहरेश्वरः ॥ कदाचिदांदोलग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१ पकाराय कैलासेशं करालये ॥ मणिसौधसहस्राढ्ये रत्नप्राकारविस्तृते ॥ मणिमंडपसाहस्रैरन्विते खचितोपले ॥३॥ नवरत्
नमणिज्योतिःप्रभाकौलितदिङ्मुखे ॥ वैडूर्यसूत्रांतर्गते कांतिकांचितदिक्तटे ॥ हरिद्दूरिमणीगर्भसंछन्नामलभूतले ॥ मणि
गोपुरगोद्भासिकलशद्योतितांबरे ॥४॥ चलत्पताकानिवहसंवहोद्भूतवातके ॥ सभाविभासिनटनेकंपिताखिलभू
तले ॥ मणिधारामहोदारादूरीकृततमस्तति ॥ प्राकारगोपुरैस्तुंग [illegible] गोपुंगवविराजिते ॥६॥ मणिगर्भशिवागारसंभ्रशो
भिसुमनोहरे ॥ कैलासेशमहालिंगतुंगधामोपशोभिते ॥७॥ पंचगंगातटोद्भासिलिंगपंक्तिविराजिते ॥ तत्तीरसुमनो
हारिरत्नसोपानसंयुते ॥८॥ अंबिकेशालयोद्दामकुंभदीधितिदीपिते ॥ नंदिकेशादिगणपकृततूर्यरवैर्युते ॥९॥
गणेशस्कंदसदनसानंदगिरिमस्तके ॥ देवीश्वरमहाधामधगधगितदिक्तटे ॥ महागिरिवरोत्तुंगरत्नसौध
.६०९ विराजिते ॥ माणिक्यखचितोदारतारहीरविराजिते ॥११॥ इंद्रनीलमहाकांतिनीलकालकितांबरे (नीलिका कलिताम्बरे) ॥ नंदनानंदन
शतैः सुचंदनवनावृते ॥१२॥ तमालसालविपिनमध्यप्रासादशोभिते ॥ हरिन्मणिमहारंभाचलत्पत्रशतावृते ॥ रत्
नतालीवनोद्दामघर्घरातुलमारुते ॥ महासरोवरोद्भासिफुल्लनीरजशोभिते ॥१४॥ रत्नकल्हारकुमुदशत
पत्रविराजिते ॥ चंपकाशोककदंबबिल्वनागवनावृते ॥१५॥ भ्रमद्भ्रमरतत्पुष्पगुच्छाच्छादितमस्तके ॥ बिल्वमूल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भस्म धारणं ॥ त्रियायुषेण मंत्रेण त्रिपुंड्रस्यच धारणं ॥ ३५॥ त्रियंबकेन मंत्रेण रुद्राक्षाणां च धारणं ॥ पंचाक्षरेण मंत्रेण त्रिकालं लिं-
गपूजने ॥ ३६ ॥ रुद्राक्ष ध्यायजपश्चैव त्रिकालं सावधानतः ॥ बिल्वपत्रैर्महादेवपूजनं सोमवासरे ॥ कालाष्टम्यां महादेवं बि-
ल्वपत्रैश्चपूजयेत् ॥ चतुर्दश्यामपामार्गैः निशि बिल्वैश्च पूजनं ॥ ३७॥ अस्तदोषे प्रदोषे च बिल्वैर्लिंगस्य पूजनं ॥ शि-
वक्षेत्र निवासश्च अविमुक्ते विशेषतः ॥ ३८॥ शिवभक्तार्चनं वापि भोग भाग्यैर्यथारुचिः ॥ शिवोत्सवादि दर्शश्च शिवाश्रम
निषेवणं ॥ ४०॥ शिवध्याने महामूर्तेः सांबस्यच विशेषतः ॥ नृत्य(त्त)मानं त्रयीनेत्रं सांबं चंद्रकलाधरं ॥ ४१॥ नीलकंठं च सानंदं नंदिभृं-
गिनिषेवितं ॥ गणेशास्कंदजनकं ध्यायेद्देवं महेश्वरं ॥ ४२॥ क्षणार्धं वा(तदर्धं वा) स मुक्तो भवति ध्रुवं ॥ एवं भक्तिर्विरूपाक्षस्य साधारणी
भवेत् ॥ ४३॥ सतरत्येव संसारमसारं जन्ममृत्युदं ॥ साकथं जायते स्कंद कलिस्थानां विशेषतः ॥ ४४॥ नृणामत्यंतपापानां संकरा
णां दुरात्मनां ॥ कलेःस्वरूपमधुना वद शंकरसंभव ॥ ४५॥ त्वत्तो नान्यो रहस्यज्ञो गुरुर्मे नास्ति कश्चन ॥ तस्मात्वां परि पृच्छामि
इच्छा प्रश्ननिरूपणे ॥ ४६ ॥ सूत उवाच ॥ इति मुनिवचनं निशम्य हर्षाद्भव सूनुः कमलच्छदाक्षनेत्रः ॥ मुनिमानसहर्षवर्ष
धाराधरके कारवचा(तात)त्तके भ्युवाच ॥ इतिश्री शिवरहस्ये श्री सदाशिवाख्ये नवमांशे मुनिवाक्यं नाम त्रितीयोध्यायः ॥ ३॥ ॥
श्री काशी विश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनम नमः ॥ श्रीस्कंद उवाच ॥ यदि पृच्छ त्वया तात प्रश्नमेनं मनोहरं ॥ सर्वलोको-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्य सदाशि॰ न॰

८ मयं सर्वं जगदेतच्चराचरं ॥२०॥ यस्याष्टमूर्त्तिभिर्व्याप्तं तेन भिन्नं न किंचन ॥ईशावास्येति वेदेन सर्वं शिवमयं जगत्॥२१॥ अ॰ ३
योऽसौ सूर्यस्थितो देवः तमिं धयति तेजसा ॥ योऽसावग्निस्थितो देवो वर्चसा तं प्रपूरयेत्॥ २२॥ योऽसौ चंद्रस्थितो देवः कांत्या तं
सम्पूरयत् ॥ योऽसौ वायुस्थितो देवः चलनैराविशेच्च तं ॥ २३॥ योऽसौ विष्णुस्थितो देवः पालक्याशक्तितेस्युतः ॥ योऽसौ ब्रह्म
णि विश्वात्मा सृष्टिकर्त्तात्मना स्थितः ॥२४॥ योऽसौ रुद्रात्मको देवः स काले संहरेज्जगत् ॥ योऽसाविंद्रात्मको देवः त्रिविष्टपनि
विष्ठितः ॥२५॥ योऽसौ भूमिमयो देवो धत्ते सर्वं चराचरं ॥ योऽसौ स्ववरुणो देवो आपः पाति विषां पतिः॥ ॥२६॥ योऽसावाकाशगो
देवः व्याप्य तिष्ठति रोदसी ॥ योऽसावपांशरीरो वै[illegible] नदीनदगणाधिपः ॥२७॥ योऽसौ सर्वात्मको देवः सर्वभूतगुहाशयः ॥ पुरुषः
606 परिपूर्णात्मा तेन पुर्णमिदं जगत् ॥२८॥ तस्यैव कृपया भक्तिः जायते नेतरेच्छया ॥ भक्तिज्ञानं विजायेत तस्यैव भक्तिप्रसादतः ॥२९॥
स्वतंत्रस्य महेशस्य निरिच्छस्य पिनाकिनः ॥ भक्त्यैव लभते मुक्तिर्नान्यथा वेदवादतः ॥३०॥ तस्यैष आत्मा वृणुते इति मंत्रा
नुशासनात् ॥ परांचि खानि देवेशो व्यतृणत्परमेश्वरः ॥३१॥ तस्माद्ब्रह्मादयो देवा मोहिताः शिवमायया ॥ कश्चिद्धीरो
महादेवप्रसादादेव शूलिनः ॥३२॥ प्रत्यगात्मानमिच्छेत शिवमेव सनातनं ॥ सर्वभूतेष्वसंगतं लिंगस्थं वापि भक्तितः ॥३३॥
तेनैव सुकरो मार्गो दर्शितः शूलपाणिना ॥ सर्वेषां भक्तिलाभाय मुक्तये पि च शाश्वतः ॥३४॥ अग्निरित्यादिभिर्मंत्रैस्त्रिकालं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नानां अवेदानां शिवात्मज ॥ भक्तिः कथं भवेच्छंभौ साक्षान्मुक्तिप्रदायिनी ॥ ५ ॥ या सा नंततपोलभ्या अलभ्यैव दुरात्मनां ॥ यः शिवानु
ग्रहीतश्चेत्स भक्तेः पात्रतामियात् ॥ ६ ॥ सा न धर्म तपोलभ्या अलभ्या योगिनामपि ॥ नोर्वरादानतो लभ्या वदंत्युत्तमदानतः ॥ नगोस
हस्रदानैर्वा नो वाजिवरदानतः ॥ नरथासुतदानैर्वा हिरण्यादिकदानतः ॥ ८ ॥ नरौप्यकूप्यदानैर्वा नांबरादिप्रदानतः ॥ नतुला
पुरुषाद्यैर्वा दशधेनुप्रदानतः ॥ ९ ॥ नसत्राहीन एकाहद्वसूदीक्षोपसंघकैः ॥ सा भक्तिः शांभवी जातु भविष्यति कदाचन ॥ १० ॥
नान्नतोयप्रदानैर्वा विप्रग्रामप्रदानतः ॥ प्रपा मंडप विस्तारच्छायावनसुरोपणैः ॥ ११ ॥ सरस्तीरवंधैर्वा सा भक्तिः शांभवी
भवेत् ॥ यो महादेवपादाब्जध्यानानंदैकमेदुरः ॥ १२ ॥ तेनैव लभ्या सा भक्तिः साक्षान्मोक्षप्रदायिनी ॥ नवर्णाश्रमधर्मैर्वा नैवाचा
रानुपालनैः ॥ १३ ॥ अभिजात्येन शीलेन सा न लभ्या कथंचन ॥ नवेदांतादिवाक्यैर्वा न शब्दैस्तर्ककोटिभिः ॥ १४ ॥ नमीमांसा
सहस्रैर्वा नमीमांस्या कथंचन ॥ प्रसादः शांकरो यस्य तस्य भक्तिर्महेश्वरे ॥ १५ ॥ यं चिंतयति गौरीशो मोचयामीति पाशतः ॥
तं भक्तिभाग्यधौरेयं कुरुते करुणाकरः ॥ १६ ॥ शरणागतपालाय शिवाय परमात्मने ॥ यो नमस्कुरुते प्रीत्या समुक्तो मोचये
त्परान् ॥ १७ ॥ द्विजो वा श्वपचो वापि न तस्य सुमहानणुः ॥ भावप्रीतो महादेवो भावदः परमेश्वरः ॥ १८ ॥ न तस्य कश्चिन्मित्रो वा
शत्रुर्वास्ति कदाचन ॥ सर्वे सुरासुरा विप्राः पशवस्तद्वशे स्थिताः ॥ १९ ॥ स एव देवदेवेशः पशुपाशनिकृंतनः ॥ तस्य माया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मार्कंडेयमहामृत्युनाशकोऽज्ञानवारकः ॥३४॥ ~~मनिस्तो~~ भेरीझांकाररनिरतो मृगचर्मविधारकः ॥ पुण्यकीर्तिः पुण्यलभ्यो मोहनास्त्रवि
शारदः ॥३५॥ कैलासशिखरावासः पारिजातवनाश्रयः ॥ इल्लांदरवसंप्रीतो महेंद्रस्तुतिहर्षितः ॥ यूपावटो भारवकः कोमलांगोज
नाश्रयः ॥ विश्वामित्रप्रियो बालापाकृन्तरतः सुखी ॥ ३७॥ वामाचारप्रियो नेता शान्तिहस्तो दुरासदः ॥ सर्वाकारः शाश्वतात्मा
ज्ञानो दूरगो हरः ॥१३८॥ श्रीस्कंदउवाच ॥ इत्येतन्नाम साहस्त्रं शेषाशेषमुखोद्गतं ॥ भो दिव्यं मुनिश्रेष्ठ श्रवणात्पापनाशनं ॥
॥३९॥ सर्वान्कामानवाप्नोति शिवार्चनपरायणः ॥ त्वमेभिर्मुनिमुख्यैश्च शृण्वन्भक्तिमवाप्नुयाः ॥ ४५॥ कुमारीपतिमाप्नोति नि
र्द्रव्यो धनवान् भवेत् ॥ जयार्थी जयमाप्नोति क्षयद्वीरप्रसादतः ॥ ४१॥ श्रीस्कंदउवाच ॥ इतितवगदितं मे नामसाहस्त्रमेतद्धरवर
607 चरणआराधने साधनं ते ॥ मुनिगणगणवर्यैः धार्यमेतत्सुराद्यैः परमपदमवाप्तं शंकराज्ञावशेन ॥१४२॥ इति श्रीशिवरहस्ये
सदाशिवाख्ये नवमांशे श्रीशिवसहस्त्रनामकथनं नाम द्वितीयोध्यायः ॥ २॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवायनमः ॥
॥ जैगीषव्यउवाच ॥ श्रुतं ते तारकारातेनाम साहस्त्रमुत्तमं ॥ विशेषतः शेषकृतमशेषाघनिवारकं ॥१॥ प्रश्नमेनं वदाद्यत्वं पृष्ठे त्वा
वैकुतूहलात् ॥ कृतत्रेताद्वापरेषु सर्वधर्मप्रकाशिषु ॥२॥ युगेष्वपि महादेवे भक्तिर्नैवोपजायते ॥ कथं कलियुगे घोरे नष्टेध-
र्मे मतिः शिवे ॥३॥ कथं वा कलिजानां तु शिवभक्तिर्भविष्यति ॥ संकराणां जारजानां दुर्बीजानां विशेषतः ॥४॥ वर्णाश्रमादिहि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंक्ति९- नीलग्रीवः सैन्यपालो दिशानाथो नतिप्रियः॥ केशवान्मथनो मौनी मधुसूदनसूदनः॥ २२९

संस्थितः॥ भैरवो भरणो भर्त्ता भ्रातृव्यो नामरूपकः॥१७॥ अव्याकृतात्मा भूतात्मा पंचभूतांतरोऽस्मयः॥ अहनन्योऽशब्दमयः कालाधारः कला
धरः॥१८॥ भृगुतुंगो चीरवासी कैवर्तो नायकोर्धकः॥ करेणुपोगंधमदः चांपेयकुसुमप्रियः॥१९॥ भद्रोऽचर्मवसनो वै राजस्तो
त्रकारकः॥ सुमप्रीतः सामगीतो ऊर्जो वर्चा कुलेश्वरः॥ ककुद्मान्पीतवसनो वधेशो नारदः पिता॥ क्रव्यादनो नीतिमयो धर्मचक्रप्र
वर्त्तकः॥ शष्प्यः फेन्यो विनिर्नेता कंकणी नाशिकोऽशलः॥ एणकः शलभाकारो शालू· रोग्रामसंस्थितः॥ महाविशेषकः यनो वारोती
रस्थितः सलः॥ कृपीडयो निशांतात्मा गुणवान् ज्ञानवाँश्शुचिः॥२३॥ सर्वपापहरो लिंगो भगमाली प्रतारणः॥ आनंदघन आतार्पीइ
रिण्योऽथ प्रपथ्यकः॥२४॥ गंगातीरस्थितो देवः अविमुक्तसमाश्रयः॥ महाश्मशाननिलयो वलयो वालिपूजितः॥२५॥ कर्म
धर्मो व्रात्यवर्यो मानवो जीवकेशवः॥ कर्मदेवमयो ब्रह्म ऋतं सत्यं महेश्वरः॥ २६॥ सुमंगलः सुखमयो ज्ञानानंदो मिताशनः॥ म-
नोमयः प्राणमयो विज्ञानात्मा प्रसादनः॥ २७॥ ~~नीलग्रीवः सैन्यपालो दिशानाथो नतिप्रियः॥ केशवोन्मथनो मौनी मधुसूदन-~~
~~सूदनः॥२८॥~~ आनंदमयकोशात्मा धामासीमाश्रीथ भूमकः॥ सदाशिवो विशिष्टात्मा वशिष्ठार्चितपादुकः॥ २९॥ उदुंबरकरोडिंभोबं
भरो पिङ्कुलस्तलः॥ मूलस्तालकरो बर्ण्यः पर्णाद्प्राणनाशकः॥३०॥ अपर्णापतिराशास्यो संपूर्णः पूर्णरूपवान्॥ दीपमालोऽजो
गलिको वै तुंडः स्तुंडकप्रियः॥३१॥ उलूकः कलविंकोपशुकनाथप्रसादकृत्॥ जैगीषव्यतपः प्रीतो रावणेज्यो बलार्दनः॥ ३२॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

^भूतो भूभार

६ स्तोभपीतो भारहरणे स्थिरः ॥१॥ सुराक्षरो धरोध्रुन्ता सागरांतर्गतो वशी ॥ रेष्यो स्थो रजस्योप प्रवाहयो वैद्युतो नलः ॥२॥ सिकत्यो वाद्यउ
र्व्यों मध्योई प्रियवाक् पटुः ॥प्रपंचमाया रहितो कीर्तितो वीर्यवर्धनः ॥३॥ कालचक्रांतरहितो नित्या (जित्या) प्रचेतनः ॥ गर्वान्वितो
भयाकारो मृगयुर्भविहा भवः ॥४॥ शृंगा (शृंगः) तांगः शीतांगो नागांगो भस्मभूषणः ॥ त्रियंबकोंऽबिका भर्तानंदिकेशप्रसादकृत् ॥५॥ चंडी
शवरदो दिव्यो माया विद्या विशारदः ॥ मृगांगशेखरो भव्यो गौरीपूज्योदयामयः ॥६॥ममायनो विकंपनो गगीर्वाणप्रियो वटुः ॥ वर्णी
वनस्योय ति राट्गूढगर्भो विरोचनः ॥७॥ शंवरो बर्बरो धौम्यो विराट्रूपः स्थितिप्रदः ॥ महाकारुणिको भ्रांतिनाशकः शोकहा
प्रभुः ॥८॥ अशोकपुष्पपूज्यांघ्रिर्मणिभद्रो महेश्वरः ॥ अमृतेशो द्रुतगतिस्तगरोर्जुनमध्यगः ॥९॥ दमो विरोधहृत्कांतो नीतिज्ञो
६०८ विष्णुपूजितः ॥ सुमप्रियो वातमयो वरीयान् कर्मठो यमी ॥१०॥ दिगंबरः शमसयो धूमपः शुक्रगर्भकः ॥ अदृहासातल्पशायो आ
सीनो धावमानकः ॥११॥ तुराषाट्मेघमध्यस्थो विपाशातीरसंस्थितः ॥ कुलोन्नतो कुलीनश्च व्यवहारप्रवर्तकः ॥१२॥ केतुमालो
हरिद्रांगो द्राप्रिः पुष्पमयो भृगुः ॥ विशेषको वीर्वी निरतः लग्जतो रुधिरप्रियः ॥१३॥ अकेत वहृदावासीक्ष पानाथकुलाधरः ॥ नक्तंचरो
दिवाचारी दिव्यदेहो विशासकः ॥ कदंबवनमध्यस्थो हरिद्रांगो र्मिमध्यगः ॥ यमुनाजलमध्यस्थो जालको जाम खोवसुः ॥१५॥
वसुप्रदो वीर्यः शूलहस्तः प्रतापवान् ॥ खड्गहस्तो मंगलात्मा मृत्युर्मृत्युजिदीश्वरः ॥१६॥ लंकावासी मेघमालो गंधमादन–

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरंदरनतिप्रियः ॥ प्रघसो विघसाशी च अन्नाधिपतिरन्यगः ॥ ८५ ॥ पन्नगाभरणो योगी गुरुर्लोकैकनायकः ॥ विराजो विश्वतोधर्मी बभ्रुशो
बाहुकप्रियः ॥ ८६ ॥ प्रदाननिपुणो मित्रो ऊर्ध्वरेता महातपाः ॥ कुरुजांगलवासी च नित्यतृप्तो निरंजनः ॥ ८७ ॥ हिरण्यगर्भो भूतादिस्वराट् प्रभुः
॥ पटहध्वनिसंप्रीतो नतमुक्तिप्रदायकः ॥ ८८ ॥ फलप्रदः फालनेत्रः फणीश्वरमहांगधृक् ॥ वास्तुपो वासवो वात्यो वर्मभिद्वसनोज्ज्वलः
॥ ८९ ॥ मीढुष्टमः शिवतमो वसुः शिवतरो बली ॥ निधनेशो निधानेशो पुरुजिद्राष्ट्रवर्धनः ॥ ९० ॥ अयुतायुः शतायुश्च प्रमितायुः शता
ध्वरः ॥ सहस्रशृंगो वृषभो उरुगायो रुमीडुकः ॥ ९२ ॥ गंता गमयिता गाता गरुत्मान् गीतवर्धनः ॥ रागरागिणिकाप्रीतो तालपाणि
र्गदापहः ॥ ९३ ॥ देवेशः खंडपरशुः प्रचंडतरविक्रमः ॥ उरुक्रमो महाबाहुः हेतिधृक्पापकादनः ॥ ९३ ॥ गणिकानाट्यनिरतो वि
मर्शो वावदूककः ॥ कलिप्रथनो धीरो धीरोदांतो महाहनुः ॥ ९४ ॥ क्षयद्वीरो मुंजिकेशो कल्मलीकिः सुरोत्तमः ॥ वज्रांगो वायु
जनको अष्टमूर्तिः कृपाकरः ॥ ९५ ॥ प्रहूतः परमोदारः पंचाक्षरपरायणः ॥ कर्कंधुः कामदहनो नलिनाक्षो जडाजडः ॥ कुबेरपूजितपदो
महातक्षककंकणः ॥ शंखवर्णो मधुरारावो मृडस्सास्पिंजरोज्ज्वरः ॥ मार्गो मार्गप्रदो मुक्तो विजितारिः परोवरः ॥ प्रणवार्थो वेदमयो वेदां-
तांबुजभास्करः ॥ ९८ ॥ सर्वविद्याधिपः सौम्यो यज्ञेशो क्षेत्रनायकः ॥ पापनाशकरो दिव्यो गोभिलो गोपुरोगणः ॥ ९९ ॥ गणेशपूजि
तपदो ललितो वाममनोहरः ॥ कक्षवासो महोक्षांको निस्तमः स्तोमवर्जितः ॥ १०० ॥ निःसीममहिमोदारः प्रभामूर्तिः प्रसन्नवाक् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्य
५

३ सदाशि.नं
अ.२

हस्तोज्वलत्प्रभः॥ किंदमो मंकणप्रीतो जातु कर्णस्तुतिप्रियः ॥७०॥ वेनो वैन्यो विशाखश्च कंपनो रोमधारकः ॥ उपायदोद्य
रितांगो नानागमविशारदः ॥७१॥ काव्यालापैककुशलो मीमांसावल्लभो ध्रुवः॥ तालमूलनिकेतश्च बिल्वमूलप्रपूजितः
॥७२॥ वेदांगो गमनो गव्यो गव्यप्रीतः फलादनः॥ गंगातीरस्थितो लिंगी आलिंगो रूपसंश्रयः ॥७३॥ शांतिहापण्यनिलयः पलला
शोर्कपूजितः॥ महेंद्र विष्णुजनको ब्रह्मताता स्तुतोव्ययः ॥७४॥ कर्दमेशो मतंगेशो विश्वेशो गंधधारकः॥ विशालो विम
लो जिष्णुर्जयशीलो जयप्रदः ॥७५॥ दारिद्र्यमथनो मंत्री शंभुः शशिकलाधरः ॥ शिंशुमारो शौनकेड्यो श्वानपः श्वेतजीवदः॥
॥७६॥ मुनिबालप्रियो गोत्री मित्रिंदो मंत्रसंस्थितः॥ काशीशो कामितांगश्च बल्लकीवादनप्रियः॥७७॥ हल्लीसल्लास्यनिपु
609 णो सल्लीलो वल्लरीप्रियः॥ महापारदसद्वीर्यो वह्निनेत्रो जटाधरः॥ आत्माद्योनेकरूपात्मा पुरुषः प्रकृतिः परः॥ स्थाणुर्वेणुवन
प्रीतो रणजित्पाकशासनः ॥७८॥ नग्नो निराकृतो धूम्रो वैद्युतो विश्वनायकः॥ विश्वाधिकः शांतरवः शाश्वतः सुमुखो महान्॥ ८०॥
अणोरणुः श्वभ्रगतो अवटेशो नटेश्वरः॥ चित्रधामा चित्रभानुः विचित्राकृतिरीश्वरः ॥८१॥ इंद्रोजो मूर्त्तिरूपात्मा अमूर्त्तो वह्निधा
रकः॥ अपस्मारहरो गुप्तो योगिध्येयो खिलादनः ॥८२॥ नक्षत्ररूपः क्षत्रात्मा क्षुत्तृष्णाश्रमवर्जितः॥ असंगो भूतहृदयः बालखिल्यो मरी
चिपः ॥८३॥ पंचप्रेतासनासीनो योगिनीगणसेवितः॥ नानाभाषानुचरितो नानादेशसमाश्रयः ॥८४॥ वृंदारकगणस्तुत्यः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं० २ कान्तिपरो मणिपाणिः

प्रियो नाथो आनन्दात्मा सनातनः ॥ तमालनील सुगतः कुतर्क विनिवारकः ॥ ५५ ॥ कार्य रूपः प्रशांतात्मा कारणानां च कारणः ॥ तृण
पाणिः कुलाचलः ॥ ५६ ॥ कस्तूरी तिलकक्रांत फालो भस्म त्रिपुंड्रवान् ॥ वारणां गालंकृतांगो महा पापनिवारणः ॥ ५७ ॥ प्रकाशरू
पो गुह्यात्मा बाल रूपो विलेशयः ॥ भिक्षु प्रियो भक्ष्य भो भरद्वाज प्रियो वशी ॥ ५८ ॥ कर्मण्यो नाको ध्वर्त्तात रुणो यान हृषदः ॥ वृ
षगामी धर्म गोप्ता कामी कामांगनाशनः ॥ ५९ ॥ कारुण्यो वाज रूपात्मा निर्धर्मो ग्रामणीः प्रभुः ॥ अरण्य पशु हस्तश्च शैनिको
मेघवाहनः ॥ ६० ॥ कुमार गुरुरानंदो वामनो वाग्भवो युवा ॥ स्वर्धुनी धन्य मौलिश्च तरुराजो महात्मना ॥ ६१ ॥ कणाशनस्ता
म्रघनो मय प्रीतो जरामरः ॥ गाण गोरिः फालनेत्रो वर्णाश्रमपरायणः ॥ ६२ ॥ पुराण वृंद संप्रीतो इतिहास विशारदः ॥ समर्पो
न मिताशेष देवो द्योतकरः फणी ॥ कर्ष कोलांम लांगलेशश्च मेरु धन्वा प्रजापतिः ॥ उग्रः पशुपतेर्गोप्ता पवमानो विभावसुः ॥
॥ ६४ ॥ उदासु वीर्तरागो उर्वीशो वीर्यवर्धनः ॥ ज्वाल मालो जितांगश्च वैद्युदग्नि प्रवर्तकः ॥ ६५ ॥ कमनीया कृतिः पाता आषा
ढो षंड वर्जितः ॥ पुलिंद रूपः पुण्यात्मा पुण्य पाप फलप्रदः ॥ ६६ ॥ गार्हपत्यो दक्षिणाग्निः सभ्यो व सय क्रुल्क विः ॥ द्रुम आहवनीय
श्च तस्करो घ भयस्करः ॥ ६७ ॥ शंकरो नारदो वार्यो वात चक्र प्रवर्तकः ॥ कुलिशायुध हस्तश्च विकृतो जटिलः शिखी ॥ ६८ ॥
सौराष्ट्र वासी देवेड्यो सह्य जाती रसं स्थितः ॥ महाकायो वीतभयो गण गीती विशारदः ॥ ६९ ॥ तपस्वी तापसाचार्यो द्रुम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४ णोऽग्रनादेहः कौलाचारप्रवर्त्तकः ॥३९॥ तंत्राध्यक्षो मंत्रमयो गायत्रीमध्यगः शुचिः ॥ वेदात्मा यज्ञसंप्रीतो गरिष्ठो पारदः कलिः
॥ ऋग्यजुःसामरूपात्मा सर्वात्मा क्रतुरीश्वरः ॥ हिरण्यगर्भजनको हिरण्याक्षनरमर्दः ॥४१॥ दमिताशेषपाषंडो दोर्दंडहस्तोद्दु-
रासदः ॥ दूर्वार्चनप्रियकरो रंतिदेवो महेश्वरः ॥४२॥ अमृतात्मा महादेवो हरः संसारकारकः ॥ त्रिगुणो विश्वनावाग्मी लब्धो सरुधि
राशनः ॥ वपाप्रियो वसानिष्ठो विष्णुरक्त प्रियो गुरुः ॥ किरातवेषः शोणात्मा रतनगर्भो रुणेक्षणः ॥४४॥ सुरासवबलिप्रीतस्त
तूर्षो गंधदेहवान् ॥ व्योमकेशः कोशहीनः कल्पनारहितः क्षमी ॥४५॥ सहमानश्च विद्या [illegible] धीस्फटिकोपलनिर्मलः ॥ मृत्युंजयो
दुराराध्यो भक्तिप्रीतो भयापहः ॥ गंधर्वगानसुप्रीतो विष्णुगर्भोऽमितद्युतिः ॥ ब्रह्मस्तुतः सूर्यनेत्रो वीतिहोत्रोऽर्जुनांगकः ॥४७॥
गर्वापहारको वाग्मी कुंभसंभवपूजितः ॥ मलयो विंध्यनिलयो महेंद्रो मेरुनायकः ॥४८॥ पार्वतीनायको जय्यो जंगमाजंगमाश्रयः ॥ कुरु
विंदोरुणो तन्वी अस्थिभूषो निशाकरः ॥४९॥ समुद्रमथनोद्भूतकालकूटविषादनः ॥ सुरासुरेंद्रनरदोश्यामूर्तिः सहस्रपात् ॥५०॥
कारणो वीरणः पुत्रीजं तुगभोगरादनः ॥ श्रीशैलमूलनिलयः श्रीमदभ्रसभापतिः ॥५१॥ दक्षिणामूर्त्तिर्नघो जलंधरनिपातनः ॥
दक्षिण्यो यजमानात्मा दोक्षितो दैत्यनाशकः ॥५२॥ कल्माषपादपूज्यांघ्रिरतिशेतुरगप्रियः ॥ उमाधवो दीनदयो दत्तादंतो
दयापरः ॥५३॥ श्रीमद्दक्षिणकैलासनिवासो जनवत्सलः ॥ दर्भरोमा बलोत्रेतातामसस्तनुवर्धनः ॥५४॥ नमस्कार

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नागेशवरकंकणः ॥ अंगेशशायी भूतेशो गण कोलाहल प्रियः॥ प्रसन्ना स्योऽनेकबाहुः शूल धृक्काल ता पनः॥ कोल प्रमथनः कूर्म महाखर्पट
धारकः॥ २५॥ नार सिंह जिन धरो महालां गल धृग्बलिः॥ककुदोन्मथनो हेतु रहेतुः सर्व कारणः॥ कृशानु रे तसो कुल्ल फालनेत्रो
मरीरिहा॥ मृगवाल धरो धन्वी श क्रबाहु विभंजकः ॥ २६॥ दक्षयज्ञ प्रमथनः प्रमथा धिप तिः शिवः॥ शतावर्त्तो युगावर्त्तो मेघानर्तो दुरा
सदः ॥ २७॥ मनोजवोजा तजनो वेदा धारः सना तनः॥ पांडरागो गो जितांगः कर्म्मादि जनवत्सलः ॥२८॥ चातुर्होत्रो वीरहोता शत रुद्रिय मध्यगः॥
भीमो रुद्र उदा वर्त्तो विषमाक्षो रुणेश्वरः॥२९॥ यक्षराज नुतो नाथो नी ति शास्त्र प्रवर्त्तकः॥ कपाल पाणी भगवान् वैय्याघ्रव गलंकृतः ॥३०॥ मो
क्षसारो ऽध्व राध्यक्षो ध्वजनी वोम रुत्स खा ॥ अरुणेथ स्व गा ध्यक्षो कामना रहितस्त रुः॥३१॥ बिल्व पूज्यो बिल्वि नोशो हरिश्चाप
रा जितः॥ बृहद्रथंतर स्तुत्यो वामदेव्य स्तव प्रियः॥ ३२॥ अघोर तनु रो जिष्ठो गं भी रो मन्यु रीश्वरः॥ कलि प्रवर्त्तको योगी सां ख्य मायावि
शारदः॥३३॥ विधारणो धैर्य धुर्यो सोम धामां तर स्थि तः॥ शिपि विष्टो गव्हरे ष्ठो देवः ज्येष्ठो कनिष्ठकः॥३४॥ पिनाक हस्तो व रजो दुंदुभ्यो
वर्ष्यो रेष्म्यकः॥ कवची चनि षंगी चरथघो षोऽमित प्रभः॥३५॥ कालंजरो दंदशूकः विश्वेशो गु णा तिगः॥ गभस्ती शोमुनिश्रेष्ठो मह
र्षिः संशितव्रतः॥३६॥ कर्णिकार वना वासी करवीर सुमप्रियः॥ नीतो पतम ह्यास्त्रग्वी कर हृद्पु रेश्वरः ॥ ३७॥ शतर्चनः परानंदो
ब्राह्मणा र्च्यो पवीतवान्॥ बलीबाल प्रियो धर्मो हिरण्य पतिर च्यु तिः॥ ३८॥ यम प्रमथनो ष्णी षी चक्र हस्तः पुरांतकः॥ वसुषे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३ मन श्रीज्ञानदायकः ॥ ८॥ कंदर्पदर्पसर्पघ्नो विषादी नीललोहितः ॥ कालांतको युगावर्त्तः संक्रंदनसुनंदनः ॥ ९॥ दीनपोषो पाशहंता
शांतात्मा क्रोधवर्धनः ॥ कपर्दनिलसच्चंद्रो लिंगाध्यक्षो गजांतकः ॥ १०॥ वैकुंठपूज्यो विश्वात्मा त्रिनेत्रो वृषभध्वजः ॥ जन्हुजापतिरी-
शानः श्मशाननिलयो युवा ॥ ११॥ पार्वतीजानि रुद्घाट्यो नाट्यविद्यापरायणः ॥ सामवेदप्रियो वैद्यो विद्याधिपतिरी-
श्वरः ॥ १२॥ कुमारजनको मारमारको वीरसत्तमः ॥ कंबलाश्वतरोद्धारि सुफणो त्कृष्टकुंडलः ॥ १३॥ आनंद वनवासी ७
च अविमुक्तमहेश्वरः ॥ ॐकारनिलयो धन्वी केदारेशोऽमितप्रभः ॥ १४॥ नर्मदालिंगनिलयो निष्पापजनवत्सलः ॥
७ महाकैलासलिंगात्मा वीरभद्रप्रसादकृत ॥ १५॥ कालाग्निरुद्रोऽनंतात्मा भस्मांगो गोपतिप्रियः ॥ वेदाश्वः कंजजाजानि
८॥ नेत्रपूजितपादुकः ॥ १६॥ जलंधरवधोद्युक्तो दिव्यचक्रप्रदायकः ॥ वामनो विकटो मुंडः स्तुहंडकृतसंस्तुतिः ॥ १७॥
फणीश्वरमहाहारो रुद्राक्षकृतकंकणः ॥ वीणापाणिर्गानरतो ढक्कावाद्यप्रियो वशी ॥ १८॥ विशालवक्षाः शैलेंद्रजामाता
०. ऽमरसत्तमः ॥ हृत्तमोनाशको बुध्नो जगत्कंदोऽर्दनो बली ॥ १९॥ पलाशपुष्पपूज्यांघ्रिः फलाशनवरप्रदः ॥ सागरांतर्गतो घोरः
सद्योजातोऽविकासरवः ॥ २०॥ वामदेवः सामगीतः सोमः सोमकलाधरः ॥ निःसीममहिमोदारः दूरिताखिलपातकः ॥
॥ २१॥ तपनांतर्गतो धाता धेनुपुत्रवरप्रदः ॥ बाणहस्तप्रदो नेतानमुचिवीर्यवर्धनः ॥ ॥ २२॥ नागाजिनांगो नागेशो—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचास्य हृदयाशास्य मनुशास्या मिते हृदि ॥ ४॥ ऋषिरस्यादिशेषोवैदेवोदेवो महेश्वरः ॥ सर्वत्र विनियोगोऽस्य कर्मस्वपि सदा द्विज ॥ ५॥
ध्यानं तस्यानुवक्ष्यामित्वमेकाग्रमनाः शृणु ॥ ॥ श्रीस्कंद उवाच ॥ ध्याये दिंदुकलाधरं गिरिधनुं सोमाग्निफालोज्वलं वैकुंठोरु-
विपाठबाणसुकरं देवं रथेऽधिष्ठितं ॥ वेदाश्वं विधिसारथिं गिरिजया चित्तेनु संदह्म हे नाना काम कलाविलासजगदानंदादिसं
पूर्त्तये ॥ १॥ एवं ध्यात्वा महादेवं नाम्नां सहस्रमुत्तमं ॥ प्रजपेन्नियतो मंत्री भस्मरुद्राक्षभूषणः ॥ १॥ लिंगमभ्यर्च्य यन्वापि
बिल्वकोमलपल्लवैः ॥ पंकजैरुत्पलैर्वापि प्रसादाय महेशितुः ॥ २॥ अष्टम्यां वा चतुर्दश्यां पर्वस्वपि विशेषतः ॥ यंयंकामं
सदाचित्ते भावयेत्तत्तदाप्नुयात् ॥ ३॥ ॐ गंगाधरोंऽधकरिपुः पिनाकी प्रमथाधिपः ॥ भव ईशान आतार्योनेकधन्वा महेश्वरः
॥ ४॥ महादेवः पशुपतिः स्थाणुः सर्वज्ञ ईश्वरः ॥ विश्वाधिकः शिवः शांतो विश्वात्मा गगनांतरः ॥ २ ॥ परांबिकानाथः शर
दिंदुकलाधरः ॥ गणेशाङ्कतितातो देवेशो भववेद्य पितामहः ॥ ३॥ तारणस्तारकस्ताम्रो प्रपंचरहितो हरः ॥ विनायकस्तुतप
दःक्षमारयोनं दिवाहनः ॥ ४॥ गजांतकोधनुर्धारी वीरघोषस्तुतिप्रियः ॥ प्रजासंहरणो चंडतांडवो मन्मथांतकः ॥ ५ ॥
शिपिविष्टः शाश्वतात्मा मेघवाहो दुरासदः ॥ आनंदपर्णो वर्षात्मा रुद्रः संहारकारकः ॥ ६॥ भगनेत्रप्रमथनो नित्यजेतापरा
जितः ॥ महाकारुणिकः शुभ्रः प्रसन्नास्यो मखांतकः ॥ ७॥ घनाभकंठो गरभुक् बभ्रुशो वीर्यवर्धनः ॥ प्रकटस्तवनो मानी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नात् ॥२७॥ भवानीरमणार्चायां यो निष्टस्तुष्ट एव सः ॥ अणीयोपि सहिज्यायोन्न द्विजोपि द्विजाद्वरः ॥२८॥ द्विजराजकलामौलिपादपंकजसेवया ॥ द्विजानामेव सर्वेषां ध्येयः सो व स्त्रिलोचनः ॥२९॥ उमासहायो विश्वेशो जगद्दुःखापहारकः ॥ तारकः सर्वजंतूनां सर्वेषामेव शंकरः ॥३०॥ किंकरास्तस्य सर्वेपि असुराभूसुराः सुराः ॥ पूजनीयः सदा लिंगे बिल्वपत्रैश्च कोमलैः ॥३१॥ द्विचैर्वापि पवित्रो वा त्रिनेत्रो मोचकः सदा ॥ भस्माभ्यक्तस्त्रिपुंड्रांको रुद्राक्षामलहारकः ॥३२॥ यस्तु संपूजयेल्लिंगे तुंगेशांगे महामनाः ॥ अलिंगोपि महादेवस्तत्पापं भंगयत्यपि ॥३३॥ तुंगेवाप्यं तरंगवातमसंगकरोच्छिवः ॥ श्रीस्कंद उवाच ॥ यः कोपि शांगो भुवि भस्मसंगो लिंगो विमले सुतुंगे ॥ बिल्वं तथाब्जं करवीरपुष्पं गंगांभसाप्लाव्यद्दाति भाग्यैः ॥३४॥ स एव मातंगहरांगमोक्षैक संगाय भवेदसंगः ॥ ये खंडबिल्वीदलमिंदुमौलेः श्रीखंडलिप्ते शिरसि क्षिपंति ॥ आखंडलाद्यैरभिवंदनीयास्ते खंडचंद्रं शिरसा वहंति ॥३५॥ इति श्री शिवरहस्ये सदाशिवाख्ये नवमांशे जैगीषव्य श्रीस्कंदसंवादे प्रथमोध्यायः ॥१॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीसदाशिवाय नमः ॥ श्रीस्कंद उवाच ॥ शेषाशेषमुखोद्गीतां नाम सारावलीमिमां ॥ हाटकेशोरुकच्छक भूतेनाहीनकेन तु ॥२॥ सहस्रनामयत्प्रोक्तं तत्ते वक्ष्याम्यहं शृणु ॥ धन्यं मान्यं महामन्युप्रीतिदायकमुत्तमं ॥३॥ नान्येषु दापनीयं तेन देयं वेदमीदृशं ॥

हाटकेशार्चा कारणं तारणं नृणां ॥ शृणु त्वं गणवृंदैश्च वृंदारैश्च मुनीश्वरैः ॥ १३ ॥ तेन धन्योसि मान्योसि महामन्युप्रसादभाक् ॥
यथाशिवकथा सिंधु तरंगानंदशीकरः ॥ १४ ॥ संसारतापसंतप्त शीतयत्यंतरे वहि ॥ नतथा स्वर्धुनी धन्या किंपावयतीतन्नरं ॥
॥ १५ ॥ गंगा लिंगैकसंगापि पापभंगाय सा नृषु ॥ नमुक्तिकांतासंगाय शंगायैवेह केवलं ॥ १६ ॥ भवंति भवपादाब्जस्मरणे
न विभूतयः ॥ मतयः सुप्रसन्नास्युः प्रसन्ने परमेश्वरे ॥ १७ ॥ सन्नानि सर्वपापानि, भिन्नापायो भवेत्सहि ॥ यः सदा ध्याय
ति हृदामुदेव परमेश्वरं ॥ १८ ॥ यदा कदा सदैवापि सततदा मुक्तिभाक् भवेत् ॥ यच्चित्तं विहरेत्साधु सदा शिवपदांबुजे ॥ त
द्देव चित्तं शैवेंद्र अन्यच्चित्त विकारकं ॥ वित्ताशाया भ्रमं त्यक्त्वाः हृत्तापकरणं हितत् ॥ २० ॥ मुधा सुधां विहायांधाः पतं
ति विषयावटे ॥ देवो रुतटिनीजूटं कारटिलकृतांबरं ॥ २१ ॥ विहाय पार्वतीकांतं हा मुधा परिमोहिताः ॥ कृतांतसदने तांताः शां:
ता अपि कलौ द्विज ॥ २२ ॥ न तथा त्वं महाबुद्धे सिद्धेः पात्रं त्वमेव हि ॥ त्रिनेत्रसुचरित्राणां द्विजाणां श्रावको पियः ॥ २३ ॥
श्रोत्रनेत्रमहाहारपादपंकज सेविनां ॥ ऐहिकामुष्मिकी सिद्धिः युष्मत्सु मुनिसत्तमाः ॥ २४ ॥ हृत्तमोनाशकं ज्ञानं
मुक्ता एव भविष्यथ ॥ कालांतकं सकृत्पूज्य कालातीतो भविष्यति ॥ २५ ॥ नकाल सदनं याति मदनांतकपूजया ॥ जयोपि
हि भवेत्सद्यो विभवोपि हि शाश्वतः ॥ २६ ॥ भवभावप्रपन्नानां भावानां भवनाशनं ॥ जायते नात्र संदेहो भवोद्भवपदार्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्य

सदाशि. न. अ. १

१ ॥श्री गणेशायनमः॥ ॥श्रीगौरीशंकराभ्यां नमः॥ ॥श्रीशारदायै नमः॥ ॥शिवाय गुरवे नमः॥ सोमात्मजं सामजवक्त्रमाद्यं गणेश
सामस्तुतविघ्नवैद्यं॥ आद्यं सुराणां निखिलैश्च वंद्यं वंदे सदा हृद्यतमं त्वभेद्यं॥१॥ ॥सूतउवाच॥ ॥प्रणम्य तारकारातिं पुरा
रातितनूभवं॥ विनयावनतो भूत्वा जैगीषव्यः सशांभवः॥२॥ शृण्वत्सु देवसंघेषु गणेष्वपि मुनिष्वपि॥ हरपादांबुजध्या
नानंदनिर्वृत्तमानसः॥उवाच मोचामधुरवाचा शीतलया मुनिः॥३॥ ॥जैगीषव्यउवाच॥ ॥तारकारे संहृतारे पुरारिप्रेममंदिर
॥ किंचिद्विज्ञप्तुमिच्छामि चित्ते तदुपधार्यतां॥४॥ अष्टमांशावसाने त्वयैव कथितं शांकरे॥ शेषाशेषमुखप्रोक्तं शंभोर्नाम
सहस्रकं॥५॥ तदेभिः श्रोतुमिच्छामि यद्यस्ति मयि ते दया॥ तद्वदाद्य विशेषेण शेषप्रोक्तं सनातनं॥६॥ रसालसारं पीत्वैव
6/3 नान्यदिच्छति कोकिलः॥ तद्वच्छिवकथासारं पीत्वा नान्यदिहेच्छति॥७॥ मन्मनः सद्म संलग्नं पादपद्मे महेशितुः॥ ना
न्यद्वर्णाश्रमाचारकथाभिरमते मनः॥८॥ यथा शिवकथासिंधुपया संतरणं भवे॥ न तथा सर्वधर्मार्थश्रवणे मे धृता मतिः
॥९॥ तुच्छान्न पृच्छे धर्मादीन् स्वच्छोऽस्मि त्वत्कृपावसात्॥ सूतउवाच॥ इति तद्वचनं श्रुत्वा सानंदजललोचनः॥ स्वनेत्रा
लोकनेनाशु स्वीचकार सशांभवं॥१०॥ स्कंदोऽभ्युवाच तं शांगं भस्मांगं लिंगपूजकं॥ अनंगमातंगहरपादपद्मांतरंगकं
॥११॥ श्रीस्कंद उवाच॥ साधु पृष्टं त्वया शैव शिवपादार्चने रत॥ शंभोर्नाम सहस्रं ते शेषाशेषमुखोद्गतं॥१२॥ पाताले-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथनवमांशप्रारंभः ॥ ६ ॥ श्री ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ शिवरहस्य अष्टमांश प्रारंभः ॥ श्री ॥

614

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ ८ ॥ श्रीगणेशाय नमः ॥ श्री शारदायै नमः ॥ शिवाय गुरवे नमः ॥ श्री गौरीशंकराय नमः ॥ अथ शिवरहस्य अ श्री मारक
ष्टमांश प्रारंभः ॥ दिग्नागवृंदसदृशानननागभूषप्रेमास्पदं गमगजामुखपद्ममित्रम् ॥ तन्नोनुमः प्रणतवि अ॰ अ॰ १
१ घ्नहरं गणेशमीशात्मजं शरवणोद्भववंद्यमाद्यम् ॥ १ ॥ सूत उवाच ॥ ॥ जैगीषव्य प्रणम्यान्यं प्रश्नं चक्रे मुनीश्वरः
स्कंदं नंदितमंदारवृंदं संहृततारकम् ॥ २ ॥ जैगीषव्य उवाच ॥ ॥ श्रुतं ते तारकाराते आनंदवनवैभवम् ॥ सह
स्रनामपद्धं भोः दिव्यं रुद्रसमन्वितम् ॥ ३ ॥ क्षेत्राणां महिमा शंभोः शिव धर्माः सनातनाः ॥ विष्णोश्च पुष्पदंत
स्य माहात्म्यं श्रुतमुत्तमम् ॥ ४ ॥ सप्तमांशे कथाश्चित्राः त्वत्तः शिवतनूद्भव ॥ अष्टमांशे कथा शंभोरष्टमूर्तेर्वद
स्व मे ॥ ५ ॥ शेषेण च तपस्तप्तं शिवपादार्चके यहे ॥ स वै भूपूजितः शंभोरित्युक्तं प्रथमांशके ॥ कालं कालन कथा
ख्यानैः नेयः कालोधुना मया ॥ कृपया त्वत्पदांभोजमनुलोके वदस्व मे ॥ ७ ॥ यथा त्वया श्रुतं देव्या
नन्दनस्पंदिसन्मधु ॥ मच्चित्तभ्रमरो नित्यं पातुमिच्छति षण्मुख ॥ ८ ॥ शंभोश्चरित्रं पापघ्नं वद तार
कसंहर ॥ त्वत्कृपापात्रभूतो यः सन्निनेत्रप्रियो भवेत् ॥ ९ ॥ ~~श्रुतं श्रवणभूतस्य वच श्रुत्वा इद समज~~
~~अकाथिष्टो दंतमेतं शिपिविष्टकथा श्रवण॥~~ ॥ श्रुतिश्रवणभूषस्य चरितं पातकौघभित् ॥ १० ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वदेवत्रार संहार मारमारप्रियात्मज ॥ १० ॥ सूत उवाच ॥ तदानीं शांभवस्यास्य वचः श्रुत्वा हरात्मजः ॥
अकथिष्टोदतमेतं शिपिविष्टकथाश्रयम् ॥ ११ ॥ नागैः प्रपूजनं शंभोर्नागभूषस्य ईशतुः ॥ कद्रूसु
पर्णी संवादो गरुडेन पराभवः ॥ १२ ॥ शिवधर्म प्रसंख्यानं गरुडाय ददाविदम् ॥ कश्यपस्य च संवा
दो गरुडेन मुनीश्वराः ॥ १३ ॥ यथा पर्णीमुखें दृष्यं शिवेन कथितं रहः ॥ पुण्यं शिवरहस्याख्यं मधुशे
वांगपुष्टिदम् ॥ १४ ॥ शांभवा षट्पदा एव तज्जिज्ञास्व उत्तमाः ॥ मुनिं प्राह तदा स्कंदो गणेंद्रानमरोत्तमान्
॥ १५ ॥ नमस्कृत्य महादेवं अंबो हेरंबमेव च ॥ दध्यौ चिरं प्रसन्नात्मा स्वहृत्पंकजसंस्थितम् ॥ १६ ॥ पु
रुषं परमेशानं सर्वभूतगुहाशयम् ॥ व्याप्यव्यापकताहीनं कारणानां च कारणं ॥ १७ ॥ पतीनां पतिमी
6/5 शानमुमापतिमनामयम् ॥ गणानां च पतिं देवं शिवं गृत्सपतिं प्रभुं ॥ १८ ॥ कृत्स्नं चानां पतिं शंभुं हरं व्रात
पतिं विभुम् ॥ दिशां च पतिमीशानं उग्रं देवं कपर्दिनम् ॥ १९ ॥ अंबिकेशं पशुपतिं पथीनां पतिमीश्वरम् ॥
अन्नानां च पतिं देवं बभ्लुशं मीढुषं शिवम् ॥ २० ॥ भवोद्भवं महादेवं पुष्टानां पतिमीश्वरम् ॥ जगतां पति
माशास्यं वनानां च पतिं भवम् ॥ २१ ॥ क्षेत्राणां च पतिं भीमं वृक्षाणां शर्वमीश्वरम् ॥ ~~कक्षाणां च पतिं~~

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 ~~भीमं वृक्षाणां शर्वमीश्वरम्~~ ॥ कक्षाणां च पतिं व्योमकेशं कोशादिवर्जितम् ॥ २२ ॥ जगतां दैववित्श्वेशमोषधीभी मा०अ
नामहेश्वरम् ॥ पतीनां मेरुधनुषं सत्वानां बाणधारकम् ॥ २३ ॥ सहमानं महेशानमाव्याधिपतिमीश्वरम् ॥ सर्वेषां अ०१
२ तस्थुषानां च जंगमानां पतिं प्रभुम् ॥ २४ ॥ सर्वैश्वर्येण संपन्नं नाम्ना सर्वेश्वरं शिवम् ॥ अनामरूपं देवेशं सर्वेवा
सं चदूरगम् ॥ २५ ॥ सर्वभूतेषु शरणं शरण्यं शरणार्थिनाम् ॥ महाकारुणिकं सांबं भक्तानामभयप्रदम् ॥ २६ ॥ सर्वेंद्रि
याधेरहितं विषयादिविवर्जितम् ॥ सर्वेंद्रियगुणातीतं सर्वाधारमनोपमम् ॥ २७ ॥ सर्वस्य प्रभुमीशानं नान्यत्किंचि
दसंस्तवे ॥ ध्यात्वाहृत्पंकजे देवमुमया सहितं शिवम् ॥ २८ ॥ सर्वेंद्रियाधेरहितं महानंदांबुमग्नधीः ॥ अवशेन
जगादेदं स्कंदो नंदांबुमग्नधीः ॥ २९ ॥ ॥ स्कंद उवाच ॥ ॥ लोकानुग्रहविग्रहत्रिजगतां संहारकोग्र
प्रभो ग्रस्तं मामहिनेव सोम मगजाकान्तोरुपापात्मना ॥ भक्तं चापि भवाननुग्रमनसा पश्याद्य निग्राह्यमप्यग्राह्यं
शशिशेखराधिकमहं ग्राह्याग्रगण्योऽकिम् ॥ ३० ॥ आतायोत्वास्य शंभो मदहरभगवन्रुद्रभगोत्रिनेत्र भीमोग्राध्व
रदक्षपक्षसुता मोक्षांबुआशिक्षक ॥ उक्षाधीश्वर वाहकक्षसते शंभोभगाक्षिक्षय ध्वांक्षाक्षिप्रभदक्षदीक्षित २
महादीक्षाविनाशावमाम् ॥ ३१ ॥ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे जैगीषव्यप्रश्ने स्कंदध्यानं नामप्रथ
मोऽध्यायः ॥ १ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री स्कंद उवाच ॥ ॥ श्रुणु तूर्णं कृपांभोधेः कथाख्यानमुनीश्वर ॥ जैगीषव्य महाशैव जित षड्वैरि विक्रम ॥ १ ॥
पंचेषुमत्तमातंग हर पंचास्यविक्रम ॥ संपूर्णं व महेशस्य कृपापूर्णार्णव स्थिर ॥ २ ॥ अपर्णारमणाचीतो भवानभ्यर्णवर्तिहि ॥
मया षड्वदनांभोज श्रवणैः श्रुतमैश्वरम् ॥ ३ ॥ माहात्म्यं परमेशस्य महिमानं महाद्भुतम् ॥ देव्युत्फुल्लमुखांभोज मरंदस्यंदि
सुन्दरम् ॥ ४ ॥ पुण्यं शिवरहस्याख्यं मधुभूतममुत्तमम् ॥ अमृतादपि विप्रेन्द्र सारभूतामिदं ध्रुवम् ॥ ५ ॥ किं चामृतस्य पानेन
नैव मुक्तिर्भविष्यति ॥ एतच्छिवरहस्याख्यामृतपानं विमुक्तिदम् ॥ ६ ॥ त्वमेव पात्रं विप्रेषु श्रवणे ते धृता मतिः ॥ अमी
गणेन्द्रा विप्रेन्द्राः सुरेन्द्राश्च यथा सुखम् ॥ ७ ॥ आनन्दघनकंदस्य महिमानं महेशितुः ॥ अस्मिन्नंशे महादेव्यै महेशेनो
66 न्मवर्णितः ॥ ८ ॥ भीमोऽष्टमांशः कथितो देवेशस्य प्रसादकृत् ॥ भीमेन कथितो देव्यै अघोरास्येन शांकर ॥ ९ ॥ श्रुणु कर्णे
सुखाख्यानं सहैभिर्मुनिपुंगवैः ॥ चरित्रं तत्त्रिनेत्रस्य पवित्रं पापनाशनम् ॥ १० ॥ विचित्र पुण्यदं सर्वं स्मरणादस्य
सत्तम ॥ शृण्वतां श्रवणे तूर्णं मुक्तिरेव भविष्यति ॥ ११ ॥ निस्तीर्णाः संतु संसारात् भवोद्भव कृपारसैः ॥ भविष्यंत्येव
सहसा भीमपादांबुजाश्रयात् ॥ १२ ॥ यो महेशकृपासिंधुतरंगाप्लाविमानसः ॥ स्वमनः पद्मसद्मोऽपसं फुल्लानंदमेदुरः ॥
भवेज्जन्मसहस्रेषु कश्चिच्छ्रद्धां भवसत्तम ॥ भूतो भवानीरमणपदध्यानहताशुभः ॥ भवत्युत्पन्नभाग्याय भवनाशाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरह॰ ८ केवलम् ॥ भुक्तिमुक्तिप्रदं पुंसामेतस्य श्रवणं सदा ॥ योंऽशस्याध्याय पादं वा श्लोकार्धं शृणुयाद्यदि ॥ स एव शांभवो लोके भी.मा.अ.
३ सदा शैवपदाश्रयः ॥ १५ ॥ इदमेव परं श्रेयो मङ्गलानां च मङ्गलम् ॥ मङ्गलापतिपादाब्जभक्तिदं मुक्तिसेतुदम् ॥ १६ ॥ अ.२
अमङ्गलहरं पुंसां पुमर्थदमनुत्तमम् ॥ इदं शिवरहस्याख्यं शशिशेखरभाषितम् ॥ १८ ॥ देव्यै देवेन कथितमष्टमूर्तिप्रियं सदा ॥
नाशांभवश्राव्यमेतद् द्विजैः श्राव्यमिदं मुने ॥ १९ ॥ अशांभववदने विप्रो शिवद्रोहमवाप्नुयात् ॥ पुरा चित्ररथो नाम गंधर्वाधि
पतिः किल ॥ २० ॥ वीर्यवान्बलसंपन्नः सदा स्त्रीजनवत्सलः ॥ तरुणो रूपसंपन्नः गाननृत्यविशारदः ॥ २१ ॥ पुष्पकेन
सदा विप्र सपक्षेण मुदा सह ॥ पर्यटन्पृथिवीं चैव सुरलोकेषु सत्तमः ॥ २२ ॥ स गंधर्वकुलश्रेष्ठो ददर्शाश्रममुत्तमम् ॥ मुं
जपृष्ठे सदा रम्यं फलपुष्पद्रुमाकुलम् ॥ २३ ॥ लतावितानबहुलं मृगपक्षिगणाकुलम् ॥ हौंडिर्नाम मुनिस्तत्र उवास शिवभा
वनः ॥ २४ ॥ भस्मरुद्राक्षसंपन्नः त्रिपुण्ड्रोज्ज्वलफालकः ॥ फालाक्षध्याननिरतो शैवो चैव परायणः ॥ २५ ॥ तादृशैरेव मुनि
भिरावृतो ह्यरसत्तमैः ॥ तस्यासीद्रूपसंपन्ना कन्या कमललोचना ॥ २६ ॥ रूपयौवनसंपन्ना सदा सौदामिनीव सा ॥
तां दृष्ट्वा रूपसंपन्नां चकमे काममोहितः ॥ २७ ॥ पितुर्लिंगार्चनार्थाय पुष्पापचयतत्पराम् ॥ वनवाटिषु रम्यासु रहो
वाचोरुविक्रमः ॥ २८ ॥ गंधर्व उवाच ॥ ॥ अयि रंभोरु कासि त्वं कस्य कन्या वदस्व माम् ॥ तवाद्य संगमं याचे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

17

फुल्लासु वनराजिषु ॥ २९ ॥ कुसुमेषु शरार्त्तमां परित्रातुमिहार्हसि ॥ इत्युन्मत्तवचः श्रुत्वा गंधर्वस्य द्विजात्मजा ॥
तमाह कंप्रवदनाभीता चालोकयदिशः ॥ कन्योवाच ॥ ॥ कौंडिरहं शांभवस्य कन्या गंधर्व सत्तम ॥ तमेव शरणां गच्छ तदादिष्टा त्वया सह ॥ ३२ ॥ समन्त्र दत्ता कन्याहं त्वां वरं वरये पतिम् ॥ इत्युक्तः स तदा श्रुत्वा तामाकर्षितुमागतः ॥
मूढो हृदः शरैर्विद्धो मारस्य नितरां मुने ॥ सा भीता पाद्ववेगा त्यक्त्वा पुष्पाणि कन्यका ॥ ३४ ॥ पितरं साश्रुपूर्णाक्षी प्राह गंधर्वचेष्टितम् ॥ तदा स शांभवो कौंडिः शशाप मुनिसत्तमः ॥ ३५ ॥ मुनिरुवाच ॥ ॥ यस्मान्मत्कन्यकां पापप्राधर्षीः काममोहितः ॥ अपस्मारगृहीतस्त्वं भवति मुनिराड्हि ॥ ३६ ॥ गंधर्वो मुनेः शापान्मदोन्मत्तो विचेतनः ॥ बभ्राम सपिशाचार्त्तो वदन्नुन्मत्तवत्तदा ॥ ३७ ॥ सखा तस्याभवत्क्षिप्रं तुंबुरुः शिववल्लभः ॥ कैलासे नु ओंकारं नत्वा तस्य निष्कृतिमाह वै ॥ ३८ ॥ तुंबुरुरुवाच ॥ ॥ शंभो विश्वेश विश्वात्मन् सखा चित्ररथो मम ॥ तेन शांभवपुत्रस्य कन्यापहृतचेतसा ॥ ३९ ॥ अनुष्ठितमिदं शंभो तमुद्धर महेश्वर ॥ भगवानोपदेवेशः तुंबुरुं प्राह हर्षितः ॥ ४० ॥ ईश्वर उवाच ॥ ॥ मत्क्षेत्रे शांभवश्रेष्ठो उभौ तुल्यौ हि तुंबरो ॥ तस्मात्त्वद्भावितः प्रीत्या तद्गंधर्वविमोचनं ॥ ४१ ॥ उपायमेकं वक्ष्यामि मन्नाम्नां स्मृतिमात्रतः ॥ अपस्मारग्रहान्मुक्तः स भविष्यति तुंबुरो ॥ ४२ ॥ इत्थं शंभोर्वचः श्रुत्वा स प्रणम्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०इ०८ महेश्वरम् ॥ ययौ चित्ररथो यत्र स्थितोऽपस्मारसंयुतः ॥४३॥ उन्मत्तभूतो विकृतः करालोन्नतकेशवान् ॥ तं बध्वा वल्लभो०मा०अ०
४ की हस्तो जगौ कर्णरसायनम् ॥ ४४ ॥ ॥ तुंबुरुरुवाच ॥ ॥ शर्वे गवे पौरपुरे तकामस्तोमबाण विनिवार अ २
क शम्भो ॥ त्वत्पदाब्जकृतलग्नेनकालैः कामकायदग्ध नाग्न्यमूर्ते ॥ श्रीमत्र्यंबक सदाशि
ववेदवेद्य वेद्योत्तमप्रमथनाथसुरासुरेड्य ॥ विश्वनाथ मम नाथ पाहि माम् पापतापदवदग्धमो शम्भो ॥ ४५ ॥ स्व
र्णवर्णकृतनत्रकर्णजापारहारगगनांतरसंस्थ ॥ ऊर्णनाभिरिव तद्द्रुतमेतज्जागतो विसृजसे शिव तूर्णम् ॥ ४६ ॥
शंकुकर्णभीतस्तुतिजालैः भद्रकर्णकृतशंखनिनादैः ॥ नंदिवाद्यभरतानुगतालैः नृत्तरंगमपिते हृदयानः ॥
इत्थं तत्स्तुतिजातेन वीतपापोऽभवत्क्षणात् ॥ स तु चित्ररथो विप्र क्षणाद्दिव्यवरूपधृक् ॥ ४८ ॥ एवं कथाप्रभा
वेन नाम्नां शंभोः प्रभावतः ॥ नंदिभृंग्यादयोऽप्येवं समाराध्य महेश्वरम् ॥ ४९ ॥ गणेशत्वं च संप्राप्य मोदन्ते शि
वसन्निधौ ॥ तस्मा ह विनयान्नन्दिकेशं महेश्वरः ॥ ५० ॥ ॥ श्री ईश्वर उवाच ॥ ॥ स्कंदो विघ्नाधिपो वा
तव सद्दशगुणं नाभिनंदामि नंदिन् ॥ विश्वानन्दप्रदस्त्वं मम तनय वरो देव संदोक वंद्यः ॥ ५१ ॥ गौर्याश्चापि प्रिय
स्त्वं तव शतयजुषां सारजप्यैः प्रियं माम् ॥ वित्थित्वय्येव स्कंगण वर विनुतं सत्यमद्यानुबेहम् ॥ ५२ ॥ मत्सार ४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्यघोरो वसा वहृदय द्वारे चकैलासके कुर्वन्मे गण पुंगता मीध गताःस्व णी तवे आग्र घुक ॥ विष्णु ब्रह्म महेंद्र
मुख्य मुकुटे नीराजिता ङ्घ्रा ह्रितं लोकेषु प्रचीरख्यातं प्रति युगंत्वंमशीतरं परम् ॥ ५३ ॥ ॥ नन्दी उवाच ॥ ॥
भस्माभ्यक्त तनुर्भवे भसितपुकृ पुंड्रांक गात्रो भवे भ्रावो क्षादि विभूषितः शिवमनुव्याहारमात्रादरः ॥ रुद्राध्यायज
पानुरक्तहृदयो लिंगार्चना त्यादरो भूयांजन्मशतेषु एवविहित स्त्वत्पादपद्मां जलिः ॥ ५४ ॥ इत्थं नंदिवचस्सुनंदि
तहृदास्मेराननः शंकरः ॥ प्राहानंदभरेण वाक्यमधुना संवीक्ष्य पूर्वोदितम् ॥ तन्मुर्ध्निस्वकरांबुजं चविदधन्नु
च्चैर्वदंतंहरः सर्वेषामुपशृण्वतां सुरगणेंद्राणां मुनीनामपि ॥ ५५ ॥ एवं प्रदक्षिण विधौ निरतः सभृंगी भृंगी
610 पमोर विरोवोदय पर्वतेंद्रम् ॥ स्तुत्वा च तोष्य भगवन्तमुमासहायं लेभे गणेंद्र पदवीमर धीय मन्यैः ॥ ५५ ॥
स्कंद उवाच ॥ ॥ पुंसां पुमर्थ दमनुत्तम मीशपाद ध्यानानुरक्त हृदयैः परिसेवनीयम् ॥ मान्यवर्यमिदमे
वपदान्यपुष्पि माधुर्यधैर्य वचनैः परमेवसारम् ॥ पुण्यं परं शिवरहस्यमधुप्रकृष्टं उत्कृष्ट भक्ति जनकं
शिवि विष्टपादे ॥ कष्टानिनाशयतितुष्टमिदं ददाति पुष्टिं प्रयच्छति सदैव विमुक्ति गृष्टिः ॥ ५७ ॥ भ्रष्ट
श्रियामपि सदैव तनुप्रकृष्ट मुत्कृष्ट राज्य तनयाधिक सौख्य दायि ॥ किं भोगभाग्य निकरैः वरदंतिवृंदैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहं० ८ वाज्युत्तमैर्वरस्थैर्धनधान्यगोभिः ॥ किं नैश्वरैर्वर महेश्वरभक्तिभावं वान्छीना नैव सुकृतैरकृतैः कृतार्थैः भीमा० अ०

५ ॥५८॥ ॥ इति श्रीशिवरहस्ये भीमाख्येऽष्टमांशे चित्ररथशापनिवृत्तौ द्वितीयोऽध्यायः ॥२॥ ॥ अ० २-३

श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीभीमायनमः ॥ श्रीस्कंद उवाच ॥ शृणु त्वमगजाकान्तपादभक्ति

विवर्धनम् ॥ भवभक्तिकथोदारं वरं मधु महाघभित् ॥१॥ इत्तमो वारणं सद्यः मुक्तिकारणमद्भुतम् ॥ त्वत्तो न पा

त्रमेतस्य ग्रहणे धारणे मुने ॥२॥ रहस्यमेतद्भगवानगजापतिरेवहि ॥ कैलासे स्वांकसंस्थायै प्रीत्या प्रा

हसशंकरः ॥३॥ तदंतिकस्थेन मया श्रुतमेतद्वदामि ते ॥ अष्टमूर्तेः प्रियं चेतदष्टमांशमिदं तव ॥ ४ ॥

थ कथयिष्ये मुनिश्रेष्ठ शृण्वभिमुनिपुंगवैः ॥ श्रवणैर्बधूनामित्वं भवानेवमतो मम ॥५॥ कुरु चित्तमिहैका नि

ग्रमुग्राख्यानं मनोहरम् ॥ भावानां भवशांत्यर्थं भवेनैव प्रकाशितम् ॥६॥ भवोद्भवचरित्रेषु विश्रांताकि

ल शांकराः ॥ अविश्रांतमुमाकांतकथया भ्रांतिवर्जिताः ॥७॥ भवतां ताऽपि सदा नितरां शांतमानसाः ॥

क्षणं त्वत्प्रसादेन कुरु कर्णैकपारसम् ॥८॥ तूर्णमभ्यर्णगा मुक्तिः भविष्यति कृपावशात् ॥ शंभो विचि

त्रलीलस्य महेशस्य पिनाकिनः ॥९॥ स गौरीहृदयानन्द आनन्दांबुनिधिः शिवः ॥ भक्त्या भक्तैः स्तुतो नि ५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वं वेदवेद्यो महेश्वरः ॥ १० ॥ ददाति मोक्षसाम्राज्यं प्राज्यं देवशिखामणिः ॥ राज्यं वा शिवभक्तानामन्नप्रा
ज्यं घृतं सदा ॥ ११ ॥ वाणीपतेरयं प्रासादं हृदजालं कृपावशात् ॥ शचीगोपतेरयं चाद्य चालयंदलसात्स्थिरः ॥ १२ ॥
रमारमणतामीशः सगौरीरमणो हरः ॥ ददात्येव हि भक्तेषु शांभवेषु कृपावशात् ॥ १३ ॥ स एव गीयते वेदे
वेदान्तैरपि शंकरः ॥ स एव सर्वदेवेशो मृत्युंजय उमापतिः ॥ १४ ॥ स एव भगवान्शंभुः श्रुतश्चापर्व
णा शिवः ॥ यस्यैश्वर्यस्य नांतोस्ति सर्वगः सर्वदा प्रभुः ॥ १५ ॥ यद्ध्यानेन परा मुक्तिः सुलभा शांभवोत्तमे ॥ सगौरीरमणो
देवः कालकामांधकाशनः ॥ १६ ॥ स मृत्युंजयो नित्यमपारविभवाश्रयः ॥ यस्य प्रसादलेशेन विष्णुब्रह्मेंद्रपूर्वकाः ॥ १७ ॥ स्थि
6/9 ष्टितानि वृतास्सर्वे ऽपि पिविष्ट पदार्थकाः ॥ उदारतरगंभीरो भवमायाभयापहः ॥ १८ ॥ सर्वदुःखहरो देवो रुद्रो वै नीललोहितः ॥ य एनं विदु
र्ज्ञानेनमृतास्ते सदा मुने ॥ १९ ॥ अन्यथा घोरदुःखमेव प्राप्नुवन्ति पदे पदे ॥ यस्य वामांकगा देवी या सा सर्वेश्वरी शिवा ॥ २० ॥ यन्मायया मोहिता वै
ब्रह्मेंद्राश्चाप्यधोक्षजः ॥ यस्याः प्रसादलेशेन विजानन्ति महेश्वरम् ॥ २१ ॥ स्वात्मानं सर्वगं शान्तं सच्चिन्मयमुमाधवम् ॥ यस्य पुत्रो
गणाधीशः सर्वविघ्ननिवारकः ॥ २२ ॥ यस्य पुत्रो हि मे वाद्य साक्षाज्ज्ञानात्मको मुने ॥ यस्य नन्द्याख्यो विप्र गणाः शंकरपुंगवाः ॥ २३ ॥
यस्य धर्मो महावाहः पुण्यपादोमितद्युतिः ॥ यस्याष्टमूर्त्तिभिर्व्याप्तं जगदेतच्चराचरं ॥ २४ ॥ यस्य लिंगं सदा कालं पूजयन्ति सुरासुरगणाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ बलप्रमथनं सांबं भक्तसंसारमोचकम्॥२५॥ कारणं जगतामीशमानन्दघनमव्ययम्॥ योवैरुद्रोमहादेवः भूतं भव्यं भवज्जगत्॥ भीमा॰अ॰
॥ ६ ॥ ॥२६॥ योवै रुद्रोमहादेवः शंकरः शशिशेखरः॥ विश्वंभूतं चभवनं विचित्रंसहि शंकरः॥ भीमोरुद्रोमहेशानो गीयते श्रुतिषु स्थिरः॥ अ॰३॰४
सर्वाभयप्रदो विश्वो विश्वाधिक उमासखः॥ पतिस्त्वंनस्तुतोवेदैः सर्वेषामेव शंकरः॥२७॥ भयापहोऽयं भक्तेषु शांभवेषु महात्मसु॥ सर्वो
पास्योयमेवात्मा सर्वेषां हृदयान्तरः॥२८॥ सर्वभूतगुहावासः वासिता जगतान्त्रये॥ ईशावास्यमिदं सर्वं जगत्त्रिभुवनात्मकम्॥२९॥
यस्यरूपं च पृथिवी सूर्याचन्द्रमसौ मुने॥ पृथिवी देवताः सर्वाः नविदन्ति महेश्वरम्॥ प्रियोऽयं सर्वभूतेषु नास्त्यस्माज्जगदेवहि॥ ॥ ॥
॥ श्री स्कंद उवाच ॥ बभ्राजमानमिदमेतदद्भ्ररूपमुद्भ्रान्तचित्तकुदृशाजगदेवसत्यम्॥ निभ्राजतेभ्रद्धदि वहृदभ्रगोष्ठी
नटस्यचरराचेनहीनदृष्टेः॥३१॥ नोविष्णुर्नो विधाता हरिसुरनिकरा भूसुरा भासुरा ये वीरा वाप्यसुरा सुकिन्नरवराः संसारका-
रागृहे॥ भ्राम्यन्तोपिन जानते शिवपदं किन्तु प्रसादाद्विभोः नोविभ्यन्ति भयेषु शंकरपदध्यानानुरागाः॥३२॥ इतिश्री
शिवरहस्ये भीमाख्येऽष्टमांशे तृतीयोऽध्यायः॥३॥ श्री काशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीभीमायनमः॥ ॥
श्री स्कंद उवाच॥ विज्ञानात्मा परात्मायं सर्वात्मायं महेश्वरः॥ एषोंतर्हृदयारामो एषभूतपतिः शिवः॥१॥ सएष परमा ॥ ६ ॥
नन्दो रसो यममृता हरः॥ एषविप्रे महादेवः सर्वदाभिष्टुतो मुने॥२॥ एनमेकेवदन्त्यग्निं ब्रह्माणंहरिशक्रकम्॥ एकोरुद्रो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महादेवो न द्वितीयोऽस्ति कश्चन ॥ ३ ॥ ऋतं सत्यं परं ब्रह्म पुरुषः कृष्णपिंगलः ॥ ऊर्ध्वरेता विरूपाक्षो विश्वरूपो महेश्वरः ॥
॥ ४ ॥ यो वेदादौ स्वरः शंभुः वेदान्तेषु प्रतिष्ठितः ॥ ईशानः सर्वविद्यानां सर्वभूतादिरीश्वरः ॥ ५ ॥ ब्रह्मविष्ण्वादिदेवानामधिपो विश्
वतोमुखः ॥ जनिता ब्रह्मविष्णूनां रुद्रेन्द्राणां महेश्वरः ॥ ६ ॥ यमानिलानलाकोणां दिवः पृथ्व्योर्महेश्वरः ॥ यो जरा पृथिवी देवं पृथि
व्यं केषु वेदन ॥ ७ ॥ ब्रह्माणं विदधाद्ग्रे तस्मै वेदानुपादिशत् ॥ विश्वतश्चक्षुरीशानो विश्वतो बाहुरीश्वरः ॥ ८ ॥ विश्वतः पाणिपादोऽयं सहस्त्रा
क्षः सहस्रपात् ॥ अत्यतिष्ठदिदं सर्वं ईशानोऽयं दशांगुलम् ॥ ९ ॥ यद्भूतं यच्च वै भव्यं वर्त्तमानं महेश्वरः ॥ एतावानस्य महिमानातोज्यायां
१ श्च पुरुषः ॥ भीषेव पवते वायुः भीषेवोदेति भानुमान् ॥ भीषेवाग्निरिन्द्रश्च मृत्युर्धावति भीतितः ॥ ११ ॥ अपाणिपादो जवनो गृहीता चक्षु
९० रीश्वरः ॥ सर्ववेत्ति वेद्यजातं च न तं वेत्तीह कश्चन ॥ १२ ॥ तमाहुरेकं पुरुषं ज्योतिषां ज्योतिरीश्वरम् ॥ हिरण्यबाहुमीशानं सर्वांगे नहिर
ण्मयम् ॥ १३ ॥ एषोऽन्तरादित्यगतो नीलग्रीवो विलोहितः ॥ नमुच्यायं महादेव उग्रोऽयं च महेश्वरः सुमंगलः ॥ १४ ॥ यो वै रुद्रः स भग
वान् गीतः श्चाथर्वणोत्तमैः ॥ अन्नानां च पतिः शंभुः क्षेत्राधिपतिरीश्वरः ॥ १५ ॥ मित्राधिपो महादेवो तथा च वनपतिः शिवः ॥
भूमानन्दघनो ह्यात्मा सामगानगीतो महेश्वरः ॥ १६ ॥ एष ब्रह्मै षड्वेदो ऋग्भिर्गीतो महेश्वरोऽव्ययः ॥ नमस्ते रुद्र इत्यादि वाक्यैश्च
यजुर्वेदज्ञैः ॥ १७ ॥ इति हासपुराणेषु ईशो गीतः पुरातनैः ॥ महोपनिषदां सारे रयमेव हि गीयते ॥ १८ ॥ भिद्यते हृदयग्रन्थिश्छिद्यं

त स्थितः

शिवरह०८ तेसर्वे संशयाः॥ हृत्तमोनाशनं तस्य ज्ञानदीपं हि जायते॥१९॥ नप्राणो नच मनश्चायं असंगः सर्वगस्थितः॥ सदैव संत्र मध्येनं भोमा० अ०
॥७॥ नदेवा न महर्षयः॥२०॥ नविदुर्ब्रह्मविष्ण्वाद्याः सेंद्ररुद्रार्कवायवः॥ यतः प्रसूयते विश्वं ब्रह्मविष्ण्वादिपूर्वकं॥२१॥स अ०४॥
र्वोपः परमेशानो आकाशोद हरे हरः॥ सर्वभीताः प्रमुह्यन्ति द्यावाभूम्योर्य आंतरः॥२२॥ अनन्तो ह्यव्ययात्मायं पुरुषः प्रकृतेःप
रः॥ यमज्ञात्वा महादेवं मोहिताः ससुरासुराः॥२३॥ आत्मानं मन्यते सर्वे देहाहंकारसंवृताः॥ मायया देवदेवस्य चित्रलीलस्य व
र्त्तिनः॥२४॥ जितमायः सर्ववेत्ताः स कारणमुमापतिः॥ स नित्यो नित्यभूतानां चेतनानां स चेतनः॥२५॥ सकारणं कारणानां
पतीनां पतिरीश्वरः॥ जगतः कालरूपस्य कालकालो महेश्वरः॥२६॥ महाग्रासो यमीशानो यस्यौदनमहर्निशम्॥ ब्रह्मक्ष
त्रात्मकं विश्वं मृत्युर्यस्योपसेचनम्॥२७॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानुषाः॥ तदा शिवमविज्ञाय दुःखस्यान्तो भविष्य
ति॥२८॥ यदा तमोऽस्तं न दिवा न रात्रिर्न सन्नासच्छिवः स्वयम्॥ स चाक्षरो नित्यमनुप्रशक्तिः धाता विधाता परमो ह्यसंदृक्॥
२९॥ प्रपंचपञ्चीकरणे निरतापि शिवं विना॥ तेनं चिंता महेशेन सर्वे चैव सुरासुराः॥३०॥ परिवंचक ईशानो देवदेवास्त्रि
शूलभृत्॥ य एनं विदुरीशानममृतास्ते भवन्ति वै॥३१॥ अपेतरे दुःखयुक्ताः संसारवशवर्त्तिनः॥ जरामरणसंयुक्ताः ष
डूर्मिपरिमोहिताः॥३२॥ देहात्मवादिनः सर्वे ईषणाभिर्विमोहिताः॥ तापत्रितयमध्यस्था स्वस्थाभांति समाकुलाः॥३३॥ ॥७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जायन्ते च म्रियन्ते च कीटा इव सुरा नराः ॥ वानरा इव सर्वेऽपि पामरा दुःखभागिनः ॥ ३४ ॥ यस्य रूपं मुने सर्वं जगदेतच्चराचरम् ॥
भूमिरापोऽनलो वायुराकाशं व्योम केशभाक् ॥ ३५ ॥ को हि तद्वेद देवस्य महिमानं पिनाकिनः ॥ यजन्ति यागैर्नियता यजमाना म
हेश्वरम् ॥ ३६ ॥ भिक्षवः कष्टवसन्ति वेदान्तेषु विजानते ॥ योगिनो युंजते योगं यद्धि ज्ञानाय मेव हि ॥ ३७ ॥ नानावर्णाश्रमैर्धर्मै
रिष्टापूर्तैरुपासते ॥ मन्त्रैर्मन्त्रविदः सांबमुपासन्ते महेश्वरम् ॥ ३८ ॥ लेभिरे स्वपदान्येव यस्य लिंगार्चनेन हि ॥ ब्रह्मविष्ण्वा
द्यो रुद्रमुनयो मानवाः सुराः ॥ ३९ ॥ असुरा नृपवर्याश्च गंधर्वाप्सरसोरगाः ॥ विपाद्ममौचिताः एवं संपद्मध्यानियोजिताः ॥ ४० ॥ स
र्वे विश्वाधिकस्यैव निश्वासाज्जायते जगत् ॥ जातं च वर्धते नित्यं स्थितौ पतिलीयते सि च ॥ ४१ ॥ यस्याष्टमूर्तिभिर्व्याप्तं जगदेतत्त्रिशूलि
62/ नः ॥ अग्निः शिव उमा सोमा आभ्यां व्याप्तं जगत्त्रयम् ॥ ४२ ॥ अग्निषोमात्मकं विश्वं जानन्ति परमर्षयः ॥ न देवांकयुतं चैव
भगलिंगांकितं सदा ॥ ४३ ॥ पुंप्रकृत्योरिदं रूपं तस्माच्छिवमयं जगत् ॥ अनंगमातंग हरो हृणां हृदयेष्वास्थितः ॥ ४४ ॥ स परः पुरुषः
प्राणः परमात्मा शिवः स्वयम् ॥ अद्वैतोऽयं चतुर्थोऽयं पंचकोशातिगो ह्ययं ॥ ४५ ॥ तस्माद्ब्रह्मा तथा रुद्रो विष्णुर्विश्वं प्रजायते ॥ सर्व
मन्त्यगोत्यज्यध्येयः सांबस्त्रिलोचनः ॥ ४६ ॥ उमासहायो भगवान् मायामायी स ईश्वरः ॥ मंगलापतिरीशानो भक्तानां मंग
लप्रदः ॥ ४७ ॥ अमंगलं हरत्येव भक्त्या भक्तैरुपासितः ॥ सर्वेश्वरो महादेवः सर्वैश्वर्यसमन्वितः ॥ ४८ ॥ जितमायो महादेवस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 स्यमायाजिताः सुराः ॥ क्षेत्राणां च पतिर्देवः पशुपाशविनाशकः ॥ ४९ ॥ मायापाशैर्निबध्नाति जगत्सासुरमानुषम् ॥ मोचयेदंवि 
 कानाथः पाशेभ्यः ससुरासुरम् ॥ ५० ॥ भक्त्या प्रसादितो देवः साक्षात्पशुपतिः शिवः ॥ यस्य निश्वासपवना वेदामानं मुनीश्व 
राः ॥ ५१ ॥ यः सोमभागी रीज्यते सोमः सोमार्धशेखरः ॥ पावितो नायकोनेता स्थावरस्य चरस्य च ॥ ५२ ॥ यस्यांशलेशो हि जगद्भूतं
भाविभवत्तथा ॥ सर्वं शिवमयं विश्वं नाशिवं विद्यते मुने ॥ ५३ ॥ सर्वं शिवात्मकं तया प्रतिभाति विश्वं विश्वाधिकस्य कृपया ख
लु सर्वमेतत् ॥ ५४ ॥ जानीहि शंभुकृपया परिवर्ततेदं भूम्यब्धि कानन सुरासुरमानवं च ॥ नान्यद्भूतभवं जगत्सुरनरं क्ष्मातेजवा
य्वादिखं ज्योतिर्जालजलं जडाजड जगद्द्यावापृथिव्योंतरा ॥ ईशावास्यमिदं तदेव विदितं व्याप्तं व्ययं व्यापकं चैकानेक
परं परा प्रमुदितं जानीष्व सर्वं शिवं ॥ ५५ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे चतुर्थोऽध्यायः ॥ ४ ॥ श्रीकाशीविश्वे
श्वरार्पणमस्तु ॥ श्रीभामायनमः ॥ जैगीषव्य उवाच ॥ धन्योस्म्यहं तारकारे श्रुतं सर्वात्म्यमीशतुः ॥ तं त्वोपनिषदं सोमं
पृच्छामि पुरुषेभुनः ॥ १ ॥ कथमीशस्य चरितं विस्मयावहमुत्तमं ॥ सर्वे नरासुरास्सर्वे मुनयश्च तपोधनाः ॥ २ ॥ चित्रलीलस्य देवस्य
विश्वेशस्य कृपावशात् ॥ तरन्ति दुष्करं स्कंद सुघोरं भवसागरम् ॥ ३ ॥ यत्कृपालेशसंभूतं जगदेतच्चराचरम् ॥ महाकारुणिकः शंभुः सर्व
वेषां प्रसादकृत् ॥ ४ ॥ कथं देवस्य चरितं वद मह्यं कृपावशात् ॥ नूनं मे विस्मयं प्रीतिहेतु दं भक्तिवर्धनम् ॥ ५ ॥ उमापतिपदांभोजभक्ति 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दं मुक्तिदं मम ॥ वद त्वं तारकारा[ते] कथां कथय मां शुभां ॥ ६ ॥ सद्भिर्मुनिभिश्चैव गणेंद्रैः सुरसत्तमैः ॥ श्रोतुमुत्कण्ठितं चेतस्तन्महत्वं
कृपया वद ॥ ७ ॥ सूत उवाच ॥ इत्युक्तं तद्वचः श्रुत्वा मुनिं स्कंदोऽभ्युवाच हि ॥ महेश्वरस्य चरितं शृण्वतामघनाशनम् ॥ ८ ॥
स षड्वदनांभोजसंभवैर्लोचनोत्पलैः ॥ कृपावलोकनेनैव वीक्ष्य शांभवपुंगवम् ॥ ९ ॥ गणेंद्रानमरेंद्रांश्च [संख्या] प्रसूस्याद्प्रसन्नवाक् ॥
स्कंद उवाच ॥ भवत्सु नैव गोप्यं मे शांभवेषु महात्मसु ॥ १० ॥ शांगांगसंगो भंगाय दुःखानामेव केवलम् ॥ ११ ॥ भवतो शप्रसादेन भवना
शो महामुने ॥ शंभोः कथा[ऽऽ]कर्णनेन कर्णौ धन्यतरौ तव ॥ १२ ॥ मम वक्त्राणि धन्यानि लोचनावलिरेव मे ॥ शिवलिंगा लोकनेन कैलासे
शंकरालये ॥ १३ ॥ तूर्णमभ्यर्णगा मुक्तिरपर्णापति पूजया ॥ पापारण्यमहादावः शंकरस्यैव पूजनम् ॥ १४ ॥ न विना शंकरस्यार्चां सं
622 सारात्तारणं भवेत् ॥ भस्मांगरागो यो भूयाद्भावो भवपदार्चयैः [कः] ॥ १५ ॥ भावाभावं भजंत्येव भावर्द्धहि भाग्यवान् ॥ शंभोर्लिंगार्चनेनै
व पापभंगः प्रजापते ॥ १६ ॥ अनंगमातंगहर पदार्चक जनप्रियः ॥ भवत्येव विशेषेण शांभवो भूरिभाग्यवान् ॥ १७ ॥ महादेवस्मृतिः
सद्यो विद्यो तयति तं नरम् ॥ सुरं वा किन्नरं वापि उरगं यक्षमेव च ॥ १८ ॥ गंधर्वं मनुजं वापि कीटं पतंगमेव च ॥ करोति शंकरकृपा मोक्षायैव
न संशयः ॥ नाकिं ददाति साम्राज्यं प्राज्यं भक्तेषु केवलम् ॥ प्र[यदु]दार कथासारसारसानां महात्मनाम् ॥ २० ॥ भवन्ति संपदो नित्यं सर्वेषु सु
खहेतवे ॥ भवैकसुलभो देवो भक्तवश्यो भयापहः ॥ २१ ॥ भावग्राह्यो हि नीडारव्य इत्याह यर्वणी श्रुतिः ॥ तेनैव सर्वमुक्त्यर्थं सृष्टं शंकर ह्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विना

ोवरंहं॰८ पूजनम्॥२२॥नास्त्यन्यत्तारणं नृणां विश्वेश पूजनम्॥कः संतरेत भवदामसारासारवासनाम्॥२३॥ तां मृत्युंजय पूजार्थमुपपुज्य भीमा॰अ॰

सुखीभवेत्॥नविनान्यत्र धर्मज्या करो नाश्नुते पदम्॥२४॥ श्रीमृत्युंजयपूजैव सुलभा मोक्षदायिनी॥नपूजा पूजको नास्त्यस्व अ॰ ५॥

॥९॥ तन्त्रस्येश्वरस्य हि॥२५॥ किंतु सर्वाभयार्थं हि सृष्टं वै लिंगपूजनम्॥लिंगेर्चितो महादेवो ददातिविपुलां श्रियम्॥२६॥ विमुक्तिजन

कं स्थानं ददात्येव महेश्वरः॥ यः सकृद्बिल्वपत्रेण द्वित्रैर्वा भवपूजितः॥२७॥भवो भवहरो भूयाद्भावानां नात्र संशयः॥ यस्य संपूजना

देवब्रह्मविष्ण्वादयः सुराः॥२८॥ सेंद्राः सवरुणा देवा निवसन्ति त्रिविष्टपे॥ असुरा यक्षरक्षांसि मुनयो मनवस्तथा॥२९॥ प्रियं लिं

गार्चनं शंभोः नान्यत् किंचिन्मुनीश्वर॥नदानैर्नैव तपसा नवर्णाश्रमधर्मतः॥३०॥ एतद्विधसाध्येकं श्रौतं श्रीमहादेवपूजनं॥

विश्वेशपूजया विश्वं सर्वं संपूजितं भवेत्॥३१॥ विश्वाधिको महादेवः सर्ववेदान्तसंस्तुतः॥स्मृतः संपूजितो नित्यं ध्यातो वा मु

क्तिदायकः॥३२॥ दर्शनं स्पर्शनं लिंगे अपमे इति मन्त्रतः॥सर्वपापक्षपायैव मुक्तये भवते नृणाम्॥३३॥ यो महेशं सकृत्स्या

त्वा स्वहृदंभोजमध्यमे॥उमासहायं त्र्यक्षं च नीलकंठं स धन्यभाक्॥३४॥मान्यः सुराणां सर्वेषां मुनीनामयिवै मुने॥

मन्ये महामन्युसमो नदेवः करुणाकरः॥३५॥ अपराधिषु भक्तेषु महमानः सएव हि॥चुलुकं जलमात्रं वा त्रुटितं बिल्वजं दलं

॥३६॥ददाति नियमाद्यो वै तस्मै मुक्तिं प्रयच्छति॥ब्रह्मादिदुर्लभं स्थानं ददात्येव महेश्वरः॥३७॥ विश्वनाथोह्यनाथं तं सनाथं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्कुरुते नरम् ॥ स्वभक्तं मन्मथाराति रनाथ जन वत्सलः ॥ ३८ ॥ तस्यैव भक्त्या सुलभो मोक्षो नो धर्म कोटिभिः ॥ तस्येशस्य प्रसादार्थं सृष्टा हि विविधा क्रिया ॥ ३९ ॥ जपहोमार्चनाध्यान व्रतं कृच्छ्राणि सत्तम ॥ योगं सांख्यं च तन्त्राणि स्मृत योनि गमा अपि ॥ ४० ॥ आगमाश्चापि विविधाः यत्र तत्र पराणि च ॥ श्रुतयः स्मृतयः सर्वा वर्णाश्रमानिबंधनाः ॥ ४१ ॥ बन्धनायैव सर्वेषां न मुक्त्यैकारणं भवेत् ॥ प्रसादकार णान्येवन प्रसादो भवेद्धितैः ॥ ४२ ॥ प्रसाद कारणं शम्भोः भक्तिर्या निश्चला शिवे ॥ भक्त्यैव भव पाशेभ्यो मोचनं जायते नृणाम् ॥ भक्त्या तरति दुर्गाणि भक्त्या भद्राणि पश्यति ॥ भक्तिरेव विरूपाक्षे सदा कार्या मुनीश्वराः ॥ ४४ ॥ भस्माभ्यक्त तनुर्भावो भव लिंगं समर्च्य ॥ काल भीत्यापि मुच्येत संसाराद्भुत सपतः ॥ ४५ ॥ रुद्राक्षमाला भरणो रुद्रसूक्त जपादरः ॥ पंचाक्षर जपो नित्यं सर्वदा शिवपूजकः ॥ ४६ ॥ स एव मुक्ति कान्तायाः पतिरीशेन कल्पितः ॥ रुद्राक्षे त्रादिनिरतो विरतो भवसागरात ॥ ४७ ॥ जागरूकः स दातन्द्रो भवतीश्वर चिंतकः ॥ जरा मृत्यु जगज्जन्म सुखदुःखाकुलं जगत् ॥ ४८ ॥ पश्यन्मा प्रमदो भूयाद्धि क्लेश पदपूजने ॥ आयुर्यात्येव नियत मामकुंभे यथा पयः ॥ ४९ ॥ संपदो विपदस्ताहि स्वर्गो धर्मे तु नश्वराः ॥ शोक मोह समाक्रान्ताः ससुरासुर मानवाः ॥ ५० ॥ धनं क्षयान्तं सर्वेषां प्रियाणां विप्रयोगिता ॥ परीक्ष्य सर्वे दुःखान्तं चिरज्येतीति हि श्रुतिः ॥ ५१ ॥ नापुरामासनीयं हि धर्माग्र्यो ह्यनुचिंतनैः ॥ स्वस्थो ह्यस्य त्रिविध्यायक्तेन दुःखे विमुच्यते ॥ ५२ ॥ सूत उवाच ॥ ॥ कः संतरेत भवमेत

६२३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ दसारसारं मूढात्मनां मृगदृशापरिचिंतितं यत् ॥ दुःखाय तद्भवभवतां परिधावितं यत् तृष्णाहरं भवतिकिं मरुगं पयापः ॥ ५३ ॥ तद्भीमे भीमा०अ०
णाशिवयाद्युगं विहाय पद्मासनाब्जनयनान्परिशीलयन्ति ॥ पातान्तधर्मनिचयान्मरतोत्ततोऽपि कारुण्यतो भवति चोदितएषधर्मः ॥ अ०५१६
॥१०॥ ॥५४॥ ॥ श्रीस्कंद उवाच ॥ ॥ प्रकाशोनिवायं विधिरपि कदाचिद्द्विजपशो प्रदेयोऽयं शानोव्वसमभवभक्तेषुनियतम् ॥ शिवंस्पृ
ष्ट्वैतावद्वदितमिदमेवाद्यमधुरम् ॥ श्रृणुत्वं भक्त्यैव श्रुतिगतिमिदं स्नानमधुना ॥ ५५ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे स्कंदजै
गीषव्यसंवादो नाम पंचमोऽध्यायः ॥ ५ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्री भीमायनमः ॥ श्रीस्कंद उवाच ॥ वक्ष्याम्यद्यमुने श्रेष्ठ
नागानां तपसः क्रियाम् ॥ अपर्णापति पादाब्जध्यानासक्तःसुपर्णजम् ॥ १ ॥ भयंत्वज्ञाविज्ञकुस्ते आकल्पाद्यासवन्द्विव ॥ इममर्थं
पुरादेवी कैलासे प्राह शंकरम् ॥ २ ॥ विस्मितातीवसा वीक्ष्याभीतापन्नगसत्तमान् ॥ श्रीदेव्युवाच ॥ नागेरते महादेव देवदेव जगत्पते ॥ तवांगसंग
जनकं पुण्यं चक्रिमुपार्जितम् ॥ ३ ॥ किमेभिः शंगातिंगार्चा भुजंगैः किं कृतांशिव ॥ तन्मेवदविशेषेण करुणाकर शंकर ॥ ४ ॥ इत्थं गौर्या हरः पृष्टो
तदद्भुतमुवाचह ॥ श्रीमहादेव उवाच ॥ श्रृणुदेवि प्रवक्ष्यामि नागानां पूजनं मयि ॥ आकल्पाद्यभवन्मेद्यतेसर्वभाग्यगौरवैः ॥ ५ ॥ ममप्रिय
तरासर्वे कंदर्पारातिपूजया ॥ कद्रुः सुपर्णी च पुरा विवादे तौ रवेः किल ॥ ६ ॥ अश्वबालास्ततः कृष्णांश्चकारकुटिलेनहि ॥ आशीविषविषेणैव प
णितासान्यया सह ॥ ७ ॥ व्रीडायुक्ता सपत्नीसा सुपर्णीदास्यमावत ॥ सा दुःखिता सुतं प्राह स्वस्य दास्यविमोक्षणे ॥ ८ ॥ अमृताहरणायैव गरुत ॥ १० ॥
मन्तं तदा मुने ॥ ॥ सुपर्णी उवाच ॥ काद्रू कौटिल्यतः पुत्र तत्पुत्रे — — — — — — —

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रु विषोल्बणैः ॥ पणितेन मया पूर्वं बेदगंधर्व बालके ॥ ९ ॥ नित्यं श्वेतेनेति मया कृष्णे त्युक्ते तयापुनः ॥ दास्यं तदा वयोर्वाल्यात्
सत्यभूता भवत्विति ॥ १० ॥ दृष्ट्वा पुत्रैः कृतं तस्या बालानामीप्सितं क्रियाम् ॥ दास्यभावं समापन्ना सपत्न्या पुत्र नाशय ॥ ११ ॥ अमृताहरणो
नैव त्वयाती र्णा द्विजेश्वर ॥ एतदर्थं हि पितरौ पुत्रं कांक्षयतः सुत ॥ १२ ॥ पुन्नाम्नो नरकान् त्राता पुत्र एव न संशयः ॥ यदामृतं ते दास्यामि तदा
दास्यं न चैव मे ॥ १३ ॥ इति प्रोक्तं मया तस्यै तत्पुत्र परिपालय ॥ यो दुःखान् त्रायते पुत्र पितरौ स सुतोत्तमः ॥ १४ ॥ अस्माद् दुःखांबुसंरोधात्
समुत्तारय मां द्रुतं ॥ सूत उवाच ॥ इति मातुर्वचः श्रुत्वा गरुडः पततां वरः ॥ प्राह प्रणम्य तां देवीमेवमस्त्विति दर्पितः ॥ १५ ॥ गतः स
काश्यपिस्तस्मान्मेरोः शिखर मुत्तमम् ॥ नानाद्रुमलतोपेत फल पुष्पा वनान्वितम् ॥ १६ ॥ मृगांडजवरैर्युक्तं स गत्वा पितुराश्रमम् ॥ तं पश्यतां त
पोराशिं पितरं कश्यपं तदा ॥ १७ ॥ भस्म रुद्राक्ष संपन्नं शिवाराधनतत्परम् ॥ शांभवैर्मुनिभिर्युक्तं रुद्रसूक्त जपादरम् ॥ १८ ॥ प्रणम्य विनये
६२५ नैव स्थितस्तस्यैव सान्निध्ये ॥ तेनानुमोदितस्तत्र निषसादांडजेश्वरः ॥ १९ ॥ तं दृष्ट्वा स्वसुतं विप्रो गरुडं खिन्नमानसम् ॥ उवाच विनयो
दारं कश्यपोऽब्जज संभवः ॥ २० ॥ कश्यप उवाच ॥ कुतः समागतं वत्स क्व वा संप्रति गच्छसि ॥ किं चिकीर्षुरिह प्राप्तः पीरिक्लिष्टोऽसि दृश्य
मुते ॥ २१ ॥ स पितुर्वचनं श्रुत्वा प्रांजलिः प्राह तं मुनिम् ॥ ॥ गरुड उवाच ॥ ॥ भगवन्तपतां श्रेष्ठ साक्षादब्जजसंभव ॥ मात्रोर्विवद
तोरेवं दास्यभावेन खेदितः ॥ २२ ॥ मातुर्दास्य विमोक्षाय त्वत्सकाशमिहागतः ॥ भवान्पिता शांभवश्च महात्मा शिवभावनः ॥ २३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ अमृताहरणे यत्नं कर्तुमिच्छामि सांप्रतम् ॥ मातुरानृण्यमिच्छामि कृत्वा दास्यविमोचनम् ॥ केन प्राप्तिर्भवेन्मह्यं तदुदाहर मां प्रति ॥ तद्वद्भ भीम०अ०
गवानेव ब्रवीतु कृपया मयि ॥ २५ ॥ कं यायां शरणं लोके विहायैकं प्रजापतिम् ॥ इत्यंडजवचः श्रुत्वा कश्यपो ध्यानचक्षुषा ॥ २६ ॥ समीक्ष्य अ०६ ॥
॥११॥ पत्न्याः कौटिल्यं कनीयस्या मुनीश्वरः ॥ उवाच पतगश्रेष्ठं शिपिविष्टपदाश्रयः ॥ २७ ॥ ॥ कश्यप उवाच ॥ ॥ सापत्न्यं नाम लोकेषु पुत्र कौ
टिल्यदं सदा ॥ सापत्न्याद्धि महद्दुःखं देवैर्दैत्यैः पुरा सुत ॥ २८ ॥ सगरोंगारसदृशः प्राप्तः स्वर्गे च पांडज ॥ ध्रुवो दाशरथिश्चैव पांडवा दुःखभा
मयः ॥ २९ ॥ सापत्न्यैरेव कौटिल्यात्क्षत्रिया भ्रंशिताः पदात् ॥ नलोपि पुष्करेणैव विजितो नृपनन्दनः ॥ ३० ॥ पुनरभ्यर्च्य देवेशं स्वराज्यं लेभि
रे नृपाः ॥ बाह्याश्च शत्रवस्त्वन्ये सापत्न्याद्यांतरा स्मृताः ॥ ३१ ॥ काद्रवेयैः कृतं कर्म मातुस्ते दास्यकारणम् ॥ अमृताहरणार्थाय सुराणां
विजयाय च ॥ ३२ ॥ उपायं ते प्रवक्ष्यामि विजयाय रणे द्विज ॥ अनर्चितमहेशानां जयो नैव भविष्यति ॥ ३३ ॥ समभ्यर्च्य महादेवं सुराश्च
जितशत्रवः ॥ तस्मादाराधयेशानं जेतारमपराजितम् ॥ ३४ ॥ क्षयधीरं महादेवं शंकरं शरणं व्रज ॥ यदि देवः शरण्यश्च जयस्तस्य न दुर्ल
भः ॥ ३५ ॥ पुरा विष्णुश्च दैत्यैश्च पीडितामरचोदितः ॥ जगाम शरणं सांबं देवदेवं कपर्दिनम् ॥ ३६ ॥ सहस्रशरदां वत्स भस्मरुद्राक्ष
भृत्स्वयम् ॥ पंचाक्षरजपासक्तः पंचास्यध्यानपूर्वकम् ॥ ३७ ॥ समभ्यर्च्याम्बुजवरैर्नेत्रेणाभ्यर्च्य शूलिनम् ॥ शिपिविष्टात्स्व भ्य
यं तुष्टाच्चक्रं लेभे सुदर्शनम् ॥ ३८ ॥ तेनैते निहता दैत्याः कोटिशो बलवत्तराः ॥ हिरण्याक्षश्च कशिपुः कालकंजाः पुलस्त्यजाः ॥ ३९ ॥ ॥११॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मधु कैटभ संज्ञाश्च मुर कंसादयः पुरा ॥ कर्मदेवेषु स श्रेष्ठ्य मवाप जेष्ठ पूजया ॥४०॥ ब्रह्मणापि महादेवः पूजितो भक्ति भावतः ॥ अलभत्
सृष्टि सामर्थ्यं देवजालं महेश्वरात ॥ इन्द्रोपि वज्रं लेभे वै श्री महादेव पूजया ॥४१॥ वृत्रासुर समुद्भूतां ब्रह्म वध्यामवापह ॥४२॥ दध्यौ संपू
जयन्सांबं तस्मात्पापाद्वि मोचितः ॥ गुरोर्भार्यापहरणात्स्वभार्याणां विवर्जनात ॥४३॥ रोहिण्यामीत कामेन जानन्यं समपद्यत ॥ चन्द्रो यक्ष्माविनि
मुक्तो सूर्यः कुष्टाद्विमोचितः ॥४४॥ दक्षोविनिंदनाल्लेभी लिंगाच्योतो बिमोचितः ॥ दधीचिर्मंकणो गार्ग्यो कण्वो मेधातिथिर्मुनिः ॥४५॥ गौत
मः वावघो धौम्यो उपमन्युर्महामतिः ॥ क्षीरवारिधिमासाद्य मोदते शंकरार्चकः ॥४६॥ मार्कण्डेयो विजिग्येथ यमं सर्वभयप्रदम् ॥ विश्वनाथा
र्चनेनैव सोब्धिपः कलशोद्भवः ॥४७॥ दूर्वासस्तपो वृतिधरीशानुग्रहतो द्विज ॥ तथैवान्येनृपतयः सोमसूर्यान्वयोद्भवाः ॥४८॥ समभ्यर्च्य
७२ महादेवं लेभिरे वांछितानिहि ॥ भुक्ति मुक्ति प्रदं पुंसां बिजयारोग्यदं सदा ॥४९॥ काल मृत्युप्रहरणं महादेवस्य पूजनम् ॥ नचिनाशं करस्या
र्चा भुक्ति मुक्तिहि सिध्यतः ॥५०॥ स्वर्ग्यं पुत्र्यं पशव्यं च श्री महादेव पूजनम् ॥ भक्त्या बिल्वैः समभ्यर्च्य भस्मरुद्राक्षभूषणः ॥५१॥
महापापैर्विमुच्येत किं पुनश्चोपपातकैः ॥ भृगुरुज्जीवयामास स्वभार्यां निहतां पुरा ॥५२॥ विष्णुर्द्धृतयापूर्वं सुरकार्यार्थसिद्धये ॥
शशाप विष्णुं विप्रोसौ सदा भगे परा श्रयः ॥५३॥ मुनयो गणपाश्चैव अन्ये चैव सुरासुराः ॥ लेभिरे वांछितान्येव तस्मात्वमपि पूजय ॥५४॥
शिवस्य लिंगं दर्पितं बिल्वैर्भस्माक्षभूषणः ॥ ॥ सूत उवाच ॥ ॥ विष्णुस्त्रो वधानिर्घृणो जनिजरानाशप्रदं शापमप्यागाद्दैत्य वैरेः सुराजे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 विजितैः संप्रार्थितो सौ भृगुः ॥ तेषु स्थानवरं दिदेश कृपया तद्विष्णुरात्मीक्ष्यवै चक्रोत्कृत्यतदीय शापभयतोऽन्यवीक् परावर्त्तत ॥ तामुज्जी व्य 
 भृगुः शशाप हरिमप्याजौहि भगीचेको योनिष्वप्यति कुत्सिता सुनितरां दैवैस्तदा दुद्रुवे ॥ दैत्यानाह गतव्यथांश्च विनिरुजां प्रापय्य धाम्नी द्रुतं 
पाताले निवसन्तु भोगिनिलये शंभोः पदाम्बुजार्चकाः ॥ ५६ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्री काशी
विश्वेश्वरार्पणमस्तु ॥ ॥ भीमाय नमः ॥ ॥ कश्यप उवाच ॥ ॥ अमृतं रक्षितं देवै नाके सद्मानि सर्वदा ॥ उदायुध धरा देवाः तद्रक्ष्यंत
निशं द्विज ॥ १ ॥ निद्रातन्द्रादिरहिता शक्रस्याज्ञा करी नहि ॥ तज्जयो या यमे तत्ते कथयाम्यंडजेश्वर ॥ २ ॥ त्रिपुरा वंचितास्तेन विष्णुना वंचि 
तो बली ॥ मोहयामास तन्त्रेण कुशास्त्रेणासुरांस्तदा ॥ ३ ॥ पाषंडान् तान् स्वयं चक्रे शिवभक्तान्जितेन्द्रियान् ॥ शिवार्चन परिभ्रष्टान् भस्म
रुद्राक्ष वर्जितान् ॥ ४ ॥ पश्चात्संग्रामितां श्चक्रे रुद्राध्याय विवर्जितान् ॥ कृत्वैवं योधयामास तेन जिग्ये हरिः पुरा ॥ ५ ॥ शिवं ॥ स्वयं गर्वेण तत्या
ज शिवचिह्नानि शूलिनम् ॥ वीरभद्रेण निहतो दक्षयज्ञे पुरा हरिः ॥ ६ ॥ तृतीयांशे स कथितो विस्तारश्चांडजेश्वर ॥ तेन पापेन सहरिः निहतः शू
लपाणिना ॥ ७ ॥ मत्स्य कूर्म वराहादि नारसिंह तनुष्वपि ॥ यः शांभवाचार हीनान् पाषण्डान् कुरुते नरान् ॥ ८ ॥ कुतर्कैर्वाक्यै येऽपि मर्त्यो विप्रं वान
रकं व्रजेत् ॥ अधोमुखोर्ध्वपादोऽसौ लंबते हनिशं मलैः ॥ ९ ॥ यः शांकरांश्च मार्गं वर्येत् भक्तिभावान्महेशितुः ॥ सयात्यैव शुनरकं स चायं
पापकृत्तमः ॥ १० ॥ सर्वेषां निष्कृतिः प्रोक्ता पापानां नारकापहा ॥ शिवद्रोहः शांभवानां द्रोहो वा नरकावहः ॥ ११ ॥ नरकोत्तारणं नृणां नै 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नजातु भविष्यति ॥ शिवद्रोहेषु सर्वेषु शरण्यः शिव एव हि ॥१२॥ स मोचको महादेवः शिवद्रोहेषु सत्तम ॥ सहमानतया सर्वं भक्तानां पापना

शकः ॥१३॥ नान्येषां निष्कृतिः प्रोक्ता शिवद्रोहेषु सत्तम ॥ तस्मात्तं शरणं याहि सर्वां सिद्धिं प्रयच्छति ॥१४॥ विद्यां हृद्यां वदाम्येव तव

पंचाक्षरात्मिकाम् ॥ पंचाक्षरपरो मर्त्यः शिवज्ञानाय कल्पते ॥१५॥ तेन मुक्तो भवत्येव विद्यया द्योतते ऽण्डज ॥ किं तैर्वा परैर्मंत्रैर्गायत्र्या

सममर्चा हि ॥१६॥ गायंतं त्रायते यस्माद्गायत्री भर्गचिह्निता ॥ संसारभंजको भर्गः शिव एव विनिश्चितः ॥१७॥ पंचाक्षरं च गायत्री श्रौत

मंत्रद्वयं स्मृतम् ॥ उभयोर्दैवतं यस्मान्महादेवो महेश्वरः ॥१८॥ विप्रैरेव सदा मंत्रो जपनीयः प्रयत्नतः ॥ स्त्रीशूद्राणां नमो तेन जप्यः पंचा

क्षरः परः ॥१९॥ अभावे तु पितुः पुत्रतस्त्रिता पुत्र एव हि ॥ अन्ये वा ज्ञातयो विप्राः शांभवो वान्यतः सुतः ॥२०॥ यद्येवोपनये शा

स्त्रं तथा पंचाक्षरीपि च ॥ गायत्री वत्सदा ज्ञेया मंत्रराजो यमुत्तमम् ॥२१॥ तस्मात्तवोपदेक्ष्यामि मंत्रं पंचाक्षरं परम् ॥ मंत्रेणानेन देवेशं

यः पूजयति शंकरम् ॥२२॥ सर्वपापविमुक्तश्च जायते नात्र संशयः ॥ पंचाक्षरं सतारं यो प्रजपेत्प्रीतिपूर्वकम् ॥२३॥ स तु मुक्तो भवत्ये

६९८ व षडक्षरसमाश्रयात् ॥ पंचास्यध्याननिरतो पंचाक्षरजपादरः ॥२४॥ महापापयुतो वापि युक्तो वाप्युपपातकैः ॥ विमुच्यते सद्य एव रा

हुमुक्त इवोडुराट् ॥२५॥ न गायत्र्याः परो मन्त्रो न तु पंचाक्षरान्मनुः ॥ द्विजत्वे सा चैव प्रोक्ता गायत्री भर्गदेवता ॥२६॥ शिवप्रसादसि

द्ध्यर्थं श्रीमत्पंचाक्षरो मनुः ॥ द्विजानाममयं मंत्रं सर्वेषां मनकाम्यकम् ॥२७॥ तांत्रिका वैदिकाश्चैव भागतो वा यथारुचि ॥ द्विजा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहं·८ राध्यो महोदवः मनुर्जोप्यो द्विजस्मृतः ॥२८॥ तस्माद्द्विजानामंत्रो द्वौ प्रसादद्विजकृद्ददौ ॥ यस्यदेश शांभवे प्रोक्ता सर्व वर्णामराश्चि भीमा-अ·
यः ॥२९॥ शिव प्रसाद सिध्यर्थं जपनीयो मनुः परः ॥ स्त्रीभिः शूद्रैर्निमां तेन जपनीयो महामनुः ॥ ३०॥ गायत्रीति द्विजातीनामेवं त्रैव अ-७॥
॥१३॥ र्णिकेष्वपि ॥ नान्येषां शूद्रजातीनामंगनानां जपेस्मृता ॥ ३१॥ शूद्रो जप्यतु गायत्रीं नरके पच्यते चिरम् ॥ जाति प्रमाद जनको मं
त्रौ द्वौ शांभवौ स्मृतौ ॥ ३३॥ वेद माता च गायत्री वेद मध्य गतास्वयम् ॥ तस्मान्मन्त्र द्वयं विप्र सर्वथा श्रुति मध्यगम् ॥ ३३॥ प्र·
लयेसमनुप्राप्ते वेदा लीयन्ति यत्र वै ॥ गायत्र्यामेव गायत्री भर्गशब्दे शिवात्मके ॥ ३४॥ शिव पंचाक्षराकाराः पंचरूपी शिवस्यके ॥
चा
वर्णाः पंचाक्षरस्यास्य पंचास्य क्रमतः शिवे ॥ ३५॥ लीयन्ते किल कल्पान्ते प्रणवो हृदये स्थितः ॥ तस्माच्छ्रुतिषु सर्वत्र शिवो गी
तः सदा शिवोम ॥ ३६॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूत कृत ॥ ब्रह्मैव सदा शंभुः ब्रह्मणोऽधिपतिः शिवः ॥ ३७॥ नकारोऽपि
च लीयेत सद्योजातस्य के शिवे ॥ मकारोऽपि च लीयेत वामदेवास्य के शिवे ॥ ३८॥ शिकारोऽपि च लीयेत अघोरास्ये महेश्वरे ॥ व
कारोऽपि च लीयेत शिवतत्पुरुषात्मके ॥ ३९॥ यकारोऽपि च लीयेत सर्वांगेऽपि च शांकरे ॥ एवमेव महामन्त्रं अविमुक्तो वि
शेषतः ॥ ४०॥ स तारस्तारको मन्त्रः शैवेभ्य उपदिश्यते ॥ सन्नजीवेभ्य एवेश ईशानेन दयालुना ॥ ४१॥ नातः परतरो मंत्रस्ता
रकः परमेश्वरः ॥ यस्मादुच्चार्यमाणोऽपि शिवरूपं विभासते ॥ ४२॥ शिव स्वरूपभासेन स तु साक्षाच्छिवो भवेत् ॥ वर्णेभ्योऽपि ॥१३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परं सारं तारं शिवमयं विदुः ॥ ४३ ॥ अविद्याकर्मपाशेभ्यस्तारणात्तारमेव हि ॥ वर्णास्त्वन्ये तु सगुणा निर्गुणं तारमेव हि ॥ ४४ ॥
सतारं वर्णसहितं शिवरूपावभासकम् ॥ शिवस्य निर्गुणं साक्षात्तारमेव हि केवलम् ॥ ४५ ॥ एकाक्षरं यत्प्रणवं तत्तारं समुदाहृतम् ॥
तदेवोद्गीथवाक्येन सर्वश्रुतिषु गीयते ॥ ४६ ॥ तदेवानन्दकं दोत्तथं सर्वशब्दावभासकम् ॥ संशीलयन्परं याति शिवमेव हि निर्गुण
म् ॥ ४७ ॥ गायत्री मन्त्रसारं द्विजकुलतिलकाकार सिद्धत्वदायी मन्त्रोऽयं शिवतोषकृत्सु विहितो वेदान्तभागेष्वपि ॥ तारोऽयं पर
निर्गुणप्रकटने शब्दादिरेवैषवै भिक्षूणामथ शांभवानां हृदये शीलितो मुक्तिदः ॥ ४८ ॥ इति श्री शिवरहस्ये अष्टमांशे भीमारण्ये सप्तमो
अध्यायः ॥ ७ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री भीमाय नमः ॥ ॥ पतग उवाच ॥ ॥ प्रदेहि परमं मंत्रं संसारोत्तारकं
६२७ गुरो ॥ येन मुक्तो भवाम्यद्य संसाराद्घसागरात् ॥ १ ॥ सिद्धिं च साधये काम्यां प्रसादात्परमेष्ठिनः ॥ मातुरानृण्यमिच्छामि प्रसादा
देवशूलिनः ॥ २ ॥ त्वत्तो मन्त्रमिमं लब्ध्वा संपूज्य परमेश्वरम् ॥ पितः प्रसादं कुरु मे शांभवस्त्वं महामुने ॥ ३ ॥ शांभवो यदि विद्ये
यं लब्ध्वा शंभोः प्रसादकृत् ॥ यः पुत्रः पितरं त्यक्त्वा शांभवं ज्ञानपारगम् ॥ ४ ॥ पंचाक्षरं चान्यमुखाल्लब्ध्वा संपूजयेच्छिवम् ॥
सनैवाधिकृतो भूयात्प्रसादात्परमेष्ठिनः ॥ ५ ॥ तत्त्वविद्भिश्च कथितं शिवेनाप्याह्येवमेव हि ॥ अशांभवो यदि पिता पुत्रश्चे
च्छांभवो भवेत् ॥ ६ ॥ शांभवादेव तन्मंत्रं गृह्णीयाद्धि दिवोत्तमात् ॥ नाविद्धस्तु तृतो मंत्रमित्याह परमेश्वरः ॥ ७ ॥ तस्माच्छि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 नोदितोमार्गः हेरंबाय पुरा मुने॥ ददौ शिवो शिवायैस स्वकं दायप्रददौ शिवः॥ गणानां प्रददौ मन्त्रं पंचाक्षरमनुत्तमम्॥ 

भर्तुः सकाशात्भार्यापि लब्ध्वा मन्त्रं शिवं जपेत्॥ ९॥ नमोंतेनैव शूद्रोऽपि यतस्त्री समउच्यते॥ शूद्राणांनैव मन्त्रेषु अ 

॥१४॥ अधिकारो मुने किल॥१०॥ पंचाक्षरेनैव शूद्राणांधिकृत्य वेदहुतः॥ तन्मे वदविशेषेण संशयोऽस्मिन्हि कश्यप॥११॥ ॥

॥सूत उवाच॥ ॥ततः पतगराजस्य श्रुत्वा वचनमीदृशम्॥ पद्मजातसुतः प्राह तदुद्बोधकरं वचः॥ ॥कश्यप उवाच॥

सत्यमुक्तं त्वया पुत्र गुह्याद्गुह्यतरं वचः॥ तदद्य संप्रवक्ष्यामि यथाशिवमनोरथम्॥ विरक्तानां तु शूद्राणां शांभवाचारव

र्त्तिनाम्॥ गुरुत्वेन द्विजश्रेष्ठैः परिग्राह्यो न शूद्रजः॥१४॥ विप्रोऽपि शांभवो युक्तं शूद्रो भस्माक्षधारिणम्॥ परीक्ष्य नि

यतं धर्म्यमग्राम्यं शंकां नच॥१५॥ शिवालयं ततो गत्वा शिवतीर्थे निषेव्य च॥ सान्निध्यौ दक्षिणामूर्त्तेः भूर्जपत्रे लिखेन्मनुम्॥

॥१६॥ त्रिवारं वाचयेद्विप्रः शूद्रा द्विधवयापि च॥ नमोंतं विधवा शूद्री तथान्ये द्विजवत्स्मृतः॥ १६॥ नस्वयं तद्वदेत्कर्णे

शूद्रस्य द्विजसत्तमः॥ सच शिष्यो भवेच्छूद्रः गुरुर्विप्रो नसंशयः॥ १८॥ एवमाहुः पुराचार्याः शिवाभिमतमुत्तमम्॥ स्त्रियोऽपि

भर्तृमुखतः प्राप्य मन्त्रमिमं जपेत्॥ १९॥ अन्यवर्णास्त्रियोऽप्येवं पितुः प्राप्य महामनुम्॥ जपेयुः पूजयेयुश्च मन्त्रेणानेन शंक ॥१४॥

म्॥२०॥ बिल्वपत्रैः प्रसूनैर्वा त्रिवारं सकृदेव वा॥ मृल्लिंगे रसलिंगे वा धातुजे नार्मदेऽपि वा॥२१॥ रत्नलिंगेषु वा सम्यक् स्था

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बेर वा चेरऽपि वा ॥ स्वयंभुवे वा देवे वा आर्षे वा मानवे कृते ॥ २२ ॥ उत्तरोत्तरतोत्कर्षात्पूजनीयः सदाशिवः ॥ लिंगे ष्वेतेषु भक्त्यैव
नियमाच्छंकरार्चकः ॥ २३ ॥ स्फाटिके पूजितः शंभुः प्रददाति च वाञ्छितम् ॥ लिंगार्चनेन सकलं वाञ्छितं प्राप्यते नृणाम् ॥
सर्वलिंगार्चनेनैव प्राप्यन्ते हि मनोरथाः ॥ शिवस्य लिंग पूजैव मुक्तिदा श्रुति दर्शिता ॥ २५ ॥ आमनंत्यऽजं श्रेष्ठं जाबाल
श्रुतयो ध्रुवम् ॥ शिवलिंगमनभ्यर्च्य न पेयं जलमप्यणु ॥ २६ ॥ फलं वा यद्यदा भोज्यं अन्नं वा शंकरार्पितम् ॥ भुंजी
याच्छ्रीमहानाथ यं निवेदितमुत्तमम् ॥ अनभ्यर्च्य महादेवं योऽश्नाति फलमेव वा ॥ स रेतोभाक्षी नरके तिष्ठत्याभूतसंप्लवम् ॥ २८ ॥
यद्यदह्ना करोत्पापं यच्च तात्र यामकम् ॥ तदह्ना प्रतिमुच्येत शिवलिंगार्चनेन हि ॥ २९ ॥ प्रदोषे यः शिवं दृष्ट्वा परिपूज्य
९० सभक्तिभाक् ॥ द्विस्त्रैर्वा बिल्वपत्रैर्वा नीरैर्वापि महेश्वरम् ॥ ३० ॥ सोमवारे तथा सायं शतजन्माघनाशनम् ॥ कालाष्टम्यां कालकालं
सायमाभ्यर्च्य शंकरम् ॥ ३१ ॥ भूतायां वै भूतनाथं सायमभ्यर्च्य शंकरम् ॥ नैवेद्यं शिवभुक्त्यैव सर्वथा गणपो भवेत् ॥ ३२ ॥ संसार
रोगनिर्मुक्तः मुक्तये कल्पते नरः ॥ तथा पर्वे स्वापि शिवं ग्रहणे सोमसूर्ययोः ॥ ३३ ॥ समभ्यर्च्यामरश्रेष्ठं सर्वलोकेष्वपि ध्रुवम् ॥ आ-
यावज्जीवं समभ्यर्च्य जीवन्मुक्तो भवेन्नरः ॥ ३४ ॥ प्रमादादेकदा त्यक्त्वा (कत्वा) शिवलिंगार्चनं सुत ॥ वापयित्वा शिरः केशान् प्रा
श्य गव्यादि पंचकम् ॥ ३५ ॥ रुद्रहोमं हुनेद्देवं चरुणा सर्पिषा द्विज ॥ स्वसूत्रोक्तेन मार्गेण कृत्वा पूर्वापराक्रमम् ॥ ३६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह-८ शांभवं भोजयित्वैकमुपोष्याभ्यर्च्य शूलिनं ॥ पूर्वाह्णापरह्णे चैव कृत्वा पूजाद्वयं पुनः ॥३७॥ भुंजीत शांभवैः सार्धं नैवेद्यं यच्छि भीमा॰
॥१५॥ वार्पितम् ॥ तत्पापमुक्तो भवति इत्याह परमेश्वरः ॥३८॥ शिवार्चनपरित्यागो महापापं प्रकीर्तितम् ॥ निष्कृतिर्विहिता अ॰अ॰
शास्त्रे महापापे क्वचिद्द्विज ॥३९॥ प्राणान्तं न ततो घोरं नरकं प्राप्नुयान्नरः ॥ गृहीत्वा नियमं विप्रः शिवलिंगार्चनक्रमे ॥ ॥ ८॥
वरं प्राणपरित्यागश्छेदनं शिरसो द्विज ॥ अनभ्यर्च्य महादेवमन्नं नाश्नीयात्कदाचन ॥४१॥ एवं नियममास्थाय त्यक्त्वा तच्छं
कराचनम् ॥ त्यक्तप्राणो न शुद्ध्येत मृतो नैरकमिच्छति ॥४२॥ तस्मादतन्द्रितो लिंगे पूजनीयः सदाशिवः ॥ शिवप्रसादजन
कं शिवलिंगस्य पूजनम् ॥४३॥ भुक्तिदं मुक्तिदं चापि ॥ ज्ञानदं सर्वदा नृणाम् ॥ अवश्यं तु द्विजातीनामित्याह शशिशेखरः ॥
॥४४॥ नान्यदेवैः समं शंभुं पूजयेद्विश्वनायकम् ॥ पशवो ब्रह्मविष्ण्वाद्याः तैः समं पतिपूजनम् ॥४५॥ न कार्यं सर्वथा सर्वैः
न प्रसादकरं हितम् ॥ मत्वा रुद्रेति मन्त्रेण श्रुतिः पूजां निषेधति ॥४६॥ सह ह्यन्यार्चनं शंभोर्नैव कुर्यात्सुरान्तरैः ॥ नरका
वहमेवाद्य नात्र कार्या विचारणा ॥४७॥ विश्वाकाराः सर्व एव स तु विश्वाधिकः शिवः ॥ एकः शिवः यथाऽद्वैतो द्वैतवार्ता
पि तत्र न ॥४८॥ तस्मात्संपूजयेच्छांगं लिंगमेव पिनाकिनः ॥ शिवलिंगार्चनेनैव शिवस्तुष्यति नान्यथा ॥४९॥ अन्येऽपि ॥१५॥
बहवो धर्माः शिवप्रोक्ताः प्रसाददाः ॥ साक्षात्प्रसादजनकं शिवलिंगार्चनं द्विज ॥५०॥ लिंगेऽर्चितमहादेवाद्दारिद्र्यो विशेषतः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भक्तानां सकलानभीष्टं प्रददाति महेश्वरः ॥ ५१ ॥ अन्येऽपि शैवधर्मा ये ब्रह्माद्यास्तेऽर्थनाशकाः ॥ कुर्वन्तु वा यथाजोषं नैतत्त्या
ज्यं कदापि च ॥ ५२ ॥ इत्येवं समयं कृत्वा वरमाप्राणसंक्षयम् ॥ पूजनीयः शिवो लिंगे ज्ञानमुक्तिमभीप्सुभिः ॥ ५३ ॥
॥ श्रीस्कंद उवाच ॥ ॥ यः पूजयेच्छशिकलाविलसत्सुमौलिलिंगं महाशपथपूर्वकमेव विप्रैः ॥ प्राश्यं जलं न च फलं
न च भोज्यमन्नं लिंगार्चनोज्झितिरहो नरकप्रदैव ॥ ५४ ॥ कः संतरेत भवमेतदसारसारं शंभोः पदांबुजसमर्चनतो विही
नः ॥ त्यक्त्वा (कृत्वा) सुरान्तरमनुत्तमचन्द्रमौलिलिंगार्चनेन सकलां श्रियमश्नुते च ॥ ५५ ॥ इति श्रीभीमाख्ये शिवरहस्ये
अष्टमांशे अष्टमोऽध्यायः ॥ ८ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमाय नमः ॥ ॥ गरुड उवाच ॥ ॥
६२९ किं वा प्रसादजनकं महादेवस्य वै मुने ॥ तच्चीरव्योमभक्त्यैव तद्वदस्व गुरो मयि ॥ १ ॥ श्रीस्कंद उवाच ॥ गरुडस्य
वचः श्रुत्वा कश्यपः प्राह तं पुनः ॥ विनतातनयं दृष्ट्वा विनतं नियतो मुनिः ॥ २ ॥ शिवप्रसादजनकं भस्मनो महिमा
वरम् ॥ कश्यप उवाच ॥ भस्माभ्यक्ततनुर्नित्यं पूजयेदिन्दुशेखरम् ॥ ३ ॥ भस्मधारणहीनानां प्रसादो नैव
शांभवः ॥ भवे जन्मशतेष्वेव द्विजस्यापि विशेषतः ॥ ४ ॥ भस्मधारणहीनानां ज्ञानं नैवोपजायते ॥ ज्ञानांगत्व
मिदं भस्म सृष्टमीशेन मुक्तिदम् ॥ ५ ॥ भस्म भस्मेति यो ब्रूयात्स तु पापैर्विमुच्यते ॥ भस्मना पादपर्यन्तं यः स्नाति निय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ ८ तंसदा ॥ ६ ॥ सतुसंतरतेघोरं संसारं दुःखदं नरः ॥ द्विजोवर्णी गृहस्थोवा यतिर्वापिवनाश्रमी ॥ ७ ॥ त्रिकालं भस्मनि भीमा॰अ॰
रता देवदेवप्रसादभाक् ॥ भस्मस्नानविहीनात्मा कृत्वा कर्माण्यपि द्विजः ॥ ८ ॥ नैवतत्फलमाप्नोति कुर्वन् यत्किंचिदप्यवै ॥ अ॰ ९
॥ १६ ॥ प्रत्यवैतिद्विजो वापि भवत्येव न संशयः ॥ ९ ॥ भस्मप्रभावो वेदान्तैः सर्वदा प्रतिपद्यते ॥ अथर्वशिरसि स्वैरं भस्म प्रोक्तं हि पावनम् ॥
शिरोधृतमिदं भस्म स्नानमापादमस्तकम् ॥ अग्निरित्यादिभिर्मन्त्रैः स्नात्वापापाद्विमुच्यते ॥ ११ ॥ यो वा को वान्त्यजो वापि नि
त्यं भस्मतनुर्भवेत् ॥ स महेशप्रसादस्य पात्रं भवति निश्चितम् ॥ १२ ॥ द्विजो वाप्युत्तमाचारो भस्मस्नानं न विवर्जितः ॥ यो भस्म
धारणं दृष्ट्वा नाभिनन्दति दुर्मतिः ॥ १३ ॥ तस्य तौ च सांकर्यमनुमेयं विपश्चिता ॥ यतिर्वेदान्तनिष्ठोऽपि भस्मधारणवर्जि
तः ॥ १४ ॥ पठन्वा पाठयन्वापि नैव तज्ज्ञानमाप्नुयात् ॥ जीवात्मैक्यं परं ज्ञानं भस्मस्नानेन जायते ॥ १५ ॥ भस्माभ्यक्ततनुर्नि
त्यं त्रिपुंड्रपरिचिह्नितः ॥ स तपस्वी सदा नार्हो सर्वकर्मार्हको भवेत् ॥ १६ ॥ त्रिनेत्रदययापात्रं पवित्रो भवति ध्रुवम् ॥ मित्र
भूतः सुराणां च भवत्येव न संशयः ॥ १७ ॥ भस्मधारणहीनो यः शिवलिंगं समर्चयेत् ॥ न तस्य पूजां गृह्णाति महादेवः
पराङ्मुखः ॥ १८ ॥ भविष्यति न संदेहः प्रत्युत प्रत्यवैति च ॥ सर्वदा सर्वकालेषु भस्मधृक् पावनः शुचिः ॥ १९ ॥ यः ॥ १६ ॥
स्नाति स्नानदशके विद्याबुद्ध्यापि मानवः ॥ भस्मस्नानाद्विनिर्मुक्तः सोऽशुचिः सर्वकर्मणि ॥ २० ॥ पवित्रतरमेतद्धि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भस्मैव श्रुतिचोदितम् ॥ श्रौतानलोद्भवं भस्म महापापनिवर्तकम् ॥२१॥ मुक्तिदं ज्ञानदं पुंसामग्निरित्यादिमन्त्रितम् ॥ भ
स्मधृत्वैव संध्यायामधिकारी न संशयः ॥ ३१-१ ॥ अधृत्वा यदि तद्भस्म संध्यां कुर्याद्द्विजाधमः ॥ भस्म धृत्वा पुनः सं
ध्यामाचरेत्संध्ययोर्द्वयोः ॥२३॥ श्राद्धं यज्ञं तथा होमो विवाहोपनयादिकम् ॥ देवताभ्यर्चनं नित्यं काम्यस्वाध्याय
तर्पणम् ॥२४॥ सर्वं भस्मधृगेवाप्नु सर्वेषां फलमश्नुते ॥ स तापस्वी स दाता च सर्वान् संतारयेन्नरान् ॥२५॥ भस्मधा
रणमन्त्रेण दुःखं तरति मानवः ॥ अशुचिर्भिन्नमर्यादो भस्मधृक् पावनो भवेत् ॥२६॥ अभक्ष्यभक्षणं कृत्वा
६३० गत्वागम्यामपि द्विजः ॥ भस्मनास्नानमात्रेण सर्वपापैः प्रमुच्यते ॥२७॥ वराहं मूषिकं नालं उन्मत्तं श्वानरासभौ ॥
स्पृष्ट्वा दृष्ट्वा द्विजो नित्यं भस्मस्नानं समाचरेत् ॥२८॥ उदक्यां सूतिकां दृष्ट्वा यः स्नाति शिवभस्मना ॥ भस्मस्नानेन पापानां रा
शिर्वै भस्मसाद्भवेत् ॥२९॥ भस्मधृक्सर्वदा पूज्यो यथा शिवमयो हि सः ॥ संध्ययोः प्रथमध्याह्ने निशीथे भस्मधृक्
भवेत् ॥३०॥ साचारोऽपि दुराचारो भस्मधृक् पावनो भवेत् ॥ भस्मत्रिपुण्ड्रसहितो नित्यमर्च्येत शंकरम् ॥३१॥ ते
न दत्तं जलं पुष्पं साक्षाद्गृह्णाति शंकरः ॥ हव्यं गृह्णन्ति च सुरा कव्यं पितृगणास्तथा ॥३२॥ भस्मधारणमात्रेण शिवः
तस्मै प्रसीदति ॥ प्रसादः शांकरो यस्य मुक्तिस्तस्य करे स्थिता ॥३३॥ दानं यद्दीयते दात्रा योगहीनाय पापिने द्विजः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहस्य भस्मधारणमात्रेण अभयो वर्धितं फलम् ॥ ३४ ॥ प्रातस्त्यजति यो विप्रो भस्मना पादमस्तकम् ॥ त्रिपुण्ड्रधृक संमन्त्रैश्च स भीमा॰ अ॰

मुभिर्निशि पातकैः ॥ ३५ ॥ त्रियायुषं त्रिपुण्ड्रांकः रात्रि पापाद्व्यपोहति ॥ मध्याह्नेपि तथा प्रातः पातकै र्विप्रमुच्यते ॥ ३६ ॥ अ॰ ९ ॥

सायंकाले भस्मधारी अपराह्णादघात्सदा ॥ मुक्तो भवति गौरीशः प्रियकृत्स भविष्यति ॥ ३७ ॥ भस्माभ्यक्ततनुर्भवेदथ महारु

॥ १८ ॥ द्राक्षमालाधरो रुद्राध्याय जपादरः शिव महा पंचाक्षरं सादरः ॥ श्रीमत्र्यंबक पादपंकज वरे ध्यायन्विमुक्तो भवेत् पापौघात् भवसागरा

न्महादेवाश्रयाद्भावतः ॥ ३८ ॥ लिंगं शांतमपारबिल्वजदलै रक्तांबुजैरर्चयन् दुर्भिक्षप्रभवे महाघगणनातूलानलो वै भवेत् ॥

विघ्नाद्रित्यघनाशये जनि जरारोगप्रणाशो भवेदेवं देवमहर्निशं विभवतो भुक्तिं लभस्वादरात् ॥ ३९ ॥ ॥ इति शिवरहस्ये भी

माख्ये अष्टमांशे नवमोऽध्यायः ॥ ९ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ कश्यप उवाच ॥ ॥

भस्मनः पंच नामानि श्रुति गीतानि वै द्विज ॥ विभूतिर्भसितं भस्म क्षारं रक्षेति चक्रमात् ॥ १ ॥ भासकं ज्ञानदानेन भस्मितत्कीर्ति

नं सदा ॥ ऐश्वर्यदानात्साभूतिः भसितं पापनाशनात् ॥ २ ॥ क्षारं पापक्षरणात्तो रक्षा रक्षणतः स्मृता ॥ भस्मनाम स्मरणाच्च पंच

धैतत्प्रकीर्तितम् ॥ ३ ॥ जाबाले नितरामुक्तं भस्म पापभयापहम् ॥ भस्म मुक्तिप्रदत्वाच्च प्रसादकरणं महत् ॥ ४ ॥ यो भस्म ॥ १७ ॥

रहितो विप्रः स एव श्वपचोंत्यजः ॥ सनित्यसूतको भूयाद्भस्मधारणवर्जितः ॥ ५ ॥ तेनाधीतं तपो वेदं जपं सर्वं च निष्फलम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आमनन्ति सदा भस्म श्वेताश्वतरशाखिनः ॥६॥ आमनन्ति सदा भस्म अथर्वशिरसि स्थिताः ॥ आमनन्ति सदा भस्म बृह
ज्जाबालशाखिनः ॥७॥ श्रुतयो भस्ममाहात्म्यं वदन्ति बहुधा द्विज ॥ मुनयो ब्रह्मविष्ण्वाद्या भस्ममाहात्म्यवेदिनः ॥८॥ देवैः
सेन्द्रैः सुधृतं भस्मेदं पावनं परम् ॥ ब्रह्मणा विष्णुनेन्द्रेण धृतं रुद्रैः सदैव हि ॥९॥ देवस्त्रीभिर्धृतं भस्म सर्वदा तत्त्रिपुण्ड्रवत् ॥ देव्या च
गू गणपैनैव स्कन्देन च धृतं परं ॥१०॥ स्त्रीभिर्धार्यमिदं भस्म मङ्गलं तद्ध्रुवांतरा ॥ सभर्तृकाभिः सततं शिवाराधनसाधनम् ॥११॥ स्नानांगत्वे
न कथितं सर्वदा पावनं परम् ॥ श्रौतं त्रिपुण्ड्रमेवेदं त्यक्त्वा तन्नरकं व्रजेत् ॥१२॥ ऊर्ध्वपुण्ड्रं मृदा कुर्वन् द्विजोऽपि श्वपचाधमः ॥ ऊ
र्ध्वपुण्ड्रं भ्रमेणापि नैव कुर्याद्द्विजः सदा ॥१३॥ अश्रौतमूर्ध्वपुण्ड्रं स्यान्न धार्यं सर्वथा द्विजैः ॥ ऊर्ध्वपुण्ड्रेण यः कुर्याच्छिवलिं
शिवप्रसादजनकं भस्मधारणमुत्तमम् ॥१५॥
६३ गस्य पूजनं ॥१४॥ स पापभाक् भवत्येव नात्र संदेहकारणम् ॥ शिवप्रसादजनकं त्रिपुण्ड्रपीरधारणम् ॥१५॥ शिरो ललाटवक्षस्सु
दोर्द्वयोर्यस्त्रिपुण्ड्रधृक् ॥ स एव प्रियकृच्छ्रेष्ठो महेशस्य गणेश्वरः ॥१६॥ यो भस्मधारणं त्यक्त्वा मृदोर्ध्वपुण्ड्रधृक् नरः ॥१७॥
स नरो जारजो विप्रः स एव श्वपचाधमः ॥ भस्मना पूतफालो यः स तपस्वी स तु द्विजः ॥१८॥ स एव प्रेमसदनं मदनान्तकस्य च ॥
भस्मधृक् पूयते पापैर्महद्भिरपि प्रनशः ॥१९॥ भस्मफालत्रिपुण्ड्रांकं दृष्ट्वा भीतो यमः सदा ॥ भूतगणाश्च पिशाचाश्च ग्रहाश्चैव
विनायकाः ॥२०॥ तं नरं नोपसर्पन्ति सर्वदा भस्मधारणम् ॥ भस्मधारणमात्रेण सदा शाम्यन्ति वै ग्रहाः ॥२१॥ पंचाक्षरेण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 यो भस्म अभिमन्त्र्यैव धारयेत ॥ आर्द्रैः शुष्कैस्तथा पापै मुच्यते नात्र संशयः ॥ २२॥ भस्मैव परमं तुर्यं पावनं ज्ञानभासकम्॥ 
यो विनिन्दति भस्मेदं स निंद्यां योनिमाप्नुयात ॥ २३॥ भस्मदिग्ध त्रिपुंड्रांकं भोजयित्वा तु शांभवं ॥ स भोजयति गौरीशं
॥१०॥ तेन तुष्टो महेश्वरः ॥२४॥ पवित्राणां पवित्रं हि भस्मैव द्विजपुंगव॥ न भस्मात्पावनतरं त्रिषु लोकेषु विद्यते ॥२५॥ न
भूत्या प्रमदेतैव इति श्रुत्यनुशासनं॥ भस्मना पूजयेल्लिंगं त्र्यंबकेण समुच्यते ॥ २६॥ सर्वस्मादपि पापेभ्यो स मुक्तो
मोचयेत्परान् ॥ स जीवन् शिवतामेति साक्षाद्रुद्रसमो भवेत ॥ २७॥ नित्याशुचिमिदं देहं भस्मना शुचिभाग्भवेत॥
भस्म एतद्विहायैवमन्यत्पुंड्रधरो यदि ॥२८॥ मुक्तिं विन्देत चेदस्मात्सागरे संप्लविष्यति ॥ विषपानेन नित्यत्वं
यदि विन्देत मानवः ॥२९॥ भस्मस्नानविहीनो यः स भवेन्मातृजारतः ॥ यो भस्मस्नानयुक्तो भवति सुरनरो
स द्विजो वाधमो वा नैवान्यो भगवत्प्रमोदजनकं ज्ञानं महत्प्राप्नुयात ॥ भूत्योर्ध्वफलके ललाटतटके पाद्म
मदादौ रतो निर्दग्धाखिलवंशसंकरमहापापौघदुःखौघयुक् ॥ ३०॥ यो भस्माभ्यक्तदेहो भवति जनिजरा
नाशपापाद्विहीनः ॥ पापैस्तापजदुःखभागनिकराज्ज्ञानं महद्विन्दति ॥ भुक्त्वा सौख्यमतीव शंकरगणश्रे
ष्ठोऽष्टरम्याकृतिः भूयादेव महाप्रभावसहितो विप्रोऽप्यमुक्तो भवेत ॥ ३१॥ ॥ इति शिवरहस्ये भीमाख्ये अष्टमांशे ॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भस्ममहिमानामदशमोऽध्यायः ॥१०॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ कश्यप उवा-
च ॥ ॥ रुद्राक्षधारणं पुण्यं शिवप्रीतिकरं सदा ॥ प्रसादजनकं साक्षाच्छंभोर्नित्यं पिनाकिनः ॥१॥ रुद्रनेत्रसमुद्भूता रुद्राक्षास्तर
वोऽभवन् ॥ विंदवस्त्रैपुरयुद्धे मीलिताक्षेण शंभुना ॥२॥ पतिता भूतले वत्स ते भूमौ तरवोऽभवन् ॥ द्वात्रिंशद्दक्षजातीया सकलाः
सुषिरावृताः ॥३॥ ब्राह्मणक्षत्रियावैश्याशूद्राक्षाइति विश्रुताः ॥ ब्राह्मणाश्वेतजातीया क्षत्रिया रक्तवर्णकाः ॥४॥ वैश्याःपी
तास्तु विज्ञेयाः शूद्राः कृष्णाः प्रकीर्तिताः ॥ तत्तद्वर्णे क्रमेणैव धार्या वर्णैरनुक्रमात् ॥५॥ ब्राह्मणो बिभृयान्मूर्ध्नि सर्वांगेषु विशेष
तः ॥ क्षत्रियोऽपि च वक्षस्सु बाह्वोरपि विशेषतः ॥६॥ वैश्यः कण्ठे वक्षसि च शूद्रो मूर्धनि धारयेत् ॥ ब्राह्मणैरपि सर्वांगे धार्यं त्रै
यंबकेण तु ॥७॥ अघोरेणैव मन्त्रेण क्षत्रियो धारयेच्छुभान् ॥ वामदेवेति मन्त्रेण वैश्यैर्धार्याः सदक्षकाः ॥८॥ शूद्रःशि
632 वेतिनाम्नैव धृत्वा मुक्तो भविष्यति ॥ पतिस्तु प्रणवेनैव स्त्रीणां पंचाक्षरेण तु ॥९॥ सभर्तृका कण्ठदेशे धृत्वैकं चाक्षमुत्तमम् ॥
पाकादिकरणे योग्या रजसापि पविस्रुता ॥१०॥ रत्नैः स्वर्णेन वा धार्यो राजते नाथवा सदा ॥ सूत्रेण क्षौमजेनापि सर्वैर्धार्या यथा
रुचि ॥११॥ अशुचिर्वा शुचिर्वापि सर्वावस्थाङ्गतोऽपि वा ॥ रुद्राक्षमालाभरणः पवित्रो नात्र संशयः ॥१२॥ त्रिनेत्रप्रिय
पात्रं स इति शास्त्रविदां मतम् ॥ एकाननः शिवः साक्षात्तं धृत्वा शिवसाद्भवेत् ॥१३॥ द्विमुखं पार्वती शंभुः तद्धृत्वा पापा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 मोचितः ॥ त्रिमुखो वह्निरूपात्मा तं धृत्वा भस्मपापमुक् ॥ १४ ॥ चतुर्वक्त्रः स्वयं ब्रह्मा तद्धृत्वा ब्रह्मलोकगः ॥ पंचवक्त्रः स्वयं 
शंभुः तं धृत्वा पंचपातकैः ॥ विमुच्येत क्षणेनैव साक्षात्त्र्यक्षप्रसादभाक् ॥ षडास्यं स्कंददैवत्यं धृत्वा स्कंदसलोकगः ॥ १६ ॥ 
॥ १९ ॥ सप्ताननं स्वयं देवी तं धृत्वा वह्निलोकगाः ॥ अष्टाननं तु रुद्राक्षं अष्टमूर्त्तेः प्रियं सदा ॥ १७ ॥ तद्धारणादष्टवसुलोके सो मोदते चिरम् ॥
नवाननं स्वयं भीमः भीमपापैः प्रमुच्यते ॥ १८ ॥ दशास्यं च सदा धृत्वा न यामीं याति यातनाम् ॥ एकादशाननं रुद्रास्तत्लोके निवसेच्च
धृक् ॥ १९ ॥ द्वादशास्यं सोमधाम प्रदोषाघविनाशकम् ॥ त्रयोदशास्यं पापघ्नं धृत्वा विष्णुपदप्रदम् ॥ २० ॥ चतुर्दशास्यं रुद्राक्षं
शिवज्ञानप्रदं शुभम् ॥ एवं चतुर्दशमुखं रुद्राक्षं धारयेत् क्रमात् ॥ २१ ॥ सर्वपापैर्विमुक्तश्च पश्चान्मुक्तो भविष्यति ॥ द्विजो वा श्व
पचो वापि यो रुद्राक्षाणि धारयेत् ॥ २२ ॥ स तपस्वी स मूर्धन्यो वदान्यो मुक्त एव हि ॥ सदाशिवप्रसादस्य पात्रं नात्र विचारणा ॥ २३ ॥
मुखं मुखेन संयोज्य धार्या रुद्राक्षमालिका ॥ नो चेत्स्वतपसां हानिः भविष्यति शिवाज्ञया ॥ २४ ॥ द्वात्रिंशत्कंठस्थाने षु षट् षट् क
र्णयुगे तथा ॥ बाह्वोः षोडश धार्या वै मणिबन्धे तु द्वादश ॥ २५ ॥ वक्षस्यष्टाधिकशतं भुवोश्चैकं शिखास्वपि ॥ चत्वारिंशतिं
मूर्ध्नि संग्रहोऽयं प्रकीर्तितः ॥ २६ ॥ सहस्रं विभृयान्नित्यं माला वा यावती भवेत् ॥ कंचुकं वा यथाजोषं मुकुटं मूर्ध्नि धारयेत् ॥ २७ ॥
सहस्रमधमं प्रोक्तं इन्द्रलोकप्रदायकम् ॥ दश सहस्रधृङ्मर्त्यः सोमलोकमवाप्नुयात् ॥ २८ ॥ अयुतं सूर्यलोकस्थः लक्षेण ब्र ॥ १९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्मलोकगः ॥ कोटिं तु निम्ब्रयाद्रक्षान् स च विष्णुमयो भवेत् ॥ २९ ॥ अनन्ताक्षस्य धरणे शिवस्य भविष्यति ॥ रुद्राक्षमालया जप्तो
मन्त्रोऽनन्तफलप्रदः ॥ ३० ॥ रुद्राक्षधारणे लज्जा येषां मस्ति स्वभावतः ॥ ते सर्वे जारजा ज्ञेया अब्रह्मण्याः सदैव ते ॥ ३१ ॥ रुद्राक्षे
ति वदन्मर्त्यो दशगोदानजं फलम् ॥ प्राप्नोति शिवसारूप्यं तेनैव देहेन मुच्यते ॥ ३२ ॥ मृण्मयेनापि रुद्राक्षं कृत्वा यत्नेन धारयेत् ॥ रु
द्राक्षधारणा द्रुद्रो भवत्येव न संशयः ॥ ३३ ॥ तेषामेवात्मविज्ञानं ये वै रुद्राक्षधारिणः ॥ भिक्षवोपि च रुद्राक्षान् धृत्वा मुक्ता
लिंगं भवन्ति हि ॥ ३४ ॥ रुद्राक्षमालाभरणाः शिवं प्रपूजयेत ॥ तत्कृतामेव तां पूजां गृह्णीयात् परमेश्वरः ॥ ३५ ॥ अरुद्राक्षकृतां पूजां
न गृह्णाति महेश्वरः ॥ यो भस्मधारी नियतं स रुद्राक्षधरो भवेत् ॥ ३६ ॥ अन्यपुंड्रधरश्चापि न रुद्राक्षाणि धारयेत् ॥ पुंड्रांतरं
यो धृत्वैव रुद्राक्षमपि धारयेत् ॥ ३७ ॥ प्रस्थुतो नारकी भूयादिति जाबालकी श्रुतिः ॥ यो रुद्राक्षोरुहारः सितभसितमहापुंड्र
६९३ स्तोरुबाहुः संपूज्य प्रमथाधिनाथमजरं भक्त्याऽथ मुक्तिं लभेत ॥ [illegible] कर किंकरोऽपि स महारुद्राक्षभस्मांगको मारारति
पदांबुजार्चनरतं विं किं न विन्दत्सहि ॥ ३८ ॥ यो रुद्राक्षोरुवक्षाः शितभसितलसत्फालबाहूक्षिमूलो लोला गोला हि फा
लज्वलदनलकुलव्यालमालात्तशूलम् ॥ ध्यायन् बुद्ध्या निशं ध्यायति गतिदहृदा धन्यमान्योऽहमल्पं लोकाध्यक्षानुशि
क्षाक्षीपत कलुषधी मुक्तयशाभवो यः ॥ ३९ ॥ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे रुद्राक्षमहिमा नाम एका
दशोऽध्यायः ॥ ११ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कश्यप

श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ मुनिरुवाच ॥ ॥ श्रीरुद्रमन्त्रान्प्रजपेन्नियतं भस्म
धार्यपि ॥ रुद्रमन्त्रं जपन्विप्रो ध्यायेद्देवमुमापतिम् ॥ १ ॥ वेदानां मध्यगं साक्षात् यजुषां मध्यगं परम् ॥ शतरुद्रीगतं त्वे
तद्रुद्रमन्त्रं शिवप्रियम् ॥ २ ॥ रुद्रप्रियकरं साक्षाद्रुद्रमन्त्रं श्रुति श्रुतम् ॥ रुद्राध्यायार्थविज्ञानी पदार्थज्ञानवान्नरः ॥ ३ ॥ न
मो तेन शिवं ध्यायन्सर्वपापैः प्रमुच्यते ॥ नमोन्तेनच तद्रूपधारिणं शिवमेव हि ॥ ४ ॥ ध्यायन्महेशं तद्रूपं पतीनां परमेश्वरम् ॥
॥२०॥ सर्वेषामप्युमाकान्तं नितान्तं शान्तमव्ययम् ॥ ५ ॥ रुद्रमध्यगतैर्मन्त्रैर्नमो तैरुभयोरपि ॥ एकद्वितो नमस्कारैः ध्याये
द्देवं पिनाकिनम् ॥ ६ ॥ सर्वदेवाधिदेवेशं विश्वेशं रुद्रसूक्ततः ॥ ध्यायन्मन्त्रान् जपेद्रुद्रान् तत्तदर्थावबोधतः ॥ ७ ॥ श्रीरु
द्रमन्त्रं प्रजपेद्भस्मधारणपूर्वकम् ॥ भस्मधार्यधिकारी च तथा रुद्राक्षधार्यपि ॥ ८ ॥ रुद्राध्याय जपे योग्यास्त एव भुवने द्विजाः ॥
नान्यपुंड्रधराः सर्वे नाधिकारिण एव हि ॥ ९ ॥ प्रत्युतो रुद्रमन्त्रांश्च प्रजपन्पापभाग्भवेत् ॥ यस्तु रुद्रं जपेन्नित्यं ध्यायमा
नो महेश्वरम् ॥ १० ॥ सर्वपापविशुद्धात्मा शिवत्वमुपगच्छति ॥ स्तेयं कृत्वा ब्रह्मवध्यां च कृत्वा मद्यं पीत्वा गुरुदारांश्च ग
त्वा ॥ भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥ ११ ॥ एकवारं जपन्रुद्रं पापैर्मुक्तो भविष्यति ॥ द्विती
यवारं जप्त्वैव रुद्रं ध्यायन्महेश्वरम् ॥ १२ ॥ गाणपत्यमवाप्नोति शिवस्य परमात्मनः ॥ तृतीयवारं प्रजपन् शिवे लीयेत ॥२०॥
सर्वदा ॥ १३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकादशानुवारं यो रुद्रमन्त्रान्जपेद्द्विजः ॥ संयमेत्यादि च जपन् आमोदेकादशावृतम् ॥१४॥ जपाल्लिंगेऽभिषेको वै शं
भोः प्रियतमो मतः ॥ वस्त्रपूतेन तोयेन अविच्छिन्नां प्रकल्पयेत् ॥१५॥ धारां वृत्तां प्रकल्प्येत शिवलिंगे द्विजोत्तमः ॥ रुद्राध्या
येणाभिषिंचेज्जपाद्प्युत्तमो भवेत् ॥१६॥ जपाद्दशगुण प्रोक्तो अभिषेको महेश्वरे ॥ चन्दनैर्बिल्वपत्रैश्च पूजयेदिन्दुशे
खरम् ॥१७॥ रुद्राध्यायादिनाम्ना च पूजयेत्परमेश्वरम् ॥ रुद्रैस्तुवीत देवेशं सांबं संसारभेषजम् ॥१८॥ स्तुत्वा रुद्रैर्महा
देवसन्निधौ गणपो भवेत् ॥ रुद्रैर्होमं प्रकुर्वीत चरुणा मधुसर्पिषा ॥१९॥ नामभिर्देवदेवस्य स्वाहांतैश्च पृथक्पृथक् ॥ गृहारि
ष्टे स्वस्य दृष्टे उत्पातक्ष्मादिकम्पने ॥२०॥ देशोपसर्गे दुर्भिक्षे राजचोराद्युपद्रवे ॥ प्रजापशुमृतौ चापि जपहोमार्चनं चरेत् ॥
634 ॥२१॥ रुद्रैर्मन्त्रैरयुतशो ध्यायन्देवं पिनाकिनम् ॥ ब्राह्मणैः शांभवैरेव भस्मरुद्राक्षधारिभिः ॥२२॥ कारयेद्विधिवद्राजा
धनाढ्यो वापि कश्चन ॥ गावो भूमिं हिरण्यादि प्रदेयाः शक्तिसारतः ॥२३॥ शांभवेभ्यः सदा रोगतापपापैः प्रमुच्यते ॥
रुद्रमन्त्रजपे योग्याः शांभवा एव केवलम् ॥२४॥ अतिरुद्रविधानं वा महारुद्रमथापि वा ॥ कुर्यात्सर्वोपसर्गेभ्यो
न भयं जायते क्वचित् ॥२५॥ घृतधारां पातयेताविच्छिन्नां रुद्रमन्त्रतः ॥ वह्नौ कुंडे शिवं ध्यात्वा शांभवाष्टोत्तरैः श
तैः ॥२६॥ एकादशानुवृत्त्यैवं मंडलं धनधान्यवान् ॥ मुक्तः शिवमयो भूयादकामः कामवान्यदि ॥२७॥ सर्वकामा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ८ नवाप्नोति वत्सरान्तेन संशयः ॥ गोष्ठे वापि नदीतीरे रुद्रक्षेत्रे शतोत्तरम् ॥ २८ ॥ जप्त्वैतत्कर्म कृत्वापि फलं विन्देद्दशोत्तर भीमा० अ०
म् ॥ क्षीराभिषेकं लिङ्गे तु रुद्रमन्त्रैः समाचरेत् ॥ २९ ॥ न भूयस्तन्यपो मातुः भविष्यति न संशयः ॥ यो रुद्रैर्वा नमस्कारं प्र अ० १२
॥ २१ ॥ दक्षिणमथापि वा ॥ ३० ॥ कुर्याच्छिवालयं शंभोः सन्निधौ स तु मुक्तिभाक् ॥ रुद्रमन्त्रैस्त्रिकालं यः स्तुवन्न
त्तिनमाचरेत् ॥ ३१ ॥ स शंभोर्गणपो भूयाद्वत्सरेण न संशयः ॥ अविमुक्ते शिवक्षेत्रे ष्वन्येष्वपि यथाबलम् ॥ ३२ ॥
रुद्रं जपन्प्रमुच्येत पापेभ्यो नात्र संशयः ॥ यो बिल्वमूले रुद्रांश्च जपेद्ध्यायेन्महेश्वरम् ॥ ३३ ॥ स कोटिरुद्रसाम्यस्य
फलं लब्ध्वा विमुच्यते ॥ जाबाला आमनंत्येव महिमा रुद्रजापिनः ॥ ३४ ॥ किं जप्येनामृतमिति रुद्रैरेवेति सा श्रुतिः ॥
यतिश्च प्रजपेन्नित्यं वनी वर्णी गृही तथा ॥ ३५ ॥ यावन्नमो नं तु यतेः अन्यत्तु गृहमेधिनः ॥ यत्र स्थितो रुद्रजापी तत्र
शंभुः स्थितः सदा ॥ ३६ ॥ तस्मै वित्तं शांभवाय दत्तं तच्चाक्षयं भवेत्सदा ॥ गां भूमिमथवा मां वा धनं धान्यं हिरण्यकम् ॥
॥ ३७ ॥ दत्वा शिवप्रसादस्य पात्रं श्रीरुद्रजापिने ॥ एकवारं जपन्रुद्रं तद्ग्रामे शान्तिमृच्छति ॥ ३८ ॥ ग्रामे अस्मिन्ननातु
रमिति मन्त्रार्थपारगः ॥ शतवारं तु नगरे पुरे युत जपाद्भवेत् ॥ ३९ ॥ तत्र स्थानां शुभं भूयाद्यत्र रुद्रजपो भवेत् ॥ कुंभं
संस्पृश्य यो रुद्रं सोदकं प्रजपन् द्विजः ॥ ४० ॥ स्नापयीत च रोगार्त्तं रोगी रोगैः प्रमुच्यते ॥ वन्ध्या कुमारं सूते चातो ॥ २१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वं प्रेमास्पदं स्थिरं ॥ ४१ ॥ एवं रहस्यमं(नं)घं शतरुद्र मन्त्र जप्याभिषेक नियमैः शिवपूजनेन ॥ तस्मै प्रसीदति सदा शशि
खंड मौलि शखंड लाजङ्घेरि वन्दित पादपद्मः ॥ ४२ ॥ रुद्राध्याय जपानुरक्त हृदयो रुद्राक्ष भस्मादरो जप्त्वावाप्य
भिषिच्य वा शशि महा चूडो रुद्रलिंगं सदा ॥ मूर्ध्नो वाप्यथ मंडितो यतिवरो भूयाच्छिवाग्रेसरो विष्णु ब्रह्म मरुद्ग
णार्चित पदो नंदीश तुल्यो गणः ॥ ४३ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे रुद्राध्याय प्रशंसा नाम
द्वादशोऽध्यायः ॥ १२ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री भीमाय नमः ॥ ॥ कश्यप उवाच ॥
श्री बिल्वाराधनस्यापि महिमानं ते वदाम्यहम् ॥ शृणुष्व सावधानेन प्रसाद प्रदमीशितुः ॥ १ ॥ बिल्वः पूर्वं शिवेनैव
७३ मनसा कल्पितस्तरुः ॥ संसारसागरोत्तार हेतवे पत्र पूजनैः ॥ २ ॥ पापताप विनाशाय कैलासाचलतो हरः समानीयाथ
भूभागे स्थापयामास लीलया ॥ ३ ॥ तमाह गौरी विनया च्छशि शेखरमीश्वरम् ॥ ॥ श्री गौरी उवाच ॥ ॥ आनी
तोयं तरुः शंभो भूभागे केन हेतुना ॥ तवप्रियकरो नित्यं कैलासे पर्वतोत्तमे ॥ ४ ॥ रत्नालवाल मध्यस्थो तन्मूलेषु स्थि
तं त्वया ॥ यथा मयि तथा प्रीतिः बिल्वेऽस्मिन् तव शंकर ॥ ५ ॥ सर्वदा सर्व कालेषु मया संपूजितो भवान् ॥ कैलास मौलि
लिंगेषु कैलासाख्येषु शंकर ॥ ६ ॥ एतत्पत्रैर्महादेवं कोमलारक्तजैर्दलैः ॥ सर्वेषां सुलभः केन हेतुना क्रियते तरुः ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 श्रीस्कंद उवाच ॥ ॥ इत्थं देव्यावचः श्रुत्वा स गौरीरमणो हरः ॥ उवाच सर्वहितकृद्देव्या पद्माननं प्रियम् ॥ 
॥२२॥ ॥८॥ अक्षैर्वीक्ष्याथ तामाह संफुल्लमुखपंकजः ॥ ॥ श्रीईश्वर उवाच ॥ ॥ धन्ये मान्ये त्वया पृष्टं मम मन्ये मनोरथ अ॰१३॥
म् ॥ तच्छृणुष्व महादेवि रहस्यमिदमद्भुतम् ॥ ९ ॥ गोप्यं हृद्यं ममेदं हि न प्रकाश्यमिदं त्वया ॥ ममनेत्रसमुद्भूता
५३ मार्तण्डविक्रमः ॥ १० ॥ सर्वेषां तेजसां राशिरीशानात्मकस्ववसः ॥ स चतुर्दशलोकोत्थतमोनाशाय कल्पितः ॥
॥ ११ ॥ चन्द्रोप्यौषधिराट् ज्ञातो मम सव्यारुनेत्रकः ॥ अतिपाल तत्तेभूतनयनो लोकदाहकृत ॥ १२ ॥ तनु पापविना
शाय कल्पितः कश्चनामरः ॥ तदर्थं चिंतयित्वाहमसृक्षं बिल्वमेव हि ॥ १३ ॥ मम प्रियकरो नित्यं तरुराजो यमीश्वरि ॥ यथा
त्वयि सदा प्रीति बिल्वेप्यस्मिन्सदा मम ॥ १४ ॥ मद्रूपो वृक्षराजोऽयं वृक्षाणां पतिरस्म्यहम् ॥ रुद्रगीतो हमीशेति पापभेदाय
सृष्टवान् ॥ १५ ॥ बह्वृचब्राह्मणेनोक्तो ज्योतिर्बिल्वेऽतिपावीति ॥ यतो मदक्षसंभूत आदित्यस्समजायत ॥ १६ ॥ बिल्वो
ममाक्षसंभूत उभयोर्जनकस्त्वहम् ॥ सोमोऽहमेव जनकः सर्वेषां श्रुतिचोदितः ॥ १७ ॥ ब्रह्मणो जनकश्चाहं विष्णोरिन्द्र
स्य पार्वति ॥ पवतो जनिता चाहं द्यावापृथ्व्योरहमेव हि ॥ १८ ॥ मत्तो यतो भवन्बिल्व आदित्योपि महेश्वरि ॥ वेदेऽपि यजु
र्भागे प्रोक्तो आदित्यसोदरः ॥ १९ ॥ तमोनाशाय सृष्टोऽयं मादित्यस्तपतां वरः ॥ पापनाशाय सृष्टोऽयं बिल्वो भूतलमाश्रि
तः ॥ २० ॥ ॥२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पापानां पापिनां चापि दर्शनार्चनतः स्वयम् ॥ पापं हरति वृक्षोऽसौ दर्शनस्पर्शनार्चनैः ॥ २१ ॥ त्रिदलं बिल्वपत्रं च त्रि
गुणात्मकमेव हि ॥ ब्रह्मा विष्णुश्च रुद्रश्च वृक्षपत्रक्रमेस्थिताः ॥ २२ ॥ तस्मादयं वृक्षराजो मत्प्रियः पापनाशकः ॥ सर्वेषां
सर्व पापानि नाशयत्येव कृत्स्नशः ॥ २३ ॥ तृष्णा तमो गुणं कृत्स्नं नाशयेद्दिवि संस्थितः ॥ तथा भूमिगतो बिल्वो पापना शाय
शंकरि ॥ २४ ॥ लोकानां पापनाशार्थं समानीतो मयाम्बिके ॥ कैलासमौलितो बिल्वः पत्रेणार्चंतु मां जनाः ॥ २५ ॥ इत्ये
वं कृपया पापान्दृष्ट्वा नरकदुःखितान् ॥ ससुरान्मानवांश्चापि मुनीनपि महेश्वरि ॥ २६ ॥ लोकपापानुतापेन समानो
तो भुवं प्रियम् ॥ अर्चन्ति मां सुकृतिनो बिल्वपत्रैः त्रिशाखकैः ॥ २७ ॥ कोमलारक्तकैर्वापि शुष्कैः पर्युषितैरपि ॥ तेन मु
636 क्तिं प्रयांत्येते बिल्वैर्लिंगार्चनेन मे ॥ २८ ॥ बिल्वपत्रार्चनाभावे मम पूजैव निष्फला ॥ सर्वोपचार कृपयापि बिल्वपत्रवि
वर्जिता ॥ २९ ॥ तस्माद्बिल्वार्चनेनैव सर्वेषां मुक्तिदो ह्यहम् ॥ धन्यः पूजयते बिल्वैर्धन्यो मामभिवीक्षति ॥ ३० ॥ ना
धन्यः कोऽपि विना मां हि पूजने तस्य का कथा ॥ ३१ ॥ यो बिल्वपत्रं संगृह्य रक्षति प्रीतिमानसः ॥ ३१ ॥ मत्पूजार्थं महादेवि शु
ष्कं पर्युषितं तु वा ॥ त्रिपत्रमेकपत्रं वा पातयेल्लिंगमस्तके ॥ ३२ ॥ तेन स्ववंशकाः सर्वे मदग्रे क्रीडते गणः ॥ एकेना
पि च बिल्वेन सकृत्संपूजयेत्तु मां ॥ ३३ ॥ समुक्तो मोचयेदन्यानिति विद्धि महेश्वरि ॥ सर्वपुष्पातिप्रियतरं पत्रैर्वा परमेश्वरि ॥ ३४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह-८ बिल्वपत्रैस्सदा देवि यथा प्रियतरो गुहः ॥ तथा बिल्वार्चनेनैव सर्वेषां मुक्तिदास्म्यहम् ॥ ३५ ॥ कृतानन्त महापापो प्यना भीमाख्ये
यासेन मुच्यते ॥ बिल्वपत्रैश्च संपूज्य मल्लिंगमभिषीक्ष्यते ॥ ३६ ॥ प्रातः संगव माध्याह्ने सायं चापि प्रदोषके ॥ अ.अ.
॥२३॥ सोमवारे चतुर्दश्यां पर्वस्वपि विशेषतः ॥ ३७ ॥ बिल्वपत्रैः समभ्यर्च्य सर्वां सिद्धिं लभेन्नरः ॥ मम प्रियतरो भूयान्म ॥१३॥
त्प्रसादं च विंदति ॥ ३८ ॥ सुवृत्तो वापि दुर्वृत्तो बिल्वैरभ्यर्च्य मां शिवे ॥ स सर्वपूज्यो भवति स तपस्वी मुनिः स्वयम् ॥
॥ ३९ ॥ सर्वतीर्थेषु स स्नातः सर्वयज्ञेषु दीक्षितः ॥ स च सर्वमहानन्दकृत्तमो हृत्तमो मम ॥ ४० ॥ यो बिल्वपत्र
शतकैः सहस्रैरपि लक्षकैः ॥ कोटिभिर्बिल्वपत्राणां समर्चनकरो भवेत् ॥ ४१ ॥ स एव धन्यो मान्यो मे गणेन्द्रो
दि रजताचले ॥ यो बिल्वं पोषयेद्भक्त्या जलदानादिभिः शिवे ॥ ४२ ॥ स च वंशयुतो देवि मदग्रगणपो भवेत् ॥ बिल्वप
त्रैर्बिल्वमूले लिंगमभ्यर्चितं मम ॥ ४३ ॥ तेन त्रैलोक्यलिंगानि पूजितानि न संशयः ॥ ये बिल्ववनकर्तारो बिल्व
वन्दनतत्पराः ॥ ४४ ॥ बिल्वालिंगनसंसक्ताः बिल्वदर्शनतत्पराः ॥ प्रातरुत्थाय यो बिल्वं प्रयाति प्रीतिपूर्वकम् ॥ ४५ ॥
स कृतानन्तपापोऽपि मुच्यते सोऽपि मुक्तिगः ॥ भस्म धृत्वैव बिल्वानां सर्वमेवं समाचरेत् ॥ ४६ ॥ बिल्वयुतं वनं
धन्यं तत्संगावृक्षजातयः ॥ वल्लिगुल्मादयः सर्वे मम लोके वसन्त्यपि ॥ ४७ ॥ स्थावरत्वं परित्यज्य भवन्ति गणो ॥२३॥
पोत्तमाः ॥

बिल्वस्यैवानुषंगेण शांभवस्यांगसंगवत् ॥ ४८ ॥ बिल्वपत्रार्चनकरौ धन्यौ कंटकनुन्नकौ ॥ शं
खचक्रादिचिह्नैस्ते भवन्ति पृथिवीभुजः ॥ ४९ ॥ बिल्वमूले प्रजप्तोयो मन्त्रः कोटिगुणो भवेत् ॥
शांभवं भोजयेद्वापि बिल्वमूले विशेषतः ॥ ५० ॥ स दरिद्रोऽपि संपन्नो भवत्येव न संशयः ॥ पादौ प्रक्षा
ल्य नत्वाथ भस्मधारणपूर्वकम् ॥ ५१ ॥ मन्त्रमेनं समुच्चार्य बिल्ववृक्षं समारुहेत् ॥ नमस्ते बिल्ववृक्षाय
नवारुणदलाय च ॥ ५२ ॥ पत्रं ते शिवपूजार्थं गृह्णाम्यद्य क्षमस्व मे ॥ इति प्रार्थ्य महावृक्षं गृह्णीयात्पत्र
मेव हि ॥ उत्तराग्रेण पत्रेण पूजनीयोऽहमेव हि ॥ ५३ ॥ किं पुनर्बहुनोक्तेन बिल्वपत्रं मम प्रियम् ॥ ॥ श्रीस्कं
द उवाच ॥ ॥ इत्युक्त्वा गिरिराजराजतनयामालिंग्य मोदान्वितः कैलासे वरबिल्वमुलनिलये शांगे
637 हि लिंगे मुदा ॥ तत्पत्रैः कुसुमैस्तदीयमगजाकान्तोऽभिजिघ्रंस्थितो बिल्वार्चाफलमेतदेव भगवान् जाना
त्यसौ शंकरः ॥ ५४ ॥ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे बिल्ववृक्षमहिमा नाम त्रयोदशोऽध्या
यः ॥ १३ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ काश्यप उवाच ॥ ॥
शिवप्रसादपात्रं श्रीशांभवः केवलं भवेत् ॥ शांभवाः शंभुभक्ता ये भस्मरुद्राक्षधारिणः ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्चका:

शिवरह. ५ शिवलिंगार्चि[?]का शैवा: शिवैकपरदेवता: ॥ शिवलिंगैकशरणा आमरणे ऽपि प्रतिक्षणम् ॥ २॥ नान्यसुरार्चनरता शां भीमा अ-
भवा एकेवलम् ॥ शिवैकशरणा एव मनो वाक्कायकर्मभि: ॥ ३॥ शांभवा न विधातारं न विष्णुं नामरान्परान् ॥ मनसा अ. १४
॥२५॥ पिन मन्यन्ते, मन्वते तृणतुल्यतां ॥ ४ शिवभक्तिसमापन्ना संपन्ना एव ते सदा ॥ दुर्लभा शांभवी भक्ति: प्रसादादेव सा भवेत् ॥
॥ ५॥ प्रसाद: शांकर: श्रेष्ठो भविष्यति शिवाज्ञया ॥ भावानां भावनां दृष्ट्वा भव: प्रीतो भविष्यति ॥ ६ ॥ नाभावो विद्य
ते तस्य सदा संसारवर्तिन: ॥ संसारोत्तारका एव शांभवा: शंकराज्ञया ॥ ७॥ विष्णुब्रह्मादयो देवा मुनयो मानवास्त
था ॥ असुरा: किन्नरा वापि सुधाकरधरार्चका: ॥ ८ ॥ ते सर्वे शांभवा एव भस्मरुद्राक्षधारिण: ॥ शिवैकपरदेवास्ति
ते सर्वे शिवचेतस: ॥ ९ ॥ शिवप्रणामपरमा भक्तामुक्तिपथस्थिता: ॥ पंचाक्षरपरा एव श्रीरुद्राध्यायजापका: ॥ १० ॥ शिव
लिंगार्चका: शैवा: सततं भवपूजका: ॥ भावेन भगवत्प्रीता: भवो द्रुवपदार्चका: ॥ ११ ॥ भगवानेक एवेति ये विज्ञायार्च
यन्ति ते ॥ त्रिपुण्ड्रभस्मनिटिला: सदा कौटिल्यवर्जिता: ॥ १२ ॥ निटिलानलपूजेक परा मुक्तिं व्रजन्ति ते ॥ शर्वाराध
नतो हारा: विष्णुब्रह्मादिपूजिता: ॥ १३ ॥ शिवमेकं यजन्त्येव लिंगे बिल्वादिपल्लवै: ॥ अभिषिच्य सदा नीरै: प्रा
त: सायं विशेषत: ॥ १४ ॥ प्रदोषे सोमवारे च चतुर्दश्यष्टमीषु च ॥ नक्तं नैवेद्यभोक्तारो नियमाच्छंकरार्चका: ॥ १५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हा नित्यप्रदोषनिरता यता ह्यः शिवार्चकाः॥ भक्ताः शैवा द्विजा एव मन्ये वर्णा अपि क्रमात्॥१६॥ स्त्रियो वासं करा वापि
पूज्यलिंगं पिनाकिनः॥ शांकरा एव ते सर्वे शिवलिंगार्चनोद्यताः॥१७॥ पंचास्यलिंगं पंचास्यध्यानपूर्वं यजंति ते॥
बिल्वांबुजैः समभ्यर्च्य प्रातः सायं विशेषतः॥१८॥ हारादीरितपापौघा अमोघाः शंकरार्चकाः॥ पंचाक्षरेण ये लिंगं
विल्वैरभ्यर्च्य शूलिनः॥१९॥ पंचत्वं प्राप्नुयाज्जातु पंच पापैः प्रमुच्यते॥ शांभवा एव संपूज्याः शिवार्चनपरायणाः॥
अनभ्यर्च्य महादेवं मरणेऽपि प्रतिक्षणम्॥ नान्नं फलं वा गृह्णन्ति नियतामितभाषिणः॥२१॥ त एव शांभवा ज्ञे
याः शिवलिंगैकपूजकाः॥ तदंगसंगतः सद्यः पापभंगः प्रजायते॥२२॥ मातंगकृत्तिवसनपादपूजाप्रभावतः॥
630 तेषु दत्तं तथा शंभुः स्वयं गृह्णाति शंकरः॥२३॥ शिवक्षेत्रे भोजनीयाः पूज्याश्च शिवयोगिनः॥ अन्यवर्णे
ष्वपि च ये भस्मरु[illegible]द्राक्षधारिणः॥२४॥ शिवलिंगासक्तकंठा नीलकंठपदार्चकाः॥ अविमुक्ते च केदा
रे रुद्रकोटौ मेरेश्वरे॥२५॥ भृगुतुंगे नर्मदायामोंकारे च प्रभासके॥ पुष्करे नैमिषारण्ये महाकाले त्रियंबके॥२६॥
गोकर्णे च कुरुक्षेत्रे श्रीशैले पुंडरीकके॥ दाक्षिणे तत्र कैलासे वृंदा[illegible]दावरुणाचले॥२७॥ गोपर्वते सह्यमू
ले श्रीकंठे रत्नपर्वते॥ श्रीमातृ[illegible]शिखरे चैव गजारण्येऽथ जप्यके॥२८॥ कुंभघोणेऽर्जुने चैव माधूरेश्वरकानने॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवर०८ कमलालयसंज्ञे च वेदारण्ये चसेतुके ॥२९॥ह्लास्यैवेणुविपिने ताम्रपर्ण्यास्तटद्वये ॥सह्यापगारोधसि च क्षेत्र भीमा॰अ॰
निष्ठाश्च शांभवाः ॥३०॥ पूजनीयाः प्रयत्नेन शिवप्रीत्यर्थमेव हि ॥ यत्र भुङ्क्ते शांभवस्तु शिवो भुङ्क्ते च तत्र हि ॥३१॥ अ॰१४॥
॥२५॥ पूज्याः सदा दानमानैस्तेन प्रीतो भवेच्छिवः ॥ शिवभक्ता महोत्साहाः शिवार्चनपरायणाः ॥३२॥ शान्ता दान्ता जितक्रो
धाः शिवनामजपादराः ॥ भस्मरुद्राक्षसंपन्नाः शिवोत्कर्षार्थवादिनः ॥३३॥ वादिनः कालतत्त्वस्य शिवक्षे
त्रनिवासिनः ॥ अन्यक्षेत्रप्रत्यभिज्ञारहिता भूतिभूषिताः ॥३४॥ शिवमेव यजन्त्येव सर्वकालेषु सादरम् ॥ त एव वै
दिका ज्ञेया श्रौतपुंड्रादिधारिणः ॥३५॥ श्रौतलिंगमिदं प्रोक्तं भस्मरुद्राक्षधारणम् ॥ रुद्राध्यायजपं श्रौतं श्रौतः पं
चाक्षरीजपः ॥३६॥ रुद्रलिंगार्चनं श्रौतं श्रौतं शिवजपस्मृतिः ॥ श्रौतधर्मार्थनिरताः शांभवा एव केवलम् ॥३७॥
अश्रौतमूर्ध्वपुंड्रं स्यान्न तद्धार्यं शिवार्चकैः ॥ नान्यक्षेत्रे वसेन्नित्यं शांभवः शंभुतत्परः ॥ ३८॥ नान्यं सुरं वापि
नरं किंनरं वा यजेत्स हि ॥ ॥सूत उवाच ॥ ॥एवं ये शिव[illegible] भक्तिभावनिरतास्ते शांभवाः केवलं
दारोदारकुमारवृन्दसहिताः श्रीशंकरार्चारताः ॥ मायापारशराभिघातरहिताः वेदान्तसारादराः घोरापार
महान्धसंसृतिभरमहारास्त्यजंत्येव ते ॥३९॥ अन्ये भूभाररूपाः शिवपदकमलध्यानहीना नमान्याः ॥२५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सामान्याः शिवमन्युदग्धवपुषो जाराः परजाराद्भवाः ॥ वीरावाप्यसुरासुरा नरवरास्ते वा नराः पामराः माराराति
पदांबुजोज्झितमनास्तमाः सपापा हि ते ॥ ४०॥ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे चतुर्दशोऽध्यायः॥
॥१४॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ कश्यप उवाच ॥ ॥
शांकरा एव देवेशं स्तुवन्ति भवभाविताः ॥ भावनामात्रसुलभो दुर्लभो ह्यकृतात्मनाम् ॥१॥ शिव एव हि सर्वेषां
शासकस्तारकः सताम ॥ स एव भक्तिभावेन पूजितो भुक्तिमुक्तिदः ॥२॥ शिवनैवेद्यपुष्टांगाः संतुष्टा ज्येष्ठ
पूजकाः ॥ निष्ठावन्तः कृपावन्तः शिपिविष्टपदाश्रयाः ॥३॥ तुष्टाः पुष्टाः सदा भक्तास्ते जिष्टाः शिवपूज
काः ॥ स्तुवन्ति स्तोत्रवर्यैर्न नृत्यन्तीशाग्रतो मुदा ॥४॥ भस्मरुद्राक्षकवचा जटामुकुटभूषणाः ॥ रुद्राक्षव
637 रकोटीरा रुद्राक्षांगदकंकणाः ॥५॥ साश्रुनेत्राः स्खलज्जिह्वास्ते नृत्यन्ति शिवाग्रतः ॥ सोत्साहक
रतालैश्च शांभवा लिंगपूजकाः ॥६॥ शिवलिंगप्रभासन्नाः कृपापांगावलोककाः ॥ अनंगवरमा
तङ्गभङ्गसाङ्गान्तरंगकाः ॥७॥ नृत्यन्ति शांभवा एवं तत्स्तुतिं शृणु सादरम् ॥ एवं स्तुवन्ति यं शंभुं शांभ
वाग्रसरा हि ते ॥८॥ सर्वदा वा प्रदोषे वा सायं प्रातः पराह्णके ॥ त एव सर्वभाग्यानामाकराः शांकरा हि ते ॥९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ८ हे गौरी रमणारुणाचलपते तूर्णं ममाभ्यर्णगं मृत्युं वारयतारयाशु दुरितात्संपूर्णदृक्संगतः ॥ घोरापारभवार्णवाज्जनिजरारोगा भीमाः अ०
॥ २६ ॥ नुतापैरपि शंभो मे मरणक्षणेऽपि शरणं यत्पंकजावेक्षणम् ॥ १० ॥ दिव्यश्रीचरणांबुजं हृदिसरोजीवाच्चनापैतु त्वं हे गौरी कुचचा अ०१५
रुशैलशिखरा पारादरस्वान्तर ॥ मारोद्दामसुदर्पसर्पकुहरापार व्यथां संहर हे काकोदरभूष भूतिदमहो धृक् धुर्य बाणासन ॥
मध्यत्सागरसंभवोत्तमगर श्रीनीलकण्ठ प्रभो पाहीशान दयानिधान भगवन् कारुण्यतो मां सदा ॥ हे चन्द्रद्युति कोटि रंजि
तजटा कोटीरजूटीलद्देव श्रीतटिनी तटोत्तमपटो भूतेभ च र्मांबर ॥ १२ ॥ हे काद्व्य प्रभुवर्य घोटकमहावेदोक्त हेषास्तुति
गुद्व्योद्दिक्तटसंभ्रमोरुनटना पाटीरपंकांकित ॥ पाहीन्द्रस्तुत कोटिकोटसहस्रं मामीश सर्वेश्वर हे शूलोद्यत हस्त मस्त
कलसच्चन्द्रोरुगंगाधर ॥ १३ ॥ स्वामिन्देव किरीटकोटि विलसत्पादांबुजा बाधमां मुक्ताशस्तसमस्त भीतिदमहा
कोलोरुदंष्ट्राधर ॥ वित्रस्ताखिललोकरक्षकमहाशास्त्राःपितः पाहि मां हे गंगांबुतरंगसंगसुमहा मन्दांग लिंगान्तर ॥
पापेभ्यस्सुपतंग दिव्योत्तमांगप्रभो ॥ १४ ॥ माता पोत मिवाव भूति विलसत्सर्वांगरागाव मां दिव्योत्तुंग भुजंगसंगसुमहा
नन्दांग लिंगान्तर ॥ पापेभ्यस्सुपतंगजानेन करुणादृक्संगतः पाहि मां हे फालाक्ष महेशरक्षकरुणामूर्ते ध्वराध्यक्ष
माम् ॥ वीक्षाशिक्षितमन्मथांगसुमहादक्षोरुशिक्षाकर तत्पक्षानार देवलोक्षकदन ध्वंसीकृताघोऽसज ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाह्युक्षेश वराश्रय त्रिभुवनाध्यक्ष प्रभो पाहि मां त्र्यक्षापार दयाघनांतर दृशा संवीक्ष्य मां सर्वदा ॥ १६ ॥ हे शंभो

पम सुन्दरोरु सुजटा साम्राज्य निर्धारक प्राज्याज्य प्लुत बीह्व नक्र हे वन प्राचुर्य राज्य प्रद ॥ भैषज्योत्तम देव देव सुमहा

पापान्विते मय्यपि हृत्तापन दिवानिशं प्रदहते शंभोऽनुकंपां कुरु ॥ १७ ॥ हे कालान्तक शान्तिदान्ति निरत स्वांतांतरंग स्थित मत्तानन्त जगत्सुरान्तर सुहृत्संसार तांतं हि माम् ॥ भ्रान्तं भीतमशान्त बुद्धिमनिशं कामान्तरंगे सदा मां र

क्षासुदयारसोत्तर मुमाकान्त प्रभो शंकर ॥ १८ ॥ हे शंकर स्मरहरान्धक कालशत्रो संसार रोग हर वैद्य सुरोत्तमाद्य ॥ पाह्य

6 ५०

द्य श्रुति शिरस्तुत पादगद्य पद्यस्तुत प्रकटितं सुगतं र भेद्य ॥ १९ ॥ विद्युत्सुचंचल त्वलन्नर देह मेतल्लब्ध्वापि ते पदयुगं न

भजामि मुग्धः ॥ हे व्याल मालगरशोभित कंठमूल दिव्य त्रिशूल कर कालन कल्पादि लोल ॥ २० ॥ कोलाहल ध्वनि

करोत्तम फालमूल ज्वालानलायित पुरत्रय तूल शंभो ॥ पाहीन्दु धाम सुलल्लामजलोत्तमांग मालायिताब्जज कपाल त

१४ ४

प्रपद द्विजबालपाल ॥

लात्तु स्य ॥ २१ ॥ पाताल जाल ॥ हे विघ्न बाधक विश्व वन्द्य चरित तामेव मयप्रध्वंसक कायापाय मपाकुरुष्व भगवन् मा

यान्धकारं हर ॥ मे यन्ते पद पंकजं प्रति भवे ध्येवं मुहुः सिध्यतां हे याभ विषया भवन्तु नियतं हेयं न ते पूजनम् ॥ २२ ॥

जि दि

जा मीनध्वजाम्बु परं परिखिन्न चित्तं हृत्तापचित्त मथ वित्तगणार्जनेन ॥ पित्तोल्बणेन सततं भ्रमतं तरंगमाशाश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ८ माय भगवन् करुणां कुरुष्व ॥ २३ ॥ सौवर्णवर्णसदृशोत्तमकर्णिकारमन्दारकुंदकरवीरसदंबुजार्च्ये ॥ बिल्वोत्तमांगसुकदंबक भीमाख्ये अ० अ० १२
२७ चंपकादिदूर्वार्च्य शंकर विभो परिपाहि दीनम् ॥ २४ ॥ हे विश्वनाथ मथितान्तकमन्मथांग गौरीसनाथ मम नाथ सुरप्रमाथ ॥ मार
॥२८॥ क्षशंकर अनाथजनं प्रमाथ नाथाधुना ध्वनि कृते वरमन्धनाथ ॥ २५ ॥ हे विश्वाधिक विश्ववंद्यचरितास्तेया व्यये शप्रभो भोगि
त्रिपुरान्धकान्तक महाकामेश कामापह ॥ मत्कामं परिपूरयाशु भगवन् शंभो प्रसीदाधुना इत्येवं परिनृत्यति प्रतिदिनं शंभो मुदे शंकरः ॥
॥ २६ ॥ एवंस्तव्यमुमाधवं वररमानाथाक्षिपादांबुजं विश्वाधीश्वरमिन्दुकुन्दधवलं स्वार्धांग गौरीसखम् ॥ हारः शंकरमंबिकासहचरं देवं
क्षयद्धोकंपारावार महाघसागर महोसंसनरेत्तत्क्षणात् ॥ २७ ॥ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे पञ्चदशोऽध्यायः ॥ १५ ॥
॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ भीमाय नमः ॥ ॥ कश्यप उवाच ॥ ॥ ये स्तुवन्ति महादेवं ते वै हाराः प्रकीर्तिताः ॥ येऽर्चयन्ति म
हादेवं ते वै शांभवसत्तमाः ॥ १ ॥ ये ध्यायन्ति महेशान चरणांबुजमुत्तमम् ॥ शंभोर्विहारसदना मदनान्तकस्य च ॥ २ ॥ ये वै क्षेत्रेषु निरताः विर
तान्यत्र वस्तुषु ॥ आनन्दवनवासेन सर्वदानन्दमेदुराः ॥ ३ ॥ शिवलिंगार्चने कार्ये वै ते वै शांगाः प्रकीर्तिताः ॥ ये वै नैवेद्यभोक्तारस्ते वै भावाः
प्रकीर्तिताः ॥ ४ ॥ ये नामनिरताः शंभोः अन्यनामपराङ्मुखाः ॥ ते वै मोहश्वराः प्रोक्ताः पात्रभूताश्च हारिणः ॥ ५ ॥ शिवभक्तार्चने कार्ये वै धन
धान्यादिभिर्मुदा ॥ शांकरास्ते सदा ज्ञेया दृष्टाः स्पृष्टाः प्रसादिनः ॥ ६ ॥ ये भस्मोद्धूलननिरतास्ते वै शैवाः प्रकीर्तिताः ॥ अग्निरित्यादिभि ॥२७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्त्रैः सर्वदा ये नग्नंमुदा ॥ ७॥ दग्धपापास्त एवेति विज्ञेयाः शांभवोत्तमाः ॥ त्रियायुषत्रिपुण्ड्रैश्च तथा त्र्यंबककैरपि ॥
॥ ८॥ त्रिपुण्ड्रधारिणः सर्वे ते रुद्रा नात्र संशयः ॥ अघोरमन्त्रतो एवं सदा रुद्राक्षधारिणः ॥ ९॥ कण्ठकर्णगलाद्यंग
बाहुमस्तककेष्वपि ॥ ते शांभवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ॥ १०॥ नैवेद्यं य शिवे दद्युः भुञ्जुर्वा शंकरार्पितम् ॥ ते
शांभवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ॥ ११॥ ये धारयन्ति चिह्नानि देवदेवस्य शूलिनः ॥ ते शांभवाः सदा ज्ञेयाः शिवस्यै
व प्रसादिनः ॥ १२॥ ये धारयन्ति रुद्राक्षान् सदा वै शांकरोत्तमाः ॥ ते शांभवा० ॥ १३॥ ये रुद्राध्यायजाप्येन जपन्ति
शिवतुष्टये ॥ ते शांभवा० ॥ १४॥ ये रुद्रैश्चमकैर्नित्यमभिषेक्ष्यन्ति शंकरम् ॥ ते शांभवा० ॥ १५॥ ये वै पंचाक्षरासक्ता
641 स्तेनेशं पूजयन्ति ये ॥ ते शांभवा० ॥ १६॥ ये वै बिल्वार्चनप्रीता ये वै बिल्वार्चनप्रियाः ॥ ते शांभवा महादेवप्रिया नास्त्य
त्र संशयः ॥ १७॥ बिल्वपत्रार्चका ये वै त्रिकालं लिंगमस्तके ॥ ते शांभ० ॥ १८॥ ये लिंगाराधनव्यग्रा अगत्यमुग्राचि
नेरताः ॥ ते शांभवा० ॥ १९॥ ये पंचगव्यैर्नियतं त्रिकालमभिषेचकाः ॥ ते शांभवाः ॥ २०॥ फलजालरसैः शंभोरभिषेचक
रताः सदा ॥ ते शांभवा० ॥ २१॥ पाटीरागरुकस्तूरीचन्द्रचन्दनलेपकाः ॥ ते शांभवा ॥ २२॥ शंभोर्लिंगे सदा तुंगे असंगाः शंग
तत्पराः ॥ ते शांभवा० ॥ २३॥ बिल्वपत्राम्बुजवरैः करवीरार्कचंपकैः ॥ मन्दारपारिजातोत्थमालापुष्पप्रदा हि ये ॥ २४॥ शंभो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ८ लिंगे विशेषेण त्रिकालंच प्रदोषके ॥ तेशांभवा० ॥२५॥ दिव्यवस्त्रप्रदातारो महेशायसदामुदा ॥ तेशांभवा० ॥ २६॥ ये शंभो रत्न पुष्पादि प्रस्तारे विशेषतः ॥ ते शांभ० ॥२७॥ सुवर्ण रत्न पुष्पाद्यैर्बिल्वपत्रार्चकाहि ये ॥ तेशां० ॥ २८ ॥ येकृ
॥२८॥ ष्णागरु साम्राणि गुग्गुलधूपदायिनः ॥ ते शां० ॥२९ ॥ घृततैलमहादीपदायिनः शिवालये ॥ ते शां० ॥ ३०॥ येनैवेद्य प्रदातारो भक्ष्य भोज्यादिभिर्मुने ॥ तेशांभवा० ॥ ३१ ॥ येतांबूलप्रदातारः अहर्निशमुमापतेः ॥ तेशां० ॥ ३२॥ छत्रवृंदप्रदातारः स वंदा शिव मस्तके ॥ ते शांभवा० ॥ ३३॥ येवैचामर दातारो हंस पाण्डुरमुत्तमम् ॥ तेशांभवा० ॥ ३४॥ ये पताक प्रदातारः सर्वदायेशिवाग्रतः ॥ तेशांभवा० ॥ ३५॥ येच दर्पण दातारो महादेवाग्रतः सदा ॥ ते शांभवा० ॥ ३६॥ येमृदंग महावीणा दुन्दुभीवादनेरताः ॥ ते शांभवा० ॥ ३७॥ तौर्यत्रिकादिकर्त्तारो नृत्यस्त्रीणां प्रदायकाः ॥ ते शांभवा० ॥ ३८ ॥ येशिवालयकर्त्तारः प्राकारवरगोपुरम् ॥ ते शांभवा महादेव प्रियानास्त्यत्र संशयः ॥ ३९ ॥ येशिवारामकर्त्तारः सर्वपुष्पोपशोभितम् ॥ ते शांभवा ॥ ४० ॥ येरथोत्सवकर्त्तारो बृषवाहनमुत्तमम् ॥ तेशांभवा० ॥ ४१॥ येशांभवेभ्योन्नदातारो यतीनामपिभावतः ॥ तेशांभवा ॥ ४२॥ शांभवानां विशेषेण तेवै शांभवसत्तमाः ॥ ये प्रदोषार्चनेरताः सर्वपूजाभरैः शिवे ॥ तेशां भवा० ॥ ४३॥ येसोमवासरे सायं शिवालिंगार्चनेरताः ॥ ते शांभवा महादेव प्रियानास्त्यत्र संशयः ॥ ४४॥ येऽष्टम्यामष्टमूर्तिम्

भीमा० अ० अ० १६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ये पूजयिष्यन्ति भक्तितः ॥ ते शांभवाः ॥ ४५ ॥ ये भूतायां (भूत) नाथमर्चयन्ति दृढव्रताः ॥ ते शांभवाः ॥ ४६ ॥ ये पर्वस्वपि चाप्यर्च्य (प्यप्यर्चयंति)
शर्वरी नाथ धारिणम् ॥ ते शांभवाः ॥ ४७ ॥ ये नामनिरताः शंभोः सर्वदा स्वैनाऽवलाः ॥ ते शांभवाः ॥ ४८ ॥ ये भक्त्यार्चनतस्तुष्टास
वे वर्णेष्वपि ध्रुवम् ॥ महेशस्य विशेषेण शांभवाग्रेसरा हिते ॥ ४९ ॥ येऽर्चयन्ति महादेवं त्रिवारं भस्मधारिणः ॥ ते शांभवाः ॥
॥ ५० ॥ ये क्षेत्रनिरताः शम्भो विरता विषयेष्वपि ॥ ते शांभवाः ॥ ५१ ॥ येऽथर्वणशिखा जप्य निरता वेदपारगाः ॥ ते शांभवाः ॥ ५२ ॥ ये
तद्ध्यापननिरताः सदा पंचाक्षरादराः ॥ ते शांभवाः ॥ ५३ ॥ एवं शांभवसत्तमाः शिवमहाचारानुरागादरा दारोदार कुमार मारऽ
रज व्यापार संहारकाः ॥ पारावार विकार संसृति भरं तेनानुवन्ति ध्रुवं हाराः शंकर पाद पद्म निरता विश्वेश्वरस्यार्चकाः ॥ ५४ ॥
64-2 ये शांभवाः शशिकला शंकलोत्तमांग लिंगोत्तमांग नव चन्दन बिल्वपत्रैः ॥ संपूजयन्ति कलिपाप मतंग भंगाः शांगास्त्वसंग हृ
दया शिवलिंग संगाः ॥ ५५ ॥ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे षोडशोऽध्यायः ॥ १६ ॥ श्री काशी विश्वेश्वरा
र्पणमस्तु ॥ भीमायनमः ॥ ॥ श्री मुनिरुवाच (कश्यप उवाच) ॥ ॥ भस्मत्रिपुण्ड्र परि चिह्नित सर्व गात्रा रुद्राक्ष नेत्र पदभावन सर्वभि
न्नाः ॥ विध्वस्त पातक वरावर पंचवक्त्रास्ते शांभवा भुवनमाशु पवित्रयन्ति ॥ १ ॥ रुद्राक्षवक्षोरु महत्स्थिरांग कंठोरुबाहु परि चिह्नि
त सर्वगात्राः ॥ सुत्रामवंदित पदावर सत्ववर्यं पुण्याधिकाः किल महोन्नतशांकरास्ते ॥ २ ॥ पंचाक्षरा (सक्त) हृदयाः सदयाः सदैव मोदाय सर्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहु॰८ तनुषु प्रथितानमदायतेऽपि ॥ वोधाय सर्वजगतां तदुमासहाय पादारविंद भजकाय हितायतेऽपि ॥ ३ ॥ रुद्राध्यायजपेषुस भीमा॰अ॰
क्तहृदया विश्वाकृति ध्यायिनः शंभो सर्वजगत्पतितत्व गुणतो मन्त्रार्थसारादरा: ॥ येयौवनोन्नत मदेऽपि सदैव शंभु पादारविन्द अ॰१७
॥२९॥ भजनाय मुदा प्रवृत्ताः ॥ ४ ॥ मारोद्दामविकार पूरित हृदोप्युज्झित्यतत्पातकं हेयापाय निकाय कायमोपितेन प्राप्नुवन्ति ध्रुव
म् ॥ येशांगलिंग कृतसंगमहोत्तमांग गंगातरंग शशितुंग कृतांगभंगम् ॥ ५ ॥ मातंगवक्त्रवरतात मनंग भंग शान्तां तरंग हृदया:
परिशीलयन्ति ॥ येबिल्वमन्दारसुचंपकाद्यै रिन्दीवरैर्वरकदंवजकर्णिकारैः ॥ ६ ॥ माकन्दकुन्दजलसत्करवीरपु
र ष्पैर्यो च्यो भिनर्चितमुदासतु शांभवोऽहि ॥ येपाटीरसोरुसन्मृगमदामोद प्रभा भावितं देवे वन्दितचन्दनेन विलसत्स
ल्लेपलिंगमुदा ॥ ७ ॥ यः कुर्यान्निशिवा प्रदोषसमये सत्तालवृन्तोद्भवै र्वातैर्वीज्यवसन्तकेतक भवैर्दुःखं न संप्राप्नुयात् ॥
शाल्यन्नं मधुराज्यसूपदधिजक्षीरादि मध्वादिभिः शाकापूपगुडाक्त भक्ष्यक सदा गोधूमपूर्णाद्भवम् ॥ ८ ॥ नैवेद्यं
सुमनोहरं भुवि सरा हृद्यं प्रदत्वा शिवे माद्यं मोदक संभवान् समधुरान् दत्वा समुक्तो भवेत् ॥ यो धूपैस्तगरागरूद्भव
महासाम्राणि सद्गुगुल चन्द्रोद्यद्दूरखण्ड सान्द्रसुमहादीपैर्धृताक्तैः शिवे ॥ ९ ॥ दद्याद्यः शशिशेखरोत्तममहालिं
गालेबे शांकरो भक्तो ज्ञाननिदान साधककरो भूयात्सदेवा शुभे ॥ योमी राजयति प्रदोषसमये दीपावली नां शतैः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साहस्रैरपि चन्द्रशेखरमहालिंगं समुक्तो भवेत् ॥ १० ॥ सच्छत्रै रविवल्लेमहेन्दुसदृशैः दद्याच्छिबाया शुवेसः शैवो भवतीं
दुचुड भजनात्सच्चामराद्यर्पणैः ॥ पताकाभिः शुंभुं विविध पटगभाभिरभितः प्रभाभावोद्भवे मेरुदहणलीलाभिरपि वै ॥ ११ ॥
यस्तौति शंभुं परवाच भक्त्या प्रदक्षिणप्रक्रमेणन भक्त्या ॥ लिंगालये यः कुरुते प्रदक्षिणं प्रणामपूर्वं स तु शैववर्यः ॥
॥ १२ ॥ यस्तौति शंभुं सकृदेव भक्त्या शंभो शिवेति शशिधाम धरेति भक्त्या ॥ गंगाधरेति प्रथितोरु दक्षशिरश्छिदध्वराध्यक्ष
महोक्षवाह ॥ १३ ॥ फालाक्षविश्वेश्वर शिक्षक मोक्षमार्ग विज्ञानमीशान् देहीति वक्ति स शैववर्यः ॥ यः शैववर्यतिलको
भवतीन्दुचूडपादारविंदभजनेन नयेत्सकालम् ॥ १४ ॥ नालं भवोद्भवसुरोत्तम कालकाल श्री शूलपाणि चरणस्मरण
प्रभावः ॥ आसन्नमरणं च वीक्ष्य सभयो भावो हि भस्मास्त्रधृक् तूर्णं पूर्णमतिः सदैव सततं किं चान्यपूर्णपातिम् ॥ विश्वे
शं समुपास्य मुक्तिपरमानन्दं लभे त्वां भवः यो गौरीरमणार्चनेन सरणिं मुक्तेर्विमार्गत्यहो ॥ १५ ॥ दूर्वापामार्गजद्दैः सु
विल्वजलद्दैः संपूजये त्वां भवः ॥ किं दारान्न धनानि गोधनवरं वीराः कुमारापि वै विद्या वा वरमन्त्रयन्त्रनिवहं किं चौष
धं रोगहृत ॥ सर्वं निर्वृत्तिमीति जातु मरणे सर्वं त्रिनेत्रार्चनं एकं साधकमित्यवैमि सततं किं चातकाद्वीतिहृत् ॥ आयाति
मृत्युर्निकटेन चायुरायाति पद्धतमेव शंभो ॥ १६ ॥ पश्यामि शश्वन्निकटं सुदर्पे वृक्षो रतत्कानन मम्बिकेश ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मात्प्रपद्ये शरणं त्वदीय पद्म प्रभावा च्चरणं सदा मे ॥ १७ ॥ शंभो योनि मुखाच्च निःसरण मप्युत्क्रान्तिकालव्यथा त्रु भीमा० अ०
॥ ३० ॥ स्यन्ममे तनुप्रकर्षजनिता श्रांत्या मुमूर्षामीय ॥ तस्मिन्नस्तमित प्रपंच मिहिका व्यापार कोलाहल क्रंदद्बालकदंबनन्धुनि अ० १७
वेह चित्त कथं ते पदे ॥ १८ ॥ मरणोत्तरमप्यतो वशोकं क्रकचाक्रामण घोर सौरि गेहम् ॥ अनुभवशत केऽपि पाप
तापैः नसुखं किंचनवं चितोस्मि शंभो ॥ १९ ॥ यो बिल्वच्छदमालया शिवमहालिंगोत्तमांगे दधत् प्रातःसंगवपुंग
वारुवहनं पुण्ये प्रदोषेऽपिच ॥ मातंगादि तुरंग गो धन महो दानान्न पानादिकं पुण्यं प्राप्य मुदासदेव उदयत्येषोहि भावो
कि वत् ॥ २० ॥ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥
श्री भीमायनमः ॥ ॥ कश्यप उवाच ॥ ॥ तस्मात्त्वां पतग श्रेष्ठ विद्यया वीक्षयाम्यहम् ॥ पंचाक्षर परो यस्तु स सर्व बल
भाजनम् ॥ १ ॥ भुक्ति मुक्त्योः सर्व पात्रं त्रिनेत्रप्रियकृत्तमः ॥ स्वतंत्रोऽपि महादेव स्तन्मन्त्र वशगो भवेत् ॥ २ ॥ पुण्या
६ नुमित्रो भवति सन्न्याशि परि पूजितः ॥ यस्तु पंचाक्षर परो पंचास्य ध्यान पूर्वकम् ॥ ३ ॥ स पंचत्व विहीनात्मा भवेदेव
शिवः स्वयम् ॥ ४ ॥ पंचाक्षराश्रयाः सर्वे ब्रह्म विष्णु मरुद्गणाः ॥ ५ ॥ पंचाक्षरा श्रयाः सर्वे मुनयो येतपोधनाः ॥ असुरा
जातुधानाश्च सिद्ध विद्याधरादयः ॥ ५ ॥ गंधर्वाः किंनारा यक्षाः तथा किंपुरुषादयः ॥ मन्त्रेणानेन देवेशं पूजयन्तिवि ॥ ३० ॥
धानतः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिंगे बिल्वदलैर्नित्यं गौरैरपि यथाविधि ॥ ममापि भवसारेण भक्तिरेवात्र कारणम् ॥ ७ ॥ फलमाढ्य दरिद्राणां सममेवा

ण्डजेश्वर ॥ भक्त्या प्रसीदति शिवो भक्त्या मुक्तिं प्रयच्छति ॥ ८ ॥ भक्त्यैव लभ्यते ज्ञानं वेदवेदान्तवाक्यजम् ॥ तत्वं

ब्रह्मेति वाक्यानां भावना भक्तिरेव च ॥ ९ ॥ मुक्तिप्रदं महादेवं मत्वा तिष्ठति धीरधीः ॥ कथमन्ये सुराः सर्वे मुक्तिदानक्षमा द्वि

ज ॥ १० ॥ पशवः सर्वदेवाश्च सपतिः परमेश्वरः ॥ स एव मोचकस्तेषां पशूनां पतिरीश्वरः ॥ ११ ॥ भक्त्या लिंगेऽर्चितो बिल्वैः

पाशेभ्यो मोचयेत्पशून् ॥ माया पाशाः प्रकीर्त्यन्ते काम क्रोधौ रुलोभकाः ॥ १२ ॥ मदमात्सर्य मोहाद्या ईषणादित्रयं तथा ॥

वर्णाश्रमौ कुलं जाति ध्वनाद्यखिलसंपदः ॥ १३ ॥ पुण्यपापादयश्चैव स्वर्गं च नरकं तथा ॥ देवतिर्यङ्नराकार ज्ञानं तत

सौख्यविभ्रमम् ॥ १४ ॥ संसारे सौख्यता ज्ञानं विषयादिसुखभ्रमः ॥ विचाररहितं चेतो धारणा गुणिनां त्रयम् ॥ १५ ॥ एते

८११ पाशाः प्रकीर्त्यन्ते पतिपूजाप्रभावतः ॥ शिवलिंगार्चनेनैव पाशेभ्यो मुच्यतेऽखिलैः ॥ १६ ॥ अग्निरित्यादिभिर्भस्म गृही

त्वा च तदैव हि ॥ परिमृज्याण्डजेशस्य कश्यपः शांभवोत्तमः ॥ १७ ॥ ददौ पंचाक्षरीं विद्यां सर्वपापप्रणाशिनीम् ॥ सतया

विद्यया रेजे पक्षीशो पापवर्जितः ॥ १८ ॥ परमेश्वर पादाब्जं ध्यायं मन्त्रं समभ्यसत् ॥ मुक्तमेघ इवादित्यो विराजति यथा त

था ॥ १९ ॥ पक्षीशो मन्त्रमाहात्म्यात्तदा रेजे मुदायुतः ॥ शिवलिंगार्चविधिमुक्त्वा वा कश्यपस्तदा ॥ २० ॥ पूजाप्रभावे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 त्तारं तं च कृत्वाऽङ्गजेश्वरम् ॥ कश्यपः प्राह तं पुत्रमेवमभ्यर्च्य येतितम् ॥ २१ भस्मत्रिपुण्ड्रपरिवर्जितफालदेशाद्दूरं भूसुर 
 वराऽपि भासुरार्च्यः ॥ आचारतोऽपि सुचिचारितवेदभागसाराखेतः शिवपदार्चनहीनवृत्तेः ॥ २२ ॥ रथ्यासु सर्वमलदग्ध 
विदग्धभस्मगात्रैः सदा खरतरैः खरस्पर्शवर्यैः ॥ मूढः कामेषु विद्धो दृढतरभवजापारकारागृहीतः भ्रान्तः पुत्रकलत्रमित्रैर्नि
बद्धे बन्ध्यो द्युते बन्धुभिः ॥ बुद्धो बुद्धतरोऽपि पाशनिकरैः सर्वेषणाभिश्चिरं भीमेशनार्चनवर्जनाधममतिः शंभोः प्रसादोज्झि
तः ॥ २३ ॥ किं तूत्तमर्णमधमर्णगभीनीरं घोरभ्रमार्णवमिदं परिपूर्णकाम ॥ तूर्णं सदाभ्यर्णहृदं सदा मां संतारयस्व करुणान्त
न र्णाश्रमश्रमभंगेरपिजीर्णमीश
रकर्णधार ॥ २४ ॥ दिव्यश्री शिपिविष्टचारुचरणांभोजप्रभा भावतो भावो जन्मपरं परासु न भवेच्छ्रीशैवलिंगार्चकः ॥
माया भारमवाप्य भावजनितो भावो भवानीपतिध्यानानन्दसमुद्रमग्नहृदयो भेदप्रभावोज्झितः ॥ २५ ॥ ॥ इति श्री
शिवरहस्ये भीमाख्ये अष्टमांशेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ कश्यप उवाच ॥
कृतनित्यक्रियः प्रातः समभ्युक्ष्याथ वारिणा ॥ नदीतीरे शिवागारे बिल्वमूलेऽपि वा द्विज ॥ १ ॥ भस्माभ्यक्ततनुर्नित्यं
त्रिपुण्ड्राणि च धारयन् ॥ अग्निरित्यादिभिर्मन्त्रैः सर्वांगं परिपूज्य वै ॥ २ ॥ भस्मना पादपर्यन्तं श्रौतेन विरजेन च ॥ त्रिया
युषैः त्रिपुण्ड्रांको कुशासन उदङ्मुखः ॥ ३ ॥ प्राङ्मुखो वा सदा देव मुखे तत्पूर्वकेऽपि वा ॥ सद्योजातमुखे वापि धृतरुद्राक्ष 
मालिकः ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

X पं॰ १०— सकूर्चं पादमूले तु निधायस्थापयेच्छिवं ॥ पाद्यार्घ्याचमनं दत्वा मधुपर्कादि दापयेत् ॥१८॥

कण्ठ कर्ण गलेष्वेव वक्षो बाहु शिरस्वपि ॥ पंचाक्षरमिदं मन्त्रं सतारं प्रजपेद्द्विज ॥ ५ ॥ सहस्रं वा तदर्धं वा शतमष्टोत्तरं
तु वा ॥ उमासहायं देवेशं ध्यायन्नासाग्र लोचनः ॥ ६ ॥ हृत्पद्मसद्मगं देवं त्रिनेत्रं चन्द्रशेखरम् ॥ सर्वाभरण संयुक्तं फुल्ल
पंचमुखांबुजम् ॥ ७ ॥ त्रिपुण्ड्रोज्ज्वलत्फालं टंकपाशादि शूल भृत् ॥ कृत बाहु चतुष्टाढ्य प्रभा भरण शोभितम् ॥ ८ ॥ सर्वा
गसुन्दरीं देवीं चन्द्रार्धमुकुटोज्ज्वलाम् ॥ नासा भरण शो[illegible]ढ्यां रत्ना भरण भासुराम् ॥ ९ ॥ ताटंक द्वय संशोभि महेन्दुस
दृशाननाम् ॥ महा गंधज कस्तूरी पाटीरद्रव लेपिताम् ॥ १० ॥ चंपके मल्लिकाजाजी मालती सर भूषिताम् ॥ तांबूल रागरक्तोल्ल
बिंबाधर मनोहराम् ॥ ११ ॥ हस्त पादाग्र संशोभि किंकिणी नूपुरोज्ज्वलाम् ॥ फुल्लह्लादक हस्ताग्रां हरवामांक गां सदा ॥ १२ ॥ पार्श्व
645 द्वये षडास्येन गजास्येन च शोभिताम् ॥ ध्यायेद्देवं महादेवं सांबं चारु त्रिलोचनम् ॥ १३ ॥ शुद्ध स्फटिक संकाशं नीलकण्ठं
शिवं तथा ॥ महामरकतोद्दीर्ण सच्छायां चारु हासिनीम् ॥ १४ ॥ एवं ध्यात्वा चिरं देवं लिंगे चावाह्यतं शिवम् ॥ पाद्यार्घ्याच
मनैः पुष्प गंधांबु पूरितैः ॥ १५ ॥ पात्रैः पंचाक्षरावृत्या मुद्र्या दर्शितैस्तथा ॥ आवाह्य स्थाप्य पीठे तल्लिंगं स्फाटिक
धातुजम् ॥ १६ ॥ बाणं वा रससम्भूतं चरं वा स्थावरं तु वा ॥ पंचाक्षरेण तन्मौलौ पुष्पं दद्याच्च भक्तितः ॥ १७ ॥ क्षीराभिषेकः प्रथमं
ततो दधि घृतं मधु ॥ सिता च नारिकेलोत्स कूर्चं पादमूले तु निधायस्थापयेच्छिवम् ॥ पाद्यार्घ्याचमनं दत्वा मधुपर्कादि दापयेत् ॥
॥ दक कदली फल जालकम् ॥ १८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहु॰ ८ फनसाम्ररसं चापि ततो लिकुचजं रसम् ॥ इक्षुसारं च गंधोदरत्नस्वर्णोद्भवं जलम् ॥ २० ॥ अन्नाभिषेकं च ततो गौरीरुद्रा भीमा॰ अ॰
भिषेचनम् ॥ पाद्याचमनदानं च तत उद्वास्य पूजयेत् ॥ २१ ॥ पीठे लिंगे च संस्थाप्य वस्त्रं यज्ञोपवीतकम् ॥ भस्मना त्र्यंब अ॰ १९ ॥
॥ ३२ ॥ केणैव पूजयेदिन्दुशेखरम् ॥ २२ ॥ गंधाक्षतान् ततो दद्यात् स्वर्णकल्पं यथारुचि ॥ निधनेत्यादिभिर्मन्त्रैर्भवाद्यैर्बिल्वप
त्रकैः ॥ २३ ॥ अन्यैर्वा विविधैः पुष्पैर्ग्राम्यारण्योद्भवैरपि ॥ तत्तत्कालभवैरेव पूजयित्वा महेश्वरम् ॥ २४ ॥ धूपं दीपं ततो
दत्वा नैवेद्यं चापि दापयेत् ॥ तांबूलं च ततो दद्यात्ततो नीराजनं द्विज ॥ २५ ॥ छत्रं च चामरादर्शौ ततो तौर्यत्रिकक्रमम् ॥
प्रदक्षिणां नमस्कारं रुद्रसूक्तेन कारयेत् ॥ २६ ॥ ततस्तोत्रैश्च वैदिकैः पौराणैरपि शंकरम् ॥ स्तोत्रेणानेन पतगस्तु वीतवं
महेश्वरम् ॥ २७ ॥ ॥ कश्यप उवाच ॥ ॥ नमो नमस्ते शशिचूड गंगाधराव्ययापारगादिप्यारिन् ॥ श्रीव्योमकेशाय
दयार्णवाय संसारवैद्याय नमो नमस्ते ॥ २८ ॥ नमो नमो देवदयांबुधे हर मारांग संहारक कालशत्रो ॥ विश्वेश्वरापारदया
निधान पाहीश श्रीशंकर रक्ष मां सदा ॥ २९ ॥ भगाक्षिहर शंकर त्रिदशनाथ पाह्यब्जजप्रकाश वरमौलिधृक् प्रमथना
थ विघ्नाधिप ॥ गजान्तसुमहाहव त्रिपुरघोरसंहारक प्रसीद च यथाधुना मधुहराक्षिपूजाप्रिय ॥ ३० ॥ देवदेव निग
मान्तवेद्य हृत्तापपापविनिवारक शंभो ॥ कालकाल करुणाकर शंभो पाहि मामखिलदुःखसमुद्रात् ॥ ३१ ॥ ॥ ॥ ३२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तुत्वैवं शिवमिष्टदान करुणा पांगं च लिंगस्थितं संपूज्य प्रमथाधिनाथ मगजाकान्तं समुक्तिं लभेत ॥ कामानप्यमि
गान वाप्य समुदा भुक्त्वा सुखं शांकरो पुष्पैश्चापि प्रदोषपर्वणि तथा पापैर्विमुक्तो भवेत ॥ ३२ ॥ इति श्री शिवरहस्ये भीमा
ख्ये अष्टमांशे एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री भीमाय नमः ॥ ॥ कश्य
प उवाच ॥ स काश्यपिर्नमश्चक्रे स्वापि तुश्चरणां बुजम ॥ कद्रुदु पूजासक्तस्य कश्यपस्य महात्मनः ॥ १ ॥ तेन प्राप्तम
हाविद्या प्रभावेणो घतः सदा ॥ लब्ध्वानुज्ञोऽथ गुरुणा वितत्यस्वशु जावुभौ ॥ २ ॥ जगर्ज बलवान्नादं तदा हर हरेति च ॥
उत्पपाताथ गगने तरुणारुण नाथवत ॥ ३ ॥ मेरोर्मूर्ध्नि सरो नाम मानसाख्यं नदाण्डजः ॥ स्मान स सरः स्नानं चकाराशु
६१८ हताशुभः ॥ ४ ॥ मेरोरुपवने तत्र बिल्वमन्दारसंयुते ॥ चंपकाशोकसहिते माकन्दद्रुमसंयुते ॥ ५ ॥ पारिजात वनोद्देशे कन्द
मूलफलावृते ॥ नानामृगांडजयुक्ते कोकिलनादिते ॥ ६ ॥ निधाय तत्र लिंगं च पतगेश्वर नामकम ॥ अग्निरित्यादिभि
र्मन्त्रैर्भस्माभ्यक्त महांगकः ॥ ७ ॥ धृतत्रिपुण्ड्ररुद्राक्षः पंचाक्षर जपादरः ॥ रुद्रसूक्त जपासक्तः फलमूलैः शुभैस्तथा ॥
॥ ८ ॥ समान सज्जलैः स्नाप्य प्रत्यहं पूजयच्छिवं ॥ बिल्वमन्दारकुसुमैरसमैः कमलोत्पलैः ॥ ९ ॥ निवेद्य फलमूलानि नि
राहारो चरत्तपः ॥ वर्षं फलाशनः पक्षी वर्षं वायुजलाशनः ॥ १० ॥ एवं द्वादश वर्षाणि तपसा विनतासुतः ॥ निनाय काल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरहु॰ कालस्य पूजया हृज्जयेन च ॥ ११॥ तल्लिंगमध्यादीशानः तस्मै प्रादुरभूच्छिवः ॥ गंगाचन्द्रकलामौलि कपर्दविलसच्छि भीमा॰अ॰

॥३२॥ रः ॥ १२॥ उमया सहितो नित्यं नीलकण्ठ त्रिलोचनः ॥ महावृषं समारुह्य नन्दिभृङ्गिगणावृतः ॥ १३॥ तं दृष्ट्वा गरुडं तत्र महा अ॰२०

पशुपतिः स्वयम् ॥ तपसा कर्शितं तत्र प्राह देवो वृषध्वजः ॥ १४॥ ॥ महादेव उवाच ॥ ॥ नितरां परिखिन्नोऽसि तपसा

पतगेश्वर ॥ कस्ते कामं वद क्षिप्रं तत्ते संपूरयाम्यहम् ॥ १५॥ सूत उवाच ॥ ॥ इति शंभोर्वचश्श्रुत्वा प्रणम्याण्डजराट् शिवम् ॥

भक्त्याश्रुपुलकं देवं मौलावंजलिमाहरन् ॥ १६॥ तुष्टाव शिपिविष्टं तं अष्टमूर्त्तिंकरम् ॥ ॥ गरुड उवाच ॥ ॥ देवदेव कृपा

सकलामरवंद्य विश्वनाथ शशिचूड महेश ॥ व्योमकेश जितकाम कलाहृत शूलमूलकरधीतकाल ॥ १७॥ मार

मारहरि सायक शंभो कालकण्ठ करुणाकर घोर ॥ घोरपातकभयादिविदूर पाहि मां वरदयाघनसार ॥ १८॥ शयद्धी

रं वीरं गरधरमुमाकान्तमधुना शरण्यं मौलीन्दुद्युतिविदितदिग्वक्रतमसम् ॥ महांगोद्यच्चर्मीकृतपटसदाशोभि

नृहरिस्फुरद्दंष्ट्रो हारि प्रखरनखरोद्योति तसुखम् ॥ १९॥ प्रपद्ये देवं त्वां श्रुतिवरशिरस्थारुपटलीवलीढं ते पादं सकल

सुरमौलिद्युतिपदम् ॥ अनाथानां नाथं सकलजगतामेकशरणं शरण्यं त्वां शंभुं भवहरणपादं कलयतः ॥ २०॥

यथा चेतो नित्यं न भजति तथा प्राकृतसुरान् हरिब्रह्मादित्यान् सवरुणमरुच्चादिकगणान् ॥ भवं भावापन्नं श्रुतिवर ॥३३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिरो वेद्यं चरितं तव शानं कस्तो प्रचवति नरः स्तव्य मधुना ॥२१॥ मदीयोऽयं मन्तुः सहतु च भवा नेव मनसा यतो वेदो वे
द्यो भवसि सहमानस्त्वमधुना ॥ तथाप्येतद्भक्त्या त्वयि गदितमेतद्व्रजतु मे वचः पथ्यं स्वास्थ्यं क्षमोसि मयि ति र्यक्कृत्व
दयया ॥२२॥ ॥सूत उवाच ॥ ॥गरुडो द्वीतमेतद्दै स्तव्यं श्रुत्वा प्रहर्षितः ॥ उवाच वरदोस्मीति वरं वृणु यथामति ॥२३॥
तवानया ण्डजस्तुत्या नितरां तुष्टमानसः ॥ ॥ईश्वर उवाच ॥ ॥मद्वरेण च ते कामो भविष्यति न चान्यथा ॥ इति श्रु-
त्वा वचः शंभोः प्रांजलिः प्राह चाण्डजः ॥२४॥ ॥ गरुड उवाच ॥ ॥प्रज्ञां बलं च विजयममृता हरणाय मे ॥ मातु
दस्य विमोक्षं च सर्पे कौटिल्य जं हि मे ॥२५॥ तव प्रसादतः शंभो भविष्यत्वद्य माचिरम् ॥ मेरुमूर्ध्नि महादेव मत्कृते पतगेश्वर ॥
6197 ॥२६॥ अस्मिन्सन्निहितो लिंगे भव त्वं सर्वदा शिव ॥ इति तद्वचनात्सर्वं तथास्त्वित्यवदद्धरः ॥२७॥ ववृषुः कुसुमासारं देवा
मूर्ध्नि द्विजेशितुः ॥ प्रवादयंस्ते वाद्यानि ननृतुस्ता वराप्सराः ॥२८॥ रंभो वे शी मेन काद्या मेह शस्येव सन्निधौ ॥ स्कंद उवा
च ॥ ततः पतगराट् तदा पुरहरांघ्रि संपूजनाद्बभूव बलगर्वितः फणिवरोरुमालाधरः ॥ वितत्य निज पक्षति क्षीपित वात पो
ता होति प्रकीर्ण वर शैल हृत्सुर फणीन्द्र वित्रासनः ॥२९॥ हरोऽपि विजहार वै गिरिजया समालिंगितो मरुद्गणगणावृतो
फणिफणोरुमालागणः ॥ कृतो डुगणेशोल्लसद्दरशिरखण्ड कोटि प्रभा विराजित कपर्दिको वृष वराधिरूढो ययौ ॥३०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे गरुडस्य ईश्वरप्रसादोनाम विंशोऽध्यायः ॥२०॥ श्रीकाशीविश्वेश्वरार्पणमस्तु॥ भीमा॰अ॰

३४॥ ॥ भीमायनमः॥ ॥स्कंद उवाच॥ ॥ तरुणः करुणामूर्तिः कृपया अरुणानुजः॥ वरुणालयगतान्सर्पानुज्जहार महेन्द्रह॥ अ॰२१

योद्धुं ययौ देवलोकं पक्षावुत्क्षिप्य वेगतः॥ अट्टहासेन घोरेण कंपयन्नमरावतीम्॥ २॥ ततो देवा भयापन्नाः सर्वे चापि सकिंक

राः॥ विद्याधराश्च गंधर्वा सुपर्वाणो महौजसः॥३॥ किमेतदिति मन्वानाः समुत्तस्थुरुदायुधाः॥ अमृतं यत्र निक्षिप्तं गुप्तमु

त्तमधन्विभिः॥४॥ देवैः किंनरगंधर्वैरुरगैरण्डजेश्वरः॥ प्रचण्डचण्डदण्डेन पक्षकाण्डेन भूयसा॥५॥ मार्तण्ड

सारथेर्भ्राता खण्डयच्चण्डविक्रमः॥ कांश्चित्पक्षप्रतारेण देवान्संमूर्च्छितांस्तदा॥६॥ कांश्चिद्दन्तद्रक्धारान्कांश्चिद्गं

धर्वसत्तमान्॥ ताडयामास पादेन गरुडोमृदुभावतः॥७॥ उज्जहारैव बलवाननतुलामलविक्रमः॥ कलशं पूर्णमाछाद्य अ

मृतस्य तदाण्डजः॥ ८॥ उज्जहारामृतं मध्यान्मध्यं दिनकरो यथा॥ स मातुर्निकटं गत्वा नत्वा दत्वामृतं तदा॥ ९॥

मातरं मोचयामास दास्यभावात्स्वभावतः॥ कद्रुपुत्रान्तदा क्रुद्धो योधयामास वैरवगः॥ १०॥ आशीविषांस्तदा सर्पा

न् निर्वीर्यानकरोत्तदा॥ तत्फणामणिमालाभिः शोभितः पतगेश्वरः॥ ११॥ द्रावयामास तान्सर्पान् काद्रवेयांस्तदाख

गः॥ स्वां मातरं सुपर्णीं च सांत्वयन्नीतिवेगतः॥ १२॥ मेरोर्मूर्ध्नि तदा गत्वा प्रत्यहं वै तदाण्डजः॥ पतगेश्वरमभ्यर्च्य ॥३४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बिल्व पत्रैश्च पंकजैः ॥१३॥ समायातु गृहं मातुः भक्तो नित्यं महेशितुः ॥ तदामृतं गतं दृष्ट्वा देवाः सर्वे सवासवाः ॥१४॥
गंधर्वाः किन्नरा यक्षा विद्याधरमहोरगाः ॥ बलं प्रमथनार्चातो बलवन्तं च पक्षिणम् ॥१५॥ मेनिरे विस्मयोप
ताः विष्णुं गत्वा तदाब्रुवन् ॥ उदन्तं तत्कृतं सर्वे देवास्तत्र सवासवाः ॥१६॥ ॥ देवा ऊचुः ॥ ॥ शृणु विष्णो भयं
प्राप्तं देवानां गरुडात्सदा ॥ अमृतं यत्सुरादत्तं समुद्रमथनोद्भवम् ॥१७॥ पीतावशेषं देवैश्च रक्षितं तद्गृहे सदा ॥
तदुज्जहार बलवान्नमस्सोरिः सपक्षिराट् ॥१८॥ अमुंचन्मातरं स्वस्य दास्यभावादपि ध्रुवम् ॥ कश्यपस्योप
देशेन शिवपूजाप्रभावतः ॥ हिनस्ति देवान्गंधर्वान्काद्रवेयानपि द्विजः ॥ हीनामृतान्हरे देवान्मृतानित्युपधा
६५७ रय ॥ निश्रीकं विष्टपं सर्वं कष्टमन्धंसमावृतम् ॥ न भ्राजन्ते यथा पूर्वं तस्योपायं वदस्व नः ॥२१॥ इत्युक्तोऽमरपुंग
वैः स च हरिः विस्मापितें नांतरं देवानाह तदा भयेन भगवन् भक्तं खगं तं तदा ॥ ओजस्तेजयुतं शिवार्चनमहाप्रभा
व्यजातं प्रभुं जेतारं त्वपराजितं रणे गणे मेने तदा बे हरिः ॥२२॥ ॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे
एकविंशोऽध्यायः ॥२१॥ ॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥ ॥ श्रीभीमायनमः ॥ ॥ श्रीस्कंद उवा
च ॥ ॥ ततो विष्णुः सुरानाह भीतान्वै गरुडात्तदा ॥ मनसा चिंतयन्नर्थं जयेतस्य धृतव्रतः ॥१॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीविष्णुरुवाच ॥ शृणुध्वममराः सर्वे जयं मेद्य गरुत्मतः ॥ स न शक्यो बलैर्जेतुं सर्वैरपि सुरासुरैः ॥ २ ॥ मया च ब्रह्मणा
चैव कश्यपस्यात्मजो युवा ॥ किं च शर्वार्चनबलादस्वर्वं गर्वमाश्रितः ॥ ३ ॥ स तेन पीडयत्येव जगत्सासुरमानुषम् ॥
॥ ३५ ॥ आशीविषानपि मुदा निर्विषान् कारो द्वली ॥ ४ ॥ स बली शंभुभक्तश्च भस्मरुद्राक्षधृक् सदा ॥ पतंगेश्वरमभ्यर्च्य मेरुमौलौ
कृताश्रमः ॥ ५ ॥ श्रमहीनः सदा शंभोः पादसंश्रयतः खगः ॥ क्षयद्वारपदार्चातो वीरसूर्यः खगेश्वरः ॥ ६ ॥ बली युवा
च पक्षी च त्र्यक्षपादार्चनेरतः ॥ बलिना विजयप्राप्तेः सांत्वेनैव वशं नयेत् ॥ ७ ॥ साम्नैवाभिप्रसन्नस्य सर्वं भवति हृद्गतम् ॥
शांभवेषु न मे धार्ष्ट्यमुपायो वापि विक्रमः ॥ ८ ॥ शिवभक्ता महाघोरा पराक्रमयुताः सदा ॥ अघोरपादसंसक्ता असु
रा भूसुरास्सदा ॥ ९ ॥ पुरा दक्षाध्वरे सर्वे वीरभद्रेण शिक्षिताः ॥ अहं देवेश्वरस्त्वं च भवाद्या देवतागणाः ॥ १० ॥ सागरोद्भव
यो घोराद्धरा दग्धाः स्म देवताः ॥ करुणाकरदेवेन तारिता गरभक्षणात् ॥ ११ ॥ मत्स्यकूर्मवराहं च नारसिंहतनुं हरः ॥ शि
क्षयामास मे पूर्वं कंदर्पोदर्पसर्पहा ॥ १२ ॥ यस्य भक्तो द्विजो ह्याहं सर्वदापि निराकृतः ॥ शापितोऽहं च भृगुणा मानुषीं यो
निमास्थितः ॥ १३ ॥ रावणेन रणे पूर्वं निर्विण्णोस्मि तदासुरः ॥ दश जन्मस्वपि तदा असुरैः पीडितोस्म्यहम् ॥ १४ ॥ ॥ ३५ ॥
यदा यदा मां गर्वाढ्यं दृष्ट्वा देवः पिनाकधृक् ॥ भवतश्च तदा दृप्तान् दृष्ट्वा वै स महेश्वरः ॥ १५ ॥ उपायैर्वासुरश्रेष्ठान्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मरजंभादिवृत्रकान् ॥ नमुचिप्रमुखांश्चापि तथान्यांश्च युगे युगे ॥ १६ ॥ हिरण्याक्षादिभिर्युद्धे अस्मान्मोहयतीश्वरः ॥ तां
श्चदृष्ट्वा नघज्ञात्वा अस्माभिर्विनिहन्तितान् ॥ १७ ॥ अस्माभिरपि ये शक्या न युद्धे इत्यसौ स्वयं ॥ त्रिपुरान्धककामारि
कालकालः कृपानिधिः ॥ १८ ॥ दधीचिनापि मुनिना निर्जितोऽस्मि रणाजिरे ॥ क्षुपस्य पक्षपातेन एवमादिमपाद्भुतम् ॥
॥ १९ ॥ भवोद्भवस्य चरितं दृष्टं पूर्वं सुरासुरैः ॥ तस्मात्खगेश्वर जेयं तं प्रसाद्य जयो भवेत् ॥ २० ॥ इत्युक्त्वा स सुरैः सार्धं
ययौ यत्र खगेश्वरः ॥ मेरुमूर्ध्नि कृतावासमण्डजं प्राह माधवः ॥ २१ ॥ ॥ विष्णुरुवाच ॥ ॥ धन्योऽसि कृतकृत्योऽसि
मान्योऽसि पतगेश्वर ॥ न त्वया सदृशं भूतं लोके दृष्टं मयासुरैः ॥ शिपिविष्टपदार्चातः सर्वेषां कष्टनाशकः ॥ सुसं
677 तुष्टः सुनिष्ठावान् ज्येष्ठलिंगार्चनात्सदा ॥ २३ ॥ बलप्रमथनार्चातो बलवांस्त्वं खगेश्वर ॥ क्षपद्धीरपदार्चातो वी
रोऽस्यं द्विजसत्तम ॥ २४ ॥ कस्ते प्रभावं च गुणं शक्तो वक्तुं सुरेष्वपि ॥ अशक्ता एव सर्वेऽपि तुल्यः शक्तिधरेण हि ॥ २५ ॥
मत्तो वृणुष्व कामं ते तदद्यैव प्रपूरये ॥ ॥ सूत उवाच ॥ ॥ इति विष्णुवचः श्रुत्वा प्रहस्य गरुडोऽवदत् ॥ मृडा
र्चनतो विष्णुमिन्द्रादीनपि तत्र वै ॥ २६ ॥ ॥ गरुड उवाच ॥ ॥ सर्वं जानामि ते चित्रं सुराणां कार्यसाधक ॥
त्र्यक्षार्चनप्रभावेन त्वया चक्रमिदं हरे ॥ २७ ॥ लब्धं तेनैव विजयो भविष्यति सुरेष्वपि ॥ वैकुण्ठमपि प्राप्तं तदा शर्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० पदाश्रयात् ॥ २८॥ देवानहं सदा जाने कां दिशी कान् हि मत्सुरः ॥ पुरा दक्षमखे यूयं वीरभद्रेण शिक्षिताः ॥ २९ ॥ भीमा० अ
॥ ३६॥ भ्रष्टा नष्टौजसः सर्वे शिवद्रोहेण वै तदा ॥ गरज्वालावलीदग्धतनुस्त्वं भासि काष्ठवत् ॥ ३०॥ त्वं कथं वरदो मेऽद्य अ० २२
किन्नूनं ममैव हरेः ॥ शिवार्चकस्य मे किंचित्स्वप्नेऽप्यद्य न दुर्लभम् ॥ ३१॥ अहं दास्ये वृणु वरं यथेष्टं वरयाधुना ॥ अ
तुलातुलराजकन्यकाकुचलोललालितोरुचारुवक्षसम् ॥ श्रुतिलोलाक्षवराक्षमालभूषं विषमाक्षं भजति प्रदोषका
ले ॥ ३२॥ यः कालान्तकपूजनेन दिवसं निन्ये सकलाति गोऽभूयान्नैव भवेषु संसृति भोरज्जाकण्ठलग्नोऽप्यसौ ॥ दुः
खेषु प्रसभं हि मज्जति न वै किं दुष्कृतैः शंकरः ॥ भद्राण्येव लभेत शंकरकृपा पीयूषधारारसैः ॥ ३३॥ शतपथ
यजुषामथोर्ध्वगम्यं यच्छ्रुतिसारं जपतामथ प्रदोषे ॥ प्रमथाधिपपदाब्जलोलचित्तो भ्रमतेनैव भवे भवेषु सक्तः ॥
॥ ३४॥ इति श्री शिवरहस्ये भीमाख्ये अष्टमांशे द्वाविंशोऽध्यायः ॥ २२॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥
श्रीभीमाय नमः ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तं तद्वचः श्रुत्वा तमाह सुरसत्तमैः ॥ विष्णुस्तदाण्डजं श्रेष्ठं काश्यपं
मेरुमूर्धनि ॥ १॥ ॥ विष्णुरुवाच ॥ यदि देयो वरो मह्यं सत्यमद्य खगेश्वर ॥ मातुर्दास्यापहरणे यन्नीतममृतं
त्वया ॥ २॥ तदद्य देहि देवानाममृतास्तेन वै सुराः ॥ हीनाऽमृताः सुराः सर्वे मृता निरुपधाय ॥ ३ ॥ साहाव्यमासुर ॥ ३६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुष्ट्वाहनत्वेनमे कुरु ॥ वरद्वयंमे देह्यद्यसत्य सन्धो भवान्खग ॥ ४॥ सत्ये प्रतिष्ठिता लोका ऋतंसत्यं महेश्वरः ॥सत्येना
दित्याबलिनः सत्येनध्रियेतमही ॥ ५॥ नक्षत्राणामथोपस्थे सोमः सत्येन आहितः॥ इत्येषा बह्वृचः प्रोक्ता श्रुतिरेषा सनातनी॥
॥६॥ तस्मात्सत्यपरो भूयाः पतगेशास्य सान्निधौ ॥ श्रीशिवउवाच॥ तदाविष्णु वचः श्रुत्वा प्राहाण्डजकुलोद्भवः॥ ७॥शर्वपादार्चनरतोगर्व
पर्वतमध्यगः॥ ॥ पतग उवाच ॥ ॥ सत्येस्थितोहमेवाद्यसत्य भूताः शिवाश्रयाः॥ आज्ञयादेवदेवस्य सूर्यंसर्वेसु
सुराः॥ ८॥ उदेतिसविता नित्यं वायुर्वाति शिवाज्ञया॥ चन्द्रोऽपि भगणैः सार्धं भ्रमन्तेऽहर्निशंग्रहाः॥ ९॥ शेषोऽशेषैः शिरो
वृन्दैः बिभर्ति पृथिवीमपि ॥सागरोगरकण्ठस्य शासनान्नोर्ध्वगो भवेत् ॥ १०॥ मुनयोमनवश्चैव अनलोवहतेहविः ॥ लोका
650 लोक्यास्तथा सर्वे विष्णो सत्येप्रतिष्ठिताः॥ ११॥ ददाम्यद्य वरं तेद्य यथासंप्रार्थितं त्वया॥ सुराणां सन्निधौ विष्णो किंपुनः
शिवसान्निध्यौ॥ १२॥ यः शंभोः सन्निधौ सत्यं कृत्वा नैव प्रपालयेत् ॥ स याति नरकं घोरं दारुणं देहसंक्षये॥ १३॥ तस्माद
वश्यं कर्त्तास्मि ददाम्यमृतमेव ते ॥ सुराणां दुःखजनकं नेम कार्यं हरे सदा ॥ १४॥ मातुर्दास्यापहरणे समानीतं मयाऽधुना ॥ किं
चैकं वच्मि मे विष्णो सुराणामुपशृण्वताम्॥ १५॥ सन्निधौ पतगेशस्य सत्यं वेद हरेऽधुना ॥ यदा भस्मादिदिग्धांगो त्रिपु
ण्ड्रोज्वलचिह्नवान्॥ १६॥ रुद्राक्षमालाभरणः यत्र पुष्ट्वा गमिष्यसि ॥ लिंगार्चकोऽसि नियतं बिल्वपत्रैरखण्डितैः॥ १७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० ८ शिवनैवेद्य भोक्ता त्वं सदा शिवपदाश्रयः॥ सुरैरप्येतदृशैर्युक्तो यदा विष्णो गमिष्यसि ॥ १८॥ तदा ते विजयो विष्णो भविष्य भीमा०अ
॥ ३०॥ ति शिवार्चनात् ॥ शिवचिह्नांकितः शत्रून्जेष्यत्येव न संशयः॥ १९ ॥ भस्मरुद्राक्षहीनांगान् परानाजौ हनिष्यसि॥ अ० २३॥
तदा वदामि स्कंद चेन नान्यथा मम भाषितम् ॥ २०॥ किंच जालंधरोऽसि भगवान् त्यक्त्वा भस्माक्षकः पुरा ॥ संशिक्षितो
ऽसि त्यक्तेन तेन देवैः पराजितः ॥ २१॥ वीरभद्रेण हि पुरा तस्मात्सत्यं वदाम्यधुना॥ ॥स्कंद उवाच॥ ॥ इत्युक्तो गरु
डेन शंकरपदध्यानानुरक्तेन हि विष्णुर्वाक्यमिदं जगाद रभसा हर्षाश्रुधारावृतः॥ देवानामुपसृण्वतां भुवि पुरो दृष्ट्
वा पण्डजेशं तदा प्राप्यात्रामृतमुत्तमं सुरकरे दत्त्वाति संतोषतः॥ २२॥ ॥श्री विष्णुरुवाच॥ ॥ यः शांभवेन भवताऽऽ
जिषु सर्वदापि साहाय्यभूत बलिना विजयो हि मेद्य॥ कांक्षेक्षताघ्र्य हृदये खलु सत्यमिष्टमेतत्त्वयोक्तमधुना प्रकरो
श्रीस्कंद उवाच॥
मि पक्षिन्॥ २३॥ इत्युक्त्वा स जगाम देवसहितो भक्तिं च वोऽस्याण्डजे संतुष्टोऽपि खगोऽपि विष्णुमवहद् दैत्यान्ऽऽ जिम
ध्येस्वयम् ॥ रुद्राक्षामलभस्मसंगतमुमाकान्तार्चकं तं हरिं पद्माक्षामलपूजितोत्तमहरं निष्ठावता चेतसा ॥२४॥ ॥
॥इति श्री शिवरहस्ये भीमारण्ये अष्टमांशे विष्णुगरुडप्रसादो नाम त्रयोविंशोऽध्यायः॥ २३॥ ॥ श्रीकाशी ॥ ३०॥
विश्वेश्वरार्पणमस्तु॥ ॥श्री भीमाय नमः॥ ॥श्री॥ स्कंद उवाच॥ ॥गरुडोपद्रुताः सर्पाः काद्रवेया महाबलाः
॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नखतुण्डैर्विनिर्भिण्णाः (ण्णाः) गरुडेन हतो जनः ॥ १॥ पक्षविक्षिप्तचूर्णाक्षास्ते चक्षुःश्रवसांवराः ॥ शेषोनन्तो वासुकि
स्तक्षः कर्कोटकधनञ्जयौ ॥ २॥ गुलिकः शंकु(ख)पालश्च धृतराष्ट्रः पिलिपिपिलः ॥ कंबलाश्वतरौ बभ्रुः तुहुण्डो बलव
र्धकः ॥ ३॥ पनसो वारुणीरभ्यो तक्षको भद्रकर्णकः ॥ पवना शोणिमांडव्यो गर्गोऽथ वसुशेणकः ॥ ४॥ उदानस्तु गृ
ध्रहनुः जातुकर्णो अयःशिरः ॥ कपोतरोमा स्तब्धाक्षश्चित्रघंटो विदारुणः ॥ ५॥ इत्येते नागराजानः कद्रूतनुसमु
द्भवाः ॥ मात्रा सहैव ते सर्वे दुःखिता गरुडार्दिताः ॥ ६॥ काश्यपं प्रणिपत्योचुः सर्पा दर्पविवर्जिताः ॥ उच्छ्वसन्तः श्वास
भारैः दुःखशोकाकुलान्तराः ॥ ७॥ ॥ नागा ऊचुः ॥ ॥ प्रणतास्म मुनिश्रेष्ठ भार्यां पश्य कनीयसीम् ॥ आयसी
दुः प्रतिमावासीद्दुःखशोकजरातुरा ॥ ८॥ गरुडेन हतान् पुत्रान् क्रोचन्ती त्वां समागता ॥ तस्मात्क्षमापार्थनः पुत्रवात्सल्य
तो मुने ॥ ९॥ यत्कौटिल्यं पुरा मात्रा यदस्माभिः कृतं तदा ॥ तत्पापफलभोक्तारा त्वत्सकाशमिहागताः ॥ १०॥ साथ कद्रूर्मुनेः
६४। पादौ नत्वाथ व्रीडिता तदा ॥ प्राह भर्तारमीक्षंती निश्वसन्तीच पन्नगी ॥ ११॥ सन्नगी (सानगी) रति दृप्तापि दृप्ता (दर्प) कौटिल्यवर्जि
ता ॥ ॥ कद्रुरुवाच ॥ ॥ सापत्न्या क्रोधितो भर्तः पुत्रवात्सल्यमोहिता ॥ गरुडेन हताः सर्पाः मत्कौटिल्याग्नि
धर्षिताः ॥ १२॥ हतशिष्टान् गूढपादान् गरुडाद्रक्ष मे सुतान् ॥ दृढं मृडपदध्यानात्त्वं च गूढं तपोधिकः ॥ १३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शि॰रह॰ ८ मूढांगूढपदांविप्रमातरं प्रौढिवर्जिताम्॥ ॥सूत उवाच॥ ॥इतितस्य वचः श्रुत्वा कश्यपः प्राह तां तदा॥ भीमाःअ
॥३८॥ सांत्वयन्समुनिश्रेष्टस्तदातां सर्पमातरम्॥ १४॥ ॥ कश्यप उवाच॥ ॥मैवं वद विशालाक्षी कार्चिंता अ॰२४॥
मयिसंस्थिते॥जीवयिष्यसुतान्तेद्य गरुडेन हतान्पुनः॥१५॥माकौटिल्यं कुरुष्वाद्य सपत्नीं प्रति यादृशम्॥
यच्छद्मकुर्वते मूढाः ते पश्चात्तप्यते भृशम्॥ १६ ॥ तत्पाप फलतस्तेद्य पुत्रा नष्टा हतौजसः॥इति तां सांत्वयन्वा
क्यौर्मृतानुज्जीवयन्मुनिः ॥१७॥ शिवार्चन प्रभावेन पद्मजातसुतात्तमः॥तानाहूयसुतान्कद्रुः प्राहार्थवादिदं
वचः॥ १८॥ ॥कश्यप उवाच॥ ॥ईशमाराध्यकेदारे स्वसुतैः सह सुव्रते॥ईश्वरस्य प्रसादेन केदारस्यार्चनेनच॥
मच्छिक्षाज्ञा वशा कद्रु स्वसुतैः सह संवस॥ पाताले हाटकेशाख्यं लिंगं संपूजयन्शुभे॥२०॥पुत्रैराराध्येयशानं तेनत्वं
सौख्य भागिनी॥ भोगिभिर्भोग निलयं पातालं सर्वसौख्यदम्॥२१॥त्रिविष्टपादपि सदा शिपिविष्टाश्रयात्सदा॥
तल्लिंग महिमानं ते समासात्प्रब्रवीम्यहम्॥२२॥ गंगाजटाजूटमौलिरिन्दुशूलभृतोऽद्यमे॥हाटकेशाख्यलिं
गस्य महिमां मे शृणु ध्रुवम्॥२३॥ ॥कश्यप उवाच॥ तल्लिंग प्रभया सुदीपित महत्पाताललोकं सदा
नागानां विलसत्फणामणि गण ज्योत्स्नाेरुधारा(ता)तत॥नो चंद्रार्क सुविद्युदुज्वलमहा वह्नि प्रभा भाधिकाः = ॥३८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोषा नो भगणाः सदैव न दिवारात्रं महेशाश्रयात् ॥ २४ ॥ वन्दारु वृन्दगण्या अपि चन्द्रमौलि पादारविन्द
भजनाय मुदा प्रयान्ति ॥ नागैर्नगो पमम्महोरु शरीर शीर्षैः नागारि वाहसहिता परिपूजयन्ति ॥ २५ ॥ तत्पा
तालतलेऽपि हाटक महालिंगं सदैवार्चयन् ॥ नागैर्नागवराः स्वकीय सुमहाशुण्डोरु कांडोस्थितैः ॥ धारा
सारसुपुष्करो धृत लसद्विल्वी दलैः कोमलैः ते चाष्टौ निवसन्ति भूधर वराः कैलास सानुप्रभाः ॥ २६ ॥
पाताले तत्र केतु प्रभृतिबलिवराः शक्र वित्रासनाये दैवा अप्यमरावतीं परि विहायात्रैव संमोहिताः ॥
ना विप्रेन्द्राः सुरसिद्ध दैत्यनिकरा यूयं च गोत्तमाः शांगं लिंगमुमापतेः प्रियतमं श्री हाटके शाभिधम् ॥ २७ ॥
कष्टं वीक्ष्य त्रिविष्टपं श्रुति शिरोनिष्ठां हि संप्राप्यते धन्यास्ते शिपि विष्ट हृष्टमनसा संपूजयन्त्यादरात् ॥
682 जूर्याहि द्युति कोटि कूट घटनो त्तुंगोत्तमां गोल्लसच्चन्द्रान्शुस्फुटदुत्पलारुण रजः स्वः सिन्धु मौलिं हरम् ॥
॥ २८ ॥ लीलापांगस्फुलिंग संगत महानंगां गमातंग हृत्तल्लिंगोत्तममध्य संगत मुमा देहार्धलिंगं हरम् ॥
बालेन्दु द्युति जूटि तारिवलज्जटा कोटीर पाटीरकं घोटी वद वधूरि ताधविलसद्दात्रं निटालेक्षणम् ॥ २९ ॥
पाटीरागरु चन्द्र चन्दन वैरालिप्य काकोदराः स्वैर्दारै रतिसुन्दरैः सुमनसां भारैश्च तद्धाटकम् ॥ लिंगं त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 त्वोरेपूजयन्ति नियता वीरैः कुमारैर्युताः॥ ३०॥ ॥ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे पाताले हाटकेश प्रभावे च 
तुर्विंशोऽध्यायः॥ २४॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु॥ ॥ श्री भीमाय नमः॥ ॥ कश्यप उवाच॥ ॥

उपायमेकं वक्ष्यामि पुत्रैः साकं शृणुध्वमे॥ यस्याराधनमात्रेण सर्पास्ते सुखिनः सुताः॥ १॥ जरामरणनिर्मुक्ता गरुडोद्भ
वभीतितः॥ मुक्तास्ते पन्नगश्रेष्ठ पन्नगा निवसन्तु ते॥ २॥ मौलौ हिमवतः सुभ्रु नाना मुनिवृतस्य वै॥ निवसन्तु सदा
हृष्टाः शिपिविष्टार्चने रताः॥ ३॥ वरकाकोदराः सर्वे केदारेशसमर्चकाः॥ कुमारदारसहिता मारमारार्चने रताः॥ ४॥
असारसंसारमिदं तरन्तु च सुनिर्भयाः॥ सापत्न्यः दुःखसंतप्ता गरुडो बलवत्तरः॥ ५॥ दृढं मृडार्चनरतो स्वमोद्यप
रिवर्जितः॥ अमृतं यो हरत्पूर्वं सुरान्विद्राव्य निर्भयः॥ ६॥ हरिणा प्रार्थितो देवे वाहनं त्वण्डजेश्वरः॥ प्रादाद्वरं स हरेय
वहामीति सुता मम॥ ७॥ अशांकरं हरिं दृष्ट्वा पातयत्यं बुधौ हरिम्॥ स्वस्कंधतोऽध गरुडो मृडपादार्चने रतः॥ ८॥
हनिष्यत्येव ते पुत्रान् सोऽपि पुत्रो ममाधुना॥ पातित्रिनाथो बलवान् त्रिनेत्रपदपूजया॥ ९॥ उभयोः संधिकारणं जाति
वैरान्न वै भवेत्॥ तस्मात्सर्पा महादेवं कंदर्पोद्दर्पमर्दनम्॥ १०॥ व्रजन्तु शरणं सांबं शरण्यमभयप्रदम्॥ आराध्य देवदेवे
शं केदारेशं वसाधुना॥ ११॥ शिवचिह्नांकितास्त्वं च भव सुभ्रु सुतैः सह॥ भस्मरुद्राक्षसंपन्ना शिवलिंगार्चने रताः॥ १२॥ 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिपुण्ड्रधारिणः सर्वे सर्पाः पंचाक्षरादराः ॥ रुद्राध्यायानुवृत्यैव काद्रवेया वसंत्वपि ॥ १३ ॥ केदारेशार्चनेनैव सिध्यन्त्वेवमनोरथाः ॥
सुरासुराश्च मुनयः पूर्वं केदारपूजया ॥ १४ ॥ बभूवुर्बलिनः सर्वे तस्मात्तं शरणं व्रज ॥ पुत्रैः साकं व्रजसुखं शिवार्चनरता भव ॥ १५ ॥ शांभवं
लांछनं दृष्ट्वा गरुडो न हनिष्यति ॥ ये शांभवद्रोहकृतस्ते वै निरयगामिनः ॥ १६ ॥ ~~पुत्राणां तव देवोऽपि~~ ॥ तस्मात्पतगरात्सर्पान् नैवे हिं
स्यात्सुखं व्रज ॥ शिवोऽपि ते प्रसन्नः स्यात् केदारेशस्य पूजया ॥ १६ ॥ पुत्राणां तव देवोऽपि त्राणं भक्त्या करिष्यति ॥ त्रिपुण्ड्रमौल
यः सर्वे कुण्डलीभूता भवन्त्वपि ॥ १७ ॥ रुद्राक्षभूषणाः सर्वे ते चक्षुःश्रवसां वराः ॥ भवन्तु भवपादार्चाभावैः कुर्वन्तु नान्यथा ॥ १८ ॥
पापकंचुकनिर्मुक्ताः त्यक्त्वा स्वैः कंचुकैः सह ॥ कुलं च प्रीतिपूजाभिः वंचना वर्जिताः सदा ॥ १९ ॥ रुद्राक्ष
धारणाच्चापि तथा पंचाक्षरीजपात् ॥ भस्मत्रिपुंड्रकरणात् भवः प्रीतो भविष्यति ॥ २० ॥ रुद्राध्यायजपेनेशः
683 तथा बिल्वार्चनेन च ॥ केदारवासाच्च सदा काकोदरसुखप्रदः ॥ २१ ॥ प्रादेशत्येव देवेशः सर्पाणां स्थानमुत्तमम् ॥ स
र्पाणां प्रीतितः शंभुः स्वांगभूषां करिष्यति ॥ २२ ॥ न केदारसमं लिंगं भव्यं हि जगतां त्रये ॥ प्रसादजनकं साक्षात् पूजितं भु
क्तिमुक्तिदम् ॥ २३ ॥ मया पद्मासना त्वज्ञात्वा पूजितं सर्वकामदम् ॥ तत्पूजितास्पृष्टे रेषा मत्तो जाता सुरासुरैः ॥ २४ ॥
तस्मात्पूजय यत्नेन कद्रु त्वं स्वसुतैः सह ॥ ॥ काश्यप उवाच ॥ ॥ अंभोजसंभव भवा मनवः सुराश्च कुंभोद्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 वादिमुनयो दितिनन्दनाये ॥ अम्भोधितल्पकगतो हरिरत्तदेव लिंगं सदम्बुजवरैः परिपूज्य बिल्वैः॥ भीम
॥४०॥ ॥२५॥ तुष्टोप्यशेषसुविशेषमहाहिशेषभूषाविशेषभसितोत्तमपुष्पकोटि ॥ संकाशलिंगमचुनापरिपूज अ०अ०
० यस्व ॥ सूत उवाच ॥ ॥ इत्युक्तं मुनिवचनं निशम्य कद्रुः कद्रुश्चार्चनसाधनायपुत्रयुक्ता ॥ केदारंमुदित २५
मना ययौ तदानीं नत्वा तं मुनिवरमीशपादभक्तिम् ॥ २७ ॥ सर्पास्तेपितृतो निशम्य वाक्यं भस्माक्षादिविभूषिताः
सहैवमात्रा ॥ निर्जग्मुः हिमशिखराश्रयं तदानीं क्षेत्रं तत्त्रिदशपतेर्महेशितुः प्रियं वै ॥ २८ ॥ कुमुदाम्बुजमि
त्रवह्निनेत्रप्रियलिंगार्चनतोरगाःकृतार्थाः॥ श्रुतिशीर्षविद्दो यदर्शने मतिरीशानपदार्चना भवेत् ॥२९॥
उरगा अप्युरगाग्र्यभक्तिनिष्ठास्तुरगारातिवहान्तकाब्जपादे ॥ मुरमाहरामरेंद्रवंद्ये करवीरे
इकटिव चोरुवासे ॥३०॥ अरुणानुजभीतितो विहीनाः वरतक्षकवासुकिद्विजिह्वाः ॥ शरणारुण
पादपद्मयुग्मं भजतां नास्ति भयं कदाचिदेव ॥३१॥ वरुणालयपारणाज्ञयाशंभुंकरुणासागरमी
श्वरार्चनेन ॥ मरणादपहाय भीतिजातं स्मरणेनेशितुरेव कारणेनहाराः ॥३२॥ ॥ इतिश्री शिव ॥४०॥
रहस्ये भीमाख्ये ऽष्टमांशे केदारगमनं नाम पञ्चविंशोऽध्यायः ॥२५॥ श्री काशीविश्वेश्वरार्पणमस्तु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री भीमाय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ केदारेशं समाराध्य काकोदरनरास्तदा ॥ भस्मरुद्राक्षसंप
न्नाः पंचाक्षरपरायणाः ॥ १ ॥ रुद्राध्यायेनाभिषिच्य बिल्वैः संपूज्य भक्तितः ॥ स्वफणामणिमाणिक्यैः संपूज्य परेश्व
रम् ॥ २ ॥ नैवेद्यैर्धूपदीपैश्च तथा नीराजनैरपि ॥ तुष्टुवुस्तेऽपि भुजगाः भुजंगाभरणं शिवम् ॥ ३ ॥ ॥
नागा ऊचुः ॥ ॥ पाह्युग्रमित्रनयनामलभूतिगात्र रुद्र त्रिनेत्र गिरिराजसुताकलत्र ॥ पात्रं विचि
त्रतरमेतदहोऽपवित्रं सत्रातिरात्रमखतर्पितलोकयात्र ॥ ४ ॥ श्रीव्योमकेश सकलेश महेश शंभो काशीवका
शपुरीश्वर शंकरेश ॥ देवेश खंडपरशो पशुपाशनाश पाहीश मामकधिया तव पादभक्तान् ॥ ५ ॥ त्वं भर्गस
र्गकरणाव्ययदीनवर्गसंतारकार्गलपदान् परिमोचयाशु ॥ दूर्वादलार्चितपद त्रिदशोरुगर्वनिर्वापणार्णववसांबु
६४ जमित्रनेत्र ॥ ६ ॥ श्रीमन्मेरुशरासन त्रिभुवनाध्यक्षाध्वराध्यक्ष कवीक्ष त्वत्करुणाकटाक्षलहरी संहारितांघौघ
कान् ॥ उक्षाधीश्वरकेतनेश्वर दयापात्रान् त्रिनेत्राधुना कक्षाणां च पते सुदक्षमखहृत् तूर्णं प्रसादं कुरु ॥ ७ ॥ भूभृद्रा
जकुमारिकाकुचतटीपाटीरपंकांकितं रुद्राक्षप्रियभस्मपुण्ड्रनिटिलं ज्वालोरुगंगाधरं ॥ वैय्याघ्रत्वगलंकृ
तांगमसकृत् पश्ये मच्चित्ते सदा वित्तेशादिपदप्रदं हरिशरं संभावयामो हरम् ॥ ८ ॥ विश्वेशस्य पदांबुजाश्रयण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० तोनिश्रेयसौख्यैक भाक् ॥ भोगानप्यमिता नवाप्य भुवनेकैलासमौलौगणः ॥ भूयादञ्जज कल्पकोटिषु भीमा० अ०
चिरं भोगिप्रिया भोक्ता भूपृक् चन्द्रोत्तंसकिरीट कोटिविलसत्कन्दर्प दर्पापहः ॥ ॥सूत उवाच॥ नागा अ० २६
॥४१॥ नांचस्तवं श्रुत्वा केदारेशो महेश्वरः ॥ तल्लिंगमध्याच्चतदा आविरासीत् स्वयं हरः ॥१०॥ नागाजिनोत्तरासंगो
शशांककृतशेखरः ॥ उमयासहितोदेवो नीलकण्ठस्त्रिलोचनः ॥११॥ गंगाधरः कपालांकः शूलज्वल
नसत्करः ॥ तंदृष्ट्वादेवदेवेशं सर्पाः कद्रुसमन्विताः ॥१२॥ प्रणम्य चमहादेवं संस्तुवन्ती ललोहितम्॥
नागा ऊचुः ॥ ॥ वेदार्च्य शर्व मम गर्वहराध सर्वकन्दर्प दर्पहरसर्प महोरुहार॥ अग्योग्र भीमभव
भर्गसुसर्ग वर्गस्वर्गापवर्गदविभो तव भक्तिमार्गम् ॥१३॥ दूर्वादलार्चनकृतं भवदीय लिंगे संगेऽपि शांग
निवहाः किमुताप मार्गैः ॥ बिल्वैश्च पंकजवरैः कनकैः कदम्बैः पूज्येन्दु चूडकुलभूधरवास शंभो ॥१४॥
विश्वामहेश्वर हरामरधीर वीर गौरीमनोहर हराव्यय मार मार ॥ संसार भार परिहार करप्रसीद श्री शंकरा बगा
रधुर्यधर प्रसीद ॥१५॥ ॥सूत उवाच॥ ॥ तत्स्तुत्यातोषितः शंभुः तानुवाचोरगेश्वरान् ॥ प्रणतान्
विनतान्सर्पान् शर्वो रुद्र उमापतिः ॥१६॥ ॥श्री महादेव उवाच॥ ॥ चक्षुश्रवोत्तमायूयं मद्भक्तामत् ॥४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परायणाः ॥ भवत्स्तुत्याति संतुष्टो भवतां कष्टनाशकः ॥ १७ ॥ शिपिविष्टोऽहमधुना तुष्टोऽहं भवतां मुदे ॥ वृणुध्वं
काद्रवेया वै वरं मत्तोऽभिकांक्षितम् ॥ १८ ॥ इच्छाप्रपूरको नित्यं स्वच्छानामस्मि सांप्रतम् ॥ निरिच्छानां हृदिच्छां
च वांछा मच्छांददाम्यहम् ॥ १९ ॥ मच्छासने निविष्टानां भस्मरुद्राक्षधारिणाम् ॥ ॥ सूत उवाच ॥
सदाशिववचः श्रुत्वा नत्वा ते भुजगोत्तमाः ॥ सहकद्र्वा प्रणम्येशं वव्रुर्वरमनुत्तमम् ॥ २० ॥ सा च कद्रुर्महादेवं
प्रणम्य परमेश्वरम् ॥ तुष्टावाष्टाकृतिं शंभुं शिपिविष्टं कृपाकरम् ॥ २१ ॥ कद्रु उवाच ॥ शंभो विश्वेश शंभो श
शिगरतटिनी जूटकोटि ज्वलांग ज्वालानेत्राब्जजातोत्तमवरशिरसां मालिकालंकृतांग ॥ उक्षांगापांगसं
७५ गस्फुरदुरुपदभृद्दिव्यमातंगभंगानंगांगाभंग गंगाजलल्लवकुटिलालोलदिव्योत्तमांग ॥ २२ ॥ पाहीश
प्रमथेश चारुकरुणामूर्ते तरुणाद्रिस्थित पारावारमहाघसागरतरिश्रीकर्णधार प्रभो ॥ २३ ॥ पुत्रान्मे शरणाग
तान् तरणिजज्वालोरुनेत्र प्रभो पाहीशान दयानिधान अरुण भ्रातुर्भयोत्पीडितान् ॥ चन्द्रापीड महेश ते चरण
योः भक्तिप्रभाभावितान्नास्त्यन्यत्तव पादयोः शशिकला मौलि शरण्यं परम् ॥ २४ ॥ त्वं मातासि पितासि
सर्व जगतां नेतासि त्वमेवेश्वरस्त्वत्तो मे सुतवृन्दमद्यधुना प्राप्नोतु सौख्यं विभो ॥ विभ्यद्गरुडभीतितो गतिप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह० रं त्वामेव याचे शिव तत्त्राणाय भवाधुना शरणदत्वन्तोऽभिकांक्षे वरम् ॥२५॥ ॥ सूत उवाच ॥ ॥ भीमा० अ०
तस्यास्तत्स्य वचो निशम्य भगवानुग्रोऽप्यनुग्रस्तदा नागाना हन वो भयं गरुडतो भूषांग जाता हि मे ॥ केचित्कं अ० २६
॥४२॥ कणतां भजन्तु भुजगा जूटेरुबन्धास्तदा पादाद्यंघ्रि जनूपुरा वरमहामाल्लायिता: केऽपि मे ॥२६॥ मत्कण्ठा
भरणाश्च कुण्डलवरा: यूयं भवंत्व ध्यमे ॥ ॥ ईश्वर उवाच ॥ ॥ पाताले निवसन्तु संततमुमाकान्ता
श्रया: शांकरा वीरीदारकुमारदारसहिता: काकोदरामत्परा: ॥ दिव्यं मे वरलिंग मद्भुततमं श्री हाटकेशाभिधं
त्वभ्यर्चानुदिनं सदैव नियतं भस्मांगरागादरा: ॥२७॥ न विष्णुचक्रान्नयमस्य दण्डान्न पाशिपाशान्न च
शक्रवज्रात् ॥ न वो भयं वै भुजगा भवेत्क्वचित् मत्पादसंसेवनतो गरुत्मत: ॥२८॥ ॥ सूत उवाच ॥
इत्युक्तं नगजापते: वरवच: श्रुत्वैव नागा हि ते मात्रा तुष्टहृदब्ज सद्म वसतिं नत्वोचुरित्थं वच: ॥ ता
न्नागाननुगृह्य देवसहित: स्थानं ययौ तं नगं कैलासं समवाप्य सो गिरिजया हर्षोरुधारावृत: ॥२९॥
॥ नागा ऊचु: ॥ ॥ शंभो त्वदंगवरभूषणतो वयं हि धन्याश्च मान्यपदवीं प्रथिता: सुराद्यै: ॥ विष्ण्वा
दिवन्दित पदाब्जवरं तवांघ्रि द्वन्द्वं क्षणेन वयमप्याति धन्य धन्या: ॥३०॥ ॥ श्रीस्कंद उवाच ॥ ॥४२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्थं संस्तुत्य शंभुं वर विवरमहो भूमिपाताल मूलं ईशा ज्ञातो विविशुर् वशाः भक्तितः पाविताशाः ॥ दिव्यं तद्धाटकेशं प्रथितमणिग
णोत्तुंग लिंगं भजन्तः ॥ कांक्षंतो मुक्ति सिद्धि किल बिलशायकाः शांभवाः शंभु भक्ताः ॥ ३१ ॥ ॥ इति श्री शिवरहस्ये भीमाख्ये अ
ष्टमांशे नागोपरि शिवप्रसादो नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥श्री भीमाय नमः ॥ ॥
॥ श्री स्कंद उवाच ॥ ॥ शेषोऽपि हाटकेशाख्यं लिंगं शंभोः सदैव हि ॥ सर्पैः पाताल विवरे पूजयामास भक्तितः ॥ १ ॥ भस्मरुद्राक्ष
संपन्नाः पंचाक्षर परायणाः ॥ रुद्राक्ष माला भरणो महेश चरणाश्रयः ॥ २ ॥ कद्रूसुत वरस्तत्र सदा रुद्र जपादरः ॥ स्वफणा मणिभिस्तत्र कृत्वा
शर्वालयं महत् ॥ ३ ॥ प्राकार गोपुरोपेतं मणिसौधशतोत्तरम् ॥ सर्पाणामालयान्येव क्रमेण परितस्तदा ॥ ४ ॥ महासौधगणाकीर्णं सप्रतोलि
कमुत्तमम् ॥ नागैश्च नागनारीभिरावृतं तच्चकार वै ॥ ५ ॥ महेश्वरप्रसादेन शेषो वै विश्वकर्मणा ॥ अशेषभुजगानां च कद्रुध्याश्चैव नालयम् ॥
658 ॥ ६ ॥ लिंगालयान्यपि सदा परितः स चकार वै ॥ तक्षकेशमनंतेशं कंबलाश्वतरेश्वरौ ॥ ७ ॥ एलापतेश्वरं चैव तथा कर्कोटकेश्वरम् ॥ धृतराष्ट्रे
श्वरं चैव गूलिकेशं भृतीश्वरम् ॥ ८ ॥ शंखेश्वरं चापि चण्डीशं वारणेशं द्रुतीश्वरम् ॥ सर्पेशं वामनेशं च खर्वटेशं च वासुकिम् ॥ ९ ॥ एतानि
दिव्यलिंगानि स्थाप्य तत्र भुजंगमाः ॥ मणिधामगतान्येव कृत्वा तानि महेशितुः ॥ १० ॥ पाताले हाटकेशस्य परितो नागसत्तमाः ॥
दिव्यपूजाभरैर्नित्यं पूजयामासुरीश्वरम् ॥ ११ ॥ तत्पूजाविस्तरं वक्ष्ये तत्स्तुतिं च शृणुष्वमे ॥ ॥ श्री स्कंद उवाच ॥ ॥ फणामणिगण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 व्रजप्रभव गर्भधाम प्रभाविराजतसुहाटकोज्ज्वलमहोरुलिंगोत्तमम् ॥ सुबिल्वदलपंकजैः कनकचंपकैर्मल्लिकाकदंबकुसुमा 
स्रजां भरवैरैः प्रपूज्योरगाः ॥१२॥ लिंगं हाटकगर्भमंडितमहागर्भोरुधामास्थितं दिव्योत्तुंगवृषाढ्यरत्नशिखरद्वाराङ्कितं सुंदर 
 म् ॥ प्राकारप्रकरैरपारगणनाहीनस्वमौलौत्नसद्रत्नास्वच्छविभिः प्रदीपितमुमाकान्तालयेषूद्यताः ॥१३॥ पातालगंगांबुघटै
सहस्रधारादिभिक्षीरदधिप्रभाज्यैः ॥ प्राज्यैर्मधुप्रभवसारघटैसहस्रैः सच्छर्करापूरभरैरहीनाः ॥१४॥ सन्नारिकेलाद
कजंबनीररंभाफलाम्रप्रभवैश्च फानसैः ॥ गन्धोदकैश्चंद्रउशीरपाटलानक्तोत्नकांकोलसुवासितैर्जलैः ॥१५॥ आसिच्य
गव्यैवरपंचकाद्यैरालिप्य लिंगं सगृहं सुवस्त्रैः ॥ सद्रत्नभूषाफणिगोलकांकितै रत्नैश्च निष्टप्तसुवर्णयुक्तैः ॥१६॥ तगरागरु
धूपसंभवैर्वरगन्धैः मणिदीपकोटिभिः ॥ परिफुल्लसुपंकजार्कबिल्वैर्वरमाल्लिककारवीरजाजिपुष्पैः ॥१७॥ मरुवक
दमनस्रजादिभिः परिपूज्य प्रमथाधिपोरुलिंगं ॥ भुजगा जगतां महेशमेवं वरनैवेद्यभोज्यभक्ष्यभोज्यैः ॥१८॥ स्र
क्ताम्बूलदुकूलकूलविहितालंकारसच्चन्दनालिप्तं लिंगमुमापतेः प्रियतमं नीराजयन्ति द्विज ॥ १९ ॥ दीपानां च सहस्र
कैर्वरमहाकर्पूरखण्डोत्थितज्वालाजालनिरस्तदिक्तमततिं ते पन्नगाः शंकरम् ॥ २०॥ हाटककटकोपमामहे
शलिंगं परिसंवेष्ट्यमुहान नोत्थरत्नैः ॥ स्वफणादिसुन्दरेश मूर्ध्नि परिवस्याभिरहो समर्चयान्ति ॥ २१॥ स्वेच्छेन्दुधाम 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिमण्डलसन्निभोरुनिष्टप्ररुक्मवरदण्डसुमण्डितैश्च ॥ स्वच्छत्रपंक्तिवरचामरकोटिलेढि भ्राजमता कनिकरैः व्यजनै

रपारैः ॥ २२ ॥ आदर्शदर्शवरनास्य महोत्सवोद्यध्वानैर्जितां बुधिवरैर्भेरदुन्दुभीनां ॥ सत्काहलैर्भेरमृदंगसुशंखनादैः सं

घोष्य शंकरमहालयमध्यमेवम् ॥ २३ ॥ तौर्यत्रिकैर्हरहरेतिरवैर्भुजंगा नृत्यन्ति गिंग सविधो मुदिताः कृतार्थाः ॥ श्रीरुद्रवीणायुत

वाणिपाणिपद्मप्रभोल्लयैः नरवरैर्निनावाग्रैः ॥ २४ ॥ तद्भक्तिरागोत्तमगानधारा नाम्नां च शंभोश्च नयन्ति कालम् ॥ तदंभणसुनीलिमा

विधुतकालिमानं कचः प्रकर्ष भुजगांगनाः परिलसत्कपोलश्रियः ॥ चलद्दुलषमण्डनैः प्रथितकुण्डलानां दोलनैः नयान्तिकि

लवीणया शिवमहेशगानादराः ॥ २५ ॥ तानागाभरणोरुलिंगसदने नृत्यन्ति नागात्मजाः ॥ नागस्य प्रसभोरुकाण्डसुम

657 ह्रा पादझ्झणंनूपुराः ॥ पश्येशेति हरेति शंकर महादेवेति नित्यं सदा वीणावेणुमृदंग निस्वनलयैः सोमोरुधामाननाः ॥ २६ ॥

शेषोप्यशेषवदनैर्भुजगोरुभूषं भूषा ज्वलास्र भसितोत्तमभूषितांगम् ॥ २७ ॥ योषार्धकायनवमाषनिकाशकण्ठं तोषायशं

करमहोस्तुवीतप्रदोषे ॥ ॥ शेषउवाच ॥ ॥ द्विजिह्वफणिभूषणं भसितलिप्तफालेक्षणं सुपंकजदलेक्षणं प्रथित पूजयातो

षणम् ॥ गरोल्बणविशोषणं मदनकालसंहारणं कुरंगशिशुधारिणं सुरवराद्यसत्कारणम् ॥ २८ ॥ मातंगानंगभंगांधकपुर

भगयमहन् पाहि मामीश शंभो दृष्ट्या वृष्ट्येव तोत्फुल्लसस्यं प्रभवति हि यथा तद्वदीशानशंभो ॥ दुःखै रोगादिरागैरसुतनुव्यसनैरात्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ पापं महेश त्वत्यादाज्ञावलोकान्न हिममसुकृतैः लोकसंघैः फलं मे ॥ २९ ॥ ॥ श्री स्कंद उवाच ॥ ॥ श्री हाटके भीमाअ०
॥४४॥ शसमधिष्ठित नाग लोके पापाद्भयं न गरुडादीपपन्नगानाम् ॥ नागानगरि कर वज्रमहोग्रधारा संपात नाद्यसुरविनः शिवपूज अ०२७॥
याते ॥ ३० ॥ ॥ इतिश्री शिवरहस्ये भीमाख्येऽष्टमांशे शेषकृत हाटकेशार्चनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ श्री काशी
विश्वेश्वरार्पणमस्तु ॥ ॥ श्री भीमाय नमः ॥ ॥ श्री स्कंद उवाच ॥ ॥ हाटकेशं समभ्यर्च्य शेषो शेषमुखैः स्तुवन् ॥
रुद्रसूक्तैर्महादेवं संपूज्य परमेश्वरम् ॥ १ ॥ बिल्वपत्रांबुजैश्चैव उत्पलैः कुमुदैस्तथा ॥ गन्धैश्च धूपदीपैश्च नैवेद्यैर्विविधै
रपि ॥ २ ॥ स्वफणामणिभिर्नित्यं पूजयामास शंकरम् ॥ पंचामृतप्रवाहैश्च फलसारैर्महेश्वरम् ॥ ३ ॥ स्वफणाच्छादीभिर्नि
त्यं छादयल्लिंगमस्तकम् ॥ त्रिपुण्ड्र फाल विलसत्सहस्रास्यैस्तदामुदा ॥ ४ ॥ सहस्रमौलिमाणिक्यैः शंभोर्गर्भगृहं तदा[धा]
दीपयामास शेषोऽसावशेषभुजगेश्वरः ॥ छत्रैश्चचामरैर्दिव्यपताकादर्शवाद्यकैः ॥ ५ ॥ नागकन्यानर्तनैश्च वीणादिध्वनिभि
स्तथा ॥ ६ ॥ स्तुवीत गानधाराभिः नागकन्या महेश्वरम् ॥ अस्तं दोषे प्रदोषेऽसौ नित्यं संपू[ज]यत्यरम् ॥ ७ ॥ स्वं स्तुवन्नुवासासौ शे
षो भुजगमः सुखम् ॥ सहमात्रामुदा तत्र हाटकेशं प्रपूजयन् ॥ ८ ॥ चक्षुःश्रवास्ते शृण्वन्ति शिवनाम सुधारसम् ॥ चक्षुर्भिर्वहि
पश्यन्ति पूजितं लिंगमेश्वरम् ॥ ९ ॥ सहस्रास्योऽप्ययं शेषो धन्यैः स्वैर्नेत्रमण्डलैः ॥ वीक्ष्यैव हाटके शार्व्यं सर्वांगोत्फुल्ल ॥४४॥
कंटकः ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकैकास्येन नाम्नैकं विल्वैः संपूज्य दुह्यचरम्॥ नाम्नां सहस्रैरीशानं विश्वेशं करुणाकरम्॥११॥ संस्तौति विवशो नित्यं पन्नगः सन्लिंगोत्तमः॥ स चस्तुः स्रवसां राजा सहस्रपरिवत्सरम्॥१२॥ वायुहारः सदा शेषो अशेषवदनैः स्तुवन्॥ भक्त्यै वेदैर्वेदवेशं ससमीरणपारणः॥१३॥ समाकर्णय विप्रेन्द्र तत्स्तुतिं सावधानतः॥ ॥शेष उवाच॥ ॥सुरवरतटिनी जटोत्तमांगे स्फुरदुडुपद्रविशं वरांकचूडम्॥ अकपट वचनां तमृग्य पादं करटित्वक् पट हाटक धूर्जटिं भजामि॥१४॥ वरहाटकयुक्तगोष्ठी नटमाशास्यमुमासहायम्॥ निलिटानल दग्ध काम कालं चटुले हरहाटक धूर्जटिं भजे॥१५॥ पटुबटुमुनिभिः निषेव्यमाणं वटतटके कृतोटजं महेशम्॥ अघटनघटना परीयमाया तमसः पारन हाटके समीक्षे॥१६॥ तटिन्निभजटाकुटि विधृत सोमसोम प्रभा विभासित जगत्त्रयं स्फुरत्कृपीटने त्रोज्वलम्॥ वटस्थ मगजापतिं करटि कृत्ति भूष्यत्कटिं सुचोटक कृतागमं सरभसं भजे धूर्जटिम्॥१७॥ आसत्यलोकानधिमौलिमेतत्पातालमूलं वरशांग लिंगम्॥ श्री हाटकेशं भजवेदमौलिं जालैकवेद्यं भुजगांगभूषम्॥१८॥ ॥सूत उवाच॥ ॥एवं शेषस्तवं कृत्वा तल्लिंगोत्तुंगमौलिनः॥ निर्गत्यार्कसहस्राभो उमयामीक्ष्यतं हरः॥ काकोदर महाहारो हरः सर्वामरेश्वरः॥१९॥ ललाटपटलोद्भासित्रिपुण्ड्र कुटिलालकः॥२०॥ स्फटिकाचल संकाशः कुटिलान्तर दुःखदः॥ चटुलाननकं जाक्षः करटित्वक्पटो हरः॥२१॥ महानटोऽतथ विकटोद्यट्टहास

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह॰ गिरावदत्॥ ॥हर उवाच॥ ॥तवस्तुत्यानयाशेषसविशेषप्रायास्तुत॥ अशेषभूमिधरणे सामर्थ्यं ते ददाम्यहम्॥ भीमा अ॰
८ विश्वंभरा धरोसित्वं सदा विश्वाधिकाचिनात्॥ शांभवोस्युरगश्रेष्ठ न ते भारो भवेद्ध्रुवः॥२३॥ इति शंभोर्वचः श्रुत्वा फणिराजः अ॰२८
॥४५॥ प्रणम्यतम्॥ उवाच विनयोदारं काकोदरधरं हरम्॥२४॥ ॥शेष उवाच॥ ॥कांसे ऽक्ष्णं तव विभो पदभक्तिभावं काको
दरेश्च न दुरोदर वत्सुरादीन्॥ नष्टान् त्रिविष्टपगतानपि भक्तिनिष्ठो नष्टेऽधुना तव पदं शिपिविष्ट मिष्टम्॥२५॥ अस्माभिरत्नद
मलंधशिधाम चूडमीड्यं चवेदशिरवैर्हरहाटकारव्यंम्॥ लिंगं सुमंगलदमंगलयासमेतमाजो व्यमेतदमलं पशुपाशमुक्त्यै॥
किं वात्नोकनुलोके निगमशिखिशिखा भारकारागृहेऽधन्मारापारशरातुराः सुरवरा भाराभुवः केवलम्॥ वीरोदारकुमारस्वाचि चतु
राः संसारवार्तारसाः स्वाराज्यं शिवपादपंकजवरं नाराधयन्ति क्षणम्॥२७॥ इत्युक्त्वा गिरिजामनोहरवचः श्रुत्वादिशेषो हरं न
त्वाह श्रुतिवीक्षणोऽथ भगवन् चाज्ञां करिष्ये तव॥ को भारो मम ते पदाब्जयुगलं चित्तेन संबिभ्रतः शंभो सर्षपवद्वहामि शिरसा कां
क्षेऽद्य भक्तिं तव॥२८॥ नागा नागाजिनांग नग शिखरमहाचारुचापांघ्रिरेणुं मूर्धन्याधाय धन्या मदमुदितधियः तस्थुरिच्छाविं
हाराः॥ हाराः काकोदरास्ते हरपदवरहृद्ध्यानधाम्नानुसारा वीरोदारकुमारदारसहिताः शंभोप्रसादादराः॥२९॥ ॥श्रीस्कंद
ले उवाच॥ ॥एवं बलं विश्रायेशवरस्य दत्वा बालद्विजाननकरो बलयेन शंभुः॥ बलप्रमथनार्चितो वलिसुतार्च्यलिंगालये ॥४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ययौ द्रुतमुमाधवो वरभुजंगहारोज्वलः ॥ ३० ॥ ॥ इति श्री शिवरहस्ये भीमाख्येऽष्टमांशे शेषस्य शिवप्रसादो नामाष्टविंशोऽध्या
यः ॥ २८ ॥ ॥ श्री काशी विश्वेश्वरार्पणमस्तु ॥ ॥ श्री भीमाय नमः ॥ ॥ श्री स्कंद उवाच ॥ ॥ पातालमूले देवे
शं पूजयन्ति विलेशयाः ॥ भस्मरुद्राक्षसंपन्नाः शिवध्यानहताशुभाः ॥ १ ॥ गूढपादा मृडध्यानाद् दृढभक्तिरताः सदा ॥ वासुकि
प्रमुखाः सर्वे तक्षकाद्याश्च भोगिनः ॥ २ ॥ तक्षकेशं तक्षकोऽपि संपूज्यांबुजबिल्वजैः ॥ गंधधूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ॥
नीराजनाद्यैर्नाट्यैश्च नागकन्याकृतैस्तदा ॥ संपूज्य स्तौति हृष्टात्मा तक्षकेशं स तक्षकः ॥ ४ ॥ ॥ तक्षक उवाच ॥ ॥ शं
भो विरञ्चिवरमौलिकपालपाणे चंचत्सुधांशुमुकुटोज्वलितोत्तमांग ॥ मामोचयाशु दुरितात्परिवंचकेश देवस्त्वमेव भ
गवांश्च कुलं च नाथ ॥ ५ ॥ मृडं दृढतरं हृदा सदयमिन्दुचूडं सदा भजामि भसितोज्वलं हृदयपद्मसद्मान्तरे ॥ भुजंगवरकंकणं
६६० क्वणन्निस्वनांघ्रिप्रभाविसिनरत्नानन्तजगदुदारसत्ताण्डवम् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ वीक्ष्याशिक्षितमन्मथं सुरगणा
ध्यक्षं महोक्षप्रियं पक्षीन्द्रप्रियवाहवीक्षणलसत्पादांबुजं शंकरम् ॥ भस्मीभूतविषं सुदक्षमथनं भिक्षुप्रियं तं सदा चक्षुश्श्रोत्रवराश्च
तक्षकमुखाः संपूजयन्तीश्वरम् ॥ ७ ॥ अनन्तेशमनन्तोऽपि बिल्वैः संपूज्य भक्तितः ॥ गन्धपुष्पैश्च विविधैर्नैवेद्यैरपि शंकरम् ॥
धूपदीपादिनानाद्यैः स्वफणाफणिभूषणैः ॥ लिंगमालिंग्य भोगेन भोगिवर्यो स्तुवद्भृशम् ॥ ९ ॥ ॥ अनन्त उवाच ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 भस्मांगरागधृतबालकुरंगसंगफालस्फुलिंगहरनेत्रपतंगलिंग॥ गंगातरंगमहदिन्दुकृतोत्तमांगमातंगकृत्तिभुजगांगदहा भीमा० अ०

 रपाहि॥१०॥ पायानंगमतंगभंगसुमहालिंगस्थ शंभो सदा शांगांगस्य महोत्सवसंगभरिता नन्दांगगंगाधरः॥ मां पाह्यघहांध अ० २९॥

कस्मरहरामेय प्रभो शंकर विश्वाधीश्वर चन्द्रशेखर विभो कारुण्य दृक् संगतः॥११॥ कंबलाश्वतरेशानं कंबला श्वतरौ सदा॥ सदा

पूजयतः शंभुं बिल्वमन्दार पंकजैः॥१२॥ तुष्टुवतेहि भुजगौ तल्लिंगं भक्तिभावतः॥ ॥ कंबलाश्वतरा ऊचतुः॥ ॥ भवगद

शमनाद्य वेद्य वेदप्रतिपाद्येश्वर विद्यया भिवेद्य॥ त्वंपर्ण शय्यसहमानमहेश्वराद्य आलाद्यसर्व तनुगोऽपि अभेद्यशंभो॥१३॥

तं कंबला श्वतरगीतसुसाम सीम श्रीवामदेव वरसामर थंतरेड्यम्॥ श्रीव्योमकेशमुमया परिपूज्य बिल्वैः स्तोतुष्टुवाते भुजगौम

हेश्वरम्॥१४॥ एलापत्रेश्वरं लिंगं एलापत्रो रगेश्वरः॥ संपूज्य बिल्वैः स्वफणामणिमालोपहारकैः॥१५॥ स्तौति देवं

सदा भक्त्या फणाभृल्लिंगमैश्वरम्॥ ॥ एलापत्र उवाच॥ ॥ वंदे कुरंगकरसंगभवोरुभंगं भस्मांगरागितमनंगमतंगभंगम्॥

गंगातरंगविलसज्जटिलोत्तमांगं श्रीलिंगमेतदनुजाहृदयानांगम्॥१६॥ एलापत्रस्त्रिनेत्रं स्वकफणिविलसद् धन्यगात्रोरु

वेष्टैः॥ तल्लिंगाकण्ठलग्नो विधृतनवफणारत्नसंछादितश्रीः॥ बिल्वैश्चन्दनलेपसुन्दरमहा कामेश्वशीतैः शिवं संतोष्यानु

दिनं वसत्युरगपः पुण्ये प्रदोषेऽपि च॥१७॥ कर्कोटकेश्वरं भक्त्या नागः कर्कोटकोऽर्चयन्॥ विल्वमन्दारपुन्नागचंपकाशोक ॥४६॥

पंकजैः॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धूपदीपोपहाराद्यैः स्तौति शर्वं महेश्वरम् ॥ ॥ कर्कोटक उवाच ॥ ॥ श्री नीलकण्ठ सित भस्म वरा
वकुण्ठ वैकुण्ठ नेत्रार्चित पादपद्म ॥ उत्कण्ठभातुकहृदापीरचिन्तनीय पादांबुजे परिलुठामि च सन्न कण्ठः ॥१९॥ धृतराष्ट्रे
श्वरं भक्त्या धृतराष्ट्रो भुजंगमः ॥ बिल्वांबुज मन्दार पुष्पैरभ्यर्च्य शंकरम् ॥२०॥ नैवेद्यैर्धूपदीपैश्च नित्यमभ्यर्च्य
शंकरम् ॥ स्तौति प्रांजलिरीशानं स्वफणामवनामयन् ॥२१॥ ॥ धृतराष्ट्र उवाच ॥ ॥ हर हर गरकण्ठ पार्वती शत्रि
दशामेय गुणाकर प्रसीद ॥ हरहर शितिकण्ठ सोमसोमो ज्वलितो त्तंस मौन्द्र चित्तहंस ॥२२॥ गुलिकोऽपि सदा लिंगमर्चयन् गु
लिकेश्वरम् ॥ बिल्वैः फणामणिव्रातैः धूपदीप निवेदनैः ॥२३॥ अभ्यर्च्य स्तौति हृष्टात्मा सुलिंगं सर्पपुंगवैः ॥ ॥ गुलिक
६८, उवाच ॥ ॥ स शंखचूडः शशिचूडमीशमीड्यं सदा वेद वचोभिरेवम् ॥ भस्मांगरागं कपि सन्निकर्षाद्विकर्षयत्येव ततो
घकारम् ॥२४॥ देवदेव परमेश्वर शंभो विश्वनाथ मम नाथ सनाथम् ॥ मा कुरुष्व दयया घनया त्वं मन्मथान्तक विभो शशि
शिचूड ॥२५॥ शंखचूडेश्वरं लिंगं शंखचूडोऽर्चयन् सुमैः ॥ बिल्वांबुजैः सदा भक्त्या भुजंगो भस्म भूषणः ॥२६॥ नैवेद्यै
र्धूपदीपैश्च नृत्यन् संस्तौति भक्तितः ॥ ॥ शंखचूड उवाच ॥ ॥ शंभो कन्दर्प दर्प ज्वर हर पुरहन् पाहि मामी
श दुःखात् दुर्वाराखर्व गर्वं जनि मृति विवशं रोग पापादि युक्तम् ॥ २७ ॥ कल्पानल्प जलोद्भवोद्भव महासृष्टे लुठन्तं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 सदातन्मौलिस्रगलंकृतांगक महालिंगोत्तमांगप्रभो ॥ पिचण्डेश्वरारव्यं च वरिवस्याभिरस्तदा ॥ स्तौति देवं समभ्यर्च्य नागो 
 ह्यानन्दतुन्दिलः ॥ २८ ॥ ॥ पिचंडल उवाच ॥ ॥ भक्ताजस्रगलंकृतांगक महाभूषाहिभूषो ज्वलन्नेत्रोन्मेषनिमे अ. २९
षशोषित जगत्सोषेन्दुचूडोज्वल ॥ पाहि शाविदशोत्तमोत्तम सदा सामैक सीमास्तुत कामांगप्रहराव कामद सदा मां वामदेवप्र
भो ॥ २९ ॥ वारुणो ह्युरगेन्द्रो सौ वारणत्वग्वसार्चकः ॥ निवारणकरं देवं पापानां कारणं परम् ॥ ३० ॥ वारणेशं सदाभ्यर्च्य बिल्वाप
चिति कल्पनैः ॥ मदवारणवक्त्राद्य पुत्रं संस्तौति भक्तितः ॥ ३१ ॥ ॥ वारण उवाच ॥ ॥ पाहीन्दुद्युति जूट देव तटिनी गर्वा
दिनिर्वापण ॥ त्वं कल्याणनगात्तसत्करधनो जेता जगत्कारण ॥ ३२ ॥ भस्मादीनसुभूषणोत्तम सदा कामांग संहारण सर्व प्राणहरा
न्तक प्रहरण मेयांघ्रि पद्मारुण ॥ कुतीशं कुतिकोनागः संपूज्य प्रमथाधिपम् ॥ ३३ ॥ बिल्वमन्दारकंजादि माला जालोत्पलैरपि ॥
स्तौति प्रसन्नहृदयः फणिराट् फणिभूषणम् ॥ ३४ ॥ ॥ कुतिक उवाच ॥ रामासंहतनार्धकाय विलसत्सोमोज्वलन्मूर्धक
धूमोद्दामशिरः कपर्दसुमहाद्धूमांकनेत्रज्वल ॥ भूमानन्द घनप्रमोद भगवन् त्वं व्योमकेश श्रुते सीमासंस्तुत पादपद्म म
महत्कामप्रदाव प्रभो ॥ ३५ ॥ सर्पेशं वरसर्पेशः संपूज्य श्री फलन्छदैः ॥ निवेदनै धूपदीपैः संस्तौति परमादृतः ॥ ३६ ॥ ॥
सर्प उवाच ॥ ॥ शिष्टार्चितं सकल कष्टहरं प्रकृष्टमोक्षप्रदं विलसदाशिषि विष्टलिंगम् ॥ अष्टाकृतिं च भजतां नहि दुष्ट 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावोनष्टाशुभा भुवि भवन्ति तदेव सर्पाः ॥३७॥ वामेशं तत्रलिंगं वामनो भुजगोत्तमः ॥ बिल्वांबुजैः समभ्यर्च्य संस्तौ

ति परमेश्वरम् ॥३८॥ ॥ वामन उवाच ॥ ॥ उच्चैर्घोषादिशेष क्षितिधर वर धृक् पोषिताशेषलोक सृष्टि

स्थित्यन्तकार्येष्वतितरमनिशं जागरूक प्रभो मां ॥ वेदावेत्तपदांभोज प्रभा भावतो वेषाकारमिदं सदा त्रिभुवनं मन्ये

किमन्येनमे ॥३९॥ खर्वटेशं कर्कोटाख्यो नागोऽभ्यर्च्य सदंबुजैः ॥ बिल्वपत्रैः सदेशानं सदा विलशयो त्तमः ॥४०॥ स्तौति विदान्तवाग्

गुंभैरंभोजैः पूज्य शंकरम् ॥ ॥ खर्वट उवाच ॥ ॥ त्वद्भाषाभीषितास्ते सुरवरनिकराश्चन्द्रसूर्यानलेन्द्राः त्वद्भा

साभासतेदं जगदिदमखिलं लोकजाले महेश ॥ विष्णुब्रह्ममरुद्गणादि जनकः सोमोऽसि सर्वांतराकस्त्वां स्तौति महेश

६६ सर्वतनुभाक् त्वं निर्गुणोस्यव्ययः ॥ ४१॥ वासुकि र्वासुकीशानं बिल्वैरभ्यर्च्य शंकरम् ॥ संस्तौति हृष्टो नियतं कुण्डलीशो

२ महेश्वरम् ॥४२॥ ॥ वासुकिरुवाच ॥ ॥ क्षायद्धीर काकोदरा पारहार स्फुरत्स्फार कर्पूर गौराव हीरप्रभाकारता

रेन्द्र सन्मौलि गंगारयोल्लासिलीलातृकाजालमालाद्भुताभोतमांगाब्जेन आर्चितांघ्रिद्वयानंग भंग पतंग स्फुलिंगात्तफा

लप्रभाजाल निर्मूलिताल्लोलपाशात्तकाल त्रिलोकाकुलाकार मार व्यथासार संहार उद्धृत्त हृत्त्रे पुराकार गंगाध्वरा

मेघमातंग चर्मांबरा नीलदलाकार कण्ठस्फुरत्सान्द्र गौरीकुचाश्लेष गाढ प्रभावांग संजात सत्कण्ठकांक प्रभो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०८ पाहिमाम्॥४३॥एवं संस्तुत्य ते सर्पाः कंर्दर्पहरमीश्वरम्॥पाताले दिव्यलिंगेषु हाटकेशादिषु द्विज॥४४॥वदन्ति ते भीमा॰अ॰

॥४८॥ यतं त्वेवं भुजंगाः शांभवोत्तमाः॥ ॥ सर्पा ऊचुः॥ ॥ अस्माकं कुलदेवतं शशिकलाजूटानुकूलो ऽद्यत अ॰२९

स्फाराकारभुजंगहारवलयालंकारलिंगोत्तमम्॥चोटीभूतमहागमांतशिखरं जूटीकृताहीश्वरं पाटीरद्रवसारचन्दनलस

सत्कोटीरमीशेमहि॥४५॥ ॥स्कन्द उवाच॥ ॥एवं सर्पेश्वरास्ते स्वफणमणिगणैरिन्दुचूडैकलिंगं बिल्वैर्मन्दारपु

ष्पैः हरिहरविधिभिः पूजितं शंकरांघ्रिम्॥स्वैर्भोगैश्च भुजंगमेश्वरमहालिंगोत्तमांगो ज्वलत्सोमोत्तंससरिद्वरोद्भवमहाशीता

दिवाताशनाः॥४६॥सर्पाः पर्वतनन्दिनीसहचरं संपूज्य बिल्वच्छदैरच्छैः स्वैर्मणिभिर्विदीपिततमःस्तोमं महेशालयम्॥कु

र्वन्ति प्रसभं प्रदोषसमये श्रीहाटकेशार्चकाः तेनैव स्वकदेहजत्वचमिषात्पापादिनिर्मुच्यते॥तिष्ठन्तीश्वरगात्रभूषणवराः

सौख्येन पातालगाः॥४७॥लीलाकारकृतानतेषु गदजापीडा न मृत्युद्भवा नो जन्मादिभयं जरादिकमहो कद्रुद्भसंसेचनात्॥एके

नाक्षियुगेन दिव्यगिरिशालंकारलिंगोत्तमं वीक्षन्तो श्रुतिसारशंकरकथां शृण्वन्ति ते कद्रुजाः॥पाताले निगमोपमेऽपि दितिजाः

श्रीकालकालार्चका व्यालेन्द्रागरलाशिशंकरमहालिंगार्चकाः शांकराः॥फालाद्यंगलसत्त्रिपुंड्रसुमहारुद्राक्षमालाध

राधीरोदारकुमारदारसहिताः काकोदराः शांकराः॥४९॥पाताले भुजगेश्वरप्रभृतयः शेषाद्यशेषाः शिवं लिंगेषु प्रथितेषु हाट ॥४८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कमहालिंगंसकार्कोटकाः ॥त्रुट्यत्पातकसंततिःस्वकफणामाणिक्यपूजादिभिः बिल्वानां प्रकरैःसरंबुजवरैःपुण्यै
श्चदीपादिभिः॥ ५०॥ कर्पूरागरुसंभवैसमुरसामोदैश्च नित्यंशिवंसंपूज्यैव वसन्तिगूढपदका:दार्ढ्येनशंभोःपदम्॥
ध्यायन्त्येवसदानुरक्तहृदयाःसर्पाविरक्ताःसदात्लिंगंतद्वरहाटकेशमुमया पश्यन्ति चक्षुश्रवाः॥५१॥ ॥इति श्री शि
वरहस्ये भीमाख्येऽष्टमांशेसर्वनागकृत पातालिलिंगपूजा नाम एकोन त्रिन्शोऽध्यायः॥२९॥ ॥श्रीकाशीवि
श्वेश्वरार्पणमस्तु॥ ॥श्री भीमायनमः॥ ॥श्री स्कन्द उवाच॥ ॥दिग्गजा अर्पिते चाष्टौ अष्टमूर्त्तिं कृपाकरम्॥
स्वनाम्नास्थाप्य लिंगानि स्वपुष्कर जलांबुजैः॥१॥स्नात्वा पातालगंगायां स्वशुण्डावलयोद्धृतैः॥स्वर्णकुंभो धृतांभोभिःधृत
663 गण्डत्रिपुंण्ड्रकाः॥२॥ धृतरुद्राक्ष कवचाः कक्ष्यारूपेणते गजाः ॥पूजयन्ति च लिंगानि स्वस्यां दिशि गजोत्तमाः॥३॥
गजचर्मांबरधरं तानि वक्ष्याम्यनुक्रमात्॥ ऐरावतःपुण्डरीको वामनःकुमुदोंजनः॥४॥पुष्पदन्तःसार्वभौमःसुप्रतीकोऽथदि
ग्गजाः॥पूर्वतैरावतो भाति श्वेताद्रिरिव जंगमः॥५॥ चतुर्दन्तोमहाकायःवीरणकलभावृतः॥मदधाराकपोल्लासिभ्रमत्भृंगशता
वृतः॥मणिधामगतं कृत्वा लिंगमैरावतेश्वरम्॥संपूज्यबिल्वमन्दारैःधूपदीपनिवेदनैः॥७॥स्तौति चोद्धृत्यशुण्डाग्रंमुण्ड
0 मालाधरं हरम्॥ ॥ऐरावत उवाच॥शान्तंशंकरमंतकान्तकमुमाकान्तं भजाम्यन्तिकं स्वातानन्तमनन्तकोद्भवभयंविंवो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवरह०॰ पलस्यं मम ॥ विश्वाधीश्वरत्वशाश्वतं घकहरा पार न्ययां संहार घोरापार भवोरुसागरगदा पारादिदु:खं हर:॥ ८ ॥ एवं संस्तो भीमा अ
॰ तिहृष्टात्मा सदेवाभ्रमुवल्लभ: ॥ पुण्डरीकस्तथाग्नेय्यां किंजल्कसदृशच्छविः ॥ ९ ॥ उर्णयाथ करिण्यावै कलभैरपि संवृ अ० ३०
॥४९॥ तः ॥ चतुर्दन्तोमहाकाय: मदप्रस्रवणान्धिकः ॥ १० ॥ पुण्डरीकेश्वरारव्यं तदाग्नेय्यां मणिधामगम् ॥ प्रतिष्ठाप्य महालिंगमि
भेन्द्रो भीममीश्वरम् ॥ ११ ॥ पुण्डरीकेश्च बिल्वैश्च स्वशुण्डावलयोद्धृतैः ॥ समर्चयित्वा संस्तौति बृंहितैर्घोषयन्मुदा ॥ १२ ॥ ॥
पुण्डरीक उवाच ॥ ॥ पाहित्रिनेत्रसुचरित्रपवित्रपात्रं पाह्यब्जमित्रनयनामलभूतिगात्र ॥ मामीशशंखधवलेन्दुक
लालनलाम पाहीशमामधिकयासकलेषु मित्र ॥ १३ ॥ एवं संस्तौति चभुवं धारयन्स महागजः ॥ वामनो दक्षिणे तिष्ठन्नुद्यत्कुंभो
महेश्वरम् ॥ १४ ॥ कर्णाग्रचामरोल्लास मदगंधान्धदिक्तटः ॥ वर्णेन कर्बुरो विप्र मृग्यासकलभैर्वृतः ॥ १५ ॥ वामनेशाभिधं
लिंगं मणिधामगतं तदा ॥ कृत्वा बिल्वांबुजैः पूज्य नारराः पापवारणम् ॥ १६ ॥ शुण्डामावृत्य दन्ताग्रे स्तौति देवं सदिग्गजः ॥ ॥
० वामन उवाच ॥ ॥ पाहींदिरारमणकारणतारणेक्ष्य चक्षुश्च भाभरणहारणकालकर्ण ॥ मारांगसंहारणपापनिवारणेशं
० पाहीन्दुभूषण महेशगणाग्रगण्य ॥ १७ ॥ एवं संस्तौति नियतं दिशः स्तंबेरमो हरम् ॥ नैरृत्यां कुमुदो धीशं कुमुदोत्पलभासु
रः ॥ १८ ॥ वर्णया कलभैर्युक्तो कुमुदेशं महेश्वरम् ॥ मणिधामगतं कृत्वा पूज्य बिल्वोत्पलैर्गजः ॥ १९ ॥ बिबृत्यनयेने ॥४९॥

कर्णौ भक्त्या स्तौति महेश्वरम् ॥ ॥ कुमुद उवाच ॥ हे देवदेव जगदीश्वर पंचवक्त्र विश्वंभराधरण भूषण भीषणे
०० श ॥ गौरीमनोरमण सर्व शरण्य शंभो आर्तार्य तारण विभो चरणं नतोऽस्मि ॥ २० ॥ अंजनः पश्चिमे भाति पद्मोऽशोक पद्मसन्नि
भः ॥ वारणा कलभैर्युक्तो चतुर्दन्तो मदस्रवः ॥ २१ ॥ अंजनेशाभिधं लिंगं मणिधामगतं गजः ॥ पद्मैर्बिल्वोत्पलैर्भक्
त्या मन्दारार्जुनचंपकैः ॥ २२ ॥ निवेद्य फलमूलादि अंजनस्तौति शंकरम् ॥ ॥ अंजन उवाच ॥ ॥ सरसीरुहनाभने
० त्रवंद्यं स्फुरशंबर वैरिलीलांगम् ॥ भजभजशिवदं शिवाधवं त्वां भवभवम भयाय चेतसा त्वम् ॥ २३ ॥ पुष्पदन्तोऽथ
वायव्यां धारयन्शिरसा भुवम् ॥ अतसी पुष्पसंकाशः पुष्पिण्या कलभैर्युतः ॥ २४ ॥ पुष्पदन्तेश्वरं लिंगं मणिधाम
६६१ गतं तदा ॥ बिल्वमन्दार पुन्नाग चंपकैरर्च्यदन्तिराट् ॥ २५ ॥ संस्तौति नियतं भक्त्या कुंभसंस्पृष्ट भूतलः ॥ ॥ ॥
॥ पुष्पदन्त उवाच ॥ ॥ कुरु कुरूणां शशि द्युतोऽद्य प्रथितानं गमतंगभंगमीशम् ॥ सुपतंगदृगंगतुंगगंगासुतरंगौघजटं
भजामि शंगम् ॥ २६ ॥ एवं संस्तौति नियतं द्विरदः सुरसत्तमम् ॥ सार्वभौमो गजेन्द्रोऽसौ पाटलीपटलारुणः ॥ २७ ॥ पाट
ल्या कलभैर्युक्तः सार्वभौमेश्वराभिधम् ॥ मणिधामगतं लिंगं बिल्वाब्जैः सर्वदार्चयन् ॥ २८ ॥ संस्तौति शुण्डामु
द्धृत्य वेतण्ड हरमीश्वरम् ॥ उत्तरे धारयन्पृथ्वीं कर्णतालैर्मदोद्धतैः ॥ २९ ॥ ॥ सार्वभौम उवाच ॥ ॥ शंगं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 संग हरं महेशमनघं मातंगचर्माम्बरं गंगातुंगतरंगरंगितजटाभारं भुजंगांगदम्॥ मधुमथनाक्षपादांबुजं महेशं भज शंभुस 
 कलाद्यं विश्वनाथं प्रमथानां शिवमेकमनाथमीशम्॥ ३०॥ सुप्रतीकस्तथैशान्यां सुप्रतीकेश्वराभिधम्॥ लिंगमणी 
न्द्रसंकाशं दिव्यधामगतं गजः॥ ३१॥ प्रतीक्ष्याकलभैर्युक्तो गौरवर्णो महाबलः॥ संपूज्य बिल्वकमलैस्तथा नीलोत्प
लैरपि॥ ३२॥ निवेद्य फलमूलादि दन्ताबलवरो हरम्॥ संस्तौति भरितानन्दो मदधाराकटस्रवाः॥ ३३॥ ॥सुप्रती
क उवाच॥ ॥श्रीकालकालजितसर्वदितिप्रसूतपातालमूलपदखेलनविश्वलोल॥ पाद्यब्जजाच्युतशची
धवपूजितांघ्रे गौरीमनोहरनिलासनिधानशील॥ ३४॥ एवं दिग्गजवर्यपूजितमहालिंगानि तुंगानि ते प्रोक्तान्युत्तमभो
गिलोकतिलकालंकारसद्घाटकम्॥ लिंगं शांगमुमापतेः प्रियतमं संपूजितं वा स्मृतं चित्तचिन्तितकामदं किल महापापौघसंघे
कमित्॥ ३५॥ ॥सूत उवाच॥ नित्याच्छिन्नमहानिनेन्नचरणां भोजप्रभाभावतः चित्रं चापि जगत्पवित्रितमिदं भात्यं
तरंगे मम॥ किं सत्रावभृथाप्लवैः नगवादानैर्महीदानतः तुंगाश्वैर्भवरान्न राशिसुमहादानैः व्रतैश्चापि किम्॥ ३६॥ यो
वा को वापि शंभुं भजति भुवि नरः किंनरो वासुरो वा मा वा पारदारभिचातरक्तो भूमाररूपापरे॥ धन्यो मान्यो हि मन्युप्र
भृतिगुणगणश्रेष्ठतामाप्नुयात्स विद्योतद्युतिरिन्दुकुन्दधवलप्रेमास्य संगो भवेत्॥ ३७॥ वरं रासभो वा वरं सूकरो वा वरं जार 

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चण्डालकन्यासमेतः ॥ वरं पामरो वा नरो वा सुरो वा ह्यपार लिंगार्चना वर्जितो न ॥ ३८ ॥ उद्भिज्जानि च जा॰ जरायुजानि च
महाभूतानि चाण्डोद्भवान्याहृत्तान्य सकृन्महेश्वर महाधाम्न्येव तानि द्रुतं ॥ संस्थान्यप्रतिमप्रभाव विहिते वेदान्तवेद्ये हरे हा
एव विलीयन प्रतिभवं यान्त्येव शर्वाश्रयाः ॥ ३९ ॥ उत्क्रान्ति क्रान्तदेहाक्रम भ्रमण महाघोर संसार चक्रे नक्रप्राये
रुदाराधनसुतवदन भ्रान्तिसंभ्रान्तदेहाः ॥ इह मोहेर्ष्याया पेद्रुतेगति भूतिभि नीश जन्माद्यवस्थाः संस्थातुमन्वेतेषे
भ्रमकुदरस्री पूर्तये निश्रमूढाः ॥ ४० ॥ ॥ स्कन्द उवाच ॥ ॥ एवं दिग्गजमौलिधारितमहीमीशार्चनायो
द्यताः शुण्डादण्डविमर्दिताण्डकटभित् घोरोरुसंबृंहितैः ॥ उच्चैर्घोषपरायणाः गजवराः दन्तित्वमाशां वरं सं पूज्यप्र
मथाधिनाथमगजाकान्तं गजास्तेसदा ॥ ४१ ॥ भीमांशः कथितोऽष्टमोऽष्टतनुकः श्रीपादपद्मार्चकैः श्रोतव्यः स
665 कलाघशैलभिदुरोमारारिभक्तिप्रदः ॥ श्रीदेव्यै कथितो महेशवदनात्तत्तुभ्यमुक्तो मया किं भूयः परिपृच्छसे तव मुदा
तद्वच्मि शैवाग्रणे ॥ ४२ ॥ ॥ इति श्री शिवरहस्ये भीमाख्येऽष्टमांशे त्रिंशोऽध्यायः ॥ ३० ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥
श्रीभीमाय नमः ॥ श्रीकालभैरवाय नमः ॥ श्री ॥ ॥ ॥ इति श्री शिवरहस्याष्टमां
-शः समाप्तः ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥इति श्री शिव रहस्याष्टमांश समाप्त:॥श्री:॥ छ॥ ॥

666

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri